दशमस्कन्धपूर्वार्द्धे श्री १०८ श्रीराधारमणो जयति । तृतीयखण्डः

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीत

श्रीमद्भागवतम् ।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी, श्रीमज्जीव-गोस्वामिकृतवैष्णवतोषिणी, श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापनाचार्यवर्यश्रीसुदर्शनसूरिकृतशुक-पक्षीयसमाख्याटीका, तदनुगामिश्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमन्माध्व-सिद्धान्तधुरन्धरश्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीगौडीयवैष्णवाचार्य्यप्रवर-श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भाख्य टीका, श्रीमद्विष्णुस्वामिसिद्धान्तनिर्वाहकाचार्यप्रवरश्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, केनचित्कृतविशुद्धरसदीपिका, श्रीरामनारायणकृतभावभावविभाविका, श्रीधनपतिसूरिकृतगूढार्थदीपिका, श्रीनिम्बार्कसम्प्रदायि-श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इति चतुर्दशभि र्व्याख्याभिर्भाषानुवादेन च समलङ्कृता

तदिदं

परमहंसपरिव्राजकाचार्य्यपूज्यपादश्रीमत्स्वामिप्रकाशानन्दसरस्वतीप्रवरशिष्येण,

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्

वङ्गदेशान्तर्गत ताडास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षिराय-

"श्रीवनमालिराय बहादुरस्य"

सम्पूर्णसाहाय्येन

प्रकाशितञ्च ।

तच्च

श्रीवृन्दावन श्रीरङ्गमन्दिरस्थ पं० भागवताचार्य द्वारा

पं० लक्ष्मणाचार्यद्वारा च संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रापितम् ।

सम्वत् १९६४

श्रीरासपञ्चाध्यायी ।

श्रीमद्भागवते दशमस्कन्धे ।

एकोनत्रिंशोऽध्यायः ।

ॐ नमो भगवते वासुदेवाय ।

श्रीशुक उवाच ।

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनत्रिंशे तु रासार्थमुक्तिप्रत्युक्तयो हरेः ।
गोपीभीरासंरम्भे तस्य चान्तर्द्धिकौतुकम् ॥
ब्रह्मादिजयसंरूढदर्पकन्दर्पदर्पहा ।
जयति श्रीपतिर्गोपीरासमण्डलमण्डनः ॥

ु, विपरीतमिदम् परदारविनोदेन कन्दर्पविजेतृत्वप्रतीतिः ाम् योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् "साक्षान्मन्मथ-न्मथः' आत्मन्यवरुद्धसौरतः' इत्यादिषु स्वातन्त्र्याभिधानात् स्माद्रासक्रीडाविडम्बनं कामविजयख्यापनायेत्येव तत्त्वम् । किञ्च, ृङ्गारकथापदेशेन विशेषतो निवृत्तिपरेयं पञ्चाध्यायीति व्यक्ती-करिष्यामः ता रात्रीः "यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति प्रतिश्रुता इत्यर्थः ॥ १ ॥

श्रीमत्सनातनजीवगोस्वामिकृतबृहत्तोषिणी ।

नमः कृष्णाय रासरसिकाय ।

श्रीशुकबादरायणिरुवाचेति । बदरिकाश्रमे महातपश्चरणाद्भगवान् श्रीव्यासो बादरायणः तस्य तपःफलरूपः पुत्र इति सर्वज्ञश्रीभगवत्प्रेमरसमयत्वादिकं ध्वनितं तेनोक्तत्वादस्याख्यानस्य सर्वथा यथा साधनसाध्यत्वं प्रौढानु रागमयत्वं चाभिप्रेतं ततो भक्त्यैतच्छ्रोतव्यमिति भावः इदानीं श्रीव्रजसुन्दरीणां मनोरथपरिपूरणद्वारा प्रेमरसविस्तारणरूपं तदवतारमुख्यतरप्रयोजनं दर्शयन् ताभिः सह विहरणमेव तस्य सर्वातिशायिसुखमिति च प्रकटयन् तत्र चाधरामृतपानादिना सुदृशामेव श्रीभगवद्रूपादिमाधुरीविशेषानुभवात् प्रेमविशेषविस्तारसुसिद्ध्या तद्योग्याभिः सह रासक्रीडां पञ्चप्राणतुल्यपञ्चाध्याय्या वर्णयन् आदौ तत्सामग्रीं दर्शयन् तत्र च श्रीव्रजदेवीवर्गाकर्षणं कथयन् तद्धेतुत्वेन श्रीभगवतो भावविशेषप्राकट्यमाह—भगवानिति।एषा च क्रीडा तदुचितकाले कैशोरे ज्ञेया तथाचोक्तं श्रीविष्णुपुराणे—

"सोऽपि कैशोरकवयो मानयन् मधुसूदनः ॥
रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः" । इति ।

श्रीहरिवंशे च—

"युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित् ॥
कैशोरकं मानयानः सह ताभिर्मुमोद ह" ॥ इति ।

तत्र रासारम्भे तस्य सौन्दर्यादिविशेषस्मारणेन परममोहनत्वात् श्रीबादरायणिना "ततश्च पौगण्डवयः श्रितौ व्रजे" इत्यादिवद्युक्तं वक्तुं न शक्तं क्रीडा सा च समग्रमेव कैशोरं व्याप्येत्यादिकं सर्वमग्रे यथास्थानं विचारणीयम् । तत्रोपलक्षणार्थं कैशोरारम्भे प्रथमैकरात्रक्रीडेयमुच्यते-भगवानिति । रासक्रीडायां निजाशेषभगवत्तासारप्रकटनाभिप्रायेण नन्दादयः परमानन्दनिर्वृता बभूवुः भगवानपि स्वयं परमानन्दनिर्वृतो भवितुं रन्तुं क्रीडाविशेषं कर्त्तुं मनश्चक्रे ऐच्छदिति अपिशब्दार्थः ता रात्रीरिति तैर्व्यञ्जितार्थमेव । यद्वा, ता अनिर्वचनीयाः सर्वकालतः श्रेष्ठतराः परमानन्दरसमयीस्तत्क्रीडायोग्या इत्यर्थः । बहुवचनेन बह्वीषु रात्रिष्वेव सा क्रीडा बोध्यते तदन्ते सविशेषं व्यक्तं भावि शरदा कृत्वा उच्चैः फुल्ला विकसिता मल्लिकाः यासु ताः यद्यपि सर्व-

श्रीमत्सनातनजीवगोस्वामिकृतबृहत्तोषिणी ।

तदाश्रये श्रीवृन्दावने सदा सर्वपुष्पाण्युद्भवन्ति विशेषतश्च शरदि जातीकुमुदकमलादीन्यपि विकसन्ति तथाप्युत्फुल्लमल्लिका इति रात्रिविषयकाविकासविशेषाभिप्रायेण एवमग्रेऽपि कुमुद्वन्त-मिति इत्युद्दीपनानि वीक्ष्य रतियोग्या इति आलोच्य योग-मायापराख्यसच्चिदानन्दशक्तिविशेषः तामुपकरणत्वेन आश्रितः प्रकटितवान् सन् इति सर्वतो लीलातो विशेषेण रासक्रीडायाः परमानन्दविशेषादिस्वरूपत्वमभिप्रेतं सर्वस्या अपि लीलायाः सच्चिदानन्दरूपत्वं प्रागष्टमाध्याये बाल्यलीलायां विवृतमेवा-स्ति । यद्वा, योग ऐश्वर्यं तद्युक्ता माया दया "माया दम्भे कृपायाञ्च" इति विश्वः । तामुपाश्रितः उपाधित्वेन प्राप्तः सन् रासक्रीडया स्वस्यैश्वर्यं कृपां च विस्तारितवानित्यर्थः । यद्वा, अपिशब्दस्यात्रैवान्वयः योग आत्मारामता माया आवरणा-त्मिका कापट्यं वा योगयुक्तां मायाम् उप सामीप्येन नित्यमाश्रि-तोऽपि इति तदानीं योगो माया च नातिष्ठत् किन्तु निज-पदाब्जप्रेमसम्पद्विस्ताररूपसत्यस्वभावो व्यक्तोऽभूदित्यर्थः । यद्वा, योगे संयोगे या माया यद्वत्पत्नीष्विव वञ्चना तामुपाश्रितोऽपि इति तदानीं तस्य सङ्गमे मायानिवृत्तेत्यर्थः । सर्वाभिरेव व्रज-सुन्दरीभिः सह साक्षात्संयोगविशेषसिद्धेः सिद्धिं गताभिरपि तत्प्राप्तेः । यद्वा, युनक्ति नित्यं वक्षसि संयोगं प्राप्नोतीति योगा या मा लक्ष्मीस्तस्यां नित्यं वर्त्तमानः तया सदा सेव्यमानो-ऽपीत्यर्थः । इति रासक्रीडा तया न सम्पद्येत तद्दुर्लभा चेत्याद्य-भिप्रेतम् । यद्वा, योगाय सम्योगाय मायःशब्दो यस्याः सा योगमाया वंशी" माङ् माने शब्दे च" इत्यस्य घाञ्रूपं तामुपाश्रितः । यद्वा, योगस्य सम्भोगस्य मायो मानं पर्याप्तिर्यस्यां सा योगमाया श्रीराधा अथवा योगस्य सम्भोगस्य मा लक्ष्मीः सम्पत्तिरिति यावत् तां याति प्राप्नोतीति योगमाया श्रीराधैव तां मनसा उपाश्रितः रासक्रीडायास्तद्धेतुकत्वात् तत् पाद्मे प्रसिद्धमेव ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नमः श्रीरासरसिकेभ्यः ।

अत्र टीकायां रासारम्भ इति तन्निमित्ते रासारम्भसम्बन्धिनं मानं वीक्ष्येत्यर्थः । कन्दर्पजेतृत्वप्रतीतेरिति कन्दर्पकर्तृकस्यैव जेतृत्वस्य प्रत्ययादित्यर्थः । अथ मूले श्रीबादरायणिरुवाचेति वक्ष्यमाण-महामहिम्नः प्रसङ्गस्यास्य बलात् तदिदं लम्भयति बदरिका-श्रमे महातपश्चरणात् भगवान् श्रीबादरायणः वेदव्यासः तस्य तपः श्रीकृष्णोपासनलक्षणमेव सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायौचित्यात् तस्य तादृशतपःफलरूपः पुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकं तत्राधिकं यद्यपि स्फुरति तथापि तन्नामनिरुक्तेर्माहात्म्यपर्यवसानमत्रैव जातं तत-स्तादृशमस्यैवैतत् श्रोतव्यमिति व्यञ्जितं श्रीशुक उवाचेति पाठे तु परमोज्ज्वलरसस्वाभाव्येन परमकोमलालापता दर्शिता तत स्तादृशोचितसत्तयैव श्रोतव्यमिदमिति व्यञ्जितं तथाहि सर्वाति-शायिप्रेमवतीनां श्रीव्रजसुन्दरीणां मनोरथपरिपूरणमेव प्रियमाश्र-

सुखार्थं सर्वं कुर्वतः श्रीभगवतो मुख्यतरं प्रयोजनमिति दर्श-यन् तदेव तस्य सर्वातिशायिसुखमिति च प्रकटयन् तत्र च "साक्षान्मन्मथमन्मथः" इति "त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्" इति "गोप्यस्तपः किमचरन्" इति दृष्ट्या सर्वात्मारामैरपि दुर्लभानां भगवद्रूपगन्धस्पर्शशब्दानां वैशिष्ट्येनानुभवात् तदीयरसस्याधरा-मृतस्य तु सर्वथैवान्यत्रासम्भवात् प्रेमविशेषविस्तारसुसिद्धया तद्योग्याभिस्ताभिः सह रासक्रीडां पञ्चेन्द्रियतुल्यप्रियैः पञ्चभि-रध्यायैर्वर्णयति—यत्र "पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गैः" इत्यादिना "गोपीनां परमानन्द आसीद्गोविन्ददर्शने" इत्यादिना "इत्थं शरत्स्वच्छजलम्" इत्यादिना "हेमन्ते प्रथमे मासि" इत्यादिना च तासां तस्य च नवरागं विशिष्य स्वेन वर्णितवत्त्वं "शर-दुदाशये साधु जातसत्सरसिज" इत्यादिना "प्रहसितं प्रिय" इत्या-दिना "दिनपरिक्षये" इत्यादिना "रहसि संविदं हृच्छयोदयम्" इत्या-दिना च ताभिः स्वयं वर्णयिष्यमाणां च स्मृत्वाऽतिविशिष्ट-तया वर्णयितव्यत्वेन नवसङ्गमं स्मरन्नाह—भगवानपीति । अपि-शब्देन तासां पूर्वपूर्ववर्णितं नवरागं विस्मारयति—पूर्वेण वाक्येन तु सङ्गमस्यास्य नवत्वमेवावगमयति—एतावन्तं कालं ता अनुरागचपलचित्ततया रन्तुं मनः कुर्वत्य एवासन् भगवांस्तु जातानुरागत्वेऽपि धैर्येण समयविशेषं प्रतीक्षमाणो न चक्रे सम्प्रति ताः कैशोरमध्यप्राप्ताः सर्वसुखप्रदतया सर्वमङ्गलतया प्रकटितवेणुशिक्षादिविशेषतया च विलक्षणाः कुमारीषु च "मयेमा रंस्यथ क्षपाः" इति प्रतिश्रुता रात्रीर्वीक्ष्य तत्रापि राका-रात्रेरागमनारम्भे दीप्तानुरागत्वेन गलितधैर्यतया तच्चक एवेति प्रतिपत्तेः श्लेषेण "आत्मारामाश्च मुनयः" इत्यादिवत् भगवान् सर्वार्थपरिपूर्णोऽपि ता रात्रीर्वीक्ष्य उद्दीपनत्वेनानुभूयेति कैमु-त्येनालम्बनरूपाणां तासां प्रेममहिमा दर्शितः तत एव व्यक्त-सर्वार्थं तस्य कैशोरमपि मानितं जातमिति श्रीविष्णुपुराणे दर्शितम्—

> "सोऽपि कैशोरकवयो मानयन् मधुसूदनः ।
> रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः" ॥ इति

श्रीहरिवंशे च—

> युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित् ।
> कैशोरकं मानयानः सह ताभिर्मुमोद ह" ।

इत्यत्र कालविदित्यस्य व्याख्यानं ता रात्रीर्वीक्ष्येति ह ताभिर्मुमोदेत्यस्य सूचकं रन्तुं मनश्चक्रे इति आत्मने-पदनिर्देशः । स्वलब्धं सार्थः क्रियतां बोध यति "स्वरितञितः कर्त्रभिप्राये क्रियाफले" (१ । ३ । १०२) इति विशेषविध्या-श्रयणात् तदेवं ता इत्यनेन स्वस्यापि चमत्कारकरं काल-वैशिष्ट्यं व्यज्य तदुज्ज्वलितां श्रीवृन्दावनशोभामपि दर्शयति, शर-देति । शरदा हेतुना उच्चैः फुल्ला मल्लिका यासु ताः यद्वत्पर-योगात्प्रसिद्धेरनेनास्याः शरदो मल्लिकानां चापूर्वत्वं व्यञ्जितं तेन च सर्वाण्येव पुष्पाणि लक्ष्यन्ते इत्यालम्बनकालवैशिष्ट्यानां श्रीकृष्णस्य प्रेममयपरमसुखप्रदत्वं दर्शितं यस्मात् ह्लादिनीशक्तिविलास-लक्षणात्प्रेमविशेषमय्येवैषा रिरंसा न तु प्राकृतकाममयीति तेषां कन्दर्पदर्पहेति व्याख्यानमपि तथा युक्तमेव निवृत्तिपरैर्व्याख्या-यीतापि क्रममेव च वक्ष्यते—

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

"शार्विशे विरहालापविक्लिन्नहृदयो हरिः ।
तत्राविर्भूय गोपीस्ताः सान्त्वयामास मानयन् ॥
स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः ।
सदयं नन्दयन् गोपीरुद्गतो नन्दनन्दनः" ॥ इति

श्रीमुनीन्द्रेणापि इदमेव वक्ष्यते "विक्रीडितं व्रजवधूभिरिदं च विष्णोः" इत्यादौ तत्र दुर्घटघटनां समादधदाह—योगमाया पराख्याचिन्त्यशक्तिः तामुप सामीप्येनाश्रितः यत्र यत्र विहरति तत्र तत्रैव (तां) सूर्यः स्वदीधितिमिव सदा प्राप्त इति स्वाभाविकतादृशशक्तित्वं व्यञ्जितम् । तेन च दुर्घटतल्लीला च सेत्स्यतीति भावः । श्लेषेण योगः संयोगः तदर्थं माया कृपा "माया द[illegible] कृपायाश्च" इति विश्वः । तामुप आधिक्येनाश्रितः । किञ्च, ताः वीक्ष्य क्रमेण राकापर्यन्तमधिकमधिकं मनोरथं चक्र इत्यर्थत्वे लब्धे विशेषोऽयमपि ज्ञेयः । तस्यां राकायां मायं गृहमागतो भोजनादिकं विधाय मातुः स्थानात् शय्यागृहचन्द्रशालिकाद्वारं गतः सन् सद्यः सम्पाद्यत्वेन निश्चितवानित्यर्थः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

भगवानपीत्यादि—

"भगवानितिशब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्त्तेते वासुदेवे सनातने" ॥

वक्ष्यते च "स्मारितो भगवानद्य देवो नारायणो मम" इति । वासुदेवब्रह्मनारायणादिभिः—

भगवत्पुरुषोत्कृष्टनामानि व्योमवासिनः ।
परस्यैवेति तानीह परमात्मनि सन्ति हि ॥

इति प्रबलप्रामाण्यात् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ विवक्षितानि यूनो भगवतः शारदिकानि चेष्टितान्यनुवर्णयति, पञ्चभिरध्यायैः तत्र यदुक्तं भगवता "मयेमा रंस्यथ क्षपाः" इति तस्य सत्यत्वमापादयितुमित्यर्थः । अनुजिघृक्षैकशीलत्वात्केनापि व्याजेन गोपीः कृतार्थयितुं च ताभिः सह चिक्रीडिषुस्तावद्वेणुगीतेनैव ताः समाहूय ततः परीक्षापूर्वकं ताभिः सह विजहारेत्याह—एकोनत्रिंशेन । भगवानपीति । "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः" इत्युक्तभगवल्लोकदर्शनजानन्दपारवश्यप्रयुक्तात्मारामानन्दादिसमुच्चयार्थोऽपिशब्दः ताः याः "मयेमा रंस्यथ क्षपा इति प्रतिज्ञातास्ता इत्यर्थः । शरदा हेतुभूतया उत्फुल्लाः मल्लिकाः यासु ताः रात्रीः अवलोक्य रन्तुं मनश्चक्रे चिक्रीडिषायाः प्रसक्तं कर्ममूलत्वं निराचिकीर्षुर्विशिनष्टि योगमायामुपाश्रितः । युज्यत इति योगा तां मायामात्मीयसङ्कल्पमाश्रितः स्वसङ्कल्प एव केवलं तन्मूलं न तु कर्मेति भावः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निर्दोषभक्तिजनितब्रह्मज्ञानमेव मुक्तिसाधनमिति या शास्त्रतात्पर्यार्थनिर्धारणा तदर्थमर्थवादं वदत्यस्मिन्नध्याये तत्र वैकुण्ठदर्शनानन्तरं कः कथाप्रसङ्ग इति तत्राह—भगवानपीति । यद्रात्रिमुखे लोकदर्शनं तां रात्रिं शारदेन शरदृतुसम्बन्धिना कालेन उत्फुल्ला विकसिता मल्लिका नवमल्लिका यस्यां सा तां योगमायां स्वरूपसामर्थ्यम् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवानपीत्यपिशब्देन तत्प्रेयस्योऽपीति समुच्चीयन्ते ताः निजमाधुर्येणाद्यापि स्वमन्मनोहारिणीः शरदापि मल्लिकोत्फुल्लतातादृशरसमयलीलासमयरूपत्वात् योगमायां दुर्घटघटनाशक्तिम् उप समीपे आश्रितः तादृशतत्सेवावसरापेक्षया निकटस्थ तादृशशक्तिरित्यर्थः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ ब्रह्मेन्द्राग्निवरुणादीनां दर्पं शमयित्वा कन्दर्पस्य दर्पं शमयितुं युगपदनेकरमणीकदम्बसम्बलितं रासाख्यं लास्यमारिप्सुर्भगवानेकदा स्वयोगवैभवं प्रादुश्चकार; तत्र रासस्य लक्षणं यथा—

"नर्त्तकीभिरनेकाभिर्मण्डले विचारिष्णुभिः ।
यत्रैको नृत्यति नटस्तद्वै हल्लीशकं विदुः ॥"

तदेवेदं तालबन्धगतिभेदेन भूयसा । रासः स्यान्न स नाकेऽपि वर्त्तते किं पुनर्भुवि इत्यस्य दुष्करतया परमरमणीयतया च बहुकालसाध्यत्वाच्च तथा च बह्वीरेव रात्रीरेकत्र कर्त्तुं कृतसङ्कल्पत्वात् तत्कालं समुपस्थिता रात्र्यभिमानिनी बह्वीरेव देवताः पुरतो वीक्ष्य रन्तुमिच्छां चकारेत्याह—भगवानपीत्यादि । भगवानचिन्त्यवैभवोऽपि योगमायामुपाश्रितः सन् रन्तुं मनश्चक्रे । अयम्भावः अस्मिन् विलासे बह्व्य एव दुर्घटसङ्घटनाः सम्भाव्याः तास्तु केवलं योगैश्वर्यसाध्याः स्वयमिच्छामात्रेण कर्त्तुं शक्या अपि अग्रिमरसस्य मधुरकोमलतायामैश्वर्यप्रकाशनं नातिसुरसमिति तत्तत्कर्मणि "कार्यार्थं सम्भविष्यति" इति प्रागेवावातीर्णां मूर्त्तिमतीं स्वयोगशक्तिं त्वयाऽस्मिन् विलासे सर्वमेव समर्थनीयमिति उपाश्रितः विधेयत्वेनोपाश्रित आज्ञप्तवानित्यर्थः । इत्ययमपेरर्थः किं कृत्वा ता रात्रीर्वीक्ष्य ताः पूर्वसङ्कल्पिता अनेका रात्रय एकत्र मिलिता भवन्त्विति मनसि कृता इत्ययं तच्छब्दार्थः अनेकानां रात्रीणां क्रमादागामिनीनां युगपद्दर्शनाभावात् रात्रीरिति राज्यधिष्ठात्रीर्देवता इत्ययं बहुवचनार्थः आनन्दघने श्रीविग्रहे अन्तःकरणाभावात् इच्छाशक्तिमात्रस्यैव सम्भवादलौकिककृतिसाध्यक्रियाविषयत्वेऽपि लौकिककृतिसाध्यक्रियाविषयत्वाच्च मनश्चक्रे मनःस्वीचकारेति मनःशब्दार्थः मनःस्वीकारात् मनोभवश्चापि स्वीकारः रात्रीः कीदृशीः शरदोत्फुल्लमल्लिकाः शरत्सम्बन्धिन्यः शारद्यः उत्फुल्लमल्लिकाः उन्मल्लिकाः ॥ १ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने।
लीला या युज्यते सम्यक् सा तुर्ये विनिरूप्यते॥
लौकिकस्त्रीषु संसिद्धस्तद्द्वारा पुरुषो भवेत्।
स्वानन्दानुभवार्थं हि योग्यतापि निरूपिता॥
ततो हि भजनानन्दः स्त्रीषु सम्यग्विधार्यते।
तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा॥
स्त्रिय एव हि तं पातुं शक्तास्तासु ततः पुमान्।
अतो हि भगवान् कृष्णः स्त्रीषु रेमे ह्यहर्निशम्॥
बाह्याभ्यन्तरभेदेन आन्तरन्तु (परं) महत्फलम्।
ततः शब्दात्मिका लीला निर्दुष्टा सा निरूप्यते।
ततो रूपप्रपञ्चस्य पञ्चधा रमणं मतम्॥
आत्मना प्रथमा लीला मनसा तु ततः परा।
वाग्प्राणैस्तु तृतीया स्यात् इन्द्रियैस्तु ततः पराः।
शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठितम्।
षड्विंशे तु हरिः पूर्वं जीवानानन्दयत्स्वयम्॥
ते चेत्समर्पितात्मानस्तत्रोपायश्च रूप्यते।
आत्मा यावत्प्रपञ्चोऽभूत्तावद्वै रमते हरिः॥
सोऽन्तःकरणसम्बन्धी तिरोधत्ते हरिश्च सः।

प्रथमं भजनानन्दं निरूपयितुं स्त्रीषु स्वानन्दः स्थापनीय इति तासु रत्यर्थमिच्छां कृतवानित्याह—भगवानपीति।"मयेमा रंस्यथ क्षपाः" इति या रात्रयो वरत्वेन दत्ताः स्त्रीणां रमणार्थाः ता रात्रीर्भगवान् परिगृह्य सर्वास्वेव रात्रिषु ता आधिदैविकीरारोप्य पूर्णत्वात्तासां पूर्णिमारूपाः कृत्वा ऋतुमपि शरदमेव कृत्वा तस्यापि कार्यं पुष्पाद्येव कृत्वा रसोद्दीपकत्वेन सर्वां सामग्रीं विधाय पश्चाद्रमणार्थं स्वानन्दप्रकाशकं कामयितामहंमन उत्पादितवान् तत्र सर्वासु स्वास्मिन्नपि बोधनीयः तत्र वेणुरपि सहायतां प्राप्स्यति सङ्कल्पः ततःकामवर्णनं अतः प्रथमं तादृशं मनः कृतवान् यद्यपि एतत्प्रणालिकाव्यतिरेकेणापि स्वानन्दं तत्र स्थापयितुं शक्तः तथापि मर्यादा तिष्ठत्विति भगवानपि मनश्चक्रे नन्वेवं सति स्वानन्दः आनस्यागात् अन्यथा भवेत्ततः स्वरूपादपि प्रच्युतः स्यादित्याशङ्क्याह—योगमायामुपाश्रित इति। योगमाया हि यथास्थितमेवान्यत्र स्थापयति यथा सङ्कर्षणं लीलार्थं सापि पूर्वं सापि परिगृहीतेति नाऽपूर्वं किञ्चित् यथा प्रमाणे रक्षायां च बलभद्रोपयोग एवं कार्ये योगमायायाः तत्राप्यन्तरङ्गा योगमाया अन्यत्र स्थितं प्रमाणमन्यत्रापि योजयति अन्यत्र स्थितं चानन्दमन्यत्र अतः प्रमाणातिरिक्तमार्गो भक्तिमार्ग आश्रे विततौ भविष्यतः याश्च रात्रयो रमणार्थमेव निर्मिताः ता एव परिगृहीताः अन्यथा साधारणीपरिगृहे सर्वत्रैवानन्दः स्यात् शरदि ऋतावुत्फुल्ला मल्लिका यासु ता दृष्ट्वा रमणार्थं मनः कृतवान् योगमायां च समीप एवाश्रित्य स्थितः॥ १॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

श्रीरामकृष्णगङ्गाचरणान्नत्वा गुरून् प्रेमणः।
श्रीलनरोत्तमलोकनाथ श्रीगौराङ्गप्रभुं नौमि॥

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम्।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभुष्णवे।
तदीयप्रियदास्याय मां मदीयमहं ददे॥
अथ पञ्चभिरध्यायैः पञ्चप्राणसमैर्मुनिः।
रासं प्राह हरेः सर्वलीलासम्पच्छिरोमणिम्॥
रासो जयति यद्दत्तसौभाग्या गोपयोषितः।
पराख्या अधरी चक्रुः सर्वोर्द्धस्थां रमामपि॥
ऊनत्रिंशे वेणुनादः पारुष्यविषवर्षणम्।
गोपिकाचातकीष्वाभिः क्रीडान्तर्द्धिश्च वर्ण्यते॥

इह खलु सप्तवर्षवयसि वर्त्तमानेन भगवता कार्त्तिकस्यामावास्यायां कर्मवादोत्थापनेन इन्द्रमखभङ्गः कृतः तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः, द्वितीयायां यमुनातीरे भ्रातृद्वितीयाभोजनोत्सवः श्रीमुनीन्द्रेणावर्णितोपि ज्ञेयः। तत्रैव वर्णिता इन्द्रकोपोक्तयश्च तृतीयामारभ्य नवमीपर्यन्तं गोवर्द्धनधारणं दशम्यां गोपानां विस्मयकथाबाहुल्यम् एकादश्यां गोविन्दाभिषेकः द्वादश्यां वरुणलोकगमनं पौर्णमास्यां ब्रह्मलोकगमनमम् ततश्च शरदः समाप्तत्वात्तदुत्तरे वर्षे अष्टवर्षवयस्त्वे सत्याश्विनपूर्णिमायां रासोत्सवः सर्वलीलोत्सवमुकुटमणिस्तं वक्तुमारभते—भगवानपि षडैश्वर्यपूर्णोऽपि रन्तुं मनश्चक्रे रमणस्योद्दीपनालम्बनानां कालदेशपात्राणां शरद्यामिनी वृन्दावनव्रजवनितानां सर्वोत्कृष्टमाधुर्य्येणाकृष्टत्वादिति भावः। शतकोटिविलासिनीनामुज्ज्वलरसचिन्तामणीनां सौस्वर्य्यसौन्दर्य्य सौकुमार्य्यसौरभ्य माधुर्य्यवैदग्ध्यतौर्य्यत्रिकाणि बहुविधानि परमरुचिराणि स्वीय श्रोत्रादीन्द्रियैर्जिघृक्षुः स्वीयसौस्वर्य्यादीनि तदीयश्रोत्रादिभिस्ता जिघ्राहयिषुश्च बभूव प्रेमवश्यत्वादेकस्यामेव रजन्यामव्यवधानेन यदा तदा सत्यसङ्कल्पताशक्त्या प्रेरितया योगमायया दुर्घटघटनापटीयस्या शक्त्या प्रहरचतुष्टयवत्यास्तस्या एव रात्रेर्मध्ये तावद्विलाससमापयिष्यः परश्शतकोटिरात्रय आनीय दर्शिताः अत एव ता रात्रीर्वीक्ष्येति बहुवचनं ब्रह्मरात्र उपावृत्त इत्यग्रेऽपि वक्ष्यते प्रसिद्धार्थतत्पदोपन्यासान्नानागुणवतीरिति रात्रीणामुत्कर्षः शरदा टाबन्तः शरदायामपि उत्फुल्ला मल्लिका यासु ताः शरद्यपि मल्लिकाः "कुन्दस्रजः कुलपतेरिह वाति गन्धः" इति कुन्दास्वपि "रेमे तत्तरलानन्दिकमलामोदवायुना" इतिरात्रावपि कमलानि पुष्यन्तीति वृन्दावनस्योत्कर्षः शरदोत्फुल्लमल्लिका इति पाठे शारद्यश्च ता उत्फुल्लमल्लिकाश्चेति ता रन्तुमारेभे रेमे इत्युक्तेरात्मारामस्य स्वत एव पूर्णकामस्य भगवतस्तस्य व्रजवनितासु रमणं बाह्यं नरविडम्बनमेवेति कश्चिद्व्यचक्षीतेत्यतो रन्तुं मनश्चक्र इत्युक्त्या रमणमिदमान्तरमेव न तु बाह्यमिति ज्ञापितं सत्यमान्तरमेवेदं रमणं किन्तु व्रजसुन्दरीणां भक्तत्वात् तदनुरोधेनैवेति कश्चिद्व्याचक्षीतेत्यतश्चक्र इत्यात्मनेपदं प्रयुक्तं रमणस्य स्वसुखार्थकत्वं बोधयति ततश्च इत्थंभूतप्रेमाणो व्रजसुन्दर्यो यस्तासु भगवान् स्वतः सर्वसुखपूर्णोऽपि रन्तुं मनश्चक्रे "आत्मारामाश्च मुनयः" इत्यत्र "इत्थं भूतगुणो हरिः" इति वदतो व्रजसुन्दरीणामपि परमोत्कर्षः तथा "सोऽपि कैशोरकवयो मानयन् मधुसूदनः। रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः" इति "युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित्। कैशोरकं मानयन्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सह ताभिर्मुमोद ह" इति श्रीविष्णुपुराणहरिवंशयोः मानयन्नादृतं कुर्वन्नित्यर्थः । ताभिः सह विहाराभावे क्षीरकैशोरवयोऽव्ययमानितं स्यादत एवोक्तमभियुक्तमहानुभावैः "कैशोरं सफलीकरोति कलयन् कुञ्जे विहारं हरिः" इति सर्वथैव व्रजवनितानामुत्कर्षो ध्वनितः तत्र चोक्तानुक्तसर्वेति कृत्यसमाधानार्थमाह—योगमायां स्वीयाचिन्त्य-चिच्छक्तिवृत्तिम् उप आधिक्येन आश्रित इति स्वाश्रितानामपि तामाश्रित इति प्रयोगात्तस्या अप्यत्र सौभाग्याधिक्यम् ॥ १ ॥

विशुद्धरसदीपिका ।

श्रीमिश्रनारायणपादपल्लवं—
प्रणौमि सद्भागवतं पुराणम् ॥
यत्र क वा येन स्वयं प्रकाशितं—
स्वयं निपीतं स्वयमेव गीतम् ॥
श्लोकवल्लीलया येन मुनीन्द्रवरदानतः ।
लब्धा महापुराणस्य यथार्थाख्यानशक्तयः ॥
नवधा भक्तयो यस्य मूर्त्तिमत्योऽग्रतः स्थिताः ।
शुद्धां भक्तिं प्रपुष्णन्ति तत्पदाम्बुजसेविनाम् ॥
किशोरीरमणो यस्य देवः सख्येन सेवितः ।
ललितानुगतप्रीत्या साक्षादानन्ददायकः ॥
प्रणम्य प्रद्युम्नपदारविन्दं—
वर्षन् महाप्रेमसुधामरन्दम् ॥
श्रीराधिकाकृष्णकिशोरलीलां—
व्याख्यामि चाख्यामि सदाऽ*प्रमीलाम् ॥
श्रीवंशिकां नौमि ययात्मसात्कृताः—
कृता न के कुञ्जसुखाब्धिमग्नाः ।
निपीय यस्या ध्वनिमाशु याता—
जाता व्रजे राधितराधिकाहृताः ॥
रामकृष्णप्रसादेन संवादेन सतामियम् ।
क्रियते रासलीलाया विशुद्धरसदीपिका ॥
यदुच्छिष्टामृतेनायं मूर्खोऽपि मुखरीकृतः ।
साधवस्ते कृपापूर्णाः क्षम्यन्तामक्रमं मम ॥

अपि च—
उद्दीप्यतामियं सद्भिर्यतः स्यात्तत्त्वदीपिका ।
ईक्षन्तामिच्छया सन्तः सहन्तां मम साहसम् ॥

तत्र भगवल्लीलाया नित्यत्वप्रतिपादकं श्रीदशमस्कन्धवाक्यं यथा, जयतीति—

जयति जननिवासो देवकीजन्मवादो,
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन-
व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥

अथ विश्वविस्मापकं श्रीभगवच्चरितामृतं निपीयाऽवितृप्ततया ऽहोभाग्यं तदानीन्तनानां ये तादृशलीलं भगवन्तं साक्षादपश्यन्निति समुत्कण्ठया विषीदन्तं राजानं ज्ञात्वा तल्लीलाया नित्यत्वं सूचयन् मास्तु चक्षुर्गोचरोऽयं नित्यविहारी "श्रोतव्यो मन्तव्यः" इत्यादि श्रुतिसिद्धः श्रवणमनोगोचरस्तु शश्वत् क्रीडतीति समादधदाह—जयतीति । स इति प्रकरणलब्धं स जयति सर्वोत्कर्षेण वर्त्तते इति वर्त्तमानप्रयोगेण नित्यत्वं सूचितम् । अत एव परमोल्लासेन प्राक् प्रयोगः कथमित्याकाङ्क्षायां " द्वे विद्ये वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति श्रुतिप्रतिपादितं रूपद्वयं निर्दिशति—तत्र पूर्वार्द्धेन शब्दब्रह्म रूपत्वम् उत्तरार्द्धेन तु परब्रह्मरूपत्वम् इति विवेकः । तथा हि जननिवासः जनेषु भक्तेषु नितरां वासो यस्य सः तेषां तादृशत्वम्—

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" ॥

इति श्रीतृतीयोक्तेः तत्कुतः? देवकीजन्मवादः दीव्यति नित्यं क्रीडतीति देवो नित्यविहारी तं कायति शब्दायते सा देवकी श्रीहरिकथा—

"कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" ॥

इति प्रथमोक्तेः । तस्यामेव जन्म प्रादुर्भावो यः स एव वादः तत्त्ववित्सम्मता कथा यस्य सः तत्कुतः यत् यतः उ इति विस्मये वराणां श्रेष्ठतमानां श्रीभागवतप्रवराणां परिषदः सभायाः स्वैः स्वभूतैर्दोर्भिरिव सद्धर्मपालनसचिवैर्महाभागवतैः तद्वारेत्यर्थः । अधर्मं "धर्मो मद्भक्तिकृत्प्रोक्तः" इत्युक्तेस्तद्विपरीतं सर्वमप्यधर्मम् अस्यन् निजभक्तवरद्वारा श्रवणकीर्तनादिव्यतिरिक्तं कर्मज्ञानादिकं निरस्यन्नित्यर्थः । एवं च शब्दब्रह्मस्वरूपेण श्रीभगवतः श्रावणप्रत्यक्षत्वं साधितम् । अथ सुस्मितेन रसोल्लासाभिव्यक्तिसितेन । श्रयते आश्रयते हरिरेनामिति श्रीः तस्याः श्रियः पररमायाः श्रीराधाया मुखकमलेन उपलक्षितस्सन् स्थिरचराणाम् अर्थान्नित्यधामगतानां स्थावरजङ्गमानां वृजिनं विरहखेदं निहन्ति तथा अत्रेत्थम्भूतलक्षणतृतीया यया नित्यसम्बन्धः सूचितः " वामभागे स्थितां तस्य राधिकां परदेवताम् " इति तन्त्रोक्तेः । अत्र परदेवतामिति परस्य पुरुषोत्तमस्य तस्यैव देवतामिवाराध्यामिति तस्याः प्राधान्यमप्यर्थादुक्तं तथा तेनैव रूपेण व्रजेत्यादि "व्रजनं व्याप्तिरित्युक्ता व्रजनाद्व्रज उच्यते„ इति स्कान्दनिर्वचनानुसारेण व्रजपुरस्य श्रीगोलोकाख्यमुख्यप्रकाशस्य वनितानां परमानुरागवतीनां नित्यसहचरीणां कामो नवनवोऽभिलाषस्तस्य देवोऽधिष्ठाता शुद्धः प्रेमा तं वर्द्धयन् तासु विद्यमानमेव बहुलीकुर्वन् एवं च युगलरूपेण श्रीराधाप्राधान्येन च क्रीडन्नित्यदा वर्त्तत इति तस्य तेनैव रूपेण परब्रह्मत्वं प्रतिपादितमिति " यो ऽसौ परं ब्रह्म गोपालः" इति तापनीश्रुतेः । एवं च यत्र तत्राप्येकत्वेन पुंस्त्वेन च निर्देशोऽभेदाभिप्रायेणेति मतम् तदुक्तं सम्मोहनतन्त्रे "तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्" इति व्यतिरेके दोषस्तत्रैवोक्तः—

"गौरतेजो विना यस्तु श्यामं तेजः समर्चयेत् ।
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे !" ॥

इति सङ्क्षेपः । अत्र कारिकाः—

अनन्तलीलस्य हरेस्त्रिधा लीलास्ति नित्यदा ।
व्रजे वने निकुञ्जे च श्रेष्ठचमत्कोत्तरोत्तरम् ॥
पुनः सा द्विविधा चैका प्रकटाऽप्रकटा ऽपरा ।
आद्या साधकसिद्ध्यै स्वसुखस्मृत्यै तथाऽपरा ॥
कदाचिद्द्वापरान्तेऽन्या यया सम्भूय भुगते ।

* अप्रमीलामतन्द्रितां नित्यामिति यावत् ।

विशुद्धरसदीपिका ।

गोलोकस्य प्रकाशे हि किञ्चित्कालं प्रकाशते ।
स्वैः स्वैः परिकरै राधाकृष्णौ प्रकटतां गतौ ।
तत्सद्भावेन भजतां तां तां सिद्धिं विधाय च ॥
पोष्यवर्गान् समादाय पुनरप्रकटौ सदा ।
कुञ्जेकुञ्जे विहरतस्तदेका सक्तमानसौ ॥
प्राकट्ये चाप्यप्रकटप्रकाशेनैकतां गतौ ।
तां तां लीलां प्रकुरुतस्तां गायन्ति मुनीश्वराः ॥
केवलाऽप्रकटा लीला रहस्यत्वान्न गीयते ।
साक्षादिति मुनीन्द्राद्याः प्रकटाप्रकटं जगुः ॥
साधकानुग्रहस्तत्रासक्तौ हेत्वन्तरं मतम् ।
अष्टाविंशतिभिस्तत्राध्यायैः श्रीदशमे स्फुटम् ॥
वात्सल्यसख्याविष्टानां योगे सिद्धिं समादिशत् ।
अथ माधुर्यसिद्धानां तामाख्यातुमुपक्रमः ॥
मुनीन्द्रस्यातिहर्षेण पञ्चाध्यायेतिनिर्णयः ॥

अथ श्रीरासपञ्चाध्यायी व्याख्यायते ।

तत्र श्रीबादरायणिरुवाचेति श्रीशुक उवाचेति पाठद्वयं तत्राति हर्षज्ञापकं पुण्यविशेषमेतस्मिन्नुपकल्पयन् बादरायणिरुवाचेत्याह श्रीसूतः—तथाहि बदराणां समूहो बादरम् "बदरीखण्डमण्डिते" इति प्रथमोक्तेः । तदयनमाश्रयो यस्यासौ बादरायणो व्यासः तस्यापत्यं बादरायणिः ततश्च—

"अन्यत्र दशभिर्वर्षैर्यत् पुण्यमुपलभ्यते ।
मनुजैरेकरात्रस्य वासाद्बदरिकाश्रमे" ॥

इति पाद्मात् । तत्र चिरतरवासेन समासादिततद्देशाभिधानस्य मुनेः पुण्यपुञ्जफलमत्रैव सत्पुत्रे निष्पन्नमिति सूचितम् तच्च पुण्यं श्रीकृष्णाराधनमेव सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायस्यौचित्यात् तादृशपुण्यफलरूपोऽसौ तत्पुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकं तस्मिन्नित्यसिद्धमेवेत्यपि दर्शितम् ततश्च तादृशभक्त्यैवेयं वक्तृभिः संसेव्या रासकथेति सूचितम् यद्वा, रहस्यप्रकाशने स्वेष्टदेवापराधो ऽप्रकाशने च ज्ञानखलतादोष इत्युभयतः पाशारज्जुरिति चिन्तयन् मुनीन्द्र एव स्वदेहकृत्पुण्यसमूहं निष्प्रत्यूहमूहयन् साचिव्यम् आत्मानमभिजातं तज्जातं चाभिमन्यमान आख्यातवानाख्यानमित्यादिशन्नाह—बादरायणिरुवाचेति । यत्र च श्रीशुक उवाचेति पाठः श्रीरत्यातिशयत्वाच्छ्रीराधैव "आत्मया रमया रेमे,, इति ब्रह्मसंहिताभ्यः "रेमे तया चात्मरत,, इति वक्ष्यमाणाच्च तस्याः शुकः तत्क्रीडानिकुञ्जपञ्जरस्थः कलवाङ्नामा सुखधामा इति तल्लीलागानयोग्यतां तदेकपरतां तदुत्कर्षहर्षितां तद्रहस्यप्रकाशनेऽप्यतिरस्यतां रसतां च तद्वाक्यजातस्य कोमलालापतां च सूचयन् श्रीशुक उवाचेत्याह—अथ पूर्वाध्यायान्ते—

"नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः ।
कृष्णं च तत्रच्छन्दोभिः स्तूयमानं सुविस्मिताः" ॥

इत्युक्तं अस्यार्थः नन्दादयः "यज्ञामार्थसुहृत्प्रियात्मतनयप्राणाशया त्वत्कृते" इत्युक्तदिशा तदेकवत्सला तं तेषामेव सम्बन्धिनं लोकं दर्शयामास "लोकं स्वं गोपानाम्" इति प्रागुक्तेः । न तु निर्विशेषं सत्यज्ञानादीनां तस्यैव विशेषणत्वात् नीरूपस्योत्तरस्य दर्शनानुपपत्तेश्च अत एव परमानन्दनिर्वृता बभूवुरिति शेषः । कृष्णं च सर्वाकर्षकपरमानन्दघनं नराकारं परं ब्रह्म छन्दोभिस्तदेकपरैरतिरहस्यैः गोपालतापिन्याद्युपनिषद्विशेषैः यद्वा, "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इत्युक्तेरस्यैव महापुराणस्य प्राणभूतैः समनन्तरवर्ण्यमानैः । "भगवानपि ता रात्रीः"इत्यादिभिर्नियताक्षरविशेषैः स्तूयमानं दृष्ट्वा तद्गतलीलायास्तेषु गोप्यत्वाच्छ्रुत्वेति नोक्तम् तावतापि सुविस्मिताः विस्मृतदेहदैहिका बभूवुरित्यर्थः । एवं तन्मनोरथपूरणं श्रुत्वा श्रीव्रजदेवीनामसमोर्द्ध्वमनुरागमभिलाषं च "पीत्वामुकुन्दमुखसारघ', इत्यादिना "अक्षण्वताम्"इत्यादिना च तत्र तत्र वर्णितं स्मृत्वा अहो अतिकाठिन्यं श्रीभगवतो यदीदृशप्रियवर्गाणामुपेक्षेत्यन्तः समनुतप्यन्तं राजानमुपलभ्याह—भगवानपीति । अत्र"मयेमा रंस्यथ क्षपाः" इति दत्तवरासु या मनसा प्रतिश्रुतास्ता रात्रीर्वीक्ष्य भगवानपि परमस्वतन्त्रोऽपि रन्तुं मनश्चक्र इत्यहो तासां प्रेमप्राबल्यमिति भावः । वस्तुतस्तु रासोऽयं द्विविधः नित्यरासो महारासश्चेति—

"रहोविहारश्रवणान्नित्यरासोत्सवादपि ।
मनो मे हर्षमापन्नं न तृप्यति तृषार्तवत्" ।

इत्यादिपुराणोक्तेः अत्र महारासश्रवणादिति प्रकरणादन्वेयं तत्रोत्तरस्य महत्त्वमपि हर्षप्रदत्वं च साधकानुग्रहापेक्षयेति सङ्गृहीतः श्रीमुनीन्द्रैः प्रकटलीला चाप्रकटप्रकाशस्यैक्येनैव जायत इति तथैव व्याख्यायते वस्तुतस्तु "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः" "भगवानपि ता रात्रीः"" वीक्ष्य रन्तुं मनश्चक्रे इत्यन्वयः । अत्र तम् अप्रकटं लोकं तास्तत्रोपलभ्यमाना रात्रीरित्यर्थः अपिरत्र समुच्चये कास्ता इत्यपेक्षायामाह—शरदा उपलक्षिताः तथा उन्मल्लिकाः फुल्लमल्लिकाश्चेति क्रमेण शरद्वसन्त ग्रीष्मसम्बन्धिनीः रात्रीरित्यर्थः । वीक्ष्येति तासां देवतात्वं ध्वनितम् अन्यथा कालावयवत्वाद्दर्शनानुपपत्तेः । ततश्च तदभिमानिनीर्देवता एव राससम्पत्तिसम्पादयित्रीः साक्षादागता विशेषेणेक्ष्येत्यर्थः । एवं च ऋतुत्रयसम्बन्धिन्य एकत्र मिलिता अशीत्युत्तरशतं राज्यभिमानिन्यो देवतास्तत्रैव यमुनापुलिनस्याप्रकट प्रकाशे स्वस्वसेवाव्यग्रकराः समागता इति ज्ञेयम् सोऽयं शरदामोदाख्यो निकुञ्जविशेषः यत्र हि सर्वकालं रासादिसम्पत्तिः स्वभावसिद्धैव वर्त्तते तामेव समीक्ष्य साधनसिद्धानां व्रजाङ्गनानां मनोरथपूर्त्तिस्फूर्त्तिरुदयते स्म ताश्च द्विविधाः श्रुतिरूपा मुनिरूपाश्च पुनर्द्विविधाः"युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित्" इति श्रीहरिवंशोक्तेः । कालविदिति तासां मनोरथपूरणसमयज्ञ इत्यर्थः । तत्राद्याः परकीयाभिमानिन्यः अपराः स्वकीयाभिमानिन्यश्च गान्धर्वरीत्या स्वीकारात् स्वीयात्वमिह साम्प्रतमित्युज्ज्वलोक्तेः परन्तु " प्रच्छन्नकामिता ह्यासां गोकुलेन्द्रस्य सौख्यदा"इति"स्तत्रोक्तेस्तदनुकरणमपि मतम् पूर्वासां परकीयात्वमपि समुत्कण्ठावर्द्धनायाभिमानमात्रमेव न तु वास्तवं "माया कलिततादृक्स्त्रीशीलेनानुसूयुभिः । " न जातु व्रजदेवीनां पतिभिः सह सङ्गमः" इति तत्रैवोक्तेः । अथ तासां मुनिरूपात्वं पाद्मोत्तरखण्डे—

विशुद्धरसदीपिका ।

"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात् ॥

अत्र गोकुल इत्यनेन हरिंसम्प्राप्येत्यनेन च "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति न्यायादेते पूर्वमेव तादृशभावेन श्रीकृष्णोपासका आसन्निति सूचितम् तत्र श्रीरामं दृष्ट्वा तत्सारूप्येणोद्बुद्धसंस्कारा: हरिं परममनोहरं धीरोदात्तधीरोद्धतधीरललितधीरशान्तभेदेन चतुर्विधनायकेषु धीरललितं स्वोपास्यमेव भोक्तुमैच्छन् सुविग्रहमित्युक्तेः न तु धीरशान्तं श्रीराममिति भ्रमः कार्यः रसाभासापत्तेः ते सर्वे गोकुलस्त्रीगर्भतः समुद्भूताः केचिच्च देशान्तरगोपस्त्रीभ्यः समुद्भूताः गोकुले विवाहिता इति विवेकः । तथा बृहद्वामने "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे" इति । आसां नामानि कृष्णयामले—

"अथातः सम्प्रवक्ष्यामि गोपीः मुनिचरीः पराः ।
याः कृष्णं तपसा प्राप्य रमन्ते स्म निरन्तरम् ॥
चित्रगन्धा सुगन्धा च स्वगन्धा हरिवल्लभा ।
रङ्गवल्ली च सारङ्गी शारदा च शुचिश्रवा ॥
स्निग्धा सुवर्चा मृदुला मधुरा च मधुश्रवा ।
सुधाधारा चित्रकला रत्नचूडा कलस्वना ॥
अमृता शोभना चैवामृतानन्दाऽमृतप्रिया ।
रत्नाभृङ्गी परिमला तथा रत्नकला शची ॥
हारावली मालिनी च शुभा काञ्चनमालिनी ।
रुक्ममाला सुगन्धा च कस्तूरी पद्मिनी सती ॥
कुमुद्वती रसाला च चित्ररूपा सनातनी ।
विपुला नन्दनी मेधा मेध्या सिद्धिर्धृतिर्ध्रुवा ॥
कुमुदा कामिनी काम्या कौलिनी कमलावती ।
कलिका कमनीया च कामचारा कलावती ॥
कुशला वकुला धीरा विधुरा विधुराङ्गिका ।
जयन्ती जयनी जाती जगन्मोहनसुन्दरी ॥
रुचिरा चारुसर्वाङ्गी शुभा सर्वाङ्गसुन्दरी ।
मञ्जुला महिला मौञ्जी मदना मदनप्रिया ॥
लीलावती नीलदीप्तिः प्रभा शोभा जया कृपा ।
मधुप्रियेति विज्ञेया अशीतिर्मुनिसुन्दरी ॥
ज्ञानप्रेमान्वितैर्भावैर्भजन्त्यः कृष्णमन्वहम् ।
श्रीकृष्णरसलस्मोदमुदिताः प्रमदा इमाः ॥
अधनाःतधनं बद्धा त्यजन्ति निजप्रियम् । इति ।

तथैव श्रुतयोऽपि "गोप्यो जाताः" इति तत्रैवोक्तम् । यथा—

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः ।
तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः ।
चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा ॥
तुष्टोऽस्मि ब्रूत वो प्राज्ञा वरं यन्मनसेप्सितम् ।

श्रुतयः ऊचुः—

"कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः ।
कामिनीभावमासाद्य स्मरक्षुब्धा न संशयम् ।
यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः ।
भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा ।

श्रीभगवानुवाच—

आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थमुद्यते ।
कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥ इति

अत्र कामतत्त्वेनेति भगवद्विषयत्वात् कामोऽपि तत्त्वरूप इत्यर्थः । अन्यथा तत्त्वपदवैयर्थ्यादिति भावः । "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियः" इति श्रुतिः स्तुतौ च "गायत्री चासु जाता" इति पाद्मसृष्टिखण्डे प्रसिद्धम् । द्विविधानामेवासां परकीयात्वं तदेतत् प्रकटलीलायामेव क्वचिदप्रकटलीलायामपि तथा श्रुति॰ लीलयोरभेदाभिप्रायेणोत्पन्नवद्यं ततश्चैता परोद्दिश्य कामेनेत्युक्तं पाद्मे । गोप्यः कामादिति सप्तमे च । पर्यवसानेति तु "जिघांसयाऽपि हरये स्तनं दत्वाऽऽप सद्गतिम्" इति वद्रिरंस्यापगमः स्पष्ट एव "ततो मुक्ता भवार्णवात्" इत्युक्तेः भवार्णवः कामवासनैव "दुःखं कामसुखापेक्षा" इति श्रीएकादशोक्तेः । आसां च "वितर वीर नस्तेऽधरामृतम्" इत्यादिना वक्ष्यमाणरिरंसावशेषेण कामादित्युक्तिरविरुद्धैव "प्रेमैव गोपरामाणां कामः इत्यगमत् प्रथाम्" इत्यादिकं तु सिद्धावस्थापरम् आस्वेव कासाञ्चित् सहचरीत्वोपलब्धेः सुतरां प्रेमपरत्वमिति ज्ञेयम् अत एतासां सिद्धिरपि द्विविधा कासाञ्चिद्रिरंसावशेषेण यूथेश्वरीत्वं कासांचित् शुद्धभावेन सहचरीत्वं च, तत्राद्यानां व्रजनिष्ठत्वमेव, उत्तरासां व्रज निकुञ्जनिष्ठत्वं यथायोगं नहि निकुञ्जेऽनेकनायिकात्वं "गोप्यैकया युतस्तत्र परिक्रीडति नित्यदा" इति ब्रह्मयामले—

"अत्रैवाहं पुमानेकः केवलोऽगम्य ईश्वरः ।
स्त्री द्वितीया तु राधैव तस्याः सख्यः स्त्रियोऽपराः" ॥

इत्यादिपुराणोक्तेश्च । अत एवैतासां चतुर्विधत्वमुक्तं पाद्मे—

गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः ।
देवकन्याश्च विप्रेन्द्र ! न मानुष्यः कथञ्चन ॥

तत्र श्रुतिमुनिरूपास्तूक्ताः तत्र श्रुतिचरीनामानि कृष्णयामले—

अथ वक्ष्ये श्रुतिचरीर्गोपीः कृष्णमनोरमाः ।
कृष्णस्य दक्षिणे पार्श्वे दीव्यन्ती चारुदर्शना ॥
सुतपोव्रतपाश्चैव सुव्रताथ प्रियम्वदा ।
सुरेखा च सुपर्याया रत्नरेखा बहुश्रवाः ।
विश्रामधारणीचैव धरित्री चान्तिरेव च ।
सुमेधा सुमुखी धन्या सुखदा च सुलक्षणा ॥
सुन्दरी च सुखोत्पन्ना सुरभी गुणवत्यथ ।
सुलोचना सुफलिनी सुशीला सुभ्रुवा तथा ॥
वदुगीता च सुगीता च कलगीता कलस्वना ।
कलकण्ठी कलोत्ताना मातङ्गी च कलावती ॥
क्रमप्रदा च बहुदा बहुहूता बहुक्रिया ।
सुप्रयोगा विप्रयोगा बहुयोगा सुनासिका ॥
चत्वारिंशद्दमूर्गोप्यो ज्ञानप्रेमरसाश्रिताः ।
गायन्त्यः सामगानोत्थं सङ्गीतं मधुरं स्वरम् ॥
नानायन्त्रविधानेन तोषयन्ति निजेश्वरम् । इति

गोपकन्या नित्यसिद्धाः प्रकाशभेदेन व्रजनिकुञ्जगताश्च आद्याः लीलावधाः कान्तभावाः सख्यभावाश्च पराश्च सख्य एव देवकन्यास्तु—

विशुद्धरसदीपिका।

देवेष्वंशेन जातस्य कृष्णस्य दिवि तुष्टये।
नित्यप्रियाणामंशास्तु या जाता देवयोनयः॥
अत्र देवावतरणे जनित्वा गोपकन्यकाः।
ता अंशिनीनामेवासां प्राणसख्योऽभवन् व्रजे॥

इति श्रीमदुज्ज्वललोकौ। आसामेव सङ्गात् श्रुतिमुनिरूपासु काश्चिद्यूथेश्वरीत्वं काश्चिच्च तत्सहचरीत्वं प्राप्ताः काश्चित्तूत्कटेन शुद्धप्रेम्णा श्रीललितादिनां सङ्गाच्छ्रीराधा सहचरीत्वमिति विवेकः। तदुक्तं श्रीएकादशे "मत्कामा रमणं जारमस्वरूपविदोऽबलाः। ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः"॥ व्याख्या। मम इमा मत्काः मयि कं सुखं यासामिति वा मन्मुखसुखिन्य इत्यर्थः। तासां मा रमणं श्रीराधारमणं प्रापुः याश्चास्वरूपविदः शुद्धप्रेमैकपरवानहमिति मम स्वभावानभिज्ञाः ता जारमिति जारबुद्धिवेद्यमेव नतु पापपतिम्। श्लेषेण जरयति कामवासनामिति जारस्तं प्रसिद्धजारत्वस्य स्वस्मिन्नसिद्धत्वमाह, ब्रह्मेत्यादि। ता अपि शुद्धप्रेमवतीनां सङ्गात् शतसहस्रशः परमं परा उत्कृष्टा मा श्रीराधाख्या यस्यासौ परमस्तं नराकृतिपरब्रह्मैववपुः ब्रह्मत्वमस्य कथमस्यावतारस्य ब्रह्मता भवतीति "योसौ परं ब्रह्म गोपाल" इति च तापिनी श्रुतेरपि सङ्क्षेपः विशेषजिज्ञासायां भक्तिमञ्जूषा द्रष्टव्या सा च प्राप्तिः कासाञ्चिद्भावपरिपाकभेदेन रासक्रीडायां कासाञ्चित् कुरुक्षेत्रयात्रायामिति "सिद्धिं कतिचिदेवासां रासारम्भे प्रपेदिरे" इत्युज्ज्वलोक्तेः"तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्' इति श्रीदशमोक्तेश्च भावपरिपाकश्च कामवासनापगमेन निष्पद्यते सच शुद्धसख्योदयेनेति सिद्धान्तः एतदभिप्रेत्याहुः श्रीधरस्वामिपादाः

ब्रह्मादिजयसंरूढदर्पकन्दर्पदर्पहा।
जयति श्रीपतिर्गोपीरासमण्डलमण्डनः॥ इति

इति अत्र श्रीपतिरिति दाम्पत्यरीतिः श्रीराधामाधवयोरेवेत्यभिप्रायेणोक्तं गोपीरासमण्डलमण्डन इति गोपीनामेवान्योन्यबद्धकराणां रासमण्डलस्य श्रीपतिरूपेणैव मण्डन इत्यर्थः। ततश्च कामविजय एव पर्यवसित इति भावः। एवमेवाग्रे व्यक्तं भावि अत एवानन्दवृन्दावनचम्पूमनु "अथ चतुर्मुखशर्वगर्वगरिमखण्डनानन्तरं मदकलकन्दर्पदर्पदमनाय निजमुरलिकालिकाशिक्षापरीष्टये च"इत्यादिना अत्र मुरलिकाशिक्षा आलिपरीष्टेति क्रमः।यद्वा, मुरलिकैव या आलिकाप्रियसखीत्यर्थः। वंशीप्रियसखीति ब्रह्मसंहितातः एवं च"योगमायामुपाश्रित" इत्यपि सुसङ्गतं योगोऽत्राघटितघटना साचैकैव स्वरूपेण विविधभाववतीनां वाञ्छापूरणम् तदर्थं मायः शब्दोऽस्यामिति योगमाया वंशीमीयते प्रमीयते वक्तानेनेति मायः इति व्युत्पत्तेः "लिङ्गं यद्गूढहृदययोः" इति श्रीद्वितीयोक्तेश्च। तथा वंशीप्रियसखीत्युक्त्या तदुपाश्रयणं युक्तमेव अपि च महाकद्रुस्तु वंशिकेति श्रीकृष्णोपनिषच्छ्रवणात् कामदर्पदलनाय तदाश्रयणमिन्द्रदर्पदमनाय गिरिराजाश्रयणमिवावश्यकमिति भावः। यद्वा, योगमाया अचिन्त्यमहाशक्तिः श्रीभूलीलेति मुख्यतमशक्तित्रयी मुख्या लीलाख्यात्र च वृन्दापदाभिधेया तामुपाश्रित इत्यन्वयः अथवा योऽयं भगवान् यामुपाश्रितः सन् रन्तुं मनश्चक्रे सा आगमा दुर्गमा दुर्लभेति यावत्"गोविन्दप्रियवर्गदुर्गमसखीवृन्दैरनाच्छादिता" इति श्रीमत्सुधानिधेः। "ये गत्यर्थास्ते ज्ञानार्थाः"इत्यनुशासनाच्च सोऽपि रन्तुं मनश्चक्रे इत्यन्वयः। यद्वा, सा अगमा रन्तुं मनश्चक्रे सा का यामुपाश्रितः भगवानपि रन्तुं मनश्चक्रे इति परिवृत्त्यान्वयः। सुगोप्यत्वाच्छिलष्टपदैरुपादानमशेषं प्राग्वत् अत एवास्यास्तथाविधं ध्यानमुक्तं श्रीमृत्युञ्जयतन्त्रे यथा—

"ध्यायेत्तत्र महादेवीं स्वयमेव तथाविधः।
रक्तपद्मनिभां बालां बालार्ककिरणोज्ज्वलाम्॥
पीतवस्त्रपरीधानां वंशयुक्तकराम्बुजाम्।
कौस्तुभोद्दीप्तहृदयां वनमालाविभूषिताम्॥
श्रीमत्कृष्णाङ्कपर्यङ्कनिलयां परमेश्वरीम्।
सर्वलक्षणमिर्थां देवीं परमानन्दनन्दिताम्॥
रासोत्सवप्रियां राधां कृष्णानन्दस्वरूपिणीम्।
भजेच्चिदमृताकारां पूर्णानन्दमहोदधिम्॥ इति।

अत्र तथाविधः सखीभाववान्। तदुक्तं श्रीमत्सुधानिधौ—

"दुकूलं बिभ्राणामथ कुचतटे कञ्चुकपटम्—
प्रसादं स्वामिन्याः स्वकरतलदत्तं प्रणयतः॥
स्थितां नित्यं पार्श्वे विविधपरिचर्य्यैकचतुराम्—
किशोरीमात्मानं किमिह सुकुमारीं नु कलये"॥ इति।

अत्र भाव एव कार्य्यो न तु वेषो ऽपि धार्य इति हृदयम्। तदुक्तं भक्तिभावप्रदीपे—

"परात्परेश्वरे भावश्चिदानन्दरसात्मकः।
स दैहिकप्रकाशस्य बाध्यतेऽनुभवे नहि॥

तथा—

भावो यावदहं योषित् पुमान् षण्ढस्तनोर्भ्रमात्।
तावत्तु गोपीभावस्य कथमभ्युदयो भवेत्॥ इति।

विवृत्तमिदं भक्तिमञ्जूषायाम्। यद्वा, श्रीवैष्णातोषिण्यां सदैव योगो यथा सहसा योगमाया श्रीराधा तामुपाश्रितः समीपस्थितः सन् तदाज्ञया ता व्रजसुन्दर्य्यो वीक्ष्य रात्रीश्च प्रतिज्ञाता वीक्ष्य रमणयोग्या ज्ञात्वा स्वयं श्रीराधासहितस्ताभिस्ताभिः सह चक्राकारं मण्डलं कृत्वा रन्तुं क्रीडयितुं मनश्चक्रे। यद्वा, अन्तरङ्गलीलायां सदैव सङ्गोद्योगम् आयते श्रूयते सा योगमाया श्रीराधा तामुपाश्रितः मुख्यतया स्वीकृतवान् पश्चात्तदाज्ञया मुरलीसङ्केतेन तस्याः सख्योऽन्याश्च चन्द्रावलीप्रभृतयोऽप्याकारिता इति एवं च प्रकटलीलायामपि तया सह नित्यक्रीडा सूचकानि" पूर्णाः पुलिन्द्यः" इत्यादीनि ''यर्ह्यम्बुजाक्ष" इत्यादीनि च वाक्यजातानि सुसङ्गतानि भवन्तीति ज्ञेयम् अन्यथा कल्पनागौरवं रसाभास उपासनाविरोधश्चापद्येतेति दिक् ततश्च यतो योगमायामुपाश्रितस्ततो भगवान् "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिषु" इति कोशात् श्रीमानित्यर्थः। नित्ययोगे मतुप् नित्यदा तया युक्तः अतिशायने वा तदनुगतश्चेत्यर्थः। नित्ययोगो नाम परम्पराव्यभिचारित्वं तथा— "राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेष्वा" इति बह्वृचपरिशिष्टश्रुतेः॥ व्याख्यातेयं भक्तिमं० यतो "नित्यरूपो हरिस्तां तु राधां न मुञ्चत्यपो क्वापि तं न ह्यणाङ्केम" इति माहेश्वरसंहितातश्च तदनुगतिश्च तद्भक्तिः साच तद्भक्तानां समभिगम्यते एव भक्ताः

श्रीविशुद्धरसदीपिका ।

कृष्णं भजन्ति सततं तदनुग्रहतामाहेश्वरीसंहिताऽपः अथवा—

स्तम्भनं मोहनं रूपं बलं वैदग्ध्यमेव च ।
अभिलाषोपपन्नत्वं षण्णां भग इतीङ्गना ॥ इति ।

लक्षितो नित्यमधुरलीलो धीरललितो भगवान् योगमायामुपाश्रितः सन् रन्तुं मनश्चक्रे एवं चात्मनेपदप्रयोगोपि साधुः श्रीराधिकाराधनं कृते एवायं समुद्यमः रेमे तयेत्यत्र च तस्या एव तदात्मत्वेन स्थापयिष्यमाणत्वादिति सङ्क्षेपः । अत्र कारिकाः

तदेवं श्रायते राधा नामबीजं फलं जगौ ।
यमौ सखीजनस्तस्याः सुखाथाप्या स्वहेतवे ॥
श्रुतयो मुनयो गोप्यो दुर्गाव्रतपरा हि याः ।
सर्वाः संरमयन् रेमे दर्शयन्नेकतानताम् ॥
स्वस्य तस्यां रहस्येनां रमयामास तान्व्रजन् ।
प्रकाशभेदेन तथा बहुरूपः स्वलीलया ॥
तस्या विस्वभ्रमेणैव रमयामास काश्चन ।
अतः स्वाधीनपतिका राधिका राधनाय हि ॥
रासक्रीडेति निर्णेतुमस्माकमयमुद्यमः ।

तत्राहावलङ्कारव्यङ्ग्यमर्यादयोभयोः गान्धर्वविवाहमेव रासापदेशेन सूचयति, सच दर्शितः श्रीराधाशतके राघवेन्द्रसरस्वतीपादैः—

श्रीकृष्णस्तिलकं चकार सुदृशो भाले निभाल्याननम्—
त्वं वृन्दावनवल्लवीमणिरसि प्राणाधिके राधिके ॥
इत्युक्ते मुरवैरिणा जयजयेत्याकाशवाणी जगौ—
नेदुर्दुन्दुभयोपि पेतुरसकृन्मन्दारपुष्पस्रजः ॥
गान्धर्वो विवाहः समभवदनया राधया माधवस्य—
प्रायो गन्धर्वमुख्यैः सुरनरपतिभिर्गीयते सर्वलोके ॥
आचन्द्रार्कं च वृन्दावनभुवि भविता कुञ्जगेहे विहारो—
रासे गोपीकुमारस्तव भवतु चिरं राधिके कण्ठहारः ॥

सोयं यथावासरं रसनीयः ॥ १ ॥

———

श्रीरामनारायणकृतभावभावविभाविका ।

श्रीनिकुञ्जविहारिणे नमः ॥

श्रियं श्रीशं गिरां दुण्ढिं शिवां शिवमजं सुरान् ।
गुरून्विप्रानहो भक्तान्विश्वं वन्दे हरेर्वपुः ॥
शेषं सनत्कुमारादीन्साङ्ख्यायनपराशरौ ।
नारदं भगवद्व्यासं शुकं सूतं द्विजान् नृपम् ॥
सद्गुरुर्दर्शितो येन हरिनाथप्रदर्शकः ।
सुचेतरामराजाख्यं भवदनभवदं भजे ॥
स्वमाम् इमातरं वन्दे सेवाकुञ्जं समाश्रिताम् ।
स्वान्ते सखीभिराहूतां राधाशृङ्गारतत्पराम् ॥
पापपुञ्जान्ध्यहर्तारं सावित्र्या प्रभया स्वया ।
भवानीदासशर्माणं शर्मकृत्कर्मवर्मदम् ॥
दोषाकरस्य मनसो दोषाकरकरङ्करैः ॥
हरिनाथनखव्रातं भजे दोषाकराकरम् ।
रामसिंहस्य चरणौ भजेऽहमरुणप्रभौ ॥
मोहनैशतमोजाड्यभयभ्रान्तिहरौ द्युभिः ।
सदा सुखार्कसच्छास्त्रसुतर्कैः कर्कसद्युभिः ।
वन्दे कुतर्कनीहारहरं हृत्कञ्जकाशनम् ॥
वन्दे श्रीशङ्कराचार्यान् शङ्करान् जनसङ्करान् ।
बौद्धनाशङ्करान्स्वैरस्यात्सर्वराजवशङ्करान् ॥
वन्दे श्रीनानकगुरून् शास्त्रबोधगुरुर्गुरून् ।
गुरुशिष्यतया ख्याता यच्छिष्या एव केवलम् ॥
वन्देऽहं वैष्णवाचार्यान् श्रीशपादरतान्खलु ।
एतं ब्रह्मादिसत्त्वापद्वैतसत्त्वमवर्णयन् ॥
श्रीमद्भागवतव्याख्या कृता यैः श्रुतिसम्मता ।
विरतिज्ञानिरत्याख्यश्रीधरान् श्रीधरान् भजे ॥
वन्दे श्रीवल्लभाचार्यान् कृष्णपादैकतत्परान् ।
पुष्टिमार्गविधायान्ते न्यासात्स्वाचार्यमाश्रितान् ॥
मध्वाचार्यानहं वन्दे ये स्वाचार्याश्रिता अपि ।
मन्दानात्मज्ञकृपया भक्तौ भेदमवर्णयन् ॥
केशवं कृष्णचैतन्यं हरिं स्वाचार्यमाश्रितम् ॥
प्रेमभक्तिप्रवृत्त्यर्थं नामगानैकतत्परम् ।
गौरपादाश्रितान् वन्दे जीवरूपसनातनान् ॥
गोपितं यैः सदद्वैतं रसिकैरसलोभितः ।
वन्दे तच्चिन्मयं धाम रसरासमुखात्मकम् ॥
श्रुतिभिर्गोपिकाभूत्वा ब्रह्म यत्र विलोकितम् ।
अहो चित्रमहो चित्रं वन्देऽहं प्रेमबन्धनम् ॥
यदुबद्धं मुक्तिदं मुक्तं ब्रह्मक्रीडामृगीकृतम् ।
मायासन्नर्तको नृत्यद्यद्वशे दारुदारवत् ॥
वन्दे प्रेमसुखं ब्रह्म स्वं च प्रेमसुखास्पदम् ।
सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् ॥
गोपिकामध्यगं वन्दे श्रुत्यर्थं श्रुतिसङ्गतम् ।
रूपलावण्यमाधुर्यमागाधिकाम्—
प्रेमभाजां सदा प्रेमसंसाधिकाम् ॥
बाधिकाबाधिकां वामवामाधिकाम्—
कृष्णसंराधिकां राधिकां त्वां भजे ॥
सारिकासारसंसारसन्तारिकाम्-
सारिकाधारिकां दीनसूद्धारिकाम् ।
हारशृङ्गारसञ्चारशृङ्गारिकाम्—
कृष्णसराधिकां राधिकां त्वां भजे ॥
*कृष्णहृद्धारिकां कृष्णहृद्धारिकाम्—
कृष्णहृद्धारिकां कृष्णहृद्धारिकाम् ।
कृष्णहृद्धारिकां कृष्णहृद्धारिकाम्-
कृष्णसंराधिकां राधिकां त्वां भजे ॥
भानुजां भानुजातीरसत्केलिनीम्—
कामसङ्ग्रामसङ्गीरसत्खेलिनीम् ॥
नन्दनन्दाङ्गमृद्वङ्गसम्मेलिनीम्—
कृष्णसंराधिकां राधिकां त्वां भजे ॥
कृष्णहृद्धासिनीं श्वेतसद्वासिनीम्—
नित्यसद्राविणीं चित्तसूल्लासिनीम् ॥

* कृष्णं हृदि धारिकां । कृष्णहृदि हारभूतां । कृष्णहृदाहरणशीलां कृष्णो हृदि येषां धारिकां कृष्ण एव हृदो हारको यस्याः । कृष्ण एव हृदि हार इव यस्याः ।

श्रीरामनारायणकृतभावविभाविका ।

प्रीतिसङ्काशिनीं भीतिसन्नाशिनीम्—
कृष्णसंराधिकां राधिकां त्वां भजे ॥

कृष्णसौदामिनीं कामसन्तापिनीम्—
भामिनीं कामिनीं कोकिलालापिनीम् ॥
स्वामिनीं स्वामिनो नामसञ्जापिनीम्—
कृष्णसंराधिकां राधिकां त्वां भजे ॥

नायिकानायिकां नेत्ररसायकाम्—
भक्तिसन्दायिकां सौख्यसञ्चायिकाम् ।
प्रीतहृत्स्फीतसङ्गीतसङ्गायिकाम् ।
कृष्णसंराधिकां राधिकां त्वां भजे ॥
चन्द्रभागाकृतं यः पठेदष्टकम्—
कष्टसन्नाशकं स्विष्टकं मिष्टकम् ॥
प्रेष्ठकृष्णेष्टकं शिष्टकं तं कुरु—
कृष्णसंराधिकां राधिकां त्वां भजे ॥
श्रीराभक्षं चौर्ये दक्षं गोप्रत्यक्षं वन्देऽध्यक्षम् ।
ध्वंसाकांक्षं मायातक्षं रक्षापक्षे भाले पक्षम् ॥
विद्युद्धामावामावामं मेघश्यामं हृत्स्वारामम् ।
उत्कर्षं सङ्घर्षावर्षं वन्दे तर्षामर्षाकर्षम् ॥
वेदश्वासं जीवाभासं चित्तोल्लासं मध्वाहासम् ।
मायादासं मायोदासं चीरोदासं भूतावासम् ॥
तं संसारासारापारे पारावारे सारं सारम् ।
वन्दे कीर्त्याकारातारं विश्वोद्धारं सर्वाधारम् ॥
पिच्छापीडं पीडापीडं गोपाक्रीडं व्रीडाव्रीडम् ।
आध्यं माध्यं बाध्याबाध्यं साध्यं साध्यं प्रेमाराध्यम् ॥
विपद्गणध्वान्तसहस्रभानवः—
समीहितार्थार्पणकामधेनवः ॥
अपारसंसारसमुद्रसेतवः—
पुनन्तु मां ब्राह्मणपादरेणवः ॥
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥
पञ्चापयोधरतटीपरिरम्भलग्न- काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेदा- स्वेदाम्बुपूरमनुपूरयतु प्रियन्नः ॥
श्रीमद्भागवते कृष्णे पञ्चप्राणा इव स्थिताः ।
पञ्चाध्यायास्तु रासस्य व्याख्यातुं तत्समाश्रये ॥
गोपिकाव्राहनं चाद्ये उक्तिप्रत्युक्तयो मिथः ।
ताभी रासतमारम्भे कृष्णान्तर्धानकौतुकम् ॥

श्रीमत्कृष्णद्वैपायनस्य भगवतो बदरीपलाशितमहापुण्यप्रदश्रीनारायणाश्रमनिवासतदाचरितमहत्तपसाविर्भूतप्रेममयश्रीकृष्ण एव श्रीबादरायणिशब्देन तत्र तत्र सूचितप्रभावो मधुरालापश्रियातिमाधुर्यरसिकतया च शुकत्वेन देवदेवाविर्भावात्मकतया क्रीडानिरूपणपरत्वेन च देवतया प्रसिद्धः श्रीशुकदेवोऽत्र निगमकल्पतरुरसात्मकफलरूपे श्रीमन्नारदप्रेरणया प्रवृत्तश्रीभगवद्व्याससमाध्याविर्भूते—

"कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" ।

इत्यादिवर्णितमाहात्म्ये शब्दात्मकपरब्रह्मकृष्णविग्रहे श्रीमद्भागवतेऽपि पञ्चप्राणात्मना निवसतामेतेषामध्यायानां प्राधान्यमवगत्य—

"यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्" ॥

इति भगवद्वचनात् यावान् विभुः सच्चिदानन्दानन्तस्वरूपो यथा प्रेमरसिकेषु प्रेमभाववान् नृत्यादिषु च नेत्रकटाक्षकरचालनादिविचित्रभावदर्शकश्च यदखिलमाधुर्यादिनिधिः श्यामसुन्दररूपवान् सौष्ठवादिविचित्रानन्दमात्रगुणनृत्यरतिविहारादिकर्मको भगवानध्यायपञ्चकविषयस्तज्ज्ञानस्य भगवदनुग्रहाधीनतामाकलय्य तदारम्भे भगवानितिशब्देन मङ्गलमङ्गलभगवत्स्वरूपस्मारकमङ्गलमनुचरन् रासप्रसङ्गमाह—भगवानपीति । स च शब्दो ध्वनिना मङ्गलात्मकोऽपि वाक्यार्थेऽप्यन्वितः तत्र भगवच्छब्दे—

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना" ॥ इति

वाक्योक्तैश्वर्यादिषट्काधारतया सच्चिदानन्दानन्तविभुसर्वावयवः स्वगतभेदवर्जितो माधुर्यादिचिदानन्दात्मकगुणविग्रहः—

"सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे ।
नमो विज्ञानरूपाय परमानन्दरूपिणे" ॥

"तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्यादिश्रुतिभिः—

"निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो-
निश्चेतनात्मकशरीरगुणैश्च हीनः ॥
आनन्दमात्रकरपादमुखोदरादिः—
सर्वत्र च स्वगतभेदविवर्जितात्मा" ॥

इत्यादिस्मृतिभिश्च प्रतिपादितो हरिर्मत्वुप्प्रत्ययेन प्रतिभाति तथा च नित्यनिर्दुःखे सुखघने भगानां दुःखनिवारकत्वसुखकरत्वासम्भवाद्पार्थकत्वेन तत्स्मरतां दुःखापनोदपरमानन्दापादनादिनिखिलाभिमतपूरकत्वेनैव सार्थक्यमिति तत्स्मरणरूपमङ्गलस्य निष्प्रत्यूहसाफल्यसिद्धिः भगवानपि रन्तुं मनश्चक्रे इत्यन्वयः । ननु, "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायात् प्रवृत्तिमात्रस्य "प्रयोजनाकाङ्क्षत्वात् प्रयोजनमात्रस्य च लोके सुखदुःखाभावयोरेवान्तर्भावात् निर्दुःखसच्चिदानन्दरूपस्य तु तयोर्नित्यसिद्धत्वेन तत्प्रयुक्तरमणेच्छानुपपत्तिरेव न च सच्चिदानन्दरूपस्यापि जीवस्य दर्शनात् कृष्णेऽपि तथैवेच्छा सम्भवात्कानुपपत्तिरिति वाच्यम्

"सपदजयात्वजाभनुशयीत गुणांश्च जुषन्—
भजति सरूपतां तदनुमृत्युमपेतभगः"

इत्यादिवाक्येनापेतभगस्य लुप्तज्ञानैश्वर्यस्याज्ञानप्रतिबद्धस्वरूपानन्दभानस्य जीवस्येच्छोपपत्तावपि—

"त्वमुत जहासि तामहिरिव त्वचमात्तभगो—
महसि महीयसेऽष्टगुणितेऽपरिमेयभगः" ॥

इत्यादिना ऽऽत्तापरिमेयभगस्येच्छानुपपत्तेस्तादवस्थ्यात् अतो भगवानपि कथं रन्तुं मनश्चक्रे तत्राह—ताः प्रजावीक्ष्य मनश्चक्र इति कथम्भूतास्तारात्री रात्रिवत्तमोव्याप्ताः ज्ञानभास्करोदयाभावेन मुद्रितहृत्कमलेन स्वरूपानन्दभानशून्याः एवमज्ञानावरणे निर्दिश्य विक्षेपशक्त्या भ्रान्तत्वमाह—शरदोत्फुल्लमल्लिका इति । शरदि

श्रीरामनारायणकृतभावभावविभाविका ।

जाड्यमये उत्फुल्लमल्लिकाद्युपलक्षितसुखसम्भावनाशून्येगृहादावपि आन्तेवासमन्ताद्रुत्फुल्ला मल्लिका यासामसुखे सुखं पश्यन्तीः प्रजा आलोक्य अयोगेषु चित्तनिरोधादियोगशून्येषु स्वस्मिन्नयुज्यमानेषु वा सर्वथा अयोग्येषु वा या माया कृपा तामुपाश्रितः। यद्वा, तासामयोगाय स्वस्वरूपविच्छेदाय प्रवृत्ता या माया तामुपाश्रितस्तदुपहितस्तथा च—

"भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः।
तन्मायातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदैवतात्मा" ॥

"दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥

विचक्षणोऽस्याहंति वेदितुं विभो—
रनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्त्तमानस्य गुणैरनात्मन—
स्ततो भवान् दर्शय चेष्टितं विभो ॥

इत्यादिवाक्यैरीदृक् स्वलीलागानाद्यतिरिक्तं सुखसाधनमपश्यन् रन्तुं मनश्चक्रे। यद्वा। तासां योगाय स्वमनोहरलीलाप्रवणगानादिनास्वस्मिन्योजनाय या माया कृपा "माया दम्भे कृपायां च" इति कोशोक्तेस्तामुपाश्रितो रन्तुं मनश्चकारेत्यर्थः। यद्वा, ता एव प्रजा वीक्ष्य अमां निश्चलां मायां कृपामुपाश्रितः स्वयं भगवानपि प्रयोजनशून्येऽपि तथाऽनपगामिन्या कृपया रन्तुमुद्यत इति भावः । यद्वा, तां मुमुक्षुरूपाः प्रजाः वीक्ष्य रन्तुं मनश्चक्रे ताः कीदृशीस्तत्राह—रात्रीः"रादाने" इत्यस्मात् दानपरा उदाराः सर्वत्यागशीला वा भगवत्यैहिकस्वसर्वस्वस्यामुष्मिकसर्वक्रियाफलस्य स्वमनोवाक्कर्मणाश्च समर्पणशीला वा तत्रैहिकामुष्मिकात्सर्वतो निर्विध्य भगवत्परत्वे हेतुमाह—शरदोत्फुल्लमल्लिका इति। "दोऽवखण्डने" इत्यस्मात् शरा इव द्यन्ति अवखण्डयन्ति उत्फुल्ला मल्लिका यासां मल्लिकाद्युपलक्षितं विषयसुखं शरादिवदवखण्डनादिदोषदृष्ट्या सर्वत्यागादिना भगवत्पराः प्रजा आलोक्य तासाम् इतरसुखनिर्विण्णानां परमानन्दघने स्वलीलासुखे योगाय या माया कृपा तामुपाश्रितः। यद्वा—

"वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥
मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् ।
न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ॥

इत्यादिनान्वयव्यतिरेकाभ्यां ज्ञानप्राप्तेर्भक्त्यधीनतया तासाम् अमृनिश्चले कूटस्थाविकारिणि स्वस्वरूपे या मा प्रमा उपाधिविविक्तस्वरूपसाक्षात्काररूपा तस्यां तत्सम्पादने ताभिरुपाश्रितो यः स भगवानपि रन्तुं मनश्चक्रे । यद्वा, तासाम् अयोगाय योग उपाध्यध्यासस्तदपवादाय या मा प्रमा। यद्वा ,न युज्यते उपाधिसङ्गं न भजते असङ्गो न हि सज्जते व आत्मा तद्विषया मा प्रमा ।यद्वा,तासां योगाय स्वस्वरूपाभेदाय या मा भाग(त्याग)लक्षणया महावाक्यजन्यप्रमा । यद्वा, "योगश्चित्तवृत्तिनिरोधः" तदन्विता मा प्रमा तस्यामुपाश्रितः—

"सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम्।
गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वा गुणः" ॥

इत्यादिवाक्यैस्तथाभूतज्ञानस्य भगवल्लीलानुसन्धानाद्यधीनतया रन्तुं मनश्चक्रे। यद्वा, मा प्रज्ञा द्विविधा अस्थिता स्थिता चेति तत्र या अगा स्थिता मा प्रज्ञा तस्यां मुमुक्षुरूपाभिस्तत्सम्पादके उपाश्रितो यः स मनश्चक्रे इति । यद्वा—

"या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" ॥

इति वचनात् यत्र संसारे भूतानि जाग्रति तत्र यासां रात्री रात्रयो भवन्ति यस्मिंश्च स्वरूपे सर्वभूतानां निशेव शरज्जाड्येनाननुभवस्तत्रोत्फुल्लमल्लिका इव सुखं यासां ता ज्ञानिरूपाः प्रजा वीक्ष्य तन्मनो हर्तुम् आवरणतन्निवृत्तिभ्यां विभुसच्चिदानन्दानन्तश्यामसुन्दरमाधुर्यनिधिसर्वाङ्गस्य कचित्तिरोधानेन कचिदाविर्भावेन नृत्यलीलादि सम्पादयितुं योगमायामुपाश्रितो रन्तुं मनश्चक्रे । यद्वा, भगवल्लीलाप्राप्ति "न यत्र माया किमुतापरे" इत्यादिना मायाया अप्रवेशाद्भगवल्लीलाऽऽविर्भावतिरोभावादीनामपि स्वरूपात्मकत्वाद्योगमायामुपाश्रित एव रन्तुं स्वरूपात्मकलीला आविर्भावयितुं मनश्चक्रे—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥
परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे ! आख्यानं यदधीतवान्" ॥

इत्यादिवचनात् । यद्वा, ताः चीरहरणावसरदानान्तरे "मयेमा रंस्यथ क्षपाः"इत्यत्र निर्दिष्टतया तदापि वर्तमानत्वेन इदमा निर्दिष्टास्तदारभ्यस्तद्भावनापरिपाकेनेदानीमाविर्भूता रात्रीर्वीक्ष्य रन्तुं मनश्चक्रे । यद्वा, कथम्भूता रात्रीः ता अतिविलक्षणाः ब्रह्मरात्र उपावृत इत्यत्र ब्रह्मरात्रिसमकालत्वेन वक्ष्यमाणास्तया—

"तास्ता क्षपाः प्रेष्ठतमेन नीता—
मयैव वृन्दावनगोचरेण ॥
क्षणार्द्धवत्ताः पुनरङ्ग तासां—
हीना मया कल्पसमा बभूवुः ॥

इत्यत्र च कल्पकालत्वेनाभिहिताः अयमत्रार्थः भगवानपि ता रात्रीरित्यत्र निर्दिष्टस्य ता इति शब्दस्य प्रत्यभिज्ञानार्थमतिविलक्षणत्वसूचनार्थं च भगवतापि तास्ता इत्युक्तम् तास्ताः कल्पसमा क्षपा मयैव सह क्षणार्द्धवत्तीताः तत्र कल्पसमानां क्षणार्द्धवत्त्वयने हेतुगर्भितं विशेषणं प्रेष्ठतमेनेति प्रियतमसमागमे सुखातिशयेन समधिकदूरबहुकालस्याप्यल्पकालत्वायनोपपत्तेः पुनःकथम्भूतेन वृन्दावनगोचरेण तत्र प्रत्यक्षेण न।हि व्यापकमात्रिग्रहस्य कदाचित्तत्रावस्थितिः कदाचिन्नेति किन्तु गोचरत्वागोचरत्वमात्रं विशेष इति।यद्वा तत्र गाश्चारयतीति तथा तेन तथा च साजात्येन प्रेष्ठतमत्वेन च निरशङ्कनिरतिशयप्रेमास्पदत्वध्वनिः यद्वा, अन्यत्र "अनश्नन्नन्यो अभिचाकशीति" इत्यादिश्रुतिभिरभोक्तृत्वेन प्रसिद्धोऽपि वृन्दावने एव गा इन्द्रियाणि चारयतीति तथा तेन तथा च प्रेमनिधौ वृन्दावने प्रेमिसन्निधौ प्रेमप्रभावाद्व्यावहारिकस्यापि जीवेशविभागस्यानवस्थितिरिति भावः।यद्वा, वृन्दावने या गा इन्द्रियाणि गोपीगोगणमृगखगादिचक्षुरादीनि तानि स्वीयरूपमाधुर्यगानसौष्ठवाङ्गसौरभ्यस्पर्शाधरामृतादौ

श्रीरामनारायणकृतभावभावविभाविका ।

सञ्चारयतीति वृन्दावनगोचरस्ते (न) नायं भावो ऽन्यत्र—

"न सन्दृशे तिष्ठति रूपमस्य—
न चक्षुषा पश्यति कश्चिदेनम् ।
न चक्षुषा गृह्यते नापि वाचा—
नान्यैर्देवैर्मनसा कर्मणा वा ॥

इत्यादिश्रुत्येन्द्रियागोचरत्वेऽप्यत्र प्रेमान्वितेन्द्रियविषयो भवति यथा रन्ततत्वमन्येन्द्रियादिष्वयमव्यधीतरन्तरपरीक्षाशास्त्र संस्कृतेन्द्रियस्य विषयं यथा च ब्रह्मात्मतत्वं " यन्मनो न मनुते" इत्यादिभिर्मनोपि विषयमपि वेदान्ताभ्यामसंस्कृतमनसो " दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इत्यादिना गोचरं भवति तद्वच्चेन्द्रियगम्यत्वे दृश्यत्वेन मिथ्यात्वानुमानं मनोगम्यत्वेऽपि तुल्यत्वात् इन्द्रियगम्यत्वेन मिथ्यात्वसाधने मिथ्या वस्तुमात्रस्येन्द्रियाविषयतया विरुद्धत्वापाताच्च न च मनसावरणानिवृत्तिरेवात्र सप्रेमेन्द्रियैरपि तथैव स्वीकारात् तद्भानस्य स्वप्रकाशतयैव करणाविपर्यासमात्रस्य प्रेमप्रभावत्वमिति सन्तोष्टव्यम् तद्भाऽप्यपेक्षयान्या रात्रयः क्षणार्द्धवदपि मया हीना विरहत्वेन कल्पसमा बभूवुरिति तथा—

"एवं शशाङ्कांशुविराजिता निशाः—
स सत्यकामो ऽनुरताबलागणः ।
सिषेव आत्मन्यवरुद्धसौरतः—
सर्वाः शरत्काव्यकथारसाश्रयाः" ॥

इत्यत्र वक्ष्यमाणातिविलक्षणत्वं ताः शब्देन द्योत्यते अत्र तु सर्वाः निशाः शशाङ्कस्य पूर्णचन्द्रस्यांशुभिर्विशेषेण राजिताः शोभिताः नान्यत्र चन्द्रस्य दक्षशापात्क्षिप्रपूर्णत्वं नापि सर्वनिशानां चन्द्रवत्त्वं नापि तदंशुभिर्विशेषेण राजमानत्वं किन्तु कश्चित्तमः कश्चित्प्रकाश इति महद्वैलक्षण्यं । किञ्च, शरदि भवा इत्युपलक्षणम् ऋत्वन्तराणामपि तथा काव्येषु कथ्यमाना ये रसाः तेषामेवाश्रया ननु तद्दोषाणामित्यप्यतिवैलक्षण्यं नह्यन्या रात्रयः सर्वाः सर्वरसाश्रया दोषवर्जिताश्च भवन्ति दोषानाम्ना प्रसिद्धत्वात् तदेव सर्वर्तुगुणाश्रयत्वं व्यञ्जयन् रात्रीर्विशिनष्टि शरदोत्फुल्लमल्लिका इति । शरदि या समन्तात् उत्फुल्ला मल्लिका यासु तास्तथा तथा च शरदि मल्लिकाविकासरूपवसन्तगुणकथनेन तापादितद्दोषाकथनेन च सर्वर्तुगुणाश्रयत्वं दर्शितम् न चात्र वैलक्षण्येऽप्यसम्भावनावसरः यद्वा स्वस्वरूपस्याप्रमानहेतुना महामोहनैशतमसा व्याप्तेऽस्मदादिहृदाकाशे भगवल्लीलानुसन्धानमात्रेण परमाह्लादाद्यमृतरससमयभक्तिप्रभान्वितनिखिलनिरतिशयभगवत्सत्वचन्द्रप्रकाशे सति वैयसम्पन्निरूपितसर्वगुणाविर्भावो दोषसङ्क्षयश्च नान्यदेति—

"यस्यास्ति भक्तिर्भगवत्यकिञ्चना—
सर्वैर्गुणैस्तत्र समासते सुराः ॥
हरावभक्तस्य कुतो महद्गुणा ।
मनोरथेनासति धावतो बहिः" ॥

"न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" ॥

इत्यादिभिर्निरूपितस्तदा किमु वाच्यं भगवल्लीलाधाररात्रीणां यद्वा, शरदोत्फुल्लमल्लिका वीक्ष्य रन्तुं मनश्चक्रे शरदि सत्यपि जाड्ये विकासविरोधिनि भगवल्लीलोत्साहेनैवोत्फुल्ला या मल्लिकास्ता वीक्ष्यैतेनेन यथा इमा प्रेमोल्लासेन प्रोत्फुल्लिते सुमनासि तत्र मोहशरज्जाड्ये सत्यपि भगवतो रन्तुमुत्साहस्तथात्रापीति ध्वनिः । तथा च प्रेमोल्लास एव भगवत्प्रसादहेतुर्न जडचेतनविभागः । यद्वा, शरदि स्वविकासकालाभावेपि मल्लिकानां भगवल्लीलाप्रेम्णैवोत्फुल्लतादर्शनेन वृन्दावनलताद्रुमादीनां न जडत्वमत एव नन्दनन्दनवनलतादीनामनपवर्गदनन्दनवनगतकल्पद्रुमाच्छ्रैष्ठ्यं किमु वाच्यं वेदद्रुमपुष्पितवचसामर्जुनं प्रति भगवता निन्दितत्वेपि वृन्दावनपुष्पाणां श्रीसङ्कर्षणं प्रति प्रशंसनात्ततोऽपि श्रैष्ठ्यमेव तदुक्तमभियुक्तैः "निगमद्रुमे मृगय माम् वृन्दाविपिने द्रुमे द्रुमे पश्य । व्रजवनिता भूत्वा श्रुतिभिरिहैवावलोकितं ब्रह्म" अत एव कथम्भूता मल्लिकास्ता अतिविलक्षणाः क्रीडोपयोगितया पूर्वमेव बलरामं प्रति प्रशंसिता इति वा पुनः कीदृशीः रात्रीः "रा दाने" इत्यस्मादेवोदाराः—

"अहो एषां वरं जन्म सर्वप्राण्युपजीविनम् ।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते ॥
एतावज्जन्म साफल्यं देहिनामिह देहिषु ।
प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत् सदा ॥

तथा चागानां मल्लिकादीनां या मा स्वस्मिन् रतिमती मतिः तस्याम् अगमायां तेषु अगमेषु मायां कृपां वा उपाश्रितो यः स भगवानपि रन्तुं मनश्चक्रे । किञ्चाकाले मल्लिकाविकासोक्त्या ऋतुराजेनातिराजनीतिदक्षेणातिसुमनसा रुद्रदग्धस्य स्वमित्रस्यानङ्गस्य भगवत्तत्सखीसमागमे उद्भवमभिकाङ्क्षिणा निपतितपुष्पास्तरणशय्यादिभिः कुसुमितद्रुमाराममण्डपैः सुमनोमुक्तादामलतावितानादिभिः सेवा कृता युक्तं चैतदतिसुमनसां मित्रसौहृदं भगवत्सेवा च तदालक्ष्य भगवानपि मनसा मनोजमुद्भावयितुं मनश्चक्रे । यद्वा, नीतिज्ञेन तेन कामविजयाय प्रभोरुद्यममालक्ष्य ब्रह्मेन्द्रवरुणादिविजयिकृष्णमहात्म्याभिज्ञेनापि स्वमित्रमपि तादृशमाकलय्य सख्यधर्मपालनोचितमवगत्य भगवता पराजयेपि हास्यभावं तच्छोटनेऽपि हारादिरूपेण तदङ्गसौख्यं च सम्भाव्य द्रुमलताकुञ्जादिकुसुमशरतूणीणां कुसुमशरैः पूर्णता कृता तदेवाह—शरदोत्फुल्लमल्लिका इति । शरान् ददातीति शरदाः कुसुमबाणाय तदायुधसमर्पिका उत्फुल्ला मल्लिकाः तथा विरहिजनहृदयविदारणाय कुन्दकलिकाः शूलानि केवलाः कुन्ताकाराः किंशुकपुष्पाणि विरहिहृदयरक्ता रक्तार्द्धचन्द्रशररूपाणि वीक्ष्य रन्तुं रमणेनैव स्वमित्रमन्मथमनो मन्थितुं मनोद्वारा मनोजपराभवमालक्ष्य मनश्चक्रे । यद्वा, शरदोत्फुल्लमल्लिके त्युपलक्षणं कुसुमितलतासख्यालिङ्गितान् वनस्पतीन् पतीन् वायुना शाखाभुजचालनेन नृत्यतो वीक्ष्य जातोत्साहा रन्तुं पुलकिततनुस्वसख्यालिङ्गितवपुषा नृत्यादिना विहर्तुं मनश्चक्रे । यद्वा, ताः स्वयं दत्तवराः चीर्णगौरीव्रताः पूर्वतप्ततपसो मुनिरूपाः श्रुतिरूपा देवाङ्गनारूपाः स्वभाम्नोऽवतीर्णा नित्यसख्यः सखीभावनालब्धतद्रूपाः साधनसिद्धाश्च गोपीर्वीक्ष्य तत्प्रेमरञ्जनया

श्रीरामनारायणकृतभावभावविभाविका ।

निवद्धाकृष्टचितः सच्चिदानन्दघनः कृष्णो भगवानपि रन्तुं मनश्चक्रे यथा—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः" ॥

इत्यादौ भगवद्गुणानामात्मभूतानामात्मारामसुनिमनःकर्षकत्वमित्यत्यद्भुतत्वं तथा प्रेमरसात्मकव्रजवनितागुणानां नित्यसर्वज्ञसच्चिदानन्दघनभगवत्कृष्णमनःकर्षकत्वमिति ततोऽप्यति चमत्कृतत्वं चमत्कृतत्वेऽपि यथा मुनीनामात्मारामत्वाद्भगवतस्तु "आत्मा नारायणः परः" "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्—

"ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथानन्दकरं मनस्तः" ॥
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा
कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् ।
"नित्यप्रिये, अखिलदेहिनामन्तरात्मदृक्"
"अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः" ॥ इत्यादि

श्रुतिस्मृतिवृन्दशतैरात्मस्वरूपत्वात्तद्गुणानां च "यद्रूपगुणकर्मकः" इत्यादौ यद्रूपा एव गुणाः कर्माणि च यस्येति तद्रूपत्वात्सुचितमेव तन्मनसां तत्र रमणम्—

"रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते" ॥ इति ।

श्रुतिसिद्धत्वात्तत्र तद्रमणस्य तथा भगवतः कृष्णस्य प्रेममधुमधुकरत्वात्तत् तु सुमनसां सुमनसां तु तन्मध्वाकरत्वाद्योग्यमेव तदाकर्षणं तत्ररमणं च कथम्भूतास्ता गोप्यस्तत्र तेनैव प्रेमोत्कर्षेण विशिनष्टि—रात्रीः शरदोत्फुल्लमल्लिका इति । रात्रीरित्यत्र "रा दाने" इत्यस्मात्स्वसर्वस्वस्य स्वात्मनश्च दात्रीः—

"यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ।
"यज्जीवितं तु निखिलं भगवान् मुकुन्दः ॥
या दुस्त्यजं स्वजनमार्यपथं च हित्वा ।
भेजुर्मुकुन्दपदवीम्
"वक्षः श्रियैक रमणं च भवाम दास्यः"
श्यामसुन्दर ! ते दास्यः करवाम तवोदितम् ॥

इत्यादिवचनात् । यद्वा, वर्णितान्योन्यविशेषणविशेष्यता रात्रीश्च शरदोत्फुल्लमल्लिकाश्च ता गोपीश्च वीक्ष्य रन्तुं मनश्चक्रे यद्वोक्तपद्येषु सर्वत्र भगवल्लीलाधाम रात्रीणां मल्लिकाद्युपकरणानां सखीनां च तत्पदलक्ष्यभगवत्स्वरूपत्वद्योतनाय "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः" "तास्ताः क्षपाः प्रेष्ठतमेन नीताः" "भगवानपि ता रात्रीः" इत्यादौ सर्वत्र तच्छब्दप्रयोगः सङ्गीत्य(कथं) किं भूतः सन् रन्तुं मनश्चक्रे ? तत्राह—ताः प्रेमायस्कान्तमणिरूपाः गोपीः प्रति अयोवत्स्वत एव प्रेमानुगत्स्वभावतया गच्छतीति अयोगा या माया कृपा तामुपाश्रितः । यद्वा, तासां स्वबाहुदृढबन्धाहार्याणां स्वस्नेहगुणगणाकुलबलज्जाबन्धनाभ्यामुभयतः कृष्यमाणानां कुललज्जाबन्धनायोग्यतामालक्ष्य तद्योगाय विच्छेदाय या माया कृपा तामुपाश्रितः । यद्वा, तासां स्वस्मिन् योगाय योजनाय स्वात्मना तासां संयोगाय वा मायां कृपामुपाश्रितः । यद्वा ताः प्रति अगा निश्चला या माया कृपा तामुपाश्रितो यः सः । यद्वा स्वश्यामसुन्दरवपुः प्रति अयस्कान्तमणिप्रति अयोवत्स्वतो गता अयोगा गोपदारास्तेषु मायां कृपामुपाश्रितः । यद्वा, स्वस्मिन् युज्यन्ते इति योगाः । गोपदारास्तेषु मायां कृपामुपाश्रितः । यद्वा यो भगवांस्तेषां अगेषु गोपदारेषु निश्चलेषु निश्चलमतिषु च—

"चित्तं सुखेन भवताऽपहृतं गृहेषु—
यन्निर्विशत्युतकरावपि गृह्यकृत्ये ।
पादौ पदान्न चलतस्तव पादमूला—
द्यामः कथं व्रजमथो करवाम किम्वा" ॥

इति वक्ष्यमाणतद्वचनात् या माया कृपा तामुपाश्रितः । यद्वा, तासां स्वस्मिन् अयोवत् गता या मा प्रमा यथार्थमतिस्तस्यामुपाश्रितः । यद्वा, तासामन्येषु विस्वबन्धुप्रभृतिषु अयोगा अयुज्यमाना अन्यायोग्या वा या मा मतिः तस्यामुपाश्रितः।यद्वा,स्वस्मिन्नेव युज्यमाना स्वस्यैव वा योग्येति योगा मा तासां मतिस्तस्यामुपाश्रितः यद्वा,यो भगवांस्तासामगा निश्चला या मा मतिस्तस्यामुपाश्रितः।स रन्तुं मनश्चक्रे । यद्वा, यः स इति पूर्ववत् "अकारो वासुदेवः" स्वयमेव तद्गता या तासां मा मतिस्तस्यामुपाश्रितः । यद्वा, अन्यायोग्या अयोग्या या तासां मा अङ्गशोभा तस्यामुपाश्रितो लग्नमनाः । यद्वा, स्वयोग्यत्वेन योगा या तासां माऽङ्गशोभा तस्यामुपाश्रितः । यद्वा, यः स इति पूर्ववत् तासाम् अगा अनपगामिनी नित्या या मा शोभा तस्यामुपाश्रितः । यद्वा, योगा वक्षसि संस्थिता या मा लक्ष्मीस्तस्यामुपाश्रितोऽपि ता वीक्ष्य रन्तुं मनश्चक्रे इति लक्ष्म्या अपि अतिशयितं तासां प्रेमसौभाग्यं भगवतः प्रेमवश्यत्वात् । यद्वा, अगा स्वचाञ्चल्यं परित्यज्य नित्यमुरसि संसक्ता या मा तस्यामुपाश्रितोऽपि यः स तां वीक्ष्यैव तत्प्रेमोत्कर्षितविह्वलितच्छविमालोक्यैव अनागता अपि ता वेणुसाहाय्येनाहूय रन्तुं मनश्चक्रे इति चित्रं प्रेमसौभाग्यसौष्ठवं तासाम् योगाय स्वात्मना योजनाय यद्वा,तासां माङ्माने शब्दे च"इत्यस्मान्मायः शब्दो मीयतेऽर्थो यस्मा च यस्मात्सः लिङ्गं यद्वृष्टदृश्ययोः" इति भागवतोक्तेर्वा मायः शब्दो यस्यास्तां मुरलिकामुपाश्रितः । यद्वा, तासां बन्धुगृहादिभ्योऽयोगाय तल्लज्जादिव्यवच्छेदाय वा मायः शब्दो यस्यास्तामुपाश्रितः । यद्वा, स्वस्मिन् योगाय या मा मतिस्तामापयति प्रापयति स्वमधुरध्वनिना या सा योगमाया वंशी तामुपाश्रितः । यद्वा, अन्येष्वयोगाय मां मतिमापयति ध्वनिनैव तामुपाश्रितः । यद्वा, स्वस्मिन्नगां निश्चलां मां मतिमापयति मधुनादेनैव या वंशी तामुपाश्रितो यः स भगवान्।यद्वा, स्वस्मिन्योगायान्येष्वयोगाय या मा मतिः अगा निश्चला मतिस्तामदृष्टद्वारेणापयति या कात्यायनी स्वचरितवर्णनेन स्वसङ्गद्वारेणापयति या श्रीमती राधा मोहनद्वारेणापयति या स्वकान्तिः उद्दीपनद्वारेणापयति शरच्छोभा वनादिशोभा वा तामुपाश्रितः तत्रागमा इति पक्षे यः स इति पूर्ववत् । यद्वा, स्वस्मिन्योगायान्येष्वयोगाय वा याऽन्तर्यामिण्याः स्वस्यैव सा सङ्कल्पात्मिका प्रमा तस्यामुपाश्रितः । यद्वा दर्शनेनैव स्वस्मिन् योजयन्ती अन्येष्वयोजयन्ती या आत्मनो माऽङ्गश्रीस्तस्यामेवोपाश्रितः

श्रीरामनारायणकृतभावभावविभाविका ।

यद्वा, स्वात्मनः प्रार्थ्यमानब्रह्मादिदेवान् परित्यज्य भगवद्वक्षः समाश्रयणादर्शनेन स्वस्मिन् योगायान्येष्वयोगाय वा या मा उरसि स्थिरा लक्ष्मीः तस्यामुपाश्रितः । यद्वा, तत्र रासे सर्वासां गोपीनामात्मनश्च भाविप्रेमविह्वलत्वं सम्भाव्य क्रीडा तदुपकरणादिसाकल्यमापादयितुं विश्वकर्ममाययोः स्वलीलाप्रवेशाभावेन तत्सर्वमुपकरणादि योजयतीति योगा तत्र योग्या वा योगा स्वयोगैश्वर्यात्मिका वा योगा अघटनघटनापटीयस्त्वेन माया काचित् स्वरूपात्मिकैव शक्तिस्तामुपाश्रितः । यद्वा, तासामपि योगाय नृत्यरतिविहारादिना भगवतः संयोगाय माया कृपा यस्यास्तां राधामुपाश्रित एव रन्तुं मनश्चक्रे तत्कृपयैव भगवतस्ताभी रमणाय प्रवृत्तिः । अनेन भगवति भाववतां सर्वजनानां भगवद्रमणाय श्रीमत्याः राधायाः कृपा भवति तामाश्रितो भगवानपि तद्रमणे प्रवर्तत इति न तस्यां कदापि मात्सर्यादिसम्भावनालेशोऽपि यदा तद्भक्तानामपि न क्रोधमात्सर्यादिसम्भावना तदा भगवत्याःकिमु वाच्यम् किञ्च,यत्र स्वामिनः सुखदाने परिमिताशक्तिस्तत्र स्वभोगसङ्कोचभयात्पामराणां सापत्न्यभावो भवति यत्रापरिमेयशक्तिर्भगवान् स्वामी तत्र स्वभोगसङ्कोचभयासम्भवाद सम्भावित एव तद्गतानां मात्सर्यादिरिति भावः । यद्वा, भगवतो योगे एव मा यस्याः यस्या योगे एव वा भगवतो मा तस्यां राधायामुपाश्रित एव । यद्वा, स्वलीलागानश्रवणादिद्वारा सर्वस्याप्यज्ञमुमुक्षुब्रह्मविज्जनस्य योगाय तत्प्राप्तये माया करुणा यस्या राधायास्तामुपाश्रितः । यद्वा, सर्वस्यापि जनस्य भगवति योगायाभेदाय मां प्रमां तत्त्वज्ञानं लीलादिसुखे योगाय निवेशाय वा मां प्रेमश्रियम् आपयति या राधा तामुपाश्रितः । यद्वा, सर्वस्यापि सखीभावानुगतस्य तदानीन्तनगोपीजनस्याधुनिकस्य वा तदनुगभावस्तस्य जनस्य भगवल्लीलादौ योगाय योग्यत्वाय भगवता योगाय वा स्वांशभूतां मां शोभाम् आपयति या राधा तामुपाश्रित एव रन्तुं मनश्चक्रे इत्यनेनेश्वरीं राधां विनेश्वररमणासम्भवाद्यत्र यत्र भगवद्रमणं जातं भाव्यं वा भावनाप्रभावेन तत्र तत्र राधाकृपया तदंशमाप्रवेश इति ध्वनिः । यद्वा, भगवानपि यामुपाश्रितः सा राधाऽपि पूर्वोक्तसर्वपक्षा अत्रानुसन्धेयाः ता अज्ञरूपा मुमुक्षुरूपा ज्ञानिरूपाः प्रजा निशा मल्लिका गोपीश्च वीक्ष्य रन्तुं मनश्चक्रे सा कथम्भूता अयोगमा अन्यासामयोगाय मा शोभा यस्याः यां दृष्ट्वा नान्यस्यां कृष्णमनो रमते । यद्वा, यद्योगे एवांशप्रवेश एव सर्वासां मा भवतीत्यकारप्रश्लेषं विना योगमा । यद्वा, य इति भागवद्विशेषणतया पृथग्व्यवस्थाप्य अगमा अकारो हरिस्तत्कृता एव मा मतिर्यस्याः । यद्वा, अगा निश्चला मा शोभा यस्या इति अगमा । यद्वा,अन्यत्र लक्ष्म्याः "चञ्चला चपला चला" इति प्रसिद्धत्वात् इयं तु अगा हरिगता अगा निश्चला वा लक्ष्मीरेव । यद्वा, अगमा सर्वथा दुरवगममाहात्म्या सा यदा रन्तुं मनश्चक्रे तामुपाश्रितो भगवानपि मनश्चक्रे इति भावः । अयमत्राभिप्रायः मनसो जीवोपाधित्वेन ईश्वरस्य मन उपाध्यभावान्मायायाश्च स्वरूपात्मकलीलाप्रवेशाभावात् रन्तुं स्वरूपात्मकमेव मन आविर्भावयामास "आकाशशरीरं ब्रह्म सत्यात्मप्राणारामम् मन आनन्दं शान्तिसमृद्धममृतम्" इति श्रुतेः । आ समन्तात् रासमण्डले रतिविहारादौ व्यापकतया चिद्रूपतया चकासते प्रकाशते इति तादृक् शरीरं ब्रह्म कृष्णः सत्य आत्मा देहः प्राणा मुख्या इन्द्रियाणि च आरामो धाम क्रीडोपस्करं च यस्य स्वरूपात्मकत्वादत एव मनश्च सुखस्वरूपं यस्य तथा शान्तिसमृद्धं दुःखशून्यम् अमृतमनश्वरमित्यर्थः ॥ १ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

श्रीमते नन्दसूनवे नमः ॥

गोपाङ्गनागुणाकृष्टचेतोखिलजनाश्रयः ।
तस्य कृष्णस्य पादाब्जमाश्रये ऽभीष्टसिद्धये ॥
उमां श्रीबालगोपालतीर्थान् व्यासमुखान्मुनीन् ।
विघ्नहर्तॄन् गणेशादीन्पण्डितांश्च विमत्सरान् ॥
अथ पञ्चभिरध्यायैः रासक्रीडामहोत्सवः ।
वर्ण्यते मुनिना कृष्णसद्गुणाकृष्टचेतसा ॥
ऊनत्रिंशे कलं वेणोः श्रुत्वा गत्वा व्रजस्त्रियः ।
वने वादादिकं प्रापुः कान्तेनेति निगद्यते ॥

इन्द्रवरुणादिविजये किं चित्रं ब्रह्मादिजयसंरूढदर्पःकामोऽपि भगवता पराजितः इति ख्यापनायक्रमप्राप्तां भगवत्कृतां रासक्रीडां वर्णयितुमुपक्रमते-भगवानपीति । कामकृतो हि ब्रह्मादिपराजयः प्रसिद्धः तदुक्तम्—

"अहल्यायै जारः सुरपतिरभूदात्मतनयाम्—
प्रजानाथो ऽयासीदभजत गुरोरिन्दुरबलाम् ॥
इति प्रायः को वा न पदमपथे कारितं मया—
श्रमो मद्बाणानां क इह भुवनोन्माथविधिषु" ॥ इति ।

ये तु स्मरादिकमपहाय तपश्चर्यायां रताः न तैः कामः पराजितः किन्तु तस्मात्पलाय्य ते गतास्तत्रापि तत्कृतनग्नादिदुर्दशां प्राप्ताः तदुक्तम्—

"स्त्रीमुद्रां झषकेतनस्य विकसत्सर्वार्थसम्पत्करीम्—
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ॥
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः—
केचित्पञ्चशिखीकृताश्च जटिलाःकापालिकाश्चापरे" ॥ इति ।

श्रीकृष्णस्तु शतकोटियूथगोपाङ्गनारथसैन्यवता कामेन युद्ध्यमानोऽपि आत्मन्यवरुद्धसौरतत्वात्तं विजितवानित्यनेन ग्रन्थेन ख्याप्यते-योगमायामुपाश्रितः"आत्मारामो ऽप्यरीरमत, साक्षान्मन्मथमन्मथः, आत्मन्यवरुद्धसौरतः" इत्यादिषु स्वातन्त्र्याभिधानात् रासलीलोत्सवश्च नववर्षवयस्त्वे सत्याश्विनपूर्णिमायां यतः सप्तमवर्षे वयसि वर्तमाने भगवति कुमारिकाणां व्रतचर्या ततःसप्तवर्षोत्तरकार्तिकस्य अमावास्यायाम इन्द्रमखभङ्गः तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः द्वितीयायां भ्रातृभोजनोत्सवः तृतीयाप्रभृति इन्द्रकृतोपद्रवमवलोक्य नवमीपर्यन्तं गोवर्द्धनधारणं दशम्यां गोपानां विस्मयं कर्मबाहुल्यम् एकादश्यां गोविन्दाभिषेकः द्वादश्यां वरुणलोकगमनादि पौर्णमास्यां नन्दादीनां ब्रह्महृदनयनादि ततश्च शरदः समाप्तिरिति शुक उवाच इत्यनेन कोमलालापचञ्चुकोक्तिः एवमिदं भागवतं कोमलचित्तस्यैव श्रोतव्यं चित्ताकर्षकं च तत्रापि रासक्रीडोत्सववर्णनं

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

सर्वस्यापि श्रीमद्भागवतस्य सारभूतमिति ध्वनितं परमहंसशिरोमणिना श्रीशुकेन परमप्रेम्णा वर्णितोऽयं रासक्रीडोत्सवोऽतः परमहंसैरप्यादरेण श्रोतव्य इत्यपि सूचितं भगवानपि—

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना" ॥

इत्युक्तषड्विधैश्वर्यवानपि रन्तुं मनश्चक्रे शृङ्गाररसालम्बनशिरोमणिभूतानां शतकोटियूथविलासिनीनां सौस्वर्यसौन्दर्याधरामृतसौरभ्याणि परमशोभनानि स्वीयश्रोत्रादीन्द्रियैरनुभवितुं स्वीयानि तानि तदीयश्रोत्रादिभिस्ता अनुभावयितुमिच्छितवान् एतावन्तं कालं गोप्य एव वर्द्धमानानुरागचञ्चलचित्ततया रन्तुं मनश्चक्रिरे भगवांस्तु वयोविशेषं प्रतीक्षमाणो न चक्रे सम्प्रति प्राप्तवयाः ताः "मयेमा रंस्यथ क्षपाः" इति पूर्वं प्रतिज्ञाता रात्रीश्च वीक्ष्य भगवानपि रन्तुं मनश्चक्र इत्यपरोऽर्थः पूर्णोऽपि ता रात्रीरुद्दीपनत्वेनानुभूय ।किमु ताः गोपीर्वीक्ष्येति तासां सौन्दर्यप्रेमाद्यतिशयो व्यज्यते। यद्वा, ता इति प्रसिद्धार्थकतत्पदप्रयोगान्नानागुणवतीरिति तासामुत्कर्षो बोधितः ताः इति बहुवचननिर्देशाद्ब्रह्मरात्र उपावृत्त इति वक्ष्यमाणत्वाच्चैकस्यामपि रात्र्यां तादृशविलासानुकूलाऽसंख्यातरात्रीः स्वसङ्कल्पिताः वीक्ष्येति बोधितं तथाच तादृशरमणानुकूलाः कोटिकोटिरात्रीः स्वसङ्कल्पिताः वीक्ष्येति एवं तत्वमन्मथा राकारात्रेश्चन्द्रोदयात्पूर्वमप्रवेशाच्चन्द्रोदयस्य च वीक्षणानन्तरं वर्ण्यमानत्वाद्वीक्ष्येत्युक्तिरसङ्गता स्यात्। अथ वृन्दावनशोभामप्युद्दीपिकामाह—शरदिति। शरदा हेतुभूतया यद्वा शरदेति टाबन्तत्वात् शरद्यामपि उत्फुल्ला मल्लिका यासु उत्फुल्लाश्च ताः मल्लिकाश्चेति वा एतद्वाक्यतः "कुन्दस्रजः कुलपतेरिह वाति गन्धः" रेमे तत्तरलानन्दिकुमुदामोदवायुना" इति वक्ष्यमाणत्वाच्च वृन्दावनमाहात्म्यात्सर्वकाले सर्वपुष्पविकासो बोधितः रन्तुं मनश्चक्र इत्युक्त्या आन्तरमिदं रमणं नतु बाह्यं नराविडम्बनमात्रमिति सूचितम् अन्यथा रेमे रन्तुमारेभे इति वा ब्रूयात् तत्रापि चक्र इत्यात्मनेपदप्रयोगादपि न गोपिकानुरोधेन तदर्थमेवापि तु स्वस्य सुखार्थमपीति सूचयति यथा—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः" ॥

इत्यात्मारामाणामपि मुनीनां चित्ताकर्षणसामर्थ्यवत् गुणाकृष्टचेतसां भगवद्गुणेषु रमणमुक्तं तद्वद्गोपाङ्गनानां तादृशगुणाकृष्टचेतसो भगवतोऽपि तासु रमणमुक्तम्। ननु, स्वल्पकाले कथमऽनल्पकालसमयेशः कथं च स्वल्पदेशे तावद्यूथगोपाङ्गनाक्रीडनसम्भवः? कथञ्चैकस्याऽसङ्ख्यातगोपिकाभिः रमणसम्भव ? कथञ्चाऽमनस्कस्य भगवतस्तद्रमणासक्तमनस्त्वमित्यादिशङ्काजालनिरासायाह—योगमायामुपाश्रित इति अघटितघटनापटीयसीति मायां तु प्रकृतिं विन्द्यात्' मम माया दुरत्यया"इत्यादिनोक्तं योगमायामुपाश्रितः स्वाश्रितां तां कर्तव्यलीलोपकरणसाधनत्वेनाश्रितवान् यद्वा योगः स्वेनगोपीनां संयोगस्तदर्थम्मा मायां कृपामाधिक्येनाश्रितः यद्वा स्वस्मिन्वात्सल्यरसाक्रान्तचेतसां नान्दादीनान्तया तया लीलया आनन्दसागरे निमज्जितवान् पुनश्च ब्रह्मह्रदप्रवेशादिना स्वस्वरूपानन्दप्राप्तिपर्यन्तामप्यवस्थां दर्शितवान् यास्तु सखीभावमाश्रिताः चिरकालमारभ्यस्वेन रमणोत्कटोत्कण्ठावत्यस्तासां गोपाङ्गनानां मनोरथपूर्तिः कथं कृतवानित्यपेक्षायामाह—भगवानपीति। यद्यप्यसौ पूर्णकामस्तथापि पूर्वकोटिजन्मसु अस्मिंश्च जन्मनि उपाश्रितः रमणार्थमेव सम्यगाराधितोऽतस्ताभिरन्वितस्तासामभिलषितरमणानुरूपा रात्रीश्चक्रे एकस्यांरजन्यामसङ्ख्यातरजनीप्रदर्शनसङ्कल्पं कृतवान्, कथम्भूताः? शरदोत्फुल्लाः मल्लिकाः यासु शरदोत्फुल्लमल्लिकाश्च चक्रे इति वा मल्लिकेति पुष्पेतराणामप्युपलक्षणं तथा अमना अपि भगवान् रमणानुरूपं मनोऽपि चक्रे इदं च सर्वमघटितघटनापटीयस्याऽस्य योगमायाशक्त्या सम्पादितवानित्याशयेनाह—योगमायां वीक्ष्य सर्वसम्पादनाय कटाक्षेणोद्बोध्य मम योगमाया एतस्या एतासां मनोरथपूर्तिर्भविष्यति तत्र मम का हानिरित्याशयेन ता वीक्ष्येति वा। यद्वा, तासां योगार्थं मायां वीक्ष्य तथाच मयि केन संयोगेन नास्ति मम पूर्णकामत्वादिस्वरूपहानिरिति भावः। महाभगवानपि योगमायामुपाश्रितो योगमायामधिष्ठायाप्रकटीकृतनन्दनन्दनविग्रहस्ताः स्वस्मिन्नासक्तस्वान्तगोपीर्वीक्ष्यालोच्य तन्मनोरथपूर्त्यर्थं गान्यादिकं चक्रे इत्यर्थः। यद्वा, ता रात्रीर्वीक्ष्य तासां मनश्चक्रे रन्तुं योगमायामधिष्ठाय स्थितः योगमायया कृष्णेन सार्द्धं सम्यक् रमणं कृतवत्यो वयमिति तासां मनसि दृढतरां प्रतीतिमुत्पादयितुं प्रवृत्त इत्यर्थः। पञ्चाध्यायात्मकोऽयं सर्वशास्त्रसारसर्वस्वभूतो ग्रन्थ इति सूचयितुं मङ्गलाचरणार्थमादौ भगवानिति पदं प्रयुक्तम्। अत्र भक्तिशान्तिरसप्रधाने श्रीमद्भागवते पारमहंस्यां संहितायां प्रसङ्गात्परशास्त्रार्थं शृङ्गाररसमनुवदता मुनीन्द्रेण स्वसिद्धान्तोऽपि गूढतया निर्दिष्टः, अत एव शृङ्गारकथापदेशेन विशेषतो निवृत्तिपरेयं पञ्चाध्यायीति श्रीधरस्वामिभिरप्युक्तं—

"निवृत्तिमार्गसंसक्तचेतसां विदुषां मुदे।
व्यक्तीकारोम्यहं पञ्चमिमं कृष्णप्रसादतः" ॥

सविशेषसुखं निखिलमपि दुःखसम्भिन्नमेव—

"ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय! न तेषु रमते बुधः" ॥

इति भगवद्वाक्यादतो विवेकवता निर्विशेषब्रह्माविर्भावाऽभिलाषुणा तत्प्रतिबन्धनिवृत्तिरेव सर्वोपायैः सम्पाद्येति ब्रह्मरात्र्यावच्छिन्नकालपर्यन्तं तुच्छीकृतकोटिकन्दर्पविग्रहेण भगवतापि रममाणानां गोपाङ्गनानां दुःखनिवृत्तिः तृप्तिश्च न सम्पन्नेति वर्णयता भगवता मुनिना सूचितं तदुक्तम्—

"न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥

इति। एवं विधविवेकोत्पत्तियोगे इह जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठाननितान्तनिर्मले स्वानुग्रहपात्रेऽन्तःकरणे श्रुतिरूपस्वकान्ताभिरभिरन्तुं भगवानपि मनश्चक्रे "यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुत्या भगवदनुग्रहादेव श्रुत्यर्थविचारे प्रवृत्तिर्भवति नान्यथेति भावः।भगवदनुग्रहपात्रताबोधनायाह—ता रात्री रसङ्ख्यातजीव-

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

जन्मसु अनुभूता महच्चित्तमनोबुद्धिरूपा अन्तःकरणवृत्ती रात्रीः अज्ञानरूपतमोव्याप्तत्वादात्मतत्त्वावरणरूपत्वाद्रात्रीसदृशाः सम्प्रति शरदोत्फुल्लमल्लिकाः शरत्स्थानापन्नेन भगवदाराधनलक्षणेन निष्कामकर्मणा अन्तःकरणशुद्धिसाधनेन फुल्ला विकसिताः माल्यादिपुष्पस्थानापन्नाः शान्त्यादयो यासु ताः "वीक्ष्य शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धान्वित आत्मन्येवात्मानं पश्येत्" इति श्रुतेः । ननु, निर्गुणस्य जातिगुणादिशब्दप्रवृत्तिनिमित्त रहितस्य श्रुतिप्रतिपाद्यत्वासम्भवात्कथं ब्रह्मणि तासां रमणमित्याशङ्क्याह–योगमायामुपाश्रित इति । तथाच तन्निरसनेन निर्विशेषब्रह्मोपलक्षणमेव तासां रमणमिति भावः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नौमि सर्वेश्वरं कृष्णं श्रीगुरुं तत्पदाश्रयम् ।
पूर्वाचार्यं दयासिन्धुं श्रीनिम्बार्कं हरिप्रियम् ॥
कन्यावस्त्रापहारादिलीलां षड्वार्षिको हरिः ।
हेमन्ते कृतवान् भूयः सप्तवर्षः सुशोभनम् ॥
गिरेः पूजादिकं कर्म शरदं तेऽखिलेश्वरः ।
हल्लीसाख्यं महानृत्यं कृतवान् वै तदोपरि ॥
रमणीये शरत्काले राज्यां राज्यां स्वयं क्रमः ।
अनेनैव पुराणेन ज्ञातव्यो वै सुबुद्धिभिः ॥
सर्वेषां संयमः प्रोक्तस्तत्स्वभावानुसारतः ।
प्रोच्यते पञ्चभिः सर्वजयिनः पुष्पधन्विनः ॥

तत्रोनत्रिंशके ऽध्याये कलगीतप्रणोदिताः ।
गोप्यश्चक्रुः सुसम्वादं कृष्णेनेति निरूप्यते ॥

ताः रात्रिरिति " यातावलाः ! व्रजं सिद्धाः मयेमा रंस्यथ क्षपाः " इति प्रतिश्रुताः वीक्ष्य रन्तुं रासक्रीडां कर्तुं मनश्चक्रे गोपाङ्गनाभिरिति शेषः । ननु , स्वस्वगृहगताभिः अजिज्ञासितनृत्यवाद्यगानज्ञाभिरासक्रीडोचितपदार्थवर्जिते वने कथं रन्तुं मनश्चकार इत्यत आह–योगमायां लीलासौष्ठवार्थं प्राङ्नियुक्तां स्वशक्तिभूताम् । यद्वा , युज्यते इति योगः प्रयोजनं तदर्था माया वयुनात्मिका दुर्घटघटनापटीयसी वासुदेवासाधारणसङ्कल्परूपा तयैव वनेपि सर्वविहारोपकरणसिद्धिस्तासां च सर्वकलाकुशलता तद्भर्त्रादीनां चानसूयत्वं चेति बोध्यम् तामुपाश्रित्येत्यर्थः । ननु, परदारारामः सह लीला लोकविरुद्धेत्यत आह–भगवानिति । समस्तैश्वर्यादिगुणनिधिः सर्वात्मा पूर्णकामः स्वात्मिकाभिः सह विहरन् न लोकविरुद्धं करोति यथा पाणिग्रहणविधिनापि स्वकीयया विहरन् जनो न लोकविरुद्धं करोत्यन्यथा दण्डयो भवतीति भावः । शरदा उत्फुल्ला मल्लिकाः यासु ताः अनेन रासोत्सवोद्दीपनता रात्रीणां वर्णिताः ॥ १ ॥

श्रीवैष्णवशरणकृतसिद्धान्तार्थदीपिका ।
श्रीमते रामानुजाय नमः ॥

दृष्टिपथपतितवनितातूर्णीमौनकथादर्शीयासम् ।
कञ्चन विटावतंसङ्कये मुनिमानसैककलहंसम् ॥

अथ श्रीभागवताभिधश्रीकृष्णविग्रहे पञ्चप्राणभूतायां श्रीरासपञ्चाध्याय्यां स्वरसनां पावयितुं काचित् सिद्धान्तार्थदीपिका नाम टिप्पणी निवेश्यते ।

"परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे ! आख्यानं यदधीतवान् ॥"

इत्युक्तरीत्या उत्तमश्लोकलीलाविष्टचेता मृदुलाच्छवालुके सुरसरित्तटे ऽनेकसुरनरमुनिजनैरावृते परीक्षित्सभाजेपरमासने सन्निविष्टः परमपुरुषस्य वसुदेवगृहजन्मारभ्य बाल्यादिलीलाः कथयन् राजानं परीक्षितमुत्समाधिकारिणं दृष्ट्वा "नापृष्टः कस्यचिद् ब्रूयात्" इति नियममनादृत्य—

"ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत"

इति वचः सार्थयन् पञ्चाध्याय्या व्रजसुन्दरीभिः सह श्रीहरे रासक्रीडावर्कुं वादरायणिरुवाच—भगवानपीति । अत्रत्यभगवच्छो ब्रह्मशिवयोरुपास्यं अवाप्तसमस्तकामम् ऐश्वर्यादिषड्गुणपरिपूर्णं पूर्णपुरुषोत्तमं वक्ति—

"अथापि यत्पादनखावसृष्टं ।
जगद्विरिञ्चोपहृतार्हणाम्भः ॥
सेशं पुनात्यन्यतमो मुकुन्दात् ।
को नाम लोके भगवत्पदार्थः" ॥

इति प्रथमोक्तेः—

"धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः ।
यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये" ॥

इति वक्ष्यमाणत्वाच्च अपिना अजस्यसामग्र्या तादृशात्मारामामनोविकारजनकता बोध्यते भगवानपि शरदोत्फुल्लमल्लिकास्ता चीरहरणलीलायां गोपसुन्दरीभ्यः प्रतिज्ञातास्ताः शारदी रात्रीर्वीक्ष्य रन्तुं मनश्चक्रे यतो योगमायामुपाश्रितः योगो गोपीनां राससुखप्रापणं तस्मै या माया दया तामुपाश्रितः यद्वा, अखण्डितब्रह्मचर्यो वैराग्यवानपि गोपीष्टयोगाय कपटमाश्रितः नवस्तुतस्तथा रन्तुमना इत्यर्थः ।"भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु " इति मेदिनीकोशात् । रमणं च भगवतः सर्वत्र स्वानुरक्तभक्तजनमनोरथपूरणमेवेति सिद्धान्तः । यद्वा, योगमायामघटितघटनापटीयसीं निजासाधारणशक्तिं तया विना व्रजवासिजनमोहनासम्भवात् "नासूयन् खलु कृष्णाय मोहितास्तस्य मायया" इति वक्ष्यमाणत्वात् । यद्वा, योगमायां निजप्रेयसीनां योगाय मायारूपां मुरलिकां नहि विचित्रकार्यकरीं वंशीं विना गोपवनिताकर्षणं सम्भवति, "जगौ कलं वामदृशां मनोहरम्" इत्यव्यक्तमधुरमनोहारिस्वनस्य तद्व्यतिरेकेणासम्भवात् ॥ १ ॥

भाषा टीका ।
श्रीरासविहारिणे नमः ।

स्मरसुरभिलचारुस्मेरताराढ्यपूर्णः
व्रजसुतनुमनोभूकेलिपर्याप्तकालः ।
विहरतु विरसज्राट् कश्चिदाश्माकचित्ते
विहृतिमदयवाऽस्माश्चित्तमेवास्तु तस्मिन् ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि–हे राजन् ! श्रीकृष्णचन्द्रने का

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

भाषा टीका ।

कात्यायिनी देवी के पूजा के प्रकरण में गोपकन्यान तें प्रसन्न होय के जिन रात्रीन की प्रतिज्ञा करी हीं वे रातें प्राप्त होत भईं, कैसीहैं ? कि—शरद काल में चमेली जिन में फूलि रही हैं, ऐसी उन रात्रिन कों देखिकें श्रीकृष्णचन्द्र रमण करिवे कों मन करत भये, ताई सों आपने अपनी योगमाया को आश्रयलियो या जगे योगमाया कहिवे तें अचिन्त्य-शक्ति, श्रीराधिकाजी,श्रीवंशी जी, इत्यादिकन को ग्रहण होय है सो संस्कृत टीकान में बहुत विस्तार होयवे ते नहीं लिख्यो ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजश्चन्द्र उदगात् उदितः, किं कुर्वन् ? दीर्घकालेन दर्शनं यस्य सः प्रियः स्वप्रियायाः मुखमरुणेन कुङ्कुमेन यथा विलिम्पति तथा प्राच्याः ककुभो दिशो मुखं शन्तमैः सुखतमैः करैरश्मिभिररुणेनोदयरागेण विलिम्पन्नरुणीकुर्वन्नित्यर्थः । स प्रसिद्ध उडुराजः तथा चर्षणीनां जनानां शुचस्तापग्लानीर्मृजन्नपनयन् ॥२॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

एवं निजरिरंसया चन्द्रमपि प्राचीदिशा सह प्रियमेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यञ्जयन्निव तद्रिरंसास्मरणेनोद्दितभावविशेषः प्राचीदिशा नायकया सह चन्द्रस्य नायकभावप्रदर्शनेनोदयमाह—तदेति । यदा मनश्चक्रे तदानीमेव उडूनां तारकाणां राजेति ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितं तासां च पूर्णचन्द्रप्रकाशतयाविवक्षया परिवारत्वापेक्षया च उदयस्य गौणतयोक्तिः विशेषेण लिम्पन्निति पूर्णचन्द्राभिप्रायेणैव पूर्णत्वं च तस्य पौर्णमास्यां किं वा तथा विनाऽपि तिथ्यन्तरे भगवद्रिरंसापेक्षया शन्तमैस्सुतमैरित्यर्थः । सर्वतापापहारित्वात् सः कामाम्बुराशिपरिवर्द्धनतया प्रसिद्धः न केवलममुना प्राचीदिश एव तापोऽपहृतः किन्तु सर्वेषां जनानामपि इत्याह, चर्षणीनामिति शुचः । शरदर्कजसन्तापदुःखानि एतच्च श्रीभगवतो रिरंसोद्दीपनद्वारा प्रायो गोपकन्यावर्गाचिरविरहतापापनोदनाभिप्रायेण जगत्पूज्यानां तासां शुगपनोदनेन जगतामेव स्वतः शुगपनोदन सिद्धेः प्रियः प्रियायाः इवेति सरागत्वसाधुरत्वानन्यत्वादिनाऽन्योन्यं रुचिविशेषो दर्शितः । अत एव शोकाश्रूणि मार्जयन् यथासौ परमसुखकरेण लिम्पति दीर्घदर्शन इत्यनेन परमोत्कण्ठ्यं सूचितम् एवं सर्वमिदं श्रीभगवद्रिरंसाविभावनमूह्यम् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं निजरिरंसया चन्द्रमपि प्राचीदिशासह प्रियः प्रियेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यञ्जयन् तासां रात्रीणामुत्तमाङ्करूपायामस्यामभिव्यक्तसर्वमङ्गलसूचकमभ्युदयमाह—तदेति । उडूनां राजेति ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितं रश्मिभिररुणेनेति करणद्वयम् उभयेषामपि साधकतमत्वात् रश्मिधृतेन रागेणेत्यर्थः । विशेषेण लिम्पन्निति पूर्णचन्द्राभिप्रायेणैव ततो राकैवेयं तिथिः पूर्णत्वं च तस्य तिथ्यन्तरे श्रीभवदिच्छापेक्षया तदेरयुक्तिस्वारस्यात् किम्वा उत्फुल्लमल्लिकारात्रीर्वीक्ष्येति वसन्तस्याप्युद्दीपनत्वेन सहजोद्गमौचित्यात् "राकेशकररञ्जितम्" इति वक्ष्यमाणानुसारेण तन्नियमेवेह तात्पर्यात् स इति ता इतिवत् न केवलमेवममुना प्राची दिश एव तापोपहृतः, किन्तु सर्वेषां जनानामपीत्याह—चर्षणीनामिति । शुचः शरदर्कजसन्तापदुःखानि यद्वा मनोदुःखानि भगवतः सर्वशक्त्याश्रयपरमशक्तिरूपाणां तासामनुल्लासोल्लासाभ्यां स्वत एव सर्वेषां तत्तद्भावात् श्रीकृष्णजन्मादिनादिवत् प्रियः प्रियाया इवेति सरागत्वसाधुत्वानन्यत्वादिनान्योन्यं रुचिविशेषो दर्शितः । अत एव तत्परिजनानां शोकाश्रूणि मार्जयन् यथाऽसौ परमसुखकरेण करेण लिम्पति तथेति व्यञ्जितं दीर्घदर्शन इत्यनेन परमोत्कण्ठ्यं च सूचितम् एवं सर्वमिदं श्रीभगवतो रिरंसाविभावनमेवोक्तम् ॥ २ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

करैररुणेन तद्गतोदयरागेण २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा यदा रन्तुं मनश्चक्रे तदैव तत्प्रीतये स शारदः उडुराजश्चन्द्रः उदगादुदितः, किं कुर्वन् ? दीर्घेण कालेन दर्शनं यस्य सः चिरं प्रोष्यागतः प्रियः स्वप्रियायाः मुखमरुणेन कुङ्कुमेन यथा विलिम्पति तथा प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखतमैः करैः रश्मिभिररुणेनोदयरागेण विलिम्पन् अरुणीकुर्वन्नित्यर्थः । तथा चर्षणीनामोषधीनां मनुष्याणां च शुचस्तापग्लानीर्मृजन्नपनयन् चेतनाचेतनतापं निराकुर्वन्नित्यर्थः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उडुराजश्चन्द्रः प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखकरैः कुङ्कुमपुष्पवदरुणैः "कुम्भमन्दाग्नकौ" इति वाणोः ककुभिति योगात्मकः शब्दः भृशं मन्दगामिन्या प्राच्या सौन्दर्यातिशयेन पूज्यायाश्चियो मुखं यौवनातिशयेन उद्भूतदरूपं जनयन्ननुराग-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जनकत्वेन राजशब्दवाच्यः पुरुषः शन्तमेनारुणेन करेण हस्तेन कलहोद्भूतदुःखाश्रुकाविलं यथा विलिम्पति निमार्ष्टि तथेति शब्दाक्षिप्त इति शेषः । कीदृशः उडुराजः चर्षणीनां सस्यानां खरकिरणसन्तापम्लानलक्षणाः शुचः मृजन् परिहरन् हिमकिरणकरेण पाणिना वा दीर्घदर्शनः दीर्घकालाद्दर्शनं यस्य स तथा अन्यत्र बहुकालप्रवासेन दृष्टिमार्गं प्राप्तः प्रियो भर्ता दर्शनीयो वा ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

करैररुणेन तदुदयरागेण ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

फुल्लमल्लिकाश्च वसन्त उन्मुखमल्लिका ग्रीष्मे फुल्लमल्लिकाः कर्मधारये पुंवद्भावात्सिद्धम् एतेन शरद्वसन्तग्रीष्मसम्बन्धिन्यो रात्रय एकत्र मिलिताः सत्योऽशीत्युत्तरशतरात्र्यभिमानिन्यो देवता एव युगपदागता इत्यर्थः । न केवलं शारद्य एव भगवानिति ऐश्वर्यपरं तथा सति मातापितृसमीपे पूर्ववदेकरात्रमिव शयितवदासीत् इदं हि तदैश्वर्यम् ॥ *॥ तदा उक्तप्रकारासु सर्वास्वेव रात्रिषु पूर्णत्वेन चन्द्रमा अप्येक एव नायकत्वे (न) नासीदित्याह—तदोडुराज इत्यादि । तदा तस्मिन्नेव समये यदा भगवान् रन्तुं मनश्चक्रे तदैव सेवकस्येयमेव रीतिरीश्वरेच्छासमकालमेवोपसत्तिरिति यत् स इति पूर्णत्वेन प्रसिद्धः उडुराजः उदगात् उदियाय किं कुर्वन् करैः किरणैः प्राच्याः ककुभो मुखम् अरुणेन अरुणिम्ना गुणवचनोयं विलिम्पन् रञ्जयन्नित्यर्थः । यद्यपि बह्वीनां रात्रीणां पतिस्तथापि प्राचीदिगेव तस्य प्रियेति तामेवादौ सादरमनुनयन् पुनः किं कुर्वन् चर्षणीनां जनानां शुचो मृजन् निर्मलीभावं कुर्वन् तत्र दृष्टान्तः प्रियः श्रीकृष्णः सर्वासां व्रजदेवीनां वल्लभोऽपि चर्षणीनां सखीजनानां शुचो मृजन् अरुणेन कुङ्कुमेन करैः करव्यापारविशेषैः प्रियाया राधाया मुखं लिम्पन्निति वाक्यार्थोपमा कीदृशः उडुराजः प्रियो वा दीर्घदर्शनः बह्वीषु रात्रिषु परिपूर्णतयैकरूपेण वर्तिष्यमाणत्वात् दीर्घम् अपरिच्छिन्नं दर्शनं यस्य पक्षे प्रियया सह दीर्घं सर्वकालीनं दर्शनं यस्य स्वाधीनभर्तृकत्वात्तस्याः अथवा दीर्घदर्शनो दीर्घलोचन इत्यर्थः ॥ २ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नूतने तस्मिन्मनसि देवता नास्तीति अनधिष्ठितं च कार्यं न साधयिष्यतीति तदधिष्ठातृदेवं चन्द्रं च ससृज इत्याह तदोडुराज इति । यदैव मनः कृतवान् तदैव तस्याधिदैवतमुडुराजः उदगात् उदितो जातः यद्यप्येकदा रात्रयो दृष्टास्तथापि क्रमेणैव तासां स्थितिः भगवन्मनश्चन्द्रस्याधिदैविकत्वात् पूर्णश्च सः निष्कलङ्कश्च मनस्येवाविर्भूते तस्याविर्भावः क्रीडायामुपरतायामुपरतिः मध्याकाशपर्यन्तमेव गमनं नास्तमयः कदाचिदपि सोऽपि चन्द्रः स्त्रीणां मनांसि उडुस्थानानीति तेषामपि रक्षकः इदं प्रथमतया जात इति पूर्वस्यामेव दिशि तस्योदय उच्यते सा दिग्देवानामिति तस्या दिश इन्द्रो देवता अधिपतिश्च इदानीं भगवानेवेन्द्र इति तस्य रेतोरूपः तस्यामुद्गतः अतः प्राच्याः ककुभः मुखं मध्यभागं स्वकरैः स्वकिरणैः विलिम्पन् उदगात् तस्या मुखेन रागः स्थितः प्रतिस्पर्धिन्यां सूर्यसम्बन्धेन रागसम्भवात् अतः अस्या अपि मुखं कुङ्कुमसदृशैः करैरारक्तं क्रियते यदि चन्द्रः स्वदिशो मुखं न रञ्जयेत् तदा भगवन्मनोऽपि स्त्रीणां हृदयं न रञ्जयेत् कराः शन्तमाः शीतलत्वात् तापहारकाः । किञ्च, अरुणेन गुणेन कृत्वा अत्यन्तं कल्याणरूपाः अरुणो हि रागप्रधानः पुरुषोऽपि यद्यनुरागेण स्पृशति तदा सुखं भवति । ननु, अस्य चन्द्रस्य यदि अधिष्ठातृत्वमात्रं तदा मनस्येव उदयो भवेत् यद्यन्धकारनिवृत्तिः प्रयोजनं तदा भगवतैव अन्धकारो निवर्तेत यदि वा उद्दीपकत्वं तदापि भगवतैव तत्सम्भवः अतोऽस्यासाधारणं कार्यं वक्तव्यमिति चेदत आह—स चर्षणीनां शुचो हरन्निति । चर्षयः सर्वत्र परिभ्रमणशक्त्यः ताः सर्वत्र परिभ्रान्ता अपि न क्वापि परमानन्दसम्बन्धिन्यो जाताः यदि वा कश्चिन्मुच्येत तथापि ता न प्रवेशं लभन्ते ततः पूर्वमेव ता निवृत्ता भवन्ति अतस्तासां शोकस्तिष्ठत्येव चर्षणीसहितानां जीवानां वा तासां शोकः इदानीमेव निवृत्तः शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वात् प्रायेण तदानीन्तना जीवाः तादृशशक्तियुक्ताः तस्मिन्नुदिते परमानन्दानुभवोऽवश्यं भावीति तथा सति प्रयोजनत्रयं दिग्देवताया मुखसम्मार्जनं चर्षणीनां शोकदूरीकरणं अन्धकारनिवृत्त्यादिश्च कण्ठोक्तं द्वयमपि तदेकसाध्यमिति वक्तुं दृष्टान्तमाह—प्रियः प्रियाया इवेति । दीर्घकाले दर्शनं यस्य महता कालेनागतो भर्ता प्रियः प्रियायाः पतिव्रतायाः शोकं दूरीकृत्य मुखसम्मार्जनं च करोति न चैतत्कार्यमन्यथा सिद्ध्यति ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदैवोद्दीपनानन्तरं च प्रादुर्बभूवेत्याह—तदा उडुराजश्चन्द्र उदगात् । किञ्च, न केवलमयमुद्दीपन एव अपि तु गोपस्त्रीरमणस्य तस्य प्रमाणीभूत इत्याह—ककुभः इति । दीर्घकालेन दर्शनं यस्य स प्रियो रमणः प्रियायाः स्वरमण्या मुखम् अरुणेन कुङ्कुमेन स्वकरधृतेन यथा विलिम्पति तथा प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखतमैः करैः किरणैर्धृतेन अरुणेन उदयरागेण लिम्पन्नरुणीकुर्वन्नित्यर्थः । स प्रसिद्ध एव चर्षणीनां—

> "अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः ।
> यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता"

इति षष्ठोक्तेर्मानुषजातीनां शुचः सन्तापान् मृजन् अपनयन् अयमर्थः कृष्णस्य स्वकुलादिपुरुषः सः पुरातनोऽपि द्विजराजोऽपि रमणाद्बहुतरस्त्रीमानपि प्राच्या दिशः इन्द्रभार्यात्वात् परस्त्रियो मुखं स्वकरैः स्पृशति स्पृशन्नेव स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोति यदि तदा कृष्णस्य तद्वंश्यस्य नवीनवयसो गोपजातेरल्पज्ञविवाहत्वात् स्वीयस्त्रीरहितत्वाच्च स्वसौन्दर्येण मानुषीजातीरानन्दतो गोपस्त्रीरमणे कः खलु दोष इति ॥ २ ॥

*एतत्सिद्धान्तं प्रथमश्लोकार्थः ।

विशुद्धरसदीपिका ।

अथ "प्रियमनुसुकृतां हि स्वस्पृहाया विलम्ब" इति न्यायेन यदैव भगवान् रन्तुं मनश्चक्रे तदैव तदभिप्रायमभिनयन् उडुराज उदगादिति सम्बन्धः । एवं च तद्देशगतानां चन्द्रीनां तदिच्छानुगतत्वम् "समानोदितचन्द्रार्कम्" इति बृहद्गौतमीयोक्तेः अत्र बहूनां तारकाणां राजेति उडुशब्देन राज्युद्धासिन्यस्तस्मिन् कान्तभावबत्यो व्रजाङ्गना अध्यवसीयन्ते किं कुर्वन् प्राच्याः ककुभः मुखम् अग्रभागं शन्तमैः करैः किरणैः अरुणेन गुणेनोपलक्षितैर्विलिम्पन् अरुणीकुर्वन् पक्षे प्राच्याः प्राचीनाया नित्यप्रियायाः इत्यर्थः । मुखमाननं करैः बहुत्वं व्यापाराभिप्रायेण अत्र करैररुणेनेति करणद्वयं वा उभयेषामपि साधकतमत्वात् ततश्च रश्मिधृतेन रागेणेत्यर्थः । पक्षे करधृतेन ततश्च "नेपथ्यरचनागम्या प्राच्या" इत्यनेन नवसङ्गमो रासक्रीडायामेवेत्यपि निरस्तं "यद्यम्बुजाक्ष" इत्यादौ वक्ष्यमाणत्वात् श्रुतिमुनिरूपाणां च नव एव एवेत्यविरोधः तथा तत्सम्बन्धेनोडुराजस्य पूर्णत्वमनुरागित्वं च विलिम्पन्निति सेवापरत्वं च तेन तस्यास्तस्याश्च स्वाधीनपतिकात्वं साधितं शन्तमैरिति मृदुस्पर्शशीतलत्वाद्यर्थां वैदग्ध्यं किं कुर्वन् चर्षणीनां "चरगतिभक्षणयोः" इत्यनुशासनात् वक्ष्यमाणगतिभक्षणादिमतां गृहं गतानां गोपीजनानां शुचः कदासौ प्रियोऽस्मान् मिलिष्यतीति रमयिष्यतीति चिन्तारूपाः । यद्वा, चर्षणा श्रीकृष्णं गन्तुं शीलं यासां ताः वस्तुतस्तु चर्षणीनां जनसमूहानां ततश्च योग्यत्वात् सखीजनसमूहानां शुचः तयोः प्रणयमानादिकृताः परस्परानासक्तिसम्भावनाम्लानीर्मृजन्नपनयन् एतदेव हि सख्यं यथा श्रीगोविन्दलीलामृते प्रहेलिकाप्रसङ्गे—

"तृप्ता स्वजनस्य तृप्तिमयिता दुःखे महादुःखिता—
लब्धैः स्वीयसुखालिदुःखनिचयैर्नोहर्षबाधोदया ॥
स्नेष्टाराधनतत्परा इह यथा श्रीवैष्णवश्रेणयः—
कास्ता ब्रूहि विचार्य चन्द्रवदने ता मद्वयस्या इमाः" ॥ इति ।

क इव प्रियाया इव इति नित्यप्रेष्ठत्वं दीर्घदर्शन इति दीर्घे दर्शने लोचने यस्य सः तेनोत्फुल्लत्वं निर्निमेषक्षणत्वञ्च सूचितम् । अत्र च वाच्यार्थपुरस्कारेणोद्दीपकतया चन्द्रोदये प्रस्तुतेऽप्रस्तुतस्य स्वाधीनपतिकावृत्तान्तस्योपमामुखेन स्वयमेव कविनाऽऽविष्कृतत्वादन्यापदेशध्वनिरयम्, यदाह ध्वनिकारः—

"शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः ॥
यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः" ॥ इति ।

केचित्तु प्राच्या इत्यनेनैन्द्र्या इत्युपलक्ष्य परकीयामध्यवस्यन्ति तन्मतेनप्राथम्यं स्यादित्युपसङ्गतेपणीयसङ्क्षेपः ॥ २ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततः किं वृत्तमित्यत आह—तदोडुराज इति । यथा यदैव भगवान् चर्षणीनां "चरगतिभक्षणयोः" इत्यस्मात् भोक्तॄणां जीवानां भगवन्मार्गगमनशीलानां वा शुचस्ता यत्र यार्ताः तत्तापोपशमनशमादिसाधनाशक्तिप्रयुक्तशोकान्वा प्रियतमत्वात्मसगवद्वियोगशुचो वा मृजंस्तेषां सुमनस्पदे हृदयाख्ये रन्तुं मनः करोति तदैव उडुराजः उडुषु मोहनैशतमोभ्यस्तद्धृदयवनकिञ्चित्प्रकाशनशीलेषु स्वयं प्रकाशमानेषु शमादिषु राजते प्रकृष्टाह्लादप्रकाशात्मिकया भक्तिप्रभया शोभते इति "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुरा" इत्यादिभिस्तैरुडुभिः शमादिभी राजमानो वा यो भजनानन्दचन्द्रः तथा ककुभः कं सुखं तद्रूपतयैव कुषु कुत्सितेष्वपि स्त्रीशूद्रादिषु पापयोनिषु दुराचारेषु च भातीति तथा—

"अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृह्णन्ति ये ते" ॥
"अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" ॥

इत्यादिवचनात् पुनः कीदृशः सभजनानन्दः प्रियः सर्वेषामपि विषयिमुमुक्षुमुक्तानां प्रेष्ठतमस्तथा दीर्घदर्शनः दीर्घमनपबाध्यन्दर्शनं ज्ञानं यस्मात् अत एव सः अतिविलक्षणः स तेषां तच्छुचः स्वयं शन्तमैरतिशयसुखरूपैरन्येषु करैः कं सुखं रान्तीति तथाभूतैः करैः स्वरश्मिरूपैः भगवल्लीलागुणगानतानवितानादिभिर्मृजंस्तथा प्राच्याः प्राक् सिद्धायास्तमो व्याप्ताया अपि धियो मुखं सत्त्वात्मकमुख्यभागं प्रियाया अरुणेन कुङ्कुमेनेवारुणेनानुरागरागेण विशेषतो विलिम्पन्नुद्गच्छति तथा यदा वृन्दावने रन्तुं मनश्चक्रे तदैव सभजनानन्दः सर्वत्रोदगात् । यद्वा, यदैव भगवान् रन्तुं मनश्चक्रे तदैवोडुभिरुडुसदृशैर्नानाहावभावकटाक्षादिभी राजते इत्युडुराजः शृङ्गारात्मको रसेन्दुः तथा ककुभः कं सुखं तद्रूपतया कौ पृथिव्यां पार्थिवदेहे प्राकृतेऽपि भातीति तथा तथा च किमु वाच्यं प्रेमरसानन्दात्मकगोपीदेहेषु तथा प्रियः सर्वमनोरमः तथा दीर्घदर्शनः दीर्घं दर्शनं यस्मात्तेन रूपेणात्मदर्शनीया अपि शृङ्गारेण दीर्घकालमनिमेषतया दर्शनार्हा भवन्ति किमु वाच्यमतिसुन्दरीणां तथा स अतिविलक्षणः चर्षणीनामुक्तधातोरेव कृष्णरसास्वादाय गमनशीलानां शुचः एतावत् कालं प्रियासङ्गमजनितविषादान् शन्तमैः सुखरूपैः करैः सुखप्रदैरनुकूलनायकतया कृष्णाचरितकेलिकौतुकाद्युद्दीपनविभावैर्मृजन् तथा तासां प्रियतमसङ्गमाभावपीतमुखम् अरुणेन सम्भावितसन्निहिततत्समागमोत्साहजनितारुण्येन प्राच्याः पूर्वाया नित्यकृष्णप्रियाया इव विलिम्पन्नुद्गतः । यद्वा, यदैव भगवान् रन्तुं मनश्चक्रे तदैव उडुसदृशर्तुषु राजते इत्युडुराज ऋतुराजः रकारडकारयोः सावर्ण्यमभिप्रेत्योक्त्या राजमानो वा तथा ककुभः कः स्वर्गस्तस्मादपि कुः भूमिर्विकासितसुमनोभिर्भात्यनेनेति तथा प्रियः प्रियतमकृष्णसारूप्यतया प्रेष्ठः तथा दीर्घदर्शनः वर्तमानशरत्समयात् दीर्घकाले सम्भावितं दर्शनं यस्य तथा स्वयमेव कालातिक्रमेण भगवद्रमणोत्साहेन प्रादुर्भूतत्वात्सबहुविलक्षणो वसन्तः विरहिणां शुचः करैः प्रियसङ्गतानां शन्तमैः स्वोद्दीपनविभावैः चर्षणीनामुक्तव्युत्पत्त्यैव रन्तुं गन्तुमुद्यतानां शुचो मृजन् प्राच्याः प्रकर्षेण पूज्यायाः कृष्णप्रियाया व्रजभुवः मुखं मुख्यं श्रीमद्वृन्दावनम् अरुणेन विविधोज्ज्वलितस्वानुरागतया सम्भावितकिंशुकादिशोणसुमनःसमूहेन विलिम्पन् उद्गतः अत्र प्रियाया मुखम् अरुणेन विलिम्पन्नित्युक्त्या वसन्तसम्भावितहोलिकाद्योतनमपि ज्ञेयम् तथा यदैव भगवान् रन्तुं मनश्चक्रे तदैवोडुराजश्चन्द्र उदगात् तथा च यदा सर्वेषां तदिच्छाधीनतया रमणानुकूल्येन तन्मनःसह्लादमस्तदा किमु वाच्यं चन्द्रमसस्तदङ्कविराजमानस्य

श्रीरामनारायणकृतभावभावविभाविका ।

तन्मनसः सहकारित्वे एवं चन्द्रमसो भगवद्भक्तविरागमनस्त्वेन यस्तत्रारुणरागः सभगवदनुरागः यस्तत्र श्यामाङ्कः सध्यानव्यक्तभगवदाभासः यश्च तन्मन उल्लासे रोमहर्षः सद्रुमलतादिविकासः यश्च तदुत्साहे भगवत्स्मितानुतत्प्रहासः सविश्वव्यापिसितामृतमयपरमाह्लादप्रकाशः यश्च व्याप्यरुणप्रकाशः सोऽधरामासः यश्चोडुगणचमत्कारः तद्विहसनव्यक्तदशनलसनम् इति पुनः कथम्भूतश्चन्द्रः ककुभः के स्वर्गे मण्डलेन कौ भूमौ कान्त्या भातीति तथा पुनः कीदृशः प्रिय उरोधृतश्यामसुन्दराभासेन प्रेष्ठतमः पुनः स कृष्णमनआनुकूल्येन नित्यमुरोव्यक्तकृष्णाभासतया चातिविलक्षणाः प्राच्याः ककुभः सुरपतिप्रियाया दिशोऽपि मुखं शन्तमैराह्लादिप्रभान्वितैः करैरश्मिभिररुणेन तद्गतशोणरागेण करधृतहोलिकारोलिकादिवद्भासनेन स्वप्रियाया इव विशेषतो लिम्पन् चर्षणीनां जनानां दिनतापादिशुच इव चर्षणीनां कृष्णं प्रत्यभिसरणशीलानां स्वहृच्छुचो गोपिकानामपि गोपिकानां शुचः पूर्वप्रियविरहशोकान् गमने क्रीडायां च तम आदिप्रतिबन्धसम्भावितचिन्ताविशेषान् भगवतः स्वकुलसदाचारसङ्कोचसम्भावितग्लानीश्च मृजन्नुदगादिति कृष्णमनोवदुदगमगादित्यर्थः । अत्रैव हेतुगर्भितं विशेषणं दीर्घदर्शन इति दीर्घमर्थं दर्शयतीति तथा अयमभिप्रायः उडुभीराजते इत्युडुराज इत्यात्मन उडुराजत्वेन यथाऽहं बहुभिरुडुभिः स्वकान्ताभीराजमानस्तथैव मद्वंशप्रादुर्भूतेन त्वया भाव्यमिति दर्शयति नचात्र बहुदारसङ्ग्रहे यशोहानिचिन्ता यथोडुभीराजमानस्य ममोज्वला प्रभा के स्वर्गे कौ पृथिव्यां च प्रसृता तथैव तवापि कीर्त्तिः शुभ्रामृतरसमयी लोकतमस्तापापहारिणी मनोह्लादिनी बहुदारसमागमेन कं कुम्भासयिष्यतीति दर्शयति नच कुत्रापि तव परदाररत्वशङ्कावतारः तारापतित्वेपि मम बुधोद्भवप्रभाविस्तारवत्तव पूर्णावतारत्वेन रमणेऽपि तव यशसा सर्वस्यापि बोधोद्भवो निस्तारश्चेति न मम प्रतारकस्य प्रतारकत्वम् । किञ्च, सर्वमनोरूपस्य मम यदा न कुत्रापि परत्वदृष्टिस्तदा सर्वात्मकस्य तव न तत्सम्भावनागन्धोपीति दर्शयति । किञ्च, यथोडुभी राजमानेनापि मया निःशङ्केन सुरराजप्राच्या मुखं चारुणेन विलिप्यते तथा त्वयापि स्वकान्तया प्रियायुक्तेनापि निःशङ्केन सर्वासां मुखमरुणेन कुङ्कुमाद्यङ्गरागेण हृत्स्वं चारुणेनानुरागेण श्रोत्रस्वं च स्वयशोरागेण लेपनीयमिति दर्शयति—किञ्च, यथा उडुराजस्यापि मम प्राच्याः पूर्वसिद्धायाः आदरस्तथा त्वया प्रियायां इव बहुदाररमणेपि प्राच्याः पूर्वसिद्धायाः प्रकृष्टपूज्याया नित्यप्रियाया आदरो न विस्मर्त्तव्य इति दर्शयति, यदा मम कुलवृद्धस्यापीदृग्विलासस्तदा किमु वाच्यं तव तत्कुलनवकिशोरस्येत्यादिदर्शयतो दीर्घदर्शनत्वं युक्तमेव । यद्वा, यदैव भगवान् रन्तुं मनश्चक्रे तदैव यथा प्राच्याः पूर्वसिद्धायाः प्रकर्षेण पूज्याया वा नित्यप्रियायाः श्रीमत्या राधाया मुखमरुणेन कुङ्कुमाद्यङ्गरागेण विलिम्पन् उपलक्षणमेतत्समस्तशृङ्गाररचनारातिविहारादेः तत्तच्छृङ्गारविहारादि कुर्वन् प्रासिनिश्चामुखं व्रजाद्विहारस्थलमुदगच्छति तद्वत चर्षणीनामात्मरसास्वादाय गन्तुमुद्युतानां गोपीजनानां शुचः स्वविहाराप्राप्तिप्रयुक्तमनोग्लानीः शन्तमैः "आनन्दमात्रकरपादमुखोदरादिः" इत्यादिवचनान्निरतिशयसुखस्वरूपैः परमाह्लादसौन्दर्यसुरभिमार्दवतापोपशमनादिभिः कं सुखं रान्तीति तैः करैः स्वहस्तैः बहुवचनमत्ररासमण्डलरतिविहारादौ सर्वासां सन्निधौ बहुधाविर्भावाभिप्रायेण मृजन्नपनयन् अत्र लिम्पन् मृजन् उभयप्रयोगयोर्भूतभविष्यदर्थकयोः वर्त्तमानवन्निर्देशस्तु "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" (३।३।१३१) इति सूत्रानुसारेण साधु उदगात् व्रजादुद्धृत्य वंशीवटमगात् तत्रोद्गमने यशोदादिकृत्यमाशङ्क्य विशेषयति, उडुराज इति । रकारडकारयोः सवर्णासवर्णयोरपि सावर्ण्यं संभवादुरुधा राजते इति तथा रासादावग्रे वक्ष्यमाणाः स्विकारस्य वक्ष्यमाणत्वात्तथैव व्रजेष्वाविर्भावसद्भावात् तद्वैकृत्यशङ्कावकाशः पुनः कीदृशः ? प्रियः तथा दीर्घदर्शनः "यः सर्वज्ञः सर्ववित् नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात्" इत्यादिश्रुतेरलुप्तदृक्तया स्वस्मिन् सर्वासां प्रीतिं वात्सल्यशृङ्गाररसभेदेपि समानां पश्यन् दीर्घपद्मदलायते दर्शने नेत्रे यस्येति वा । ननु, पृथिव्यां नरत्वेनावतीर्णस्य कथमीदृक्त्वं तत्राह—ककुभः कं सुखं तद्रूपेणैव कौ पृथिव्यामवतीर्णोऽपि भातीति न तत्र सुखमानरूपे भगवति तच्छङ्कावसरः कं सुखं तद्रूपाकुः पृथिव्यापि भाति यस्मादिति वा कस्य ब्रह्मणोर्थे कौ अवतीर्य भातीति वा ब्रह्मापि कुत्सितो भाति यस्मादिति वा के ब्रह्मणि कुत्सितेऽस्मदादौ च समान एव भातीति वा ककुभः सर्वेश्वरत्वाद्दलसदृक्त्वम् । यद्वा, तद्रमणमनोनुसारेण यदैवोडुराजश्चन्द्रः प्रियायाः प्राच्याः ककुभः मुखम् अरुणेन विलिम्पन्नुदगात् तदैव स प्रियो दीर्घदर्शनो भगवानपि चर्षणीनां तासां शुचो शन्तमैः करैर्मृजन् व्रजादुद्धृत्य विहारस्थलमगादिति सम्बन्धः ॥२॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

तदैवं चन्द्रमा अपि भगवद्भावमुद्दीपयन्नुदगादित्याह—तदा तस्मिन्नेव क्षणे सः प्रसिद्धः उडूनां नक्षत्राणां राजा चन्द्रः उदगात् उदयं प्राप्तः उडुपदेन नक्षत्राणामपि तत्परिवारत्वेनोदयः सूचितः किञ्च "मनसापि न गन्तव्याः परदाराः कदाचन" इति निषेधमनुसन्धाय महत्समलज्जया वा रमणाच्चेतसः परावृत्तिमपि निराकरोदित्याशयेनाह—ककुभ इति । प्राच्याः इन्द्राधिष्ठितायाः दिशो मुखं शन्तमैः परमसुखकरैः किरणलक्षणाहस्तैर्धृतेनारुणेनोदयरागेण विलिम्पन्नरुणीकुर्वन् तथाचानया प्रवृत्त्या कृष्णमेतमुपदिशति स्म, भगवांश्चन्द्रः भो यदुकुलावतंस ! यशोकदोषशङ्कया रमणाचित्तं मा निवर्तय मद्वंश्यत्वात् यथा अहं तव कुलादिपुरुषो द्विजराजस्तत्रापि पुरातनस्तत्रापि राजमत्वाक्रान्तस्तत्रापि परमसुन्दरानेकस्त्रीपतिः प्राच्या दिशः परस्त्रियो मुखं स्पृशन्नेव स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोमि तद्वत्त्वमपि मद्वंश्यस्तत्रापि नवीनतया तत्राप्यतिशयितत्वात् स्वभार्यारहितस्तत्रापि सर्वदोषविनिर्मुक्तपरमसुन्दरविग्रहस्तत्रापि सम्प्रति गोपजातिनिविष्टो यथेष्टं गोपाङ्गनाभिः रमणे कुरु नास्ति तव दोषगन्धोपि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायात् वस्तुतः "तेजीयसां न दोषाय" इत्युक्तत्वादेतादृश

दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं[1] रमाननाभं नवकुङ्कुमारुणम्।
वनं च तत्कोमलगोभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका।

नास्ति मम दोषसम्पर्कस्तव त्वतितेजस्वित्वात्सुतरामित्यपि स एव बाधितवानित्याशयेनाह–चर्षणीनामिति—

"अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः।
यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता" ॥

इति षष्ठस्कन्धोक्त्या मानुषजातीनां शुचः शरदर्कजसन्तापदुःखानि मृजन् अपनयन् तथाच समस्ततापनिवर्तकस्य नास्ति तादृक् क्षोभजाततापावाप्तिसम्भावनेति भावः। तत्रानुकूलं दृष्टान्तमाह—प्रिय इति। दीर्घकालेन दर्शनं यस्य प्रियः स्वरमणः प्रियायाः स्वरमण्याः मुखम् अरुणेन अनुरागेण स्वकरधृतेन कुङ्कुमेन च यथा लिम्पन्ति तद्वत्। यद्वा, मनःकरणसमकालमेव चन्द्रोऽपि तादृशाऽसङ्ख्याकराऽयानुकूलः शकोत्पादित इत्याह, तदेति। तदा तस्मिन्नेव क्षणे स्वसङ्कल्पितश्चन्द्र उदगात् स प्रसिद्धश्चन्द्र उदगात् सच किञ्चिद्विशापशान्निवादगादित्याशयेनाह–ककुभ इति। तथा च "चन्द्रमा मनसो जातः" इति श्रुतेः। त्वत्त उत्पन्नस्य त्वत्प्रसादलब्धप्रतापस्य ममापि नास्त्येवास्विध कर्मलेपः तव तु सर्वेश्वरस्यैव कुतः सः अतः स्वभक्तानामाशां मनोरथं पूरयेति बोधयन्निवेति भावः। किञ्च, सर्वसन्तापनिवृत्त्यर्थं प्रवृत्तौ लोकदृष्ट्या प्रतीयमानोऽपि दोषो न संस्पृश्यत इत्यपि विज्ञापयन्नित्याशयेनाह–चर्षणीनामिति। यद्वा, यथा मम प्राच्याः ककुभः सम्बन्धः परदारसम्पर्कवत्प्रतिभाति न तु वस्तुतः तत्सम्पर्कः किन्तु सर्वजनतापनिवृत्त्यर्थं प्राच्याः दिशि समुदायमात्रं तथा भगवतोऽपि स्वजनसन्तापनिरासार्थं कृतावतारस्य तत्तल्लीलया स्वभक्तसुखसम्पादकप्रवृत्तौ मूढजनानां लौकिकरमणादिप्रतीतावपि नास्ति किञ्चिद्बाधकमिति विज्ञापयन्निवोदगादित्याशयेनाह, ककुभ इति। निवृत्तिपक्षे तदा भगवत्प्रसादोदयक्षणे प्रबोद्धूनां तत्स्थानापन्नानां शुभवृत्तीनां राजा विवेकाख्यश्चन्द्र उदगात् किङ्कुर्वन्नित्यपेक्षायामाह–ककुभ इति। प्राच्या अनेकजन्मप्रवृत्ताया अविवेकदशायाः मुखं आद्यलक्षणं करस्थानापन्नैस्तत्तद्विचारैः सम्पादितेनारुणेन तत्तत्पदार्थबोधलक्षणेन रागेण लिम्पन् तिरोहितं कुर्वन् अत एव चर्षणीनाम् अधिकारजनानां तत्तद्वस्तुविषयकान् शोकान् मृजन् अपनयन् अत्र दृष्टान्तमाह प्रिय इति ॥२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तदुद्दीपनान्तरमाह–तदेति। तदा तस्मिन्नेव क्षणे सः प्रसिद्धः शारदः उडुराजश्चन्द्रस्तत्प्रीतये उदगात् उदितोऽभूत् किं कुर्वन्? दीर्घदर्शनः दीर्घेण कालेन दर्शनं यस्य सः प्रियः स्वप्रियायाः मुखमरुणेन कुङ्कुमेन यथा लिम्पति एवं प्राच्याः ककुभो दिशो मुखं शन्तमैः करैः किरणैः अरुणेनोदयरागेण विलिम्पन् अरुणीकुर्वन् तथा चर्षणीनां शुचस्तापग्लानीर्मृजन्अपनयन्। "अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः। यत्रैषा मानुषी जातिर्ब्रह्मणा परिकल्पिता" इति षष्ठस्कन्धात् चर्षणयो मानुषाः बह्वीषु शरद्रात्रीषु रासक्रीडा भगवता कृता ताः रात्रीरिति बहुवचनात् पूर्णोडुराजयोगस्तु पूर्णिमायामन्यासु च यथा सम्भवम् ॥ २ ॥

भाषा टीका।

जब रासरसिक आनन्दकन्द श्रीकृष्णचन्द्र ने रमण करिवे कूं मन करयो, तब ताई समय पै नक्षत्रन को राजा पूर्णाजाको दर्शन ऐसो कार्तिक पूर्णिमासी को जो चन्द्रमा है सो शीतल सुखदायी अपनी किरणन सों इन्द्र की दिशा जो प्राची [पूर्व दिशा] है ता के मुखकों अरुण करत, जनन के तापन कूं दूर करत, उदयकों प्राप्त होत भयो, जैसें परदेश तें विरही पुरुष अपने घर आयके बडी प्रीति सों अपनी प्रिया को केसर सों मुखमाडै ता रीतिसों ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कुमुत् कुमुदं विकसनीयं विद्यते यस्य तं कुमुद्वन्तं न खण्डं मण्डलं यस्य तं रमायाः आननस्येव आभा यस्य तं नवकुङ्कुममिवारुणमेवंविधं चन्द्रं दृष्ट्वा तथा वनं च तस्य कोमलैर्गोभी रश्मिभीरञ्जितं दृष्ट्वा कलं मधुरं जगौ अगायत, कथं? वामदृशां वामा मनोहरा दृशो यासां तासां मनोहरं यथा ॥३॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

ततश्च भावविशेषाविर्भावेन श्रीगोपीनामाकर्षणार्थं मोहनमन्त्रमिव वेणुना किञ्चिद्गीतमगायदित्याह–दृष्ट्वेति। कुमुत् कुमुदं तथा च विश्वः "कुमुदेऽपि कुमुत् प्रोक्तम्" इति तद्वन्तमिति कुमुदानिव तदानीं विकसितानीत्यर्थः। अत एव वक्ष्यते श्रीगोपीभिः "वृन्दावने कुमुदकुन्दशशाङ्करम्ये" इति। यद्वा, कुः पृथ्वी तस्या मुत् हर्षः तद्वन्तमिति तदुदयेन सर्वेषामेवानन्दोऽभूदित्यर्थः। तत्र हेतवः अखण्डेत्यादीनि अखण्डमण्डलत्वाद्रमाननाभम् इति लक्ष्मीमुखस्मारणेन रिरंसा विभावितेति ज्ञेयम्। यद्वा, रमतीति रमा श्रीराधा ननु रमाननं सदा कुङ्कुमस्य भावो द्दीपनत्वेनैव प्रयोगः एवं कालस्य रतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति–वनं चेति। तस्य चन्द्रस्य कोमलैः प्रथमोदयेनाल्पमात्रप्रकाशवद्भिः गोभिः अभितो रञ्जितं रक्तीकृतम् अनुरागविषयीकृतं वा। यद्वा, गोभिरिति तृतीयान्तं पदम् अञ्जितं अक्षितम् अत्रापि स एवार्थः एवं भावोद्दीपनमेव दर्शितं कलं मधुरं किञ्चिद्गीतम्। यद्वा, कलं यथास्यात्तथा जगौ वेणुनेति

(१) रमाननाभमिति विज० वीर०।

श्रीमत्सनातनजीवगोस्वामीकृतबृहत्तोषिणी ।

ज्ञेयम् । "कास्त्र्यङ्ग ! ते कलपदामृतवेणुगीते" इत्यादिवक्ष्यमाणात्वात् वामा मनोहरा दृशो नेत्राणि यासां परमसुन्दरीणामित्यर्थः । यद्वा, वामा कुटिला दृक् दृष्टिर्यासां परमविदग्धानामित्यर्थः । एतच्च स्वरूपनिरूपणमात्रं व्रजाङ्गनानां सर्वासामेव स्वभावतस्तादृशत्वात् मनो हरति आकर्षति सङ्केतविशेषेण रागतालादिविशेषं वा मनोहरं यथा स्यात् इति दिनान्तरापेक्षया तदानीं गानविशेषोऽभिप्रेतः दिनान्तरेषु वेणुगीतेन तादृशत्वावृत्तेः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्च तं दृष्ट्वा भावविशेषाविर्भावेन वनमागत्य तच्च तद्रश्मिभीरञ्जितं दृष्ट्वा तत्र च यमुनातीरभागमद्यापि रासौलीति प्रसिद्धं श्रीवज्रस्थापितं ग्रामचत्वरमागत्य चाकर्षणवेणुना किमपि गीतिमगायादिति पूर्वस्यां रात्रौ प्रकटितवेणुशिक्षाविशेषत्वमप्याह—दृष्ट्वेति । तं च रमाननाभं रमयन्तीति रमाणां परमरमारूपाणामेव वा तासां तत्प्रेयसीनां मध्ये परमप्रेयसी या राधा तत्प्राप्त्यर्थमेव वेणुशिक्षाविशेषं प्रकटयितुं नूनमेतावन्तं कालं तासामपि सङ्गमे शिथिलोऽभूत् तस्या यत् आननं तदाभं दृष्ट्वा तत्तया वितर्क्य तेन तत् स्मृत्वा वा स्वप्रकाशनाय कलञ्जगावित्यन्वयः । वितर्कोपद्युपादनाय साम्येन विशेषणानि कुमुत् कुमुदं तथा च विश्वः "कुमुदेऽपि कुमुत्प्रोक्तम्" इति तद्वन्तमिति वा स्वप्रकाशनाय कुमुदानि च तदानीं विकासितानीति स्वन्यर्थः । अत्र विशेषणैरेव विशेष्यश्चन्द्रो लक्ष्यते "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" इति वत् आननस्य पक्षे कोः पृथिव्या मुत्कर्षवर्यत्वेन विद्यते यस्य तदिति विशेष्यवशाल्लिङ्गविपरिणामेण ज्ञेयम् । परमरमारूपत्वात्तस्याः अखण्डमण्डलं षोडशकलं पक्षे यथावत् परिमाणसम्बलितं मण्डलमवयववृन्दं यत्र नवकुङ्कुमाविपड-
वदरुणं पक्षे नवकुङ्कुमरागेणारुणम्. एवं कालस्य रतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति वनं चेति । तस्य प्रथमोदयेनाल्पमात्रप्रकाशवद्भिर्गोभिः अभितो रञ्जितम्; यद्वा, भावे निष्ठा तैरभिरञ्जितम् अर्थात् कृष्णस्याभिरञ्जना यत्र तत् दीर्घत्वाभावः कान्दस: एवं भावोद्दीपनमेव दर्शितं कलं मधुरमस्फुटं च यथा स्यात्तथा जगौ वेणुनेति ज्ञेयम् । "कास्त्र्यङ्ग ते कलपदामृतवेणुगीते" इत्यादिवक्ष्यमाणात् तत्र मधुरत्वं मनोहरणाय अस्फुटत्वं सर्वासामपि तासां स्वस्वनाममयत्वादिभ्रमाय अन्येषां वेणुवादमिदमिति विशेषानवधारणाय च । ननु, मधुरत्वेन कथं सर्वेषामेवाकर्षणं नाभूत् ? तत्राह—वामदृशां तादृशभाववतीनामेव मनोहरं यथा स्यात्तथेति आदिरसमात्रोद्दीपनं रागविशेषं जगावित्यर्थः । वक्ष्यते च अनङ्गवर्द्धनमिति. स च नूनं मध्यमादिनामा यत उक्तं गौडवरागसेकं—

> "मध्यमादिर्मग्रहान्तो मध्यमग्रामरागजः ।
> अयं सायं तु गातव्यः शृङ्गारे ऋधवर्जितः" ॥ इति

मेति मध्यमः ऋधेति ऋषभधैवतौ स्वरौ "ग्रहः स्वरस इत्युक्तो यो गीतादौ समर्पितः" इति पूर्वं तु "इति वेणुरवं
राजन् ! सर्वभूतमनोहरम्" इति सामान्यविषयकत्वात् स्वभावानुसारेण तासां मोहनमात्रं जातम् अधुना तु रसविशेषोद्दीपनत्वादाकर्षणमिति तत्र तत्र वंश्या अपि वैशिष्ट्यमस्ति यथोक्तम्—

> "अर्द्धाङ्गुलान्तरोन्मानं तारादिविवराष्टकम् ।
> ततोऽङ्गुलान्तरे यत्र मुखरन्ध्रं तथाङ्गुलम् ॥
> शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका ।
> नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ॥
> दशाङ्गुलान्तरा स्याच्चेत् सातारमुखरन्ध्रयोः ।
> महानन्देति विख्याता तथा सम्मोहनीति च ॥
> भवेत्सूर्यान्तरा सा चेत् तत आकर्षणी मता ।
> आनन्दिनी तदा वंशी भवेदिन्द्रान्तरा यदि ॥
> गोपानां वल्लभा सेयं वंशुलीति च विश्रुता ।
> क्रमात् मणिमयी हैमी वैणवीति त्रिधा च सा" ॥ इति

अतो द्वादशाङ्गुलान्तरेतारमुखरन्ध्रा हैमीयं ज्ञेया एवं गानवैशिष्ट्यमपि ज्ञेयं वामदृशामिति श्लेषेण स्वस्मिन् कुटिलमेव पश्यन्तीनां तासां मनोरूपमूलाकृष्ट्या दृष्ट्यादिसर्वेन्द्रियवृन्दमेवाकृष्टमित्यर्थः । अत्र श्लेषेण कामबीजं जगाविति रहस्यं यतो वामदृकूसम्बन्धि यत् तत्सहितं कलमिति प्रथमाक्षरत्रयं व्यञ्जितं कीदृशं मनोहरं मनः शब्देन तदधिष्ठाता चन्द्र उच्यते स च तदाकारत्वेन लवकः तं हरति आकर्षतीति तत्सम्वलितमित्यर्थः । नादयुक्तत्वं तु वेणुनादस्वाभाव्यादेवेति भावः । तदुक्तं "कलातु माया लवकातुमूर्तिः कलक्वणद्वेणुनिनादरम्यः" इति ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कुमुद्वन्तं चन्द्रं गोशब्दः किरणपरः ॥ ३—६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दृष्ट्वेति । कुमुत्कुमदं विकसनीयं विद्यते यस्य तम् । यद्वा, कोः पृथिव्याः मुदस्यास्तीति तं भूमेरानन्दकरं चन्द्रं तस्य कुमुद्वतः कोमलैर्गोभिः किरणैरङ्कितं रमणीयं वनं च दृष्ट्वा वामदृशां कामिनीनां मनोहरं मधुरं च यथा भवति तथा भगवानिति शेषः । जगौ वेणुमवादयदित्यर्थः । कुमुद्वन्तं कथम्भूतम् अखण्डं सम्पूर्णं मण्डलं यस्य तं नवकुङ्कुममिवारुणमतः कुङ्कुमारुणकान्तामुखसदृशम् ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दः अखण्डमण्डलं पूर्णमण्डलं रामस्य वल्लभस्याननमिव शोभमानं रामाणामाननमिव रमणीयं कुङ्कुमपुष्पवदरुणं तमुडुराजं दृष्ट्वा तस्य चन्द्रस्य कोमलगोभिः मृदुतररश्मिभिः रञ्जितं मण्डितं वामदृशां स्त्रीणां मनोरमं मनोहरं वनं सेवायोग्यस्थलं च दृष्ट्वा कलमव्यक्तमधुरस्वरं जगावित्यन्वयः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

महालक्ष्मीरूपत्वेन वा रमा अत्र श्रीराधा "इति वेणुरवं राजन् सर्वभूतमनोहरम्" इति पूर्वोक्तात् वैशिष्ट्यमाह–वामदृशां मनोहरमिति । आदिरसोद्दीपनगानविशेषादिति भावः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

भगवानपि तमुदितं दृष्ट्वा विहारार्थं क्षणमपि विलम्बं नाकरोदित्याह–दृष्ट्वेत्यादि । कुमुद्वन्तं प्रकाशयेन कुमुदं वर्त्ततेऽस्येति कुमुद्वान् नडादित्वादतो ड्मतुप् चन्द्रः तं दृष्ट्वा कलं जगौ गीतवान् वेणुनेति शेषः । कुकूज वेणुमित्युक्तेः किं जगौ इत्यत्राह वाम दृशां मनोहरं यत् तदेवेत्यर्थः । वामदृशामित्यस्यायमर्थः, यज्जगौ तद्वामदृश एव शुश्रुवुः न तु पूर्वपूर्वोक्तवत् सर्वभूतमनोहरमिति तथा सति सर्वे एवाऽश्रोष्यन् तन्न चेत् वामदृश एवाजग्मुर्न तु सखायः सखीनां तु मते पित्रोर्गृह एव वर्त्तते पित्रोरपि तथैव पूर्वपूर्वदिनवत् यथास्थानं यथाकालं शयनादिक्रियां कुर्वन्नेवास्ते इदृश्यते च ताभ्यां तथा ईदृश्येव तस्य योगशक्तिरचिन्त्या अनयैव दिशा वृन्दावनस्थो नित्यं इति यन्मतं तदपि साधयितव्यं कुमुद्वन्तं कीदृशम्? अखण्डमण्डलं पूर्णं पुनः कीदृशम्? रमाननाभं रमां विहाय गोपीभिः सह क्रीडायां तस्याः सदैव कोपेनारुणमाननं तत्समानं तदैव प्रकटयति, नवकुङ्कुमारुणं न केवलं तं दृष्ट्वा वनं च कीदृशं तत्कोमलगोभिरञ्जितं तस्य कोमलैर्गोभिः किरणैः अञ्जितमुच्चितम् अभिरञ्जितमिति समस्तं वा पदम् अत एव नवकुङ्कुमारुणमिति वनस्य च विशेषणमवगन्तव्यम् ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं मनस उत्पत्तिमुक्त्वा तद्देवतायाश्च ततः सङ्कल्पोत्पत्त्यर्थं तच्छक्त्योर्नित्यं निरूपयन् तद्दर्शनेन वेणुनाद उत्पन्न इत्याह–दृष्ट्वेति । कुमुद्वांश्चन्द्रः पृथिव्यां सर्वत्रैव मुदं कृतवानिति तदाकरणसामर्थ्यम् अखण्डमण्डलमिति । न खण्डं मण्डलं यस्य एतस्य रसोत्पादने विभावकत्वमप्यस्तीति ज्ञापयितुं रमाननाभमिति उक्तं लक्ष्म्या अयं भ्राता भवतीति रमाया आननवत् आभा यस्य तथोक्तः । किञ्च, नवकुङ्कुमवदरुणावर्णोऽपि तेन विवाहसमये यथा लक्ष्मीमुखं तथा अयं वर्त्तते अतो नूतनकामजनकः । किञ्च, वनमपि रसपोषकं तस्य कोमलगोभिरल्पकिरणैः अभितो रञ्जितमारक्तयुक्तं किरणानां रसदोग्धृत्वं वन एव पालकत्वं च ज्ञापयितुं च गोपदं रमाननाभत्वेन पूर्वं निरूपणाद्यथा तत्पूतनकटाक्षाभावोदयद्वैतवस्तथैतेऽपीति ज्ञापनाय च गोपदमिन्द्रियस्यापि वाचकमिति तथा अधुना भावोत्पत्तिरेव तत्पोषस्तु स्वामिन्यागमनादिनाशे भावीति ज्ञापयितुं कोमलपदं यत्र तेन वनमपि रज्यते तत्र भवदर्थमागतः तद्द्वारा कथं न कुर्यात् ततः सङ्कल्पद्वारा कामजननेन सर्वं कार्यं भविष्यतीति कलं यथा भवति तथा जगौ गानं कृतवान् तच्च गानं वामदृशां सुन्दरदृष्टीनां स्त्रीणां मनोहरमिति तस्मात् "गायन्ति स्त्रियः कामयन्ते" इति श्रुतेः । अर्थाद्गीतेन सर्वाः समाहूता इति यदि त्वव्यक्तमधुरं गीतं कुर्यात् तदा गीतमेव शृण्वन्त्यस्तत्रैव स्थिता भवेयुः यासां पुनर्दृष्टिर्नोत्तमा तास्तु नाकारिता एव ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च तद्दर्शनेनोद्भूतकन्दर्पविकारो "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति स्मृत्वा स्वकुलादिपुरुषस्य तस्य धर्मं स्वस्मिन्नपि पश्यन्निःशङ्कमेव परस्त्रीरानेतुं कामव्यमोघं यत्नमकरोदित्याह–दृष्ट्वेति । कुमुत् कुमुदं "कुमुदेऽपि कुमुत् प्रोक्तम्" इति विश्वः तत्प्रकाशनीयत्वेन वर्त्तते यस्य तं कोः पृथिव्या अपि मुत् कर्त्तव्यत्वेन च वर्त्तते यस्य तमात्मानं च दृष्ट्वेत्यपि व्याख्येयं विशेष्यविशेषणानुक्तेः न खण्डं मण्डलं बिम्बं स्वरूपं यस्य तं पूर्णमित्यर्थः रमा लक्ष्मीः तद्भ्रातृत्वात्तदाननाभम् । यद्वा, "सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा" इति स्मृतेः रमा श्रीराधा रमन्ते रमयन्तीति वा रमागोप्यश्च तासामाननस्येवाभा यस्य तामिति तद्दर्शनेन तास्स्मृतिपथमारूढा इति भावः । पक्षे रमाणां तासाम् आनने आभा अन्तःकन्दर्पविकारद्योतिनी सम्यक् कान्तिर्यतस्तमास्मानम् उद्यद्रागव्याप्तत्वात् नवकुङ्कुमपिण्डवदरुणं पक्षे नवकुङ्कुमचर्च्चया अरुणं तथा वनं च तस्य कोमलैर्गोभिः किरणैः रञ्जितं अञ्चितम् अभिरञ्जितमिति समासो वा पक्षे तैः प्रसिद्धैर्गोभिः स्वाङ्गकान्तिभिः स्वपाल्यमानगवीभिर्वा अभिरञ्जितम् अभिरञ्जितचरमित्यर्थः । टजभाव आर्षः इत्युद्दीपनालम्बनविभावौ दृष्ट्वा कलं मधुरमगायत वेणुनेति शेषः । "कास्त्र्यङ्ग ते ! कलपदामृतवेणुगीते" त्यग्रिमोक्तेः कथं वामा मनोहरा दृशो यासां तासां युवतीनामेव मनोहरं यथा स्यात्तथा "गायन्ते स्त्रियः कामयन्ते" इति श्रुतेः । श्लेषेण कलं ककारलकारं वामदृशामिति लुप्तविभक्तिकं पदं वामदृक् चतुर्थः स्वरः तथा सह पञ्चदशस्वरं कामबीजं जगाविति रहस्यं मनोहरं मनसः आकर्षकत्वात् स्वस्वरूपभूतमहामन्मथमन्त्रमित्यर्थः ॥ ३ ॥

विशुद्धरसदीपिका ।

ततश्च तद्दर्शनेन प्राणप्रियाया रासक्रीडाभिलाषमभ्युदयन् प्रोत्साहितमनास्तत् सखीजनानाकारयितुमन्यासां साधकचरीणां च भावमवधारयितुं यत्कृतवांस्तदाह–दृष्ट्वेति । अत्र भगवान् इत्यध्याहार्यं कथं जगौ "ध्वनौ तु मधुरास्फुटे कलः" इत्यमरः तत्र मधुरत्वं सर्वासां मनोहरणाय अस्फुटत्वं चाऽनवधारणेन स्वजनानाभ्रमाय तच्च गानं वंश्यैव योगमायामित्युक्तेः तत्तत्तस्या अपि वैशिष्ट्यं ज्ञेयम् तदुक्तम्—

> अष्टाङ्गुलान्तरोन्मानं तारादिविवराष्टकम् ।
> ततोऽङ्गुलान्तरे यस्या मुखरन्ध्रं तथाङ्गुलम् ॥
> शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका ।
> नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ॥ १ ॥
> दशाङ्गुलान्तरा सा चेत् स्यात्तारमुखरन्ध्रयोः ।
> महानन्देति विख्याता तथा सम्मोहनीति च ॥
> भवेत्सूर्यान्तरा सा चेत्तत आकर्षणी मता ।
> आनन्दिनी स्मृता वंशी भवेदिन्द्रान्तरा यदि ॥
> गोपीनां वल्लभा सेयं वंशुलीति प्रकीर्त्तिता ।

विशुद्धरसदीपिका ।

क्रमान्मणिमयी हैमी वैणवीचेत्यसौ त्रिधा ॥

ततो हैमीयमाकर्षणीसंमोहिनी च ज्ञेया गानेपि वैशिष्ट्यं तदुक्तं मौडवरागभेदे "मध्यमादिर्मग्रहान्तो मध्यमग्रामराजकः । अयं सायं तु गातव्यः श्रृङ्गारे ऋषभवर्जितः" स च नूनं मध्यमः तत्रापि "धन्या श्रीश्च तथा गौरी राधिकाया रतिप्रदा" इति यथोद्दिष्टोक्तिएते एव गीते इति गम्यते कीदृशं कलं वाम-दृशां मनोहरम् "वामौ वल्गुप्रतीपौ च" इत्यमरः । वामे सुन्दरे दृशौ यासामिति किशोरीणामित्यर्थः । ननु पूर्ववत् सर्वभूतमनोहर-मिति भेदः । वस्तुतस्तु वामे श्रीकृष्णस्य वामपार्श्वे स्थितायां श्रीराधायामेव दृग्ज्ञानं परिचयो यासामिति तत्सहचरीणा मित्यर्थः । "दृग्ज्ञाने ज्ञातरि त्रिषु" इत्यमरः । श्लेषेण च कल-मित्यादिना वाक्येन गुप्तबीजमेवोद्धृतमिति ज्ञेयम् तथाहि कलं ककारं लकारं च वामदृक् ईकारः मन अनुस्वारः इत्यक्षरमात्रा-त्मकमिति ततश्च श्रीराधिकायाः स्वस्य महामन्त्रादिबीज-मुभयोरेकीभावसूचकं जगावित्यर्थः । अत एव तासां तासां च मनोहरमिति किं कृत्वा कुमुद्वन्तं दृष्ट्वा "कुमुदेऽपि कुमुत् प्रोक्तम्" इति विश्वः । कुमुदो हि रात्रिविकासिकमलिनीजातयः ता विकसनीया यस्य सः कुमुद्वन्तम् आननपक्षे : कौ पृथिव्या मुत्कर्षत्वेन विद्यते यस्य तमिति परमरमारूपत्वात् तस्याः सखीनां कुमुदिनां तदेकविकसनीयत्वेनानन्यनिष्ठत्वं च सूचितं कीदृशम् ? अखण्डमण्डलं षोडशकलं ततश्च पूर्णत्वं पक्षे यथावत् परिमाणसम्वलितम् मण्डलम् अवयववृन्दं यत्र तत् पुनः कीदृशं रमाननाभं रमात्र श्रीराधा तस्या आननस्याभा इव आभा यस्येति प्रतीपेन तस्याः रासोत्साहप्रतीतिः नवकुङ्कुमारुणं नवकुङ्कुम-पिण्डवदरुणं नवकुङ्कुमरागेण प्राक्सूचितेनारुणं तद्वदारुणमिति सहजसौन्दर्यं तथा वनं च दृष्ट्वा कीदृशं तस्य कोमलैः गोभिः किरणैः अञ्जितं प्रञ्जितमिति वनशब्देन तरुलतासमुदायस्तेन च सहचरीसमुदायो लक्ष्यते तदेतत्सूचितं श्रीगोविन्दलीलामृते—

> "सहचर्यश्च दास्यश्च राधिकालोकमोदतः ।
> स्तब्धाः कण्टकितामूर्तिभेदैर्गुल्मतया स्थिताः" ॥

इत्यादिना । तथा चैवं ज्ञायते योयं मुख्यतमः श्रीभगवत्प्रकाशो नित्यदृ।ऽप्रकाशं विहरत्यस्मिन् विपिनवरप्रदेशे अजगतश्च प्रकाशः प्रकटलीलायां साधकानुग्रहाय तेनैकीभूय तत् परिकरैश्च प्रकटलीलागतान् परिकरानेकीकृत्य क्रीडति तत्र च लीलाशक्तिरेव तस्मिन् तेषु तेषु परिकरेषु च प्रेमवैवश्यादि द्वारा तत्र तत्र प्रकाशे पृथगभिमानं परस्परमननुसन्धानं च सम्पादयति यतश्च नित्यसिद्धमपि निजवैभवादिकं स च तेषु नानुसन्धत्त इति स्थिते प्रकाशान्तरेण "सार्धं गतो वामयमेन माधवः" इत्यादिपूर्वकम् श्रीव्रजेश्वरीलालनादिसुखमनुभवति भवति च प्रकाशान्तरेण रासरसाविष्ट इति सर्वमनवद्यम् अन्यथा चन्द्रशालिकायां सुखसुप्तं परितो गुप्तं स्वात्मजमात्मनैवानिशं प्रतिमुहुरुत्थायोत्थायालिङ्ग्य आवयन्त्याः श्रीव्रजेश्वर्याः आमीलं वृत्तङ्कुसमलं स्यादिति सूक्ष्मदृष्ट्यावधेयं तदेवं नित्य-सिद्धाभिः संभूय पुलिनं गता इत्यादिकमुज्ज्वलोक्तमपि सङ्गच्छते इत्यादिति दिक् ॥ ३ ॥

श्रीधनपतिकृतभावविभाविका ।

ततः किं वृत्तमित्यत आह—दृष्ट्वेति । स भगवानित्यनुषज्यते स भगवान् रमणप्रवृत्तस्वमनोनुसारेणोद्गतं भक्तानां भजना-नन्दगोपीनां श्रृङ्गाररसं वसन्तं चन्द्रं प्रियामुखं गोपीसमूहं वनं च दृष्ट्वा कलं जगावित्यन्वयः । तत्र भजनानन्दपक्षे कौ पृथिव्यां तद्गतसर्वजनेषु मुदस्याः कुत्सितेष्वप्यन्यत्र स्वोत्कार-मपश्यत्सु वा मुदस्या तादृग्भक्तिप्रभावन्तम् अन्यधर्माणामिव विदैनं खण्डं मण्डलं यस्य रामा मनोरमा भक्तास्तासामाननेषु आभा उत्कृष्टा दीप्तिर्यस्य न वा सर्वतो विलक्षणाकुः भूमि-रवस्था यस्य कुत्सितेष्वपि मा प्रभा अरुणमनुरागं च यस्मात् तादृशं वनं स्वीयं वृन्दावनं च तद्भजनानन्दसम्बन्धिन्यो याः कोमलाः कठोरताशून्या गावो वाचस्ताभिरञ्जितं दृष्ट्वा श्रृङ्गाररसपक्षे तु कौ भूमौ या मुत्तद्वन्तं कुमुदादिकुसुमरचना-वन्तं वा न प्राकृतजनश्रृङ्गारवत्खण्डं मण्डलं यस्य रमाणा-माननेषु आभा कान्तिर्यस्मात् । यद्वा, रमाननसम्बन्धेनैवाभा कान्तिर्यस्य तदाननेष्वेवा समन्ताद्भातीति वा नवकुङ्कुमादिना अरुणत्वं यस्मिन्नवकुङ्कुमवदरुणोऽनुरागो वा मुखरागो वा यस्मात् तादृशं वनं च तच्छृङ्गाररसान्वितगोभिर्वचोभीरञ्जितं दृष्ट्वा वसन्तपक्षेपि तथैव कुमुद्विकासो यस्मिन्सकलवनगतपुष्पलता-दिविकासेन न खण्डं मण्डलं यस्य कामोद्दीपनतया वा न खण्डं भवति कामिनीनां मण्डलं यस्मिन् रमाननानामिव विकासितसुमनसामाभा यस्मिन् नवा विलक्षणवर्णा कुः पृथिवी यस्मिन् कोः पृथिव्याः शोणपुष्पादीनामाभा शोभारुणा यस्मिन् तादृशं वनं च तत्सम्बन्धिनीभिः कोमलाभिः कोकिलादि-गोभिरञ्जितं दृष्ट्वा चन्द्रपक्षे तु कुमुदाद्भिका तद्वन्तं कुमुदो विकसनीया वसन्ते यस्येति वा नित्यपूर्णतया न खण्डं मण्डलं यस्य रमाया आननमिवाभा यस्य तद्भातृत्वात् नवकुङ्कुम-वदरुणमुदयरागो यस्य तादृशं तत्र चन्द्रिकाया रमास्मित-साम्यं कुमुद्विकासस्य रमाननेन कृष्णहर्षविकाससाम्यम् अखण्ड-मण्डलत्वेन मुखवर्तुलत्वसाम्ये आभाया आह्लादकत्वसाम्यं श्रृङ्गाराङ्कुरागेणोदयरागसाम्यं वनं च तत्कोमलाभिः सुस्प-र्शाभिः गोभिः किरणैःरञ्जितं दृष्ट्वा कलं जगौ तथा च वनस्य चन्द्र-गोभिरञ्जितत्वकथनेन तमोरजोवर्णायप्रपुष्पसमुदायस्य सित-प्रकाशाह्लादात्मकसत्वाभा चन्द्रप्रभाभिभवद्योतनेन सत्वेन रजस्तमोभिभवे भगवद्भजने योग्यता दर्शिता तथा चन्द्रेण स्ववंशप्रभवकृष्णदर्शनजाताह्लादेनामृतरसात्मकसितप्रभया विश्व-मभिव्याप्य स्ववंशोत्सवे स्वापितुः क्षीरनिधेरतिवृद्धिः कृता तत्र च व्यापकपयःपयोधौ वृन्दावनं श्वेततद्गोभिरञ्जितं श्वेत-द्वीपो बहुबाहवो द्रुमा एव पार्षदा हरिरेव हरिः राधैव रमा तत्सखेव एव सख्य इति तदाह्वानाय कलं जगौ इति ध्वनिः । प्रियामुखपक्षे तु कुत्सितेष्वपि मुत् मोदोऽनुग्रहो यस्य तथा अखण्डं वर्तुलं मण्डलं यस्य अखण्डं कृष्णं मण्डयतीति वात्यनुगृह्णातीति वा तथा रमाणां गोपीनामाननेषु आभा यस्य रमाननेषु आ समन्ताद्वर्णप्रवेशेन भातीति वा तथा नवकुङ्कुमेन कृष्णार्पितेनारुणं तादृशं भावनाय दृष्ट्वा वनं च तत् स्वप्रिय-धामतया तत्कोमलाभिः प्रकाशिकाभिर्गोभिरञ्जितं दृष्ट्वा गोपी-

श्रीरामनारायणकृतभावभावविभाविका।

समूहपक्षे तु कृष्णातिप्रियामुखचन्द्रस्मितप्रभाविकसनशीलकुमुदाकारनेत्रवन्तं तथा नित्यनिरतिशयप्रीतिमत्तया नयगामित्वेन न खण्डं रासमण्डलं येन तं तथा रमाया अंशावेशात् आननेषु आभा यस्य अत एव रमा कृष्णरमणार्हा आननाभा यस्य तं बहिः शृङ्गारधृतेन नवेन कुङ्कुमेनारुणां मनसि च नवकुङ्कुमसदृशेनानुरागेणारुणां दृष्ट्वा तथा वनं च समस्तवृन्दावनं यत्र तत्र तत्कोमलाभिर्विरहखेदेन रमणाभिलाषेण च विनयरूपाभिर्गुणागानरूपाभिश्च गोभिरञ्जितं दृष्ट्वा कलं जगौ मधुरास्फुटे कलः इति कोशोक्तेः मधुरं रसमयं परमाह्लादकम् एकमपि गानगतं स्वं स्वजनाह्वानतया भासमानत्वादस्फुटं च तथा समस्तव्रजस्थानमपि रासानधिकारिणां श्रवणगोचरत्वेनास्फुटं केन सुखेन लाति अनुगृह्णातीति वा कलं केन सुखातिशयेन लीयते चित्तमस्मिन्निति, वा कलं पुनः कीदृशं वामदृशां मनोहरं वामे दृशौ यासां स्वविलासार्हतया तासां मनोहरं वामे सुन्दरे कृष्णे वा संलग्ने दृशौ यासां वामे कुलमर्यादादिभ्यो विपरीते वा दृशौ यासां तासां प्रेमातिशयवत्त्वेन वा मनोहरं वामे स्ववामभागे पतिभावनया दृशौ यासां तासां "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति स्वप्रतिज्ञात भावनापूरकत्वेन वा मनोहरं; यद्वा, जगौ इत्युक्त्वा तज्ज्ञातविषयकामबीजोद्धारमेवाह—कलं वामदृशां मनोहरमिति। कलमिति ककारं लकारं च वामदृक् ईकारः मन अनुस्वारः हरम् अर्धमात्रात्मकमिति यद्वा, कलमित्यत्रैव ककारलकारानुस्वारसङ्ग्रहः वामदृक् ईकारः ककारलकारयोरुच्चारणार्थाभिहिताकारापवादेन तत्र ईकारसम्बन्धविधानार्थां षष्ठीबहुवचनं चात्राविवक्षितं मनोहरमिति पदं पृथगेव अर्धमात्राया अनुस्वारत्वेनाभिधानं गानं चात्र वंशस्यैव योगमायामुपाश्रित इत्यत्रोक्तत्वात् तथा च यथा लोके वंशपर्वच्छिद्रद्वारा क्षेत्रे उप्तं बीजं बहुफलोदयि तथा विरहकर्शितं घनश्यामप्रेमरसार्द्रे तासां हृदयक्षेत्रे वंशपर्वात्मकमुरलिकाद्वारा उप्तं कामबीजं शीघ्रमेव बहुफलिष्यतीत्यवधार्य वंश्या कलं जगौ इति ध्वनिः तदेव चाग्रे वक्ष्यति अनङ्गवर्द्धनमिति. यद्वा, रात्रीः शरदोत्फुल्लमल्लिका वीक्ष्य रन्तुं मनश्चक्रे रमाननाभं कुमुद्वन्तमखण्डमण्डलं दृष्ट्वा कलं जगौ इत्यस्यायमभिप्रायः निशां राधाकारां दृष्ट्वोद्दीपितमनोजो रन्तुं मनश्चक्रे कलं च जगौ तत्र चन्द्रं रमा राधा तदाननाभं चन्द्रगतश्यामाङ्कं मृगमदबिन्दुं चन्द्रिकां स्मितम् अरुणां तद्दीयसीमन्तसिन्दूरं नीलाम्बरं तन्नीलाम्बरं भगणास्तद्भूषणानि इति विभागः ॥ ३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

तथा विज्ञापयन्तं चन्द्रमवलोक्य यत्कृतवांस्तदाह—दृष्ट्वेति, "कुमुदेऽपि कुमुत्प्रोक्तः" इति विश्वात्। कुमुदं विकासनीयं तेन विद्यतेऽस्येति तथा यथा स्वभक्ताः कुमोदन्यः समुद्यमाप्तेन मया विकासं प्रापिताः तथा स्वभक्ताः गोप्यस्त्वयापि विकासनीयाः "उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्। विभावयन् समृद्धीनां फलं सुहृदनुग्रहम्" इत्युक्तेरिति विज्ञापयन्तमिव पुनश्चाऽखण्डमण्डलं बिम्बं यस्य तं परोपकारशीलस्य क्वापि हानिर्न भवतीति सूचयन्तमिव अनेन राकेति ध्वनितं पुनश्च रमाया लक्ष्म्याः आननाभावदाभा कान्तिर्यस्य तद्भ्रातृत्वात् तथा च लक्ष्म्याः स्मारकत्वेन रमणेच्छामुद्दीपयन्तमिव स्वभार्याभ्रातृत्वात् श्यालकस्य मम सन्निधौ सङ्कोचो न विधेय इति वा सूचयन्तमिव। यद्वा, "सर्वलक्ष्मीः सर्वकान्तिः सर्वसम्मोहिनी परा" इति स्मृतेः रमा श्रीराधा रमन्ते रमयती वा रमा गोप्यश्च तासामाननस्याऽऽभेवाऽऽभा च यस्य तं स्वदर्शनेन ताः स्मृतिपथमारोहयन्तमिव तथा उदयरागव्याप्तत्वान्नवकुङ्कुमपिण्डवदरुणं विवाहसमये वल्लक्ष्म्यादिमुखं तत्तुल्यत्वान्नूतनकाममुद्दीपयन्तमिव वनं च तस्य तथाभूतस्य चन्द्रस्य कोमलैर्गोभिः किरणैरभिरञ्जितं गोभिः अञ्जितं व्याप्तमिति वा। यद्वा, भावे क्तः तत्कोमलगोभिरञ्जनं यत्र किरणानां सुधादोग्धृत्वं वन एव पाल्यमानत्वं च ज्ञापयितुं गोपदं तत्रापि शीतबाधाकरत्वनिराशाय कोमलपदं तथा च यथोक्तविशेषणविशिष्टं चन्द्रं रमणयोग्यं वनं च दृष्ट्वा कलं जगौ अत्र विशेष्यस्यानुक्त्या आत्मा मुखं वाऽपि विशेष्यं ज्ञातव्यम् अस्मिन् पक्षे कोः पृथिव्या अपि मुत्कर्तव्यत्वेन विद्यते यस्य तमात्मानं मुखपक्षे कुमुद्वदिति लिङ्गविपरिणामः अनेन भूचरसुखार्थं कृतावतारेण मया मय्यासक्तमनसा गोप्योऽपि मयाऽभिरमणेन सुखिन्यो विधेया इति ध्वनितं पुनश्चाऽखण्डमन्यूनानतिरिक्तं मण्डलं नासाकरणाद्यङ्गचक्रं यस्मिन् अनेन गोप्यर्थमेव तुच्छीकृतकोटिकन्दर्पविग्रहस्य प्रादुष्कृतत्वादवश्यं रमयितव्या इति सूचितम् पुनश्च रमाणां तासामाननानामाभा यस्मिन् अनेन स्वस्मिंस्तासां स्वचित्तत्वदर्शनेन तत्कुलप्रदानस्यावश्यकत्वं सूचितम् पुनश्च ताभिर्लिप्तेन नवकुङ्कुमेनारुणं। यद्वा, अत एव तन्मुखलिप्तेन नवकुङ्कुमेन प्रतिबिम्बितेनारुणाभम् अनेन स्वविग्रहस्य तद्विग्रहगतरागरञ्जितत्वदर्शनेन तन्मनोगतरागेण स्वमनसो (ऽति) चिरञ्जितत्वमावश्यकमिति ध्वनितं तद्विकसितकुसुमाद्यलङ्कृतं पुनश्च स्वस्य स्वमुखस्य वा कोमलगोभिरभिरञ्जितम् एवमुद्दीपनालम्बनविभावैर्दृष्ट्वा कलमव्यक्तमधुराक्षरं यथा स्यात्तथा जगौ गानं कृतवान् तदपि वेणुनेति ज्ञातव्यं कलपदामृतवेणुगीतेति वक्ष्यमाणात् तत्र मधुरमिति मनोहरणशक्तिमत् अव्यक्तमिति सर्वासां स्वस्वाऽऽह्वानज्ञानोत्पादकम् अन्येषां तदाह्वानाऽनिश्चायकञ्चेति बोधितं मधुरत्वात्सर्वाकर्षणं वारयति—वामेति। वामा मनोहराः दृशः कटाक्षा यासां वामं सुन्दरं दृक् दर्शनं यासामिति वा तासां युवतीनां सौन्दर्यादिगुणालङ्कृतानामेव मनोहरं यथा स्यात्तथा "गायन्तं स्त्रियः कामयन्ते" इति श्रुतेः। वामा स्वस्मिन्कुटिला दृशो यासां तासां मनोहरमिति श्लेषेण सर्वदा स्वस्मिन् कुटिलमेव पश्यन्ति तासां सर्वेन्द्रियप्रवर्तकमनआकर्षणेन तथादर्शनाऽभावायेत्यपि द्रष्टव्यम् कलं वामदृशामित्यत्र श्लेषान्तरेण कामबीजं क्लीमित्याकारकं जगावित्यपि ज्ञेयम् तथाहि कलं ककारलकारौ वामदृशेति टाबन्तं वामदृशा इकारः मन्त्रशास्त्रे वामदृगिति चतुर्थस्वरस्य सञ्ज्ञा इकारश्च भूतवामदृशामिति समाहारद्वन्द्वे अमो लुकि रूपं तथा च इमिति च तेन क्लीमिति सिद्धं निपातपक्षे

निशम्य गीतं तदनङ्गवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ।
आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र[1] कान्तो जवलोलकुण्डलाः ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ भगवत्कृतमनुग्रहान्तरं दर्शयति-दृष्ट्वेति । कुत्सिता अनित्याशुचिविषयप्राप्तिजन्यमुत्कुमुदनकुमुदस्वभावः कलङ्कत्वेन विद्यते यस्य विवेकलक्षणचन्द्रस्य तं तत्राप्यखण्डमण्डलं वैराग्यशान्त्यादिसाधनसमूहो यस्य तं पूर्णवैराग्यादियुक्तं यतो रमाननाभं रमायाः सम्प्रत्ययप्रमादादिरूपेण परिणता या आनने मुखे आभा शोभिर्यस्य तं विषयमात्रसौन्दर्यबुद्धिनिवर्तकं पुनश्च नवकुङ्कुमारुणं पूर्वं हि नात्मवर्ग एवानुरागः स्थितः सम्प्रति नवीनेन कुङ्कुमस्थानापन्नेनाभिरञ्जितं वा । यद्वा, तदन्तःकरणलक्षणं वनं कोमलैस्त्यक्तग्रहभावैः शास्त्रश्रवणसत्पादस्पर्शभगवन्मूर्तिसज्जनदर्शनभगवन्नैवेद्यास्वादनभगवच्चरणारविन्दार्पिततुलस्याघ्राणभगवन्नामस्मरणाऽर्चनादिपरैः गोभिरिन्द्रियैस्तज्जन्याभिर्वृत्तिभिरभिरञ्जितं शोभितं च दृष्ट्वा कलम् अनेकार्थसूचकं मधुराक्षरं "अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयात्" इत्यादिसूत्रजातं कृष्णद्वैपायनात्मनाऽऽविर्भूय जगौ कथम्भूतं कलं वामदृशां वामस्य परमसुन्दरस्य परमात्मनो दृक् ज्ञानं याऽवस्ता उपनिषदः "तन्त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुतेः तासां मनोहरं परब्रह्मणि तात्पर्यावधारणकारणं वामा सुन्दरा दृक् ज्ञानं यासामिति । यद्वा, वामा कुटिला दृशो यासामऽस्पष्टब्रह्मलिङ्गभेदाद्यनुवादकानां मनोहरं प्रत्यगभिन्ने ब्रह्मणि तात्पर्याऽवधारणपरं यद्वा, कुटिलज्ञानानां वादिना मनोहरं तदभिप्रेतार्थनिरासकरं । यद्वा, वामदृशां शोभनज्ञानवतां विवेकिनां वेदान्तशास्त्राऽधिकारिणां सतां मनोहरं मनोज्ञं नतुविषयासक्तचेतसां यद्वा, "आत्मा वा ऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" इत्यादिरूपकलं जगौ कीदृशं वामदृशामनात्मपदार्थविषयाणां कुटिलदृष्टीनां मनोहरन्तत्कारणभूताऽनात्मप्रवणमनउपशमकम् । यद्वा, यथोक्तविवेकिजनमनोज्ञमित्यर्थः ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवान् कुमुद्विकसनीयत्वेन विद्यते यस्य तम् "कुमुदेऽपि कुमुत्प्रोक्तम्" इति विश्वः । अखण्डमण्डलं बिम्बं यस्य तं रमाया आननस्य आभेवाभा यस्य तम् नवकुङ्कुममिवारुणम् उडुराजं दृष्ट्वा तस्योडुराजस्य कोमलैः सुस्पर्शैः गोभिः किरणैरञ्जितं रमणीयं कान्तियुक्तम् "अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु" वनं च दृष्ट्वा वामा मनोहरा दृशो यासां तासां मृगशावाक्षीणां मनोहरं यथा भवति तथा जगौ अगायत वेणुमवादयदित्यर्थः ॥ ३ ॥

भाषा टीका ।

कुमुदन को विकासवे वारो परिपूर्ण जा को मण्डल और रमा जो श्रीलक्ष्मी जी तिनके मुख सदृश जाकी कान्ति, नवीन केशर के नाई अरुण ऐसे चन्द्रमाकूं देखिकें और चन्द्र की चांदनी सों और किरणनसों रंग्यौ जो वृन्दावन ताय देखिकें स्त्रीनके मनकूं हरन करिवेवारो अव्यक्त मधुर ऐसो गीत श्रीकृष्णचन्द्र वांसुरीतें गावत भये ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असापत्न्यायान्योन्यमलक्षितो न ज्ञापित उद्यमो याभिस्ताः स कान्तो यत्र तत्र गीतध्वनिमार्गेण जग्मुः जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः ॥ ४ ॥

श्रीमत्सनातनजीवगोस्वामिकृतवृहत्तोषिणी ।

तत्पूर्वोक्तप्रकारं श्रीकृष्णवेणुगीतम् अतङ्गं श्रीभगवद्विषयं कामं प्राग्वर्त्तमानमेवाधुना वर्द्धयतीति तथा तत् यद्यपि वामदृशां मनोहरमित्यनेनानङ्गवर्द्धनत्वमायातमेव तथापीयं विशेषोक्तिस्तदतिशयविवक्षया अनङ्गशब्दप्रयोगश्च तासां प्रेमरूपकामविशेषस्य ग्राम्यधर्महेतुप्राकृतकामांशाभावविवक्षया, यद्वा, श्रीभगवद्विषयत्वेनानङ्गस्यापि साङ्गीभावाद्यभिप्रायेणेति दिक् व्रजस्य व्रजे वा याः स्त्रियो यौवनव्यक्ताः कृष्णेन परमाकर्षकेण पूर्वमेव गृहीतम् आकृष्टमाविष्टं वा मानसं मनस्तदीयाशेषं वा यासां ताः विशेषतश्चेदानीं तादृशं गीतं श्रुत्वा आजग्मुः । यद्वा, स्वयूथे मिथः सख्यवतीनामपि तासामन्योन्यमलक्षितोद्यमत्वे हेतुः, कृष्णेति. तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः । यद्वा, तेनैव प्रेमविशेषस्वाभाविकतद्विलासात्मकसापत्न्यस्य यूथान्तरे प्रादुर्भावात् । यद्वा, गमनेऽत्यन्तत्वरया तज्ज्ञापनाशक्तेः अत एव जवेन गमनवेगेन लोलानि कुण्डलानि कर्णभूषणानि यासां ताः आजग्मुरिति श्रीबादरायणेः श्रीकृष्णान्तिके सदैवात्मकथितेः परिस्फूर्तेः किं वा तासां तद्गमनवार्तया भावविशेषोदयेन तासामिव स्वस्यापि तत्र गमनस्फूर्त्या साक्षादिव श्रीकृष्णान्तिकतायाः स्फुरणात् यद्वा, आजग्मुः अभिससुरित्यर्थः । यद्वा, आ सम्यक् सर्वपरित्यागेन जग्मुः ययुरित्यग्रे बहुशो वक्ष्यमाणत्वात् सः परममोहनवेणुगीतगायकः । यद्वा, चिरं व्रतादिना ऽभीप्सितः अतः कान्तः स्वामी निजमनोहर इति वा । यद्वा, कस्य सुखस्य अन्तो निष्ठा यस्मात् सः ॥ ४ ॥

(१) कान्तोऽस्वरलोलकुण्डलाः इति विज० ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अन्ये (तु) च तद्गीतं न श्रुतवन्तः किन्तु तेन ता एव चाकृष्टा इति तस्य शक्तिविशेषं द्योतयन्नाह—निशम्येति । तत्पूर्वोक्तम् प्रकारं श्रीकृष्णवेणूद्गतम् अनङ्गं श्रीभगवद्विषयं कामं प्रागवर्त्तमानमेवाधुना वर्द्धयतीति तथा. तत् यद्यपि वामदृशां मनोहरमित्यनेनानङ्गवर्द्धनत्वमायातमेव तथापीयमुक्तिस्तदतिशयविवक्षया अनङ्गस्याङ्कुरप्रयोगश्च पूर्वं बीजाङ्कुररूपेणैव स्थितः सम्प्रति तु पल्लवित इत्यर्थं बोधयति । एतेन तद्गानस्यामृतसेकत्वमप्युत्प्रेक्षते सद्यस्तथाभावात् व्रजस्य स्त्रियस्तद्विशेषाः प्रकरणबलात् अत एव कृष्णेन परमाकर्षकेण पूर्वमेव गृहीतम् आकृष्टं मानसं मनस्तदीयाशेषं वा यासां ताः- विशेषतश्चेदानीं गीतं श्रुत्वा आजग्मुः अन्योन्यालक्षितत्वे हेतुस्तेऽपीत्याख्यातः। यद्वा, स्वस्वयूथे मिथः सख्यवतीनामपि तासां तत्र हेतुः कृष्णेति तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः । अत एव जवेनेति आजग्मुरिति श्रीबादरायणेः श्रीकृष्णान्तिके सदैव स्वस्थितिस्फूर्त्तेः किम्वा तासां तद्गमनवासनया भावविशेषोदयेन तासामिव स्वस्यापि तत्र गमनस्फूर्त्या साक्षादिव श्रीकृष्णान्तिकतायाः स्फुरणात् अग्रे तु ययुरिति चलनार्थकमेव स इति तादृशतत्स्मरणोत्कण्ठावचनं परममोहनरूपगुणवेणुभावैः प्राचीनैस्तदानीन्तनैश्च तासामस्माकं च मुहुरत्यर्थमभीप्सित इत्यर्थः कान्ता रमणः यत्रेति तत्रैव परमसुखमयस्थान इत्यर्थः । तस्य वेणुवाद्यस्य परमाकर्षणविद्यारूपत्वादन्यत्र भ्रमणादिकमपि नासीदिति भावः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निशम्येति । तन्मन्मथोद्दीपकं गीतमाकर्ण्य व्रजस्त्रियः स कृष्णो यत्र तत्राजग्मुः, कथम्भूताः ? कृष्णेन गृहीतमाकृष्टं कृष्णे निवेशितं वा मानसं यासां परस्परमलक्षितो नज्ञापित उद्योगः कृष्णं प्रति गमनोद्योगः यासां जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां तथाभूताः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनङ्गवर्द्धनं कामोद्रेककारणम् अन्योन्यं परस्परमलक्षिताशयाः अज्ञातमनोभावाः पूर्वमदृष्टवनस्थाना वा स कृष्णो यत्रास्ते तत्रेति शेषः । कान्तस्वरं सुवर्णं तेन रचितानि लोलानि कुण्डलानि यासां तास्तथा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आजग्मुः प्राप्तवत्यः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

वामदृशां मनोहरमिति यदुक्तं तदेवानन्यसाधारण्यमाह, निशम्येत्यादि । यत्कलं वेणुगीतं व्रजस्त्रियो निशम्य श्रुत्वा आजग्मुः नान्यः कोऽपि तच्छ्रवणाभावात् कुत्र आजग्मुरित्याह—स यत्रेत्यादि । स कीदृशः कान्तः कमनः कीदृशं गीतम् अनङ्गवर्द्धनम् अङ्गं कामकला अङ्गी प्रेमा अतोऽनङ्गवर्द्धनम् भाङ्गिवर्द्धनं प्रेमवर्द्धनमिति यावत् ताः कीदृश्यः कृष्णेन गृहीतं मानसं यासां तेन तत्राऽनङ्गस्य नावसरः अन्योन्यम् अलक्षित उद्यमो याभिः आकस्मिकत्वेन पूर्वसंवादाभावात् न त्वीर्ष्यया यद्यप्येवं तथापि सर्वा एकसूत्रनद्धा दारुपुत्रिका इव एकदैव जग्मुर्न तु पौर्वापर्यक्रमेण जवेन वेगेन लोलानि कुण्डलान्येव यासां तादृशवेगवता गमनेनापि कुण्डलानामेव लोलताऽऽसीदिति गमनस्य स्वाभाविकगाम्भीर्यसूचनम् ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः सर्वाः स्त्रियः समागता इत्याह—निशम्येति।यद्यपि भगवता कुमारिका एवाहूताः तथापि आह्वानं सदृशमिति निरोधोऽपि कर्त्तव्य इति सर्वा एव समागताः । किञ्च, यद्भगवता गीतं तदनङ्गमेव वर्द्धयति—अङ्गं तु नाशयत्येव अतो नूनम् उत्पन्न(:) कामः ता आनीतवान् । किञ्च, व्रज (स्थ) स्त्रियः पूर्वमपि भगवदीयाः अतः कृष्णेनैव गृहीतं मनो यासाम् अतः शीघ्रमेव यत्र कान्तः तत्रागताः अनेन आकारिता एव प्रथममागता इत्युक्तं तासां मुख्यः कान्त इति अत एवान्योन्यमलक्षित उद्यमो यासां ता हि प्रत्येकमेव भगवन्तं पतित्वेन स्वीकृतवत्यः स पूर्वमुपास्तो यः कान्तः तासां शरीरविचारेऽपि दृष्टिर्न जातेति वक्तुं जवेन लोले कुण्डले यासामिति कर्णपीडाऽननुसन्धानं प्रदर्शितम् ताः स्त्रियो गौडदेशस्थाः तत एव कुमारिकाः समागता इति पूर्वं मथुरादेशस्थितानामपि अनागरीणां कुण्डल एव ताटङ्कयोरेव वा कुण्डलत्वम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तीकृतसारार्थदर्शिनी ।

कलगीतसूत्रगुम्फिताः पञ्चालिका इव ताः कृष्णान्तिकमायाता इत्याह—तद्गीतं मनोहरमपि मनोजवर्द्धनम् किञ्च, कृष्णो हि वेणुगीताख्यं महाचौरं व्रजे प्रेषितवांस्तेन च व्रजस्त्रीणां निष्कपाटेन कर्णद्वारेणान्तःकरणकोशागारं प्रविश्य मनसा सह धैर्यलज्जाभयविवेकादीनि महाधनान्यपहृत्य झटित्येवानीय कृष्णाय दत्तानीत्याह—कृष्णेन गृहीतानि मानसानि मनांसि च मानसानि मनःसम्बन्धीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि यासां ताः आजग्मुः महाचौरचक्रवर्तिनः कृष्णात् तानि स्वस्वधनानि प्रार्थयितुमिवेति भावः । तदैवं मन्ये तं महाचौरं धर्त्तुं ऽध्यग्राणाम् अन्योऽन्यं न लक्षित उद्यमो यासां ताः चौरस्य पश्चात्पश्चादेवाजग्मुः क स कान्तो यत्र जवेन वेगेन लोलानि कुण्डलानि कुण्डलोपलक्षितानि कङ्कणकिङ्किण्यादीन्यपि यासां तास्तेन सह तासां बहिष्करणगृहस्थितानि धनान्यपहर्त्तुमुद्यतस्तस्य चौरेण तेन नापहृतानीति भावः ॥ ४ ॥

विशुद्धरसदीपिका ।

एवमाकारितानां तासामागमनं वर्णयन् तद्दर्शनोत्कण्ठया आत्मानं श्रीकृष्णोपकण्ठगतं च भावयन्नाह–निशम्येति । व्रजस्त्रिय आजग्मुरित्यन्वयः । व्रजशब्देनात्र स्नेहैकपुष्टजनावास उच्यते ततश्च स्नेहपुत्तलिका इत्यर्थः—

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो—
गोविन्दमादिपुरुषं तमहं भजामि ॥

इति ब्रह्मसंहितोक्तेः जग्मुरिति वक्तव्ये आजग्मुरित्युक्तिरात्मनः श्रीकृष्णसमीपस्थत्वभावनया किं कृत्वा गीतं निशम्य कीदृशं तदनङ्गवर्द्धनम् अङ्गं कामकला अङ्गी प्रेमा अतोऽङ्गिवर्द्धनं प्रेमवर्द्धनमित्यर्थः । साधकचरीपक्षे यथाश्रुत एवार्थः । अथ स्वस्वयूथे सख्यवतीनामपि तासां तद्गीताकृष्टमानसत्वेन विचारापगमात् अन्योन्यमलक्षितोद्यमा इति यद्वा कृष्णगृहीतमानसा इति हेतुगर्भं विशेषणं किं वायं हेतुः केवलप्रेमवर्द्धनत्वे एव परमानन्दकर्षकानन्दवशीकृतमानसाः तथासति कुतो जवावकाशः कुत्रेत्यपेक्षायामाह–स यत्र कान्तः परममनोहरः यद्वा कानां सुखानामन्तः पर्य्यासिर्यस्मिन् इति केवलप्रेमपात्रमित्यर्थः उत्कण्ठातिशयमाह–जवेति । जवेन वेगेन लोलानि कुण्डलानि यासां ताः तेन कुण्डलानां रम्यत्वं व्यञ्जितम् ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तद्गानसाफल्यं निरूपयति–निशम्येति । व्रजस्त्रियस्तद्वंशगीतमनङ्गवर्द्धनं निशम्य कृष्णगृहीतमानसाः सत्योऽन्योन्यमलक्षितोद्यमाः तथा जवलोलकुण्डला यत्र स कान्तस्तत्राजग्मुरित्यन्वयः । तत्र व्रजस्त्रिय इत्यत्र व्रजस्य स्नेहमयधामत्वात्स्नेहमय्यः तेन स्नेहप्रभावेनैव कृष्णं प्रतिव्रजनशीला इति वा वंशगीतस्यानङ्गवर्द्धनमिति विशेषणे चायं ध्वनिः यथाशुष्केन्धने स्नेहपूरिते स्थितोऽग्निर्वंशद्वारा धमनेन वर्द्धते तदा च घनश्यामवर्षितजीवनमेव तदुपशमोपायः तथा विरहार्कतापशुष्केऽपि स्नेहपूरिते तासां देहे हृच्छयो हृच्छयाग्निः स च वंशधमनोद्गतगीतेन प्रज्वलितः वंशानां चायं स्वभावः स्वस्मिन्पवनसम्पर्के वह्निमुत्पाद्य स्ववंशं दहन्ति येषां स्ववंशदाहे प्रवृत्तिस्तद्वंशभववंशस्यान्यदाहे किमु वाच्यं किं च भगवन्मुखतद्वाय्वोरपि" मुखादग्निरजायत, वायोरग्निः,, इति श्रुत्या स्वत एवाग्निजनकयोः किमु वाच्यं हृच्छयाग्निवर्द्धने कामश्च रुद्रदग्धः स्वयमनङ्गः सर्वेषामप्यात्मवद्दाहमिच्छन् विशेषतः शम्भुवैरं स्मरन् कुचशम्भोरुन्मूलतो दग्धुं तन्मूले हृदयेऽनलरूपतया निवसन् कृष्णमुखानिलबन्धुतया वृद्धप्रतापः प्रवयायैव प्रववृते तथा च प्रज्वलिते हृच्छयाग्नौ घनश्यामरसवृष्ट्या तदुपशममावश्य तज्ज्याग्नेः स्वकारणादेवोपसंहारं विचिन्त्य दावाग्निपानेन च विश्वस्य यत्र स घनश्यामस्तत्कारणत्वेन तदुपसंहारसमर्थः कान्तः कं जलं तस्यान्तोऽवधिभूतो रसजलनिधिः तत्राजग्मुः । यद्वा, मत्कामबीजं भगवता वंशपर्वच्छिद्रद्वारा हृत्क्षेत्रे उप्तं तत्प्रेमार्द्रभूमिलाभेन रोमपुलकरूपेणाङ्कुरितं पुनश्च विरहार्कतापेन शुष्यद्भगत्याशुसलिलेन सिञ्चितेऽपि तापोष्णजलेन तद्वृद्ध्यसम्भवमाकलय्य य एव बीजं वपति स एव सिञ्चति यदि बीजवपनकर्त्तैव घनश्यामो भवेत्तदुप्तं बीजं शुष्यत्स्महदद्भुतमिति तदुद्भवाय सबीजवप्ताघनश्यामो यत्र तत्राजग्मुः । यद्वा, ब्रह्मेन्द्रादीन् स्वप्रभावैः पराभाव्य तद्विजयीकामः श्रीरुद्रेण दग्धोऽप्यनङ्गः सन् भूतपतेरपि भूतवद्बन्धुधा क्षोभकोऽभूत् तद्विजयाय समुद्यतो भगवान् नष्टपूर्णमनोजमिन्दुं राहुरपि द्रुह्यति यत्र योगेश्वरः कृष्णस्तत्र ध्रुवानीतिरिति वचनात् रिपुर्वर्द्धयित्वा जेतव्य इतिनृपनीतिमनुसृत्य स्वानुरागिमनसो गृहे तद्धृदये गानरसान्वितकामबीजक्षेपेण तमनङ्गमपि तदङ्गेषूद्भाव्य यावन्मनःस्वास्थ्यं मनोजस्वान्तस्थमसम्भाव्य तदस्वातन्त्र्ये च रतिरणासम्भवमाकलय्य मनोहरेण स्वगीतेन श्रवणपथा तद्दृहृदयप्रविष्टेन तन्मनः स्वरागरागिरणात् गृहात्प्रव्राज्य दुप्रदरदच्छदनरमासदनमदनादिविविधविबुधविबुधीकरणविविधकुसुमास्पदस्वच्छस्वच्छविवेन प्रस्थाप्य तत्क्षेत्रजमनोजं विविधपद्मरदनस्वेन्द्रनीलवज्रमाणिरत्नाद्युपस्करगोपीतनुकामगकाञ्चनपुरेषु हृत्कमलसिंहासनेषु अरुणासितासिततत्रयनतीर्थराजसलिलैरभिषेचयामास स च कुसुमायुधः कामः कृतघ्नतया तदुपकारं विस्मृत्य मनः स्वपितरं कृष्णगृहीतं मत्वा रतिरणाय कामगानकुसुमस्रग्गिषुचयमुक्तामालाभिन्दिपालालकादिपाशकण्ठशङ्खवक्रकचकुचभ्रुयुगासिधनुर्नेत्रशल्यकापाङ्गभल्लुकरणोपस्करयुतान् स्वसुवर्णसुगान् गोपीवपूंषि स्वायुधकुसुमपूरितस्वामित्रवसन्ताक्रान्तवनान्तर्गतं कृष्णं स्वसम्मिलितसुवंशजतदीयगीतदूतेनावगत्य तं प्रति मदनत्वान्मदोत्साहेन प्रेरयामास तत्प्रेरितास्ता रतिरणस्य कान्तेनैवोचितत्वाद्यत्र स कान्तस्तत्राजग्मुः किं भूताः जवलोलकुण्डलाः जवेन मदनप्रेरितरतिरणायागमनवेगेन लोलानि मकराकृतानि मकरध्वजध्वजरूपाणि कुण्डलानि यासां ताः इति पूर्वोक्तपदसमुदायाभिप्रायः । पुनः कथम्भूताः अन्योन्यमलक्षितोद्यमाः गृहीतमनस्त्वेन परस्परविचाराक्षमत्वात् कामनृपप्रेरणया प्रवृत्तावलब्धविचारावसरत्वाच्च ॥ ४ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

अथ तादृशगानानन्तरं यद्वृत्तं च तदाह–निशम्येति । तद्गीतमनङ्गस्य कामस्य वर्द्धनम् अङ्कुरितस्य कामस्य सर्वाङ्गसम्पूर्णतापादकं एतेन एतस्याऽमृतसेकरूपत्वं सूचितम् । यद्वा, तद्गीतम् अनङ्गस्य सर्वाङ्गरहितस्य अनङ्कुरितस्यापि कामवर्द्धनं तच्छ्रवणमेवोत्पाद्याभिवृद्धिपर्यन्तानयनसामर्थ्यं नानास्तु व्रजस्त्रियश्चिरकालमारभ्य तद्विषयककामाविष्टस्वान्तास्तादृशं गीतं निशम्याकर्ण्य कलगीतश्रवणसूत्रगुम्फिताः पाञ्चालिका इवाऽऽजग्मुरिति वक्तव्ये स्वस्य कृष्णसन्निधानावेशादाजग्मुरित्युक्तम् । ननु, किं सर्वाऽपि व्रजस्त्रियः आजग्मुः तथा सति वामदृशां मनोहरमित्यनेन विरोध इति चेत्तत्राह–कृष्णगृहीतमानसाः कृष्णेनैव पूर्वमेव गृहीतवशः पतितत्वेनाङ्गीकृतवत्यः "सम्भ्रमः स्नेहमाख्याति" इत्युक्तत्वात् स्नेहव्यापकं तासां सम्भ्रममाह—जवेन लोले सकम्पे कुण्डले यासां ताः अनेन कर्णव्ययाऽनुसन्धानाभावः सूचितः । यद्वा,

दुहन्त्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः ।
पयोऽधिश्रित्य संयावमनुद्वास्याऽपरा ययुः ॥ ५ ॥
परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून् पयः ।
शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मां रक्षतीमामन्यैवमपि याचयतीति सापत्न्याभयात् कृष्णगृहीतमानसत्वेन विचारास्फूर्तेर्वा अन्योन्यमलक्षितगमनोद्योगाः अत एव जवेन चञ्चलकर्णाभरणाः कुत्रेत्यत्र आह स: पूर्वमुपागतः कान्तो यत्रस्थितः तत्र यद्वा, चोरचक्रवर्तिना श्रीकृष्णेन गृहीतानि मानसानि मनांसि तत्सम्बन्धीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि च यासां ता आजग्मुः अनेन कृष्णो हि महाचोराधिराजा वेणुगीताख्यं स्वभृत्यं महाचोरं व्रजे प्रेषितवांस्तेन च व्रजाङ्गनानां निवृत्तकर्णद्वारेणाऽन्तःकरणं कोशागारं प्रविश्य धैर्यादिमहारत्नपूरितमनोमञ्जूषाम् अपहृत्य झटित्येवानीय स्वस्वामिने दत्तां तां कृष्णात्प्रार्थयितुमिवेति सूचितम् अत एव महाचौरं धर्तुं व्यग्रत्वात् सूचकमन आदेरऽपहृतत्वाद्वा अन्योन्यमलक्षितोद्यमाः अत एव जवलोलकुण्डलाः कुण्डलेति कङ्कणकिङ्किण्यादेरप्युपलक्षणम् अनेन बहिर्गृहस्थानापन्नस्थूलदेहस्थधान्यादिस्थानीयभूषणान्यल्पत्वबुद्ध्या चौरेण तेन नापहृतानीति ध्वनितं निवृत्तिपक्षेऽप्येवं भगवदनुग्रहीतस्य विवेकवैराग्यादिसाधनसम्पन्नस्यान्तःकरणेऽपि ब्रह्मणा श्रुतिरूपकान्तानामभिरमणं सर्वतो वृत्तिनिरोधनं च सम्पन्नमित्याह—निशम्येति । तद्यथोक्तं गीतं व्रजस्त्रियः श्रुतीनां गवामवस्थितिस्थानं वेदो व्रजशब्देनाभिधीयते तत्सम्बन्धिन्यः स्त्रियः श्रुतयः श्रुत्वा सः कान्तः कमनीयः परमपुरुषार्थभूतः परमात्मा यत्र विवेकवन्तःकरणलक्षणे वने वर्तते तत्राजग्मुः ब्रह्मप्रतिपादकत्वेन स्फूर्तिगताः—

"तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" ॥

इति भगवद्वाक्याद्भक्तान्तःकरणोत्थितः श्रुतिभिरभिरममाणः तदज्ञानं नाशयतीति विज्ञापयत इत्यर्थः । आजग्मुरित्युक्त्या स्वाऽन्तःकरणवर्तिपरमात्मन्येवाजग्मुरिति सूचयति, गीतं विशिनष्टि—मनङ्गवर्द्धनम् अस्मात् आदेशेनेति नेत्युक्तस्य मूर्तामूर्तलक्षणाङ्गविनिर्मुक्तस्य निर्विशेषस्य ब्रह्मणो वर्द्धनमज्ञानावृतस्य तस्याज्ञाननिवर्तनेनाविर्भावकरम्. यद्वा, अङ्गानां देहानां वर्द्धनसङ्ख्यात देहोत्पत्तिकारणमज्ञानमङ्गवर्द्धनं तद्विरोध्यनङ्गवर्द्धनं कथम्भूताः व्रजस्त्रियः कृष्णेन सदानन्दस्वरूपेण परमात्मना गृहीतं मानसं तात्पर्यं यासां ताः कृष्णे तात्पर्येण समन्विताः पुनश्चान्योन्यमलक्षित उद्यमः परमात्मप्रतिपादनरूपोद्यमो यासां ताः परस्पराकाङ्क्षारहिताः प्रत्येकं स्वत एव प्रमाणभूता इति यावत् पुनश्च जवेन लोलानि झटिति नाशोन्मुखानि कुण्डलानि याणादि रूपाः पाशा याभ्यस्ताः विचारिताः सत्यः माया जीवात्मपाशनिवर्त्तिका इति यावत "कुण्डलं कर्णभूषायां पाशेऽपि विलये" इति मेदिनी, मनसो वृत्तयोऽपि इन्द्रियलक्षणगवां वासस्थानत्वाद्देहो व्रजशब्देनोच्यते तदन्तरवस्थानाद्व्रजस्त्रियः कृष्णेन गृहीतं कारणभूतं मानसं यासां ताः कृष्णासक्तमनः सम्बन्धिन्यः । यद्वा, कृष्णेन गृहीतः स्वीयत्वेनाङ्गीकृतः कृष्णानुगृहीतो विवेकादिसाधनसम्पन्नस्य मानसः मनःसम्बन्धिन्यः नत्वऽनधिकारिणः परस्परं निरपेक्षव्यापारवत्यः तत्तदिन्द्रियद्वारा निःसृत्य स्वस्वविषयप्रकाशने स्वतन्त्राः सः कान्तो यत्र वर्तते तत्र आजग्मुः बहिर्मुखतां विहायाऽन्तर्मुखतां प्राप्ताः तदानीं जवेन झटिति लोलानि कम्पितानि कुण्डलानि पाशाः याभ्यस्ताः समानमन्यत् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनङ्गवर्द्धनं कामोद्दीपकं गीतं निशम्याकर्ण्य भक्तेच्छापूरकेण कृष्णेन गृहीतमाकृष्टं मनो यासां ताः व्रजस्त्रियः अन्योन्यमलक्षितः अत्यौत्सुक्येन गमनवशात् उद्यमः श्रीकृष्णं प्रति गमनोद्योगो याभिस्ताः स श्रीकृष्णः कान्तो यत्र तत्र गीतध्वन्यनुसारेण आजग्मुः जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः ॥ ४ ॥

भाषा टीका ।

अनंग जो कामदेव है ताके बढावनवारो ऐसे वा गीत कूं सुनके, श्रीकृष्णचन्द्र ने हरयो मन जिनको परस्पर नहीं लखाई परयो उद्यम जिनको ऐसी वे ब्रज की स्त्री तहां आवत भई जहां कमनीय पति श्रीकृष्णचन्द्र वंशीवट पे वंशी बजाय रहे, और चलिवे के समय वेगसों जो चली हैं तासों कुण्डल जिनके झोटा खाते जांय तासों ये जानी जाय कि कुण्डल भी श्रीकृष्ण के समीप जायवे की त्वरा कराय रहे हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीकृष्णसूचकशब्दश्रवणेन तत्प्रवणचित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयन्त्य इवाद्यवसितं कर्म विहाय ययुरित्याह—दुहन्त्य इति । पयःस्थालीस्थं चुल्ल्यामधिश्रित्यैव क्वाथमप्रतीक्षमाणाः काश्चिद्ययुः संयावं गोधूमकणान् पक्वमनुद्वास्याऽनुत्तार्य ॥ ५ ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

परममोहनतद्गीतेन निजदेहदैहिकाद्युपेक्षया आत्मकर्मलोकधर्मादिकं परित्यज्य गता इति श्लोकत्रयेण वर्णयन् तत्रादौ कासां चित्स्वजातिकर्मपरित्यागमाह—दुहन्त्य इति । दुहन्त्यो गाः दोहं दोहनं दुग्धं वा तदानीमत्र गोपीनामपि कृष्णार्थं गोदोहने प्रवृत्तेः । यद्वा, अन्तर्भूतणयन्तं दोहयन्त्य इत्यर्थः । अभिययुः वेणुगीताभिमुखं ययुः काश्चिदित्यादिकं बहुलयूथभेदापेक्षया "वनिताशतयूथपः" इत्यग्रे वक्ष्यमाणत्वात् तत्तन्नामग्रहणं गौरवभरात् किं वा तेषां स्मरणविशेषकरत्वेन प्रेमवैकल्यापादनभयात् एतच्च श्रीभागवतामृतपूर्वखण्डे विवृतमेव तथाभिधाने हेतुः समुत्सुकाः कालविलम्बसहनासमर्थाः एष हेतुरग्रेऽपि सर्वत्रानुवर्त्यः अपरा इत्यस्य पूर्वेण परेणाप्यन्वयः एवमग्रेऽपि अन्यत्तैर्व्याख्यातम् यद्वा, पयश्चुल्लयामधिश्रित्य अनुद्वास्य पक्वमपि ततोऽनुत्तार्य संयावं च अधिश्रित्यानुद्वास्येति ॥ ५ ॥

एवं कासाञ्चित् सायन्तनमुख्यकर्मत्रयपरित्यागमुक्त्वा कासाञ्चिल्लोकधर्मत्यागं पादत्रयेण वदन् तत्रादौ कासाञ्चित्सामान्यबन्धुभृत्यादिपरित्यागमाह—परीति पादेन । परिवेषयन्त्यः बन्धून् भृत्यादींश्च प्रति अन्नादिकं संविभज्यार्पयन्त्यः स्थिताः तत्परिवेषणं हित्वा ययुरिति पूर्वेणैवान्वयः । यद्यप्येतदपि सायन्तनकृत्यान्तरेव प्रविशति तथापि स्त्रीणां भर्त्तृबन्धुभृत्याद्युपेक्षया लोकधर्मत्यागान्तरेव सुखं सङ्गच्छेतेति अनुपेक्षणीयाणामपि परित्यागं कासाञ्चिदाह—पाययन्त्य इति पादत्रयेण । हित्वेत्यनुवर्त्तते शिशून् भगिनीपुत्रादीन् हित्वा शुश्रूषन्त्यः शुश्रूषमाणाः स्नानाद्यर्थोष्णोदकार्पणादिना सेवमाना अश्नन्त्यः आशयन्त्यः इत्यन्तर्भूतणयन्तं पतीन् भोजयन्त्यः भोजनं भोजयितृत्वम् यद्वा, एवं पूर्वं धर्मादिपराणामपि सतीनां परमसतीनां लोकधर्मत्यागं पादाभ्यामुक्त्वा कासाञ्चित् देहापेक्षात्यागमाह—अश्नन्त्य इति पादैस्त्रिभिः । अश्नन्त्यो भुञ्जानाः लिम्पन्त्यः चन्दनपङ्कादिना निजदेहानुलेपनं कुर्वन्त्यः लेपनादिकमपास्येति शेषम् । अन्या इत्यस्य लिम्पन्त्य इति पदद्वयेनान्वयः । एवं भोगसंस्कारस्यापि त्यागेन देहोपेक्षा सिद्धैव यद्वा, भोजनत्यागेन भगवत्प्रीणनस्य देहस्योपेक्षोक्ता ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं तत्प्राप्तिमुक्त्वापि परममोहनतद्गीतेनावेगान्निजदेहदैहिकाद्यपेक्षया आत्मकर्मलोकधर्मादिकं परित्यज्य चलितानां श्लोकत्रयेण विशेषप्रतिपत्तये पुनः प्रस्थानोद्यममेव वर्णयन् तत्रादौ कासाञ्चित् स्वजातिकर्मपरित्यागमाह—दुहन्त्य इति युग्मकमिदम् । दुहन्त्यो गाः अन्तर्भूतणयर्थत्वात् दोहयन्त्य इत्यर्थः । अभिययुः वेणुगीताभिमुखं ययुः काश्चिदित्यादिकं बहुषु यूथेषु कासाञ्चिदेकक्रियासङ्घटनात् "वनिताशतयूथपः" इत्यग्रे वक्ष्यमाणत्वात् दोहं दोहनं दुग्धं वा तथाभिधाने हेतुः समुत्सुकाः कालविलम्बसहनाद्यसमर्थाः एष हेतुरग्रेऽपि सर्वत्रानुवर्त्यः अपरा इत्यस्य पूर्वेण परेणाप्यन्वयः एवमग्रेऽपि । अन्यत्तैः । यद्वा, पयश्चुल्लयामधिश्रित्य अनुद्वास्य पक्वमपि ततोऽनवतार्य संयावं च अधिश्रित्याऽनुद्वास्येति एवं कासाञ्चित् सायन्तनमुख्यकर्मत्रयपरित्यागमुक्त्वा तत्रैव कासाञ्चिल्लोकधर्मत्यागं पादत्रयेण वदन् तत्रादौ कासाञ्चित् सामान्यबन्धुभृत्यादिपरित्यागमाह—परीति पादेन । परिवेषयन्त्यः बन्धुभृत्यादिभ्य इति शेषः । तत्परिवेषणं हित्वा ययुरिति पूर्वेणैवान्वयः । अतिस्निग्धपरित्यागमपि कासाञ्चिदाह—पाययन्त्य इति पादेन । हित्वेत्यनुवर्त्तते वक्ष्यमाणानुसारेण भ्रातृपुत्रादीन् हित्वा अन्यथा रसाभासापत्तेः एवं लोकपरित्यागमुक्त्वा धर्मपरित्यागमाह—शुश्रूषन्त्यः शुश्रूषमाणाः स्नानाद्युष्णोदकार्पणादिना सेवमानाः स्थापयिष्यते कासाञ्चिद्देहापेक्षात्यागमप्याह, अश्नन्त्य इति । अश्नन्त्यो भुञ्जानाः अनेन तत्प्रेमाविष्टेषु दैहिकशुद्ध्यशुद्धिविचारो नास्तीति गम्यते ॥ ५-६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कृष्णगृहीतमानसत्वमेव तच्चेष्टाभिः प्रपञ्चयति—दुहन्त्य इति त्रिभिः । काश्चिद्व्रजस्त्रियो गाः पयो दुहन्त्यः सत्यो दोहं हित्वा समुत्सुकाः कृष्णे इति शेषः । तमभिययुः प्रापुः अपरास्तु स्थालीस्थं क्षीरं चुल्ल्यामधिरोप्य तत्क्वाथमप्रतीक्षमाणा ययुः काश्चित्तु संयावं गोधूमकणान्नं पक्वमनुद्वास्याऽनवरोप्य ययुः ॥ ५ ॥

काश्चित्परिवेषयन्त्यः पत्यपत्यादीन् भोजनार्थं निवेश्यान्नादिकं पात्रेषु ददत्यः तत्परिवेषणं हित्वा अपरास्तु शिशून् पयः पाययन्त्यः तद्धित्वा अन्यास्तु पतीन् शुश्रूषन्त्यः उपचरन्त्यः शुश्रूषां हित्वा अपरास्त्वश्नन्त्यो भोजनस्पात्रमपास्य हित्वा ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदा तासां भावविशेषं कथयति, दुहन्त्य इति । दोहनक्रियां दोहनपात्रं वा अधिश्रित्य पयः श्रपयितुं चुल्ल्यामारोप्य संयावं कथदन्नमनुद्वास्य अनवरोप्य ॥ ५ ॥

परिवेषयन्त्यः भुञ्जानानां पात्रेषु भोक्तव्यं विनिक्षिपन्त्यः तत्परिवेषणं पाययन्त्यः स्तनादिकमिति शेषः । पादमर्दनादिना शुश्रूषन्त्यः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दुहन्त्यः दोहयन्त्यः अभिययुः चलितवत्यः शिशून् भगिनीभ्रातृपुत्रादीन् पयो गव्यं सुतान् स्तनमित्युक्ते रालम्बनवैरूप्यात् "सर्वाः शरत्काव्यकथारसाश्रयाः" इति वक्ष्यमाणरसाश्रयविरोधाच्च शुश्रूषन्त्यः इत्यन्तर्गृहरीतिकाः काश्चिदेव वेषाः अन्यासां यत् पत्यपत्यसुहृदामित्यादिना तदस्वीकारात् ॥ ५-८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तासामौत्कण्ठ्याधिक्यप्रकटनाय पूर्वमाजग्मुरित्यतीतकाले निरूप्य पुनरागमनप्रकारमादितः कथयन् मार्गगमनं

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

भावं दर्शयति—दुहन्त्योऽभिययुरित्यादिबहुभिः । दुहन्त्य इति अन्तर्णीजन्तं भ्रात्रादिद्वारा दोहयन्त्य इत्यर्थः । दोहं हित्वेति दोहस्थानात् पुनर्गृहं न गतास्तत एवाभ्ययुरित्यर्थः । पराः पयोऽधिश्रित्य नत्वपाश्रित्य अपराः संयावम् अनुद्वास्य नावतार्य्यं काश्चित्परिवेषयन्त्यः ॥ ५ ॥

भुञ्जानेषु गुरुषु परिवेषणं कुर्वत्यस्तदपराः शिशून् बालान् रक्षयतांकान् गव्यं पयः पाययन्त्यः लिम्पन्त्योऽनुलेपनं कुर्वत्यः अन्याः प्रमृजन्त्यः प्रकर्षेणाङ्गमार्जनं कुर्वत्यः अञ्जन्त्यः नयनमञ्जनेन रञ्जयन्त्यः काश्चित्पतीन् पत्यभिमानिनः शुश्रूषयन्त्यः उपचारादिनाऽनुरञ्जयन्त्यः अन्या अश्नन्त्यः भोजनं कुर्वत्यः तत् अपास्य ॥ ६—७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

प्रसङ्गादन्यासामप्यागमनमाह—तासां वा क्रियापराणां तत्र काश्चन षोडशसहस्रव्यतिरिक्ताः नवविधाः समागताः दशविधा वा गुणानां त्रैविध्यात् नवविधत्वं निर्गुणाश्चैकविधाः जातिकुलब्लोकधर्मपराहितस्तास्तित्र उदीरिताः तत्र गोपजातीयाः दुग्धपराः तत्र दुग्धस्योत्पत्तिस्थितिप्रलयान् कुर्वन्ति तास्तित्रः प्रथममुदीरिताः एवंविधा अपि गणाश इति वक्तुं सर्वत्र बहुवचनं काश्चित् दुहन्त्य एव दोहं दोहनलक्षणं कर्म मध्ये त्यक्त्वा भगवदाभिमुख्येन ययुः गौर्वत्सश्च बद्धौ दोहनपात्रं च अर्द्धदुग्धं यः समयः सर्वथा त्यक्तुमशक्यः तस्मिन् समये समागताः तथा समागमने हेतुः समुत्सुका इति । समयगुत्सुकाः (कयः)को वदे क्षणान्तरे भगवान् कगमिष्यतीति अन्याः पुनः पयः अधिश्रित्य तथैव ययुः भोजनार्थं पयांसि पच्यमानाः गोधूमकणाः संयावशब्देनोच्यन्ते तेषां दोहे सर्वनाश इति पक्वस्यैव संयावशब्देनोच्यते अतस्तदप्यनुद्वास्य काश्चन आभिययुः अपरा इति सर्वत्र गुणभिन्नस्वभावत्वम् ॥ ५ ॥

एवं तिस्रो राजस्यः सात्त्विकीराह—परिवेषयन्त्य इति । भर्तुरपत्यस्यापि सेवा स्त्रीधर्मः तत्र भर्तुः भोजने शयने च सेवा स्वधर्मः अतिबालकानां पुत्राणां स्तनदानं च परिवेषणं च सृष्टिरिव रेतस उत्पादकत्वात् स्तनदानं पालनं शिष्टमन्यत् सर्वत्र तत्साङ्कित्वेति ज्ञेयम् अन्या इत्यपि तामसीराह, अश्नन्त्योपास्यभोजनमित्यादि ॥६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तासां तत्पार्श्वगमनकाले परमोत्कण्ठया विलम्बस्यासह्यत्वात् ममताऽहन्तास्पदकर्मापेक्षाभावं श्लोकत्रयेण वदन् काश्चित् स्वजातिधर्मपरित्यागमाह—दुहन्त्यः गा दोहयन्त्यः तं दोहं दोहनकर्म हित्वा अभिययुरभिसस्रुः पयो दुग्धं पात्रस्थं चुल्ल्यामधिश्रित्य अध्यारोप्य एतत् क्वाथमप्रतीक्षमाणाः काश्चित् संयावं गोधूमकणान्नं पक्वमप्यनुद्वास्य अनवतार्य्यं स्त्रीमात्रधर्मत्यागमाह—परिवेषयन्त्यस्तत्परिवेषणं पतीनुष्णोदकप्रदानादिना शुश्रूषन्त्यः ॥ ५ ॥ ६ ॥

विशुद्धरसदीपिका ।

अथ श्रीकृष्णसूचकध्वनिश्रवणानन्तरं तत्प्रवणचित्तानाम् अनुषङ्गेण तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंस्तासां स्वस्वभावाभिव्यञ्जकां क्रियां तन्निवृत्तिं च दर्शयति—दुहन्त्य इत्यादित्रिकेण । तत्रादौ "तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः" इति महापुरुषानुज्ञानुसारेणावतारितदेव्यंशानां ता अंशिनीनामेवासां प्राणसख्योऽभवन् व्रज इति तत्प्राणसखीत्वं दर्शयन् स्वजातिकर्मपरित्यागपूर्वकं तत्तद्यूथेश्वरीकरणीयं दोहनादिकं ताः कुर्वत्यः प्रस्थिता इत्याह—दुहन्त्य इत्यादिस्पष्टम् । एवं चान्तर्भावितण्यर्थकल्पनापि पराहता किं कृत्वा ? दोहं हित्वा तत्र हेतुः समुत्सुका इति, कालविलम्बमसहमानाः पयः स्थालीस्थं चुल्ल्यामधिश्रितं तदुत्तारणमप्रतीक्षमाणाः संयावं गोधूमकणामेलितं क्वथितं पयः "थूली" इति प्रसिद्धं तदनुद्वास्य अनवतार्य्य ययुः एवं च सायन्तनमुख्यकर्मपरित्यागः सूचितः । एताः परिचारिकाप्रायत्वाद्देव्यंशा एवेति मुख्यव्यक्तम् ॥ ५ ॥

कासाश्चित्साधकचरीणां सामान्यबन्धुपरित्यागमाह—परिवेषयन्त्य इति । अन्याः भ्रातृजायादयः परिवेषणं कुर्वतीः प्रयोजयन्त्य इत्यर्थः । शिशून् प्रजावत्यादिबालान् पयः पाययन्त्यः इति स्नेहादिपरित्याग उक्तः ते च भ्रातृपुत्राद्य एव ज्ञेयाः अन्यथा रसाभासापत्तेः तथा तत्पेयं गवामेव पयः अत एव सुतान् स्तनमिति नोक्तं ततश्चैता दुर्गाव्रतपरा धन्यायाः कन्या इति ज्ञेयम् । शुश्रूषन्त्यः पतीनीति श्रुतिमुनिरूपाः वक्ष्यमाणदेहत्यागपूर्वकं प्राप्तियोग्याः पतीनिति पतिम्मन्यानित्यर्थः कासाञ्चिद्देहापेक्षापरित्यागमाह—अश्नन्त्य इति । एता नित्यसिद्धाः परिचारिकाः देव्यंशानामेताभिः सम्मिलितानां तादृशत्वं संभवत्वित्यत्र सम्पूर्वस्य भवतेर्मिलनार्थत्वादिति ज्ञेयम् ॥ ६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तत्र पृथक् पृथक् तासां गमनदशामाह—दुहन्त्योऽभिययुरिति । अत्र भगवत्प्रेमपथाचार्यभूता गोप्यः स्वयं राधाकृष्णस्वरूपा अपि कलिजनोद्धारायान्यधर्मादिसामर्थ्यमपश्यता धर्मसंस्थापनावतीर्णेन भगवता सर्वावतारशिरोमणिना सर्वधर्मशिरोमणिमुद्रावयता ऽऽविर्भावितप्रेमपथप्रवृत्त्यै लीलामिषेण तदङ्गधर्मानुपदिशति—तत्र गृहादिभ्यो विच्छिद्य भगवत्प्रापकतदीयगीतं तद्वंशायेऽच्युतगोत्रा गुरवः तद्द्वाराश्रवणमात्रेणातिविक्लवितमनस्त्वेन सुसमृद्धाद्बन्धुजनपूर्णाद्गृहादप्यैहिकामुष्मिकनिष्कामतया सद्यः परिव्रज्य तल्लीलासुखप्रापकवनं प्रति गमनं "नैवारब्धं परित्यजेत्" इत्यादिवाक्यानामपूर्णकर्मत्यागे दोषविधायकानामन्याधिकारप्राप्तानां न प्रेमपथप्रवेशः । अत्र तु "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुत्या ऐहिकामुष्मिककर्मपूर्णतापेक्षामसमाप्य तत्कृत्यं सर्वमुत्सृज्य तद्वंशानुगतया भगवद्धामतल्लीलाप्रवेशाय समुद्यम एवोचित इति स्वयमनुष्ठाय स्वाचरितेन बोधयन्ति—

> "परोपदेशवेलायां सर्वे व्याससमा द्विजाः ।
> तदनुष्ठानवेलायां मुनयोऽपि न पण्डिताः" ॥

इतिवन्न कथनमात्रम् तत्र काश्चिद्दुहन्त्यो गाः दोहयन्त्योऽभ्

श्रीरामनारायणकृतभावभावविभाविका ।

वृञ्जितीति त्यागात्पूर्वं स्वकुलविहितधर्मानुष्ठानं यथा द्विजाः "स्वर्गकामो ज्योतिष्टोमेन यजेत्" इत्यादिसकामश्रुतिगोरसममृतादिप्राप्तिमिच्छन्तस्ताः श्रुतीर्गाः तत्कर्मानुष्ठानेन दोहयन्तोऽच्युतगोत्रमुखात्तद्गीतं गीताद्युपश्रुत्य तद्धित्वा समुत्सुका गृहात् प्रव्रजन्ति तथा दोहं हित्वा इत्यपूर्णकर्मत्याग उपदिष्टः समुत्सुकाः सम्यगुत्साहवन्त्योऽभिययुः वंशमभिमुखीकृत्य भगवदभिमुखं ययुरिति गुरुहरिसन्मुखतोपदिष्टाः तत्र दोहत्यागगमनोत्साहयोरयमभिप्रायः दोग्ध्रा गोपालनन्दनेन श्रुतिगोरसगीतादोहनवत् श्रुतिरूपगोपिकान्तरिन्द्रियगोरसं प्रेमबन्धनेनाच्छाद्य वंशध्वनिनैव दुग्धम् अथ बाह्येन्द्रियगोरसं भुजबन्धनेनाच्छाद्य कुचमर्दनेन दोहयितुं गृहगतं लज्जाबन्धनम् उत्साहजवेन त्रोटयित्वा रतिरसपूरितस्तनभारनमितवीणामध्या गृहसुखं तृणवत्त्यक्त्वा समुत्सुका ययुः अन्तरङ्गप्रयोजनप्राप्तौ बहिरङ्गत्यागवदन्तरङ्गगोदोहने बाह्यगोदोहनत्याग उचित एव अन्यासां चरितमाह—पयोधिभिरित्येति । उपदेशः पूर्ववत् अयमत्र विशेषः यथा केचित्सज्जनाः स्वजीवनं सफलीकर्त्तुं स्नेहसारान्विते श्रुतिगोरसे समन्वितं कृत्वा विरहज्वालतापेन तत्सुपक्वतां सम्पादयन्ति तथाऽपरा गोप्यः स्वजीवनान्नसुस्निग्धे पयसि मेलितं संयावं सुस्वादुसुपक्वकरणायाग्नावधिश्रित्य भगवता वंशभमनेन इच्छयहृच्छयाग्नौ प्रज्वलिते तापाधिक्योद्भासिते स्नेहरसेऽन्तस्तापसन्तप्ता बाह्यानुसन्धानशून्यास्तमनुद्वास्यैव ययुः तथा च यदान्तस्तापवद्भिर्बहिः स्वजीवनसाफल्याय सेवितगोरसमपि त्यज्यते तदा किमु वाच्यं सकामश्रुतिगोरसत्यागे अत्रास्माभिरन्यानिरूपितगोपीनां न्यूनाधिकभाव उपेक्ष्यते भगवत्सम्बन्धिनां भगवद्रूपताऽनुसन्धानात् ॥ ५ ॥

अन्यासां चरितमाह—परिवेषयन्त्य इति । उपदेशः सर्वत्र समानः काश्चित्तु सुस्निग्धमन्नमन्येभ्यः परिवेषयन्त्यः शुष्कनीरसबहुच्छिद्रस्य हृदयशून्यस्तग्रन्थ्यात्मानवंशवंशजातस्य वंशस्यापि मधुगानसम्पादकं कृष्णाधररसं तद्वंशदूषगीतरूपतया गतं कर्णपुटकद्वारे सदास्वाद्याऽहो एतद्रसलुब्धा मुनयोऽपि देवेभ्यो हविर्दानात्मकयज्ञकर्माणि त्यजन्ति वयं कामिन्योऽपि कथं तत्पानं हित्वा लौकिकपरिवेषणे प्रवृत्ता इत्यवधार्य्य तद्रसभाजनं हित्वा भाजनं च भित्वा ययुरिति पूर्वेण सर्वत्रास्मिन् श्लोकेऽन्वयः । अत्र तु स्वयं विषयरसाभोक्तॄणामन्येभ्यो दातॄणामत्युत्तमानामपि कृष्णरसास्वादाय तद्विक्षेपकदानादिकर्मत्याग उपदिष्टः । काश्चित्तु शिशून् पयः पाययन्त्य इत्यत्र सुतान् स्तनमित्यनुक्त्वा शिशून् पय इति प्रयोगादन्यासां बालानां गवादिवर्त्सानामिति भाति यथा अकिञ्चनवैराग्याद्विशिशूनां पुष्टितां सम्पादयन्त्यपि प्रेमोत्कर्षवर्द्धनानि शृण्वन्त्येव तत्सर्वं विस्मृत्य भगवत्स्वरूपमात्रं पर्यवस्यति तथा पोष्यान् शिशूनपि हित्वा ययुः तथा च लोके न काचिदेव प्रेमिणः किन्तु सर्वे एव परन्तु पुत्रबन्धुधनादौ विभक्ता प्रीतिर्न प्रेमत्वेनाभिधीयते सर्वतो निर्विधेकविषयाचेत्सैव प्रेमादिलक्षणा भजते तदुक्तं श्रीप्रह्लादेन—

> "या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
> त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु" ॥

काश्चित्तु पतीन् शुश्रूषन्त्यः तद्धित्वा ययुरिति सर्वत्र सम्बध्यते न चाऽत्र पतित्यागप्रयुक्तो दोषः यथा विष्णुबुद्ध्याऽश्वत्थः सेव्यस्तत्र विष्णोरेव मुख्यं सेव्यत्वं नाश्वत्थस्य तथा विष्णुरूपतया पत्युः सेव्यत्वे विष्णोरेव मुख्यं सेव्यत्वं पतित्वं चेति प्रतीकमुपेक्ष्य साक्षात्पतिहरिसेवनेन दोषशङ्काकलङ्कः "वरोऽसौ विष्णुरूपेण प्रतिगृह्णात्ययं विधिः" इति वाक्येन तन्निराकारात् वस्तुतस्त्वेताः श्रुतिरूपास्तथा च यथाश्रुतयस्तत्तदेव कर्मपरत्वेन प्रतीयमाना अपि ब्रह्मैकपराः "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः । नित्यश्रुतीनामनित्यदेवसम्बन्धानुपपत्तेश्च तथाऽत्र या या गोपी यस्याः श्रुतेरवतारस्तदर्थत्वेन प्रतीयमानो देवोऽत्र तत्पतित्वेनावभासते यथा सा सा श्रुतिस्तत्तद्देवपरत्वेन भासमानापि तदसम्बन्धान्न तत्परा किन्तूक्तश्रुतिर्ब्रह्मपरैव तथा ता गोप्योऽपि तत्तत्पत्नीत्वेनावबुध्यमाना अपि न तत्पत्न्यस्तत्सम्बद्धा वा किन्तु कृष्णब्रह्मैकपरा अतो यावच्छ्रुतीनां ब्रह्मैकपरत्वबोधकगुरूपदेशाभावस्तावत्तासां तत्तद्देवपरत्वप्रतीतिवत्पतिशुश्रूषा अच्युतगोत्रगुरूपदेशात्तदेव परत्वमपहाय ब्रह्मपरत्ववत् हरिवंशनादश्रवणोत्तरं तच्छुश्रूषां हित्वा कृष्णपरत्वमित्यवधम् काश्चित्तु अश्नन्त्यो भोजनमपास्य ययुः यथा योगभ्रष्टा विषयभोगासक्ता अपि गुरोर्हरिगीतश्रवणमात्रेण "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति" इति श्रुत्या ब्रह्मण एव रसरूपत्वमवधार्य तद्रसानुभवाय तान् भोगान् विषमिव मन्वानास्तानपास्य परिव्रज्य हरिं भजन्ति तथा अश्नन्त्योऽपि हरिवंशरवं श्रुत्वैव तदपास्याकृताचमना एव तदधररसास्वादाय ययुः ॥ ६ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

आजग्मुरित्युक्त्या विप्रतिबन्धकानां तत्तद्ध्यानपराणां सत्त्वात् कथं स्वस्वगृहात्तासां निस्सरणमित्यपेक्षायां प्रेष्ठसूचकशब्दश्रवणमात्रेण तत्प्रवणमानसानां तत्क्षणमेव लौकिककर्मनिवृत्तिर्जातेति सूचयंस्तासां निर्गमनप्रकारमाह—दुहन्त्य इति । दुहन्त्यो दोहयन्त्यः तत्क्षणमध्य एव दोहं देहनं हित्वा काश्चित् अभिययुः वेणुगीतकृत्प्रेष्ठाभिमुखं ययुः । यद्वा, दोहनपात्रं गृहीत्वा काश्चित् स्थितास्तत्समये गीते तत्पात्रं विहायाभिययुः । यद्वा, दोहनानन्तरं दुग्धपात्रं गृहीत्वा काश्चित्स्थितास्तत्क्षणे वेणुगीते श्रुते च तत्यक्त्वाऽभिययुः काश्चित्तु स्थालीस्थं पयश्चुल्ह्यामधिश्रित्य तत्क्वाथार्थं तदधिसेचनानिवृत्त्यर्थं च तत्सन्निधौ स्थितास्तत्समये वेणुगीतमन्तःप्रविष्टं ततस्तत्क्वाथमप्रतीक्ष्यमाणास्तद्भाजनं विहायाभिययुः अपराः संयावं पक्वं गोधूमकणान्नम् अनुद्वास्य तदाधमन्यमनुसन्धायाभिययुः यतः समुत्सुकाः उत्कटोत्कण्ठावत्यः तद्विलम्बसहनाऽसमर्थाः एतेन स्वजातिधर्मं विहायाभिययुरित्युक्तम् ॥ ५ ॥

अथ स्त्रीमात्रधर्मत्यागमाह—परिवेषयन्त्यो बन्धुभ्यः परिवेषणं कुर्वत्यः तत्परिवेषणं विहाय काश्चिदाश्रितवात्सल्यात् शिशून् पयो दुग्धं स्तन्यमितरद्वा पाययन्त्यः तत्पयः पानं हित्वा काश्चिदभिययुः पतीन् सर्वे

लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ।
व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णान्तिकं ययुः ॥ ७ ॥
ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ।
गोविन्दाऽपहृतात्मानो न न्यवर्त्तन्त मोहिताः ॥ ८ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

सेवनीयान् शुश्रूषन्त्यः पादप्रक्षालनादिसेवां कुर्वन्त्यस्तां सेवां विहायाभिययुः काश्चित्तु भोजनं कुर्वन्त्यः भोजनं त्यक्त्वा मनागेवान्ता एवाभिमुखं ययुः कृष्णान्तिकं ययुरित्युत्तरेणात्रान्वयः । एतेन बन्धुभृत्यत्यागः अतिस्निग्धत्यागः स्वधर्मत्यागः स्वदेहपोषणत्याग-श्चोक्तः ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासां कृष्णेऽनुरक्तिं तदन्यत्र विरक्तिं च सूचयन् गमने प्रकारमाह—दुहन्त्य इति त्रिभिः । काश्चित् श्रीकृष्णसमीपगमने समुत्सुकाः गाः पयो दुहन्त्यः मध्ये दोहं दुग्धं दोहनकर्म वा हित्वा अभिययुः श्रीकृष्णाभिमुखं जग्मुः अपराः समुत्सुका इति सर्वत्र योज्यम् पयो दुग्धं पात्रस्थं चुल्यामधिश्रित्य अध्यारोप्य तत्क्वाथमप्रतीक्षमाणाः ययुः अपराः संयावं गोधूमकणान्नं पक्वमनुद्वास्यानवरोप्य ययुः ॥ ५ ॥

काश्चित्परिवेषयन्त्यः बन्धून् भोजनार्थं निवेश्य अन्नादिकं ददत्यः तत्परिवेषणं हित्वा ययुः काश्चित् शिशून् बालान् पयः पाययन्त्यः काश्चित्पतीन् शुश्रूषन्त्य उपचरन्त्यः ॥ ६ ॥

भाषा टीका ।

काम के बढायवे वारे वा वेणु के गीत कों सुन के बडी उत्कण्ठा भई जिन कें ऐसी कितनी गोपी दूध दुहावती हीं सो दूध दुहायवे कूं छोडके श्रीकृष्ण की ओर जात भई, कितनी गोपी चूल्हे पै औटवे कों दूध चढाय कें आवति भई, कोई गोपी रँधी रँधाइ थूली कों चूल्हे पै तें नहीं उतार कें आवत भई ॥ ५ ॥

कोई गोपी अपने घरकेन कों परोस रहीं हीं सो परोसवे कों छोडकें आवति भई, कितनी गोपी अपने छोटे २ बालकन कों दूध पिवावतीं हीं सो दूध पिवायवे कों छोडकें आवति भई। कोईक गोपी अपने पतीन की शुश्रूषा कर रहीं ताकों छोड के आवति भई, कितनीक अनी भोजन कर रहीं सो भोजनन को छोड कें आवति भई ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्याः प्रमृजन्त्यः अङ्गोद्वर्त्तनादि कुर्वत्यः काश्च काश्चित् कृष्णतुष्ट्यर्थं कर्म तदासक्तमनसोऽन्यथा कृतमपि फलत्येवेति द्योतयन्नाह—व्यत्यस्तेति । स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः ॥ ७ ॥

न च कृष्णाकृष्टमनसां विघ्नाः प्रभवन्तीत्याह—ता वार्यमाणा इति ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कासाञ्चिच्च श्रीभगवत्सन्तोषणार्थतद्भजनसाधननिजाङ्गभूषणापरित्यागमप्याह—लिम्पन्त्य इत्यादिना । तत्रैव हेतुं दर्शयन् किं वक्तव्यं दैहिकदेहाद्यपेक्षापरित्यक्तेति कासाञ्चिद्देहविस्मृतिरपि जातेत्याह—व्यत्यस्तेति । पूर्वोक्तसर्वत्यागभावकस्यौत्सुक्यस्य विभ्रमाख्योऽयमनुभावः यथोक्तं "वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात् । विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" इति. अनेन तद्विधानां प्रेमभगवता यथापेक्षितं न तथा वेशादीति गम्यते किन्तु पश्चात्तेनैव परिहृत्य स्वयं यथावत् परिधापितमिति ज्ञेयम् एवं दोहनादीनामेषामवश्यापेक्षत्वेन यथोत्तरं श्रैष्ठ्यमूह्यम् ।यद्वा, केवलमत्र प्रारब्धनिजनिजकर्मपरित्याग एव तात्पर्यम् तत्र च व्यत्यस्तवस्त्राभरणत्वे वस्त्रादिधारणरीतित्याग एव सर्वत्र च तत्र तत्र हेतुः, कृष्णगृहीतमानसा इति । समुत्सुका इति च प्रोक्तम् एवं सर्वा अपि कृष्णस्य परमाकर्षकस्य श्यामसुन्दरस्य श्रीव्रजेन्द्रनन्दनस्य अन्तिकमेव ययुः न तु लज्जादिना विघ्नादिना वा दूरे तस्थुरित्यर्थः । परममोहितत्वात् यद्यपि स यत्र कान्तस्तत्राजग्मुरित्यनेन तदन्तिकगमनमेवोक्तं तथापि परममोहेनातिवेगेनात्यन्तनिकटगमनविवक्षया पुनर्विशेषोक्तिरिति दिक् ॥ ७ ॥

अधुना स्त्रीभिः प्रबोध्यमानामपि श्रीभगवदपहृतचित्ततया तासामविशेषविचारात्तद्ध्यानमाह—ता इति । सर्वा एव ताः पत्यादिभिर्वार्यमाणाः धर्मप्रदर्शनादिना हस्तधारणादिना च गन्तुं निरुध्यमाना अपि न न्यवर्त्तन्त किन्तु ययुरेवेत्यर्थः । कुतः मोहिताः हृतविवेकाः तत्कुतः गोविन्देन गोकुलेन्द्रेण । यद्वा, गा इन्द्रियाणि ईश्वरत्वेन विन्दतीति तथा तेन अपहृत आत्मा चित्तं यासां ताः महत्तमेनापहृते द्रव्ये स्वरूपानां पक्षान्तरे च अन्तरीश्वरेण महामोहनेन प्राणकोटिप्रेष्ठेनान्तरपहृते बाह्यानामन्येषां मतः प्रत्यर्पणसामर्थ्याभावात् अत्र प्रवाहवेगनीयमाना नौर्यथा तटस्थानां तिष्ठतिष्ठेत्याद्युक्त्या महाबुद्धानां वा नौधारणेनापि न तिष्ठेदिति दृष्टान्तो द्रष्टव्यः गोविन्देनापहृत आकृष्ट आत्मा जीवाख्यो यासामिति निरुक्तौ जीवेन विच्छेदः स्यादिति जीवनार्थमेव गता इति श्लेषार्थः तथापि पतिभिरिति तेषां पत्नीशुभाशुभभागित्वेन मुख्यत्वात् ततश्च

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

केवलं कन्यावैगुण्येन दोषस्पर्शात् स्नेहाच्च पितृभिः ततश्च दुष्कीर्त्तिभयात् स्नेहविशेषाच्च भ्रातृभिः ततश्च कुलदोषशङ्कया बन्धुभिरिति—

"रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके ।
अभावे ज्ञातयस्त्वेवं न स्वातन्त्र्यं क्वचित्स्त्रियः" ॥

इति स्मृत्युक्ताश्चत्वारो रक्षका अत्रोक्ताः तत्र प्रायः पुत्रानुत्पत्तेरत्र पुत्रा नोक्ताः पत्यादीनां चैषां यथोत्तरं न्यूनत्वमूह्यं तासामुत्तरोत्तरं तत्तद्वश्यतासम्बन्धयोर्न्यूनत्वात् तथापि पूर्व पूर्वेषां निवारणे प्रवृत्तावपि परपरेषां तत्र प्रवृत्तिः कुटुम्ब समुदायतापेक्षया यद्वा, पूर्वपूर्वैः परित्यागे कृते परपराश्रयणाशङ्कया तैस्तैः क्रमेण निवारणम् । यद्वा, तत्तदन्तिकवर्त्तिभिः पतिभिः काश्चित् पित्रादिभिश्च काश्चन तत्र च पतिभिः पत्न्य एव पित्रादिभिः प्रायोऽविवाहिताः स्ववासिन्यश्च पुत्र्य इति विवेचनीयम् अन्यत् समानम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कासाञ्चिद्व्याहरहस्तत्प्रत्याशया विरहेऽपि "अङ्गेष्वाभरणं करोति बहुशः" इति गीतगोविन्दरीत्या श्रीभगवत्प्रेमविलसितस्यापि निजाङ्गवेषस्य परमोत्कण्ठया परित्यागमाह—लिम्पन्त्य इत्यादिना । लिम्पन्त्यः अङ्गरागं कुर्वन्त्यः लेपनादिकमप्यपास्येति ज्ञेयम् अन्या इत्यस्य लिम्पन्त्य इति पदद्वयेनान्वयः । तत्रैव हेतुं दर्शयन् किं वक्तव्यं दैहिकदेहाद्यपेक्षा परित्यक्तेति कासाञ्चिद्देहावयवविशेषाऽननुसन्धानमपि जातम् इति व्यनक्ति—व्यत्यस्तेति पूर्वोक्तसर्वत्यागानुभाव (क) स्यौत्सुक्यस्य विभ्रमाख्योऽयमनुभावः यथोक्तम्—

"वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" ॥ इति ।

अनेन तद्विधानां प्रेमभगवतो यथाऽपेक्षितं न तथावेशादीति गम्यते किन्तु पश्चात् तेनैव परिहितस्य स्वयं तथावत्परिधापितमिति ज्ञेयम् एवं दोहनादीनामेषामवश्यापेक्ष्यत्वेन यथोत्तरं श्रैष्ठ्यमूह्यं तदेवं सर्वा अपि कृष्णस्यान्तिकं प्रतिययुः प्रस्थितवत्यः ॥ ७ ॥

अधुना स्वैः स्वीयैर्बलात्कारितबाह्यानुसन्धानानामपि तासां कुलवधूस्वाभाविकत्वेन परमदुस्त्यजस्य लज्जादेरपि त्यागमाह—ता इति । सर्वा अपि ताः पत्यादिभिः क्व नु रात्रौ बहिर्गम्यत इत्यादिनिर्बन्धेन मुहुर्वार्यमाणा अपि न न्यवर्त्तन्त किन्तु ययुरेवेत्यर्थः । कुतः मोहिताः हृतविवेकाः तत्कुतः गोविन्देनापहृत आत्मा चित्तं यासां ताः अयं पत्यादीनामपि शैथिल्ये हेतुर्ज्ञेयः तन्नामकीर्तनमात्रस्य सर्वविघ्नापहारिप्रभावत्वात् तत्तदन्तिकवर्त्तिभिः पतिभिः काश्चित् पित्रादिभिश्च काश्चन तत्र च पित्रादिभिरविवाहिताः स्ववासिन्यश्चेति—

"रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके ।
अभावे ज्ञातयस्त्वेवं न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥

इतिस्मृतेः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमन्या लेपनमार्जनाञ्जनादीन् कुर्वाणालेपनादीन् विहाय लोचने अञ्जन्त्य इत्यन्वयः । काश्चित्तु व्यत्यस्तानि विपरीतस्थानानि वस्त्राण्याभरणानि च यासां तथाभूताः सत्यः कृष्णसमीपमाययुः ॥ ७ ॥

एवं गच्छन्त्यः पित्रादिभिर्वार्यमाणा अपि कृष्णगृहीतमानसत्वात्काश्चिन्नन्यवर्तन्त न गृहानाजग्मुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रमृजन्त्यः शरीरोन्मार्जनं कुर्वन्त्यः स्थानसम्मार्जनं वा अञ्जन्त्यो मष्यादिना मुखकण्ठादिषु आभरणादि दधानाः कण्ठादिषु वस्त्राणि वसाना इति व्यत्यस्तवस्त्राभरणाः ॥ ७ ॥

वार्यमाणा निरोध्यमाना गोविन्देनापहृता आकृष्टा आत्मानो मनांसि यासां तास्तथा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु, कथं तासां पितृपतिभ्रातृभिर्वारणं न कृतमित्याह, ता वार्यमाणा इत्यादि । ताः पतिभिः भ्रातृभिर्बन्धुभिश्च न वार्यमाणा बभूवुरित्यर्थः । ऊढाः पतिभिः अनूढा पित्रादिभिः अत एव न न्यवर्त्तन्त बाधकाभावात् कथं तैस्तैर्न वारिताः तत्राह—मा ऊहिता वितर्किताः योगमायाभावात् ते ते तास्ताः समीपस्था एव विदुः ता एव वा कथं विचारेण न न्यवर्त्तन्त तत्राह—गोविन्दापहृतात्मानः आत्मनि सति बुद्ध्यादयो गुणाः स्युः तेषु सत्सु विचारः प्रवर्त्तन्ते आत्महरणेन सर्वहरणमित्यर्थः । काकाक्षिगोलकन्यायेन नकार उभयत्र योज्यः ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

लिम्पन्त्यः शरीरानुलेपनं कुर्वन्त्यः प्रमृजन्त्यः उद्वर्त्तनादिकं कुर्वन्त्यः गृहं वा लिम्पन्त्यः प्रमृजन्त्यः आभरणानि भाण्डानि वा प्रमृजन्त्यः अत्रापि पूर्ववदेव क्रमः शरीरसेवातो गोसेवा मुख्या ततः पतिसेवेति अञ्जन्त्यः काश्च लोचने इति गुणातीता अतः काश्चनेति दुर्लभाधिकारः सूचितः ज्ञानमार्गशोधिका इति निर्गुणत्वं तासामागमने दैहिकविचारोऽपि न जातः किं पुनस्तद्धर्माणामितिवक्तुं वस्त्राभरणयोर्व्यत्यासमाह—व्यत्यस्तेति । व्यत्यस्तानि विपरीतानि वस्त्राण्याभरणानि च यासाम् एवमुद्यमः सर्वासामेव साधारणो निरूपितः व्यत्यासो मार्गगताविति केचित् तन्मध्येऽपि काश्चित् कृष्णान्तिकं ययुः काश्चिन्न याः पुनः शब्दपरा जाताः ता उद्युक्ता अपि नाऽऽगताः याः पुनः शब्दापेक्षया त्यक्तवत्यः ताः सर्वतो निरपेक्षा विपरीतावश्यकदेहधर्माः भगवदन्तिकमागताः ॥ ७ ॥

सर्वासामनागमने हेतुमाह—ता वार्यमाणा इति—

"रक्षेत् कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

इति चत्वारो स्वकाः मतो यथामथं पतिभिर्वार्यमाणा जाताः काश्चन पितृभिः तथैव पुत्रैः बन्धुभिश्च ते हि निरुद्धा अपि फलरसानभिज्ञाः साधनप्रवणाः स्वद्वारैव स्त्रीणां भजनं मन्यन्ते न तु स्वातन्त्र्येण तथापि गोविन्देनापहृत आत्मा अन्तःकरणं यासां निवारणं हि अत्र प्रवर्तकश्च भगवान् अन्तःकरणारूढाश्च पुरुषाः न हि नौकाप्रवाहवेगाद्गच्छन्ती तिष्ठतिष्ठेत्युक्ता तिष्ठति भयं स्वधर्मो वा तासां नास्तीत्याह—मोहिता इति। यदि ताः कृष्णान्तिकं न गच्छेयुः तदा मूर्च्छिता इव प्राणांस्त्यजेयुः सर्वात्मभावज्ञापनायैवाधुना व्रजस्थानामेतदागमनज्ञानं कारितवानिति ज्ञेयम् अन्यथाऽग्रे मन्यमानाः स्वपार्श्वस्थानिति वाक्याद्यथा वनस्थितत्वज्ञानं सम्पादितवानेवं पूर्वमेवागमनाज्ञानमेव कथं न सम्पादयेत् "प्रक्षालनाद्धि पङ्कस्य" इति न्यायेन तज्ज्ञानं सम्पाद्य तत्सम्भावितदोषाभावसम्पादनात्तदसम्पादनस्यैव वरीयस्त्वादिति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कासाञ्चिदावश्यकदैहिकवेशत्यागमाह—लिम्पन्त्यः देहे अनुलेपं चन्दनादिना कुर्वत्यः प्रमृजन्त्यः उद्वर्तनादिकं कुर्वत्यः कासाञ्चिदावेगवशाद्देहावयवविशेषपरिचयस्याप्यभावमाह—व्यत्यस्तेति। विभ्रमाख्योऽनुभावोऽयं यदुक्तम्। "वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात्। विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" इति ॥ ७ ॥

ननु, ताः प्रेमप्राबल्यात् सर्वापेक्षां तत्यजुरित्युचितमेव तासामपेक्षायां तत्पत्यादयः कथं तत्यजुस्तत्राह—ताः कुलवध्वः पतिभिः कुलकन्याश्च ताः पित्रादिभिर्वार्यमाणा अपि न न्यवर्तन्त तत्र हेतुर्गोविन्देति, भयलज्जादीनां का वार्ता तासामात्मनामपि गोविन्देनापहृतत्वात् मोहिता मूर्च्छिता इति सूत्रसञ्चालितपाञ्चालिका इवेत्यर्थः। पत्यादिभिर्गतप्राणानामपि भार्यादिदेहानामप्रतिष्ठाभयादेवान्यत्र सञ्चारो न सह्यते इति चेत्? सत्यं विप्रतिपत्तिरियं योगमाययैव समाहिता ज्ञेया तत्र समाधानं तयैव कल्पितानां तत्तत्क्षण एव तादृशगोपीनां स्वस्वभार्यादिकत्वेन प्रत्यार्पितानां स्वस्वगृहान् प्रति पत्यादिभिः परावर्त्तनमेव प्रकारश्चाग्रे वक्ष्यते ॥ ८ ॥

विशुद्धरसदीपिका।

कासाञ्चित्स्वसहचरीणां स्वस्वयूथेश्वरीपरिचरणस्यापि परित्यागं कथयन्वंशीध्वनेः परममोहनतामाह—लिम्पन्त्य इति। अङ्गरागं कुर्वन्त्यः प्रमृजन्त्यः उद्वर्त्तयन्त्यः शेषं स्पष्टम् सर्वमिदं यूथेश्वरीकर्मकमेव ज्ञेयम् अन्यथाऽयथार्थकल्पनागौरवत् नचात्र सहचरीधर्मविघातः यूथेश्वरीणां तत्प्रागेव गमनात् व्युत्क्रमेणोक्तिस्तु मुनीन्द्रस्य भावावेशेनेति ज्ञेयम्। अथ कासाञ्चिदनेकजन्मसिद्धानां गोपीनां पतिरेव वा "नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धनः" इत्यादिना गौतमीयतन्त्रोक्तानां निखिलसिद्धयूथेश्वरीणां देहावयवविशेषानुसन्धानमाह—व्यत्यस्तेति। विभ्रमोऽयं तदुक्तम्—

"वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात्।
विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" ॥

इति ॥ ७ ॥

कासाञ्चित् साधकचरीणां भावौत्कण्ठ्यप्रदर्शनाय लज्जादित्यागमाह—ता इति। पतिभिरिति धर्मपरित्यागोऽपि सूचितः एते च पत्यादयः साधनसिद्धानां श्रुतिमुनिरूपाणामेव ज्ञेयाः नतु नित्यसिद्धानां गोपीनाम् अनेकजन्मसिद्धानां पतिरिति तन्त्रेवोद्दिश्य मन्त्रार्थकथनविरोधात् "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहिताविरोधाच्च कचित्तदनुकरणं तु साधकचरीणां भावप्रपोषाय श्रीकृष्णस्य लोकवल्लीलानुकरणवदविरुद्धमेव ननु, कथमाग्रहेण प्रस्तैर्न निवारितास्तत्राह—मोहिताः मा ऊहिता योगमायाकल्पितपतिपाञ्चालिकाप्रायैस्तैरतर्किता इत्यर्थः। ननु, ता एव स्वविचारेण कथं न न्यवर्त्तन्त तत्राह—गोविन्देति। यूथेश्वरीसाधकचरीपक्षे गोकुलेन्द्रापहृतात्मानः सहचरीपक्षे वृन्दावनेश्वरापहृतात्मानः "वृन्दावने तु गोविन्दम्" इति वाराहतन्त्रात् ॥८॥

श्रीरामनारायणकृतभावभावविभाविका।

अन्यासां दशामाह—लिम्पन्त्य इति। गृहं वा स्वाङ्गं वा अङ्गरागेण लिम्पन्त्योऽन्या गोप्योऽभूवन् तावच्चन्द्रमसोऽसङ्कुचात्सितसूक्ष्ममृदुरश्मिलेपिन्यकुङ्कुमारुणोदयरागेण प्राचीमुखलेपनालुब्धलेपनावबोधेन प्रेष्ठतमेन प्रथममेव स्वविहारास्पदे तासां हृदयालये रासाद्र्यमालक्ष्य स्वमुखचन्द्रकरैः सूक्ष्ममृदुनानागानतानवितानैः कूर्चाः निर्माणं कृत्वा स्ववंशवर्णे सन्निवेश्यानुरागरागेण लिप्ते तन्मृदुशान्तमकरैरेवाङ्गरागेणाङ्गान्यपि लेपयितुमिच्छन्त्यो गृहाङ्गलेपनाद्यपास्य कृष्णान्तिकं ययुः अनेन कृष्णाङ्गीकृतयोगक्षेमाणां स्वगेहदेहलालनाद्यपास्य तन्नित्याभियुक्तत्वमेव युक्तमित्युक्तं भवति, काश्चित्तु प्रमृजन्त्यः शुद्धान्तःकरणानामपि मलावशेषशङ्कया तन्निवृत्त्यै सत्कामाभ्यासवत् शुद्धचिदानन्दघनस्वरूपेऽप्यारोपिता विद्यामलनिरासाय ज्ञानाभ्यासायासवत् शुद्धेऽपि स्वाङ्गेऽसम्भावितमलसम्भावनया कृष्णयोग्यतामाकलय्य तन्निवारणायोद्वर्त्तनं कुर्वन्त्योऽपि सन्मुखरितकृष्णगीतहृतमनसां तत्तत्प्रयासशैथिल्ये तदेकपरत्ववशत्तदप्यपास्य कृष्णान्तिकं ययुः एतेन कृष्णग्रहगृहीतमनसां नात्मनः कृष्णसम्भोगयोग्यतासम्पादनायापि कर्मोद्यमायास इति सूचितम्. काश्चित्तु लोचने अञ्जन्त्योऽभूवन् तत्रायमभिप्रायः निरञ्जनस्य श्यामस्य नेत्रयोः संयोगे तत्र निवसतः सर्वदृग्दोषमलभञ्जनत्वं सुखव्यञ्जनत्वं चाज्ञायाञ्जनस्यापि श्यामत्वेन तत्र समर्पयन्त्यः। यद्वा, अञ्जनस्य श्यामरजस्त्वेन श्यामपदाब्जरजस्त्वं मत्वा रागरागान्वितस्वनेत्राब्जयोः परागरजस्त्वेन परागरजसा नेत्राब्जयोः शोभां रजोद्वारा नेत्राब्जयोः प्रियपदाब्जाभ्यां सम्बन्धं च भगवतो दीनवत्सलत्वात्तत्पदाब्जरजोधारणेन नेत्रयोरभिव्यक्तिसम्भावनया विरहानिवृत्तिं चाकलय्य निवेशयन्त्यः। यद्वा, नेत्रयोर्विरहानललालिमा व्यक्तिं दृष्ट्वा मत्वमना वह्न्याच्छादनचारकृष्णरजसा तदाच्छादनमभिप्रेत्य निवेशयन्त्यः तदेव कृष्णेन वंशद्वारा धमनेन हृत्स्थहृच्छयानलावपि प्रज्वालिते नेत्रयोर्द्विगुणरागदाहयोर्वृद्धौ वैकलव्ये जाते नेत्रस्थलकमलाभ्यां ताप-

श्रीरामनारायणकृतभावभावविभाविका ।

धिक्येन प्रोद्भूततद्रसात्मकाश्रुसलिलैर्हृच्छयाग्न्यास्य हृदयं सिञ्चन्त्यस्तैस्तच्छान्तिं प्रत्युत हृत् कुम्भोद्भूतकामाग्निना कुम्भजेनेव सिन्धोस्तत्खण्डाश्रुधारासलिलशोषं दृष्ट्वा पदजलेन सिन्धुपूरकं नाम्नैव महद्भ्यदहनशमनं दवानलपानकर्त्तारं घनश्याममधरामृतवर्षं तदुपशमाय ययुः एवं भगवद्गतानां भगवदनुरागजान्यत्र विरागेणैहिकामुष्मिकसर्वत्यागमारब्धत्यागाभीति परिव्रज्य भगवद्धामोपगमनं च तद्वंशगुरूपदेशेन दर्शयित्वा तत्सेवोपकरणव्यत्यस्ततापि न भगवत्स्थ प्रवृत्तिमतां तत्स्वरूपप्राप्तौ बाधिकेत्यपि स्वाचरितैरेवोपदिशन्ति—व्यत्यस्तेत्यादिना । प्रेमवैक्लव्येन देहानुसन्धानस्यैवाभावे कुत्रत्र्याद्यनुसन्धानं भगवता नित्याभियुक्तानां योगक्षेमोद्वहनस्य प्रतिज्ञातत्वे च्यात्मनोऽपि प्रेमवैक्लव्यादेव तदकरणात् यद्वा, प्रेमपथिभूषणादिव्यत्यासस्यैव भूषणत्वात्तदकरणं वस्तुतस्तु कृष्णगोप्योर्भेदाभावात् कृष्ण एवोभयरूपतया तथा विहरन् सर्वजीवोद्धारार्थं प्रेमपन्थानमुपदिशतीति न कोऽपि शङ्कावसरः ॥ ७ ॥

अथ प्रधुना—

"त्वां सेवतां सुरकृता बहवोऽन्तरायाः—
स्वौको विलङ्घ्य परमं व्रजतां पदन्ते ।
नान्यस्य बर्हिषि बलिं ददतः स्वभागान्—
धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥

इत्यादिवचनात्स्वौको विलङ्घ्य परमं पदं भगवद्विहारस्थलं व्रजतां सुरकृतान्तरायस्य तदकिञ्चित्करत्वस्य च निर्दिष्टत्वात्तदेव दर्शयति—ता वार्यमाणा इति । तत्र पतिभिरिति श्रुतिरूपाणां गोपीनां तत्तन्मन्त्रप्रतिपाद्यत्वेनापातदृष्ट्या भासमानानामुक्तन्यायेन तदसम्बद्धानामपि देवानां पतित्वेन लोके प्रतीयमानत्वात्तैरित्यर्थः । न च तत्र सुरकृता बहवोऽन्तराया इत्युक्तमत्र तु पतिपित्रादिभिरित्यर्थभेदः शङ्कनीयः "देवाद्वारादिरूपिणः" इत्यत्र देवानामपि तत्कुटुम्बजनरूपतयैव विघ्नकारित्वस्योक्तत्वात् विशेषतो गोपानां तु—

"नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः ।
वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥
सर्वे वै देवताप्राया उभयोरपि भारत !" ।

इत्यादिभिर्देवत्वे शङ्काया अप्यभावात् तथा च ता वार्यमाणा इत्यनेनान्तरायं निर्दिश्य न न्यवर्तन्तेति तदकिञ्चित्करत्वनिर्देशः तत्र हेतुर्मोहिताः कृष्णानुसन्धानेन स्वदेहानुसन्धानशून्यत्वे किमु वाच्यं तद्वारणानुसन्धानस्य तत्रापि हेतुमाह गोविन्दापहृतात्मान इति । गोविन्देनापहृता आत्मानो मनांसि यासां तत्र गोविन्द इत्यत्र गवां बहिरन्तरिन्द्रियाणामिन्द्रः स्वामी गा बहिरन्तःकरणानि विन्दते प्राप्नोति वशीकरोतीति वा सर्वथा मनोहरणयोग्यतोक्ता अत एव मोहिता इति मा-ऊहितं तद्वारणं याभिस्ताः यद्वा गोविन्देन गोभिः श्रुतिवचोभिर्विन्दते तात्पर्यवृत्त्या बोध्यते इति तथा तेनापहृत आत्मा तात्पर्यं यासामनेन यथा श्रुतीनां तात्पर्येण ब्रह्मपर्यवसितानां न देवान्तरपर्यवसानं तथा तासामपि न तत्रावस्थितिः यद्वा गवामिन्द्रेणेवापहृता वशीरवेण मनोहरेण मनोपहर्योत्थापयैश्वर्येणैव स्वसमीपं नीता आत्मानो देहा एव यासामित्यनेन देवेन्द्रविजयिगवेन्द्रापहृतात्मनां न देवप्रतिबन्धः किञ्चित्करः तत्र साक्षादात्महरणे हेतुर्मोहिता इति मां तपोलक्ष्मीरूपेणोहिता भगवताऽऽत्मीयत्वेन सम्मता इति परस्परं वा हेतुहेतुमद्भावः वस्तुतस्तु भगवतो नित्यसहचरीणां सर्वथा वारणागोचरत्वात् देवाङ्गनानामपि ब्रह्माज्ञया तत्तद्भावानुज्ञया च भगवत्प्रियार्थावतीर्णानां तद्वारणासम्भवात्—

तद्भूरि भाग्यमिह जन्म किमप्यटव्यां—
यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ॥
यज्जीवितं तु निखिलं भगवान्मुकुन्द—
स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥"

इति ब्रह्मवचनात् व्रजवासिनां सर्वेषामपि भगवदेकजीवनत्वात् परमानन्दघननिरावरणपरमप्रेमास्पदकृष्णब्रह्मसाक्षात्कारेऽपि केषाञ्चित्प्रेम केषाञ्चित्तदभाव इति वक्तुमप्यशक्यत्वात् तथात्वे तु तत्परमानन्दघनत्वप्रेमास्पदस्वभावत्वे सन्देहापत्तेः न च मायामोहितानां तथा त्वसम्भावना तत्साक्षात्कारे तल्लीलाशक्तिं च मायामोहासम्प्रतिपत्तेः न चासुराणां मोहितत्वं व्रजजनेष्वसुरत्वासम्भवात् असुराणामपि तत्र निविष्टानां तत्साक्षात्कारवतां मायामोहानौचित्यात् भगवद्दर्शने उद्भूतानुरागानामपि तेषां लीलानुसारितया गोपबालानामिव युद्धादिलीलोपपत्तेरन्यथा प्रेमाभावे प्रेमैकलभ्यभगवत्प्राप्त्यसम्भवापत्तेश्च " मन्येऽसुरान्भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान्" इत्यादिवचनात् भगवता सङ्केते सन्दर्शितस्वमतानुसारेण तु सर्वेषामाधुनिकानामपि व्रजवासिनां भगवद्रूपत्वात्किमु वाच्यं तदानीन्तनानां तथा च सर्वथा लीलाप्रतिबन्धकवारणासम्भवेऽपि प्रेमधर्मोपदेशगानादिना सर्वोद्धारार्थं प्रकाशितलीलोपयोगतया गोपगोपीनां तच्चेष्टोपपत्तिरिति सर्वमनवद्यं काश्चित्तु प्रेमिणां भगवदेकजीवनत्वेन तन्मिलनप्रतिबन्धेन जीवनं किन्तु प्रतिबन्धगुणमयदेहत्यागेन भगवल्लीलाप्रवेश इति स्वचरितैरेवोपदिशन्ति—अन्तर्गृहगता इत्यादित्रिभिः । यद्यपि भगवल्लीलाधामानुगतानां विभागानुपपत्तिः तथापि श्रुतिरूपाणामाधुनिकसाधनसिद्धानां चरितानुकारेणैव तदुपदेशोपपत्तिः तत्रायमर्थः अन्तर्गृहगता देवास्तथा भावित्वात् पूर्वमेव गृहान्तःप्रवेशस्थिताः अत एव पत्यादिवारणेनालब्धविनिर्गमाः न लब्धो विशेषतो निर्गमो याभिस्ताः न लब्धो वीनां पक्षिणामिव निर्गमो याभिरिति वा अनेनैव पूर्वपद्यवर्णितानामन्तर्गृहगतत्वाभावेन लब्धविनिर्गमानां तद्वारणाप्रतिबन्धत्वमुक्तं तथा च गुणमयदेह एव तत्प्रतिबन्धसम्भवमालक्ष्य तत्त्यागाय कृष्णम्—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" ॥

इतिवचनात्सत्यानन्दरूपं श्यामसुन्दरं मनःकर्षकं वा दध्युः ननु, भावनायां गोपाङ्गनानां कथं ध्यानप्रकारावगतिस्तत्राह—तद्भावनायुक्ता इति । मुनिरूपत्वेन साधनसिद्धत्वेन च पूर्वमपि जन्मान्तरे तत्संस्कारादिह च तद्भावनाध्यानं तेन युक्ता इति तत्र लिङ्गमाह—मीलितलोचना इति । यद्वाऽन्यविषयसंस्कारो ध्यानविरोधी स च पूर्वविषयसम्पर्कजनितभावनासंस्कारात्मक आधुनिकेन्द्रियसन्निकर्षजातश्च द्विविधः तत्र प्रथमाभावे हेतुमाह—तद्भावनेति । पूर्वमपि तद्भावनयैव युक्ता इत्यन्यभावनाभावात्

श्रीरामनारायणकृतभावभावविभाविका ।

केन ध्यानप्रतिबन्धो भवेत् द्वितीयाभावे हेतुमाह मीलितलोचना इति । ततश्च कृष्णध्यानेनैव दृष्टादृष्टद्वारा गतदेहाध्यासत्वात्प्रतिबद्धं यद्गुणमयं देहं तत्सद्यो जहुः ननु सति कर्मबन्धशेषे गताध्यासत्वमात्रेण कथं जहुस्तत्राह—प्रक्षीणबन्धना इति । प्रकृष्टतयाऽनवशिष्टलेशतया क्षीणानि निवृत्तानि कर्मबन्धनानि यासां ताः ननु, यथा कथञ्चिदागामिसञ्चितयोरश्लेषविनाशाभ्यां क्षीणत्वसम्भवेऽपि भोगैकनाश्यप्रारब्धपापपुण्ययोः कथं निवृत्तिरिति शङ्कायामाह—दुःसहप्रेष्ठविरहेति । पूर्वं दुःसहो यः प्रेष्ठस्य कृष्णस्य विरहस्तेन यत्तीव्रतापो दुःखं सर्वाशुभफलीभूतदुःखानां ततोन्यूनत्वेन तदन्तर्भावात्तेनैव भोगद्वारा धुता अशुभा याभिस्ताः तथा तदनन्तरं ध्याने एव प्राप्तोयोऽच्युतस्याऽऽश्लेषो निबिडपरिरम्भस्तेनोद्भूताया निर्वृत्तेः सर्वशुभफलीभूतसुखानां "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्या तल्लेशत्वात्तयैव सर्वशुभफलानां प्राप्तत्वाद्भोगद्वारैव क्षीणानि प्राचीनशुभानुष्ठानजनितादृष्टरूपाणि मङ्गलानि यासां ता नच नियतकालभोगयोग्यानां शुभाशुभानां युगपद्भोगानुपपत्तिरिति वाच्यं सर्वकर्मफलभोगदेशकालनियमस्य फलप्रदेशाधीनतया तदिच्छयैव तदुपपत्तेः किञ्चादृष्टोद्बोधकदेशकालनिमित्तानां फलैकानुमेयतयाऽत्रैवं फलदर्शने एवमेव तत्स्वीकारापत्तेः शङ्कानवसर एव । ननु, ध्यानमात्रेण योगिनामिव देहाप्रतीतावपि बाधाभावे कथमध्यासनिवृत्तिः सत्यामपि देहाप्रतीतावप्ययोगिनां सुषुप्तिं गतानां च पुनरुत्थाने तदध्यासानुवृत्तिदर्शनात् तत्राह—तमेवेति । जारबुद्ध्याऽपि तं परमात्मानमेव सङ्गतास्तथा च दीपप्रज्वालनपाकाद्यर्थमङ्गारबुद्ध्या मणौ प्रवृत्तस्य मणिलाभवद्भोगाय जारबुद्ध्याऽपि परमात्मानमेव सङ्गतानां तल्लाभो गुणमयदेहत्यागश्चेति सर्वमनवद्यं वस्तुतोऽस्मिन्पक्षेऽपि न तासां गुणमयो देहः न वा तत्त्यागः किन्तु तदनुकारेणोपदेशमात्रं यद्वा, मुनिरूपासु गोपिकासु काश्चित्पूर्वमेव दृढभावनया गुणमयदेहत्यागेन लीलोपयोगिसच्चिदानन्दघनस्वरूपात्मकदेहा एव जातास्तास्तु कृष्णाह्वानमात्रेणाप्रतिबद्धतया गताः याः काश्चित्तु यथा वामदेवस्य पूर्वं भावनापरिपाकाभावाज्जन्मप्राप्तावपि गर्भ एव भावनापरिपाकात्तत्प्राप्तिस्तथा भावनाया यथावत्परिपाकेन गुणमयदेहेन जातास्तास्तु आह्वानात् पूर्वमत्र गोपीदेहे दुःसहप्रेष्ठविरहतीव्रतापधुताशुभत्वेन ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलत्वेन प्रक्षीणबन्धना नष्टादृष्टप्रतिबन्धा अतोऽधुना कृष्णमुरलिकाह्वानसमये लीलाप्रवेशाय तद्योग्यस्वरूपात्मकदेहस्य नित्यसिद्धस्य सर्पारोपतिरोहितरज्जुवत् गुणात्मकदेहारोपतिरोहितस्याविष्करणाय कृष्णं ध्यातुमन्तर्गृहगतास्तत्रापि मीलितलोचनास्तथा तद्भावना युक्ता अत एव ध्यानविक्षेपकेन्द्रियनिरोधात्तद्भावनायुक्तत्वेन क्षोभकान्यान्तर्वासनाभावाच्चालब्धविनिर्गमा न लब्धो बहिः कस्मिंश्चिदपि विषये चित्तविनिर्गमो विनिर्गमो वा यासां तथाभूताः कृष्णं नित्यानन्दविग्रहं श्यामसुन्दरं मनःकर्षकं दध्युः ध्यानप्रभावेनैव गुणमयं देहं जहुः ततश्च तमेव श्यामसुन्दरं परमात्मानं सङ्गताः गुणमयदेहाभावात्सम्यक्प्राप्ताः ननु, जारबुद्ध्या कथं सङ्गतास्तत्राह, जारबुद्ध्यापीति । अङ्गारबुद्ध्या मणिमिमिव जारबुद्ध्यापि परमात्मानमेव सङ्गताः यद्वा, अपिनाबुद्ध्यन्तरमपि द्योत्यते तथा च जारो रमणस्तद्बुद्ध्या परमात्मबुद्ध्या च सङ्गतास्तत्र परमात्मबुद्ध्या गुणमयदेहापवादो रमणबुध्या रमणं च "तं यथा यथोपासते तदेव भवति" इति श्रुतेः नच परमात्मप्राप्तौ रमणासम्भवो वाच्यः "यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा विपश्चिता" इति श्रुत्या तथाऽवगमात् अत्र जारशब्दो रमणमात्रवाची न तूत्पत्तिविषयः अग्रे कान्ते विदुरित्युक्तेः पूर्वमपि "पतिं मे कुरु ते नमः" इति निर्देशात् यद्वा, काश्चिद्गोप्यो वंशध्वनिश्रवणोत्तरं पूर्वं प्रेष्ठविरहतापेन शुष्कदेहतया ध्वनिसौष्ठवमोहिततया चालब्धविनिर्गमा गन्तुमशक्ता अन्तर्गृहगता एव प्रथमं तद्भावनायुक्ता मीलितलोचनाः सत्यः कृष्णं दध्युः ततश्च ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या यो दुःसहप्रेष्ठविरहेण देहशोषणहेतुभूतस्तीव्रतापः स एव धुतोऽशुभो यासां तासामन्याशुभासम्भवात् तथैव निर्वृत्या क्षीणानि गृहसौख्यप्रदान्यन्यानि मङ्गलानि भोगोपयोगिशृङ्गारसौष्ठवादीनि यासामिति वा तथा च धुततापत्वेन लब्धदेहसामर्थ्यत्यक्तसमस्तगृहकृत्याः सम्पन्नसर्वमङ्गलाः सत्यः आदौ जारबुद्ध्या सङ्गता अपि तां गुणभूतां जारबुद्धिं जहुः अथ च सर्वथा प्रतिबन्धाभावात्तं परमात्मानमेव गुणमयं देहं सम्यक् मुख्यकान्तधिया गताः निश्चेतनात्मकशरीरगुणैश्च हीन इत्यादि, वचनात्तद्देहगुणानां स्वरूपात्मकतया देहदेहिगुणगुणिविभागाभावात् । यद्वा, काश्चिद्गृहान्तर्गता अत एवालब्धविनिर्गमास्ततश्च दुःसहप्रेष्ठविरहतीव्रतापेन धुताः कम्पिताश्च ता एवासमन्ताच्छुभाः शुद्धा ध्यानं कर्तुं योग्याश्चातः कृष्णप्राप्तये कृष्णमेव नित्यं तद्भावनायुक्ता मीलितलोचना दध्युः ततश्च ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः सत्यः येन गुणमयदेहसम्बन्धेन कृष्णे जारबुद्धिर्भवति स हेय इति व्यवस्य जारबुद्ध्या निमित्तभूतया गुणमयं देहं सीतासञ्ज्ञाभ्यां छायादेहत्यागवत्पतिम्मन्यसमीपे जहुः ततः सद्यः प्रक्षीणबन्धना अप्राकृतदेहेन तमेव परमात्मानं सम्यग् गताः अत एवान्ते च वक्ष्यति

> "नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
> मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः"॥

इति ॥ ८—११ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

काश्चिच्चन्दनकुङ्कुमादिना भगवदङ्गसङ्गसम्भावनयाऽङ्गरागं कुर्वन्त्योऽप्युत्कण्ठया तल्लेपनम् हित्वा आकर्षकस्य प्रेष्ठस्य समीपं ययुः अन्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वन्त्यःअनेनावश्यकदेहावेशादित्याग उक्तः कासाञ्चिद्गमनत्वरावेशवशाद्देहावयवविशेषाऽनुसन्धानाऽभावमाह—व्यत्यस्तेति । स्थानतः स्वरूपतश्चाङ्गोऽवधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि, देहावयवविशेषाऽनुसन्धानाभावमाह—व्यत्यस्तेति । स्थानतः स्वरूपतश्चावधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः "वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात् । विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" इत्युक्तो विभ्रमाख्योऽनुभावोऽयम् अनेन भगवदुद्देश्यं कर्म तदासक्तचेतसामन्यथा कृतमपि फलत्येवेति ध्वनितं निवृत्तिपक्षे

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

आगमनप्रकाराकाङ्क्षायां श्रुतिः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" "सर्वापेक्षा च यज्ञादि श्रुतेः"(३।४।२६) इति श्रुतिसूत्राभ्यां सर्वकर्मणामिव संयोगपृथक्त्वन्यायेन तत्प्रतिपादकश्रुतीनामपि परमात्माभिमुख्यमाह—वुहुस्य इति । "जुहुयाद्यजेत दद्यात्" इत्यादिश्रुतयस्तत्तत्कर्मफलप्राप्तिं प्रतिपादयन्ति अहोहं तत्फलं हित्वा तत्प्रतिपादने मुख्यं तात्पर्यं विद्याभिमयुः ब्रह्मणि समन्वयं गन्तुं प्रवृत्ताः "सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेः । काश्चित्तु समुत्सुकाः "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते, तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इत्याद्याः श्रुतयः । पयःस्थानीयं क्रियमाणं सञ्चितं च कर्माऽधिश्रित्य तत्परिपाकं तद्भोगपर्यन्तं प्रतीक्षानिन्यसम्प्रतिपाद्याभिययुः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इत्याद्याः अपराः परिपक्वगोधूमकणान्नस्थानीयं प्रारब्धकर्मानुष्ठास्य भोगं विना तत्क्षयाभावं प्रतिपाद्य अपराः "सूर्याय जुष्टन्निर्वपामि अग्नये जुष्टं निर्वपामि" इत्याद्यास्तत्तद्धविः परिवेषयन्त्यस्तत्र तात्पर्यं हित्वा तथा अपराः "अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूम" इत्याद्याः शिशून्पयःस्थानीयं कर्मफलमक्षयत्वेन प्रतिपादयन्त्यस्तत्र तात्पर्यं हित्वा । यद्वा, सर्वकर्मा "सर्वकामः सर्वगन्धः सर्वरसः" इत्याद्याः परिवेषयन्त्यः "ऋतं पिबन्तौ सुकृतस्य लोके" इत्याद्याः पयःस्थापनीयसुकृतफलपानं चेतनकर्मकं प्रतिपादयन्त्यः काश्चित् "स होवाच प्राणोऽहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्व" इत्याद्याः पतीन्स्वर्गादिपतीन् इन्द्रादीन् प्रतिपादयन्त्यः तत्प्रतिपादनतात्पर्यं हित्वा काश्चित् "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, मृत्युर्यस्योपसेचनं, क इत्था वेद यत्र सः" इत्याद्याः अन्यादिकर्तृकाशनं प्रतिपादयन्त्यः भोजनमृत्य्वादिरूपम् अपास्य तत्प्रतिपादनं विहाय तथा अन्याः "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति" इत्याद्याः लिम्पन्त्यो लेपनमध्यारोपं प्रतिपादयन्त्यः अन्या "अथा त आदेशो नेति नेति नेह नानास्ति किञ्चन, अस्थूलमनणु" इत्याद्याः प्रमृजन्त्यः प्रकर्षेण मार्जनमपवादं प्रतिपादयन्त्यः काश्चन "अनीशया शोचति मुह्यमानः, यः सर्वज्ञः सर्ववित्, सर्वस्य वशी सर्वस्येशानः" इत्याद्याः लोचनस्थानीये जीवे सचैतन्ये अञ्जयन्त्यः उपाधिमत्तया प्रतिपादयन्त्यः काश्चित्तु "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि तत्त्वमसि, अहं ब्रह्मास्मि" इत्याद्याः व्यत्यस्तवस्त्राभरणाः स्वस्वरूपाच्छादकम् अहं कर्तेत्यादिप्रतीत्यापादकं जीवत्वं वस्तुस्थानीयम् ऐश्वर्यादिलक्षणप्रतीत्यापादकद्वारेण प्रतिपादिते वस्त्राभरणे चाभिरता । यद्वा, व्यत्यस्तौ सम्यक् परिक्षिप्तौ वस्त्राभरणमीश्वरत्वस्थानीयं व्यत्यस्ते व्यस्तप्रतिस्थानीयौ आवरणविक्षेपौ याभिस्ता वृत्तयो बहिर्मुखतां विहायान्तर्मुख्या जाता इत्यपि द्रष्टव्यम् ॥ ७ ॥

ननु,—

> "रक्षेत्कन्यां पिता कान्तां पतिः पुत्रस्तु वार्द्धके ।
> अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥

इत्युक्त्या तासां रक्षकाणां विघ्नभूतानां सत्त्वे कथं कृष्णान्तिकं ययुरित्यादिशङ्क्य "त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो" ! इत्युक्तत्वात् कृष्णाकृष्टचेतसां न विघ्नाः भवन्तीत्याशयेनाह—ता इति । तत्र चतुर्विधा गोप्यः पद्मपुराणेऽभिहिताः—

> "गोप्यस्तु श्रुतयः प्रोक्ता ऋषिजा गोपकन्यकाः ।
> देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चन" ॥

इति प्राकृतमानुषभावरहिताः तत्र गोपकन्याः काश्चिन्नित्यसिद्धाः काश्चित्साधनसिद्धाः तत्र नित्यसिद्धा आह्लादिनीशक्तिरूपाः "आनन्दचिन्मयरसप्रति भाविताभिस्ताभिः" इति ब्रह्मसंहितायामुक्तत्वात् ह्लादिनी या महाशक्तिरिति बृहद्गौतमीयाच्च तथा च सच्चिदानन्दघनः परमात्मा गोपालरूपमसङ्ख्यातगोपालिकारूपं चादाय क्रीडार्थं प्रकटिते गोलोके क्रीडति स चात्र ताभिः सार्द्धमवतीर्णस्ततस्तासां नित्यसिद्धत्वादिकमुच्यते द्वितीयास्तु काश्चित् गोपीजनवल्लभोपासनया प्राक् गोपीभावं गोलोकं प्राप्य भगवता लब्धक्रीडा आज्ञयावतीर्णाः काश्चित्सम्प्रति गोकुल एव गोपीभावाप्ताः पूर्वोपासनकात्यायनीव्रताचरणादिसाधनसिद्धत्वात्साधनसिद्धाः श्रुत्यादयस्तु सर्वा अपि साधनसिद्धा एव साधनं च प्रार्थनादि तदुक्तं बृहद्वामनपुराणे—

> "कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः ।
> कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयः" ॥
> यथा त्वल्लोकवासिन्यः सकामत्वेन गोपिकाः ।
> भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा" ॥

इति ऋषीणां श्रीमद्रामचन्द्रप्रसादात् गोपिकाजन्मप्राप्तिरुक्ता पाद्मोत्तरखण्डे—

> "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
> दृष्ट्वा रामं हरिं तत्र भोक्तुमिच्छन् स्वविग्रहम् ॥
> ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
> हरिं सम्प्राप्तकामेन ततो मुक्ता भवार्णवात्" ॥

इति श्रीमद्राममवलोक्य स्वोपास्यगोपविग्रहं हरिं स्मृत्वा तमेव भोक्तुमिच्छावता लज्जया तदवृतवता कल्पतरोरिवाभ्यर्थितोऽपि श्रीरामाभीष्टसिद्धिर्जातेत्यर्थः । सम्भवन्तु सुरस्त्रियः इति प्राग्भाषाय भगवदाराधनलब्धब्रह्माज्ञयाऽवतीर्णत्वाद्देवाङ्गनानां साधनसिद्धता तत्र "नैते सुरेशा ऋषयो न चैते" इत्युक्तत्वात्सुराणामृषीणां च गोपालादिरूपेणावतीर्णत्वाद्देवाङ्गनाः स्वपतिभिर्दैवैः विवाहादिकम् ऋषिचरीणां तु ऋषीणां दम्पतीरूपेणावतीर्णत्वात्स्वस्वरूपभूतैरेव पतिभिर्विवाहादिकं श्रुतीनां कासाञ्चित्तु तत्तत्प्रतिमाद्यर्थैः प्राप्तगोपालरूपैः भगवत्प्रतिपादकानां नित्यसिद्धगोपीनां च स्वसमानमायामयविग्रहाणां गोपैः मायया प्रकटीकृतैर्गोपैः वा विवाहादिकं सञ्जातं तत्र ऋषिचर्यः भगवत्प्रतिपादिकाः श्रुतयश्च सर्वा अप्यऽभिज्ञाः साधनसिद्धगोपीनां देवकन्यानां च मध्ये काश्चिदभिज्ञाः काश्चिदनभिज्ञाश्च नित्यसिद्धानां मध्ये भगवत्सङ्कल्पाऽनुसारेण तस्मादयमाभाव्य काश्चिन्मा नित्यः काश्चिद्दासिनाः भगवत्स्वरूपप्रतिपादकश्रुतीनां मध्येऽपि अतन्निरसना स्वाण्डायां गृहीतमानिनी स्वरूपाः अन्यास्तु गृहीतदासीरूपास्तत्रैवम्भूतानां गोपाङ्गनानां मध्ये काश्चित् पितृभिः काश्चित्पतिभिः काश्चिद्भ्रातृभिः काश्चिद्बन्धुभिः काश्चित्

अन्तर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥
दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ।
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

युत्रैरित्यपि द्रष्टव्यं वार्यमाणा अपि न न्यवर्तन्त यतः गोविन्देन वेदोद्धारकेण गोलोकविहारिणा गवेन्द्रेण प्रेष्ठेन भगवता अपहृतः आत्मा अन्तःकरणं यासां ताः तथा चान्तःकरणं रुद्धेन भगवता यद्गतान्तःकरणानां श्रोत्रं निवारणमकिञ्चित्करं प्रवाहपतितनौकायां स्थितस्य तिष्ठतिष्ठेति निवारणं यथा ननु मया स्वधर्मोऽज्ञाताऽन्तःकरणां निरुद्ध किमिति न निवृत्ता इत्यशङ्क्याह—मोहिता इति । भगवत्स्वरूपाशक्तिः उक्तरूपायाः यानुसन्धाननिवर्तकं व्यामोहं गताः ननु तैः पित्रादिभिः सर्वथा किमिति न निवारिता इति वाऽऽशङ्क्याह मोहिता इति तया च मूर्च्छामृत्युरिवागन्तुं प्रवृत्ताः अतस्तैस्तन्मूर्च्छामरणादिभयाः न प्रसह्य वारिता इतिभावः । निवृत्तिपक्षे ता श्रुतयः पितृपत्यादिस्थानीयैः वैदिकवादाभिमानिभिर्वादिभिर्वार्यमाणाः गोविन्देन वेदैकगम्येन परमात्मना अपहृतात्मानः स्वीकृताभिप्रायाः न न्यवर्तन्त यतः मया परमप्रेयसप्रमायैव ऊहिताः वृत्तयोपि पित्रादिभिर्विषयैर्वार्यमाणा अपि गोविन्दे निलीनस्वरूपाः प्रमया ऊहिता अनुकूलतर्कबलान न्यवर्तन्त विषयाभिमुख्यं न प्राप्ता ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लिम्पन्त्यः देहे चन्दनादिनाऽनुलेपं कुर्वन्त्यः अन्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकुर्वन्त्यः व्यस्तानि स्थानतः स्वरूपतश्चाङ्गानो धारणेन विपर्ययं प्राप्तानि वस्त्राणयाभरणानि च यासां ताः कृष्णसमीपे ययुः अनेन कृष्णावेशितबुद्धिना कृष्णार्थं कर्मान्यथा कृतमपि कृष्णप्रियं भवतीति सूच्यते ॥ ७ ॥

श्रीकृष्णासक्तैर्जनैः कृष्णप्रातिकूल्यविषया स्वजनाश्चाप्युपेक्षणीयैवेति सूचयन् ता वार्यमाणाः अपि न न्यवर्तन्तेत्याह ता इति ॥ ८ ॥

भाषा टीका ।

कोई गोपी अपने शरीरमें केसरिया चन्दन को लगा॰
वती रहीं ते बीचही में चन्दन लगावनो छोडके चली आई
कोई गोपी अपने शरीर में उबटनो लगावती रहीं ते उब॰
टनो लगावनो छोड के चली आई, कोई सखी नेत्रन में काजर
आंज ती रहीं ते काजर आंजवो छोडके चली आई, और
कोई कोई गोपी वसन भूषण अदल बदल के पहिर आई जैसे
कोई तो ऊपर ओढवे की ओढनी कूं कमर में पहिर के लहंगा
को ऊपर ओढकें चली आई, कोई गोपी हाथन के भूषण
पामन में और पांमन के भूषण हाथन में पहिर के श्रीकृ॰
ष्णके समीप आवति भई ॥ ७ ॥

उन सब गोपीन कूं श्रीकृष्ण के समीप जायवे के समें पतीन ने रोकीं मातापितानने रोकीं, भैया बन्धून ने रोकीं, परन्तु गोविन्द ने जिनको मन हरण कर लियो, ऐसी वे गोपी श्रीकृष्ण की माया में मोहित होय के श्रीकृष्णचन्द्र के समीप जायवे सें निवृत्त नहीं होत भई । किन्तु अपने प्राण प्यारे नन्द दुलारे श्रीकृष्णचन्द्र के समीप गमन करती भई ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न लब्धो निर्गमो याभिस्ताः प्रागपि तद्भावनायुक्तास्तदा नितरां दध्युरित्यर्थः ॥ ९ ॥

किञ्च, तदानीमेव तं परमात्मानं कृष्णं ध्यानतः प्राप्ताः सत्यो गुणमयं देहं जहुरित्याह—श्लोकद्वयेन दुःसहेति । ननु, कथं जहुः ? परमात्मेति ज्ञानाभावादित्याशङ्क्याह, जारबुद्ध्यापीति । नहि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथा मत्वापि पीतामृतवदिति भावः । ननु, तदपि प्रारब्धकर्मबन्धने सति कथं जहुस्तत्राह, सद्यः प्रक्षीणबन्धना इति । ननु, कथं भोगमन्तरेण प्रारब्धं कर्म क्षीणं भोगेनैव सद्यः क्षीणमित्याह—दुःसहेति दुःसहो यः प्रेष्ठविरहस्तेन तीव्रस्तापस्तेन धुतानि गतान्यशुभानि यासां तत्प्राप्तिपरमदुःखभोगेन पापं क्षीणमित्यर्थः । तथा ध्यानेन प्राप्ता अच्युतस्य आश्लेषेण या निर्वृतिः परमसुखभोगस्तया क्षीणं मङ्गलं पुण्यबन्धनम् यासां ताः अतो ध्यानेन परमात्मप्राप्तेस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयाद्गुणमयं देहं जहुरिति ॥ १० ॥ ११ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

यदि च तात्ताद्दशापिदनेन निवारिता अभविष्यन् तर्हि सद्य एव दशमीदशामगमिष्यन्निति तासां सर्वासामेव भावविशेषं दृष्टान्तेनैव प्रदर्शयन् कासाञ्चिद्दशाविशेषमाह—अन्तरिति त्रिभिः । काश्चित् महावस्थवशभूताः साधनसिद्धा वा गृहमध्यस्थिता एव नाममात्रपत्यादिभिः द्वारादिनिरोधात् पित्रादीनां द्वारदेशोपवेशाद्वा न लब्धो विनिष्ठः श्रीभगवदभिसरणार्थं मार्गः । यद्वा, अन्यगोपिवत् यीनां पत्नीणामिवातिशयगमनार्थं निर्गमः बहिर्निःसरणं पन्था वा । यद्वा, वेः पक्षिणोऽपि निर्गमो

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

यस्मात् छिद्रात्तादृशमपि याभिस्ताः अत एव कृष्णं निजचित्ताकर्षकं परमानन्दघनमूर्त्तिं वा दध्युर्विशेषतश्चिन्तयामासुः "ध्येयमापदि" इत्याद्युक्तन्यायेन तन्महापन्निस्तारार्थम् अभीष्टाप्राप्त्या स्वत एव तच्चिन्ताविशेषोत्पत्तेः कथं दध्युः? तस्य प्रस्तुतस्य श्रीकृष्णेन सह विलासस्य किं वा सुगोप्यस्य सम्भोगस्य वा भावनो तया युक्ताः संयुक्ताः योगवत्यो वा सत्यः । किञ्च, मीलितलोचनाः अर्द्धमुद्रितनेत्राः सत्य इत्यर्थः । यद्वा, दुःखविशेषेण ध्यानावेशेन वा मुद्रितनेत्राः सत्यः । यद्वा, मीलितमन्तर्हितं लोचनम् अन्याशेषज्ञानं यासां तथाभूताः सत्यः ॥ ९ ॥

ततश्च सद्य एव श्रीकृष्णेन सह संयोगं प्राप्ता इत्याह–दुःसहेति द्वाभ्याम् । ध्यानेन विशेषतस्तद्रूपगुणादिपरिस्फूर्त्यां दुःसहःप्रेष्ठविरहः अत एव तेन तीव्रतापः तेन धुता ऽशुभा परमात्मानमपि तं कृष्णं जारबुद्ध्यैव प्रेमाग्निविशेषेण सदा जरयतीति जार उपपतिस्तद्बुद्ध्या सङ्गताः सम्यक् प्राप्ताः तेन सहमिलिता इत्यर्थः इति नित्यपरमप्रेमसङ्गोऽभिप्रेतः । कथं गुणमयं देहं जहुः किन्तु गुणातीतं नित्यभगवत्प्रेमसङ्गति योग्यं देहं प्रापुरित्यर्थः । सच्चिदानन्दघनरूपप्राप्ता सङ्गता इति भावः । सङ्गतिश्च नित्यवक्षःस्थलस्थश्रीवत् महाशक्त्यादिवद्वा नित्यसंयोगलक्षणा ज्ञेया तत्रापि जारबुद्ध्या सङ्गतत्वाद्विशेषः कश्चिदूह्यः तथा चोद्धवद्वारा श्रीभगवदुक्तौ "या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः । अलब्धरासाः कल्याणो मापुर्मद्वीर्यचिन्तये ॥" इति अत्र च कल्याणय इत्यनेन मद्वीर्यचिन्तयेत्यनेन च प्राप्ति विशेष एवाभिप्रेतः तच्चाग्रे तत्रैव व्यक्तं भावि अन्यत्तैर्व्यञ्जितमेव तत्र दुःसहशब्देन तीव्रशब्देन च अनन्तकोटिकल्पेषु महानरकादिभोगैर्यावांस्तापः ततोऽपि कोटिगुणस्तापः सूच्यते तथा अच्युतशब्देन निर्वृत्तिशब्देन च अनन्तकल्पेषु सा[illegible] राज्यस्वराज्यादि भोगैर्यत्सुखं मोक्षसुखं च ततोऽधिकमपि तत्सुखं ध्वन्यते श्रीभगवदाश्लेषसुख[illegible] तत्सर्वस्य कणमात्ररूपत्वात् तत्र च श्रीभग[illegible] तत्तद्वासनात्तयोऽपि ज्ञेयः अत एव प्रक्षीणेति [illegible] था अशुभं नाम भगवन्नित्यसंयोगप्रतिबन्धक[illegible] एव मङ्गलं च मानादिषु श्रीभगवदनुनयादिजन्य[illegible] विशेषहेतुः सत्कर्मविशेषः तत्तत्प्रत्ययश्च नित्यसंयोग[illegible] अत एव विरहेण मानादिना च सम्पद्यमानप्रेमान[illegible]विशेषाभावात् तासामत्र स्थिताभ्योऽन्याभ्यः सौभाग्येन्यतो[illegible]विधवा ततश्च सर्वसद्गुणमयमपि देहं सद्यो जहुः पत्या[illegible] गृहान्तर्निरुद्धेन तेन श्रीकृष्णाप्राप्तेः अतस्तद्योग्यदेह[illegible] भिर्वं तं श्रीव्रजेन्द्रकिशोरमेव सङ्गता इत्यर्थः । कुतः परमात्[illegible]न्तरेण मापियमित्यर्थः । तत्र हेतुः जारबुद्ध्येति । अन्यत्समान[illegible] ध्यानप्रभावेन सद्यः प्रकर्षेण क्षीणानि बन्धनानि पत्यादिकृतद्वारबन्धादीनि यासां तथाभूता अपि किञ्च ध्याने ध्यानेन वा हेतुना प्राप्तः सङ्गतो योऽच्युतः विरहेऽपि च्युतिरहितो भगवान् श्रीकृष्णस्तस्य किं वा अच्युतेन अविच्छिन्नेन अर्थात् प्रेष्ठस्यैवाश्लेषेण या निर्वृत्तिः परमसुखं आश्लेषरूपा निर्वृत्तिर्वा तया ध्यानविशेषेणैव साक्षात्संभोगसुखत्वेन प्रतीयमानया निर्वृत्या विशिष्टा अपि गुणमयं सर्वसद्गुणमयमपि देहं जहुः तत्र हेतुः दुःसहो यः प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहस्तेन यस्तीव्रतापः अन्तर्महाज्वरः तेन धुता निरस्ता आशु शीघ्रं यद्वा आशुः अभिनवा भा कान्तिर्यासां ताः किञ्च क्षीणमङ्गलाः अन्तर्गृहे निरोधाय पत्यादिभिर्धारणादिना बहिर्निस्सरणार्थोद्यमे भित्तिकपाटादिसंसर्गेण वा नष्टतिलकपत्रावलीमाल्यादिमङ्गलाः महोत्तापजर्जरत्वात् कान्तिविनाशेन तिलकादिक्षयेण च तादृङ्मलिनप्रक्षीण देहस्य श्रीभगवत्सेवायामयोग्यत्वमनुतादित्यर्थः । यद्वा ध्यान प्राप्ताच्युताश्लेषनिर्वृत्या प्रक्षीणं क्षयमप्राप्तं मङ्गलं सर्वाभीष्टप्रापकसत्कर्मशेषफलं रासक्रीडादिलक्षणं वा यासां तयैवाशेषरतिसुखसिद्धेः तथाभूता अपि जहुः कुतः दुःसहप्रेष्ठविरहतीव्रतापेन धुतं धुतिर्निधूननं पीडनमिति यावत् तदेवाशुभमङ्गलं महादौर्भाग्यं यासां ताः क्षणमपि महाकल्पकोट्यधिकं कुर्वाणात्तस्मादसमोर्द्ध्वदुःखभरान्महाभीतेरित्यर्थः । यद्वा धुता कम्पिता अपगता आशुरविलम्बातात्कालिकी भा प्रतिभा अत्यन्तविरहतापेन विचारापगमादिति भावः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यदि च तास्तादृशविघ्नेन वारिता अभविष्यन् तर्हि सद्य एव दशमीदशामिव दशामगमिष्यन्निति तासां सर्वासामेव भावविशेषं दृष्टान्तेन प्रदर्शयन् तासां प्रस्थितवतीनामेव मध्ये कासाञ्चिदवस्थाविशेषमाह–अन्तरिति त्रिभिः । अयमर्थः श्रीकृष्णस्य व्रजे प्रेयस्यः खलु द्विविधा । नित्यसिद्धाः साधनसिद्धाश्च तत्रैकासां नित्यसिद्धात्वमष्टादशाक्षरादौ (आ) ताभिर्विशिष्टत्वेनैव तदाराधनविधानादुच्यकं तच्छ्रुतीनां तदाराधनानां चानाद्यनन्तभावित्वात् अतो ब्रह्मसंहितायाम्—

"चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानम्" इति ॥
आनन्दचिन्मयरसप्रतिभाविताभिः ।
स्ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत ॥

इति । "श्रियः कान्ताः कान्तः परमपुरुष" इत्येता एव तदीयलक्ष्मीत्वेनोक्ताः तत्र च श्रीराधिकाया वैशिष्ट्यं बृहद्गौतमीये–

"देवी कृष्णमयी प्रोक्ता राधिका परदेवता ।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनीपरा" ॥ इति ।

अत एव ऋक्परिशिष्टे परस्परमव्यभिचारित्वं प्रोक्तम् "राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेष्वा" इति । अतो मात्स्यादौ "रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने" इति शक्तित्वसाधारण्येनानयोर्गणनेऽपि वैशिष्ट्यं ज्ञेयम् अथापरासां साधनसिद्धत्वं यथा पाद्मोत्तरखण्डे—

"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्" ॥ इति ।

गोकुले इत्यस्य हरिं सम्प्राप्येत्यत्राप्यन्वयात् "ये यथा मां प्रपद्यन्ते" इति न्यायाच्च महर्षयः पूर्वं तादृशभावेन श्रीकृष्णो-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पासका इत्यर्थः । अतो रामं दृष्ट्वेति सारूप्येण जातस्वोपासना-संस्काराः हरिं स्वोपास्यं श्रीकृष्णमेवोपभोक्तुमैच्छन् लज्जया तु साक्षान्न वृतवन्तः ततश्च कल्पवृक्षस्येवावक्तोऽपि श्रीरामस्य प्रसादात् तेषामिष्टसिद्धिर्जातेत्याह—ते सर्वे इति । गोकुले गर्भतः स्त्रीत्वमापन्ना गोकुल एव समुद्भूताः गोकुल एव च हरिं श्रीकृष्णं कामेन स्ववासनानुसारेण सम्प्राप्य तस्मिन्नन्तर्गृहे एव स्वयमाविर्भूतं लब्ध्वा ततस्तदनन्तरमेव भवार्णवात् मुक्ता इति, न च वक्तव्यं गोकुलजातानां प्रापञ्चिकदेहादित्वं न सम्भवतीति अवतारलीलायाः प्रापञ्चिकमिश्रत्वात् श्रीदेवकीदेव्यामपि षड्गर्भसङ्कुकानां जन्म श्रूयते इति कदाचित् श्रुतयो गोप्यो जाता इति बृहद्वामनप्रसिद्धिः अत एव तथा व्याख्यास्यते—

"स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो-
वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः" ॥

इति गायत्री च तासु जातेति पाद्मे सृष्टिखण्डे यथा ब्रह्मणा गोपकन्यारूपाया गायत्र्या उद्वाहे गोपेषु श्रीविष्णुवचनम्—

"मया ज्ञाता ततः कन्या दत्ता चैषा विरिञ्चये ।
युष्माकं च कुले चाहं देवकार्यार्थसिद्धये ॥
अवतारं करिष्यामि मत्कान्ता तु भविष्यति" ।

इति । अतः "तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः" इत्यत्रापि तथा व्याख्यातम् अत एव तासां च चतुर्विधत्वमुक्तं पाद्मे—

"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः ।
देवकन्याश्च राजेन्द्र ! न मानुष्यः कथञ्चन" ॥ इति ।

अत्र गोपकन्या एव नित्याः न मानुष्यः कथञ्चनेति प्राकृतमानुषत्वनिषेधात् आसु च पाद्मोत्तरखण्डनिर्दिष्टानामन्तर्गृहगता इत्युक्तानामप्येकत्वं मुक्तत्वसादृश्येन लब्धानां लभ्यते यत एव "शुश्रूषन्त्यः पतीन्काश्चित्" इति प्रोक्ताः इति ज्ञेयाः आसां दोहनादिप्रथककर्मानुक्तेः अन्तर्गृहगतत्वस्य पतिशुश्रूषायामेव तात्पर्याच्च एतासां च साधकत्वं देहत्यागश्रवणात् पाद्मोत्तरखण्डाच्च कल्प्यते तथा च सति याः काश्चिद् गोकुले समुद्भूताः साधनवशात् सिद्धपूर्णभावा न तु सिद्धदेहा नितरामन्या इव नित्यसिद्धाः पतिशुश्रूषणार्थमन्तर्गृहगता एव पत्यादिभिः साग्रहद्वारादिनिरोधात् न लब्धो विशेषेण केनापि प्रकारेण निर्गमो याभिस्ताः अत्र तासां साक्षाद्गोविन्दसङ्गमे तादृशदेहस्थितेरेव विघ्नत्वात् पूर्ववत्तद्भक्तेः पतिशैथिल्यविधानादावप्रवृत्तिरिति ज्ञेयम् अलब्धनिर्गमत्वादेव तद्भावनायुक्तास्तस्मिन् श्रीकृष्णे समुत्कण्ठितचित्ताः सत्यः कृष्णं निजचित्तापकर्षकं तमेव दध्युर्ध्यातवत्यः तत्रानुभावमाह—दुःखविशेषेण ध्यानावेशेन च मुद्रितनेत्राः । यद्वा, मीलितमन्तर्हितं लोचनमन्याशेषज्ञानं यासां ताः ॥ ९ ॥

ततश्च सद्य एव श्रीकृष्णेन सह संयोगं प्राप्ता इत्याहुः, दुःसहेति युग्मकेन । तत्रोत्कण्ठापरिणामं दुःसहेत्यर्द्धेन ध्यानपरिणामं ध्याने त्यर्द्धेनाह—उत्कण्ठया दुःसहप्रेष्ठविरहः विप्रलम्भाख्यो भावः तेन तीव्रतापः तेन धुताऽशुभा ध्यानेन हेतुना प्राप्ता याऽच्युतस्य निजभक्तेषु च्युतरहितत्वेन प्रसिद्धस्याश्लेषनिर्वृतिः तया क्षीणमङ्गलाः

अत्र दुःसहशब्देन तीव्रशब्देन च दुःखस्य पराकाष्ठा दर्शिता अच्युतशब्देन निर्वृतिशब्देन च सुखस्य अशुभं भगवन्नित्यसंयोगप्राप्तिप्राचीनदशायां दुःखजनिका तद्विरहस्फूर्त्तिः मङ्गलं च तद्दशायामेव सुखजनिका प्राप्तव्यतत्संयोगस्फूर्त्तिः यावतीभ्यां ताभ्यां वृत्तिभ्यामेव प्रौढभावः साधकः सिद्ध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि सम्प्रति युगपदेव भोगो जात इति धुतत्वं क्षीणत्वं चोक्तम् ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

दुःसहेत्यादिना प्रारब्धकर्मक्षयप्रकार उच्यते—क्षीणमङ्गला क्षीणपुण्याः ॥ १०-१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काश्चिद्गोप्यस्त्वन्तर्गृहगताः पतिभिरन्तर्गृहनिरुद्धा इत्यर्थः अत एव न लब्धो निर्गमो यासां ताः प्रागपि कृष्णभावनायुक्तास्तदा नितरां कृष्णं दध्युः ध्यातवत्यः कथम्भूताः मीलिते लोचने याभिस्तथाभूताः ॥ ९ ॥

एवं ध्यातवतीनां प्रारब्धकर्मक्षयपूर्वकभगवत्प्राप्तिमाह—द्वाभ्यां दुःसहेति । दुःखेनापि सोढुमशक्यो यः प्रियतमस्य कृष्णस्य विरहः तेन यस्तीव्रतापः तेन धुताः निरस्ताः अशुभाः प्रारब्धपापकर्माणि यासां ध्यानेन प्राप्तो योऽच्युतस्याश्लेषस्तेन या निर्वृतिरानन्दस्तया क्षीणानि मङ्गलानि प्रारब्धपुण्यानि यासां तथाभूताः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अलब्धविनिर्गमाः न लब्धं विनिर्गमनं याभिस्तास्तथा तस्य कृष्णस्य भावनया भक्तिसंस्कारेण युक्ताः ॥ ९ ॥

काश्चन ताः स्त्रियः गुणमयं सत्त्वादिगुणविकृतदेहं जहुरित्यन्वयः । अयं देहत्यागः संसारिण इव न किन्तु मुच्यमानस्येवेत्याह—सद्य इति । बन्धनध्वंसोऽपि प्रारब्धपुण्यपापप्रणाशेन इष्टत्वात्तत्रापि तथैवेत्याह, दुःसहेति । दुःसहः सोढुमशक्यः प्रेष्ठस्य कृष्णस्य विरहः सांसारिको वियोगस्तेनोत्पन्नस्तीव्रतापः अत्युत्कटज्वरानुभवः तेन धुताशुभाः निरस्तपापाः ध्यानेन प्राप्तः अच्युतस्याश्लेषः ध्यानप्राप्ताच्युताश्लेषः तेन उद्भूतया निर्वृत्या स्वरूपानन्दाविर्भावलक्षणया क्षीणानि प्रारब्धानि मङ्गलानि पुण्यानि याभिस्तास्तथा ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अन्तरित्याद्यष्टकम् ॥ ९—१७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अपत्यवत्यस्तु अधिकाराभावात्तद्वपुर्हित्वा वपुरन्तरेण सद्य एव तत्र गता इति दर्शयन्नाह—अन्तर्गृहगता इत्यादित्रिभिः । काश्चित् अपत्यवत्यो ऽनधिकारवत्यः वैवाहान्तर्गृहगताः अन-

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

धिकारित्वेनाङ्गसङ्गाऽयोग्या अपि दर्शनमात्रकाङ्क्षया बहिर्गन्तुमिच्छन्त्यो ऽप्यलब्धविनिर्गमाः तद्भावनायुक्ताः सत्यः कृष्णं दध्युर्भावनालिङ्गमाह—मीलितलोचना: ॥ ९ ॥

दुःसहेन प्रेष्ठस्य श्रीकृष्णस्य विरहेण तीव्रतापस्तेन धुतानि अशुभानि यासां तेनाशुभकर्मक्षयः ध्याने प्राप्तो यः अच्युतस्तस्याऽऽश्लेषः तत्कृतया निर्वृत्या क्षीणानि मङ्गलानि शुभकर्माणि यासां तास्तथानेन शुभकर्मक्षयः यावद्दुःखक्षय एकेन कृष्णविरहदुःखेन जात इति तद्विरहस्य दुःखत्वाधिक्यम् एवं यावत्सुखक्षय एकेन कृष्णस्य ध्यानानन्देन जात इति तद्ध्यानानन्दस्य सर्वसुखातिरिक्तत्वम् व्यङ्ग्यम् ॥ १० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

एवं दशविधानां भगवत्समीपगतिमुक्त्वा यासां कालः प्रतिबन्धकः पूर्वमेव भक्तियुक्तास्ता भजनानन्दमननुभूयैव प्रतिबद्धा एव भगवत्सायुज्यं प्राप्तवत्य इत्याह—अन्तर्गृहगता इति त्रिभिः। दैवगत्या काश्चिद्गृहमध्ये स्थिताः गोपभार्याः चातुर्यानभिज्ञाः अप्रौढाः पतिसहिताः पतिभिरेव संरचिताः अलब्धविनिर्गमा जाताः ततः प्रतिबन्धनिवृत्त्यर्थं कृष्णमेव ध्यातवत्यः परं तद्भावनायुक्ताः भगवान् जारः स्वयमभिसारिका इति अन्यथा प्रतिबन्धो न स्यात् तादृश्योऽपि मीलितलोचनाः सत्यो भगवन्तं दध्युः ध्यातवत्यः ततो मुक्ता जाताः ॥ ९ ॥

ननु, तत्र ज्ञानाभावात् विहितभक्त्यभावात् भगवतोऽपि साक्षित्त्वाभावात्कथम्मुक्ता इत्याशङ्क्य कर्मक्षयात् मुक्ता इति वक्तुं कर्मक्षयप्रकारमाह—दुःसहेति। दुःसहो यः प्रेष्ठविरहः स एव ज्वालिमहानग्निः तस्य यस्तीव्रः तापः तेन धुतानि निर्धूतानि ज्वालितानि भस्मसात्कृतानि अशुभानि यासां फलभोगे कर्म क्षीयत इत्यविवादं कोटिब्रह्मकल्पेषु कुम्भीपाकादिनरकेषु यावत् दुःखम्भवेत् तावद्दुःखं भगवद्विरहे क्षणमात्रेण जातं ततः सर्वपापफलभोगः समाप्तः। पुण्यक्षयप्रकारमाह—ध्यानप्राप्तेति। सर्वपापक्षये भगवान् ध्याने प्राप्तः अच्युतः परमात्मा न तु समागतोऽपि जारत्वेन अन्यथा ततोऽपि कर्मशेषः स्यात् तस्य योऽयमाश्लेषः तेन या निर्वृतिः तया क्षीणं मङ्गलं पुण्यम् यासां कोटिब्रह्मकल्पेषु स्वर्गादिलोकेषु यावत्सुखमनुभूयेत तावद्भगवदाश्लेषे क्षणमात्रेणैवानुभूतम् अतः पुण्यक्षयोऽपि जातः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अत्रोज्ज्वलनीलमणियुक्तरीत्या विविच्यते गोप्यस्तावद्द्विविधाः नित्यसिद्धा साधनसिद्धाश्च, साधनसिद्धाश्च द्विविधाः यौथिक्यो ऽयौथिक्यश्च यौथिक्यश्च द्विविधाः श्रुतियूथभूतत्वात् श्रुतिचर्यः ऋषियूथभूतत्वादृषिचर्यश्च ततस्तासां चतुर्विधत्वमुक्तं पाद्मे—

> "गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः।
> देवकन्याश्च राजेन्द्र! न मानुष्यः कथञ्चन" ॥ इति।

गोपीत्वेनैव मानुषत्वे लब्धेऽपि न मानुष्य इति निषेधस्तासां प्राकृतमानुषत्वाभावं ज्ञापयति अत्र गोपकन्यका एव नित्यसिद्धास्तासां साधनाश्रवणात् गोपीत्वे सत्यपि कात्यायन्यर्चनस्य तु साधनत्वं नरलीलत्वमेव ज्ञापयति गोपीत्वस्य सिद्धत्वादेवेति तत्प्रसङ्ग एव प्रपञ्चितं तासां नित्यसिद्धत्वन्तु "आनन्दचिन्मयरसप्रतिभाविताभिः"इति ब्रह्मसंहितोक्त्या तासां ह्लादिनीशक्तित्वप्रतिपादनात् "ह्लादिनी या महाशक्तिः" इति बृहद्गौतमीयाच्च ताभिः सह कृष्णस्य रमणाख्यानादित्वाच्च दशाष्टादशाक्षरादिमन्त्रेषु तासां निर्देशात् तन्मन्त्रोपासनानां तद्विधायकश्रुतीनां चानाद्यतत्कालभावित्वाच्च "सम्भवन्त्वमरस्त्रियः"इति प्रमाणावगतानां देवकन्यानां नित्यसिद्धगोपिकांशभूतत्वं व्याख्यातमुज्ज्वलनीलमणौ श्रुतिचरीणां साधनसिद्धत्वम्—

> "कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः।
> कामिनी भावमासाद्य स्मरक्षुब्धान्यसंशयः ॥
> यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः।
> भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा" ॥

इत्यादि बृहद्वामनवचनेभ्योऽवगतम् ऋषिचरीणां च "गोपालोपासकाः पूर्वमप्राप्ताभीष्टसिद्धयः" इत्युज्ज्वलनीलमणियुक्तानां तथाभूतत्वं"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहं। ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात्" इति पाद्मोत्तरखण्डात्। अत्र रामं दृष्ट्वा हरिं भोक्तुमैच्छन्निति रामसौन्दर्यदर्शनेन स्वोपास्यस्य हरेः गोपालस्य स्मरणात्तमेवभोक्तुमैच्छन्नित्यर्थः लज्जया तु साक्षात्तं न वृतवन्त्यः ततश्च कल्पवृक्षस्येवाच्युतोऽपि श्रीरामस्य प्रसादात्तेषामभिष्टसिद्धिर्जातेत्याह—ते सर्वे इति। हरिं कामेन सम्प्राप्येत्यनुसंहितं फलं ततः कामादेव हेतोर्भवार्णवात् संसारान्मुक्ता इत्याननुसंहितं फलम् अत्र"मातरः पितरः पुत्राः"इति "यत्पत्यपत्यसुहृदामनुवृत्तिः" इति "पतिसुतान्वयभ्रातृबान्धवान्" इत्याद्यग्रिमग्रन्थदृष्टेरपत्यवत्यो गोप्य एवान्तर्गृहनिरुद्धा बभूवुरिति श्रीकविकर्णपूरगोस्वामिकृतदशमस्कन्धटीकायां दृष्टमतस्तदनुसारेण सार्वत्रिकं मूलार्थमव्याप्यैव व्याख्यायते अत्रेदं तत्त्वं गोपालोपासका ऋषयस्ते श्रीराममूर्तिमाधुरीदर्शनाद्रागमार्गकेनिष्ठारुच्यासक्तिरत्यङ्कुरभूमिका आरूढाः सम्यगपरिपक्वकषाया अपि श्रीयोगमायया देव्या गोकुलमानीय गोपीगर्भे जनिताः कन्यका बभूवुःतासामेव मध्ये काश्चिन्नित्यसिद्धगोपीसङ्गभूम्ना वयःसन्धिदशामारभ्यैव लब्धपूर्वानुरागाः स्फूर्त्तिप्राप्तकृष्णाङ्गसङ्गाः दग्धसम्यक्कषायाः प्रेमस्नेहादिभूमिका आरूढा गोपैर्व्यूढा अपि योगमाययैव तदङ्गस्पर्शदोषाद्रहिताश्चिन्मयदेहीभूताः कृष्णोपभुक्तास्तस्यां रात्रौ वेणुवादनसमये पतिभिर्वार्यमाणा अपि योगमायया साहाय्यप्रसादान्नित्यसिद्धगोपीभिः सहिता एव प्रेष्ठमभिसस्रुः काश्चित्तु नित्यसिद्धादिगोपीसङ्गभाग्याभावादलब्धप्रेमत्वाददग्धकषायाः गोपैर्व्यूढा गोपोपभुक्ता अपत्यवत्यो बभूवुः ताः खलु तदनन्तरमेव नित्यसिद्धादिगोपीसङ्गभूम्ना कृष्णाङ्गसङ्गस्पृहोद्रेकात् पूर्वरागवत्यस्तासां कृपापात्रीभवन्त्योऽपि कृष्णाङ्गसङ्गायोग्यदेहत्वेन योगमायया सहायाऽकरणात् पतिभिर्वारिताः कृष्णमभिसर्तुमक्षमाः सद्य विपद्ग्रस्ताः पतिभ्रातृपित्रादीन् स्वप्राणवैरित्वेन पश्यन्त्यो मत्याद्दशामुपस्थिताया सख्यां यथान्या मामादिस्ववन्धुजनं स्मरन्ति तथैव स्व-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्राणैकबन्धुं कृष्णं सस्मरुरित्याह—अन्तरिति । न लब्धो विनिर्गमो याभिस्ता इति पतिभिर्द्वार्य्येव सतर्जनं सयष्टिकमुपविष्टत्वादिति भावः । सदैव तद्भावनयायुक्ता अपि तदानीं दध्युः हा हा प्राणैकबन्धो ! वृन्दावनकलानिधे ! जन्मान्तरेऽपि त्वत्प्रेयसी भूयास मस्मिन्नन्तकाले त्वन्मुखचन्द्रं चक्षुषा नाऽपश्यं भवतु मनसाऽपि पश्यामीति प्रत्येकं स्वगतमनुलपन्त्यो मुद्रितलोचना सत्यो नितरां दध्युः ॥ ९ ॥

अत्र गोपीनां प्राप्यमतिरहस्यं वस्तु बहिरङ्गलोकेभ्यो गोपयं स्तान् प्रतिबाह्यमर्थमन्तरङ्गान् भक्तिसिद्धान्तविज्ञान् प्रति तु स्वाभीप्सितमाभ्यन्तरमेवार्थं ज्ञापयंस्तन्त्रेणाह—दुःसहेति । तत्र बहिर्मुखान् प्रति ताभ्यः कृष्णो मोक्षं ददावित्याह—दुःसहो यः प्रेष्ठविरहस्तेन तीव्रतापस्तेन धुतानि गतानि अशुभानि यासां ताः ध्यानेन प्राप्तस्याच्युतस्याश्लेषेण या निर्वृतिरानन्दस्तया क्षीणं मङ्गलं पुण्यं यासां ताः अतः प्रक्षीणप्रारब्धबन्धना: जारबुद्ध्यापि तमेव परमात्मानं प्राप्ता देहं जहुरिति अन्तर्मुखान् प्रति तु तदानीं स्वप्रेष्ठविरहसंयोगोत्थानि दुःखसुखान्यपरिमितानि प्राप्य लब्धमनोरथा एव ताः क्रमेण बभूवुरित्याह—दुःसहेन प्रेष्ठविरहेण यत्तीव्रस्तापस्तेन धुतानि कम्पिताकृतान्यशुभानि याभिस्ता यासां प्रेष्ठविरहतापस्य तीव्रतां वीक्ष्य कोटिब्रह्माण्डस्थबाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताहङ्कारं परित्यज्य स्वपराजयबुद्ध्या चकम्पिरे इत्यर्थः । ध्यानेन प्राप्तः स्फूर्त्या आगतो यो ऽच्युतस्तेन तदैवाद्भुतस्य तस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावाभिमानादिमतो देहस्य यः श्लेषस्तेन श्लेषेण या निर्वृतिस्तया क्षीणानि कृशीभूतानि मङ्गलानि प्राकृताऽप्राकृतानि यासां ताः यासां स्फूर्तिप्राप्तप्रेष्ठाश्लेषोत्थसुखं वीक्ष्य कोटिब्रह्माण्डगतविषयसुखानिर्विषयब्रह्मानुभवसुखसहस्राणि मङ्गलशब्दवाच्यानि क्षीणानि यदपेक्षया निकृष्टान्येव बभूवुरित्यर्थः । भगवद्विरहसंयोगोत्थदुःखसुखाभ्यां प्रारब्धपापपुण्यानि नष्टानि तेषां स्वफलभोगैकनाश्यत्वादिति व्याख्या तु वैष्णवानां मते न युज्यते ॥ १० ॥

विशुद्धरसदीपिका ।

एवं च श्रुतिमुनिरूपाणां मध्ये काश्चिन्निर्जितकषाया निराबाधा-भयुरित्युक्तम्, इदानीं कासाश्चन दुष्पचेलिमदशां गतवति कषाये तदाभासे वा भक्तिप्रभावाजानिमन्तरेणैव सिद्धशरीरा स्वादनपूर्वका नित्यप्राप्तिमाह—अन्तरिति त्रिभिः । तत्रान्तर्गृहगता इति पत्यादिपरिचरणे लिङ्गं किं वा तद्दर्शनादिष्वौदासीन्येन स्वदेहान्तःस्थितिप्रदर्शनाय तथोक्तं किं वा मुनिचरीत्वेन प्राक्तनसंस्कारवशात्तद्ध्याननिष्ठत्वप्रदर्शनाय तत एव च पत्यादिभिस्तद्व्यापारैः सावधानैरपि स्थापिता इति गम्यते यादृश-मायया इत्याद्युक्तेः एते च तदुक्तपठावष्टम्भनार्थं योगमायाकल्पिता एव तत्काल्पितव्रजाङ्गनावादिति गम्यम् अन्यथा तद्रोधना कृतो लोकापवादो दुर्वार एव स्यादिति ध्येयम् तथा तत्पक्षे-देहानामप्यन्तर्धापनं तथैव ज्ञेयम् यावद्भगवत्सुरशरीरान्तर्धापनं-वत् तदेवं याः काश्चित्साधनवशात्सिद्धपूर्णभावा न तु सिद्धदेहा नितरामन्या इव नित्यसिद्धास्तासामवस्थेयमिति ज्ञेयम् श्लोकार्थोऽयं गृहस्यान्तरित्यन्तर्गृहम् यद्वा, अन्तः अन्तःकरणे गृहगता गृहाभ्यन्तरे गता वयमिति भावो यासां ताः तद्भावना युक्ता इति निर्देशात् एवञ्च भावनयैव चालब्धविनिर्गमाः सत्यः कृष्णं स्वचित्ताकर्षकपूर्णानन्दस्वरूपं श्यामसुन्दरं दध्युर्ध्यातवत्यः कथमित्यपेक्षायामाह—मीलितलोचना इति । इदमेव प्राग्भवीयमुनिवरत्वे लिङ्गम्—

> "एतेऽलिनस्तव यशोऽखिललोकतीर्थं—
> गायन्त आदिपुरुषानुपथं भजन्ते ॥
> प्रायो अमी मुनिगणा भवदीयमुख्या—
> गूढं वनेऽपि न जहत्यनघात्मदैवम् ॥

इत्यादिवत् ॥ ९ ॥

ततश्च तादृशध्यानावेशात्तत्क्रतुन्यायेन तादृश्यैव तस्य प्राप्तिमाह—दुःसहेति । अत्र प्रेष्ठेति विरहस्योत्कटत्वे हेतुः सोऽपि संयोगपुष्ट्यै इति ज्ञेयम् "न विना विप्रलम्भेन संयोगः पुष्टिमश्नुते,, इत्युक्तेः तथा अच्युत इति संयोगदार्ढ्ये हेतुः तेन नित्यसंयोगो ध्वनितः तथाऽशुभमत्र श्रीभगवन्नित्यसंयोगप्राप्तिप्राचीनदशायां दुःखजनिकात् तद्विरहस्फूर्तिः मङ्गलं च तद्दशायामेव सुखजनिका प्राप्स्यमानतत्संयोगस्फूर्तिः यावतीभ्यां ताभ्यां ताभ्यां वृत्ताभ्यां प्रौढभावः सिध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि युगदेव भोगो जातः इति धुतत्वं क्षीणत्वं चोक्तं तयोः शब्दयोश्च पुण्यपापपर्य्यायत्वाभावात्तथात्वं न शङ्कनीयम् उभयोः स्वस्वानियतफलदातृत्वानियमात् पापस्य तु सुतरां भगवद्विरहस्य प्रेमस्फोरकत्वाभावाच्च "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते,, इति सुतरामेव तत्प्रारब्धजन्मत्वाभावात् स्वामिव्याख्यायां तु "गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम्" इति वत्प्रारब्धरक्षणारम्भयोः स्वप्रेमवर्द्धनविदग्ध श्रीभगवदिच्छयैव यथैव हि परकीयात्वादिस्फूर्त्तिरपि तस्यास्तद्वर्द्धनमाह रुद्रः—

> "बहुवार्यते यतः खलु यत्र प्रच्छन्नकामुकत्वञ्च ।
> या च मिथो दुर्लभता सा परमा मन्मथस्य रतिः" ॥

इति दिक् इदमत्र विचार्य्यते श्रीभगवत्प्राप्तिमार्गो द्विविधः विधिमार्गो भावमार्गश्चेति सोऽपि प्रत्येकं द्विविधः सङ्कीर्णशुद्धभेदात् तत्राद्यः कर्मज्ञानादिमिश्रः तत्राप्याद्यः सकामकर्ममिश्रो निष्कामकर्ममिश्रश्च तयोराद्येन श्रीमदुपेन्द्रादिलोकप्राप्तिः तत्रापि तदुपासकत्वे तत्रैव नित्यस्थितिः स्वयं रूपोपासकत्वे च तद्भोगानन्तरक्रमेण तत्प्राप्तिः सोऽपि तद्वदेव तदुपासकत्वे स्वयं रूपोपासकत्वे च तत्प्राप्तिः ज्ञानमिश्रेण च महाकालपुराधिपतिप्राप्तिः अथ शुद्धेन विधिमार्गेण निष्ठातारतम्याद्भावप्राप्तिः अथ भावमार्गेऽपि सङ्कीर्णशुद्धभेदेन द्विविधः तयोराद्यो रिरंसामिश्रोऽपरमिश्रश्च तत्र प्रथमेन प्रेयसीव प्राप्तिः तत्रापि विधिमिश्रत्वे पुरगतप्रेयसीभावप्राप्तिः तत्रैवोद्वाहादिश्रवणात् केवलेन व्रजाङ्गनात्वप्राप्तिरिति अत एव विवाहाद्यश्रुतिरिति विवेकः शुद्धेन च सहचरीभावप्राप्तिः तत्रापि श्रीकृष्णस्याहमित्यभिमानेन तत्सखीत्वं श्रीराधाया अहमित्यभिमानेन तत्प्राणसखीत्वम् इति नचायं विभागोऽनुपपन्नः सामान्यविशेषवाचका हि शब्दा यथास्थान-

विशुद्धरसदीपिका ।

मेव तं तमर्थं प्रकाशयन्ति यथा ब्राह्मणा नावमन्तव्या इति सर्वेऽपि गृह्यन्ते यथा च ब्राह्मणा वरणीया इति वरणयोग्या एव तथा प्रकृतेऽपि व्रजस्त्रीणां प्रागुक्तास्ते च तेच प्रकाराः स्वस्वाधिकारानुसारेण तत्तत्परा द्रष्टव्याः अन्यथा बल-देवक्रीडितगोपीष्वपि तथा प्रयोगस्य सामान्यार्थस्वीकारे "वक्रं व्रजेशसुतयोः" इत्यादिना तदेकमतिगतीनां तासामन्यत्रासक्ति-वर्णने रसभङ्गो मर्यादातिक्रमश्च दुर्वारः स्यादिति ध्येयम् अत्र च प्रामाणपर्येषणायां श्रीवृहद्भागवताद्गिवेषणीयं मूले च परम-हंसादिसभायां तद्गोपनाय प्राप्तेश्च गुणातीतत्वद्योतनाय परम पुरुषार्थरूपायास्तस्या दृष्टान्तस्थानीयस्य परमपुरुषार्थस्य मोक्ष-स्योपन्यासः कृत इति न कोऽपि विरोधः ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ जन्मान्तरेषु मोक्षाभिकाङ्क्षया कृतया गोपीजनवल्लभो-पासनया लब्धगोपीभावानामवस्थामाह—अन्तरिति । काश्चिद्गोप्यो मोक्षप्रदभगवत्सङ्कल्पानुसारेण पतिभिर्द्वारायां मुद्रितत्वात् अन्तर्गृहगताः अलब्धविनिर्गमाः कृष्णं दध्युः मरणदशोप-स्थितौ तमेव प्रेष्ठं दध्युः यतः यस्य सर्वदा भावना भवति तदेवा-न्तकाले ध्यानपथमारोहति ताश्च सर्वदा कृष्णभावनायुक्ता आस-न्नित्याशयेनाह-तद्भावनायुक्ताः नेत्रद्वाराऽन्यत्र चित्तवृत्तिगमन-भयान्मीलितानि लोचनानि यासां ताः ध्यानावेशेन मुद्रितनेत्रा इति वा । यद्वा, मीलितानि लोचनानि इतरज्ञानानि यासां ताः । केचित्तु काश्चित्तु नित्यसिद्धादिगोपीसङ्गभाग्याभावादलब्धप्रेम-त्वाददग्धकषायामूढगोपोपभुक्ता अपत्यवत्यो बभूवुस्ताः खलु तदनन्तरमेव नित्यसिद्धादिगोपीसङ्गभूकृष्णसङ्गस्पृहावेका तासां कृपापाङ्गीभवत्यो ऽपि कृष्णाङ्गसङ्ग योग्यदेहत्वेन योगमायया सहायकारणोत्पत्तिभिर्वारिताः कृष्णमभिसर्तुमक्षमाः महा-विपद्ग्रस्ताः पतिभ्रातृपुत्रादीन्स्वप्राणचौरत्वेन पश्यन्त्यो मरण-दशायामुपस्थितायां सत्यां यथाऽन्ये मात्रादिस्वबन्धुजनान् स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुः इति वर्णयति, निवृत्तिपक्षे स एव रसानां रसतमः परमः पराद्धयोष्टमोयमुद्गीथ इत्याद्याः उद्गीथादिरूपान्तर्गृहगता अपि काश्चिद्गोपस्य भगवतः सम्बन्धिन्यः अलब्धो ऽवशेषेण निर्गमः प्रतिपादनं याभिस्ताः तस्य परमात्मनो भावनायामुपासनायां युक्ता नियुक्ताः कृष्णं दध्युः परमात्मध्यानं विदध्युः यतो विचारेण मुद्रितमथा श्रुतार्थ-प्रकाशस्तथाचोद्गीथादिस्तुतिप्रतापा निरुद्धा अपि तत्र न तस्थु-रित्यर्थः । वृत्तयोपि काश्चिदत्यन्तप्रियवस्तुरूपगृहान्तर्गताः अलब्ध-विनिर्गमा अपि तत्र कृष्णभावनायुक्ताः कृष्णं दध्युर्मुद्रितावि-षयिकप्रकाशाः ॥ ९ ॥

तथा च वर्तमानकालीनविरहध्यानाभ्यां पूर्वोपासनया लब्धाभ्यां स्वाभिलषितस्फलं प्रापुरित्याह—दुःसहेति । दुःसहो यः प्रेष्ठ-विरहो महानग्निस्तेन यस्तापः कोटिब्रह्मकल्पेषु कुम्भीपाकादि-नरकेषु यावद्दुःखं भवेत् ततोऽप्यधिकं भगवद्विरहस्मरणेण जातं दुःखं तेन धुतानि निर्मूलानि भस्मसात्कृतानि अशु-भानि यासां तथाच सर्वपापफलभोगसमाप्तिः पुण्यक्षयप्रकार-माह—ध्यानेन प्राप्तोऽच्युतस्य सदैकरसस्य परमात्मनः आश्लेषः सम्यगालिङ्गनन्तदानीं न जारत्वेनाऽऽश्लेषः किन्तु परमात्मत्वे-नेति बोधयितुम् अच्युतपदं तेन या निर्वृतिः सुखं कोटिब्रह्मकल्पेषु स्वर्गादौ यावत्सुखं भवेत्ततोऽप्यधिकं भगवत्सङ्गप्रेष्ठविरहेण यस्तीव्रस्तापस्तेन धुतानि कल्पितीकृतानि अशुभानि याभिस्तास्त प्रियविरहतापस्यातितीव्रतां वीक्ष्य कोटिब्रह्माण्डस्थवाडवानल-महाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्व-तीव्रताऽहङ्कारं परित्यज्य पराजयं बुद्ध्या च कम्पिता इत्यर्थः ध्यानेन प्राप्तः आगतो योऽच्युतस्तेन तदैवाद्भुतस्य प्रेमपूर्ण-चिन्मयस्य तादृशस्वभावादिमतो देहस्य य आश्लेषस्तेन या निर्वृति-स्तया क्षीणानि कृशीकृतानि मङ्गलानि सुकृतानि यासां ताः यासां स्फूर्तिप्राप्तप्रेष्ठाऽऽश्लेषस्य सुखं वीक्ष्य कोटिब्रह्माण्डगतविषयसुख-निर्विषयब्रह्मानुभवानन्दस्य क्षीणत्ववर्णनं "यं लब्ध्वाचापरं लाभं मन्यते नाऽधिकं ततः" इत्यादिशास्त्रज्ञानविजृम्भितं निवृत्तिपक्षे दुःसहो यः प्रेष्ठस्य परमात्मनो विरहः अत्र परमात्मोपासनानस्तीति केनचिन्निरूप्यमाणस्तेन जातो यस्तीव्रतापस्तेन धुतानि अशुभानि याभिस्ताः तथा ध्यानेन परमात्मोपास्तायोऽच्युताश्लेषस्तेन केन-चिद्विदुषा वर्णितेन या निर्वृतिस्तया हेतुभूतया क्षीणानि कोटि कारितानि मङ्गलानि याभिस्ताः । यद्वा, अक्षीणानि न नाशितानि वर्धितानि वा मङ्गलानि याभिस्ताः निवृत्तिपक्षे स्पष्टोर्थः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णं दध्युर्ध्यानवत्यः ॥ ९ ॥

मुख्यपतिबुद्ध्या सङ्गतानाम् "यत्पत्यपत्यसुहृदाम्" इत्यादिषु कृष्णतत्त्वज्ञतया निर्दिश्यमानानां गोपीनां कृतार्थतायां कः संशय इति सूचयन् जारबुद्ध्याऽपि भगवन्तं सङ्गतानां कासाञ्चित् इत्थं ध्यानपराणां पुण्यापुण्यरूपप्रारब्धकर्मक्षयपूर्वकं भगवत्प्राप्ति-लक्षणं मोक्षमाह—दुःसहेति द्वाभ्याम् । दुःखेनापि सोढुमशक्यो यः प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहो वियोगस्तेन यस्तीव्रो दारुणस्तापस्तेन धुतान्यशुभानि प्रारब्धापुण्यकर्माणि यासां ताः तथा ध्यानेन प्राप्तो योऽच्युतस्तस्य आश्लेषण या निर्वृतिः सुखसम्पत्तिस्तया क्षीणानि मङ्गलानि प्रारब्धपुण्य-कर्माणि यासां ताः ॥ १० ॥

भाषा टीका ।

कितनीक गोपीन को उनके पतीन ने घरन के भीतर मूंदि दीनी तासों जब उन गोपीन कों अपने प्रियतम श्रीकृष्ण-चन्द्र के समीप जायबे कों मार्ग नहीं मिल्यो, तब अपने प्यारे को जैसे सदा दर्शन करतीं हीं वाही सामरी मूरत की भाव-ना करिके नेत्रनको मूंदि करिके वे गोपी अपने प्यारे कों भीतर में ध्यान करतीं भईं ॥ ९ ॥

ता समें दुःसह जो अपने प्रियतम को विरह ताके तीव्र ताप सों नष्ट भये हैं अशुभ जिनके और ध्यानके विषें प्राप्त भयो जो श्रीकृष्णचन्द्र को आलिंगन ताके आनन्द सों क्षीण भये हैं पुण्य जिनके, ताही सों तत्काल में क्षीण (नष्ट) भये हैं

तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

भाषा टीका ।

संसार के बन्धन जिनके ऐसी वे गोपी, गुणमय अर्थात् त्रिगुण प्रकृति के विकार पंचभूतन सों रच्यो जो ये प्राकृत देह है ताको त्याग देत भई, और श्रीकृष्णचन्द्र के विषें जारबुद्धि करिके उनही परमात्मा श्रीकृष्णचन्द्र को प्राप्त होत भई "पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" या श्रुति में एसें कहें हैं, कि-मुक्तपुरुष पुण्यपापनको छोडिकें निर्मल होयके परम पुरुष के सङ्ग विहारके योग्य होयके उनकी समताकूं प्राप्त होवे है" सो या जगै जिनगोपीन के कर्मन के परिपाक में नैक कछु कसर रही तिन गोपीन ने श्रीकृष्णके विरहके दुःखमें पापनके फल भोग लीने, और उनके ध्यान करिवे में भयो जो मिलवे को सुख तासों सुकृतन के फल भोग लीने या प्रकारसों जब पुण्यपापके फल भोग चुकीं तब उन गोपीन को त्रिगुणशरीर दूर भयो और फिर वे दिव्य देहनतें परमात्मा श्रीकृष्णचन्द्रको प्राप्त होत भई ॥ १०—११ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अत एव सद्यः प्रक्षीणबन्धनाः सद्यः सपदि प्रकर्षेण क्षीणं बन्धनम् आशाबन्धो यासां देहत्यागा रासादिकेलिं प्राप्स्याम इत्याशाबन्धोऽपि नष्ट इति भावः । अन्यथा अन्यगोपीवत् श्रीवृन्दावने व्रजान्तःसाक्षादवस्थित्यादिपरित्यागायोगः अत एव ताभ्योऽत्र निवसन्तीनां श्रीव्रजदेवीनां सौभाग्यमाधिकमेव केवलं नित्यसंयोगेन विरहदुःखाभावात् कैश्चिद्भावविशेषेणातृप्ताः ताः प्रशंसन्ते विरहेऽपि प्रेमविशेषोदयेनानन्दविशेषः स्यादिति श्री-भागवतामृते विवृतमेवास्ति । यद्वा, जहुः अन्तर्धापयामासुः । यद्वा, तं परमात्मानं जारबुद्ध्यैव सङ्गम आसक्तिं प्राप्ता अपि दुःसह-प्रेष्ठविरहतीव्रतापेनैव धुताशुभा धुतं विनाशितं जगतामेव अशुभं तापत्रयं याभिः तादृक्तापविशेषस्य श्रीभगवदीयगाढ प्रेमोद्रेकमयत्वात् जगत्तापत्रयनाशकत्वं तथा ध्यानप्राप्ताच्युता-श्लेषनिर्वृत्या अक्षीणमङ्गलाः अक्षीणं पुष्टं वृद्धिमेव गतं जगतां मङ्गलं याभ्यः तादृग्ध्यानस्य जगतामभ्युदयकारित्वात् मङ्गलवृद्धिकारित्वम् एवम्भूताः सत्यो गुणमयं देहं जहुः गुणा भावाः तत्रान्तराभावाः आर्जवस्थैर्यमार्दवबहिर्निष्क्रमोपायाक्षता गुरुजनादिसङ्कोचादयः बाह्याः सन्तप्ततागृहान्तस्थताबद्धतादयः तन्मयं तत्प्रधानं देहं जहुरिति तत्सद्भावत्याग एवात्र देहत्याग उक्तः यथा सुषुप्तिप्रसङ्गे अह्यायास्तत्तद्भावत्याग एव देहत्याग इति तृतीयस्कन्धे कथितम् अतः प्रक्षीणबन्धनाः प्रक्षीणानि बन्धनानि दिनान्तरे श्रीभगवत्केलिप्राप्तौ प्रतिबन्धा आन्तरा बाह्या आर्यवसन्तप्तादयो यासां तद्रात्रौ अच्युताश्लेषनिर्वृत्या कालक्षेपादसम्भरासाः । कल्याणम् इति एवं ज्ञानेन मोक्षो भवेत् प्रीतिभक्त्यादिना वैकुण्ठलोकादिप्राप्तिः सम्यक्प्रेमादिना श्रीभग वद्वशीकरणं तत्र च समर्थेन प्रेमविशेषेण नित्यप्रेष्ठतया व्रजे संयोग इति सिद्धान्तः । अतस्तादृशभावोत्पत्तये रासक्रीडा सर्वथा सर्वैः सेव्येति तात्पर्यम् ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अतस्तत्रैव तं श्रीकृष्णमेव सङ्गता मिलिताः तथा च वासना-भाष्यधृतं मार्कण्डेयवचनम्—

> तदानीमेव ताः प्राप्ताः श्रीमन्तं भक्तवत्सलम् ।
> ध्यानतः परमानन्दं कृष्णं गोकुलनायिकाः ॥ इति ।

तयोः शब्दयोः पापपुण्यपर्य्यायत्वाभावात् तयोः स्वस्व-प्रतिनियतफलदातृत्वात् पापस्य तु सुतरां भगवद्विरहमयप्रेम-स्फोरकत्वाभावात् "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति पाद्मोत्तरकार्त्तिकमाहात्म्यखण्डानुसारेण तासां सुतरां तत्प्रारब्धजन्मत्वाभावात् किन्तु गुरुपुत्रमिहानीतमितिन्यायेन प्रारब्धरक्षणारक्षणयोः स्वप्रेमवर्द्धनविदग्धश्रीभगवदिच्छैकमय-त्वात् नान्यथा व्याख्यातं ननु किं जारत्वेन सङ्गताः नेत्याह तादृशरागौत्सुक्येन सोपानीकृतया जारबुद्ध्यापि परमात्मानं सर्वांशिपरमस्वरूपत्वेनापि सर्वेषामपि स्वभावत एव यदुपपत्यादि-शब्दवत्पालकत्वेन पतित्वे सिद्धे भावविशेषधारिणीनां तासां रमणत्वेनापि पतिरसाविति पतिरूपमेवेत्यर्थः । रमणत्वाज्ञानेनैव जारबुद्ध्याऽपि तस्मिन् सङ्गस्यमानेऽपि रमणत्वलिप्सायाः प्रगल्भ-त्वात् जारत्वस्य तस्मिन् सर्वांशिन्यसम्भवात् जिघांसयापि हरय इत्यादिवत् जारबुद्ध्यापीति हेयतयैव निर्देशात् प्राची-नस्य पत्युर्देहस्य च त्यागात् इति भावः । तथाहि पटोलमूले रमणं स्यात् तथा रमणः प्रिय इति विश्वकोशात् "धवः प्रियः प्रतिभर्त्ता जारस्तूपपतिः समौ" इत्यमरकोशाच्च रमणपत्यादिशब्द-वाच्यजारादिशब्दवाच्ययोर्नैकत्वं मन्तव्यं किन्तु पूर्वस्य स्वामि-त्वादुत्तरस्य चोरत्वाद्विरुद्धवस्तुत्वमेव तत्रापि सभ्यशब्दान्तर-मप्रयुज्य प्रयुक्तस्यासभ्यस्य जारशब्दस्य जिघांसाशब्दस्येव निन्दातात्पर्यत्वमेव प्रतीयते "जारः पापपतिः" इति त्रिकाण्ड-शेषादिकोशाल्लोकाच्च किन्तु येन रागेण ता जारभावमयं निन्द्यं लोकधर्ममर्य्यादातिक्रममपि ताः कृतवत्यस्तं सूचयित्वा तस्यैव प्रशस्तत्वं दर्शितं चेष्टाविशेषसाम्यात् कामतया व्यपदिष्टत्वेऽपि प्रियानुकूल्यतात्पर्य्यत्वेन प्रेमैकरूपत्वं च, तथा च वक्ष्यते "यत्ते सुजातचरणाम्बुरुहं स्तनेषु" इत्यादि अत एवोक्तं तादृशैरपि "आसा-महो चरणरेणू" इत्यादौ "या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा" इत्यादि एताः परमित्यादौ "वाञ्छन्ति यत्तव भियो मुनयो वयञ्च" इति एवं हेयांशपरित्यागपूर्वकमहाप्रेमरसनीयकृष्णलक्षणपरम-पुरुषार्थशिरोमणिप्राप्तिर्दर्शिता तत्रानुषङ्गिकं फलमाह गुणमयं च देहं जहुरिति यतः पूर्वोक्तप्रकारेण सद्यः प्रक्षीणबन्धनाः एवं सच्चिदानन्ददेहप्राप्तिरपि सूचिता एतदुक्तं भवति अपि-त्वत्र जारबुद्धेर्हेयत्वं "जिघांसयापि हरये स्तनन्दत्वाप सद्गतिम्"

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इत्यत्र जिघांसाया इव व्यनक्ति गर्हावचनेन तच्छब्देनान्वयात् अत्र हेतुः परमात्मानमिति नहि परमात्मा तादृशानिन्द्यशब्द-वाच्योऽपि भवितुमर्हति तत्र च हेतुः हरये इति हरिशब्दोऽत्र कारुण्यादिमहागुणैः सर्वमनोहरतापरः नह्येवंभूतो जिघांस्यो भवितुमर्हति तद्वदनर्हत्वेऽपि सा साच कथञ्चित् जाताचेत् तर्हि परमात्मत्वाद्धरित्वाच्च सर्वहितकारित्वेनासौ परित्याजयेदेवा-योग्यांशं तस्यामिवामूषु पुनश्च तस्या भक्त्याभासवेषं द्वेषं स्तनदानमात्रत्वेन भक्तिं मत्वा तदुपलक्षितां धात्रीगतिं ददा-वेव अमूषु तु दुःसहप्रेष्ठविरहेत्यादिपद्योक्तमहाभक्तिविशेष-णान्तःसङ्गममनुभवंस्तदुचितानिजप्रेयसीं गतिं कथं न दद्या-दिति सङ्गतिश्चेयं पूर्वोक्ते गोलोकाख्ये गोकुलप्रकाशविशेष एव ज्ञेया अत एवोद्धवद्वारा श्रीभगवता संदिष्टम्—

"या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः ।
अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया" ॥ इति ।

रासश्चायं तद्दिनगत एव ज्ञेयः तस्यैव विवक्षितत्वात् तस्मि-न्नपि प्रकाशे गोपलीलत्वेन दिनान्तरेऽपि तत्सम्भवात् किं त्वत्र "नासूयन् खलु कृष्णाय" इति वक्ष्यमाणानुसारेण तत्पत्या-दिषु दुःखाद्यनुत्पत्तये तन्माययैव त्यक्तानां देहानामन्तर्धापनं तत्सदृशीनामन्यासां स्फोरणं च गम्यते एवं तावत्कालमेव तद्गृहस्थ लब्धरासाः श्रीभगवत्प्रेयस्योऽपि नाजानन् यावदुद्धव-द्वारा यथार्थानुभावकप्रभावम् यामयेत्यादि सन्देशं नाश्रृण्वन्निति च अथवा तासां मुरलीवाद्यानुसरणेन तदन्तिकगतौ किमाश्चर्यं यतःकाश्चिन्निरुद्ध्यमाना अप्यन्तर्गृह एव तं प्राप्ता इत्याह—अन्तरिति । तादृशतीव्रतापेन धुतं श्रीकृष्णकृपया खण्डितम् अशुभं विरह-रूपं यासां ताः तेन जगतामपि धुतमशुभं याभिस्ता इति वा "मद्भक्तियुक्तो भुवनं पुनाति" इति वत् तथा तादृशनिर्वृत्याऽ क्षीणा क्षीणताविरुद्धं पुष्टं मङ्गलं निजतादृशतत्संयोगरूपं यासां ताः तथा पुष्टं जगतामपि मङ्गलं याभ्यस्ता इति वा पूर्ववत् गुणमयं विरहभावमयं देहम् आवेशमित्यर्थः । तथा तृतीये सृष्टिप्रसङ्गे ब्रह्मणो दर्शितम् अन्यत् समानं सङ्गतिस्तस्मिन्नन्तर्गृहे एव तस्य प्राकट्यात् अन्तर्गृहगता इत्यन्वयात् अतएव सद्यः प्रक्षीणं बन्धनं सर्वतत्सङ्गविरोधो यासां ताः एवमलब्धरासाः इति तस्यामेव रात्रौ ज्ञेयं पूर्व-हेतोरेव ॥ ११ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एव सद्य एव प्रक्षीणानि बन्धनानि संसृतिबन्धनिमि-त्तानि पुण्यपापात्मकानि यासां ताः परमात्मानं कृष्णमेव जारबुद्ध्यापि सङ्गताः सत्वादिगुणप्रचुरं देहं तत्यजुः एवकारापि-शब्दाभ्यां कोपि भावो भगवदनन्यविषयो मुक्तये अप कल्पत इत्यभिप्रेतम् ॥ ११ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनारब्धफलानां कुतो निवृत्तिरिति तत्राह-तमिति । जारः उपपतिः पत्युरप्यधिक इति सम्भावितस्तं कृष्णं पर-मात्मानं नारायणमेव सङ्गताः सम्यग्ज्ञातवत्यः अनेन विम्ब-भूतहरिज्ञानेनाप्रारब्धप्रणाश इति सूचितम् ॥ ११ ॥

———

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तथा तदाशुभाशुभकर्मक्षये तदारब्धदेहपात उपसन्ने यद्-भूतदाह तमेवेति—जारबुद्ध्या । गुणमयं देहं जहुः अस्मिन् देहे सति असौ जारो भवति तदयं देहस्त्याज्य इति जारबुद्धि-स्तत्यागे कारणं गुणमयं जहुः निर्गुणं देहमवापुरित्याक्षेपः तास्त्वन्ते तदङ्गसङ्गयोग्यं वपुरासेदुरिति दर्शयति, सद्यस्तत्-क्षणेनैव तमेव श्रीकृष्णमेव परमात्मानं सङ्गता अपि बभूवु-रित्यर्थः । एतेन शुभाशुभकर्मारब्धं लौकिकमेव शरीरम् अलौ-किकं तु भक्तशरीरं श्रीकृष्णलीलारब्धमित्यायातमत एतास्तत्काल-सिद्धाः प्रागुक्तयज्ञपत्नीवत् अतः प्रक्षीणबन्धना नित्य-मुक्ताः ॥ ११ ॥

———

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो मुक्ता जाता इत्याह—तमेव परमात्मानमिति । सुख-भोगार्थमेव भगवान् पूर्वमाश्लिष्टः भोगे जातेऽपि वियोजक-पापाभावात् न वियुक्ताः अतः सङ्गता एव स्थिताः शरीरं तु प्रारब्धकर्मनिर्वाणम् अपतत् यथाश्लिष्टो भगवांश्च अवेक्षदा तत्र प्रविष्टाः तद्गतं धर्माधर्मफलं बुभुजुः भगवति प्रविष्ट-त्वात् मुक्ता एव जाताः तदाह, तमेव परमात्मानमिति । पूर्वं सम्बन्धसमये यद्यपि जारबुद्ध्यापि सङ्गता एव ततः कर्म-बन्धस्य प्रक्षीणत्वात् गुणमयं देहं जहुः । तदा अज्ञानमन्यथा-ज्ञानं वा त्रिगुणावस्थायीति न तयोः प्रतिबन्धकत्वम् वियो-जकाभावात् शरीरान्तरोत्पादकाभावाच्च अविद्या परं तिष्ठति सा भगवच्छक्तिः भगवत्सङ्गमं न व्यामोहयतीति सापि निवृत्ता ततः मुक्ता जाता इत्यर्थः ॥ ११ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

भगवद्विरहसंयोगयोः पापपुण्यफलत्वाभावात् तादृशानां प्रारब्धनाशस्तु भजनदशायामेवानर्थनिवृत्तिभूमिकारूढानामित्याहुः ततश्च तमेव परमात्मानं परमप्रेमास्पदं जारबुद्ध्या अतिनिकृष्टयापि सङ्गताः अत्युत्कृष्टपतिबुद्धिमतीभ्यो रुक्मिण्यादिभ्यः सकाशादपि सम्यक् प्रकारेण प्राप्ताः पतिबुद्धेः सकाशादपि जारबुद्धौ "या दुस्त्यजं स्वजनमार्यपथं च हित्वा" इत्याद्युद्धववाक्यनिर्धारिताम् निरङ्कुशप्रेमोत्कर्षात् तथाहिमस्मिन्नेवावतारे निकृष्टवस्तुन्यप्युत्कर्षं कुर्वत्येव लीला दृश्यते यथा महाराजराजेश्वरत्वलीलातः सकाशादपि "विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये" इति भीष्मोक्तेः पार्थसारथित्व-लीलाया उत्कर्षः तथा उत्कृष्टात् शान्तरसादपि निकृष्टस्य शृङ्गाररसस्य तत्रापि दाम्पत्यभावादप्यौ-पपत्यभावस्य तथा उत्कृष्टाद्रत्नालङ्कारादपि निकृष्टस्य गुञ्जा-गैरिकशिखिपुच्छादेरुत्कर्षो दृष्ट एवेति सङ्गताः काश्चिद्गमामा

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कृतानुकूल्यान्निरोधमुक्ता अभिसृत्य तस्यामेव रात्रौ रासविहारियं तं प्राप्ताः काश्चिदन्यस्यामपि ननु, पुरुषान्तरोपभुक्तदेहाभिस्ताभिस्सह भगवद्विलासो न युज्यते इति तत्राह—जहुरिति । देहमिति जात्यपेक्षया एकत्वं तस्य देहस्य योगमाययैवालक्षितमन्तर्द्धापनामित्येके, अन्ये त्वेवमाहुः अत्र हेयो देहो गुणमय एव अवश्यतो गुणमयमिति विशेषणस्याधिक्यात् तासां देहा वेणुवादनात्पूर्वं द्विधाभूता गुणमयाश्चिन्मयाश्चासन्निति बुध्यते तत्र ये गुणमयाः स्वपत्युपभुक्ता देहास्तानेव जहुः अयमत्र विवेकः गुरूपदिष्टभक्त्यारम्भदशात एव भक्तानां श्रवणकीर्त्तनस्मरणपादसेवनप्रणतिपरिचर्य्यादिमत्यां शुद्धभक्तौ श्रोत्रादिषु प्रविष्टायां सत्यां "निर्गुणो मदुपाश्रयः" इति भगवदुक्तेर्भक्तःश्रोत्रादिभिर्भगवद्गुणादिकं विषयीकुर्वन्निर्गुणो भवति व्यावहारिकशब्दादिकमपि विषयीकुर्वन् गुणमयोऽपि भवतीति भक्तिदेहस्यांशेन निर्गुणत्वं गुणमयत्वं च स्यात् ततश्च "भक्तिः परेशानुभवो विरक्तिः" इति "तुष्टिःपुष्टिःक्षुदपायोऽनुघासम्" इति न्यायेन भक्तिवृद्धि तारतम्येन निर्गुणदेहांशानामाधिक्यतारतम्यं स्यात् तेन च गुणमयदेहांशानां क्षीणत्वतारतम्यं स्यात् सम्पूर्णप्रेमण्युत्पन्ने तु गुणमयदेहांशेषु नष्टेषु सम्यक् निर्गुणं एतद्देहस्स्यात् तदपि स्थूलदेहपातस्तु बहिर्मुखमतोरख्यातभावार्थं भक्तियोगस्य रहस्यत्वरक्षार्थं च भगवतैव मायया प्रदर्श्यते यथा मौषललीलायां यादवानाम् क्वचित्तु भक्तियोगोत्कर्षज्ञापनार्थं न दर्श्यते च यथा ध्रुवादीनाम् अत्र प्रमाणमेकादशे पञ्चविंशतितमेऽध्याये भक्तादयो निर्गुणां गुणमयाश्चेति प्रदर्शयता—

> "येनेमे निर्जिता सौम्य गुणजीवेन चित्तजाः ।
> भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते" ॥

इत्यनेन भक्त्यैव गुणमयवस्तूनां निर्जयो नाश एवोक्तो भगवता अत एव धूतानि विधूतानि तानि रन्धितानि अशुभानि गुणमयशरीराणि यासां ता इति आश्लेषनिर्वृत्या प्रक्षीणानि विवर्धितानि मङ्गलानि चिन्मयशरीराणि यासां ता इत्यप्यर्थं श्रीकीर्त्तितो भवति अतः प्रक्षीणबन्धना अविद्याबन्धनात् पत्यादिकृतरोधात् योगमायानुकूल्यं प्राप्य विच्युता इत्यर्थः । मरणावश्यात् देहपात एव तासामिति तु न व्याख्येयं—

> "या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ।
> अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया" ॥ इति

भगवद्वाक्ये कल्याण्य इति पदोपादानात् पतिकृतवारणाल्मभगवद्विरहसन्तापाच्च स्वदेहांस्तदा जिहासूनामपि तासां परममङ्गलरासोत्सवारम्भे मरणरूपामङ्गलस्य मदनभिमतत्वात्ताः कल्याण्य एवाभवन्निति भगवदभिप्रायात् तथा "ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतीः" इति शुकवाक्याच्च ता ऊचुर्याः पूर्वमलब्धरासा अन्तर्गृहनिरुद्धा आसन्निति तेन मरणं विनैव ताः गुणमयान् देहान् जहुरिति विरहतीव्रतापरञ्चितास्तासां गुणमयदेहा गुणमयत्वं परित्यज्य चिन्मयत्वं ध्रुवादीनामिव प्रापुरेव देहत्याग इत्यर्थोऽवगम्यते तथा अत्र अलब्धविनिर्गमा इति तत्र एव व्रज आस्थिता इति तथा अत्र ध्यानप्राप्ताच्युताश्लेषेति तत्र मापुर्मद्वीर्यचिन्तयेति, तुल्यार्थतैव किन्त्वत्र सङ्गता इति तत्रालब्धरासा इत्यर्थभेददर्शनादेवान्तर्गृहनिरुद्धगोपीनां द्वैविध्यं व्याख्यातं यथा सप्ताष्टानां फलानां सम्यक्पाकेऽवगते सत्याम्रवृक्षोऽयं पक्वफलः इति ज्ञात्वा सर्वाण्येव फलानि वृक्षादपचित्य गृहमानीयन्ते आनीय च यानि यानि समुचितकालेन सौरभ्यकिरणादिना च सौरूप्यसौरभ्य सौकुमार्यवन्ति राज्ञो भोगार्हाणि रोचकाणि जातानि तानि फलानि विचक्षणपरिजनेन परिष्कृत्य समये राज्ञो भोगाय परिकल्प्यन्ते यानि त्वन्तःपक्वानि बहिरपक्वानि सौरूप्यादिगुणराहित्यादरसनीयानि राज्ञोऽनर्हाणि ज्ञायन्ते तान्युष्मविशेषयोगेन परितःपक्वीकृत्यैव द्वितीयतृतीयदिनादिषु राज्ञे समर्प्यन्ते तथैव गोकुले जातानां मुनिचरीणां गोपीनां मध्ये याः प्राकृतगुणमयशरीरतां परित्यज्य प्रथममेव शुद्धचिन्मयीभूतशरीरा अजानिषत ताः पुरुषान्तरास्पृष्टाः श्रीयोगमायया नित्यसिद्धादिगोपीभिः सहैवाभिसारिताः यास्तु बहिर्गुणमयशरीरत्वस्ता अपि श्रीकृष्णविरहौष्ण्यप्रापणाया गुणमयशरीरभावत्याजनयैव चिन्मयपुरुषान्तरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः काश्चिदीषन्मात्रस्थितकषायाः प्रेक्ष्य विरहौष्ण्येनैव तन्निवर्तनार्थं रात्र्यन्तरेष्वेवाभिसारिताः ततश्च ताः प्राप्तरासादिविलासाः रात्र्यन्ते नित्यसिद्धादिगोपीभिः सह पतिगृहमागतास्तदारभ्य पतिसङ्गतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपरिप्लुताः शुष्कपयस्तन्यः स्वापत्यान्यपुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बन्धुभिः प्रतीयन्तेस्मेति सर्वमनवद्यं अन्यतु अन्तर्गृहनिरुद्धा अपि तापत्यवत्यः आश्रमग्रन्थेषु अपत्यादिशब्दैः सपत्नीपुत्रः पोष्यपुत्रो भ्रातृपुत्रो वा लक्षणीय इत्याहुः ॥ ११ ॥

विशुद्धरसदीपिका ।

एवं च प्रारब्धकर्मणोरिव मङ्गलाशुभयोर्बहुकालभोग्ययोरपि श्रीभगवद्भक्तिप्रभावेन युगपद्भोगात्तत् क्षणमेव क्षीणयोः तदनन्तरं ब्रह्मप्राप्तिरिव श्रीभगवत्प्राप्तिर्जातेत्याह—तमिति । तमेवेत्येव पदेन ब्रह्मप्राप्तिव्यावृत्तिः तर्हि, कमित्याकाङ्क्षायामाह—परमात्मानमिति । परा च मासौ परमा महालक्ष्मीरित्यर्थः । सा श्रीराधैव तस्या आत्मानं परमप्रेष्ठं यद्वा, परमा आत्मा यस्येति प्रथमे पक्षे राज्ञः पुरुष इतिवत्तस्याः प्राधान्यमपि साधितं ननु, तासामुपपतिभावाक्रान्तमानसत्वेन "ये यथा मां प्रपद्यन्ते" इत्यादिन्यायेन विरोधात्कथं प्राप्तिरित्यत आह—जारबुद्ध्यापीति । अपिरत्र जारबुद्धेर्हेयत्वं "जिघांसयापि हरये" इति जिघांसाया इव व्यनक्ति । तत एव च प्रकटार्थं परमात्मानमिति । नहि परमात्मा तादृशनिन्द्यशब्दवाच्यो भवतीति भावः तत्र जारशब्देन रागोत्कटत्वमेव तथाहि येन रागेण ता जारभावमयनिन्द्यलोकधर्ममर्यादातिक्रममपि कृतवत्यस्तादृशरागोत्सुक्यैव सोपानीकृतया जारबुद्ध्या तमेवापुः उत्कटेन प्रियानुकूल्यभावेन तस्याः कवलितत्वादिति भावः । अत्र शुद्धभाववतीनां सङ्गेनेत्युक्तं यथा श्रुतार्थस्वीकारे हि—

> "आसामहो चरणरेणुजुषामहं स्याम्—
> वृन्दावने किमपि गुल्मलतौषधीनाम्" ॥

परीक्षिदुवाच ।

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ।
गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

विशुद्धरसदीपिका ।

या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा-
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्" ॥

इत्यादौ तत्प्रशंसा न सङ्गच्छेत जारः पापपतिरिति त्रिकाण्ड शेषात् सद्गतीनां तासामङ्घ्रिरेणुसेवनाभिलाषस्य तादृशसदाचारिवर्गपूज्यपादेषु महाभागवतेष्वसम्भवादिति भावः । यद्वा, जारबुद्ध्या गुणमयं देहमपि जहुरित्यन्वयः । अस्मिन्देहे सत्यसौ जारो भवति तदयं देहोऽपि त्याज्य इति जारबुद्धिस्तत्त्यागे कारणमिति भावः । ततश्च सङ्गता अपीत्याह-सङ्गतिश्चेयं निभृतनिकुञ्ज एवेति स्वरसः तत्र कान्तभाववतीनां विशेषं वक्ष्यामः । ननु, कथं विरजोत्तरणमन्तरेण गुणमयदेहद्वयत्यागस्तथा सति "अथासौ पुण्यपापे धुनुते" इति श्रुतिगतानन्तर्य्यार्थार्थशब्दविरोधः स्यादित्यत आह, सद्यः प्रक्षीणबन्धनाः अहिकञ्चुकवत् त्यक्तप्राकृतदेहाः पारिशेष्येण लब्धसच्चिदानन्दशोभारूपशरीरा इत्यर्थः । शारीरकशास्त्रे हि विरजोत्तरणात्प्रागपि पुण्यपापविधूननस्य स्थापितत्वात् "यथा पुष्करपलाशमापो न स्पृशन्ति एवमेवं विदि पापं कर्म नाश्लिष्यति" इत्यादिश्रुतेः अत्र च गुरुपुत्रमिहानीतमितिवद्भगवतैव तासां प्रेमवर्द्धनाय तादृशजनेषु तद्यशः स्थापनाय प्रत्यायितयोः पुण्यपापत्वेनोपचरितयोर्मङ्गलाशुभयोः प्रक्षीणत्वं श्रीभगवद्भक्तिप्रभावादेवेति साधु व्याख्यातम् ॥ ११ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

यत एवमतः सद्यः प्रक्षीणबन्धनाः तत्क्षण एव प्रकर्षेण क्षीणं प्रारब्धकर्मकृतं बन्धनं यासां तास्तथाभूताः सत्यः गुणमयं देहं जहुः त्रिगुणमयं स्थूलसूक्ष्मकारणाख्यशरीरत्रयं जहुः विमुक्ता इत्यर्थः । ननु, प्रत्यगभिन्नब्रह्मसाक्षात्कारभावात्कथं तासां मुक्तिरित्यपेक्षायामाह-जारबुद्ध्येति । यद्यपि तासां भगवति जारबुद्धिरासीत्तथापि वस्तुमाहात्म्याद्भगवत्प्रसादो जातः न हि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथा बुद्ध्यापि पीतममृतं यथा तज्जनितभगवत्प्रसादेन तमेव प्रत्यगभिन्नपरमात्मानं सङ्गताः तत्प्रसादलब्धसाक्षात्कारेण तदभिन्नतां प्राप्ता इत्यर्थः । अपिशब्दस्तद्बुद्धिनिन्दाभिव्यञ्जनद्वारा वस्तुमहिम्ना तद्गतिप्राशस्त्यमभिव्यनक्ति । यद्वा, प्रथमं जारबुद्ध्यापि भगवता सङ्गताः अत्यधिकविरहदशायां ध्यानादिना भगवत्स्वरूपं ज्ञात्वा ततः प्रक्षीणबन्धनाः सत्यो विमुक्ता इत्यर्थः । तथा च सर्वमपि निकृष्टमुत्कृष्टसम्बन्धादुत्कृष्टं भवति यथा भगवत्सम्बन्धाद्गोपाः ब्रह्मादीनामपि दर्शनीयतां प्राप्ताः तत्कृतं चौर्यं कर्म स्मरणादिना ह्यनेकाऽशुभनाशकरं तत्सम्बन्धाद्गोवर्द्धनस्येन्द्रादेरप्युत्कर्षः शान्तिरसादतिनिकृष्टस्य शृङ्गाररसस्य तन्नाम्नैवोपपत्त्यसम्बन्धि सर्वपरमहंसशिरोमणिशुकमुखेन गायमानत्वेनेति भावः । निवृत्तिपक्षे तमेव "रसो वै स रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्यादिश्रुतिप्रतिपादितं परमरसरूपं जारबुद्ध्या तच्छ्रुतिपतौ योपासनाबुद्धिस्तद्विधायकतयापि सङ्गतास्तस्मिन्सङ्गतिमत्यः अत एव सद्यो विचारक्षण एव प्रक्षीणं बन्धनं अध्यमायार्थबन्धनकारणं यासां ता गुणमयं उद्गीथादिगुणस्तुतिमयं देहं तत्परत्वं जहुः अस्मत्पक्षे जारबुद्ध्या ये सङ्गताः गुणमयं देहं यदा जहुस्तदा किमु वक्तव्यं प्रेष्ठबुद्ध्या सङ्गताऽविवेकयन्तःकरणावृत्तय इतियोज्यम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तमेव प्रतिप्रकरणमनुवर्णितनिरतिशयस्वरूपगुणशक्तिं परमात्मानं बाल्यात् जारबुद्ध्याऽप्युपपतिबुद्ध्याऽपि सङ्गताः सत्यः सद्य एव प्रक्षीणानि बन्धनानि संसारबन्धनिमित्तानि शुभाशुभानि कर्माणि यासां ताः गुणमयं देहं जहुस्तत्यजुः त्रिगुणप्रपञ्चातीतमप्राकृतशरीरं श्रीकृष्णं प्राप्ता इत्यर्थः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेपि न तद्भजनान्मोक्षस्तथा बुद्ध्यभावादेवं कृष्णेपि ब्रह्मबुद्ध्यभावेन तत्सङ्गतिः कथं मोक्षहेतुरिति शङ्कते-कृष्णं विदुरिति । परं केवलं कान्तं कमनीयम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

श्रीशुकः परीक्षिदिति अन्येषां परीक्षणार्थमिवोवाच न चाज्ञानेन संशयादिति भावः । परं केवलं कान्तं प्रियं सुन्दरं वा । यद्वा, परं कान्तं श्रेष्ठं रमणं जारमित्यर्थः । अतो गुणेषु स्वसुखादिषु न तु तत्त्वे धीर्बुद्धिर्यासां तासां गुणप्रवाहः संसारस्तस्योपरमः निवृत्तिः कथं स्यात् ? सर्वपुरुषार्थचूडामणिर्मोक्षः कथं घटेत ? "तमेव विदित्वातिमृत्युमेति" इत्यादिश्रुतिप्रामाण्येन तत्त्वज्ञानेनैव संसारनिवृत्तिरिति मोक्षस्य सर्वतः श्रेष्ठतामनेन दौर्लभ्यमभिप्रेत्य किं वा मोक्षस्य साधनं शास्त्रे यदुक्तं तदभावमपेक्ष्यायं प्रश्नः । यद्वा, परं कान्तं कन्दर्पकोटिमनोहरमात्मकोटिप्रेष्ठं वा अत एव गुणेषु तस्य सौन्दर्य्यमाधुर्य्यवैदग्ध्यानुरागादिष्वेव न तु स्वस्वरूपत्वे धीर्यासां तासां तृणीकृतमोक्षैः सद्भक्तैरपि सेव्यपादानां श्रीकृष्णप्रेमलीनस्य अतिफल्गुतमो मोक्षः कथं सम्भवेत् इति मोक्षस्यातितुच्छतामननादयं प्रश्नः । मुने, हे सर्वज्ञ ! इति तद्वृत्तं त्वया ज्ञायत एव भवतस्तत्परिहारस्त्वयैव कर्तुं युज्यत इति भावः । किन्तु "नाथ-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषणी ।

योनिसहस्रेति, त्वयि भक्तस्तु कीटोऽपि, भूयासं जन्मजन्मसु" इत्यादिवचनैर्भक्तानां भक्तावेव तात्पर्येण भक्तिवृद्ध्यर्थं जन्मादि प्रार्थनात् जन्मादिलक्षणसंसारोपरमोऽनुचितः अतो निर्वेदादिनाभावपुष्टिहेतुगुणमयदेहत्यागेन गुणातीतदेहग्रहणमप्ययुक्तमेवेति सद्गुणमयतापक्षे गुणधियां गुणज्ञानामित्यर्थः गुणानां श्रीभगवत्सन्तोषणरूपलावण्यादीनां प्रवाहो यस्मिन् देहे तस्योपरमः कथं स्यात् श्रीभगवत्सेवायां देहस्यायोग्यत्वमननेन असमोर्द्धदुःखभरभीत्या वा तासां तादृशदेहत्यागायोगात् । यद्वा, गुणेषु श्रीकृष्णस्य लावण्यसौरभ्यादिषु रासक्रीडोपमादिव्यक्रीडादिषु वा धीर्यासां तासामपि गुणाः अन्यगोपीवच्छ्रीवृन्दावने व्रजान्तः साक्षान्निवासादिलक्षणाः रासक्रीडादि लक्षणो वा सौभाग्यविशेषः । तस्य प्रवाहः आवृत्त्या नित्यनूतनया वा परम्परा तस्योपरमः कथं स्यात् सर्वसद्गुणमयदेहत्यागेन तदसिद्धेः किञ्च, विचाराद्यपगमात् ताभिस्त्यज्यमानस्यापि तादृशदेहस्य तादृशनिजस्वभावेन कथं पातः स्यादित्यर्थः इति राज्ञः प्रश्नस्यार्थत्रयेण पक्षत्रयम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

परि सर्वतो भावेन ईक्षते सर्वेषां भावं जानातीति परीक्षिदित्यस्यायं भावः । यद्यपि स्वयं तत्तन्माहात्म्यं जानात्येव तथाप्यन्तर्मुखसन्दिहानानां सन्देहनिरासार्थमर्थविशेषेण सन्देहविशेषः प्रपञ्चितः बहिर्मुखसन्दिहानानां च सन्देहान्तरनिरसनार्थं ब्रह्मज्ञानवादस्येव इव सन्देहः प्रपञ्चितः राजोवाचेति क्वचित्पाठः अत्रापि सर्वभाववैचक्षण्य एव राजशब्दस्य तात्पर्यान्तरेवार्थः श्रीमुनीन्द्रेणापि, तथैव प्रतिवक्ष्यत इति तत्र बहिर्मुखरीतिकोऽर्थः प्रसिद्ध एव अन्तर्मुखरीत्या त्वयमर्थः । ननु, गुणमयं देहं जहुरित्युक्तं तत्र गुणशब्देन यदि सत्त्वादित्रयमुच्यते मयट् प्रत्ययेन विकारः ततश्च हेयस्य देहस्य स्वतस्तन्मयत्वप्राप्तेः किन्तन्निर्देशेन तस्मात् पूर्वेण मानससद्गुणमयपरम्परा उत्तरेण तु प्राचुर्यं वाच्यं तदद् पृच्छामः कृष्णं विदुरिति यद्वि च प्राप्तरासानामन्यासां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते त(द्)थापि तादृशस्य देहस्योपलक्षणत्वेन मानसगुणप्रवाहस्यापि तादृशत्वेन लब्धिः स्यात् तत्रापि पृच्छाम इत्याह कृष्णं विदुरिति । अयं चायं तं कृष्णं परं केवलं कान्तं सर्वाश्चर्यगुणमनोहरतया परमप्रेष्ठं विदुः नतु ब्रह्मतया निर्गुणतदाविर्भावविशेषतया तर्हि तासां गुणधियां ब्रह्मनिष्ठाया अपि त्याजकतया प्रसिद्धेषु तदीयतादृशगुणेषु धीरन्तःकरणं यासां तथाभूतानां तदेकनिष्ठत्वेन तद्गुणैकानुबन्धतत्प्रेमवृत्तिगुणत्वादप्राकृतगुणानामित्यर्थः । ततो देहस्य तु तासामसिद्धत्वाद्भवतु नामोपरमः कथमप्राकृतदुरतादृशगुणपरम्पराया उपरमः स्यादित्यर्थः । ब्रह्मोपासकेष्वेव न तत्स्वरूपमात्राविर्भावः किन्तु गुणैरपि सह तदाविर्भावः ततो ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एवेति तेषामेव गुण-

प्रवाहोपरमः सम्भवति नाविर्भूतभगवद्गुणानां तद्विधानामिति वाक्यार्थः श्लेषेण चेदं पृच्छति कृष्णं परं केवलं कान्तं विदुः नतु ब्रह्मतया व्यापकतया तर्हि "ये यथा मां प्रपद्यन्ते" इति न्यायेन तासु व्यापकतागुणस्याप्रकाशादन्तर्गृहे प्राकट्याभावेन कथं विरहाभा(वो)वमयगुणप्रवाहोपरमः गुणधियां सुन्दरोयं विदग्धोयम् इति मात्रबुद्धीनां मुने ! हे सर्वज्ञ ! ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव तन्मुखेन विशदयितुम् पृच्छति राजा—कृष्णमिति । हे मुने ! कृष्णं परं केवलं कान्तमेव विदुर्न तु परब्रह्मत्वेन तासामेवम्भूतानां गुणधियां विषयासक्तधियां गोपीनां कथं गुणप्रवाहस्य सत्त्वादिगुणमयदेहपरम्पराया उपरमो निश्शेषक्षयः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जारबुद्ध्यापि सङ्गता इत्युक्तं तस्य तात्पर्यमजानन्निव राजा पृच्छति—कृष्णमिति । गोप्यः कृष्णं परं कान्तं जारं पतिं विदुः ब्रह्मतया श्रुतिशतगीतपरब्रह्मत्वेन न विदुः अनधिकारित्वात् या एवंविधास्तासां गुणेषु विषयेषु धीर्बुद्धिर्यासां तास्तथा गुणप्रवाहोपरमः संसारप्रवाहनिवृत्तिः कथं सम्भाव्यते निवृत्तिमार्गलभ्याप्रवृत्तिमार्गेण कथं संसारनिवृत्तिः स्यादिति ।"उत्तिष्ठत जाग्रत" इतिश्रुतेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथात्र परीक्षित् सविस्मयं पृच्छति-कृष्णं विदुरित्यादि । हे मुने ! ताः कृष्णं परं कान्तं प्रियतमत्वेन विदुः न तु ब्रह्मतया ईश्वरत्वेन तत्कथं तासां गुणप्रवाहोपरमः ? यतो गुणधियाम् अयं मे कान्त इति गुणे धीर्यासाम् ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अत्र राजा श्रुतिविरोधमाशङ्कते, कृष्णमिति "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" इति श्रुतौ ज्ञानमेव साधनत्वेनोक्तं तत्रैव पुनः "भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् । स एव मुक्तिदाता च भक्तिस्तत्रैव कारणम्" उभयोश्च निर्णयः—

"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ।
द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः" ॥ इति ।

"भक्त्या मामभिजानाति" इत्यपि भगवतोक्तं ततो मर्यादायां ज्ञानेनैव मुक्तिः पुष्टौ भक्त्या ज्ञानेन वा एतासां तु न द्वयम् भक्तिरपि सगुणा ज्ञानमपि स गुणमुभयं च तामसम् अतः कथं मुक्तिरिति तदाह, ताः कृष्णं कान्तं परं विदुः कान्तः पतिर्जारो वा न तु ब्रह्मतया विदुः मुने इति सम्बोधनम् अत्र निर्णयपरिज्ञानार्थं निरोधस्तु स्पष्टः तासां भगवति स्वामित्वबुद्धिरेव गुणबुद्धिश्च गुणप्रवाहस्य मूलम् अन्यथा गुण-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

बुद्धिनिवारकाणि सर्वाण्येव शास्त्राणि व्यर्थानि भवेयुः वैदिकपक्षस्त्वसम्भावित एव अतो गुणधियां गुणबुद्धियुक्तानां गुणप्रवाहोपरमः कथम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्रस्थानां बहिरङ्गाणां केषाञ्चिन्मुखदर्शनेनैव हृदयगतं सन्देहमावेक्ष्य राजा स्वयं शुकवाक्यस्याभिप्रेतमर्थं तत्प्रसादाज्जानन्नपि तेषां सन्देहनिवर्तनार्थमेव सन्दिहान इवाह—कृष्णमिति । हे मुने सर्वज्ञ ! कृष्णं परमात्मानमपि परं परमपुरुषं कान्तं स्वरमणं विदुः वस्तुतयातु न विदुः अतो गुणधियां कृष्णेन सह विहरन्तीति गुणविषयकबुद्धीनां तासां गुणप्रवाहस्योपरमः कथं "तमेव विदित्वा अतिमृत्युमेतीति "आत्मानमात्मात्मतया विचक्षते" इत्यादिश्रुतिस्मृतिवाक्यैः परमात्मज्ञानस्यैव मोक्षप्रापकत्वोक्तेः ॥ १२ ॥

विशुद्धरसदीपिका ।

ननु, गुणमयं देहं जहुरिति वदतस्तत्र भवतः कोऽभिप्रायः किं गुणशब्देन सत्त्वादिगुणविकार इति किम्वा गौणं देहं जहुरिति स्वरूपे मर्यादेति आद्ये हेयस्य देहस्य स्वतस्तन्मय प्राप्तेः किन्तन्निर्देशेन यदि च पूर्वेण गुणशब्देन मानसगाढगुणपरम्परा उत्तरेण तु प्राचुर्ये तत्रेदं पृच्छामः यदि च प्राप्तरासानामन्यासां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते तदापि तादृशदेहस्योपलक्षणत्वेन मानगुणप्रवाहस्यापि तादृशीत्वेन लब्धिः स्यात्तत्रापि पृच्छाम इत्याह—कृष्णं विदुरिति । यदि च मायया कल्पिततादृक्स्त्रीशीलनेनानुसूयुभिरित्युज्ज्वलोक्त्यानुसारेण श्रीसीतासञ्ज्ञादिवद्गुणमयं प्राकृतं छायामयमेव जहुः पतिमन्येष्वर्पयामासुरिति तदा शान्तमेव पापमित्यभिप्रायेण प्रश्नः तत्र परीक्षिदुवाचेति पाठे परि सर्वत ईक्षते इति परीक्षिते विचारनिपुण इत्यर्थः । राजोवाचेति च तत्तद्भावज्ञतयातिविचक्षण इति ततश्च सामाजिकानां समाधानायैव प्रश्न इत्यभिप्रायः । कृष्णमिति हे मुने ! तत्रायमर्थः हे मुने ! मननशील ! कृष्णं नराकृतिमानन्दविग्रहं परं केवलं कान्तं कानां स्वसुखानामन्तः पर्याप्तिर्यस्मिन्निति परमप्रेमास्पदं विदुः न तु प्राकृतगुणत्यागकारणब्रह्मतया निर्गुणतदाविर्भावविशेषतयेत्यर्थः । तथा सति गुणप्रवाहोपरमः कथमासां जातः ? । अथवा गुणधियां ब्रह्मनिष्ठाया अपि त्याजकत्वेन प्रसिद्धेषु तादृशगुणेषु धीरन्तःकरणं यासां तासां ततो देहस्य तासामसिद्धत्वाद्भवतु नामोपरमः कथमविच्छिन्नस्तादृशगुणपरम्परया उपरमः स्यादित्यर्थः । ततश्च ब्रह्मोपासकेष्विव न तत्स्वरूपमात्राविर्भावः ततो ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एव न ह्याविर्भूतभगवद्गुणानां वाङ्क्षानामिति वाक्यार्थः अत्रोपरमशब्देन सङ्कोच उच्यते ततश्च गुणप्रवाहमयदेहावेशसङ्कोचेन सिद्धदेहावेशेन ययुः अत एव योगमाययान्तर्धापितमुक्तं टिप्पण्याम् एवं च गुणमयदेहाभिमानत्यागमात्रमेव विवक्षितं ततश्च तादृशतीव्रतापेन धुतं तत्तापजनितश्रीकृष्णकृपया खण्डितम् अशुभं विरहरूपं यासां ताः तथा तादृशनिवृत्त्याऽच्युतीयं श्लेषणताविरुद्धं पुष्टं मङ्गलं तत्संयोगरूपं यासां ताः गुणमयं विरहभावमयं तदावेशं जहुरित्यर्थः । अतःसद्यः प्रक्षीणबन्धनं तत्सङ्गविरोधो यासामित्यर्थः । अत्र श्रीतृतीयस्कन्धविंशाध्याय उदाहरणं तथा सति लोकापवादादिदोषोपि परास्तः कथमिति प्रश्नकाकुः ततश्च गौणदेहाभिमानत्यागपूर्वकमुख्यपरिकरदेहोपलम्भेन सङ्गता इति सिद्धान्तः वक्ष्यते च स्वयं भगवतोद्धवं प्रति दशमे—

> या मया क्रीडिता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ।
> अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया" इति ॥

अत्र कल्याण्य इति देहत्यागव्यावृत्तिः एषैव मुक्तिरित्यपि ज्ञेयं "विष्णोः परिकरत्वं हि मोक्षमाहुर्मनीषिणः" इति पाद्मात् नच पुरुषाभिमानवतां मुनिवराणां कथं गोपीदेहप्राप्तिः कथं वा तादृशत्वेन परिकरत्वप्राप्तिरिति शङ्कनीयं अन्यथाप्रतीतस्य पुरुषत्वादेः त्यागेन शुद्धप्रेमसुखास्वादनयोग्यसखीदेहोपलब्धेरेव तत्त्वात् "मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः" इति द्वितीयोक्तेः स्वरूपत्वमस्य "द्वा सुपर्णौ सयुजौ सखायौ" इत्यादिश्रुतेः पुरञ्जनोपाख्यानुख्यानुसन्धेयं तथा चादिपुराणे—

> "अहमेव पुरुषः सर्वा प्रकृतयस्तथा ।
> अयं पुमानियं योषिन्मायया कल्पितो भ्रमः" ॥

जीवानां प्रकृतित्वं श्रीभगवद्गीतासु—

> "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
> अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
> अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
> जीवभूतां महाबाहो ययेदं धार्यते जगत्" ॥ इति

परां प्रकृतिमित्युक्त्या नित्यत्वं प्राकृतत्वं चाभिप्रेत्यमित्यर्थ प्रसक्तानुप्रसक्त्या विवृतमिदं भक्तिमञ्जूषायाम् एवं प्रश्नभङ्ग्या सिद्धान्त एवोद्धृतः बहिर्मुखसन्देहनिरासाय ब्रह्मज्ञानवादमये प्रसिद्धार्थ प्रश्नस्तुस्फुट एव ॥ १२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अत्र व्याख्यातपक्षचतुष्टयेपि प्रथमे प्रतिबद्धगुणमयदेहत्यागः द्वितीये गुणमयदेहापवादः तृतीये गुणभूतगौणपतिरूपजारबुद्धित्यागः चतुर्थे गुणमयदेहानां व्रजे स्थापनं तत्र राज्ञोऽतिदक्षतया सर्वसामाजिकाभिमताभिज्ञत्वसम्भवात् केषाञ्चिन्मनःशङ्कामाकलय्य राजा पृच्छति, राजोवाच कृष्णमिति । ता गोप्यः कृष्णं कान्तमेव परं केवलं विदुः न तु ब्रह्मतया अत्र मुने इति सम्बोधनेन शास्त्रश्रवणादवगत्य मननशीलानां निदिध्यासनात्मकमौनव्रतवतां ब्रह्मबोधेन गुणप्रवाहोपरमो भवति नतु ब्रह्मबुद्ध्यभावे "तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" इतिश्रुतेरिति विद्वन् तासां गुणधियां लौकिकगुणेष्वेव रमणत्वकान्तत्वादिषु धीर्यासां तासां गुणप्रवाहोपरमः गुणमयदेहत्यागो गुणमयदेहापवादो वा कथम् ब्रह्म, परं कान्तं जारमेव विदुः तथा च गुणधियां गुणभूतपतिबुद्धीनां गुणप्रवाहोपरमः गुणपतिरूपजारबुद्धिप्रवाहोपरमः

श्रीशुक उवाच ।

उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ।
द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

कथम् यद्वा, कृष्णं नित्यानन्दं परं सर्वोपाधिशून्यमसङ्गं कान्तं कानां सर्वेषां सार्वभौमादिहिरण्यगर्भपर्यन्तशतशतगुणत्वेन परिसङ्ख्यातानां सुखानाम् अन्तःपर्यवसानं यस्मिन् तथाभूतमपि ब्रह्मतया न तु विदुः तथा च ब्रह्मबुद्ध्यभावादेव गुणाधियां प्राकृतगुणात्मकविग्रहमतीनां तथा पूर्वोक्तगुणप्रवाहोपरमः कथम् ? यद्वा, ताः कृष्णं नित्यानन्दं परमसङ्गं कान्तं सुखावधिं ब्रह्मतयैव विदुः लीलाधाम्नि मायाप्रवेशाभावेन कस्याः अप्यज्ञानासम्भवात् किमु वाच्यं तासां नित्यसिद्धानां श्रुतिमुनिरूपाणां वा तथाच ननु गुणधियां तासां पूर्वं "जहुर्गुणमयं देहम्" इत्यत्रोक्तो गुणप्रवाहोपरमः कथम् ? सति गुणप्रवाहे तदुपरमो भाव्यः गुणबुद्ध्यभाववतां लीलाधामगतानां गुणप्रवाहस्यैवासम्भवात् कथं तदुपरम इत्यभिप्रायः ॥ १२ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ननु "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति" "ऋते ज्ञानान्नमोक्षः" इत्यादिश्रुत्या ज्ञानस्यैव मोक्षसाधनत्वाभिधानं तच्च ज्ञानम् "अहं ब्रह्मास्मि" इत्यादिरूपं स्यात् तमात्मानमात्मतया विगुणगैरिकाशिखिपिच्छादेर्ब्रह्मादिभिरूपमानत्वसारस्याद्वैः "परमाश्रये क्षयायित्वं चलते" इत्युक्तत्वात् "तत्त्वमसि, अहंब्रह्मास्मि" इत्यादिश्रुतेश्च तत्साधनं च भक्तियोगः—

> "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
> तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" ॥

"यमेष वृणुते तेन लभ्यः"

> "मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
> कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
> तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
> ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
> भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः"

"पुरेह भूमन् ! बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धये ।
विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ! ते गतिं पराम्" ॥

इत्यादिवाक्यैश्च तथा च कृष्णे ब्रह्मबुद्ध्या भाववतीनां जारबुद्ध्या कथं मोक्षः न हि पतिपुत्रादीनां वस्तुतो ब्रह्मभूतानामपि भजनेन मोक्षो भवतीति शङ्कानिवृत्त्यर्थं राजा पृच्छति—कृष्णमिति । कृष्णं परं केवलं कान्तं कमनीयं पतिं वा जारं वा विदुः । यद्वा, परं परपुरुषं कान्तं स्मरमयं विदुः न तु ब्रह्मरूपं विदुः अतो गुणधियां गुणकार्यविषयाक्रान्तबुद्धीनां गुणप्रवाहस्य संसारस्योपरमो मोक्षः कथं मुनिभावेन तन्निर्णयं कर्तुं समर्थोऽसीति सूचयन्सम्बोधयति—हे मुने ! इति । विषयबुद्ध्यापि मोक्षसिद्धौ श्रवणमननादेर्वैयर्थ्यं स्यादिति वा सम्बोधनाशयः निवृत्तिपक्षे, कृष्णं सदानन्दरूपं परं कान्तं परमरसं ब्रह्मतया गुणबुद्ध्या न विदुः नावेदयन्ति अतो गुणमात्रधियां तासां श्रुतीनाम् उद्गीथादिगुणवर्णने यो प्रवाहस्तस्योपरमः कथं तन्नयोऽपि याः कृष्णं ब्रह्मतया न विदुस्तासां गुणप्रवाहोपरमः कथं न हि ब्रह्माकारतां विना गुणप्रवाहोपरमो भवतीति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीशुकानुग्रहात् ज्ञाततत्त्वोऽपि लौकिकजनभ्रान्तिनिराकरणार्थं श्रीविष्णुरातः पृच्छति—कृष्णमिति । "को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । कामग्रन्थौ चक्रिणि च" इति मेदिनीकारकोशात् कस्य कामग्रन्थेरन्तः परिहारो यस्मात्तं केवलं कान्तं रतिकोविदमेव विदुः नतु ब्रह्मतया मुमुक्षुजिज्ञास्यत्वेनेत्यर्थः । अतः गुणधियां गुणेषु विषयेषु धियो यासां तासां गुणप्रवाहोपरमः कथम् "ब्रह्मविदाप्नोति परं, तमेव विदित्वाऽतिमृत्युमेति" इतिश्रुतिविरोधात् एवंविधा अपि काश्चन तासु बभूवुः तद्विषयकोऽयं राजप्रश्नः वस्तुतस्तु श्रीकृष्णस्वरूपगुणादियथार्थज्ञानयुक्ताः बभूवुः तासां तादृशज्ञानयुक्तताऽग्रिमश्चेऽध्याये वक्ष्यते ॥ १२ ॥

भाषा टीका ।

॥ राजोवाच ॥

राजा परीक्षित् बोले, कि—हे मुने ! वे सब गोपिका तो श्रीकृष्णचन्द्र कूं अपने प्यारे कमनीय पतिमात्र ही मानतीहीं कछु ब्रह्म स्वरूप सों तो मानतीं न रहीं तब फिर गुणमय बुद्धिवारी उन गोपीन को गुणन को प्रवाह रूप जो संसार है ताको उपराम (निवृत्ति) कैसे भयो अर्थात् गुणमय बुद्धिवारी गोपीन को संसार कैसे छूट्यो ? ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परिहरति—उक्तमिति । अयं भावः जीवेष्वाहृते ब्रह्मत्वं कृष्णस्य तु हृषीकेशत्वादनावृतमतो न तत्र बुद्ध्यपेक्षेति ॥ १३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

श्रीशुकः शुक इति किञ्चिदमर्षादिनाऽव्यक्तवाक्यया कथनेन शुकतुल्यत्वात् किन्तु राजानं स्वाभिप्रायविदं जानन्नपि तद्व्याजेन तत्प्रश्नहेतून् हैतुकान् कांश्चिदुद्दिश्य क्रुद्ध्यन्निव प्रत्याह—उक्तमिति । तत्र प्रथमपक्षे भक्तानां संसारोपरमेऽपि राज्ञः शङ्कया श्रीभगवन्माहात्म्ये तावदसम्भावनोत्पत्तेः क्रोधमुद्रा हृषीकेशं सर्वेन्द्रियवृत्तिप्रदत्वेन परमोपकारिणमपि यद्वा, हृषी तृणविशेषस्तद्वत्सूक्ष्मदीर्घविरलाः किंवा हृष्यो रश्मयः तद्वद्दीप्तिमन्तो बहुलाश्च केशा यस्य तं परमसुन्दरमित्यर्थः । तादृशमपि कृष्णं द्विषन्नपि चैद्यः शिशुपालः सिद्धिं मुक्तिं गतः प्राप्तो यथा यत् एतत् पुरस्तात् पूर्वं सप्तमस्कन्धे ते तुभ्यम् उक्तमेव शकटाधःशयने शकटपातसङ्कटाद्विमुक्तयाऽत्यात्पुनर्जात इवेत्यधोक्षजः श्रीव्रजेन्द्रनन्दनः सम्प्रियोपासान्ताः तस्य या प्रियाः सिद्धिं यान्तीति किमुत वक्तव्यमित्यर्थः अन्यत्तैर्व्यञ्जितमेव द्वितीयपक्षे चैद्योऽपि सिद्धिं गुणातीत सच्चिदानन्दविग्रहप्राप्तिलक्षणां नतु विदेहकैवल्यरूपां प्राप्तः कृष्णप्रियास्तु तादृशीं सिद्धिं यान्तीति किमुत वक्तव्यम् अतः प्रेमविशेषोत्सेककृतात् प्रेष्ठविरहजक्षोभातिशयाद्भीताभिस्ताभिर्जन्मादिध्वंसः स्वीकृतः यदुक्तं गुणातीतदेहग्रहणं भक्तानामप्ययुक्तमिति तत्र सदैन्येन भावितं भावविशेषं सर्वोत्तमबुद्ध्या वृद्धद्व्यो भक्तविशेषेभ्यो गुणातीतदेहः प्रेमविवर्त्तविशेषाभावात् प्रायो न रोचते श्रीभगवत्प्रेयसीनान्तु प्रणयेनोन्नतमनसां तत्र नाति हानिरिति तृतीयपक्षे हृषीकेशं द्विषन्नपि चैद्यः सिद्धिं निजाभीष्टस्य पूर्त्तिं पुनर्भगवत्पार्षदलक्षणां प्राप्तः इत्यत्र हृषीकेशनामसामान्यस्य श्रीभगवत्स्वरूपस्य वाचकम्, अधोक्षजनाम तु प्रोक्तनिरुक्त्या विशेषस्य तत्स्वरूपस्य अतस्तस्यावतारेभ्योऽवतारिणश्च कामप्यधिकां माधुरीं प्रकटयतः श्रीव्रजराजकुमारस्य प्रियाः परममधुरप्रेमशालिन्यः सर्वदा यथावदस्यव्रजदेव्य इव व्रजावस्थानेन अभीष्टस्य व्रजे प्रेमविलासादेः सिद्धिं प्राप्स्यन्तीति किमुत वक्तव्यम् एतत्तु हानम् अन्तर्धानतया लक्षयता किंवा भवत्यागमेव देहत्यागतया व्यञ्जयता मया सूचितमपि मयाद्भिर्नावधारितमिति सर्वमनवद्यम् अहो जन्मत्रयाः सुरत्वप्रापकमुनिशापान्ते चैद्यः श्रीकृष्णप्रियत्वेन च व्रजदेव्यः सिद्धिं याता इति किं वक्तव्यम्॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

श्रीशुकः शुक इति परीक्षिद्वचनस्य बहिर्मुखप्रतारणबुभुत्सुसन्देहनिरसनार्थो प्रवृत्तिमवगत्यापि तद्व्याजेन बहिर्मुखान् भर्त्सयन्निव किञ्चित् सामर्षत्वेनाऽव्यक्तवचनत्वात् तथैवाह—उक्तम् पुरस्तादिति । सिद्धिम् अभीष्टां गतिं पुनः पार्षदतां वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्म्यताम् " नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" इति सप्तमात् ततस्तस्य द्वेषेऽपि जाते लीनतया स्थितैरपि पुनः स्वगुणैरेव सह तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाश्रयाणां तासां वर्द्धिष्णुप्रेमतया प्रकटैस्तैरेव सह तत्प्राप्तिरित्यर्थः । मया तु गुणमयं देहमिति स्वरूपशक्तिवृत्तिरूपान्तर्बहिर्देहप्राप्त्या समूलप्रकृतिप्राकृतसद्गुणैः सौन्दर्यादिभिः सम्वलितमपीत्येव विवक्षितं देहस्यैव विशेषणत्वादित्यर्थः । प्रश्नस्य स्फुटत्वे द्वितीयार्थे त्वयमुत्तरस्यार्थः "ये यथा माम्" इत्यत्र तान् प्रत्येवान्यान् गुणांश्च प्रकाशयामि स्वतस्तु मम सर्वेऽपि सन्त्येवेति विवक्षितम् अतस्तादृशभक्तावेशात् तस्यानुसन्धानाभावेऽपि तत्तत्स्फूर्त्तय एव स्वावसरे तान् प्रकाशयन्ति अन्यथा दूरतो भजतां केवलतन्माधुर्यनिष्ठानां तदप्राप्तिरेव स्यात् तत्र कैमुत्येन दृष्टान्तं श्रावयत्याह—द्विषन्नपीति । अन्यथा तत्राप्यन्तेन मोक्षादिदायकमैश्वर्यं प्रकाशेतेति भावः । तत्तत्प्रकाशे नामद्वयेन हेतुमाह—हृषीकेशमिति । अधोक्षजेति च उभयनामनिरुक्त्या तज्ज्ञानानपेक्षतयैव तेषां सिद्धये तद्गुणविशेषः प्रकाशत इति दर्शितम् ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उक्तं पुरस्तादिति शिशुपालदृष्टान्तेन गोपीनामपि गोवर्द्धनोद्धरणादिभिरीश्वरत्वज्ञानमस्तीति परिहार उक्तः । यद्वा, वस्तुस्वभावान्मोक्षसिद्धिः वस्तुस्वभावः प्रतिबन्धकप्रारब्धकर्मक्षयः उद्देश्यान्तरप्रतिपत्तिश्च अत एव दशाननस्य मोक्षाभावः गोपीनां तु प्रतिबन्धकाभावात् वस्तुस्वभावायत्तो मोक्ष उपपन्न इति गुणधियां शब्दादिविषयगुणधियाम् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्य प्रश्नस्योत्तरं सप्तम एवाभिहितम् इत्याह—उक्तमिति । एतदत्र वक्तव्यमुत्तरं तुभ्यं पुरस्तात्सप्तमस्कन्ध एवोक्तम् "गोप्यः कामाद्भयात्कंसः" इत्यादिना कोऽपि भगवत्सम्बन्धभावो मुक्तिहेतुरेवेत्युक्तमेवेत्यर्थः । उक्तेऽप्युत्तरे कैमुत्यन्यायेनोपपत्तिमाह—चैद्य इत्यादिना । चैद्यः शिशुपालो हृषीकेशं द्विषन्नपि यथा सिद्धिं पुनः ख्यातां प्राप्तः यथेति निदर्शनं वा द्विषन्नपि सिद्धिं गतः किमु तस्य प्रिया गोप्यः सिद्धिं ययुरिति ॥१३॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या सन्ततमधुमथनमहिमासंस्मरणासमुदितसंविदानिवृत्तियोग्या मुक्तिर्नतु कामादिना तेन स्वर्गादिप्राप्तिरेव "कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः" इत्यादिस्मृतेरित्यभिप्रायं हृदि कृत्वाऽर्थवादस्यापि स्वार्थसाधनसमर्थकत्वात्तेन चोद्यं परिहरति शुकः—उक्तमिति । द्वे मुक्ती ह्यानन्दानुभवलक्षणा नित्यदुःखानुभवलक्षणेति ते उभे अपि सिद्धिशब्दोक्ते तत्र यथाशास्त्रविहितमङ्गीकर्तव्यमिति तदुक्तम् सदा द्वेषिणामधरं तमः इति मुक्तिशब्दोदितं चैद्यप्रभृतिवित्यादि लोकसङ्ग्रहार्थं किमुताधोक्षजप्रिया इति अन्यथा "कामस्त्वशुभकृद्धापि भक्त्या विष्णोः प्रसादकृत्" इत्यादिनोदाहरिष्यत् जगत्प्रपितामहे विष्णौ जारबुद्धिः कथं घटत इति चेत् ? अत एव जारबुद्ध्यापीत्यत्रापिपदेन जारबुद्धिं गर्हयामास स्त्रीणां जारे हि प्रेष्ठत्वबुद्धिः साऽपि न घटत इति चेत् न सर्वेषां हरौ प्रेष्ठत्वबुद्धेरविगाहतया श्रुतेः "तदेतत्प्रेयः" इति श्रुतेः अयं भावः कुतो ऽवगत इति चेत् जगत्प्रपितामहे जारबुद्धिनं शुकस्याचार्यवचनात् ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

प्रश्नानन्तरं किञ्चिज्जातक्रोध इव सगाम्भीर्य्यं प्रत्युत्तरं दास्यतः श्रीशुकाचार्य्यस्यायमाशयः हे राजन्! साधयिष्यमाणे हि वस्तुनि सन्देहः प्रवर्त्तते न तु सिद्धे गुणमयं देहं त्यक्त्वा निर्गुणं देहमासाद्य तं सङ्गता इति यदुक्तं तत्सिद्धानुवाद एव कृतः न तु मयारोप्य कथितं तदत्र कः सन्देहः? कृष्णे प्रेमैव तथा सम्पादयति न तु ब्रह्मज्ञानं किम्बहुना आसां तु प्रेमैव यथा तस्मिन् द्वेषस्तेषामपि गुणप्रवाहोपरम आसीत् प्रेम्णः पुनरयं महिमा यदसौ स्वानुकूलं निर्गुणं शरीरमापादयति एतत्तु सर्वं श्रीकृष्णाभिकरणतामूलमेवेति क्रोधावेशं प्रकटयन्नाह—उक्तमित्यादिबहुभिः। पुरस्तादेवोक्तमस्ति तथापि भ्रान्तोसीत्यर्थः । किं तदित्याह, द्विषन्नपि चैद्यः सिद्धिं प्राक्सिद्धपार्षदभावं न तु कैवल्यं यथावत् गतः किमुत अधोक्षजप्रियाः कान्तत्वेन भजन्त्यो हि तस्य प्रिया भविष्यन्तीति यत् तत्किमुत अतः कान्तत्वेन ज्ञानमेव गुणप्रवाहोपरमस्तासां न पुनर्ब्रह्मत्वेन ज्ञानम् ॥ १३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तत्रोत्तरमाह—उक्तमिति, चतुर्भिः । एतत्सप्तमस्कन्ध एवोक्तं शिशुपालमुक्तौ यथा शास्त्रद्वयं भक्तिज्ञानप्रतिपादकं साधनं तथा भगवत्स्वरूपमपि भगवान् हि मुक्तिदानार्थमेवावतीर्णः सच्चिदानन्दरूपेण प्रकटः अतो यः कश्चन येन केनाप्युपायेन भगवति सम्बन्धं प्राप्नोति स एवमुच्यते ज्ञानभक्त्योस्तु आविर्भावार्थमुपयोगः आविर्भावश्चेदन्यथा सिद्धः तदा न ज्ञानभक्त्योः उपयोगः अत्र तु भगवान् स्वत एवाविर्भूतः मुक्तिदानार्थं सर्वसाधारण्येन ईश्वरेच्छाया अनियम्यत्वात् अत आविर्भावः स्वेच्छया भक्त्या ज्ञानेन वा भगवदवतारातिरिक्तकाले द्वयमेव हेतुः । अवतारदशायां तु न तयोः प्रयोजकत्वं वर्षाकाले जलं सर्वत्र सुलभमिति न कूपनदीनामनुपयोगः शकुनीयः तदाह, पुरस्तात्सप्तमस्कन्धे यथा चैद्यः शिशुपालः सिद्धिं भगवत्सायुज्यं गतः द्विषन्नपि द्वेषं कुर्वन्नपि यद्यपि द्वेषकृतो दोषः प्रतिबन्धको भवति तथापि स्मरणेन तदघं हित्वा तत्र सायुज्यं प्राप्तः । किञ्च, नापि तस्य दोषोऽस्ति कश्चन द्वेषादयोऽपि भगवतैवोत्पादिताः तदाह—हृषीकेशमिति । इन्द्रियप्रेरकोऽयं यथासुखं भावानुत्पादयति यत्र द्वेषस्यापि मोक्षसाधकत्वं तत्र अधोक्षजप्रियाः किमुत वक्तव्याः मुक्तिं गच्छन्तीति ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रीमन्मुनीन्द्रोपि नायं वस्तुतो राज्ञः प्रश्न इति मनसा जानन्नेव त्वमेवं पृच्छन्मेधाशून्य एवासीति तद्व्याजेनानभिज्ञानेव तान् भत्सयन्नाह—उक्तमिति । पुरस्तात्सप्तमस्कन्धे एव द्विषन्नपीति द्वेषलक्षणप्रातिकूलभावेनापि यदि सायुज्यं लभ्यते तर्हि कामलक्षणानुकूलभावस्य का वार्तेति भावः । हृषीकेशमिति निरुपाधि कृपया स्वयमवतीर्य्यं ब्रह्मादीनामपि हृषीकैरग्राह्योपि मर्त्यलोके परमनीचानामपि हृषीकेषु दृष्टेः स्वाचिन्त्यशक्त्या विषयीभूतो भवति तानुद्धर्तुमितीदमप्येकं तस्य कृपैश्वर्यमिति भावः । इमास्तु अधोक्षजस्य अतीन्द्रियस्य तस्य प्रियाः प्रीतिविषयाश्रयभूता एव अत्र चैद्यः सिद्धिं यथागत इति प्रत्यासन्नमघासुरं हित्वा विप्रकृष्टश्चैद्यो यत् दृष्टान्तितस्तेन राजानं प्रत्येतत्सरहस्यमाह, चैद्यस्यापि द्वेषाभिनिवेशोद्रेकात् मुनिशापनिबन्धनभयदेहस्यैवोपरमः अन्तश्चिन्मयपार्षददेहस्तु तस्यानश्वरो नित्यो वर्तते एव यदुक्तम् "विष्णुचक्रहतांहसौ" इति विष्णुचक्रेण हतमंह एव ययोर्नतु ताविति सिद्धिं गतः अभिष्टां गतिं पार्षदतां प्राप्त इत्यर्थः । यदुक्तम्—

> "वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
> नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" ॥

इति ॥ १३ ॥

विशुद्धरसदीपिका ।

अथ तादृशेनैवोभयार्थस्पृशा वाक्येनोत्तरं तत्र प्रसिद्धार्थस्तु श्रीस्वामिपादैः प्रतिपादितः द्वितीयो विचारणीयः तथाहि नहि वस्तुशक्तिर्बुद्धिमपेक्षते विषबुद्ध्या पीतामृतवत् इति जारबुद्धेस्तादृशत्वमध्यवस्यन्समादधाति—श्रीशुक उवाच । उक्तमिति । तत्प्रश्नाभिप्रायं ज्ञात्वा सामर्थ्योक्तिर्बहिर्मुखप्रतरणाय ततं एव च पुरस्तादित्यव्यक्तवचनेनोत्तरमपि चैद्य इति नामानुक्तिः प्रतिकूलभावत्वात् सिद्धिं पुनः पार्षदरूपामभीष्टां गतिं विष्णुपार्षदाविति श्रीसप्तमोक्तेः अयम्भावः साधयिष्यमाणे हि वस्तुनि सन्देहः प्रवर्त्तते न तु सिद्धे ततो गुणमयं देहं त्यक्त्वा निर्गुणं देहं सङ्गता इति तत्सिद्धानुवादः श्रीकृष्णप्रेमैव सर्वसम्पादक इति वक्तव्यं येषां तस्मिन् द्वेषस्तेषामपि सिद्धिरभूदिति सा च सिद्धिः प्राप्तसायुज्ययोरपि पुनर्वैकुण्ठासुतपार्षदता प्राप्तिरेव प्रकृते तु तयोर्वैरभावोपनतकैवल्यप्रतिबन्धेन प्रार्षदताप्राप्तिवज्जारबुद्ध्युपनतप्रेयसीत्वप्रतिबन्धेन शुद्धसहचरीत्वोपलब्धिरिति ज्ञेया अपि च उभयनामानिरुक्त्या तज्ज्ञानानपेक्षतयैव तेषां सिद्धये तद्गुणविशेषः प्रकाश इति दर्शितं तत्र हृषीकेशमिति सर्वान्तर्य्यामित्वेन वस्तुशक्त्यैव सिद्धिर्नतु भावापेक्षेति भावः । अधोक्षजः प्रियो यासामिति तत्कर्तृकप्रियताविषय इति कैमुत्यसिद्धिः ततश्च द्वेषेऽपि जाते लीनतया स्थितेरपि पुनः स्वगुणैरेव तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाणां वर्द्धिष्णुतया प्रकटितैस्तैरेव सह तत्प्राप्तिरित्यर्थः । अतो न बुद्ध्यपेक्षेति भावः । अधोक्षजपदेन च अधः अक्षजा प्रकटलीला यस्यासाविति व्युत्पत्त्या नित्यकिशोरतया स्थितिः सूचिता—

> "वृहच्छरीरोप्यविमानरूपो युवा कुमारत्वमिवाय कृष्णः ।
> रेमे श्रियासौ जगतां जनन्या स्वज्योत्स्नया चन्द्र इवामृतांशुः" ॥

इति पाद्मोत्तरखण्डोक्तेः तादृशतया नित्यस्थितमुख्यप्रकाशप्रीत्याश्रया इत्यर्थः । अत्रैवं विवेचनीयं पाद्मोत्तरखण्डोक्तमुनिचर्यं एता द्विविधाः काश्चिरपक्वप्राकृतदेहाः परिविष्टसच्चिदानन्दरूपाः सिद्धिमेव ययुः काश्चित्तु लीलासङ्गाविलम्पतिसम्बन्धेयः छायाकल्पितदेहं दत्वा अप्राकृतरूपेण रासलीला-

विशुद्धरसदीपिका ।

सुखमनुभूय भूयो व्रजमागत्य पुनरपि व्रजगतदेहेनैकीभूतदेहाः स्नेहमेव पुपुष्णन्ति स्मेति या एता उद्दिश्य स्वयं भगवतोक्तं "तास्ता निशाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण । क्षणार्धवत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः" इत्यादिना एता एवात्र शिष्टकषायाभासा विरहवल्लीयोग्या इति ज्ञेयम् । एताश्च पतिम्मन्यानां सेवां प्राकृतदेहेन श्रीकृष्णदेहे सेवां त्वप्राकृतसिद्धवपुषेति व्यवस्थितौ गोचारणगमनागमादावुभाभ्यां मिलिताभ्यामेव यथा गच्छन्ति तथैवाधुनापि वेणुनादमोहितत्वेन तदनुसन्धानशून्याश्चलिता एतैर्निरुद्धाः पश्चाज्जातानुसन्धाना गुणमयदेहावेशं त्यक्त्वा ययुरिति तत्तदनुसन्धानं च योगमाययेति सर्वं समञ्जसमिति॥ १३॥

श्रीरामनारायणकृतभावभावविभाविका ।

श्रीभगवान् शुकस्तदुत्तरमाह—श्रीशुक उवाच उक्तमित्यादिभिर्मनुभिः । तत्रायमभिप्रायः न हि वस्तुमाहात्म्यं बुद्धिमपेक्षते विषबुद्ध्या पीतामृतस्याप्यमृतत्वप्राप्तिवत्कान्तबुद्ध्या सक्तानां बुद्धिमनपेक्ष्य वस्तुमहात्म्यादेव गुणप्रवाहोपरम इति प्रश्नगतपक्षत्रयोत्तरमभिप्रेत्य कैमुत्यन्यायेन तद्दर्शयति—पुरस्तात्सप्तमस्कन्धे चैद्यो यथा हृषीकेशं द्विषन्नपि सिद्धिं गतस्तथैतदुक्तम् इत्यन्वयः । अत्र हृषीकेशमित्यनेनैतदुक्तं भवति भगवतो हृषीकेशत्वाद्धि तत्प्रेरणां विना केनचिदपि तस्मिन् द्वेषः कर्तुं शक्यते न वा परमानन्दात्मकतया निरुपाधिनिरतिशयप्रेमास्पदे साक्षादपरोक्षे तत्र द्वेषः सम्भवति न वा शापोद्भूतासुरस्वभावजमोहेन द्वेषसम्भावना न हि भगवत्पार्षदानां ब्राह्मणेष्वन्यथाबुद्धिः सम्भवति न वा सनकादीनां कोपः शापो वा न वा "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इत्यादिवचनैर्वैकुण्ठगतानां पातित्यं न वा शापावसरे एव भगवत्स्मृतिभ्रंशाभावं प्रार्थयतां मोहसम्भवस्तस्मात्सर्वजनोद्धारार्थमाविर्भावयितव्यलीलोपयोगितया हृषीकेशप्रेरितानामेव तत्तद्दूषणनिन्दादिचेष्टोपपत्तिस्तथा च द्वेषानुकारे प्रेरितानामपि यदा वस्तुमाहात्म्यादेव गुणप्रवाहोपरमेण स्वप्राप्तिर्दर्शिता तदा किमु वाच्यं प्रेमिणां तत्प्राप्तावित्याह, किमुताधोक्षजप्रिया इति । अधोक्षजम् ऐन्द्रियकं ज्ञानं यस्मात् अधस्तु अधमेषु अक्षजा कृपादृष्टिर्यस्येति वा अधः सुखचरणशरणापन्नेषु अक्षजा कृपार्द्रा दृष्टिर्यस्येति वा अधः अक्षजः सुखः प्रकाशो यस्मादिति वा अधः अक्षमिन्द्रियं मनस्तस्मान्जातश्चन्द्रो आह्लादे वा यस्मादधः अक्षजो मुखजो वह्निस्तेजसि वा यस्मात् अधः अक्षजाः सूर्यचन्द्राग्नयोऽध्येयास्तेन वा यस्य अधः अक्षजो मनोजो मनोहरत्वादौ यस्मात् स अधोक्षजः प्रियो यासां तथा च प्रेमभावनया तत्र निविष्टा इति किमु वाच्यं तस्मादधोक्षजस्तत्प्रिया इति वा तथा च तेनैव स्वप्रिया गुणप्रवाहोपरमेण स्वस्मिन्सङ्गमिता इति वस्तुमाहात्म्यादेव सर्वसम्भावात्र शङ्कास्पदम् ॥ १३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो एवंविधरसवत्यां कथायां प्रतिबन्धकमात्रमुत्कोपर-प्रश्नं करोत्यभिप्रेत्य सामर्षमाह—श्रीशुक उवाचेति । पुरस्तात् सप्तमस्कन्धे उक्तमर्थं पृष्टत्वात्करुणया पुनः स्मारयति, चैद्यः शिशुपालः हृषीकेशं भगवन्तं द्विषन्नपि सिद्धिं गतः हृषीकाणामीशं नियन्तारमित्यनेन यथाधिकारं द्वेषादिकं भगवत्प्रेरणयैव भवतीति सूचितम् । यद्वा, नावृतैश्वर्यं द्विषमित्यनेन आवृतब्रह्मभावानां जीवानां परस्परं द्वेषादिना सिद्ध्यभावेऽपि कृष्णेनावृतब्रह्मभावे यथा कथञ्चिन्मनः प्रवेशे सिद्धिर्भवतीति ध्वनितं यथैवं तथा पुरस्तान्मयोक्तं तथा च कृष्णे विरोधबुद्ध्यापि यदि सिद्धिर्भवति तर्हि, परमानुकूलवृत्त्यासक्तचेतसां गोपीनां सिद्धिप्राप्तौ किं चित्रमित्याह, किमुतेति । अधोक्षजः प्रियो यासां ताः अधोक्षजस्य प्रिया इति वा अधः अक्षजन्यं ज्ञानं यस्मादित्यर्थकेनाधोक्षजपदेन " शब्दमस्पर्शरूपमव्ययम् " इत्यादिश्रुत्या सर्वगुणातीतम् आवरणविनिर्मुक्तं परमात्मानं जारबुद्ध्याऽपि सेवन्तीनां या बुद्धयस्ता वस्तुमाहात्म्याद्ब्रह्म बुद्धिपरा एव गुणबुद्धय इति ध्वनितं सप्तमस्कन्धे चेत्थमभिहितम्—

" तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात्कामेन वै युञ्ज्यात्कथञ्चिन्नेक्षते पृथक् ॥
कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृप ! ।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो " ॥ इति

यद्वा पूर्व—

"ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत् ।
योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥

इति पृष्टवतस्तवैतदुत्तरं कथनेन मयोक्तम्

''सर्वेषामपि भूतानां नृप ! स्वात्मैव वल्लभः ।
इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥

इत्यादिना किञ्च सप्तमेऽप्यभिहितमित्याह, यथा वा चैद्य इति । निवृत्तिपक्षेऽपि समानमिदं पञ्चश्लोकात्मकं प्रकरणम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तमस्कन्धोक्तया रीत्या समाधीयते—उक्तमिति । पुरस्तात् सप्तमस्कन्धे एतदत्र वक्तव्यमुत्तरं पुरस्तात् सप्तमस्कन्धे ते तुभ्यमुक्तमेव हृषीकेशं सर्वेन्द्रियेशं सर्वात्मानं द्विषन्नपि सिद्धिं भगवत्प्राप्तिलक्षणां यथाप्राप्तिकूल्येन कृष्णप्रावण्येन चैद्यो गतः किमुताधोक्षजप्रियाः आनुकूल्येन कृष्णप्रावण्येन सिद्धिं प्राप्ता इति वक्तव्यम् ॥ १३ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन ! ये बात तौ हमने तोतें पहिलेही (सप्तमस्कन्ध के प्रारम्भ में) कह दीनी, कि—जैसे शिशुपाल श्रीकृष्णचन्द्र तें द्वेष (वैर) करवो २

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ! ।
(१)अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

भाषा टीका ।

सो सिद्धि कूं प्राप्त होयगयो अर्थात् मुक्ति पाय गयो, तो फिर श्रीकृष्णचन्द्र की परमप्रियान कूं मुक्ति प्राप्त होय यामें कहा सन्देह है ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, देही कथमनावृतः स्यादत आह—नृणामिति । गुणात्मनो गुणनियन्तुः भगवतः एवं रूपा अभिव्यक्तिरतो न देहित्वादृश्यमत्र वक्तुं युज्यत इति भावः ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

यथा कथञ्चित्सम्बन्धेनापि निजाभीष्टसंसाधकं भावविशेषं श्रीभगवन्तमेव वा श्रीभगवत्प्रभावेन सर्वे प्राप्नुवन्तीत्याह, नृणामिति द्वाभ्याम् । निःश्रेयसं भक्तिः तदेवार्थः फलं किम्वा तस्यार्थः प्रेमा तस्मै तत्प्रदानार्थमित्यर्थः । यद्वा, निःश्रेयसं मुक्तिः तस्यार्थो भक्तिः व्यक्तिः प्राकट्यम् इति साक्षाद्भगवत्त्वमेवाभिप्रेतम् अत एव भगवतः अवतारिणः परमेश्वरस्य । यद्वा, नृणां निःश्रेयसार्थायैवेत्यत्र हेतुः भगवत इति । अन्यथा भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूभारकंसादिवधार्थे व्यक्तेरनुपपत्तिरित्यर्थः । हे नृपेति यथा नृणां क्षेमार्थमेव इतस्ततो भवादृशस्य राज्ञो गमनमिति भावः । भगवत्त्वमेवाह—अव्ययस्येत्यादिभिश्चतुर्भिर्विशेषणैः । आत्मप्रदानादिनापि न व्येतीत्यव्ययः तस्य कुतः अपरिमेयस्य अपरिच्छिन्नस्येत्यर्थः । तत्कुतः ? निर्गुणस्य मायागुणातीतस्य तच्च कुतः ? मायागुणानामात्मनः प्रवर्तकस्य । यद्वा, नृणां निःश्रेयसार्थायैव व्यक्तिर्जन्म अन्यथा तु कथञ्चिन्न सम्भवेदित्याह—अव्ययस्य जन्मादिविकाररहितस्य किञ्च, अप्रमेयस्य तादृशस्यापि व्यक्तौ हेतुः गुणात्मन इति । निजकारुण्याद्यशेषगुणानां चेतयितुः प्रकटनपरस्येत्यर्थः । अन्यत्समानम् । अथवा ननु, तर्हि कथं परदाराकर्षणं तत्राह, अव्ययस्य परदाराविनोदेनापि न किञ्चित्तस्य व्येतीत्यर्थः । ननु, तथापि तस्य तेन किं नाम प्रयोजनं तत्राह—अप्रमेयस्य दुर्वितर्क्यैश्वर्यस्य तस्य लीला केन वितर्कयितुं शक्यतेत्यर्थः । कुतः ? निर्गुणस्य गुणात्मनः निर्गुणोऽपि सन् यः गुणानामात्मा आश्रयस्तस्य निर्गुणत्वात्तद्दोषाक्षेपः गुणात्मत्वाच्च श्रीगोपीभिः सह रतिरिति सिद्धान्तः । यद्वा, ननु तथाप्यस्मत्प्रीत्यर्थं स्वयं किमर्थं व्यक्ततामिति चेत्तत्राह, निर्गुणस्यापि जनस्य गुणानामात्मनः प्रवर्तकस्य रासक्रीडया जगतामेव परमप्रेमसिद्ध्या सर्वसद्गुणसम्पत्तेः एतदभिव्यक्तिरग्रे रासक्रीडोपसंहारे भविष्यत्येव ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं तद्ध्यानप्रभाव उक्तः तत्र भगवद्व्यक्तिसमये तु भगवत्पार्षदस्यागन्तुकदैत्यप्रभावस्य चैद्यस्य तथा तादृशश्रीभगवत्प्रेमवतीनां तासां तत्तत्सम्पादनाय भगवतः साक्षाद्रमणमपि कैमुत्येन कारणमित्याह—नृणामिति । नृणां जीवमात्राणां निःश्रेयसार्थाय सर्वसाधनफलाय तत्तद्योग्यतासम्पत्पूर्वकस्वलीलानन्दप्राप्तिरूपाय तं साधयितुमेवेत्यर्थः । व्यक्तिः प्राकट्यं तदर्थ(त्वा)वधारणार्थमाह—भगवत इति । अन्यथा भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूभारहरणमात्रार्थे व्यक्तेरनुपपत्तिरित्यर्थः । हे नृपेति यथा नृणां क्षेमार्थमेव इतस्ततो भवादृशस्य राज्ञो गमनमिति भावः । भगवत्त्वमेवाह—अव्ययस्येत्यादिभिश्चतुर्भिर्विशेषणैः । नित्यं नानाभक्तेभ्यो नानाभक्तेभ्य आत्मदानादिनापि न व्येतीत्यव्ययः तस्य कुतः ? अप्रमेयस्य अपरिच्छिन्नस्येत्यर्थः । तत्कुतः ? निर्गुणस्य मायागुणातीतस्य तच्च कुतः मायागुणानामात्मनः प्रवर्तकस्य । यद्वा, नृणां निःश्रेयसार्थायैव व्यक्तिमात्रं जन्म अन्यथा तु कथञ्चित् न सम्भवेदित्याह, अव्ययस्य जन्मादिविकाररहितस्य । किञ्च, अप्रमेयस्य तदर्थत्वे हेतुः गुणात्मन इति निजकारुण्याद्यशेषगुणानां सुप्तानामिव चेतयितुः प्रकटनपरस्येत्यर्थः । अन्यत्समानम् । श्लोकद्वयेऽस्मिन्नयं भावः इत्यादौ टीकायां बहिर्मुखसन्देहनिरासार्थः तेषामयमभिप्रायः । ननु, ब्रह्मणि कामादिकमपि चेत्पर्यवसानं तर्हि जीवेष्वपि चित्सामान्यैनैक्यात् ब्रह्मत्वमस्तीति परत्वादिष्वपि तादृशं स्यात् तत्राह—जीवेष्विति । आवृतत्वे हेतुर्धर्म्यमायावैपरीत्यरीत्या हृषीकाधीनज्ञानत्वमेवेति ज्ञेयम् । तत्र स्वाविद्यावृतत्वं बहिर्विक्षेपात्परेषूपाधिमात्रग्रहणात् हृषीकेशत्वादिति पूर्ववच्च हृषीकवशस्तदुदयः अतः स्वप्रकाशतामय एव तत्स्वानावृतमेव ब्रह्मत्वमिति स्थिते कामादिना केनापि तत्र प्रवृत्तिर्भवतु वस्त्वनुभवस्तु भवत्येवेत्यर्थः । ननु, देहीति परत्वादिवद्देहित्वेन प्रतीयमान इत्यर्थः । सिद्धान्तमाह, भगवत एवेति । तद्विशेषेण वैलक्षण्यादित्यर्थः । एवंरूपा सनातनब्रह्मरूपा न देहिसादृश्यं कुतो देहित्वमित्यर्थः । तद्विग्रहस्यैव स्वरूपशक्तिसिद्धचिदैकपरमतत्त्वैकरूपत्वात् तच्च विद्वदनुभवसंवलिततत्तच्छास्त्रप्रामाण्यात् यथा च व्याख्यातम् । "नातः परं परम ! यद्भवतः स्वरूपम्" इत्यादिष्विति ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

व्यक्तिरवतारः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च, केनापि स्वाजन्मविषयकनिरस्तसमाधेन साधित-

(१) अव्यक्त इति विज० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मानसाननुग्रहीतुमवतीर्णो कामाद्यन्यतमं भावं ये कुर्वन्ति न तेषां मुक्तौ विस्मयः कार्य इत्याह—नृणामिति—अव्ययस्य जीवगतकर्मार्थत्वोत्पत्त्यादिविकाररहितस्य अप्रमेयस्यापरिच्छिन्नस्य वाङ्मनसागोचरस्य वा सत्त्वादिप्राकृतगुणरहितस्यानन्तकल्याणगुणाश्रयस्य भगवतो भुवि लोके व्यक्तिर्नृणां निःश्रेयसार्थायैव अव्ययस्येत्यादिविशेषणैरेवंभूतस्याप्युत्पत्त्यादि विकाराभयत्वादिसद्भावं केवलं लोकानुग्रहार्थम् एवेत्युक्तं तद्व्यक्तेः जीवव्यक्तिवैलक्षण्यञ्च ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नन्वाचार्यस्यापि यथास्थितग्रन्थाभिप्रायकथनं विना वक्रगत्या व्याख्याने कोऽभिप्राय इत्याशङ्क्योत्तरग्रन्थानुकूल्यादिस्वाशयेनाह—नृणामिति। व्यक्तिरवतारः अन्यथाऽवतारो न घटत इत्यत्र हेतुमाह—अव्ययस्येति। ज्ञानादिगुणात्मनः। भगवतो व्यक्तिर्न केवलमसुरनिर्हरणार्थाय किन्तु मोक्षलक्षणपुरुषार्थाय पुरुषार्थस्तु भगवत्प्रसादेन स्यात्स च भक्त्या। सा हरेर्यथास्वरूपविज्ञानेन। विज्ञानञ्च गुणोत्कर्षज्ञानपूर्वकं। नत्वन्यथा। "गुणोत्कर्षज्ञातरि यादृशीस्यात्" इतिश्रुतेः तस्माद्द्वेषादिना नित्यसुखानन्दानुभवलक्षणमोक्षो वर्षानन्त्येनापि न स्यात् ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

एवमेव कृष्णस्य महिमा यदयं नृणां निःश्रेयसार्थं प्रादुर्भूतस्तेन तादृशीं लीलां करोतीत्याह—नृणामित्यादि। निर्गुणस्य प्राकृतगुणरहितस्य गुणात्मनो भक्तिवात्सल्यादिगुणप्रयत्नस्य आत्मशब्दोऽत्र मलवाची ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

अत्र मुख्यामुपपत्तिमाह—नृणां निःश्रेयसार्थायेति। प्राणिमात्रस्य मोक्षदानार्थमेव भगवानभिव्यक्तः अत इयमभिव्यक्तिः निःश्रेयसार्थैव अन्यथा न भवेत् असाधारणप्रयोजनाभावात् भूभारहरणादिकं च अन्यथापि भवति अतो निःश्रेयसार्थमेव भगवतोऽभिव्यक्तिः प्राकट्यं नृपेति सम्बोधनं कदाचिद्राजा कथञ्चिद्गच्छति तद्वदिति ज्ञापयितुं प्रकारान्तरेण तादृशस्य नाभिव्यक्तिः सम्भवतीति वक्तुं भगवन्तं विशिनष्टि—आदौ भगवान् सर्वैश्वर्यसम्पन्नः अपराधीनः कालकर्मस्वभावानां नियामकः सर्वनिरपेक्षः किमर्थमागच्छेत्। किञ्च, स्वार्थं गमनाभावेऽपि परार्थं वा स्यात् तदपि नास्तीत्याह—अव्ययस्येत्यादिचतुर्भिः पदैः। अन्येषां कृतिसाध्यं ज्ञानसाध्यं वा यद्भवति तदुपयुज्यते भगवांस्तु अव्ययत्वात् अविकृतत्वात् न कृतिसाध्यः अप्रमेयत्वात् ज्ञानसाध्योऽपि न देहादिभजनद्वारा भजनीयो भविष्यतीत्यपि न यतो निर्गुणः निर्गता गुणा यस्मात् गुणेषु विद्यमानेष्वेवान्यस्य प्रतिपत्तिः तत्र भवति यथा क्षुधि सत्यामन्नदानं कामे सति स्त्र्युपयोगः इन्द्रियेषु सत्सु तद्विषयाणाम् अतो भगवतः सेवकपूरणीयांशाः कोऽपि नास्तीति भजनीयोऽपि न भवति किञ्च लीलार्थं यद्यपेक्षितापि न तथापि सर्वं तस्यैव यतः सर्वगुणानां स एवात्मा अतः साधनप्रकारेण नान्यस्याप्युपयोगः अतः स्वपरप्रयोजनाभावात् यदि साधनानिरपेक्षां मुक्तिं न प्रयच्छेत् तदा व्यक्तिः प्रयोजनरहितैव स्यात् ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यतःश्रेयः साधनहीनानपि मयि यत् किञ्चित्सम्बन्धमात्रवतो जनानहमुद्धरामीति मनसि कृत्वैव भगवताऽवतीर्णमित्याह—नृणामितिद्वाभ्याम्। निःश्रेयसं केषुचित् सायुज्यं केषुचित्सालोक्यादिकं केषुचित् प्रेमाचार्यस्तस्मै भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूभारभूतकंसादिवधार्थमेव व्यक्तिरन्यथा नोपपद्यते इति भावः। अव्ययस्य प्रतिभक्तजनं स्वात्मदानेनापि न व्येतीत्यव्ययस्तस्य केन प्रकारेणेति चेदत आह अप्रमेयस्य प्रमातुमशक्यस्य कस्तत्र तत्त्वं जानातीति भावः। यतो निर्गुणस्य प्राकृतगुणरहितस्य अथ च गुणात्मनः स्वरूपभूतकल्याणगुणमयस्य न हि अप्राकृतचिदानन्दमयगुणसागरः प्रमातुमशक्यो भवेदिति भावः ॥ १४ ॥

विशुद्धरसदीपिका।

ननु, कथमधोक्षजः प्रत्यक्षलीलो जात इत्यत आह, नृणामिति। कामादिविक्षिप्तचेतस्त्वेन भावान्तराभिनिविष्टचेतसां साधकजनानां निःश्रेयसार्थाय शुद्धपरिकरकलेवरप्राप्तिपूर्वकसर्वफलरूपनिजलीलानन्दप्रदानाय व्यक्तिः प्रकटलीला भगवतः भगेन निजश्रिया श्रीराधया नित्ययुक्तयेत्यर्थः। अभेदव्यवहारो यत्र तत्रापि समानाभिधानमिति ज्ञेयम्। नन्वेवं "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति श्रीकपिलदेवाभिहितानां विविधभाववतां कथं सिद्धिरित्यपेक्षायामाह—अव्ययस्येति। नित्यं नानाप्रकाशैर्नानाभक्तेभ्य आत्मदानादिना न व्येतीत्यव्ययस्तस्य तदुक्तं श्रीतृतीये "सन्तं वयसि कैशोरे भक्तानुग्रहकातरम्" इति सन्तामिति स्वरूपेण तु नित्यकिशोरं भक्तानुग्रहकातरत्वेन तत्तल्लीलम् इत्यर्थः। तदुक्तं प्रबोधानन्दसरस्वतीपादैः—

> "अयं बृहदधीश्वरो न गणितावतारोऽप्ययं-
> स्थितो यदुपुरीमसौ मधुपुरीं च दिव्याकृतिः।
> व्रजे च मधुरः परो वनचरे च गोभिः समम्—
> सखीभिरहरन्मनो मम तु राधिकाकुञ्जगः"।

तत्तल्लक्षयत्वं चोक्तं तैरेव यथा "एकं सख्यापि नो लाचितमुरारि लसन्नित्यतादात्म्यकान्तं तादृश्यो दूरतोऽस्यद्व्रजति नवगृहेऽप्यत्तु तन्मर्मशर्म। अन्यत् वृन्दावनान्तर्विहरदथपरं गोकुले प्राप्तयोग्यं विच्छेदान्यत्तदेवं लसति बहुविधं राधिका कृष्णरूपम्" इति एतत्पारतम्येनोपासकतारतम्यमपि तत्रैव—

> "धन्यो लोके मुमुक्षुर्हरिभजनपरो धन्यधन्यस्ततोऽसौ—
> धन्यो यः कृष्णपादाम्बुजरसपरमो रुक्मिणीशप्रियोऽतः॥
> याद्योऽकप्रियोऽतः सुबलसुहृदतो गोपकान्ताप्रियोऽतः।
> श्रीमद्वृन्दावनेश्वरवितरसविवशा राधिका सर्वमूर्त्तो"॥ इति

विशुद्धरसदीपिका ।

सत्कृतः गुणात्मनः मायागुणानाम् आत्मनः प्रवर्त्तकस्य अथवा भक्तवात्सल्यादिगुणवत इत्यर्थः । नृपेति यथाहि भवतो देशयात्रा साधुजनसुखाय दुष्टदमनाय निजानन्दलाभाय चेति तथा भगवतोऽपि प्रकटनमिति भावः ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ननु, भगवतः सर्वात्मत्वात्सर्वेषामपि तदभिन्नतया वस्तुमाहात्म्येन बुद्ध्यनपेक्षायां सर्वत्र वस्त्वैक्यात्पुत्रकलत्रादावप्यनुरागमात्रेण गुणप्रवाहोपरमे सर्वमुक्त्या परिदृश्यमानप्रपञ्चोच्छेदापत्तिस्तत्राह—नृणामिति । अयमत्राशयः यद्यपि पुत्रकलत्राद्यात्मनापि सर्वत्र परमात्मन एवावस्थितिस्तथापि तत्राविद्यादिजीवोपाध्यावरणसद्भावेन बुद्धिं विना तदावरणनिरासासम्भवात् तत्र क्रियमाणा प्रीतिर्न गुणप्रवाहोपरमाय अत्र तु नृणामित्युपलक्षणं जीवमात्रस्य वृन्दावनपशुपक्षिद्रुमलतादीनामपि तत्रानुरागस्य वर्णितत्वात् श्रेयोऽर्थधर्मादिनिःश्रेयसं तु भगवदनुरागो मोक्षश्च तयोर्भगवत्स्वरूपव्यक्तिं विनानुपपत्तेस्तदर्थाय भगवतो व्यक्तिः अन्यत्र तु जीवैः साङ्ख्यनैयायिकादिभिर्वैराग्यादिसाधनान्यनुष्ठाय ज्ञानं सम्पाद्यते नाज्ञानबाधद्वारा भगवत्स्वरूपव्यक्तिः सम्पाद्यतेऽत्र तु भगवता स्वेच्छयैव स्वीयभगशब्दाभिधेयनित्यज्ञानेनैव जीवानां निःश्रेयसाय तेषामज्ञानं पराभाव्य व्यक्तिः कृताऽत आवरणाभावाद्बुद्धिमनपेक्ष्य वस्तुमाहात्म्यादेव सिद्धिः । नृप इति सम्बोधनेऽप्ययमभिप्रायः नॄन् पातीति नृप इति व्युत्पत्त्या यथा भवान् स्वेच्छयैव स्वैश्वर्येण नॄन् पाति रक्षति पालयति च तथा भगवानपि स्वेच्छया स्वैश्वर्येणैव नृणां निःश्रेयसाय व्यक्तिं करोतीति भगवतः स्वेनैव सर्वनिःश्रेयसापादने भगव्ययमाशङ्क्याह—अव्ययस्येति, ननु, चक्षुर्गोचरस्य किमिति स्वभगव्यक्त्यमुच्यते तत्राह, अप्रमेयस्येति—

> "नैतन्मनो विशति वागुत चक्षुरात्मा—
> प्राणेन्द्रियाणि च यथाऽनलमर्चिषः स्वाः" ॥

इत्यादिवचनात् । ननु, रूपादिमतः कथमप्रमेयत्वं तत्राह—निर्गुणस्येति । "निश्चेतनात्मकशरीरगुणैश्च हीनः" इत्यादिवचनात् प्राकृतरूपादेरेव प्राकृतेन्द्रियगोचरत्वमिति भावः । कथं तर्हि रूपादिप्रतीतिस्तत्राह—गुणात्मनः इति । गुणा अप्यात्मभूता यस्येत्यर्थः । अथ राज्ञो वा सापेक्षरूपचतुर्थ्यस्य समाधानपक्षे तु यतो नृणां निःश्रेयसार्थाय इयं लीलात्मिका व्यक्तिरतस्तासां गुणप्रवाहाभावेन तदुपरमस्यासम्भवेऽपि यथा यथा नृणां निःश्रेयसं भवेत्तथा तथा लीलाव्यक्त्योपदेशः क्रियते इति भावः । शेषं समानम् ॥ १४ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

भक्तितत्त्वज्ञानाऽनधिकारिणोऽप्युद्धर्तव्या इतीच्छयैव भगवद्भक्तिरवतारणम् अतो यदर्थं भगवदवताररत्तदिमसेवार्थं भगवतः स्वाङ्गा

न युज्यत इत्याशयेनाह—नृणामिति । भगवतः षड्गुणैश्वर्यसम्पन्नस्याभिव्यक्तिकारणरहितस्याभिव्यक्तिः प्रादुर्भावः नृणामविशेषेण सर्वेषां निःश्रेयसार्थाय साक्षात्परम्पराय वा मोक्षरूपपरमपुरुषार्थलाभायैव न तु भूभारभूतकंसादिवधाय भ्रूविजृम्भणमात्रेणाऽनन्तकोटिब्रह्माण्डसंहारसमर्थस्य कतिपयसंहारकणकिलेशमात्रेणावतारेणापि तस्य सुकरत्वात् न च नृणां निःश्रेयसमन्यथा सुकरं भक्तितत्त्वज्ञानयोरधिकारिणोरत्यन्तदुर्लभत्वात्—

> "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
> यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः" ॥

इत्यादिना च भगवदिच्छायास्सुकरं तस्या अपि जीवकर्मसापेक्षत्वात् अन्यथा वैषम्यनैर्घृण्यापातात् तस्मात्करुणासागरो भगवान् संसाराऽनले पच्यमानान् जीवानालोक्यावतीर्णः इति भावः यथा नृपरूपेण भगवतोऽवतरणं नृणां पालनाय तद्वदिति सम्बोधनाशयः "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुत्या परमात्मनो जीवरूपेण प्रवेशे नामरूपात्मके संसारविस्तारायान्तःप्रविष्टस्य तिरोहितस्य परमात्मनः पतिपुत्रादिरूपेण स्थितस्य संसृतिचक्रारूढस्य स्नेहादिसम्बन्धेन संसृतिचक्रे भ्रमणातिशय एव न तु तन्निवृत्तिः भगवतस्तु अभिव्यक्तिरित्युक्तमतो वस्तु रूपसाक्षात्कारेण मोक्षः श्रुतिमस्तकेष्वभिहितस्तत्स्वरूपं भगवतोऽभिव्यक्तिमेवास्तीत्याशयेन भगवन्तं विशिनष्टि—अव्ययस्येत्यादि । अव्ययस्य व्ययरहितस्य सत्यस्य यतोऽप्रमेयस्य प्रत्यक्षादिप्रमाणाजन्यवृत्तिप्रतिफलितचैतन्याविषयस्याऽदृश्यस्य दुर्ज्ञेयस्य तत्रापि हेतुमाह—निर्गुणस्य प्रत्यक्षादिप्रवृत्तहेतुगुणविनिर्मुक्तस्य "सत्यं ज्ञानमनन्तं, विज्ञानमानन्दं ब्रह्म विज्ञातारमरे केन विजानीयात् "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् यत्साक्षादपरोक्षाद्ब्रह्म "साक्षी चेताः केवलो निर्गुणश्च" इत्यादि श्रुतेः तथाच सत्यज्ञानानन्दात्मकस्याऽनावृतस्य परब्रह्मणो नन्दनन्दनादिरूपेणाभिव्यक्तिर्नतु जीवस्येव तद्देहाद्यभिमानेन तिरोधानं तस्माद्विषबुद्ध्यापि पीतममृतं यथामृतत्वायैवावकल्पते तथा जारत्वादिबुद्ध्याप्याराधितो भगवान् मोक्षायैवावकल्पते इति न कोपि विरोधः । ननु, यथोक्तस्य निर्गुणस्य परमात्मनो महावाक्यजन्याखण्डार्थवृत्त्या आवरणभङ्गमात्रं सम्पद्यते स तु स्वयम्प्रकाशत्वात्स्वयमेव प्रकाशते तस्मात्कथं चक्षुरादीन्द्रियजन्यवृत्तिविषयाकारेणाभिव्यक्तिर्नहि दृश्यमानघटाद्याकारं ब्रह्माभिव्यक्तिमित्युच्यते तावद्विभ्रितस्य दृश्यमानत्वमभिव्यक्तब्रह्मरूपत्वं चेत्येतदुभयं विरुद्धमितिचेत्तत्राह—गुणात्मन इति । गुणानां सत्त्वरजस्तमसां तदात्मिकाया महामायादिशब्दप्रतिपाद्यायाः प्रकृतेरात्मनो नियन्तुः सत्तास्फूर्तिप्रदस्याधिष्ठानचैतन्यस्य तथा च सच्चिदानन्दरूपे परब्रह्मणि सर्वथाऽघटितमप्यज्ञानादहङ्कारादिकं यथा प्रतीयते तथा साधकानुग्रहार्थं भगवतस्तत्सान्निध्यदरूपेण भानमपि न विरुध्यते ततो ज्ञानादीनां संसारकारणत्वात्तद्भानं संसारापादकं भगवद्विग्रहस्य तु मोक्षार्थप्रकटितत्वं तद्ध्यानादिकं मोक्षकरमिति विशेषः । "प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" "माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद !" इत्यादिवाक्यात्स्वेच्छोचिततत्सान्निध्यस्वानुकूलमायाशक्त्या तथाभूते परमात्मनि तत्तदाकृतिभानमिति सर्वमनवद्यम् ॥ १४ ॥

काम क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्यक्तिः अभिव्यक्तिः प्रादुर्भाव इत्यर्थः । निःश्रेयसार्थाय तत्तदधिकारिकल्याणसिद्धये निर्गुणस्य हेयगुणरहितस्य गुणात्मनः गुणानां कल्याणगुणानामात्मन आश्रयस्य ॥ १४ ॥

भाषा टीका ।

हे नृप ! अविनाशी अप्रमेय अर्थात् जिनके स्वरूप रूप गुण विभूति ऐश्वर्य को प्रमाण न होय सके, प्राकृत गुणन तें रहित अनन्त कल्याण गुणन के सागर ऐसे परब्रह्म परमात्मा भगवान् को प्रकट होयवो केवल मनुष्यन के परम कल्याण के तांई है, और कछु दूसरो प्रयोजन नहीं है ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतो यथाकथञ्चित्सदासक्तिर्मुक्तिकारणमित्याह—काममिति । ऐक्यं सम्बन्धम् सौहृदं भक्तिम् ॥ १५ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

अतो हरौ यथा कथञ्चित् सम्बन्धमात्रेणापि सर्वचित्ताकर्षके सर्वदोषहरे वा अव्यये एव कामादिकमपि नित्यं कुर्वतः ते कामादिविधायका जनाः यद्वा, कामादिना प्रसिद्धा वणडकारण्यवासिमुनयस्तथा कुब्जादयः कौशिकंसादयश्च यद्वा, ते तव यो हरिस्तस्मिन्नित्यन्वयः विदधते इति क्वचित् पाठः हि निश्चितं तन्मयतां ध्यानेन इत्येके निष्ठतां यद्वा, सारूप्यादिप्राप्त्या तत्स्वरूपतां प्राप्नुवन्ति नित्यमिति तत्र तत्राऽवाविन निष्ठया तन्मयतायामविलम्बत्वं बोधयति अन्यथा कादाचित्कतया तत्तदावेशाभावेन शीघ्रतन्मयत्वासिद्धिः सारूप्ये च भक्ताभक्तादिभेदेन सुखविशेषलाभकेवलदुःखध्वंसादिना तथा श्रीवैकुण्ठपार्षदत्वसिद्धलोकवासित्वादिना वैष्णवसिद्धान्तानुसारेण भेदः स्यादेव यद्वा, नृणां निःश्रेयसार्थमेवात्र हेतुमाह, हि यतः कामादिकमपि कुर्वन्तस्तन्मयतां यान्तीति अन्यत्समानं सौहृदमिति दृष्टान्तः चेति क्वचित्पाठः तत्र चाशब्द उपमार्थमेव तथा चोक्तं श्रीनारदेन सप्तमस्कन्धे "कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः । आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहा यूयं भक्त्या वयं विभो" इति तत्र गोप्यः इति बहिर्दृष्ट्या केवलमौपपत्यकाममात्रापेक्षया यद्वा तन्मयताप्राप्तिमात्रापेक्षयैव कामादीनां सर्वेषामेकत्र गणना फलतस्तु महान् विशेष एव एतच्च सर्वं श्रीभागवतामृते विवृतमेवास्ते रसामृताब्धे च श्रीरूपेण तत्तद्विशेषाभिव्यञ्जनेन विस्तारितमस्ति अत्रापि यथास्थानमग्रे विवरणीयम् ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अस्तु तावत्तद्व्यक्तिसमयगतानां वार्त्ता किन्तु सर्वकालनानामपीयं रीतिरित्याह—काममिति । तत्र कामं त्रिविधं गोप्यादीनामिव प्रेममयं सैरन्ध्र्यादीनामिव रिरंसामयं च क्रोधं द्वेषं चैद्यादीनामिव भयङ्कंसादीनामिव स्नेहं वृष्णिपाण्डवानामिव श्रीमद्व्रजवासिनामिव वा ऐक्यमात्मारामाणामिव सौहृदं कश्यकैशिकादीनामिव तत्र भयद्वेषौ तु नानुमतौ यः खलु कल्याणगुणमात्मानं भीषणं मन्यतो गूढं द्विषतोऽपि तस्य भीतस्य तथा मत्सरादिना साक्षादपि द्विषतो धृष्टस्य मङ्गलं कल्पते तस्मिन् कः पामरः तच्च तत्र कुर्यात् किन्तु स्नेहं सौहृदमेव वा सर्वेऽपि कुर्युरिति हि तात्पर्यम् तदित्थमेवोक्तं श्रीनारदेन " तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् " इति केनापीति तत्र योग्येनेत्यर्थः । अतस्तत्रैव तदुक्तम्—

"यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः" ॥ इति ।

तत्र च शास्त्राज्ञागौरवमयभक्तियोगमतिक्रम्य भावमार्गे हेयस्यापि तस्य तन्मयताकारित्वाय प्राबल्यं दृश्यत इति ज्ञेयम् स्नेहसौहृदे एवानुमते तदित्थमेवोक्तं द्विषन्नपीति तद्वदैक्यं च नानुमतं तत्र तादृशतद्गुणास्फूर्तेरिति एवशब्दः एकैकत्र कृतार्थीभावाय पाठान्तरे ये विदधते ते हि निश्चितं तन्मयतां तत्तद्भावसमुचिताविर्भावं तदेकस्फूर्तिं चेति चेति च पाठः समानार्थः । किन्तु, श्रीभगवान् खलु "भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम्" इति श्रीभगवद्वाक्यात्—

"योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित् ।
द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः" ॥ इति

पद्मोत्तरखण्डवचनात् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतातश्च यद्यपि, द्वेष्टृप्रभृतिभिस्तस्य याथार्थ्यं नाऽनुभूयते किन्तु अन्यथैवेति तथापि तत्प्रभावात् परम्परयाऽप्युत्तरकाले याथार्थ्यं स्फुरतीति ज्ञेयमयेऽपत्र गणिते "किमुतानोऽजप्रियाः" इत्यनेन कामस्तु प्रियत्वातिशयादुत्कर्षित इति विवेचनीयम् ॥ १५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तन्मयतां द्वेषादिविस्मरणेन तज्ज्ञानप्रचुरतां शिशुपालो हि कृष्णसौन्दर्यचित्ततया द्वेषं विसस्मार अत एव सर्वेषां मानविच्छेषाणां मोक्षप्रसङ्गः ॥ १५—२० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नित्यं कामाद्यन्यतरं भावं ये हरौ विदधतः कुर्वाणा वर्तन्त इति शेषः कामादिविदधज्जनसंसृतिबन्धहारिणि प्रीतिं कुर्वन्तीत्यर्थः । ते तन्मयतां यान्ति स्वार्थेऽत्र मयट् तत्प्रकारतां तत्सात्म्यं यान्तीत्यर्थः । हीति प्रसिद्धिश्चैद्यादिषु द्योत्यते प्राचुर्येण वा मयट् ये कामाद्यन्यतमं कुर्वन्ति ते ततस्तज्ज्ञानप्रचुरतां यान्ति तद्द्वारा मुक्ता भवन्तीत्यर्थः । कामादीन् कुर्वाणा नित्यं भगवत्सौन्दर्यचिन्ताप्राचुर्येण कामादीनपि विस्मृत्य मुक्ता भवन्तीति भावः । शिशुपालो हि कृष्णसौन्दर्यचिन्ताप्राचुर्येण द्वेषं विस्मृतवान् तत्र कामो मन्मथप्रयुक्ताभिलाषविशेषः ऐक्यम् एककुलप्रसूतत्वानुसन्धानं स्नेहः सख्यं सौहृदं भक्तिः गोप्यः कामादित्यादिस्थानप्रमाण्याद् हरावित्यनेन कामाद्यन्यतमभावविषयजनबन्धहरत्वरूपवस्तुस्वभावोऽभिप्रेतः अजानतापि स्पृष्टस्याग्नेर्दाहकत्ववस्तुस्वभावान्मुक्तिप्रतिबन्धकः प्रारब्धकर्मक्षयाभावः उद्देश्यान्तरप्रतिपत्तिश्चात एव उद्देश्यान्तरप्रतिपत्तेर्दशाननस्य मोक्षाभावः गोपीनान्तु दुःसहेत्यादिना प्रारब्धकर्मक्षयोक्तिर्भगवद्व्यतिरेकेणोद्देश्यान्तराभावेन तत्प्रतिपत्त्यभावाच्च वस्तुस्वभावात्तासां मोक्ष उपपन्नः वस्तुतस्तु गोपीनामपि गोवर्द्धनोद्धरणादिभिरीश्वरत्वज्ञानमस्त्येव ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेवं तर्हि द्वेषादिना कां सिद्धिमाप्नोतीति तत्राह—काममिति । ये हरौ कामादिकं विदधत उपासते ते तन्मयतां यान्ति कामाद्यात्मतामाप्नुवन्ति न तु भगवन्मयतां नित्यादितमितानन्दवारिधेः हरेः कामाद्यभावाद्धि शङ्को—

"यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः" ॥

इत्यादिस्मृतिं सूचयति अवधारणार्थो वा कामिनः कामित्वमेव क्रोधिनः क्रोधित्वमेवेत्यादि तदुक्तम्

"विमुक्तावपि कामिन्यो विष्णुकामा व्रजस्त्रियः ।
द्वेषिणश्च हरौ नित्यं द्वेषिणस्तमसि स्थिताः" ॥

इति विशेषद्योतको वा तदुक्तम्—

"भक्त्या हि नित्यकामित्वं न तु भक्तिं विना भवेत् ।
भक्तः कान्ततया वापि मुक्तिर्भक्तिमतां हरौ ॥

इति च । मनुष्यविशेषवद्देवविशेषद्योतनार्थोऽपि भवति "स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरस्त्रियः" इत्यादेर्भक्त्यैव मोक्षो नान्येन साधनेनेममर्थविशेषं च वक्ति "भक्त्या वा कामभक्त्यावा मोक्षो नान्येन केनचित्" इत्यतः कामभक्त्या मोक्षं स्त्रीणां वक्ति "कामभक्त्याप्सरस्त्रीणाम्" इत्यादेः उपासनायाः विशेषोऽस्तीति "उपास्यः श्वशुरत्वेन देवः स्त्रीणां जनार्दनः" इत्यादेः सूचयति "उपास्यः श्वशुरत्वेन देवः स्त्रीणां जनार्दनः" इत्यादेः सूचयति तत्तद्योग्यतोपासनामन्तरेण मुक्तिः कस्यापि न स्यादितीमं व्याचष्टे "योग्योपास्तिं विना नैव मोक्षः कस्यापि सेत्स्यति" इत्यादेः पतित्वपितृमत्त्वादिविशेषं सूचयति "पतित्वेन स्त्रियोपास्यो" इत्यादेः गुरुत्वविशेषमपि "ब्रूते गुरुः श्रीब्राह्मणो ब्रह्मणा मे पितेति च" इत्यादेः सर्वेषामपि ज्ञानेन गुरुत्वं ब्रह्मणो विष्णु सुराणाञ्च गुरोर्गुरुः" इत्यादेः उपास्य दैवत्वं विष्णोरितीमञ्चाह "गुरुर्ब्रह्मास्य जगतो दैवं विष्णुः सनातनः" इत्यादेः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तेन तस्मिन् ये कामादिकमपि कुर्वन्ति तेऽपि तन्मयतां यान्ति किं पुनः प्रेमाणमित्याह—कामक्रोधमित्यादि । कामः कुब्जायाः क्रोधः शिशुपालादेः भयं कंसादेः स्नेहं पित्रोः ऐक्यं व्रजबालानां सौहृदं प्रेमगोपाङ्गनानां तन्मयतामिति यथाधिकारं बोद्धव्यं क्वचित्तन्मात्रमूर्तिः क्वचिल्लयश्च ॥ १५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं सति येन केनाप्युपायेन य एव सम्बध्यते तस्यैव मुक्तिर्भवतीत्याह-काममिति।कामादयः षट्साधनानि भगवत्सम्बन्धे तत्र कामः स्त्रीणामेव क्रोधः शत्रूणामेव भयं वध्यानामेव स्नेहः सम्बन्धिनामेव ऐक्यं ज्ञानिनामेव सौहृदं भक्तानामेव सख्यं तेष्वेव सिद्ध्यतीति पूर्वसिद्धज्ञानभक्त्योः नात्रोपयोगः तेषां मर्यादया स्वतन्त्राविर्भावस्य नियतत्वात् एकस्य तूभयत्वे संयोगपृथक्त्वन्यायेन निर्णयः वेत्यनादरे अन्यो वा कश्चनोपायो भवतु परं सर्वदा कर्त्तव्यः अन्यथा अन्ते या मतिः सा गतिः इति अन्यशेषतामापद्यते कर्मवशाच्च नान्ते भगवतः स्मरणमन्यस्यैव प्रपञ्चविरोधित्वात् भगवतः अतो नित्यं ये विदधते ते तन्मयतामेव प्राप्नुवन्ति । ननु, कामादिषु क्रियमाणेषु दुःखान्तराभिभवे कथं नित्यं करणं सम्भवति तत्राह—हराविति । स हि सर्वदुःखहर्त्ता नित्यं तद्भावनायां जगदेव तदात्मकं स्फुरति दृष्टिः कामेनानुरक्तेति किं पुनः स्वात्मा अतः तदात्मका एव भवन्ति सर्वत्र भगवदावेशात् "जीवेऽन्तःकरणे चैव प्राणे स्विन्द्रियदेहयोः । विषयेषु गृहेऽर्थे च पुत्रादिषु हरिर्यतः-

तादृशीं भावनां कुर्यात् काम क्रोधादिभिर्यथा ।
पूर्वप्रपञ्चविलयो यथा स्याने तथा यतः" ॥

इति ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात्त्वया सामान्यतस्तावदेष सिद्धान्तोऽवधार्यतामित्याह, कामं गोपीजनादयः क्रोधं द्वेषं चैद्यादयः भयं कंसादयः स्नेहं वात्सल्यं नन्दादयः ऐक्यम् आत्मारामाः सौहृदं वृष्णिपाण्डवादयः नित्यं विदधत इत्यधुनापि ते ते तं तं भावं कुर्वन्तस्तन्मयतां यान्तीति तासां तासां लीलानां नित्यत्वं ज्ञापयति तन्मयतां गोप्यादयस्तदासक्ततां यथा स्त्रीमयः कामुक इति अन्ये सायुज्यम् ॥ १५ ॥

विशुद्धरसदीपिका ।

एवं च द्वेषेपि यथोचितसिद्धिरिति स्थिते यथाकथञ्चिदपि तद्भासक्तिस्तत्प्राप्तिहेतुरिति द्रढयन् सुप्रीतेः कैमुत्यमाह

विशुद्धरसदीपिका ।

काममिति । साधकचरीणां श्रुतिमुनिरूपाणां गोपीनामिवेति यथाश्रुत एवार्थः "हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्,, इति पाद्मोक्तेः—

"कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः" ॥

इति सप्तमोक्तेः गोप्यः कामादिति च अन्यथा हेयवर्गप्रथमपठितस्य कामस्योपादेयत्वेन प्रक्रमभङ्गः कल्पनागौरवं च स्यादिति ध्येयम् द्वेषं चैद्यादीनामिव भयं कंसादीनामिव स्नेहं वृष्णिपाण्डवव्रजवासिनामिव ऐक्यम् आत्मारामाणामिव सौहृदं क्रथकैशिकादीनामिव यथाकथञ्चिदेव सहचरीगणानां तु मुख्यं सौहृदं भक्तिमिति टीका च "सा त्वीश्वरे परानुरक्तिः" इति शाण्डिल्यसूत्रात् अनुरक्तेः परात्वं तत्सुखसुखित्वमेव मूल एवेत्युक्त्या सौहृदस्यैवान्ययोगव्यवच्छेदेन मुख्यत्वं प्रदर्शितम् अत एव—

"ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्यया ।
कामात्मनोऽपवर्गेशं मोहिता मम मायया" इति ॥
"जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः,, ।

इत्यादिना च दाम्पत्यमौपपत्यं च यथा तत्र तत्र निन्द्यते न तथा क्वचित्सौहृदमपि प्रत्युत "न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः" इत्यादिनास्तूयततरामिति साधु व्याख्यातं हरौ सर्वदुःखहरे मनोहरे चेति यथायोगं तन्मयतां क्वचित्तत्सङ्गानुकूलतनुतां क्वचिल्लीनतामिति विवेकः ॥ १५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ननु, कथमनया व्यक्त्या निःश्रेयससिद्धिरित्याशङ्कायां सत्यामस्यां व्यक्तौ ब्रह्मबुद्धौ तदभावे कामादिनापि ब्रह्मभावापत्त्यात्मकं निःश्रेयसमभिप्रेत्य कामादिविदधतस्समाधत्ते—कामं क्रोधमिति । हरौ कामादि विदधतो तन्मयतां तत्स्वरूपात्मकं मोक्षं प्रेम्णा तत्र मनोवयं वा यान्तीत्यन्वयः । तत्राभ्यर्हितं हि पूर्वमिति न्यायात् सखिभावनयानुष्ठेयकामस्य विशेषेणाभ्यर्हितत्वात् गोपिप्रसङ्गप्राप्तत्वाद्वा पूर्वनिपातः अत्रैवास्य स्वरूपात्मकत्वेन नित्यसिद्धत्वात्तज्ज्ञानस्यापि कृत्यनधीनत्वेनाविधेयत्वात् तन्मयतालक्षणफलद्वयाण्यैक्याभेदात्तत्र विध्यभाव एव । यद्वा, ऐक्यशब्दादभेदोपासनस्वीकारे भवतु तत्रापि विधिः नच विध्यर्थफलकाराश्रवणाद्विध्यभावशङ्कावसरः "य एता रात्रीरुपयन्ति ते प्रतितिष्ठन्ति" इत्यत्रापूर्वार्थत्वेन फलश्रवणेन च "प्रतिष्ठाकामो रात्रिसत्रमुपेयात्" इत्यावश्यकविधिकल्पनवत् यत्र यत्रापूर्वार्थः फलश्रवणं वा तत्र तत्र विधिकल्पनावश्यकत्वात्तथात्रापि भगवद्विषयककामादीनामपूर्वत्वात्तन्मयताफलश्रवणाच्च विधिस्वीकारस्यावश्यकत्वात् नच कामादीनां निषिद्धत्वादविधेयत्वमेवेति वाच्यं "न हिंस्यात्सर्वा भूतानि" इत्यत्रातिनिषिद्धाया अपि हिंसाया "वायव्यं श्वेतमालभेत" इत्यादौ तत्तद्देवयागसम्बन्धेन विधेयत्वं यथा तथान्यत्र निषिद्धस्यापि कामादेर्भगवत्सम्बन्धेन विधेयत्वमेव—

"न मय्यावेशितधियां कामः कामाय कल्पते ।
भर्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यते ॥

इति तन्निषिद्धत्वनिषेधस्य भगवतैव दर्शितत्वात् । किञ्च, कानिचित्कर्माणि स्वरूपत एव श्रेयस्कराणि सन्ध्यादीनि कानिचिदाश्रयमाहात्म्यात् यथा कृष्णचौर्यादीनि कानिचित्तु विषयमाहात्म्यात् यथाभगवद्विषयकामादीनि किञ्च कामस्नेहयोः सख्यभावक्रोडीकृतयोरैक्यस्य च "द्वा सुपर्णा सयुजा सखायौ, तत्त्वमसि, अहं ब्रह्मास्मि" इत्यादिश्रुतिसिद्धत्वेन वास्तवतया विधेयतया च प्रधानत्वेन न निषेधगन्धोऽपि यत्तु कैश्चित्तत्सुखसुखित्वेन सौहृदस्य प्राधान्यकथनं तत्र यद्यपि मधुराधिपतेरखिलं मधुरमिति श्रीवल्लभाचार्योक्तेः "येन केन प्रकारेण मनः कृष्णे निवेशयेत्" इत्यादिवचनाच्च कृष्णविषयकसर्वभावानां श्रेष्ठत्वमेव निष्कामसेवारूपसौहृदस्य भवतु श्रेष्ठत्वं तथापि नित्यनिर्दुःखपरिपूर्णानन्दविग्रहे दुःखापनोदसुखसम्पादनासम्भवात्—

"नैवात्मनः प्रभुरयं निजलाभतुष्टो ।
मानं जनादविदुषः करुणो वृणीते ॥
यद्यज्जनो भगवते विदधीतमानम्—
तच्चात्मनः प्रतिमुखस्य यथा मुखश्रीः" ॥

इत्यादिवचनात् जीवानां च सौहृदप्रवृत्तानां "अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्" इत्यादिभिरसुखानां प्रत्युत दुःखिनां भगवति दुःखापनोदसुखकरणसामर्थ्याभावाच्च तथोक्तानुपपत्तेरेव न च कामादिवत् क्रोधेऽपि विधिस्वीकारे कथमाधुनिकानां केषाञ्चिदपि तत्राप्रवृत्तिरिति वाच्यम् आधुनिकानां शास्त्रैकगम्यभगवतः ऐश्वर्यस्यैवावगतौ परमेश्वरत्वबुद्ध्या क्रोधप्रवृत्तिप्रतिबन्धेऽपि क्रोधं विदधतो तन्मयतां यान्तीति वचनात् शिशुपालादीनां फलदर्शनाच्च विध्यभावशङ्कानवतारात् ॥ १५ ॥

श्रीव्रजपतिसूरिकृतभागवतगूढार्थदीपिका ।

अतो यथाकथञ्चित्सदासक्तिर्मुक्तिकारणत्वात्सम्पाद्येत्याह—कामं प्रेममयं रिरंसामयं वा गोप्यादयः क्रोधं द्वेषं शिशुपालादयः भयं भीतिः कंसादयः स्नेहं पाण्डवादयः ऐक्यं सम्बन्धं वृष्ण्यादयः स्नेहं भक्तिं नारदादयः एक्यमभेदमात्मारामा इति व्याख्या ननु सम्बन्धाद्वृष्णय इति पूर्वोक्तविरोधादभेदस्य यथार्थत्वेन मया कथञ्चिद्रूपत्वाभावात्स्वामिभिर्न व्याख्यातं नित्यं हरौ सर्वहरणात्सर्वेषां भगवति विदधतः कुर्वाणा ये ते तन्मयतां सच्चिदानन्दात्मस्वरूपभगवत्स्वरूपतां यान्ति एवकारेण प्रत्येकं सम्बध्यते न कामादीनामध्येऽन्यतमस्य यथाधिकारम् अवश्यकर्तव्यतां बोधयति वाकारेण कामादीनां तन्मयताप्राप्तौ प्रत्येकं स्वातन्त्र्यं ज्ञापयति एवकारस्य यान्तीत्यनेनापि सम्बन्धस्तथा तथा च यातेरव्यभिचारकत्वं बोधितं नित्यमित्यनेन शूर्पणखादिव्यभिचारे कामादिव्यभिचारे कामादिव्यावृत्तिः यातीति वर्तमानापदेशेनेदानीमप्येवं विदधतो यान्त्येवेति द्योतयति ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कामं व्रजाङ्गनादिवत् क्रोधं चैद्यादिवत् भयं कंसादिवत्

न चैवं विस्मयः कार्यो भवता भगवत्यजे ।
योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्नेहं नन्दवसुदेवादिवत् ऐक्यं भेदसहिष्णावभेदसम्बन्धमात्मत्वेनावगच्छन्ति ग्राहयन्ति चेति सूत्रप्रोक्तमौपनिषदानामिव सौहृदं सुहृदां युधिष्ठिरादीनामिव हरौ विदधतः "ब्रह्मविदाप्नोति परम्" इत्यादिश्रुतिप्रोक्ते ज्ञानविषये ब्रह्मणि वासुदेवे ये कुर्वाणाः सन्ति ते तन्मयतां तत्साधर्म्यं यान्ति औपनिषदानां ज्ञानविषयं यत्तत्त्वं तदेव कान्तत्वादिभावेन व्रजाङ्गनादीनां ज्ञानविषयमतो न श्रुतिविरोध इति भावः ॥ १५ ॥

भाषा टीका ।

हे राजन् ! काम क्रोध भय स्नेह एकता (निष्कटपनो) और सौहृद, इन सबन कों नित्य जो पुरुष श्रीहरि भगवान् में करें हैं ते पुरुष तन्मयता को प्राप्त होयजाय हैं अर्थात् वे श्रीहरिपरायण होयजाय हैं ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नच भगवतोऽयमतिभार इत्याह—नचैवमिति । यतः श्रीकृष्णादेतत्स्थावरादिकमपि विमुच्यते ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवमीदृशो विस्मयः सन्देहः आश्चर्यबुद्धिर्वा पुनर्न कार्य्य इत्यर्थः । भवतेति अन्येन क्रियतांनाम भवतातु गर्भादारभ्य तन्महिमाभिज्ञेन कथञ्चिदपि कदाचिदपि नकार्य एवेत्यर्थः । अत एव गौरवेण भवतेति नच त्वयेत्युक्तं विस्मयाऽकरणे हेतुः भगवति अशेषैश्वर्य्ययुक्ते । ननु, तर्हि कथं देवकीगर्भतो जन्म ? तत्राह—अजे जीववन्न जायते किन्तु स्वेच्छयैव भक्तवात्सल्यविना स्वयमाविर्भवतीत्यर्थः । ननु, तर्हि देवक्यादीनां पुत्रतया कथं ज्ञानमस्तु तत्राह—योगः दुर्घटसुघटनाय सामर्थ्यविशेषस्तस्येश्वराः शिवसनकादयस्तेषामपीश्वरे अतः स्वेच्छया स्वयमाविर्भावश्च श्रीदेवक्याः पुत्रता च सम्भवेदेव अचिन्त्यैश्वर्य्यत्वात्तस्य अत एव कृष्णे नराकृतिपरब्रह्मणि, यद्वा, दुर्वितर्क्यानन्तमाहात्म्यामृतसागरतया सुप्रसिद्धे इत्यर्थः । अथवा भगवति परमेश्वरे अतोऽजे जीववत् प्राकृतजन्मरहिते कृपया स्वयमेवाविर्भावात् अत एव योगेश्वराणां भक्तियोगनिष्ठानां श्रीनारदादीनामीश्वरे भक्त्या सेव्ये भक्तिविशेषप्रकटनात् किं वा योगेश्वराणां महाश्चर्य्यशक्तिमतामीश्वरे निजाश्चर्य्याशेषैश्वर्य्यप्रकटनात् तत्रापि कृष्णे श्रीगोकुलोत्सवे यतः कृष्णात् एतत् चराचरात्मकं सर्वमेव जगत् अशेषसाधनरहितमपि तदिच्छामात्रेण तदीययत्किञ्चित्सम्बन्धाभासमात्रेणापि स्वयमेव विशेषेण मुच्यते श्रीवैकुण्ठलोकं प्राप्नोतीत्यर्थः । एतच्च भाविहास्तिनपुरतस्तलतादिश्रीवैकुण्ठप्राप्त्यभिप्रायेण तथा च प्रथमस्कन्धे श्रीकुन्तीस्तुतौ—

"इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः" ॥ इति ।

अत्र स्वृद्धा इति पुनरेधन्त इत्यनेन च श्रीवैकुण्ठप्राप्तिसामग्र्येवाभिप्रेता अन्यत्तैर्व्याख्यातम् । यद्वा, ननु बहुतरयागयोगादिमहासाधनेन दुःसाध्यापि तन्मयता कथं यथाकथञ्चित् कामादिसम्बन्धेन सिद्ध्येत् तत्राह—नचेति । अर्थः स एव अतोऽस्या रासक्रीडायाः श्रवणादौ मुक्त्यादिपरैरपि कामक्रीडामयत्वबुद्ध्या नोदासितव्यम् । किन्तु, सर्वैरेव निजेष्टतदतीतसिद्धये विशेषतो भक्तेः परमफलत्वेनेयं सदा सेव्यैवेति प्रागेतत् प्रकरणोत्थापनतात्पर्य्यं दृढीकृतमिति दिक् । अथवा श्रीव्रजेन्द्रव्रजगोपीत्वेन भाग्यविशेषता अपि हतविघ्नाः तेनैव देहेन सद्यः एव श्रीकृष्णं सङ्गतास्तदानीमेव रासक्रीडामलभन्तेति व्याख्येयम् तथाहि अन्तर्गृहे गताः पाशैर्बद्धा पत्यादिभिर्गृहान्तःस्थापिताः अत एव कथमप्यलब्धविनिर्गमाः तद्भावनायुक्ताः तस्याः श्रीकृष्णेन सह रासक्रीडाया भावनायुक्ताः ततश्च प्रक्षीणबन्धनाः ध्यानस्य प्रभावेनैव सुश्लथीभूतबन्धनाः सत्यो गुणमयं पत्यादिभिर्बहुधा बद्धत्वात् पाशमयं पाशप्रचुरं देहं ध्यानेनैव जहुः नाहं केनापि बद्धास्मि किन्तु मुक्तैवेति प्रत्येकं भावितवत्य इत्यर्थः । इति भावनात्यागेनैव देहत्याग उक्तः यथा श्रीब्रह्मणः सृष्ट्यारम्भे तत्तद्भावनात्याग एव तत्तद्देहत्यागः तथा च तृतीयस्कन्धे ततश्च ध्यानप्रभावेन सद्य एव प्रक्षीणबन्धनं पत्यादिभिः कृतं पाशैर्नियन्त्रणं किम्वा द्वारबन्धादिप्रतिबन्धो यासां तथाभूताः सत्यः विशेषणे तात्पर्य्यं देहस्य पाशमयतां जहुरित्यर्थः । ततश्च परमात्मानमपि जारबुद्ध्यैव तं व्रजराजकिशोररूपमेव सङ्गता । यद्वा, परमात्मानं परमप्रियमित्यर्थः । ध्यानप्रभावमाह—ध्यानेनैव दुःसहो यः प्रेष्ठविरहतीव्रतापस्तेन धुतं निरस्तं तुच्छीकृतम् अशुभं जगतामशेषदुःखभोगो याभिः तस्मादपि तद्विरहदुःखस्याधिक्यात् किञ्च, क्षीणम् अत्यल्पतां गतं मङ्गलं जगदशेषसुखभोगो याभ्यः तस्मादपि श्रीकृष्णाश्लेषसुखस्याधिक्यात् अन्यत्समानमेव ततश्च "या मया क्रीडता रात्रौ" इत्यस्यायमर्थः पत्यादिभिर्बद्धत्वाद्व्रज आस्थिता अपि पश्चान्मद्वीर्य्यचिन्तया नाऽलब्धरासा नाप्राप्तरासा बभूवुः किन्तु प्रापुरासमेवेति श्रीपरीक्षित्प्रश्नस्यायमर्थः कान्तबुद्ध्या ध्यानेन गुणेषु तत्सङ्गमादिसुखेषु नतु गुणातीतरूपे धीर्यासाम् इति ध्यानस्य न्यूनता सूचिता तथापि पत्यादिभिर्बन्धनार्थं प्रयुक्तायाः पाशपरम्पराया उपरमः निवृत्तिः कथमिति श्रीशुकदेवस्य यथा कथञ्चिद्ध्यानेन संसारबन्धादपि विमुक्तिः स्यात् श्रीकृष्णप्रियतमानां तासां तद्ध्यानविशेषेण पाशबन्धनान्मुक्तिर्जातेति किं वक्तव्यमिति कैमुतिकन्यायेनैव क्लेषादिना ध्यानादप्यभीष्टसिद्धिमाह—उक्तमित्यादिना । अन्यत्सुसङ्गतमेव ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

न चेति अन्येन क्रियतां नाम भवता गर्भादारभ्य तन्महिमाभिज्ञेन न कार्य्य एवेत्यर्थः। अत एव भवतेति गौरवेणोक्तम् नतु त्वयेति विस्मयाकरणे हेतुविशेषः भगवति अशेषैश्वर्य्ययुक्ते। ननु, तर्हि कथं देवकीगर्भतो जन्म ? तत्राह—अजे जीववन्न जायते किन्तु स्वेच्छयैव भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः। भगवत्त्वादेव योगेश्वरेश्वरे तत्रापि कृष्णे सर्व्वतः परिपूर्णाविर्भाव इत्यर्थः॥ १६॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

नचेति। एवमेवं सति कृष्णविषये भवता विस्मयो न कार्य्यः विस्मयासम्भावनां द्योतयितुं विशिनष्टि—अधोक्षजे अधःकृता अनितरविषया अक्षजा इन्द्रियवृत्तयो यस्मात्तस्मिन् स्वविषयककामक्रोधादिमज्जनेन्द्रियाणामन्यविषयानभिमुख्यावहे तथा कर्तुं समर्थानामपीश्वरे नियन्तरि कामादिप्रयुक्तसमाधिनिर्वाहक अनश्वरे वा भगवति तदुपयुक्तज्ञानादिगुणाश्रये यतः कृष्णात्संसारतत्स्थावरादिकमपि विमुच्यते तस्मिन्॥ १६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यथा हि शङ्कोपक्षिप्ता बहवो विशेषाः शास्त्रान्तरसिद्धाः सन्ति तस्माद्भगवति विस्मयो न कार्य्य इत्युपसंहरति—न चैवमिति। विस्मयः आश्चर्य्यबुद्धिर्भगवताप्येवमकारि किमुतास्माभिरिति दर्पो वा "चित्रे दर्पे च विस्मयः" इति यादवः। भगवत्त्वैश्वर्य्यादिगुणसामग्रीमतीत्ययं हेतुरौत्पत्तिकलक्षण इत्याह, अज इति। न जायते इत्यजः सौभर्य्यादियोगेश्वरा अपि योगबलेनातिमानुषं कुर्वन्ति किमुत तदीश्वरोऽयमिति भावेनाह—योगेश्वरेश्वर इति। कृष्णविषयः प्रश्नः परिहारोऽन्यविषय इवेयते अतः कथं संशयनिस्तारः ? इति शङ्कानिरासाभिप्रायेणाह, कृष्ण इति। हेत्वन्तरमाह—यत इति। यतो यस्मात्कृष्णादेतज्जगद्विमुच्यते संसारमुक्तं भवति यस्य प्रसादात्परमार्थिरूपाद्स्मात्संसारान्मुच्यते "नापरेण" इतिश्रुतेः॥ १६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

एवं क्रोधावेशं विहाय शिष्यवात्सल्यादुपदिशति न चैवमित्यादि। पुनरेवं विस्मयो न च कार्य्यः नैवं कार्य्य इत्यर्थः भवता श्रीकृष्णप्रभावज्ञानां पौत्रेण कुत्र कृष्णे अन्यत्रवत् सन्देहः क्रियतां कीदृशे अजे स्वप्रकाशे भगवति अचिन्त्यपरमैश्वर्य्ये योगेश्वराणामपि ईश्वरे कर्तुमकर्तुमन्यथाकर्तुं समर्थे एतेन तस्मिन् अज्ञानेनापि न किञ्चिद्भवति कान्तज्ञानेनापि तदङ्गसङ्गमङ्गलत्वं भवतीत्यन्यथाकर्तृत्वे योगेश्वरेश्वरता यत एतत्सगुल्मादिकमपि विमुच्यत इति मुक्तिकर्तृत्वे योगेश्वरेश्वरता अभक्तानां कृतार्थताकरणे अकर्तृत्वे योगेश्वरेश्वरता॥ १६॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

किञ्च, आदावेव गोप्यो मुक्ताः किमाश्चर्य्यं बहव एवाग्रे मुक्ता भविष्यन्तीति तदाह—नचैवमिति। एवम् असम्भावनारूपो विस्मयो न कार्य्यः असम्भावितबुद्धीनाम् अन्यथा स्फुरणानियमात् यतो भगवान् यत्किञ्चिन्मोक्षे ज्ञानादिकमुपयुज्यते तत्सर्वं भगवत्येवास्ति यदि ज्ञानव्यतिरेकेण मोक्षो न भवेदिति ज्ञास्यति तदा सिद्धत्वात् ज्ञानस्य तदपि दास्यति। किञ्च, अन्यः सन्देहं कुर्य्यादपि भगवतो माहात्म्यं न दृष्टमिति भवता तु न कार्य्यः गर्भ एव माहात्म्यदर्शनात्। किञ्च, निर्दुष्टे सर्वं सम्भवति तत्र दोषाणां मूलं जन्म तदभावे दोषाभाव इति तेन अजत्वात् निर्दुष्टः अन्ये सर्वे हि जायन्ते न तैस्तेषां मुक्तिः सम्भवति तुल्यत्वात्। किञ्च, यो हि साधनपरः स मुच्यते तत्र साधनं मनः सर्वतो निवृत्तं तथा योगेन भवति तस्य योगस्य च नियामको भगवानेव यद्यन्यस्यापि मोक्षो भवेत् भगवदिच्छयैव भवेत् योगादिसाधनानां तन्नियम्यत्वात्। किञ्च, सदानन्दो भगवान् फलात्मा यः कश्चिन्मुच्यते स एनमेव प्राप्स्यति अतः साधनैर्व्ययमत्र प्राप्यः सोऽपि स्वयमेव सम्बध्यत इति न किञ्चिदनुपपन्नम् किञ्च, एतत्परिदृश्यमानं सर्वमेव जगत् यतो विमुक्तिं यास्यति भावनया गोकुले स्थित आह—ज्ञानदृष्ट्या वा साक्षात्परम्परया वा सर्वानेव मोचयिष्यतीति तदग्रे वक्ष्यति स्वमूर्त्येति श्लोकद्वयेन। यद्वा, कृष्णमिति एताः कृष्णं कान्तं परं विदुर्न तु ब्रह्मतया अतो गुणप्रवाहोपरमः कथं सङ्गच्छते ? इति अत्रायं भावः ब्रह्मत्वेन विज्ञानं हि शास्त्रीयं तच्च सात्त्विकं भवितुमर्हति "सत्त्वात् सञ्जायते ज्ञानम्" इति वाक्यात् एतास्तु गुणातीतस्यानन्दमात्रकरपादमुखोदरादेः प्रकटस्यानन्तगुणपूर्णस्य सौन्दर्य्यादिगुणेषु परिनिष्ठितधियः अतो निर्गुणत्वाद्गुणप्रवाहोपरमः कथं सङ्गच्छते उपरमस्याभावरूपत्वेन प्रतियोगिसापेक्षत्वादत्र च प्रतियोगिन एवाभावादिति मुने इति सम्बोधनं शुद्धसत्त्वाविर्भावे ज्ञानोदयस्यानुभवसिद्धत्वेन सर्वार्थम् अस्योत्तरमाह—उक्तमिति। पुरस्तात्सप्तमस्कन्धे गोप्यः कामादित्यादिना अत्रायमर्थः यथा भगवति गुणातीत एव परिनिष्ठितबुद्धित्वेऽपि द्वेषस्य तत्र प्रयोजकत्वाच्चैद्यादीनां तामसत्वं तथैतासामपि निर्गुण एव परिनिष्ठितबुद्धित्वेपि जारत्वबुद्धिः तत्र प्रयोजकत्वात्सगुणत्वमेवेति लक्ष्यते अयं च रसः सर्वभावप्रपत्त्यैकलभ्यः न हि जारत्वबुद्धौ सर्वभावप्रपत्तिः कामपूरकत्वेनैव तत्सम्भवनियमात् अत्र च सगुणत्वस्य प्रतिबन्धकत्वात् यथा चैद्यादीनां स्वाधिकारानुसारेण तादृशशरीरलाभे तत्पदप्राप्तिः तथैतासामपि स्वाधिकारानुसारेण तथात्वे सगुणत्वापरमेण सर्वभावप्रपत्त्यैव ततो निजपतिभजनामिति सर्वमवदातम् अन्यथा "ये यथा मां प्रपद्यन्ते" इति मर्यादा भज्येत एतदेव मनसि कृत्वाऽऽह—उक्तं पुरस्तादेतत्त इति। ननु, तथापि तादृशप्रपत्तेरेव मूलत्वात् कथं सर्वभावप्रपत्तिसाध्यं फलं भविष्यतीत्यत आह—द्विषन्नपीति। अयमर्थः मोक्षसुखानभीप्सुः तद्विरुद्धद्वेषकर्ता च चैद्यः तस्मै यथा ज्ञानिनामपि दुर्लभां मुक्तिं दत्तवान् एवं तादृक्प्रतिपत्तिमूलानामप्येतासां तादृशं फलं दत्तवानिति एतेन यथा द्वेषभक्त्योस्तारतम्यं (त) यथाऽन्ययोषभजने तद्भक्त्योरपीति सूचितम्। ननु, गोकुलस्य भगवत्क्रीडोपयोगित्वेन

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

निश्चयः इयं च लीला स्वरूपानन्दरूपा तादृश्येवेति सर्वात्मभावरहितेष्वेतदनुभवायोग्यत्वान्नायं विस्मयः कार्य इत्यर्थः किञ्च, एतासां तु स्नेहः पूर्वोक्तः साधनत्वेनासीद्गोकुलं त्वद्दृत्यावृतं निशि शयान इति वाक्यात्सर्वसाधनविमुखं तदपि प्रतिक्षणं स्वरूपे लीयते अग्रिमाग्रिमलीलारसानुभवार्थं भगवान् परं पुनः पुनः पृथक्कृत्यता मनुभावयतीत्यचिन्त्यानन्तशक्तिमति न किञ्चिदाश्चर्यमित्याशयेनाह—यत एतादिति । शुकस्त्वधुना लीलेशयानानुसन्धानात् भावनया तत्रैव स्थित इत्येतदित्युक्तवान् वर्त्तमानप्रयोगं च कृतवान् तामेव लीलामनुभवतीति सर्वमनवद्यम् नन्वेतद्वैपरीत्यमपि सुवचं तथाहि एता अपि पूर्वोक्तमध्यपातिन्य एव अत एव पूर्वश्लोके तासामनिवृत्तिमुक्त्वा तादृशी सालोक्यसम्भाविनेति सा कथमुपपाद्यत इत्याशङ्कानिरासायाह—अन्तर्गृहेत्यादि । अत्रायं भावः पूर्वं हि वचनेन निवर्त्तनं तथा सति निवृत्तिर्हि विपरीतस्वक्रियया भवति सा चातिदूरे यतस्तत्सजातीयाः काश्चिद्भर्त्रादिकृते क्रियया प्रतिबन्धे सत्प्रतिबध्य देहमपि त्यक्त्वा भगवत्सङ्गता जाताः तथाचैतादृशः पूर्वोक्ताः सर्वा इति युक्तैवानिवृत्तिः । किञ्च, तद्भवनायुक्ता इति पदे तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वं च पूर्वोक्तानामेव भावस्योक्तत्वादेतद्भावसजातीयभाववत्त्वं पूर्वोक्तानामपीति गम्यते तेनैतन्निष्ठाशेषधर्मवत्त्वं तत्रापि सिद्ध्यति एतासां मुक्तिर्हत्वेति तन्निवृत्तिं विना न सेति तथोक्तं तासां न तथेति न तथोक्तमिति चेत् ? अहो शङ्काढ्यमानिनो मौढ्यदार्ढ्यं तव यस्मादालोचनलोचनराहित्येन बहिर्मुख्यासत्सङ्गगिरिगर्त्ताघातपातविध्वस्ताशयः परोक्तमपि नानुसन्धत्से तथाहि यच्छङ्कानिरासायैतत्कथावतारिता तद्भावश्च त्वया वर्णितस्तत्र त्वां पृच्छामस्तदर्थमियं कथा कल्पितातः सिद्धैवानूदिता अन्य एव सम्मतश्चेत् तत्रापि त्वां पृच्छाम एतासां प्रतिबन्धे को हेतुरिति स्वप्रियास्वपि सगुणत्वं ख्यापयितुमेतासां प्रतिबन्धो हरिणैव कृत इति चेद्ब्रवीषि हन्तैवं विचारकस्य तव शतधा हृदयं नास्फुटत्कुतस्तन्न जानीमः यतो मर्यादा भक्तिमार्गीयसेवाविषयकश्रद्धाया अपि निर्गुणत्वं तत्र साक्षादङ्गसङ्गिनीषु सगुणत्वं ब्रवीषि किञ्च "तामन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः" इत्यादिना प्रभुणैव "एताः परं तनुभृतः" इत्यादिनोद्धवेन "नोद्धवोऽण्वपि मन्न्यूनः" इत्यादिना भगवता स्तुतेनापि चरणरेणुप्रार्थनापूर्वकं स्तुता इति कृतगन्धशङ्कापि । ननु, कामोपाधिस्नेहवत्वेन तथोच्यत इति चेत् ? न तथा स्नेहे भगवतोऽपि विषयान्तरतुल्यत्वेन "संत्यज्य सर्वविषयान्" इति कथनानुपपत्तेः विषयार्थमेवागमनात् नच भगवतो विषयत्वेपि तदतिरिक्तविषयाणां त्यागोऽनूद्यत इति वाच्यं तव पादमूलं प्राप्ता इत्युक्तिविरोधात् न हि कामिन्य एवं वदन्ति किन्तु भक्ता एव किञ्चातितोके पूतनास्तनपयःपानानन्तरं रत्नाकरणे श्रीशुकेन हेतुरुक्तः "इति प्रणय बद्धाभिर्गोपीभिः" इति न हि तादृशे कामोपाधिकः सम्भवति न वा तादृशीनामङ्गनादित्यागः सम्भवति प्रत्युत तदादिसर्वं प्रसाध्यागमनं कुब्जावत् तदनन्तरं यद्रमणं तत्तु "रसोवैसः" इति श्रुते स्वरूपस्य रसात्मकत्वाद्रसरीत्या स्वरूपानन्ददानमेव—

सात्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥

इति भगवद्वाक्याद्भगवत्सम्बन्धिसुखस्यापि गुणातीतत्वमेव ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

न चेति अन्येन विस्मयः क्रियतां नाम अत्रार्थो भवता तु गर्भादारभ्य तन्महिमाभिज्ञेन न कार्यः गोचरत्वेपि भगवति देवकीपुत्रत्वेप्यजे गोपस्त्रीलम्पटत्वेपि योगेश्वराणामपीश्वरे कृष्णे सर्वावतारिणि यत एतत्स्थावरादिकमपि विमुच्यते इति श्रीस्वामिचरणाः यद्वा तल्लीलापरिकराङ्गमपि जगत् अधुनापि तत्तत्कामस्नेहादिभावमनुसृत्य विमुच्यते गुणप्रवाहान्मुक्तं भवति ॥ १६ ॥

श्रीविशुद्धरसदीपिका ।

नच भगवतोयमतिभार इत्याह—नचैवमिति । विस्मयः विरुद्धभावनामपि शुद्धभावोपलब्धावद्भुतत्वं सादरमाह—भवता नित्यपरिकरेणेत्यर्थः । यत्र केवलनिष्ठावतां माहेश्वरीसंहितोक्तानां महासिद्ध्यादिसहचरीत्वप्राप्तिर्निबोधका तत्र बाधानवरतभावानां तत्तत्प्राप्ताविति भावः । भगवतीति पूर्ववत् पूर्णप्रकाश इत्यर्थः अजे स्वेच्छयाविर्भूतत्वेपि नित्यकिशोर इत्यर्थः । बृहच्छरीर इत्यत्र प्रतिपादितमेव । ननु, योऽपानामयोग्यानां च समाना गतिरसमञ्जसेत्यत आह—योगेति । परमोपायस्य इत्यर्थः । यद्वा, योगोऽत्र परिकरदेहसंयोगः तदीश्वरास्ते ते च प्रकाशास्तेषामपीश्वरे मूलरूप इत्यर्थः । ततश्चायोग्यानां ब्रह्माख्यतत्प्रभावविशेषप्राप्तियोग्यानां च तत्तद्भावानुसारेण तत्तद्रूपप्राप्तिरिति लब्धवासुदेवसायुज्य चैद्यादेर्विकुण्ठास्तुतपार्षदत्वप्राप्तिवादिति साक्षात्तत्प्राप्तिनिर्देशस्तु अभेदाभिप्रायेण तदुक्तं श्रीरसामृतसिन्धौ—

"यदरीणां प्रियाणां च प्राप्यमेकमिवोदितम् ।
तद्ब्रह्म कृष्णयोरैक्यात्किरणार्कोपमाजुषोः"॥ इति

कुतः यतो हेतोः एतदखिलमपि जगद्विमुच्यते फलतस्तत्तद्भावाविष्टानां निजनिजोचितपरिकरत्वप्राप्तौ सन्देह इति भावः । यद्वा, एतादिति स्वहृदि हस्तं निधायाह—एतन्निखिलमुक्तं मम स्वरूपं ब्रह्म तदपि विमुच्यते विशिष्टां मुक्तिपरिकरतां लभत "विमुक्तश्च विमुच्यते" इति श्रुतेः किमुत भावका मुच्येयुरिति दैन्यमपि सूचितम् ॥ १६ ॥

श्रीरामनारायणकृतभावविभाविका ।

फलितमाह—नचैवमिति । एवं सति यत्र भगवतो जीवोपाध्याभूतत्वं तत्रावरणनिवृत्त्यै बुद्ध्यपेक्षायामपि यत्र भगवतः स्वकृपया स्वेनैव भगेन व्यक्तिस्तत्र गुणप्रवाहोपरमाय बुद्ध्यपेक्षानवकाशे सति यत्र च यथा जन्मोत्सवाय भगवतो लीलाव्यक्तिस्तत्र निर्मोहवैरादीनां तत्तल्लीलोपयोगिमोहवैराद्यनुकारे तथा गुणप्रवाहशून्यानामपि तदानुगुण्यप्रवाहतदुपरमाद्यनुकारे

ता दृष्ट्वाऽन्तिकमायाता भगवान् व्रजयोषितः ।
अवदद्वदतां श्रेष्ठो वाचःपेशैर्विमोहयन् ॥ १७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

सम्भवति सति भवता गर्भ एव दृष्टज्ञानरूपस्वरूपाभगवद्व्यक्तभगवत्प्रभावेन भगवति विस्मयो न कार्यः । नहि स्वतःसिद्धनिरतिशयषडैश्वर्यस्य किमप्यसम्भावितम् । ननु, गोपसुतस्य कथमीहकत्वं ? तत्राह—अजे इति । कथं शरीरस्याजत्वं तत्राह, कृष्ण इति—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" ॥

इति वचनात् । सत्यानन्दस्वरूपे औतसत्यानन्दत्वसम्भवनाय योगेश्वराराध्यत्वमप्याह—योगेश्वरेश्वर इति । कैमुत्यन्यायेन तद्गुणप्रवाहोपरमं दृढयति—यत इति । यतो यन्नामग्रहणध्यानश्रवणे एतदिति एतत्समस्तविश्वमपि विमुच्यते—

"अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृह्णन्ति ये ते" ॥

"सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् ।
सद्यस्तपस्वी भवति पङ्क्तिपावनपावनः" ॥

"अपिचेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" इत्यादिवचनात् तदा किमु वाच्यमधोक्षजप्रियाणां गुणप्रवाहोपरमे पक्षान्तरे तु किमर्थमीदृग्लीलाव्यक्तिः यत्र गुणप्रवाहशून्यानामपि गुणप्रवाहतदुपरामयोरनुकार इत्याकाङ्क्षायामाह—यत एतदिति । यतः सत्यामीदृग्भगवल्लीलायां तद्गानध्यानादिना एतद्विश्वं विमुच्यते भगवतो भगवतीनां च न स्वप्रयोजनाय किमपि कृत्यं किन्तु जनोद्धारायैव ॥ १६ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ननु, उक्तेऽप्यर्थे विस्मयाच्छिष्येण पुनः प्रश्नः क्रियतेऽतः किमपीति सामर्थ्यं भवद्भिरुत्तरं दत्तमिति चेदप्रसिद्धे ह्यर्थे उक्तेऽपि कदाचिद्विस्मयावेशात्पुनः प्रश्नो भवेदनेकवारमनुभूते समस्तशास्त्रेषु प्रसिद्धे परमात्मसुखात्सम्यक् श्रुतेस्सुमनस्कस्य विस्मयोऽपि कर्तुमयोग्य इत्याशयेनाह—नचेति । गुणप्रवाहेष्वेवमसम्भावनालक्षणो विस्मयः भवता तु गर्भवासकालादारभ्यैतावत्कालपर्यन्तं भगवन्माहात्म्यमनुभूतवता अवारितमपि ब्रह्मास्त्रं यो वारितवान् तस्य स्त्रीणोऽनिवर्तनीयसंसारनिवर्तने कः परिश्रमः इति सर्वविस्मयनिवारकजन्मवता जन्मकाल एव कोऽसौ मम रक्षक इति परीक्षणेन परीक्षिदिति नामवता न च कार्यः । कदापि न कर्तव्यः एवम्भूतो विस्मयस्तु सज्ञानिनाम् भवद्विधानां संभाविष्येतरां वा भवति न तद्विलक्षणतावतां भवादृशानाम् अश्रद्धादिकन्तु सर्वानर्थकारणत्वाद्दूरतः परिहरणीयं तदुक्तम्—

"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः" । इति

तत्रापि भगवति षड्गुणैश्वर्यसम्पन्ने येन तस्योद्धारो यद्विषयकाङ्क्षया वा तस्य प्रतिबन्धस्तदाविर्भावेन तदाकाङ्क्षापूर्त्या वा मोचनसमर्थे अत एव अजे जन्महेत्वविद्याकामकर्मवासनादिविनिर्मुक्ताजन्मशून्ये लोकानुग्रहायाविर्भूत्वा दिव्यजन्मादित्वेपि नात्यजत्वादिव्याघात इति भावः । किञ्च, योगेश्वरेश्वरे योगेश्वरा ब्रह्मादयः तेषामपीश्वरे आदिकारणे नियन्तरि भगवत्त्वाजत्वमहेश्वरत्वादिज्ञानवतोपि मुक्तिप्रदे तदुक्तम्—

"अहमादिर्हि देवानां महर्षीणां च सर्वशः ।
यो मामजमनादिञ्च वेत्ति लोकमहेश्वरम् ॥
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते" । इति ।

यद्वा, यत्प्रसादाद्योगेश्वरा अपि मोक्षदानक्षमास्तेषामीश्वरे को विस्मयः एवं त्रिभिः पदैः मोचनसामर्थ्यमभिधाय किञ्च, मुक्तिप्राप्योऽपि स एवेत्याह—कृष्णे सदानन्दस्वरूपे यतो येनकेनापि प्रकारेणाश्रितायेतच्चराचरं सर्वमपि विमुच्यते तथा च गुप्तैश्वर्ये प्रादुर्भूतजन्माद्यनर्थसमूहे स्वस्यापि मोचोपाययोगादिशून्ये आवृतसदानन्दस्वरूपे अनृतजडदुःखदेहादितादात्म्यापन्ने जीवे ऽस्त्येवं विस्मयः न तु यथोक्ते परमात्मनि तत्रापि भवत इति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न च तत्तदधिकारिनिःश्रेयसकरणे कश्चिच्छ्रम इत्याह, नचैवमिति । यतः श्रीकृष्णादेतत् स्थावरादिकमपि विमुच्यते तस्मिन्कृष्णे कामादिनिमित्तेन स्वासक्तानपि विमोचयतीति विस्मयो न कार्यः ॥ १६ ॥

भाषा टीका ।

तातें हे राजन् ! अब कबहूं श्रीकृष्ण भगवान् के विषें तुम ऐसो विस्मय मत करियो काहे सों, कि—वे योगेश्वरन केऊ ईश्वर हैं जिन श्रीकृष्ण की कृपा तें ये जगत बन्धन तें छूटि जाय है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रस्तुतमाह—ता दृष्ट्वेति । वाचःपेशैर्वाग्विलासैः ॥ १७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ताः वेणुगीताकृष्टाः परमविह्वलाः व्रजस्य योषितः सर्वा एव न तरुणीः । यद्वा, व्रज एव स्थातुं योग्याः नहि बहिर्गन्तुमिरमर्थः । तत्रापि निजान्तिकमेव आयाताः प्राप्ताः नतु लज्जादिना दूरतः स्थिताः दृष्ट्वा भगवत् स्वागतमित्यादि वक्ष्यमाण

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

किमर्थं वाचःपेशैर्विलासैर्विशेषेण मोहयन् चित्तं हरन् स्वविषयकं भावं नितरां वर्द्धयितुमित्यर्थः । तच्चाग्रे व्यक्तं भावि ननु, वाग्विलासमात्रेण कथं विमोहनं स्यात् ? तत्राह—वदतां चतुर्मुख सहस्रमुखादीनां वाग्मिनां श्रीव्यासादिनां वा कवीनां श्रेष्ठः कुतः भगवान् साक्षात्सर्वैश्वर्ययुक्तः । यद्वा, वाचःपेशैर्भङ्गीविशेषैः एकैव वाक् समुपेक्षामयी संप्रार्थनामयीचेति मिथो विरोध्युभय-कोटिस्पर्शैरेव कैतवकपटपरिपाटीपाटवैरित्यर्थः । साक्षाद्धर्मादि-बोधनपरत्वेऽपि निजास्वन्तरिरंसातात्पर्येण स्वविषयकभाव-दृढीकरणात् तत्र हेतुः वदतां श्रेष्ठ इति । यद्वा, रन्तुं मनश्चक्र इति "जगौ कलं वामदृशां मनोहरम्"इत्यादिना तस्य ताभिः सह रिरंसा व्यक्तैव एवं मनस्यन्यदेव धर्मादिपरवाग्विलासैश्च वच-स्यन्यदेवेत्येवमवहित्थया ता विमोहयन् वाक्यार्थनिर्धारणाशक्तेः वस्तुतस्तु वाचःपेशैः सौन्दर्यैरित्युक्तिपरिपाटीमात्रमेव तत् नतु तादृशो भाव इति बोधयत्येव । यद्वा, सर्वत्रान्तर्भूतोऽपि शब्दार्थौ द्रष्टव्यः तथाहि व्रजयोषितः सहजनिजप्रेमपरा अपि तत्रापि ताः तथाभूता अपि तत्रापि तदानीं निजान्तिकमायाता अपि साक्षात् दृष्टापि स्वयं च भगवान् सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत् किमर्थं ? वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः नर्मविशेषार्थमित्यर्थः यद्वा, वाचःपेशैः तासां वाग्विलासैर्हेतुभिः तच्छ्रवणार्थमित्यर्थः यद्वा, पेशैर्निजसौन्दर्यैर्विमोहयन्नवदत् कुतः अकारप्रश्लेषेण अवाचः लज्जया किमप्यवदन्तीरित्यर्थः । अतस्तासां प्रत्युक्तिश्रव-णार्थेति तात्पर्यं कुतः ? वदतां श्रेष्ठः उक्तिभङ्गीकुशलानां स्वत एव परोक्तिचातुरीश्रवणरसिकत्वादित्यर्थः । अन्यत्समानम् एवं सर्वथा वस्तुतो मिथो भावविवृद्ध्यर्थमेव ज्ञेयम्—

"विदग्धा बल्लिपूज्यासु विदग्धालिशिरोमणेः ।
वाचोऽर्थलिखने मे ताः स चानन्यगतेर्गतिः" ॥

इति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अतः परमरसमयरासलीलाप्रसङ्गे ऽस्मिन्नन्तरायाऽनौचित्येऽपि सर्वेषामेकचित्ततासम्पादनार्थमेवेदृशः प्रश्नो भवता कृतः मयापि भवदनुरोधेनैव सिद्धान्तप्रक्रियेयं व्यञ्जितेति व्यञ्जयन् पुनर-प्रार्थितोऽपि स्वयमुत्कण्ठया सहसा प्रस्तुतमेवाह—ता वेणुगीता-कृष्टाः परमविह्वलाः तदेव दर्शयति, व्रजस्य योषितः व्रज एव स्थातुं योग्याः नहि बहिर्वनमागन्तुमित्यर्थः । तत्रापि निजान्तिकमेवायाताः प्राप्ताः नतु लज्जादिना दूरतः स्थित्वा दृष्ट्वा अवदन् वाचःपेशैर्वाग्विलासैः ते च द्विविधाः शाब्दिका आर्थि-काश्च पूर्वे तु सुललितवर्णविन्याससुगमसुभगसमुच्चारणस्मित-ललितश्रीमुखलोचनविलासचालनविशेषादयः उत्तरे रस-भावालङ्कारवस्तुरूपाः एतेऽपि चतुर्विधा उपेक्षाभङ्गिमया प्रार्थना-भङ्गिमयाः मधुगलार्थसन्धापनमयाः वास्तवार्थमयाश्च तथाच सति विमोहयन्निति हृतचित्ताः हृतविवेकाश्च कुर्वन्नित्यर्थो यथायथमूह्यः तत्र पूर्वत्वं शाब्दिकप्रार्थनामयवास्तवार्थमयेषु उपरोक्तत्वं स्वान्ययोः तत्र च शाब्दिकाः स्वभावेन विशेषतस्तु भावेन आर्थिकेषु उपेक्षामयाः स्वस्मिन्नुत्कण्ठावर्द्धनार्थमेव नतूपेक्षार्थं कृताः रन्तुं मनश्चक्रे, जगौ कलं वामदृशाम्मनोहरमित्युक्तत्वात् अत एवैतत् पक्षे वाक्पेशमात्रतो नतु तात्पर्येन इत्यर्थः । एवं "मनस्यन्यद्वचस्य-न्यत्"इत्यवहित्थया तासामुत्कण्ठया विषयणानामस्पादनं तेन च विवेकहरणमिति तत्रापि प्रार्थनामया निजौत्सुक्यमात्र-हेतुकाः मधुगलार्थं सन्धापनन्तु नर्मकौतुकार्थमिति तथा वचने योग्यतां कैमुत्येनाह, वदतां श्रेष्ठः निखिलवाग्वैदग्धीविदां वरिष्ठः यतो भगवान् स्वाभाविकनाहशज्ञानादिभिः सर्वा-तिशायी । यद्वा, सर्वत्रान्तर्भूतोऽपि शब्दो द्रष्टव्यः तथाहि व्रज-योषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि तत्रापि तास्तादृशं प्रेमविकारं प्राप्ता अपि तत्रापि तदानीं निजान्तिकमायाता अपि साक्षाद्दृष्टा अपि स्वयञ्च भगवान् सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत् किमर्थं ? वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः नर्मविशेषार्थमित्यर्थः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रस्तुतमाह—ता दृष्ट्वेति । ता आगता गोपीर्दृष्ट्वा वदतां निपुण-वादिनां मध्ये श्रेष्ठो भगवान् वाग्विलासैर्विमोहयन्नुवाच तन्मनःपरीक्षार्थमाहेत्यर्थः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परीक्षित्प्रश्नं परिहृत्य बुभुत्सितकथाशेषं वक्ति—ता इति । वाचः परिभाषणादुदितैः पाशैः स्नेहलक्षणैः वदतां व्यक्तवाचां कवीनां श्रेष्ठः प्रशस्तमः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ प्रकृतमाह—ता दृष्ट्वादि । भगवानवदत् वदतां वाग्मिनां श्रेष्ठः किङ्कुर्वन् वाचः पेशैः वाचामवयवैः विमोहयन् अव-यवा नानाप्रकारभावाः "पिश अवयवे" इत्यस्मात् ते च स्वीकारताटस्थ्यपरिहारादिभिर्भेदैः निषेधे विधिः विधौ निषेध इत्यादिविपरीतलक्षणार्थः ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रासङ्गिकं परिहृत्य प्रस्तुतमाह—ता दृष्ट्वेति । याः तु समाहूताः समागता ता न निवार्यन्ते याः पुनः सगुणाः समा-गताः अन्यसम्बन्धिन्यः ताः शब्दश्रवणात्समागता इति शब्देन निवारणीयाः अन्यशेषतया भजनमयुक्तमिति करिष्यमाण-लीला तु सर्वभावप्रपत्तिसाध्या अतो निवारणार्थं यत्नमाह—ताः दुहन्त्य इत्याद्याः अन्तिकमायाता दृष्ट्वा स्वार्थमागता इति निश्चित्य भगवान् सर्वज्ञः सर्वसमर्थोऽपि ता अपि व्रज-योषितः अपावृताः स्वकीयाश्च अतः सर्वानुपपत्तिरहिता अपि दृष्ट्वा अवदत् धर्मप्रबोधनार्थं वक्ष्यमाणमुक्तवान् । ननु, ताः पूर्वं निवार्यमाणाः समागताः कथमेतद्वाक्येन निवृत्ता भविष्यन्ति अतो व्यर्थो वाक्प्रयास इति चेत्तत्राह—वदतां श्रेष्ठ इति ये

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

केचिद्वदन्ति तेषां मध्ये श्रेष्ठः अतो हृदयगाम्भस्य वचनं भवति श्रेणी यावद्वचनेन निवृत्ता भवन्ति तावन्न कृतौ योजनीयाः । किञ्च, अलौकिकमध्यस्यानिवर्त्तने सामर्थ्यमस्ति तदाह—वाचःपेशै-र्विमोहयन्निति । वाचः पेशा वाक्सौन्दर्ययुक्ताः शब्दाः तैर्विशेषेण मोहयन् अथवा ता हठाकर्त्तुमेव सम्यक् मोहनार्थं निषेधवाक्यान्युक्तवान् अन्यथा गच्छेयुरेव अतो अर्थतः निवारणेऽपि पर्यवसानतो न निवारयति ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रासङ्गिकं विरोधं समाधाय प्रस्तुतमाह—ता वेणुनादाकृष्टा वदतां कालदेशपात्रौचित्येन वचनचातुर्यवतां मध्ये श्रेष्ठः पेशै-रवयवैः "पिश अवयवे" घञन्तप्रयोगः वाचो अवयवाः वाच्य-लक्ष्यव्यङ्ग्यबोधका ये रूक्षाः स्निग्धाश्च अंशातैर्विमोहयन् वेणुनादेन मोहिता अपि ता विशेषेण मोहयितुम् अत्र ताः प्रति रूक्षो-क्त्यैव भगवतस्त्रयो मनोरथाः सत्यन्ति प्रीतिविषयस्य कान्तस्य ममौदासीन्ये दृष्टेऽप्यासां प्रीतिलेशोऽपि न ह्रसतीति प्रीतिः शुद्धतां लोके दर्शयिष्यामीति तथा सम्प्रयोगे वैपरीत्यमिवाद्य नायिकाधर्ममवहित्थामयं वाम्यमहं ग्रहीष्यामि नायकधर्म-औत्सुक्यप्रकटनमयं दाक्षिण्यमेता ग्राहयिष्यामीति मिलनेऽपि वैपरीत्यं रचयिष्यामीति तथा परमलज्जावतीनां युवतीनां स्वाभाविक्या अवहित्थया सङ्गोपितान्यप्यान्तरीणानि वचनानि प्रकृतिविपर्यासप्रापणया श्रोष्यामीति यद्यपि कामिनीनां कुचाद्य-वयववृन्दं वस्त्रावृतत्वेन गूढमेव चमत्कारकारकमिव तासा-मान्तरीणामौत्सुक्यमपि बाह्यवाम्येनाऽऽवृतमेव चमत्कारकारकं रसज्ञा मन्यन्ते नतूद्घाटितं तदपि कदाचित् कश्चिन्नायकः स्वभाग्याया नायिकाया अनावृतान्येवाङ्गानि यथा दिदृक्षते तथैव वाम्यानावृतमान्तरीणमौत्सुक्यवचनञ्च शुश्रूषते किन्तु पुरुषान्तरस्य स्ववयस्यादेरपि सन्निधौ न दिदृक्षते नापि शुश्रूषते तथैव कृष्णोऽद्यचरानावृतगोपीसर्वाङ्गः सम्प्रति तासां वाम्यानावृतमान्तरीयं वचनवृन्दं शुश्रूषते इत्यत एव नियतमेसखमपि स्वसङ्गिनं तदानीं न चकारेति ज्ञेयम् ॥ १७ ॥

विशुद्धरसदीपिका ।

ततश्चैवं समाहितमाहितचेतसञ्च राजानमाकलय्य प्रकृत-मनुसरति—ता इति । असमोर्द्ध्वसौभाग्याः । यद्वा, ता वञ्चयितुं योग्या इत्यर्थः । तदादीनां प्रकृतप्रसिद्धानुभूताद्यर्थे शक्तेः आन्तिकमायाताः अन्ति समीपे कं सुखम् आयाताः प्राप्ताः शुद्धप्रीति-मयसुखसन्निहिताः । यद्वा, पार्श्वे निजपार्श्वस्थिताऽऽनन्दमूर्तिं श्री-राधामुद्दिश्यागता इत्यर्थः । पक्षे समीपगताः कर्त्तारिकाः स्वय-मागता इत्यर्थः । भगवान् भगो भाग्यं तद्वान् स चाद्यात्मत्वेन वक्ष्यमाणपरमप्रेमास्पदं प्राणप्रिया श्रीराधैव तत्त्वं च "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेः । ततश्च तदिच्छया रासक्रीडासुखाय दत्तवराणां च मनोरथपूर्णार्थं तदिच्छयैव मुरलीकलेन तत्सखीनां साधकचरीणां चाकारणे जाते तस्याः सुहृद्वर्गैः सह तटस्थविपक्षादिवर्गाणामागमने वृत्ते प्राणप्रियायाः प्रणयकोपमाशङ्क्य तामन्वात्मन आनुकूल्यमासु चौदासीन्य-माभिनयन्नवदत् तत्र हेतुः वदतां श्रेष्ठ इति । अनुनयकोविद इत्यर्थः । वाचः पैशैरिति वाग्विलासैरिति टीका स्वरूप प्राण-प्रियायाश्चैकमतप्रदर्शनायेति भावः । यद्वा, "पिश अवयवे" इत्य-नुशासनात् वाचामवयवैरित्यर्थः । ते च नानाप्रकारा अपि तावत् द्विविधाः शाब्दिका आर्थिकाश्च पूर्वे सुललितवर्णविन्याससुगम-सुभगसमुच्चारणस्मितवलितश्रीमुखलोचनाचिल्लीचालनाद्यः परे रसभावालङ्कारवस्तुस्वरूपाः पुनश्च ते द्विविधाः उपेक्षाभङ्गि-मयाः प्रार्थनाभङ्गिमयाश्च तत्र पूर्वे कान्तभाववतीषु आत्मनः औदासीन्यद्योतनेन सख्यभाववतीष्वानुकूल्यप्रदर्शनाय परे च पूर्वासु वैदग्ध्येन प्रतारणाय परासु च प्रोत्साहनायेति च विवेकः, सर्वोऽप्ययं कामवासनाप्रसारणशुद्धभावावधारणरूपः साधक-चरीष्वनुग्रहः तदनुगतेषु साधकेष्वपि च गम्यते अत एव विमोहयन्नित्युक्तं तत्वपसारयन्निति विमोहनमत्र दाम्पत्यसंस्कारा-वशिष्टकामलेशस्थगनमेव सखीनां च । मनोहरणत्वमिति ततश्च यथास्वहृतविवेका हृतचित्ताश्च कुर्वन्नित्यर्थः । यद्वा, सर्वत्रान्तर्भू-तोऽपिशब्दो द्रष्टव्यः व्रजयोषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि तत्रापि ताः तादृशप्रेमविकारं प्राप्ता अपि तत्रापि तदानीं निजान्तिकमायाता अपि साक्षात् दृष्ट्वापि स्वयं भगवानपि सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचः पेशैः कपट-वाक्यैर्विमोहयन् परमवैकल्यं प्रापयन् अवदत् सर्वमिदं काम-कैतवनिरसनायैव अन्यथा प्रेमैकपरवति स्वयं भगवति तस्य-द्विरुद्ध्येत नतु तादृशप्रेमवतीष्वपि कपटपटुतारसभङ्गकरी स्यादित्यत आह—वदतां श्रेष्ठः नर्मोक्तिचतुर इत्यर्थः । प्रहस्य सदयमिति वक्ष्यमाणानुसारेण नर्मोक्तौ पर्यवसाययन्निति भावः ॥ १७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं नृपप्रश्नं समाधाय प्रकृतमाह—भगवान् शुकः, ता इति । तत्र ता इति पुनः पुनस्तत्पदप्रयोगेण वस्तुतस्तु महावाक्यस्य तत्पदबोध्यभगवत्स्वरूपात्मकत्वादात्मारामस्य भगवतो रमण-योग्याः लीलानुसारेण तु ताः पूर्वन्दत्तवराः तथा श्रीवत्सला भगवतापि मुरलिकागानाह्वानेनातिविलक्षणनिरतिशयसौभा-ग्यवत्यः तथा ता हरिवंशोच्चरितगीतश्रवणमात्रेण हृतचित्तास्त-न्निर्वृत्त्या त्यक्तपत्यपत्यगृहकृत्याः तथा ता अतिविलक्षणप्रेमविह्वलि-तचित्तत्वेन व्यत्यस्तवस्त्राभरणाः तथापि रूपमाधुर्यसौष्ठवेनैव मनोहरण्यः तथा ताःब्रह्मादिजयजनितदर्पेण कन्दर्पेण सर्वस्वायुध-सम्पन्नकामगर्वेणया नतया रतिरणाय प्रस्थापिताः व्रजयोषितः इति व्रजस्य स्वभावत एव प्रेमरसान्वितस्य योषित इति शृङ्गार-रसोद्दीपितानुरागाः । यद्वा, व्रजन्तीति व्रजाश्च ता एव योषित इति तथा एवं पुरुषम्मानिनीर्भामिनीः प्रति व्रजन्तीति रस-रीतिः एतास्तु प्रीतिवैक्लव्येन स्वतः तद्रीतिम् विस्मृत्य स्वयं

श्रीरामनारायणकृतभावभावविभाविका ।

व्रजिताः तथा अन्तिकं स्वसमीपमायाताः । यद्वा, अन्ति समीपे कम् सुखम् यथास्यात्तथा आयाताः । यद्वा, अन्ति आत्मने कृष्णाय वा सुखं यथा स्यात्तथा आयाताः यद्वा अन्तिकं साक्षात्स्वयंसमागतं स्वर्गमिवायाता । यद्वा, कं नित्यस्वर्गं लीलाधाम पुलिनाख्यमायाता यद्वा कं नदीजलमिव कं सिन्धुजलं प्रति वा अन्तरनिरुद्धप्रेमप्रवाहाविकसितहृत्कमलाननोत्साहतरङ्गास्फोटितलज्जासेतुबन्धाबहिश्चानिरुद्धगतिप्रवाहाः शोभितमुखकरचरणादिकमला विविधभावविभावकटाक्षादितरङ्गास्फोटितकुलमर्यादादिसेतुबन्धाः घनश्यामस्य वेणुगर्जनपूर्वकरसवृष्टिप्रवृद्धकामजवात्कम् आनन्दसिन्धुमायाताः । यद्वा, अन्ति समीपे प्राप्य कं सुखयितं कृष्णं दृष्ट्वैव कं सुखमायाताः सामाधाविव सुखे निमग्नाः कीदृशं कृष्णं दृष्ट्वा वेदद्रुमे ब्रह्मेव कदम्बमूले वृन्दावनभूम्या विभावितप्रेमप्रकाशविकासितस्वहृत्कमलमिव भ्राजमानमणिकञ्जकर्णिकासने स्थितं तरणिवर्णारुणपदतलेन मृदुतमः श्यामोर्ध्वभागेन नखचन्द्रव्रातश्रियान्वितेन पदद्वयेन स्वभजतामविरोधमात्मानस्तीर्थराजारूपत्वमिवमुक्तभवबन्धादिदोषत्रिवर्णत्रिगुणमायालिङ्गितत्वं स्वाभयेण भव बन्धिकाया अपि मायायाः ततो मोचकत्वं मुक्तेरपि प्रार्थमानस्वसत्त्वोत्कर्षात्मकप्रेमगुणाबन्धकत्वं स्वस्मिन् संलग्नस्वपदकंजाकारप्रतिदलसत्त्वप्रकाशान्वितानुरागपूरितस्वश्यामचक्रव्याङ्कितभक्तहृदत्वानुकारित्वं च दर्शयन्तं स्वपादाब्जाश्रितश्यामचक्राङ्कितगभमृदुपुष्टजङ्घजघनाभ्यां कमलालवालयनिवसितस्वच्छवि भक्तहृत्कमलत्वस्वखण्डैकदण्ड ब्रह्मणाप्यनेकत्वं त्रिभङ्गत्वं च शृङ्गारभावान्वितोपासकानां तु कामेषु कञ्जद्वयसन्धितसन्नमिततदीयधनुर्युगरूपत्वं कञ्जविशोर्द्धमूलसुकुसुमरंभा कृतमृदु विचित्रेन्द्रनीलमणिरचितरूपातिभारनमितकामगृहयुगस्तम्भरूपत्वं वा सुरूपनिधिरक्षकत्वेन स्थापितबहुमणिधरबहुफणयुगमणिधररूपत्वं वाभिनीय व्यञ्जयन्तं तरणिकिरणगणावृतेन्द्रनीलाद्रिद्वयसङ्गमपीताम्बरावृतनितम्बयुगलसन्निहितागाधरूपामृतसरोनाभिनिमग्नामितमदनानुद्धयामदर्शनेन ब्रह्महृदनिमग्नानामनावृत्तिं बोधयन्तं तन्नाभिसरोनिकटोरसि हारमुक्ताहारेण स्वाभ्यवहारव्यवहारमाकलय्य कटितटोल्लासिमणिकिङ्किणिहंसनिकरसुस्वरतया स्वगुणगणमुक्ताभ्यो जीवनं सम्भाव्यमानानां शुकादिपरमहंसानां जीवन्मुक्तानामपि समाधिरूपोपरमादुपरम्य गुणगानपरत्वयोग्यतां सूचयन्तं मुखचन्द्रस्मितचन्द्रिकासम्भाविता श्यामरूपनिशायां मुक्ताहारगङ्गान्तर्गतरोमावलियमुनाधारासम्मावितितीर्थराजतद्वोरद्वन्द्वावाक् चक्रवाकद्वन्द्वस्तनाभ्यां तीर्थसेविनामद्वन्द्वतां भगवदेकाश्रयत्वं च द्योतयन्तं श्यामस्निग्धमृदुपीवरबहुफणामाणिधरभुजाङ्गभुजङ्गभीतशङ्खकण्ठस्थहारगङ्गाद्वारेण भगवन्मुखमुन्मुखतया भीतानामात्मैकशरणत्वं गमयन्तं । यद्वा, भक्तानामविद्यास्मितरागद्वेषाभिनिवेशाख्यपञ्चबाणपञ्चबाणपञ्चबाणवारणनिर्वाणकरणाय बाणयाः परत्वेन निर्वाणस्य आत्मनः कामरूपस्य श्याममृदुमञ्जुपटवेष्टितविविधभूषणमणिजटितपञ्चमृदुलाङ्गुलिसुमनोन्वितभुजयुगनिषङ्गाभ्यामभयम् भावयन्तं वर्तमानचिबुकगम्भीरगर्तावसथ स्मितविचित्रङ्गतरङ्गरङ्गिनं विमलयुगकपोलदोलवोलालकपाशवृत्तमीनाकृतिमणिकुण्डलाभ्यां स्नेहपाशबद्धालिमनोमीनानुकुर्वद्भ्यां शुक्तिनिर्मुक्तव्यक्तमुक्ताकृतनासाश्रितजलजेन अहर्निशसमप्रभनित्यपूर्णामितेन्दुबिन्दुसमीकरणाननचन्द्रेण स्मितसुधया वक्त्रश्रिया च क्षीरनिधिमन्दरं लक्ष्म्या अपि प्रलोभकविद्रुमाधरवदनं वज्रनखमणिविविधभूषणरत्नाकरं रूपसुधासिन्धुं मनोजातिजयाय कृष्णोद्यममालक्ष्य सौभ्रात्रं दर्शयता मनोजचन्द्रेण कृष्णमुखचन्द्रविजयाय विविधभूषणमणिग्रहभगणसैन्यमादाय बहुबर्हचन्द्रकरूपतया मनोजपक्षपूरणोपि तद्ग्रहभगणसैन्यमात्माङ्गीयं सम्पाद्य सुभूषणभूषणाङ्गभूषणतया प्रतिष्ठाप्य तद्बर्हचन्द्रकचन्द्रान्स्वमुखचन्द्रचन्द्रिकया पराभाव्य स्वीयश्यामकान्त्या तद्वाह्याभ्यन्तरमापूर्य शिरोधारणादरेण स्वपक्षे कृत्वा च शिष्टकामरणायोद्यतमालोक्य कं सुखमायातास्ता दृष्ट्वा भगवान् धर्मादिषट्सम्पन्नः धर्मज्ञानविरागपुरस्कारेण रासरतिविहारादौ शृङ्गारैश्वर्ययशोविस्तारेणालुप्तभगः कामविजयाय तद्विरोधिधर्मज्ञानाग्रणी करणेन नीतिज्ञत्वाद्वदतां श्रेष्ठः यद्वा धर्मज्ञानोपदेशात्स्थूणानिखननन्यायेन शृङ्गारानुरागपुष्टीकाराद्वदतां श्रेष्ठः यद्वा विनया विनयानेकार्थकवत्मकथनाद्वदतां श्रेष्ठोऽवदत, किं कुर्वन्नित्यत आह—वाचः पेशैर्विमोहयन्निति । तत्र वाचः पेशैर्वाग्विलासैः यद्वा "पिश अवयवे" इत्यस्मात् वाचामवयवैः तैश्च द्विविधाः मञ्जुवर्णनिवशसुगमसुभगोच्चारस्मितवक्तिलक्षित मुखलोचनभ्रूचालनादयः शाब्दाः रसभावालङ्कारादयश्चार्थिका यद्वा उपेक्षाव्यञ्जकाः प्रार्थनाव्यञ्जकाश्च तैर्विमोहयन् मुग्धाः साधकचरीः प्रागलब्धविहारा गोपीरुत्कण्ठावृद्ध्यर्थमेवोपेक्षणोत्तनेन विभ्रमापन्नाः कुर्वन् मानिनीः पूर्वमपि लब्धविहाराः प्रियाः प्रार्थनाभावेन विशेषेण मोहयन् स्वानुरागविषयमुखदृगपाङ्गदर्शनसुखसमाधिनिमग्नतया विगतदेहाद्यनुसन्धानाः कुर्वन् प्रौढाः कामिनीरसविभावादिकुशला उभयार्थाभिज्ञाः स्वरसिकत्वविविधभावकुशलत्वद्योतनेन विशेषतः स्नेहात्मकमोहपाशैः स्वगुणगणगुणान्वितैर्निबध्नन् ॥ १७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो बहूक्तमितः परमपि प्रश्नोत्तराभ्यां लोकोत्तररसवत्यां भगवद्रासक्रीडाकथायां विच्छेदकाभ्याम् इति ध्यायन् स्वयमेव प्रकृतमनुसरति—ता इति । ताः स्वयं कलगीतेनाहूताः अतः व्रजयोषितो व्रज एव वासयोग्या अपि झटिति स्वसमीपमागता उपलब्धाः । यद्वा, ताः व्रजयोषितः सर्वदा व्रजे एवोपलब्धास्तदानीं स्वस्य वने स्थितस्यान्तिकमायाता दृष्ट्वा वाचः पेशैः विलासैः स्वचित्तानुसारैर्निषेधप्रार्थनार्थप्रतीतिजनकैः पूर्वं कलगीतेन मोहिताः पुनर्विशेषेण मोहयन् अभाषत यतो वक्ता सर्वेषां वक्तॄणां मध्ये श्रेष्ठः यतो भगवान् इदं च व्यामोहोत्पादनं विशेषरसोद्भवाय तथा चेमाः स्वात्मानं धैर्यान्माधाद्धहिरपि प्रार्थयति, तासां प्रेरणापेक्षा वाक्यैरेवोद्दीपनं भवति याः स्वान्तर्गतप्रार्थनावत्योऽपि धैर्यवशात् मानवत्यो बहिर्नीतिं नेतीत्येव वदन्ति तासां प्रेरणा प्रार्थनावाक्यैरेवेत्यन्तस्त्वेणोभयार्थवाक्याभ्यामभिहितवान् पृथक् पृथक् यतो कार्यवाक्यप्रयोगस्य परस्परकद्दोत्पादकत्वेन रसाभासकत्वात् यद्वा, सर्वत्रापि यद्वातमात्रेणार्थ व्याख्येयं व्रजयोषितः साहजिक-

श्रीभगवानुवाच ।

स्वागतं वो महाभागाः ! प्रियं किं(१) करवाणि वः ।
व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणम् ॥ १८ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

प्रेमवशोऽपि ताः प्रेममयं कामविकारं प्राप्ता अपि अन्तिकमागता अपि साक्षाद्दृष्टा अपि स्वयं भगवांस्तासां भावज्ञोऽपि कपटवाक्यै-र्व्यामोहयन् वैकल्यं प्रापयन् अवदत् यतो नर्मोक्तिवादिषु श्रेष्ठस्तथा च नर्मविशेषार्थमेवमभाषत इत्यर्थः । निवृत्तिपक्षे भगवानेव वदतां श्रेष्ठः स्यात् तद्वादिरूपेण वदतामग्रगण्यः स्वाचःपेशैरापातरम्यैर्विलासैः विमर्शाविरुद्धप्रभया विपरीत-सिद्धान्तेन ता ऊहयन् तर्कयन्नुवाचेत्यर्थः ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रासङ्गिकमुक्त्वा प्रस्तुतमाह-ता इति । वदतामुचितवाक्-प्रयोगकुशलानां मध्ये श्रेष्ठः वाचः पेशैरवयवैः तासां स्वान-न्यतानिश्चायकैर्वाग्वयवैरित्यर्थः । "पिश अवयवे" धातुः विमो-हयन् धर्मोपदेशेन स्वसमीपतः प्राच्या च्यावयन्निव ॥ १७ ॥

भाषा टीका ।

भगवान् श्रीकृष्णचन्द्रने उन व्रज स्त्रीन कों अपने समीप आई भई देखि कें बोलवे वारेन में श्रेष्ठ परम चतुर नायक श्रीकृष्णचन्द्र वाणी के विलासन तें उन व्रज स्त्रीन कों मोहित करत यों बोलत भये ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वाः सम्भ्रममागता विलोक्य सस्मयमिवाह-व्रजस्येति ॥१८॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

प्रथममवहित्थयौदास्यमवलम्बमानः सादरमाह-स्वागतमिति । वो युष्माकं शोभनमागमनं वृत्तमित्यर्थः । यद्वा युष्माभिः सुष्ठु आगतं किं महान् भागो भाग्यं पातिव्रत्यादिलक्षणं यासां तासां सम्बोधनम् अतो वो युष्माकं किं प्रियं करवाणि अपितु न किञ्चित् कर्तुं शक्नोमीत्यर्थः । यद्वा, किं करवाणि तदाज्ञापयन्त्वि-त्यर्थः । महाभागानां प्रियाचरणेन ममापि धर्मविशेषो भावीति भावः । एतत् सर्वं स्वत एवौदासीन्यं गमयत्येव लोके प्रायो गौरवेणैवैतादृशप्रश्नप्रवृत्तेः अत एव पूर्वं यज्ञपत्नीः प्रत्यप्येव-मेवोक्तं केवलं तासु ब्राह्मणीत्वेन परमादराद्दास्यतामिति आसु च व्रजाङ्गनात्वेन प्रकृत्यैव प्रियत्वात् प्रियं व इति विशेषः । यद्वा, वः किं प्रियं करवाणीति स्वाक्षाभिमुखोक्त्या ताभ्योऽप्यासु परमौ-दासीन्यमेव सूच्यते वस्तुतस्तु एतासां तादृशागमनं दृष्ट्वा परम-प्रीत्यैवाह-स्वागतमित्यादि । महाभागा इति रासक्रीडया महा-लक्ष्मीतोऽपि सौभाग्यविशेषाभिप्रायेण किंवा सर्वपरित्यागेन तदेकापेक्षया तासामागमनात् स्वस्य च तादृशत्वाभावेन स्वस्मा-दपि महत्त्वविवक्षयोक्तम् अतस्तासां प्रेमपरवशः सन्नाह—प्रिय-मिति । तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमुकुटमणेः स्वाभाविकमेवेति दिक् अत एव यज्ञतत्नीषूकेराषु विशेषः प्रियं व इति युक्त एवेति एवम् आदौ सदाचाररीत्या समागत-जनेषु वक्तुं योग्यमुक्त्वा सर्वा एवयुगपत् ससम्भ्रममागता वीक्ष्य स्वयमपि कैतवेन ससम्भ्रममिव पृच्छति-व्रजस्येति । अनामयं मङ्गलं कच्चित् प्रश्ने । ननु, चतुरसिंह ! तथासति गोपादयोऽप्यागताः स्युरितिचेत् सत्यं तर्हि अङ्गनाविषयकः केषामपि दैत्यादीना-मुपद्रवो नूनं भवेदिति धूर्ततया आशङ्क्येव साटोपमाह-ब्रूतेति । निजागमनस्य कारणं हेतुं प्रयोजनं वा अथवा तदुक्त्यभिप्राया-निर्धारेण लज्जया वा अनुत्तरास्ता वीक्ष्य शोकवेगेनामङ्गलस्या-श्राव्यत्वेन वा किञ्चिदवदन्तीर्मत्वेव किञ्चिदन्यद्वोत्थापयन् सर्वे-षामग्रे पृच्छति-व्रजस्येति । एवं सर्वमग्रेऽप्याशङ्कादिकं कैतवेनैवेति ज्ञेयं तथाप्यवदन्तीः प्रसन्नमुखीश्चालोक्यो स्वस्ततामभिनयन् सलज्ज-मिवाह-ब्रूतेति । शकटकृततृणावर्त्त्यादिनेव मत्पार्श्वेऽत्र रात्रौ प्रायः सर्वासामीदृग्गमनकारणं मदुदुर्वितर्क्यत्वात् यूयमेव स्वयं ब्रूते-त्यर्थः । वस्तुतश्चेयं नर्मभङ्गिरेव एकैव वाक् समुपेक्षामयी सम्प्रार्थनामयी चेत्युक्तं तत्र समुपेक्षामयीत्वं प्रपञ्चितं सम्प्रार्थना-मयीत्वं कथ्यते इदमेव श्लेषार्थतया अग्रे प्रतिश्लोकं ज्ञेयं तथाहि भो महाभागाः ! महान् भागो भाग्यं यासाम् ईदृशी ज्योत्स्नी तत्रापीदृशं वनं तत्रापीदृशोऽनुवर्त्ती जनोऽयमनुकूलः तत्रापीदृशं वो नवयौवनादि इति महद्भाग्यमेव वो युष्माकं स्वागतम् अतो युष्माकं किञ्चित्प्रियं करवाणि । यद्वा, वो युष्माभिः कृत्वा निजेष्टं किङ्करवाणि किमपि साधयिष्यामीति यद्यप्यर्थश्लेषोक्तौ सम्यगत्तरार्थे सङ्गतिर्नापेक्ष्यते तथापि विदुषां सतां प्रीतये कथञ्चिद्दर्श्यतेमहि । किञ्च, युष्माकमागमनेनैव व्रजस्य मङ्गलं व्यक्तम् अतः आगमनकं युष्माकम् आगमनसुखं तदेव अरणं शरणं यस्य तं मां कच्चित् किंब्रूत मया सहालापं किं करिष्यथेत्यर्थः । यद्वा, अव्ययानामनेकार्थत्वात् कच्चित् किञ्चिद्ब्रूतेत्यर्थः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्रथममवहित्थयौदास्यमवलम्बमानः सादरमाह—स्वागत-मिति । वो युष्माकं शोभनमागतं वृत्तमित्यर्थः । यद्वा, वो युष्माभिः सुष्ठु आगतं कच्चिदिति प्रश्ने महान् भागो भाग्यं पातिव्रत्यादिलक्षणम् यासां तासां सम्बोधनम् अतो वो युष्माकं किं प्रियं करवाणि अपि तु न किञ्चित्कर्तुं शक्नोमि

(१) करवाम इति वीर० ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

इत्यर्थः। यद्वा, किं करवाणि तदाज्ञापयन्त्वित्यर्थः। महाभागानां प्रियाचरणेन ममापि धर्मविशेषो भावीति भावः। पूर्वं यज्ञपत्नीः प्रत्यप्येवमेवोक्तं किन्तु तत्रास्यतामिति गौरवं विधाय किं कर्त्तुं शक्नोमि अपि तु न किमपीति केवलमौदास्यमत्र तु प्रियं किमिति श्लेषेण साकाङ्क्षत्वमपीति विशेषः। वस्तुतस्तु एतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह—स्वागतमित्यादि। महाभागा इति सर्वपरित्यागेन तदेकापेक्षया तासामागमनात् स्वस्य च नानाप्रियजनापेक्षया तादृशत्वाभावमननेन स्वस्मादपि प्रेममहत्त्वविवक्षयोक्तं भागोऽत्र भजनम् अतस्तासां प्रेमपरवशः सन्नाह—प्रियमिति। तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमणेः स्वाभाविकमेवेति दिक्। तदित्थमेव परत्र च वस्तुत इत्यादिकम् इति शब्दपर्यन्तो वास्तवोऽर्थो ज्ञेयः। तदनन्तरं तु नर्मादिमयो ज्ञेयः। तथाहि स्वागतमित्यादिना नर्मणा सदाचारमिवाश्रित्य समागतजनेषु वक्तुं योग्यमुक्त्वा सर्वा एव युगपत् ससम्भ्रममागता वीक्ष्य स्वयमपि कैतवेन सभयसम्भ्रममिव पृच्छति—व्रजस्येति। अनामयं मङ्गलं कच्चित्। ननु, चतुरसिंह! तथा सति गोपाद्योऽप्यागताः स्युरिति चेत्? सत्यं तर्हि अङ्गनाविषयकः केषामप्युपद्रवो नूनं भवेदिति धूर्ततया आशङ्क्येव साटोपमाह—ब्रूतेति। निजागमनस्य कारणं हेतुं प्रयोजनं वा। अथवा तदुक्त्यभिप्रायानिर्द्धारणेन लज्जया चानुत्तरास्ता वीक्ष्य मन्ये शोकवेगेनामङ्गलस्याश्राव्यत्वेन वा किञ्चित् न वदथेति व्यञ्जयन् किञ्चदन्यदेव चोत्थापयन् सवैयग्र्यमिव पृच्छति—व्रजस्येति। एवं सर्वमग्रेऽप्याशङ्कादिकं कैतवेनैवेति ज्ञेयं तथाप्यवदन्तीः प्रसन्नमुखीश्चालोक्याध्यस्ततामभिनयन् सलज्जमिवाह—ब्रूतेति। भवतु मद्दुर्वितर्कत्वं यूयमेव स्वयम् ब्रूतेत्यर्थः अत्रैकैव वाक् समुपेक्षामयी सम्प्रार्थनामयी चेत्युक्तं तत्रास्याः समुपेक्षामयीत्वं प्रपञ्चितं सम्प्रार्थनामयीत्वं कथ्यते इदमेव श्लेषार्थतयाग्रेऽपि प्रतिश्लोकं लेख्यं तथाहि हे महाभागाः! महान् भागो भाग्यं यासाम् ईदृशी ज्योत्स्नी तत्रापीदृशं वनं तत्रापीदृशं वो नवयौवनादि तत्रापीदृशोऽनुवर्त्ती जनोऽयमनुकूलः इति महदेव भाग्यमिति तत्रेष्टप्रश्नरूपं प्रार्थनासोपानमाह—कच्चित् वो युष्माकं स्वागतम् प्रार्थनामाह—वो युष्माकं किं प्रियं करवाणि अतो भवतीनां यत् हृद्गतं किमपि प्रियमस्ति तदेव मम प्रार्थनीयमित्यर्थः। तत्र निरुत्तरा वीक्ष्य पुनः प्रार्थनार्थं सोपानान्तरमाह—व्रजस्येति। प्रार्थनामाह—ब्रूतेति। मा लज्जतेति भावः॥ १८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

उक्तमेवाह—स्वागतमित्यादिना इति विप्रियमित्यतः प्राक्तनेन मत्प्रेष्ठानां वो भाग्यं वाचामगोचरमित्यभिप्रायेण सम्बोधयति हे महाभागा इति वो युष्माकं स्वागतमागमनं शोभनं जातं किन्तु व्रजस्यानामयमाधिव्याधिराहित्यं किलेतिप्रश्नः तत्कच्चिदस्मद्विहितमित्यर्थः यद्यनामयं तद्यागमनकारणं ब्रूत तदनामयापादनादुच्यद्धः किं प्रियं करवाम॥ १८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वः किं प्रियं करवाणि युष्माकं यथाभीष्टं कर्तव्यं तत्किं तदभीष्टं जानन्नप्यज्ञ इव पृच्छति—व्रजस्येति। कच्चिद्व्रजस्य स्थानम् अनामयं न आमयो रोगो यस्मिन् तत्तथा॥ १८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

स्वागतमित्यादिकमुत्तरप्रत्युत्तरम्॥ १८—२३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

तत्रादौ स्वीकारपूर्वकमाह—स्वागतमित्यादि हे महाभागाः स्वागतं परमसौभाग्यभाजः! सुखेनागतं प्रियं किं करवाणि वः वो युष्माकं किं करवाणि युष्माकमनुरागोचितं प्रियमीश्वरोऽप्यहं कर्त्तुमसमर्थ एव तेनाहं व ऋणीव इतिस्वीकारः तादृस्थ्यमाह व्रजस्यानामयं कच्चित् आगमनकारणं ब्रूत किमर्थमागतास्थ तत्कथयत॥ १८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

भगवद्वाक्यान्याह—स्वागतमित्यादिदशभिः दशविधानां निवारकाणि तमोरजःसत्त्वभेदाः स्वान्तःपर्यवसानतः निरूप्यन्ते स्त्रियस्तासु वाक्यान्यपि यथायथं प्रथमस्तामसतामसात्त्विक्यो निवार्यन्ते ततस्तामसराजस्यः ततस्तामसतामसस्यः एवमग्रेऽपि विभाज्याः प्रथमं समागतानां लौकिकन्यायेनाह—स्वागतमिति। कुशलप्रश्नोऽयं वो युष्माकमागमनं स्वागतं किमिति स्तुतिमाह, महाभागा इति। भवतीनां महद्भाग्यम् अतः स्वागमनमेव तथापि प्रच्छ्यन्त इति। लौकिकोक्तिः वस्तुतस्तु निष्प्रत्यूहं भगवत्सामीप्यमागता इति समागतानामुपचारमाह—प्रियं किं करवाणि व इति। किञ्चित् प्रार्थयितुमागता इति लक्ष्यन्ते तथा सति तद्वक्तव्यम् अर्थादेतासां नाहं स्वभावतः प्रियः किं तु कामतः प्रिय इति ज्ञापितं तत्प्रयोजनं त्रिविधं भवति इष्टरूपमनिष्टनिवृत्तिरूपं देशकालव्यवहितं कामितं च तत्रापि त्रैविध्यमस्तीति वाक्यत्रयं वा यद्भवत्यो भावन्त्यस्समागताः तत्तत्र किं व्रजे कश्चन उपद्रवो जातः यज्ज्ञापयितुं तासां समागमनं पूर्वपूर्वानङ्गीकारे उत्तरोत्तरवाक्यं यदि प्रियमपि न किञ्चित्कर्त्तव्यं व्रजे च न काप्यनुपपत्तिः तदा आगमनकारणं ब्रूत॥ १८॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अथ स्त्रीपुंसां रसज्ञानां मिलने तावदियं रसरीतिर्यत् पुमांसो रतौत्सुक्यमाविष्कुर्वते स्त्रियस्तु तत्रावहित्थां कुर्वन्तीत्यतस्तामेव रसरीतिं प्रथममाश्रित्य कृष्ण आह—स्वागतं वो युष्माकं कच्चित्सुखमयमागमनं वृत्तं (त) यतो यूयं महाभागाः जन्मारभ्य दुःखस्य मुखं भवतीभिः कदापि न दृष्टमिति भावः। यद्वा, नायं प्रश्नः किन्तु प्रीत्युक्तिस्तो युष्माकं शोभनमागमनमद्य वृत्तं यदत्रागतं तदवश्यकृतं यतो महाभागाः भाग्यवतीनां

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हि सर्वाः क्रिया एव सफलीभवन्त्यः स्वस्य परस्य च सुखदा भवन्तीति भावः । अतो वः किं प्रियं करवाणि अधुना रात्रावत्र निर्जने वने एकाकिना यूना मया युवतीनां वो यत् प्रियमातिथ्यं कर्तुं शक्यं स्यात् तद् ब्रूत युष्मत्प्रियचिकीर्षामपि सारल्येन स्वाप्रियं कृपया स्पष्टं वक्तव्यं यथा निःसन्देहं तत्राहं प्रवर्तयेति भावः । ततश्च भो महासाहसिक ! लम्पट ! अस्मानपि पतिव्रताः यदेवं वक्तुमुत्सहसे तत्किं धर्मतो राजतश्च न बिभेषीति समुचितं प्रत्युत्तरमप्राप्तवता प्रियं किं करवाणीत्यस्य व्यञ्जिते ऽङ्गसङ्गरूपेऽर्थे सम्मतिलक्षणं लज्जाहेतुकं मौनमेव दृष्टवता भगवता विचारितं यद्येताभिः स्वसमुचितं वाम्यमद्य नाङ्गीक्रियते तर्हि मयापि स्वसमुचितमौत्सुक्यं न बहिष्करणीयं किन्तु वाम्याभिभ्रमेव ततश्च सम्भोगभेदे सम्प्रयोगे यथा वैपरीत्यमपि चारु भवति तथैव सम्भोगभेदे संमिलनेपि वैपरीत्यं चारुभवतु किन्त्वासां महामोहनवेणुनादमाध्वीकपानोत्थातिवैवश्यादेव प्रकृतिविपर्ययस्तत एव दाक्षिण्यं मम तु वैवश्याभावात्तदनुरोधादेव कृत्रिमं वाम्यं बहिरेव कार्यमन्तस्तु स्वाभाविकमौत्सुक्यमस्त्वेवेत्यादिकं विचार्य च वाम्यपदवीमारोढुं सभयसम्भ्रमं पृच्छति—व्रजस्येति । कच्चिद् व्रजस्यानामयं मङ्गलं न जाने साम्प्रतं व्रजे कश्चिदिन्द्रादिकृत उपद्रवो वर्तते? यतः सर्वा एव यूयं भीताः पलाय्य स्वत्राणार्थं मदन्तिकमायाता इति भावः । ततश्च कैयमद्यतन्यऽस्य धूर्ततालहरीति मिथः सस्मितसविस्मयावलोकं वितर्कयन्तीषु तास्वहो युष्माकं मौनेनैवावगम्यते नोपद्रवस्तर्हि ब्रूत किमर्थमायाता अहन्तु नाज्यूहितुं समर्थ इति भावः ॥ १८ ॥

श्रीविशुद्धरसदीपिका ।

तानथाह—श्रीभगवानिति । तत्र प्रथमे पक्षे भवद्दिश्यमौदासीन्यमवलम्बमानः सादरमाह—स्वागतमिति । सुष्ठु आगमनं वृत्तमिति प्रश्नः काकुः अनवसरे कथमागतमिति भावः । तथोक्तौ विस्मिता इवालक्ष्याह—व इति । युष्मान् पृच्छामीत्यर्थः । नत्वन्याः काश्चिदिति । ननु, किमस्माकं सकपटादरेणोच्यत आह—महाभागा इति । सौभाग्यादिगुणवतीनामादरस्यौचित्यादिति भावः । अहो किमनेन केवलकुशलप्रश्नवञ्चनेनेत्यत आह—प्रियमित्यादि । मया तु सदाचारप्राप्तमुचितं स्वागतमात्रमनुष्ठितं परिशिष्टमत्र भवतीभिर्वक्तव्यमिति भावः । अत्र वारद्वयं युष्मत्पदप्रयोगो व्यग्रतया सम्भ्रमद्योतनाय अथवा वः स्वागतमात्रमेव मया कर्तुं शक्यते वः प्रियन्तु न किञ्चित्कर्तुं शक्नोमीत्यर्थः । तत्र हेतुः महाभागा इति महाभागाविशिष्टानां मल्लक्षणेन साधारणजनेन किं प्रियं कर्तुं शक्यमिति सोल्लुण्ठम् एवं प्रश्नेन जातलज्जाः परिवर्त्तितदृष्टीरालक्ष्य साकूतमाह—व्रजस्येति । अहो मौनव्रताभिर्वः किमनु किमिति दृष्टिरालुप्यत इति भावः । अहो भीरुप्रकृते ! तथा सति सर्वा एव समागताः स्युरत आह—तर्हि स्वयमेव ब्रूतेति आगमनकारणम् अभिप्रायमित्यर्थः । तदज्ञानेनात्मनस्तत्रौदासीनता सूचिता पक्षान्तरे कच्चिदिति मधुरोक्तौ एतासां तादृशमागमनं दृष्ट्वा परमप्रीत्याह—स्वागतमित्यनुमोदनं भवतीनां स्वामिच्छा

प्राणप्रियया प्रेरितेन मया यथा समाहूतास्तथैव झटिति समागताः इति भावः । अत एव महाभागाः प्राणेश्वरीसमाहृतत्वादिति भावः । अतः परं वः प्रियं मया किं करणीयं न किमपीत्यर्थः । अहो श्रुतमुरलीरवाः सर्वेऽपि व्रजवासिनः आगच्छेयुरिति वैषम्याद्बिभेत्यत आह—व्रजस्येति । अनामयं भयाभावः अत आगमनकारणं रासक्रीडासुखे यदनुष्ठेयं तद् ब्रूतेत्यर्थः ॥ १८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

भगवद्वाक्यमेवाह—स्वागतमिति । तत्रौदासीन्यपक्षे प्रीतिपरीक्षार्थं भगवदौदासीन्येऽपि प्रेमिणामनुरागवृद्धिरित्युपदेशः तथौदासीन्येऽपि सादरभाषणमिति सज्जनयोपदेशाय सादरोक्तिः वः सुष्ठ्वागमनं जातम् । ननु, किमस्यादरः क्रियते? तत्राह—महाभागा इति । यूयं महासौभाग्यवत्यः स्वस्वगृहे प्रतिष्ठिताः प्रतिष्ठार्हाः स्वज्ञातिवर्गैः सौभाग्यवतीनामादर उचित एव । यद्वा, यतो यूयं महाभागा महत्सौभाग्यवत्यः अतो वोऽस्मिन् वने किं स्वागतं सुष्ठ्वागमनमपि तु न तथात्र वः किं प्रियं न किमपीत्याक्षेपः यद्वा औदासीन्येन प्रश्न एव वोऽत्र किमिति स्वागतं किमुद्दिश्य सुष्ठ्वागमनं वृत्तं स्वागतमेवेति चेत्तत्र पुनः प्रश्नः किमत्र वः प्रियमहं न जानामि त्वदधीनमेवास्मत्प्रियमिति चेत्तत्राह—वः किं करवाणि भवत्प्रिये कर्तव्यमपि मया न ज्ञायते । यद्वा, किं करवाणीति मया किमपि कर्तुं न शक्यते । ननु, सर्वदा सर्वापत्सु समन्तात् व्रजरक्षणादिप्रियं त्वयैव क्रियतेऽधुनास्मदागमने किमित्यौदासीन्यं? तत्राह—व्रजस्येति । कच्चिद्व्रजस्यानामयं वर्तते ? कोऽप्युपद्रवस्तु नैव जातः सत्युपद्रवे स्वागमनकारणं ब्रूत प्रार्थनापक्षे तु वः स्वागतं मदाह्वानमात्रेण मदुपरि कृपया मत्कृपया वा वः सुष्ठ्वागमनं जातं यतो यूयं महाभागा महत्सौभाग्यवत्यः स्वसौभाग्येन ममापि भाग्यं वर्द्धयन्त्यः । यद्वा, मदनुग्रहाङ्करदानेन प्रीत्याह्वानेन मदेकान्तदर्शनलाभेन चोद्बुद्धमहाभाग्याः । यद्वा, यूयं ममैव महाभागाः नान्यस्य कस्यचिद्युष्मासु साम्यम् । यद्वा, श्रीमत्या प्रियया महाभागा माहात्म्योऽशाः अतो ममैव योग्याः । यद्वा, महती भा दीप्तिर्यासां ता महाभा आ समन्तात् लोके गानं यासां ताः आगाः आगच्छन्त्यो वा आगा अं वासुदेवं प्रति गच्छन्त्यो वा न कुत्रचिद्गच्छन्त्यो निश्चलमतयो वा आगा ताश्च ताश्च महाभागाः महत्याभा आगता यासु वा सर्वथा प्रियार्हत्वेनाहं वः प्रियं किं करवाणीति प्रियज्ञानेपि प्रश्ने तदिच्छानुज्ञाधीनत्वमात्मनो द्योतयति—व्रजगतबन्धुवर्गभयेनाज्ञापयितुं शङ्कमाना आलक्ष्याह—व्रजस्येति । कच्चिदिति कोमलालापेनाभयद्योतनं व्रजस्येति सम्बन्धसामान्ये षष्ठी व्रजजननिमित्तं वः युष्माकमनामयं चिन्तारोगाभावः तन्निमित्तकचिन्ता न कार्या ते ममामायामोहिताः स्वान्स्वान् दारान् स्वपार्श्वस्थान् पश्यन्तः सुखमासते सेवापराय मह्यं स्वागमनकारणं ब्रूत ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यद्वक्ष्यत्युदाहरति—स्वागतमिति । तत्र त्रिविधाः गोप्यः स्वावतारं विज्ञाय रमणाभिलाषवत्योऽभिज्ञाना: प्रथमाः जारबुद्ध्या तद्वत्योऽनभिज्ञा द्वितीयाः स्वप्रेमातिरेकेण वशीकृतभेष्टाः

श्रीधनपतिसूरिकृतगूढार्थदीपिका।

मानवत्यस्तृतीयाः। तत्राभिज्ञापक्षे वः युष्माकं स्वागतं सुष्ठु शोभनम् आगतम् आगमनं जातं प्रेष्ठसन्निधावागमनमात्रस्यात्यन्तशोभनत्वात् यद्वा, स्वागतमिति कुशलप्रश्नः अतः परमप्रेम्णा समागतानां युष्माकं प्रसन्नोऽहं किं प्रियं करवाणि युष्मन्मनोऽभिलषितप्रियकरणेन भवतीनां सन्तोषस्य सम्पादनीयत्वात् अहो रमणेच्छयाऽऽराधनपराणामस्माकं मन्दभाग्यत्वादद्यापि सर्वज्ञेनाप्ययमभिप्रायो न बुद्ध्यते यतः एवं पृच्छति यद्वा, अस्मत्प्रेममन्दतामालोच्यैवं वदति तस्मादतः परं किं वक्तव्यम् इति विचार्य खिन्नचित्ता आलक्ष्याऽऽश्वासयति, हे महाभागाः! महद्भाग्यं भवतीनां यतो ब्रह्मादिभिरपि प्रार्थनीयं मत्सान्निधानं लब्धवत्यः। यद्वा, माहान्भागो भजनं यासां मत्प्रेमातिरेकाभिनिर्मुक्तानां कथं मत्सम्बन्ध इति भावः। एवमुक्ता अपि लज्जया वक्तुमशक्ताः व्रजाभिमुखीः स्थिताः दृष्ट्वा पुनराह, व्रजस्येति। व्रजस्थसम्बन्धिजनस्योपद्रवोपस्थितौ भवतीनामागमनं जातं स्यादिति मया ज्ञातमतः पृच्छामि व्रजस्य कच्चिदनामयम् उपद्रवाभावः सम्प्रति वर्त्तते एवं श्रुत्वा अहो सर्वज्ञोऽपि भगवानज्ञवत्पृच्छतीति नरनाट्यमालक्ष्य विस्मयेन मन्दस्मितवतीरुपलभ्य स्वयमपि मन्दहासितालङ्कृतमुखसरोरुह आह—ब्रूतेति। आगमनकारणं ब्रूत किमिह तूष्णीमवस्थानेन सन्देहापादकेन स्वाभिलषितप्रार्थनप्रतिबन्धकलज्जाभिभवकारणप्रेमातिरेकसम्पादनार्थं भगवता ताः प्रत्येकमुक्तम् अनभिज्ञापक्षे स्वस्मिन्नासक्तचित्ता अस्मत्कलगीतश्रवणसमकालमेव व्रजाद्बहिर्निःसृत्य स्वसन्निधौ समागताः अतएव तासामन्तःकरणस्थो भावोपि बहिर्निस्सारणीय इत्याशयेन दाक्षिण्यलक्षणा नायका स्वभावतां आहंयितुम् अवहित्थालक्षणनायकस्य स्वभावमङ्गीकृत्याह—स्वागतमिति। वः शोभनमागमनं भवतु यस्मादागमनं सम्यक् शुभसूचकमहं लक्षये यतो हे महाभागाः! महाभाग्यैर्लब्धो महान्भागः स्वपतिभजनं यासां ताः पतिव्रतास्तथा च महाभागानां युष्माकमागमनं मङ्गल्यं सूचयति, इति भावः। अतः आज्ञापयन्तु भवत्यो वः प्रियं किं करवाणि केन प्रियाचरणेन स्वात्मानं कृतार्थं करोमीत्यर्थः। एवं विपरीतमाकर्ण्योद्विग्नमानसाः शुष्यन्मुखारविन्दा अहो वृथैव व्रजात्सहसा निस्सृत्याऽत्र समागता इति पश्चात्तापेन व्रजाभिमुखीरुपलभ्याह—व्रजस्येति। यदि व्रजस्य कश्चिदुपद्रव उपस्थितस्तच्छान्त्या च यदि युष्मत्प्रियं भवति तर्हि वक्तव्यं झटित्येव तच्छान्तिं करोमीति भावः। ननु, भो चतुरशिरोमणे! तथा सति गोपा आगताः स्युरिति चेत्तत्राह—ब्रूतेति। युष्मदागमनेन तत्रत्यस्त्रीणामेव कश्चिदुपद्रव उपस्थित इति तर्कवशान्मैवमुच्यते अतःस्वमुखादपि झटिति तत्कारणं ब्रूत अहो एतत्स्वरूपासक्तचित्ताभिरस्माभिर्व्रजस्य दत्तजलाञ्जलित्वं जानन्नपि फलकाले किमस्मासु व्रजासक्तचित्ततामारोप्यैवं वदतीति स्वमुखारविन्दाभिमुखीरवलोक्याह—ब्रूतेति। वा तिष्ठतु मदीयस्तर्कः स्वयं वक्तुमुद्यता यूयं स्वमुखादेव स्वागमनप्रयोजनं ब्रूतेत्यर्थः। यद्वा, स्वसम्भ्रममाह—वः स्वागतं यतो भवत्यः पतिपुत्रादिसकलसम्पत्सम्पन्नत्वेन महाभागाः तथाभूतानामागमनावकाशरहितानामत्रागमनेन ममातिविस्मयो जातः इति भावः। तस्माद्युष्माकं किञ्चित्प्रियाचरणे मम महत्युत्कण्ठा जातेत्याशयेनाह, प्रियमिति। यत्प्रियं भवत्यः प्रथयन्ति तदहं करवाणीत्यर्थः। एवमुक्ताः नर्मोक्तिमबुद्ध्वा लज्जया स्वाभिलषितं प्रियं प्रार्थयितुमशक्ताः व्रजाभिमुखीरवलोक्याह, अहो ज्ञातं मया व्रजे कश्चिदुपद्रव उपस्थितः स्यात्तद्भयात्पलाय्य स्वत्राणार्थं मदन्तिकमागता अतः पृच्छामीत्याशयेनाह, व्रजस्येति। तथा च तत्र सम्भावितोपद्रवशान्तिरूपं प्रियं किङ्करवाणि इति भावः। एवमुक्ता अहो अस्य धूर्ताधिराजस्याऽद्यापूर्वोऽयं वाग्विलासो द्रष्टव्य इति तर्कयन्ति सस्मितं परस्परं विलोकयन्तीरालक्ष्याह—ब्रूतेति। अहो भवतीनां मौन्येन मिथः सस्मितं निरीक्षणेन चोपद्रवाभावोऽस्ति इति मया ज्ञातमतः स्वमुखादेवागमनप्रयोजनं ब्रूतेत्यर्थः। मानिनीपक्षे तासां दुर्लभदर्शनसंभाषणाः स्वान्तिकमायाता दृष्ट्वातिविस्मितस्वान्तः सोत्कण्ठमाह—स्वागतमिति। अहो युष्माभिः सुष्ठु समीचीनमागमनं कृतम् एतादृशचन्द्रकराभिरञ्जिते समस्तोद्दीपनविशिष्टे वने युष्मदागमनाकाङ्क्षया मदवस्थानात्। ननु, किमित्येवं ब्रवीषि मन्दभाग्यप्रेरिता वयमत्र समागता इति तु कदापि न वाच्यमित्याह—हे महाभागाः! एताऽभिनवयौवनादिमतीनामेवंविधे वने एवंविधेन प्रियेण समागमो महता भाग्येन लभ्यतेऽतो नाऽल्पस्य तपसः फलमिदमिति भावः। एवमुक्ताः नासाकुञ्चनभ्रुकुटिबन्धनपूर्वकम् अवलोकयन्तीरुपलभ्याह—प्रियमिति। अहो नायं कोपकालः किन्तु कोपौदासीन्यादिकं विहाय रमणस्य समयोऽतो येन प्रियाचरणेन भवत्यः प्रसन्नाः भवन्ति तत्किं वर्त्तते तदहं करोमीति दैन्यं व्यञ्जते। यद्वा, किमेवं मुद्रयाऽवस्थिताः यद्युष्माकं मनसः प्रियं तदहं जानामि तदेव च ममापि प्रियं तद्वः प्रियं देशकालानुकूल्ये सति किं करवाणि भवतीनामनुज्ञा वर्त्तते किमिति ससम्भ्रमोक्तिः एवमुक्ताः व्रजाभिमुखीरवलोक्य तासां पलायनं सम्भाव्याह—व्रजस्येति। अहो प्रियाः! प्रियाचरणानुज्ञा किमिति न दीयते किमर्थं वाऽविकसितमुखपद्माः भवत्यः पुनर्व्रजमवलोकयन्त्यतोऽहं पृच्छामि व्रजस्य तु कच्चिदनामयम् एवमुक्ताः किञ्चिद्विकसितवदना ईषत्कटाक्षवतीरवलोक्य सस्मितमाह—ब्रूतेति। आगमनप्रयोजनं झटिति ब्रूत प्रार्थनायां त्रोटुं किं वा वदिष्यन्तीति मयान्मद्भ्रमकम्पमपाकुरुतेति दैन्यं व्यञ्जते सम्प्रत्यभीप्सितकार्येनाशकरीं लज्जां विहाय कथयतेति भावः। निवृत्तिपक्षे आस्तिको भूत्वा वदति स्वागतमिति वः श्रुतीनां सुष्ठु आगतं आगमनं भवति यतो भवत्यो महाभागाः प्रमाणमूर्द्धन्यभूता अतो युष्माकं किं प्रियं करवाणि अभिधेयं किं धर्मक्रिया ब्रह्म तदपि किं सविशेषमुत निःशेषमेकमनेकं कर्मप्राप्यमुपासनाप्राप्यमुभयप्राप्यं केवलज्ञानप्राप्यं कर्मसमुच्चितज्ञानप्राप्यं वा प्रतिपादयामि। ननु, यथा कथञ्चित्किञ्चित् प्रतिपादने को दोष, इत्याशङ्क्याह—व्रजस्येति। व्रजस्याऽपौरुषेयस्य वेदस्याऽनामयं कश्चिद्दोषगन्धोऽपि न सम्भाव्यते ऽपौरुषेयवाक्येषु तथा चेदस्तु नामेति भावः। ननु, आगता एव परब्रह्माणि वयमतः किमिति एवं पृच्छसीत्याशङ्क्याह—ब्रूतेति। स्वागमनवतीनां युष्माकमागमनकारणं विनाऽऽगमनं नोचितमिति कृत्वा तस्य कारणं जातिगुणसम्भावनमतः ब्रूतेत्यर्थः॥१९॥

रजन्येषा घोररूपा घोरसत्त्वनिषेविता ।
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ! ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वपरित्यागपूर्वकं मत्प्राप्त्यर्थं बहुभाग्यलभ्यमित्याशयेन सम्बोधयति-भो महाभागाः ! इति । वो युष्माकं स्वागतं शोभनमागमनं जातम् मां प्रत्यागमनं सद्यः सफलं भवतीत्यभिप्रायेणाह—वो युष्माकं किं प्रियं करवाणीति यद्भयाद्वृद्धत्वादिहागता वयं ते उत्पाताः अत्रापि प्रवर्त्तन्ते किमित्याशयेन पृच्छति-व्रजस्यानामयं कच्चिदिति । यदि कश्चिद्व्रजे उपद्रवो नास्ति तदाऽन्यदागमनकारणं ब्रूतेत्यन्वयः ॥ १८ ॥

भाषा टीका ।

श्रीभगवान् उवाच ।

भगवान् श्रीकृष्णचन्द्र बोले, कि-हे बडभागिनीओ ! तुम्हारो भलो आगमन भयो, अब तुम्हारे आयवे सूं हम तुम्हारो कहा प्रिय करें सो कहो । भला तुम सब जनी कहो व्रज में आनन्द मङ्गल तो हैं, और जब व्रज सर्वप्रकार कुशल है तो तुम अपने आयवे को कारण कहो कि-तुम सब या समय कैसें आई ? ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लज्जया सन्दर्शितमाक्षेपमाह-रजन्येषेति ॥ १९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एषा प्रत्यक्षा प्रत्यक्षत्वमेवाह-घोरं रूपं स्वरूपं यस्याः सा तामसत्वात् । किञ्च, घोरैः सत्त्वैः प्राणिभिर्नितरां सेविता व्याप्ता अतः प्रतियात निवृत्य गच्छत नात्र विलम्बो युक्त इत्याशयेनाह, नेति । इह वने । किञ्च, हे सुमध्यमाः ! सुन्दरीभिरस्मिन् भयानके काले स्थाने च स्थातुं न युज्यत एवेति भावः । अन्यत्तैर्व्यञ्जितमेव । यद्वा, ननु रसिकशेखर ! भवानिव वयमप्यत्र विहर्तुं पुष्पाद्याहर्तुं वा आगताः स्म इति चेत्तत्राह—रजनीति । एषा रजन्येव न तु दिनम् । ननु, रात्रिविलासिन् ! ततः को नाम दोषः तत्राह-घोरेत्यादि । स्वभावतो भयजनिका तत्रापि घोरसत्त्वैर्निषेविता । यद्वा, हे कमललोचन ! ज्योत्स्नीयं रात्रिः तत्राह-घोरसत्त्वेति । अतः स्त्रीभिरिह वने न स्थेयं स्थातुं न योग्यमिति व्रजं प्रतियात श्लेषेण यूयं यूथशो बहवो व्रजं पुरुषसमूहं स्वपतीनिति यावत् प्रतियात भजत एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात् अतोऽत्र न स्थेयमिति नर्मविशेषः ननु, भीरुप्रवर ! घोरसत्त्वेभ्योऽस्माकं न भयं तत्राह—सुमध्यमाः हे कृशमध्याः ! तनुमध्यत्वात् कृशाङ्गीनामबलानां बलिष्ठेभ्यो भयं स्यादेवेति भावः वस्तुतस्त्वेतत्तासां स्वविषयकमाक्षेपं दृढीकरणार्थं किम्वा तन्मेधा उत्कण्ठाविवर्द्धनार्थं श्लेषार्थश्चायं घोरसत्त्वादिना अत्र न कोऽप्यागमिष्यतीति भावः । यद्वा, एषा उदितपूर्णचन्द्रा जनान् रञ्जयतीति रजनी अघोररूपा तमोऽपगमात् यद्वा, शान्ता आसन्नशुद्धसात्त्विकमङ्गलमासकार्तिकसम्बन्धात् इति रासमङ्गलयोग्यत्वम्, किञ्च, न घोरैः रसविघातकत्वेन भयजनकैः सत्त्वैर्युष्मत्पत्यादिभिर्निषेविता । यद्वा, अघोरैर्मृगादिभिः स्वभावेन मिथो मित्रत्वप्राप्त्या भयजनकैरेव सत्त्वैः सर्वप्राणिभिः किम्वा अघोरैः सत्त्वैर्हरिणमयूरादिभिरेव रतिजनकैः यद्वा, घोरं दुष्टानां भयजनकं किम्वा अघोरं केषाञ्चिदपि जनानां भयजनकं सत्त्वं बलं यस्य ममेति बालाऽऽश्वासनार्थः किं वा अघोरं शान्तं सुखदं स्वभावो यस्य तेन मया निषेविता इति निजवैदग्धीविज्ञापनम् अतः सर्वथा व्रजं न प्रतियात इहैव स्थेयं युष्माभिः कुतः स्त्रीभिः तत्रापि हे सुमध्यमाः ! परमसुन्दरीत्वात् मदन्तिक एवात्र स्थातुं युज्यत एवेत्यर्थः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एषा प्रत्यक्षेति तासां तर्कवाग्मितामाशङ्क्य दृढयति—ततः कुलवधूनां बहिर्वनादावागमनं नोचितमिति भावः । ननु, समुदित्य बह्वीनामागमनं न दोषभाक् यदि च दोषभाक् तर्हि व्रजेऽपि किमेषा रजनी नास्ति ? तत्राह-घोरेति । इह वन एव घोरं रूपं तामसस्वभावाभिव्यक्तिर्यस्या न तु व्रजे इहासहायत्वात् तत्र ससहायत्वादिति भावः । तथा इह घोरैः प्राणिभिर्नितरां सेविता व्याप्ता च अतो व्रजं प्रतियात निवृत्य गच्छत नात्र विलम्बो युक्त इत्याशयेनाह—नेति । ननु, तर्हि कथमत्र भवता स्थीयते तत्राह—स्त्रीभिरिति । ननु स्त्रिय इव पुरुषा अल्पसत्त्वा इति भावः । किञ्च, हे सुमध्यमाः ! इति "यत्राकृतिस्तत्र गुणा वसन्ति" इति न्यायेन सुन्दरीणां गुणवतीनां च भवतीनामत्रावस्थानं न युक्तमिति भावः । अन्यत्तैः यद्वा, ननु रसिकशेखर ! भवानिव वयमप्यत्र विहर्तुं पुष्पाद्याहर्तुं वा समागताः स्म इति छद्मना तासामवस्थितिमाशङ्क्याह—रजनीति । एषा रजन्येव न तु दिनं ननु, रात्रिविलासिनः ततः को नाम दोषः तत्राह-घोरेति । हे कमललोचन ! ज्योत्स्नीयम् रात्रिः तत्राह-घोरसत्त्वेति । श्लेषेण यूयं यूथशो बहवो व्रजं तत्र स्थितान् स्वपतीन् प्रति यात भजत एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात् अतोऽत्र न स्थेयमिति नर्मविशेषः ननु, भीरुप्रवर ! घोरसत्त्वेभ्योऽस्माकं न भयं तत्राह—सुमध्यमाः ! हे कृशमध्याः ! तनुमध्यत्वात् कृशाङ्गीनामबलानां बलिष्ठेभ्यो भयं स्यादेवेति भावः । वस्तुतश्चैतत्तासां स्वविषयकभावस्य व्यञ्जनार्थः नर्मणा उत्कण्ठावर्द्धनार्थं च श्लेषार्थश्चायं भयस्वभावनया च निजाभीष्टं मा निवर्त्तयतेत्याह—प्रथमार्द्धेन । एषा उदितपूर्णचन्द्रा जनान् रञ्जयतीति रजनी घोररूपत्वाविष्करोतत्स्वभावम् न कोऽप्यागमिष्यतीति भावः । तस्मादिह मम वीरस्यैव सन्निधौ

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्थेयम् यद्वा, अघोररूपा तमोऽपगमात् अघोरैर्वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाजनकैरेव सत्त्वैः सर्वप्राणिभिः दिवसप्रायत्वादस्या ज्योत्स्न्या अघोरैः सत्त्वैर्भ्रमरकोकिलादिभिरेव वा निषेविता । यद्वा, घोरं दुष्टानां भयजनकम् अकारविश्लेषेण अघोरं केषाञ्चिदपि भयाजनकम् वा सत्त्वं बलं यस्य मम तेन निषेवितेति वाचाऽऽश्वासनार्थं तच्छ्रुत्वा पृष्ठवर्त्तिनीः सखीः सस्मितं परावृत्त्य पश्यन्तीः प्रत्याह—उत्तरार्द्धेन । अतः सर्वथा व्रजं प्रति न यात इहैव स्थेयं युष्माभिः कुतः स्त्रीभिः स्त्रीजातीनाम् इहस्थान एव स्थातुं योग्यत्वादित्यर्थः । तत्रापि च हे सुमध्यमाः ! परमसुन्दरीत्वान्मदन्तिक एवात्र स्थातुं युज्यत एवेत्यर्थ इति ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लज्जाप्रयुक्तमन्दहासमाचक्ष्याह—रजनीति । एषा रात्रिः स्वयं भयङ्करा भयङ्करैः सत्त्वैर्व्यालव्याघ्रादिभिर्निषेविता सहाचरिता च अतो व्रजं प्रति गच्छत हे सुमध्यमाः ! इहास्मिन्वने रात्रौ स्त्रीभिर्न स्थातुं युक्तम् ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यत्किञ्चिन्निमित्तमपेक्षते भवदागमनम् अन्यथा ऽस्या अवस्थायां नोचितमिति तत्राह—रजनीति । घोरसत्त्वा राक्षसादयः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

परिहासपूर्वकनिषेधे विधिमाह—रजन्येषा इत्यादि । एषा रजनी घोररूपा यतः घोरैः सत्त्वैः प्राणिभिर्निषेविता तस्माद्गृहं प्रति यात इह स्त्रीभिर्न स्थेयं स्त्रियः स्थातुं नार्हन्ति अथवा स्त्रीभिः सह मया न स्थेयम् यूयं चेन्न गच्छत तदाऽहमेव गमिष्यामीति तत्रावस्थानं प्रति निषेधः गृहं प्रति यातेति विधिः पुनर्निषेधविध्योर्विधिनिषेधावश्चैव रजन्येषा अघोररूपा चन्द्रिकाविशदत्वात् अघोरैः शान्तैर्मृगादिभिः सत्त्वैर्निषेविता तस्मात् भयाभाव एवात्र तेन गृहं न प्रति यात इह वृन्दावने स्त्रीभिर्भवतीभिः स्थेयं इतःपरम्वृन्दावन एव स्थेयं गृहं नागन्तव्यमित्यर्थः । हे सुमध्यमाः ! यद्वा, स्त्रीभिः स्त्रीणां मध्ये ईभिः लक्ष्मीभिः स्त्रीणां लक्ष्मीभिरिति वा ॥ १९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्राप्यनुसरे स्वयमेव पक्षान्तरं कल्पयति, यथा भवन्तः समागताः तथा वयमपीत्याशङ्क्याह—रजनीति । एषा रजनी न तु दिनं दिवस एव ह्यरण्ये कार्यार्थं गम्यते अयं तु चन्द्रः न तु सूर्य इति भावः । नन्वस्तु रजनी तथापि प्रकाशस्य विद्यमानत्वात् आगन्तव्यमेवेति चेत्तत्राह, घोररूपेति । प्रकाशयुक्तापि एषा वस्तुतो घोररूपा भयजनिका प्रकाशयुक्तायामपि रात्रौ गच्छन् पुरुषो बिभेतीति किञ्च, घोरसत्त्वनिषेविता घोराण्येव सत्त्वानि रात्रिं निषेवन्ते न त्वघोराणि अतो रात्रावघोरो निर्गतो घोरैरुपहन्यते अतः स्वभावधर्मसंसर्गिणां स्वरूपं ज्ञात्वा व्रजं प्रति यात, नन्वेवं सति तवैव स्थाने स्थास्यामः परिचितो भवानिति चेत्तत्राह—नेह स्थेयं स्त्रीभिरिति । वयं हि पुरुषाः रात्रिश्चेयं अतोऽत्र स्त्रीभिर्न स्थातव्यं तथा सत्युभयोरपि विक्रिया स्यात् किञ्च, भवत्यो यदि वृद्धा बाला वा भवेयुस्तदा स्थातुम् अपि भवत्यस्तु सुमध्यमाः रसात्मिकाः अतो देहाध्यासे विद्यमाने सर्वथैव गन्तव्यं स्थितिपक्षे नञ् प्रश्लेषो घोरपदयोर्द्वयं न प्रतियातेति च ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हन्त हन्त कुलधर्मधैर्यलज्जादिकं ध्वंसयित्वा प्रतिदिनमस्मानुपभुञ्जानो ऽयमद्य वेणुनादेनाकृष्यानीय कारणं पृच्छतीत्यपाङ्गचालनैरेव परस्परमाचक्षाणासु तासु सत्यं देवपूजोपयोगिरजनिविकासिपुष्पाहरणार्थमागच्छामेति किं वताक्षपाङ्गनिक्षेपेण ब्रूध्वे अयुक्तमिदं कालदेशपात्रानौचित्यादित्याह—रजनीति । एषा चन्द्रिकाबहुलापि घोररूपा रात्रित्वादेवेति वल्लिमूलपल्लवादिषु सूक्ष्मसर्पवृश्चिकादेर्दुर्लक्ष्यत्वात् पुष्पाहरणस्य कालोऽयमनुचित इति भावः । घोरसत्त्वा व्याघ्रादयस्तैर्निषेवितेति कालसम्बन्धेन वृन्दावनदेशोऽप्ययमनुचित इति भावः । तस्माद्व्रजं प्रति यात । ननु, क्षणं विश्रम्य यास्यामस्तत्राह, नेह स्त्रीभिः स्थेयमिति कालदेशसम्बन्धेन युष्मल्लक्षणानि पात्राण्यप्यनुचितानीति भावः तत्रापि हे सुमध्यमाः! इति यूयं सुन्दर्यो युवतयः स्थ अहं च सुन्दरो युवैवात्रास्मि यद्यपि यूयं परमसाध्व्य एव अहं च "कृष्णो ब्रह्मचारी" इति गोपालतापिनीश्रुतिप्रामाण्येन ब्रह्मचार्य्येवेति सदाचरणेनापि न कश्चिद्दोषस्तदपि मनः खल्वविश्वास्यं युष्माकं मम चेति भावः एवं व्याञ्जितमन्तरौत्सुक्यं श्लिष्टार्थेनापि स्पष्टीभवति तद्यथा आगमनकारणं लज्जया न ब्रूध्वे चेन्मा ब्रूत तदहं जानाम्येव तस्मात्सर्वं शृणुतेत्याह—रञ्जयतीति रजन्येषा चन्द्रिकामयत्वादघोररूपा तस्मादेवाघोरसत्त्वैर्मृगादिभिरेव वृन्दावनस्वभावेनाहिंसत्वाद्व्याघ्रादिभिरपि वा निषेवितेति तेनात्र भेतव्यमिति भावः । यद्वा, नात्र स्वस्वपत्यादिभ्यो भेतव्यं यतो घोरसत्त्वनिषेवितेति तेऽत्र नागमिष्यन्तीति भावः । अतो व्रजं प्रति न यात इह मदन्तिके स्थेयं कुतः ? स्त्रीभिः किं स्त्रीमात्रमेव स्वान्तिके स्थापयसीत्यत आह, हे सुमध्यमाः ! इति सौन्दर्ये तारुण्ये च सति याः स्त्रियः शोभनमध्यदेशा भवन्ति ताभिर्भवतीभिरेव नान्याभिः स्थेयमिति भावः एवमुपेक्षामयाः अपेक्षामयाश्चार्थाः कृष्णोक्तीनां ज्ञेयाः ॥ १९ ॥

विशुद्धरसदीपिका ।

प्रथमे पक्षे । ननु, व्रजे वने वाऽस्माकं समागमावजञ्जायेत एव किमागनकारणजिज्ञासयेत्यत आह—रजनीति । कुलाङ्गनानां रजन्यां बहिर्गमनमनुचितमिति भावः । ततः किमत

विशुद्धरसदीपिका।

आह-घोररूपेति। रतिलम्पटपाटच्चरादिघोरप्रकृतिजनैर्व्याप्तेत्यर्थः। ननु, मनसि परिशुद्धे न कोऽपि दोषः तत्राह—घोरत्वादि घोरत्वं हि रजसो धर्मस्तेन चापलं लक्ष्यं तच्च युष्माकं अकीर्तिकरमिति भावः। ननु, जातमेव किं तदनुतापनस्यत आह-प्रतीतिप्रमादेनानुचरितं पुनः सम्यगाचरणीयमिति भावः। ननु, झटिति गन्तुं न शक्नुमस्तत्राह—नेति। इह न स्थेयं, कुतः? स्त्रीभिरिति परस्त्रीभिः परपुरुषसान्निध्येऽवस्थानं न विधेर्विषय इति भावः। ननु, पुंसः प्रकृत्यात्मकं जगदिति न्यायात् को विरोधस्तत्राह-सुमध्यमाः सुन्दरीभिरात्मच्छायातोऽपि शङ्कनीयमिति भावः। पक्षान्तरे ननु, लोकापवादभिया व्रजं प्रतियानमेवोचितमस्माकमित्यत आह--रजनीति। दिवसे गन्तव्यमिति भावः। इदानीं का भीतिस्तत्राह-घोररूपेति। प्रकृतिदुर्गमेत्यर्थः। ततः किमत आह—घोरैः सत्त्वैर्व्याघ्रादिभिः सेवितेति। ततः किं विधेयमत आह-व्रजं न प्रतियात कुत्र स्थेयमत आह-इहेति। ननु, रतिलम्पटस्य भवतः शङ्कनीयत्वादनुचितमित्यत आह-स्त्रीभिः नहि बहूनामेकत्र स्थितौ लोकापवाद इत्यर्थः। किञ्च, निरपत्रपत्वे सति भवत्यपवादः भवत्यस्तु सुमध्यमाः सुशोभने मध्ये मान्ति निलीयन्त इति लज्जया स्वाङ्गेष्वेव निलीना इत्यर्थः। अथवा एषा उदितपूर्णचन्द्रा जनान् रञ्जयति अनुरागं वर्द्धयतीति रजनी अकारप्रश्लेषः अघोररूपा तमोऽपगमात् तथा अघोरैः वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाजनकैरेव सत्त्वैः सर्वप्राणिभिर्निषेवितप्रायत्वात्। यद्वा, अघोरसत्त्वैः भ्रमरकोकिलादिभिर्निषेविता वस्तुतस्तु अघोरसत्त्वैः सौहृदाक्रान्तमानसैर्भवादृशैः परिकरैरेव नितरां सेविता सेवितुं योग्येत्यर्थः। अतो व्रजम् अनेकभावानां समूहं न प्रतियातः तत्प्रतिक्रियां सङ्कोचं वा न कुरुत श्रीवृन्दावनगुणैरेव शुद्धसख्यावेशो भविष्यतीति भावः—

> "वृन्दावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम्।
> यत्र नैसर्गदुर्वैरा सहासन्नृमृगादयः॥
> मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम्"॥

इति प्रागुक्तेः अस्यार्थः वृन्दावनमिति ब्रह्मवैवर्त्तोक्तेषु श्रीराधिकाषोडशनामसु वृन्देति तन्नामोक्तेः श्रीराधावनमित्यर्थः तानि यथा—

> "राधा रासेश्वरी रासवासिनी रसिकेश्वरी।
> कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी॥
> कृष्णवामाङ्गसम्भूता परमानन्दरूपिणी।
> कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी॥
> चन्द्रावली चन्द्रकान्ता शतचन्द्रनिभानना"॥ इति

वृन्दावनस्यास्तु तयैव प्रसादितत्वादिति प्रसिद्धं कीदृशं जनाजीव्यः सखीजनाः "नामैकदेशे नामग्रहणम्" इत्यनुशासनात् सत्यभामावत् तेषामाजीव्या ये कुञ्जद्रुमास्तत्तल्लीलाप्रकाशकत्वात् तैराकीर्णं सर्वतो व्याप्तं तथा "मा शब्देनोच्यते राधा तया सह कृतः समः" श्रीकृष्णस्तस्य मा सर्वतः प्रियं तत्रैवानवरतस्थितेः पुनः कीदृशं यत्रेति, नृमृगादयोऽत्राधिष्ठानाधिष्ठेययोः अभेदोपचारात्सपद्रसाभ्यया एवोच्यन्ते अयं भावः सिंहं दृष्ट्वा नराणां भयं तान् दृष्ट्वा सिंहस्य क्षोभः तयोर्व्याध्यबाधकता भवत्येव अत्र तु शुद्धे प्रेमैकदेशे तदभाव इति तत्र हेतुः अजितेति अजितः रसान्तरैरनाक्रान्तः शुद्धः प्रेमा तदावासेन निजनिवासेन द्रुता निरस्ता रुट् तर्षश्च तदादयोऽन्ये च गौणा रसा यत्र तस्मिन् अयं भावः सापत्न्ये रुट् परकीयात्वेऽनेकनायिकात्वे च तर्षः अत्र तु "गोप्यैकया युतस्तत्र परिक्रीडति निस्पृदा" इति ब्रह्मयामलोक्तेरेकनायिका स्वाधीनपतिका साम्राज्ये तयोरभाव इति सङ्क्षेपः। विस्तृतमिदं भक्तिमञ्जूषायां। तर्हि किं विधेयम? इह मयाऽऽरब्धे रासक्रीडाविशेषे एव स्थेयम्। ननु, वयं न तद्योग्या इति सोत्प्रासोक्तिमाशङ्क्याह-सुमध्यमा अतिसुन्दर्य इत्यर्थः। एतज्ज्ञात्वैव मम प्राणप्रियया आकारिता इति भावः॥ १९॥

श्रीरामनारायणकृतभावभावविभाविका।

औदासीन्यपक्षे तु भगवता पूर्वमागमनकारणप्रश्नेऽस्माभिः गोपजातितया व्रजे वने वाऽऽगमनादि क्रियत एव किं कारणं प्रश्नेन? तत्राह—रजनीति। दिने सम्भवत्यप्यागमने रात्रौ तदनौचित्यमेव ननु कोऽत्र दोषः? तत्राह—एषा घोररूपा तत्रापि हेतुः घोरैः सत्त्वैः प्राणिभिर्निषेवितेति, तर्हि किं कुर्मः? तत्राह—व्रजं प्रति यात. वार्ट यास्यामः, किं त्वरया? तत्राह—नेह स्थेयं, त्वया कथं स्थीयते? तत्राह, स्त्रीभिरिति। पुरुषस्य गोचारिणो ममावस्थानसम्भवेऽपि न स्त्रीभिः स्थातव्यमिति भावः। स्त्रीभिरपि वन्यशबर्यादिभिरवस्थानमाशङ्क्याह, सुमध्यमा इति। अयम्भावः अन्येषु घोरसत्त्वैर्व्याघ्रादिभिरेव भयं सुन्दरीणां तु तैरपि भयं घोरं रजसा कामेन व्याप्तमन्तःकरणं येषां तैरपि भयं तादृशैर्निषेवितायां रजन्यां सुमध्यमाभिरिह वने न स्थेयमेव प्रार्थनापक्षे तु प्रियं किं करवाणि व इति प्रियाचरणानुज्ञाप्रश्ने किं ब्रूमो जनाः दूरात् द्रक्ष्यन्तीति चेत्तत्राह—घोररूपेति। गृहसुखं परित्यज्य मद्रतिपराणामेवैषा रजन्यघोराऽन्येषां तु घोररूपेति नहि कश्चिद्बहिर्निस्सरतीत्यभिप्रायः तत्र हेतुः घोरसत्त्वैर्व्याघ्रवृकादिभिर्निषेवितेत्यर्थः। यद्वा, घोराणि (निद्रा)तमोव्याप्तानि सत्त्वानि अन्तःकरणानि येषां व्रजवासिनां तैर्नितरां सेविताः सर्वे सुप्ताः न कोऽपि जागर्तीति भावः। यद्वा, प्रियाचरणानुज्ञायां प्रोत्साहयति एषा रजनी मनोरञ्जनी मदनप्रेमोत्साहप्रफुल्लितयुष्मदङ्गवल्लिविकसितविविधकुसुमसुरभिवासितशीतमन्दसमीरभवन्मुख—सदृशपूर्णचन्द्रस्मितानुकारिचान्द्रिकाद्युद्दीपनविभावैः भवद्दर्शनाद्यालम्बनविभावैर्मनोह्लादिनी। ननु,रजनी प्रतिदिनान्ते भवत्येव कोऽस्य विशेषस्तत्राह,अघोररूपेति। दिनमातपतापेन घोररूपं भवति रात्रिस्तु तमसा इयं तु पूर्णचन्द्रान्वितत्वेन न तथा किन्तु अघोररूपेति भावः। यद्वाऽन्या रजन्यो युष्माकमस्माकं च परस्परविरहेण घोररूपा प्रियादर्शने कुसुमानि कामशरवद्धृच्छेदकानि तादृक्समीरः शोषसुखश्वासश्चन्द्रः प्रलयार्कसन्निभः एवं घोराणि सर्वाणि रूपाणि यासु तथा भवन्ति इयन्तु प्रियदर्शनेनाघोररूपेति भावः। उत्कर्षान्तरमाह, अघोरसत्त्वनिषेवितेति। अघोरैः शोभनैः पिकचातकमधुकरहंसादिभिर्निषेविता यद्वाऽन्या रजन्यः घोरैरजस्तमोमयैर्वैतालासुरादिभिर्निषेविता भवन्ति इयन्तु विलक्षणा अघोरैः सत्त्वात्मकैर्भवद्गानादिदर्शनयशोगानोत्सुकैर्विविधैर्वनचरविहङ्गमैः

श्रीरामनारायणकृतभावभावविभाविका ।

गन्धर्वादिभिर्निषेविता यद्वा, अघोरं सत्त्वमन्तःकरणं येषां तैर्निषेवितेति न कोपि विहारविरोधी यद्वा, अघोरं रजस्तमोभ्यामामिश्रं यन्मदीयं सत्त्वं तेनैव निषेविता न प्राकृतरजनीनामिव त्रिगुणात्मिका यद्वा, अघोरं घोरगुणा प्रकृतिस्तद्रहितं यत्सत्त्वं सत्तामात्रं तेन निषेविता तदात्मिका लीलाधारिणि माया गुणाप्रवेशात् । ननु, समागमो जातः अद्य व्रजं गत्वा श्वो भाविन्यां रजन्यामागमिष्यामस्तत्राह, हे सुमध्यमाः ! व्रजं प्रति न यात व्रजं गोपनिवासस्तं प्रति न यात गोपास्ते रसानभिज्ञाः न सुमध्यमानां भवतीनां मनो रञ्जयितुं योग्याः किन्तु स्त्रीभिर्भवतीभिर्विविधरतिरसाभिलाषवतीभिरिहैव रसिकशिरोमणेर्मम सन्निधावेव स्थेयमिति भावः । यद्वा, व्रजतीति व्रजः नश्वर ऐहिकगृहादिरामुष्मिको जातिकुलधर्मफलभूतस्वर्गादिश्च तं प्रति न यात किन्तु इहैव नित्ये मदनुरागलीलासुखे एव स्थेयं "व्रज गतिनिवृत्तौ" इत्यस्मात् नित्यास्थितिः कार्या चले व्रजे ऐहिकामुष्मिकरूपे गत्यभावात्मकस्थित्यसम्भवात् स्त्रीभिरित्यस्याप्ययमभिप्रायः स्त्रीभिः पुरुषसमीपे एव स्थेयं न कोपि मदन्यः पुरुषः "एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते" इत्यादिना नश्वरव्रजस्य जीवघनस्यागेन परं पुरुषेक्षणस्य श्रुतिसिद्धत्वात् किञ्च, यतो यूयं सुमध्यमाः सुष्ठु सूक्ष्मकट्यः अत एव इहैव स्थेयं सुसध्यमानां रसानां स्वानभिज्ञव्रजगोपरतिभारसहिष्णुत्वासम्भवात् यद्वा सुष्ठु मध्ये हृदि मा मद्विषया यथार्था मतिर्यासामपि निबद्धमतयः यद्वा, सुष्ठु मध्ये समस्तदेहमध्ये मा शोभा यासां शोभितसमस्ततनवः यद्वा सुष्ठु मध्ये यूथेश्वरीतया वर्तमाना मा मन्निलप्रिया यासामिति मत्प्रियाऽन्विताः यद्वा, सुष्ठु स्वांशप्रवेशेन मध्येऽनुगता मा मत्प्रिया यासामिति मामकसन्निधावेवावस्थितिः समुचितेति भावः ॥ १९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवमुक्ताः लज्जाविष्टमानसाः किञ्चिदपि वक्तुमक्षमा अवलोक्य प्रेमोद्दीपनार्थमीषत्कर्णकठोरं वाक्यमाह-रजन्येषेति । युष्माकं मौनेन कारणाभावो मया ज्ञातो निष्कारणं वागमनमुन्मत्तचेष्टितसमन्तस्माद्वृथागमनवद्वृथावस्थानस्याप्यनुचितत्वात् इह वने न स्थेयं यज्जातं तत्तु जातमिति मास्तु वृथा चेष्टितमिति भावः । तर्हि किं सफलचेष्टितमित्यपेक्षयामाह-व्रजं प्रति यात गच्छत गत्वा गृहकृत्यपरता सम्पाद्येति भावः व्रजमित्यनेनाऽऽगमनस्यापि निष्फलत्वं सूचितम् । ननु, भवतु क्षणमात्रं स्थित्वा गमिष्याम इति चेत्तत्राऽऽह—रजनीति । एषा उपलक्ष्यमाना तथा च सरुषं नेत्राण्युन्मील्य द्रष्टव्या एषा रजनी वर्तते न तु दिनं दिनादौ विलम्बेऽपि कृते उत्तरोत्तरप्रकाशसाहुल्यसम्भावनाऽस्ति बाधा रजन्यां त्वग्रोत्तरोत्तराऽन्धकारबाहुल्यसम्भवाद्विलम्बो नोचित इति भावः । किं च ज्योत्स्नाकुलापि घोररूपा रात्रित्वादेव तथा च महानिशीथागमे गमनमप्यशक्यं न दुर्घटं भविष्यतीति भावः । ननु, भवत्यत्र तस्याप्यकस्मादागताः फलमूलादिकं किञ्चिदादाय यास्याम इति चेत्तत्राह घोरसत्त्वैर्व्याघ्रसर्पवृश्चिकादिभिर्निषेविता कालसम्बन्धाद्वृन्दावनेऽपि घोरसत्त्वसम्भावनयाऽत्रावस्थानं विसरणं वा नोचितमिति भावः । ननु, एवं तर्हि भवतापि किमर्थमत्राऽवस्थीयते ? व्रज एव चलनीयमिति चेत्तत्राह—स्त्रीभिरिति । तत्रापि हे सुमध्यमाः ! सुकुमारमध्यभागाः भयोपस्थितौ पलायनादावसमर्थाः अत एव कोमलाङ्गत्वात् घोरसत्त्वं द्रष्टुमप्यक्षमाः एतेन तव सन्निधौ नास्त्यस्माकं किञ्चित् दुःखमिति शङ्कापि निरस्ता अनभिज्ञाप्से एतच्छ्रुत्वा अहो द्रष्टव्यं धूर्ताधिराजस्य वाग्विलासचातुर्यं लोकोत्तरसौन्दर्यक्रीडादिकं प्रदर्शयित्वा धैर्यकुललज्जादिकं नाशयितुं सम्प्रति कलगीतेन स्वयमाहूय कारणं पृच्छतीत्यपाङ्गचालनेन परस्परमाचक्षाणासु तासु अहो मया बुद्धं देवपूजोपयोगिपुष्पाद्याहरणाय भवत्य आगताः स्युस्तस्तथा चेच्छृणुतेत्याह—रजन्येषेति । भो चतुरशिरोमणे ! किमेवमागमनकारणं पृच्छसि ? भवानिव वयमपि क्रीडार्थं वने समागताः इति छलनावस्थानपरा आलक्ष्याह—रजन्येषा घोररूपेति । भो विशालनेत्राः ! नेदृग्दिनमत एवंविधायां रजन्यां कुलवधूनां युष्माकं प्रासाद एव क्रीडोचिता नतु बहिरागत्य वने, ननु, घोररूपायां रजन्यां प्रासादेऽपि क्रीडा कथं स्यादिति चेत्तत्राह—इह वने एव घोररूपा नतु व्रजे सहायबाहुल्यादिति भावः । ननु, भोः कमलनयन ! एवंविधज्योत्स्नावत्त्वेनोपलक्ष्यमाना रजनी किमिति घोररूपेत्युच्यते त्वयेति चेत्तत्राह-घोरसत्त्वनिषेविता अतो व्रजं प्रति यात अहो भवतु क्षणमात्रं विश्रम्य यास्याम इति चेत्तत्राह-नेति अवश्यकर्तव्ये विलम्बो न युक्त इति भावः । ननु, भवता कथं स्थीयत इति चेत्तत्राह—स्त्रीभिरिति । ननु, बहिर्नामस्माकं तव सन्निधौ स्थितानां का भयसंभावनेति चेत्तत्राह—सुमध्यमा इति । यद्वा, ननु त्वमेव भीरुरसि ननु वयं वनमपि साधारणं नतु तव पित्रा पितामहादिभिर्वा मौल्येन क्रीतम् अतो वयमऽत्रैव विहरिष्याम इति चेत्तत्राह-नेति । भवतु यथेष्टं विहरन्तु भवत्यः परन्तु रहः मत्पार्श्वे न स्थेयम् आबालब्रह्मचारिणा मया स्त्रीसङ्गस्य परिहृतत्वात् तत्राऽपि बालवृद्धाभिः सहावस्थाने नास्ति दोषः यूयं तु युवतयः सुन्दर्यश्चाऽतो दूरतः परिहरणीया इत्याशयेनाह—हे सुमध्यमाः ! इति । तथा च सुन्दरीणां युवतीनां सुन्दरेण मया रात्रौ निर्जने वने सहावस्थानं नोचितं यद्यपि यूयं परमपतिव्रताः अहं च ब्रह्मचारिणामग्रणीर्जितेन्द्रिय एवाऽतः सहावस्थानेऽपि नास्ति विकारशङ्का तथापि मनसोऽविश्वसनीयत्वाद्पकीर्त्युद्भवाच्च नेदमुचितमिति भावः । यद्वा, अत्रागमने भवतीनां प्रयोजनमहं न पश्यामि पृष्टेऽपि तूष्णीम्भावाद्भवत्योऽपि न पश्यन्त्यतो ब्रवीमि तत्कुरुध्वमित्याशयेनाह-रजनीति । संप्रति व्रजं प्रतियात यतः एषा दिवा तद्व्यापारवशात् लब्धावसरयोर्दम्पत्योः सुखजनकत्वेन बहुशोऽनुभूयमाना रजनी रञ्जनकारी वर्तते । ननु, सत्यमेवं तथापि रजन्यां गन्तुमशक्ता इति चेत्तत्राह—अघोरसत्त्वैः भ्रमरकोकिलादिभिरेव निषेविता वृन्दावनमाहात्म्यात्तु घोरसत्त्वैर्व्याघ्रादिभिर्वर्जिता । किञ्च, पतिभिः सार्द्धमत्र स्थितौ नास्ति क्षतिः सिद्धमिति स्त्रीभिः पतिविरहिताभिरिह निर्जने वने तत्रापि मत्पार्श्वे केवलानामत्र परपुरुषसन्निधाववस्थानस्य सुसहानपकीर्त्यादिकरत्वात् मम च विवाहितस्य पुरुषस्य अत्र कुत्रापि स्थितौ नास्ति काचित्

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ।
विचिन्वन्ति ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ॥ २० ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ध्वनितमपि स्त्रीभिरनेन ध्वनितम् । ननु, एकस्यां रजन्यां वियुक्ता एव स्थास्यामः कस्मादस्मान् दृष्ट्वा ग्लायसि इति चेत्तत्राह—हे सुमध्यमाः ! इति । रात्र्यान्तरं को वेद किं भविष्यति एवंविधं सौकुमार्यादिकं वृथा न वपणीयं ममापि भवतीनां सौन्दर्यादिर्वृथा नाशसम्भावनया तदपलापो ग्लानि भवतीति भावः । मानिनीपक्षे अर्थमेवमुक्ताः व्रजं प्रति गन्तुमुद्यता आलक्ष्याह—रजनीति । अहो आगमनकारणं लज्जा किन्ना नोच्यते चेत्तर्हि मा ब्रूत तथापि व्रजं प्रति तु न यात अत्रापि प्रार्थनायां लोट्, कुत इत्यत आह—एषाऽनुभूयमाना रजनी रञ्जनकरी एवं विधा पुनर्मिलिष्यति न वेति भावः । यतो ज्योत्स्नाव्याप्तत्वात् अघोररूपा पुनश्च क्रीडोपकरणभूतैरघोरैर्भृङ्गमृगादिभिर्नितरां सेविता यद्वा अघोरं समस्तं बलं यस्य तेन रूपा निषेविता अतो नास्ति भयसम्भावनापीति भावः । यद्वा, पित्राद्यागमनभयाविष्टमानसा वयं कथं न याम ? इति चेत् तत्राह—घोररूपा रात्रित्वात् पुनश्च घोरसत्त्वनिषेविता तस्मादत्र कोऽपि नायास्यतीति भावः । अतः सर्वशङ्कां विहायेह मत्पार्श्वे स्थेयं यतः स्त्रीणां हि एवंविधे देशे काले चैवंविधरमणसन्निधाववस्थानं बहुयोग्यमिति भावः । तत्रापि न स्त्रीमात्रस्यापि तु युष्मद्विधानामित्याशयेनाह—हे सुमध्यमा इति । निवृत्तिपक्षे ब्रूतागमनकारणमित्युपक्षिप्तं कारणं भावमुपपादयति—रजनीति । एषा अहेतुवादाभिमतनिर्विशेषा विद्युल्लता रात्रितुल्या सर्वस्यापि तत्राध्यात् अत एव घोरं सर्वविशेषविनिर्मुक्तत्वादत्यन्तशून्याद्रयवदत्यर्थमभङ्गुरं रूपं यस्याः सा अत एव घोरं सर्वपरात्यन्तदुःखकरं सत्त्वं बलमन्तःकरणं वा येषां सर्वनिषेधप्रतिपादनपराणां तैर्नितरां सेविताः अतो व्रजं प्रतियात बहुवाक्यानुसरणं कुरुत इह निर्विशेषचितिप्रतिपादकतया न स्थेयं स्त्रीकथानाममिः श्रुतिभिः यतो हे सुमध्यमाः ! शोभनार्थप्रतिपादनेन सुन्दर्यः । अयं भावः ब्रह्मणि वेदान्तो न प्रमाणं तत्र तत्प्रामाण्यस्याशक्यनिरूपणत्वात् तथा हि ब्रह्म मानान्तरगम्यं न भवति ? किंवा ? नाद्यः, मानान्तराविषयत्वे योग्य एव सिद्धे चक्षुरप्रवृत्तिदर्शनात् न द्वितीयः वेदान्तप्रतिपाद्ये ब्रह्मणि मानान्तरानुपलब्धः । ननु, लोकेपि न वाक्यार्थस्य मानान्तरापेक्षा वाक्यार्थस्य सर्वत्रापूर्वत्वात् सिद्धबोधिवाक्यमपि नाद्यार्थप्रमितौ तदभावशङ्कानिवृत्तये वा मानान्तरमपेक्षते किन्तु वाक्यस्य वक्तृदोषप्रयुक्ताप्रामाण्यशङ्कानिवृत्तये ब्रह्मस्थपौरुषेयत्ववेदान्तलक्षणमखण्डसद्वाक्यार्थम् एवास्तलक्षकवेदान्तानां न मानान्तरापेक्षा अतः कथं ब्रह्मणि वेदान्तानामप्रामाण्यमिति चेन्न [त्व]खण्डार्थत्वस्य लोकवेदयोरसिद्धत्वात् न हि नानापदार्थसंसर्गविषयस्य वाक्यस्यैकप्रतिपादकार्थविषयत्वं सम्भवति वाक्यं हि अभिधां गौणीं लक्षणां वा वृत्तिमाद्य स्वार्थं बोधयति इति प्रसिद्धम् नचाखन्यतमयापि वृत्त्या वेदान्ता अखण्डमर्थं बोधयन्ति मुख्यवृत्त्या वेदान्तानामेकार्थवृत्तित्वाऽनुपपत्तेः स्पष्टत्वात् गौणीलक्षणयोः स्वीकारेऽप्यन्तरपदवाच्यार्थत्वाल्लक्ष्याह— अभिकयोर्लक्ष्यमाणगुणान्वितेरपदवाच्यार्थयोः सत्त्वाद्वाक्यार्थस्यैकपदार्थमात्रवृत्तित्वासिद्धेः । ननु, पदद्वयेपि लक्षणाङ्गीकाराल्लक्षणापक्षे नास्ति दोष इति चेन्न अर्थभेदाभावे पदानां पर्यायत्वाद्वाकाङ्क्षादेरभावाद्वाक्यत्वभङ्गापत्तेः । ननु, वाक्यार्थभेदाभावे पर्यायता वाक्यस्य पदानातिरिक्तत्वेपि प्रमितिजनकत्वेनार्थवत्त्वादापि वाक्यवैयर्थ्यमिति चात्र वेदान्तनामाऽनुदितानस्तमिति चैतन्यमात्रस्वरूपपरब्रह्मविषयमितिजनकत्वाङ्गीकारेऽविषयत्वसिद्धान्तभङ्गापत्तेः प्रमाणवैफल्यात्तस्मात् श्रुतिमस्तकप्रतिपाद्यं ब्रह्मेति ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यकस्मादेवागता नहिं व्रजं प्रतियात प्रतिगच्छत इह मत्समीपे स्त्रीभिर्न स्थेयं न स्थातुं योग्यम् तत्र हेतुमाह, रजन्येषेति ॥ १९ ॥

भाषा टीका ।

देखो एक तौ ये रात है, ताऊ में बड़ो भयानक घोर रूप है, ताऊ में घोर जन्तु सर्प बिच्छू व्याघ्र भल्लूक सिंह इत्यादिक जो हिंसक जीव हैं तिनसों व्याप्त है, जहां देखो तहां ये भयानक जन्तु या रात में डोलें हैं, याते तुम व्रज कों लौट के जाओ देर मत लगाओ हे सुमध्यमाहो ! सुंदर है तुम्हारे कटि प्रदेश कछु तुम बड़ी बूढ़ी तौ हौ नहीं सुन्दर युवती है । और मैं भी युवा अवस्था वारौहूं तासूं, तुम स्त्रीन को या जगे एकान्त वनमें रात में स्थित होयबो उचित नहीं है । ये तो ऊपरी अर्थ है, भीतर सूं श्रीठाकुर जी को अभिप्राय ऐसें है, कि—हे सुन्दर कटि प्रदेश वारी ओ ! ए रात्रि है यामें कोई को आयवे जायवे को डर नहीं है, और अघोर रूपा अर्थात् सुन्दर रमणीयरूपधारी है, और अघोर (रमणीय) जंतु जो मोर चकोर पपैया कोकिल तोता मैना तिन सों सेवित है, या वृन्दावन में कोई वैर करन वारे भयानक जन्तु नहीं हैं ऐसी सुन्दर या रात में तुम आई हौ तासों अब तुम लौट के व्रज को मत जाओ याई जगह मेरे समीप स्थित रहौ ऐसी सुंदर रातमें तुमको याई ठौर रहनो उचित है ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च, मातर इति । विचिन्वन्ति मृगयन्ते बन्धूनां साध्वसं कृच्छ्रं मा कृध्वं मा कुरुतेत्यर्थः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, पुरुषसिंह ! परमबलीयसस्तवान्तिके स्थितानां नः कुतो भयमित्याशङ्क्य सशङ्कमाह—मातर इति । आदौ स्नेहविशेषान्मातरः ततस्तासां वने बहुपरिश्रमणाशक्त्या स्नेहेन कलङ्कभयेन च, पितरः विवाहितकन्याविषयकापेक्षाविशेषाभावेन तेषां शैथिल्ये सति पुत्राः पुत्रतुल्याः मात्रादिवेषेण लज्जाविशेषोत्पत्तेः मातृवद्विनयसङ्गोपनार्थं धाष्टर्यपरिहारार्थं वा बाल्येन बहुपरिश्रमणाशक्त्या वा तेषां शैथिल्ये भ्रातरः स्वभावतः परम स्निग्धत्वात् तेषामपि लज्जादिना कथञ्चिच्छैथिल्ये पतयो विचिन्वत्येव पत्नीगुणदोषभागित्वात् एवमन्वेषणे तेषां यथोत्तरं श्रेष्ठत्वं तेन च पतीनामवश्यमागमनमभिप्रेतं यद्वा, काश्चिन्मातरः काश्चित्पितर इत्येवं यथास्थितत्वं किम्वा प्रोक्तयुक्त्यैव स्नेहादिना कुत्रापि मातरः कुत्रापि पितर इत्येवं ते सर्वत्र एवापश्यन्तः गृहेषु वनेषु वा अनालोकयन्तः विचिन्वन्ति इतस्ततो मृगयन्ति हि वितर्के अतो यदि कदाचित्ते अत्रागता मत्पार्श्वे युष्मान् पश्येयुः तदा युष्माकं मम च लज्जा भयं च स्यादेवेति भावः । अतोऽत्रावस्थितत्वा निजबन्धुभ्यो ममात्मनश्च साध्वसं भयं मा कृद्धं नोत्पादयत यद्वा, महामन्त्राभिज्ञ ! तेऽत्र सुदुर्गमेव न मध्य नागमिष्यन्ति आगता अपि न द्रक्ष्यन्त्येव तत्राह, युष्माकमप्राप्त्या व्याघ्रादिभ्यो युष्माकमनिष्टशङ्कया बन्धूनां भयं शङ्का नोत्पादयत "साधवो बन्धुवत्सलाः" इति न्यायात् अतस्तेषु स्नेहेन निवर्त्तध्वमिति भावः । वो युष्मान् "मापुर्मह्यार्थ्यचिन्तया" इत्यादिवत् मा माश्च अपश्यन्तो युष्मन्मात्रादयो विचिन्वन्ति ननु, निर्भयसिंह ! विचिन्वन्तु पश्यन्तु वा ततः किमित्यत्राह, बन्धुभ्यो भयं अकृद्धम् अवश्यकृत्यतापत्त्याऽतीतनिर्देशः कुरुतेत्यर्थः । अन्यथा स्त्रीणां स्वातन्त्र्यापत्त्या बहुदोषोत्पत्तिरिति भावः अथवा सुव्रत त्वत्पार्श्वस्थिता न कुतश्चिदपि बिभिम इत्याशङ्क्य चक्षुर्मुद्रणापूर्वकं साभिनयमाह, मत्पार्श्वे स्त्रीभिर्न स्थेयं आबालब्रह्मचारित्वेन मम स्त्रीसङ्गपरिहारादित्यर्थः । अहो बत शिव शिव बालिकानां वृद्धानां कथञ्चित् सङ्गेन दोषो किल न घटेत यूयञ्च नवयौवनारूढा इत्याह—हे सुमध्यमा इति । ननु, महाकपटपटो गृहेष्वस्माभिः सहसङ्गो भवतो बहुधा भवत्येवेत्याशङ्क्याह, इहेति । इह निर्जनवने समये च प्रदोषे इति दोषविशेषं श्रीमुखभङ्गीविशेषेण सूचयति अतोऽत्रेदानीं युष्मत्सङ्गान्मम दुष्कीर्तिरेव बाढं स्यादिति सर्वथा प्रयातैवेति । ननु, सुप्तिष्ठ न कोपि ज्ञास्यतीति दुष्कीर्त्तिमाभैषीः तत्राह, मातर इति । अतो नूनमत्रागता द्रक्ष्यन्त्येवेति भावः । अतो मद्बन्धूनां मद्व्रतभङ्गान्मद्दुष्कीर्तेर्वा भयं मा सम्पादयत यद्वा, वो मात्रादयो युष्माकं गृहेभ्यो निर्गमादिना मत्पार्श्वे गमनमाशङ्क्य मा मां तत्र कुत्राप्यपश्यन्तो विचिन्वन्ति सामीप्ये वर्त्तमाना विचेष्यन्त्येव ततश्चागतैस्तैर्मयि युष्माभिः सहिते दुष्टे युष्मत्कुलमद्दुष्कीर्त्यां युष्मान् प्रति क्रुद्धेभ्यो मद्बन्धुभ्यो भयं कुरुतेत्यर्थः अन्यत् समानं वस्तुतस्तु तेभ्यो भयोत्पादनेन दूरे सुगुप्तस्थाने वा नेतुं तथोक्तमिति किं वा वामसङ्ख्या बन्धूनामुपेक्षा तेभ्यो भयाभावं च द्रढयतीति श्लेषार्थश्चायम् एवार्थे हिशब्दः अन्धा इवापश्यन्त एव विचिन्वन्ति अतो बहुमार्गणेनापि न द्रक्ष्यन्त्येवेत्यर्थः । यद्वा, अन्वर्थे हिशब्दः अपश्यन्तोऽपि विचिन्वन्ति किं काङ्क्षा नैवेत्यर्थः । भवतीभिस्तेषामुपेक्षणात् अतो बन्धुभ्यो भयं मा कुरुतेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, पुरुषसिंह ! परमबलीयसस्तवान्तिके स्थितानां नः कुतो भयमित्याशङ्क्य सशङ्कमाह—भ्रातर इति । अत्र मातरः पितरो भ्रातर इति कुमारिका दृष्ट्वा भणितं व्यूढतया प्रतीता दृष्ट्वा तु पतयः पुत्रा इति यदुक्तं तत् खलु परिहासार्थं कल्पनामात्रमिति स्थापयिष्यते चशब्द उक्तसमुच्चये हि निश्चये अतो यदि कदाचित्तेष्वेकोऽप्यत्रागतो मत्पार्श्वे युष्मान् पश्येत् तदोभयेषामपि लज्जाभये स्यातामिति भावः । अतोऽत्रावस्थित्या निजबन्धुभ्यो ममात्मनश्च साध्वसं भयं मा कृद्धं नोत्पादयत यद्वा, हे महामन्त्राभिज्ञ ! ते सुदुर्गमवनमध्ये नागमिष्यन्ति आगता अपि न द्रक्ष्यन्त्येव तत्राह, युष्माकमप्राप्त्या बन्धूनामनिष्टशङ्कातो भयं नोत्पादयत "साधवो बन्धुवत्सलाः" इति न्यायात् अतस्तेषु स्नेहेन च निवर्त्तध्वमिति भावः । अथवा श्लोकद्वयेऽस्मिन् प्रत्यावृत्त्येदं व्याख्येयं हे सु (व्रत)वृत्त त्वत्पार्श्वस्थिता न कुतश्चिदपि बिभिम इत्याशङ्क्य चक्षुर्मुद्रणापूर्वकं साभिनयमाह—नेहेति । मत्पार्श्वे स्त्रीभिर्न स्थेयं आबालब्रह्मचारित्वेन मम स्त्रीसङ्गपरिहारादित्यर्थः । अहो बत बालिकानां वृद्धानां वा कदाचित् सहवासे दोषोऽपि किल न घटेत यूयं तु नवयौवनारूढा इत्याह, हे सुमध्यमा इति । ननु, महाकपटपटो ! व्रजेऽस्माभिः सङ्गो भवतो बहुधा भवत्येव तत्राह, इहेति । इह निर्जने वने समये च प्रदोषे इति दोषविशेषं श्रीमुखभङ्गीविशेषेण सूचयति अत इहेदानीं युष्मत्प्रसङ्गात् मम दुष्कीर्त्ति(रिति वा पाठः कीर्त्ति)रेव बाढं स्यादिति सर्वथा प्रयातैवेति ननु सुप्रतिष्ठ नकोपि ज्ञास्यतीति दुष्कीर्त्तिर्मा भैषीः तत्राह, मातर इति । अतो नूनमत्रागता द्रक्ष्यन्त्येवेति भावः । अतो मद्बन्धूनां मद्दुष्कीर्त्तेर्भयं मा सम्पादयत अन्यत्समानं वस्तुतस्तु तेभ्यो भयोत्पादनेन वंशीवादनस्थानाद्दूरे सुगुप्तस्थाने नेतुं तथोक्तमिति श्लेषार्थश्चायं न चात्र स्वस्वबन्धुजनागमनमाशङ्क्यं यतः मातर इत्यादि एवार्थे हिशब्दः गहनवने अस्मिन्नन्धा इवापश्यन्त एव विचिन्वन्ति अतो बहुमार्गणेनापि न द्रक्ष्यन्तीत्यर्थः । अतश्च बन्धुभ्यो भयं मा कुरुतेति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च, मात्रादयो युष्मानपश्यन्तो मृगयेयुरतो बन्धूनां मात्रादीनां साध्वसं भयं मा कृद्धं नोत्पादयत ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विचिन्वन्तः मृगयन्तः कृद्धं कुरुध्वं साध्वसं भयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनः प्रतियात गृहमित्युक्तस्य युक्तिं वक्ति, मातर इत्यादि मातरः पितर इति कुमारीः प्रति पुत्राः पुत्रपुत्राः भ्रातरः पितरश्चेति यथातथमूढाः प्रति अथवा पितरः पुत्रा इति

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

परस्परसापेक्षतया पितृणामेव पुत्रा इति बोद्धव्यं यथा पिता पुत्रश्चागत इति पितुरेव पुत्रोऽभिगम्यते तेन पितृशब्दसन्निकृष्टपुत्रशब्देन वैमात्रेयभ्राताऽभिगन्तव्यः भ्रातृशब्देन सहोदर इति च अपश्यन्तः सन्तो विचिन्वन्ति तस्माद्बन्धुसाध्वसं माकर्तुं मा माकुरुतेत्यर्थः । न गृहं प्रति यातेति पक्षान्तरे युक्तिः वो युष्माकं मात्रादयः अपश्यन्तः सन्तो मा विचिन्वन्ति मम योगमायाप्रभावात् पश्यन्त एव वर्त्तन्ते कथं विचेष्यन्तीत्यर्थः । मन्यमानाः स्वपार्श्वस्थानिति वक्ष्यमाणत्वात् तस्माद्बन्धुसाध्वसम् अकर्तुं न कुरुत अकारः प्रश्लेषणीयः अभावेन ह्यनीना इति केवलस्य अकारस्य निषेधवाचकत्वम् ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अथ वयमभिसारिका एव त्वामुद्दिश्य समागताः किमिति प्रेष्यन्ते इत्याशङ्क्याह—मातर इति । भवतीनां मातरो नियामिकाः तास्तु नागताः अतो भवतीनामन्वेषणमपि करिष्यन्ति अतः तासां साध्वसं भयं माकर्तुं मा कुरुत न च वक्तव्यं ता अपि तथा स्त्रीत्वाद्धा नागमिष्यन्तीति चेत्तत्राह, पितर इति । तेषां कुले कलङ्कशङ्कया ते समागमिष्यन्त्येव तर्हि तैः सह गन्तव्यमिति चेत्तत्राह—विचिन्वन्ति ह्यपश्यन्त इति । गोकुलान्तर्गतानां कृष्णस्थानागमने मध्ये बहवो मार्गाः स्फुटिताः सन्ति तत्र भगवन्माया तिष्ठति यथा न कोपि भगवत्समीपं गच्छति अतो मार्गान्तरेणैव गताः अपश्यन्तः सन्तो विचिन्वन्त्येव अनेन स्थितौ शङ्काभावोप्युक्तः बन्धुभ्यः साध्वसमिति च तस्मात् सर्वा नागता इति न गन्तव्यं कुले च कलङ्को भविष्यतीति च ननु, (च) तेपि स्त्रीस्वभावं जानन्तीति नागमिष्यन्तीति चेत् भगवदर्थं वा समागता इति तत्राह पुत्रा इति पुत्राणां सर्वथा रक्षकत्वं महती लज्जेति तेषु दयया भयाभावार्थं गन्तव्यम् ननु, ते बालका इति चेत्तत्राह, भ्रातर इति । ते हि समर्था अन्वेषणे लज्जावन्तश्च अतो लज्जया अदृष्ट्वा कदाचित् शरीरमपि त्यजेयुः अतो भ्रातृस्नेहाद्गन्तव्यम्. ननु, ते अपकीर्तिभयादन्वेषणे न गमिष्यन्ति तरुणास्ते तरुण्यो वयमिति चेत्तत्राह च पतय इति तेषां भोगापेक्षाप्यस्ति तेषामेव चायं रसः अतः परं स्वं नान्यस्मै देयं भोगश्च ततोपि सिद्धः सर्व एव अपश्यन्तः गृहे अदृष्ट्वा अवश्यं विचिन्वन्ति अतो बहुकालमदृष्ट्वा नाशशङ्कया अपहारशङ्कयाच भयं प्राप्स्यन्ति न च वक्तव्यं किमस्माकं तैः तत्राह बन्धुसाध्वसमिति ते हि बान्धवाः तैः सहैव स्थातव्यम् अतो बलवद्बाधकस्य विद्यमानत्वात् त्वयापुद्गन्तव्यमिति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, रात्रावपि वनेऽपि युवतीनामपि सङ्गमो न गमने दोषो न जने कुत्स्यते सत्यं तदपि बन्धवो भवतीरनिष्टाशङ्कया साम्प्रतमवश्यमन्विष्यन्त्यतस्तान् मा व्याकुलयतेत्याह, मातर इति । वो युष्मान् विचिन्वन्ति मृगयन्ते तत्र पुत्राः क्षिप्रिमास्या एव नान्वेषणपराः पाययन्त्यः शिशून् पय इति क्रन्दन्ति वत्सा बालाश्चेति पूर्वापरोक्तेस्तदपि भगवता स्वस्मिंस्तद्विशेषज्ञानाभावमभिनीतवतैवोक्तमित्यदोषः अतो बन्धूनां साध्वसं युष्मददर्शनोत्थं भयं मा कर्तुं नोत्पादयत पक्षे अपश्यतो विचिन्वन्त्येव न त्वतिदूरेऽतिनिबिडे वनेऽस्मिन् यो न द्रक्ष्यन्त्यतो बन्धुभ्यस्तेभ्यः सकाशात्साध्वसं माकर्तुं स्वच्छन्देन मया सह रात्रावत्र विलसतेति भावः ॥ २० ॥

विशुद्धरसदीपिका ।

तत्र मास्तु घोरसत्त्वादिशङ्का गुरुजनभीतिस्तु सम्भाव्यत इत्याह—मातर इति । प्रथमे पक्षे साधकचरीरुद्दिश्याह—व इति । भवतीः प्रति ब्रवीमीति भावः । अत्र पतय इति साधकचरीषु पतिम्मन्याः नित्यसिद्धासूपहासमात्रमेव पुत्रास्तु सुतरामुपहासः यथाश्रुते तु मातृत्वेषणायोग्यपुत्रादिसद्भावे तासामङ्गजरतीत्वापत्तौ परमो रसाभास अनौचित्यं चेति ध्येयम् । यद्वा, व इत्याम्रेड्याह—अपश्यन्तः गृहेष्विति शेषः । ततश्च बन्धुभ्यो मम साध्वसं मा कर्तुं यूयं तु निर्भया इत्यर्थः । पक्षे ननु, मास्तु लोकापवादबाधा निर्बाधा भवत्पार्श्वस्थितिर्बन्धुभयजनकेति याम इत्यत आह—मातर इति । विचिन्वन्तोऽपि मम मुरलीकलमोहिता न द्रक्ष्यन्ति । यद्वा, कापि मयाऽन्तर्धानविद्या साधिता इति यद्वा अपश्यन्तः सन्तोऽपि विचिन्वन्ति ते तु मम योगमायाप्रभावात् स्वान् स्वान् दारान् पश्यन्त एव कथं विचेष्यन्तीत्यर्थः । अतो बन्धुसाध्वसं मा कर्तुम् ॥ २० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

औदासीन्यपक्षे घोरसत्त्वादिभयं सम्भाव्य कुलजनभयमपि दर्शयति—मातर इति । पुत्रा इति पुत्रसदृशा भ्रातृपुत्रादयः ते सर्वे वो युष्मानपश्यन्तो विचिन्वन्ति मृगयन्ति तथा च तेषां बन्धुनां साध्वसं सम्भ्रमो जायते तन्मा कुर्वं मा कुरुत इति पक्षान्तरे तु सत्यमत्र स्थितः सुखदा परन्तु बन्धुसाध्वसभयाद्व्रजे गन्तव्यमेव तत्राह, मातर इति । ते अपश्यन्तो विचिन्वन्तीति निमित्तं यद्बन्धुप्रयुक्तं वो युष्माकं मनसि साध्वसं तन्माकुरुध्वं ते तु गोचारणगृहकृत्यादिश्रान्ताः घोरं गाढं निद्रा तमोरूपयतीति घोररूपा रात्री तस्यां निद्रिता मन्मायामोहिताः स्वान् दारान् स्वपार्श्वस्थानेव मन्यमानाश्च, यद्वा, तथाभूतास्ते अपश्यन्त इति मा किन्तु योगमायाप्रभावात्स्वपार्श्वस्थानेव पश्यन्तः अत एव मा विचिन्वन्ति तथा च तद्भीतिप्रयुक्तं बन्धोः प्रेष्ठस्य मम साध्वसं मा कुरुध्वं मम तु वः समागम एव जीवनमिति भावः ॥ २० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु, भवत्प्राप्तीच्छया समागतानां भगवद्गीतादिनोद्दीपितकामशरव्यथं विलम्बसहनाक्षमाणां स्वभक्तानामस्माकं त्यागो नोचितः इति चेत्तत्राह—मातर इति । कासाञ्चिन्मातरः कासाञ्चित्पितरः कासाञ्चित्पुत्राः कासाञ्चिद्भ्रातरः कासाञ्चित् पतयः कासाञ्चित्सर्वे गृहजना अपश्यन्तो विचिन्वन्ति

दृष्टं वनं कुसुमितं राकेशकररञ्जितम् ।
यमुनानिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मृगयन्ते । ननु, अन्वेषणान्निवृत्ता अतो मात्रादिकोऽपि यद्यागत्य मत्पार्श्वे युष्मानपि पश्येत्तदोभयेषां भयलज्जे स्यातामतोऽत्र स्थित्वा बन्धुभ्यः स्वस्य भयं बन्धूनां मम चापकीर्तिभयं च मा कुरुत अतो बन्धूनां साध्वसपरिहाराय व्रजं प्रति यात अन्यत्र वा चलत तथा च सम्प्रत्यस्ति भवतीनां प्रतिबन्धकमतो मम को दोष इति भावः । अनभिज्ञापक्षे । ननु, नास्त्यस्माकं किञ्चिदपि भयं समुदायानिविष्टत्वाद्व्रजसमीपस्थत्वाच्च नाप्यपकीर्तिभयं सङ्केत आगतत्वादज्ञातस्थाने स्थितत्वाच्चेति चेत्तत्राह—मातर इति । भवतीनां नियामकाः युष्मान् गृहेऽदृष्ट्वा विचिन्वन्ति अतस्तासां साध्वसं मा कृढ्वं ननु, माग तेऽप्येवंविधा एवाऽतः स्त्रीत्वाद्वा नागमिष्यन्तीति चेत्तत्राह-पितर इति । ते स्वकुले कलङ्कपातशङ्कया विचिन्वन्त आगमिष्यन्तीत्यर्थः । ननु, तेऽपि नागमिष्यन्ति सङ्केत आगतास्वस्मासु शङ्कानुत्थानात्स्त्रीस्वभावस्य तैरपि ज्ञातत्वाच्चेति चेत्तत्राह—पुत्रा इति । पुत्राणां स्तन्याग्रहो महती लज्जा च वर्तत इति भावः । ननु, ते बाला इति चेत्तत्राह भ्रातर इति तेऽप्यन्वेषणे समर्थाः लज्जावन्तश्चाऽतस्ते अदृष्ट्वा लज्जया कदाचिच्छरीरमपि त्यजेयुरिति भावः । ननु, तरुणास्ते वयं च तरुण्योऽतो लज्जयान्वेषणार्थं नागमिष्यन्तीति. यद्वा, ननु रात्रौ पतिसन्निधौ स्थितिसम्भावनया तेऽन्वेषणाय न प्रवर्त्स्यन्त इति चेत्तत्राह-पतय इति । ते रात्रौ भोगापेक्षया भवत्यो नो दृष्ट्वा अन्वेषयन्तो ऽत्रागमिष्यन्ति तस्मात्स्वीयो रसोऽन्यस्मै न देयो भोगसिद्धेस्तत एव सुकरत्वात् इति भावः । नन्वेवं तर्हि ते यदा आगमिष्यन्ति तदा तैः सार्द्धमेव गमिष्यामोऽतस्तावत्तं तूष्णीं तिष्ठसि शङ्कानिरासाय विचिन्वन्तीत्युक्तं तथा च गृहान्निर्गताः मध्ये स्फुटितैर्मार्गान्तरैर्गताः सन्तो विचिन्वन्त्येव अतोऽत्रागमनं तेषां दुर्घटमतो विचिन्वन्तो खेदं मरणं वा प्राप्नुयुरित्यर्थः । नन्वस्तु किमस्माकं तैरिति चेत्तत्राह-परिजनैः सार्द्धमेवावस्थानयोग्यानां कुलाङ्गनानां युष्माकं तत्साध्वसोत्पादिकाप्रवृत्तिर्नोचितेति भावः । मानिनीपक्षे; ननु, किमित्येवं निर्लज्जः सन् वृद्धपरिवाररक्षिता लज्जावतीरस्मान्प्रति ब्रवीषि वयमत्र क्षणमात्रमप्यवस्थातुं न शक्नुमः यतः परमप्रेमास्पदा अस्मानपश्यन्तोऽस्मन्मात्रादयोऽन्वेषणाय निस्सृताः स्युरऽतस्तेषां मध्ये यद्येकोऽप्यत्रागत्याऽस्मान्पश्येत्तर्हि महानऽनर्थो भवेदस्माकमतस्तदागमनात्पूर्वमेव झटिति वाऽस्माभिर्गन्तव्यमिति चेत्तत्राह—मातर इति । बन्धुभ्यः साध्वसं यतस्ते मात्रादयोऽपश्यन्तः विचिन्वन्त्येव न तु गहनेऽस्मिन् वने तेषामागमनं सम्भाव्यम् इति भावः । यद्वा, विचिन्वन्ति नत्वत्राऽऽयान्ति नाप्यायास्यन्ति हि यतोऽपश्यन्तो न दृश्यन्तो वनस्याऽस्यातिनिबिडत्वान्मया तामस्यां विघ्नैः तस्यामस्याञ्चन्द्रिकाद्रितस्थाप्याऽतस्तद्भयं विहाय मया सार्द्धं यथेष्टं रमतेति भावः । निवृत्तिपक्षे । ननु, निर्विशेषमखण्डं ब्रह्म यथोक्तरात्रिकल्पमिति त्वया कथं ज्ञातमित्याशङ्क्य बहुविद्वत्सम्मतपक्षेरित्याह—मातर इति । यो मात्रादिस्थानापन्नाः साङ्ख्यध्वरमीमांसकादयः विचिन्वन्ति यथोक्तं ब्रह्म श्रुतिप्रमाणकमस्ति न वेति विचारयन्ति तथापि न „पश्यन्त्येव" तथा च यदि स्यात्तर्हि परमविचक्षणैरन्वेष्यमाणमवश्यमुपलभ्यते नोपलभ्यतेऽतः स्फीतालोकवर्तिघटानुपलब्ध्या घटाभाववत्तदभावो निश्चीयत इति भावः । तस्माद्यथोक्तरात्रिकल्पत्वात्त्राणाय परमोद्योगवत्वादेते वो बान्धवः तेषां साध्वसं तन्मताननुमोदनेन वेदबाह्यत्वप्राप्तिभयं मा कृढ्वं स्वरक्षकस्य रक्षणमेवोचितं नतु भयप्रदानमिति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेत्वन्तरमाह—मातर इति । बन्धूनां साध्वसं भयं मा कृढ्वं मा कुरुतेत्यर्थः ॥ २० ॥

भाषा टीका ।

इतनी सुनकें गोपी जब इत चल नहीं भई तब श्रीकृष्णचन्द्र बोले, कि—तुम्हारे मैया बाप बेटा भैया और पति ये सब तुम सबनकों न देखि कें ढुढत डोलें हैं सो तुम उनकों इवराट मत करावो। अथवादूसरो अर्थ यह है कि—मैया बाप बन्धु इत्यादिक सब तुम कों ढुढते भलेई रहो परन्तु देख नहीं सकें है तासों इतनी दूर या वन में उनके कछु आयबे को भय मत करौ भले प्रकार मेरे सङ्ग सुन्दर रास विलास करौ ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ईषत्प्रणयकोपेनान्यतो विलोकयन्तीः प्रत्याह—दृष्टमिति । राकेशस्य पूर्णचन्द्रस्य करैरञ्जितं यमुनास्पर्शिनो ऽनिलस्य लीला मन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवास्तैः शोभितम् ॥ २१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कुसुमितमित्यादिविशेषणैर्दृश्यतोक्ता यद्वा ईषत्प्रणयकोपतो वनालोकनेन दृष्टं वनमित्युक्ते ऊर्ध्वविलोकनेन च राकेशकररञ्जितमित्युक्ते कालिन्दीतीरावलोकनेन तु यमुनेत्युक्तमिति विवेचनीयं तत्र यमुनेति शैत्यं लीलेति मान्द्यं वनस्य कुसुमितत्वेन स्वत एव सौगन्ध्यमित्यनिलस्य गुणत्रयं अन्यैः

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

व्यञ्जितम् यद्वा, ननु महामोहनवाक्यव्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्राववश्यागमनस्य किं नाम प्रयोजनमिति संकेतवं त्वयां ध्यात्वा मां ज्ञातं दिष्ट्या पूर्णचन्द्रायां रात्रौ मदीयश्रीवृन्दावनशोभा निरीक्षणार्थमागतामिति भवतु तच्च सत्यमेवेति ससान्त्वनमभिनयनाह—यद्वा, गृहबन्धाद्युपेक्षया श्रीवृन्दावनचन्द्रं श्रीकालिन्दीविहारिलीलां चानुभवितुमागताः स्म इति कुतो भयमिति चेत् सत्यं तर्हि परमशोभायुक्तवृन्दावनस्य तत्रोदितचन्द्रस्य च तथा सुन्दरकालिन्दीविहारिवातगतिलीलायाश्च दर्शनमिदं दिष्ट्या सत्यमेवेत्यगुल्यादिना दर्शयन् सलीलमाह—दृष्टमिति । अर्थः स एव वस्तुतस्तु साक्षात्तथा तादृशवनादिप्रदर्शनेन भावमेव विवर्द्धयति—श्लेषार्थश्चायम् एतत्पक्षे दृष्टमिति द्वाभ्याम् ईदृशं सर्वगुणयुक्तं वनं दृष्टमेव तत्तस्मात् घोषं मा यातेत्यन्वयः । यद्वा, एतादृशे वने साक्षाद्दृष्टेऽपि रात्रौ रतौ विलम्बनमयुक्तमेवेति तद्योग्ययमुनातीरं प्रयाम इति ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततस्तासां प्रणयकोपेन यदन्यतो दर्शनं तदन्यथोत्प्रेक्षयते दृष्टमिति, तथातीति परेणान्वयः । कुसुमितमित्यादिविशेषणैर्दृश्यतोक्ता तत्र चेषत्प्रणयकोपतो वनावलोकने दृष्टं वनमित्युक्तं तत ऊर्द्ध्वावलोकने च राकेशकररञ्जितमिति ततः कालिन्दीतीरावलोकने तु यमुनेति विवचनीयम् अन्यत्तैः । यद्वा ननु, महामोहनवाक्यव्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्राववश्यागमनस्य किं नाम प्रयोजनमिति संकेतवं त्वयां ध्यात्वा मां ज्ञातं दिष्ट्या पूर्णचन्द्रायां रात्रौ मदीयश्रीवृन्दावनशोभानिरीक्षणार्थम् आगतं इति भवतु तच्च सत्यमेवेत्यङ्गुल्यादिना दर्शयन् सलीलमाह—दृष्टमिति । अर्थः स एव वस्तुतस्तु साक्षात् तथा तादृशवनादिप्रदर्शनेन भावमेव विवर्द्धयति श्लेषार्थश्चायं न केवलं तद्दर्शनाय एवात्र अपि तु परमसुखनिधानत्वमपीति भावोद्दीपनाय स्वयं दर्शयति—दृष्टमिति । ईदृशं सर्वगुणयुक्तं वनं दृष्टमेव तत्तस्मात् घोषं मा यातेत्यन्वयः इति ॥ २१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

राकेशश्चन्द्रः ॥ २१—२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्याचक्षाणा ईषत्प्रणयकोपान्विता विलोकयन्तीः प्रत्याह—दृष्टमिति । राकेशस्य पूर्णचन्द्रस्य करैः रञ्जितं यमुनास्पर्शिनोऽनिलस्य लीलया मन्दगत्या कम्पमानैस्तरूणां पल्लवैः शोभनं वनं दृष्टं हि ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राकेशश्चन्द्रः यमुनायाः अनिलेन वायुना निर्भयेन एजद्भिः कम्पमानैः तरुपल्लवैः शोभितं यद्वा, यमुनानिलानीततीरैरेजद्भिः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनर्यात गृहं न यातेति पक्षद्वयमेव व्यक्तीकुर्वन्नाह—दृष्टं वनमित्यादिसार्द्धेन । वनशोभादिदृक्षया यदागताः तत् दृष्टं वनं कीदृशं ? कुसुमितमित्यादिविशेषणत्रयं तस्माद्घोषं यात माचिरं विलम्बो मा कार्य्य इत्यर्थः । तत्र गत्वा किं कार्य्यं तत्राह—पतीन् शुश्रूषध्वं पतीनिति यान्तीति पतय इति योगार्थत्वात् यथार्थं पालकमात्रे बोद्धव्यम् अन्यच्च क्रन्दन्ति बालाश्च वत्साः तान् पाययत पश्चाद्दुह्यतेत्यर्थः । बाला इति वत्सविशेषणं हे सतीः साध्व्यः पक्षे दृष्टं वनमित्यादिना उद्दीपनविभावः प्रकटीकृतः तत्तस्मात् घोषं मा यात पतीन् मा शुश्रूषध्वं बालाश्च वत्सा मा क्रन्दन्ति तान् मा पाययत मा दुह्यत चेत्यर्थः । चिरमेव न यात इहैव सर्वदा तिष्ठतेत्यर्थः । प्रतिक्रियं मा शब्दो योज्यः ॥ २१—२२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमुक्ते परितो विलोकयन्तीराह—दृष्टं वनमिति । एषा हि राजसराजसी अग्रिमा राजसतामसी यदि वनदर्शनार्थमागतं तदा दृष्टमेव वनम् अतः प्रतियातेति अर्थात् सर्वदा दृष्टमेवैतद्वनं नात्र भयमिति ज्ञापितं गृहे च न गन्तव्यमिति "यदि गृहगमनापेक्षा तदैव गन्तव्यम्" इति वचनात् तच्च वनं कुसुमितमिति वर्णयति, यथा तासामत्यासक्तिर्भवति इदानीं पुष्पाण्येव जातानि न फलानीति वा कुसुमिते वने रतिः कर्त्तव्येति भावः । सर्वत्र मोहः प्रेषणं चानुस्यूतं किञ्च, राकेशस्य चन्द्रमसः करैः रञ्जितम् उद्दीपका एते वनं तामसं पुष्पाणि राजसानि चन्द्रकिरणाः सात्त्विका इति अये राकेश इति पूर्णचन्द्रः अतः पूर्णत्वे स्थातव्यं पर्वाविशुद्धौ तु गन्तव्यमिति वायुमपि तत्रत्यं वर्णयति—यमुनेति । यमुनासम्बन्धिना अनिलेन लीलया ये एजन्तः कम्पमानास्तरुपल्लवाः तैर्मण्डितमिति जलसम्बन्धात् लीलया चलनात् तरूणां सुगन्धानां सम्बन्धात् त्रिगुणो वायुरुक्तः वर्णनायां रसोद्बोधके चोपयुज्यते ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च ता लज्जया परितो विलोकयन्तीराह—दृष्टमिति । मां ज्ञातं वनदर्शनार्थमागता इति ततश्च तासामूर्द्ध्वावलोकने सत्याह—राकेशेति । यमुनादिगवलोकने सत्याह यमुनास्पर्शिनो अनिलस्य लीलामन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवाः पुष्पितास्तैः शोभितमित्यभीप्सितं वनादिदर्शनमपि निर्व्यूढमतो माविलम्बध्वमिति भावः । पक्षे वृन्दावनमिदं सर्वोत्कृष्टं तत्रापि

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पूर्णचन्द्रा रजनी तत्रापि चतुर्दिक्षु यमुना तत्रापि शैत्यमान्द्यसौगन्ध्यवन्तो अनिला इत्युद्दीपनविभावा एते आलम्बनविभावश्चाहं वर्त एवेत्यद्य युष्माकं रसिकतापरीक्षिता भविष्यतीति भावः ॥ २१ ॥

विशुद्धरसदीपिका ।

प्रथमपक्षे एवमौदासीन्यमनुभूय परिवर्त्तितमुखीरालक्ष्याह, दृष्टमिति । वनशोभावलोकनलोभादागता न तु मदर्थमिति भावः तत्तु दृष्टं संरम्भक्षुभितदृष्टीरालक्ष्य धाष्टर्यमभिनयति—कुसुमितमिति । कुसुमानि सञ्जातान्यस्येति तारकादिः ततश्च हासो लक्ष्यते भवतीनामनुचिताचाराद्वनमप्युपहसतीति भावः । ततोऽपि परावृत्त्याकाशदत्तदृष्टीर्दिवमुपालभन्तीरिवालक्ष्यापलक्षापलपन्नाह, राकेति । तेन पूर्णत्वं ततश्च द्विजराजत्वात् परमाप्तत्वं तस्य करैः किरणैः रञ्जितमतिधवलितम् एवं च राकेशोऽपि भवतीनां गृहगमनसाचिव्यं करोतीति भावः । पुनरतिकोपेन यमुनाभिमुखीरभिलक्ष्य तथैवाह—अहो साधु निष्टङ्कितम् यमुनेति यमुनापि समीरकृतनीरतरुपल्लवचालनच्छलेन नेह स्थेयमित्युपदिशतीति भावः । पक्षे ननु, मास्तु बन्धुसाध्वसं स्वगृहान् गन्तव्यमेवेत्यत आह, दृष्टमिति । तत्र किमित्यत आह—कुसुमितं गृहगमनोन्मुखीर्वनमप्युपहसतीति पूर्ववत् अपि च नागरीणां वनशोभानिभालनायापि किञ्चित्कालं स्थितिरेव योग्येत्याह—राकेति । तथा भवतीनां सख्या यमुनयाऽप्यनिलवीजितरुपल्लवचालनेन मौनमुद्रया मा यातेति निवारणमेव क्रियत इत्यर्थः ॥ २१ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

प्रथमपक्षे उदासीनवाक्यश्रवणेऽपि यदर्थमागताः स एव कथमेवं वदतीति चकिताः पत्यौदासीन्यमभिनयन्नेव प्रेमवृद्धयै उद्दीपनमाह—दृष्टमिति । यूयं नहि मदर्थमागताः किन्तु यदर्थमागतास्तद्वनं दृष्टम् । ननु, को वने विशेषः ? यदर्थमस्मदागमनमुच्यते तत्राह—कुसुमितमिति । विरहिणां कामशररूपतया हृद्वेधकं पतिसङ्गतानामेव सुखदं पतिसहकारं विनाऽलमानित्वनदर्शनेन ननु निशि तमसि कथं गन्तव्यं ? तत्राह—राकेशकररञ्जितं पूर्णचन्द्रकिरणैर्धवलितमिति । न गमनप्रतिबन्धि तमोऽपि किञ्च मनोजचन्द्रोद्दीपितमनोजानां कुलाङ्गनानां नात्र सुखलेशोऽपि पतिसङ्गतानामाह्लादकोऽपि पूर्णचन्द्रः प्रियवियुक्तानां प्रलयार्कसन्निभ एव भवतीति ध्वनिः औदासीन्यमालक्ष्य यमुनां प्रति दत्तदृष्टीः प्रत्याह—यमुनेति । यमुनासम्बन्धिनः मदनकुमदवर्द्धनकुमुदादिगन्धहारिणः शीतस्यानिलस्य वायोर्या लीला मन्दगतिस्तेनैजितानि यानि कुसुमिततरुपल्लवानि तैः शोभितमिति त्रिगुणसमीरान्वितं तदपि पतिसमागमोत्साहकमिति भावः । यद्वा, इति चित्रमिदं यद्वनदर्शनविहारार्थं युष्मदागमनं तद्वनमपि कुसुमितं सत् स्मितकुसुमदशनदर्शनेन मायासुमनोधरविकसनेन भवदागमनमुपहसति चन्द्रोऽपि सितचन्द्रिकया प्रहासमभिनयति यमुनानिलोऽपि तरुपल्लवकरचालनेनावस्थानमपि वारयति सर्वेषां वृन्दावनगतानां धर्ममर्यादाप्रियत्वान्न केवलमहमेव दाक्षिण्यपक्षे तु बन्धुसाध्वसाभावमुक्त्वा वनादिशोभां वर्णयन्नुद्दीपनेन प्रोत्साहयति—दृष्टमिति । वनं वृन्दावनमावयोर्नित्यलीलास्पदं भवतीभिर्दृष्टं स्वत एव सुखदं किमु वाच्यं कुसुमितमिति ऋतुराजेन स्वमित्रमदनवीराणां भवतीनां रतिरणप्रोत्साहायैव कालमनवेक्ष्य सर्वर्त्तुकुसुमैः पूरितम् । किञ्च, राकेशकररञ्जितं युष्मद्विहारायैव राकाया ईशेन पूर्णचन्द्रेण स्वकरैरेव रञ्जितमिति राकेशस्यैवमादरे न कस्यापि सङ्कोचः न च मच्चक्षुःस्थश्रियः सापत्न्यशङ्कापि तया मयापि मया सह युष्मदालिङ्गनमभिलषितमालक्ष्यैव तद्भ्रान्त्रापि सेवारब्धेति भावः । किञ्च, यमुनासम्बन्धिनाऽप्यनिलेन त्रिगुणसमीरेण तरुमृदुपल्लवकरचालनैर्विहारार्थमावाहनेन न यमुनाया अपि सापत्न्यं किन्तु मद्विहाराभिलाष एव भवतीनां च सहागमनेनैव मम प्रेमपात्रस्वतस्सिद्धसापत्न्याभावेन न शङ्कागन्धोऽपि किञ्च मत्कुलवृद्धेन युष्मदादरेण स्वकरैर्वनरञ्जनदर्शनेनैव स्वकुलवृद्धशङ्काप्यपनेया सर्वेषां मत्स्नेहव्याप्तहृदयत्वात् ॥ २१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवमुक्ता अहो भगवदनुग्रहालाभान्निष्फलमेवास्माकमागमनं जातमिति विचार्य खिन्नचित्ताः आश्वासयति—दृष्टमिति । युष्माभिरत्रागत्य वनं दृष्टमेतेनैवं चेत्तर्हि कलगीतेन किमर्थमत्र वयमाहूता इत्याशङ्कापि परिहृता । वनं दृष्ट्वा मया विचारितमहो इदं वनं स्वभक्ताभ्योऽपि प्रदर्शनीयमित्याशयेन कलगीतेन मयाऽऽहूता इति भावः । ननु, का वा अत्र दर्शनीयतेति चेत्तत्राह—कुसुमितमिति । ननु, कुसुमितवनमेव यद्यस्माकं प्रदर्शयितव्यं तवाभीप्सितं स्यात् तदा दिन एव वयं कुतो नाकारिता इति चेत्तत्राह—राकेति । राकेशः पूर्णचन्द्रस्तस्य करैः किरणैः रञ्जितं तथा च दिने राज्यन्तरे वा नास्त्येवंविधा शोभेति भावः । किं च वायुरप्येवंविधः समयान्तरे दुर्लभ इत्याशयेनाह—यमुनास्पर्शेनाऽनिलस्य वायोर्लीला मन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवास्तैः शोभितं तस्मान्नाह्वानं स्वागमनवैयर्थ्यमिति भावः । अनभिज्ञापक्षे । ननु, भवतु तव निकटे न स्थीयतेऽन्यप्रदेशं गत्वा स्थास्याम इत्यभिप्रायवतीरालक्ष्याह—दृष्टमिति । एवंविधप्रदेशान्तरं नास्ति भयं च प्रदेशो दृष्ट एव भवतीभिरतोऽलं वृथा कालक्षेपेणेति भावः । यद्वा, किमेवं मात्रादिबन्धुभयं प्रदर्श्यते तत्तु अस्माकं तृणजलाञ्जलिप्रायमेवाऽन्यथा तान् परित्यज्य रात्रौ बहिरागमनं कथं भवेत् त्वं बिभेषि चेत्तर्हि त्वमेवेतो गच्छेति प्रणयकोपवतीरालक्ष्याह, दृष्टम् अहो मयापि ज्ञायते निर्दोषाणां नास्ति कुतोऽपि भयं तथापि बुद्धिमतीनां वृथा गृहान्निःसरणमयुक्तत्वात् वनशोभेक्षणार्थमागताः स्युस्तच्च सम्पन्नमितो वृथाऽत्र न स्थेयमिति भावः । यद्वा, गच्छत्वा वञ्चयेत्ततो विलोकयन्तीरवलोक्याह—दृष्टमिति । अहो ज्ञातं मया साध्वीनां भवतीनां गृहान्निर्गमनं वनेक्षणाय तच्च जातमतो गन्तव्यमिति भावः । ननु मत्सङ्गाद्यत्रागताः फलानि गृहीत्वा यास्याम इति चेद्

तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः ।
क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत ॥ २२ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

तत्राह—कुसुमितं नतु फलितम् एतच्छ्रुत्वा दृष्टीरालोकयाह, राकेशकररञ्जितम् अतो शरत् पूर्णचन्द्रचन्द्रिकाशोभेक्षणाय भवत्यः समागताः स्युस्तदपि जातमिति भावः । यमुना-भिमुखीः समालोकयाह, यमुनेति । मानिनीपक्षे नतु, तथापि गृहाद्बहिरस्माकं मनो न रमतेऽतः कथमत्र तिष्ठाम इति चेत्तत्राह—दृष्टमिति । कुसुमितमिदं वनं भवतीभिरदृष्टं तथा तु नास्ति गृहेष्वेवविविधकुसुमशोभाऽतोऽत्र कस्य मनो न रमते प्रत्यक्षोपलब्धस्यापलापो न युक्त इति भावः । किं चैवंविधं राकेशकररञ्जनं यमुनानिललीलेजत्तरुपल्लवशोभा च गृहेषु क्वचित तस्मादेतत्सर्वमवलोक्यैव प्रायशो भवत्यो मया स्मृताः स्मृत्वा च कलगीतेनाहूताः भवत्योऽप्यागत्य तथैव दृष्टवत्यो नो गमनाग्रहं विहायेह स्थेयं गोष्ठं प्रति मा यातेति पदेनान्वयः । निवृत्तिपक्षे । ननु, भवतो विवेकचन्द्राऽनुदया-दिदानीं रहिता अस्मदभिप्रायं न जानन्ति विवेकादिसाधन-सम्पन्नान्तःकरणास्तु जानन्तीत्याशङ्क्याह, दृष्टमिति । राके-शस्य विवेकचन्द्रस्य करैर्विचारभेदैः रञ्जितं शान्त्यादिलक्षण-कुसुमशोभितमन्तःकरणलक्षणं वनं दृष्टमित्युपहासः नाममात्रेण शुश्रूषमाणायाविवेकादिमत इति भावः । यतो यमुनास्थानीयाविद्या सम्बन्धिनोऽनिलस्य तत्स्थानीयस्य विचे-पस्य लीलया तत्तद्विषयलालसया राजन्तस्तरुस्थानीयस्य वैरा-ग्यस्य पल्लवास्तत्स्थानीयाप्रविचारोत्थावैराग्यभेदास्तैश्शोभितं यद्वा, यथोक्तयमुनानिललीलया विलासेन राजन्तश्चञ्चन्तो प्रकम्पिताः संसारवृक्षस्य पल्लवाः विषयप्रवाहास्तैश्शोभितं तथा च श्रुतवेदान्तानामपि यथा पूर्वसंसारोपलम्भं तेषां विवेकाद्य-भावसमवलोक्य तन्मतानुसरणं नोचितमितिभावः ॥२१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रात्रिसरयोगजां वनशोभां द्रष्टुं यद्यागतास्तर्हि यमुना-पर्शिनोऽनिलस्य लीलया मन्दगत्या एजद्भिः कम्पमानैस्तरु-पल्लवैः शोभितं राकेशकरैः पूर्णचन्द्रकिरणैः रञ्जितं कुसु-मितं वनं वृन्दावनं दृष्टमेव ॥ २१ ॥

भाषा टीका ।

श्री कृष्ण की इन बातन कों सुन के विचारीं सब गोपीं वन की ओर निहारन लगीं, तब श्रीकृष्ण बोले, कि-हां हम जान गये, तुम सब वनकी शोभा देखिवे कों आई हो, सो यमुना की पवन तें हल रहीं है शाखा और पल्लव जामें और चन्द्रमा की किरणन सों रञ्जित पुष्पित जो वन है ताकों तुम देखचुकी हो, तासों अब देर क्यों करो ब्रज कों जाओ । और दूसरो अर्थ यह है, कि—सखी या वनकों तुमनने देखो ? कैसो खिलरह्यो है, और ताहू में चन्द्रमा की चांदिनी जो छिटक रही है तासों औरहू शोभा होयरही है, और चन्द्र किरणनसों वनहू की शोभा अपूर्व होय रही है, सुन्दर यमुनाजी न्यारी वह रहीं हैं ताके ऊपरसों जो शीतल मन्द सुगन्ध पवन लीला पूर्वक चलै है तासों वृक्षन के पल्लव न्यारे चलायमान होय रहे हैं, यमुनाकी स्वच्छ लह-रियादार रेती न्यारी विछरही है, ऐसी सुन्दर शोभा युक्त या वृन्दावनमें वंशीवटपै मैं नागर नट वासुरी वजायरह्यो हूं अब या रमणीय स्थल कों छोड के तुम कहां जाओगी अब ब्रज कों न जाओ मेरे सङ्ग विहार करो ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सतीः हे सत्यः ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततस्तस्माद्वनशोभादर्शनेन निजमनोरथपूरणात् सद्योऽगीत-दधिमथनगवादिशब्दैर्घोषयति शब्दायते इति श्लेषेण सर्वेषां सर्ववृत्तं घोषयतीति घोषस्तं गोपावासं यात मा चिरम् आचि-रादेवेत्यर्थः । यद्वा, तत्र विलम्बं मा कुरुतेत्यर्थः । किमर्थं पतीन् शुश्रूषध्वं सेवध्वं कुतः सतीः हे सत्यः ! अन्यथा साध्वीत्व-भङ्गापत्तिः अतो मत्पार्श्वे युष्माकमवस्थानमत्ययुक्तमिति भावः । ननु, परमसेव्यत्वत्सेवामसहमानाः सदाऽसूयावन्तो दुष्ट-तरास्तेऽस्माभिः परित्यक्ता एव सतीत्वमपि त्वत्पादाब्जयो-र्निर्मञ्छनीकृत्य दूरतः क्षिप्तमित्याशङ्क्य सकरुणं पक्षान्तर-माश्रयन् वत्सादिषु स्नेहं जनयति—क्रन्दन्तीति । अतस्तान् बालान् पाययत दुग्धं वत्सार्थं च दुह्यत दुग्धदुग्धं गा इत्यर्थः । वत्सेभ्यो बालेषु स्नेहविशेषात्तेषां पश्चान्निर्देशः एवं सर्वत्र निवर्त्तनार्थं पूर्वपूर्वस्माद्वाक्यादुत्तरोत्तरस्य गरिष्ठत्वं ज्ञेयम् पाययतेत्यस्यादावुक्तिस्तस्य द्रुतमवश्यकार्य्यत्वात् । यद्वा, गोप-चूडामणे ! वत्सान् गोपैर्गोदोहनेन पाययिष्यन्त्येवेत्यत आह—बालाश्चेति । तेषां युष्मान् विना दुग्धपानासम्भवात् । यद्वा, तान् वत्सान् बालांश्च पाययत पयः कथं तदाह—दुह्यत गाः गो-दोहने स्वत एव वत्सानां बालानां च तद्दुग्धस्यैव पाने भावीत्यर्थः । अत्रेदं तत्वं कृष्णैकप्रिया भगवत्यस्ता व्रजदेव्यः काश्चिज्जातविवाहा अपि नाममात्रेणैव पतिमत्या विविधच्छलेन पतीन् वञ्चयमानास्तैः सहाङ्गसङ्गाभावेनाजातापत्या एव केवलं पत्यादीनामाग्रहेण निजकौतुकविशेषेण वा तास्त्वेव काश्चित् परपुत्रान् पुत्रबुद्ध्या पालयन्तीति स्वतः स्तन्याभावेन तान् गोदुग्धमेव पाययन्तीति वस्तुतस्तु सर्वमेतत्कैतवमेव अत एव सतीरिति श्लेषार्थश्चायं तत्तस्माद्वन्धुनाऽन्तत्सावात् वनशोभा-रतिसामग्रीसद्भावाच्च आचिरं शीघ्रं मा यात यदि यात तदा

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विलम्बेन रात्र्यन्त एव यास्यथेत्यर्थः । यद्वा, चिरं चिरन्तनः अस्वातन्त्र्यादिदुःखप्रदत्वेन बहुशोऽनुभूतो यो घोषस्तं मा यात चकारान्माशब्दस्याग्रेऽपि सर्वत्र सम्बन्धः पतीन् मा शुश्रूषध्वं सतीश्च साध्वीर्मा शुश्रूषध्वं न सेवध्वं तत्पदवीमपि न यातेत्यर्थः । स्वातन्त्र्यादिसुखभङ्गादिति नर्मैव वत्सादयो न क्रन्दन्त्येव गोपादिभिर्गोदोहनादिना पयःपानसिद्धेः अतस्तांश्च पाययिष्यथ न तु धोक्ष्यतेत्यन्यकृत्याभावेन स्वातन्त्र्यं सूचितम् ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्तस्माद्वनशोभादर्शनेन निजमनोरथपूरणात् सदोच्चैर्गीतदधिमन्थनगवादिशब्दैर्घोषयति शब्दायते इति घोषः श्लेषेण तु सर्वेषां सर्ववृत्तं घोषयतीति तं गोपावासं यात गोष्ठमिति क्वचित्पाठः तत्रैव भवतीनां सर्वा सामग्रीति तदेव गन्तुं युज्यत इति भावः । माचिरम् अचिरादेवेत्यर्थः । यद्वा, तत्र विलम्बं मा कुरुतेत्यर्थः । किमर्थं पतीन् शुश्रूषध्वं सेवध्वं कुतः सतीः हे सत्यः ! अन्यथा साध्वीत्वभङ्गः स्यात् अतः परपुरुषस्य मम पार्श्वे युष्माकमवस्थानमयुक्तमिति भावः । ननु, परमसेव्यत्वत्सेवामसहमानाः सदासूयावन्तो दुष्टतरास्ते ऽस्माभिः परित्यक्ता एव पतिव्रतात्वमपि त्वत्पादाब्जं निर्मञ्छनीकृत्य दूरतः क्षिप्तमित्याशङ्क्य सकरुणामिव पक्षान्तरमाश्रयन् वत्सादिषु स्नेहं जनयति क्रन्दन्तीति अतस्तान् वत्सान् पाययत बालार्थं च दुह्यत दुग्धं दोहयतेत्यर्थः । एतच्च तत्तत्सन्निधानमात्रविश्रम्भितत्तत्प्रियगवाद्यपेक्षया अत्रेदं तत्त्वं ताः खलूद्दिश्य स वो हि स्वामी भवतीति गोपालतापिन्यां "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहितायां दशाक्षरादिमन्त्राश्च तथा श्रुत्यागमादौ कृष्णवध्व इति चात्रैव तदेवं श्रीकृष्णैककान्तानां परमलक्ष्मीणां तासामन्यत्र विवाहो न सम्भवति तत्प्रतीतिश्च तासामुत्कण्ठावर्द्धनार्थं योगमायामुपाश्रित इत्यादौ तदर्थं निर्दिष्टया योगमाययैवेति गम्यते यैव खलु तत्प्रतिरूपकल्पनया तत्पतिम्मन्यांस्तान् वञ्चयति वक्ष्यते हि "नासूयन् खलु कृष्णाय" इत्यादि ततस्तैः सहाङ्गसङ्गाभावेनाजातापत्या एव केवलं स्नेहविशेषेण यान् भ्रातृप्रभृतिपुत्रान् यान् पालयन्ति त एव पुत्रा इत्युच्यन्ते तेषामपि लोके पुत्रतया व्यवहारो विशेषतस्तथा पाल्यमानत्वात् श्रीबलदेवसाम्बावप्युद्दिश्य "संस्तुतः स्वस्नुषः प्रायात् सुहृद्भिरभिनन्दितः" इति श्रीशुकेनापि प्रयुक्तत्वात् अतस्तन्मात्राभावेन गोदुग्धमेव तान् पाययन्तीति तान् पाययत दुह्यतेत्युच्यते अत एव मुनिनाप्युक्तं "पाययन्त्यः शिशून् पयः" इत्यत्र शिशूनित्येव एव इत्येव च ननु सुतान् स्तनमिति यदि च तासामुदरजा एव ते स्युस्तदा रासनृत्यनायिकानामाविष्टनायिकानां च तासां वैरूप्येण तस्य रासनृत्यस्य रसस्य च वैरूप्यं स्यात् "मातरः पितरः पुत्राः" इत्यत्र श्रीभगवद्वाक्ये केषाञ्चिद्भ्रात्रादीनपि मात्रादिविवेचकत्वेन कासाञ्चिद्वृद्धजरतीत्वमप्यायाति तत्र पुत्रत्वोक्तिरत्स्यात् तत्तु श्रीवैशम्पायनस्यासम्मतम् "युवतीर्गोपकन्याश्च रात्रौ सङ्काल्य कालवित्" इत्यनेन, तथा तदिदं तासामालम्बनरूपाणामुद्दीपनसौष्ठवमपि वर्णयता श्रीमन्मुनीन्द्रेण न मतं "भगवानपि ता रात्रीः" इत्याद्युद्दीपनसौष्ठवेनालम्बनरूपाणां तासां सौष्ठवमनुस्मृत्य रन्तुं मनश्चक्रे इति च गमितं वक्ष्यते च तासां सौष्ठवं श्रीभगवन्तमपेक्ष्य प्रौढत्वं च "मध्ये मणीनां हैमानां महामारकतो यथा" इत्यनेन "व्यरोचतैणाङ्क इवोडुभिर्वृतः" इत्यनेन "तडित इव ता मेघचक्रे विरेजुः" इत्यनेन च तस्मात् श्रीभगवता तासां पुत्रतया निर्देशस्तु परिहासपर एव न तु दोषोद्धारपरः वाचः पेशैर्विमोहयन्निसत्र प्रहस्य सदयं गोपीरित्यत्र परिहासस्य स्फुटतरत्वं दृश्यते यत एव मातरः पितरः पुत्रा इत्यादिकं च कल्पनामयमेव जल्पितं परिहासं विना तु दोषोद्धारे "निन्दामि च पिबामि च" इतिन्यायेन तासां स्वीकारे परमवैरस्यमेव च स्यात् आस्तां तावत्तासां स्वयं दोषोद्धारः तादृशस्यालम्बनदोषस्यास्तित्वमात्रेऽपि परमरसव्याघातः स्यात् तच्चान्यत्रापि सभायके कविभिर्वर्णनीयत्वेन स्वीकृतेन सम्भवति किमुत परमपुरुषोत्तमे महाकविवर्गवर्णनीये लीलारसविशेषवर्षणार्थमवतीर्णे तस्मिन् वक्ष्यते च "भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्" इति "सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः" इति च तस्मात् पतयोऽप्यासां मायामात्रप्रतीताः पुत्राश्च गौणार्था इति श्लेषार्थश्चायं तत्तस्मात् बन्धुभ्यः साध्वसाभावात् वनशोभारतिसामग्रीसद्भावाच्च अचिरं शीघ्रं मा यात यद्वा यथा तथा विलम्बेन रात्र्यन्त एव यास्यथेत्यर्थः । चकारान्माशब्दस्याग्रेऽपि सर्वत्र सम्बन्धः पतीन् मा शुश्रूषध्वं सतीश्च साध्वीर्मा शुश्रूषध्वं न सेवध्वं तत्पदवीमपि न यातेत्यर्थः । स्वातन्त्र्यादिसुखभङ्गादिति नर्मैव वत्सा बालाश्च मा क्रन्दन्ति तस्मात् तान् मा पाययत मा दुह्यत इति च स्वातन्त्र्यं सूचितमिति ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतोऽत्रागमनप्रयोजनं जातमिति व्रजं प्रति यात चिरं विलम्बं मा कार्ष्ट गत्वा किं विधेयं तत्राह—सतीः हे सत्यः ! विभक्तिव्यत्यय आर्षः पतिव्रतानामेवंविधमागमनमनुचितमिति साक्षेपं सम्बोधयति पतीन् शुश्रूषध्वं परिचरत । किञ्च, वत्साः गवां इति शेषः । बालाश्च क्रन्दन्ति क्रन्दयुस्तस्तान्वत्सान् बालांश्च पाययत क्षीरमिति शेषः । दुह्यत गा इति शेषः तदर्थं गाः दुह्यतेत्यर्थः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततो युष्मानपश्यन्तो बन्धवो भयमवाप्नुवन्ति यस्मात् तस्मात् सतीः सत्यः ॥ २२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं वनं वर्णयित्वा अप्यासक्तिमुत्पाद्य ततो गमनव्यामित्याह—तदिति । तत्तस्माद्वनं दृष्टमिति कार्यस्य सिद्धत्वात् यात एतादृशं वनमिति मायातेऽपि स्नातः चिरं माविलम्बो भ

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कर्त्तव्यः चिरं मा यातेति च न हि कश्चिद्भगवन्तं विहाय गोष्ठं गच्छति किञ्च, गोष्ठं यात तत्र गवां शुश्रूषणमपि भवति किञ्च, तत्र गतानां धर्मः सिध्यतीत्याह—शुश्रूषध्वमिति । पतिसेवा स्त्रीणां धर्मः तत्रापि भवत्यः सतीः सत्यः पतिविशेषणं वा पूर्वजन्मनि ताः पतिव्रताः स्त्रियः स्थिताः पुरुषभावनया पुरुषा जाताः भवन्तश्च पुरुषाः विपरीता जाता इति अग्रेऽपि वैपरीत्यं भविष्यन्तीति विचार्य गन्तव्यमिति भावः । धर्मस्तत्र रसस्त्वत्रैवेति पतीनिति बहुवचनात् धर्माभावश्च या भवतीनां मध्ये पतिव्रताः ता वागच्छन्त्विति सर्वासामेवातथात्वे न गन्तव्यमेवेति न हि पतिव्रताः समायान्ति लौकिकधर्मपरायणाः अतो भगवद्वाक्यं रसात्मत्वात् तदभावमेव सूचयति किञ्च, वत्साः तथैव बद्धाः बालश्च क्षुधिताः ते क्रन्दन्ति अतः तेषां रोदननिवृत्त्यर्थं तान् पाययत स्तनं दुह्यत च गाः परार्थं च भवतीनां जीवनं न स्वार्थम् अतो दुःखितानां स्थाने सुखाकाङ्क्षिभिर्न गन्तव्यमिति ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्तस्मान्मा चिरं यात अपि तु शीघ्रमेव यातेत्यर्थः । सतीः पतिव्रता अपि शुश्रूषध्वं तत्कर्मग्रहणार्थं ता अपि भजनीया एवेति भावः । इति परोढा उक्ता कुमारीः प्राह—वत्सा गवां क्रन्दन्ति तान् दुह्यत दोहयत मुनिचरीः प्राह—बालाः क्रन्दन्ति तान् पाययत पक्षे तत्तस्माच्चिरं समस्तामपि रात्रिमभिव्याप्य मा यात मया सह रमध्वमिति भावः । पतीन् साध्वीश्च मा शुश्रूषध्वं विधात्रा दत्तस्यैतादृशसौन्दर्यस्य यौवनस्य च वैयर्थ्यप्रापणानौचित्यादिति भावः । एवं मा दोहयत मा पाययत मदनुरागिणीनां भवतीनां किं तैरिति भावः ॥ २२ ॥

विशुद्धरसदीपिका ।

तत्र प्रथमपक्षे तत्तस्माद्गोष्ठं यात चिरं मा त्वरितमेवेत्यर्थः ननु, व्रजकार्यं कृत्वैवागता नेदानीं किञ्चित्करणीयमतः शनैः शनैः यास्यामस्तत्राह–भवतु पतीन् शुश्रूषध्वं यतः सतीरिति तेऽपि शुश्रूषितास्तत्राह–क्रन्दन्तीति । स्पष्टं पक्षे तत्तस्मात् "गोष्ठं गोस्थानकम्" इति कोशात्पशुप्रायावासे नागरीणां व्यवस्थितिरनुचितेति भावः । ननु, पतयस्तु सेव्यास्तत्राह पतीन् मा शुश्रूषध्वं बहुवचनश्लेषेण सतीनां बहुपतिसेवनमनुचितमित्युपहासः योगवृत्त्या पतीन् पालकानित्यर्थः । एवं च भ्रात्रादीनामपि सङ्ग्रहः तर्हि वत्सबालादिपालनं तु कृपापात्रत्वादावश्यकं तत्राह–क्रन्दन्तीति । अत्र माशब्दस्य प्रतिपदमन्वयः ॥ २२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तर्हि किंकर्त्तव्यं तत्राह—तद्यात मेति । प्रथमपक्षे यतोऽत्र बहु स्थितिरनुचिता वनादिशोभादर्शनमपि स्वल्पमं तत्तस्माद्गोष्ठं यात यास्याम इति चेत्तत्राह—मा चिरं किं त्वरया तत्राह—पतीन् शुश्रूषध्वम् अत्र बहुवचनमुपहासेन । यद्वा, बहूनां प्रत्येकमेकपतित्वेऽपि बहुत्वाभिप्रायेण । यद्वा, योगवृत्त्या पालकानिति यतः सतीः सत्य इत्यर्थः । सतीनामिदमेवोचितं पतिसेवां संपाद्यागता इति चेत् ? तत्राह–क्रन्दन्तीति । वत्साः क्रन्दन्त्यतो दुह्यत बालाः भ्रातृपुत्रादयः क्रन्दन्ति तान् गोदुग्धम् पाययत । यद्वा, बाला वत्सा इति समानाधिकरणं द्वितीयपक्षेतु तत्तस्मात् गोष्ठं गवां पशुसदृशानां स्थानं गवामिन्द्रियाणां वा विहारात्मकगति निवृतिस्थलं नागरीणां रसविलासायोग्यं चिरं मा यात पति शुश्रूषार्थं याम इति चेत्तत्राह–यतो यूयं सतीः सत्यः अतः पतीन् मा शुश्रूषध्वम् अयं भावः नश्वरपतिस्वीकारे प्रतिशरीरं पतिभेदे बहुपतित्वमापद्येत अविनाशिनो मम पतित्व एव सतीत्वं वत्सबालाद्यर्थगमनमाशङ्क्याह–वत्सा बालाश्च क्रन्दतीति । मा दुह्यत तान् मापाययत इति माशब्दस्य प्रत्येकमन्वयः । यद्वा, अस्मानन श्वरपतीनेवात्र शुश्रूषध्वं स्वमहत्त्वदृष्ट्या आविर्भावयितव्यबहुविग्रहाभिप्रायेण वा बहुवचनम् एक विग्रहस्यैव मम बहुत्वेन प्रतीतावप्येकत्वेनैव न सतीत्वक्षतिः । ननु, त्वमाप्तकाम इति किं तव शुश्रूषा स्यात् तत्राह–अन्यत्र तथात्वेऽपि अत्र स्नेहपथे न तथा किन्तु मम श्रीवत्सरूपाबाला अपि भवतीनां विरहश्रीहीना वत्सा बालाः सन्तः क्रन्दन्ति अतः स्वगवामिन्द्रियाणां रसं दुह्यत तेषु पूरयत तानपाययत तेषां भवदालिङ्गनतृषां निवर्त्तयतेति भावः ॥ २२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो नाद्यापि भागवतोत्तमा तस्मासु जाता यतेते तस्तदर्थं कमुपायमनुतिष्ठाम इति चिन्तयतीर्व्याकुलचित्ता अवलोक्याह—"वर्णाश्रमाचारवता पुरुषेण परःपुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारणम्" इत्युक्तत्वात्स्वधर्माचरणमेव मत्तोषोपायो अतस्तत्रैवाऽभ्यास उचित इत्याशयेनाह–तद्यातेति । यस्मादत्रावस्थानं निष्फलं तत्रागमनं च स्वधर्माचरणेन मत्तोषकरत्वात्सफलं तत्तस्माद्गोष्ठं यात तत्राऽपि मा चिरं शुभकार्ये विलम्बो नोचित इति भावः । तत्र गत्वा पतीन् सेवध्वं यतो हे सत्यः ! पतिव्रतानां युष्माकमिदमेवाऽनुष्ठेयमिति भावः । यद्वा, सतीः पतिव्रताः श्वश्र्वाद्याः स्त्रीः सेवध्वं "संसर्गजा दोषगुणा भवन्ति" इतिन्यायात् गुणवतीनां सेवनेन भवत्योऽपि तथाविधाः भविष्यन्तीति भावः । ननु, स्वधर्माचरणस्य भवच्चरणाभिमुख्यमेव फलं तच्च जातत्वात्ततोनिवृत्तिरेवाऽधुना श्रेयसी "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यादि शास्त्रादतस्त्वदाभिमुख्यमसहमानास्ते कथं सेवनीयास्ततस्ताश्च पातिव्रत्यन्त्वदङ्घ्रिपाथोरुहयोर्भोराजनीकृत्य दूरतस्त्यक्तमस्माभिरित्याशङ्क्य दया सर्वभूतेष्विति दयाया महाचरणाङ्गत्वात्तत्राऽऽवश्यकमपेक्षितेत्याशयेनाह—क्रन्दन्तीति । अतस्तानात्वागृत्य पाययत तदर्थं गाश्च दुह्यत अनभिज्ञापक्षे एवं व्याजेनोद्दीपयित्वा निषेधनाऽत्यासक्तिमुत्पादयति–तदिति । यस्मादत्राऽवस्थाने फलं किञ्चिदपि नास्ति तत्तस्माद्गोष्ठं यात तत्रापि मा

अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशयाः ।
आगता ह्युपपन्नं वः प्रीयन्ते मयि जन्तवः ॥ २३ ॥
भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ।
तद्बन्धूनां च कल्याण्यः! प्रजानां चाऽनुपोषणम् ॥ २४ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

चिरं यतः पतिशुश्रूषासमयो वर्त्तत इत्याशयेनाह—शुश्रूषध्व पतीन् यतो हे सत्यः! अतः क्षणमात्रमपि परपुरुषस्य मम पार्श्वेऽवस्थानं पतिव्रतानां युष्माकं नोचितमिति भावः। यद्वा, कथम्भूतान्पतीन्सतीः एते युष्मत्पतयः पूर्वजन्मनि पतिव्रताः स्त्रियः स्थिताः पुरुषभावनया पुरुषत्वं प्राप्ताः भवत्यस्तु पूर्वं पुरुषाः स्थिताः स्त्रीषु आसक्तचित्तत्वात्स्त्रीत्वं प्राप्ताः अतः पुनर्वैपरीत्यार्थं पतीन् शुश्रूषध्वमित्याशयः। किञ्च, करुणापि स्त्रीणां स्वाभाविकी भवति अतः करुणावतीनां युष्माकं बाला वत्साश्च क्रन्दन्तीत्यतो गत्वा तान् । पाययत दुह्यतेति मानिनीपक्षे अयस्माद्बन्धुभयं नास्ति वनशोभादिरूपा रमणसामग्री चैता दृष्टा तस्मात्स्माद्गोष्ठम् अचिरात् शीघ्रं मा यात किन्तु रासानन्तरं राऽयन्ते यास्यथेत्यर्थः।ननु, पतिशुश्रूषाणादिकुव्यापारस्यावश्यकत्वान्नास्त्यस्माकं चिरकालमवस्थानावकाश इति चेत्, आह—पतीन्माशुश्रूषध्वं सतीः श्वश्रुप्रमुखाश्च मा शुश्रूषध्वं सतीः पदवीं मम सेवध्वं।ननु, अस्माकं बाला वत्साश्च क्रन्दन्त्यऽतः कथमत्र स्थेयमित्याशङ्क्य यूयं नेत्रे निमील्य सकैतवं ध्यात्वाऽऽह वत्सा बालाश्च माक्रन्दन्ति अहमत्र स्थित एव सिद्धकलयाजानामि ते सुखेन वसन्ते नत्वाऽऽक्रोशन्ति तस्मात्मा यात दासादिभिः पायितत्वान्मादुह्यत तैरेव दोहनस्यापि कृतत्वादित्यर्थः। निवृत्तिपक्षे यस्मान्निर्विशेषब्रह्मप्रतिपादनं न खल तत्तस्माद्गोष्ठक्रियार्थकश्रुतिसमुदायं यात स्वसमुदायनिविष्टाभवति क्रियामेव प्रतिपादयत तदुक्तम् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति ब्रह्मणः परिनिष्ठितरूपत्वात्परिनिष्ठितवस्तुनि च प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात्तैरसंवादे प्रामाण्यस्य दुर्लभत्वात्स्वसाध्यकत्वाय क्रियामेव प्रतिपादयतेत्याशयः ननु, पौरुषेयवाक्यानि प्रमाणान्तरापेक्षत्वात्तत्संवादविसम्वादाभ्यां प्रामाण्यमप्रामाण्यं वा लभते अपौरुषेयाणां वेदवाक्यानां तु प्रामाण्यम् एवाधिगम्यविषयतया चक्षुरादिवदनपेक्षमेव प्रामाण्यमिति चेत् सत्यं तथा अपेक्ष्यप्रामाण्ययोरपि चक्षुःस्पर्शनयोरर्थे विसंवादाद्यथाऽन्यतरस्याप्रामाण्यं तथा ब्रह्मैकत्वश्रुतीनामहं मनुष्य इत्यादिप्रत्यक्षस्य च परस्परव्याघातात् अन्दस्याऽप्रामाण्यं तस्मादत्रैव स्थित्वा पतीनिन्द्रचन्द्रादिरूपान् तत्तत्कर्मप्रतिपादनेन शुश्रूषध्वं यतो हे सत्यः! स्वाध्ययविध्युपात्तत्वादप्रामाण्यशङ्काकलङ्कायोग्याः । किञ्च । सर्वमिथ्यात्वसिद्धान्तमाश्रयध्वं ॥ वत्सबालस्थानीयाः कर्माधिकारिणः सर्वेऽपि क्रन्दन्ति अतस्तान्पाययत दुह्यत तत्तत्कर्मफलं दत्तमिति प्रतिपादनेन तत्सन्तोषं सम्पादयतेत्यर्थः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्तस्मात् गोष्ठं व्रजं यात सतीः स्वानुकूलाः पतयः परिचरन्तै इति शेषः। अतस्तान् शुश्रूषध्वं परिचरतेत्यर्थः ॥ २२ ॥

भाषा टीका ।

श्रीकृष्णचन्द्र बोले, कि—हे गोपिओ! जो तुम वन देख चुकी तो अब व्रज को जाओ अब तुम ढील मत करौ,तुम तौ बड़ी सतीहौ, तुमको पराये पुरुष की ओर नहीं देखनो चाहिये अब जायकें तुम अपने पतीन की सेवा करौ, देखो तुम गायन को दुहाय के नहीं आई हौ, तासूं तुम्हारी गऊन के बछरा रह्मावत होयगें और तुम्हारे बालक प्यारे रोवत होयगे सो अब जाय के उन बालकन कूं दूध पिवाओ और गऊन कों दुहाओ ॥ दूसरो अर्थ यह कि—हे परम सुन्दरीओ! अब तुम सब कुटुम्बकेन कूं छोडकें मेरे सन्मुख आई हौ, तस्मात् चिरं अर्थात् सम्पूर्ण रात भर मत जाओ और उन प्राकृत पतीन की शुश्रूषा मत करौ विधाता ने तुम को दियो जो ये सौन्दर्य और ये यौवन ताकों व्यर्थ गमाय वो उचित नहीं है, तासों बछरा बालक जो किलावें तौ भलेई किलामनदेव अब जब तुम मेरे विषै अनुरागवारी हौ तब उनसों तुमको कहा प्रयोजन है ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संरम्भक्षुभितदृष्टीः प्रत्याह—अथवेति यन्त्रिताशया वशीकृतचित्ताः उपपन्नं युक्तं प्रीयन्ते प्रीता भवन्ति ॥ २३ ॥

दृष्टादृष्टभयप्रदर्शनेन निवर्त्तयति—भर्तुरित्यादिश्लोक त्रयेण ॥ २४ ॥ २५ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

मयि योऽभिस्नेहः प्रीतिविशेषः तस्मादिति मधुरप्रेमाख्यः पुंस्त्रीभावविशेषो निरस्तः अत एव सौदास्यमाह—हि यतः सर्वेऽपि प्राणिनो मयि प्रीतिं कुर्वन्तीति अदभिस्नेहादिति साक्षादुक्त्या तमपि श्लथयति—अत एव गौरवेण भवत्य इति। यद्वा, ननु, प्रियस्वदप्रवर! तदस्माकमभीष्टं सम्पादनं तत्राह—प्रीतिमेव कुर्वन्तीति प्रीतेर्भक्तिविशेषत्वात्तत्सङ्गकमेवास्माकमिति भावः। अन्यत्तैर्व्यञ्जितम् अहो बत परित्यक्ता एव ते सर्वे तत् किं पुनस्तत्रागमनेनेत्याशङ्क्य तच्छ्लाघं पत्यन्तरमाह—अथवेति अर्थस्तथैव। यद्वा, ममापि युष्मास्वभिस्नेहस्तस्मात् तेनेत्यर्थः। अकारप्रश्लेषेण अयन्त्रिताशयाः परमस्वाच्छन्द्येन । यद्वा, मादृशस्य

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कामिस्नेहेन यन्त्रिताशयाः पातिव्रत्येन परपुरुषस्नेहविशेषा-ऽयोगात् एवमुभयथा भावविशेषो निरस्तः तथाप्यागता यत् अन्यत्समानं वस्तुतस्त्वेवमौदासीन्यं चातुर्यभाग्याभावविवक्षुं-नार्थमेव श्लेषार्थश्चायम् अहो परमानुरक्तास्वपि भवतीषु किमु-द्दीपनगर्भैः प्रार्थनैरित्याह—अथवेति । अभिशब्देन स्नेहस्य स्वरूपस्योक्त्या मधुरप्रेमैव लक्ष्यते सामान्यतः सर्वेऽपि प्राणिनो मम प्रीयन्ते यतः अतः सर्वोत्तमव्रजसुन्दर्य्यो भवत्यो मद-भिस्नेहाद्यन्त्रिताशया वशीकृतचित्ताः सत्यः किं वा पत्यादि-भयेन स्वच्छन्दा अपि मदभिस्नेहाद्धेतोरागता यत् तदुपपन्नमेव सर्व सोऽपि विशिष्टमद्विषयकप्रीतिमत्त्वात् अत एव प्रेमादरेण भवत्य इति अतोऽधुना मया सह स्वच्छन्दं रमध्वमिति भावः ॥२३॥

शुश्रूषणं धर्मः स च अमायया शुद्धभावेन धर्मैकापे-क्षया वा चेत् परः उत्कृष्टः हि निश्चितं तद्बन्धूनां श्वश्रू-श्वशुरादीनां च शुश्रूषणं तथा प्रजानां पुत्रभृत्यादीनाम् अनुपत्यादि-शुश्रूषणानन्तरं पोषणं च धर्म एव अमायया चेत् परः एव चकाराभ्यां द्वयोरपि मुख्यतया साम्यमपि सूच्यते कल्याण्यः ! हे साध्व्यः ! तदेव युष्माकमुचितमिति भावः । यद्वा, हे शुभा-दृष्टवत्यः अतो युष्माकमेव तत् सिद्ध्यतीति भावः । एतच्च कैतवेन प्रोत्साहनं । यद्वा, जन्तवः प्रीयन्ते नाम किं वा आगता वस्तुयुक्तमेव किं तु परमधर्मेणैवाहं लभ्येयं न त्वन्यथेति तमेव-शिक्षामुद्रया बोधयन्नाह—भर्तुरिति । अर्थः स एव वस्तुत-श्चर्य्योपहास एव तस्य परमधर्मत्वाभावात् द्वितीयपक्षेऽपि नर्मैव तुच्छीकृतचतुर्वर्गश्रवणादिभक्तिसाध्यप्रेमैकलभ्यस्य तस्य पतिशुश्रूषणाद्यधर्मेणालभ्यत्वात् अतस्तस्य धर्मस्य परत्वोक्ति-रपि नर्मैव एवेति अत एवोक्तं गीतादौ "सर्वधर्मान्परि-त्यज्य" इत्यादि । श्लेषार्थश्चायं कल्याण्यः हे महाभाग्यभाजः ! न केवलं भर्तुः तद्बन्धूनां मद्विधानां च शुश्रूषणमभीष्टपूरणरूप परो धर्मः । यद्वा, वृष्ट्यादिभ्यो गोष्ठादिरक्षणात्साक्षादहमेवात्र-त्यानां सर्वेषां भर्ता तस्य किं वक्तव्यं भर्तुर्मम शुश्रूषणमिति मद्बन्धूनां श्रीव्रजेन्द्रबलदेवादीनां च तत् शुश्रूषणं तथा प्रजानां मत्परिजनानां सुबलादीनां श्रीव्रजेन्द्रगृहदासानां च अनुपोषणमपि परो धर्मः अतः शुद्धभावेन मम सेवा क्रियतामिति भावः । किञ्च, श्रीभगवतो रसोपयुक्तेऽर्थे प्रयुक्तामपि वाचं बहवो अर्था अनुवर्त्तन्ते तत्रैश्वर्य्यरूपोऽयमर्थः । स्त्रीणाम् अन्यासां प्राकृतयोषितामेव धर्मः न तु सर्वस्त्रीवर्गवरिष्ठानां लक्ष्मीप्रार्थ्यसौभाग्यानां युष्माकं भक्तौ प्रवृत्तानामपि धर्मानादरात् तथोक्तम् "त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेः" इत्यादिना एतत्तु हरिभक्तिविलासे एकान्तिलक्षणादौ बहुशो विवृतमेवा-स्ति । यद्वा, भर्तुर्जगद्भर्तुर्मम । यद्वा, धर्मरहस्यसारसर्वस्वं शृणु-तेति पारमार्थ्यमेव नर्मणैवाह—भर्त्तुरिति त्रिभिः । व्रजस्त्रीणां, युष्माकं भर्तुः शुश्रूषणम् अधर्मः पापम् अमायया तु परोऽधर्मः महापापमेव भक्तिपराणां श्रवणादिभक्तिरूपस्वधर्मपरि-त्यागेन पतिसेवादिपरधर्मे प्रवृत्त्या महानर्थोत्पत्तेः तथाचोक्तं गीतासु "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" इति यद्वा, अकारो विष्णुरहमेव तस्मिन्नपि मायया भक्त्यादित्यागेन यश्च तथा यत् भर्तुः शुश्रूषणमिति भगवद्भक्तिहीनानां सर्वकर्मणां वैफल्याद्वैपरीत्याच्च तथा चोक्तं बृहन्नारदीये—

'किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः ।
विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः" ॥

स्कान्दे च रेवाखण्डे—

"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत ! ।
पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरे:" ॥ इति ।

एतच्च भक्तिविलासे वैष्णवमाहात्म्यादौ व्यक्तमेव ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ संरम्भक्षुभितदृष्टीस्ता निवर्त्तयितुमिव जन्तुमात्रसाधा-रणतानिर्देशेनातिक्षोभयन्नाह—अथवेति । पक्षान्तरमिदं दृष्टं वन-मित्यादि निरसनापेक्षया मयि योऽभिस्नेहः प्रीतिसामान्याति-शयः तस्मादिति रत्याख्यः पुंस्त्रीभावविशेषो न गृहीतः विशे-षणाभावात् अत एव सहोदास्यमाह—हि यतः सर्वेऽपि प्राणिनो मयि प्रीतिं कुर्वन्तीति मदभिस्नेहादिति साक्षादुक्त्या तमपि शिथिलयति—अत एव गौरवेण भवत्य इति अन्यस्तैः यद्वा, अहो बत परित्यक्ता एव ते सर्वे तत् किं पुनस्तन्नाम-ग्रहणेनेत्याशङ्क्य सश्लाघं पक्षान्तरमाह—अथवेति । अर्थतस्तथैव वस्तुतस्त्वेवमौदासीन्यं चातुर्यभङ्ग्याभावविवक्षुनार्थमेवेति श्लेषार्थ श्चायम् एवं यद्यप्यन्यप्रयोजनागतास्तथापि मत्प्रार्थनया कियन्तं क्षणमत्र विश्राम्यतेत्येवमुक्त्वा पक्षान्तरमाह—अथवेति । अभि-शब्देन स्नेहस्य सम्यक्त्वोक्त्या रत्याख्यभाव एव सूच्यते ततश्च यदि वा मदभिस्नेहादागतास्तर्हि तदेतत् उपपन्नं युक्तमेवे-त्यर्थः । तत्र हेतुः जन्तवः प्राणिमात्राण्यपि मम मत्सम्बन्धे प्रीयन्ते मयि प्रीताः भवन्तीत्यर्थः । ततस्तादृशभाववतीनां वा भवतीनां का वार्त्तेति भावः । अत एव प्रेमादरेण भवत्य इति अतोऽधुना मया सह स्वच्छन्दं रमध्वमिति भाव इति ॥ २३ ॥

ननु, यद्यस्माकं भवदभिस्नेहो निश्चितस्तदा भवच्छुश्रूषापि युक्तेत्याशङ्क्य धर्मशास्त्रेण भावयति—भर्त्तुरिति त्रिभिः । भर्त्रा-दीनामेव शुश्रूषणादिकं धर्मः नतु तदितरेषामस्माकं स चान्य-धर्मापेक्षया परः । ननु, तदप्यस्माभिर्यथा युक्तं क्रियत एव तत्राह—अमाययेति । परपुरुषस्य मम भजने तत्तु सकपटमेव स्यात् ततः सोऽपि दुष्येदिति भावः । कल्याण्यो हे साध्व्यः ! तदेव युष्माकमुचितमिति भावः । एतच्च कैतवेन प्रोत्साहनं वस्तु तश्चोपहास एव तस्य परमधर्मत्वाभावात्—

"एतावानेव लोकेऽस्मिन् पुंसां धर्मः परःस्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः" ॥

इति श्रीधर्मराजवाक्यादिति श्लेषार्थश्चायं न केवलमभिस्नेह-हेतोरेवोपपन्नत्वम् अपि तु धर्महेतोरपीत्याह—भर्त्तुरिति । अमायया कन्याभिर्निजसद्भाववृतत्वेनैव न तु बलादापादितत्वेन यो भर्त्ता तस्यैव शुश्रूषणं परो धर्मः तथा तद्बन्धूनाञ्चेत्यादि अन्यत्र परमधर्मविदां श्रीभीष्मेणास्वायाः परित्यागाद्धर्मतो भर्तृ-त्वासिद्धेः तदेवं सद्भावावृतत्वेन ते मायया कपटेनैव भर्त्तारः सद्भाववृतत्वेन त्वहमेव सत्यभर्त्ता भवतीभिः शुश्रूषणीय इत्यर्थः । अत्र तु बाल्यमारभ्य भवतीनां हृदयमेव मम साक्षीति भावः । वस्तुतस्तु स एष एवार्थः स्थापयिष्यते ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु त्वयि स्नेहाद्वयमागताः अतः कथमेवं वक्तुमर्हसीत्यत्राह—अथवेति । मयि प्रेमप्रकर्षाद्वशीकृतचित्ता यदि यूयमागतास्तर्हीदमागमनमुपपन्नं युक्तमेव कुतः हि यस्माज्जन्तवो मयि प्रीयन्ते मयि प्रीतियुक्ता भवन्ति सर्वान्तर्यामिणि सर्वसुहृदि मयि सर्वजन्तुसाधारणीं प्रीतिमात्रं भवतीनामप्यविरुद्धम् ॥ २३ ॥

न केवलं त्वदभिस्नेहमात्रादागताः किन्तु त्वया सह रन्तुमिच्छयेत्यत्र दृष्टादृष्टभयप्रदर्शनेन प्रत्याचष्टे—भर्तुरिति त्रिभिः । यदमायया निष्कापट्येन भर्तुः शुश्रूषणं परिचरणं तदेव स्त्रीणां परो माया यस्मात्तथाविधः धर्मः तथा हे कल्याण्यः तस्य भर्तुर्बन्धूनां पितृभ्रात्रादीनां प्रजानां स्वापत्यानां च यथार्हं शुश्रूषणं च परमो धर्मः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृतागमनकारणमित्ययुक्तमुक्तम् रागमूलत्वात्प्रवृत्तेरिति तत्राह—अथवेति । मदभिस्नेहान्मदधिकरणात्स्नेहात् यन्त्रिताशयाः वशान्तःकरणाः नियमिताभिप्राया वा हि यस्मात्तस्मादागमनमुपपन्नं तत्कथमत्राह—प्रीयन्त इति । मम प्रीयमाणस्य सतः सर्वेऽपि प्रीणन्ति न चेत् तयेत्यन्वयव्यतिरेकाभ्यां प्रमितत्वात् ॥ २३ ॥

किञ्च, अन्यदेकं शास्त्रविहितं वदामीत्याशयेनाह—भर्तुरिति । स्त्रीणाममायया अवञ्चनया भर्तुः पत्युः शुश्रूषणं धर्मो हि लोकवेदसिद्धः भर्तरि सन्निहितो नारायण इति बुद्ध्या शुश्रूषणं परो धर्मो हि यस्मात्तस्मात्तस्य भर्तुः बन्धूनां कल्याणं च श्रेय इति च न केवलं तद्बन्धूनां श्रेयः अपि तु प्रजानां सन्ततिलक्षणानां चानुपोषणं समृद्धिकरणं च भवतीत्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किम्वा प्रार्थनापक्षे भर्तुरिति अमायया अमिथ्यात्वेनैव यो भर्त्ता तस्य कौमारभारस्य भवतीनां मय्येव ननु तत्कान्तभावः इति मिथ्यैव भर्त्तुरित्यर्थः । कन्या वैमत्येन बलात् पतित्वाभवात् परमधर्मविदा श्रीभीष्मे याम्बायाः परित्यागादिति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनर्व्यंजं यातेत्यस्यैवानुकूलं वदति—अथवेत्यादि । न वनादिदिदृक्षया समागताः स्मः त्वद्दर्शनार्थमेवागता स्म इति चेत् तदुपपन्नमेव मदभिस्नेहयन्त्रितत्वं हि साधूनामेव यतः प्रीयन्ते मयि जन्तवः प्राणिमात्रमेव मयि प्रीयन्ते किं पुनर्भवत्यः तन्मद्दर्शनं तूपपन्नमेव सम्प्रति घोषं यातेत्यर्थः । पक्षान्तरे भवत्यो मदभिस्नेहात् यन्त्रिताशया इति जानीमः तेन आगताश्च अतोऽतः परं यदुचितं तदुपपन्नं भविष्यत्येव यतः मयि जन्तवः प्रीयन्ते प्रीता एव भवन्ति तद्यूयम् सम्प्रीता भविष्यथ तत्किमिति मा घोषं यातेत्यर्थः ॥ २३ ॥

पुनस्तद्यात माचिरं घोषमिति यदुक्तं तदनुकूलं वक्ति भर्त्तुरित्यादिसुगमं पक्षे भर्त्तुर्ममेत्यर्थः । एकवचनप्रयोगात् अमायया अकैतवेन हि निश्चितं हे कल्याण्यः । तस्य मम बन्धूनां मत्सुहृदां प्रजानां प्रकृष्टजन्मनाम् अनुपोषणम् अन्योन्यपरिपालनं च धर्मः परमः मच्छुश्रूषणम् अन्योन्यप्रीतिश्चेति द्वयं परमो धर्म इति वाक्यार्थः तेनान्योन्यसौहार्दपुरस्सरं मच्छुश्रूषणमेव कुरुतेति भावार्थः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमुक्ते याः स्तिमितदृष्टयो जाताः ताः प्रत्याह—अथवेति । मया वृथैवैते पक्षाः कल्पिताः वस्तुतस्तु मां द्रष्टुमेवागताः स्नेहात्, सिद्धान्तोऽयं पूर्वपक्षार्थमनूद्यते निरुक्तो भावो गुणात्मको दोषात्मको वा न फलं प्रयच्छति लौकिको भवति अतः अनूद्यन्ते, मयि योऽयमभितः स्नेहः सर्वभावेन तेन कृत्वा यन्त्रित आशयो यासां ता दृश्यश्चेद्भवत्यः इहागताः तदुपपन्नमेव तर्हि को विलम्ब इति चेत्तत्राह "प्रीयन्ते मम जन्तवः" इति मम सम्बन्धिनः सर्वे एव जन्तवः स्वयमेव प्रीता भवन्ति न तु मया किञ्चित् कर्त्तव्यं स्नेह एव मयि न तु कृतिरिति ततः साधारणमिममर्थं ज्ञात्वा प्रतियात स्थितिपक्षे तु स्पष्ट एवार्थः तद्यातमेति फलिष्यति न हि स्नेहादागतः प्रेयमाणोऽपि गच्छति यन्त्रितो वशीकृतः अन्तःकरणे अन्याधीने जाते न किञ्चिद्बाधिष्यते निष्कपटा च प्रीतिः कर्त्तव्येत्युभयत्र भावः ॥ २३ ॥

एवं राजसीर्निरूप्य सात्त्विकीर्निरूपयति—सत्त्वयुक्ताः निरूप्यन्ते ततो रजोयुक्ताः स्त्रीणां मुख्यो धर्मः भर्तृशुश्रूषणमित्याह—भर्त्तुरिति । स्वभावतो जीवानां भगवानेव भर्त्ता तत्रापि स्त्रीणां स्त्रीशरीरं प्राप्तानां व्यभिचाराभावाय भगवानेव सेव्यः लौकिके तु परिग्रहात् भर्तृत्वेनाभिमतः सेव्यः स एव परो धर्मः तत्राप्यमायया कापट्ये तु न सेवायां फलम् अन्ये सर्वे धर्मा अवरा तद्बन्धूनां श्वशुरादीनां कल्याण्य इति सम्बोधनात् भवतीनां सर्वे सन्तीति ज्ञापितं प्रजानां च पुत्रादीनामनुपोषणम् अन्नादिदानेन स्तनादिदानेन च पित्रादिभिः पोष्यमाणानां स्वतोऽपि पोषणं वा ॥ २४ ॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथवेति हन्त मया वृथैवैतान्यागमकारणानि कल्पितान्यधुनैव कारणमवगतमित्याह—मयि योऽभिसर्वतोभावेन स्नेहस्तस्माद् यन्त्रिताशयाः वशीकृतचित्ताः अत एवागतास्तदुपपन्नं मद्दर्शनलाभात् सिद्धं यतो मयि जन्तवः प्राणिमात्राणि प्रीयन्त इत्यौत्पत्तिकं मे सौभाग्यं न त्वौपाधिकमिति भावः । तेन भवत्यो मयि प्रीतिसामान्यवत्य एव ननु कामोपाधिकप्रीतिविशेषवत्य इति ध्वनितम् पक्षे मदभिस्नेहः कान्तभावमयः प्रेमा तस्मात्स्वसौन्दर्येणाकृत आशयो याभिस्ताः भवतीनां मनसा मन्ये योगेनाह—आकृष्टो वर्त्त इत्यर्थः । तत् आगमनमुपपन्नमुचितमेव नतूपपत्तिरहितमित्यर्थः । मयि जन्तवोऽपि प्रीयन्ते किमुत भाववत्यो भवत्य इति भावः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, भवदभिस्नेहवत्यो वयं भवामेति चेज्जानासि तर्हि तथात गोष्ठमिति मुहुः किं ब्रवीषि नहि स्नेहाश्रयो जनः स्नेहविषयं जनं त्यक्तुं शक्नुयात्, सत्यं येन धर्मः सिद्ध्येत् तदेव स्नेहवतापि(व्रज)जनेन कर्त्तव्यमिति शास्त्रमत एतद्ब्रवीमीत्याह—भर्त्तुरिति ।परः उत्कृष्टः अमाययेति ननु पुंश्चलीत्वे सतीत्यर्थः तद्बन्धूनां श्वश्र्वादीनां पक्षे स्त्रीणां प्रस्तुतत्वात् स्त्रीविशेषाणां व्रजसुन्दरीणां भवतीनामित्यर्थः । भर्त्तुः शुश्रूषणं परो धर्मः न त्वात्मीयः अतः स नानुष्ठेय इति भावः यदुक्तम्—

विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥

मम विष्णुत्वाद्भवतीनां च वैष्णवीत्वान्मद्भजनमेव भवतीनां स्वधर्मोऽस्त्वस्तु परधर्म एव "धर्मान् सन्त्यज्य यः सर्वान् मां भजेत्स च सत्तमः" इति धर्मान्तरत्यागपूर्वकस्य मद्भजनस्य विधिरिति भावः ॥ २४ ॥

—————

विशुद्धरसदीपिका ।

इत्थमाकस्मिकागमनाभिप्रायेण प्रत्याख्याता अप्यायान्तीः सरम्भक्षुभितदृष्टीः साधारणप्रीत्याश्रयनिर्देशेनातिक्षोभयन्नाह—अथवेति । मदभिस्नेहात् प्रीतिसामान्यातिशयात् यन्त्रिताशयाः वशीकृतचित्ताः सत्यः आगता इति चेदुपपन्नमेव युष्मासु यतो मयि विषये जन्तवोऽपि श्रीवृन्दावनगताः स्थिरचराः सर्वेऽपि प्रीयन्त इत्यर्थः । पक्षे अभिस्नेहात् अभितः स्नेहात् यतो मयि प्रीतिसामान्यं तु जन्तुमात्रमपि करोतीत्यर्थः । तत्र भवत्यस्तु मम प्राणप्रियाश्च प्राणसख्यः सर्वदा मयि परमप्रीतिमत्यः ततश्चात्रावस्थानेन रासाद्यनुष्ठानेन विशिष्टामेव प्रीतिं कर्त्तुमर्हथेत्यर्थः ॥ २३ ॥

प्रथमे पक्षे ननु, प्रीत्यतिशयादेव वयं न याम इत्याशङ्क्य स्पष्टमाहत्युभयं दर्शयन्नाह—भर्त्तुरिति, त्रिभिः । तत्र भर्त्तुरिति स्पष्टम् ॥ २४ ॥

—————

श्रीरामनारायणकृतभावभावविभाविका ।

प्रथमपक्षे नास्माकं पत्यादिना वनशोभया वा कृत्यं किन्तु त्वत्स्नेहादागताः किमेवमुच्यते तत्राह—अथवेति । मया तु भवदागमनं वनशोभार्थमेव ज्ञातम् अथवेति अर्थान्तरे मदभिस्नेहादेव यन्त्रिताशया भवत्य आगता यतो न केवलं भवत्य एव प्रीयन्ते मयि सर्वेऽपि जन्तवः प्रीयन्ते तथापि मद्दर्शनमुपपन्नं नाधुना विलम्ब उचित इति भावः । द्वितीयपक्षे तु किं बहुप्रार्थनया त्वदर्थमेव वयमागतास्तत्राह—अथवेति । मदभिस्नेहाद्यन्त्रिताशया भवत्य आगतास्तत्तु उपपन्नमेव यदा मत्स्नेहाविषया जन्तवोऽपि मयि प्रीयन्ते तदा मत्प्राणप्रियाणां भवतीनां तु तत्प्रेमोपपन्नमेव योग्यमेवेति भावः ॥२३॥

प्रथमपक्षे वयं त्वां त्यक्तुं न शक्नुमः कथं याम इत्यपेक्षायां धर्मोपदेशमाह—भर्त्तुरिति । नन्वन्यान् धर्मान् करिष्यामः तत्राह—स्त्रीणामिदं भर्तृसेवनमेव परो धर्म इति न तत्सदृशोऽन्यो धर्मः शुश्रूषणं कुर्वैवागतास्तत्राह—अमाययेति । निष्कपटसेवैवोचिता ननु सेवया वञ्चयित्वान्यत्र गमनम् अन्यत्स्पष्टम् द्वितीयपक्षे तु मयि प्रेमाचरणमुपपन्नमित्युक्तमेवोपपादयति—भर्त्तुरिति । यतोऽमायया भर्त्तुः शुश्रूषणं तद्बन्धूनां प्रजानामनुपोषणं च स्त्रीणां परो धर्मः अतो परमार्थभर्त्तुर्मम सेवनं मदङ्गरसदानमेवोचितमिति भावः ॥ २४ ॥

—————

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एतच्छ्रुत्वाऽत्यन्त खिन्नचित्ता आलक्ष्याह—नास्ति भवतीनां वनशोभेक्षणेच्छा नापि मदपेक्षयाऽधिकं पुत्रादौ स्नेहोऽतो मद्दर्शनार्थमत्र समागता इत्याह—अथवेति । मयि यः स्नेहस्तेन यन्त्रिताशयाः वशीकृतचित्ताः सत्यो मद्दर्शनार्थं यूयमागता इति स्यात् तदेतदुपपन्नमुपपत्तियुक्तं न तरो पक्षः हि यतः सर्वेऽपि जन्तवो मयि प्रीयन्ते प्रीता भवन्ति । यद्वा, उपपन्नं सिद्धं यतो मयि दृष्टे जन्तवः प्रीयन्ते अतो भवत्यो मद्दर्शनेन प्रसन्नाः सत्यः गच्छतेति भावः । अनभिज्ञापक्षे एवं श्रुत्वा संरम्भक्षुभितदृष्टीरालक्ष्य ततोऽप्यधिकक्षोभमुत्पादयति, अथवेति । वनादिकं द्रष्टुं नागतास्ते पक्षा वृथैव मया कल्पिताः भवत्यस्तु मयि योऽभितः स्नेहः स्वाभाविकी प्रीतिः न तु कामाद्युपाधिका तेन यन्त्रिताशयाः आगतास्तदुपपन्नम् अयमेव पक्ष उपपन्नो हि यतः सर्वेऽपि प्राणिनो मयि प्रीयन्ते तथा च सामान्यप्रीत्यतिशयवत्यो मद्दर्शनार्थं समागतास्तस्यापि जातत्वाद्गन्तव्यमिति भावः । अथवा यतो मयि जन्तवः प्रीयन्ते अतो मत्स्नेहाद्भवत्योऽपि यन्त्रिताशयाः तदेतदुपपन्नं यत आगताः मानिनीपक्षे पूर्वं यद्यपि प्रयोजनान्तरार्थमागताः भवत्यस्तथापि मन्मनोरथपूर्त्त्यर्थमत्र तिष्ठतेत्युक्तमिदानीं भवतीनां मयि स्नेहातिशयो वर्त्तते इति चिरकालान्मया बुद्ध्यतेऽतः किमर्थं ते तिरोधानं क्रियत इत्याशयेनाह—अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशया यत आगता भवत्यस्तु योग्या एव मयि तु सर्वेऽपि जन्तवः प्रीयन्तेऽतो मत्स्नेहाकृष्टचेतसामत्रागमनमुपपन्नं बहुयोग्यं जातमतोऽत्र स्थित्वा तत्फलं सम्पाद्यमिति भावः । निवृत्तिपक्षे पूर्वं श्रुतीनां समस्तानां क्रियापरत्वमुक्तं तत्र ब्रह्मप्रतिपादकश्रुतीनां क्रियापरत्वासम्भवादानर्थक्याद्धुङ्कारादिवज्जपमात्रोपयोगित्वं वास्त्विति सूचितमिदानीमध्ययनविध्युपात्तानां वेदान्तानामानर्थक्यायोग्यं प्रतीयमानार्थस्य प्रत्याख्यानाऽसम्भवं चाभिप्रेत्याहस्तु वा कर्मापेक्षितकर्तव्यस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वमुपनिषदामिति पक्षान्तरमाह—अथवा मयि अस्मत्प्रत्ययगोचरे आत्मनि अभिस्नेहात्प्रतिपादनपरत्वात् यन्त्रिताशया आनर्थक्यं जपोपयोगित्वं वा गमयितुमशक्यास्तर्हि उपपन्नं कर्मणा सम्बद्धं कर्तृदेवतादिरूपमात्मानमागतास्तत्स्वरूपप्रकाशने सङ्गता एवं रीत्या प्रतिपाद्यमाने मयि आत्मनि सति जन्तवः सर्वेऽपि लोकाः प्रसन्ना भवन्तीत्यर्थः ॥ २३ ॥

यद्यपि भवत्यो मयि स्नेहातिशयवत्यो मद्दर्शनार्थमागता इत्यहं जानामि तथापि श्रुतिस्मृतिबोधितस्वधर्मत्यागो नोचित-

दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥

श्रीधनपतिसूरिकृतगूढभागवतदीपिका।

इत्याशयेनाह—भर्तुरिति। भर्तुः शुश्रूषणं स्त्रीणां पर उत्कृष्टो धर्मः स्त्रीणामिति विशेषणेन—

"एतावानेव लोके ऽस्मिन् पुंसां धर्म्मः परः स्मृतः।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥"

इत्यादिशास्त्रात्पुरुषाणां साक्षाद्भगवद्भजनमभिहितं स्त्रीणां तु स्वपतिरूपस्य ममाराधनोक्तम्—

"नैव यज्ञक्रिया काचिन्न श्राद्धं नोपवासकम्।
या तु भर्तरि शुश्रूषा तया स्वर्गं जयत्युत ॥"

इत्यादिशास्त्रात् तत्राप्यमायया कपटराहित्येन तस्य बन्धूनां तस्य श्वश्र्वादीनां च शुश्रूषा प्रजानां पुत्रादीनां चानुपोषणं स्तनाभिदानेन पित्रादिभिः पोष्यमाणानां तदनु स्वे पोषणमिति वा हिशब्दो यथोक्तधर्मस्य लोकवेदप्रसिद्धिं द्योतयति—

"श्रुतिस्मृती ममैवाज्ञे यस्तामुल्लङ्घ्य प्रवर्तते।
आज्ञाभङ्गी मम द्वेषी मद्भक्तो ऽपि न वैष्णवः ॥"इत्यादि

अनभिज्ञापक्षे ननु, मत्स्नेहाकृष्टमानसाः मदर्थमागता इति यदि जानासि तर्हि प्रतियात व्रजं तद्यातेति किमिति निष्ठुरं ब्रवीषि न हि परस्परस्निग्धानामियं रीतिरित्याशयवतीरालोक्याह,"पापान्निवारयति योजयते हिताय"इति मित्रलक्षणेऽभिहितत्वाल्लोकद्वयहितार्थमिदं मदीयं वाक्यमतिकोमलमित्याशयेनाह, भर्तुरिति। एतेन त्वयि स्निग्धात्वात्त्वच्छुश्रूषणमधुना कर्त्तुं प्रवृत्ता अतो भवताऽपि तदनुमोदनं कर्तव्यमिति शङ्काऽपि निरस्ता यथायोग्यस्नेहस्य शुश्रूषणस्य च युक्तत्वात् तथा भर्त्तरि कर्तव्यं स्नेहादिकमन्यत्र न कार्य्यमतो मय्यपि यथा जन्तवः प्रीयन्ते तथा प्रीतिः कर्तव्येति भावः। मानिनीपक्षे न चात्र धर्म्मः शङ्कामहमेव युष्मद्भर्तृत्वेन मत्सेवनस्य परमधर्मत्वादित्याशयेनाह—अमायया भर्तुः बाल्यभावादारभ्य निष्कपटतया भर्तृत्वेन वृतस्य मम शुश्रूषणं परो धर्म्मः न तु बन्धुभिर्बलात्कारेणापादितस्य भीष्मे णाम्बायाः परित्यागेन बलापादितस्य धर्म्मतो भर्तृत्वासिद्धज्ञापनाय तस्मात्कपटागतभर्तुस्तद्बन्धवादि सेवादिकं विहाय मम मद्बन्ध्वादि सेवनादिकमेव भवतीनां धर्मतोऽपि प्राप्तत्वादावश्यकमित्यर्थः एवं कृते नास्ति कदाप्यकल्याणमिति सम्बोधनाशयः निवृत्ति पक्षे तस्माद्भर्तुः स्वनियस्य प्रतिपाद्यार्थस्य सेवनं तत्परत्वमेव स्त्रीस्थानापन्नानां श्रुतीनां धर्म्मः शक्त्यादिलक्षणाः ननु, तात्पर्य्येणाऽन्यपरत्वेऽपि स्वार्थपरता न हीयत इति चेत्तत्राह—अमाययेति। यत्परः शब्दः स शब्दार्थ इति न्यायात् तथा च निर्व्याजेन स्वार्थपरत्वं परमो धर्मः उभयपरत्वे वाक्यभेदाद्धेकपरत्वमावश्यकं सम्भवति स्वार्थपरत्वेऽन्यपरता न न्याय्येति भावः। कचिच्छक्यार्थासम्भवे तद्बन्धूनां शक्यार्थसम्बन्धिनां सेवाप्रतिपादनमपि धर्म्मः प्रजानां तत्स्थानीयानां मतानां विवक्षावितर्कैः पुष्टानामनुपोषणं तत्रैव प्रमाणतयोपस्थित-

तया पुनरतिपुष्टत्वसम्पादनं च यतो हे कल्याण्यः! कल्याणप्रवृत्तिनिवृत्तिसबोधनपरा शास्त्ररूपाः अन्यथा शास्त्रपदप्रतिपाद्यत्वमेव भवतीनां न स्यात् प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृत्यकेन वा पुंसां येनोपदिश्यते तच्छास्त्रमभिधीयत इति शास्त्रलक्षणाभिधानात् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यदि नोत्पातास्तदा कस्मात् वनशोभेक्षणाय वा गताः किन्तु यन्त्रिताशयाः वशीकृतचित्ताः भवत्यः मदभिस्नेहादागतास्तदागमनमुपपन्नं युक्तम् हि यतो जन्तवः सर्वेऽपि प्राणिनोऽविशेषेण मयि प्रीयन्ते प्रीता भवन्ति अनुरक्तिं कुर्वन्तीत्यर्थः ॥ २३ ॥

एवं सर्वसाधारणं मदनुरक्तिलक्षणं धर्मं पुरस्कृत्य स्वासाधारणः स्त्रीधर्मो भवतीभिरत्यादरेणानुष्ठेय इत्याह—भर्तुरिति द्वाभ्याम् ॥ २४ ॥ २५ ॥

भाषा टीका।

अथवा हे गोपी हो अब मैंने तुम्हारे आयबे को मुख्य कारण समझ्यो कि-तुम परम सुकमारी भोरी भारी मोमें अनुराग धारी मेरे ऊपरस्नेह कर के आई हो। काहे सों कि-तुम्हारो आशय जो अन्तः करण है सो स्नेह तें बश्यो भयो है सो बे बात उचितही है, क्यूंकि-तुम तो परम चतुर प्रीति के सारको जाननवारी हो पर मेरे ऊपर तो जीव जाति प्राणी मात्र सबही प्रसन्न होवें हैं तो फिर तुम क्यों न प्रसन्न होवगी ॥ २३ ॥

हे प्यारी कल्याणियों तुम मोपै स्नेह करि कें आई सो तो भली भई परन्तु स्त्रीन को तो कपट छोडि कें अपने पति की सेवा करनी और बाके बन्धु जो माता पिता भैया बहन है तिनकी शुश्रूषा करनी यही परम धर्म है तथा अपने पुत्रनकी रक्षा करनी यही परम धर्म है। अथवा दूसरो अर्थ यों है, कि-तुम्हारी सरी की मोमें अनुराग धारी स्त्रीन) को तो निष्कट होयके पतिन की शुश्रूषाकरनी और उनके बन्धून की सेवा करनी तथा प्रजा को पोषण करनो येतो पर परायो ये धर्म है कछुस्वधर्म नहीं है तुम्हारो स्वधर्म तो यही है, कि-केवल मेरी सेवा और मेरे सुख में सुखमाननो सो तुम जानती होवगी ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, परोपदेशपण्डित ! सर्वथा पतयः परित्यक्ता एव अधुना किं तदीयशुश्रूषाद्युपदेशेन ? तत्राह—दुःशील इति । चौर्य्यादिरतः दुर्भगः भाग्यादिहीनः निष्फलोद्यम इत्यर्थः । वृद्धो जराभिभूतः जडः कर्मादिषु सामर्थ्यहीनः रोगी महारोगग्रस्तः अधनः अतिदरिद्रः निजोदरभरणेऽप्यसमर्थ इत्यर्थः । अपिशब्दस्य प्रत्येकमन्वयः दौःशील्यादियुक्तोऽपि न हेयः व्रजवासी तु सर्वसद्गुणयुक्त एवेति कथं त्याज्यः स्यादित्यपिशब्दार्थः । लोकेप्सुभिः लोकद्वयापेक्षावतीभिः अन्यथा इह लोके दुष्कीर्त्यादिकं परत्र च नरकादिकमित्यर्थः । तत्र च महापापरतः परित्याज्य एवेत्याह—अपातकीति । तथा च स्मृतिः "पतिं त्वपतितं भजेत्" इति अतोऽत्रस्थानां सर्वेषामप्यपातकित्वान्न हातुं योग्य एवेति भावः वस्तुतस्तु पश्चात्कदाचित् कुतो धर्म्मादिविचारे सति स्वविषयक भावविशेषे शैथिल्यं सम्भवेदिति तन्निरसनेन स्वयमेवाग्रे धर्म्मश्रावणेन तासां भावो दृढीकृत इति । यद्वा, इदमपि पूर्ववन्नर्म्मैव तद्भजनापेक्षया सौशील्यादिषड्गुणयुक्तस्यापि पत्युर्हेयत्वात् तन्निरूपितमेव । श्लेषार्थश्चायम् आपद्भ्यः पातीति पतिरहं दौःशील्यादियुक्तोऽपि सन् तथा अपातकी धर्म्मादपतितोऽपि सन् लोकद्वयेप्सुभिरपिपतिपुत्रादीच्छुभिरपि वा स्त्रीभिर्व्रजाङ्गनाभिर्युष्माभिर्न हातुं योग्य एव किन्तु आलिङ्गनादिना सदा सङ्गम्य एवेत्यर्थः । अहं तु न तादृशो भवाम्येव सर्वसद्गुणत्वेन युष्मदेकप्रियत्वेन च तद्वैपरीत्यात् यूयं च मदपेक्षया लोकानपेक्षिका एव तदधुनापि कथं नालिङ्गयेयेति भावः यद्वा, प्राकृतस्तादृशषड्दोषयुक्तोऽपि पतिर्न हेयः अहं तु तत्त्वतः पतिरेव साक्षात् षड्गुणैश्वर्य्ययुक्तश्च कथं हेयः स्यामिति सर्वत्यागेन यूयमागता यत् तदुपपन्नमेव । यद्वा, लोकेप्सुभिरेव न हातव्यः परमार्थेप्सुभिस्तु सौशील्यादियुक्तोऽपि अपातक्यपि हातव्यः भवत्यस्तु मयि परमानुरागाकृष्टत्वाल्लोकद्वयमर्य्यादातिगा एवेति भावः । तत्र सिद्धान्तो लिखित एव । यद्वा, गोपङ्क्तो ऽप्यसूययाह—स्त्रीभिर्व्रजस्त्रीभिरपातक्यपि दुःशीलादिरूपः पतिर्न हातव्यो न गन्तव्यः "ओहाङ् गतौ" इत्यस्य दुःशीलः क्रोधनः दुर्भगः कुरूपः वृद्धः जीर्णः जडो मूर्खः रोगी सदा व्याधितः अधनो बहुगोधनहीनः लोकेप्सुभिः मदालोककामाभिः ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, परोपदेशपण्डित ! सर्वथा पतयः परित्यक्ता एव अधुना किं तदीयशुश्रूषाद्युपदेशेन ? तत्राह—दुःशील इति । चौर्यादिरतः दुर्भगः भाग्यादिहीनः निष्फलोद्यम इत्यर्थः । वृद्धो जराभिभूतः जडः कर्मादिषु सामर्थ्यहीनः रोगी महारोगग्रस्तः अधनः अतिदरिद्रः निजोदरभरणेऽप्यसमर्थ इत्यर्थः । अपिशब्दस्य प्रत्येकमन्वयः । दौःशील्यादियुक्तोऽपि न हेयः व्रजवासी तु सर्वसद्गुणयुक्त एवेति कथं त्याज्यः स्यादित्यपिशब्दार्थः लोकेप्सुभिः लोकद्वयापेक्षावतीभिः अन्यथा इह लोके परत्र च दुःखमेवेत्यर्थः । तत्र च पातकयेत्र परित्याज्य इत्याह—अपातकीति । पातकं पतनहेतुः पापविशेषः तथा च स्मृतिः "पतिं त्वपतितं भजेत्" इति अतोऽत्रत्यानां सर्वेषामपि पापमात्राभावान्न हातुं योग्या एवेति भावः । वस्तुतस्तु तासां निश्चितेऽपि दृढभावे उत्कण्ठावर्द्धनार्थमेव तथोक्तमिति श्लेषार्थश्चायं तस्माद्वस्तुतोऽहमेव पतिरिति स्थिते दुःशीलेत्यादिवचनानुसारेण तत्तद्दोषयुक्तोऽपि पतिर्न हातव्य इति सिद्धे निखिलकल्याणगुणयुक्तपतिरहं कथं हातव्यः यूयं पुनस्तत्तद्दोषयुक्ता न च पतय इति कथं न हातव्या इत्याह—दुःशील इति ॥ २५ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

दुश्शील इति । दुश्शीलो दुराचाररतः दुर्भगः कुरूपी वृद्धो जरितः रोगोऽस्यास्तीति तथा न विद्यते धनं वित्तं यस्य तथाभूतोऽपि पतिः लोकेप्सुभिः पुण्यलोकानिच्छन्तीभिः स्त्रीभिर्न त्याज्यः महापातकसंयुक्तस्तु हातव्य इत्यभिप्रायेण विशिनष्टि—अपातकीति । यद्वा, एवम्भूतोऽपि पतिरपातकी स्त्रीणां निकृष्ट एवातः स न हातव्य इत्यर्थः लोकेप्सुभिरित्यनेनादृष्टं भयं प्रदर्शितम् ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पत्युः दौःशील्यादिदोषसद्भावेऽपि स्त्रीभिस्तत्त्यागो न विहित इत्याह—दुःशील इति । दुःशीलः कलहादिशीलसम्पन्नः दुर्भगो निर्वीर्यः कान्तिविहीनो वा वृद्धः गतवयाः जडः स्वकार्यमूढः रोगी भग्नाङ्गोऽल्पाङ्गः कुष्ठादिव्याधिपीडितो वा ब्रह्महत्यादिदोषसद्भावे कथं न हातव्य इति तत्राह, लोक इति । दौःशील्यादिदोषसद्भावेऽपि ब्रह्महत्यादिपञ्चमहापातकरहितश्चेत् पतिः शुचिरेव न हातव्योऽन्यथा विदोष इति भावेन लोक इत्युक्तम् ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमेव दुश्शील इत्यादि योज्यम् ॥ २५—४२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनस्तेनैव क्रमेणार्थद्वयं प्रकाशयति, दुश्शील इत्यादि प्रकृतपक्षे सुगमं तस्माद्घोषं गत्वा पतीनेव शुश्रूषध्वमिति भावः पक्षे लोकेप्सुभिरेवेदं नतु मदीप्साभिः मदीप्साभिस्तु पतीन् हित्वाप्यहमेव भजनीयः ममैव वास्तवपतित्वात् तस्मात् मा घोषं व्रजत इहैव स्थित्वा मां भजतेत्यर्थः ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तथापि स पतिः समीचीनो न भवतीति चेत्तत्राह—दुःशील इति । दुष्टं शीलं यस्य द्यूतादिव्यसनवान् दुर्भगो दरिद्रः वृद्धः इन्द्रियविकलः जडो मूर्खः रोगी महारोगग्रस्तः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अधनो वा अधनोपि भाग्यवांश्चेत्तदा सम्भावनया स्त्रीभिर्न त्यज्यते एवं षड्दोषयुक्तोपि स्त्रीभिरनन्यगतिकाभिः पतिर्नहातव्यः स्पष्ट एव विरोधः षड्गुणो भगवान् षड्दोषः स इति पातकी तु हातव्य एव "भजेदपतितस्पतिम्" इति वाक्यात् । किञ्च, तत्रापि लोकेप्सुभिः येषामिह लोके परलोके च कीर्त्याद्यपेक्षा तैर्न हातव्य एव अन्यथा अपकीर्त्तिर्भवेत् ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, भवद्भिरनेहवतीनामस्माकमननुरूपाः प्रतिकूलशीला अरोचकाश्चेत्पतयः कथं सेव्या भवन्त्वित्यत आह—दुःशील इति । अपातकीति "पतिं त्वपतितं भजेत्" इति स्मृतेः । पतनहेतुपातकवानेव पतिस्त्याज्य इत्यर्थः । लोकेप्सुभिः पतिलोके सुखवाञ्छावतीभिः पक्षे लोकेप्सुभिः इहलोके परलोके चातिक्षुद्रकीर्तिसुखाद्यपेक्षावतीभिरेव न हातव्यः युष्माभिस्तु लोकद्वयाय जलाञ्जलीर्दत्वा मन्माधुर्यसुखवारिधौ खेलन्तीभिः प्रथमत एव पतिस्त्यक्त एव ॥ २५ ॥

विशुद्धरसदीपिका ।

ननु, परोपदेशपण्डित ! सर्वथा परिचायिका एव हि ते किं सदोषशुश्रूषाद्युपदेशेनेति तत्राह—दुःशील इति । चौर्यादिरतः दुर्भगः निष्फलोद्यमः वृद्धो जरावान् जडः कर्म्मादिषु सामर्थ्यहीनः रोगी पापरोगवान् अधनः अतिदरिद्रः पतिरित्यादिरपष्टम् अपातकी "पतिं त्वपतितं भजेत्" इति स्मृतमोक्तेः कृतमहापातकस्याकृतप्रायश्चित्तस्य शुद्धिपर्यन्तमभजनमुपदिष्टमिति पक्षे दुर्गोव्रतपरा उद्दिश्याह—भर्त्तुरिति । अमायया त्वन्वेषं कस्यामिर्निजरसज्ञावृतत्वेनेत्यर्थः । ननु बलात्पित्राद्यापादितत्वेन यो भर्त्ता मनुष्यास्तस्यैव शुश्रूषणं परो धर्मः तथा तद्बन्धूनामित्यादि अन्यत्र परमधर्मविदां भीष्मादीनामस्वादिपरित्यागाद्धर्मतो भर्तृत्वाभिज्ञैर्न सद्भावः दुष्यन्तादिभिश्च गान्धर्वव्रतैः स्वीकारादयमेव सद्भाव इति भावः । अथवा परकीयाभिमानिनीरालक्ष्याह—वस्तुतस्तु सर्वमिदं वासां प्रतारणार्थं क्षेयम् वस्तुतस्तु सखीराह—भर्त्तुः शुश्रूषणं स्त्रीणां परोधर्मः नच यूयं कस्यापि स्त्रियः नच भवतीनां कश्चित्पतिरिति यदि चास्ति स चाहमेव सोऽयमायया माया शब्दोत्र कैतववचनः नच सकामत्वमेव तत्रापि दाम्पत्यमेव तदभावोऽमाया तथा शुद्धरसवतीनां प्राप्तासत्याः पतिरहमेव पतिरित्युपचरितः शुश्रूषणीय इति भावः ॥ २५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

प्रथमपक्षे नास्मत्पतयस्त्वत्समगुणवन्तो येन सेव्याः भवेयु स्तत्राह—दुःशील इति । क्रोधादियुक्तः दुर्भगः कुरूपः वृद्धो गतयौवनः जडो मूर्खः अधनो दरिद्रकान्तोऽपि पतिः यावदपातकी लोकेप्सुभिः स्त्रीभिर्न हेयः अतो व्रजे गत्वा तत्सेवनमेव कार्यम् ॥ द्वितीयपक्षे तु यद्यीदृशोऽपि पतिर्न हातव्यः किन्तु सेव्य एव तदा मत्सदृशः सुशीलः सुभगो नवकिशोरो रसिकशिरोमणिर्नित्यनिरामयसच्चिदानन्दविग्रहो लक्ष्मीपतिः परमार्थपतिः सेव्य इति तु किमु वाच्यमिति ॥ २५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

यतः परिरेव स्त्रियः परमं दैवतं तदाराधनं च परमो धर्मः तेनैव च लोकद्वयविजय इति लोके शास्त्रे च घण्टाघोषस्तस्मात् दुःशीलत्वाद्यनेकदोषयुक्तोऽपि न त्याज्यः किमुत दोषविनिर्मुक्त इत्याशयेनाह—दुःशील इति । दुष्टं शीलं द्यूतादिव्यसनं यस्य सः दुर्भगो मन्दभाग्यः वृद्धो जर्जरीभूताङ्गः जडो मूर्खः रोगी महारोगग्रस्तः अधनः स्वोदरपूरणेऽप्यसमर्थः एवमुक्तदोषैरेकैकदोषवान् किं वा सकलदोषयुक्तोऽपि पतिः लोकद्वयविजयं वाञ्छावतीभिः स्त्रीभिर्न हातव्यो नैव त्याज्यः पातकी तु यावत् पातकी तावद्धातव्यः "पतिं त्वपतितं भजेत् माप्नुष्वे सत्यवतीष्वेव महापातकदूषितः" इत्यादिशास्त्रप्रवचनात् अनभिज्ञापक्षे । ननु, अस्माकं पतयो नाऽस्मदनुकूला अनुरूपाश्चेतरासक्ता एवाऽतः किं तत्सेवाद्युपदेशेनेति चेत्तत्राह—दुःशील इति । षड्विधैश्वर्यैर्युक्तमपि परपुरुषमवलोक्य षड्विधदोषयुक्तोपि स्वपतिर्न हातव्यः व्रजवासी तु सर्वसद्गुणयुतो निष्पापश्चातः कथं त्याज्यो भवेदित्याशयः मानिनीपक्षे तस्माद्बलात्कारेण इतवत्यस्वया यस्य मनसा वृतः पतिः न त्यक्तो यथा च सावित्र्या पितुर्वाक्यात् सत्यवान् त्यक्तस्तथाऽस्माभिः युष्मदादिभिः स्त्रीभिर्मनसा वृतः पतिर्न हातव्यः तत्रापि षड्विधैश्वर्यसंपन्नोऽहं न तु दुःशीलत्वादियुक्तो वस्तुतः सर्वदोषयुक्तोऽपि न त्याज्यः पतिरित्येकवचनात् स्त्रीभिरिति बहुवचनाच्चस्यैव सर्वासां पतित्वं स्वीकृतं तथा च तेषां वस्तुतः पतित्वाऽभावाच्च तत्त्यागे कश्चिद्दोष इति भावः । निवृत्तिपक्षे तत्र दृष्टान्तमाह—दुःशील इति । यावद् इवार्थे तथा च यथा पतिसम्पृक्तत्वं पतिव्रतायाः स्त्रियस्तथा वाचापि स्वार्थसम्पृक्तत्वमिति भावः ॥ २५ ॥

भाषा टीका ।

खोटे स्वभाव को होय, भाग्य हीन होय, बूढ़ो होकरो होय, बेबुद्धि को अज्ञानी होय, रोगन सों ग्रसित होय, निर्धन होय, चाहे जैसो खोटो अवगुणी होय, परन्तु जो पातकी न होय तौ लोक के चाहवे वारी कुलवती स्त्रियन को वा पतिको त्यागिवो उचित नहीं है, किन्तु वाकी सेवा ही करनो उचित है ॥ दूसरो अर्थयों है, कि—अपातकी कैसोऊ खोटो पति होय लोक की चाहन वारी वाकी सेवन करें और जो मेरे आलोकन की चाहन वारी हैं ते सर्वस्व त्यागिके मेरी सेवा करें ॥ २५ ॥

**अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ।
जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥**

श्रीधरस्वामिकृतभावार्थदीपिका ।

फल्गु तुच्छं कृच्छ्रं दुःखसम्पाद्यम् औपपत्यं जारसौख्यम् ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

ननु, श्रीव्रजयुवराज ! भवदाज्ञया नैव पतयस्त्याज्याः किं तु सदा नाम्नैव तेषां पतित्वं पतिव्यवहारस्तु त्वया सहैवास्तामित्याशङ्कय तासां दीर्घाभीष्टनिन्दनेन परमाप्रियमवहित्थया साऽसूयसूयामिवाह—अस्वर्ग्यमिति । स्वर्गाप्तौ प्रतिकूलं किं वा पूर्वपुण्यार्जितस्वर्गनाशकमित्यर्थः । अयि कामिन्योऽदृष्टत्वान्मास्तु स्वर्गापेक्षा लोके यशोपेक्षास्त्येव तद्बाधकञ्चेदमित्याह—अयशस्यमिति । पूर्वसञ्चितयशसोपि लोपकम् । ननु,लोकातीत ! जुगुप्तमेव तत् को नाम जानातु तत्राह—फल्गु तुच्छं अस्थिरत्वात् । ननु, भो अच्युत ! त्वया सहास्माकं तत् सुस्थिरमेव तत्राह, कृच्छ्रं दुःखसाध्यम् । ननु,स्वैरिसिंह ! व्रजे श्रीवृन्दावने च स्वच्छन्दविहरणात्सुखसाध्यमेव तत्राह, भयं स्वाम्यादिभ्यो नरकादिभ्यश्च तत् आ सम्यक् वहति प्रापयतीति तत् । ननु, अमृतकोटिनिर्मञ्छनीयमधुराधर त्वदपेक्षयाऽस्माभिः सर्वमप्युपेक्षितमिति कुतोऽपि न भयं तत्राह, सर्वत्र स्वदेशे परदेशे च यद्वा, व्यवहारे परमार्थे च जुगुप्सितं निन्दितं लज्जाकरत्वात् घृणावहत्वाच्च हि निश्चितं ननु, तत्त्वज्ञेन्द्र ! निजाभीष्टसिद्ध्या जुगुप्सापि सुसह्यैव तत्राह—कुलस्त्रिया इति । जातावेकत्वं कुलकलङ्कतस्तत् कुलस्त्रीणां परमानुचितमिति सर्वथा परिहार्यमेवेति भावः । वस्तुतस्तु पूर्ववत् स्वविषयकभावदार्ढ्यार्थमेव । श्लेषार्थश्चायम् अप्यर्थे चकारः अस्वर्ग्यादिरूपमप्यौपपत्यं कुलस्त्रिया अपि भवत्येव तारारुल्यादीनामपि तच्छ्रवणात् अतः साधारण्यापरया दोषविशेषो नास्तीति भावः । किञ्च, कुत्सितं लाति आददातीति कुला या स्त्री तस्या एवास्वर्ग्यादिकं युष्माकं तु निखिलसर्वस्वसारं मद्भावभाववतीनां लभेति तात्पर्येण नर्म च क्षेपम् यद्वा, नर्म प्राह–उप समीपे पतिर्यस्याः सा उपपतिः तस्या भाव औपपत्यं पत्युः समीप्यमित्यर्थः तत्सर्वथा अस्वर्ग्यादिदोषयुक्तं कुलस्त्रिया इति काश्चित् प्रेयसीमुद्दिश्योक्तम् ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, श्रीव्रजयुवराज ! भवदाज्ञया नैव पतयस्त्याज्याः किन्तु सदा नाम्नैव तेषां पतित्वं पतित्वव्यवहारस्तु त्वया सहैवास्तामित्याशङ्कय तासां दीर्घाभीष्टनिन्दनेन परमाप्रियमवहित्थया साऽसूयमिवाह–अस्वर्ग्यमिति । स्वर्गाप्तौ प्रतिकूलम् अयि कामिन्यो ! दृष्टत्वाभावान्मास्तु स्वर्गापेक्षा इह लोके यशोपेक्षास्त्येव तद्बाधकं चेत्याह–अयशस्यमिति । पूर्वसञ्चितयशसोपि लोपकम् ननु, जुगुप्समेवैतत् को नाम जानातु तत्राह, तथापि फल्गु तुच्छम् अस्थिरत्वात् । ननु, भो अच्युत ! त्वया सहास्माकं तत्सुस्थिरमेव तत्राह, तथापि कृच्छ्रं दुःखसाध्यम् । ननु, स्वैरसिंह ! व्रजे श्रीवृन्दावने च स्वच्छन्दविहरणात् सुखसाध्यमेव तत्राह–तथापि भयं परलोकात् कदाचित् स्वाम्यादिभिश्च तत् आ सम्यक् वहति प्रापयतीति तत् ननु,अमृतनिर्मञ्छनीयमधुराधर त्वदपेक्षयास्माभिः सर्वमुपेक्षितमिति कुतोऽपि न भयं तत्राह–तथापि सर्वत्र स्वदेशपरदेशयोर्व्यवहारपरमार्थयोश्च जुगुप्सितं निन्दितं हि निश्चितम् । ननु, तत्त्वज्ञेन्द्र ! निजाभीष्टसिद्ध्यां जुगुप्सापि सुसह्यैव तत्राह—कुलस्त्रिय इति । जातावेकत्वं कुलकलङ्कतोऽपि कुलस्त्रीणां परमानुचितमिति सर्वथा परिहार्यमेवेति भावः । वस्तुतस्तु पूर्ववदुक्तपाठावर्द्धनार्थमेवेति । श्लेषार्थश्चायं पूर्ववदेव धर्मोपासः पतिस्तद्विपरीतस्तूपपतिरिति अथ च लोकेऽन्यथा प्रसिद्धिमालक्ष्य स्मृतिवाक्यमिदं छलार्थतया सनर्म व्यञ्जयति उप समीपे पतिर्यस्याः सा उपपतिः तस्या भावः औपपत्यं पत्युः सामीप्यमित्यर्थः । तत्सर्वथा अस्वर्ग्यादिदोषयुक्तमिति एवं भर्त्तुः शुश्रूषणमित्यत्र परः सर्वाधिक एवाधर्म इति व्याख्येयम् ॥ २६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

औपपत्यमुपपतित्वम् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दृष्टभयप्रदर्शनेन प्रत्याचष्टे–अस्वर्ग्यमिति । कुलस्त्रियः औपपत्यं भर्त्तरि सत्यसति वा योऽन्यः सङ्गम्यते स उपपतिः तस्य कर्मौपपत्यं तत्सङ्गमनं "पत्यन्तपुरोहितादिभ्यो यक्"(४।१।१।२८)इति कर्मणि यक् अथवा भावे यक् उपपतिमत्त्वं तदस्वर्ग्यमसुखकरमयशस्करं तुच्छं दुःखावहं भयावहं च सर्वत्र निन्दितं च ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कामस्य पुरुषार्थत्वेन पतिदोषेण तदप्राप्त्या जन्मनो निष्प्रयोजनत्वमापन्नमिति प्रकारान्तरेण साफल्यमापादनीयम् इति विपक्षे बाधकमाह–अस्वर्ग्यमिति । चशब्द एवार्थे उपपतिः पत्युः प्रतिनिधिः उपपतिः जारस्तत्सम्बन्धि कर्म आम्नायवयां तत्कुलस्त्रियः सर्वत्र पत्युरुत्तमाधममध्यमेषु पुरुषेषु जुगुप्सितमेवेत्यन्वयः । कथं तदुच्यते अस्वर्ग्यं स्वर्गविरोध्येव न भवति किन्तु अयशस्यम् इहामुत्र च दुष्कीर्तिकरं च तथापि न बहुलं फल्गु तुच्छफलम् अल्पकालविषयत्वात् कृच्छ्रं कष्टं "स्यात्कष्टं कृच्छ्रम्" इत्यमरः । कृच्छ्रं कर्त्तुः असम्पादने वा भयादिभयजनकम् ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनस्तेनैव क्रमेणाह—अस्वर्ग्यमित्यादि । कुलस्त्रिया औपपत्यं उपपतिकरणम् सर्वत्र अस्वर्ग्यमित्यादि तस्मात् घोषं गत्वा पतीन् भजतेत्यर्थः । पक्षान्तरे कुलस्त्रिया औपपत्यं सर्वत्र अस्वर्ग्यमित्यादि ननु सर्वातीते मयि औपपत्याभावात् वास्तवः पतिरहमेव तस्मादविचारमेवेह स्थित्वा मां भजतेत्यर्थः ॥ २६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु, कामरसे निविष्टमनसां न धर्मो बाधकः परस्मिन्नेव रसोत्पत्तेरिति तत्राह—अस्वर्ग्यमिति । कुलस्त्रियाः औपपत्यं जारसम्बन्धः तद्रसालमपि बहुदोषग्रस्तं तत्रत्यान् षड्दोषानाह—अस्वर्ग्यं परलोकनाशकं पूर्वधर्मेण सिद्धोऽपि स्वर्गः तस्मिन्नपगच्छति किञ्च, इह लोकेऽपि यशो दूरीकरोति चकारान्नरकोऽपि नापि तत्र रसभोगो महानित्याह—फल्ग्विति । अल्पमेव तत्सुखं क्षणमात्रसाध्यं स्वरूपतो महदपि कालतः परिच्छिन्नं परिच्छिन्नमपि कृच्छ्(मि)मतिकष्टसाध्यं नाल्पेन प्रयासेन सिध्यति अतो बलवदनिष्टानुबन्धि । किञ्च, अनुभवकालेऽपि न रसमुत्पादयति यतो भयजनकं शृङ्गारविरोधी भयानकरसः अत एव व्यभिचारशब्दवाच्यः मुख्यतया भयानकमेव रसमुत्पादयेत् विशेषतः प्रथमतः । किञ्च, सर्वत्रैव जुगुप्सितं सर्वदेशेषु सर्वकालेषु तत्करणं यदि सत्कर्मापि कुर्यात् ततोऽपि जुगुप्सितो भवेत् धर्मबु(द्धि)स्तत्र विचिकित्सैव भवति अतो बहुदोषग्रस्तत्वात् उत्तमाया नैतदुक्तम् ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मयि स्नेहसामान्यवत्यो भवत्यः स्वभावाद्भवन्त्येव किन्तु धर्मप्रतिकूलः स्नेहविशेषस्तु सर्वथैव त्याज्य इत्याह—अस्वर्ग्यमिति । मास्तु स्वर्ग इति चेदयशस्यम् यशोऽपि मास्त्विति चेत् फल्गु मिथ्यैव ब्रूषे नेदं फल्गु सर्वोत्कृष्टत्वेनानुभूतत्वादिति चेत् कृच्छ्रं पत्यादिवारणकष्टमयं ननु "वामता दुर्लभत्वं च स्त्रीणां या च निवारणा । तदेव पञ्चबाणस्य मन्ये परममायुधम्" ॥ इति "दुःखमत्याधिकं चित्तं सुखत्वेनैव रज्यते" इति रसशास्त्रोक्तेः प्रत्युत तत्कृच्छ्रम् रागवतीनामस्माकं सुखातिशयहेतुरेवेति चेत् भयावहं लोकशास्त्रनिषिद्धत्वादैहिकपारत्रिकभयप्रदं ननु "यत्र निषेधविशेषः सुदुर्लभत्वं च यन्मृगाक्षीणाम् तत्रैव नागराणां निर्भरमासज्जते हृदयम्" ॥ इति रसशास्त्रोक्तेः प्रत्युत रसाधायकमेवैतदिति तत्राह—जुगुप्सितमिति । सर्वदेशे सर्वकाले औपपत्यम् उपपतिकर्तृकं कर्म कुलस्त्रियाः जुगुप्सितमिति सर्वत्र तद्वती कुलस्त्री निन्द्यत इत्यर्थः । तत्र यद्यपि युष्माभिः स्वाभीष्टसिद्ध्यै स्वनिन्दापि सुखदैव तथापि मत्प्रणयास्पदानां युष्माकं निन्दा मया कथमुत्पादनीयेत्यतो गोष्ठमेव यातेति भावः । पक्षे सर्वत्रेति जुगुप्सितमिदं सार्वत्रिकमेव अस्तु तन्नु मम नारायणसमत्वं गर्गमुखपरम्परया युष्माभिः श्रुतमेवेत्यतो ममौपपत्येऽपि नैव निन्दा परमेश्वरत्वेन शुभाशुभकर्मातीतत्वादिति भावः ॥ २६ ॥

विशुद्धरसदीपिका ।

प्रथमे पक्षे । ननु, श्रीव्रजराजयुवराज ! भवदाज्ञया नैव पतयस्त्याज्याः किन्तु नास्त्येव तेषां पतित्वमित्याशङ्क्य तासां दीर्घाभीष्टनिन्दनेनावहित्थया साभ्यसूयमाह—अस्वर्ग्यमिति । सती लोकगमनावरोधकम् अयशस्यं लोकापवादकरम् फल्गु तुच्छम् अस्थिरत्वात् कृच्छ्रं दुःखसाध्यं भयावहं भयं दृष्टमदृष्टं च तमावहति तथा तत् औपपत्यं "जारस्तूपपतिः समौ" इत्यमरः कुलस्त्रिय इति सङ्कोचोत्पादनं पक्षे ननु, भवदाज्ञया न त्यजामो लोकसंग्रहाय तत्समीपस्थितिरावश्यकीत्यत आह, श्लेषेण उप-समीपे पतिर्यस्याः सा उपपतिः नित्यमेव स्ववल्लभसान्निध्यवतीत्यर्थः "कृष्णरूपापि सा राधा नित्यं कृष्णमनुव्रता । तत्र भिन्ना निमेषार्द्धम्" इति माहेश्वरीसंहितोक्तेः । तादृशी श्रीराधा तस्याभाव औपपत्यं तया सह वास इत्यर्थः । कुलस्त्रियः कुलशब्दः समूहवचनः तेन सखीसमूहो लक्ष्यते सहचरीसमूहः स्वप्राणेश्वरी योगक्षेमपरैस्तस्याः समीपस्थैरेव भाव्यमिति भावः । तदुक्तमलङ्कारकौस्तुभे "क्वचिदग्रे क्वचित्पश्चात् क्वचित्पार्श्वपदान्तयोः । सूर्यानुरागाच्छायेव सा राधा अनुवर्तते" इति तत्र अस्वर्ग्यं स्वर्गभिन्नं स्वर्गसदृशमिति "पर्युदासः सदृग्ग्राहीति स्मृतेः मम नित्यधामप्रदमित्यर्थः "यातुधान्यपि सा स्वर्गम्" इत्यादिन्यायात् एवमयशस्यमपि अलौकिकसर्वलोकश्लाघनीययशःप्रदमित्यर्थः । "एता परं तनुभृतः" इत्यादेः । तथा फल्गुनां दास्यपत्यादिभावेन तुच्छानां कृच्छ्रं कष्टसाध्यं नहि कान्तभावाद्यासक्तानां शुद्धप्रेमव्यवहारः सुकर इति भावः । भयं न वहतीति भयावहं प्रत्युत न पारयेऽहमित्यादिना प्रेमवशकरं चाप्यर्थं तथा सर्वत्र जुगुप्सितमिति काकुः अपितु नेत्यर्थः सत्सम्बन्धिप्रेमावहत्वादिति भावः । कान्तभाववतीषु च अहमेव वास्तवः पतिरिति मत्पार्श्व एव स्थेयमित्यर्थः । शेषं प्राग्वत् ॥ २६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

कुलस्त्रीणामौपपत्यनिन्दामाह—अस्वर्ग्यमिति । पुण्यलोकानिवर्तकं प्रत्युत तद्विरुद्धनिरयार्तिहेतुः एवमयशस्यं लोकापवादकरं फल्गु स्वल्पं क्षणिकं कृच्छ्रं दुःखसाध्यम् इहामुत्र च भयापादकं सर्वत्र लोकपरलोकयोर्जुगुप्सितं तत्र प्रथमपक्षे लौकिकभ्रान्त्यनुसारेण व्रजस्थपतिम्मन्यानां मुख्यपतित्वं कृष्णस्योपपतित्वं द्वितीयपक्षे परमार्थदृष्ट्या कृष्णस्य मुख्यपतित्वं तेषामुपपतित्वमेतावान् विशेषोऽन्यत्समानम् यद्वा, उप समीपे पतिर्यस्याः सा उपपतिः श्रीः श्रीराधा वा तस्या भावं कृष्णैकपरत्वम् यद्वा, नित्यम् उप समीपे वर्तमानः पतिः उपपतिः कृष्णस्तस्यैवैकपरममौपपत्यम् अन्ये पतिम्मन्यास्त्वनित्यत्वेनागमापायित्वेन च नोपवर्तमाना न वा पतयः पालकाश्च तदुक्तम्—

"स्वान्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा" ॥
स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो—
ह्याराध्य लोके पतिमाशासतेऽन्यम् ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तासां न ते वै परिपान्त्यपत्यम्—
प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥
स वै पतिः स्यादकुतोभयः स्वयम्—
समन्ततः पाति भयातुरं जनम् ॥
स एक एवेतरथा मिथो भयम्—
नैवात्मलाभादधिमन्यते परम् ॥
तस्य ते पादसरोरुहार्हणम्—
न कामये साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो—
यद्भग्नयाच्ञा भगवन्प्रतप्यते" ।

अखिलेषु जीवेषु कामलम्पटा अनादिसंसारचक्रे क्रमेण सर्वेषां तत्पतित्वापत्तेरित्यर्थः । तथा चान्यत्र पतिमतयो न सत्यः मत्कामा एव पतिव्रताः तस्मात्त्वदीयपत्यं नित्यसमीपस्थनित्यपतिसेवनं अस्वर्ग्यमित्यादिपदेषु सर्वत्र काका तद्विरुद्धबोधनम् यद्वा, अस्वर्ग्यं तद्भिन्नतदभावतद्विरुद्धेषु नञ्विधानात्स्वर्गभिन्नं तद्विलक्षणं भगवद्धाम तत्प्रापकं अयशस्यं विलक्षणयशःप्रदम् अकारो वासुदेवस्तत्स्वरूपभूतो यः स्वर्गो नित्यसुखं "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम्" इति श्रुतिसिद्धं तस्मै हितमस्वर्ग्यं तत्सुखप्रापकं तथा अयशस्यम् अकारो हरिरेव तत्सम्बन्धि यशस्तेहितं तत् प्रापकं पुनः कथम्भूतमुपपत्तिहरिसेवनं फल्गु कृच्छ्रं फल्गुभिः सकामैः कृच्छ्रं दुःखसम्पाद्यम् यद्वा, फल्गु कं स्वल्पायासम्—

"कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥

इत्यादिवचनात् । यद्वा, फल्गूनि कृच्छ्रोपलक्षितानि सर्वाणि तपांसि यस्मात् तथा सर्वत्र भयावहं वहतीति वहः न वहः अवहः भयानामवहो भयावहस्तम् अन्यसेवनं तु भयावहम् अभयं वै जनक प्राप्तोऽसि द्वितीयाद्वै भयं भवति "भीषास्माद्वातः पवते" इत्यादिश्रुतेः विष्णोः पदं निर्भयं यदभयद्वितीयाभिनिवेशितः स्यात् "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्यादिस्मृतेश्च तथा जुगुप्सितं गोप्तुमीप्सितं अतिरहस्यम् ॥ २६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु, परमेश्वरः अस्मत्त्वे तासामस्माकं नास्ति जारपरमनसामिव पतित्यागेऽपि कृते दोष इत्याशङ्कानिरासार्थं तथा, चेदस्तु तथा स्वलोच्छया तु मध्यस्थया स्वपतित्यागे दोष इत्याशये नाह—अस्वर्ग्यमिति । कुलस्त्रियाः सर्वत्र सर्वस्मिन्नपि पुरुषे औपपत्यम् अस्वर्ग्यं परलोकनाशकरम् अयशस्यम् अतल्लोकनाशकं तत्रापि फल्गु अतिक्षुद्रं तथाभूतमपि कृच्छ्रं महाप्रयाससाध्यम् किञ्च, सम्भोगकालेऽपि भयजनकं पुनः साध्यकर्मणि प्रवृत्तावपि जुगुप्सितं निन्दितं सर्वकाराज्यां नरकपातकातिवाहिकारादिसङ्कटं तस्मात्मदाराधने यदि युष्माकमाग्रहस्तर्हि भगवद्बुद्ध्या तदनुरूपं न दूपपतिबुद्ध्येति भावः । अनभिज्ञापत्ते विपक्षे दोषमाह—अस्वर्ग्यमिति। ननु, नास्माकं स्वर्गापेक्षेति चेत्तत्राह—अयशस्यम् ननु, तदपि ना-पेक्षितम् यद्वा, रहसि तत्रास्ति तत्राह इति चेत्तत्राह—फल्गु क्षणिकत्वात् ननु, मिथ्या ब्रवीषि त्वया सह तस्याऽनन्तसुखजनकत्वनिश्चयादिति चेत्तत्राह—कृच्छ्रं पत्यादिवारणाद्दुस्साध्यम् ननु, निर्जने वने निवारकस्यादर्शनान्नास्ति दुःसाध्यमस्तु वा तथापि "वामता दुर्लभत्वं च स्त्रीणां या च निवारणा । तदेव पञ्चबाणस्य मन्ये परममायुधम्" इत्यादिवचनाद्दुःसाध्यता प्रत्युत तत्वऽतिशयहेतुरिति चेत्तत्राह—भयावहं लोकशास्त्रनिषिद्धत्वाद्यमराजादिदण्डजनितभयप्रापकम् ननु, त्वदधरसुधालोभात् सर्वमपि भयमस्माभिस्त्यक्तम् यद्वा, "यत्र निषेधविशेषो दुर्लभता यन्मृगाक्षीणाम् । तत्रैव नागराणां निर्भरमासज्जते हृदयम्" इति रसशास्त्रोक्तेर्भयमपि प्रत्युतरसाधायकमेवेति चेत्तत्राह—सर्वत्रेति । सर्वत्र स्वपरलोकयोर्व्यवहारपरमार्थयोर्निन्दितम् औपपत्यं जारसौख्यम् ननु, स्वाभीष्टसिद्धौ निन्दाप्यऽस्माभिः स्वीकृता इति चेत्तत्राह—कुलस्त्रियाः कुलस्त्रीभिरेवं न कर्तव्यमिति भावः । अनेन यद्यप्यासक्तचित्तत्वाद्भवतीभिः किमपि नो गण्यते तथाप्युत्तमवंशोद्भवेन मया कुलस्त्रियो नैव कलङ्कनीया इत्यपि ध्वनितं कुलस्त्रिय इति सम्बोधनं वा माननीपक्षे पूर्वोक्तरीत्याऽहमेव मुख्यः पतिस्त एवोपपतय इति तत्सङ्गतं सुखमेवास्वर्ग्यादिरूपम् यद्वा, उत्प्रेक्षितानि स्मृतिवाक्यान्यस्माभिस्तव भर्तृसेवादिः परो महानधर्म इत्युच्यते स्वास्मिन्नासक्तचित्तस्य प्रेष्ठस्य दुःखजनकत्वात् तथा अपातकमपि दुःशीलत्वादिदोषविशिष्टः किं न हातव्योऽपि तु हातव्य एव स्वस्य दुःखजनकत्वात् तथा चैवं विधपत्युः सामीप्यमस्वर्ग्यादिदोषयुक्तमेवेति नर्मव्यञ्जनपरत्वेन श्लोकत्रयं व्याख्येयम् यद्वा, मदासक्तचित्तत्वाद्भर्तृसेवादौ नास्ति भवतीनामधिकार इत्याह—भर्तुरिति । अमायया निष्कपटतया न तु भवतीनामभ्यासकानि सत्वे मायावतीनां तथा पतित्यागनिषेधोऽपि नास्ति भवतीनामधिकारो मय्यनुरक्ततया लोकद्वयाभिलाषराहित्यादित्याह—दुश्शील इति । किञ्चाऽपातकी-चेत्तन्न हातव्यो युष्मद्भर्तारस्तु पातकिन एव जन्तुमात्रप्रीतिपात्रे जन्मप्रभृतिरक्षापरायणे मयीर्ष्यावत्त्वेन साधुपरत्वात् कृतघ्नत्वात् कृतघ्नश्चातिपातकित्वेनोक्तः तदुक्तम्—

"ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः" इति

ननु तत्सेवायामनधिकारेऽप्यौपपत्यस्य निषिद्धत्वात्तदङ्गीकारे स्वर्गादिव्याघातस्त्वऽस्त्वेव भवतीति चेत्तत्राह—अस्वर्ग्यमिति । कुलस्य ब्राह्मणाद्युत्कृष्टकुलस्य स्त्रियस्तदस्वर्ग्यादिदोषावहं न तु गोपाङ्गनानां युष्माकं तथाऽ च तन्निषेधवाक्यानि तत्पराणीति भावः निष्कारिपक्षे यथा कुलस्त्रिया औपपत्यं दोषावहं तथा श्रुतमर्थं परित्यज्याश्रुतार्थपरत्वं श्रुतहान्यश्रुतकल्पनादिदोषावहमित्यर्थः ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वाभावार्थधर्मनाशकः औपपत्यलक्षणो धर्मः सर्वदा वर्ज्य एवेत्याह—अस्वर्ग्यमिति । अस्वर्ग्यं परलोकानर्हम् अयशस्यं यस्मिन् अयशस्करम् फल्गु तुच्छम् ॥ २६ ॥

श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्त्तनात् ।
न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

भाषा टीका ।

कुलवती स्त्री कूं जार पतितें प्रेम करबो सर्वत्र लोक में और शास्त्रन में निन्दित है, भय कूं प्राप्त करन वारो है, कष्ट सूं साध्य है, और तुच्छ है, तथा लोक में कुयश करन वारो है और परलोक में स्वर्ग को छुडावन वारो है ॥ दूसरो अर्थ ये है, कि—तुम वा कुलकी अर्थात् या लुगड की जो मो मैं अनुराग वारी स्त्री हौ, तिनमें ते कोई एक स्त्री को भी औपपत्य नाम पति को जो सामीप्य है सो सर्वत्र निन्दित, कष्ट रूप, तुच्छ, कीर्त्तिनाशक, परलोक को छुटावन वारो है, अर्थात् मो मै साचे प्रेम वारी स्त्री को प्राकृत पति में प्रेम करनो लोक वेद में निन्दित है ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च श्रवणादिति ॥ २७ ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, प्रेमैकलभ्य ! सर्वसाध्यप्रेम्णो बाह्यतरमङ्गं किम् स्वधर्मं इति चेत्तर्हि मच्छ्रवणादिकमेवानुष्ठीयतामिति । यद्वा, श्रीपुरुषोत्तम ! त्वत्प्रसाद एवापेक्ष्यते नान्यत् किञ्चित् कुलादिकमिति चेत्तर्हि मत्प्रसादो मद्विषयकप्रेम्णैव सिद्ध्यति स च श्रवणादिनैव सम्पद्यते न स्वङ्गसङ्गेनेत्याह—यद्वा, ननु सर्वार्थसाध्यसौहृद ! त्वत्प्रेम्णा सम्पन्ने न किञ्चित् जुगुप्सादिकं परमपुरुषार्थसिद्धेरिति च तर्हि तदुपाय एवानुष्ठीयतामिति शास्त्ररीतिमप्यभिनयन् दुस्सहौदास्यविशेषेण परमाप्रियं सविवेकमाह—श्रवणादिभिः श्रवणादीनां समुच्चयो विकल्पो वा तेषामेकतमेनापि भावसिद्धेः तच्च भागवतामृतोत्तरखण्डादौ विवृतमेव तत्र श्रवणं भगवत्कथादेः दर्शनं श्रीमूर्त्यादेः दूरतो ममैव वा अनुकीर्त्तनं निरन्तरमन्नामप्रधानकीर्त्तनम् "एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागः" इत्यादिना तस्यैव भावोदयेऽन्तरङ्गत्वोक्तेः दर्शनार्थं सन्निकर्षोऽपेक्ष्यत एवेति तत्परिहारार्थं तद्दर्शनस्य गौणता विवक्षया ध्यानात् प्राग्निर्देशः एषां च हेतुहेतुमत्ता यथोत्तरमूह्या तत्रादौ श्रवणमेव तेन विना सर्वाज्ञानात् अत एव श्रोतव्यः कीर्तितव्यश्चेत्यादौ तस्यैवाद्युद्देश श्रवणानन्तरं श्रीभगवद्दिदृक्षया श्रीमूर्त्यादिदर्शनं तस्माच्च ध्यानं सुखमेव सम्पद्यतेतरां तस्माच्चानुकीर्त्तनं स्वत एवोदेति मनोभिनिवेशसम्पत्तेः तस्माद्धेतोः यथा मयि भावो भवति तथा सन्निकर्षेण सामीप्येन अङ्गसङ्गेन वा न भवति "सन्निकर्षो हि मर्त्यानामनादरणकारणम्" इत्यादि न्यायात् शास्त्रविरुद्धत्वेन मनःसङ्कोचाद्वा तथैतेन तादृशो न भवति किन्तु ततो न्यून एवेति किम्वा तेन प्रकारेण न भवति किन्तु लोकधर्म्मातिक्रमेण सर्वापेक्षया परमप्रयत्नादिनैव भवति अतः सन्निकर्षत्यागेन श्रवणादिकमेव कार्य्यमिति भावः । अतस्तदर्थं गृहानेव यात सर्वसङ्कोचाद्यभावेन तत्रैव तत्सुखसिद्धेः वस्तुतस्तु सर्वमेतत्परमकौतुकित्वात् किम्वा निरन्तरप्रेमभरसुकोमलितदाक्षिण्यस्वभावानां तासां प्रेमवैयग्र्यदर्शनार्थमेव श्लेषार्थश्चायम् उक्तन्यायेन सर्वथा मयि भावोऽसङ्कोचेन युष्माभिः सदा कार्य्य एव न च वक्तव्यं श्रवणादिनापि प्रेमाख्यो भावः सम्पद्यत इति यतोऽङ्गसङ्गेनैव नितरां सिद्ध्यति न च श्रवणादिनेत्याह (श्रवणादिनेत्याह) श्रवणादेर्हेतोर्न तथा यथा सन्निकर्षेण भवति ततस्तस्माद्धेतोः अकारप्रश्लेषेण अगृहान् अगृहस्थान् अकृतदारान् मान् प्रति यात भजतेत्यर्थः तासां वशीकरणार्थमात्ममाहात्म्यविवक्षया बहुत्वं साक्षादात्मानुक्तिर्वैदग्ध्यादिना यद्वा गृहान् मदीयान् निकुञ्जरूपान् प्रविशतेत्यर्थः । गृहानित्यनेन निकुञ्जादीनामेव क्रीडागृहत्वेन निजगृहत्वेन वा सर्वैतेष्वेव वस्तव्यमित्यभिप्रैति ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं बहुधा प्रत्याख्यानेऽप्यनिवृत्तिमाशङ्क्य भावापेक्षयैनाप्यौदास्यं विधत्ते—श्रवणादिति । श्रवणादिना यथा भावो भवति तथा सन्निकर्षेणाङ्गसङ्गेन न स्यात् विरहे समुत्कण्ठया झटिति तद्वृद्धिः संयोगे तूत्कण्ठाशैथिल्यात् इति भावः । एवं परां काष्ठामापन्नोपि तासां भावोऽसिद्धता निर्देशभङ्ग्याऽपलपित एव तत्र पूर्वरागे प्रायः पूर्वं श्रवणं ततो दर्शनं ततः संयोगाप्राप्त्या निरन्तरा तत्स्फूर्तिः ततश्च तत्कथैवेति क्रमेणैव निर्दिष्टं वस्तुतस्तु परमकौतुकित्वान्निरन्तरप्रेमसुरसकोमलितदाक्षिण्यस्वभावानां तासां प्रेमवैयग्र्यदर्शनार्थमेवेति । श्लेषार्थश्चायं ननु, येन सद्भावेन स्वस्य भर्तृत्वं तद्वैपरीत्येन तेषामभर्तृत्वं स्थापितं स एव न सम्भवति तव विप्रकृष्टत्वात् तेषां तु सन्निकृष्टत्वादित्यत्राह—श्रवणादिति । यथा येन रसविशेषप्रकारेण मयि श्रवणादितोपि भावो भवति तथा सन्निकर्षेणापि न ये ऽन्ये सन्निकृष्टाः पतिम्मन्यास्तेष्वपि न स्यादित्यर्थः । मिथः प्रेमयोग्ययोर्यथा सन्निकर्षेण प्रणयबन्धो भवति तथा न श्रवणादिनेति लोकसिद्धत्वादन्यपदमर्थावसं प्रथमत एव तथोपक्रान्तत्वात् प्रकरणप्राप्ते च तस्मात् गृहान् प्रति न यातेति उभयत्रापि नञोऽन्वयः । यद्वा, ततो गृहानिति सन्धौ अकारप्रश्लेषः कार्य्यः तस्य च अभावेन छानोमापीति नञपर्य्यायस्य अयातेत्यन्वयः न यातेत्यर्थः । यद्वा, प्रतिषेधप्रत्याख्यानप्रातिपक्ष्यादिषु प्रकृत्यर्थविरोधेऽपि प्रतिशब्दो दृष्टः ततश्च प्रतियात गमनविरोधविषयान् कुरुतेत्यर्थः । एवं तासां पूर्ववत् उल्लापो द्विधा कासुचिद्यथार्थमेव कासुचिद्विपरीतमिति नवनवाभावाद्यात सेयम् ॥ २७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रवणादिभिः यथा मयि भावो भवति तथा सन्निकर्षेणाङ्गसङ्गेन न भवतीत्यर्थः ॥ २७ ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"पतिं विश्वस्य" एव भूतानां पतिः, 'माता पिता भ्राता निवासः शरणं सुहृद्गतिश्च नारायणः" इत्युक्तरीत्या नित्यो निरुपाधिकश्च पतिर्बन्धुश्च त्वमेवेत्याशयवतीराक्ष्याह—श्रवणादिति । न च गोपीनामेवंविधाभिप्रायसङ्कल्पितस्मिंस्तासां परब्रह्मत्वज्ञानाभावादिति शङ्क्यम् अनुपदं वक्ष्यमाणैरेव तासां वचोभिः "प्रेष्ठो भवान् तनुभृतां किल बन्धुरात्मा" यर्ह्यम्बुजाक्ष तवपादतलं रमायाः, श्रीयत्पदाम्बुजरजश्चकमे" इत्यादिभिरेव तज्ज्ञानाविष्कारान्मयि नित्ये निरुपाधिके पत्यौ बन्धौ च मयि श्रवणादिभिर्यादृशो भावो भवति न तथा सन्निकर्षेणाङ्गसङ्गेन भवत्यतो गृहान् प्रतियात गच्छतेति भावः । प्रत्यात्मकोऽभिप्रायविशेषः तत्र श्रवणं मत्स्वरूपरूपगुणविभूत्यादिश्रवणं कीर्तनं गुणनामकीर्तनं ध्यानं तत्पूर्वकमनुचिन्तनं तद्दर्शनं तत्पूर्वकसाक्षात्कारः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, तव मुख्यभर्तृत्वात्त्वत्सेवनं जारसेवनवद्धर्म्यं न भवति किन्तु पतिसेवनान्मुख्यसाधनमेव स्यादित्याशङ्क्य सत्यं तथापि मच्छ्रवणादिना युष्माकं मयि भक्तिः स्यात् न तथा मम सन्निकर्षेनिषेवणेन यस्मात्तस्माद्भवतीभिः गृहानगम्य मयि भक्तिः कर्तव्येत्याह—श्रवणादिति ॥ २७ ॥

श्रीसनातनगोस्वामिकृतबृहद्वैष्णवतोषिणी ।

पुनस्तेनैव क्रमेणार्थं वदेनोपसंहरति—श्रवणादित्यादिना । एव मद्भावः सुरतो भवति न तु सन्निकर्षेण यद्यपनेन तथाप्यन्यो गम्यते श्रवणादिना यथा सुरतस्तथा न सन्निकर्षेण तस्मात् गृहान् प्रति यात पद्ये यथासन्निकर्षेण मयि भावस्तथा न श्रवणादिना यतः श्रवणादेरपि साक्षात्कारः फलं ततो गृहान् अप्रतियात "अभावेन ध्यानेनेति" केवलस्याकारस्य निषेधवाचित्वात् ॥ २७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं सगुणाः प्रबोध्य गुणातीताः प्रबोधयति—श्रवणादिति । ननु, लौकिकदृष्ट्यैवैते दोषा ननु भक्तिमार्गे परमार्थदृष्ट्या वा भवान्तु पुरुषोत्तम इति चेत्तत्राह—श्रवणादिति । न हि भक्तिमार्गे सम्बन्धः एव कर्तव्य इति शास्त्रमस्ति भक्तिर्हि नवविधा श्रवणादिरूपा प्रेमरूपा च स्वतन्त्रपक्षे तु सुतरामेव नापेक्षा स्नेहस्तु भगवद्विषयकः अलौकिकः स एव सर्वाधिको भवति लौकिकस्तु कामधर्मतां प्राप्तः हीन एव भवति तस्यालौकिकस्य कार्याणि श्रीणि श्रवणं दर्शनं ध्यानमिति आद्यौ श्रवणं भगवद्वाचकानां पद्यवाक्यानां भगवति शक्तितात्पर्यावधारणं तथा सति विषयो ध्यानस्थितो भवति अन्यथा अन्यत्रापि स्नेहः स्यात् तदनुदर्शनं तदर्थस्यानुभवः कृपया भगवत्साक्षात्कारो वा भगवत्कामार्थः नारदादिभिरिव ततो ध्यानं योगेन चिन्तनम् पूर्वैरेव मयि भावो भवति स चोत्पन्नो भावः अनुकीर्तनात् स्थिरो भवति यथायमुपायः शास्त्रीयः साधीयान् न तथा निरन्तरसान्निध्येन जातो लौकिकः स हि कामरूप इत्यवोचाम अतो गृहान् प्रतियात अतः परमार्थविचारेऽपि न स्थातव्यमिति तथेत्यत्र प्रकार एव निषिद्धः न स्वरूपतो महत्त्वं निषिद्धं गृहस्थितानां च विहितं भवतीति गृहगमनमाज्ञापितम् ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, कथमन्यथा सम्भावयसि न वयं त्वदङ्गसङ्गार्थमागताः किन्तु गर्गोक्तिप्रामाण्यान्नारायणस्य समो नान्य इत्यतस्त्वामेव नारायणं ज्ञात्वा त्वद्भक्तिकामा वयमागतास्तदद्येमां रात्रिं स्वसमीप एवास्मान् स्थापयित्वा कृपया स्वचरणसरोजं परिचारयेति चेत्तत्र आह—श्रवणादिति । शुद्धभक्ताः खलु सामीप्यसालोक्यादिकमपि न कामयन्ते यथा श्रवणकीर्तनादिकमिति प्रसिद्धिर्भवतीभिः वैष्णवीभिः श्रुतैवेति भावः । पक्षे श्रवणादिभ्यो भावः कन्दर्पस्तथा न भवति यथा सन्निकर्षेणेत्यतो गृहान् प्रति न यातेति । नञ्त्रावृत्त्यान्वयः यद्वा नञ्पर्यायास्यकारस्य प्रश्लेषेण अगृहान् न गृहान् प्रतियातेत्यर्थः ॥ २७ ॥

सिद्धान्तप्रदीपिका ।

एवं च बहुभिः प्रकारैः प्रत्याख्याता अत्यनिवृत्ता आत्तरक्तदृष्ट्यापथापेताश्चर्यादीत्येवं विभज्ते—श्रवणादिति । श्रवणादिना यथा तथा न सङ्गेनेत्यर्थः । विरहे समुत्कण्ठया झटिति तत्सङ्गः संयोगेनोत्कण्ठाशैथिल्यात् नेति भावः । एवं च परां काष्ठामापन्नोऽपि तासां भावो विप्रलम्भकृतेनापलापित एवेति भावः । अत्र पूर्वरागे प्रायः पूर्वं श्रवणं ततो दर्शनं ततः संयोगप्राप्त्या निरन्तरा तत्स्फूर्तिः ततस्तत्कथेति क्रमेणैव निर्देशः अतो मम प्रेमवर्धनार्थं गृहानेव प्रतियातेति पक्षे यत्तदोर्नित्यसम्बन्धात् यथा सन्निकर्षेण मयि भावः शुद्धा प्रीतिर्जायते तत्रावसरे यथारुचि यथाकामं परिचर्यादिसम्भवात् तथा श्रवणादिना न जायते ततो गृहान् प्रतियातेति नञः परिकल्पान्वयः यद्वा, ततोऽगृहानिति प्रश्लेषः "अभावेन ध्यानेनापि" इत्यमरकोशात् अयातेत्यन्वयः नयातेत्यर्थः । यद्वा, प्रतिषेधप्रत्याख्यानप्रतिपक्षादिषु प्रकृत्यर्थविरोधेऽपि प्रतिशब्दो दृष्टः ततश्च प्रतियात गमनविरोधविषयान् गृहान् कुरुतेत्यर्थः । यद्वा, गृहानिति "देवविप्रवह्नयोऽपि हि" इतिवत् कुञ्जगृहानित्यर्थः प्रतियातेति सन्धोऽन्वयः सुहृदं प्रतियातीति यत्कुञ्जगृहागमनोन्मुखी भवतेत्यर्थः ॥ २७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

प्रथमपक्षे एवं धर्मोपदेशादिना बहुधा प्रत्याख्याता अपि यदा प्रेममार्गाद् गृहमार्गं प्रति न चेलुस्तदा प्रेमसाधनान्तरोपदेशेन न्यवसितभगवदङ्गसङ्गसौख्यास्वा(द)लग्नास्त्विव परीक्षां करोति, श्रवणादिति । प्रथमं तद्गुणाभिज्ञमुखेन गुणश्रवणाद्गुणपरोक्षज्ञानान्मयि भावोत्पत्तिस्ततो दर्शनादपरोक्षगुणोत्कर्षाद्भाववृद्धिस्ततो ध्यानान्निरन्तरप्रत्ययप्रवाहरूपात् दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमिरिति सूत्राद्भावदार्ढ्यं तथानुकीर्तनात्—

"तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः" ॥

इत्युक्ताभ्यासरूपाद् दृढभावरक्षणं यथा तथा सन्निकर्षेण न भवति प्रत्युत भावशैथिल्यं ततो गृहान्प्रतियात तत्रैव श्रवणध्यानादि कुरुत । द्वितीयपक्षे तु यथा श्रवणादिना मयि भावो भवति तथा सन्निकर्षेण ततोऽप्यधिकसुखापरोक्षानुभवेन दर्शनलाभभोगेषु सुखतारतम्यस्य श्रुतिलोकाभ्यां सिद्धत्वात् भावातिशयो भवति ततो गृहान् प्रति न यात । यद्वा, किं न तथा सन्निकर्षेण अपि तु ततोऽप्यधिकतममिति सन्निकर्षार्थं गृहान् लताद्रुमनिकुञ्जगृहान्प्रतियातेति भावः ॥ २७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

न तु सत्सर्वं लोकदृष्ट्या भगवतोक्तं वयं तु पुरुषोत्तमे त्वय्यासक्ता अतो नास्माकं स्वधर्मत्यागयुक्तो दोषो भगवदाराधनस्य सर्वोत्तमधर्मत्वादित्याशङ्क्यैवं तर्हि न लौकिकस्नेहस्यापाद्यो विषयः कामशेषस्य लौकिकस्य हीनत्वादित्याशयेनाह, श्रवणादिति । आदौ श्रवणं भगवत्प्रतिपादकवाक्यादीनां भगवति शक्तितात्पर्यावधारणं पश्चात्तेषामनुकीर्तनम् अवधारितार्थस्य स्थिरीकरणाय्याङ्कुयाख्यो मननमिति यावत् ततो ध्यानं श्रुते मतेऽर्थे चित्तस्य स्थिरीकरणं निदिध्यासनं ततो दर्शनं तदर्थध्यानुभवः भगवत्कृपया साक्षात्कारस्तस्माद्यो मयि भावः परप्रीतिलक्षणो यथा भवति न तथा सन्निकर्षेण भावो भवति लौकिकसङ्गमेन लौकिक एव कामशेषभूतभावो भवतीत्यर्थः । ततस्तस्माच्छ्रवणाद्यर्थं गृहान् प्रतियात । यद्वा, न वयं सम्भोगार्थिन्योऽपि तु प्रेमलक्षणभक्तिमात्रेच्छावत्योऽतः सर्वं विहायात्रागता अतस्तदर्थं भवत्सन्निकृष्टतया स्थास्याम इति चेत्तत्राह—श्रवणादिति । स च मयि भावः श्रवणादिना यथा भवति न तथा सन्निकर्षेण ततस्तदर्थं गृहान्प्रतियात । यद्वा, अहो भगवत्सन्निधाववस्थानेऽपि वयमयोग्या इति खिन्नचित्ता आलक्ष्याह, श्रवणादिति । मन्मुख्यभक्ताः सामीप्यसालोक्यादिकमपि न कामयते किन्तु श्रवणकीर्तनादिभिरेव रमतेऽतो युष्माभिरपि श्रवणादिभिर्निरुपाधिकोऽपि भावः सम्पाद्यः किं सन्निकर्षप्रार्थनयेति भावः अनभिज्ञापक्षे अहो दैव ! यस्मिन्वयमनुरक्तचित्ताः प्रेमाभिकामाः कदापि वियोक्तुमयोग्याः स्वाङ्गः स्वानङ्गाङ्गसङ्गं न प्रयच्छति स्वसन्निधावपि निषेधत्यतः किं कुर्मः क्व गच्छाम इति व्याकुलमानसाः लिखिताचित्रवदवस्थिताः दृष्ट्वा तासां पूर्णभावमालक्ष्य तस्य परमदार्ढ्यसिद्ध्यर्थमाह—श्रवणादिति । परिपाकपर्यन्तं सम्पादनीयो भावो यथा श्रवणादिना भवति न तथा सन्निकर्षेण सन्निकर्षस्योत्कण्ठाशैथिल्यकरत्वादपक्वे भावे त्वङ्गसङ्गो न रसावहः तस्मात्तत्परिपाकहेतूत्कण्ठावृद्ध्यर्थं गृहान् प्रतियातेत्यर्थः । यद्वा, "अथवा मदभिस्नेहात्" इत्यनेन मयि साधारणप्रीतिमत्यो भवत्य इत्युक्त्वा कामोपाधिकप्रीतौ भर्तुरित्यादिना दोषमुद्भावितवानथेदानीं तस्याभिवृद्धावुपायमाह—श्रवणादिति । यद्यपि वर्त्तमानकाले कुलस्त्रीणां युष्माकं निषिद्धो भावो नास्तीत्यहं सम्यग्जानामि तथापि शुद्धभावे दोषप्रवेशभयात्तत्र दोषोद्भावनं मया कृतं शुद्धभावश्च श्रवणादिना यथा पूर्णतां गच्छति न तथा सन्निकर्षेण प्रत्युतः सन्निकर्षेण सन्निकटस्थस्य मालिन्यं भजेन्निन्दाद्युत्थाने न निवर्त्तते च तस्मात्तदर्थं गृहगमनमेव युष्माकमुचितं नत्वत्रावस्थानमिति भावः । यद्वा, कृष्णसङ्गमोत्कटोत्कण्ठायुतानां कोटिब्रह्मकल्पपर्यन्तं कुम्भीपाकादिनरकपाताद्यभीतानां त्यक्तलोकद्वयानामस्माकमाशयमभिज्ञाय किमिति प्रलाप आरब्ध इति कोपेन व्याकुलस्त्वान्ता आलक्ष्य तत्कोपमन्यथा प्रकल्प्याह—श्रवणादिति । अहो भर्तृशुश्रूषादिधर्मनिधिभूतासु यथोक्तदोषगन्धेनापि विनिर्मुक्तास्वस्मासु दोषमारोप्यायं प्रलपति इति कोपो न कार्यः उक्तवाक्यस्य प्रासङ्गिकत्वात् युष्मदभिप्रेतस्तु भावः शुद्ध एवेत्यहं सम्यग्जानामि स च मयि यथा श्रवणादिना भवति न तथा सन्निकर्षेण ततो गृहान् प्रतियातेत्यर्थः । मानिनीपक्षे ननु, किमेवं कल्प्यते सद्भावग्रहीतोऽहमेव भवतीनां भर्ता ननु पित्रादिदत्ता गोपा इति, सद्भावस्यापि सम्प्रति सन्निकृष्टेषु तेष्वेव सत्त्वादुत्पन्नस्याप्यसन्निकृष्टत्वेऽपि सम्प्रति निवृत्तत्वादिति चेत्तत्राह, श्रवणादिति । यथा श्रवणादिना मयि भावो युष्मदन्तःकरणेषु वर्त्तते तथा सन्निकर्षेणापि पत्यादिषु नास्तीत्यहं सम्यक् जानामि अतः किमिति स्वभावतिरोधाने भवत्यः प्रवृत्तास्तस्मात् गृहान् प्रति न यातेति ततोऽनुषङ्गः । यद्वा, ततो गृहानित्यत्राऽकारप्रश्लेषः "अभावे न ह्यनोनाञ्च" इत्यमरादयात न प्रतियातेत्यर्थः । यद्वा, ननु, मदभिस्नेहाद्भवत्यो यन्त्रिताशया इति भवता कथं ज्ञातमिति चेत्तत्राह—श्रवणादिति । अहर्निशं मच्छ्रवणादिना तथा सन्निकर्षेण सन्निकटागमनेन भवतीनां मयि भावो वर्त्तत इति मया ज्ञायते ततः कपटेन पतिसेवार्थं गृहान्प्रति न यातेत्यर्थः । यद्वा, ननु, पत्यादिसन्निधावेव सर्वदा स्थास्यामस्तत् सन्निकर्षेण च तत्र भावोऽपि भविष्यति तत्पूर्वकतत्सेवनादिना धर्मादिकमपि सेत्स्यतीति चेत्तत्राह श्रवणादिति तत्सन्निधाववस्थितानामपि युष्माकं यथा मयि भावो भविष्यति मच्छ्रवणादिपरत्वात् तथा पत्यादियुक्तदभावात्तो गृहानित्यादौ न्यवर्त्तत एतेन किमित्येवं स्वपत्यादिषु भावकतीनामस्माकमधर्माधिकारं भावं वदसीत्युपालम्भोऽपि निरस्तः निवृत्तिपक्षे एवं वेदवचसां भूतेर्थे प्रामाण्यं नास्त्यतो वेदान्तवाक्यानामपि कार्यार्थकर्त्रादिप्रतिपत्तिपरत्वमभिहितमधुना तु उपनिषदां ब्रह्मणि प्रामाण्यं तथापि स्वप्रकाररागतमनोव्यापारविधिशेषतैव तथा यूपाऽऽहवनीयादीन् अलौकिकान्यपि शास्त्राणि समर्थ्यते तद्बुद्धिविशेषतयाचोपनिषद्भिर्ब्रह्म समर्थ्यत इत्याह—श्रवणादिति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "य आत्मा अपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञा-

श्रीशुक उवाच ।

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

सिनवः, आत्मेत्येवोपासीत आत्मानमेव लोक उपासीत, ब्रह्म वेद ब्रह्मैव भवति" इत्यादिना विहितान्निदिध्यासनाद्दर्शनान्निदिध्यासनानन्तरमपि आत्मनि भावः कार्यान्वितस्वार्थपरत्वविभ्रमात् तत्परता प्रामाण्यं भवति, न तथा सन्निकर्षेण तत्त्वमस्यादिमेकमात्रबोधनेन सिद्धार्थकथनमात्रेण प्रामाण्यं भवति तथा च यथोक्तविधानेषु सत्सु कोऽसावात्मा किं ब्रह्मेत्याकाङ्क्षायां नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यः शुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्मेत्यादितत्स्वरूपसमर्पणेन सर्वा उपनिषद उपयुक्ताः तदुपासनाच्च शास्त्रदृष्टो उदमोक्षः फलंभविष्यति तर्कव्यधिया ननु प्रवेशे वस्तुमात्रकथने हानोपादानासम्भवात् "सप्तद्वीपा वसुमती राजाऽसौ गच्छति" इत्यादिवाक्यवदुपनिषद्वाक्यानामानार्थक्यमेव स्यादिति भावः । तस्मात् गृहान्कार्यैकसत्स्वरूपान्यात गच्छत तत्परतैव युष्माकं न्याय्येत्यर्थः ॥ २७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, सत्यमेतदन्यविषये सर्वस्वमिति तु येन केनाप्युपायेन त्वयि भक्तिः स्थिरीकर्तव्या इत्यत आह—श्रवणादिति । भावो भक्तिः ॥ २७ ॥

भाषाटीका ।

श्रीकृष्णचन्द्र बोले, कि—हे गोपियो जैसो कछु दूर तें मेरे गुण श्रवण करवेते दर्शनतें ध्यानतें और कीर्त्तनतें मो में भाव होय है तैसो समीप तें नहीं होय है तासू अब तुम अपने २ घरन कों चली जाओ ॥ अथवा जैसो समीपतें अथवा दर्शन ध्यानसों और कीर्त्तनसों मो में अचल प्रेम होवै है तैसो दूरते नहीं होवै है तासों अब तुम घरनको मत जाओ ॥ २७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

"दृशाऽऽलोकेऽन्यथैतासां प्रेमकोमलिताऽऽत्मनाम् । भाषाऽऽसु सर्वाश्चौदास्यवाहि कौतुकजृम्भयत्" इति एतत् गोविन्दस्य गोकुलेन्द्रत्वेन निजसहजपरमभराविषयस्य भाषितं वचनं विप्रियं परमप्रेमवशतः सद्यस्तात्पर्यानवधारणेन अप्रियार्थस्पर्शनेन वा अनिष्टं किंवा प्रियविपरीतं विद्विष्टमाकर्ण्य यद्वा, अर्थद्वयस्पर्शित्वेनानिश्चिताशयत्वाद्दुरूहपाठाभरेण तासां विप्रियत्वेनैव ज्ञातमित्यर्थः । विषण्णा अन्तस्तप्ताः सत्यः यतो भग्नः सङ्कल्पस्तत्सङ्गविशेषविषयकमनोरथो यासां ताः अतो दुरत्ययाम् अनन्ताम् अनतिक्रम्यां वा चिन्ता अनिष्टाप्तिजन्यं ध्यानम् आपुः अयं प्रेमार्द्रकोमलस्वभावोऽपि परमां काठिन्यमस्मद्दौर्भाग्येन गतः तदधुना किं सपादग्रहणाकाकुभिरयमनुनीयेत किंवा प्रतिवचनेन प्रयत्नतः त्वरां धैर्यावलम्बनेन वा शाठ्यतो व्रजं प्रति निवृत्त्या वा दुरवगाहगाम्भीर्यस्यास्याशयं निर्धारयेम किंवा सद्य एव प्राणान् परित्यजेम तत्र चाऽस्य साक्षादेव परोक्षं वा यमुनाप्रवेशादिनेत्यादि चिन्तयामासुरित्यर्थः । यद्वा, अहो बत किं करवाम कुत्र यामेत्याद्यविशेषां चिन्तां, नानासुखवैकल्यलक्षणाम् यद्वा, विषण्णाः सत्यश्चिन्तामापुः विषण्णत्वे हेतुद्वयं विप्रियमाकर्ण्येत्येकः प्रेष्ठजनस्य विप्रियोक्तिश्रवणमात्रेण स्वयमेव परमदुःखोत्पत्तेः । किञ्च, भग्नेत्यन्यः विशेषतोऽशेषापेक्षया निजचिराभीष्टार्थस्य भङ्गादित्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इति एतत् गोविन्दस्य गोकुलेन्द्रत्वेन गोकुलमात्रे हि तस्यापि किमुत स्वेषु भाषितं स्फुटमेव वचनं विप्रियमिति अर्थद्वयस्पर्शित्वेनाऽनिश्चिताशयत्वाद्दुरूहपाठाभावेन ... तासामुपेक्षैव स्फुरितेति विषण्णा अन्तस्तप्ताः सत्यः यतो भग्नः सङ्कल्पस्तदङ्गसङ्गविषयः चिरन्तनमनोरथो यासां ताः अतो दुरत्ययाम् अनतिक्रम्यां चिन्तामनिष्टाप्तिकृष्टानष्टाप्तिजन्यं ध्यानम् आपुः अयं प्रेमार्द्रकोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः तदधुना किं सपादग्रहणाकाकुभिरमुमनुनयेम उत प्रतिवचनेन वा प्रयत्नतः श्रमं धैर्यावलम्बनेन वा शाठ्यतो व्रजं प्रतिनिवृत्त्या वा दुरवगाहगाम्भीर्यस्यास्याशयं निर्धारयेम किं वा सद्य एव प्राणान् त्यजेम तत्र चास्य सद्यादेव परोक्षं वा यमुनाप्रवेशादिनेत्यादि चिन्तयामासुरित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं स्वमनोरथाननुगुणं गोविन्दस्य वचो निशम्य गोप्यो भग्नः सङ्कल्पो यासां ता अत एव विषण्णा दुःखिताः अत एवानर्थावहां चिन्तां प्रापुः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः !" इति गोविन्दभाषितम् अधुना विप्रियं पश्चाद्विशेषतः प्रियं चिन्तां मनसि दुःखचर्यां विचारं "चिन्ता सञ्चिकयोश्चर्चा" इति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ भगवद्वचसां गाम्भीर्यात् स्वकीयौत्कण्ठ्यगाढत्वाच्च विशेषविदग्धा अपि यथाश्रुतमेवार्थं विदित्वा "अनिष्टाशंसीनि बन्धुहृदयानि" इति न्यायेन तद्वचसः काठिन्यमेव जानन्त्यो यामवस्थामापुस्तामाह—इतीत्यादि । गोप्यः गोविन्दभाषितम् आकर्ण्य चिन्तामापुः कीदृशम् ? इति विप्रियम् एवं प्रकारं विप्रियं वचो एवं प्रकारकं विशिष्टं विविधं वा प्रियमपि इत्यपि शब्दोऽध्याहार्यः ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तासां गृहगमने बोधिते तत्परित्यागानन्तरं पुनर्ग्रहणमिदं वान्ताशनमिव मन्यमानाः भगवद्वाक्यं चानुल्लङ्घ्यमिति विचार्य अतिविरोधे उभयानुरोधिशरीरपरित्यागः कर्तव्यः इति निश्चित्य तत्रापि भगवत्सम्बन्धानन्दाभावादितिकर्तव्यतामूढा जाता इत्याह—इति विप्रियमिति । विगतं प्रियं यस्मादिति उभयथापि प्रियाभावः किं परीक्षार्थमाह अहोस्विदभिप्रेत एवायमर्थः इति आ समन्तात् श्रुत्वा वाक्यतात्पर्यं (र्थे) निर्धार्य सत्यं गमनमेव वदतीति निश्चित्य अनभिप्रेतत्वेपि तत्प्रसवहेतुमलभमानाः गोप्यो नैपुण्यरहिता गोविन्दस्य स्वामिनो देवभाषितत्वेन अनुनयाङ्गारहितमीश्वरवाक्याच्च निर्धाररहितमाकर्ण्य विषण्णा जाताः मनसि परमं विषादं प्राप्ताः तत्र हेतुर्भग्नसङ्कल्पा इति तदा परां चिन्तामापुः कथमस्माद्विचारितं भगवद्वाक्यं च एकमुखं भवतीति सा चिन्ता त्रैलोक्यं व्याप्य वेदं जन्मजन्मान्तराणि च निर्धारमलभमाना दुरत्यया पर्यवसानरहिता जाताः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गाः नानाविधान् वाग्विलासान् प्रयोक्तुं विन्दते लभते इति गोविन्दस्तस्य भाषितं "भाष व्यक्तायां वाचि" इत्यतो व्यक्तवाक्यं विप्रियमाकर्ण्य तदेव श्लेषयुक्तम् अव्यक्तवाक्यं तत्प्रियत्वे सुख्या सम्यगवगतेपीत्यर्थः । व्यक्तवाक्यस्य विप्रियत्वे कारणम् अदृष्ट्वा अव्यक्तवाक्यस्यापि प्रियत्वे सन्दिहानास्ता अनुरागस्यापि सावोत्थदैन्योदयात् सत्यमयोग्या अस्मानयमुपेक्षते इमेवेति निश्चित्य विषण्णा यदर्थमहो पतिकुलपितृकुलधर्मधैर्यभयलज्जादिकमुपेक्षयामताः स खल्वस्मानुपेक्षत इति भग्नसङ्कल्पाः चिन्तामापुः किं सकाकुपादगृहणमिममनुनयेम किम्वा प्रयत्नतो धैर्यमवलम्ब्य कृत्रिमशाठ्येन व्रजं प्रति निवृत्या दुरवगाहगाम्भीर्यस्यास्याशयं निर्धारयेम किम्वा प्राणान् परित्यजेम तत्र चास्य साक्षादेव परोक्षं वा यमुनाप्रवेशादिना वा हन्त प्राणांस्त्यक्तवास्य श्रीमुखं कथं पश्येम अस्यत्का वा कथमत्र स्थातुं प्राप्स्याम एतद्वाक्यं पत्याहिमजनरूपं वान्तभक्षणं कर्तुं वा कथं प्रभवाम क याम किङ्कर्वामेत्यादीतिकर्तव्यमूढा बभूवुरित्यर्थः ।

> "आहूय गोपीललितावतकावली:—
> स्ववेणुनादेन वचश्च यत्त्विषम् ॥
> कृष्णस्तदेवाशु यथुः सुविस्मताः—
> विश्वस्य ताः का जहति व्रजं निजम्" ॥ २८ ॥

विशुद्धरसदीपिका ।

उपसंहरति—इतीति । एवं प्रकारं यद्वा, एतदेव विप्रियम् अप्रियं यतः गोविन्दभाषितं गोकुलेन्द्रत्वात्परमप्रेष्ठत्वेन सम्भावितस्य साक्षाद्वचनमाकर्ण्य सम्यक् श्रुत्वा ननु परम्परया गोप्यः तदेकजीवनाः अत एवार्थद्वयस्पर्शित्वेनानिश्चिताशयत्वादुत्कण्ठातिशयस्वभावेन तासामुपेक्षैव स्फुरितेत्याह—विषण्णा इति । अन्तःसन्तप्ता इत्यर्थः । तादृश्यः सत्यः चिन्तामापुः तथाहि अयं प्रेमार्द्रकोमलस्वभावोपि परमकाठिन्यमस्मद्दौर्भाग्येन गतस्तदधुना सपादग्रहणकाकुभिरनुनयेम उतप्रतिवचनेन वा प्रयत्नतः स्वयं धैर्यावलम्बनेन वा शाठ्यतो व्रजं प्रतिनिवृत्य वा दुरवगाहगाम्भीर्याशयस्याशयं निर्धारयेम किम्वा सद्य एव प्राणांस्त्यजेम तत्र चास्य साक्षादुत परोक्षं वा यमुनाप्रवेशेन वेति दुरत्ययाम् अपाराम् इति कान्तभावानां तु कासाञ्चिच्चिन्तानुकरणमात्रं कासाञ्चित्साधकचरीणां प्राग्भावीयसंस्कारवशेन मौग्ध्येन वा चिन्ताभासमात्रमिति विवेकः ॥ २८ ॥

श्रीरामनारायणकृतभावविभाविका ।

एवं भगवतोक्ते तासां गोपीनां या दशा जाता तामाह—भगवान् शुकः—इति विप्रियमित्यादिश्लोकैः । तत्र या गोप्यो मानिन्यः प्राग्लब्धविहारा बहुधाऽनुभूतभगवद्दाक्षिण्यभावाः कदाप्यदृष्टोपेक्षास्तासामुपेक्षार्थस्फूर्त्यभावाद्भगवद्दाक्षिण्यभावेन स्वानुरागप्रार्थनामात्रभावेन यत्सौख्यं जातं तद्वर्णयति—इति । विप्रियमिति । इति भगवदुक्तपद्येषु द्वितीयपक्षे व्याख्यातं विप्रियं विशेषेण प्रेष्ठतमानुरागातिशयोद्घाटकतया प्रियं मनोऽनुकूलं गोविन्देन गवामिन्द्रेण गोपालतयैव देवेन्द्रादपि लब्धमानेन गोपगोपिकार्थं देवेन्द्रमानापहारिणा सर्वथा स्वानुकूलेन साक्षाद्भाषितं नत्वन्यमुखाच्छ्रुतमाकर्ण्य यद्वा, गोविन्देन गवां बहिरन्तरिन्द्रियाणामिन्द्रेण गाः इन्द्रियाणि स्वनियम्यतया विन्दते इति तथा हृषीकेशेन भाषितमतो यद्बोधाय यदर्थतया प्रयोगस्तत्प्रेरणया ताभ्यस्तदर्थप्रतीतिसम्भवाच्च शङ्काऽवसर इति द्व्यर्थकमपि वाक्यं विशेषेण प्रियं यथा भवति तथाऽऽकर्ण्येति वाऽन्वयः । विषण्णा विगताऽवसादा जातातिप्रमोदा इत्यर्थः भग्नसङ्कल्पा भग्नो गृहगमनसङ्कल्पोपि यासां तथाभूताः सत्यः दुरत्ययामव्युच्छिन्नां चिन्तां चित्तस्य भगवति प्रत्ययैकतानतां आपुः "चिन्तयेन्मामतन्द्रितः" इत्यादौ चिन्ताशब्दस्य ध्यानार्थकत्वलाभात् दुरत्ययत्वनिर्देशेन समाधिर्द्योततः भगवद्रूपमाधुर्ये समाधिवल्लीना बभूवुरिति भावः याश्च प्रागलब्धविहारा मुग्धास्ता गोप्यस्तु इति द्व्यर्थकमपि वाक्यं विप्रियं प्रियविरुद्धं यथा स्यात्तथैवाकर्ण्य गोविन्दभाषितमित्यस्यायमर्थं भावः । अयं गवां गोभूमीन्द्रियवेदादीनामिन्द्रो गोपीर्मां(स्मा)नः उपेक्षत इति तथा च विषण्णा विषादापन्नाः भग्नसङ्कल्पाः निवृत्तोत्साहाः दुरत्ययामचिकित्स्यां चिन्तां चितातोपि दशगुणाधिकामापुः तद्यथा—

> "चिन्ताचिता बिन्दुमती चितातो दशधाऽधिका ।
> चिता दहति निर्जीवं सजीवो दहतेऽनया ॥ २८ ॥

(१)कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिम्बाधराणि चरणेन भुवं लिखन्त्यः ।
अस्त्रैरुपात्तमषिभिः कुचकुङ्कुमानि तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥ २८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं भगवद्वाक्यान्युदाहृत्य ततः किं वृत्तमित्यपेक्षायां गोपिकावाक्यान्युदाहर्तुं श्रीशुक उवाच–इति, यथोक्तप्रकारमत एव विगतं प्रियं यस्मात्तद्विप्रियं नच प्रियवचने विप्रियत्वभ्रमः यतो भाषितम् "भाष व्यक्तायां वाचि" इति स्मरणादुव्यक्तं प्रतियात व्रजमित्यादिरूपहृन्निषेधरूपम् । ननु, यथावदश्रवणे स्पष्टार्थकमपि वाक्यमन्यथा प्रतीयत इत्याशङ्कानिरासायाह–आकर्ण्य समन्तान्मनो दत्वया श्रुत्वा तत्रापि तात्पर्यावधारणापर्यन्तं श्रुत्वा एतेन तद्वाक्यस्य परीक्षार्थत्वमपि वारितम् तत्रापि गोविन्दस्य गां वेदादिरूपां वाणीं विन्दतीति गोविन्दस्तस्य वेदार्थसम्प्रदायप्रवर्तकस्य सर्वज्ञस्य परमात्मनः भाषितं प्रतीकारभाषिते हि संशयो भवति किमभिप्रायेणानेन प्रयुक्तमिदं वाक्यमिति न तु परमात्मभाषितमिति भावः । एताश्च गोप्यः प्रत्यवायत्वात्प्रतारणायोग्यास्तस्माद्यथार्थं गमनमेव वदतीति तद्वाक्यान्निश्चित्याऽहो गृहादिकं त्यक्त्वाऽत्र वयं समागताः वान्ताऽशनमिव पुनस्तद्गृहान् गन्तुमशक्ताः भगवद्वाक्योल्लङ्घने चाऽक्षमाः इति विचार्योभयाविरोधे शरीरपरित्याग एव कर्त्तव्य इति निश्चित्य विषण्णाः विषादश्च इतिकर्तव्यतायां मूढतां गताः यतो भग्नः सङ्कल्पो भगवत्सङ्गमानन्दविषयको यासां ताः दुरत्ययां जन्मान्तरेष्वपि अनिर्वर्त्यां चिन्तामहो भगवता किमिदमुक्तमतःपरं किं भविष्यतीत्येवमादिरूपां प्रापुः । अनभिज्ञापक्षे इति यथोक्तं गोविन्दस्य भाषितं प्रार्थकमप्युत्कण्ठास्वभावात्प्रियमेव निर्धार्य गोवर्द्धनधारणेन सर्वदा रक्षापरायणस्य महात्मनः स्वामिन इदं वाक्यम् अतो नानृतमिति तासां चित्ते प्रतीतिर्जातेति बोधयितुं गोविन्दपदनैपुण्यपराहित्येन यथाश्रुतार्थमात्रग्रहणासमर्था इति द्योतनाय गोप्य इत्युक्तं ततो विषण्णाः परमापद्मापिता यतो भग्नस्तद्रतिविषयः सङ्कल्पो मनोरथो यासां ताः दुरत्ययामनन्तां चिन्तामापुः । अहो कलगीतमाकर्ण्याऽऽह्वानभ्रमात्कुलधर्मधैर्यभयलज्जादिकं विहाय तथैवाऽत्र समागताः प्रेमार्द्रोऽप्ययमस्मद्भाग्येन कठोरतां गतः किं वाऽस्मत्परीक्षार्थं दाक्षिण्यं विहाय वामतागतिमङ्गीकृतवान्? किं वाऽस्य मनसि प्रेमलेशोऽपि नासीत् भ्रमादेव जन्मप्रभृत्येतस्मिन्वयमनुरक्ताः? किं वाऽस्मदीयं किञ्चिदपराधमनुसन्धाय तद्दण्डदानायोद्यमः? ततः किममुं नत्यादिभिरनुनयामः? किं वा प्रतिवचनेन व्रजं प्रतिनिवृत्याचैतदाशयं निर्धारयेम? एतदाज्ञापालनं वा करवाम? एतदाविष्टं वान्ताशनसमं पत्याराधनं तु कथं कर्तुं प्रभवाम? किं वैतत्समक्षं यमुनाप्रवेशादिना सद्यः प्राणांस्त्यजेम? एवञ्चेत्पुनरेतन्मुखसरोजं कथं पश्येम? एतदनुज्ञां विनाऽत्रापि स्थातुं कथं प्रभवाम? अहोऽतिकष्टं किन्नु कुर्मः क्व गच्छाम? इत्येवमादिरूपां चिन्तां प्राप्तवत्यः ॥ मानिनीपक्षे इति विशेषेण प्रियं गोविन्दभाषितमाकर्ण्य विषण्णाः भग्नसङ्कल्पा इव दुरत्ययां चिन्तां प्रापुरङ्गीकृतवत्यः निवृत्तिपक्षे इत्येवं विगतप्रिया गोविन्दस्य वेदबाह्येभ्यो वेदत्राणाय स्वीकृततद्वादिविग्रहस्य भाषितमाकर्ण्य विषादं प्राप्ताः यतो भग्नः प्रत्यगभिन्नब्रह्मप्रतिपादसङ्कल्पो यासां ताः गोप्यः परमात्मसम्बन्धिन्यः श्रुतयो दुरत्ययां चिन्तामास्तिकामप्यस्मन्नाशाय प्रवृत्ताः अहो कथं भविष्यतीत्येवंरूपां प्रापुरित्यर्थः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विप्रियं स्वमनोरथाननुरूपम् ॥ २८ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! श्रीगोविन्द अर्थात् विचित्र वाणीकूं प्राप्त होन वारे श्रीकृष्णचन्द्र ने याप्रकार (दूसरे अर्थकी रीतिसूं) विशेषकरकें प्रिय वातें कहीं परन्तु गोपीन ने उन वातनकूं विप्रिय जानकें वडो विषाद कियो, और गोपीं जा रासविलास के मनोरथ करके आई हीं, सो मनोरथ सब भग्न होय गयो, तासूं बडी चिन्ता कूं प्राप्त होती भई ॥२८॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चिन्तां प्राप्तानां स्थितिमाह–कृत्वेति । शुचः शोकादुद्गतेन श्वसनेन शुष्यन्तो बिम्बफलसदृशा अधरा येषु मुखेषु तानि अव अवाञ्चि कृत्वा तथाङ्गुष्ठेन महीं लिखन्त्यः तथा गृहीतकज्जलैरश्रुभिः कुचकुङ्कुमानि क्षालयन्त्यः तूष्णीं स्थिताः यतः उरुदुःखस्य भरो भारो यासां ताः ॥ २९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अत एव तूष्णीं तस्थुः स्वयं परमचिन्तावेशेन वागादीन्द्रियवृत्त्यस्फूर्तेः शुच इत्यनेन शुष्यद्दित्यनेन च श्वासस्य दीर्घतोष्णता च ध्वनिता बिम्बेति पक्वबिम्बफलसादृश्येनारुणता कोमलता च अतोऽधराणामतिशोषो म्लानता च सूचिता चरणेन वामपादेन भूमिविलेखनं चिन्तानुभावः, हे भूमि ! विदीर्णा भव वयं प्रविशाम इत्यस्य भावः । एवमूर्ध्वाऽवस्थितिरेव गम्यते उपात्तमषिभिरिति कुचकुङ्कुमानि मृजन्त्य इति च अस्त्राणां धारा सूच्यते तस्यां अपि बाहुल्यविवक्षया बहुत्वं तत्र सर्वत्र हेतुः उरुदुःखस्य भरो भारो बाहु महादुःखव्याप्ता इत्यर्थः । यद्वा, अनेनानुक्रममन्यदपि सन्तापक्रमादिकं सङ्गृह्णाति तेन वैवर्ण्यकम्पस्तम्भादयोऽपि जाता इत्यर्थः । यद्वा बाह्यस्थितिप्रकारमुक्त्वा आन्तरमप्याह–उर्विति । अनेन मूर्च्छातुल्यावस्था बोध्यते तस्याश्च

(१) त्यक्त्वा वक्त्रवनजान्यतिताप इति त्रिज० ।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

दुःश्रवत्वात् साक्षादनुक्तिः स्मेति प्रसिद्धौ नर्मोक्त्याऽपि तासां तादृशशोकेऽसम्भावना न कार्येति भावः । यद्वा, विस्मये तथापि तादृशदुःखमभूदहो प्रेममाहिमेति । यद्वा, अव्ययानामनेकार्थत्वात् खेद एव ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अत एव तूष्णीं तस्थुः चिन्तां परमचिन्तावेशेन वागिन्द्रियवृत्त्यस्फूर्तेः शुच इत्यनेन शुष्यद्भिरित्यनेन च श्वासस्य दीर्घतोष्णता च ध्वनिता शतृप्रयोगेण तु शोषाविच्छेदः बिम्बेत्यरुणता कोमलता च अतोऽधराणामतिशोषो म्लानता च सूचिता चरणेन वामपादाङ्गुष्ठेन भूलिखनं चिन्तानुभावः हे भूमि (मे) ! विदीर्णा भव प्रविशाम वयमित्यस्य भावः । एवमूर्ध्वावस्थितिरेव गम्यते उपात्तमषीभिरिति कुचकुङ्कुमानि मृजन्त्य इति चास्त्राणां धारा सूच्यते तस्यापि बाहुल्यविवक्षया बहुत्वं तत्र सर्वत्र हेतुः उरुदुःखस्य विषादस्य भरो भारो यासु ताः अनेनानुक्तमन्यदपि सन्तापक्लमादिकं गृह्यते तेन वैवर्ण्यस्तम्भादयोऽपि जाता इत्यर्थः । स्मेति प्रसिद्धौ नर्मोक्त्यापि तासां तादृशशोकेऽसम्भावना न कार्येति भावः । यद्वा, विस्मये तथापि तादृशदुःखमभूदहो प्रेममाहिमेति एते च चिन्तानुभावाः न तासां लक्ष्यमाणनिषेधरूपप्रतिवचनार्थविशेषभञ्जकाः कामिकृतप्रार्थनायां कुलवतीनां तत्सम्भवात् तासां रसाविरोधिभावोदयस्वभावाच्च ॥ २९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अव अवाङ्मुखानि कृत्वा ॥ २९—३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चिन्तां प्राप्तानां स्थितिमाह—कृत्वेति । अव अवाक् मुखानि कृत्वा कथम्भूतानि शुचः शोकाद्यः श्वसनः सोष्णो निश्वासमारुतः तेन शुष्यन्तो बिम्बफलवदधरा येषु तथाभूतानि तथा वामचरणाङ्गुष्ठेन महीं लिखन्त्यः तथा गृहीतानि कज्जलानि यैस्तैरश्रुभिः कुचयोः कुङ्कुमानि क्षालयन्त्यः उरुः दुःखभारो यासां तथाभूताः तूष्णीं स्थिताः बभूवुः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुःखं लक्षयितुमाह—न्यक्कृत्येति । वक्त्रजानि मुखकमलानि न्यक्कृत्य अधःकृत्वा बिम्बफलतुल्यान्यधराणि बिम्बाधराणि अन्तर्गतशोकाग्निसन्तापेन शुष्यन्ति बिम्बाधराणि येषु तानि तथा—

"कामबाणाविद्धाङ्गा स्त्रियो निर्वराङ्गना ।
पादाङ्गुष्ठनखेनाधोवदना लिखती क्षितिम्" ॥

कामशास्त्रात्प्रसिद्धभावं दर्शयति—चरणेनत्यादिना । उपात्तमषिभिरङ्गीकृताञ्जनैरास्त्रैर्बाष्पैः उरूणां दुःखानां भारो यासां तास्तथा स्म कृष्णवाक्याभिप्रायं संस्मृत्य—

"कामस्य दहनास्त्रैस्तु दग्धाङ्गोत्पादिनाश्रुभिः ।
नेत्रद्वारेण निर्याति दुःखमन्तर्गतं स्त्रियः" ॥ इति ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

चिन्ताप्रकारमाह—कृत्वेत्यादि । मुखानि अव अधःकृत्वा कीदृशानि शुचः शोकाद्धेतोर्यैः श्वसनैः श्वासैस्तैः शुष्यन्तः अधरा येषु एतेन श्वासस्य दीर्घोष्णत्वं व्यञ्जितं चरणेन भुवं नत भुवि किमपि बुद्धिपूर्वं लिखन्त्यः उपात्तमषिभिर्गृहीताञ्जनैरस्रैर्लोचनजलैः कुचकुङ्कुमानि मृजन्त्यः तूष्णीं तस्थुः न किञ्चिदूचिरे कथं नोचुस्तत्राह—उरूणां दुःखानां भरो यासु दुःखभरभावितत्वेन कण्ठरोधात् रागप्रवृत्ते स्मेति निश्चयः ॥ २९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततश्चिन्तया यज्जातं तदाह—कृत्वेति । चिन्तया प्रथमं मूर्च्छिता जाताः ततः मुखानि अव अवाङ्मुखानि कृत्वा कमपि स्वमुखं न प्रदर्शयिष्याम इत्यावाङ्मुखानि कृतवत्यः अवगताः शुचो याभिः ताः शोकसम्बन्धिन्यो वा जाताः शुचः श्वसनेन शोकसम्बन्धिना श्वासवायुना शुष्यन्ति बिम्बवदधराणि येषां तादृशानि मुखानि कृत्वा चरणेन च भुवं लिखन्त्यः तथैवावस्था भवतीति भूमिं विवरमिव प्रार्थयन्त्यः उपात्तमषिभिः अस्रैः कुचकुङ्कुमानि मृजन्त्यः तूष्णीं तस्थुः मुखस्य अवाक्त्वेन मन्त्रतिरोभावः श्वसनेन प्राणपीडाशोकेनान्तःकरणस्य बिम्बाधरशोषेण कामरसस्य पदा भूमिलेखनेन शरीरस्य अस्रैः इन्द्रियाणां कुङ्कुमाभावेन कान्ते दुःखभरेण आनन्दस्य तूष्णीं स्थित्या चैतन्यस्य तिरोभावो निरूपितः केवलं स्थाणुवत् स्थिताः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चिन्ताया अनुभावानाह—कृत्वेति । मुखानि अव अधःकृत्वेति लज्जा ध्वनिता प्रेम्णोऽनुरागादस्माकं स्वाभाविकलज्जात्याग एव सम्प्रति लज्जां प्रापयतः कुलवतीनां पुञ्जीभूतलज्जानामप्यस्माकं लज्जात्यागः खलु प्रेमहेतुक एव स च प्रेमरसविदां मते सङ्गीत एव ननु विगीतः प्रेम्णस्तु लक्षणमेतदेव यत् स्वविषयं परमेश्वरमप्यतिशयेन वशीकरोति तत्प्रेमेति ततश्च यद्यस्माकं प्रेमविषयोऽयं कृष्णो न वशोऽभूत्तदास्माकं प्रेमैव नास्तीत्यवगतं लज्जात्यागोऽयं किं हेतुकोऽभूदित्यनुतापो लज्जाचिन्ता च तत्रानुतापं विवृण्वन् मुखानि विशिनष्टि मुखानि कीदृशानि ? शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यन्तो बिम्बाधरा येषु तानि सूर्यातपेन पक्वबिम्बफलानां शोषे सतीव [illegible] भावः । लज्जाचिन्ते मरणं च यथा भवेत्तथा अधराणामप्यभूदिति भावः । लज्जाचिन्ते विवृणोति—चरणेन वामपादाङ्गुष्ठेन भुवं लिखन्त्य इति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हे धरित्रि ! विदीर्णा भव त्वयि वयं प्रविशाम इति भावः । शोकसन्तापौ विवृणोति—उपात्तमषिभिः कज्जलाक्तैरस्रैः कुचयोः कुङ्कुमानि मृजन्त्यः तेन विच्छेदवह्निकिना महाऽनुतापक्रकचेन द्विधा विदारयितुं श्यामसूत्ररेखे दत्ते इति सम्भावना ध्वनिता अस्रैरिति बहुवचनेन मृजन्त्य इति वर्त्तमानकालेन चास्राणां प्रवाहवती धारा सूचिता तावद्भिरप्यस्रैरन्तरीयवस्त्राण्यार्द्रयन्ति इत्यनुक्त्या एवं सम्भाव्यते नयनोत्थयमुनाह्रदयोत्थसन्तापानलयोर्निर्वापणशोषणकामयोर्विवादेन कस्याऽपि जयः पराजयो वा दृष्ट इति उरुदुःखस्य भरो भारो यासां तास्तूष्णीमिति भारासहिष्णुतयैव चेतनाया अपगमादिति भावः । ततश्च तस्थुरिति तासां गतचेतनानां पाञ्चालिकानामिवोर्द्ध्वावस्थितिरवगम्यते ॥ २९ ॥

विशुद्धरसदीपिका ।

तत्र चिन्ताप्राप्तानां स्थितिमाह—कृत्वेति । मुखानि अव अवाञ्चि कृत्वा अवाङ्मुखीकरणमिदं निजमुखस्य चन्द्रत्वाऽनुमानात् तदवलोकनेन तन्नेत्रकमलसङ्कोचात्स्वेषामेनाकलनभ्रमनिवारणाय किम्वा तूष्णीं भव मैवं वाच्यमिति चेष्टितेनैव तद्वारणाय किम्वा अस्मद्भ्रान्त्या काश्चिदन्या एवागताः किम्वा यास्त्वेवं वदन्त्ययमिति मौग्ध्येनात्मनोऽवलोकनाय यद्वा किमिदानीं विधेयमिति निजस्य पृच्छायै किम्वातिनिष्ठुरमिदमीदृशं वाक्यजातं निशम्याधुनापि जीवाम इति स्ववीक्षायै किम्वाऽस्य वाक्शरैरस्माकं हृदयानि विदीर्णानि न वेति परीक्षायै इत्याद्यूह्यम् अथ स्वयमेव तत्कारणमाह श्रीमुनीन्द्रः—शुचः श्वसनेन शुष्यद्बिम्बाधराणीति । इदं चोच्छ्वासैः सह जीवोऽपि किं निर्गत इत्याकलनाय किम्वा शुष्यद्बिम्बाधरावलोकनेनास्माकं कान्तस्यं मा जानात्विति गाम्भीर्येण तदाच्छादनाय किम्वा पूर्वं तु स्वभावसुन्दरावधरौ सादृश्यमसहमानावेव स्थितौ सम्प्रतिशुचः श्वसनेन शुष्यन्तौ बिम्बसदृशौ जाताविति ततश्च बिम्बफलानां मतिघ्नत्वं धर्मशास्त्रप्रसिद्धमिति किमेतयोरवलोकनादस्य मतिभ्रमो जात इति तयोर्गोपनाय किम्वा कथं चिद्बहिः कठोरतामप्यनुकृतवतोऽप्यन्तः प्रियरूपस्य त्वस्माकं शुष्यद्बिम्बाधरदर्शनेन वैमनस्यमुदेष्यतीति तयोराच्छादनायेति तथा चरणेन भुवं लिखन्त्यः अयमप्यवाङ्मुखत्वे हेतुः । भुवोलिखनं च हे सर्वंसहे ! खलु मृदुला भव देहि किञ्चिदवकाशं येन त्वयि प्रविशाम इत्यभिप्रायेण किम्वा हे प्राणनाथ ! भवता यथारुचि कथ्यतां विधात्रा लिखितमेवेदमस्मल्ललाटपट्टे प्रतिदर्शयाम किम्वा रुषती वागतिवातव्याहताः कदाचित्परिवर्त्तिताः स्याम इति शङ्कया निजचरणानां भूमौ निखननायेति तथा अस्रैः कुचकुङ्कुमानि मृजन्त्यः अयमप्यवाङ्मुखत्वे हेतुः तादृशं च सम्यक् मार्जनाय उपात्तमषिभिरिति स्वेषामन्तःकरणानामपि श्यामरागद्योतनाय विरहतप्तानां हृदयानां भञ्जित्वात्स्फोटो मा ऽभूदिति तादृशश्यामवर्णनीरलेपेन श्यामत्वसूचनायेति तथा उरुदुःखभरनमितकन्धरत्वादवाङ्मुखत्वमिति दिङ्मात्रप्रदर्शितम् ॥ २९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततः किं कृतवत्य इत्यपेक्षायामाह—कृत्वेति । दाक्षिण्यविदां पक्षे तु आनन्दाब्धिनिमग्ना भगवन्माधुर्यसमाधिलीनचित्तास्तूष्णीमेव तस्थुः किं कृत्वा तदाह—स्वमुखशोभया खे पश्यन्तीनां देवाङ्गनानां मुखानि अव अधःकृत्वा न्यूनानि विधाय तथा कृष्णालुब्धमानतया स्वसौभाग्यातिशयेन तन्मुखानि शुचः श्वसनेन शुष्यद्बिम्बाधराणि कृत्वा तथा चरणेन भुवं लिखन्त्यः साङ्कुतां कुर्वन्त्यः भुव उत्कर्षेण तदीयस्वर्गशोभां क्षिपन्त्यस्तासामुपात्तमषिभिरस्रैस्तदीयकुचकुङ्कुमानि मृजन्त्यः ताश्च उरुदुःखभराः कृत्वा तूष्णीं तस्थुः । यद्वा, स्वीयैरेवानन्दास्रैः स्वीयान्येव कुचकुङ्कुमानि उरुदुःखभरा विरहचिन्ताश्च मृजन्त्यस्तूष्णीं तस्थुः शेषं समानम् । उपेक्षाविदां पक्षे तु ताः उपेक्षार्थावदः स्वमुखानि अवःकृत्वा तूष्णीं तस्थुरित्यन्वयः । तत्र मुखस्यावाक्करणं कृष्णस्तु नैवं कटु वदति अयं स एवान्यो वा कश्चिदिति सन्दिह्य नान्यं पश्याम इत्यवधाय, यद्वा, कृष्ण एव परन्तून्मत्तप्रलापतया केनचिद्वेषेणाऽऽक्रान्त इति न तादृशं पश्याम इति यद्वाऽस्माकं स्वत आगमनेन जातगर्व एवं वदति आवाङ्मुखत्वे उदासीना आलक्ष्याऽनुनेष्यति, यद्वा,अस्मत्प्रेमाह्लादवन्मुखचन्द्रमालक्ष्य सकपटस्वनेत्रकमलसङ्कोचेनैवं वदतीति तन्माभूदिति स्वमुखाऽवाक्करणम् । यद्वा, तन्मुखचन्द्रदर्शनाय स्वनेत्रकुमुदविकासे तत्कटुवचनतिग्मांशुभिस्तिग्मांशुतामाकलय्य नेत्रकुमुदसङ्कोचेन मुखाऽवाक्करणम् । यद्वा, स्व चेष्टयैव कटुवचनवारणायावमुखत्वाचरणं यद्वा नास्मान्कदाचिदेवं वदति स एव वयमन्या वा इति प्रेममुग्धभावेन स्वावलोकनायावाङ्मुखत्वम् । यद्वा, किमद्य कार्यमित्यात्मानं प्रष्टुं यद्वा, निष्ठुरवाक्यं श्रुत्वा कथं जीवाम इति द्रष्टुम् । यद्वा, वाणीबाणैर्हृदयं जातं न वेति परीक्षितुम् । यद्वा, शुचः श्वसनेन, शुष्यद्बिम्बाधराणीति शुकमुनीन्द्रेण विशेषणात् शोकदवदाहाग्नितनुतरुहृच्छीडनिःसृतनिःश्वासशुकाः पुनरागमिष्यन्ति नवेत्यवलोकितुम् । यद्वा, शुष्यद्बिम्बाधराणि दृष्ट्वा नः कान्तस्यमाक्षयत्विति तद्गोपनाय । यद्वा,"सद्यो बुद्धिहरा बिम्बा"इति वचनादनुपमावप्यधरौ शोषेण बिम्बसाम्यं गतावस्य मतिघ्नौ जाताविति तद्गोपनाय । यद्वा, अनेन कटुवचसाऽस्मच्छोकसम्पादनेऽप्यस्माभिः शुष्यदधरदर्शनेनास्य वैमनस्यं न कार्यमिति । यद्वा, शुष्यन्तौ बिम्बाधरौ पक्वत्वावज्ञातास्तद्गोपनदर्शनेन तन्माधुर्येण प्रलोभयितुम् । यद्वा, चरणेन भुवं लिखन्त्य इति निर्देशात्सल्लेखनाय । यद्वा, भुवं लिखन्तीनामवाङ्मुखत्वं तत्र प्रवेष्टुं मार्गार्थं भूविनयाय । यद्वा, मत्कपाले विधिनैवमेव किं लिखितमिति भालदर्शनाय । यद्वा, तीक्ष्णवचोतिवातसञ्जातघातपरावृत्तमतयः कदापि विमुखा न भवाम इति भूमौ पादप्रवेशाय तथा, अस्रैरित्यस्यायं भावः, अस्मच्छेत्रे द्रवताङ्गने त्वं वज्रचेता नाधुनापि द्रवसि । यद्वा, घनश्यामरसवृष्टिमिच्छन्तीभिः स्वरजलवृष्ट्येष्योत्पादनं यद्वा स्वनेत्रकञ्जमधुधारात्मकाश्रुमत्तमधुमधुपमाधवमनोलोभनम् । यद्वा, बाह्यमहत्स्वरजलवृष्टेस्त्वया गोवर्द्धनमुद्धृत्य व्रजरक्षा कृता अधुना व्रजगतबहुसहस्रदृक्सिञ्चिताकृशानजलवृष्टौ गृहमेदं त्वया किं कार्यम् । कुचकुङ्कुमानि मृजन्त्य इत्यस्यायमभिप्रायः सहस्रसहस्रवृष्टेर्गिरिरक्षा त्वया कृता

श्रीरामनारायणकृतभावविभाविका ।

अधुना प्रत्येकहस्तद्वयसङ्ख्यातकनकगिरिकुचशोभापहारः क्रियते इति महल्लज्जास्पदं यथा तत्र तद्गिरिकरधारणेन गिरिरक्षा कृता तथात्रापि स्तनगिरिकरधारणेनैव तद्रक्षाऽस्माभ्यो नान्यथा यद्वा, सहस्रस्कन्दमानस्तनगृहाभ्यन्तरकाञ्चनकलशमिव एकहस्त्या पहारं इष्वात्पादनाय । यद्वा, त्वद्दैपरीत्ये किमस्माकं कुङ्कुम-शृङ्गारेण उपास्तमषिभिरित्यस्याप्ययं भावः त्वदर्थे धृताञ्जनं वृथा वहतीति पश्य । यद्वा, मल्लोचनाञ्जनमपि श्यामस्य द्रवी-भूततां दर्शयति श्यामोऽपि सन् भवानेव द्रवतीति महच्चित्रं किञ्च, नेत्रयोः श्यामजलप्रवाहे यदि श्यामतारापि द्रवेत्तर्हि केन त्वां द्रक्ष्याम इति नैष्ठुर्यं त्यक्त्वा शीघ्रं प्रसीद । यद्वा, त्व-दीयवक्त्रातिग्मांशुतिग्मांशुवर्णाभिरश्रुरूपतया द्रवीभूय प्रवहत्य-प्यन्तःकरणे श्यामराग एव व्याप्तो दृश्यते बहिरन्तस्त्वमेवा-नुगतोऽपि निष्ठुरतां भजासि अतः प्रसीद । यद्वा, विरहसन्तप्तहृदये स्फोटभियोपात्तमषिभिरस्तैः सिञ्चन्त्यः तथा उरुदुःखभराः दुःख-भरेण नम्रकन्धरत्वादवाङ्मुख्य इत्येव च रुद्धकण्ठत्वात्तूष्णीं तस्थुः तथोपेक्षादर्शनात्स्वमुखेन किमपि वक्तुमौचित्यं सम्भा-वयन्त्यो भावैरेव स्वदशाः सूचयन्त्यः तूष्णीं तस्थुः । यद्वा, "यः सर्वज्ञः सर्ववित्" इति विशेषतोऽपि तव सर्वविदत्वं श्रुतं नो मुखानि शुचः श्वसनेन शुष्यद्बिम्बाधराणि जातानि त्वन्तु नास्मद्दुःखमधुनापि वेत्सि इति विभ्रमतः अत नो दुःख-मपगमय तथाप्यश्रुतवानमाहुः—"स शृणोत्यकर्णः" इत्यकर्णस्यापि श्रवणः श्रोतृत्वश्रवणात्त्वं सकर्णोऽपि न शृणोषि अवशृणु नः प्रार्थनां किं शृणोमेत्याहुः—शुचः श्वसनेन शुष्यद्बिम्बाध-राणि नो मुखानि तेनैव कामविरहशोकानलवत्प्रश्वासाग्निना दह्यमाना वयं अत्र त्वं कथं रक्षिष्यसि आहुः अथ आलिङ्ग्य विर-हानलज्वालिताकुलितकाञ्चनलतिकालतात्मकास्मदङ्गानां स्वाङ्ग-विशालतमालालिङ्गनेन अत्र यद्वत् तथाश्च अधरामृतं देहि शुष्यद्-बिम्बाधराणि मुखानि तेनैवामृतरसेन अत्र तर्पय तव बन्धु-जीवाधरयोरस्मदधरबन्धुजीवनस्वभावस्वकत्वात् शुष्यन्ति नो मुखादीन्यङ्गानि अत्र कान्तिमन्ति दीप्तिमन्ति च विधेहि अन्य-दाराङ्गीकारमाशङ्क्याहुः—अत्र स्वस्वाम्यमवगम्य अत्र प्रसीद तदैव यथार्थपतित्वेनान्यदीयसम्भावनानौचित्यम् अत एव अत्र स्वपासोः प्रवेशाय नोचेच्चरणेन भुवः खननेन भुवं प्रविशाम इति भावः । एवमत्र स्वाङ्गस्पर्शनाऽस्मदङ्गेषु विभजस्व नोचेद्वध हिंसय त्वद्विरहे जीवनस्य दुस्सहत्वात् हिंसनमेव परमोपकार इत्यर्थः । इत्येवम् केवलम् अत्र प्रवक्तृत्वा तूष्णीं तस्थुः "अत्र रत्नमणि-गतिकान्तिप्रीतितुल्यत्वगमप्रवेशश्रवणाभ्युपगमपाचनक्रियेच्छा दीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु" इति विधानात् अत्र प्रेमिणां आनाय मानसोः समाना भगवत्प्रीत्यभिवृद्धिः भगवता प्रवृ-त्त्युपदेशेऽपि न गृहाद्यभिमुखत्वं किन्तु तदेकपरत्वमेवेति हित-यथोपदेशः ॥ २९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

चिन्ताप्राप्तानामवस्थानमाह—कृत्वेति । सद्यःशुचः प्राप्तशोकाः श्वसनेन शुष्यद्बिम्बाधराणि मुखानि कृत्वा, यद्वा मुखानि अव अवाञ्चि अधोमुखानि कृत्वा मुखानां तथा करणं च कासाञ्चिदहोऽस्माकं नास्त्यद्यापि प्रेमोद्रेको नो चेत्तेन वशी-कृतो भगवानेवं ब्रूयादित्यभिप्रायेण, कासाञ्चिदहो परमप्रेमा-स्पदेन भगवतैवमनङ्गीकृतानामस्माकमूर्ध्वमधो वा कान्यवस्थातुं योग्यता नास्तीत्याशयेन, कासाञ्चिदहो सर्वगुणगणालङ्कृत-विग्रहस्य करुणासागरस्य सर्वज्ञस्य भगवत एवंविधोक्ति-र्मन्दभाग्यताऽस्मल्ललाटदर्शनजन्या अतः स्वललाटमस्मै न प्रदर्श-नीयमित्यभिप्रायेण, कासाञ्चिदहोऽस्मदीयं कञ्चिदपराधं स्मृत्वा भगवानेवंवदतीत्यतो नम्रीभूय क्षमापनीय इत्याशयेन, कासा-ञ्चिदहोऽस्माकमधो भूमौ निकृष्टजन्मादानं निष्फलमेव सम्पन्न-मित्याशयेन अधःकृतानि मुखानि विशिनष्टि शुचः शोका-दुद्भूतेन शोकसम्बन्धिना वा श्वासवायुना शुष्यन्तः शोषं गच्छन्तो बिम्बफलतुल्या अधरा येषु शोकेन ज्वालाव्याप्तश्वासेन शुष्यन्तः शुचः शुचशुचरापाढस्य श्वसनेन वायुना शुष्यद्बिम्ब-सदृशा अधरा येष्विति वा एवम्भूतश्वसनेनाधरादिसमस्त-शरीरं शोषयित्वा मरिष्याम इत्याशयः चरणेन पादाङ्गुष्ठेन भुवं विलिखन्त्यः, काश्चिदहो श्वभ्रादिरूपं तिरोधाय भूमौ गोपाङ्गना-विग्रहो वृथैवास्माभिराश्रित इति पश्चात्तापं सूचयन्त्य इव अहो किं भूमिभारभूता अस्मानेव निश्चित्यानेन प्रकारेण अस्मन्नाशायाऽयमवतीर्ण इति, काश्चिदहो भगवतीं सीतामिव अस्मानपि भूमिं प्रवेशयितुं प्रवृत्तोऽसीति, तथा व्याप्तकज्जलैरश्रुभिः स्तनकुङ्कुमानि क्षालयन्त्यः अहो नास्तीदानीं नेत्रस्थकज्जलस्य स्तनस्थकुङ्कुमस्य च किमपि प्रयोजनमतः क्षालनीयमुभयं तत्क्षालनं चाऽस्मिन् समयेऽन्यजलाभावादश्रुजलैरेव कार्यं कुचेषु चातःपरं मषिलोपो विधेय इति सूचयन्त्य इव मृजन्त्य इति वर्तमानापदेशेन मार्जनाय प्रवृत्ताभिरपि यमानुजाप्रवाह-तुल्याभिरश्रुधाराभिस्तन्मार्जनं न सम्पन्नं वडवानलप्रतापसन्ताप-शोष्यमाणत्वादिति ध्वनितम् उरुभरपदाभ्यां दुःखस्य परा काष्ठोच्यते महद्दुःखातिशयवत्यः दुःखसागरनिमग्नास्सत्यः किञ्चिदपि वक्तुमशक्तत्वात् तूष्णीं तस्थुः स्म मुखस्याधाञ्चि-करणेन भगवदाभिमुख्यस्य शोकेनान्तःकरणस्य बिम्बाधर-शोषेण काभरस्तस्य पदा भूमिलेखनेन शरीरस्य अश्रुभिरिन्द्रि-याणां कुङ्कुमाभावेन कान्तेः उरुदुःखभरेणानन्दस्य तूष्णीं स्थित्या चैतन्यस्य च तिरोभावेऽभिधानात् श्वसनेनेति प्राण-पीडाकथनान्मूर्च्छिताः केवलं स्थाणुरिव स्थिता इत्यर्थः । अनभिज्ञा-पक्षे मुखानामधःकरणं कासाञ्चिदहो वयमत्रागताः सम्मा-नाहा अप्यनेन न सम्मानिताः प्रत्युत प्रतिघातेस्याद्विवाक्यै-रवमानिता इति लज्जासागरनिमग्नहृदयत्वेन, कासाञ्चिदहो पत्या-दिकं विहायैवंविधं कर्म कर्तुं प्रवृत्तानामप्यस्माकं प्रवृत्तिर्निष्फला जाता इतः परं किं करिष्याम इति लज्जाव्याकुलचित्तत्वेन, कासाञ्चिदहो वेणुनादेनाऽनाहूताः वंशीशब्दमाकर्ण्याह्वानभ्रमेणैव समागताः अतोऽस्माकं मौर्ख्यमेव प्रकटितमिति लज्जया, कासाञ्चि-दहो एवंविधां दशां प्राप्ताः इतःपरं व्रजं गत्वा कथं तत्रत्य-सखीजनेभ्यो मुखं प्रदर्शयिष्याम इति लज्जया, कासाञ्चिदहो विनाऽऽह्वानं समागताः इतःपरं दृष्टो भवदीयसौभाग्यसौन्दर्यं इति वदतोऽस्य कृष्णस्य समक्षे मुखं कथं करिष्याम इति लज्जया

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

कासाञ्चिद्दृशो सर्वालङ्कारालङ्कृतमप्यस्मदीयं मुखमस्मै न रोचते एतत्समक्षं स्थापनमयोग्यमिति लज्जया, कासाञ्चिद्दृशोऽस्मन्मुखमवलोक्याऽस्य महानानन्दो भविष्यतीत्याशया समागतानां परं विपरीतं जातमिति लज्जया, कासाञ्चिद्दृशोऽस्मदन्तःकरणे निविष्टप्रेमातिशयमबुध्यैवैतेनैवमुक्तानां ऽनभिज्ञसमीप एव समागमनमनुचितं जातमिति लज्जया, कासाञ्चिद्दृशो नाऽस्त्ययं कान्तानां स्वभावः सर्वथा नतिनतीस्थं वर्तीनां स्वभाव एवंभूतोऽनर्थकरो योऽस्माभिरङ्गीकृतोऽनस्ताभिरुपहास्या भविष्याम इति लज्जाविष्टचित्तत्वेन, कासाञ्चिद्दृशो इयं मां किं धक्ष्यतीयं मां कथं पथि मिलिष्यतीति परस्परप्राप्तलज्जया, कासाञ्चिद्दृशो एतन्मुखनिःसृतैवंविधोक्तवचनलज्जालया वृथाऽस्मन्मुखदाहो मा भवत्वित्याशयेन, कासाञ्चिद्दृशो यद्यप्ययमेव महदुःखायायुक्तस्तथापि प्रज्वलिताऽस्मदन्तःकरणान्मुखनेत्रादिद्वारा निःसृताभिरति प्रचण्डज्वालामालाभिः सन्तापं न प्राप्नुयादित्याशयेन, कासाञ्चिद्दृशो पूर्वं प्रसन्नचेतस्तया वने विहरणपरो वंशीवादनिरतोऽप्यस्मन्मुखदृष्ट्वैवंविधं क्षोभं गतोऽतः तस्मै क्षोभकरं स्वमुखं न प्रदर्शनीयमित्यभिप्रायेण, कासाञ्चिद्दृशो नेत्रद्वारा काचिन्मोहनशक्तिः अस्मदन्तःकरणे प्रविश्याऽस्मान्व्यामोहयत्येतत्समक्षं स्वनेत्रस्थापनं न कार्यमिति भावेन, कासाञ्चिद्दृशो शोकाक्रान्तमस्मन्मुखमवलोक्य कोपाक्रान्तं मे मदीयं मुखमिति भ्रान्त्याऽतोऽप्यधिकमौदासीन्यं मा गच्छत्वित्याशयेन, कासाञ्चित्तथाभूतोक्तिजन्यशोकाद्युद्भूतसमुद्रकल्पाऽश्रुजलप्रवाहभाराक्रान्तशिरस ऊर्ध्वस्थापनाऽशक्त्या, कासाञ्चिदेवंभूतमप्यस्मदीयं मुखमस्य प्रीतिकरं न भवति किमुताश्रुधारासम्पर्कमलिनीकृतमन्तःशोकोद्भूताश्रुप्रवाहोऽधःपातनीय इति प्रष्टुचेतसि प्रीत्युत्पत्त्याशया, कासाञ्चिद्दृशो धिक् स्त्रीचाञ्चल्यं येन प्रीतिलेशेनापि हीनस्य पाषाणवदतिकठिनस्वान्तस्य समीपेऽतिरभसा समागता अतःपरं स्वस्य स्वयमाहूयैवं वक्तुं प्रवृत्तस्य कृतघ्नस्य मुखमपि नावलोकनीयमित्याशयेन, कासाञ्चिद्दृशो विधातरतिकठोरान्तःकरणपरदुःखानभिज्ञ दुःखार्त्तभूता अस्मान्विलोक्यातिदुःखं दातुं प्रवृत्तोऽसि भवतु शपथोऽस्ति तव यदि यावत्सामर्थ्यं दुःखं न प्रदास्यसीति तस्मादितोऽप्यधिकं दुःखं यद्यस्ति तव समीपे तर्हि तदप्यस्मभ्यं प्रयच्छ विलम्बं मा गच्छेदं शिरस्तवाग्रेऽस्माभिः स्थापितमिति विधातरि कोपावेशेन, कासाञ्चिद्दृशो परस्परनेत्रसंयोगवशात्परस्परस्वभावविपर्ययो जातः एतस्य कान्तस्य दाक्षिण्यरूपः स्वभावोऽस्मच्चेतसि प्रविष्टः कान्तानामस्माकमवहित्थालक्षणस्वभावोऽस्य मनस्यतस्तथा मा भवत्वित्याशयेन, कासाञ्चिद्दृशो बहूक्तं त्वया भवत्वन्यदपि यद्वक्तव्यं तद्वदस्वेदं शिरस्तवाग्रे स्थापितमित्यभिप्रायेण, कासाञ्चिद्दृशो स्ववचोक्तिनाराचधारया पुनः पुनः किमर्थमस्मान्वेधने प्रवृत्तोऽसि यदि मारणीया एव वयं तर्हि खड्ग एव तीक्ष्णासिना ग्रीवोपरि निपातनेनास्माकं शिरांसि छिन्धीत्याशयेन, कासाञ्चिद्दृशो कृतमेवंविधव्याहारप्रकारेण तं विनैव नैव सौन्दर्यं-अस्मान्मूलितवर्गद्रुमाणामस्माकं सर्वदैव नम्रीभावोऽस्तीति भावेन, कासाञ्चिद्दृशो विधातस्त्वया किमेवंविधमस्मदीयं मुखं रचितं यदस्य गोपालबालकस्यापि प्रीत्यजनकत्वात्तत्समक्षं स्थापयितुमयोग्यमिति पश्चात्तापेन, कासाञ्चिद्दृशो भालेक्षणेनापि चिन्तितुमशक्यमिति

मुक्तानामनाथानां धिक् स्त्रीत्वमिति विमानस्थदेवाङ्गनादिकृतोपहासभयेन, कासाञ्चिद्दृशोऽयं चौरचक्रवर्ती वंशीरवेण स्वभृत्येनास्मदीयमनोरत्नमञ्जूषाम् अपहृत्य परमसाधुवदेव वदतीत्यतोऽस्माकं विमतरूपमिति भावेन, कासाञ्चिद्दृशो किमस्मास्वयमुपदिशसि न वयमुपदेशार्थं तव समीपमागताः स्वयमेवोपदिशसि चेत्तर्हि विषमरूपकामद्वारवस्थाभूतोपदेशकस्य तव मुखं नावलोकनीयमित्यभिप्रायेण, कासाञ्चिद्दृशो गोवर्धनाश्रितस्य हस्तेन यथार्थमेव किं वयं रक्षिता इति सूचनाय, कासाञ्चिद्दृशो सर्वं त्वत्तोऽधोभूतमेव ज्ञात्वा वयमागता अतः किमर्थमेवं बहुभाषसे इति ज्ञापनाय, तथा शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यत् सूक्ष्मालपेन शोषे सति विगतस्थौल्यैः रूपत्वात्समार्द्रबिम्बफलैः सदृशा अधरा येषु अस्मदधरामृतं प्रियो भोक्ष्यतीत्याशया समागतानां तदाशाभङ्गात्थशोकानलस्तच्छायशो प्रवृत्त इति भावः। पुनश्चरणेन वामपादाङ्गुष्ठेन भुवं लिखन्त्यः, काश्चिद्दृशो नास्ति तवापराधः किन्त्वस्माकमेव यतो यस्मिन्काले "याता ऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति त्वयोक्तम् तदा कुहुकाशारोमणेस्तव वचसि कृतविश्वासाभिरस्माभिः रभिलाषा यापितवानस्यापि (?) अतोऽधुना किं कुर्मोऽस्मन्मौर्ख्यमेवास्माकमनर्थकरं सम्पन्नमिति ध्वनयन्त्य इव, काश्चिद्वनसाक्षी कोऽपि नास्तीति निर्भयता नोचिता किन्तु सर्वाधारभूता भगवती वसुन्धरा साक्षीभूता विद्यते एवमस्या एव विमतरूपमिति सूचयन्त्य इव, काश्चिद्भुवनैकसुन्दर्या जाड्येन गृहीतचेतसां नास्त्यस्माकं तथाविधं पातिव्रत्यं किमर्थमेवं वक्तुं प्रवृत्तोऽसीति बोधनाय जारवतीलक्षणां स्वस्मिन्दर्शयन्त्य इव, काश्चिद्दृशो वृथैव मुखाद्यलङ्क्रियाऽतः परं मृदमुत्पाद्य तया सर्वाण्यङ्गानि लेपनीयानीति शोकोद्भूतमुत्कटं वैराग्यं बोधयन्त्य इव, काश्चिद्दृशो भूमिरपीयमस्मदपेक्षया वरा यस्यामस्मत्प्रेष्ठपादारविन्दसंस्पर्शः सदैवास्तीति ज्ञापयन्त्य इव, काश्चिद्दृशो यादृशं दुःखमनेनास्मभ्यं दत्तं तादृशं दुःखमस्मै प्रदेयं तच्चाऽस्मदङ्गसंस्पर्शाविकस्य भविष्यतीत्युग्रं तपः सम्पाद्य भूमिभावं प्राप्य स्वाङ्गसंस्पर्शेनायं पीडनीय इति ध्वनन्त्य इव, काश्चिद्दृशोऽस्माकमस्मिन्व्रजभूमावेवंविधोऽतिकठोरचित्तः कोऽपि नास्त्यतोऽयमीदृशः कथमत्र जात इति सूचयन्त्य इव, काश्चिद्दृशो किमेवं विधमन्यायं कर्तुं प्रवृत्तोऽसि किं भूमिकर्कशापेक्षयाप्यस्मदीयानि स्तनाद्यङ्गानि कर्कशानि यत्संस्पर्शजन्यदुःखभयादेवं जल्पसीति सूचयन्त्य इव, काश्चिद्दृशोऽस्मद्दुःखाय यत्त्वया चरितमारब्धं तदस्माभिर्लिखित्वा स्थाप्यतेऽस्मिन् जन्मनि जन्मान्तरे वा ऽस्य प्रतीकारं करिष्याम इति ज्ञापयन्त्य इव, काश्चिद्दृशोऽस्याश्चर्यमेवंविधं मिथ्याप्रतिज्ञमियं भूमिस्त्वारयत्येतद्द्वारेण विदीर्णा भविष्यतीति सूचयन्त्य इव, काश्चिद्दृशो मातर्वसुन्धरे ! नास्मत्साहाय्यकं त्वं किंचिदप्यतस्त्वयैवाऽस्य बोधनीयोऽस्य त्वयि प्रीत्यतिशयस्य दर्शनादिति भूमिं प्रार्थयन्त्य इव, काश्चिद्दृशोऽस्य पाषाणवदन्तःकरणमतिकठिनमस्मत्प्रेमोद्रेकातिरेकभूमिं न जानात्येवं काश्चिद्विधं दुःखमवलोक्यापि न द्रवतीति ध्वनयन्त्य इव, काश्चिद्दृशोऽस्मद्धृदयं पाषाणादपि कठोरतरं यत एवंभूतेऽपि कष्टे सत्यपि न विदीर्यत इति सूचयन्त्य इव, काश्चिद्दृशो नास्तीति

प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्त्तितसर्वकामाः ।
नेत्रे विमृज्य रुदितोपहते स्म किञ्चित्संरम्भगद्गदगिरोऽब्रुवताऽनुरक्ताः ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

परं जीवनकृतमती भो मातर्वसुन्धरे ! कृपया विशीर्णा भव त्वयि प्रविशाम इति भूमिं प्रवेशाभिमुख्यं बोधयन्त्य इव, पुनश्चाश्रैरुपात्तमषिभिः कज्जलकैरस्रैः कुचकुङ्कुमानि मृजन्त्यः अहो नेत्रस्य श्यामतैवानर्थकरी यथाऽतिनिष्ठुरान्तःकरणे कृष्णे स्नेहमुत्पाद्यैवंविधां दशां वयं नीताः अतो मध्यन्तरहस्यापि निःसारणीया बत एवं विविधचक्षुष्मत्ताऽपेक्षयाऽन्धतैवास्माकं श्रेयस्करीत्याशयः । अनेन त्वत्प्राप्त्याशानिवृत्त्या काष्ठभूतेऽस्मच्छरीरेषु निःसीमतापककचेन विदारणाय विरहतक्षकृतं श्यामसूत्ररेखाद्वयमित्यपि ध्वनयन्त्य इव, अस्रैरिति बहुवचनेन तत्प्रवाहधारा बोधिता । मृजन्त्य इति वर्त्तमानापदेशेन न मनोरथयमुनाद्वयकज्जलाश्रुधाराद्वयस्य कुङ्कुममार्जनाद्युद्युक्तस्य हृदयोत्थसन्तापाऽनलस्य तच्छोषणोद्युक्तस्य विवादे कस्याऽपि जयो वा पराजयो वा न संवृत्त इति द्योतितम् । उरुदुःखस्य भरो भारो यासां ताः भारासहिष्णुतयैव चेतनापगमात्तूष्णीं पाञ्चालिका इव तस्थुरित्यर्थः ॥ मानिनीपक्षे, मुखानामधःकरणं कासाञ्चित्परपुरुषमुखावलोकनमत्यस्मभ्यं न रोचत इति सूचनाय, कासाञ्चित्त्वन्मुखावलोकनमपि तवाऽतिदुर्लभमन्यत्तु दुर्निरस्तमित्यपि दर्पख्यापनार्थम्, कासाञ्चिदहो न वयं व्यभिचारिण्यः किन्तु कुलाङ्गनाः तल्लक्षणाखस्मासु (?) तपत्वादिति ज्ञापनाय, कासाञ्चिदहो कृष्ण त्वन्त्वतिधूर्त्तोऽसि परदारानेवं प्रार्थयन् लज्जालेशेनापि विनिर्मुक्तोऽसौ वयं तु लज्जासागरे निमग्ना इति स्वस्य लज्जावतीत्वबोधनाय, कासाञ्चिदहो अधोगतिसम्पादकमौपपत्यं धर्मशास्त्राभिज्ञानामस्माकं सर्वथा परिहरणीयमिति स्वस्य परलोकभयाविष्टताख्यापनाय, कासाञ्चिदहो वयं लोकमर्य्यादाभिज्ञा अधोमुखतापादकं कर्म कर्त्तुं नार्हाः किमर्थमेवं बहुजल्पसीति स्वस्यापकीर्तिभयाविष्टताख्यापनाय, कासाञ्चिदन्तःकरणस्थामुत्कण्ठां मुखादिविकासमवलोक्यैव मा गच्छन्त्वित्याशयेन, अहो स्वपतिविरहजनितशोकोद्भूतोष्णोच्छ्वासा यतः श्वासाश्च स इति ब्रवीति जनकश्वसनेनेति यदप्यस्मदधरपानाशा तव महती वर्त्तते तथापि तत् छिद्धिः स्वप्नेपि दुर्घटा अबलेन त्वया बलात्कारेणाबलानामस्माकमधरामृतपाने क्रियमाणे तत्स्थं पीयूषन्तु न लप्स्यसि तस्याशक्यमाणत्वादित्याशयः । चरणेन भुवं लिखन्त्यः काञ्चिदस्मत्पादरजोऽपि तव दुर्लभतरमितरत्तु दूरगतमिति ध्वनयन्त्य इव, काश्चिद्भूमिप्रवेशं करिष्यामस्तव वशीभूतास्तु न भविष्याम इति सूचयन्त्य इव, काश्चिद्बलात्कारेण स्पर्शादिकं करिष्यसि चेत्तर्हि भूमिपतये नन्दाय कंसाय वा गत्वा कथयिष्याम इति द्योतयन्त्य इव, अहो बलात्कारेणाऽप्यस्मान् गृहीष्यतीति भयादिव मृषाश्रुभिरन्वर्थमस्माभिरुपलिप्तानि तव नयाभ्रमश्चेत्तर्हि तानि प्रक्षाल्य तेषु मषिलेपोऽस्माभिः क्रियत इति सूचयन्त्य इव, मार्जनादेः कृतत्वान्मृजन्त्य इत्युक्तम् । उरुदुःखभरा इव तूष्णीं तस्थुः स्म ॥ निवृत्तिपक्षे यथोक्तबाधुकयुक्तिभिः श्रुतीनां महती पीडा जातेत्याशयेनाह—कृत्वेति । चरणेन मूलरूपेण भुवं स्थाणुरूपस्थितं परमात्मानं लिखन्त्यः तत्प्रतिपादने, मुख्यतात्पर्यवत्यः सर्वाः श्रुतयः अवशुचः प्राप्तशाकाः सत्यः अत्यन्तमाङ्गलक्षणानि मुखानि बाधुकस्वार्थलेक्षणान श्वसनेन शुष्यद्बिम्बाधरस्थानीया मोक्षप्रतिपादनभागा येषु तथाभूतानि कृत्वा अस्रैः स्वरुधिराश्रुभूतैर्वाक्यार्थैरूपात्तमषिभिरुत्तरश्रुत्यादिकरदपलखिन्नारूढैः कुचस्थानीयानां सांख्यग्रन्थकठिनभागानां समीचीनार्थलक्षणानि कुङ्कुमानि मृजन्त्यः उरुदुःखभराः तूष्णीं तस्थुः स्म उपरुध्यत ता इत्यर्थः ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथाभूतानां स्थितिं वर्णयति—कृत्वेति । उरुरपारो दुःखभरो यासां ताः चरणेन भुवं लिखन्त्यः तथा उपात्तमषिभिर्गृहीतालञ्जनैरस्रैरश्रुभिः कुचकुङ्कुमानि मृजन्त्यः क्षालयन्त्यः शुचः शोकात् शोकसन्तापात् उष्णीभूतेन श्वसनेन सबलनिश्वासमारुतेन शुष्यन्तो बिम्बफलनिभाः अधरा येषु तानि मुखानि अव अवाञ्चि कृत्वा तूष्णीं तस्थुः निर्वचनाः स्थिताः बभूवुः ॥ २९ ॥

भाषा टीका ।

अपने प्यारे के कठोर वचन सुनि कें भयो जो शोक, ता शोक के मारे उत्पन्न भये उष्णश्वासतें सूखे हैं कदूरी के फल समान अरुण ओष्ठ जिनके, ऐसे मुखन कूं नीचे करकें चरण के अंगूठान सों भूमि लिखती जाय हैं । तथा रुदन तें काजर सहित आँखनसों जो आंसू चले हैं तिनसूं कुचन की केसरि धुइगई है, अत्यन्त दुःखके बोझतें गोपी चुपचाप होय कें ठाडी होत भई हैं ॥ २९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च, प्रेष्ठमिति किञ्चित्संरम्भेण कोपावेशेन गद्गदा गिरो यासां ता अब्रुवत स्म । संरम्भे कारणं प्रेष्ठमित्यादि प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणम् ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

प्रेष्ठं प्रियतममपि प्रियेतरमिव अप्रियजनवत् प्रत्याख्यानं कुर्वन्तम् । ननु, तर्हि तस्मात्मनो निवर्त्यतां तत्राहु—तदर्थं श्रीकृष्णप्राप्तये किं वा तस्मै अनिर्वाच्याय सुखोदयाय अथवा तेन सह क्रीडाविशेषाय विशेषेण निवर्त्तिताः पुनर्यथा सम्बन्धगन्धोऽपि तेषां न स्यात्तथा निरस्ताः सर्वे कामा विषयभोगाः तद्वलि०

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

रिक्ताशेषाभिलाषा वा याभिस्ताः अतस्तं विना कथञ्चिद्-प्यन्यत् किञ्चिन्न रोचत इति भावः । कुतः ? कृष्णं परमानन्दघन-मूर्त्तिं चित्ताकर्षकं श्रीव्रजेन्द्रनन्दनम् अत एवाब्रुवन् इमेत्यत्राप्यति-प्रसिद्ध्याद्यपेक्षयोक्तम् यद्वा, पश्चादर्थे उरुदुःखभरेण सद्यः प्रत्युत्तयनुदयात् पश्चादब्रुवन् । ननु, अतिनिर्बन्धेन कदाचित्तस्या-वज्ञापि शक्येत तत्राह—अनुरक्ताः अनुरागेण तच्छङ्कानिरस-नात् । यद्वा, अवज्ञायामपि सत्यां तत्त्यागाशक्तेः । ननु, उरुदुःखा-क्रान्ताः कथं वक्तुमपि शक्ताः ? तत्राह—रुदितैर्महादुःखेन स्वय-मेव गद्गदैः उपहते व्याप्ते नेत्रे विशेषेण मृष्ट्वा शोध-यित्वा अश्रूण्यपसार्येत्यर्थः पाठान्तरे प्रमृज्येति पाठेऽप्यर्थः स एव, परमप्रयत्नेन त्वरां धैर्यमालम्ब्येत्यर्थः । यद्वा, उरुदुःखेऽप्युक्ति-शक्तावनुराग एव हेतुर्भाति प्रेम्णो विचित्रविलासत्वात् ततश्च नेत्रे विमृज्येति स्नेहजननाय प्रेमोद्रेकस्वभावत एव वा किञ्चि-च्छ्रीमुखावलोकनपूर्वकोक्त्यर्थम् इति परमार्त्या लज्जाशैथिल्यमपि गम्यते किञ्चिदिति संरम्भस्याल्पत्वं स्वतः प्रेष्ठत्वात् निजप्रेम-कोमलशीलत्वाद्वा । यद्वा, अनिर्वचनीया महासंरम्भेण गद्गदगिरः यतोऽनुरक्ताः अन्यस्तैर्व्यञ्जितम् यद्वा, किञ्चित् सङ्कुचितमेव मैव-मित्यादिकमब्रुवन् कुतः संरम्भगद्गदगिरः प्रणयकोपावेशेन बाष्परुद्धकण्ठत्वादित्यर्थः । तत् कुतः अनुरक्ताः सदा स्वभावत एव रक्ताः अधुना च तादृशोक्तिश्रवणादतिदुर्लभतामननाद-धिकोत्कण्ठया विशेषतो जातोत्कटरागा इत्यर्थः । यद्वा, कृतराग-विशेषाः न तूपेक्षयापि निर्विण्णा इत्यर्थः । किञ्चिदनिर्वचनीयम् अनुरागेणोत्कर्षस्य मनोहरत्वात् तादृगुक्तौ हेतुः प्रेष्ठमित्यादि आर्षिं प्रतिपदं भाषमाणां स्थितामिति पूर्वमेव किंवा वर्त्त-माननिर्देशेन तदानीमपि चिन्तां त्यजत मा रुदित स्वस्था भवत गृहान् यातेत्यादिकमनिष्टं प्रतिक्षणं वदन्तम् इवेति तत्त्वतस्ता-त्पर्यविचारेण नर्म्माद्वौ पर्यवसानात् तच्च पूर्वं लिखित-मेव ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

प्रेष्ठं प्रियतममपि प्रियेतरमिव प्रियमात्रादितरमिव प्रत्याख्यानं कुर्वन्तम्; ननु, तर्हि तस्मात् मनः कथं न न्यवर्त्तयन्? तत्राह, तदर्थे श्रीकृष्णप्राप्तये विशेषेण निर्वर्त्तिताः पुनर्यथा सम्बन्धगन्धोऽपि तेषां न स्यात्तथा निरस्तास्तद्व्यतिरिक्ताशेषाभिलाषा याभिस्ताः अतस्ताम्निवर्त्तयितुं नाशक्नुवन्निति भावः । कुतः कृष्णं परमा-नन्दघनतया सर्वचित्ताकर्षकतया च तन्नाम्ना प्रसिद्धं श्रीव्रजेन्द्र-नन्दनम्; ननु, उरुदुःखाक्रान्ताः कथं वक्तुमपि शक्तास्तत्राह-संरम्भेति । अमर्षेण विषादकार्यैणैव विषादावरणादिति भावः । तत्र नेत्रमार्जनं भावद्वयसन्धिजं तच्च प्रणयकोपस्वभावतः किञ्चित् श्रीमुखावलोकनपूर्वकवचनार्थम् इति परमार्त्या लज्जाशैथिल्यमपि गम्यते किञ्चिदिति विषादांशस्यान्तर्भूतत्वात् तद्व्यकार्यं गद्गदत्वम् अनुरक्ता इति विषण्णतायां सर्वत्रैव हेतुः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च प्रेष्ठमिति ततः शनैरुदितेन रोदनेन उपहते शोकाश्रु-पूर्णतया लुप्तदर्शने नेत्रे विमृज्य प्रमृज्य किञ्चित्संरम्भेण कोपावे-शेन गद्गदा गिरो यासां तथाभूताः अनुरक्तास्तस्मिन्नेवानुराग-युक्ता अत एव तदर्थं कृष्णार्थमेव त्यक्ताः सर्वे मनोरथा याभिस्ता-स्तथाभूताः गोप्यः कृष्णमूचुः, कथम्भूतं ? प्रेष्ठं तथापि प्रियेतरं वैरिणमिव भाषमाणम् इव विशेषणद्वये संरम्भकारणम् ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदर्थं कृष्णकृते विनिवर्त्तितः सर्वकामो यासां तास्तथा रुदितेन रोदनेन उपहते क्लिष्टे संरम्भेण प्रणयकोपेन गद्गद-पदं स्खलदक्षरपदं यासां तास्तथा ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ भगवद्वचसोऽर्थद्वयवत्तायां तत्तत्स्मरणसंस्कारतः इदं वा इदं वेति परामर्शो नोत्तरस्यापि घटमानत्वमाशङ्क्य किञ्चि-च्छिथिलदुःखभरतया वक्तुं शक्तिर्जातेति तासां विवक्षां प्रकट-यति—प्रेष्ठमित्यादि । प्रेष्ठः प्रेयानयं कदाचिदपि नैवमप्रियं वक्ष्यति तदा कथमवादीति विमृश्य प्रियेतरमिवेति इवशब्दः कृष्णम् अब्रुवतेत्यन्वयः । कीदृश्यः ? तदर्थं विनिवर्त्तिताविशेषेण निवृत्तिं प्रापिताः सर्वे कामा याभिः किं कृत्वा नेत्रे विमृज्य तन्मुख-दर्शनार्थम् अर्थान्तरमत्रासीदिति निर्णीय संरम्भो जातः तेन गद्गदा अस्फुटा गिरो यासां नेत्रे कीदृशे ? रुदितेन उपहते उच्छूना रक्ते अनुरक्ता इति स्वरूपकथनं स्वेति वैचित्र्य बहुवचनमत्र क्रमशः सर्वा एवोचुः नैकदेति मन्तव्यम् ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमपि स्थितौ तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद्वि-ज्ञापयामासुरित्याह—प्रेष्ठमिति । भाषणं पूर्वोक्तमेव अथवा तस्या-मप्यवस्थायां किमिति रोदनं क्रियते स्वस्था भवत गृहे गच्छते-त्येवं वदति परं हसन्मुखः तदा तासां हृदये वाक्यामृतानि प्रविष्टानि सजातीयानि वाक्यान्युत्पादितवन्ति तदा भगव-दुद्बोधिता एव ताः भगवद्वाक्यानि पूर्वपक्षयितुम् आरेभिरे इत्याहुः, प्रेष्ठमिति । प्रेष्ठो भवत्येव स्वसामग्र्या तथा सम्पादितत्वात् परं वदत्यन्यथा तथाप्यप्रियमिव प्रतिभाषमाणमिति नोक्तं न हि कदाचिदपि भगवानप्रियवक्तृत्वात् किन्तु प्रियो भवतीतरोऽपि भवति सर्वभवनसामर्थ्यात् इतरत्वेन प्रियत्वं बाध्यते यथा जगज्जगदतिरिक्तरूपश्च तदाह, प्रियेतरमिव प्रतिभाषमाणमिति यः प्रियांशः तं न तिरोधारयति किन्तु वाक्यं न तेन रूपेण वदति किन्तु रूपान्तरेण तदा तेन सह वादः कर्तुं शक्य इति न हि फलं कश्चित्साधनं भवति मां शृणुतेति वा वदति परं बलादपि प्रतिबन्धनिराकरणं कृत्वा स प्राप्य एव तदाह, कृष्णं सदानन्दमिति । ननु, कोऽयं निर्बन्धः स एव कार्य इति

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

महांश्चेन्न मन्यते तदा अल्पतरा अपि काम्या इति तत्राह–तदर्थविनिवर्तितसर्वकामा इति । तदर्थं भगवदर्थं विशेषेण निवर्तिताः सर्वे कामा याभिः अयमेव काम्य इति निश्चित्य पूर्वमेव सर्वे कामास्त्यक्ताः "काममयश्चायं पुरुषः" यदि त्यक्तोऽपि गृह्येत तदा भगवदुक्तमेव गृहं कथं न गृह्येत तस्मादयमेव कामः अवशिष्यते स चेन्न भवेत्स्वरूपहानिरेवेति निश्चित्य फले मानमकृत्वा दृढीभूय रुदितोपहते नेत्रे विमृज्य यथास्थानं सर्वं प्रापयित्वा किञ्चित्संरम्भेण वादार्थमुद्यमः संरम्भः । भगवान् हि वाक्येन निराकरोति न तु स्वरूपतः वाक्यं तु निराकार्यमिति तदर्थं संरम्भः कार्योऽयमन्तं गत्वा परावर्तते परं संरम्भेण गद्गदा गिरो वर्णानाम् न स्फुटनिर्गमनम् ईश्वरवाक्यनिराकरणे यतो वाणी बिभेति यद्यपि ईश्वरभीत्या निर्गमासम्भवे कुतो गद्गदत्वं गिरस्तथापि यथा भगवतो भीतिस्तथाचेत्प्रियाभ्योऽपि भीतिरस्तीति ज्ञायते तेन प्रभुभीतिकृतमस्फुटत्वं तत्प्रियाभीतिकृतो निर्गम इति नोक्तानुपपत्तिरिति भावः । एतासां तु न भयं यतः अनुरक्ताः रागो हि भयप्रतिपक्षः यत्र रागः स्वल्पोऽपि न तत्र भयम् अतः अब्रुवत वक्तव्यम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च किमरण्यरोदनं कुरुध्वे प्रसन्नमुख्यः सत्यः स्वस्वगृहं किं तूर्णं न गच्छतेत्युच्चैरुच्चारितेन भगवद्वाक्येन कर्णाध्वनान्तः प्रविष्टवता मूर्च्छितास्ताः प्रबोधिताः किञ्चिद्विलापयामासुरित्याह–प्रेष्ठं पूर्वं बहुशः कृताङ्कसङ्गत्वात् प्रियतमम् अथ च कारणं विनैव प्रियेतरमिव प्रतिकूलं स्वस्वपतिं भजध्वमित्यतिकठोरं भाषमाणम् एतच्च नैव सम्भवेत् यतः तदर्थं विशेषेण पुनर्यथा सम्बन्धगन्धोऽपि तेषां न स्यात्तथा निवर्तिताः सर्वे कामा याभिस्ताः अत्रान्यशब्दस्याप्रयोगात् सर्वशब्दप्रयोगाच्च भगवत्सुखार्थकः कामः कामशब्देन नोच्यते इति श्रीशुकाभिप्रायः रुदितेन उपहते अन्धीभूते नेत्रे विमृज्येति अथमन्तकालोऽस्माकमागतस्तत् सकृदप्येतस्य मुखकमलं दृष्ट्वा म्रियामहे इत्याकाङ्क्षयेति भावः हन्त हन्त प्रेयसापि भूत्वा विनैवापराधं कथमेतावान् प्राणान्तो दण्डः क्रियते ? इति संरम्भस्तथा वयमेतदनुरूपरूपगुणाद्यभावादङ्गसङ्गायोग्या एव भवामः अतस्त्यज्यामहे इति मननात्संरम्भाभावश्चेत्यतः किञ्चित्संरम्भेण गद्गदा गिरो यासां ताः ननु भयथापि प्रेमशून्यास्तस्मान्निवृत्तिरेवोचितेत्यत आहुः–अनुरक्ता इति । अनुरागान्धा हि विचारं न सहन्त इति भावः ॥ ३० ॥

विशुद्धरसदीपिका ।

किञ्च, प्रेष्ठमिति । प्रकर्षेणेष्टं प्रियतमं प्रियेतरमिव प्रतिभाषमाणमिति परमानौचित्यं तथापि कृष्णं मुरलीवादनादिना चित्ताकर्षकम् आत्मना च तदर्थविनिवर्तितसर्वकामाः तत्कृते विनिवर्तिताः निरस्तास्तद्व्यतिरिक्ताः सर्वेऽभिलाषा याभिस्ताः एवं च तत्सुखमेव सूचितं तत एव च विप्रलम्भप्रायेण नेत्रे विमृज्य प्रागनात्मना रुदितोपहते अपीति स्वभावस्वरत्वम् एवं च नेत्रमार्जनमपि भाव-

हृयसन्धिजं प्रणयकोपस्वभावतः किञ्चिच्छ्रीमुखावलोकपूर्वकण्ठव्यवहाराय तेन च तस्य लज्जोत्पादनाय तत्कृतः किञ्चित्संरम्भगद्गदगिर इति विषादकार्येण सरम्भेण विषादावरणादिति भावः तथा संरम्भेणैव विषादांशस्यान्तर्भूतत्वात्तदर्थकार्ये गद्गदत्वमपि सर्वत्र हेतुः अनुरक्ताः इति स्मेति विस्मये नस्मौत्त्याप्यहो तादृशदुःखमभूदित्यद्भुतः प्रेममहिमेति एवं च वैवर्ण्यस्तम्भादयोऽन्येऽपि जाता इत्याद्यूह्यम् ॥ ३० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

प्रागल्भ्यविहारतया सम्भावितोपेक्षायां कृष्णकृपार्द्रस्वभावज्ञतया स्वभावितानुग्रहायां रसविभावाद्यभिज्ञकुशलमतीनामुभयार्थविदां चरितमाह–प्रेष्ठमिति । कृष्णं स्वरूपतः सत्यानन्दरूपं कृपार्द्रस्वभावतश्च कृष्णं भक्तानां दुःखकर्षणं तथा प्रेष्ठं नित्यस्वप्रीतिविषयतया प्रियतमं प्रियतरवत्प्रियेतरवचनरचनाचातुर्यं स्वयञ्च तदर्थमेव विशेषेण निवर्तिताः सर्वे ऐहिकामुष्मिकाः कामा भविष्यद्विषयाभिलाषरूपाः काम्यन्ते इति कामाः भासाः भोगाश्च याभिस्तथाभूताः प्रत्याख्यानायोग्याः प्रेष्ठमेव दाक्षिण्यार्थकवाक्यमात्मनः प्रतिभाषमाणमपि उपेक्षार्थस्यापि सूचनेन प्रियेतरमिव अप्रियवाक्यमिव भाषमाणमुपलक्ष्योपेक्षार्थभानेन प्रथमं रुदितोपहते नेत्रे दाक्षिण्यार्थकभानेन लब्धधैर्या विमृज्य किञ्चित्सरम्भगद्गदगिर इत्यत्र संरम्भस्य किञ्चिन्निर्देशेन रागाभिव्यक्तापि गम्यते तथा च प्रथमं रागादागमनेऽनुरक्ताः पुनरुपेक्षार्थभानेन रागार्द्रे हृदि जातो यो रजोरूपसंरम्भस्तदुभयकालिके निर्माणतया बहिर्यथावत्किःसरणाशक्ता अत एव गद्गदा गिरो यासां ताः पुनर्दाक्षिण्यार्थज्ञाने जाते तदनुरक्ताः पुनः संवृद्धरागाः तं कृष्णमब्रुवत ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततो विनिवृत्तमूर्च्छास्तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद्विलापयामासुरित्याह–प्रेष्ठमिति । गोप्यो रुदितोपहते नेत्रे विमृज्याऽहो बहुवितथ्यं तद्विपर्यस्येन सम्प्रति भगवद्दर्शनं तु सम्यक्कर्तव्यमित्याशयाः कृष्णमब्रुवत स्म भगवतः सदानन्दरूपत्वात्सदाभिमुख्यमेव सदानन्दाविर्भावकरमतः सर्वानर्थकरं तद्वैमुख्यं कथमपि नोचितमिति भावः । प्रेष्ठं परप्रेमास्पदत्वादात्मानं प्रियेतरमिवानात्मवत्प्रतिभाषमाणं प्रत्याचक्षाणम् अहो सर्वात्मा सन् किमर्थमेवं वदतीति किञ्चित्संरम्भेण प्रणयकोपेन गद्गदा अस्फुटस्खलिताक्षरा गिरो यासां ताः । ननु, भगवति ईषत्संरम्भोऽप्यनुचितस्तासां मुखात् भगवद्वाक्यप्रत्युक्तिरूपा वाणी च कथं निःसृता ? इति चेत्तत्राह–अनुरक्ता इति । स्वल्पस्यापि रागस्य भयनिवर्तकत्वात्परमानुरागवतीनां तासां का भयसम्भावनेति भावः । यतस्तदर्थविनिवर्तितसर्वकामाः तदर्थं भगवदर्थं विशेषेण तद्वासनासाहित्येन निवर्तिताः सर्वे कामाः याभिस्ताः तथा च भगवदतिरिक्तसर्वकामस्य तदिच्छायाश्च त्यक्तत्वाद्भगवद्विषयककामस्य च मोक्षकामवदकामरूपत्वात्सम्भाषणेच्छायां तदनुरक्तचेतसां तासां नास्ति किञ्चिदपि भयमिति भावः । अनभिज्ञपक्षे तथाभूता दृष्टा प्राप्ता अपि ता

गोप्य ऊचुः ॥

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलम् ॥
भक्ता भजस्व दुरवग्रह ! मा त्यजाऽस्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ॥ ३१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अहो किमेत्येवमत्यर्थरोदनं कर्तुमुद्यताः स्वस्थाः प्रसन्नमुख्यः सख्यः स्वस्वगृहं तूर्णं किं न गच्छत इत्येवं प्रहसन् यदोक्तैरुवाच तदा तानि वाक्यानि तासां कर्णाध्वनाऽन्तःप्रविष्टानि ततश्च तैरेवोद्बोधितास्तत्सजातीयवाक्यैर्भगवद्वाक्यानां प्रत्युत्तरं वक्तुमारेभिर इत्याशयेनाह—प्रेष्ठमिति। बहुकालमारभ्य परमप्रेमास्पदत्वेन निश्चिन्तामिदानीम् प्रियेतरमिव यथा प्रियेतरः अप्रियं वदति यथा प्रतिघातेत्यादि वज्रादप्यतिकठोरं प्रत्याख्यानं रूपतो कर्णाभीषयां प्रियेतरमिवाऽप्रियवाक्यसदृशं वाक्यमिति वा तत्रापि कृष्णं सम्प्रत्यपि वेणुनादेन चित्तरत्नमञ्जूषाम् आकृष्य सौचित्येन स्थितम् अत एव तदर्थं विनिवर्त्तितास्सर्वे कामाः रुदितोपहते अन्धीभूते नेत्रे विमृज्य अहो मत्प्राप्तसमयोऽयमस्माकमागतस्तस्मात्सकृदपि प्रेष्ठस्य मुखपद्ममवलोक्य मरिष्याम इत्याकाङ्क्षयेति अहो प्रेष्ठत्वेनाभितोयं विनाऽपराधं कथमेवंविधप्राणान्त्यदण्डं दातुमुद्युक्त इति संरम्भः स्वामिनस्तदङ्गसङ्गायोग्यतां विचार्य्य तच्छैथिल्यमित्युक्तं किञ्चित्संरम्भेणेत्युक्तं ननु, सर्वथापि प्रेमशून्येन तेनाऽस्वं भाषणादिनेति चेत्तत्राह—अनुरक्ता इति। अनुरागान्धाः विचाररहितत्वात् प्रत्याख्याता अपि पुनस्तत्रैवानुषज्यन्त इति भावः। मानिनीपक्षे विस्मिताः परमप्रियं प्रियेतरमिव प्रतीयमानं वाक्यं प्रतिभाषमाणं कृष्णमब्रुवत स्म अहो कथमस्मान् परदारानित्थं वदसीति कोपेनान्तःकरणस्योत्कण्ठोत्कण्ठया शिथिलीकृतत्वात्। संरम्भेण गद्गदभूता गिरो यासां ताः यथोक्तं प्रार्थनारूपं वाक्यमाकर्ण्य ततोऽप्यधिकमनुरक्ताः। निवृत्तिपक्षे प्रेष्ठं "सर्वे वेदा यत्पदमामनन्ति" इति "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिभ्यां वेद्यत्वेनात्यर्थमभिमतं तत्तद्वादिरूपेण श्रुतीनां प्रत्यक्षेण प्रामाण्यं नास्तीत्येवमादिरूपं प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणं कृष्णं फलरूपं सदानन्दात्मकं परमात्मानं तदर्थं परमात्मप्राप्त्यर्थं विशेषेण निवर्त्तिता अधिकारिणां सर्वे कामा याभिस्ताः तथा च श्रुतिः—

> "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
> तदा मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" ॥

इत्यादौ रुदितेन स्वार्थानभिज्ञाद्युदितनर्क्ककृतेन रुदितेनोपहते नेत्रे यथाभूतार्थप्रकाशनसमर्थे शक्तिलक्षणालक्षणे विमृज्य किञ्चित्संरम्भेणाहो आस्तिक्यरूपेण स्थितोऽपि भगवानित्थं वदतीति ईषत्कोपेन गद्गदास्खलन्त्या गिरो यासां ताः। किञ्च, तस्मिन्नेवानुरक्ताः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तदनन्तरं स्वमनोरथं श्रीकृष्णं प्रत्यूचुरित्याह—प्रेष्ठमिति किञ्चित् संरम्भेण गद्गदाः स्खलितमक्षराः गिरो यासां ताः रुदितेन रोदनेन उपहते अन्धीभूते नेत्रे विमृज्य अब्रुवत स्म संरम्भे हेतुमाह—प्रियेतरमिवानिष्टमिव प्रतिभाषमाणं प्रत्याचक्षाणमिति तदर्थं कृष्णार्थं विनिवर्तिताः सर्वे कामाः याभिस्ताः इति च ॥ ३० ॥

भाषा टीका।

है तो अपनों अत्यन्त प्यारो परन्तु आज न जाने काहेतें कुप्यारे की नाईं वचन बोले हैं, ऐसो जो श्रीकृष्णचन्द्र ताके तांई निवृत्त कर दिये सम्पूर्ण काम जिनने ऐसी परम अनुराग में भरी भई जो गोपी हैं, वे सगरी, रुदन करत २ फूलि आये जो नेत्र तिनतें आंसून को पोंछिके, थोरो सो होय आयो जो संरम्भ तातें गद्गदवाणी होय के बोलत भई ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

नृशंसं क्रूरं हे दुरवग्रह ! स्वच्छन्द ! तव पादमूलं भक्ताः सेवितवतीरस्मान् भजस्व मा त्यजेति ॥ ३१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

"तासामेव प्रसादेन यासां श्रीनागरेश्वरे। उक्ते विज्ञायतेऽर्थस्ता वन्दे श्रीनागरीश्वरीः" श्रीभगवता यज्ञपत्नीषूक्ताद्यपद्यपादस्यास्य सम्यगुक्तत्वादिव भगवत्यः श्रीव्रजदेव्योऽपि तथैव यज्ञपत्न्युक्तपद्याद्यपादमाहुः वस्तुतस्तु तस्य वचनोक्तेस्तासां चात्युक्तेः साम्येन सम्वादापत्तेर्मैवमिति मेति निषेधस्यादौ प्रयोगः परमार्तिवैयग्र्येण एवम् ईदृशं कथञ्चिदेतद्वचनसदृशमपि किमु वक्तव्यम् एतदित्यर्थः। कुतः ? नृशंसं वज्रसारवत्काठिन्येन हृदयविदारकमित्यर्थः। यद्वा, साक्षान्मारकं "नृशंसो घातुको हिंस्रः" इत्यमरः। गदितुं व्यक्तं वक्तुं किं वा गदितुमपि किमुत व्यवहर्तुमर्हति तत्र च भवान् प्रेमार्द्रस्वभावः अतोऽन्यो वक्तु नामेत्यर्थः। भवानिति प्रागनुनयार्थस्तुत्या गौरवात् श्लेषेण भाति नक्षत्राणि तदीशतया तद्वान् चन्द्रः कामाभिवर्द्धनत्वाच्चन्द्रो वः स नार्हत्येव तत्रापि हे विभो ! अस्मत्प्राणप्रभो ! अतोऽस्मान् प्रति नार्हत्येवेति भावः। एवं "स्वागतं वो महाभागाः" इत्यादिकं भवता सादरं सन्यायं मृदुकमपि प्रेमरसविघातकत्वात् निवर्त्तनार्थमेवोक्तत्वात्स्वार्थतो विपरीतमेवेति भावः। अनेन स्वागतमित्याद्यपादस्योत्तरमूह्यम्। ननु, भोः प्रियवादिन्यः ! तर्हि किं कर्तुमर्हामि इत्यपेक्षायामाहुः—अस्मान् भजस्व मनोरथपूरणेनाऽनुवर्तस्व

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

यद्वा, सेवस्व नित्यं प्रेम्णोपभुङ्क्ष्वेत्यर्थः । कुतः ? तव पादयोर्मूलं तलं रजः पादुका वेत्यर्थः । अब्जादिरूपकानुक्तिर्नृशंसोक्त्या काठिन्याद्यभिप्रायेण । यद्वा, पाद एव मूलं सर्वार्थस्य कारणं आश्रयो वा तद्भक्ताः "आदिकर्मणि क्तः कर्त्तरि च"(३।४।७१) तद्भजनं कर्तुमारब्धाः अद्यापि समग्रभजनासम्पत्तेः एषा दैन्य विनयोक्तिर्दासीत्वेच्छया।यद्वा,सेवितवतीः आश्रिता इत्यर्थः।अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्यादिवचनानां वैयर्थ्यापत्तिः अनेन प्रियं किमिति पादस्योत्तरं । ननु, श्रीगोप गृहिण्यः सदा विषयासङ्गेन गृहाभिरतत्वात् दुर्लभसङ्गा यूयं किमिति मया भजनीयाः तत्राहुः—सन्त्यज्येति । सर्वान् विषयान् इन्द्रियार्थान् । पत्यादिद्वारा साध्यान् । सम्यक् समूलतया अपुनरङ्गीकारदार्ढ्येन च त्यक्त्वा सर्वार्थमूलत्वत्पादाब्जप्राप्त्यैव सर्वार्थसिद्धेः त्वद्भजनप्रातिकूल्याद्वा विषयत्यागेन पत्यादित्यागोपि ज्ञापित एव पत्यादीनां तन्मूलकत्वात् । यद्वा, ननु तत्त्वज्ञपूज्यपादाः ! कथं विषय सुखमिच्छथ ? तत्राहुः—सन्त्यज्येति । अतो वयं परमार्थसुखमेवेच्छाम इति भावः । त्वया सह क्रीडाविशेषस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वस्वात्मकत्वात् इति "ये यथा मां प्रपद्यन्ते" इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वदन्याशेषत्यागेनास्मान् भक्तुमर्हसीति गूढो ऽभिप्रायः अनेन व्रजस्थानामयमित्यस्योत्तरं सर्वविषयत्यागेन तत्त्वाद्युपेक्षापरमातन्मङ्गलकथनेनालमिति तात्पर्यात् । ननु, चपलाः ! अधर्माद् बिभेमि तत्र सेर्ष्यमाहुः दुरवग्रह हे स्वैराशिरोमणे ! दुराग्रहेति वा अस्मान् अनन्यगतीर्मा त्यज । यद्वा, दुरवग्रहं दुराग्रहम् मा सम्यक् त्यज, ननु, वाचालाः ! यूयं कामिन्यो मद्योग्या न भवथेति चेत् ? सत्यं तथापि सर्वत्यागेन भजतां जनानां सर्वेषामपि स्वीकारो महापुरुषधर्मं इति दृष्टान्तेनाहुः—देव इति । देवत्वेनावश्यं कामकेष्टपूरणं कार्यमित्यभिप्रेतं तत्रापि आदिपुरुषः पुरुषोत्तमः तेन भक्तमनोरथपूरणस्यावश्यकत्वात् तत्रापि मुमुक्षूनपि किमुत तदेकेप्सून् किम्वा अमुमुक्षून् भक्त्यैकानिष्ठानित्यर्थः । यथासौ भजनमात्रापेक्षया सर्वानेव भजते स्वीकरोति तथा त्वमस्मान् भजस्वेति, यद्वा ननु साध्व्यः तत् कर्म ममानुचितामिति चेत्तत्राहुः—देवः भक्तोऽप्यपेक्षकोपि आदिपुरुषोपि मुमुक्षूनपि भजते मुक्तिदानेनापि तन्मनोरथं पूरयति अतो भक्तेच्छानुसारव्यवहारेण न दोषो घटत इति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, श्रीगोपेन्द्रनन्दनत्वेनैव कृष्णे कृष्णनिष्ठानां व्रजसुन्दरीणां आन्तरीणमहाभाववैचित्रीसहचरीपरमैश्वर्येषु तद्भक्तविशेषेषु सर्वाभिज्ञतादिरूपस्य तासां माहात्म्यस्य प्रख्यापनाय स्वमनोऽनुकूलार्थं ताभिः प्रयुक्तयैव भारत्या कृष्णैश्वर्यं सप्रयोजनानुपयुक्तमपि वर्णयति—अन्यथा व्रजसुन्दर्यो भगवत्स्वरूपानभिज्ञा इति ते मन्येरन् तदैश्वर्यं वर्णनं परमार्तिसमय एव न त्वानन्दसमये तदैश्वर्यज्ञानं क्वापि तासामसुखानुभव एव पर्यवसानात् तत्रापि निजभावमाधुर्यव्यञ्जनार्थत्वं तावदेव यदैश्वर्यवर्णनेपि सख्य उदेष्यति निखिलो ... व्यभिचारः तथाहि विभो, हे वहिरन्त दर्शक । इति भवानस्माकं सर्वं भाव जानात्येव अतस्तव पादमूलं भक्ता आश्रिता अस्मान् भजस्व अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्यादिवचनानां वैयर्थ्यापत्तिः ननु, तत्त्वज्ञपूज्यपादाः ! कथं विषयसुखमिच्छथ ? तत्राहुः, सन्त्यज्येति । अतो वयं परमार्थसुखमेवेच्छाम इति भावः । त्वया सह क्रीडाविशेषस्य तस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वस्वात्मकत्वात् इति "ये यथा मां प्रपद्यन्ते" इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वदन्याशेषत्यागेनास्मान् भक्तुमर्हसीति गूढोऽभिप्रायः हे दुरवग्रह ! दुराग्रह अस्मान् प्रपन्नाः मा त्यज दुरवग्रहत्वेन प्रपन्नपरित्यागादधर्मस्यैवोत्पत्तेः विशेषतश्च सुव्रतत्वादिप्रतिज्ञाहान्यापत्तेः परमेश्वरत्वात्तवाऽधर्मो न स्पृशेत् एव प्रतिज्ञाहानिस्तु परमानुचितैवेति भावः । यद्वा, हे भक्ताः भज भजतीति भजः न भजः अभजः हे भक्तानामप्यभज ! हे स्वेच्छयापि दुरवग्रह ! इति सप्रणयरोषमाहुः—सर्वान् विषयान् भोगान् यद्वा, साम्राज्यप्रभृतिवैकुण्ठावधिपदानि सन्त्यज्यापि तव पादमूलम् अमुमुक्षून् मोक्तुमनिच्छून् अशक्नुवतो जनान् त्वत्पादमूलस्य सर्वतो माधुर्यविशेषात् भज स्वीकुरु यतो देवः जगत्पूज्यस्त्वम् अन्यथा देवत्वासिद्धेः तत्रापि यथावत् सम्पूर्णतया आदिपुरुषो भगवान् अन्यथा निजभगवत्ताप्रकटनासंपत्तिः सामान्येतोक्तिः युक्तिप्रदर्शनेन निजस्वीकारदार्ढ्यार्थम् अतः ते त्वदीया अस्मान् मा त्यज अन्यत्समानम्—

> आर्त्युक्तेरपि गोपीनां श्लेषार्थैर्भारती सखी ।
> रक्षन्ती गौरवं तासां कृष्णभक्तेषु गायति ॥

तथाहि ईदृशं किञ्चिदप्रियं करवाणि मया सह किञ्चिदूनेत्यादिकं नृशंसं वक्तुं नार्हसि तत्र हेतुः सन्त्यज्येति विषयपरित्यागेन प्रपन्नानां नः पुनस्तद्भोगे प्रवर्त्तनस्य दोषत्वादित्यर्थः मदैवास्माकं स्वागतादिकम् यद्वा, याः सर्वविषयान् सन्त्यज्य तव पादमूलं भक्ताः ता एव दुरवग्रहं स्वच्छन्दं यथा भवति तथा भजस्व अस्मान् मा त्यज सम्यक् त्यज प्रभवस्तु भक्तजनानेव भजन्ते न त्वभक्तानित्यत्र दृष्टान्तमाहुः—देव इति ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

श्रीगोप्य ऊचुरिति अत्रेदं विवेचनीयं यद्यपि समानभावापन्नत्वेन युगपत् समानवचनस्फूर्त्तिरपि सम्भवति तथाप्येकदोक्तावतिकोलाहलतया नातिरसाधायकत्वात् कासाञ्चित् मुख्यानामेव वचनं ज्ञेयम् तच्च युगपद्वा तत्तन्महावाक्योपसंहारे तत्र: प्रसीद वरदेति, शिरःस्वङ्घ्रिम् इति, तत्रः प्रसीद वृजिनेति, तन्नो निधेहीति, स्वस्वाभिवाञ्छित वचनचतुष्टयान्ते क्रमशो वा पूर्वं पूर्वासां वाक्यस्थापनपूर्वकमेवोपन्यस्तमस्ति चतुष्टयत्वं च यूथशो दिक्चतुष्टयाश्रितत्वात् तासां तथापि सर्वासां तत्सम्मुखत्वं च कृष्णस्य सिद्धक् पुरराजिमण्डलैरप्याननां इति यत् "यासामेव प्रसादेन याज्ञां श्रीनागरेश्वरे । जरपतत्वं ज्ञायते ता वन्दे श्रीनागरेश्वरीः" श्रीगोपीगणप्राणवल्लभाय भगवते नमः । अथ पत्यादिपरित्यागेन त्वद्भजने ऽस्माकं धर्मोऽधर्मो वेति पश्चाद्विचारयिष्यते अद्य तावदस्मत्परित्यागे धर्मदोषो दुष्परिहर इत्याहुः—मैवमिति । मेति निषेधस्यादौ प्रयोगः परमार्तिवशेनेण एवम् ईदृशं कथञ्चिदेतद्वचनम्...मपि किमु वक्तव्यम् एतदित्यर्थः कुतः नृशंसं वज्रवत् काठिन्येन हृदयविदारकमित्यर्थः । यद्वा, साक्षात्मारकं "नृशंसो

श्रीमज्जीवगोस्वामीकृतवैष्णवतोषिणी ।

घातुकः क्रूरः" इत्यमरः । गदितुं व्यक्तं वक्तुं किंवा गदितुमपि किमुत व्यवहर्तुमर्हति तत्र च भवान् प्रेमार्द्रस्वभावतया प्रसिद्ध इत्यर्थः । तत्रापि विभो, हे अस्मत्प्राणनाथ ! अतोऽस्मान् प्रति नार्हस्येवेति भावः अत्र संरम्भगद्गदेत्युक्तत्वात् सर्वत्र शब्देन स्वरेण वा दैन्यावावपि प्रणयकोपो व्यञ्जनीयः एवं "स्वागतं वो महाभागाः" इत्यादिकं भवता सादरं सन्यायं मृदूक्तमपि निवर्त्तनार्थमेवेति रसविघातकत्वादर्थतो विपरीतमेवेति भावः । अनेन स्वागतमित्याद्यपादस्योत्तरमूह्यम् । ननु, भोः प्रियवादिन्यः ! तर्हि किं कर्त्तुमर्हामि इत्यपेक्षायामाहुः—अस्मान् भजस्व मनोरथपूरणेनानुवर्त्तस्व कुतः तव पादयोर्मूलं तलं भक्ता इति दैन्योक्तिः अज्ञादिरूपकानुकिर्नृशंसतोक्त्या काठिन्याद्यभिप्रायेण अनेन प्रियं किमिति पादस्योत्तरम् ननु, श्रीगोपगृहिण्यः सत्यमेव भजामि किन्तु भवत्पत्यादिहिताचरणरूपमेव युक्तं नत्वीदृशमिति तत्राहुः—सन्त्यज्येति । सर्वान् विषयान् इन्द्रियार्थान् पत्यादिरूपान् सम्यक् अपुनरङ्गीकारतात्पर्येण त्यक्त्वा तेषां त्वद्भजने प्रातिकूल्यात् अनेन व्रजस्यातामयमित्यादिकस्य दुह्यतेत्यन्तस्य सर्वस्याप्युत्तरं तेषां सर्वेषामपि विषयान्तःपातात् तत्त्यागेन देहेपि गलितप्रेमत्वात् तत्प्रेमाविना रजन्येषेत्यादिवाक्यस्याप्यनुपादेयत्वात् व्यतिरेकेणाहुः—हे दुरवग्रह, दुराग्रह ! अस्मान् अनन्यगतीर्मा त्यजेत्यर्थः । अन्यथैव दोषः स्यादिति भावः । कथमित्याशङ्क्य धर्माधर्मातीतस्येश्वरस्यापि तद्धर्मपालनावश्यकता दर्शनादित्याहुः—देव इति । तत्रापि मुमुक्षूनपि किमुत तदपेक्षून् किंवा अमुमुक्षून् मोक्षमप्यनिच्छून् भक्त्येकनिष्ठानित्यर्थः । यद्वा, मुमुक्षून् तस्मादन्यत् सर्वं त्यक्तुमनिच्छून् यथासौ भजनमात्रापेक्षया सर्वानेव भजते स्वीकरोति तथा त्वमस्मान् भजस्वेति भजत इति द्वितीयान्तः क्वचित्पाठः तत्र तु मुमुक्षूनिति विशेषणं साधनसाध्ययोर्द्वयोरप्यवस्थयोरेतेषामात्मसात्करणात् सकामान् व्यावर्त्तयति—यथा तान् भजते न त्यजतीत्यर्थवशाद्भजस्वेत्यस्य विभक्तिविपरिणामस्य व्याख्येयम् अत्र श्रीगोपेन्द्रनन्दनत्वेनैव कृष्णे लब्धनिष्ठानामपि "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासतेऽसुराः" इत्युक्तत्वात् "हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः । भुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताः" इति श्रीनारदपञ्चरात्रोक्तानुसाराच्च नादृतमपि सर्वं ज्ञानादिकं ताः परिचरति तस्मात्केवलप्रेममय्योऽपि वचांसि पारमैश्वर्यज्ञानमय्योऽप्यमर्थस्तासामेव महिमसूचनार्थं ज्ञानादिशक्तिप्रेरितत्वया भक्तविशेषाणां चमत्काराय स्फुरति अथवा दैन्येन माहात्म्यस्फूर्तेरीश्वरत्वं सम्भाव्येदं वचनं तथाहि विभो, हे बहिरन्तर्व्यापक ! इति भवानस्माकं सर्वं भावं जानात्येव अतस्तव पादमूलं भक्ता आश्रिता अस्मान् भजस्व अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्यादिवचनानां वैयर्थ्यापत्तिः । ननु, तत्रभवत्यः पूज्यपादाः ! कथं विषयसुखमिच्छथ ? तत्राहुः, सन्त्यज्येति । अतो वयं परमार्थसुखमेवेच्छाम इति भावः । त्वया सह क्रीडाविशेषस्य तस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वस्वात्मकत्वात् इति "ये यथा मां प्रपद्यन्ते" इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वन्याश्रयत्यागेनास्मान् भक्तुमर्हसीति गूढोऽभिप्रायः । हे दुरवग्रह, स्वच्छन्द ! अस्मान् प्रपन्नान् मा त्यज परमेश्वरत्वात् त्वामधर्मो न स्पृशत्येव सत्यसङ्कल्पत्वश्रुतिविरोधात् प्रतिज्ञाहानिस्तु परमानुचितैवेति भावः सर्वान् विषयान् साम्राज्यप्रभृतिवैकुण्ठावधिपदानि सन्त्यज्यापि ते त्वाम् अमुमुक्षून् मोक्तुमनिच्छून् अशक्नुवतो जनानन्यानपि भज स्वीकुरु, द्वितीयायां षष्ठी ते तुभ्यं त्वां प्राप्तुं मुमुक्षूनिति च चतुर्थी वा यतो देवः जगत्पूज्यस्त्वम् अन्यथा देवत्वासिद्धिः तत्रापि यथा यथावत् सम्पूर्णतया आदिपुरुषो भगवानिति अत्र चाभिरपि यज्ञपत्न्युक्ताद्यपद्याद्यपादानुवाद आर्तिसाम्यांशेन ज्ञेयः "आर्त्तावपि स्वभावेन वैदग्धीवलितात्मनाम् । प्रार्थने गोपरामाणां निषेधार्थोऽपि वीक्ष्यते" ॥ तथा हि एवमीदृशं किञ्चित्प्रियं करवाणि मया सह किञ्चिद्ब्रूतेत्यादिकं नृशंसं वक्तुं नार्हति तत्र हेतुः सन्त्यज्येति याः सर्वविषयान् सन्त्यज्य तव पादमूलं भक्तास्ता एव दुरवग्रहं स्वच्छन्दं यथा भवति तथा भजस्व अस्मान् मा सर्वांशेनैव त्यज प्रभवो भक्तजनानेव भजन्ते न त्वभक्तानित्यत्र दृष्टान्तमाहुः—देव इति । अस्मिन्नर्थे वस्तुतस्तु सर्वमेतन्नर्मैवेति भाव एव व्यञ्जित इति ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तिमेवाह—मैवमित्येकादशभिः । हे विभो इत्थं नृशंसं क्रूरं यथा भवति तथा वक्तुं भवान्नार्हति हे दुरवग्रह ! स्वच्छन्द सर्वान् विषयान् भोग्यानपत्यपत्यादीन् विहाय सर्वनिगमामिति पाठे सर्वेषां पत्यादीनां निगममार्गं सन्त्यज्य तव पादमूलं प्राप्ताः भक्ता इति पाठे भजमाना अतोऽस्मान्न त्यज किन्तु भजस्व अनुकूलो भव मुमुक्षून् भजमानान् भक्तानादिपुरुषो भगवान् यथा न त्यजति तद्वदित्यर्थः ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तथा विचार्य किमब्रुवन्निति तत्राह—मैवमिति । नृशंसं परुषं वचनमेवं गदितुं वक्तुं नार्हसि कुतः ? इत्यत आह—सन्त्यज्येति । हे दुरवग्रह, अवग्रहो वर्षविघातः तद्रहित ! भक्ताभीष्टवर्षणशीलेत्यर्थः । शब्दादिसर्वविषयान् सन्त्यज्य भक्त्या तव पादमूलं भजेम सेवितुमवाप्ता इति यतस्तस्मात् मास्मान् त्यज अत्र दृष्टान्तमाह—देव इति ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्किमित्याह—मैवमित्यादि । एता मध्या धीराः तेन विभो इति वक्रोक्त्या सम्बोधनं भवान् "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति सत्यप्रतिज्ञः एवं नृशंसं क्रूरं गदितुं नार्हति तर्हि किं कर्त्तव्यमित्याहुः अस्मान्भजस्व मा त्यजस्वेत्यात्मनेपदं कर्त्रभिप्राये क्रियाफले अस्मद्भजने स्वप्रतिज्ञारक्षणमेव फलं केन प्रकारेण भजिष्ये तत्राहुः आदिपुरुषो नारायणो देवो यथा मुमुक्षून् भजते तथेत्यर्थः । स तु तेभ्यः आत्मानमेव ददाति । ननु, स तावत्तेभ्यो मोक्षमेव ददाति अथ यदि तदाकाङ्क्षितत्वात्तदा दास्यत्येव गृहं यात नेत्याहुः—तव पादमूलं भक्ताः श्रिता वयं भक्तास्तु मोक्षं कदापि नाद्रियन्ते तेन

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

दृष्टान्तगर्भं तावदिदमेव मोक्षे यथा न पुनरावृत्तिस्तथाऽस्माकमपि गृहे न पुनरावृत्तिर्भवतु सदैव स्थातव्यमिति यत् तदेव किं कृत्वा भजनीया भवन्त्यस्तत्राहुः, सर्वविषयान् सन्त्यज्य तांस्तथैवेत्याद्युक्तः । यतो वयमपि तथा हे दुरवग्रह, दुष्प्राप ! ॥ ३१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वाक्यानां बाधवाक्यानि तावन्ति प्रार्थनाधिका । एकादशविधास्तेन तासां वाचो जयन्ति हि ॥ भगवता प्रथममुक्तं "स्वागतं वो महाभागाः !" इति यद्यपि भगवता वयं स्तुतास्तथापि प्रेषणाभिप्रायेण न तु स्वस्मिन्नागता इति तथा सति नेयं स्तुतिः किन्त्वतिक्रूरं वचनमनिष्टपर्यवसानात् अन्यथाकथं किं कर्तव्यं तत्राह—मैवं विभो ! इति । भवान् सर्वमेव कर्तुं समर्थः समर्थश्चेदन्यथा वदेत् नृशंसमेव भवति दयायां विद्यमानायां न वदेदिति यच्च भगवता उक्तं व्रजस्यानामयमिति तदस्माकं नोद्देश्यं यतः सर्वविषयानेव सन्त्यज्य तव पादमूलं प्राप्ताः अनेन स्वकार्यपरिग्रहोऽनुचितः नापि जारत्वेन समागतामिति निरूपितम् एकादशेन्द्रियाणामपि विषयास्त्यक्ताः सवासनास्तत्र विनिगमकं तव पादमूलं प्राप्ता इति अन्यथा पादमूलप्राप्तिरेव न स्यात् यदुक्तं "ब्रूतागमनकारणम्" इति तत्राहुः—भजस्वेति । अन्यत्कर्तव्यमिति चेत्तत्राहुः—हे दुरवग्रहेति । दुष्टोऽयमवग्रहः आग्रहः यद्भजनं न कर्तव्यमन्यत्कर्तव्यमिति यथा जीवानां ते हि सर्वं कर्तुं वाञ्छन्ति न भगवद्भजनं यथाऽयमाग्रहो जीवानां दुष्टः तथाऽत्रापि भवितुमर्हति "ये यथा मां प्रपद्यन्ते" इति तु नास्ति यदि तदभिप्रायेणैव तथा तदा मा त्यजास्मान् अस्माभिर्न त्यज्यत इति एतच्च भजनं न विषयवत् किन्तु प्रकारान्तरेणेति विशेषतो वक्तुमशक्ताः दृष्टान्तेनाहुः, देवो यथेति । देवो हि सर्वानेव भजते अन्यथा शास्त्रं व्यर्थं स्यात् तत्राप्यादिपुरुषो देवः पूर्वकाण्डेऽपि भजनं सार्थकं सुतरामुत्तरकाण्डे आदिपुरुषस्तु सेव्य एव भवति देवश्च न हि देवभजनं व्यभिचारजनकं भवति पुरुषान्तरभजनेऽपि प्रथमभर्त्रा विवाहितः अभजनीयो भवति अनङ्गीकारस्तूचितः न त्वभजनम् एतेन स यथा स्वातिरिक्तभजनं न सहते तन्निवृत्तिपूर्वकमेव स्वभजनं सम्पाद्य स्वयं भजते तथा त्वयापि कार्यमतस्तत्र प्रेषणं तवात्यनुचितमिति ज्ञायते । किञ्च, यथा मुमुक्षून् भजते भगवान् आत्मीयत्वेन परिगृह्णाति आत्मतया स्फुरति आनन्दं तेभ्यः प्रयच्छति "एष ह्येवानन्दयाति" इति श्रुतेः आप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही ति न्यायेन भगवान् तदर्थमात्मानं प्रकटीकरोतीति मुमुक्षून् भजसे इत्युक्तम् अन्यथा मुमुक्षव एव भगवन्तं भजन्ते न तु भगवान् अतः फलद्वारा भजनं यथा तेषां पुनः पूर्वावस्थां न सम्पादयसि सततं स्वस्मिन्नेव स्थापयसि तथा अस्मदर्थमाविर्भूय स्वानन्देन वयं योजनीया इत्येतत्कर्तव्यमित्यर्थः । एतेन प्रार्थनया सकृदङ्गीकृत्य तूष्णीं भावपक्षो निरस्तः अग्रे गृहगमनापत्यपुष्टिस्थितिसम्पादनादिकं तु रसपोषायैव न तु पुरुषार्थमिति ज्ञेयम् ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अस्मान् धर्ममुपदिशस्त्वं च स्वयं पापराशिं चिकीर्षसीत्यनुचितमित्याहुः—मैवमिति । नृशंसं घातुकं साक्षान्मारकं यथा स्यात्तथा गदितुं भवान् प्रतिपुरुषं धार्मिकत्वख्यातिमतो नन्दस्य पुत्रः सन्नार्हति अन्यस्तु प्रतिपुरुषं मानुषमारणावृत्तिको वरमर्हतु नामेति भावः । "नृशंसो घातुकः क्रूरः" इत्यमरः । त्वया कोटिसंख्या अप्यस्मान् प्रति वाक्शरास्तथा एकदैव निःक्षिप्ता यथा अधुनैव शरीराणि परित्यज्य यमपुरं सर्वा एव वयं यामो न तु त्वदुपदिष्टं गोष्ठपुरं त्वन्तु शतकोटिस्त्रीवधपातकानि गृहीत्वा स्वयमेव गोष्ठं याहि, स्त्रीवधाच्चेत् जिघृक्षसि तर्हि सर्वविषयांस्त्यक्त्वा तव पादमूलं भक्ताः सेवितवतीरस्मान् भजस्व आत्रान्यविषयानित्युक्त्वा सर्वविषयानित्युक्त्या भगवद्भक्तसङ्गो हि विषयो न भवतीति ध्वनितम् । भोः कामिन्यः! किं स्वस्वपतिरूपो भवतीनां कामो नोपशामयति? यतस्तान् परित्यज्य मामेव भजध्वे तत्राहुः—हे दुरवग्रह । "अवे ग्रहो वर्षप्रतिबन्धे" (३।३।५१) इति पाणिनिस्मरणात् दुष्टो अवग्रहो वृष्टिप्रतिबन्धोऽनावृष्टिर्यस्येत्यत्रान्यपदार्थस्य मेघस्यैवोपयुक्तत्वात् दुःसम्प्रयोगाच्च हे विषमात्रवर्षक ! मेघेत्यर्थः । तेन चातकीनामस्माकं दूरस्थोऽपि त्वमेव कृष्णमेघो बन्धुस्त्वं दैवदोषादद्य विषं वर्षसि अथ ग्रहत्वात्सलिलं न चेद्वर्षसि तर्हि मा वर्ष तद्दत्तं विषमेव पीत्वा वयं म्रियामहे नतु निकटस्थानां ह्रदादीनामपि जलं पिबामेत्यस्माकं भावं जानीहीति भावः अतोऽस्मान्मा त्यज वदात्मनः कृतघ्नत्वं दधासीति भावः ननु च सत्यं चातक्यो मेघमपेक्षन्तां नाम मेघस्तु चातकीर्नापेक्षते चातक्यो म्रियन्तां जीवन्तु वा मेघस्य न कोपि हानिरिति चेत् सत्यं न त्वं जडात्मको मेघ एव किन्तु विदग्धचूडामणिर्नारायणसमो नारायणवदेव वर्तस इत्याह—देव इति । मुमुक्षून् त्वदुपासनार्थं सर्वं विषयांस्त्यक्तुमिच्छूनपि त्वदभीष्टोपपादनया भक्तवश्यत्वात् भजते अस्मांस्तु त्वदर्थं सन्त्यक्तसर्वविषयश्रेणीका अपि त्वं कथं न भजसीत्यर्थः ॥ ३१ ॥

विशुद्धरसदीपिका ।

तदेवाह—श्रीगोप्य इत्येकादशभिः । अत्रैवं विवेकः पुरस्तादेतासां चतुर्विधत्वे साधितेऽप्यस्ति कश्चिद्विशेषः याश्च श्रुतिमुनिरूपाः साधकचर्याः ताः द्विविधाः प्रौढाश्च कन्याश्च आसां साधकचरीत्वाविशेषादेकमत्यमित्येको वर्गः एतासामेवेदम् श्लोकत्रयात्मकं महावाक्यम् एवं च प्राचीनसंस्कारावशेषस्वाभाव्यात्कान्तभावाच्चैश्वर्यज्ञानमप्यविरुद्धं तत एव चाधीरतयाऽग्रे सरत्वं पूर्वदिक्स्थितत्वात्प्रतिवचने प्राथम्यमपि बोध्यम् । सिद्धा अपि द्विविधाः दाक्षिण्यभावाः सखीभावाश्च तत्राद्यानां श्रीराधिकाप्रतिपक्षत्वम् श्रीकृष्णनिष्ठत्वेनाक्षौल्यमपीति द्वैविध्यम् । तत्राद्यानां दाक्षिण्यत्वम् अपरासां तटस्थत्वमिति नच स्वाधीनपतिका सौभाग्यवर्णनमस्तासां तद्विपक्षतटस्थादिवर्णनमयुक्तमहृद्यं चेति वाच्यम् मधुरातिमधुरलीलाया आस्या स्वभावोऽयं यत्स्वल्प्योऽप्यमानादिवैचित्रीपरिकरितैव च रसं पुष्णाति तत एव तादृशतयैव कविभिर्वर्ण्यते श्रीभागवतापि

विशुद्धरसदीपिका ।

यथावसरं स्वलीलायामङ्गीक्रियते तदुक्तमुज्ज्वले—

"यथा स्युर्नायकावस्था निखिला एव माधवे ।
तथैव नायिकावस्था राधायां प्रायशो मता" इति ॥

प्रायश इति स्वरूपतः स्वाधीनपतिकैव प्रथममेव च व्रजनिकुञ्जलीलयोर्विशेषः । शृङ्गारप्राधान्येन प्रेमपरिपोषका व्रजलीला प्रेमप्राधान्येन शृङ्गारपोषका निकुञ्जलीलेति तदुभयसन्धिगता रासलीलेति तद्द्वयमपि यथास्थानं पुष्णाति च प्रपुष्णाति च शुद्धं प्रेमाणमिति ततश्च लीलाशक्तिरेव तासु तत्तद्भावं दधाति विदधाति चाखिलं तदनुगुणमिति गम्यं वस्तुतस्तु श्रीराधाया एव रासलीलेति परमोल्लासेन वर्णयन्ति "सैव चाष्टविधा राधा नानाभावविभावनी" इत्यादिपुराणोक्तेः।यद्वा, तास्ताः सर्वा अपि वञ्चयित्वा तस्यामेव परमासक्त्या नित्यं रमत इति तत्सौभाग्योत्कर्षहर्षितास्तत्सुखाकर्षितास्तथा तथा वर्णयन्तीति दिक् । ततश्च सिञ्चेत्यादिश्लोकद्वयात्मकं दक्षिणानां महावाक्यं, ततस्तत्र प्रसीदेति वामानां श्रीश्यामसहचरीणां, रमाया दृष्टक्षणामिति तत्सुखस्य सूचितत्वात् । न चासां वाक्योक्तिर्विरुद्धा सहचरीभावः समये परिजनभावश्च; वेषभूषादौ उपदेष्टृताच माने तस्मिन् गाढेति गर्हकत्वञ्चेत्यादिनोज्ज्वलादौ तथाभिधानात् वस्तुतस्तु सख्यमासां श्रीराधामनुतत्प्रियत्वेन श्रीहरौ गौरवप्रीतिविषयत्वात्तथात्वमविरुद्धम । यद्वा, सखीभावो द्विविधः दासीभावः सहचरीभावश्चेति तत्राद्यानां तत्र प्रसीदेति, अपरासां तन्नो निधेहीति, केचित् वस्तुतस्तु चरमं महावाक्यं तटस्थानामिति यथायोग्यं योजनीयम, अपि च यद्यपि विरहे समानभावापन्नत्वेन युगपत्समानवचःस्फूर्त्तिरपि सम्भवति तथाप्येकदोक्तावलिकोलाहलतया नातिरसाधायकत्वं अतो मुख्यानामेव वाक्यमिति ज्ञेयम । चतुर्दिक्षु स्थितत्वेन सर्वासां साम्मुख्यं च कृष्णस्य विश्वगित्यादिवदिति सर्वं समञ्जसम । मूलमनुसरामः—मैवमिति, आदावेव निषेधोक्तिस्तदुक्तेरतिपारुष्यतया एवम् ईदृगपि किमुतदमेव विभो, अस्मत्प्राणनाथ भवान् प्रेमार्द्रचित्ततया प्रसिद्धः नृशंसं क्रूरं स्वागतमित्यादिना बहिः सादरं सन्धायं मृदूक्तमपि निवर्त्तनार्थगर्भितत्वाद्रसविघातकत्वादन्तः क्रूरमेवेति भावः "नृशंसो घातुकः क्रूरः" इत्यमरः ननु, तादृङ्मधुरवचसां कथं घातकत्वमुच्यते ? इत्याशङ्क्यास्मच्चित्तक्षोभकत्वादेवेति परिहरन्ति—सन्त्यज्येति । मूलत एव पत्यादिरूपान् सर्वविषयान्सम्यङ्मनसाप्यनङ्गीकारेण त्यक्त्वेदानीं सर्वत्यागेनागतास्त्वौदासीन्यमतिक्षोभकमिति भावः । तव पादमूलमिति वक्रोक्तिः स्वागतमित्यादिप्रतिवचनाभिप्रायेण भर्त्रादिरूपकानुक्तिश्च काठिन्याभिप्रायेण भक्ता इति दैन्यं तेन कान्तभावाभिव्यक्तिः हे दुरवग्रह, स्वतन्त्र ! किम्वा "वृष्टिवर्षे तद्विघाते ऽवग्राहावग्रहौ समौ" इत्यमरकोषादवग्रहो वृष्टिविरहस्मः स च श्यामघनस्य भवतोऽनुचित इति सम्बोधयन्ति—दुरिति । दुःखपदत्वमपि अस्मान् अनन्यगतीरित्यर्थः । अथास्माकं दोषविचारेण अस्मत्परित्यागेन तवापि महानेव दोषः स्यादित्यभिप्रायेण धर्माधर्मातीतस्येश्वरस्यापि अनन्यजनतत्परतां दृष्टान्तयन्ति—देव इति । सतु मुमुक्षूनपि भजते अस्माभिस्तु सोऽपि विषस्फोटान्तर्भावितस्त्वत्प्रेमविघातकत्वादिति भावः । यद्वा, अमुमुक्षूनिति पदच्छेदः "इमं लोकं तथैवामुमात्मानमुभयायिनम । आत्मानमनु ये चेह ये रायः पशवो गृहाः" इति तृतीयोक्तेः "हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे" इति नवमोक्तेः अथवा सर्वविषयान् सन्त्यज्यागता इति कथं प्रतीमस्तत्राहुः, देव इति । नारायणसमो गुणैः" इत्यादिमहाजनप्रसिद्ध्याऽस्माभिरादरणीय इत्यर्थः । ननु, नन्दनन्दनोऽहं सादृश्योक्तिभ्रमेणैव तथा प्रतीत इति चेत्तत्राहुः, यथा यथावदित्यर्थः । ननु, मानुषे मयि कथं तथा प्रतीतिस्तत्राहुः आदिपुरुषः "योऽसावादित्ये पुरुषः" इत्यादिश्रुतेः, परमपुरुष इत्यर्थः । श्लेषेण आदित आरभ्य पुरुषोऽस्माकं पतिरिति । ननु, परपुरुषः इदानीन्तनानामेव तथात्वादिति भावः कथमेवमिति तत्राहुः, अमुमुक्षून् त्यक्तुमनिच्छून् यदा अस्मान् भजते इति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति भजिष्यति भवांस्तदाद्यत्वेवेत्यर्थः ॥ ३१ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

गोपीवचनमवतारयति—गोप्य इत्याद्येकादशभिः । तत्र भगवता स्वयं प्रवृत्तिधर्मोपदेशे कृते तत्समाधानाय श्रुतिरूपगोपीपुरस्कारेण विरागान्वितसाधनभक्तितत्त्वबोधप्रेममार्गाभिधानेन क्रमेण पद्यत्रयेणोत्तरमाहुः—मैवमित्यादिना । हे विभो ! प्राणनाथ ! भवान् प्रियमेव वदन्नप्येवं द्व्यर्थकतयोपेक्षार्थस्यापि भानेन नृशंसं क्रूरं यथा स्यात्तथा गदितुं नार्हति किमद्य नास्ति भगवद्धस्तगतादर्शमुद्रिकाऽस्ति चेत्स्वमुखं निरीक्षस्व नहि भवत्कोमलमुखसदृशीयं बाणसमा वाणी नहि मुखचन्द्रचन्द्रिकावाक् प्रलयार्कांशुवत्तापिका युक्ता नहि सुखकञ्जमधोद्धोलाहलवत्तीक्ष्णातोचिता तथा नान्यः कोऽप्यत्र वर्त्ततेऽयमुपेक्षार्थः बोधनेन वञ्चयितुमेवं द्व्यर्थकवचनोक्तिः सङ्गच्छेत वयन्तु नहि भवतैवं वदनार्हा अतः सर्वविषयान् पतिधनगृहसौख्यादीन् ऐहिकान् साक्षादामुष्मिकान् ब्रह्मलोकादिपर्यन्तान् काम्यभोगांश्च सन्त्यज्य सम्यक् सवासनं अकृत्वा तव पादमूलं भक्ताः सेवमाना अतो भजस्व तत्र विषयानित्यनेन "षिञ् बन्धने" इत्यस्माद्विशेषेण बन्धहेतुतया त्यक्तुं योग्यत्वं हातुमशक्यत्वं च सूचयन्ति । ननु, सर्वविषयत्यागे मम त्यागोपि प्रसज्येतेत्याशङ्क्य विषयशब्दस्य बन्धकपरत्वं भवतु अबन्धकत्वेन प्रत्युत बन्धहरत्वेन विषयत्वाभावादेव समाहितत्वेपि विभो इति सम्बोधनेनापि त्यक्तुमनर्हत्वेन च समादधते तथाहि विभो इति भूमन् व्यापक इत्यर्थः । तथा च "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तत्सुखं नाल्पे सुखमस्ति" इति श्रुत्या तव विभुत्वेन भूमसुखरूपतया अहेयत्वमेव प्रत्युत तव प्राणादन्येषां दर्शनश्रवणस्मरणानर्हतया हेयत्वस्यैव श्रुतिसिद्धतया न तत्प्रतिगन्तव्यं तथा विभोर्देशापरिच्छेदतया तं कथं कोपि त्यजेत्त्यक्तुं वा समर्थो भवेत् न्यच्चमेक एव बहिः कथं भजामि तत्राप्याहुः, विभो इति नहि व्यापकस्य तव तद्दशक्यमतो विभुत्वेनैव समर्थः सर्वमूर्त्तसंयोगित्वं विभुत्वमिति नान्यथा स्थितिः विभोस्तवास्मच्छरीरसंयोग आवश्यक एव । ननु, किमतिप्रार्थनया बहवो मद्वशीकरणसमर्थास्तत्राहुः—दुरवग्रहेति । स्वच्छन्देत्यर्थस्तस्मात्त्वमेव भक्तानोऽस्मान्भजस्व मा त्यज । यद्वा, "वृष्टिर्वर्षं तद्विघातेऽवग्राहा-

श्रीरामनारायणकृतभावविभाविका ।

वग्रहौ समौ" इति काशाकः दुःखं यथा स्यात्तथा रसवृष्टिविघातक ! नैतत् घनश्यामे त्वयि युक्तमिति भावः । यद्वा, दुर्गतम् रसवृष्टिविघातकत्वं यतस्तथाभूतस्वभाव नहि त्वयि स्वभावविरुद्धमिदं युक्तमिति ध्वनिः । अत्र सर्वविषयान् सन्त्यज्येति वशीकारसंज्ञकवैराग्यपूर्वकन्यासोक्तिः पादमूलं भक्ता इति पादसेवनादिभक्तिनिर्देशः न च स्त्रीत्वेन तदनधिकार इति वाच्यं त्यागमात्रात्मकपरमहंससन्यासे सर्वाधिकारात् मैत्रेयीविदुरादीनां तथा दर्शनाच्च तत्र दृष्टान्तमाह—देव इति । " मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितः" इत्यत्र अन्यथा मिथ्याकल्पिताऽविद्योपाधिकजीवरूपं हित्वा स्वस्य कृष्णस्य रूपेणावस्थितिरिति मोक्षस्य कृष्णस्वरूपात्मकत्वात् तादृच्छून् स्वस्वरूपकामान् यथा आदिपुरुषो देवो नारायणो भजते तथा तव स्वरूपकामान्नो भजस्वान्यथास्मदभजने तव पुरुषत्वदेवत्वयोः क्षतिरित्यागतं देवानां प्रियत्वं गत्वामिन्द्रत्वं चेति व्युत्पत्त्योक्तिः "दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु"। यद्वा, यतस्त्वं कामक्रीडापरत्वेन कामविजिगीषुत्वेन अस्मदाह्वानादितद्व्यवहाररतत्वेन द्युतिमत्त्वेन निगमस्तुत्यत्वेन रसिकजनगीतगुणत्वेन मोदात्मकत्वेन स्वकान्त्या मदनमदभ्रमनोन्मदत्वेन कान्तत्वेन च सर्वथापि देवस्तस्त्वं विहायास्मदुपेक्षया केवलस्वप्नपरत्वेन देवत्वस्वीकारोऽयुक्त एव तथा यथा इति यथावत् आदिपुरुषः आदित एव सर्वासां पुरुषः श्रुतिसिद्धः पतिर्नाधुनाऽस्माभिः स्वबुद्धिदोषेण कल्पितः अन्ये तु भ्रमेण एव कल्पिताः तस्मात्ते त्वाममुमुक्षून् नोऽस्मान् भजस्व मा त्यज इति पुनः पुनरुक्तिः प्रार्थनातिशये ॥ ३१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तदुदाहरति—मैवमिति । यद्यपि वयं निकृष्टास्तथापि सर्वोत्तमो भवान् षड्विधैश्वर्यसम्पन्नः प्रतियातेत्यत्र रूपं नृशंसं क्रूरमस्मत्प्राणापहारेणासमर्थत्वात् घातुकं नृशंसमिति किञ्चित् संरम्भाविष्कारः यद्यपि भगवता प्रथमं स्वागतमित्यादिना स्तुतात्वथाप्यग्रे प्रतियातेति प्रतिगमनाभिधानात्तदपि नास्माकं प्रेमातिरेकवर्णनाभिप्रायकमपितु व्यङ्ग्योक्त्योपहासपरम् अतस्तदपि नृशंसमेव परिच्छिन्नस्य परकीयान्तःकरणवृत्त्यनभिज्ञस्यैवाभिधोक्तिः कदाचित् घटेत न तु विभोर्व्यापकस्य सर्वान्तरवस्थितत्वात् सर्वान्तःकरणवृत्तिसाक्षिणः इत्याशयेन सम्बोधयन्ति—हे विभो ! इति । अत एव व्रजस्यानामयं कच्चिदिति प्रश्नोऽपि न युज्यते तत्कुशलाकुशलयोरुदासीनभूतास्मदन्तःकरणवृत्तित्वाविदित्वाशयेनाहुः—सन्त्यज्येति । व्रजस्य का कथा अस्माभिः शब्दस्पर्शादयः सर्वेन्द्रियाणामपि विषया सम्यग्वासनोच्छेदपर्यन्तं त्यक्ताः सन्त्यज्य च तव पादमूलभक्ताः स्वागताः (?) तव पादमूलभजनार्थमेव न तु फलान्तरमस्माकमपेक्षितमित्यर्थः । सर्वविषयानित्यनेन त्वद्विषयकः कामः कामो न भवति भुनमाति अस्मदन्तःकरणात्सर्वे विषया यदि निरस्ता न स्युः तव पादमूलभक्तिः कथं तत्राविर्भवेत् तथा च सैव तत्त्यागसाक्षिणीत्यनेन ध्वनितं तत्र भगवतोक्तं प्रियं किङ्करवाणि वः भूतागमनकारणमिति तत्राप्याहुः—भजस्वेति । तथा च भगवद्भक्तानामस्माकं स्वीयत्वेन ग्रहणमेवास्मत्प्रियं भगवता कर्तव्यमेतद्व्यतिरिक्तं किञ्चिदस्माकं प्रियं नास्त्येतदेवास्मदागमनप्रयोजनमतस्तदेव सम्पादयेत्याशयः तस्मात्प्रतियात व्रजं नेह स्थेयमिति त्यागाग्रहो भवतो नोचित इत्याहुः । हे दुरवग्रह ! मा त्यजास्मान्मद्भजनं न कर्तव्यमित्ययमाग्रहो दुष्टो भवति सर्वैः कर्तव्यं भगवद्भजनं न कार्यमिति दुष्ट आग्रहो जीवानां वर्तते परमेश्वरस्याप्ययुक्त आग्रहश्चेत्तर्हि कथं जीवानामुद्धारः तस्मादस्माकमेव केवलमभाग्यवशादुक्ताग्रहो भवता आश्रित इतिसम्बोधनाशया । ननु, न मया स्वभजनं निषिध्यते किन्तु कामोपाधिकं तदिति चेत्तत्राह—देव इति । यथा देव आदिपुरुषोऽवतारियं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इतिप्रतिज्ञावान् भवान् यथा मुमुक्षून्भजते तत्तत्फलप्रदानेनाभयते स्वस्मिन्नेव स्थापयति न तु पुनस्तेषां पूर्वावस्थां सम्पादयति तद्वदस्मदाद्यर्थं तदवतारभूतस्त्वमेवाप्यस्मदङ्गसङ्गोत्कटाकाङ्क्षावतीर्मा त्यज अपितु अस्मदभिलषितफलप्रदानेनाश्रय तथा च मोक्षोपाधिकमपि भगवद्भजनं यथा मुमुक्षूणां भगवता शुद्धत्वेनैवाङ्गीक्रियते तथा त्वदङ्गसङ्गोपाधिकमपि त्वमेवाङ्गीकर्तुं योग्योसीति भावः । सम्बन्धित्यागो न कर्तव्य इति वक्तुं स्वभक्तत्यागं च कर्तुं भवान्नार्हतीति नापि स उपदेशः सफलो भविष्यतीत्यप्यनेन ध्वनितम् अनभिज्ञापक्षे भो विभो, समर्थ ! एवं गदितुमपि भवान्नार्हति चरितुं नार्हतीति किमु वक्तव्यमित्यर्थः । यद्यपि परमैश्वर्यवांस्तथापि परमधार्मिकत्वेन प्रख्यातस्य श्रीनन्दरायस्य पुत्रः स्वयं च रसार्द्रं इति सूचनाय भवानित्युक्तं नृशंसं साक्षान्मारकं तथा चास्मदुपदेशाय प्रवृत्ते त्वया वाङ्मात्रावकृतासङ्ख्यातस्त्रीवधजनितपातकोत्पत्तिर्न विचारितेति भावः अथवा हे विभो, अस्मत्प्राणनाथ ! तथा च विश्वनाथास्मत्प्राणरक्षणमेव तवोचितं न तु तन्नाशनमिति भावः । तत्रापि भवान्मयेमा रंस्यथ क्षपा इति कृतप्रतिज्ञः "प्रतिज्ञाय करोमीति कर्तव्यं तदकुर्वतः । मिथ्या वचनदग्धस्य इष्टापूर्तिर्विनश्यति,, इत्यादिशास्त्रज्ञो भवान् तथाप्यस्मद्दोषोद्घाटनाय प्रवृत्तस्त्वं स्वप्रतिज्ञानाशादि वृहद्दोषान्न पश्यसि तदुक्तं शकुन्तलायाम्—

"राजन्सर्षपमात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि" ॥

इति भावः । ननु, "स्वागतं वो महाभागाः" इति परमकोमलमपि प्रथमं मयैवोक्तं तत्किमर्थं विस्मरयत इति चेत्तत्राप्यलङ्कृत्य शिरश्छेदनवन्निवर्तनार्थं तथा नृशंस एवान्तर्भावात् भवतु भवन्मुखचापनिःसृतवागस्त्रजालेन दग्धप्राणा वयमितः परं परलोकमेव यामो न तु व्रजम् । त्वत्कृतसङ्ख्याता अस्मान् हत्वा किं पदं प्राप्स्यसीति न विद्मः इत्याशयेनाहुः—सन्त्यज्येति । वास्तानवत्पुनर्गृहान्न यास्यामः सर्वविषयांस्त्यक्त्वा इति द्योतनायाममिहुक्तं तथा च व्रजस्यानामयं रजन्येषेत्यादिवाक्यजातं निरर्थकमेवेति भावः । ननु, किमित्येवमित्युपालम्भं दातुं प्रवृत्ताः प्रियं किं करवाणि वः भूतागमनकारणमिति मदुक्तिः श्रुत्वा तूष्णीं स्थिताः भवतीर्दृष्ट्वा पुनर्गन्तुकामाः निष्कामाश्चावध्य रजन्येषेत्याद्युक्तं मया ततो मास्तु कोपो यत्प्रार्थनीयं तन्निःशङ्कं प्रार्थ्यतामिति चेत्तत्राहुः—अस्मानमा त्यज त्वद्व्यतिरिक्ताभिलाषाकाङ्क्षारहिताः भजस्व स्वीयत्वेन सभाभयस्व सन्त्यज्येत्यादिना ।

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु, कथं गोपगृहिण्योऽहं भजामीति शङ्कापि निराकृता तव पादमूलं भक्ता इत्यनेन वयं वनशोभादिनिरीक्षणार्थमागता इति दृष्टं वनमित्यादियुक्तं समाहितं पादपद्ममित्यनुक्त्या किञ्चित् संरम्भेण नृशंसवाक्यपादयोः काठिन्यं व्यञ्जयति । ननु, युष्माभिः सर्वं यथार्थमेवाभिधीयते तथापि नाहं भवतीर्भजामि स्वतन्त्रत्वादिति चेत्तत्राहुः—हे दुरवग्रहेति । अयमाग्रहो दुष्टो भवति स्वतन्त्रस्यापि तवैवंविध आग्रहो नोचितः चतुरशिरोमणित्वाद्दुराग्रहो हि मूढधर्म इति भावः । अतोऽनन्यगतीरस्मान्मा त्यज त्यागस्यानिर्वाच्यदोषोत्पादकत्वात् नन्वस्तु दोषस्तेन मम का हानिरित्याशङ्कयाहुः—अहो किमेवंविधगर्वगिरमगमारूढोऽसि किमासकामात्मारामात्परमेश्वरादप्याधिक्यं प्राप्तोऽसि यतः सोऽप्येवं न करोतीत्याशयेनाहुः—देव इति । तथा धर्माद्यनपेक्ष्य सर्वलोकसंहारकृतपापासंस्पृष्टः सकलैश्वर्यसम्पन्नः स्वयं प्रकाशो ब्रह्मादिकारणभूतः स्वभक्तान्मुमुक्षून्भजते मोक्षप्रदानेन तथा त्वं स्वतन्त्रोऽप्यस्मन्मनोरथपूर्तिं कर्तुं योग्य इत्यर्थः । मुमुक्षूनित्यनेन ते मुमुक्षवः न तु तदेकल्पत्व इति तेषां स्वतो निकृष्टतां सूचयति यद्वा, अमुमुक्षून् मोक्षाद्यनिच्छून् यद्वा मुमुक्षुनऽनदन्यकर्म त्यक्तुमिच्छून् शरणागतान् दुरवग्रह इत्यनेनाह—विषमाग्रवर्षकमेघस्यप्युक्तम् "अवग्रहो वृष्टिप्रतिबन्धे" इतिपाणिनीयस्मरणात् दुष्टमवग्रहो यस्मिन् स प्रतिषिद्धवृष्टिर्मेघस्तस्य दुष्टत्वं चोत्पादुवर्षकत्वात् तथा चेतरजलस्थानीयस्वपत्यभिकाङ्क्षाविनिर्मुक्ता मेघस्थानीयत्वदेकशरणाश्चातकीकल्पा वयं त्वदधरामृतपानार्थमागतास्त्वं त्वस्मदभाग्योदयात्संप्रति विषं वर्षसि भवतु विषमेव पीत्वा मरिष्यामो न तु व्रजं यास्यामः चातकीस्वभावत्वात् तस्मादस्मान्मा त्यज कृतघ्नत्वं तव नेदमुचितमिति भावः ननु, चातकीसमानानां भवतीनां मरणेन मम चातकपेक्षारहितमेघकल्पस्य का हानिरिति चेत्तत्राहुः—न त्वं केवलजडमेघसदृशः किन्तु परमाभिक्षु:स्वमायकचेतनरूपपरमात्मसदृशोऽसीत्याशयेनाहुः देव इति । यद्वा, भक्ता अस्मान् भजस्व दुराग्रहम् आ समन्तात्त्यज "बुद्धेः फलमनाग्रहः" इत्युक्तत्वात्परमबुद्धिमतस्तवाग्रह एव नोचितः दुराग्रहस्तु दुर्निरस्त इति भावः । मानिनीपक्षे एवं प्रियं किं करवाणि च इत्यादिरूपं नृशंसं क्रूरं गदितुं नार्हसि यद्यपि भवान् सौन्दर्यादिगुणभ्रमस्तत्रापि विभुः परमसमर्थस्तथापि भवादृशा एवं न वक्तव्याः इति भावः । यदि परदाराश्चेव तव रमणेच्छा तर्हि याः सर्वविषयान्संत्यज्य तव पादमूलं भक्तास्तान् दुरवग्रहं स्वच्छन्दं यथा स्यात्तथा भजस्व अस्मानासमन्तात्सर्वप्रकारेण त्यज । यद्वा, अस्मान्दुःसाध्याः प्रति दुराग्रहं त्यज प्रभवोऽपि भजमानमेव भजन्तीत्याशयेनाहुः, देव इति । आदिपुरुषो देवो यदपेक्षयाधिकं प्रभुत्वादिविशिष्टः कोपि नास्ति स यथेत्यर्थः । निवृत्तिपक्षे एवं प्रतिरुद्धाः श्रुतयः साक्षाच्छमाहुः–मैवमिति । एवं ब्रह्मणि श्रुतीनां प्रामाण्यं नास्तीत्यादिरूपं नृशंसं सर्वघातुकं गदितुं भवानर्हतीति । ननु, नाहं ब्रवीमि किन्तु शास्त्रतत्त्वाऽनभिज्ञास्ते ते वादिन एव जल्पन्त्यतो वाहमुपालम्भाविषय इति चेत्तत्राहुः, हे विभो ! व्यापक ! तथा च "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुत्या नामरूपात्मकं संसारविस्ताराय तादृशजीवात्मना त्वमेव ब्रवीषीति भावः । यतः सन्त्यज्य सर्वविषयांस्तव पादमूलं भक्ता अस्मान्भजस्व दुरवग्रहम् आत्यज नायं मोक्षमार्गः किन्तु परमानर्थासद्भावप्रापकः "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्" इत्यादिश्रुतेः । तस्माद्यथा मुमुक्षूणां मोक्षः स्यात्तथा करुणा विधेयेत्याशयेनाहुः–देव इति । यथा आदिपुरुषो देवो मुमुक्षून् भजते मोक्षदाता भवेत्तथाऽस्मान् भजस्व तथा च परमपुरुषार्थमोक्षलाभाय ब्रह्मण्यस्मत्प्रामाण्यमवश्यमाश्रयणीयमित्यर्थः । अयमाशयः सर्वान्विषयान् प्रतिपाद्यान् सम्यक् परित्यज्य ब्रह्मणि समन्वितानां श्रुतीनामन्यपरत्वाभिधानं साहसमात्रं तत्र श्रुतिवाक्यानां द्विविधा ब्रह्मणि प्रवृत्तिः एका ब्रह्मात्मनोरेकत्वविषया अपरा सत्यज्ञानादिलक्षणब्रह्मविषया तत्राद्या यथा सोऽयं देवदत्त इति पदं तत्रैकस्मै कस्मिन् देवदत्ते पर्यवसानं तद्वत् तथाहि यथोक्तवाक्यं सोऽयमिति विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशव्यक्तिमात्रलक्ष्यपरं तथा तत्त्वमसि वाक्यमपि विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशचैतन्यव्यक्तिमात्रलक्ष्यपरं ननु पूर्वं तत्रैव पदार्थानां संसर्गः संसृष्टादयोऽर्थाः वाक्यार्थं लक्षणामुक्तं तच्च द्विविधमप्यखण्डार्थे न सम्भवति ततः कथं वाक्यार्थलक्षणशून्यखण्डं ब्रह्म वाक्यार्थः स्यादिति चेन्न वेदान्तशास्त्राचार्यैः श्रीबादरायणाऽनुयायिभिः—

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः" ॥

इति वदद्भिरखण्डस्य वाक्यार्थत्वाभिधानात् तत्रैवं सत्युक्तलक्षणस्य तत्राव्याप्तिः सामान्यलक्षणस्यैव तथाविधविशेषव्याप्तिनियमात् विशेषलक्षणयोरेतयोः परस्पराव्याप्तिदूषकत्वात् सामान्यलक्षणं तु वाक्यप्रमेयत्वमात्रपर्यवसायि न चाखण्डवाक्यार्थस्य विशेषलक्षणाभावः अपर्यायानेकपदैकप्रातिपदिकार्थमात्रपरत्वस्यैव तल्लक्षणत्वात् । ननु, तत्र पदलक्षितरूपे भिन्ने किं वा न भवेदैक्यप्रमित्यसम्भवः द्वितीये पदार्थवाक्यार्थयोरेकत्वापत्तिरिति चेन्न द्वितीयपक्षोक्तदोषस्पष्टापत्तिप्रस्तरत्वात् न च पदद्वयवैयर्थ्यं लक्षणैकार्थबोधनार्थत्वात् तत्त्वं पदस्य वाक्यार्थपरित्यागेन चिल्लक्षकत्वं तत्पदं सामानाधिकरण्ये सति घटते तथा तत्पदस्यापि वाक्यपरित्यागेन (?) चिद्दृशकत्वैकपदसामानाधिकरण्ये इति न पदद्वयवैयर्थ्यम् एवं सत्यनाद्यवान्तरवाक्याखण्डार्थत्वं यथा केनचित्पृष्टोऽस्मिन् ज्योतिर्मण्डले चन्द्रो नामेति तस्य प्रतिवचनं प्रकृष्टप्रकाशः चन्द्र इति वाक्यस्यात्र प्रकृष्टशब्दात् चन्द्रप्रातिपदिकार्थसिद्धिः प्रकृष्ट तम इति प्रकृष्टशब्दस्य प्रकृष्टतमसोऽपि प्रयोगदर्शनात् तथा प्रकाशशब्दोऽपि न तत्सिद्धेः खद्योतादावपि तत्प्रयोगदर्शनात् तस्माच्छब्दार्थपरित्यागेनाप्रकर्षप्रकाशाविरोधी चन्द्रप्रातिपदिकार्थः पदद्वयेन प्रतिपाद्यत इत्यखण्डार्थत्वसिद्धिरन्यथा चन्द्रप्रातिपदिकार्थमात्रप्रश्नोत्तरतया विशिष्टमर्थं बोधयतो वक्तुरनवधेयवचनं न स्यात्तथाविभखण्डार्थलक्षणवाक्यत्वात्प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति सिद्धं यद्यपि प्रमाणान्तराभावात् ब्रह्मण्युपनिषदां प्रामाण्यमुक्तं किमपौरुषेयलक्षणप्रामाण्यं किम्वा प्रमाणान्तरसन्निकृष्टार्थविषयत्वापौरुषेयत्वादिस्यापेक्षं प्रामाण्यं किं वा प्रमाणान्तरयोरयथार्थविषयत्वात्तत्सिद्धार्थानुवादरूपमप्रामाण्यं नाद्यः गृहीतसङ्गतिकस्य पुंसः सत्यादिवाक्यश्रवणे

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग ! स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अबाधितानवगतार्थप्रमितदर्शनात्प्रामाण्येन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरसम्वादो न मिथ्यात्वापादकः सर्वप्रमाणानामनधिगतार्थगतत्वादन्यथा चक्षुषा गृह्यमाणस्य रूपस्य त्वचा गृहणात् मिथ्यात्वाशङ्का स्यात् न द्वितीयः प्रमाणान्तरसंभिन्नार्थत्वाभावात् पौरुषेयवचनप्रयुक्तत्वं हि सम्भवदस्य भूतार्थप्रयुक्तत्वप्रत्यक्षादीनामपि संभेदः स्यात् नापि तृतीयः स्पर्शज्ञानयोरपद्रव्यविषयस्य चक्षुषोऽनुबाधकत्वादर्शनात् एवं सिद्धे उपनिषदां ब्रह्मणि प्रामाण्ये तद्गतानां पदानामर्थान्तरकल्पना न युक्ताश्रुतहान्यश्रुतकल्पनाप्रसङ्गात् न च तेषां कर्तृस्वरूपप्रतिपादनपरता वक्तुं शक्या तत्तत्केन कं पश्यत् "एकमेवाद्वितीयम्" इत्यादिना क्रियाकारकफलादेर्निराकृतत्वात् नापि ब्रह्मणा उपासनाविधिशेषत्वं सम्भवति एतत्केन हेयोपादेयशून्यत्वेन क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं तथापि ब्रह्मात्मविज्ञानस्य फलपर्यन्तत्वात् यत्तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुं हि न शासना चौपनिषदां शास्त्रत्वमिति संक्षेपः एतेन स्वागतमित्याद्यपेक्षो निरस्तः यत्तु रजन्येषेत्यादि तत्तु यथार्थमेव तत्राऽनिद्रितानामज्ञानामपेक्षया ब्रह्मणो निशातुल्यत्वात् तदुक्तं "या निशा सर्वभूतानां तस्यां जागर्ति संयमी" इत्यादि यत्तु मातर इत्यादि तदपि न "असन्नेव स भवति असद्ब्रह्मेति चेद्वेद" इत्यादिना मात्रादितुल्यत्वाभिमानिनामास्तिक्यत्यामसत्त्वाभिधानेन तेषां भयोत्पादनस्य समुचितत्वात्तथापि दृष्टं वनमित्यादिनोपहासः सोपि साहसनिबन्धनः अन्तःकरणतद्धर्माणां यत्स्वसंवेद्यत्वात् अभिकार्यभावेति "अतीत्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इत्यादिश्रुतीनां निरालम्बनतापत्तेश्चेति दिक् ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासामुक्तिमेव वर्णयति–मैवमित्येकादशभिः। हे विभो ! व्यापक परमात्मन् ! इह मत्सन्निधौ न स्थेयमित्येवं गदितुं भवान् सर्वव्यापकः नार्हति परिच्छिन्नमुखे तच्छोभते इत्यर्थः । ननु सर्वत्र सर्वदा सत एकत्र सङ्गमे कोयं दुराग्रहः ? अत्राहुः—हे दुरवग्रह ! दुर्लभः अवग्रहः ग्रहणं यस्य स तथा तत्सम्बुद्धौ हे दुरवग्रह ! सर्वगोपितं यत्र स्वेच्छया प्रकटोसि तत्रैव प्राप्योसीत्यर्थः अतः देवः आदिपुरुषो भवान् यथा मुमुक्षून् भजते तथा भक्ताः किङ्करीः अस्मानपि भजस्व परिचर्यायां नियोजयेति फलितोर्थः केनापि हेतुना मा त्यज ननु मुमुक्षवः विषयान् त्यक्त्वा मां प्रार्थयन्तेऽतस्तान्भजाम्यत्राहुः नृशंस यथा भवति तथा सर्वे विषया भोगाः येषु तान् पतिपुत्रादीन् निवारयितुं प्रवृत्तानपि सन्त्यज्य तव पादमूलं प्राप्ता इति ॥ ३१ ॥

भाषा टीका ।

गोप्य ऊचुः

गोपी बोली कि–हे परम समर्थ ! समर्थ कहवेको तात्पर्य यह है, कि–नित्य जिनकी खिरकी के नीचे फिरकी खाते डोलते हैं तौऊ हमको बोलिवे को अवसर नहीं मिलतो वेई हम सब इकठौरी होयके आई हैं तिनको त्यागि वे को सामर्थ्य तुह्मारोई है, तासों तुम धन्य हो ! हे महाराज ! आप हमनसों ऐसे निर्दय कठोर बोलवे को योग्य नहीं हौ, काहेसो, कि–हम सम्पूर्ण विषयनको छोडिकें आपके चरणारविन्द के समीप आई हैं। हे दुराग्रही ! देख हम तेरी अनन्य भक्ता हैं तू हमैं भज हमको मत त्यागै, जैसे आदि पुरुष देव श्रीनारायण अपने भक्त मुमुक्षून को भजैहै ॥ ३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि च यदुक्तं यत्पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासमेवमेतदुपदेशानां पदे विषये त्वय्येवाऽस्तु उपदेशपदत्वे हेतुः, ईश इति । विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः । ईशत्वे हेतुः आत्मा किल भवानिति भोग्यस्य हि सर्वस्य भोक्ता आत्मैवेश इत्यतः प्रेष्ठो बन्धुश्च भवानेवेति सर्वबन्धुषु करणीयं त्वय्येवास्त्वित्यर्थः । अथवा धर्मोपदेशानां पदे स्थाने धर्मोपदेष्टरि त्वयि सत्यस्मासु च धर्मं जिज्ञासमानासु सतीषु त्वया धर्मविदा यदुक्तमेवमेतदस्तु न तु त्वं धर्मोपदेष्टा किन्तु भवानात्मेति अथवा यदुक्तमेतदुपदेशपदे तद्गोचरे पुरुषेऽस्तु नाम, त्वयि तु ईशे स्वामिनि सत्येवं काका नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूप इति । यद्वा, यदुक्तं पत्यादिशुश्रूषणं धर्म इति एवमेतत्त्वय्येवास्तु कुतः उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां पदे ऽधिष्ठाने कुत ईशे नहीश्वरमधिष्ठानं विना कोपि पतिपुत्रादिर्नामेति मन्यत्समानम् अलमतिविस्तरेण ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, सदाचारवर्गोऽयं । युष्माभिस्त्यज्यन्तां नाम विषयाः स्वधर्मस्त्ववश्यमपेक्ष्य एव तत्र सोपहासमाहुः—यदिति । अङ्गेति सप्रेमसम्बोधने ईशे परमेश्वरे वृन्दावने परमेष्ठिपुरन्दरादिभिरपि स्तूयमानत्वस्य दृष्टश्रुतत्वात् । यद्वा, सर्वव्रजस्य नाथे त्वयि प्रेष्ठः प्रियतमः नरवन्यवत् प्रियपात्रं तत्र च तनुभृतां सर्वेषामपि जीवानां नचान्य इव द्विजानां बन्धुश्च हितकारी सुहृदा यतः आत्मा परमात्मा किल निश्चितं त्वत्सेवैव परमो धर्मः तदपेक्षया अन्यत् सर्वं त्याज्यमेवेति भावः । तथाचोक्तम् "तावत् कर्माणि कुर्वीत" इत्यादि तस्मात्लिखितमेव मन्यदप्यंशितम् यद्वा,

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

धर्मविदा धर्मतत्त्वाभिज्ञेनापि त्वया धर्म इति यदुक्तं तत्पत्यादीनामनुवृत्तौ सेवायाम् आनुकूल्येऽपि वा रङ्गः रागो यासां स्त्रीणां तासामेव न त्वन्यासामस्माकं त्वदेकप्रियाणामित्यर्थः अतस्त्वदपेक्षया सर्वमेवान्यदुपेक्ष्यमेवेति भावः।तत्र हेतु दर्शयन्त्यः सर्वतोऽधिकतरं तस्य प्रियत्वं वदन्त्यः सन्त्यार्थं प्रार्थयन्ते,प्रेष्ठ इति। तनुभृतां सर्वेषामपि प्राणिनां प्रेष्ठः, किमुतास्माकं प्रेष्ठत्वे हेतुः बन्धुः हितकारी आत्मा च स्वतः प्रीतिविषयः चेतयितेति वा इति बहिरन्तरुपकारित्वमुक्तम् यद्वा, बन्धुराः प्रेमशृङ्खलाबन्धयुक्ताः भक्त्या सुन्दरा वा आत्मानो जीवा यस्मिन् सः अतः एतत् अस्माकं सर्वतनुभृतां वा स्वधर्म इति यत् त्वय्येवास्तु तत्र च एवम् अस्मदभिमतप्रकारेणेत्यर्थः । सुगोप्यत्वात् साक्षादनुक्तिः तत्र हेतुः उपदिश्यते सर्वैः शास्त्रैर्गुरुभिर्वा सर्वत्यागेन भजनीयतया कथ्यन्ते इत्युपदेशौ पदौ श्रीचरणौ यस्य तस्मिन् इति त्वत्पादाब्जापेक्षया स्वधर्मोऽपि परित्याज्य इति युक्तमेवेति भावः।अथवा ननु, सारज्ञास्तर्ह्युपेक्षितमभिव्यज्यतामित्यत्र सवैलक्ष्यं प्रार्थयन्ते, एवमुक्तप्रकारेण अत इति वा तनुभृतां त्वदनुगानां सर्वेषां सवयसामनुचरादीनां च किमुतास्माकं भवान् आत्मा स्वयमेव न त्वन्यद्वारा प्रेष्ठः प्रियतमः बन्धुश्च हितकारी अस्तु पदद्वयेनान्योऽन्यं प्रीतिरभिप्रेता किमर्थं त्वयि निमित्ते कथम्भूते एतस्य अस्मदभिप्रेतभजनविशेषस्य यो गुर्वादिभिः सख्यादिभिर्वा उपदेशस्तस्य पदे विषये तत्सिद्धय इत्यर्थः । धाष्टर्यपरिहाराय साक्षादनुक्तिः तत्र स्त्रीणां स्वत एव तत्सिद्धिः पुंसां तु भावमात्रेण किं वा तत्रैवोत्कटरागाणां दण्डकारण्यवासिमुनीनामिव जन्मान्तरे ज्ञेया, एषा सामान्येनोक्तिरत्यन्तप्रेमोत्कण्ठया । यद्वा, एतत् उपदेशास्पदे त्वयि ईशेऽस्मद्विधानां नाथेऽस्तु यतो भवान् बन्धुरात्मा सुन्दरस्वभावः अत एव तनुभृतां सर्वेषां प्रेष्ठः । यद्वा, अस्त्वेवमिति साऽसूयाऽभ्युपगमः उपदेशानां त्वद्भजनपरगुर्वादिवाक्यानां सर्वेषामेव पदे यतः ईशे स्वामिनि गोवर्द्धनोद्धरणादिना जीवनदे (यद्वा ता) तत्राऽपरसमर्पणेश्वरे त्वय्यपि एतत् एतादृशं सत्वं तनुभृतां देहधारिणीनां सतीनामस्माकं किल किम् आत्मा देही देहो वा बन्धुः प्रियः अपि तु नैव किं तु भवानेव प्रेष्ठः । यद्वा, देहधारणादात्मैव बन्धुः अकारप्रश्लेषेण भवांस्तु अप्रेष्ठः किं किलेति वितर्के वा तथापि काक्वा स एवार्थः वयं देहं त्यक्तुं न शक्नुम इति किं भवता वितर्क्यत इत्यर्थः । मुक्तदेहा इव वयमपि त्वदर्थेऽधुनैव देहं त्यक्ष्याम इति । भावः । अनेन रजन्येषेत्यस्योत्तरं देहानपेक्षया घोरादिभ्यो भयाभावात् तदैव भजनीयत्वेन व्रजं प्रतिगमनप्रयोजनाभावाच्च सर्वैश्वर्यं विनेदमर्थत्रयम् अत्र नर्मेदं तत् त्वय्येवास्तु त्वमेव स्त्रीभूत्वा पत्यादिसेवाधर्ममाचरेत्यर्थः । कुतः उपदेशपदे गुरावित्यर्थः । अन्यथा गुरावननुष्ठिते कर्मणि शिष्याणामप्रवृत्तिः स्यात् तत्र च त्वमेव समर्थ इत्याहुः-प्रेष्ठ इति । श्लेषार्थश्चायं भङ्ग हे व्रजभुजङ्ग ! भर्तृपुत्रसुहृदाम् अनुवृत्तिः स्त्रीणां स्वधर्मः तत्र सुहृदं तद्बन्धूनां च कदर्थनाय इत्युक्तत्वात् अतो मे कामः पूर्यतामिति धर्मविदा त्वया यदुक्तम् अपि कृष्ण अस्त्वेवमेतत् अस्तु एवमेतत् इति चत्वारि पदानि तदेव मे मम ईशे एतास्वेवास्तु यतः उपदेशपदे सर्वेषां पतिरेव गुरुः स्त्रीणामित्यादीनां शास्त्राणामुपदेशात् एवं भोः साध्व्यः ! भवतु पतिरेवानुवर्त्यतां किं त्वद्य शरज्ज्योत्स्नायां सुन्दरे वृन्दावने सर्वव्रजवासिभिः प्रेमास्पदत्वेन स्वीकृतस्य मे पार्श्वे निःशङ्क वनादिसौन्दर्यसुखमनुभूयतां तत्राहुः प्रेष्ठ इति । भवान् तनुभृतां व्रजसम्बन्धिनां प्रेष्ठोऽपि बन्धुरात्मा बन्धुरो विषम आत्मा स्वभावो यस्य विषमस्वभावत्वात् त्वयि न विश्वास इत्यर्थः।यद्वा,पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्मः सुष्ठु अधर्मः इति यत् धर्मविदा त्वयोक्तम् एवमेतत् त्वय्येवास्तु यत उपदेष्टरि कथम्भूते ईशे सर्वं वक्तुं व्यवहर्त्तुं च समर्थे न च तथोपदिशन्तं त्वां जना परिवदयुः यतः प्रेष्ठादिरूपो भवानिति ॥ ३२ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, उक्तो भर्त्तुः शुश्रूषणमित्यादिना स्वधर्मः कथमतिक्रम्यते इति तस्य कर्ममीमांसामतमाशङ्क्य तदुपमर्दि ब्रह्ममीमांसामालम्ब्य प्रतिभाव(ने)त्वेन तस्मिन्नात्मत्वमारोपयन्त्यस्तन्मतदूषणेन नास्माकमधर्म इति प्रतिपादयन्ति—यत्पत्यपत्येति । धर्मविदेति सोपहासमेव सर्वशास्त्रोपदेशानां पदे "शास्त्रयोनित्वात्" (१।१।३) "तत्तु समन्वयात्" (१।१।४)इति न्यायेन तत्तात्पर्यविषये तत एवेश त्वय्येकस्मिन्नेव एवं शुश्रूषणप्रकारेण एतदुपदेशवाक्यमस्तु । ननु, मयि तत्पदत्वमेव कथम् ? तत्र सच्छलमाहुः—किल वितर्के भवानात्मा परमात्मा कथं तादृशत्वमपि तत्राहुः—तनुभृतां सर्वेषामेव प्रेष्ठः निरुपाधिप्रेमास्पदत्वं ह्यात्मत्वं तल्लक्षणादात्मा तत्रापि सर्वेषां प्रेष्ठत्वात् परमात्मेति तथा बन्धुः सर्वेषां निरुपाधिहितकारी परमात्मा च सर्वावभासकत्वेन तादृशः ततश्च भवानेव स इति अनेनेशत्वमपि सिद्धं तस्मात् त्वमेव शुश्रूषणीय इति भावः । अथवा । ननु, सदाचारवर्गपूज्याः युष्माभिस्त्यज्यन्तां नाम विषयाः स्वधर्मस्त्ववश्यमपेक्ष्यस्तत्र सासूयमाहुः—यत्पतीति एवमुपदेशकर्त्तरि त्वय्येवैतदुपदेशास्पदत्वमस्तु त्वमेव तद्योग्यो भवसीत्यर्थः । ननु, कथमेतत्तत्राहुः—प्रेष्ठ इत्यादि । तनुभृतां प्राणिमात्राणां प्रेष्ठः चित्ताकर्षकः बन्धुः सर्वाभिलषितहितकारी अत एवात्मा स इव हृदयाधिष्ठाता तत्प्रेरयिता वा तस्मादस्माकं वा को दोषः किन्तु भवत एवेति प्रत्युत भवानेव तादृशदोषपरित्याजनायोपदेश्य इत्यर्थः । अथ पूर्ववदैश्वर्यपक्षोऽपि युज्यते स च तैर्व्याख्यात एव तत्र विवर्त्तवादमतखण्डनार्थद्वयम् अविशेषेणात्माभ्युपगमात् तथाप्यत्र भोक्तृत्वमीशितृत्वमेव ज्ञेयं राजनिर्देशभोक्तृत्ववत् अन्यथा जीवत्वापाते विवक्षितत्वासिद्धेः सामान्यतो निर्देशस्तु जीवस्य दृष्टान्तत्वापेक्षया तस्य सर्वस्वरूपत्वख्यापनापेक्षया च द्वितीये न त्वित्यादिकं काकुगर्भं तथा पर एवोपदेष्टा भवति न ह्यात्मन आत्मैवेत्यनुपदेष्टृत्वं ततश्चास्माकमुपदेष्टृत्वाभावे साक्षात् कृतात्मत्वे च न पतिशुश्रूषणादि विधिगोचरत्वमिति भावः । श्रीवैष्णवमतेनान्यदर्थद्वयम् अथवा यदुक्तमिति तत्र प्रथमार्थे स्वामिनि आश्रयत्वेन वृत्त इत्यर्थः । "देवर्षिभूताप्तनृणां पितृणाम्" इत्यादेः तदेवं तदुपासनमाहात्म्यात् धर्मं प्रत्याख्याय वस्तुविचारद्वारापि प्रत्याख्यायते यद्वेति अधिष्ठानत्वं तत्तत्स्फूर्त्याश्रयत्वं "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः अनैश्वर्यार्थे तु किलेति निश्चितम् उपदेशपद इति यद्गुरूपदेश्य

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

चरणारविन्द इत्यर्थः । इत्यपि व्याकुर्वन्ति अत्र नर्मेदं तत् त्वय्येवास्तु त्वमेव मोहिनीरूपेणाजितवत् स्त्रीभूत्वा पत्यादि सेवाधर्ममाचरेत्यर्थः । कुतः उपदेशपदं गुरावित्यर्थः । अन्यथा गुरावननुष्ठिते कर्मणि शिष्याणामप्रवृत्तिः स्यात् तत्र च त्वमेव समर्थ इत्याहुः ईशे सर्वकलासमर्थे ननु च कृत्रिमस्त्रीत्वे त्वयि न कोऽपि प्रीतिं कुर्यात् इति मन्तव्यं स्वभावत एव तव सर्वप्रेष्ठत्वादित्याहुः-प्रेष्ठ इति । बन्धुरात्मा मनोहरस्वभावः निषेधार्थश्चायम् अङ्ग हे कृष्ण ! पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्मः सुष्ठु अधर्म इति यत् धर्मविदाऽपि त्वयोक्तम् अन्यादृशयोजनया छलेन प्रतिपादितमित्यर्थः अमायया यो भर्तेत्याद्यभिप्रायात् एवमेतत् ईश एव सत्युपदेष्टरि सर्वं वक्तुं व्यवहर्तुं च समर्थ इत्यर्थः । तस्मिंस्त्वय्येवास्तु तेन त्वमेवोपदेश्यो भवेत्यर्थः । कथं तत्राहुः तनुभृतां श्रीवृन्दावनादिस्थितचतुर्विधप्राणिनामपि प्रेष्ठः प्रेमविषयः बन्धुः प्रेमकर्ता अत एवात्मा 'साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्,, इति वत् परस्परहृदयाभव इत्यर्थः । तस्मात् यदि त्वमेवैतेष्वनन्तेषु विरक्तः स्यात् तदा वयमपि स्वेषु स्वल्पप्रमाणेषु यथास्थितयोजनया धर्मप्राप्तेषु च स्यामेत्यर्थः । तत्र चास्मास्वेव तावद्विरक्तो भवेति नर्मतात्पर्यम् । यद्वा, यथा तथा वा योजना भवतु भर्तुः शुश्रूषणमित्यादिना यत्पत्यादीनामनुवृत्तिः स्त्रीणां स्त्रिया धर्म इत्युक्तम् एतदुपदेशकर्तरि त्वयि ईश एवमस्तु अनुज्ञायां लोट् भवितुं योग्यमित्यर्थः । यतः प्रेष्ठ इत्यादि । मर्तृविचारस्त्वस्माभिरेव ज्ञायत इति भाव इति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उपदेशपदे पद्यत इति पदम् उपदेशाधिगन्तव्ये त्वयि सत्यमेवतु न वयमिममर्थमप्राप्ताः किन्तु भवानस्माकं प्रेष्ठः प्रियतमः प्रियतमबुद्ध्या प्राप्त इत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं "भर्तुःशुश्रूषणं स्त्रीणाम्" इत्यादि तदनूद्य तत्रोत्तरमाहुः यदिति । अङ्ग हे कृष्ण ! धर्मविदा त्वया पत्यादीनामनुवृत्तिरेव स्त्रीणां स्वधर्मः स्वानुरूपो धर्म इत्युक्तं तदेतत् त्वयि उपदेशपदे सति पद्यते गम्यते इति पदं त्वय्युपदेशार्थं गन्तव्ये सति एवमेवास्तु उपदेशपदत्वाभिप्रायेण सम्बोधयन्ति-ईशेति ईश इति सप्तम्यन्तपाठोऽपि पाठः न वयमुपदेशार्थं प्राप्ताः किन्तु त्वत्सङ्गार्थे इति भावः । तदेवाविश्चक्रुः-भवान्प्रेष्ठः प्रियतम इति बुद्ध्या प्राप्ता इत्यर्थः । प्रेष्ठत्वे हेतुः तनुभृतामात्मा निरुपाधिकबन्धुश्च किलेति श्रौती प्रसिद्धिं द्योतयन्ति यद्वा, यत् पत्यपत्याद्यनुवृत्तिरेव स्त्रीणां स्वधर्म इत्युक्तं तदेतत्पत्यादिषु कर्तव्यमनुवर्तनम् उपदेशपदे उपदिश्यत इत्युपदेशः अनुवर्तनीयत्वेनोपदेष्टव्यपत्यादिरूपेणावस्थिते साक्षात्त्वय्येवास्तु पत्यादीन्प्रीतिविषयान् बन्धूंश्चापादयति तदन्तरात्मतया तद्रूपेणावस्थिते नित्यनिरुपाधिकपत्यादिरूपे सर्वविधबन्धौ त्वय्येव तेषु कर्तव्यत्वेन उपादिष्टानुवृत्तिरस्त्वित्यर्थः । तदेवाभिप्रेत्य विशिषन्ति प्रेष्ठ इत्यादिना ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुश्रूषस्व पतीनिति यदुदितं तत्राहुः-यत्पतीति । हे अङ्ग ! स्त्रीधर्मशास्त्रविदा त्वया स्त्रीणां पत्यादीनामनुवर्तनं स्वधर्म इति यत्तदस्त्येव न सन्दिग्धं तर्हि तान्विसृज्यात्र किमर्थमागतमिति तत्राह-तदपीति । देवपरे अस्मत्पित्रादीनां जामातृस्थानीये त्वयि तदपि क्रियत इति शेषः । देवानां वरणीये वा देवाद्यभीष्टदातरि वा न केवलं पतिस्थानीये ईशे ऐश्वर्यादिगुणसम्पन्ने तस्माद्वरणीय इत्यर्थः । परमानन्दविषयोऽपि हि पतिरयं कथं तद्विषय इत्याशङ्क्य न केवलमस्माकमेव परमानन्दगोचरः अपितु सर्वेषामिति भावेनाह-प्रेष्ठ इति । अस्माकं विशेषतोऽपि प्रेष्ठ इत्याह-बन्धुरिति । बन्धुरूपः परमात्मा किल तथा पुरातनवार्ता "वालौ सम्माण्ययोः किल" इति यद्वाऽऽत्मभूतो बन्धुः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अनन्तरं "जहुर्गुणमयं देहम्" इति प्राकृतदेहत्यागेन तत्कालसिद्धा अपि अधीराभावेनैवाहुः-यत्पत्येत्यादि । हे अङ्ग ! स्त्रीणां पत्यपत्यसुहृदाम् अनुवृत्तिर्धर्म इति यदुक्तं धर्मविदा त्वया तत् उपदेशपदे उपदेशकर्तरि त्वय्येवास्तु नास्मासु स पुनरस्माभिः शरीरैः सार्द्धं त्यक्तः त्वय्यस्त्विति परुषोक्तिः त्वं तथाविधदुःखभाग्भवेत्यर्थः । तत् दुःखं तत्रैव समुचितम् ईशत्वात् सर्वमेव सोढुं समर्थोऽसीत्याह-ईशेति । अथ क्रोधवशादनुचितमेवोक्तमिति परामृश्य शान्तं शान्तं तत् कदापि तव न भूयात् यत् त्वं तनुभृतां प्राणिमात्रस्यैव प्रेष्ठः बन्धुरात्मा च किल निश्चितम् इति क्रोधभावशान्तिः एतेन त्वय्यनुरक्तानां स्त्रीणां पत्यपत्याद्यनुवृत्तिर्महती यातनैव सा कदाऽपि कस्याऽपि मा भवत्वित्यर्थः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यद्यपि भगवतोक्तं स्त्रीणां स्वधर्मपरित्यागोऽनुचित इति अतः एषा रजनी घोररूपा नेह स्त्रीभिः स्थेयमिति तत्राप्याहुः— यत्पत्यपत्येति । पतिरपत्यानि सुहृदश्च एषामनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वया उक्त बहिर्मुखा हि धर्मशास्त्राः शारीरमेव धर्मं स्वधर्ममाहुः न त्वात्मधर्मं भगवद्धर्मं वा यतस्ते अनात्मविदः तथा धर्मविदैव त्वया न त्वस्मान्विचार्य आत्मानं वा त्वयोक्तं तस्यात्वस्माभिर्विषयनिर्धारः क्रियते न तु दूष्यते तदाहुः—अस्त्वेवमेतदिति । स्त्रीभिः स्वधर्मः कर्तव्य इति यदुक्तं तदेवमेवास्तु न हि पत्यादयः धर्मस्वरूपं नाप्याधारः किन्तु निमित्तं स च धर्मः अनुष्ठीयमानः प्रमीयमाणश्च भवति अनुष्ठीयमाने पुण्यादयो निमित्तं प्रमीयमाणे गुरुः अतः सा अनुवृत्तिः प्रथमतो गुरावस्तु अन्यथा स्वधर्मज्ञान एव न स्यात् । न च भगवद्वाक्यमनुवादकं पूर्वमस्माकं धर्मज्ञानाभावात् अन्यथा तदेव क्रियेत नापि सेवाव्यतिरेकेणाऽयं धर्मः स्फुरति अन्यथा वचनमात्रेणैव गतं स्यात् अत उपदिष्टस्य सिद्ध्यर्थं सेवा कार्या उपदेष्टस्य परम आश्रयः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

फलैत्र भवति अङ्गेति कोमलसम्बोधनात् नास्माभिः प्रतिकूलतया निरूप्यते । किञ्च, स्वधर्मा अनेकविधाः स्वापेक्षयोत्कृष्टविषयाः समानविषया हीनविषयाश्च तत्र पूर्वपूर्वधर्मप्राबल्यं यथा स्त्रीणां पतिपुत्रादीनां स्वसमानानां सेवाधर्मः एवं स्वनियामकस्येश्वरस्यापि अनुवृत्तिर्मुख्यो धर्मः अन्यथा तत्प्रेरणाभावे पतिसेवादौ न प्रवर्त्तेत अतः प्रकृतेऽपि भवानीश्वरः अन्तर्यामी तादृशोऽपि भूत्वा पतिपुत्राद्यर्थे न प्रवर्त्तयसि किन्तु स्वसेवायामेव प्रेरयसि अतो वाक्योक्तधर्मसिद्ध्यर्थमपि भवानादौ सेव्यः । किञ्च, धर्मो धर्मिमूलः तदविरोधेन कर्त्तव्यः फलार्थश्च कर्त्तव्यः अन्यथा देहनिष्ठेऽपि पुरुषं प्रवर्त्तयन् अनाप्तः स्यात् अत एव धर्मशास्त्रे पितृत्वाच्छरीरस्य तदनुरोध उक्तः द्रव्यसंस्कारविरोधे द्रव्यं बलीय इति न्यायाच्च तत्कस्यचित्प्रियो देहः कस्यचिदात्मा कस्यचित्परमात्मा कस्यचिन्निर्वाहकः भवांस्तु सर्वरूपो भवति यतः अत्यन्तं प्रेष्ठः परमप्रेमास्पदमानन्दः बन्धुर्देहनिर्वाहकश्च । किञ्च, न केवलमस्माकं किन्तु तनुभृतां सर्वेषामेव देहधारिणां भवान् नाशयत्यत्र त्वया दत्तमेव शरीरं स्वभुक्त्यादिप्रयोजनार्थं जीवो गृहीत्वा तिष्ठतीति निरूपितम् अतः स देहः भगवदीयः भगवतैव स्थापितः तस्मै निवेद्य तदनुपयोगे जाते पश्चादन्यस्मै देयं चेतनो हि प्रेयः अतः यावद्भगवदुपयोगं ज्ञास्यति तावन्नान्यस्मै दास्यति बोधितोऽपि यतस्तनुभृतां त्वमेव प्रेष्ठः प्रेष्ठाय च देयं प्रियं वस्तु अन्यार्थं क्रियेति प्रसिद्धिरेव प्रमाणम् किञ्च, न केवलं देहदाता किन्तु बन्धुरपि येन प्रयत्नेन शरीरं बिभर्त्ति स बन्धुः आत्मा बाह्यश्च अतोऽन्तरङ्गबहिरङ्गन्यायेन नित्यानित्यन्यायेन वा भवत्सेवैव मुख्या यदा पुनस्त्वदनुपयोगस्तत्रापि चेत्तथा प्रेरणा तदाऽन्यस्मै दास्यामो नान्यथेति धर्मिविचारः धर्मोऽप्यधिकः एतच्च त्वदनङ्गीकृतं सर्वमेव विरुद्धं भवतीति प्रार्थ्यते आस्त्विति सर्वरूपत्वात्त्वमेव सेव्य इति वा अन्यत्र एकदा सर्वसेवा प्राप्ता अंशतो बाधिता स्यात् विनिगमकाभावाच्च अनेन स धर्मोऽपि न भवति यः कालादिना बाध्यते अशक्यश्च भवति न हि प्रमाणं विरुद्धं विधत्ते अतः पत्यादिसेवाविधायकं च शास्त्रं त्वत्सेवामेव विधत्ते अतः अनुवादपक्षे स्वतन्त्रविधानपक्षे वा भवत्सेवैवोचितेति भावः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथ काश्चित्प्रखरास्तद्वचनेनैव तं पराजेतुकामा आहुः—यदिति । पत्यादीनाम् अनुवृत्तिः स्त्रीणां स्वधर्म इति यत्त्वयोक्तम् एतदेवमस्तु अनेन प्रकारेण भवतु नात्र विवदामहे एतदेवास्माभिः प्रतिपन्नं क्रियते इति भावः । ननु, केन प्रकारेण तत्राहुः उपदेशस्य पदे आस्पदे धर्मोपदेशकर्त्तरि त्वयि अनुवर्त्तिते सत्येव पत्यादीनामनुवृत्तिरुचितेत्यर्थः । प्रथमं धर्मोपदेष्टा आचार्यः उपसेव्यते पश्चात्तदुपदिष्ट आचरणीयो धर्म इति न्यायात् आचार्यानुवृत्त्यैव निष्कपटया धर्मः सिद्ध्येदिति च शास्त्रं तत्रापि ईशो परमेश्वरः, यद्याचार्य एव परमेश्वरः स्यात् तर्हि किमु वक्तव्यम् किञ्च ईश्वरत्वादेव तनुभृतां त्वमात्मा आत्मत्वादेव प्रेष्ठः प्रेष्ठत्वादेव बन्धुरिति अयमर्थः पत्यादीनां परमात्मसाहित्येनैवानुवृत्तिः शास्त्रोक्ता आत्मराहित्ये तु मृते सद्य एव गृहान्निःसारितानां तेषां नद्यादेस्तटे मुखानि दह्यन्त इति धर्मशास्त्रम् अतो मूर्त्तस्यात्मनस्तवैवानुवृत्त्या पत्याद्यनुवृत्तिसिद्धेः किमन्यैस्त्वत्प्रतिकूलत्वादेव निरात्मकैर्दग्धमुखैः पत्यादिभिरिति । ननु, पूर्णप्रेम्णा ऐश्वर्यज्ञानावरकत्वादासां च सम्पूर्णप्रेमवत्त्वात् कथमेतादृशमैश्वर्यज्ञानं सम्भवेत् उच्यते नारदपञ्चरात्राद्युक्तलक्षणो भक्तिरसामृतादिषु व्याख्यातः प्रेमाह्यनिशं नैसर्गिकौत्कण्ठ्यशैत्यवान् विरहसंयोगरसादनुभावकोऽपि ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः "नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि" इति । रसामृतोक्तेः, ब्रह्मानन्दानुभवपरार्द्धाधिकोऽपि विरहे तीव्रांशुकोटेरप्यधिकं सन्तापयन्नैश्वर्यमाधुर्यसम्बन्धिनः सर्वानेव भगवतो गुणान् प्रद्योतयत्येव ननु कांश्चिदावृणोति विरहस्य सूर्यतुल्यत्वेन सर्वप्रद्योतकत्वात् संयोगे तु सुधांशुकोटेरप्यधिकमाह्लादयन्माधुर्यमयानेव गुणान् प्रद्योतयति संयोगस्य शुभ्रांशुतुल्यत्वेन सुखदत्वात् माधुर्यादैश्वर्यावरणात् यत्र संयोगेऽप्यैश्वर्यं प्रद्योतते तत्र प्रेम्णा एवापूर्णत्वमवगन्तव्यम् । अत्र त्वासां भाविविरहभावनावतीनां विरह एवायं माहात्म्यस्फूर्तिरपि प्रेमकृतैव, प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत् ततस्तदतिशयस्तु तदतिशयमेव यथाह भरतचरिते "किमहो अरे आचरितं तपस्तपस्विन्या यदियमवनिरित्यादि" इति श्रीजीवगोस्वामिचरणाः ॥ ३२ ॥

विशुद्धरसदीपिका ।

किञ्च, यदुक्तं "भर्तुः शुश्रूषणं स्त्रीणां परो धर्मः" इति तत्कर्ममीमांसामतमवगत्य तदुपमर्दिब्रह्ममीमांसामतमाश्रित्य स्वप्रतिभाबलेन तस्मिन्नात्मत्वमारोपयन्त्यस्तन्मतदूषणोऽपि नास्माकं दोष इति प्रतिपादयन्ति यद्वा तस्तु तस्मिन्नेव मुख्यपतित्वं साधयन्ति—यत्पत्यपत्येति । त्वया धर्मविदेति सोपहासं येन स्वयमेव मुरलीकलेनाकारिताः सर्वे धर्मादिमहारितास्तस्य धर्मोपदेष्टृत्वमुपहसनीयमेवेति भावः । अत्रोढानूढाभेदेन प्रक्रियाद्वैविध्यमाह—ऊढानामप्यात्मकोटौ निक्षेप इति प्रथमं यदि च पत्याद्यनुवृत्तिः स्त्रीणां स्वधर्म इति निश्चितमेव तदेतदुपदेशानां पदे विषये त्वय्येवास्तु उपदेशपदत्वे हेतुः, ईश इति । "तमेतमात्मानं वेदाऽनुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादौ विविदिषावाक्यावगतसर्वोपदेशानामीशपरत्वावगमात् "शास्त्रयोनित्वात्" इत्यादिसूत्राच्च "कृष्णमेनमवेहि त्वमात्मानम्" इत्युक्तेः परमात्मा किल भवान् भोग्यजातस्य हि भोक्ता आत्मैवेश इत्यर्थः । "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथाः" इत्यादिश्रुतेः । आवाभ्यं भोग्यमित्यर्थः । अन्यथा जीवत्वापातेन विविक्षतासिद्धिरिति भावः । अत एव पुत्रादिवत्प्रेष्ठः निरुपाधिप्रेमास्पदं सुहृदादिवद्बन्धुश्च निरुपाधिहितकारी भवानेव पत्यादिषु तत्सम्बन्धस्याऽसकृद्भावादिति भावः अतः । सर्वबन्धुषु यत् करणीयं तत्त्वय्येवास्त्वित्यर्थः । अत्र तनुभृतामिति सामान्यनिर्देशेन परमात्मत्वं परमप्रेष्ठत्वं परमबन्धुत्वं च सिद्धम् । शास्त्रं च तदनुवृत्तिविधानं शाखाप्रकाशनसदुपासनपर्यवसायकं भवेति । सर्वे

विशुद्धरसदीपिका ।

चतुरस्रम् । अथवा धर्मोपदेशानां पदे स्थाने धर्मोपदेष्टरि त्वयि सति अस्मासु च धर्मं जिज्ञासमानासु सतीषु त्वया धर्मविदा यदुक्तं तदेव मेवास्तु न तु त्वं धर्मोपदेष्टा किन्त्वात्मा पर एवोपदेष्टा भवान् न स्यादिति भावः । अत्रापि धर्मविदेति सोपहासमेव "नापृष्टः कस्यचिद्ब्रूयात्" इत्यादि विरोधादिति भावः । इति व्याख्या द्वयी-विधसंवादमाश्रित्य अथ तत्त्ववादमाश्रित्य यथा धर्मविदेति प्रशंसा "धर्मो मद्भक्तिकृत्प्रोक्तः" इत्येकादशोक्तेः धर्मसेतूनां वक्ता कर्ता-ऽभिरक्षितेत्यादिवक्ष्यमाणाच्च त्वया यदुक्तमेतत् "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इत्याद्युपदेशानां तात्पर्यगोचर आदिपुरुषे त्वय्येवास्तु । ननु, तथाभावे विरुद्ध-धर्माक्रान्तत्वं प्रसज्येतेत्यत आहुः—ईश इति । सर्वाश्रये सर्व-नियन्तरि चेत्यर्थः । "यस्य भासा सर्वमिदं विभाति, एतस्यैवानन्द-स्यान्यानि भूतानि मात्रामुपजीवन्ति" इत्यादिश्रुतेः । यद्वा, भक्ता-ऽनुग्रहकातर इत्यर्थः । यतः तनुभृतां पत्यादीनामात्मा फलरूपो भवान् "देवर्षिभूताप्तेत्यादेः "कृष्णमेनमवेहि त्वमात्मानमखिलात्म-नाम्" इत्यादेश्च अत एव प्रेष्ठो बन्धुश्च । यद्वा, यदुक्तं पत्यादि-शुश्रूषणं धर्म इत्येवमेतत् किन्तु त्वय्येवास्तु कुतः शुश्रूषणी-यत्वेनोपदिश्यमानानां पदे अधिष्ठाने तत्कुतः ? ईश इति, न हीशमधिष्ठानं विना कोऽपि पतिपुत्रादिर्नामास्तीति भावः । अत्र श्रीपञ्चमस्कन्धस्य श्रीरमास्तुतिरनुसन्धेया अपि च परस्परविरुद्ध-स्वभावानां पत्यादीनामनुवृत्तिर्मण्डूकतोलनवदनुपपन्ना सती "अथात उपदेशो नेति नेति" इत्यादिश्रुतिसाचिव्यनाधिष्ठानभूतमीश्वरमेव सेव्यतयाध्यवसाययति इयमेव श्रुतार्थापत्तिर्नाम पत्यादिप्रयोगश्च दृष्टान्तत्वेन सङ्गमनीयः "भोजने जननीसमा" इत्यादिश्रीद्रौपदीमुद्दिश्य महाराजोक्तिन्यायादिति । यद्वा, अङ्ग स्त्रीणाम् अप्रधानस्त्रीणां सहचरीणामिति यावत् पत्याद्यनुवृत्तिः स्वधर्म इति यदुक्त-मेतत् मम किल श्रुतिमाह—तदर्थिका "नलमुखेन्दुपरां विबुधः स्मरः, इत्यादिवल्लुब्धप्रेमाख्यपरमगुरूपदेशस्य पदे गोचरे त्वय्येवास्तु तत्र पतिवद्वश्यसेव्यत्वं पुत्रवन्ममतास्पदत्वं सुहृद्वदादरणीयत्व-मभिहितं तदेतत्प्रकारत्रयसमुदिता शुद्धा प्रीतिः त्वद्विषयैवास्त्वि-त्यर्थः । यतः तनुभृतां लब्धसिद्धदेहानामात्मा प्राणेश्वरी तद्वत्प्रेष्ठः बन्धुरः "बन्धुरः सुन्दरेपि च" इति विश्वः । अत एव ईशे तद्वदाराध्ये भजनीय इत्यर्थः "रसं प्रायायामाभजति किल भावं व्रजमणौ" इति श्रीसुधानिधेः इयमन्तर्गृहगतासु लब्धसहचरीदेहानामुक्तिरिति सर्वमनवद्यम् लब्धयूथेश्वरीदेहानां तु मते मर्मेदम् तथाहि त्वया धर्मविदेति पूर्ववत्सोपहासमेव पत्यादिशुश्रूषणमुक्तमेतत्त्वमेव मोहिनीरूपेणाजवत्स्त्रीरूपो भूत्वा पत्यादिसेवामाचरेत्यर्थः । कुतः ? उपदेशपद इति हेतुगर्भितं विशेषणं गुर्वननुष्ठिते शिष्याणा-मप्रवृत्तेरिति भावः । तथा ईशे सकलकलाकुशले सर्वं कर्तुं समर्थे इत्यर्थः । नच कामिस्त्रीरूपे त्वयि कश्चित्प्रीतिं न कुर्यादिति शङ्कनीयं यतः प्रेष्ठो भवान् तथा बन्धुरः सुन्दर आत्मा स्वरूपं च यस्येत्यर्थः ॥ ३२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एतदेव द्रढयन् भर्तुः शुश्रूषणमित्यादेर्दीक्षितयार्थस्य स्वरूप-तत्त्वाद्वेचापेक्षार्थयोरमाहुः—यत्पत्यपत्येति । अङ्ग हे प्रिय ! धर्म-विदा त्वया पत्यपत्यसुहृदामनुवृत्तिः स्वधर्म इति यदुक्तं तदेत-दुपदेशपदे त्वय्येवास्तु इत्यन्वयः । तत्र त्वया धर्मविदेति सोपहासं हृद्धर्मविरवे तन्निष्ठत्वे च मुरलीसेवा न आह्वानं कथम् आवाहीत्रमुक्तौ तु विश्वासघातो महानधर्म एव, किञ्च त्वया नात्मतत्त्वदृष्ट्यैवमुक्तं किन्तु धर्मविदा तथा च धर्म-विचारेऽपि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इति श्रुत्या सर्वेषां चतुराश्रमधर्माणा-मीशपरत्वप्रतीतेः ईशत्वात्सर्वोपदेशानां पदे त्वय्येवेशे एत-दप्यनुवर्तनमस्तु अनुजयाय अस्य शराश्वासवदम्बानुवृत्तिः शास्त्रेषु त्वदाराधनायैवेति तत्त्वम् । यद्वा, उपदेशपद इति सेव्य-त्वेनोपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने त्वय्येव तदनुवृत्ति-रस्तु "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" यस्य भासा सर्वमिदं विभाति एतस्यैवानन्दस्यान्यानि भूतानि मात्रा-मुपजीवन्ति" इत्यादिनान्येषां त्वद्व्यतिरिक्तसत्तामानाद्यभावात् । यद्वा उपदेशपदे इत्यत्र पदशब्दस्योभयविषयोभयबोधकत्वादेतदुप-देष्टरि गुरावीशे च त्वय्येवानुवर्तनमस्तु प्रथमं गुरोस्तत ईश्वर-स्योभयोरेवाराध्यत्वात् । ननु, मया पत्युस्तद्बन्धूनां च सेव्यत्व-मुक्तमन्तःकरणशुद्धिविविदिषा द्वारा सर्वधर्माणां मयि पर्य-वसानेऽपि यत्र यस्य यदाराधनमुपदिष्टं तेन तदेव कार्यं तत्राहुः प्रेष्ठ इत्यादि यतो भवांस्तनुभृतामस्माकं पतीनां चात्मा "आत्मा नारायणः परः"—

"अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः ।
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" ॥

इत्यादिश्रुतिस्मृतिभ्यः अत एव प्रेष्ठोऽपि "न वा पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति"—

"सर्वेषामपि भूतानां नृप ! स्वात्मैव वल्लभः ।
इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि" ॥

इत्यादिश्रुतिस्मृतिभ्यः । नरत्वं विहाय पत्यादयः सेव्यास्तव पती-नामप्यात्मत्वात्तद्देहसेवात आत्मसेवाया वरिष्ठत्वात् तथा "सयुजा सखाया" इति श्रुतेस्तवैव बन्धुरूपत्वात्तदनुवृत्ति-रपि त्वय्येवास्तु नच "अनश्नन्नन्यो अभिचाकशीति" इति श्रुत्या ममाभोक्तृत्वात्कथं भोगादिनानुवृत्तिरिति वाच्यं पिप्पलशब्दा-भिधेयकर्मफलाभोक्तृत्वेपि "तदहं भक्त्युपहृतमश्नामि प्रयता-त्मनः" इति स्मृतेराराध्यत्वेन भोक्तृत्वस्य सिद्धत्वात् । यद्वा, पत्या-दीनामनुवृत्तिर्यत्स्त्रीणां स्वधर्म इति "धर्मसेतूनां वक्ता कर्ता-भिरक्षिता" इत्यादिवचनैर्धर्मविदा त्वयोक्तमेतत्तूपदेशपदे "सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्यः" "वासुदेवपरा वेदाः" इत्यादि-श्रुतिस्मृतिभ्यः सर्वोपदेशानां तात्पर्यविषये त्वय्येवेशेऽस्तु ननु, पत्याद्यनुवृत्त्युपदेशस्याहं कथं गोचरस्तत्राहुः—प्रेष्ठ इत्यादि । "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इत्या-दिभिस्तथावगमात् । यद्वा, उपदेशपदे त्वय्येवास्त्वित्यस्यायमभि-प्रायः यथा तरोर्मूलनिषेचनेन पत्रशाखादिपुष्टिर्जायते नतु प्रत्येक-पत्रादिनिषेचनेन तथा त्वदनुवृत्त्या सर्वाऽनुवृत्तिर्भवति न तत्प्रत्ये-कानुवृत्तेर्मण्डूकतोलनवदसम्भावितत्वेनापि त्वय्येवास्तु मण्डूक-तोलने यथैकारोहेऽन्यानवरोहात्पुनः सेटकपूर्तिस्तथा पति-

श्रीरामनारायणकृतभावभावविभाविका ।

सेवनपरत्वे पुत्रपालनानुपपत्तिस्तदुपपत्तौ तदनुपपत्तिस्त्वत्सेवायां तव सर्वात्मकत्वात् सर्वानुवृत्त्युपपत्तिरिति भावः । यद्वा पत्यपत्याद्यनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं तदेतदुपदेशपदे त्वय्येवास्तु अत्रापि धर्मविदेति सोपहासम्—

"नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोकमाचरेत्" ॥

इति स्मृत्या प्रश्नाभावे कथनानौचित्यमिति भावः । नच वाच्यम् "अपृष्टमपि तं ब्रूयाद्यस्य श्रेयोभिवाञ्छति" इति वचनान्नायं दोष इति यतो धर्मबुद्ध्या तदुपदेष्ट्रा धर्मविदा तस्य स्वयमप्यनुष्ठेयत्वात् अन्यथा—

"परोपदेशवेलायां सर्वे व्याससमा द्विजाः ।
तदनुष्ठानवेलायां मुनयोऽपि न पण्डिताः" ॥

इति न्यायात् तथा चैतदुपदेशपदे उपदिष्टार्थस्य स्वयमनुष्ठाय शिक्षयितुं तदुपदेशगोचरे त्वय्येवास्तु नचास्मासु अनुपदेष्टृत्वनुष्ठानाभावेऽपि दोषानुपपत्तेः किञ्च विद्वानर्थी समर्थश्च धर्ममीमांसायां धर्माधिकारी त्वं स्वेतद्धर्मवित् तत्फलोत्कर्षापकर्षादोषयोर्निरूपणात्तत्फलार्थी च तथा ईशः कर्तुं समर्थश्चेति त्वय्येवैषोऽधिकारसम्भवादस्तु तत्कर्तुमनीशासु तद्धर्मावित्सु तत्फलानर्थिष्वस्मासु वृथा तदालापः नच वाच्यं नाहं स्त्रीति कथं तद्धर्माधिकार इति त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारीति श्रुतिविरोधात् ननु, कादाचित्ककृत्रिमस्त्रीरूपे मयि कथं पत्यादिप्रीतिः स्यात्तत्राहुः प्रेष्ठ इत्यादि भवान् सर्वेषां तनुभृतां प्रेष्ठः स्त्रीधर्माननुचरति त्वयि पत्युः का कथा सर्वे जनाः प्रीयेरन् मोहिनीरूपे त्वयि दृग्धमन्मथस्य परमयोगेश्वरेश्वरस्यापि या दशा जाता तां त्वं वेत्स्येव यतः किल निश्चयेन भवान् बन्धुरात्मा बन्धुरः सुन्दर आत्मा यस्येति तथा "बन्धुरं सुन्दरेऽपि च" इति विश्वः । नचैवं सति कथं पुंस्त्वनिर्देशः क्रियते इति वाच्यं त्वयि सर्वसम्भवेऽप्यस्माभिः पतिभावनतया तथा निर्दिश्यते इति सर्वमनवद्यं यद्वा—

"यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम् ।
जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः" ॥

इति वचनात् त्वया धर्मविदोक्तं नत्वस्मद्दशाविदा यत्त्वयोक्तं तत्सर्वं त्वय्येवैषो समर्थोऽस्तु यदा वयमिव कस्मिंश्चित्त्वादृशे ऽप्राप्तचित्ता भवसि त्वां च स प्रिय एवैवमुपदिशेत्तदास्मदुक्तं तव प्रतीयेत । ननु, किं शापो दीयते युष्माभिरित्याहुः प्रेष्ठ इत्यादिना, यतस्त्वं प्रेष्ठोऽतस्तथा नहि त्वयि प्रार्थयामः किन्तु स्वदशाविज्ञापनाय तथा ब्रूमः तस्मात्सर्वथा त्वय्येवानुवृत्तिर्योग्यत्वेनास्तु नान्यत्रेति भावः ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तदप्युक्तम्—

"तद्यात माचिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः ।
भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया" ॥

इत्यादि । तत्राप्याहुः—यदिति । यत्पत्यपत्यसुहृदामनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् एतदुपदे शपदे त्वय्येवमेवास्तु अङ्ग हे भगवन्निति कोमलामन्त्रणेन न वयं प्रतिकूलं वदाम इति सूचयन्ति-त्वं हि उपदेशविषयैस्त्वद्वाक्यैः पत्यादिसेवनमुत्कृष्टफलप्रदमतः साक्षाद्भगवति सति किं परम्परयेति भावः । यतः इयं विविदिषा वाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः यद्वा, ईशोऽन्तर्यामिणि जीवो हि यत्रान्तर्यामिरूपेण त्वया प्रेर्यते तत्रैव प्रवर्त्ततेऽतः स्वसङ्गमार्थं त्वयैव प्रेरिता वयं त्वदाराधनसमीहां यत्तस्मादन्तर्यामिरूपेण सदाराधने प्रियेण प्रेष्ठरूपेण पत्याद्याराधन इत्यस्मद्वाक्यलतापादिकाप्रवृत्तिर्भगवतो नोचिता अन्तर्यामिकृतप्रेरणास्यैव प्रबलत्वादितिभावः । किञ्च, उपदेशनियोज्य उपदेशविषयश्च त्वमेवाऽतः त्वदाराधनेनास्ति किमपि बाधकमित्याशयेनाहुः—प्रेष्ठः परमप्रेमास्पदः अत एवात्मा परमप्रेमास्पदस्यैवात्मत्वात् स च तनुभृतां सर्वेषां तनुः यस्य कस्यचित् अतः सर्वेषां बन्धुरूपो भवानेव यतः संप्रत्यप्यस्मदनुग्रहार्थं नन्दनन्दनविग्रहस्तस्मादुपदेशकर्तृतदनुष्ठानतद्विषयात्मनस्तवाराधनमेव मुख्यं सर्वाराधनमिति भावः । यद्वा, त्वय्युपदेशपदे धर्मोपदेशकर्त्तरि सति अस्मासु धर्मजिज्ञासमानासु सतीषु एतत्त्वयोक्तमेवमस्तु न न वयं तथा नापि भावः न किन्तु भवानात्मेति अथवा एतदुक्तमुपदेशपदे पुरुषेऽस्तु नाम त्वयि तु ईशे स्वामिनि सति एवं क्व नैवमित्यर्थः । यद्वा, उपदेशपदे उपदेशेन निवर्तनीये लौकिकपुरुषसक्तचित्तत्वे एतदेवमस्तु ईश्वरे त्वयि तु नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूपः अथवा एवमेतत्त्वय्येवास्तु कुतः उपदेशपदे आराधनीयत्वेनोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने यतः ईशे न हीश्वरमधिष्ठानमृते कोऽपि पतिपुत्रादिशब्दाभिधेयस्तस्याऽधिष्ठानानतिरेकात् तस्मान्न वयमनुचिते कर्मणि प्रवृत्ता इति भावः । यद्वा, यत्त्वयोक्तमेतदेवमादावुपदेशकर्त्तरि आचार्ये त्वय्यस्तु आचार्यसेवनपूर्वकस्यैव धर्मानुष्ठानस्य सफलत्वप्रतिपादनात्तत्रापि ईशो परमेश्वर एवमाद्याचार्यः स्यात्तर्हि किमु वक्तव्यम् ईश्वरत्वादेव तनुभृतामात्मा तत एव बन्धुः सुहृत्तमात्मकानामेव पत्यादीनां सेवनं दृश्यते नतु मृतानां, तेषां तदाद्यविधानात् तेनास्मद्भाग्यवशात् सदानन्दात्मैव प्रकटितस्तस्मात्तत्सेवने प्रवृत्तानामस्माकं किन्ते रीति भावः । अनभिज्ञात्वे अधिकारमबुद्ध्वैव धर्ममुपदेष्टुं प्रवृत्तोऽसि "निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः" इत्युक्तत्वाद्ब्रह्मज्ञानामस्माकं विधिनिषेधाधिकाराभावादित्याशयेनाहुः—यदिति । इति यद्धर्मविदा त्वयोक्तमेतदुपदेशास्पदे तदेकस्वभावे एवमस्तु क्रियतामेवमुपदेशो न वयं निवारयामः परन्तु स्वाधिकाराभावादस्मत्तं गृह्णीम इति भावः । धर्मविदेति धर्मस्वरूपमात्रं वेत्सि नतु तदुपदेशाधिकारं यद्वा, यथापि धर्मविदसि न तु ब्रह्मविदत एवं ब्रवीषीति सोपहासं व्यङ्ग्यं यद्यपि निवारणमुचितमधिकारं विना ऽप्ययरोदनप्रायस्योपदेशस्य निषिद्धत्वात्तथापि ईश्वरत्वात्तव नास्त्यस्माकं निवारणसामर्थ्यमित्याशयेनाहुः—ईश इति । यद्वा, अधिकारं विनोपदेशकर्तृत्वमनुचितमपि प्रभुत्वान्न विरुध्यते । ननु, वामेव विभुनेत्युक्तत्वे नविभुतायाः कुटिलप्रवृत्तिजनकत्वाऽवगमात् अधिकाराभावसाधकमात्मानुभवमावेदयन्ति, प्रेष्ठ इति । अस्मत्प्रेष्ठो भवानेव सर्वेषां तनुभृतां बन्धुर्हितैषी परमात्मा आत्मा च । यद्वा, सर्वेषां परमप्रेमास्पदभूतो य आत्मा यश्च सुहृत्परमेश्वरः स तत्त्वमसि वाक्येन तत्त्वं तदुपलक्षितो

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

भवानेव तथा चाखण्डवाक्यार्थबोधवतीनां कुतस्त्वदुक्तधर्मे-
ऽधिकारः कुतश्चाशुभसम्बन्धः—

"पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा ।
ब्रह्मभूतस्य संयोगो नाशुभस्योपपद्यते" ॥

इत्यादिशास्त्रादिति भावः । ब्रह्मज्ञमन्यानां पक्षमवलम्ब्येयं युक्ति-
र्द्रष्टव्या तेषां तदभिमानेन यथेष्टाचरणे प्रवृत्तिदर्शनात्तदुदाहरणं
तु "ब्रह्मैव सर्वमिति वेदविदो वदन्ति तस्मान्न मे सखि ! पराऽपर-
भेदबुद्धिः । जारेऽथवा निजवरे सदृशाऽनुरागो व्यर्थं किमर्थ-
मसतीति कदर्थयन्ति" इत्यादि । यद्वा, स्त्रीणां स्वधर्म इति यत्त्व-
योक्तमेतदुपदेशपदे त्वय्यस्तु एतदुपदेशविषयो भवानेवाऽतो न
वयमुपदेशनीयाः । ननु, मम कुत उपदेशविषयत्वमित्याशङ्क्य
सौन्दर्यमाधुर्यादिगुणगणालङ्कृतस्यास्मच्चित्ताकर्षकस्य तवैवा-
पराध इत्याशयेनाहुः—भवान्बन्धुरात्मा बन्धुरो मनोहर आत्मा
स्वरूपं यस्य सः अत एव प्रेष्ठः किलेति अतस्तवैवंविधं त्वमेवास्म-
त्कुलनाशे प्रयोजक इति भावः । यद्वा, इति यत्त्वयोक्तं तदस्माकं
मनसि न प्रविशति यतस्त्वं धर्मवित् नतु तत्त्वदनुष्ठाता यो
यस्य धर्मस्यानुष्ठाता न भवति केवलं धर्मं जानाति न तद्वा-
क्यात्कस्यचित्कस्मिंश्चिद्धर्मे प्रवृत्तिर्भवति अतः काश्चिन्माहा-
भागाः पातिव्रतधर्मानुष्ठानपरा योषितस्ताऽस्मानुपदिशन्तु तदस्म-
न्मनसि तद्वाक्यं प्रविशेदतः किमर्थं जल्पसीति भावः । अस्म-
द्वाक्यमेतासां हृदि प्रविशत्विति यदि तवाग्रहस्तर्ह्येतदुपदेशपदे
गुरौ त्वय्यस्तु तथा च विष्णुना यथा मोहिनीरूपं धृतं तथा त्वमपि
स्त्रीरूपमादाय स्त्रीधर्ममाचर तत अस्मानुपदिश गुर्वनुष्ठिते
कर्मणि शिष्यभूतानामस्माकमपि प्रवृत्तिः सौकर्येण भविष्यतीति
भावः । ननु, अनुष्ठानादप्यहं दर्शयामि परन्तु किं कर्तव्यं स्त्रीत्वं
नास्ति ममेति चेत्तत्राहुः—ईश इति । सर्वकलासमर्थे त्वयि स्त्रीभा-
वोऽपि न दुर्घट इति भावः ननु, कपटेन गृहीतस्त्रीभावस्य मम पाणि-
गृहीतुरलभ्यत्वात्कथं पातिव्रतधर्मानुष्ठानमिति चेत्तत्राहुः—
प्रेष्ठो भवान्स्वभावत एव प्रियः मनोहरात्मा च तथा च
मोहिन्यां जानन्नपि कपटस्त्रीभावं स्वाभाविकं स्त्रीभावं परमप्रिया-
मुमां विहाय सन्दग्धकामः परमजितेन्द्रियोऽपि श्रीरुद्रस्तद्ग्रहणा-
याऽधावत्तथा लोकोत्तरसौन्दर्यवति त्वयि कपटेनापि गृहीत-
स्त्रीभावे जानन्तोऽपि कोटिशः स्वस्वदारान्परित्यज्य त्वद्ग्रहणायाऽ-
धाविष्यन्त्यतो न पतिर्दुर्लभ्य इति भावः । अनेन विधात्रा धर्म-
विनाशायैव त्वं रचितोऽसि पुरुषत्वे स्त्रीणां धर्मं नाशयसि
गृहीतस्त्रीभावे पुरुषाणां तन्नाशयिष्यसि धर्ममनुष्ठातुं तत्त्वं
कदापि न समर्थोऽसि यथेदानीं पुरुषधर्ममेकपत्नीव्रतलक्षणमनु-
ष्ठातुमशक्तो बह्वीनां स्त्रीणामासक्तत्वात्तथा गृहीतस्त्रीभावेऽप्य-
सङ्ख्यातपुरुषाणामासक्तिजनकत्वात्स्वधर्मानुष्ठानोपदेष्टुमशक्तस्त्वं
किमर्थं वृथा कण्ठशोषणाय प्रवृत्तोऽसि इत्यपि ध्वनितम् यद्वा,
धर्मविदा त्वया इति यदुक्तमेतदुपदेशपदे त्वय्येवमस्तु त्वद्-
हृद्येव जीर्णा भवतु ग्राहकाभावात् यद्वा ज्ञातमस्माभिर्निश्चितधर्म-
वित्त्वं त्वया सम्पादितमतः शिष्याः सम्पादनीयाः यथोक्तधर्म-
श्चोपदेष्टव्य इति तव महत्युत्कण्ठा वर्तते ततोऽस्मानेवमुपदेष्टुं
प्रवृत्तोऽसि परन्तु न वयं त्वां गुरुं कर्तुं समागताः अतः किमर्थ-
मपात्रवाग्जालजल्पनं नाश्रयसि अप्रतिपित्सितमर्थं प्रतिपाद-
यन्नाऽनवधेयवचनो भवति तथा च धर्मविषये यद्यपि जातोऽसि
तथाप्यधिकारानधिकारविवेकलेशेनापि विधुरोऽस्यतः सर्वोऽप्येतत्त्व-
त्त्वयि तिष्ठतु गुरोः सकाशाद्यथोक्तविवेकमपि लब्ध्वैतदधि-
कारलाभे सुखेनोपदेशं करिष्यसीति भावः यतस्त्वमीशः यथो-
क्तोपदेशधारणाधिकस्वीकारेऽधिकारिसम्पादने च समर्थः भव-
त्यस्तर्हि किमर्थमागता इति चेत्तत्राहुः—तनुभृतां सर्वेषां चतुर्दश-
भुवनस्थानां सौन्दर्यादिविशिष्टविग्रहवतां मध्ये भवान्मनो-
हरस्वरूपोऽतोऽस्माकं प्रेष्ठस्तथा च त्वयि रमणबुद्ध्या समागता
वयमतो न यथोक्तोपदेशार्हा इति भावः ॥ मानिनीपक्षे पत्याद्यनु-
वृत्तिलक्षणः स्त्रीणां स्वधर्म इति यत्त्वयोक्तम् एतत्तूपदेशकर्तरि समर्थे
त्वय्येवमस्तु सर्वदैवमेव त्वया वयमुपदेशनीयाः धर्मविदित्यनेनाऽहो
ज्ञातमद्यास्माभिस्त्वं धर्मं वेत्सीति सूचितम् योग्यं चैवमुपदेशकर्तृत्वं
तव यतः स्वस्मिन्प्रेमकृतः शुभं यथैव प्रवर्तयेत सज्जनैरित्याशयेनाहु-
र्हे प्रेष्ठ ! इति भावः । प्रेमविषयः यतो बन्धुर्यथोक्तोपदेशकर्तृत्वाद्धि-
तैषी अत आत्मा स्वात्मतुल्यस्तथा च कः सत्यभर्तृशुश्रूषणीयः ?
को वा कपटभर्त्रित्यादिविवेकवतीनामस्माकमग्रे स्वपाण्डित्यं नोद्घा-
टनीयमिति (स्वस्य च धर्मं नाशयेति) भावः । यद्वा, इति यत्त्व-
योक्तमेतदेवमुपदेशपदे त्वय्यस्तु त्वमपि स्वधर्ममाश्रित्य तिष्ठ नत्व-
स्माकं स्वस्य च धर्मं नाशयेति भावः । यतस्त्वमीशः नाशसंरक्षणयोः
समर्थः यत्तु भवदभिरतहृदयतीनां न स धर्मः कपटपूर्वकत्वादिति
चेत्तत्राहुः—प्रेष्ठ इति । तनुभृतां सर्वेषां प्राणिनां भवानात्मत्वात्प्रेष्ठः
यतः सर्वेषां हितैषी तथा च सर्वेषां तनुभृतां यथा त्वयि
प्रीतिः तथाऽस्माकमपि अतो विशेषप्रीतिमत्स्वस्मासु दोष-
मारोप्यास्मद्धर्मं नाशयितुमयोग्योऽसीति भावः । निवृत्तिपक्षे एवं
साक्षाद्ब्रह्मप्रतिपादकश्रुतिभिः स्वस्य ब्रह्मणि समन्वयोऽभिहितः
इदानीं "इन्द्रो यतोऽवसितस्य राजा अग्निर्मूर्द्धा दिवम्" इत्यादिकाः
श्रुतयः स्वाभिप्रायं ब्रह्मणो वेदयन्ति यदिति यत्त्वं सधर्म-
काणां श्रुतीनामिन्द्रादिप्रतिपादकानामस्माकमिन्द्राद्यनुवृत्तिस्ता-
त्पर्येण तत्र प्रवृत्तिः स्वधर्म इति धर्मविदा त्वयोक्तम् एतदेवं
त्वय्यस्तु यतः उपदिश्यमानानामिन्द्रादीनां एवाऽधिष्ठाने यत
ईश्वरे सर्वकारणभूते यतश्च भवानेव प्रेष्ठत्वात् तनुभृतां सर्वेषा-
मिन्द्रादीनामात्मा तद्बन्धुस्तत्स्वरूपश्चेन्द्रादिविग्रहरूपश्च तथा च
किमपि विकारजातं प्रतिपादयन्त्यः श्रुतयः सर्वाधिष्ठानभूतं सर्वात्मानं
सर्वस्वरूपं परमात्मानमेव प्रतिपादयन्ति "सर्वे वेदा यत्पदमाम-
नन्ति" इत्यादिश्रुतेरिति भावः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, भक्तिलक्षणं धर्मं पुरस्कृत्यान्योऽपि स्वधर्मोऽनुष्ठेय
एवेति प्रागुक्ता ममाज्ञा पालनीयेत्यत्र विवित्सायां धर्मो-
पयोगः जाते त्वद्विषयके ज्ञाने सर्वात्मनस्तव भजनमेव सर्व-
थाऽनुष्ठेयमस्तु त्वद्भजनेनैव सर्वं सम्पन्नं भवतीत्याहुः—"भर्तुः
शुश्रूषणं स्त्रीणाम्" इत्यादिना पत्याद्यनुवृत्तिः स्त्रीणां धर्म इति
त्वया धर्मविदा अङ्ग हे प्रियतम ! यदुक्तम् एवमेतदुपदेशपदे
उपदिश्यन्ते इत्युपदेशाः अनुवृत्तिविषयाः पत्यादयस्तेषां पदे
आश्रये पद्यते सर्वात्मतया ज्ञायते इति पदं गत्यर्थानां ज्ञानार्थ-
त्वात् तस्मिन्सर्वात्मतया ज्ञाते त्वयि अस्तु पत्यादिषु पुत्रा-
दिषु स्थानीयेषु याऽनुवृत्तिः त्वयोक्ता कल्पद्रुमस्थानीये त्वयि

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ।
तन्नः प्रसीद परमेश्वर ! मा स्म छिन्द्या आशां भृतां त्वयि चिरादरविन्दनेत्र ! ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

करिष्याम इति फलितार्थः । उपदेशपदत्वे हेतुरीशे इति ईश-त्वादेव तनुभृतामात्मा आश्रयः अत एव बन्धुः हितकारी अत एव प्रेष्ठः ॥ ३२ ॥

भाषा टीका ।

हे श्रीकृष्ण ! पति पुत्र और सुहृदनकी अनुवृत्तिकरनोई स्त्रीन को परम धर्म है, या प्रकार धर्म के जानन वारे ऐसे आपने जो धर्म को उपदेश दियो, सो ये तो जब कहनों रह्यो, कि—जब हम धर्मश्रवण करवे की इच्छासों आप सों धर्म पूछतीं और आपकों उपदेश करवे वारेन के आसन पै बैठारतीं तब आप उपदेश करते हमने तो कछु प्रश्न नहीं कियो, और आपही ते आप कहने लगे सो ये उपदेश, उपदेश के स्थान जो आप हो तिन आपही में रह्यो अर्थात् आपही मोहनी रूप धरके पतिव्रतान के धर्म को पालन करो, । अथवा ये जो आपने उपदेश दियो सो मुख्य पति के ठिकाने जो आप हो तिन आपही के विषै रह्यौ काहे सों, कि—आप देह धारिन के आत्मा हो ताईं सों परम प्रिय हौ तब हमारे पतीन कऊ आत्मा तुमही हौ फिर हम आत्मा कों छोड के वा आत्मा तें विमुख केवल देह रूप पतीन की सेवा कैसें करें तासों आपही की सेवा करें गीं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतत्सदाचारेण द्रढयन्त्यः प्रार्थयन्ते—कुर्वन्तीति । कुशलाः शास्त्रनिपुणाः तथा च शास्त्रम् “ किम्प्रजया करिष्यामो येषां नो ऽयमात्मा लोकः” इति ॥ ३३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, कामान्धिचन्द्र ! न केवलमस्माभिः कामेनैवेदमुच्यते किन्तु सदाचारादिविचारादपीति द्रढयन्त्यः सकाकु प्रार्थयन्ते—कुर्वन्तीति । हि एव त्वय्येव नत्वन्यत्र रतिं भावं न तु श्रद्धामात्रं तत्र हेतुः स्वे बन्धौ आत्मन् आत्मनि चेतयितरि च अतः नित्यप्रिये बहिरन्तरुपकारित्वात् सुखप्रदत्वाच्च यद्वा, हे आत्मन् ! हे नित्येति सम्बोधनं तेन च पत्यादीनां जडत्वमनित्यत्वं च तथा स्व इति प्रिय इति च क्रमेण हितकारितया स्वाभावि-कतया च प्रियत्वोक्त्या वैपरीत्यमपि तेषां ध्वनितम् अतोऽस्माकं पत्यादिभिः किम् अपि तु न किञ्चित् प्रयोजनमित्यर्थः । पत्यादि-प्रयोजनस्य तदधिकस्यापि त्वत्त एव सुसिद्धेः विशेषतश्चा-र्तिदैः संसारहेतुत्वात् नश्वरत्वेन शोकत्वादिजनकत्वाच्च आदि-शब्देन जननीपितृभ्रात्रादयः । यद्वा, आर्तिदैरपि “द्यो अवखण्डने” ते दुःखं सम्यगवखण्डयितुं न शक्ता एव कथञ्चित् कदा-चिद्वा किञ्चित् दुःखं खण्डयन्तु तथापि तैः किमित्यर्थः । अन्यत् समानं यद्वा कुशलाश्चतुरा नित्यप्रिये सर्वदा प्रेमास्पदे त्वयि रतिं कुर्वन्ति स्व आत्मन् स्वात्मनि स्वात्मविषये आर्तिदैः दुःखदैः पत्यादिभिः किं प्रयोजनमित्यर्थः । तत्तस्मात् सदाचार-प्राप्तत्वेन अन्येषामार्तिदत्वेन च त्वद्रतेरेव कार्यत्वात् नः त्वद्भक्ता अस्मान् प्रति प्रसीद स्वीकारप्रसादं कुरु । ननु, भूषणा प्रियाः प्रायोऽङ्गनाः स्युरिति कश्चिदन्यो मत्तो भूषणादि-प्रसादो गृह्यतां तत्राहुः-वरदानामपि सर्वेषामीश्वरेति अतो-ऽसाधारणप्रसाद एव तवोपयुज्यत इति भावः । तमेवाभिव्यञ्ज-यन्ति—मास्मेति । स्मेति प्रसिद्ध्या द्रढीकरणं चिरात् अबोधो-दयात् आशरीरग्रहणाद्वा धृतां नैश्चल्येन कृतां स्वाशाम् इति पतिभिः सह तत्सम्बन्धो निरस्तः मा छिन्द्याः किन्तु सफ-लयेत्यर्थः । अन्यथा तच्छेदेन तदेकावलम्बजीवनानामस्माकं सद्यो जीवनोच्छेदापत्तिरितिभावः । धृतामित्यत्र हेतुः हेऽरविन्दनेत्रेति परमसुन्दरेत्यर्थः । अतोऽग्रेऽपि गास्यते शरदुदाशयेत्यादि । यद्वा, अरविन्दरूपकेण दृष्ट्यापि सर्वेषां तापहारित्वादिकं ध्वनितम् अतोऽस्मासु तद्वैपरीत्यमयुक्तमिति भावः । किञ्च, वरदेश्वरेति पूर्वं वस्त्रहरणे दत्तो वरोऽपि स्मारितः श्लेषेण वरद “द्यो अवखण्डने” स्वदत्तवरच्छेदक ! तच्च युक्तमेवेत्याहुः-ईश्वर परमस्वतन्त्रेति एषा प्रणयकोपोक्तिः यद्यपि कृतकात्यायनीव्रताः कुमारीः प्रत्येव वरो दत्तोऽस्ति तथापि स्ववर्ग्यत्वात् सख्येन साम्यात् सर्वा अप्युक्ताः अन्यथौचित्यात् यद्वा, अहो महानागर ! कथञ्चिन्मुग्धा वा त्वां न भजन्तु वयं कथं त्वां न भजेमेत्याहुः-कुर्वन्तीति । कुशला विदग्धाः अतो विदग्धानामस्माकं तैः किमित्यर्थः विशेषतश्चास्मान् प्रति त्वया वरो दत्तोऽस्तीत्यभिप्रायेणाहुः-तदिति । अन्यत्समानम् अनेन मातर इत्यस्योत्तरं तेषामार्तिदत्वेनोपेक्ष्य-त्वात् । यद्वा, पूर्वोक्तान्त्यपद्यानुसारेण मरणमेव द्रढयन्त्यः प्रार्थयन्ते-कुर्वन्तीति । स्वे गोलक्षणधर्मे आत्मा चित्तं यस्य तत्-सम्बोधनम् अलुक्समासः तेनावैदग्ध्यादिकमभिप्रेतं न विद्यते प्रियः कोऽपि यस्य तस्मिन् अप्रिये त्वयि इति हेतोः आर्तिदैः दुःखच्छेदकैः पत्यादिभिः सह वर्तमानाः कुशलाश्चतुरा अस्मा-दृश्यः किं कुतो रतिं कुर्वन्ति अपि तु अस्थाने कर्तुं नार्हन्ती-त्यर्थः तत् अस्मान् प्रति मा प्रसीद आशां न छिन्द्याः अरं परमतीक्ष्णां प्रान्तेङ्गतया बिन्दतीत्यरविन्दं चक्रं तद्वच्छेदके नेत्र यस्येति श्लेषेण परमघातकत्वं सूचितम् एषा मुमूर्षया कोपोक्तिः किञ्च, अरविन्दवत् रात्रावप्रकाशमाने नेत्रे यस्येति अतः परमसुन्दरत्वाद्यस्य स्वधुनोपेक्षा युक्तैवेति भावः । अतस्त्वया मातरम् इत्यादिना यत्तेषामपेक्षणमुक्तं तद्युक्तमेवेत्येवमसूयाद्युप-गमद्वारा तदुत्तरमुक्तं श्लेषार्थश्चायं कुशला मङ्गलरूपाः साध्व्य इति यावत् नित्यप्रिये स्व आत्मनि निजस्वरूपे विषये आर्ति-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

प्रदैरपि पत्यादिभिर्हेतुभिः किं त्वयि रतिं कुर्वन्ति अपि तु नैव तत्तस्मात् हे वरद ! हे ईश्वर ! नः प्रसीद चिराद्वयमत्र माऽऽस्म मा तिष्ठाम शीघ्रं गृहगमनायानुज्ञां देहीत्यर्थः । त्वयि तु मयि इति छेदः मयि अरविन्दनेत्र । अस्मदङ्गसङ्गार्थं । त्वया स्वयं धृतां तु आशां छिन्द्याः छिन्धि यद्वा, आशां व्रजगमनदिशं मा स्म छिन्द्याः मा वर्त्मपातयेत्यर्थः । मा निह्नुष्व । ननु, स्वयमेव निरीक्ष्य गृह्णीध्वं तत्राहुः—त्वयि धृता "धृङ् अवस्थाने" इत्यस्य त्वय्येव स्थितां त्वयाक्रान्तामित्यर्थः ॥ ३३ ॥

श्रीमज्जीवगोस्वामीकृतवैष्णवतोषिणी ।

एवं शास्त्रबलेन पत्यादौ शुश्रूषणां प्रत्याख्याय सदाचारबलेनापि प्रत्याचक्षाणा "मातरः पितरः पुत्राः" इत्यादिना प्रपञ्चितं तत्स्नेहनिगडं विशेषतः परिहरन्ति—कुर्वन्ति हीत्यर्द्धकेन । हि प्रसिद्धौ कुशलाः " य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः " इत्यादि श्रीगर्गवाक्यानुसारेण साराऽसारविवेकचतुराः त्वयि नित्यप्रिये स्वाभाविकप्रमोदपदरूपे रतिं प्रीतिं कुर्वन्ति इति तस्य स्वस्मिन्परस्मिंश्च सुखमयस्फुरणमाभिप्रेतं पत्यादीनां तद्वैपरीत्यमाहुः—स्वे आत्मीये आत्मन् आत्मनि च आर्त्तिदैः दुःखप्रदैः तादृशभगवद्विमुखतापादकास्मन्निवारणतात्पर्य्यात् अतस्तैः पत्यादिभिरस्माकं किं प्रयोजनम् स्व इति सर्वनामत्वेऽपि पूर्वादित्वेन स्मात् स्मिनोर्विकल्पात् तदेवं प्रथमदिक्स्थिता, भक्ता भजस्वेत्युपक्रमानुरूपं विवक्षितमुपसंहरन्ति, तत् तस्मात् नोऽस्माकम् सम्बन्धे अस्मान् प्रतीत्यर्थः । प्रसादस्यैवावश्यकार्य्यताभिप्रायेण व्यतिरेकमुखेनाभिव्यञ्जयन्ति—मास्मेति । चिरात् प्राबोधोदयात् धृतां नैश्चल्येन कृताम् इति पतिभिः सह तत्सम्बन्धो निरस्तः मा छिन्द्याः किन्तु सफलयेत्यर्थः । अन्यथा तच्छेदेन तदेकालम्बनजीवनानामस्माकम् सद्यो जीवनच्छेदः स्यादिति भावः । आशामेव विशेषेण व्यञ्जयन्ति—हे वरद ! कुमारीषु सङ्कल्पो विदित इत्यादिना दत्तवरविशेष ! हे ईश्वर ! अन्यासामपि दुर्घटं मन आदिघटनाविशेषसमर्थेति चिराद्धृतामित्यत्र हेतुः हे अरविन्दनेत्रेति शरदुदाशय इत्यादि वक्ष्यमाणात् अरं चक्रप्रान्तं तदिव अरं तत्पत्राग्रभागः हृदयच्छेदकत्वेन तद्विन्दतीति तु संरम्भस्यान्तःस्थितेः श्लेषश्च अरविन्दवत् राजीवप्रकाशमाने नेत्रे यस्येत्यतः परमसुन्दरीष्वप्यस्मासु सम्प्रति तवोपेक्षा युक्तैवेति नर्मद्योतना च । किञ्च, अरविन्दरूपकेण हृदयापि सर्वेषां तापहारित्वं ध्वनितम् अतोऽस्मासु तद्वैपरीत्यमयुक्तमिति भावः । ऐश्वर्य्यार्थस्तु हि शास्त्रप्रसिद्धौ कुशलाः श्रीनारदादयः रतिं भावं न तु श्रद्धामात्रं तत्र योग्यमित्याहुः नित्यप्रिये कुतो नित्यत्वं प्रियत्वञ्च तत्राहुः—स्वे आत्मन्यपि विषये आत्मनि परमात्मनि इत्यर्थः " कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इत्युक्तेः । एतेन तस्य सुखरूपत्वं च ध्वनितम् अन्यथा निरुपाधिप्रमास्पदत्वं न स्यात् अतोऽस्माकं पत्यादिभिः किम् अपि तु न किञ्चित् प्रयोजनमित्यर्थः । ननु, भवतीनां पत्यादयोऽपि मादृशा नित्यप्रिया एव तेऽप्याहुः आर्त्तिदैः तादृशकुशलवृन्दाभिलषितास्मदीयभगवद्भजनविरोधिभिः किं ? हे वरदेश्वरेति वरस्याव्यभिचारित्वं दर्शितमिति एवमुत्तरत्राप्यूह्यं निषेधार्थश्चायं ननु, अहं तनुभृतां प्रेष्ठश्चेत् तर्हि स्वस्वोचितप्रेमकर्त्तारस्त इव भवत्योपि स्वोचितं रत्याख्यं भावमेव मयि कुर्वतामित्याशङ्क्याहु—कुशलाः मङ्गलरूपाः साध्व्य इति यावत् आर्त्तिदैः दुःखावखण्डकैः पत्यादिभिर्हेतुभिः स्वे गृहादौ आत्मनि च नित्यप्रिये सति किं त्वयि रतिं कुर्वन्ति अपि तु न तत्र स्वाद्विनाशापत्तेः तत् तस्मात् हे वरद ! वाञ्छितप्रद ! ईश्वर ! गोकुलस्वामिन् ! नः प्रसीद प्रसादमेवाहुः चिराद्वयमत्र माऽऽस्म न तिष्ठाम अस्तेर्लुङ्विलङ्वत् प्रयोग आर्षः शीघ्रं गृहगमनायानुज्ञां देहीत्यर्थः । तथा त्वयि धृताम् अवस्थिताम् आशां चास्मदङ्गसङ्गेच्छारूपां छिन्द्याः छिन्धि "धृञ् अवस्थाने" इति अत्र वरदेश्वरेत्यत्र परमेश्वरेति पाठोऽपीश्वरत्वसङ्गमनीयः छिन्द्या इत्यत्र छिन्द्यादिति पाठे तु भवानित्यध्याहार्यम् ॥ ३३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

माऽस्मच्छिन्द्याः विफलां न कुर्याः ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्र सदाचारं प्रमाणयन्त्यो विज्ञापयन्ति—कुर्वन्तीति । कुशलाः शास्त्रनिपुणाः आत्मन्यात्मन्यत एव नित्यप्रिये त्वय्येव रतिं कुर्वन्ति नित्यप्रिय इत्यनेन सोपाधिकपत्यादीनामानित्यप्रियत्वं सूचितं तथा चोक्तम्—

> "तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
> तदेव कोपाय यतः प्रसादाय च जायते" ॥

तस्माद्दुःखात्मकं नास्ति न च किञ्चित्सुखात्मकम् । इति । कुशला इत्यनेन "नवा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय" इत्यादिशास्त्रार्थाभिज्ञत्वमभिप्रेतं यत एवमतोऽन्यतो दुःखदैः सोपाधिकैःपत्यादिभिः किं न किञ्चित्साध्यमस्तीति भावः । तत्तस्मान्नोऽस्माकं प्रसीद त्वयि चिरं धृतां यद्वाऽस्माकमाशां माऽस्माच्छिन्द्याः विफलां न कुर्या आत्मपर्यन्तवदान्यस्य तवेदमाशाच्छेदनमनुचितमित्यभिप्रायेण वरदेश्वरेतिसम्बोधनं त्वत्सौन्दर्यावलोकनेन त्वय्येवाशा धृतेत्याभिप्रायेण सम्बोधयन्ति अरविन्दनेत्रेति ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि त्वमेवाऽस्माकं मुख्यः पतिरित्याशयेनाहुः—कुर्वन्तीति । कुशलाः सारासारविवेकपटवः स्वे आत्मन् अनिमित्तबन्धावात्मनि स्वामिनि वा त्वयि रतिं कुर्वन्ति नोऽस्माकं नित्याप्रियैः पत्यादिभिः किं प्रयोजनमिति शेषः । नित्याप्रियत्वं कथमिति तत्राहुः—आर्तिदैरिति । अनेन कुन्वति सत्साः इत्येतत्परिहृतं ततः किमत्राहुः—तत् इति । यस्मादेवं मुख्यो भर्ताऽतस्तस्मात्तर्हि किंरूपः प्रसाद इत्यत्राहुः—माऽस्मेति । आशामति तृष्णाम् "आशादिगतितृष्णयोः" इति यादवः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

साध्व्यः खलु त्वय्येव रतिं कुर्वन्ति नान्यपतिषु नापत्यादिषु च तस्मादयमुपदेशो न कार्यः नास्माकमाशाच्छेदेति रुदन्मुख्यः काश्चिद्धीरा आहुः—कुर्वन्तिहीत्यादि । कुशलाः कल्याण्यः त्वयि हि त्वय्येव रतिं कुर्वन्ति कीदृशे त्वयि आत्मन् आत्मनि आत्मशिति सम्बोधनं वा पुनः कीदृशे नित्यप्रिये नित्यसुहृदि तासाम् आर्त्तिदैः पतिसुतादिभिः किन्ताः पत्यन्तरे सुतादौ च तुच्छबुद्धिमेव कुर्वन्ति अतः कुमार्य्य एव कुशला यतस्त्वयि नित्यप्रिये रतिं कुर्वाणाः पत्यपत्यादितुच्छीकृताः त्वदितरानङ्गीकारात् तत्तस्मान्नोऽस्मभ्यं प्रसीद मैवं ब्रूयाः हे वरदेश्वर ! चिरात् त्वयि धृताम् आशां मास्म छिन्द्याः आशालता यथा फलवती तथा हे अरविन्दनेत्र ! प्रसीदेति पुनरावृत्तिः अरविन्दनेत्रेति सम्बोधनं रात्रावरविन्दस्य सङ्कोचात् मुद्रितनेत्रता गम्यते तेन कटुभाषितं प्रसन्नया दृष्ट्या न कथ्यत इति लोकव्यवहारात्तथैव श्रीकृष्णेन च कथितमिति गम्यते ॥ ३३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं राजसीनां निरूप्य सात्त्विकीनां निरूपयति—कुर्वन्ति हीति । यदप्युक्तं मातरः पितर इति मातृत्वं बन्धुसाध्वसमिति तत्किमिदं प्रथमतया अस्माभिरेव क्रियते आहोस्वित् अन्येऽपि कुर्वन्ति तत्रापि किमधमा मात्राद्यनुवृत्तिं कुर्वन्ति आहोस्वित् उत्तमाः उत्तमा अपि त्वत्सेवायामशक्ताः आहोस्वित् शक्ता इति विचारणीयम् अस्मिन्नर्थे निर्णायकं महतां चरित्रमाहुः, येत्वात्मनि कुशलाः आत्महितार्थिनः न तु देहेन्द्रियाणां ते त्वय्येव रतिं कुर्वन्ति इनेहेन हि क्रिया भवति भगवत्कृतमेव जीवगामि भवतीति तदुपपादितं “तस्यात्मने प्रतिमुखस्य” इत्यत्र प्रीत्या च सेवा भवति यदि पुत्रादिसेवापि धर्मः स्यात्तदा पुरुषार्थत्वेनात्मपर्यवसायिनी स्यात् कुशला इत्यनेन तेषां कौशलमेतत् अवृत्त्यपेक्षया निवृत्तिरुत्तमा इन्द्रियस्वमनसामर्थ्याभाव एव अन्यगामि कर्त्तव्यं यतो यतो निवर्त्ततेत्यत्र निरूपितं निरुद्धानीन्द्रियाण्यात्मगामीनि भवन्ति तत्राप्यात्मगामीनि तदैव भवन्ति यदि त्वदर्थमुपयुक्तानि भवन्ति अतः केवलनिग्रहफलापेक्षया ये त्वयि रतिं कुर्वन्ति ते कुशला इति हिशब्दार्थः । एवकारवचनेन च पूर्ववदेकत्र सर्वसम्भवो निरूपितः । किञ्च आत्मा स्वरूपभूतः नरवद्यासन्यायेन तथा जातः । किञ्च, येन हि सेवा कर्त्तव्या स चेत् प्रियः कालपरिच्छेद्यो न भवेत् भवानेव अन्यथा जारसेवापि धर्मः स्यात् जन्मयादिनस्य परिच्छेदकत्वात् । किञ्च, पतिसुतादयश्च न धर्महेतवो भवितुमर्हा न्तः आर्त्तिदाः न हि धर्मनिमित्तानि कदाचिद्दुःखदानि भवन्ति अन्यथा संसारो न स्यात् अतस्तैः किम् ? तेषां भयमस्तु अन्यद्वा, न तैः किञ्चित्प्रयोजनमित्यर्थः । परमेकमेव प्रार्थनीयं भवभागे सर्वशास्त्रं युक्तिश्च व्यर्थास्यात्तदाहुः, तत्तस्मात्प्रसीद त्वं प्रसन्नो भव त्वत्प्रसादादेव लोका भ्रान्ताः दुःखहेतुष्वपि प्रवर्त्तन्ते । ननु, किं साधनं प्रसादे भवतीनामिति चेत्तत्राहुः, वरदेश्वरेति । ये हि वरान् प्रयच्छन्ति ते लोकानां क्लेशं ज्ञात्वा यतो दयालवः अन्यथा तपांसि क्रियमाणे वरं न प्रयच्छेयुः तेषामपि

त्वमीश्वरोऽतिदयालुः तद्द्वाराऽपि सर्वेषां दुःखशमनं करोषि अतो वयं क्लिष्टाः क्लेश एव साधनं तपोवत् निषिद्धप्रकारस्तु यद्यत्र कश्चन भविष्यति स न कर्त्तव्यः । ननु यथैतावन्तं कालं पतिसेवा कृता एवमेवाग्रेऽपि कर्त्तव्या प्राप्तत्वात् गौणमपि कर्म समारब्धं समापयेदिति तस्मादविचारेणैव पतिसेवां कुरुतेति चेत्तत्राहुः मा स्म छिन्द्या आशां धृतामिति नास्माभिः पतिसेवा कृता तदर्थं वा स्थितं त्वदाशया स्थितं मध्ये स्थितिनिर्वाहार्थमेव तदङ्गीकारः इदानीं चेत्समागतानामभिलषितार्थो न सिध्येत् तदा आशा भग्ना भविष्यति तस्यां गतायां प्राणा एव गमिष्यन्तीति अत एव केन चित् स्त्रीहृदयज्ञेन निरूपितम् “आशाबन्धो हृदयं रुणद्धि” इति एतस्य मूलमपि स्त्रीशास्त्रे भविष्यति चिरात्त्वय्येव धृतां तस्यां छिन्नायाम् अवलम्बनाभावात् अधः पतिष्यामः इति स्मेत्ययमर्थः प्रसिद्धः अरविन्दनेत्रेति सम्बोधनं दृष्टयैवाप्यायकत्वं निरूपयति आशाहेतुरप्यनेनोक्तस्तापापहारकदृष्ट्या दर्शनात् भावोद्गारिणया एव तथात्वात् इयदवधि जीवनमप्यत एवेति भावः ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

काश्चित्तदनुशादिन्यस्तमेवोक्तमर्थं सदाचारेणापि द्रढयन्ति—कुर्वन्तीति कुशलाः—

> “य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः ।
> नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः” ॥

इति गर्गोक्तिविश्वासचतुराः, न च रतिं कुर्वन्तीत्यपि वस्तुतो वाक्यं यतस्त्वयि रतिः स्वाभाविक्येव कुशलानामित्याहुः—स्वे-स्वीये इति त्वमेव तेषां ममतास्पदम् आत्मनीति त्वमेवाहन्तास्पदं च अत एव नित्यप्रिये इति प्रीतिरपि त्वयि नित्यैव पतिसुतादिषु तु औपाधिकी अत एवानित्या अस्माकं तु तेषु सापि नास्तीत्याहुः आर्त्तिदैस्त्वदभिसारवारकत्वाद्दुःखदैः, तत्तस्मान्नोऽस्मभ्यम् अस्मान् जीवयितुं प्रसीद यादिवाऽस्मानन्योढा मा जीवय, एताः अनूढास्त्वं किं रोदयसीत्याहुः—हे वरद ! “सङ्कल्पो विदितः साध्व्यः !” इत्यादिना एताभ्यस्त्वं वरमदा एवेत्यर्थः । नन्वेतासु प्रसादे एवकास्यायन्यर्चनमेव कारणं भवतीषु मत्प्रसादे किं कारणं तत्र त्वयिनिष्कारणमेव प्रसीदेति सकाकुप्रार्थनमाहुः—हे ईश्वर ! स्वेच्छमाकीर्षिते स्वपरतन्त्रा चिरात् बाल्यमारभ्य त्वयि धृताम् माशाम् आशाख्याम् कल्पलतां सम्प्रति फलवतीं मा छिन्द्याः फलवती लता हि कुयमात्पुरुषेण छेदं नार्हतीति चिराद्धितिं छिन्द्या इति पदाभ्यां सूचान्नोतितम् एषा ह्याशालताऽस्मन्मनःकेदारिकायां त्वयैवारोपितेत्याहुः, हे अरविन्दनेत्र ! अस्मद्वयःसन्ध्यारम्भे प्रथमदर्शनसमये अरविन्दतुल्याभ्यां नेत्राभ्यां त्वत्प्रेषिताभ्यामस्मत्नेत्ररन्ध्रेषु प्रविश्य हृदयक्षेत्रे भावाभिधानमाशालताबीजमाहितमिति ध्वनितम् “चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः” इति रसशास्त्रोक्तरीत्या सैवाशालता गुणरूपश्रवणदर्शनादिना वर्द्धिता फलवती भुक्तभुज्यमानफलापि कठोरोक्तिकुठारिकया कथमद्य छिद्यते “विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्” इति न्यायं जानास्येवेत्यनुध्वनितम् ॥ ३३ ॥

विशुद्धरसदीपिका ।

एतदेव सदाचारेण दृढयन्तः प्रार्थयन्ते—कुर्वन्तीति । कुशलाः लोकशास्त्रव्यवहारनिपुणाः त्वय्येव रतिं शुद्धां प्रीतिं कुर्वन्ति ये त्वयि रतिं कुर्वन्ति त एव कुशला इति परिवृत्त्यान्वयो वा तथा च शास्त्रं "किं प्रजया करिष्याम येषां नो ऽयमात्मा ऽयं लोकः" इत्यादि कीदृशे स्वे आत्मीये पूर्वावित्वात्स्मिन्नो विकल्पः आत्मनि च यतः नित्यप्रिये एवं च विजातीयैरनात्मभिरनित्यप्रियैरार्तिदैश्च पत्यादिभिः किम्? न किमपीत्यर्थः यद्वा वरदेश्वरेत्युक्तेस्त्वच्चरणयोः कात्यायनीव्रतपराणामियमुक्तिः तत्रायमर्थः वयं त्वयि रतिं कुर्वन्त्य एव कुशलाः अन्यथा पातिव्रत्यभङ्गादिति भावः । कीदृशे ? स्वे ज्ञातौ आत्मनि परमप्रेमास्पदे नित्यप्रिये नित्ये इतीहामुत्र चेत्यर्थः । तत्तस्मात् नः अस्मान् प्रसीद वरदेश्वरेत्यनेन प्रसादप्रकारः सूचितः "मयेमा रंस्यथ क्षपाः" इति तदुक्तेः । ईश्वर इति सामर्थ्यं च व्यतिरेके दोषं सूचयन्ति—आशामिति । चिरात् जन्मारभ्य वरदानमारभ्य चेति धृतां निबद्धां मा स्म छिन्धाः तथा सति आशामयपोषितबधः प्रसज्येतेति भावः । अरविन्दनेत्रेति रात्रिसङ्कुचनीयत्वं सूचितं ततश्च ज्ञात्वाऽस्मानेवमुक्तामित्याशाबन्ध एव दृढीकृतः लब्धसहचरीदेहानां तु मते यास्त्वय्यपि रतिं शुद्धां प्रीतिं कुर्वन्ति ताः कुशलाः कामाद्यनावृतत्वात् कीदृशे स्वे धने निजप्राणेश्वरे भोग्ये आत्मनि पूर्ववत् नित्यप्रिये शुद्धप्रीतिविषयत्वात् एवञ्च पत्यादिभिः किम्? इति स्वभावत एव कामाद्यनाशक्तिः सूचिता ततश्च त्वय्यपि पत्यादिरूपेणासक्तिर्मा ऽस्तु किमुतान्यत्रेति भावः ॥ ३३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एतदेव शिष्टाचारेण दृढयन्त्यः प्रार्थयन्ति—कुर्वन्तीति । इति एवार्थतया सर्वत्र सम्बध्यते ये कुशलाः स्वपरमार्थविदस्त एव त्वय्येव रतिमेव कुर्वन्त्येवेति "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते, ज्ञानी त्वात्मैव मे मतम्, अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" इत्यन्वयव्यतिरेकाभ्यां ज्ञानिन एव रतेरुक्तस्य तदभावे अयुक्तविनाशस्य चाभिधानात्—

"एषां बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् ।
यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः ।
स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः" ॥

इत्यादिना तवैव त इति विषयत्वाभिधानात् अत्रापवर्गशब्दस्य स्वरूपात्मकमोक्षातिरिक्तक्रममुक्तिपरत्वं मदृतेऽन्योऽर्थोऽपवर्गः स्वरूपातिरिक्तक्रममोक्षः स्वर्गश्च न प्रियः स्वरूपात्मकमोक्षस्याप्रियत्वे भगवत एवाप्रियत्वापत्तिः तथा च "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति, यो वै भूमा तत्सुखं, नित्यं विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानात्, सच्चिदानन्दरूपाय कृष्णाय नमो विज्ञानरूपाय परमानन्दरूपिणे, आनन्दमात्रकरपादमुखोदरादिः" इत्यादिश्रुतिस्मृतिसिद्धपरमानन्दरूपस्य भगवतोऽपि प्रियत्वात् कृपयातिकुलवेदनीयदुःखरूपत्वापादिःमपयथार्थरूपाणां गोपीनामेव "तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ।" "नद्यः प्रविष्टा इव नामरूपे" इत्यादिस्वरूपात्मकमोक्षश्रवणाविरोधश्च रतिमेव कुर्वन्त्येवेत्यत्र हेतुत्वेन त्वयीत्यस्य विशेषणमाहुः, नित्यप्रिय इति । तत्रापि हेतुमाह—आत्मन्निति । लुप्तसप्तम्यन्तं पदं गौणात्मनि पुत्रादौ कदाचिदप्रियत्वदर्शनात्तद्व्यावृत्त्यर्थमाहुः स्वे मुख्यात्मनीति "तत्त्वमसि अयमात्मा ब्रह्म, अहमात्मा गुडाकेश" इत्यादिवचनात् नहि मुख्यात्मा कदाचिदप्रियो भवति "आत्मनस्तु कामाय सर्वं प्रियं भवति" इत्यादिश्रुतेः । नचाभेदे कथं रतिः सेव्यसेवकभावो वेति वाच्यं स्वात्मनि मुख्याभेदे मुख्यप्रीतिः पुत्रादौ मुख्याभेदाभावे मुख्यप्रीत्यभावस्य तत्र गौणाभेदे गौणप्रीतेरन्यत्र शत्र्वादौ गौणाभेदस्याप्यभावे सर्वथा प्रीत्यभावस्य प्रत्युत भेदैकभावेन द्वेषस्यैव दर्शनाद्भेदतारतम्ये प्रीतितारतम्यस्य भेदतारतम्ये प्रीत्यभावतारतम्यस्य निश्चयेनाभेदस्यैव प्रीतिप्रयोजकत्वात् नित्यसेवायाश्च स्वस्मिन्नेव दर्शनादन्यत्रेष्टगुरुपुत्रपत्यादौ स्वसम्बन्धेनैव सेवा कादाचित्कत्वस्याप्युपलम्भात्स्वसम्बन्धाभावे सेवाया अदर्शनादीशादिसेवाफलस्यापि स्वस्मिन्नेव पर्यवसानात् तद्भावस्यापि अभेदे एव सामञ्जस्यात् प्रायः सर्ववादिभिः स्वस्वाचार्याणां भगवदवतारत्वेन तदभेदाभिमतावपि तदनुरागित्वसेवकप्रधानत्वाङ्गीकारेण स्वस्मिन्नंशभेददृष्ट्या तत्सदृशानुरागाद्यभावाभिमत्या भेदाभाव एवानुरागसेवयोः सामञ्जस्यसम्भवात् किञ्चाऽभेदवादिनमेव स्वरूपेणाभेदेऽप्यौपाधिकसेव्यसेवकभावश्चोपपद्यते उपाधेरध्यासेन स्वरूपान्तर्गतत्वात् स्वाभाविकश्च भेदवादिषु विभुत्वादिना तु समानतया सेवकत्वानुपपत्तिः तदुक्तम्—

"अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता—
स्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा" ॥

इति । अणुत्वादिमतेषु तु कथमणुर्विभुसेवां कुर्यात् देहाद्युपाधिसम्बन्धेन सेवायां तु औपाधिकत्वेन स्वाभाविकत्वक्षतिः । किञ्च, नौपाधिकमपि सेवकत्वमणोः सम्भवति उपाधिनाणुसम्बन्धासम्भवात् नाणुदेहयोः समवायः अकार्यकारणद्रव्ययोः समवायादर्शनात् नापि संयोगस्तस्याव्याप्यवृत्तित्वेन निरंशेऽणौ तदनुपपत्तेः नापि तादात्म्यं भिन्नयोस्तदसम्भवात् नाप्यध्यासो भेदवादिमते तदनङ्गीकारात् त्वय्येवेत्येवकारव्यावर्त्यमाहुः पतिसुतादिभिः किमिति तद्व्यावर्त्यत्वे हेतुः आर्तिदेति । यद्वा, यास्त्वय्येव रतिमेव कुर्वन्त्येव ता एव कुशला नान्या इत्यन्वयः । तत्र हेतुः नित्यप्रिये इति अनित्ये पत्यौ जन्मान्तरे अन्यान्यपतिस्वीकारेण पातिव्रत्यभङ्गप्रसङ्ग इति भावः । स्वे आत्मनि अन्यत्र पत्युः पत्नीः पत्न्याः पतिः देहार्धत्वेन श्रूयते देहस्यानित्यत्वेन तत्सम्बन्धिपतिस्वरूपस्याप्यनित्यत्वं त्वन्तु न तथा किन्तु त्वं तत्सर्वजीवानां स्वात्मेति नित्यप्रियः अन्यत्र हेयत्वमाहुः पतिसुतादिभिरार्तिदैः किम्? अनित्यत्वादप्रियत्वादौ तत्सम्पादने आर्तिं पुनश्च प्रतिक्षणजरारोगापदादिभिरन्ते नाशेन प्रियत्वं रोत्स्यति—

"यावन्तः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः" ॥

इत्यादिवचनैः एवमावश्यकत्वं भगवद्रतेरापाद्य प्रार्थनामाहुः, तन्न इति । यतो नास्माभिरनुचितमाचरितमतो नोऽस्मान् प्रसीद प्रसन्नेन मया किं कार्यं तत्राहुः—वरदेति । वरदत्वादेवास्मदभीष्टं वरदत्वं च वेत्सि किमस्माभिर्वाच्यमिति भावः । ननु,

चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ।
पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किम्वा ॥ ३४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

इत्युक्तमसाध्वीलक्षणं स्वस्मिन् सूचयन्त्य आहुः-कुर्वन्तीति । महो कुशलाः अस्मदाद्याः पत्यादिभिः स्वीये आत्मनि देहादौ नित्यप्रिये तत्करणीयप्रीतिविषये सति त्वयि रतिं कुर्वन्ति किम् ? तत्राप्यार्तिदैः पापसम्भावनयापि परमपीडाप्रदैः समानमन्यत् यद्वा तिष्ठतु पतित्वविचारः, प्रीतिविचार अस्माकं तु सर्वतो विरक्ति सम्पाद्यात्मरतिः कर्त्तव्येति सतां प्रवृत्तिदर्शनेन सम्प्रति मनीषा वर्त्तत इत्याशयेनाहुः-कुर्वन्तीति । तु अपि छेदः अपि हे सौम्य हि प्रसिद्धं कुशलास्तु स्वे वस्तुतः स्वरूपभूते शुद्धे आत्मनि नित्यप्रिये रतिं कुर्वन्ति नतु तद्विपरीते देहादौ नोऽस्माकम् आर्तिदैः पत्यादिभिः किं प्रयोजनमिति विचार्य कथं रतिं कुर्वन्तीत्यपेक्षायामाहुः—तदिति । यतः सर्वदुःखरूपं तस्मात् हे परमेश्वर ! त्वं प्रसीद प्रसन्नो भूत्वा वयं यया विषयाशया त्वयि मा आस्म त्वदन्यभूता वयं न स्थितास्तामाशां हे अरविन्दनेत्र ! भवान् छिन्द्यात् हे ईश्वर ! परब्रह्मविषया मा प्रमा छिन्द्यादिति वा यद्वा हे अरविन्दनेत्र ! परमेश्वरविषयिणी मा प्रमा चिरादनादिकालमारभ्य धृतां स्वीकृतां विषयाशां छिन्द्यात् ततस्त्वयि आस्म त्वदनन्या भवामेत्येवं प्रकारेण रतिं कुर्वन्तीत्यर्थः । यद्वा भो चतुरशिरोमणे नेयं परदारेषु रत्याशा शोभना कुशलास्तु स्वपतिभार्यादावपि रतिं विहाय स्वात्मन्येव रतिं कुर्वन्तीत्याशयेनाहुः-कुर्वन्तीति । तत्तस्मात्त्वमपि प्रसीद किमर्थं ग्लायसीति भावः । "प्रसादे सर्वदुःखानां हानिरस्योपजायते" इति प्रसिद्ध्या प्रसादे सति हे परम हे अरविन्दनेत्र ईश्वर ! परमाच्चिरात्त्वयि अवस्थितां सर्वदुःखनिदानभूतामाशां छिन्द्यादित्यर्थः । निवृत्तिपक्षे "प्लवा ह्येते अदृढा यज्ञरूपाः, अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयोभिनन्दन्ति मूढाजरामृत्युं ते पुनरेवापियन्ति, पुरुष एवेदं विश्वं कर्म तपोब्रह्मपरामृतं, यद्विभाति, भिद्यते हृदयग्रन्थिः" इत्याद्याः श्रुतयो वैराग्यादिसाधनसम्पन्नास्त्वय्येवात्मनि परमात्मस्वरूपे प्रत्यगभिन्ने यतो नित्यप्रिये रतिं कुर्वन्ति आर्तिदैः पत्यादिभिर्न किं प्रयोजनमिति विचार्य तस्मात् हे परमेश्वर चिरादनादिकालादारभ्य त्वयि धृतामाशामभिप्रायं कञ्चिदपि मा छिन्द्यात् छेदनपरः परमेश्वरेण त्वया दण्डनीय इति सम्बोधनाशयः यद्वा तदन्तः स्थितेन त्वया न छेदनाय स न प्रेरणीय इत्याशयेनाहुः—हे अरविन्दनेत्र सर्वहृत्कमलप्रकाशन ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, तर्हि सदात्मकत्वात्पत्यादीनामप्यनुवृत्तिरुचितैवेत्यतस्तदनुवृत्तौ दोषं वदन्त्यः उक्तसिद्धान्तं सदाचारेण दृढयन्त्यः भगवत्यनुवृत्तिं प्रार्थयन्ते-कुर्वन्तीति । स्वे आत्मन् आत्मनि त्वयि रतिमनुवृत्तिं कुशलाः आत्ततत्त्वाः कुर्वन्ति न त्वन्यत्र "किङ्कर्मणा किं प्रजया किं धनेन त्यागेनैकेनामृतमानशुः" "किं प्रजया करिष्यामो येषां नोऽयमात्मलोकः" इत्याद्याः श्रुतयोऽत्रानुसन्धेयाः ॥ ३३ ॥

भाषा टीका ।

जो परम कुशल जन हैं ते तुमारे विषैं प्रीति करैं हैं, काहे सो, कि—तुम अपने आत्मा हौ, और नित्य प्यारे हौ, और जो पति सुत आदिक हैं, वे तौ केवल दुःख देवे वारे हैं, उनसों कहा प्रयोजन है, तासों हे कमल दललोचन ! तुम हम पै प्रसन्न होउ बहुत काल से हमने तुम्हारे विषै आशा रूप लता लगाई है ताकों मति काटौ ॥ ३३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च प्रतियातेति यदुक्तं तदशक्यं त्वयैव चित्तादीनामपहृतत्वादित्याहुः-चित्तमिति । यदस्माकं चित्तमेतावन्तं कालं सुखेन गृहेषु निर्विशति तत्त्वया अपहृतं करावपि यौ गृहकृत्ये निर्विशतस्तावपि सुखात्मना त्वयेति वा ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

सुखात्मकेनेति गृहादीनां दुःखात्मकत्वं ध्वनितं सुखेन सहितमिति वा पादौ यौ गृहकृत्ये गमने वा निर्विशतस्तावप्यपहृतौ अतस्तव पादमूलात् पदमेकमपि न चलतः गन्तुं न शक्नुत इत्यर्थः । करयोः पादयोश्चापहारस्तत्तदिन्द्रियशक्त्यपहारात् यद्वा ननु मिथ्यावादिन्यस्तर्हि कथमत्रागता इति चेद्युक्तं त्वद्गीतेनाकर्षणान्न तु स्वशक्तेः अन्यथा अधुना गमनं सम्भवेदित्याहुः-पदमिति । अथः स एव अथो अस्मात्कृतो कथं व्रजं यामः ननु अबलाः मयैव कथञ्चित् प्रेष्यध्वं तत्राहुः—किङ्करवामेति । वाशब्द उक्तसमुच्चये कटाक्षे वा यद्वा अनुक्तसमुच्चये ततश्च किम्वा अनुसन्दधीमहि कुत्र वा यामेत्यर्थः । चित्तादीनां भवताऽपहृतत्वात् कर्मस्वप्रवृत्तेः कथञ्चिच्छक्तौ सत्यां वा कर्मभिः प्रयोजनाभावादिति भावः । यद्यपि चित्तापहारेण सर्वेन्द्रियापहारोऽप्यायाति तथापि विशेषतः करपादापहारोक्तिः पतिशुश्रूषणादिगृहकर्मकृत्यस्यान्यत्र निजगमनस्य च परिहाराय अन्यसेव्योक्त्वात् यद्वा याचितं सुखे निमित्ते सुखे विषये वा पूर्वं स्थितं तद्भवताऽपहृतं सत् तत्र अपि न प्रविशत्यपि कुतस्तत्र कृत्यमपेक्षतामित्यर्थः । ननु, गृहेष्वयं तर्हि गृहकृत्यमनासक्त्यैव क्रियतां तत्राहुः करावप्यपहृतौ गृहस्थ्यकृत्ये न निर्विशतः ननु तर्हि तत्र गत्वा केवलमधिष्ठातृत्वेन स्थीयतां तत्राहुः पादौ च भवताऽपहृतौ न चलत इति अन्यत्समानम् अतस्त्वय्येव चित्तं त्वदर्थकृत्य एव करौ त्वत्स्थान एव पादौ प्रविशन्ति नान्यत्रेति च सूचितम् यद्वा मनः संसारस्तेन

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तापस्तेन हृतं नाशितमपि चित्तं लोकानां सुखेन अनायासेन स्वत एवेत्यर्थः । गृहेषु निर्विशत्येव करावपि गृहकृत्ये निर्विशत एव अतः पतिशुश्रूषाद्यर्थं तव प्रेरणायाऽलमिति भावः । ननु, तत्त्व वाक्यैः ! तर्हि गम्यतामिति चेत्तत्राहुः—पादाविति । किन्तु त्वत्-काठिन्येनात्र स्थातुमपि न युज्यते गन्तुञ्च न शक्यते अहो बताद्भुता किं कार्यमित्यार्त्या सवैयग्र्यमाहुः—किङ्करवामेति । अनेन हृतं वनमित्यस्योत्तरं चित्ताद्यपहारेण पुष्पादिग्रहणाद्यशक्ते-स्तद्दर्शनस्यापि वैफल्यात् किन्त्वनेति द्वितीयपक्षे वनादिदृक्षादौ सत्यपि पादापहरणात्क्रमणाशक्त्या सम्यग्दर्शनासिद्धेः किं तद्दर्शनेनेति अत्र नर्मेदं वनं ऽस्माकं प्रयोजनाभावात् तद्दर्शनार्थं नागताः स्म चित्तवित्तस्य भवताऽपहरणात् तदुद्देशेनात्रागता-श्चौरम्भवन्तं प्राप्ता अपि गृहीतुं नेतुं च तथा क्रोशनार्थं कुत्रापि गन्तुमपि न शक्नुमः भवता करपादापहरणात् अतो हृतधनाः कथं व्रजं यामः ? किं वा करवाम ? स्तम्भनादिमहा-मन्त्रज्ञचोरवरे कस्याप्युपायस्याप्रभावादितिभावः । श्लेषार्थश्चायं परतो वर्त्तमानस्य नकारस्य सर्वत्रैवान्वयः सुखात्मकेनापि यद्यस्मादस्माकं चित्तमपहृतं न भवति तस्माद्गृहेषु, तान्निर्वि-शत्येव यत् करावपि पादावपि अपहृतौ न भवतः अतो गृह-सम्बन्धिकृत्ये तौ तौ च निर्विशत एव अतः पदं निजस्थानं प्रति तौ चलत एव अथो अतः कथं यामोऽन्यत्र कुतो वा करवाम त्वदुक्तिमिति, इति श्लेषोक्तं यमुनातीरगमनादिकं निरस्तं यद्वा, गृहेषु भवता उद्धवता सुखेन अपहृतं चित्तं यत् यस्मात् गृहकृत्ये निर्विशति गृहेषु भवता सुखेनैवापहृतौ करावपि गृह्य-कृत्ये निर्विशतः पदं निश्चितं यथा स्यात् तथा पादावपि तथा तस्माच्चलतः यस्मान्नचलतस्तव पादमूलात्कथं व्रजं न यामः किङ्करवामेति ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, गृहवाससुखरक्षार्थमपि न पत्यादित्यागो विधेय इत्या-शङ्क्य तत्रापि तस्यैव दोषोट्टङ्कनपूर्वकमाहुः—चित्तमिति । सुखेन सुखरूपतया स्वदर्शकेनेति तदानीं गृहादीनां दुःखरूपतास्फूर्त्तिः ध्वनिता सुखम् स्वाहिनमिति वा पादौ यौ गृहकृत्ये गमने वा निर्विशतस्तावप्यपहृतौ अतस्तव पादमूलात् पदमेकमपि न चलतः गन्तुं न शक्नुत इत्यर्थः । करयोः पादयोश्चापहार-स्तत्तदिन्द्रियशक्त्यपहारात् अत आगमनं च त्वद्गीताकर्षणमात्रे-णेति भावः । अथो अस्माद्धेतोः कथं व्रजं याम । ननु, भवता एवं चेत् मयैवाग्रे गच्छता सह गम्यतां तत्राहुः—तत्र गत्वा किम्वा करवामेति वाशब्दः समुच्चये । यद्यपि चित्तापहारेण सर्वेन्द्रियापहारोऽप्यायाति तथापि विशेषतः करपादापहारोक्तिः पतिशुश्रूषणादिगृहकृत्यस्यान्यत्र निजगमनस्य च परिहाराय, अन्यत् । यद्वा, यच्चित्तं सुखे निमित्ते सुखे विषये वा पूर्वं स्थितं तद्भवताऽपहृतं सत् उत अपि न प्रविशत्यपि कुतः ? तस्मिन् कृत्ये करादिकं प्रवेशयेदित्यर्थः । ननु, गृहेष्वप्रवेशेऽपि तथापि व्रजाद्विहारयत्नेन प्रवेश्यतां तत्राहुः—करावप्यपहृतौ गृहसम्बन्धि-कृत्ये न निर्विशतः । ननु, तथाप्यत्र तु स्थातुमयुक्तमिति गच्छतैव तत्राहुः—पादौ च भवताऽपहृतौ स्वाभिमुख्येनाऽऽकृष्टौ पदमपि न चलत इति अन्यत्समानम् । अतस्त्वय्येव चित्तं त्वदर्थकृत्य एव करौ त्वत्स्थान एव पादौ प्रविशन्ति नान्यत्रेति सूचितम् अत्र नर्मेदं वनेऽस्माकं प्रयोजनाभावात् तद्दर्शनार्थं नागताः स्मः चित्तवित्तस्य भवताऽपहरणात् तदुद्देशेनात्रागताश्चौरं भवन्तं प्राप्ता अपि गृहीतुं नेतुं च तथा क्रोशनार्थं कुत्रापि गन्तुमपि न शक्नुमः भवता करपादापहरणात् अतो हृत-धनाः कथं व्रजं यामः ? किम्वा करवामः स्तम्भनादि-महामन्त्रज्ञचोरवरे कस्याप्युपायस्याप्रभावादिति भावः । निष-धार्थश्चायम् । ननु, वेणुगीतेन मया गृहादाकृष्टाः सुष्ठु आनीताश्च कथं गन्तुं शक्नुथ तत्राहुः—गृहेषु भवता उद्भवता सुखेन अपहृतं चित्तं यत् यस्मात् गृहकृत्ये निर्विशति । यद्वा, चित्तं सुखं एव न तु भवताऽपहृतं यस्माद्गृहेषु निर्विशति एवं करावपि गृह्यकृत्ये निर्विशतः परिश्रान्तत्वमाशङ्क्याहुः—पादौ पदमपि कथं न चलतः अपि तु दूरमपि चलत एव ततः कथं न यामः अपि तु याम एव अत्र च किङ्करवा-मेति ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गृहेषु गृहकृत्येषु गृहकार्येषु यौ निर्विशतः तौ च भवता-ऽपहृतावित्यर्थः । पदं पदमात्रमपि ॥ ३४ ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं "तद्यातमाचिरं गोष्ठम्" इत्यादि तत्रोत्तरमाहुः—चित्त-मिति । यच्चित्तं गृहेषु निर्विशति निर्विवेशं गृहाद्यभिनिविष्टं यच्चितं इत्यर्थः । तत्सुखेनानायासेन भवताऽपहृतं तथा तावपि च यौ गृह्यकृत्ये गृहकार्ये अभिनिविष्टौ करौ तावपि भवतापहृतौ व्यापाररहितौ कृतावित्यर्थः तथा पादावपि तव पादमूलात्पाद-मात्रमपि न चलतः अतः कथं व्रजं यास्यामः अथोनन्तरं किम्वा करवाम ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रतियातेत्यस्योत्तरमाहुः—चित्तमिति । हे सखे ! नो यच्चित्तम् उत तदपि गृहेषु न निर्विशति उपभोग्यत्वेन न स्मरति कुत इत्यत्राहुः—भवतेति । भवताऽपहृतं तस्मादिति शेषः । "स हि सर्व-मनोवृत्तिप्रेरकः समुदाहृतः" इति वचनात् करावपि कर्मसाधने-ऽपि गृह्यकृत्ये गृहयोग्यकार्येषु संमार्जनोपलेपनादिलक्षणे न तिष्ठत इति शेषः । अस्मत्पादौ गमनसाधनेऽपि तव पादमूलात् पदम् एकपादन्यासमात्रमपि न चलत इत्यथो तस्मात्कथं व्रजं यामः किं वा करवाम इति न ज्ञायते इति शेषः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

वयं तवाज्ञाभङ्गकारिणो भवामः तेन गन्तुं च शक्यते किन्तु तवैव दोषास्तत्र घटत इति पुनरतिविदग्धा मध्या धीरा आहुः—चित्तं सुखेनेत्यादि । चित्तं भवता सुखेनापहृतम् अनायासेन चोरितं । ननु, चोरान्तरेण त्वत्प्रयत्नविशेषेण यच्चित्तं गृहेषु निर्विशति अतश्चित्ताभावाच्च भवति किमस्माकं दूषणं तर्हि चित्तं दीयते सचित्ताः सचित्ता सत्यो गृहं व्रजतेत्याशङ्क्याहुः, उत विस्मये करावपि गृह्यकृत्ये न निर्विशतः अतः परं त्वत्सेवायामेव करौ निर्विशतः न गृहकृत्य इत्यर्थः । तेन तत्र गत्वैव किं प्रयोजनम् । ननु, तथापि मदाज्ञातो यात वरं गृहकृत्यं मा कार्यमित्याशङ्क्याहुः, पादाविति । तव पादमूलाच्चरणसमीपात् पदमपि पादौ न चलतस्तयोस्स्तम्भो जातः कथं याम इत्याहुः, यामः कथमिति न गत्वा किं करिष्यथेत्याहुः, करवाम किं वा तदेव न. विद्महे किं वा करिष्यामः अथवा यच्चित्तं गृहेषु निर्विशति तद्भवताऽपहृतं संसारतापतप्तम् अस्माकं तु चित्तं भवतापहृतम् अतो गृहेषु सुखे सुखनिमित्तं न निर्विशति सर्वमन्यत्समम् ॥ ३४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

यदुक्तं वनदर्शनार्थं किमागता इति ततश्च वनवर्णना कृता तत्राहुः—चित्तंसुखेनेति । वनदर्शनेच्छा तदा भवति यदा चित्तं स्वस्मिन् न तिष्ठेत् तत्तु त्वयैवापहृतं तत्रापहारे न तव प्रयासः तथा सति सर्वं नापहृतं स्यात् तदाह—सुखेनेति । भवता वा आनन्दरूपेणापहृतं न हि साक्षात् परमानन्दे सति कश्चित् परम्परया पाचिकं साधनं गृह्णाति वनदर्शनं दूरे गृहेऽपि यच्चित्तं निर्विशति अनेन ज्ञानशक्तेरपहार उक्तः नापि मन्तव्यं वने किञ्चित्कार्यार्थमागता इति तदर्थं क्रियाशक्तेरप्यपहारमाहुः—उत करावपीति । यौ गृह्यकृत्ये निर्विशतः दूरेणापहृतं वनकृत्यं कामेन वक्तव्य (ह)रित्वात् त्वत्स्पर्शेनैव करौ सजीवौ भवतः नोचेन्मृतौ अतः सेवाविधिरपि हस्ताभावात् कुण्ठितः न हि कररहितं कर्मणि कश्चिन्नियुङ्क्ते किञ्च यद्भवाघुष्य गन्तव्यमित्यभिप्रायेण वनदर्शनं जातमित्युक्तं तदप्यसंभावितं यतोऽस्माकं पादौ द्वावपि तव पादमूलादस्मात् स्थानात् एकमपि पदं न चलतः नान्यत्र गच्छतः पादानां गतियुक्तानां मूलभूतौ त्वत्पादौ तस्यापि चेन्मूलं गताः तदा कथमन्यत्र गच्छेयुः त्वत्पादौ तस्यापि चेन्मूलङ्गताः तदा कथमन्यत्र गच्छेयुः अन्यथा वृक्षाणामपि गतिः स्यात् मूलङ्गतानां अस्मात्स्थानादिति वक्तव्ये यत्तत्र पादमूलादित्युक्तं ततस्त्वद्गमने न सर्वत्र गन्तुं शक्यते न तु त्वद्व्यतिरेकेणेति ज्ञापितम् अतः कथं यामः शकटादिना प्रेषणीया इति चेत्तत्राहुः अथो अथ तत्र गत्वा किं करवाम यथा शकटादिकं गृहे पातनार्थं साधनमस्ति न चैवं हस्तयोः कार्यकारणे किञ्चिल्लौकिकसिद्धं न केवलं गमनेन प्रयोजनं किन्तु पित्रादिसेवार्थं गमनं तदभावाद्व्यर्थमेव गमनमिति भावः । तदाहुः अथो अथ किं वा करवामेति इत्तनिरपेक्षा कृतिः भिन्नप्रक्रमेण भगवद्भावेन भवतीति तथोक्तम् अनेन स्नानपानमप्यशक्यं निरूपितम् आशाभावे सर्वत्रैव शोषात् ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अन्यास्तु स्वीयं प्रमाणं सरसं द्योतयन्त्यो भो श्रीचौरचक्रवर्तिन् ! न वयमन्यार्थमागताः किन्तु त्वया चोरितं प्रतिवस्त्वनमेव जिघृक्षव इत्याहुः—चित्तं भवता अपहृतं न च तत्राप्यचौरस्येव तव कोऽप्यधिकः प्रयत्नोऽभूदित्याहुः—सुखेनेति । वेणुरन्ध्रेषु फूत्कारमात्रेणैवेत्यर्थः । न च तच्चित्तधनमस्माकमल्पतरमित्याहुः—यच्चित्तं गृहेषु सर्वेष्वेव निःशेषेण विशति अतस्तदपहारेण त्वयाऽस्माकं सर्वाण्येव गृहाणि लुण्ठितानीति ध्वनितं वस्तुतो गृहेष्वस्माकं चित्ताभावात्तानि ज्वलन्तु समृच्छन्तु वा किमस्माकं तैरित्यनुध्वनितम् अतिशयोक्त्या गृहेषु श्रोत्रादीन्द्रियेषु तत्तत्साफल्यार्थं यत् निर्विशति यद्विना सर्वेन्द्रियाण्यपि विफलीभवन्तीति भावः । अतश्चित्तापहारादेव सर्वेन्द्रियाण्यपि त्वयाऽपहृतानीत्याहुः—करावपि यौ गृहकृत्येषु निर्विशतः उतेति नेत्रे श्रोत्रे अपि एतानि सर्वाण्यप्यपहृतानीत्यर्थः । ननु, भो अद्य तावद्गच्छत श्वः परश्वो वा विविच्य यच्छिष्टं दास्यामीति तत्राहुः—पादावस्माकं पदमेकमपि न चलतः यद्विनेत्यर्थः । अतश्चित्तं देहि तत एव याम इति भावः ॥ ३४ ॥

विशुद्धरसदीपिका ।

अथ द्वितीयदिक्स्थिताः प्रतियात ततो गृहानिति यदुक्तं तत्प्रतारणामात्रं त्वयैव चित्तादीनामपहृतत्वेनाशक्यत्वादिति परिहरन्ति—चित्तमिति । यदस्माकं चित्तं सुखेन हेतुना गृहेषु निर्विशति "निर्वेशो भृ[भु]तिभोगयोः" इति कोशात् सुखभोगमनुभवतीत्यर्थः । तत् भवताऽपहृतं मास्तु चित्तं स्वकराभ्यामेव गृहकृत्यं सेत्स्यति चेत्तत्राहुः—करावपि । ननु, हृतज्ञानक्रियाधिकरणाभिरत्र किं कार्यमिति तत्राहुः—गृह्यकृत्य इति । तव सेवायां तु क्षणमपि चलत इत्यर्थः । ननु, तत्र गतानां तत्रत्यकरणीयपराणां चित्तादिकं तत्रैवाविशेदिति तत्राहुः, पादाविति । अत्रागमनं तु त्वद्गीताकर्षणेनेति भावः । नन्वबला मयैव गच्छता सह गम्यतामिति चेन्मैवं मैवमिति परिहरन्ति करवाम किं वेति ॥ ३४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तथात मा चिरं गोष्ठमित्यस्यापि दाक्षिण्यार्थत्वेष्टत्वात् द्वितीयार्थे तदशक्यत्वेनैव स्वानधिकारं मत्वोत्तरमाहुः—चित्तमिति । यथोचितं सुखेनाञ्जसा आनन्दात्मकसुखबुद्ध्या वा गृहेषु निर्विशति तच्चित्तं भवतापहृतं स्वस्मिन्नाकृष्य त्वय्येव निविष्टं यद्वा, यच्चित्तं गृहेषु निर्विशति तत्सुखेन सुखरूपेण भवताऽपहृतं नित्यपरमानन्दघनरूपविदर्शनेन दुःखग्रामगृहेषु विशतीति भावः । यद्वा, भवताऽपहृतं यच्चित्तमानिदाघिमध्यात्वेव तत्तापोपशमाय अमासिकमरुमरीचितोयसदृशगृहेषु निर्विशति तत्सुखेन सुखाब्धिस्वरसाक्षात्कारेण भवतापहृतं भवसम्बन्धिकामादितापेन हतं रहितं जातं तथा च सुखाब्धिलाभेन विगततापत्वेन मरुमरीचिरूपगृहेषु सुखजलभ्रमाभावेन च न तत्र निर्विशति यौ नः

श्रीरामनारायणकृतभावभावविभाविका ।

करावपि गृहकृत्ये निर्विशतस्तावपि भवताऽपहृतौ तव सेवामेव रोचयतः प्रतिपदं व्याख्यानन्तु पूर्ववत् । यद्वा, श्रुतिरूपाणां नश्चित्तं तात्पर्यं सुखेन सुखरूपेण भवताऽपहृतं न हि परमानन्दरूपं ब्रह्म विहाय निःसुखे निष्फले गृहाद्यर्थे श्रुतितात्पर्यं सम्भवात फलवदर्थावबोधकत्वाद्वेदस्य तथा करौ इति अनुष्ठानोपचयौ पादाविति पदप्रवृत्तिश्च नस्त्वद्विषयैवेति भावः । नन्वत्र स्थितानां मद्रूपमाधुर्यदर्शनलुब्धानां तादृग्दशा जाताऽतस्तत्र गन्तव्यं तत्र गमने पुनः पूर्ववदेव भविष्यति तत्राहुः—पादाविति । नः पादावपि तव पादमूलाच्चरणसन्निधानात्पदं चरणमात्रमपि न चलत अतो गमनप्रेरकचित्तस्य भवताऽपहृतत्वात् पादयोर्गतिलोपात्कथं व्रज याम: करयोश्च भवतापहृतत्वात्कथं करवाम तत्कर्मस्विष्टसाधनत्वसुखत्वभ्रमाभावात् किं करवाम इति भावः । किञ्च, तथापि चित्ताद्यपहरणे गृहादिविमुखत्वापादने गृहगमनायैव मुक्तौ च कस्य चित्तिप्रा स्वाप्ने ब्राह्मणस्वपुत्रयोः भोजनतन्निवारणज्ञापनन्यायापात्तः ॥ ३४ ॥

—————

श्रीवंशीधरसूरिकृतभागवतगूढार्थदीपिका ।

यद्यपि वनदर्शनार्थमागतास्तस्य च जातत्वादितः परं प्रतियातेत्युक्तं तत्राप्याहुः—चित्तमिति । गृहादिषु यच्चित्तं सुखेन निर्विशति तत्त्वयाऽपहृतम् एवमग्रेऽपि यद्वा, तदपहारेण भगवतः प्रयास इत्याशयेनाहुः, सुखेनानन्दस्वरूपेण तथा च साक्षादानन्दस्वरूपे त्वयि लब्धावस्थानं चित्तं गृहेऽपि न निर्विशति दूरे वनदर्शनादौ तत्प्रवेशः तथा करावपि गृहोचितकृत्ये न निर्विशतो दूरे पुष्पफलाद्युपचयः नहि कररहितः कस्मिंश्चित्कर्मणि केन चिन्नियुज्यते इति भावः । तथा च तव पादमूलात् त्वत्समीपात् पादौ पदं न चलतः नान्यत्र गच्छतः तव पादमूलादित्यनेन त्वत्पादसाहित्यं चेत्तदा सर्वत्र गन्तुं शक्ताविति सूचितम् अतो गमनसाधनाभावाद्व्रजं कथं याम: । ननु, भवतीनां पद्भ्यां गमनसामर्थ्यं नास्ति चेत्तर्हि शकटादिना प्रेषयिष्यामीति चेत्तत्राह, करवामेति । अथो अथ तत्र गत्वा किं करवाम तदुद्योगोपायसाधनचित्तादेस्त्वया ऽपहृतत्वादिति भावः । अनभिज्ञापक्षे न वयं वनशोभादिदर्शनार्थमागताः नापि तव सङ्गमार्थमपि तु चोरितं स्वचित्तं गृहीतुमागता इति नर्म व्यञ्जयन्त्य आहुः, चित्तमस्माकमपहृतं केनेति चेत्तत्राहुः भवता चोरचक्रवर्तिना । ननु, भवत्योऽत्यन्तमिथ्यावादिन्यः वनस्थेन हि मया तदागारप्रविष्टेन कथमपहृतमिति चेत्तत्राहुः, सुखेनानायासेन वेणुरवादिभूत्यसद्भावे तदपहरणे को वा तव प्रयास इति भावः । नचेदं स्वल्पमेतदपहारेण सर्वस्यापि गृहादेर्लुण्ठितत्वादित्याशयेनाहुः, यच्चित्तं गृहेषु सर्वेषु बाह्येषु इन्द्रियादिरूपेषु च निर्विशेषेण विशति तदपहृतमित्यर्थः । अतः करावपि यौ गृहकृत्येषु निर्विशतः उक्तेऽस्यनेन नेत्रादीनामपि सङ्ग्रहः । ननु, सम्प्रति गच्छत श्वः परश्वो वा दास्यामीति चेत्तत्राहुः, पादौ तद्विना तव पादमूलात्पदं न चलतः धृतस्य चोरस्य त्यागो न न्याय्य इत्यपि ध्वनितम् अथो अतो व्रजं कथं याम गत्वा च किं करवाम सर्वसाधनचित्तरूपधनाभावादित्यर्थः । यद्वा, किं करवाम चिरादेः सर्वस्यापहाराच्चौरे भवन्तं प्राप्याऽपि तद्दण्डं दातुं त्वां गृहीतुं नेतुं राजाद्यग्रे आक्रोशनार्थं गन्तुं चाशक्तत्वात्स्तम्भनादिमन्त्रज्ञेऽलौकिकचौरे किं कुर्वामेति भावः । यद्वा सुखरूपेण भवता चित्तादेरपहृतत्वात् गृहादीनि ज्वलन्तु समृद्ध्यन्तु वा किमस्माकं तैरतस्तत्रागमनाय चास्मदग्रे नोच्चारणीयमिति भावः । मानिनीपक्षे । ननु, तिष्ठतु विवादः सम्प्रत्येव भवत्यः समागताः रात्रावत्र विश्रम्य प्रातर्गमिष्यथेति चेत्तत्राहुः, चित्तमिति । सत्यमुक्तं त्वया तथापि गृहेषु भवता जायमानेन सुखेन चित्तमस्माकमपहृतं यद्यस्माद्गृहकृत्येषु निर्विशेति करावपि तत्र निर्विशतः । ननु, भवतु तथाप्यतिसुकुमारत्वात्पदमपि गन्तुमशक्याभ्यां पद्भ्यां कथं गमिष्यथेति चेत्तत्राहुः, पादौ तव पादमूलात्कथं पदं न चलतः किन्तु चलत एव ततः कथं व्रजं न याम अत्र स्थित्वा च किं करवामः । यद्वा, यद्यपि पादौ पदमपि गन्तुं न शक्तौ तथापि तव पादमूलात्कथञ्चिद्व्रजमेव शनैःशनैर्याम अन्यथाऽत्र स्थित्वा किं करवामेत्यर्थः । निवृत्तिपक्षे । ननु, सर्वासां श्रुतीनां ब्रह्मपरत्वे कर्मणस्तत्तात्पर्याविषयत्वात्तदनुष्ठानादेर्वैयर्थ्यं प्राप्तमित्याशङ्क्य तत्त्वज्ञानात्पूर्वं तद्वैयर्थ्यमाशङ्क्य तत्तदुत्तरं नाद्यः "यत्र तु द्वैतमिव भवति तदितर इतरं पश्यति" इत्यादिना संसारदशायां क्रियाकारकादेः साङ्गावाभिधानात्तद्वैयर्थ्यार्थाऽनवगमात् न द्वितीयः "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्" इत्यादि वा तदुत्तरं तद्वैयर्थ्यस्येष्टत्वादित्याशयेनाहुः, चित्तमिति । सुखरूपेण भवता चित्तं मदापहृतं सच्चिदानन्दघनेन प्रत्यगभिन्ने परमात्मनि तं यदा लीने तदा गृहेषु बाह्येष्वाभ्यन्तरेषु च न निर्विशति अत एव करावपि गृहकृत्ये न निर्विशतः पादौ पदमपि न चलतः यथा च सर्वेन्द्रियव्यापारनिवृत्त्या तत्त्वविदः कर्माधिकाराभावात्तदपेक्षया कर्माऽनुष्ठानादेर्वैयर्थ्ये नास्ति दोषः—

"नैव तस्य कृते नार्थो न कृतेनेह कश्चन ।
नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः" ॥

इत्यादिशास्त्रादिति भावः । अतस्तव पादमूलाद्व्रजं व्रजं कथं याम कर्मकाण्डेऽस्माकं तदानुगुण्याऽसम्भवो श्रुत्यानुगुण्यं कथं भजाम स्वासामर्थ्यमदनुपाधित्वात् गत्वा च किं करवाम : क्रियाकारकादिप्रतिषेधबोधिकानामस्माकं तदानुगुण्याऽसम्भवादिति भावः ॥ ३४ ॥

—————

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुक्तं प्रतियात व्रजमिति तदशक्यमित्याहुः—चित्तमिति । यच्चित्तमेतावन्तं कालं गृहेषु निर्विशति तत्सुखेन परमानन्देन त्वया भवता अपहृतं स्वप्रवणं कृतं तथा करावपि यौ गृहकृत्ये इहकार्ये निर्विशतस्तावपि भवताऽपहृतौ स्वचरणस्पर्शलिप्सू कृतौ तथा पादावपि तव पादमूलात्पदमपि न चलतोऽतः कथं व्रजं याम: यास्यामः अथो ऽनन्तरं तव प्रियं किं करवाम वाशब्दात्किमप्रियं तव यत्र करवाम तदाज्ञापयेत्यर्थः ॥ ३४ ॥

—————

सिञ्चाङ्ग ! नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ।
नोचेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ! ते ॥ ३५ ॥

भाषा टीका ।

जो हम सबन को चित्त गृह के काम काज में सुख सौं लग रह्यो हो, सो चित्त तो तुमने हर लियो, और जिन हाथन सूं घर के काम करती हीं तिन हाथन की शक्ति हर लीनी, और या मन की शक्ति हू तुमने हर लीनी, तासूं अब पाय एक पैंड हू नहीं चले हैं, ता हू पै आपने ये धुनि बांधि राखी है—कि—"तुम व्रज को जाओ व्रज को जाओ" सो आपही कहौ जब हमारे पांय नहीं चले हैं तब आप के चरणारविन्द के समीपतें कैसे व्रज कूं जांय ? और वा ठौर जाय करके हू कहा करैं ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽङ्ग हे कृष्ण ! नोऽस्माकं तवाधरामृतपूरकेण तवैव हासलहितनावलोकेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निस्तं सिञ्च नोचेद्वयं तावदेकोऽग्निस्तथा विरहाज्जनिष्यते योऽग्निस्तेन चोपयुक्तदेहा दग्धशरीरा योगिन इव ते पदवीमन्तिकं ध्यानेन याम प्राप्नुयामः ॥ ३५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

सिञ्च निर्वापयेत्यर्थः । जलप्रवाहेणाग्निमेवेति रूपकतो श्लेषम भावो क्रियानिर्देशः परमासिवैयग्र्येण न हृत्स्य हृच्छयाग्निना समासान्तः प्रविष्टेनापि सम्बन्धः त्वच्छन्दस्त्वया जनिताग्नेस्त्वयैव निर्वापणं युज्यतेति विवक्षया पूरशब्देनाग्नेर्महत्तापि ध्वनिता अन्यथा अल्पेनैव जलेन निर्वापणासिद्ध्या पूरकेणेत्यनुपयोगः स्वार्थे कः हासादीनां क्रमेण घृतेन्धनवातत्वं ध्वनितं हृदि शेते वसतीति हृच्छयः कामः अतस्तन्निवर्त्तकौषधस्याप्यन्तः प्रवेशनापेक्षयाऽधरामृतपूरस्य पानं तथाऽनन्यप्रतिकार्यं च सूचितं यद्यपि नायिकानां नायके सम्भोगप्रार्थनं व्यङ्ग्यैवोपयुज्यते न तु साक्षादुक्ततया तथापि लोकोत्तरप्रौढानुरागाणां तासां परमार्त्तिभरेण विचारापगमात्तत्रात्र विरुध्यते । यद्वा, त्वदधरामृतपूरकेण त्वदधरामृतेन वर्णमयतामिव गतेन श्रोतृजनान् पूरयति आप्याययतीति त्वदधरामृतपूरकं वचनं तेन हृच्छयाग्निं हृदयवर्त्तिसन्तापं सिञ्च नाशयेति वचनामृतेनाऽस्माकं तापं नाशयेत्यर्थः । नो चेत् यदि न सिञ्चसि ध्यानेनेति मरणे या गतिः सा गतिरित्यादिन्यायेन निजेष्टसिद्धौ परमोत्कण्ठया साधनविशेष उक्तः । यामेति सम्भावनायां प्राप्स्याम एवेत्यर्थः । तत्र चाऽसम्भावना त्वत्स्वरूपप्रभावेन नास्तीत्याशयेन सम्बोधयन्ति सख इति । अन्यत्तैर्व्याख्यातम् यद्वा, त्वत्पादयोरेव ध्यानेन चिन्तया यो विरहाग्निस्तेनोपयुक्तदेहाः तत्र ध्यानेनेति विरहाग्नेराधिक्योद्दीपने साधनम् यद्वा, विरहजाग्न्युपयुक्तदेहानां गोपीनामिव ध्यानेन पदयोः पदवीम् अन्तिकमित्यात्यन्तसंयोगमित्यर्थः । याम यास्याम एव अतः शाठ्यमात्रं स्त्रीवधमात्रं च तवावशेक्ष्यति वयं तु त्वत् संयोगमवश्यं प्राप्स्याम एवेति यद्वा विरहजाग्न्युपयुक्तदेहा अपि पदयोः पदवीं मोक्ष इत्यर्थः । ननु, कथम्भक्तकानां मोक्षः स्यात् तत्राहुः ध्यानेन मोक्षस्यैव चिन्तया वाञ्छयेत्यर्थः । ननु, तथापि नासौ वो घटेत तत्राहुः—सखे इति । सख्येनेदमेव हितं नः क्रियतामित्यर्थः इति महार्त्याऽत्यन्ताभाव प्रार्थनं मोक्षस्यात्यन्ताभावता श्रीभागवतामृते विवृतैव । यद्वा, ध्यानेन या पदवी वैकुण्ठाख्यपदं तां यामेति कदाचिद्भक्तादीनां केनचिद्दुःखेन मोक्षादिप्रार्थनमिव वृन्दावनविहारैकप्रियाणां तासां श्रीवैकुण्ठलोकप्रार्थनमपि दुःखभरादेव । यद्वा, ध्यानविषये या विरहजाग्न्युपयुक्तदेहाः गोप्यस्ता अपि भवत्पदाब्जान्तिकं नयाम नेष्यामः किमुतात्मानमित्यर्थः । इयं प्रेममदोक्तिः किं वा न यामेति सख्येन प्रार्थनमेव । यद्वा, तव पादयोर्ध्यानेन विरहजाग्न्युपयुक्तदेहा या गोप्यस्तासां पदवीं याम मरिष्याम इत्यर्थः । ततस्त्वमनुतप्स्यस इत्यभिप्रेत्याहुः—सख इति । तासां तेनैव देहेन रासक्रीडाप्राप्तिपक्षे च पत्यादिभिः रुद्धत्वात्तन्मोचनार्थं ध्यानाच्च त्वया तासामनागमनेनान्यद्दर्शनमननात् । यद्वा, ध्यानेनापि तव पादयोरन्तिकं यास्यामः किं कार्या त्वया पश्चात् प्रार्थिता अपि न यास्याम एवेति किं वा सर्वेसामग्रीयुक्ते अस्मिन् जन्मनि तदसिद्ध्या परस्मिन् तस्यासम्भाव्यत्वात् । यद्वा, विरहजाग्नेरेव उपयुक्ता उचिता देहाः न तु सम्भोगामृतयोग्या यासां ताः अधुनात्र तदसिद्ध्या कालान्तरेऽपि जन्मान्तरेऽपि विरहस्यैव निश्चेयत्वादिति भावः । यद्वा, जन्मान्तरे ध्यानेनापि ते पदयोरन्तिकं मार्गमपि वा यामेति प्रेमार्त्तिभरेण प्रार्थनं तत्र च सखित्वेनैव इत्याशयेन सम्बोधयन्ति—सखे इति । अलमतिविस्तरेण अनेन तद्यातेरप्योत्तरं हृच्छयाग्निनिर्वाणे सति यत्नाद्यातुमपि शक्नुमः अन्यथा च मरिष्याम एवेति किं तत्र यानाकेनेति शेषार्थः अङ्ग ! हे महाकपट ! नः अस्माकं हासावलोककलगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरकेणैव सिञ्च अस्माकं मध्ये सा काचिन्नास्त्येव यस्या अधरामृतेन स्वकामाग्निं सेक्ष्यसीत्यर्थः । इति स्वगर्वाणां सर्वथा नैरपेक्ष्यं सूचितम् । अथ च स्वाभीष्टपरममधुरवस्तुनि दुर्लभे सति लुब्धैः स्वस्यैवाधरपुटी लिह्यते इति नर्मभङ्गी व्यङ्ग्या नो चेत् यद्येवमप्युक्त्वा पश्चान् मस्माकं निरुन्धन् दुराग्रहान्न विरमसि तदा वयं स्वपतिविरहजाग्न्युपयुक्तदेहावरम्भवेम वरं म्रियेमहीत्यर्थः । तथापि सखे ! सेन्द्रिये ध्याने चिन्तनेऽपि तव पादयोः पदवीमपि न याम न यास्याम इत्यर्थः ॥ ३५ ॥

श्रीमज्जीवगोस्वामीकृतवैष्णवतोषिणी ।

तदेवं द्वितीयविकल्पिता अपि पुनस्तामेवोत्कण्ठा स्फुटमेव वक्तव्यतत्पूर्वरत्यवस्थामाविर्भावितं प्रौढ्या निर्विशेषयत्नतापात् प्रथमाख्यानेन त्वयि दोषमात्रं पर्यवस्यतीति टीका विवक्षितम्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

उपसंहरन्ति–सिञ्चेति । निर्वापयेत्यर्थः आद्यौ क्रियानिर्देशः परमार्त्ति-धैर्य्येण न इत्यस्य हृच्छयाग्निनैव सम्बन्धः । तत्पुरुषस्यो-त्तरपदप्रधानत्वात् हासस्य सम्बन्धिपदं तवेत्येव लभ्यते प्रक-रणबलात् विनापि त्वच्छब्दमर्थबोधे सति तन्निर्देशस्तवया जनि-तास्तत्वयैव निर्वापणं युक्तमिति विवक्षया पूरशब्देनाम्र-महत्त्वमपि ध्वनितम् स्वार्थे कः हासावलोककलगीतयोः क्रमेण धृतवातत्वं ध्वनितं हृदि शेते वसतीति हृच्छयः कामः अत-स्तन्निवर्त्तनौषधस्याप्यन्तःप्रवेशनापेक्षयाऽधरामृतपूरस्य पानं तथाऽनन्यप्रतिकार्य्यत्वञ्च सूचितम् । इत्थं सम्भोगस्य साक्षात् प्रार्थनं तदीयवेणुतनुमाधुर्य्यमधुमत्तचित्तानां लोकोत्तरप्रौढानु-रागार्त्तिनर्त्तितमहोत्कण्ठावगुण्ठितानां रसेनापि न विरुध्यते निषेधार्थाच्छन्नतयैवोक्तत्वात्तु नितरामिति व्यतिरेकेण तदेव दृढयन्ति नो चेत् ? यदि न सिञ्चसि तदापि ध्यानेनेति "मरणे या मतिः सा गतिः" इत्यादिन्यायेन याम सम्प्रत्येव प्राप्स्याम इत्यर्थः । प्राप्तकाले लोट् तत्र च सखे इति सम्बोध्य स्वेषु स्नेह-मुद्बोधयन्ति अत्रान्वयकमेणाभिप्रायाश्चैते । ननु, हासादिजहृच्छयाग्नि सेकं साधनं मम जलभाजनमत्र किमिव दृश्यते इति परिहास-माशङ्क्याहुः–अमृतेति । अमृतेनैव तत् सिक्तं स्यात् नतु जला-दिना तत्रापि तस्य पूरेण ननु यत् किञ्चिन्मात्रेण स्वार्थे कन् तेनैवेत्यर्थः । ननु, तदपि दुर्लभं कुत्र लभ्यते तत्रापि तस्य पूरस्या-त्यन्तासम्भव इत्याशङ्क्य कथमिदं गोपयसीत्याहुः, त्वदधरेति । अहो नान्येनामृतेन तच्छान्तिः स्यात् किन्तु त्वदधरसम्बन्धिनैव तत्रापि तस्याप्यत्यन्तवृद्धयुवतीकोटिभिरप्यपरिसमाप्त्येन तत्पूरे-णैवेति महातृष्णा सूचिता एवमग्रे वक्ष्यमाणस्यामृतस्य च परम-वैलक्षण्यं । ननु, ध्यानेन यामेति झटिति देहत्यागं सूचयन्तीनां भवतीनां तत्साधनं न दृश्यते तत्राहुः—विरहेति । अबे अन्या इव किं वयमनुरागहीनाः येन बाह्यमग्न्यादिकं तत्साधनं मृग्यामः किन्त्वन्तरेव स्वत एव तदुदेष्यतीति भावः । अन्यत्तैः । यद्वा, एवं विवक्षितमुपसंहरन्त्यो ननु, दुर्घटेऽस्मिन्नर्थे कथमति त्वरयथेत्या-शङ्क्यातिदुःखात् दुर्घटत्वमेव सत्वामित्याहुः–नोचेदिति । ध्यानेपि नैव याम यतः विरहजाग्निरेव उपयुक्ता उचिता देहा न तु संयोगा-मृतयोग्या यासां ता अधुनाऽत्र तदुक्तिरुद्धया कालान्तरेऽपि जन्मान्तरेऽपि विरहस्यैव निश्चेयत्वादिति (अनिश्चितत्वादिति) भावः । सखे इति तस्यापि तत्र भाविदुःखं दर्शयन्ति यद्वा, झटिति तत्प्राप्त्यभावेन देह-त्यागं सूचयन्त्य आहुः, जन्मान्तरेपि ध्यानेनापि ते पदयोरन्तिकं मार्ग-मपि वा यामेति प्रार्थनं तत्र च सखीत्वेनैवेत्याशयेन सम्बोधयन्ति सखे इति । अनेन सुमध्यमा इत्यस्योत्तरं भवदाशयेऽस्मदुगुणदेहोपि त्याज्यस्तत्यक्तेपि तस्मिन् भवाम त्याज्य इति श्लोकद्वयमिद-मैश्वर्य्यमयार्थेऽपि भावः समानम निषेधार्थश्चायं तस्मात् अङ्ग, हे महालम्पट ! नः अस्माकं हासावलोककलगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरकेणैव सिञ्च अस्माकं मध्ये सा काचिन्नास्त्येव यस्या अधरामृतेन स्वकामाग्निं सेक्ष्यसी-त्यर्थः । इति स्ववर्णनायां सर्वथा नैरपेक्ष्यं सूचितम् । अथ च स्वाभीष्टपरममधुरवस्तुनि दुर्लभे सति लुब्धैः स्वस्यैवाधरपुटी लिह्यते इति नर्मभङ्गी व्यङ्ग्या नो चेत् यदेवमधुरत्वा पश्यान अस्माकं निरुन्धन् दुराग्रहान्न विरमसि तदा वयं स्वपतिविरहजा-ग्न्युपयुक्तदेहा भवेम वरं म्रियेमहीत्यर्थः । तथापि ध्याने चिन्तनेऽपि तव पादयोः पदवीमपि न याम न यास्याम सखे इति बाल्य-क्रीडायां प्राप्तसख्यत्वेनाऽस्मद्धर्मनिष्ठां जानास्यपीति भावः । यद्वा, चेदिति निश्चये "अस्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नि" इति वत् ततश्च नैव विरहजाग्न्युपयुक्तदेहा वयं ततो ध्यानेऽपि नैव यामेति ॥ ३५ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि किं मया विधेयम् ? इत्यत्राहुः–सिञ्चेति । अङ्ग हे कृष्ण ! तवाधरामृतस्य पूरकेण प्रवाहेन नोऽस्माकं हासयुक्तेन तवाऽवलोकनेन मधुरवेणुनादेन च जातं हृच्छयाग्निं कामाग्निं सिञ्च शमय नो चेद्यद्येवं न करोषि तर्हि हे सखे ! वयं भवद्वियोगजाग्निना दग्धदेहाः सत्यः त्वद्ध्यानेन साधनेन तव पदयोः पदवीं याम प्राप्नुवाम त्वयाऽनुपभुक्तं व्यर्थमिदं शरीरं त्वद्विरहाऽग्निना दग्ध्वा त्वद्ध्यानेन त्वत्सन्निधिमेव प्राप्स्यामः मृत्वापि त्वां न त्यजेति भावः ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्हि भवतीनां किमभीष्टमित्यत्राहुः–सिञ्चेति । पूरकेण प्रवा-हेण हाससहितावलोकेन कलगीतेन मधुरगानेन जातो हृच्छयः कामः स एवाग्निः तं सिञ्च अभिषिञ्च शमय, नो चेत् न शम-यसि चेत् ? विरहाज्जातेनाग्निना उपयुक्तो गृहीतो देहो यासां तास्तथा ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

हे विभो ! करणीयं वर्त्तते करिष्यामश्च तदेव, त्वम् यदि एवं करोषि तदा सत् करिष्याम एव किं मया कर्त्तव्यमिति चेच्छ्रूयतामिति पुनर्मध्या धीरा एवाहुः–सिञ्चाङ्ग न इत्यादि । हे अङ्ग ! नो गीतजं कथनजं हृच्छयाग्निं सिञ्च हृदि शेते हृच्छयो योऽग्निर्भवदुपेक्षाप्रतिपादकवचनरूपोऽग्निः तं निर्वापय केन त्वदधरामृतपूरकेण प्रशंसायां कः हे हासावलोककलहास-सहिता अवलोकफलानिरीक्षणसौष्ठवं यस्य नो चेत् यद्येवं न करोषि तदा विरहजाग्न्युपयुक्तध्यानेन ते तव पदयोः पदवीं याम न तु यास्यामः एकोऽग्निर्योऽयं वर्त्तते स तु दाहक एव न मारकः मारकस्तु विरहज एव अयन्तु गीतजत्वात् वाग्ज एव तेनानेन शुष्कास्तेन तत्क्षणमेव भस्मीभविष्याम इति वाक्यार्थः ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

भगवता शीघ्रं गच्छतेत्युक्तं तत्राहुः–सिञ्चाङ्गेति । वयं शीघ्रमेव गमिष्यामः यदि त्वं प्रतिबन्धं न करिष्यसि अनेन तूष्णीभावेऽपि मरणं परावृत्तौ तु न किञ्चिद्वक्तव्यम्

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

हे अङ्ग ! त्वदधरामृतपूरकेण त्वदधरामृतप्रवाहजलेन नो हृच्छयाग्निं सिञ्च स चाग्निः त्वयैवोत्पादित इति तत्कारणमाहुः–हासावलोककलगीतजेति । तव योऽयं हासपूर्वकः अवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निः हासः कामजनकः अवलोकः सन्धुक्षणकर्त्ता गीतवायुरिव तत्रापि कलगीतं सर्वतो वायुः सोऽपि जातो हृदये हृदयगामि च त्वदधरामृतमेव पूरो हि वस्तु प्रवाहयति तस्याश्च सिञ्चनकरणत्वेनोक्त्याग्नेरतिमहत्त्वं ध्वन्यते अतो युक्ता सिञ्चनोक्तिः अलौकिकश्चाग्निः अलौकिकेनैव शाम्यति कन्दर्पो हि मृतो ज्वलति स हि जीवन् अन्यवस्थां त्यजति नान्यथा अमृतेनैव च जीवति तत्रापि न देवभोग्येन अन्यथा तैरेव जीवितः स्यात् सृष्टिकारणत्वात् नास्य मोक्षः अतोऽतिगुप्तेनैवाधरामृतेन तस्य जीवनम् अतः सिञ्चनमेवोक्तम् अन्यथा निर्वापणमेव प्रार्थयेयुः कामे जीवति जीविष्यामः अन्यथा स स्वयं ज्वलन् अन्यानपि ज्वालयिष्यति तदाहुः–नोचेदिति । सिञ्चनेन यदि मन्त्रवादीव न जीवयिष्यसि तदा विरहेण जनितो योऽग्निः तेनोपभुक्तदेहा ध्यानेन ते पदयोः पदवीं यामः स्वयं स्वतन्त्रमार्गाज्ञानात् त्वं च सखा येन मार्गेण गमिष्यसि तेनैव वयमपि यास्यामः । यथा त्वमधुनाऽस्मभ्यमार्तिप्रदस्तथा वयमपि तथाभूतास्तुभ्यं पश्चात्तापादिहेतवो भविष्याम इति गूढाभिसन्धिस्ते पदयोः पदवीं यामेति वक्रीणामिति क्षेपम् देहे गते त्वन्तर्यामिणा क्वचिद्गन्तव्यं देहान्तरस्य तु नोत्पत्तिः बीजस्य दग्धत्वात् हरेणैव दग्धो न कामः प्ररोहति स विपरीतो रहीभवति तत्रापि विशिष्टो विरहः एकान्ताभावरूपो वा अनेन त्वया सह एकान्ताभावे विरहत्वं यद्यपि पूर्वोक्ताग्निनैव दाहः सम्भवति तथापि भस्मसात्करणेन तस्य सामर्थ्यं यावत्सर्वाङ्गेषु सूक्ष्मावयवेष्वप्यग्निः प्रविश्य नोद्बुद्धो भवति यथा वह्निसम्बन्धेन शुष्कं काष्ठं ज्वलति तत उपाधेरनन्तं गतत्वात्ते पदयोर्गमनम् अतो गमनं दूरापास्तं प्रत्युत मरणमुपस्थितमिति शीघ्रं प्रतीकारं कुरु ॥ ३५ ॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अहो सम्प्रयोगसमयान्यसमयेऽपि सुन्दरीणां निर्बन्धाः काया दिदृक्षिता यें आसंस्ते वीक्षणाक्षिने दृष्टास्तथैव मधुपानान्यसमयेऽपि भाववतीनामासां निर्लज्जं वचनं शुश्रूषितमासीत् तदधुनापि न श्रूयते हन्त हन्त वेणुनादेन काममयेन नोन्मादिताः पुनश्च वाचःपेशैर्विह्वलीकृताः यस्मादस्य लज्जाविवेकधर्मधैर्यादीनि तिष्ठन्ति ताश्चित्तमन्यपहृतं तदध्येताः प्रायः सलज्जमेव भाषन्ते न त्वाभ्यन्तरभावमधुनापि वाचा सम्यगुद्घाटयन्तीति मनसि परामृशति सति श्रीकृष्णे काश्चित् मुख्यतमा उन्मादसञ्चारिभावबलेन विपर्यस्तीकृतप्रकृतय आहुः, सिञ्चेति । अत्र हासेत्यस्य सम्बन्धिपदमर्थात्सर्वत्रैव लभ्यते ततश्च अङ्ग हे कृष्ण ! तव हास्यसहितेनावलोकेन कलगीतेन च जातः प्रोद्बुद्धः प्रोद्दीप्तो यो हृच्छयः काम एवाग्निस्तं तवैवाधरामृतपूरेण सिञ्च निर्वापय स्वार्थे कः येनैवाग्निः प्रोद्दीप्यते तेनैव प्राप्तविवेकेन यदि निर्वाप्यते तदैव तदपराधोपशमः अन्यथा अग्निदाता गृहादिदाहोत्थं पापं प्राप्नोत्येवेति भावः । अत्र काममित्यप्रयुज्य हृच्छयपदप्रयोगेनैवं ध्वन्यते अस्माकं कामो हि हृदि शेत एव तत्र त्वया विना कोऽपि प्रबोधितुं न शक्नोति त्वञ्च वंशीनादेन सहास्मत्कर्णरन्ध्रद्वारा हृदयं प्रविश्य तत्र शयानं कामाग्निं प्रबोध्य हासावलोकघृतमधुभ्यां कलगीतवातेन च प्रदीप्य तत्क्षणानन्तरमत् प्राणान् दग्धुमुपक्रमसे अतस्तद्दाहपापाद्बिभेषि चेत् तं निर्वापय नच तत्प्रोद्दीपने तन्निर्वापणे वा तवायासलेशोऽपि यतस्ते हासावलोकस्तस्याग्नेरुद्दीपकः अधरामृतं च तस्य निर्वापकमिति तद्वस्तुद्वयं तव मुखचन्द्र एव वर्त्तते अतो दुर्ललितराजपुत्रस्य तवाग्निज्वालननिर्वापणात्मिकैव खेला भूयसी भूरिशो दृष्टा नत्वग्निज्वालनमात्रैव एषा त्वय्येव दृश्यते इति नर्थयामि मे साहजिकान्येव हासावलोककलगीतानि एतैर्यदि युवतयो ज्वलेयुस्तदा कुत्र कुत्र कतिशो वा मया स्वाधरामृतैश्चिकित्सा कर्त्तव्येति चेत्तर्हि परस्सहस्रस्त्रीवधे प्राप्त एव तव तदुद्भूतादनुतापाद्धठो यास्यतीत्याहुः नोचेदिति विरहाग्निना उपयुक्तदेहा दग्धशरीरा योगिन्य इव ध्यानेन तव पादयोः पदवीं याम अधुनैव प्राप्नुयाम अयमर्थः वयं पूर्वजन्मस्वकृततपःफलानेवात्मनो जानीमः यदेतज्जन्मनि त्वं नाङ्गीकुरुषे तस्मादधुना तपश्चरणार्थं न बाह्यं लौकिकं वह्निं गृह्णीमः हृच्छयाग्नित्वद्विरहाग्न्योः स्वत एव सत्त्वात् तत्रापि त्वद्विरहाग्निनातिप्रबलीभविष्णुना हृच्छयाग्निरपि मन्दीकरिष्यते एतौ तौ विरहाग्नावेव प्राणेषु हूयमानेष्वस्माकं सङ्कल्पश्चायं भोः कृष्णविरहाग्ने ! कृष्णपादस्पर्शमाशासाना वयं त्वयि स्वप्राणान् जुहुमस्तस्मात् कृष्णस्य पादयोः पदव्यामन्यजनैरलङ्घितायामस्मांस्तथा स्थापय यथा अस्मत्कुचयोरुपर्यैव तस्य पादौ पतेतां न तु भूमाविति ततश्च त्वत्पादमार्दवेणैवोपशान्तहृच्छयाग्नयो वयं सिद्धमनोरथा एव भविष्यामस्त्वञ्चानिच्छन्नप्यस्मत्कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसीति सखे इति सख्यादेवैवं चिकीर्षामः सखीरप्यस्मांस्त्वमेवं सन्तापयसि चेद्वयमपि त्वां सखायमेवं कथं नानुतापयाम इति ध्वनिः किन्तु प्रेमहतकः खलु तदपि त्वदनुतापदुःखं कोटिगुणीकृत्यास्मभ्यमेव दास्यति इति जानीमः । किं कुर्मोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टं तस्मादपरिणामदर्शिन् ! कृपासिन्धो ! स्वानुतापवह्निबीजं किमर्थं वपसि कथं वा तत्फलभोगिनीरस्मांश्च करोषि मुञ्च हठमस्मानङ्गीकुर्विति भूयांसि एवाऽनुध्वनयः ॥ ३५ ॥

विशुद्धरसदीपिका ।

तदेवमधीरतया दशमीमिव दशामासादयन्त्यः प्रत्याख्याने च तस्मिन्नेव कोपं पर्यवसाययन्त्यो विलक्ष्यमसहमाना विवादितमुपसंहरन्ति–सिञ्चेति । ससम्भ्रमम् आदावेव क्रियानिर्देशः परमार्त्तिवैयग्र्येण तथा निर्वापयेति वक्तव्ये सिञ्चेत्युक्तिरग्नेराधिक्यसूचनाय न इति त्वदिति चासाधारण्येन अधरामृतानि लक्ष्यं वह्निमात्रस्य जलसेकमात्रशक्यत्वागमात् पूरकेणेति

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

एवं दक्षिणादिग्गतास्तदुक्त्या प्रार्थयन्ते—सिञ्चेति। अङ्ग, हे भगवन्! अस्मद्धृच्छयाग्निं सिञ्च ननु निर्वापय त्वद्विषयककामस्य परमसुखरूपत्वात् अतस्त्वयैवोत्पादित इत्याहुः—हासेति। तत्र य उपहासपूर्वको ऽवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निस्तत्र हासः कामजनकः अवलोकः सन्धुक्षणकर्त्ता गीतं वायुरिव तत्रापि कलगीतं सर्वतो वायुः सिञ्चनं च न बाह्यघृतादिना न स्वर्गस्यामृतेन न चन्द्रस्य सुधया वा सम्भवति तेषां यथा कथञ्चिदुदरप्रवेशयोग्यानामप्य ऽनभिलषितत्वेन हृदये प्रवेशायोग्यत्वादित्याशयेनाहुः—त्वदधरामृतपूरकेणाऽलौकिकेनापूर्वकेणापि सिञ्चनोक्त्या यथोक्ताग्नेः परम महत्त्वं सूचितम् सिञ्चनप्रार्थनया भगवद्विषयः काम एवात्मजीवनं जाठराग्निवदिति ध्वनितम् अन्यथा सस्य यदनुष्ठेयं तदावेदयन्ति—नो चेदिति। सिञ्चनेन यदि न जीवयसि तर्हि विरहजाग्निना उपयुक्तदेहाः दग्धशरीरास्ते पदयोः पदवीमन्तिकं योगिवद्धाम: प्राप्नुयामः उपयुक्तपदेन त्वदुपभोग्य देहिनां यथोक्ताग्निनोपभुक्तत्वमयुक्तमिति ध्वनितम् ननु, सिञ्चनेनातिप्रवृद्धः कामाग्निर्दाहको भविष्यतीत्याशङ्कानिरासाय विरहाग्निनेत्युक्तम् तथा चातिप्रवृद्धोपि जाठराऽग्निर्यथे ष्टभोजनलाभे सति न दहति अनशनादिना तदलाभे तु दहति तथा हृच्छयाग्निरपि स्वभोग्यालाभे तदाशानिवृत्त्या विरहाग्निरूपेण परिणतो दहतीति भावः। यद्यपि तव प्राप्तौ नास्त्यस्माकं किञ्चिदपि प्रतिबन्धकं तथापि भगवदुपभुक्तदेहानां भगवत्प्राप्तिरभिलषिता तद्विपर्यये महद्दुःखमापतत्यखिलरूपेणावतीर्णास्य तव यथाऽस्मन्मनोरथपूर्त्तिर्भवेत्तथाऽनुष्ठानं योग्यमिति सूचयन्त्यः सम्बोधयन्ति—हे सखे! इति। अथवा यद्यप्यस्मन्मरणे तव नास्ति काचिद्धानिस्तथापि सखित्वात्पश्चात्तापस्तु भविष्यतीति सम्बोधनाशयः॥ अनभिज्ञापक्षे अनेन निर्वस्त्राङ्गदर्शनार्थं यथा वस्त्रा हरणलीलारब्धा तथा निर्लज्जवचनश्रवणार्थमियं लीला समारब्धेति विज्ञाय विस्पष्टं प्रार्थयन्ते—सिञ्चेति। आदौ क्रियापदप्रयोगेणोत्कण्ठाधिक्यं सूचयन्ति—अङ्ग, हे प्रिय! नः कामाग्निं सिञ्च निर्वापय यतस्तव हासावलोककलगीताभ्यां जातश्चोद्दीप्तस्तथा चास्मद्धृदयशयमेव कामाग्निं हासावलोकाभ्यां मधरोत्तरारणीभ्यां कलगीतलक्षणेन मन्थनदण्डेन प्रबोध्य वाचः पेयैः प्रदीप्य तत्रस्थानस्मत्प्राणान् दग्धुमुपक्रान्तोसि नेदमुचितमतस्तज्जनितपापाद्बिभेषि चेत्तर्हि तं निर्वापय येनैवाग्निः प्रदीप्यते तेनैव पश्चात्तापेन झटिति यदि निर्वाप्यते तर्हि तदैव तत्पापं निवर्त्तत इति भावः। ननु, सम्प्रति ममान्तिके जलपूर्णभाजनाऽभावात्कथं सिञ्चामि तथाचेद्वतीनामाग्रहस्तर्हि यमुनासन्निधौ चलनीयमिति सोपहासमाशङ्कयाहुः—अमृतेन तत्राप्यग्नेः परममहत्त्वात्पूरकेण स्वार्थे कन् ननु, जलमपि यत्र दुर्लभं तत्राऽमृतं कुतः स्यात्? तद्बिन्दोरपि दुर्लभत्वात् तत्पूरः कुत इत्याशङ्क्य कथमस्मज्जीवनसाधनं गोपायसि प्रत्यक्षोपलभ्यमानस्य गोपनायोगादित्याशयेनाहुः—त्वदधरेति। अहो नान्येनामृतसमुद्रेणापि तच्छान्तिस्ततोऽस्तु तद्दौर्लभ्यं येनामृतेन तच्छान्तिस्तत्तव मुखचन्द्र एवास्मतो नास्ति तव कोऽप्यायास इति भावः। अनेन ज्वालनोपशमनयोरुभयोरपि स्वायत्तत्वादुभयविधा क्रीडोचिता नत्वेकविधा दुर्लीलाकर्तृषु राजकुमारेष्वपि तथा दर्शनादित्यपि ध्वनितम् हृच्छयाग्निरित्यनेनान्तरीयदाहात्मको रोगविशेषः त्वदधराख्यपात्रविशेषं मुखे निधाय पीतेनाऽन्तः प्रवेशसमर्थेन तत्रस्थामृतपूरकेणैवोपशान्तिं गमिष्यति नत्वन्यैः कोटिभिरप्युपायैरिति ध्वनितम् ननु, मम स्वाभाविकैर्हासादिभिर्यदि युवत्यो ज्वलेयुस्तर्हि कुत्र कति वा स्वाधरामृतदानेन चिकित्स्या इति चेत्तत्राहुः—नो चेदिति। यदि न सिञ्चसि तर्ह्ययमेकोऽग्निस्तेन शोषितदेहास्तथा विरहजाग्निना दग्धशरीरास्ते पदयोः पदवीं सान्निध्यमधुनैव ध्यानेन प्राप्नुयामः "अन्ते मतिः सा गतिः" इतिन्यायात् प्राणान्विहायापि प्रेष्ठसान्निध्यानं सम्पाद्यामिति स्वप्राणेभ्योपि स्नेहाधिक्यं सूचयन्त्यः सम्बोधयन्ति—हे सखे! इति। यद्वा, पूर्वजन्मन्यकृततपस्का वयमतो विरहाग्निना प्राणान् जुहुमः ततस्तव पादयोः पदवीं मार्गं प्राप्नुयामस्तद्रूपा भविष्यामस्ततोऽनिच्छतोऽपि तव पादावस्मत्स्तनेष्वेव पतेतां न तु भूमौ ततश्च त्वत्पादभारेणैवोपशान्तहृच्छयाग्नयो वयं सिद्धमनोरथाः भविष्यामस्त्वञ्चानिच्छन्नप्यस्मत् कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसि तथा च सखीरस्मांस्त्वमेव सन्तापयसि चेत्तर्हि वयमपि त्वां सखायमेव कथं नानुतापयाम यस्तु प्रेमहतकस्तदनुतापदुःखमपि कोटिगुणीकृत्याऽस्मभ्यमेव दद्यात इति जानीमः। किन्तु नोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टं तस्मात् भोः परिणामादर्शनकृपासागर! स्वानुतापवल्लीबीजं किमर्थं वपसि कथं वा फलभोगाशीरसांश्च करोषि मुञ्चासदाग्रहमङ्गीकुर्वस्मानित्याशयः। यद्वा, अकर्त्तव्यप्रार्थनामाकर्ण्यापि विमुखमालक्ष्याहुः—नो चेद्ययमिति। चेत्तावत्पर्यन्तं कामाग्निना कथं दग्धा इत्याशङ्क्य तत्सिञ्चनाशया सञ्जीवनाय वयमपि अतःपरं तन्निवृत्त्याशया अग्निर्विरहाग्निश्चेत्यग्निद्वयसत्त्वे जीवनं दुर्लभमिति भावः। ननु, अस्तु तेन मम का हानिरिति चेत्तत्राहुः—ध्यानेनेति। तथा च निरवधिकदुःखं दातुं प्रवृत्तोसि तादृशं दुःखं तुभ्यं दातुं नास्त्यस्माकं सामर्थ्यं यस्माद्विरहेण तव दुःखानुदयात् संयोगस्यापि तादृग्दुःखजनकत्वेऽप्यस्मिन्जन्मनि तस्य दुर्लभत्वादिदं शरीरं दग्ध्वा तेन पादयोर्मार्गभावं यामः तेन च सर्वदा संयोगेनैवाविच्छिन्नं तव दुःखं दास्याम इति भावः। तथापि परस्परदुःखप्रदाने न सख्यधर्म इत्याशयेनाहुः—हे सखे! इति। यद्वा, नन्विदानीमिदं दुर्घटं जन्मान्तरं स्यादित्याशङ्क्याहुः नोचेदिदं दुर्घटमेवेति चेत्तर्हि ध्यानेनापि ते पदयोः सान्निध्यं न यामः यतः विरहजाग्नेरेवोपयुक्ता उचिता न तु संयोगामृतयोग्या देहा यासां ता अधुनैव जन्मान्तरेऽपि विरहस्यैव निश्चयादिति भावः। तस्मात्त्वया सम्पादितं सख्यं वृथैव सम्पन्नमिति सम्बोधनाशयः॥ मानिनीपक्षे अङ्ग, हे लम्पट! नोऽस्माकं सहजेन सादिना जातो यस्तव कामानलस्तत्त्वदधरामृतपूरकेणैव सिञ्च, तादृशी अन्युपशामकतादृशामृतदानयोग्यायाः कस्याश्चिदस्मासम्भावाविष्ट मधुरादिवस्तुनि दुर्लभे दृष्टे सति ओष्ठपुटी लोके यथा क्लिद्यते तद्वदिति नर्म व्यञ्जनम् यद्वा, नोऽस्माकं त्वनिरत्याऽ[illegible]मृतेन पूरकेणेत्यर्थः। बलात्कारमालक्ष्याहुः, नो चेद्यदि त्वमधरामृतपानाय प्रवर्त्तसे चेत्तर्हि वयं स्वपतिविरहजाग्न्युपयुक्तदेहाभावे सम्भवेमहि तथापि ध्याने चिन्तनेऽपि ते पदयोः मार्गमपि

यर्ह्यम्बुजाक्ष! तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग! स्थातुं त्वयाभिरमिता बत पारयामः ॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यास्याम न यास्याम आत्मस्वरूपस्याद्यस्मात्त्वमावं जानासीतिसम्बोधनाशयः । निवृत्तिपक्षे "तरतिशोकमात्मवित्, ब्रह्मविदाप्नोतिपरं, नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुत्या परमपुरुषार्थानन्यसाधनतत्त्वज्ञानस्यास्मदवलोकनादिना यथाकथञ्चिदपि जातस्य करुणामृतधारयाभिषिञ्चनवर्द्धनेन समुचितमिति प्रार्थयन्ते-सिञ्चेति । अङ्ग, हे परमात्मन् नोऽस्माकं श्रुतीनां हासपूर्वकं प्रसन्नतापूर्वकमवलोकनं श्रवणपूर्वकं मननं कलयति सर्वतश्चिन्तवृत्तीः सङ्कर्षतीति कर्म तव मधुरं गानं निदिध्यासनं च ताभ्यां जातो यो हृच्छयस्य सर्वाश्रयस्य कामादेर्दाहकत्वादग्निस्तज्ज्ञानाग्निं त्वदोष्ठपुटनिःसृतवाङ्मयामृतपूरकेण कृष्णद्वैपायनाद्यात्मना त्वं सिञ्च वर्द्धय यथा यथोक्ताग्निस्तद्व्रादिकल्पितकुतर्कजलप्रवाहैर्नोपशाम्येत तथा कुर्वित्यभिप्रायः कृष्णाद्यात्मनावतीर्णस्य भगवतो वचनामृतत्वमुक्तम्—

"प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥

इत्यादिना । ज्ञानस्याग्निरूपत्वमुक्तं भगवता—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ! ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥

इत्यादिना । तत्सेचनं तेनैव कृतम्—

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्" ॥

इत्यादिना । विपक्षे दोषमाहुः नोचेज्जोसिञ्चसि यदि वयं तत्त्वमादिश्रुतिप्रतिपादितेन श्रुतिषु प्रत्यगभिन्नपरमात्मनिरूपणेनाप्तीत्याग्निरूपेण तव विरहलक्षणाग्निनोपयुक्तदेहाः भक्षितस्वरूपाः नष्टाः भवेम तथापि ते पदयोः पदवीं तत्त्वं ध्यानेन याम तत्राभिप्रायस्त्वो भविष्याम यस्त्वन्यथाभावस्य वादिसहस्रैरपि कर्तुमशक्यत्वादिति भावः । यस्मात्तयोर्याः सख्यं वर्त्ततेऽतस्तौ कदापि न विमुक्तौ भवत इति सम्बोधनाशयः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्यनुरक्तिमन्यत्र विरक्तिञ्चाहुः-सिञ्चेति द्वाभ्याम । हे अङ्ग, प्रियतम ! नोऽस्माकं भवदीयेन हासलसितेनावलोकेन अवलोकनेन मधुरेण गीतेन च जातं हृच्छयाग्निं कामाग्निं त्वदधरामृतपूरकेण सिञ्च शमय नोचेदेवं कामाग्निशमीकरणाभावे हे सखे ! वयं कामाग्निना दग्धप्रायाः अपि पुनरपि विरहजाग्निनोपयुक्तदेहाः दग्धदेहाः सत्यः ते पदयोः पदवीं ध्यानेन याम प्राप्नुयामः इति ॥ ३५ ॥

भाषा टीका ।

हे कृष्ण ! ये तुमारे हास पूर्वक अवलोकन ते और मधुर बंशी के गीत से उत्पन्न भयो जो कामाग्नि ताकूं तुम अपने अधरामृत के प्रवाहते सींचो । नहीं तो हे सखे ! हम सबन के देह या तुमारी विरहाग्नि के उपयोग में आय-जावेंगे, तब वाविरियां हम योगीन की नांई ध्यान सों तेरे चरणन की पदवी को प्राप्त होवेंगी ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, स्वपतीनेवोपगच्छत त एनमग्निं सिञ्चेयुरिति चेत्तत्राहुः—यर्हीति । रमाया लक्ष्म्या दत्तक्षणं दत्तोत्सवं दत्तावसरं वा तदपि क्वचिदेव न सर्वदा अरण्यजनाः प्रिया यस्य तस्य तव अरण्यजनप्रियत्वादरण्ये कचिद्यर्ह्यस्प्राक्ष्म स्पृष्टवत्यो वयं तत्र च त्वयाऽभिरमिता आनन्दिताः सत्यस्तदारभ्यान्यसमक्षं स्थातुमपि न पारयामः तुच्छास्ते न रोचन्त इत्यर्थः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, महाकामिन्यः श्रीबलदेवेऽपि युष्माकं भक्तिरस्त्यतो भवतस्तमेव कामपार्थं यात किं वा अन्यदीया यूयं मया कथं स्वीकार्याः इत्याशङ्क्य सशपथमाहुः-यर्हीति । हे अम्बुजाक्षेति परमसौन्दर्यं सूचितं तवं स्वरूपे किं वा अधोभागः तदस्प्राक्ष्म तदीयत्व सम्बन्धं प्राप्ताः स्म इत्यर्थः । एषा प्रेम्णा विनयोक्तिः सदा रमयतीति रमा लक्ष्मीस्तस्या अपि कचिदेव दत्तक्षणं अतोऽरण्यजनानामस्माकं त्वद्गमनायोग्यत्वाभावेऽपि ते प्रिया यस्येति परमकारुण्यं सूचितम् अन्यसमक्षमिति यदि कदाचित् कथञ्चिदन्येषामन्तिके तिष्ठेम तदा परोक्षमेव न तु साक्षात् सम्मुखे अङ्ग इति यदि वा कथञ्चित् समक्षं तिष्ठेम तदा च परमदुःखेनैवेत्यर्थः । स्थातुमपि किमुत उपवेष्टुं शयितुं वेत्यर्थः तत्र त्वयैव नागरशेखरेण सम्पादितमित्याहुः, त्वयाऽभितो रमिता इति । बत खेदे निश्चये वा अन्यसेव्यत्वासम्भवात् । यद्वा, रमायाः सेव्यमपि तव पादमूलं अरण्यजनप्रियत्वादरण्यजनानामेव दत्तक्षणम् अतः क्वचित् कस्मिंश्चित् स्थाने काले वा यर्हि यावत् अस्प्राक्ष्म कचिद्दत्तक्षणमिति वा कचिदनिर्वचनीयदेशे इत्यर्थः । तावदारभ्य त्वयाऽभिरमिताः सन्तोषिताः यद्वा, स्पर्शनादौ रतिविशेषं नीताः, सत्यः अन्यसमक्षं यद्वा, अहो

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

महामोहनकाननान्तरे त्वदङ्गसङ्गाशया वा गृहे गत्वा तिष्ठेम तदपि न घटते महाधूर्तेन त्वया गृहसुखस्याशेषस्यैव विलुण्ठनादित्याहुः—यर्हीति । स्पर्शने हेतुद्वयं रमाया दत्तक्षणमिति रमाय रमणाय आदत्तक्षणं गृहीतावसरम् अरण्यजनानां प्रियस्येति च त्वयाऽभिरमिताः स्मः कदाचिदस्प्राक्ष्मेति तत्र निजाविवेकदोषो निरस्तः अतस्तत्प्रभृतिकिमप्यन्यन्न रोचते कथं गृहं यामेति भावः । यद्वा, अरण्यजनप्रियस्य तव या रमा श्रीराधा तस्याः पादतलं अन्यदसमानं तदैश्वर्यं विनोदमर्थद्वयं यद्यपि तत्रैव सापि समागतास्ति तथापि तत्सङ्गाकाङ्क्षितिनिष्ठा विज्ञापनेनान्याः सर्वा अपि तस्यामिव स्वेषु तस्य प्रीतिं जनयितुं तथोचुरिति ज्ञेयम् अनेनाथवेत्यस्योत्तरं स्वाभाविकप्रेमविशेषेणैवागताः स्म नत्वन्यजनवत् साधारणप्रेम्णेति श्लेषार्थः । हे अरण्यजन ! सदा अरण्यचरत्वात् अरण्यमेव जनः परिजनो यस्येति वा प्रियस्य पत्युः पादतलं यर्हि अस्प्राक्ष्म कथं ? तव रमाय रमणाय क्वचित् कुत्राप्यंशे अदत्तक्षणं अदत्तावसरं तत्प्रभृति त्वयाऽभिरमिताः तु अयेन शुभावहेन विधिना अभिरमिता वयं तु अन्यसमक्षं स्थातुमपि अशक्तत्वेन न पारयामः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, कथं निरपराधे मय्यपराधः कल्प्यते मदीयस्वाभाविकसौन्दर्यादिदर्शनेन कामिनीनां चित्तादिकं क्षुभ्यति तत्राहं किङ्करवाणि किञ्च यदि गृहकृत्येषु न शक्तिस्तथापि कुलवधूनां युष्माकं तत्रैवावस्थानं युक्तं तत्राहुः यर्हीति ! हे अम्बुजाक्ष यर्हि यदा अस्मदनिर्वचनीयपुण्योदयसमये क्वचिदपि दुर्लभे देशे त्वयाऽभिरमिता निजभावव्यञ्जनया नन्दिताः स्मस्तत्र पादतलमस्प्राक्ष्म सूचकेन वाक्येन इति "पूर्णाः पुलिन्द्य उरुगायपदाब्जराग-श्रीकुङ्कुमेन दयितास्तनमण्डितेन" इत्यत्र पूर्वकृतव्याख्यानुसारेण कयापि तया यथाकथञ्चित् लब्धस्य पादतलस्पर्शस्य तल्लोष्ठीष्वेव प्रसिद्धेः कृतकात्यायनीव्रतानां तु तत्स्पर्शस्याङ्गीकरणमात्रतात्पर्याभासमङ्गा अपि प्राप्तसङ्गाभिरात्मैक्यं प्रकल्प्य ताभिर्मिलित्वा प्रोचुरिति ज्ञेयम् । कीदृशं पादतलं रमाया दत्तक्षणं तस्यामपि नूनमर्पितमहोत्सवमित्यर्थः । ननु, स्वप्न एवायं भवन्तीनाम् अन्यथा नित्यमपि तथाद्यापि तत्स्यात् तत्राहुः—अरण्यजनेषु पुलिन्दीहरिण्यादिष्वेव सन्ततनिजदर्शनादिदानेन प्रीतिकर्तुर्नतु व्रजजनेषु ततोऽस्माकं तु सुतरामेव दुर्लभस्वेत्यर्थः । इति रमाया अस्माकञ्च योग्यानां परित्यागात् तादृशानां च स्वीकारादुपालम्भश्च सूचितः । तदेवं यर्ह्यस्प्राक्ष्म तत्प्रभृतिः नान्येषां समक्षं स्थातुमूर्ध्वावस्थानमपि कर्तुं पारयाम अन्यदर्शनमस्मभ्यं न रोचत इत्यर्थः । अत एव एष कोऽप्युच्चाटनविद्यामयः स्पर्शगुण इति भावः । ननु, मिथ्यावादिन्यः ! सदा गोष्ठजनमध्ये वसथैव तत्राहुः—अङ्ग सुखेन अनायासेन ततो बलादेव तत्र वसाम इति भावः । अथैश्वर्यपक्षे क्वचित् स्पर्शने हेतुः क्वचित् केषु चिदाविर्भावेषु रमाया दत्तक्षणं स्वयं तु अरण्यजनप्रियस्य वृन्दावनवासिनां श्रीगोपादीनां प्रेम्णा तदव्यभिचारिणः अहो अभाग्यं तथापि यर्हि कदाचिदेवास्प्राक्ष्म अन्यत् समानम् ॥ अत्र तेषां व्याख्याने अरण्येति तज्जनसम्बन्धेनैवस्यापि दैन्यमेवेति अनेनाथवेत्यस्योत्तरं स्वाभाविकप्रेमविशेषेणैवागताः स्म नत्वन्यजनवत्साधारणप्रेम्णेति निषेधार्थश्चायम् अये साधु स्मारितं सखे ! इत्यनेन यतो बाल्यक्रीडासख्येन भवतीनां स्पर्शोऽपि जातोऽस्तीत्याशङ्क्याहुः—यर्हीति । यर्हि यदा तव बाल्ये वानरादिप्रियस्यैव सतः पादतलं रमाया रमणाय दत्तावसरं तदभिसारोन्मुखं बभूवेत्यर्थः । तत्प्रभृति तदपि नास्प्राक्ष्म किमुतान्यदङ्गं कथम्भूता अपि त्वया अभिरमिता बाल्ये कारितक्रीडा अपि अत एवान्येषां श्वश्र्वादीनामपि समक्षं स्थातुं पारयामः अन्यथा तैरपि ह्रियेमहीति भाव इति ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

दत्तक्षणां दत्तावसरम् अस्प्राक्ष्म स्पृष्टवत्यः ॥ ३६-३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु,स्वस्वपतय एवाधरामृतं सिञ्चेयुस्तत्राहुः—यह्यति । हे अम्बुजाक्ष ! अरण्यजनानां मुनीनां प्रियस्य तव रमायाः लक्ष्म्याः दत्तक्षणं दत्तोत्सवं दत्तावसरं वा तदपि कदाचिदेव न सर्वदा अरण्यजनप्रियत्वादिति भावः । एवंविधं पादतलं यर्हि यदा वयमस्प्राक्ष्म स्पृष्टवन्त्यः अरण्यजनप्रियत्वादरण्ये क्वचिद्यदा स्पृष्टवत्यः तत्र च त्वयाऽभिरमिता अभिनन्दिताः स्मस्ततः आरभ्य अङ्ग हे कृष्ण ! अन्यसमक्षं स्थातुमपि न पारयामः पुरुषान्तरसमक्षमवस्थातुमपि न शक्नुमस्तुच्छास्ते न रोचन्त इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यर्हि यदा क्वचिद्वने दत्तक्षणां दत्तावसरम् अस्प्राक्ष्म स्पृष्टवन्त्यः अरण्यजनः संन्यस्तजनः तत्प्रभृति तदानीमारभ्य अन्यसमक्षम् अन्यजनाभिमुखं न पारयामः न शक्नुमः अत्र अद्भुतमाश्चर्यं तव महिमा अनेन त्वदङ्गस्पर्शनानन्तरमन्याङ्गस्पर्शनशङ्का निवारिता ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु, उपभुक्तं द्रव्यमस्मदुपयुक्तं न भवति भवत्यश्च पतिमत्यः तेनास्मद्योग्या न भवथेत्याशङ्क्याहुः—पतिमत्य ऊचुः यर्हीत्यादि हे अम्बुजाक्ष ! यदि यदा कदाचित् कुत्रापि धूलीखेलादौ बाल्ये तव पादतलम् अस्प्राक्ष्म स्पृष्टाम तत्प्रभृति अन्यसमक्षं स्थातुं न पारयामः अस्तु तव सम्पर्कः तद्विदमन्यसम्बन्धित्वमस्माकं लोकप्रत्ययेन न वास्तवं त्वत्प्रिया एव वयं तव कीदृशस्य वृन्दावनजनदयितस्य अत एवाऽस्माकं स्पर्शो जातः पादतलं कीदृशं रमाया दत्तक्षणं दत्तोत्सवं दत्तावसरं वा अवसरे हि सा तत्स्पर्शं लेभे वृन्दावनजनात्तु

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

सदैव स्पृशन्तीत्यरण्यजनप्रियत्वं नचान्यत्र किं प्रमाणं यदन्य समक्षं स्थातुं न पारयामेति स्वविशेषणद्वाराऽऽहुः—वयं कीदृश्यः त्वयाऽभिरमिता त्वया सर्वज्ञशिरोमणिना कथमन्यथा स्वीकरिष्यामहे अत उचितमेवान्यसमक्षं स्थातुमसामर्थ्यमस्माकमिति शेषः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

किञ्च, यदप्युक्तम् अथवा मदभिस्नेहात् आगता इति यद्-भ्रामकं स्नेहः स्तुतः तत्र याथार्थ्यं शृणु इत्याहुः—यर्हीति । हे अम्बुजाक्ष! दृष्ट्यैव तापनाशक! यर्हि यस्मिन् क्षणे तव पादतलं अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षम् अङ्ग! सामस्त्येनापि स्थातुं पारयामः साक्षाच्चरणस्पर्शो दुर्लभः यत्र पुनः पादः प्रतिफलितः तत्पादतलमुच्यते रमापि तेनैव जीवति तदुक्तं नागपत्नीभिः "तवाङ्घ्रिरेणुस्पर्शाधिकारो यद्वाञ्छया" इति अतः तत्फलस्थानीयं रमायाः क्षणं सुखं तेनैव दत्तं कस्मिंश्चिद्धृदये समागतं सुखं तत्रैव भवतीति तस्य स्पर्श एवास्माकं भूमिष्ठस्य न तु लक्ष्मीवद्धृदये तत्तलमायाति अस्माभिर्विचारितं लक्ष्म्या चेदेतत्-प्राप्तं तपसा चाञ्चल्यपरिहारेण तदास्माभिरपि चाञ्चल्य परिहारेण नाशिष्ठतया स्थातव्यं किञ्च, अरण्यजनाः प्रियाः यस्य तेनापि सर्वसङ्गपरित्यागेन स्थातव्यं सङ्गाभाव एव भगवत्तोषहेतुरिति अरण्यं हि सात्त्विकं वैष्णवं च एतेन पुलिन्दीकमारणं वा पादतलसम्बन्धिकुङ्कुमसम्बन्धेनैव ता अपि प्रिया आसन्निति तेन पादतलस्य फलपर्यवसायित्वं प्रभुप्रीति साधकत्वं च सहजमिति वयमप्यात्मनि तथैव जानीम इति भावः । स्फुटमिदं न वक्तुं शक्यमित्येवमुक्तम् अतः त्वत्-प्राप्त्यर्थं नान्यसमक्षं स्थातुं शक्नुमः सर्वथा त्वां यो न प्रपन्नः शक्त्याभावस्तत्कर्मप्रवेशात् यो हि यस्य घातकस्तद्-गृहापत्तौ तस्याग्रे स्थातुं न शक्तो भवति यथा व्याघ्राग्रे देहाभिमानी तथा भगवदीयः भगवद्व्यतिरिक्तो हि तद्भावं नाशयिष्यतीति यत्रैवं सूक्ष्मेक्षिका तत्रान्यस्य स्थाने गमनं तस्य च देवतात्वेन भावनं दूरापास्तम् अतः प्रीतिमात्रस्तुति यां सा अल्पीयसी अनन्यभावा एव वयं लक्ष्मीवत् किञ्च, यथा सर्वपरित्यागेन लक्ष्मीश्चेत् त्वां शरणं गता तदा अभिरमिता जाताः तथा वयमपि जाताः सर्वदैव स्वप्ने त्वत्-सम्बन्धं प्राप्नुमः अन्यथा जीवनमेव न स्यात् एवं भुक्त-पूर्वा वयं नान्यत्र प्रेषयितुमुचिता इति ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, तर्हि स्वस्वपतीनेवोपगच्छत त एवैनमग्निं सिञ्चन्तु इत्युक्त आहुः—यर्हीति । हे अम्बुजाक्षेति त्वन्नयनदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः स्म इति "चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः" इति रसशास्त्रोक्तेः । प्रथमं लोचनालोचनदर्शनमेवास्माकं पूर्वरागप्रवर्तकमिति भावः । तत्रापि यर्हि यस्मिन्नेव क्षणे तव पादतलं कस्मिंश्चिद्गोवर्धनादिकुञ्जप्रदेशे अस्प्राक्ष्म कुचाभ्यां स्पृष्टवत्यो वयं कीदृशं रमाया दत्तक्षणं वैकुण्ठ-वासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिलाषमयो-त्सवदायकं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति नागपत्नी-वचनाद्गर्गादिमुखतः श्रुतात् अतो वनवासिनीनां गोपस्त्रीणा-मस्माकमभिलाषमयोत्सवदायकं तत्राभिलाषे किमाश्चर्यमिति भावः। ननु, लक्ष्म्या अप्यभिलषणीये वस्तुनि कुतो वः प्राप्तियोग्यतेत्यत आहुः—अरण्यजना गोपजातय एव प्रिया यस्य तस्य तव तत्प्रभृति तं क्षणमारभ्य अन्येषां स्वस्वपतीनां गोपस्त्रीणामस्माकं समक्षं स्थातुमपि न पारयामस्तान्दृष्ट्वा मनसि घृणोत्पद्यत इति भावः । किञ्च, न केवलं वयमस्प्राक्ष्मैव अपि तु त्वया आभिः सर्वतो भावेन रमिता यथेष्टं सम्भुज्य पुरुषवशीकृता अपीत्यर्थः । तेन सम्भुक्त-पूर्वा अस्मानन्यत्र न प्रस्थापय पादयोस्ते पताम इति काकुध्वनितः ॥ ३६ ॥

विशुद्धरसदीपिका ।

अथ तृतीयदिक्स्थिताः सहचर्यो दास्यश्चात्मनि काम-वासनाभ्रममपि निवारयन्त्यस्तद्व्यवहारेऽपि ग्लानिमावेदयन्त्योऽथवा मदभिस्नेहादित्यस्योत्तरमपि प्रदर्शयन्त्यः स्वाभिप्रायगोपनेन वञ्चनाय च पूर्वासां सवासनत्वमवलम्बमाना आहुः—यर्हीति । यदारभ्येत्यर्थः । तत्प्रभृतीति वक्ष्यमाणान्वयानुरोधात् हे अम्बु-जाक्षेति कैशोरं सूचितं तव पादतलमिति पादशब्दो गौर-वाभिप्रायेण अस्प्राक्ष्म स्पृष्टवत्यः कीदृशं रमाया दत्तक्षणं श्रीराधाया दत्तोत्सवं "आत्मना रमया रेमे" इति ब्रह्मसंहि-ताऽभ्यः रमापतेरिति वक्ष्यमाणाच्च । अत्र स्वाधीनपतिकायां तया व्यवहारस्यानुपपत्त्या पादशब्देनायं स्वभावविनिमयेन पुरुषायितं सूचयति अन्यथा रसाभासापत्तेः । यद्वा, पाद-तलमित्यस्य देहलीदीपवदुभयत्रान्वयः ततश्च तव रमायाश्च पादतलमित्यर्थः । कुत्रेत्याकाङ्क्षायां क्वचिदिति साकूतं यत्र क्वचिदित्यर्थः । त्वया ज्ञायतेऽस्माभिश्चेति तूष्णीं स्थेयमिति भावः । यद्वा, तव रमाया एव पादतलमिति शुद्धसख्यं सूचितम् ननु, यत्किञ्चित्सूचनीयमिति तत्राहुः, अरण्येत्यादि । अरण्यजनाः पुलिन्दीजनाः प्रिया यस्य तस्य तत्समक्षं विहारस्यासङ्कोचादेव मुक्तं तेषां वा प्रियस्येति "पूर्णाः पुलिन्द्यः" इत्यादिप्रागुक्तं सङ्गमितं तत्प्रभृति तदारभ्य (आरभ्य) समक्षमित्यादिगतार्थम् अङ्ग! स्वातन्त्र्येण परतन्त्रतायां नोऽस्माकं दोष इति भावः । अभि-रमिताः आनन्दिताः अभिरामतां प्रापिता वा एवञ्चातः प्रागपि निभृतविहारः सूचितः अत्र प्रमाणं पाद्मे—

> "बाल्येऽपि भगवान् कृष्णः कैशोरं रूपमाश्रितः ।
> रेमे विहारैः विविधैः प्रियया सह राधया" इति ।

तत्रैवान्यत्र "रेमे श्रिया ऽसौ जगतां जनन्या" इति दर्शितं प्राक् एतदनुसारेण श्रीमत्सुधानिधौ—

> "श्रीमद्राधे ! त्वमथ मधुरं श्रीयशोदाकुमारे—
> प्राप्ते कैशोरकमितरसाद्वहती साधुयोगम् ॥
> इत्थं भाव्ये रहसि कथया नित्यलीलान्वयः श्री-
> जातावेशा प्रकटसहजा किन्तु दृश्या किशोरी" इति ।

एवं च प्रकटाप्रकटलीलायां नित्यविहारः श्रीराधयैवेति

विशुद्धरसदीपिका ।

दर्शितं ततश्च प्रथमसमागमो रासक्रीडायामेवेति मतं साधकचरीगणापेक्षया प्रकाशभेदेन वा सङ्गमनीयं प्रकाशभेदश्च स्वीकृतः श्रीप्रबोधैः यथा—

"एकं सख्यापि नो लक्षितमुगमि लसन्नित्यतादात्म्यकान्तम्—
तदूद्दश्यं द्वारतोऽन्यद्व्रजति तत्रगृहे ऽन्यत्तु तन्नर्मशर्म ।
अन्यद्वृन्दावनान्तर्विहरदथ परं गोकुलप्रासयागम—
विच्छेदन्यप्रदेवं लसति बहुविधं राधिकाकृष्णरूपम्" ॥

इति मुख्यः प्रकाशस्तु "गोप्यैकया युतस्तत्र परिक्रीडति नित्यदा" इति ब्रह्मयामले दर्शितः नित्यवति आदिपुराणे "कुञ्जकुञ्जगता क्रीडा कदाचिद्विरमेन्न हि" इति न चैवं प्रकटाप्रकटलीलयोर्भेदवैयर्थ्यमिति वाच्यं "कदाचिद्द्वापरस्यान्ते प्रकाशं विहरत्यसौ" इति श्रीकृष्णयामलादावुभयोरपि दर्शितत्वात् विवृतमिदं भक्तिमञ्जूषायाम् ॥ ३९ ॥

श्रीरामनारायणकृतभावविभाविका ।

किञ्च व्रजं यात पतीन् शुश्रूषध्वम् इति कथनमनुचितमसमर्थं नियोगानुपयोगादित्याहुः—यर्ह्यम्बुजाक्षेति । तत्र श्रुतिरूपोक्तिः हे अम्बुजाक्ष ! हृत्कमलसाक्षिन्निति नास्मद्धृत्साक्षियोऽस्मदुपेक्षोचितेति भावः अरण्यजना "आरण्यमावर्तयेत्"इत्यादिश्रुत्याऽरण्यावर्तनपरो जनाः परमहंसाः प्रिया यस्य तेषां प्रियस्य वा अरण्ये उपनिषदि जनिर्येषां मन्त्रादीनां तेषां प्रियस्य तात्पर्यगोचरस्य ते एवाभिव्यञ्जकतया प्रिया यस्यैते वा तस्य तव पादतलं "पादोऽस्य सर्वाभूतानि"इति श्रुतेः पादो विश्वं तस्य तलम् आधारमधिष्ठानमिति तत्सर्वाधिष्ठानमिति तत्सर्वाधिष्ठानात्मकस्वरूपं यर्हि कर्हिचित् अस्प्राक्ष्म अध्यारोपापवादन्यायेन लक्षणावृत्त्या गोचरीकृतवत्यः । ननु, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"इति श्रुत्या कथं लक्षणावाच्यसङ्गे मयि भवतीनां प्रवृत्तिरत्राहुः—रमाया दत्तक्षणमिति । तव स्वया शक्त्या विहरतः तस्या एव दत्तस्वास्फूर्त्यात्मकोत्सवं राधाविहारिणं त्वां स्वामिव वयमस्प्राक्ष्म "क्वचिद्रजयात्मना च चरतोऽनुचरेन्निगमः" इत्यादिवचनात्सगुणप्रवृत्तास्तदाध्यासिकसम्बन्धेन तदधिष्ठाने निर्गुणेऽपि त्वयि पर्यवसिता त्वया चाभिरमितास्तं त्वौपनिषदं "वेदैश्च सर्वैरहमेव वेद्यः" इति स्वीयत्वेन स्वीकृता इति भावः तत्प्रभृति अन्येषां तत्तन्मन्त्रस्फुरत्वेन प्रतिभासमानानां देवानां तदंशावतीर्णगोपानां वा समक्षं यथा स्मास्तथा स्थातुमपि न पारयाम नित्यश्रुतीनां नित्यदेवपरत्वेन नित्यत्वानुपपत्तेः मुनिरूपोक्तिपक्षे तु हे अम्बुजाक्ष ! कमलनयन ! यर्हि दण्डकारण्यजनप्रियस्य तत्सुखोत्पादनायैवारण्यं गतस्य रावणघातस्य राज्ये बल्याधिदिग्विजयादावपि संभवात् तज्जना एव वयं प्रिया यस्येति वा तस्य तव पादतलमित्यादरेण त्वामेव रमाया दत्तक्षणं दत्तोत्सवं यद्वा तस्या दत्तावसरं तथापि भगवत्या राधया दत्तस्मत्सुखायैव दत्तावसरमन्यथा त्वद्वक्षो नित्यनिवासिनी परमेश्वरी कोवा दयासुखकीटो हर्तुं समर्थः कश्चित् अस्प्राक्ष्मास्मदनुरागभावमालक्ष्य स्वापकाभिप्रहेण युगपत् स्वपत्रकुट्यामाविर्भूतमालिङ्गितवत्यः आभिरामेण रामेण त्वयाभिरमितास्तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयाम अन्यनयो योगाद्यभिमुखतापि न रोचते इति भावः । साधनसिद्धव्रजकुमार्युक्तिपक्षे तु सम्बोधनं पूर्ववत् यर्हि अरण्यजनानां वृन्दावनवासिनीनां नः प्रियस्य ता वयमेव प्रिया यस्येति वा अस्माकं व्रतकर्शितानां कृपया अयमेव वरदानाय यमुनातीरं गतस्य पादतलं रमाया श्रीराधाया नित्यं दत्तोत्सवं कर्हिचिदस्प्राक्ष्म सन्निधानाच्चीरग्रहणाभिषेण स्पृष्टवत्यस्त्वया च क्ष्वेलयादिनाभिरमिताः पूर्वमपि त्वय्येव निविष्टचित्तत्वेन चीर्णव्रताः तत्प्रभृति तु अन्यसमक्षं स्थातुमपि न पारयामः व्रतेति सर्वत्रोपेक्षा अवणखेदे अङ्गेति प्रीतिसम्बोधनसमानम् अङ्ग इति पाठे तु स्वातन्त्र्येण न स्थातुं पारयाम इत्यपि समानं प्रियासख्युक्तिपक्षे तु यर्हि अरण्यजनेषु अस्मासु प्राणप्रिया यस्य तस्य तव रमायाः प्रियायाः पादतलं रमाया राधायास्तव च पादतलं वा कर्हिचित्त्वं वेत्सि वयं वा दत्तक्षणं दत्तोत्सवं यथा अस्प्राक्ष्म स्पृष्टवत्यः त्वया चाभिरमिताः प्रिया प्रसादेनानुनीता इत्यनेन पूर्वविहारोऽपि सूचितस्तदुक्तं पद्मपुराणे—

"बाल्येऽपि भगवान्कृष्णः कैशोरं रूपमाश्रितः ।
रेमे विहारैर्विविधैः प्रियया सह राधया" ॥

इति अप्रकटनित्यलीलाभिप्रायं वा "कुञ्जकुञ्जगता क्रीडा कदाचिद्विरमेन्न हि" इत्यादिपुराणवचनात् तत्प्रभृतीत्यादि समानम् ॥ ३९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु यद्यपि निःसीमप्रेमवत्यो भवत्यस्तथापि मर्यादापालनार्थं पत्यादिसन्निधौ स्थित्वैव मदाराधनं कर्तव्यमिति चेत्तत्राहुः—यर्हीति । हे अम्बुजाक्ष ! यर्हि यत्प्रभृति तव पादतलं वयमस्प्राक्ष्म स्पृष्टवत्यस्तत्प्रभृति अन्यस्य समक्षं स्थातुमपि न पारयामः अशक्नुम इतःपरं तत्समक्षे स्थितकोटिनरकखेदाधिकखेदं कुर्वन्तीति सूचनाय वर्तेस्युक्तं किञ्च नैतावन्मात्रमपि तु त्वयाभिरमिताः बालभावमारभ्य त्वया सार्धं त्वत्प्रसादात् क्रीडामपि लब्धवत्यः अम्बुजमन्तःकरणं कमलमश्नुते व्याप्नोतीत्यम्बुजाक्षः तथा चान्तःकरणवृत्तिस्त्वं सर्वं जानन्नपि किमेवमाग्रहं करोषीति सम्बोधनाशयः स्वस्य भगवत्पादतलस्पर्शयोग्यतामपि सूचयति कश्चिदरण्यजनाः प्रिया यस्य तथा च वयमप्यरण्यजनत्वात् क्वचिदस्प्राक्ष्मेति भावः । इतः परमन्यत्र क्वापि स्थातुमशक्ता इत्यत्र हेतुमाहुः—रमाया लक्ष्म्याः दत्तोत्सवं दत्तावसरं वा तदपि कर्हिचिदेव न सर्वदा तथा च रमाया अपि यत्प्रार्थ्यं दुर्लभं तदेव पादतलं स्पृष्ट्वाऽन्यसमक्षे स्थातुमस्माकं का शक्तिरिति भावः । यद्वा, हे अम्बुजाक्ष ! दृष्ट्यैव तापनिवारक ! यथा लक्ष्म्याः चाञ्चल्यं विहायैतत्प्राप्तं तथास्माभिरपि सर्वतश्चाञ्चल्यं परित्यज्य तत्प्राप्तये तदेकनिष्ठतैव संपादनीयेत्याशयेनाहुः—रमाया इति । किञ्चारण्यजनप्रियस्य सर्वसङ्गविनिर्मुक्तेषु वने स्थित्वा तवाराधनपरेष्वेव तव प्रीतिदर्शनात्तव प्रीत्यर्थं तत्साम्यमेवास्माकमपि सम्पादनीयमित्याशयः । किञ्च इदानीं सर्वदा त्वयाभिरमिता अपि जाता अन्यथा जीवन-

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

स्यैव दुर्लभत्वात्तस्मादृयमन्यत्र गन्तुं स्थातुं च न समुचिता इति भावः। क्वचिदङ्ग इति पाठस्तत्राऽङ्गः सर्वभावेन स्थातुमित्यर्थः ॥ अनभिज्ञापक्षे ननु, कामाग्नितप्तानां यदि गृहकृत्येषु नास्ति शक्तिस्तथापि कुलाङ्गनानां युष्माकं पतिसन्निधावेव स्थातुमुचितमतः स्वपतीनेवोपगच्छत त एवैनं कामाग्निमपि सिञ्चेयुरिति चेत्तत्राहुः—यर्हीति । हे अम्बुजाक्ष ! तव नेत्रकमलदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः इत्येत्युत्पन्नचक्षूरागेण लब्धचित्तसङ्गादिकान् किमेवं ब्रवीषि "चक्षूरागः प्रथमं चित्तसङ्गस्ततोऽथ सङ्कल्पः" इति रतिशास्त्रं किन्न जानासीति भावः। तत्रापि यर्हि अस्मद्भाग्योदयक्षणे कदाचिदेव क्वचिदपि दुर्लभगोवर्द्धनादिकुञ्जप्रदेशे त्वयाऽभिरमिता निजभावव्यञ्जनयाभिनन्दिताःस्तमस्तव पादतलमस्प्राक्ष्म करेण संवाहनार्थं कुचाभ्यां वा स्पृष्टवत्यो यतो रमायाः जातावेकवचनं रमणीनां दत्तोत्सवं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति नो पत्नीनां मुखाच्छ्रुतत्वादूभयाय वैकुण्ठवासिन्या लक्ष्म्याः नारायणप्रियाया अपि रमणाभिकाङ्क्षया उत्सवदायकं यथाऽस्माकं तदाभवादेव किं चित्रमिति भावः। स्वस्य योग्यत्वेन दुर्लभत्वमाशङ्क्याहुः, अरण्यजनाः गोपाद्य एव प्रिया यस्य यद्वा, अरण्यरमणीनामुत्सवजनकस्य कादाचित्कत्ववर्णनमसङ्गतमित्याशङ्क्याहुः—अरण्यजनाः पुलिन्द्यः प्रिया यस्य तथा च पुलिन्द्यादिषु दर्शनादिना प्रीतिजनकस्य पादतलस्य स्पर्शोऽस्माकं दुर्लभ इति भावः अहो रमणाऽस्मान्विहाय तादृशीनां प्रीतिं प्रयच्छसीत्युपालम्भोपि व्यज्यते तत्प्रभृत्यन्यदर्शनमपि न रोचते तथा च कोऽप्युच्चाटनमन्त्ररूपस्तत्र पादतलमात्रस्पर्श एवेति भावः। अङ्ग इति पाठे ननु, मां मिथ्यावादिन्यो व्रजे वसथैवेति चेत्तत्राहुः—अङ्गः अनायासेन तथा च तत्र वलाद्वसाम ननु प्रीत्येति भावः। मानिनीपक्षे ननु, अङ्गस्पर्शादिना कामाग्निमुद्दीपयित्वा सम्प्रत्येवं वक्तुं प्रवृत्त इत्याशङ्क्याहुः—यर्हीति । बाल्ये त्वदङ्गस्पर्शः कदाचित्कृतः स्यात् परन्तु यत्प्रभृति तव पादतलं रमणीनां दत्तक्षणं जातं तत्प्रभृति क्वचिदपि कदाचिदपि नाऽस्प्राक्ष्म यतो वाऽरण्यजनप्रियस्य वानरादिप्रियस्य सतः त्वया कदापि नाभिरमिता अपि अत एवाऽन्येषां श्वश्रूप्रमुखानां समक्षं स्थातुं पारयाम" अन्यथा तैर्द्विष्यतेमहीति भावः । अम्बुजवद्विशालनेत्रस्याऽस्मत्स्वभावं पश्यतो नैवं प्रार्थनमुचितमिति सम्बोधनाशयः। यद्वा, यदि तव पादतलं वयमऽस्प्राक्ष्म तर्हि तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयामः बतेति खेदे तथा सति महान् खेदः स्यादिति भावः। ननु तथा आत्मतो मदङ्कुशलमित्यर्थः। पादतलस्पर्शमात्रस्य यद्येयं कथा तदा त्वयाभिरमितानां जायमानस्तु खेदो वाचामप्यगोचर इत्यभिप्रायेण त्वया अभिरमिता इत्युक्तम् ननु, मदङ्गस्पर्शवतीनां मयाभिरमितानां प्रतिदिनमानन्दास्वादनपराणां तत्समक्षाऽवस्थाने किं प्रयोजनमित्याशङ्कानिवृत्त्यर्थमुक्तं रमाया दत्तक्षणं तथा चैवंविधपादस्य तव गर्वस्वभावात्स्वर्गगर्ववतीभिरस्माभिः सङ्गतः स्थायित्वासम्भवात्ताहशस्य सुखस्य तथाविधदुःखकारणत्वसम्भवात् मेवमिति भावः। तत्राप्यरण्यजनप्रियस्य मरणाविरोधिभावतस्तथा चोभयभ्रष्टत्वसम्पादकम् तव पादतलस्पर्शादिकामिति भावः।

निवृत्तिपक्षे ननु, मया सिक्तोपि यथोक्तैर्वादिकल्पितदुस्तर्कैर्निर्वाणं यास्यतीति चेत्तत्राहुः—यर्हीति । हे अम्बुजाक्ष ! सर्वहृत्कमलव्यापक ! यदा तव प्रसादोदयकाले प्राप्तसाधनसम्पदधिकारिणा विचारिता वयं तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुमपि पारयामः ब्रह्मातिरिक्तं किमपि सामर्थ्यं न प्रतिपादयामः अपाततोऽर्थान्तरप्रतीतावपि अतस्तात्पर्येणान्यपरत्वं नास्तीत्यर्थः। तथापि त्वया परमात्मना अभिरमिताः त्वय्येव समन्वयंप्राप्ताः। ननु, तथापि "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतीनामप्यविशेषपरत्वमेवावसीयते निर्विशेषस्य निर्व्यापारस्य जगत्कर्तृत्वाद्यसम्भवादित्याशङ्कानिरासायोक्तं क्वचिद्रमायाः आपातरम्याया महामायाया दत्तक्षणं न तु सर्वत्र सर्वदा च तथा, शाखाग्रन्यायेन तासां सविशेषे वा निर्विशेष एव तात्पर्यं यश्चोरः सरस्थाणुरिनिवद्यो जगत्कर्तृत्वादिविशिष्टः स निर्विशेषः परमात्मेति जगत्कर्तृत्वादीनां विशेषब्रह्मलक्षकत्वे नास्ति कश्चिद्विरोधः दृग्दृश्यसम्बन्धानिरूपणान्मायासम्बन्धो ब्रह्मणो न वास्तव इति भावः ननु, श्रुतवेदान्तानामपि यथापूर्वसंसारानुवृत्तिदर्शनात्कथमुच्यते न पुनरन्यपरत्वमस्माकं नास्तीत्याशङ्कानिवृत्त्यर्थमुक्तम् अरण्यजनप्रियस्य तथा च विवेकवैराग्यादिसाधनविधुरत्वस्मरणारविन्दाऽनभिमुखस्येयं कथा न तु सर्वसाधनसम्पदलङ्कृतस्येति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पतिसङ्गेन हृच्छयाग्निः परिहार्य इत्यत्राहुः—यर्हीति । हे अम्बुजाक्ष ! कश्चित् रमायाः श्रियः दत्तक्षणं दत्तावसरम् अरण्यजनप्रियस्य अरण्यजनास्तावन्मुनयः वयमपि गोपजातीयत्वादरण्यजनास्ते प्रियाः यस्य तस्य तव पादतलं यर्हि यदा वयम् अस्प्राक्ष्म स्पृष्टवत्यः तदा त्वयाभिरमिताः आनन्दिताः सत्यः तत्प्रभृति तदाऽपि हे अङ्ग ! अन्यसमक्षं स्थातुमपि न पारयामः न शक्नुमः ॥ ३६ ॥

भाषा टीका ।

इतनी सुनके श्रीकृष्णचन्द्र बोले कि—हे गोपीओ ! तुम अपने पतीन के समीप जाओ वे तुम्हारे कामाग्नि कूं बुझावेंगे, तब गोपी बोलीं, कि—हे कमलदल लोचन ! वनवासीन के प्यारे ऐसे आप जो हो तिन आपके श्रीलक्ष्मी को उत्सव देवेवारे चरणन कों जब सूं स्पर्श कियो है, हे कृष्ण ! प्यारे ! वा समय सूं और दूसरेन के सन्मुख हम सब ठाडी होयबे कों हूं समर्थ नहीं हैं। काहे सूं कि—कबहूं कृपा करके आपने जो अपनो रमण को आनन्द दियो है तासों विश्व फीको लगे है ॥ ३६ ॥

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजः प्रपन्नाः ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वत्पादसौभाग्यन्त्वतिविचित्रमित्याहुः—श्रीरिति । वक्षस्यसापत्न्यं स्थानं लब्ध्वापि तुलस्या सपत्न्या सह तव पदाम्बुजरजः कामयते स्म भृत्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः यस्याः स्ववीक्षणकृते श्रीरात्मानं विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादीनां तपोभिः प्रयासः सा तद्रजस्तद्वद्वयमपि प्रपन्ना इति ॥ ३७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, उदारशिरोमणे ! मा सिञ्चाधरामृतार्पणेनास्माकं इच्छयार्पिन निजदास्यमात्रमपि देहीति चेत् तथापि मो मुग्धबुद्धयो मयैका द्विधा वा स्वीकार्याः अन्यथा युष्माकमत्यन्तबाहुल्येनान्योन्यं निरन्तरसापत्न्योदयाद्दायनाचापि दुःखं भवितेत्याशङ्क्य दृष्टान्तेन तत्परिहरन्त्यः परमार्त्या दास्यमात्रेच्छयाऽऽहुः—यद्वा, अग्रे दास्यं प्रार्थयितुं तस्य सर्वाराध्यमहालक्ष्मीकाम्यत्वेन परमोत्कर्षं प्रतिपादयन्त्यस्तदेव प्रपद्यमाना आहुः, श्रीरिति । उत अपि यस्याः स्ववीक्षणे निमित्तेऽपि अन्येषां त्वद्व्यतिरिक्तानां सर्वेषामेव सुराणां ब्रह्मादीनां प्रयासः इति माहात्म्यविशेषेण मात्सर्यासम्भवात् सपत्नीसङ्गता सहिष्णुता श्रियः सूचिता एवं तस्य तस्यामनासक्तिश्च ध्वनिता तथापि सा श्रीरपि सपत्न्या सहितापि पदाम्बुजरज एव चकमे तथोक्तं नागपत्नीभिः "यद्वाञ्छया श्रीर्ललना चरत्तपः" इति । श्रीसनकादिभिश्च तृतीयस्कन्धे—

> "यं वै विभूतिरुपयात्यनुवेलमन्यै—
> रर्थार्थिभिः स्वशिरसा धृतपादरेणुः ।
> धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो—
> लोकं मधुव्रतपतेरिव कामयाना" ॥

इति । तत्र हेतुः भृत्यैर्जुष्टमिति सर्वतोऽधिकप्रीतिपात्रदासवर्गसेवितत्वेन रजस एव परमोत्कृष्टमननादित्यर्थः । यद्वा, वैकुण्ठनाथस्य वक्षसि पदं लब्ध्वापि श्रीर्यस्य तव पदाम्बुजरजः किल निश्चये असमोर्द्ध्वमाधुरीभरमोहितत्वाच्चकमे तद्वत् श्रीवत् पादरज इत्येव न तु साक्षाद्दास्यमित्युक्तं तत्र च परमदौर्लभ्येन किञ्चिन्मात्रविवक्षया एकत्वं यद्वा, दास्ये सत्येव पादरजः प्राप्यते किं वा तस्मिन् प्राप्त एव दास्यं सम्पाद्यत इति पादरजसः कामना तत्प्रपन्नता च यत्तदोर्नित्यसम्बन्धाद्यच्छब्दानीततच्छब्देन श्रीवत्तदेककामनानिष्ठा बोध्यते । यद्वा, यत् यस्मादिति पूर्वमम्बुजरूपप्रयोगः श्रियस्तेन सर्वतापहरणाद्यभिप्रायेण आत्मनि च तदभावात्तदप्रयोगः यद्वा लक्ष्मीस्तादृशमाहात्म्यसाक्षात् पादाब्जरज एव कामयाञ्चक्रे वयन्तु नीचास्तद्योग्यताहीनाः पदं पादाब्जचिह्नं तत्सम्बन्धिरज एव यत्र कुत्रचिद्दूरे पतितमपि प्रपन्नाः एषा परमदैन्योक्तिः पादरजसः पुनरुक्तिः दास्यमात्रापेक्षाबोधनार्थम् । सा यथा सापत्न्यदोषं त्वद्दास्यलालसया न मेने, तथा वयमपीति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, तुलस्याः सम्बन्धि तस्या गोविन्दचरणप्रियत्वेन सदा तत्रैव निवासात् भृत्यैरनन्तैर्जुष्टमिति तत्र बहूनां सङ्घर्षोऽपि दर्शितः "सारङ्गाणां पदाम्बुजम्" इत्युक्तेः अन्येषां सुरेतराणां दैत्यादीनां सुराणां च प्रयास इति अन्यत्समानम् अनेन भर्त्तुरित्यस्योत्तरं भर्त्तुः शुश्रूषादिकं न हि परमो धर्मः किन्तु त्वद्दास्यमेव ब्रह्मादिप्रार्थ्यकृपाकटाक्षया श्रियापि तस्य प्रार्थ्यत्वादिति । यद्वा, यत्पदाम्बुजरजः यस्य नारायणस्य पादपद्मरजः श्रीश्चकमे तद्वत् स इव यस्त्वं तस्य तव पादरजो वयं च प्रपन्नाः "तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः" इत्युक्तत्वात् शेषं समञ्जसमेव एतदैश्वर्यं विनायमर्थः श्लेषार्थः । तादृशी सत्यपि तादृशस्थानं लब्ध्वापि तादृशं पादरज एव श्रीश्चकमे न तु प्राप्नोतीति तस्या अविवेकः सूचितः यस्या इति बहुजनकाम्यतया कश्चिद्दोषोऽप्यारोपितः अतोऽविचारयाऽनन्यतारहितया तयैव त्वद्दास्यं काम्यतेति युक्तमेव । यद्वा, यस्याः स्ववीक्षणे सुष्ठु अवीक्षणे अन्येषां सुराणां सात्त्विकानामपि मां श्रीर्न वीक्षताम् एतदर्थं प्रयासः स्थितिकाले महदादिभिः अङ्गीकरणात् त्यागकाले गच्छन्त्या तया मूर्च्छाकरणाच्च सा श्रीरेव चकमे कृष्णस्य वक्षसि वामे पीता सूक्ष्मा काऽपि रेखास्ति सा च गर्गादिभिर्लक्ष्मीरिति व्रजे स्थापिता तदभिप्रायेण तासां सेर्ष्यं वचनं वयं च तद्वत् तादृश्यः किं यत्तव पादरजः प्रपन्ना भवेम अपि तु सुविचाराः स्थिरप्रकृतयो भर्त्तृशुश्रूषणार्थं गृहं किल यास्याम एवेति नत्तस्मात् रजः प्रपन्नत्वात् प्रसादं कुरु तमेवाहुः—दास्यमेव देहीति, ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु, मादृशतुल्यकुलया एव यूयं ततो बत कथं पादतलमप्राक्ष्मेति वदथ इत्याशङ्क्य निजाभीष्टोत्कण्ठानुगुणितततवैयातिदैन्येनाहुः—श्रीरिति । यत् यस्य नारायणस्य वक्षसि पदं लब्ध्वापि पादपद्मरजः श्रीश्चकमे प्रेयस्युचितं सेवाभिलाषविशेषं परित्यज्य दासोचितमेवैष्टवतीत्यर्थः यत एव दासानां बहूनां तत्र सङ्घट्टमप्यङ्गीचकारेति भावः । कीदृश्यपि सा तत्राहुः, यस्या इति । तदेवं दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाहुः—तद्वदिति "तस्मान्नन्दात्मजोऽयन्ते नारायणसमो गुणैः" इत्युक्तत्वात् स नारायण इव यस्त्वं तस्य तव पादरजो वयं च सत्कुलादिसम्पत्त्या प्रेयसीपदयोग्यतां लब्ध्वापि प्रपन्नाः तस्य तव च गुणमाहिमैवायं यत्तस्या अस्माकं च लब्धतादृशपदस्तत्रापि न्यूनताभिमानमेव कारयतीत्यर्थः । तत्र श्रीरम्बुजसादृश्यमुपाधिमवलम्बमाना तस्य पदाम्बुजरजश्चकमे वयं तु तदुपाधिगमनपेक्षमाणास्तव पादरजः प्रपन्ना इति श्लेषो तत्पादस्य च वैशिष्ट्यमम्बुजरूपकारूपकाभ्यां (दर्शितम्) ध्वनितम् । (अथवा, नन्वेवं पूर्वोक्तदूतो-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

राशङ्कयते निजेन्द्रियतर्पणा एव तत्परा यूयं न तु ममानुकूल्ये मत्प्रीताविति तत्राहुः—श्रीरिति । यत् यस्माद्धेतोस्तस्मादेवेत्यर्थः । एवं सा यथा स्वपतौ तादृशरसाभिज्ञतापि तत्सेवामयपदाश्रयाभिलाषवती तथा त्वयि वयमपीति वाक्यार्थः) । एवं क्षीरोदमथने यथान्यपरित्यागेन श्रियास्तदेकभजनं तथाऽस्माकमपि त्वदेकभजनमिति ज्ञापितम् अथवा ननु, नाहं स्वप्नेऽपि भवतीस्पर्शं स्मरामि भवतु वा तथाऽप्यविचारेण सकृत् स्खलनेऽपि न भूयः कर्त्तुमुचितं तस्मादौचित्यं भवतीनां साध्वीकुलाचारलङ्घनेन मम च तादृशाभवदाचारध्वंसनेनेत्यत्र साध्वीकुलशिरोमणिं श्रियमेव दृष्टान्तयन्त्यः प्रत्युत्तरयन्ति—श्रीरिति । वक्षसि स्वभर्तुर्हृदये पदं स्थानं लब्ध्वापि श्रीः किल प्रसिद्धौ असमोर्द्ध्वमाधुरीभरमोहितत्वात् तथापि तवाङ्गसङ्गे निजायोग्यतामननाच्च यदिति यस्य वृन्दावनसम्बन्धिपादरजोमात्रं चकमे तस्य तव पादरजो वयमपि प्रपन्ना इत्यन्वयः । तदुक्तं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति तादृशप्रसिद्धिश्रवणाद्वक्ष्यते च स्वयं "जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि" इति पादरजःशब्दस्य पुनरुक्तिरत्युत्कण्ठया ज्ञेया (तदुक्तं पद्यद्वयेऽपि) रूपकप्रयोगश्च पूर्ववदेव ज्ञेयः पद्यद्वयेऽपि सा च न केवला किन्तु तुलस्या लीलारूपया वृन्दयापि सहसा च तुलसी तत्प्रेयस्यपि चकमे पाद्मे कार्त्तिकमाहात्म्ये जालन्धरोपाख्याने तस्या अपि तत्प्रेयसीत्वश्रवणात् तथा स्कान्दमथुरामाहात्म्ये—

"वृन्दावनं द्वादशमं वृन्दादेवी समाश्रितम् ।
हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम्" ॥ इति

वाराहे तन्माहात्म्ये च —

"वृन्दावनं द्वादशमं वृन्दया परिरक्षितम् ।
मम चैव प्रियं भूमे ! सर्वपातकनाशनम् ॥ इति ।

सदाश्रितत्वश्रवणाच्च कथम्भूतमपि रजः भृत्यजुष्टं त्वद्भृत्यगणासेवितावशिष्टमपि पुनारज एव विशेषयितुं तस्या वैशिष्ट्यान्तरमाहुः—यस्या इति । स्ववीक्षणे स्वपतिप्रेमपर्यन्तसम्पत्तिप्रदे अन्यसुराः श्रीविष्वक्सेनगरुडादयः तेषामपि प्रयासः यदि तस्याः तस्याश्च अप्राप्यं तदास्माकमेव को दोष इति भावः । ऐश्वर्यपक्षेऽपि प्रायः पूर्ववदेवार्थः किन्तु पूर्वत्र प्रेमकृतोत्कर्षदृष्टिप्राप्तत्वेन उत्तरत्र तु ज्ञानप्राप्तत्वेनेति भेदः तदेवं "भर्त्तुः शुश्रूषणं स्त्रीणाम्" इत्यादेरुत्तरं ज्ञेयम् निषेधार्थश्चायं ननु श्रीवृन्दे अपि स्वपतिपरित्यागेन मदाशया मद्वने तिष्ठतः काः यूयमित्यत्राहुः—श्रीरिति । यत् या श्रीः तुलस्या वृन्दया सदात्र वने स्थितं तव पदाम्बुजरजश्चकमे तत्कामनयाऽत्र वासं कृतवतीत्यर्थः । तद्वदिति सहैव वयं च वयमपि तव पादरजः प्रपन्नाः काका नैवेत्यर्थः । चपलात्वेन ख्यातया लक्ष्म्या यच्चापलं तथा जालन्धरभार्यात्वमपि लब्धाया वृन्दाया यद्व्यभिचारित्वं तत्तद्युक्तमेव नास्माकमेतादृशीनामिति भावः । अत्रापि भर्त्तुरित्यस्यैवोत्तरमिदमिति ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वत्पादसौरभ्यं(भाग्यं)त्वातिविचित्रमित्याहुः—श्रीरिति । श्रीर्लक्ष्मीस्तव वक्षसि असापत्न्यम् उन्नतञ्च पदं स्थानं लब्ध्वापि तुलस्या सपत्न्या सह यत्तव पदाम्बुजरजः कामयते स्म कथम्भूतम् ? भृत्यैः सर्वैर्जुष्टम् इति सौभाग्यातिशयोक्तिः कथम्भूता श्रीर्यस्याः श्रियः स्ववीक्षणकृते स्वावलोकनार्थम् श्रीरस्मानवलोकयतु इत्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः अन्यतपः प्रयास इति पाठेऽन्येषां ब्रह्मादीनां तपः क्लेश इत्यर्थः । सा श्रीश्चकम इत्यन्वयः । तद्वच्छ्रीवद्वयमपि तव पादरजः प्रपन्नाः ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अद्यापि लक्ष्म्या तव पादपद्मद्वन्द्वधूलिनिषेवणं काङ्क्षते किमुतास्माकमिति भावेनाहुः—श्रीरिति । अन्येषां सुराणां ब्रह्मादीनां प्रयासः प्रयत्नः यस्याः श्रियः स्ववीक्षणकृतः स्वनिरीक्षणार्थं कृतः मा श्रीर्वक्षसि पदं लब्ध्वापि तुलस्या पदं यस्य तव पादाम्बुजरजः चकमे कामितवती यथा वयं च तद्वत् तथा तस्य तव पादरजोनिषेवणाय प्रपन्ना इत्यन्वयः स्ववीक्षणकृत इति पाठे स्वदर्शनार्थमित्यर्थः ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

इममेवार्थमन्याः प्रकटयन्त्यो लक्ष्मीतोऽप्यधिकत्वेनात्मनः लौकिकत्वमात्मनो निरूपयन्ति—श्रीर्यदित्यादि द्वाभ्याम् । वक्षसि पदं लब्ध्वापि श्रीर्यत्पादाम्बुजरजश्चकमे कामयामास ननु लब्धवती कुतो न लब्धवती यतस्तुलस्या एव तद्भृत्यजुष्टं स्वाभाविकी भूतिः कर्ममूलं तेन अजुष्टं कर्मफलं न तत् सैव कीदृशी इत्याहु—यस्या इति । स्ववीक्षणे स्वं प्रति दर्शने अन्येषां सुराणां प्रयास एव वयं तद्वत् तत्स्वरूपाः किन्त्वियान् विशेषः सा तु चकम एव वयन्तु तव पादरजः प्रपन्नाः प्राप्ता एवेति ततोऽधिका अपि वयमित्यलमन्यथाशङ्कया ॥ ३७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु, तस्या दैवगत्या सम्बन्ध आसीत् स च प्राथमिकः भवतीनां तु प्रथमतोऽन्यत्रैव सम्बन्धः अतो वैषम्यमिति चेत्तत्राहुः—श्रीरिति । लक्ष्मीरपि न दैवगत्या भवन्तं प्राप्तवती किन्तु त्वच्चरणारविन्दार्थं महत्तपः कृतवती सा न स्त्रीत्वेन त्वदीया किन्तु भक्तत्वेन अन्यथा वक्षसि स्थलं प्राप्य स्वतन्त्रं तुलस्या सह सापत्न्यमप्यङ्गीकृत्य चरणरजो न कामयेत चरणरजस्तुलस्या भवति भक्ता हि भक्तेः तदुपपादितं प्रथमस्कन्धे, तस्य रजसः माहात्म्यमाह—भृत्यजुष्टमिति । तद्रजसैव भृत्यानां शरीरोत्पत्तेः किलेति प्रसिद्धं सर्व एव भक्ताः त्वच्चरणरजसैव सम्पादितदेहवन्तः अतस्तुलसी तत्र भक्तिरूपा प्रतिष्ठिता तद्रजःप्राप्तिर्येषां ते त्वत्सेवका एव भवन्ति अतो लक्ष्मीः अन्तःकरणे स्थानं प्राप्यापि अन्यः स्पृक्ष्यतीति चिन्तया रजश्चकमे तस्मिन्प्राप्ते तु शङ्कापि । ननु, किमेतावद्दैन्यम् लक्ष्म्यास्तत्राहुः—यस्याः स्ववीक्षणकृते अन्यसुरप्रयासः अन्ये सर्व एव ब्रह्मादयो देवास्तपः कुर्वन्ति लक्ष्मीरस्मान्पश्यत्विति

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अन्यथा तेषां कोऽपि पुरुषार्थो न सिद्ध्येदिति अतो बहुभिः प्रार्थ्यमाना सीता जाता कश्चिदत्यन्तमपि तपः कुर्यात् स को वेद किं कुर्यादिति रजः कामनायां तु नेयं शङ्का प्राप्तौ तु सन्देह एव न सम्भवति एवं चरणरजसः प्राप्तौ अनन्यगामित्वं निरूप्य स्वस्य तथात्वमाहुः—तद्वद्वयं चेति । अस्मानपि बहवः प्रार्थयन्ति तद्भयादेव पूर्वं चरणरजःस्पृष्टं ततो देहोऽपि त्वच्चरणरजसा समुद्भूत इति सर्वथा तव पादरजःप्रपन्नाः चकाराद्या अपि साम्प्रतं नागताः या वा महिष्यः ताः एतादृशशरीरयुक्ता एव अतोऽस्मदर्थं एव समागतो भवान् नात्मानं गोपय नापि गुप्तः ख्यास्यति तस्मादाग्रहः कर्त्तव्य इति भावः ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेवं त्वयैव वयं स्वप्रेयसीकृताः किन्तु त्वच्चरणसेवामेव वयमाशास्महे इति सदृष्टान्तमाहुः—श्रीर्लक्ष्मीर्यस्य नारायणस्य पदाम्बुजरजश्चकमे तद्भक्ततुल्यस्य तवाऽपि वयं पदाब्जरजःप्रपन्नाः ततश्च गर्गोक्तिगम्येन तव नारायणतुल्यत्वेनास्माकमपि श्रीतुल्यत्वं स्वत एवाऽऽयातमिति भावः । किञ्च वक्षसि सर्वोत्तमे स्थले पदम् आस्पदं लब्ध्वापि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं सेवितमिति पुरुषजनसङ्कुलत्वादपि तस्य पादरजश्चकमे स्वाभाविकीं प्रेयसीभावसमुचितां लज्जामपि परित्यज्य स्वन्यूनतामप्यङ्गीकृत्य कामयतेस्मेति तस्याः प्रेयसीभावादपि दासीभावो यथाऽभीप्सितस्तथैवास्माकमपीत्यतस्तव रक्तकपत्रकादिदासैः सहाऽपि लज्जां परित्यज्य पादौ सम्वाहयितुमिच्छामः तथा वृन्दावनीयपुलिन्दीनां क्रमं तृणलग्नत्वच्चरणकुङ्कुमेन स्वीयभालप्रलेपनमपि स्वन्यूनतामप्यङ्गीकृत्य चिकीर्षामः । किञ्च, श्रीमन्नारायणदेवेन प्रतुष्यता नित्यनिवासार्थं तस्यै स्ववक्ष एव दत्तं त्वया तु रसिकशेखरेणास्मभ्यं स्वपदतलनिकटप्रदेशेऽपि क्षणमपि स्थातुमपि न दीयते इत्यस्माकमेव दुर्भगललाटमिति ध्वनिः स्वयशः प्रेप्सुर्गर्गोक्तिप्रामाण्येन यदि नारायणतुल्यो बुभूषसि तदाऽस्मान् वक्षसा वहेत्यपि मात्रगाम्भीर्यस्पर्शी ध्वनिः । ननु, सा लक्ष्मीः यथा चञ्चला तथैव यूयमपि पुण्यवतां जनानां गृहे गृहे चाञ्चल्यधर्ममप्यङ्गीकुरुतेति नर्माशङ्क्य केन मूर्खेणोच्यते श्रीश्चञ्चलेति सा तु परमधीरैवेत्याहुः—यस्याः श्रियः स्वेषु वीक्षणकृते वात्सल्यरससमयकृपावलोकनप्राप्तिकृते अन्यसुराणां ब्रह्मादीनां तत्पुत्रतुल्यानां प्रयास एव सा तु तदपि तानपि प्रायो नावलोकते किन्तु तद्भक्तिरेव काचित्तेभ्योऽभीप्सितां स्वपदं दत्त इति ॥ ३७ ॥

विशुद्धरसदीपिका ।

ननु, भवत्यो मम प्राणेश्वर्य्यः प्राणसख्यः सर्वप्रकारैस्तत्समाः कथं मम पादतलं स्पृष्टवत्य इति चेत्सत्यं किन्तु परमरमानाथस्य वारस्यपादसौभाग्यमतिचित्रं प्रसिद्धवक्ष्यमाणिकामितत्वादित्याहु—श्रीरिति । सर्वसम्पत्सौभाग्याद्यधिष्ठात्री चकमे कामितवतीत्यलभ्यत्वं तदपि लतादिरूपेण तथा दर्शितं श्रीगोविन्दलीलामृते—

"श्रीभूलीलाराधिकासेवनाय लुब्धा लब्ध्वा स्थाणुतां मुरिपुगवैः ।
जातीधात्री श्रीतुलस्यात्मनाऽत्र कुर्वत्यस्तद्यत्र नित्यं वसन्ति" ॥ इति

एवं च रमादिसेव्यरमानाथसेविता श्रीराधा परमरमेति सिद्धं तत्तन्नाम्नाभिधानं त्वभेदाभिप्रायेण लोकप्रसिद्धमनुसृत्यैवेति कीदृशं भृत्येति भृत्यैः भरणीयैर्मिश्रपरिकरैर्जुष्टं श्रीत्या सेवितं तद्वत् श्रीवत् एतावांस्तु विशेषः श्रीरम्बुजसादृश्यमुपाभिमवलम्बमाना वयं तु पादरज एव प्रपन्ना इति तुलस्या सहेति वृन्दादेव्या एव नामान्तरेण कथनमपह्नवाय सहेत्यनेन पाद्मोक्तं सापत्न्यं परिहृतं तच्च "यत्र नैसर्गदुर्वैराः सहासन्" इत्यादिप्रागुक्तश्रीवृन्दावनस्वाभाव्यादेव किम्वा तत्प्राकृतांशसंसर्गजनितासुरावेशलीलाविलसितमिदं तु शुद्धमेवानयोश्चरितमिति विवेकः अन्यथा श्रीविष्णोरपि तच्छायः कथं स्यादिति विचार्य्यम् अद्भुतमेतत् रेखारूपेण नव वक्षसि पदं लब्ध्वापि प्रेयस्युचितं सेवाभिलाषं परित्यज्य दास्युचितमेवैष्टवतीत्यर्थः । कोऽसावित्यत आहुः, यस्या इति । क्षीरोदजातयाऽभेदाभिधानम् इदं च नैश्वर्य्यज्ञानमयलक्ष्य किन्तु "यद्वाञ्छया श्रीर्ललनाऽचरत्तपः" इत्यादिमहाजनप्रसिद्धेवेति ज्ञेयम् तद्वदिति तच्छ्लोकस्यात्मन्यतिदेशः ॥ ३७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अद्यापि सेव्यत्वेन पादरजःसौभाग्यातिशयं दर्शयन्त्यः आत्मनस्तद्रजःप्रपन्नत्वमाहुः—श्रीर्यदिति । यस्याः श्रियः स्ववीक्षणकृते अस्मिन् कृपादृष्ट्यर्थं तत्करुणयैव समस्तैश्वर्यादिलम्भनाय अन्येषां सुराणां ब्रह्मरुद्रेन्द्रादीनां प्रयासस्तथा आद्याचरणा सा श्रीः सर्वसम्पत्सौभाग्याद्यधिष्ठात्र्यपि । ननु, किं प्राकृतैश्वर्याद्यधिष्ठातृत्वेन परमार्थसुखालाभे तत्राहुः—नित्यनिरतिशयपरमार्थभूतपरमानन्दघनस्य तव वक्षस्यसापत्न्यपदं लब्ध्वापि यत्पदाम्बुजरजश्चकमे कथम्भूतं तुलस्या सपत्न्या सहासङ्ख्यातभृत्यैर्जुष्टमिति महच्चित्रं तत्र पादरजः सौभाग्यं येनासापत्न्योपरिपदलाभेऽप्यधः सापत्न्यमपि कामयति । यद्वा, वक्षोऽधिश्रिता श्रीरपि शिरोऽर्पितया तुलस्या सह पादरजश्चकमे इति चित्रं तत्सौभाग्यम् । यद्वा, वक्षःशिरोऽधिश्रिताभ्यां तुलसीश्रीभ्यां पादरजःकामनया भगवदङ्गानां समानपरमानन्दतया नोत्तमाधमभाव इति ध्वनिः । यद्वा, शिरोऽधिश्रितया तुलस्या सह सर्वत्यागशीलैः ब्रह्मलोकादिश्रियं तृणीकुर्वद्भिः परमनिष्कामैर्जुष्टत्वात् किमत्राद्भुतो रस इति चकिता श्रीरपि चकमे । यद्वा, चरणाब्जरजो दास्येनैव वक्षःपदलाभात् कृतज्ञतया भृत्यैरनुपमत्वजुष्टमपि रजश्चकमे नतूच्चपदलाभेन तदुपकारं विस्मरति भृत्यजुष्टमित्यनेनाकूतं, भक्तैर्भगवद्दत्तबुद्धियोगेनाभिन्नतत्स्वरूपाभेदैरपि जुष्टमिति मत्वा वक्षोऽधिश्रितापि चकमे इति कृतज्ञेषु फलतोऽपि साधने आदराधिक्यं फलादरेण तद्दास्यानादरेण तु फलाभानिश्चयात् । यद्वा, श्रीरपि वक्षःस्थापि चकमे इत्यतस्तद्दृष्ट्यैव भृत्यैर्जुष्टम् । यद्वा, एकान्तवक्षोवासिन्या श्रिया भृत्यजुष्टरजःप्रार्थनया वक्षोधामैकान्तवासाभावो पादाब्जरजः

श्रीरामनारायणकृतभावभावविभाविका ।

सत्समागमयोः श्रेष्ठयमिति भावः । यद्वा, "तुलसीदलमात्रेण जलस्य चुलकेन च । विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सल" इत्यादि वचनैस्तुलस्या तदर्पणमात्रेण भृत्यजुष्टमिति श्रियार्पितैश्वर्यभोगाद्यर्पणं लघु मत्वा तुलस्यर्पणेनैव चकमे यद्वा, ब्रह्माद्यभिलाषितवीक्षणा श्रीर्यत्तुलस्या सह तदर्पणेन वाद्यापि चकमे तद्भृत्यैः पापयोनिभिरपि जुष्टमित्यहो रजःसौभाग्यं तव दीनवात्सल्यं चातः तद्द्वयं च श्रीवर्णितरूपसौभाग्यवत्यः तुलसीवत्त्वदादरणीयाः भृत्यवात्सल्यत्यागेन दास्यरताश्च तद्व्यावहृङ्माहात्म्यं तव पादरजः तद्देवान्यत्र निष्कामतया त्वदेककामतया च तद्देव मनोवाक्कायैः प्रपन्ना इति त्वयापि तद्देवाङ्गीकार्यं इति तदुच्छब्दस्यानुषङ्गेण सर्वत्रान्वयः ॥ ३७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु, रमाया इव चरणामित्युक्त्या तद्वदस्मानप्यङ्गीकुर्विति भवतीभिः सूचितं परं तु लक्ष्म्या दैवगत्या जातो यः सम्बन्धः स तु प्राथमिको भवतीनां तु न तथेत्यऽतः किं करोमीति चेत्तत्राहुः–श्रीरिति । श्रीर्यथा यत्पादाम्बुजरजश्चकमे कामयते स्म तद्वद्वयमपि तव पादरजः प्रपन्नास्तथा च श्रीरपि न दैवगत्या भवन्तं प्राप्तवती किन्तु महता तपसेति भावः । तत्रापि तुलस्याः सपत्न्या सह न चाङ्गसङ्गाभावात्सापत्न्यमप्यङ्गीचकाराऽपितु भक्त्यतिशयादेवेत्याशयेनाहुः वक्षसि पदं लब्ध्वापि तुलस्या एवासाधारणमिति वा तथा च परमोत्कृष्टस्वतन्त्रस्थलं प्राप्यापि तादृशं रमा यच्चकमे तद्भक्त्याऽतिरेकविजृम्भितमिति भावः । ननु, कुत एवमित्याशङ्क्य रजसो माहात्म्यमाहुः भृत्यैर्नारदादिभिः सर्वैरपि तदेवाऽनन्यतया सेवितं किलेति प्रसिद्धं नात्र किञ्चिद्वक्तव्यं रज एवैवंविधसामर्थ्यं यत्तत्र संलग्नचेतसः पुनरन्यत्र गमनाभावसम्पादनमन्यस्याऽतो लक्ष्मीवक्षसि पदं लब्ध्वापि कदापि चेतसोऽन्यत्र प्रवृत्तिर्न भवेन्नाप्यन्यस्य कस्यापि स्पर्श इति मनसि निधाय रजश्चकम इति भावः । ननु, लक्ष्म्याः एव कुत एतावद्भयमित्यत आहुः–यस्या लक्ष्म्याः स्वस्य वीक्षणकृते श्रीरस्मात् करुणाया पश्यात्विष्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः सर्वपुरुषार्थानां तदधीनत्वात् तथाच बहवो मां प्रार्थयन्ते कश्चित्कदाचिदत्यन्तं यदि तपःकुर्यात्तर्हि स को वेद किंकुर्यादिति विचारवत्यस्तस्मात्तावद्भयमिति भावः । तद्द्वयमपि प्रार्थनावतां बहुत्वमालोक्य तद्भयात्प्रथममेव तव पादरजःप्रपन्ना तस्मादस्मदर्थमेवावतीर्णो भवानात्मानं न गोपय गोपनासम्भवात्कृतो मास्त्वाग्रह इति भावः । यद्वा, ननु पादस्पर्शस्य को वा तादृशो महिमेति चेत्तत्राहुः–श्रीरिति । यद्वा, ननु चरणस्पर्शादेव भवत्यः कृतार्थाः किमर्थमङ्गसङ्गार्थं विकलचित्ताः किञ्च अङ्गसङ्गमवाप्य पुनश्चरणस्पर्शे भक्तिर्न भविष्यति नचैवं का हानिरिति भ्रमितव्यं तस्या एव परमपुरुषार्थत्वादित्याशङ्क्याहुः–श्रीरिति । तथा च भगवत्पादरज एव तथाविधः यतो भवद्वक्षःस्थलनिवासिनी श्रीरपि तदेव चकमे परमभक्तायास्तुलस्याश्च तदेवासाधारणं स्वाश्रयश्च सर्वैर्भृत्यैस्तदेव जुष्टं तस्मात्सप्रतिबन्धकमङ्गसङ्गाभिलाषं निवर्त्य तदेकशरणत्वमेवाश्रयिष्याम इति भावः । अनभिज्ञापक्षे ननु, सौन्दर्यादिगुणासम्पन्नाः शोभनकुलोत्पन्नाः महिषीपदयोग्याः किमेवं ब्रूथेत्याशङ्क्य महिषीपदापेक्षयेदमुत्कृष्टमिति लक्ष्मीदृष्टान्तेन समाधानमाहुः–श्रीरिति । यद्यस्माल्लक्ष्मीनारायणस्य पदाम्बुजरजो यथा चकमे तद्वद्वयं नारायणसदृशस्य तव पादरजः प्रपन्नाः यद्यपि नारायणस्य तद्वत्तुल्यस्य तवेति वा "नारायणसमो गुणैः" इति गार्गोक्त्या तव नारायणसमत्वमस्माकं लक्ष्मीसमत्वमर्थादागतमिति भावः । तत्रापि वक्षसि परमोत्कृष्टस्थले पदं रमणीभावं लब्ध्वापि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं पुरुषजनसम्प्रदाययुक्तमपि तथा च तस्या यथा प्रेयसीभावसमुचितां लज्जां स्वन्यूनताञ्चाऽगणय्य दासीभावोऽभिलाषितस्तथैवास्माकमपि यद्यप्येवं न तथापि त्वं नारायणवदत्राचरसि वक्षःस्थलोद्वहनयोग्या अस्मान् स्वपादतलसन्निधौ स्थातुमपि ददास्यतो दग्धललाटा वयं किंकुर्म इति भावः । ननु, लक्ष्मीवच्चाञ्चल्यमपि युष्मासु प्राप्तमित्याशङ्क्याहुः–यस्या इति । तथा च या पुत्रतुल्याऽन्यसुरादीनपि यया कयाचिच्छक्त्याऽनुगृह्णाति सा चञ्चलेति मूर्खप्रवाद इति भावः । श्रीः पदाम्बुजरजश्चकमे वयं तु पादरजः इत्युक्त्या श्रियः स्ववासस्थानोपमसादृश्योपाधिकं सेवनमस्माकं तु निरुपाधिकमिति व्यज्यते । यद्वा, ननु, स्वस्वपत्युः वक्षःस्थलरमणयोग्याः कथं दासीभावं प्रार्थयन्ते इत्याशङ्क्य "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायमवलम्ब्य समाधानमाहुः–श्रीरिति । स्वभर्तुर्नारायणस्य वक्षसि पदं लब्ध्वापि लब्धनारायणपादसम्बन्धया तुलस्या सह यस्य तस्य वृन्दावनसम्बन्धिपदाम्बुजरजश्चकमे तत्सेवनार्थं वृन्दावनशोभारूपेण प्रियवक्षसि रेखारूपेण श्रीरत्रास्ते तुलस्यापि वृन्दाख्यदेवीरूपेण वृन्दारूपेणाचास्ते इति भावः । तस्मात्परमपतिव्रताया लक्ष्म्या यदेवं दशा तदानीं वयं कथं भर्तुः शुश्रूषणमित्याद्युपदेशार्हा इत्यपि ध्वनितम् । मानिनीपक्षे । ननु, श्रीवृन्दापि स्वपतिं त्यक्त्वाऽत्र वने मम सन्निधौ तिष्ठति यूयं किमित्येवंविधं मानं कर्तुं प्रवृत्ता इति चेत्तत्राहुः यद्यपि श्रीवृन्दया सहात्र स्थितं ते पादरजश्चकमे तद्वद्वयं किं पादरजः प्रपन्नाः अपितु नेति काका योज्यं तयोरेव तद्युक्तं नास्माकमिति भावः । यद्वा, यस्य नारायणस्य पदाम्बुजरजः श्रीश्चकमे तद्वद्वयं तेन नारायणेन तुल्या वयमत एव तादृशलक्ष्म्यादिप्रार्थनीयं पादरजःसपत्न्याः तव लक्ष्म्यादिदशस्यातुल्याराधनीया इति भावः ॥ निवृत्तिपक्षे । लक्ष्म्यादिवत्स्वस्य भगवत्परायणत्वमाहुः, श्रीरिति । तथा च श्रियादिसमस्ताराध्यपादपद्मे समस्तश्रुतितात्पर्यविषये परमात्मनि सर्वभावेन रतिः सम्पाद्येति भावः ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शिष्टाचारप्रामाण्यादपि त्वच्चरणरजःशरणं प्राप्ता इत्याहुः यस्याः स्ववीक्षणकृते स्वावलोकनार्थम् अन्येषां ब्रह्मादीनां सुराणां प्रयासः तपआद्याचरणरूपो यत्नः सा श्रीः वक्षसि असापत्न्यं पदं स्थानं लब्ध्वा तुलस्या सह भृत्यैर्बहुभिर्भग-

तन्नः प्रसीद वृजिनार्दन ! तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ।
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण ! देहि दास्यम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्किङ्करैर्जुष्टमपि तव पदाम्बुजरजः चकमे कामयते स्म तद्वयमपि प्रपन्नाः ॥ ३७ ॥

भाषा टीका ।

लक्ष्मीजी तुमारे वक्षःस्थल में निवास पाय करकेऊ तुलसी सहित दासनसों सेवित ऐसे जिन तुमारे चरण कमल के रज की चाहना करत भई जा लक्ष्मी के अर्थ और देवता तपस्या करें है, ता लक्ष्मी की नाईं हम भी तुम्हारे चरणन की रज कूं प्राप्त भई है, अर्थात् प्यारे ! तुम्हारी शरण आई हैं। तासों जैसे लक्ष्मी को तुमने ठिकानो दियो तैसें हम सबन पैऊ कृपा करो ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे वृजिनार्दन ! दुःखहन्तः, त्वदुपासने त्वद्भजन एवाशा यासां ता वयं वसतीर्गृहान्विसृज्य हित्वा योगिन इव प्राप्ताः तव सुन्दरस्मितविलसितनिरीक्षणेन यस्तीव्रः कामस्तेन तप्तचित्तानाम् हे पुरुषरत्न ! दास्यं देहि ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु, नवयौवनोन्मत्ताः ! दास्यमपि लक्ष्म्यादिप्रार्थ्यं कथं देयमिति चेत् ? तत्र सदैन्यमाहुः, त्वदुपासनाशाः सत्यो वसतीः सर्वबन्धुपरिच्छेदसहितगृहान् विसृज्याङ्घ्रिमूलं प्राप्ता वयम् अतः सर्वपरित्यागेन प्रपन्नानामाशामवश्यं पूरयितुमर्हसीति भावः । अन्यथा चास्माकं महद्दुःखं स्यात् तच्च तवानुचितमित्याहुः, हे वृजिनार्दनेति । तत्र च हे रसिकशेखर ! रसविशेषमयमेव दास्यं देयमित्याशयेनाहुः—त्वदिति । तच्चोचितमेवेत्याहुः—हे पुरुषभूषणेति । अन्यत्तैर्व्याख्यातम् । यद्वा, ननु गृहिण्यस्तर्हि गृहेषु गत्वैव मद्भक्तैर्गोपैः सह भक्तवर्गवन्मद्भजनं क्रियतां तत्रैव तद्विशेषोपकरणसम्पत्तेरिति चेत् ? तत्र सकाकु आहुः वसतीर्विसृज्येति । तत्र हेतुः, तवोपास उपास्तिः तस्य नाशो यासु ताः तत्र त्वद्भजनासिद्धेरित्यर्थः । किञ्च, हे महामोहन ! नान्यभक्तवदस्माभिर्दास्यं प्रार्थ्यते यद्गृहेषु गोपवर्गैः सह सिद्ध्येत किन्तु दास्यविशेष एवेत्याशयेनात्यन्तार्त्याभिनयपूर्वकमाहुः—पुरुषो जीवस्तस्य भूः स्थानं हृदयं तत् ऊषते पीडयति "ऊष रुजायाम्" इति हे तथाभूत ! तव सुन्दराभ्यां स्मितनिरीक्षणाभ्यां किम्वा हे सुन्दरस्मितनिरीक्षण ! अतो धूर्ततयैवेदं वक्रोक्त्यवहित्थया गुह्यमाणं वाक्चातुर्योऽभिव्यञ्जयन्ति स्वल त्वत्तो यस्तीव्रः कामस्तेन तप्त आत्मा देहो यासां नः अतस्तत्प्रतीकारमाशु कुरु अन्यथा अस्मद्दशोपस्थितिरिति । यद्वा, तत्प्रतीकाररूपं दास्यं देहीति भावः । यद्वा, ननु मद्व्रजस्त्रियो मद्भक्तवराणां गोपानां कन्यात्वभार्यात्वादिना युष्माकं स्वतः सिद्धं मद्दास्यमस्त्येव किं तत् प्रार्थनेनेति चेत्सत्यं किन्तु प्रसादाख्यामस्मद्याचितं तद्देहीति सदैन्यमाहुः तप्तात्मनां योग्यं यत् तद्दास्यमित्यर्थः । साक्षादात्मा निर्देशः विनयलज्जादिना किम्वा न इति पूर्वस्यानुषङ्गः । यद्वा, अत्यन्तार्त्यासत्याग्रहमाहुः तप्तात्मनां स्त्रीणां कासाञ्चिदपि दास्यं देहि अस्मद्भ्यम् एतादृशीनां दास्ये प्राप्तेऽपि तव प्रसादविशेषोऽवश्यं भवितेवेति भावः अनेन दुःशील इत्यस्योत्तरं त्वदुपासनाशया सत्पतेरपि त्यागो युक्त एव तस्सिद्धान्तो लिखित एव विशेषतश्च वसतीनां त्वदुपासननाशत्वेन तत्र च तत्स्वामिनां तेषां सम्बन्धेन त्वद्भजनपातात्ते पातकिन एवेति त्याज्या एव । किञ्च, त्वत्कामतप्तात्मनां तत्त्यागे कथं वा विचारः दोषो वा ? महाभुजङ्गग्रस्तानां को नामास्तित्विति श्लेषार्थः । वृजिनं पापम् अन्येषामपि पापनाशनोऽसीति वयं त्वदङ्घ्रिमूलं प्राप्ताः अधुना तवैव पापे मतिर्दृश्यते अतः प्रसीद अस्माकमत्रागमनापराधं क्षमस्व मनोऽवष्टम्भ पुनये निवेदीत्यर्थः । यद्वा, ननु मद्दास्यं लक्ष्म्या अपि दुर्लभं कृपया दीयमानमङ्गीकुरुतेति चेत्तत्र साभ्यसूयमाहुः—या वसतीर्विसृज्य त्वदुपासनाशाः सत्यस्तवाङ्घ्रिमूलं प्राप्ता दास्य इवाभिताप्तास्तासां तीव्रकामतप्तात्मनां चतुर्थ्यर्थे षष्ठी ताभ्यो दास्यं देहि अस्माकं पतिव्रतानां तेनालमित्यर्थः । पुरुषान् सखीनेव ननु स्त्रियो भूषयतीति तथाभूत ! अतस्त्वया किमस्माकमिति किम्वा हृदयदाहकेति पूर्ववदर्थः तर्हि त्वयि भक्त्यापीति भावः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं तृतीयदिक् स्थिता अपि विवक्षितमुपसंहरन्ति—तन्न इति । तत् तस्मात् पूर्वोक्तादेतोरेव प्रसादं कुरु तमेवाहुः दास्यमेव देहीति । ननु, नवयौवनोन्मत्ताः ! दास्यमपि तादृशं दुर्लभमिति चेत् कथं देयमित्यत्र सदैन्यमाहुः—प्राप्ता इत्यादि । अतः सर्वपरित्यागेन प्रपन्नानामाशामवश्यम् पूरयितुमर्हसीति भावः । अन्यथा चास्माकं महद्दुःखं स्यात् तच्च तवानुचितमित्याहुः—हे वृजिनार्दनेति । तत्र च निजभावोच्छलितविलासः सन् हे रसिकशेखर ! रसविशेषमयमेव दास्यं देयमित्याशयेनाहुः—त्वदिति । यद्वा, तत्तादृशनिरीक्षणतप्तात्मनामपि दास्यमेव देहीति तत्तापहरणेच्छाशा परित्यक्तेत्यर्थः । दास्यं चोचितमेवेत्याहुः—हे पुरुषभूषणेति । सर्वत्रैवार्थे तवोपास उपास्तिः तस्य नाशो यासु ता इति श्लेषेण वसति विशेषणं च किम्वा हे सुन्दरस्मितनिरीक्षण ! अतो धूर्ततयैवेदं वक्रोक्त्यवहित्थया गुह्यमाणं भावं वाक्चातुर्योऽभिव्यञ्जयन्ति त्वत्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

त्वत्तो यस्तीव्रः कामस्तेन तप्त आत्मा यासां तासां नः अनेन दुःशील इत्यस्योत्तरं त्वत्कामतप्तानां तत्त्यागे कथं विचारो दोषो वा ? नहि काममहाभुजङ्गग्रस्तानां तयोरेकतरोऽपि सम्भवतीति निषेधार्थश्च तस्मात् नोऽस्माकं सम्बन्धे प्रसीद आग्रहं त्यजेत्यर्थः । हे वृजिनार्दनेति छेदः यतः त्वदुपासनाशाः सत्यो वसतीर्विसृज्य तवाङ्घ्रिमूलं न प्राप्ता वयं तस्मात् यात्स्वत्सुन्दरेत्यादिलक्षणात्तासां ताः प्रति दास्यं देहि अस्माकं तु न तेन प्रयोजनमित्यर्थः । तासामपि नात्यन्ततदङ्गीकारात् सम्प्रदानत्वाभाव इति षष्ठ्यभिप्रायः पुरुषान् सखीनेव तत्तत्कुत्कण्ठया तत्तद्योकुलवधूनेषेण भूषयसि नाद्यापि ता इति तत्राप्यसम्भावना दर्शिता । यद्वा, पुरुषभूस्तव सत्ता पुरुषसामान्य इत्यर्थः । हे तस्य ऊषण ! पीडक ! तज्जातिमात्रकलङ्ककारिन्निति सकोपसम्बोधनम् "ऊष रुजायाम्" इति ॥ ३८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उपासनाशाः त्वत्सेवनेच्छावत्यः ॥ ३८—३९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे वृजिनार्दन ! दुःखहन्तः ! त्वदुपासने त्वद्भजन एवाशा यासां ताः वयं वसतीर्गृहान् विसृज्य योगिन इव तवाङ्घ्रिमूलं प्राप्ताः तस्मात्त्वमस्माकं प्रसन्नो भव कीदृशः प्रसादः कार्य इत्याशङ्क्याहुः तव सुन्दरं स्मितं यस्मिंस्तेन निरीक्षणेन यस्तीव्रः स्मरतापस्तेन तप्त आत्मनो नो देहा यासां ताः तासां नोऽस्माकं हे पुरुषरत्न ! त्वद्दास्यं देहि ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृजिनार्दन दुःखनाशन ! वसतीः गृहान् त्वदुपासने आशा अद्य यासां तास्तथा सुन्दरं च सस्मितं च सुन्दरस्मितं तन्निरीक्षणेन उद्भूतेन तीव्रेण कामाग्निना तप्त आत्मा देहो यासां ताः पुरुषभूषण ! पुरुषतिलक ! ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तस्मादस्मभ्यं प्रसीदेत्याहुः—तन्न इत्यादि । तस्मादन्यथा शङ्का निरासतः सोऽस्मभ्यं प्रसीद हे वृजिनार्दन ! दुःखार्दन ! वयं कीदृश्यः वसतीर्विसृज्य त्वदुपासनाशाः सत्यस्तवाङ्घ्रिमूलं प्राप्ताः तस्माद्दास्यं देहि अर्थादस्माकमित्याशयः कीदृशीनां त्वत् त्वत्त एव तप्तात्मनां हे सुन्दर ! हे स्मितनिरीक्षणेन तीव्रः अतिशयोग्रः कामोऽपि यस्मात् यत् स्मितनिरीक्षणेन कामोऽपि कुपितनो यत्र इत्यर्थः ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं स्वस्य भगवदेकभोग्यशरीरत्वमुपपाद्य प्रार्थयन्ति—तन्न इति । पूर्वश्लोकेनैव भर्तृशुश्रूषणविधिर्निराकृतः तदपरित्यागः सुतरामेव तेनैव निराकृतो भवति अनेनापि निराकरणं प्रार्थयन्ति भगवत्कृपाभावे तादृशेनैव सम्बन्धो भवेदिति कृपा हि सर्वतोऽधिका तस्मात्कारणात्प्रसीद प्रसन्नो भव त्वयि प्रसन्ने सर्वं सेत्स्यतीति । ननु, भवतीनां प्रतिकूलमदृष्टं दुःखप्रापकमस्ति अतः कथं प्रसाद इति चेत्तत्राहुः—वृजिनार्दनेति । वृजिनं दुःखजनकं पापं स्वभावत एव सर्वेषां येन केनापि सम्बन्धेन तदर्दयसि प्रसादे हेतुमाहुः—तेऽङ्घ्रिमूलं प्राप्ता इति यस्तु चरणतलं प्राप्नोति प्रसादमपि स च प्रसादः पशुपुत्रादिरूपो मा भवत्विति स्वाधिकारमन्येभ्यो व्यावर्तयन्ति विसृज्य वसतीरिति गृहस्थाश्रमस्त्यक्तः न तु गृहमात्रमिति वसतीरिति बहुवचनं परित्यागेऽपि हेतुमाहुः त्वदुपासनाशा इति त्वत्सेवां करिष्याम इति आशामात्रेणैव पूर्वसिद्धं त्यक्तं तत्र समागतानां पुनः गृहसम्बन्धे किं वक्तव्यमिति अतो देवं प्रार्थयन्ति त्वत्सुन्दरेति तव सुन्दरं यत्स्मितं मोहकमत्यानन्दजनकं त्वत्सम्बन्धात्परमानन्दरूपं तादृशस्मितपूर्वकं यन्निरीक्षणं तेन जातः तीव्रो यः कामः तेन तप्तान्तःकरणानाम् अस्माकं पुरुषाणां भूषणरूप अनन्तकोटिकन्दर्पलावण्यरूप अतः पुरुषार्थरूपमेव दास्यं देहि अधिकारिभेदेन दास्यस्यानेकविधत्वादेयं रूपं स्वतापोक्त्या व्यज्यते उक्ततापविशिष्टानां यदेतत्तापनिवर्तकं तदिति किञ्च प्रभोरपेक्षितवस्तुसमर्पणं हि दास्यं भवति न त्वन्यथा एवं सति यथास्माकमुक्ततापेन प्रभुणा त्वदपेक्षा तथा तवाप्यस्मदपेक्षायां स्वयमुद्यस्माकमुपभोगः कार्य इत्यर्थः पर्यवस्यति अन्यथा दास्यस्य स्वकृतिसाध्यत्वेन दानोक्तिरनुपपन्ना स्यात् अत एव तथा सम्बोधनं पुरुषो भूत्वा भूषणरूपेति तद्धि कण्ठादिषु सर्वेष्वङ्गेषु भवति त्वमपि तथा भूत्वा दास्यं देहीति वाक्यैकवाक्यतया प्राप्यते भूषणत्वोक्त्यैव स्वतन्त्रपुरुषार्थताप्युक्ता मणिखचितं तद्धि भूषणत्वसम्पत्त्यर्थं मध्ये स्वाप्यवदपि भवति तेन महानपि सत्कारार्थं कान्तामपि याचते तुच्छमपि तथा मध्ये कामोपयोग इति न तदुपाधिकृतं दास्यवरणमपितु तद्विपरीतमिति भावः । अतो दास्यार्थिन्य एव वयं नतु विवाहार्थिन्यः अत उपनयनाद्यपेक्षापि न लोकव्यवहारेण कर्तव्येति भावः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्माद्गृहकुटुम्बादिकं परित्यज्य नारायणस्य भक्ता इव वयं तव दास्यमेव कामयामहे इत्याहुः—तन्न इति । यतस्त्वं नारायणतुल्यस्तस्मादस्मान् प्रति प्रसीद ननु मत्प्रसादप्रतिकूलं दुःखादृष्टं भवतीनामस्तीत्यतः कथं प्रसादः नारायणोऽपि किं सर्वेषु प्रसीदतीत्यतः आहुः—हे वृजिनार्दन ! तदपि दुःखं त्वमेवार्दय नारायणो ह्यवश्यमेव प्रपद्यमानानां दुःखमर्दयति वयं च तेऽङ्घ्रिमूलं प्राप्ताः तत्रापि कामनान्तरराहित्येनैवेत्याहुः—विसृज्य वसतीरिति । ननु गार्हस्थ्यसुखं परित्यज्यापि मत्तः सुखं किञ्चनापेक्ष्य-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रार्थयध्वे इति जानीमस्तत्राहुः, त्वदुपासनायामेवाशा मत्तुपासनायाः फले कस्मिंश्चन सुखं त्वया दास्यमाने आशा यासां ताः अयमर्थः उपासनया त्वां सुखयाम इत्येवाभिप्रायेपि त्वत्सुखदर्शनोत्थं यदि नः सुखमानुषङ्गिकं भवेत्तर्हि को दोष इति । ननु, तर्हि कथमुक्तमस्माकं हृच्छयाग्नि सिञ्चेति सत्य तदग्निज्वालाया अपि त्वमेव कारणमित्याहुः तव सुन्दरस्मित-निरीक्षणेन यस्तीव्रकामस्तेन तप्त आत्मा यासां तासां अप्यस्माकं दास्यं दासीत्वमेव देहि न तु पत्नीत्वम् अत्र श्रीमद्वल्लभाचार्यचरणानामपि व्याख्या अतो दास्यार्थिन्य एव वयं न तु विहारार्थिन्यः अत उपनयनादपेक्षापि न लाकव्यवहारेणत्येषा ततश्चास्माकं कन्यात्वे परोढात्वे वा न कापि क्षतिः उभयीभावेऽपि त्वद्दास्यसम्भवादिति भावः । प्रकृतवैष्णवतोषिण्यां श्रीसनातन-गोस्वामिचरणानामपि विवाहे सति पत्नीत्वेन भजनादप्यौ-पपत्येन भजनं परममहासुखं तच्च श्रीभागवतामृतकाव्यादौ च प्रसिद्धमेव अत एवात्र दास्यविशेष एव प्रार्थितः अधुना च प्रार्थ्यते दास्यो भवामेत्येषा अयं भावः । काममहोदधित्वादेव श्रीलम्पटस्य तवास्माभिर्युवतिभिरुपासनं स्वाङ्गैरेव त्वत्सुखो-त्पादनलक्षणा खल्वेषैवेत्यतो हृच्छयाग्निसेकप्रार्थनापि त्वदु-पासनाप्रार्थनैव कामाग्निरप्यस्माकं तदुपासनोपकरणमेव मुख्य-मित्यत एव समुचितमेव सम्बोधनपदं हे पुरुषरूपभूषण ! गौराङ्गीनामस्माकमिन्द्रनीलमणिमयसर्वाङ्गालङ्कारेति ॥ ३८ ॥

विशुद्धरसदीपिका ।

विविक्षितमुपसंहरन्ति—तन्न इति । तत् तस्मात् अतो वयं स्थाविरत्वसर्वपरित्यागेन तत्सुखसुखिन्य इत्यर्थः । यद्वा, तद्दास्य-मेव नः अस्माकं प्रसीद प्रसादय हे वृजिनार्दन ! दुःखहन्तः ! दुःखं कामसुखापेक्षत्येकादशादेवमुक्तम् अत एवाङ्घ्रिमूल-मित्यजाविरूपकानुक्तिस्तस्याः प्रेयसीभाव एवोचितत्वात् प्राप्ताः प्रकर्षेणाप्ताः प्रकर्षमेवाहुः—वसतीर्विसृज्येति । वसतीरित्यनेन गृहसुखमुपलक्षितं किमर्थमत आहुः त्वदुपासनाशाः तव परि-चर्याकाभिलाषाः न तु विरहाग्न्यभिलाषा इत्यर्थः । ततश्च दास्यं द्विविधं सहचरीभावोचितं प्रेयसीभावोचितमिति सूचितं तत्राद्य एवास्माकमभिलाषणीय इति भावः । तत्परः कासा-मित्याशङ्क्य परदोषोद्घाटनस्यायोग्यत्वात् श्लेषेणैव सूचयन्ति-त्वदित्याद्युत्तरार्द्धेन । एवञ्च यास्त्वत्सुन्दरस्मितनिरीक्षणेन कामतप्तात्मानस्तासां पुरुषभूषण ! तासामेव प्रेयस्युचितं दास्यं देहीत्यन्वयः । श्लेषेण "दसु उपक्षये" इत्यस्मात् "ऋहलोर्ण्यत्" (३।१।१२४) दास्यमुपक्षयः सख्यापेक्षया तस्याल्पत्वादेवेति भावः । ततश्च न वयं कामतप्ता न चान्याभिलाषोपतप्तास्ततः सहचरी-भावोचितमेवास्माकं धनमन्वीक्षणमिति दिक् ॥ ३८ ॥

श्रीराधारमणदासगोस्वामिकृतभावभावविभाविका ।

तदेव प्रार्थयन्ति—तन्नः प्रसीदेति । यद्यस्माद्वयं लक्ष्मीवत्वां प्रपन्ना वसतीरित्युपलक्षणं पत्यपत्यसुहृद्गृहसुखादिकं सुखं विसृज्य तेऽङ्घ्रिमूलं प्राप्ताः किमर्थं तर्हि सर्वत्यागेन प्राप्तास्तत्राहुः—त्वदुपासनाशाः तव उपासने सेवने वा आशाऽभिलाषो यासां तवैवोपसमीपे आसने निवसने वाऽभि-लाषो यासां त्वदुपासनैवाशा परा काष्ठा यासां तथाभूता इति वा तत्तस्माद्धे वृजिनार्दन ! स्वभावत एव सर्ववृजिनानां दुःखानां शमन ! तथा पुरुषभूषण ! पुरुषेषु भूषण ! यद्वा, पुरु-षान्तरासंप्रतिपन्नः पुरुषश्चासौ भूषणं चेति तथा नोऽस्मान् प्रसीदानुग्रहं कुरु नो दास्यं च देहि कथम्भूतानां नस्तत्राहुः त्वदीये सुन्दरे स्मितनिरीक्षणे ताभ्यां तीव्र उद्दीपितो यः कामानलस्तेन तप्तात्मनाम् अयं भावः । सर्ववृजिनार्दनस्य तव कामसन्तापकत्वमनुचितं तव मुखचन्द्राह्लादप्रकाशात्मकस्मित-निरीक्षणरूपचन्द्रिकया तापोत्पत्तिरप्यसम्भाव्या पुरुषस्य तव स्त्रीघातोऽप्ययोग्यः भूषणात्मकस्य च मनोरञ्जनस्य तवास्मद्दुःख-मप्यनर्हं तस्माद्वृजिनार्दनत्वात्मात्मनां प्रसीद तापमुपशमय पुरुषभूषणत्वाच्च दास्यं देहि ॥ ३८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तथा च भगवदेकभोग्यशरीराणामस्माकं मनोरथं पूरयेति पश्चिमदिग्गताः प्रार्थयन्ते—तन्न इति । यस्माद्वयं भगवत्पादरज एव प्रपन्नाः प्रपत्तिश्च भगवत्प्रसादं विना दुर्लभातस्मात्प्रसीद प्रसन्नो भव त्वयि प्रसन्ने किमपि नावशिष्यत इति भावः । ननु, दुःखप्रदं मत्सङ्गमप्रतिबन्धकं दुरितं भवतीनां वर्त्तते तत्र मया किं कर्त्तव्यमिति चेत्तत्राहुः—हे वृजिनार्दन ! सकलदुःख-निदानभूतदुरितविनाशन ! स्मरणादिनापि समस्तपापसमुदायना-शनस्य तवाभिमुख्यं प्राप्तानामस्माकं पापनिवारणे को भार इति भावः । एतेन स्वपत्यादित्यागकृतमपि पापं नास्तीति सूचितम्—

> "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
> अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः" ॥
> "तावद्रागादयस्तेनास्तावत्कारागृहं गृहम् ।
> तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण ! न ते जनाः" ॥

इत्यादिशास्त्रात् अथ स्वस्य प्रसादादियोग्यतामाहुः—तेऽङ्घ्रिमूलं प्राप्ता इति । ननु, स्त्रीणां स्वभावः ईश्वरादपि प्रसन्नाद्गृहस्था-श्रमसुखमेव प्रार्थयन्ति ततस्तदनुकूलः किं प्रसादोऽपेक्षित इति चेत्तत्राहुः—वसतीर्विसृज्येति । गृहस्थाश्रम एवास्माभिस्त्यक्तो न तु गृहमात्रमिति सूचनाय वसतीरिति बहुवचनं यतो वयं त्वदुपासनाशाः भगवदुपासनं करिष्याम इत्येवंविधा आशा यासां ताः न तु तज्जन्यसुखमस्माकमपेक्षितं तथा च गन्ध-पुष्पादिनोपासनपराणामनन्यभक्तानामिवाऽवर्जनीयतया प्राप्ते सुखोपभोगे न कश्चिद्दोष इति भावः । यद्वा, तवोपास्यस्योपास-नस्य नाशो यासु ताः वसतीः तथाचाऽभीप्सितानुकूल एव प्रसादो युक्तो न तु तत्प्रतिकूलस्ततश्चावितःपरं गृहसम्बन्धिवार्त्तापि न विधेया तत्र प्रेषणं तु दुर्निरस्तमिति भावः । एवं भगवन्त-मभिमुखीकृत्य प्रार्थनामाविष्कुर्वन्ति—त्वदिति । हे पुरुषभूषण ! दास्यं देहि भक्तिकादिभेदेन दास्यस्यानेकविधत्वात्स्वरूपं स्वतापोत्पत्ते

श्रीधनपतिसूरिकृतगूढार्थदीपिका।

मिव्यञ्जयति त्वत्सुन्दरं परमानन्दजनकं यत्स्मितपूर्वकं निरीक्षणं तेन तीव्रो यः कामस्तेन तप्तान्तःकरणानामस्माकं तथाचैतत्ताप निवर्तकं दास्यं देहीति भावः। दास्यस्य स्वयमसाध्यस्य देहीति प्रार्थनया यथोक्ततापनिवृत्तेस्तद्द्वारकत्वात्तस्य च त्वद्धीनत्वाद्यथाऽस्माकं तन्निवृत्त्यर्थं त्वदपेक्षा तथा तवास्मदपेक्षायां स्वयमुत्पाद्यास्मदुपभोगः कार्य्यः प्रभुणाद्यपेक्षितवस्तुनि दत्ते दास्यं भवतीति भावः। ननु किमिदं कामोपाधिकं दास्यं प्रार्थ्यते शुद्धमेव तत्प्रार्थ्यतामिति चेत्तत्राहुः। पुरुषभूषणेति। पुरुषो भूत्वा भूषणरूपः यथा च भूषणं कण्ठादौ धार्य्यते तथा पुरुषाकारभूषणरूपस्त्वमपि न च धारणयोग्यस्तस्मान्मणिखचितभूषणधारणे लाक्षाधारणवन्मध्ये कोऽपि भोगो ननु तदुपाधिकृतं दास्यमिति भावः। यद्वा तत्तस्मान्नः प्रसीद हे वृजिनार्दन ! स्वप्राप्तिप्रतिबन्धकं पापं नाशय यतः प्राप्ता विसृज्य वसतीरिति। तस्मात्तव सुन्दरस्मितस्य नितरामीक्षणेन चिन्तनेन तीव्रो भजनाभिलाषस्तेन तप्तात्मनां तपः संयतचित्तानां दास्ये लब्धाधिकाराणामस्माकं लक्ष्म्या इवास्मद्योग्यं दास्यं देहि यतो हे पुरुषेषु भूषण ! तवापीदमेव योग्यमस्माकं च कामोपाधिकृतोऽपि तव सम्बन्धोऽलङ्कारायैवेति भावः। अनभिज्ञापक्षे नारायणसमो गुणैरित्युक्त्या त्वं नारायणगुणधारणे योग्यो वयं च तद्भक्तगुणधारण इत्याशयेनाहुः। तदिति। यस्मात्त्वं नारायणसमस्तस्मान्नस्तद्भक्ततुल्या अस्मान् प्रसीद ननु प्रसन्न एवाहमस्मि स्वस्मिन्मम कोपो भवतीभिः कदा दृष्ट इति चेत्तत्राहुः। हे वृजिनार्दन ! दुःखविध्वंसकर ! ननु नास्ति भवतीनां किमपि दुःखं गृहाद्युपद्रवजनितदुःखहेत्वसुरादिविनाशाय ममोद्युक्तत्वात्तस्मात्किमित्येव दैन्यमाविष्कुरुतेति चेत् तत्राहुः। त इति। तथा च गृहादिकं महाग्निज्वालया प्रज्वलतु तिष्ठतु वा नास्त्यस्माकं तत्प्रयुक्तं किमपि दुःखं सुखं वेति भावः। ननु भवत्यैवं यदर्थं वसतीः विसृज्य मदङ्घ्रिमूलं प्राप्तास्तदेव प्राप्यतामिति चेत्तत्राहुः। त्वदुपासनाशाः तवोपासनायां सेवायां श्लेषेण उप अङ्गसङ्गेन स्थितिरुपासना यासां न तु उपासनया दास्यमानेकास्मिन्स्थितसुखे तावत्सुखार्थमङ्गसङ्गदानादिरूपोपासनापराणामस्माकमप्यवर्ज्जनीयतया प्राप्तेन सुखोपभोगेन को दोष इति भावः। ननु तादृशमुपासनं तु स्वपतेरेव सम्भवति न चाहं युष्माकं पतिः ननु अस्तु सम्प्रति विवाह इति चेन्नोपनयनराहितस्य मम सम्प्रति विवाहानधिकारात् विवाहितानां भवतीनामपि तदयोग्यत्वेत्याशङ्क्याहुः। त्वदिति। तादृशकामतप्तात्मनामप्यस्माकं दास्यं धात्रीभावमेव देहि तथा च न वयं विवाहार्थिन्यः किन्तु दास्यार्थिन्य एव अतस्तवोपनयनादिरहितत्वेऽस्माकं च कन्यात्वे परोढत्वे वा न कापि हानिः सर्वथापि दास्यसम्भवादिति भावः। यद्वा हे वृजिनार्दन ! अस्माकं विरहदुःखदानमनुचितमिति भावः। न च्वास्त्यस्मद्दुःखनाशने कश्च न तव प्रयास इत्याशयेन संबोधयन्ति। हे सुन्दरस्मितनिरीक्षण ! एतावतैवास्मद्दुःखनिवृत्तिरिति भावः। यतस्त्वत्स्मित एव यस्तीव्रः कामस्तेन तप्तात्मनामतस्तत्तापनिवृत्त्यर्थं विकसितमुखपङ्कजो भूत्वा दास्यमात्रं देहि न तु बहुप्रार्थयाम यद्वयादेवं स्वरूपमात्मानं कृतवानसीति भावः। किञ्च काममहोदधिभूतत्वादेव स्त्रीलम्पटस्य तवास्माभिर्युवतिभिः साङ्गैरुपासनं सुखजनकमतस्तत्सेचनप्रार्थनमपि त्वदर्थमेवेत्याशयेन सम्बोधयन्ति हे पुरुषभूषण ! यद्वा गौराङ्गीनामस्माकमलङ्कारार्थं पुरुषाकारमिन्द्रनीलमणिमयं भूषणं विधात्रा रचितं तस्मात्त्वोत्पत्तिसार्थक्यायास्मत्कण्ठे संलग्नता त्वयावश्यं सम्पाद्येति नर्म व्यञ्जयन्ति हे पुरुषभूषणेति। मानिनीपक्षे ननु लोके परमसौन्दर्याकृष्टचेतसः स्त्रियो मद्दास्यं प्रार्थयन्ति भवत्यस्तु स्वामित्वमपि मत्प्रार्थनयापि नैवाङ्गीकुरुथेति महानन्याय इत्याशङ्क्याहुः। तदिति। तत्तस्मान्नः प्रसीद आग्रहमत्यर्थं च त्यज हे वृजिनार्दन ! सर्वदुःखच्छेदकस्याऽस्मद्दुःखानुच्छेदनमनुचितमिति भावः। यद्वा वृजिनान्यर्द्दयत्यत एव स्वदुःखाऽनिवारणमनुचितमिति भावः। यद्वा वृजिनं दुःखमर्द्दयति प्रार्थयतीति स तथा च दुःखोदर्कं वस्तु न प्रार्थनीयमिति भावः। यतो निरपेक्षस्यापेक्षा केवलं दुःखायैव भवतीत्याशयेनाहुः। नेति। वसतीर्विसृज्य त्वदुपासनाशाः वयं तवाङ्घ्रिमूलं न प्राप्ताः तस्मात्त्वत्सुन्दरस्मितनिरीक्षणतप्तात्मनामेव दास्यं देहि न त्वस्माकं स्वामिनीभावमप्रार्थितत्वात् न ह्यप्रार्थितमनुत्तममपि वस्तु कस्यचिदुपादेयं भवतीति भावः। पुरुषानेव भूषयतीति तथा च त्वं कं कामसन्तप्तचित्तो यदि जातोऽसि तर्हि गोपवन्धुरूपेण गोपान्भूषयेति भावः। यद्वा शरीरमात्रमस्माकं तव सविधे वर्त्तते मनस्तु स्वस्वगृहमेव प्रविष्टमत एवाग्रहेणात्रावस्थाने कृतेऽपि नास्ति किञ्चित्फलमित्याहुः। तदिति। तत्तस्मादितः परमस्मासु प्रसाद एवविधेयो न तु वृथाग्रहः न चेदं तवोचितं स्वदुःखजनकत्वादस्य कर्म्मण इत्याशयेन संबोधयन्ति ! हे वृजिनार्दनेति मत्सन्निधावेताः स्थिता इति न भ्रमितव्यं वयं तु तेऽङ्घ्रिमूलं विसृज्य वसतीः प्राप्ताः ननु अतरिचत्तानां त्वदुपासना न सम्भवति यतस्त्वदुपासनस्य समीपावस्थानादिरूपोपासनस्य नाशो यासु अतः स्वाभाविकात्त्वत्सुन्दरस्मितादिना तीव्रकामाक्रान्ततां तव नोचितेति सूचयन्त्यः संबोधयन्ति हे सुन्दरस्मितनिरीक्षण तीव्रकाम नेदं पुरुषरत्नानां लक्षणमपि तु पुरुषापसदानामतः पुरुषभूषणस्य तव नेदमुचितमिति भावेन संबोधयन्ति हे पुरुष भूषणेति। तस्मात्पुरुषभूषणस्य तव त्वदर्थं तप्तात्मनामपि स्त्रीणां स्त्रीभावदानमयोग्यं किञ्चिद्दानावश्यकत्वे दास्यमात्रं दातुमुचितमित्याशयेनाहुः। रूपतस्त्वद्वियोत्तमप्राप्तात्मनामपि दास्यमात्रं देहि सर्वथा विमुखाभिस्तु भाषणमपि तव नोचितमित्यर्थः। निवृत्तिपक्षे "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णं स्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद,, इत्याद्याः श्रुतयः परमात्मानमेवोपास्यमावेदयन्ति। तदिति। यस्मात्सर्वश्रुतितात्पर्य्यविषयो भवानेव तस्मादुपासनाय शेषानस्मानपि प्रसीदाऽस्मत्तात्पर्य्यविषयत्वमात्मनः स्वीकुरु यतो हे वृजिनार्दन ! सर्वपापासंस्पृष्टत्वात्तथात्वेनोपासितस्त्वमुपासकस्य दुःखमात्रबीजभूतपापमात्रं नाशयसि "स एष सर्वेभ्यः पाप्मभ्य उदित,, इति सर्वपाप्मापगमादुक्तः स च परमात्मन एव सम्भवति। आत्मापहतपाप्मेत्यादिश्रुत्यन्तरात् "उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद,, इति त्वदुपासनात्सर्वपापनिवृत्तिः कथितेति भावः। ननु हिरण्यश्मश्रुरित्यादिरूपश्रवणात् य एषोऽन्तरादित्ये पुरुष इत्याधारश्रवणाच्च कथं रूपादिप्रतिपादनपराणां श्रुतीनां परमात्म-

वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

परत्वं प्रशब्देनास्पर्शमरूपमव्ययं स भगवः कस्मिन् प्रतिष्ठितः स्वमहिम्नि आकाशवत्सर्वगतश्च नित्य इत्यादिश्रुत्या रूपादिरहितब्रह्मस्वरूपावगमादित्याशङ्क्याहुः । त इति । वसतीरायतनानि प्रतीयमानपरमेश्वरातिरिक्तप्रतिपाद्यरूपा विसृज्य तेऽङ्घ्रिमूलं प्राप्ताः यतस्त्वदुपासनायामाशा आशयो यासां ताः वयं तथा च परमेश्वरस्यापीच्छावशात् साधकानुग्रहार्थं मायामयरूपादि स्वीकारो न विरुद्ध्यते—

प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ।
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ! ।
सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरयः ।

इत्यादि स्मृतेः । अशब्दमित्यादिशास्त्रं निरस्तसर्वविशेषज्ञेयब्रह्मपरं सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः हिरण्यश्मश्रुरित्यादिशास्त्रमुपास्यब्रह्मपरं तथा स्वमहिमप्रतिष्ठस्याधारविशेषोपदेशोऽप्युपासनार्थो न विरुद्ध्यत इति भावः । तस्मादनुग्रहार्थं प्रकटितलावण्यसागरविग्रहस्य तव सुन्दरस्मितस्य निरीक्षणे यस्तीव्रः कामोऽभिलाषस्तेन तप्तात्मनां जीवानां हे पुरुषोत्तम ! दास्यं देहि त्वदनुग्रहं विना तव दास्यस्य दुर्लभत्वात्तन्न विनोद्धारासम्भवात्तत्प्रदानेन जीवानुद्धरेति भावः । यद्वा तव सुन्दरं यत्स्मितं चराचरात्मकं निरीक्षणं भूतात्मकं च जगत्तत्र तीव्रो यः कामस्तेन तप्तात्मनां तथा च तादृशतापनिवृत्त्यर्थं स्वदास्यं देहीत्यर्थः । निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्चभूतानि स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलय इत्यभियुक्तवाक्ये चराचरादेर्भगवत्स्मितादिरूपेण निरूपणं द्रष्टव्यम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्तस्मात् हे वृजिनार्दन ! दुःखनिर्नाशक ! प्रसीद प्रसन्नो भव । ननु प्रसन्नेन किमनुष्ठेयमत आहुः । तव सुन्दरस्मितयुक्तेन निरीक्षणेन यस्तीव्रकामस्तेन तप्तचित्तानां नोऽस्माकं दास्यं देहि । ननु गृहाद्यासक्तो जनः कथं मद्दासो भवेदित्यत्राहुः । त्वदुपासने आशा यासां ता वयं वसतीः गृहान् विसृज्य तव पादमूलं प्राप्ताः "वसती रात्रिवेश्मनोः" इत्यमरः ॥ ३८ ॥

भाषा टीका ।

हे दुःखन के काटन हारे ! तुम्हारी उपासनामे विचित्र आशा जिनके लगि रही ऐसी हम तुम्हारे चरणन के समीप आई हैं । तासों अब तुमें हमारे ऊपर प्रसन्न होओ तुम्हारी सुन्दर मन्द मुसिक्यान सहित चितवन सो तीव्र भयो जो काम देव तासूं देह जिनके जरे जांय हैं ऐसी जो हम हैं तिनकों हैं पुरुष भूषण ! अपनो दास्य भाव देओ पुरुष भूषण या सम्बोधन कहवे को गोपी न को ए अभिप्राय है, कि जैसे अपने सखान के भूषण हो रहे हो तैसे हम स्त्रीन के भूषण क्यों न हो ओहो ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु गृहस्वाम्यं विहाय मद्दास्यं किमिति प्रार्थ्यतेऽत आहुः । वीक्ष्येति । अलकावृतमुखं केशान्तैरावृतमुखं तथा कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिंस्तच्च तच्च एवं तव मुखं वीक्ष्य दत्ताभयं भुजदण्डयुगं वक्षश्च श्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति ॥ ३९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु दास्यरसिकास्तर्हि प्राय एतादृशभावानां श्रीदामसुबलादीनामिव दास्यमङ्गीकुरुतेति चेत्तत्र किम्वा दास्यविशेषप्रार्थने हेतुं सभावमाहुः । वीक्ष्येति । साक्षादन्तिकं दृष्ट्वा प्राधान्येन श्रीमुखस्य भुजयोर्वक्षसश्च वर्णनं यण्डचुम्बनाऽधरामृतपानगाढालिङ्गनाद्यभिप्रायेण तत्र चालकैर्ललाटोपरि विलसद्भिरावृतमित्यूर्ध्वभागस्य कुण्डलश्रीति द्वयोः पार्श्वयोः हसितेनावलोको यस्मिन्निति अधोमध्यभागयोरित्येवं सर्वत्र शोभोक्ता स्थलरूपकेण गण्डयोर्दर्पणादिभ्योऽपि सौन्दर्य्यं ध्वनितं दत्तमभयं भक्तानां दैत्यवधादिना येनेति वलिष्ठत्वादिगुणः तेन च चातुर्य्येण पत्यादिभ्यो भयं परिहृतं वस्तुतस्तु गाढाश्लेषेण कामादिभयहरत्वमभिप्रेतं दण्डरूपकेण सुवृत्तपृथुदीर्घत्वाद्याकारसौष्ठवं श्रिया लक्ष्म्या निजशोभया वा कृत्वा एकं श्रेष्ठमद्वितीयं वा रमणमिति परमसौन्दर्य्यं शोभाधिक्यं चोक्तं चकारद्वयं विलोक्येति पुनरुक्तिश्च श्रीमुखवद्भुजवक्षसोरपि प्राधान्यविवक्षया किम्वा दासीत्वे तद्दर्शनमात्रैकहेतुतो तथा तत्तत्परममोहनतैव दर्शिता अतो दासीत्वेन तत्तद्रसविशेषस्य यथायथं साक्षादनुभवसंसिद्ध्या दास्य एव भवाम इत्यर्थः । वर्त्तमानायां पञ्चमी गूढोऽयमभिप्रायः विवाहे सति पत्नीत्वेन भजनादप्यौपपत्येन भजनं परममहासुखं तच्च श्रीभागवतामृते काव्यालङ्कारादौ च प्रसिद्धमेव अत एवात्र दास्यविशेष एव प्रार्थितः अधुना च प्रार्थ्यते दास्य एव भवामेति अन्यत्तैर्व्यञ्जितं यद्वा कुण्डलयोः श्रीः शोभा येन तन्मुखं केषां चिन्मते श्रीति दीर्घपाठः ततश्च कुण्डलयोः श्रीस्वरूपे गण्डस्थले अधरसुधां च द्वन्द्वैक्यं तथा हसितं चावलोकं च इति सर्वेषां प्राधान्यं द्योतितं तच्चकाराभ्यां व्यञ्जितमेव विलोक्यं सुदृश्यं परमसुन्दरं यद्वा जगतामेव विशेषेण लोक्यं दृश्यं यद्वक्षस्तत् पुंसामपि मनोहरत्वात् एतदेवोक्तं श्रीकपिलदेवेन वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानमिति अस्यार्थः ऋषभस्य सर्वश्रेष्ठस्य श्रीकृष्णस्येत्यर्थः । निजाशेषभगवत्ताप्रकटनात् पुंसामपि किमुत स्त्रीणां साक्षात्तथाऽनुक्तिर्मातर्युक्तेरिति अप्यर्थे चशब्दः श्रिय एकं रमणं क्रीडास्थानमपि सदा तत्र निवासात् किं वा सुखप्रदमपि सदा तदा श्लेषात् । यद्वा श्रियः शोभाया अपि एकं श्रेष्ठमद्वितीयं वा रमणं विसर्गलोपे सन्धिरार्षः ततश्च चकारोऽन्वाचये प्रथमः अप्यर्थे द्वितीयः एवं श्रीमुखाद्भुजयोर्गौणत्वं ततोऽपि वक्षसोऽभिप्रेतं शोभासुखातिशयवत्त्वेऽपि तस्य लक्ष्म्याक्रान्तत्वेन सापत्न्यादसूयया गौणत्वमधिकं यद्वा चकाराभ्यां पूर्ववत् सर्वेषामेव प्राधान्यं द्योतितं

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

सर्वेषामपि प्रत्येकं प्राधान्येन दासीत्वे हेतुत्वात् एतेनाश्चर्यमित्यस्योत्तरं त्वच्छ्रीमुखादिवीक्षणेन औपपत्यं जन्यते तत्रास्माकं को नाम दोष इति किम्वा औपपत्येन त्वद्भजने सर्वानन्दादेर्मोक्षादपि वैकुण्ठलोकसुखादपि लक्ष्म्यादिभजनानन्दादपि च परमसुखविशेषासिद्धेः किं नामाश्चर्य्यत्वादिकम् अतः कुलस्त्रीणामेव त्वया सह तदुचितमिति श्लेषार्थः एतादृशं तव श्रीमुखादिकं वीक्ष्यापि तव दास्यः कर्म्मचर्य्योऽपि भवाम सम्भावनायां पञ्चमी भवेम किं काक्वा अपि तु नैवेत्यर्थः। तत्र हेतुः श्रिय एव एकं रमणमिति सर्वेषामेव विशेषणं चञ्चलायास्तस्या एव ननु स्थिराणां पतिव्रतानामस्माकं त्वन्मुखादिरमणमिति यद्वा कुण्डलश्रीत्यादिरूपम् अलकावृतमुखं तव त्वया वीक्ष्य विशेषेण ईक्षयित्वा दर्शयित्वा भुजदण्डयुगं च विलोक्य विशेषेण लोकयित्वा दर्शयित्वा वक्षश्च दर्शयित्वा भयं प्रति वयं दत्ताः भयाय समर्पिता वयमित्यर्थः। अतोऽस्माकं भयाभावाय अमदास्यो मदर्पितमुखो भव ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु भवत्यो न धनादिना मूल्येन क्रीता न वा दत्तभृतयः कुतो दास्यो भवेयुः उच्यते अन्यत्रैव खल्वसावन्योऽन्येन स व्यवहारः भवति तु स्वमुखादिदर्शनदानमेव मूल्यं भृतिश्चेत्याहुः । वीक्ष्येति । विशेषेण दृष्ट्वा विशेषमेवाहुः । अलकावृतेत्यादिविशेषणैः तत्र चालकैर्ललाटोपरि विलसद्भिरावृतामित्यूर्ध्वभागस्य कुण्डलश्रीति द्वयोः पार्श्वयोः हसितेनावलोको यस्मिन् इति अधोमध्यभागयोरित्येवं सर्वत्र शोभोक्ता स्थलरूपकेण गण्डयोर्विस्तीर्णत्वं कुण्डलश्रीत्यनेन स्वच्छत्वं च ध्वनितम् अधरे च सुधानुमानं दर्शनमात्राल्लोभविशेषोत्पत्तेः सौरभ्यविशेषानुभवाच्च तथा दत्तमभयं भक्तानां दैत्यवधादिना येनेत्यादि वलिष्ठत्वादिगुणः तेन च चातुर्य्येण पत्यादिभ्यो भयं परिहृतं वस्तुतस्तु गाढाश्लेषेण कामादिभयहरत्वमभिप्रेतं दण्डरूपकेण सुवृत्तपृथुदीर्घत्वाद्याकारसौष्ठवम् अत्राप्येवं वैशिष्ट्यमुक्तं तथा श्रिया वामभागस्थस्वर्णवर्णलक्ष्मीरेखारूपया लक्ष्म्या कर्त्र्या एकं श्रेष्ठं रमणं यस्मिन्निति परमसौन्दर्य्यादिसम्पत्तिनिधानत्वमुक्तं चकारद्वयं विलोक्येति पुनरुक्तिश्च निजवासभुजवक्षसोर्विशेषाश्रयताविवक्षया तयोस्तयोर्द्वयोरेका क्रिया चैकसंप्रयोजनजनकत्वात् तादृशगण्डाधरमण्डिते श्रीमुखे हि चुम्बनपाने भुजवक्षसोश्चालिङ्गनमात्रमाभिलषितमिति अत्रालकादीनामुक्तिक्रमेणेदं गम्यते प्रथमतो मुखस्य तत्तत्सौन्दर्य्यदर्शने जातेऽपि लज्जया न चातुरक्षेण दर्शनं किन्त्वत्युत्कण्ठया पश्चादेव तत इच्छाविशेषेण येन भुजौ दृष्टौ तस्य तु विश्रामो वक्षस्येवेति तथा क्रमो ज्ञेयः एवं दासीत्वे हेतुः परममोहनतैवेति ध्वनितं किञ्च भृतिर्मूल्यं च खलु विषयदानमेव लोके दृश्यते तत्तु त्वयि तत्तद्रूपशोभावति मधुराधरसुधे लोभनीयभुजादिस्पर्शे पूर्णलक्ष्मीनिधानवक्षसि लब्धे स्वतः सिद्धमेवेति तथापि वीक्ष्येति स्वेषां नेत्रखञ्जनबन्धोऽपि ध्वनितः तत्रालकानां पाशत्वं कुण्डलयोस्तदन्तिमकुण्डलिकारूपत्वं गण्डयोस्तत्सन्निधानस्थलत्वम् अधरसुधाया लोभ्याहारत्वं हसितावलोकस्य विश्वासजनकस्वपालितखञ्जनद्वयाविलासत्वं तत्र भुजदण्डयुगस्य च दत्ताभयत्वमेव पल्लवयुक्तत्वादिति भावः। तादृशवक्षसश्च सुखचारप्रदेशत्वमित्यपि ज्ञापितम् अन्यैस्तैः यद्वा कुण्डलयोः श्रीः शोभा येन तन्मुखं केषांचिन्मते श्रीति दीर्घः पाठः ततश्च कुण्डलयोः श्रीहेतुगण्डस्थले चाधरसुधा च तासां द्वन्द्वैक्यं तथा हासितं चावलोकश्च तत्तच्च वीक्ष्य इति सर्वेषां प्राधान्यं द्योतितं विलोक्य सुदृश्यमिति निषेधार्थस्तु ननु यद्येवं तर्हि कथं ममाङ्गानि मुहुर्वीक्षमाणा एव तिष्ठथ तत्र साटोपमाहुर्वीक्ष्येति अत्रापि काक्वैव निषेधो व्यङ्ग्य इति ॥ ३९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु भोग्यं गृहादिकं विहाय किमिति मद्दास्यं प्रार्थ्यते इत्यत्राहुः वीक्ष्येति । कुण्डलयोः श्रीर्ययोस्ते गण्डलस्थले यस्मिन्नधरे सुधा यस्मिन् स्मितयुक्तोऽवलोको यस्मिंस्तथालकैश्चूर्णकुन्तलैरावृतं मुखमाश्रितानामभयप्रदं भुजदण्डयोर्युगं श्रियो लक्ष्म्या एकं मुख्यं रतिजनकं क्रीडायोग्यं धा वक्षश्चावलोक्य तवैव दास्यो भवाम त्वद्रूपस्य निरतिशयभोग्यत्वादिति भावः ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे वीक्ष्य ! दर्शनीय ! वयं तव दास्यो भवामेत्यन्वयः "आशिषि लिङ्लोटौ" इति आशिषि लोट् दासीभूत्वाशिषं कामयामहे इत्यर्थः । दासीभावे कारणमाहुः । अलकेति । कुण्डलश्रिया युक्तं गण्डस्थलम् अधरसुधा च यस्य तत्तथा हसितेन युक्तमवलोकं च प्रतिजनं दत्ताभयं भुजदण्डयोर्युगं च श्रिय एकरमणं प्रधानरतिस्थानं वक्षश्च विलोक्य दृष्ट्वा विचार्य वा वीक्ष्येति वा ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

अद्य किं दास्यं दास्यसि दास्यस्तु वयं भवाम एवेति सिद्धवदन्या आहुः । वीक्ष्येत्यादि । तव मुखं वीक्ष्य दर्शनीया येऽलकास्तैरावृतं पश्चात्कर्मधारयः कुण्डलयोः श्रिया युक्तं गण्डस्थलं यस्य तत्तथा अधरे सुधा यस्य तत्तथा पुनः कर्मधारयः कीदृशं श्रिया हसितसहितोऽवलोको यत्र तत्तथा भुजदण्डयुगं च कथं भूतं दत्ताभयं विलोक्य दर्शनीयं वक्षश्च कर्मधारयः कीदृशं श्रिया हेतुभूतया एकरमणम् एतानि यथा स्वभावसिद्धानि भवन्ति तथा वयमपि दास्यो भवामेत्यर्थः । अथवा वीक्ष्य विलोक्येति । पूर्वकाले क्त्वाप् तत्रातिसुरसम् ॥ ३९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ननु भवतीनां सर्वासामेव दास्यवरणे को हेतुः सालोक्यादेरपि फलस्य विद्यमानत्वात्तत्राहुः । वीक्ष्यालकावृतमुखमिति । अनेन लोकेप्सायां पतिनं त्यक्तव्य इत्यत्रोत्तरमुक्तं लोके हि पुरुषार्थत्रयं चतुर्विधो मोक्षः इन्द्राद्यैश्वर्यभावेन स्वर्गप्राप्तिः इह लोके परमा लक्ष्मीः तदत्र त्रयमपि दास्ये सर्वोत्कृष्टमस्तीति। तदुपपादयन्ति । प्रथमं सारूप्यं सालोक्यं सामीप्यं सायुज्यमिति मोक्ष-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भेदाः ते दास्याग्रे अप्रयोजकाः यतो मुखारविन्ददर्शनेन ते कामा निवर्त्तन्त इति भक्तिरूपमुखारविन्दस्य तदपेक्षयो त्कृष्टधर्मवत्त्वं निरूप्यते अलकाः सारूप्यमिव प्राप्ता भ्रमराः ते बहव एवात्र आवृत्य मुखं तिष्ठन्ति अतः सारूप्यं गतानामपि यदि भक्तिशेषत्वं तदा किं सारूप्येण किञ्च मुखं कुण्डलश्रीः कुण्डलाभ्यां श्रीर्यस्य कुण्डलयोर्वा श्रीर्यस्मात् सामीप्ये हि नैकत्वं भवति । अत्यन्तसामीप्यं जायमानमपि कुण्डलादप्यधिकं न भविष्यति ते चेत्सांख्ययोगरूपे भगवत्प्रमाणावलम्बिनी भगवदधीनगतिमती पुनर्भगवन्मुखनिरीक्षके तदा किं सामीप्येन किञ्च गण्डस्थलाधरसुधमिति । गण्डौ स्थलरूपौ विशालौ स्थले हि रसः पातुं शक्यत इति अधरे च सुधा यस्मिन् गण्डस्थले स्थित्वा अधरसुधा पातुमत्र शक्येति सालोक्ये हि आनन्दमात्रमक्षरामृतपानञ्च अक्षरापेक्षयापि गण्डस्थले स्थितिः चुम्बनार्थमुत्तमाऽधररसश्च अक्षररसादुत्तम इत्युक्तं कुण्डलश्रीयुक्तं गण्डस्थलमित्यस्मिन्पक्षेऽपि सामीप्यात् भक्तौ शास्त्रीयो रसः अधिको निरूपितः परस्परं त्वद्गुणवादरूपः अक्षरादाधिक्यं तु अधररसे स्पष्टमेव किञ्च हसितावलोकमिति । हसितपूर्वकमवलोको यस्मिन् ब्रह्मानन्दे प्रविष्टानां न भक्तिविलासः हासो हि सर्वरसोद्बोधरूपः ज्ञानं चाविर्भूतं ब्रह्मानन्दे तु द्वयमप्यव्यक्तं जले निमग्नस्य जलपानवत् अनुभवरसो हि भिन्नतया स्थितौ भवति । अतो भक्तिरूपमुखस्य दृष्टत्वात् दास्यमेव फलं न मोक्षः भुजदण्डयुगञ्च विलोक्य इन्द्रादिभावेनापि स्वर्गो न प्रयोजक इति निरूपयन्ति दत्ताभयमिति । स्वर्गे इन्द्रः परमकाष्ठां प्राप्तः तेऽपि दैत्येभ्यो निरन्तरं भीताः इन्द्रादयः तेषामप्यभयदात् भगवतो भुजदण्डयुगलं तच्चेदत्रैवास्ति तत्परित्यज्य किमिन्द्रत्वेन चकाराच्च केवलमभयमात्रं प्रयच्छति । किन्तु क्रियाशक्त्या यज्ञादिना हविरपि प्रयच्छति । यथाग्रे इन्द्रः स्वाधिकारसमाप्तौ मुक्तो भवति । दण्डपदेन तुल्लङ्घ्यशासनत्वमुक्तम् उभयत्र च दण्डो युगपदेन निरूपितः ततो हि सर्वथा दैत्यनाशो भवति किञ्च वक्षोऽपि विलोक्य लोकानां श्रिया रमणं भवति । श्रीरपि तत्र रमते चकाराद्धर्मस्यापि अतो दास्य एव भवामः अत्र वीक्षणस्य दासीभवनहेतुत्वोक्त्या यत्रायं भावो नास्ति तेषां नैतद्वीक्षणमास्ति विधिप्रयुक्तत्वाभावेन तद्विपरीतविध्यनङ्गीकारश्च युक्त इति ज्ञाप्यते यदप्युक्तं भगवता अस्वर्ग्यमित्यादि स्वभजने दोषषट्कं तदपि षड्भिर्गुणैर्निवारितं नहि परमपुरुषार्थसाधकं पापं भवति फलत एव पापस्य निन्द्यमानत्वात् ॥ ३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यूयं यन्मम दास्यो भवथ तत् किं मया मूल्येन क्रीताः स्थ स्वीयदत्तभृतयो वा तत्र भवता अस्मत्समुचितमौल्यात् कोटिकोटिगुणितेनास्मद्दृष्टाश्रुतचरेण महानर्घ्येण हसितावलोकचिन्तारत्नेनास्मान् धयःसन्ध्यारम्भ एव क्रीत्वा स्वीयकुञ्जमन्दिरमानीय नीलनिधि पद्मनिधि जाम्बूनदमकरयुगलचिन्तामणिमयस्थलीमणिस्तम्भ लक्ष्मीविलासास्पदनीलमणिमन्दिराण्यलकादिव्याजेन स्वसम्पत्तीर्दर्शयित्वा देवैरपि दुर्लभममृतं प्रतिदिनं भोजयसीत्याहुः । वीक्ष्येति । यदा शोणवर्क्णोष्णीषं शिरसि बध्नासि तदा दासीजनेन कङ्क कतिकयोत्कृष्योत्कृष्योर्ध्वनयनात्त्वया च स्वाङ्गुल्या यत्नान्निरुध्योष्णीषोष्णीषान्तः प्रवेशनात् भालवामदक्षिणप्रान्तयोरेव दृश्यमानमूलभागैरलकैरावृतमनाच्छन्नं मुखं वीक्ष्येति यदा चूडं बध्नासि तदा भालाग्रवामदक्षिणभागेष्वपि कुञ्चितैरनतिदीर्घैरलकैरा ईषदावृतं मुखं वीक्ष्य अभ्यङ्गोद्वर्तनादिसमये सम्प्रयोगभरसमये च अलकैरासम्यक् प्रकारेणैव आवृतमाच्छन्नं मुखं वीक्ष्य ईक्षणाभ्यामास्वाद्यमानमाधुर्यभरीकृत्य वयं दास्यो भवामः मुख कीदृशं कुण्डलाभ्यां समयभेदेष्वलकैरनावृताभ्यामीषदावृताभ्यां सम्पूर्णावृताभ्यां च अचपलाभ्यामीषच्चपलाभ्यामतिचपलाभ्यां च श्रीः पृथक् पृथक् शोभा यत्र तत् हसितप्रहसितसमये गण्डयोरपि सृक्कण्योर्विततत्वात् गण्डस्थलेऽपि अधरसुधा अधरमाधुर्यच्छलनं यस्य तत् गण्डस्थलात् गण्डस्थलमाधिरुह्य गोपीनयनचकोरैः पीयमाना अधरसुधा यस्य तत् रहस्यसमयभेदे तु गोपीनां गण्डस्थले अधरसुधा यस्य तत् गण्डस्थलयोर्गोपीनामधरसुधा यस्य तत् यद्वा कुण्डलयोः श्रीः प्रतिबिम्बरूपा शोभा ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिन् तच्च तच्च तदित्येकपदं हसितयुक्तोऽवलोको यत्र तद्धासितं प्रफुल्लता गोपीनां कुमुदानां च अवलोकाद्यस्मादिति वा ननु युष्मत्पतय एतदसहिष्णवः फूत्कारेण कंसराजतो मम भवतीनां च भयमुत्पादयिष्यन्ति तत्राहुः । दत्तमभयं महेन्द्रदर्पकादिभ्योऽपि पर्वतधारणादिना येन तथाभूतं भुजदण्डयुगमिति तथा चेत्वद्भुजदण्ड एव कंसपशोः प्राणहारको भविष्यतीति भावः । एवं च व्यञ्जितेन वीररसेन शृङ्गाररसः पुष्टो भवति स्म ननु परनारीरहं धर्मात्मा स्वदासीर्न करोमीति तर्जन्या कोऽयमिति पृच्छन्त्यः सत्यं भो धार्मिकचूडामणे! गोपानां नारीर्न दासी करोषि किन्तु नारायणस्य नारीं लक्ष्मीमपि वैकुण्ठादुल्लादानीय स्ववक्षसा वहसीत्याहुः । वक्ष इति । श्रिया लक्ष्म्या कर्त्र्या लज्जावशात् सुवर्णरेखारूपया एकं मुख्यं रमणं यत्र तत् तस्मादधुना ते कियद्वयो बभूव चतुर्दशभुवनेषु मध्ये तदूर्ध्वलोकेष्वपि ब्रह्माण्डाद्बहिर्महावैकुण्ठलोकस्थेष्वपि मध्ये कस्यापि कामपि सुन्दरीं नारीं त्वं न त्यक्ष्यसीति जानीम इति व्यञ्जितं भवति ॥ ३९ ॥

विशुद्धरसदीपिका ।

अथ तुरीयदिक्स्थितास्तदीयकथिते यत्किंचित्कृताधधानाः आत्मनिप्रेयसीत्वाभिमाना प्रखरोक्तिप्रधाना भवद्वयस्पर्शित्वात्ताटस्थ्यमवलम्बमानाः का नाम तव दास्यो न भवेयुरित्यभिप्रायेण प्रागुक्तमेव द्रढयन्ति । वीक्ष्येति । अत्र हे पुरुषभूषणेत्यनुवर्त्य तव भवामेति संबन्धः । ननु भवत्यो न धनादिना क्रीताः न वा दत्तभृतयः नच वन्द्यानीता इति कथं दास्यो भवथेत्याशङ्क्य तत्त्रैविध्यमेवात्मनि प्रतिपादयन्ति । तत्र श्रियैकरमणं वक्षो वीक्ष्येति सर्वसम्पदाधिष्ठात्र्याः श्रिय एकममन्यसाधारणं रतिप्रदमिति धनादिना क्रीतत्वं दत्ताभयं च भुजदण्डयुगमित्यभयदानमेव भृतिरिति द्वितीयस्योत्तरं सकलमेव वाक्यं तृतीयस्य तत्र प्रस्तुते अप्रस्तुत व्यवहारसमारोपरूपया समासोक्त्यात्मनि मृगीत्वमन्यस्य तस्मिन् लुब्धकत्वमध्यवस्यन्ति तेन वन्द्यानीतत्वं सेत्स्यति । तथ हि तत्रालकानां गुल्मत्वम् आवृतेति विस्तृतत्वं मुखस्य कपटफलकत्वं कुण्डलयोर्मकरीत्वं गण्डस्थलयोरुभयतः पल्वलीत्वम् अधरसुधाया नीरत्वं हसितावलोकस्य लोभ्याहारत्वं भुजद्वयस्याभयप्रदत्वं श्रियैकरमणमिति सजातीयविश्रामस्थानत्वेनाश्वस्तत्वम्

विशुद्धरसदीपिका ।

मुरलीकलस्य चाकर्षकध्वनित्वमध्यवसेयमिति विलोक्येति वक्षोविशेषणमिति न पौनरुक्त्यम् शेषं स्पष्टम् ॥ ३९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ननु किमिति स्वगृहस्वामिन्योऽस्मद्दास्यो भविष्यथ तत्राहुः । वीक्ष्येति । यद्वा न यूयं मया बद्ध्वानीता नवापद्रक्षिता नवा द्रविणक्रीता इति कथं दास्यो भविष्यथ तत्राहुः । वीक्ष्येति । तवालकावृतमुखं वीक्ष्य दास्यो भवामः इदमत्राभिप्रेतम् अस्माकं मनः प्रथमतः स्वभावत एव रजसा कुटिलं तमसा कृष्णं सत्त्वेन स्निग्धं च पुनश्च स्नेहोद्रिक्तत्व ध्यानेन त्रिभङ्गललितश्यामसुन्दरसुस्निग्धत्वन्मूर्त्याकारतयापि तादृशं स्वसमानतादृक्त्रिगुणान्वितत्वदलकदर्शनेन बन्धुबुद्ध्या तत्र सङ्गतं तैरलकैर्बध्नातीति बन्धुरिति बन्धनमेव बन्धुकृत्यमात्मनश्च नागपाशाकारतया बन्धकस्वभावत्वमाकलय्य कुटिलकृष्णस्वभावतया भवानिव विश्वासघातमविगणय्य तत्रैव निबद्धमिति बद्ध्वानीतत्वेन दास्यार्हत्वं सूचितम् किञ्च कीदृशमलकावृतमुखं कुण्डलश्रिगण्डस्थलाधरसुधं वहिर्दिव्यमकराकृतमणिमयकुण्डलयोः श्रीर्ययोस्तादृशे इन्द्रनीलप्रभे कपोले यस्मिन् तथाधरयोः वज्रमुक्तामणिलसनदशनप्रभात्मकहसनसुधा यस्मिंस्तच्च तच्च तथा वीक्ष्य दास्यो भवाम अत्रायमाशयः यत्र धनिभिर्बहुनिधिर्निधीयते तत्र प्रदीपः प्रज्वाल्यते ध्वजश्चारोप्यते तद्रक्षकतया नागश्चावधार्य्यते तथा मकरध्वजारोपितमणिगणनिकरमकरानिधौ मकरकुण्डल एव तन्मकराकारध्वजे तद्गतमणय एव मणिप्रदीपाः श्यामस्निग्धोज्ज्वलकपोलेन्द्रनीलमणिमुकुरपुटमेव संपुटम् अधरावेव तद्विद्रुमाभरणं तत्र दशनभगणा एव सुधास्रावचन्द्रमणयः तदावरकालकावेव रक्षकनागयुगलं तमेव लक्ष्म्या अपि प्रलोभकं निधिं वीक्ष्य तत्क्रीता एव दास्यो भवामः पुनः कीदृशं तत् हसितालोकमवलोक्यतेऽनेनेत्यवलोकः कूर्मवायुर्नेत्रे च तानि हसितानि दशनकुन्ददीधितिना पराभूतानि येन तत्तथा चात्रेन्द्रनीलाकारे कपोले इन्द्रनीलनिधिदर्शनव्रातमेव कुन्दनिधिर्मकरकुण्डल एव मकरनिधिः अवलोकसूचितोन्मीलनकरकूर्म एव कूर्मनिधिः मणिगणपूरितकण्ठ एव शङ्खनिधिः नेत्रे पद्मनिधी तत्पूरितोऽनङ्ग एवानङ्गनिधिरित्यष्टनिध्यावरण परिवृतभगवन्मुखं वीक्ष्य तन्निधिवलोभेन तदाराधनाय वा दास्यो भवाम तथा श्रिया सर्वसम्पदधिष्ठात्र्या चञ्चलत्वेन प्रसिद्धत्वेपि तद्वक्षःश्रीलोभेन स्वभावसिद्धचाञ्चल्यमुत्सृज्य स्थैर्येण न्युषितया लक्ष्म्या निर्णीतमेकं मुख्यं रमाया अपि रमणं किमुतान्यासां यद्वक्षः तद्विलोक्य दास्यो भवाम यदा तल्लोभेन सर्वलोकेश्वरी श्रीरपि दास्यं गता तदालिङ्गनरसाभिज्ञाः प्रीत्येकमूर्त्तयोऽचलचित्तास्त्वदेकनिष्ठा वयं दास्यो भवाम इति किमत्र चित्रं तथेन्द्रवृष्ट्यादिसर्वापत्सु दत्ताभयं भुजदण्डयुगं विलोक्यापत्सु रक्षितत्वेनाग्रेऽपि तद्विरहकामाग्निनाग्नि दृग्जलवृष्ट्याद्यापद्रक्षायास्तदधीनत्वेन च दास्यो भवाम इति ॥ ३९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु यदि निरुपाधिकप्रेमवत्यो भवत्यस्तर्हि सालोक्यादिफलं प्रार्थ्यतां किमर्थं दास्यं प्रार्थ्यत इत्याशङ्क्याहुः । वीक्ष्येति । इदं सर्वं वीक्ष्य दास्य एव भवाम तत्र सारूप्यं नास्माकमपेक्षितं यतः अलकैः समानरूपैस्तदुपलक्षितैः समानरूपैर्भ्रमरैश्चावृत्तं मुखं तथा च सारूप्यं गतानामपि या, भक्तिरवशिष्यते तदर्थिन्यो वयमिति भावः । तथा सामीप्यापेक्षामपि वारयन्ति कुण्डलाभ्यां श्रीः शोभा यस्य तयोः श्रीर्यस्मादिति वा तथा चात्यन्तसमीपयोस्तत्र प्रमाणभूतसांख्ययोगरूपयोरपि यदा मुखावलोकनपरत्वं तदान्यस्य का कथेति भावः । गण्डौ विशालौ सुधापानार्थं स्थले यस्मिंस्तथा अधरे सुधा यस्मिन् गण्डस्थलं च तदधरसुधा च कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन्निति वा एतेन सालोक्यापेक्षापि निवारिता सालोक्य प्राप्तयोरपि कुण्डलयोर्मुखानिरुष्टप्राक्षरामृतेनाभिलाषेण लोलत्वदर्शनात् किंच हसितपूर्वकमवलोकोऽवलोकनं यस्मिंस्तद्धसितावलोकमनेन सायुज्यापेक्षाप्यस्माकं नास्तीत्युक्तं यथोक्तमुखावलोकनजन्यानन्यस्य पृथक्स्थितिं विनानुभवासंभवात् किंच इन्द्रादिपदमप्यस्माकं नापेक्षितमित्याशयेनाहुः । दत्ताभयं च भुजदण्डयुगं विलोक्येति । तथा चासुरादिभ्यतः इन्द्रादेरप्यभयप्रदं लोकपालास्पदमपराधिजनदण्डरूपभुजद्वयावलोकनपरायणानामस्माकमिन्द्रादिपदाभिलाषो नोपपद्यते इन्द्रादीनामपि भुजदण्डयोर्निर्विष्टत्वादिति भावः । ऐहिकैश्वर्य्यवाञ्छाप्यस्माकं नास्त्तीत्याशयेनाहुः । वक्ष इति । श्रिय एकम्मुख्यं रमणं वक्षःस्थलं विलोक्य चकाराद्धर्मस्यापि संग्रहस्तथा च सर्वतः संप्लुतोदकहृदवदन्तर्भूतसर्वपुरुषार्थं दास्यमेव प्रार्थयामः

> तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
> भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥

इति भगवत्सङ्गिसङ्गस्यापि यदेवं माहात्म्यं तदा साक्षाद्भगवत्सङ्गस्य माहात्म्यं किमु वक्तव्यमिति भावः । एतेन भर्तृत्यागस्य पापरूपत्वं प्रकृते न संभवति दुःखरूपफलजनकत्वाद्भवन्तामवलोक्य लोकद्वयस्यापि त्यक्तत्वाच्चेत्यपि सूचितम् यच्च

> अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्रं भयावहम् ।
> जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियः ॥

इति षड्दोषाभिधानं तदपि प्रकृते नोपपन्नं भगवतो यथोक्तषड्विधगुणत्वादित्यपि ध्वनितम् यद्वा ननु किमवलोक्य दास्यभावः प्रार्थ्यत इत्याशङ्क्याहुः । वीक्ष्येति । श्रियैकरमणमिति मुखस्यापि विशेषणं तथा च लोकोत्तरसौन्दर्यमवलोक्य दास्यो भवाम ननु दृष्ट्वैव वाञ्छा न विधेया प्रीत्ययोग्यानामापातरम्याणामपि बहूनां पदार्थानां सत्त्वादित्याशङ्कानिरासायोक्तम् । वीक्ष्येति । भगवद्दास्यमेव सर्वापेक्षयोत्कृष्टम् अत एवंविधविग्रहप्रादुर्भावोऽस्माकं दास्यपददानायैव भगवता कृत इति सम्यग्विचार्य्येत्यर्थः । श्रियैकरमणमित्यनेन सर्वोत्तमा चतुरशिरोमणिभूता श्रीर्यत्र सर्वभावेनासक्ता तत्र का वयं वराक्यो दास्येऽप्यनधिकारिण्योऽतः श्रियैकरमणं मुखादिकमवलोक्यात्र यद्विचारणीयं तत्तल्लक्ष्म्यैव स्वयंवरकाले विचारितमिति न विचार्यते तदुक्तम्

> नूनं तपो यत्र न मन्युनिर्जयो-
> ज्ञानं क्वचित्तच्च न सङ्गवर्जितम् ।
> कश्चिन्महांस्तस्य न कामनिर्जयः

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

स ईश्वरः किं परतो व्यपाश्रयः ॥
धर्म्मः क्वचित्तत्र न भूतसौहृदं
त्यागः क्वचित्तत्र न मुक्तिकारणम् ।
वीर्य्यं न पुंसोऽस्त्यजवेगनिष्कृतं
न हि द्वितीयो गुणसङ्गवर्जितः ॥
क्वचिच्चिरायुर्न हि शीलमङ्गलम्
क्वचित्तदप्यास्ति न वेद्यमायुषः ।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः
सुमङ्गलः कश्च न काङ्क्षते हि माम ।
एवं विमृश्याव्यभिचारिसद्गुणै
र्वरं निजैकाश्रयतागुणाश्रयम् ।
वव्रे वरं सर्वगुणैरपेक्षितम्
रमा मुकुन्दं निरपेक्षमीप्सितम् ॥

इति

तस्मादस्मत्प्रवृत्तिर्नोऽप्रयुक्तात उपेदशसहस्रैरपि न निरोद्धुं शक्येति भावः सूचितः अनभिज्ञापक्षे ननु दास्यं देहीति भवतीभिरुक्तं तत्र मूल्यं श्रुत्वा यत्कर्त्तव्यं तत्करिष्यामीत्याशङ्क्य लब्धाऽनल्पमूल्या एव वयमतो मास्तु भवतस्तद्दानचिन्तेत्याशयेनाहुः । वक्ष इति । अलकैः केशप्रान्तभागैः शोणवकोष्णीषधारणसमये तदधोभागे लसद्भिरावृतमाच्छादितं चूडाबन्धनवर्हापीडधारणसमये कुञ्चितैरनतिदीर्घैरलकैरीषदावृतमाच्छादितमभ्यङ्गोद्वर्तनादिसमयेऽआसमन्तात्तदावृतमाच्छादितं मुखं वीक्ष्य ईक्षणाभ्यां सम्यगास्वाद्यानेन मुखोर्ध्वभागशोभोक्ता तथा कुण्डलयोः समयभेदेनालकैरनावृतयोरीषदावृतयोः संपूर्णावृतयोरचपलयोरीषच्चपलयोरत्यन्तचपलयोश्चालङ्कारप्रतिविम्बरूपा श्रीर्ययोस्ते गण्डस्थले यस्मिंस्तत् अनेन पार्श्वयोः शोभोक्ता अधरसुधं यस्मिंस्तच्च हसितं प्रहसितपूर्वकमवलोको यस्मिंस्तत् हसितं चावलोकश्चेति द्वन्द्वैक्यं वा नेपथ्याधोभागयोस्तथा चैतावदेव मूल्यं कोटिचिन्तामणिविचित्ररत्नखचितमन्दिरसत्यलोकादिलभ्यामृतादेरप्येकमस्माकं तव च सहजत्वादनायाससाध्यमिति यथोक्तमूल्येन जातं वास्माकं दास्यं न किंचिदपि वक्तव्यं कर्तव्यं वावशिष्यत इति भावः । लोमविशेषोत्थानात्तौरभ्यविशेषाघ्राणाद्वाऽधरेसुधानुभवः ननु नैवं वाच्यं युष्मत्पतिभ्यो राज्ञश्च बिभेमि अहमित्याशङ्क्य किंचैवं प्रत्यक्षोपलब्धं स्वसामर्थ्यं गोपयसीत्याशयेनाहुः । दत्ताभयं च भुजदण्डयुगं तथा चाभयंकरभुजदण्डालंकृतस्य तव नास्ति भयसंभावनेति भावः अनेन गोवर्द्धनोद्धारणादिना दत्तमभयं येभ्योऽस्मत्पत्यादिभ्यः तेनैव दत्तात्यन्तभयेभ्य इन्द्रादिभ्यश्च भयाभावात्तव दास्ये स्वीकृते नास्त्यस्माकं लोकद्वयेऽपि भयशङ्केत्यपि ध्वनितं गाढालिङ्गनेन कामभयहारित्वमप्यत्र व्यङ्ग्यं दण्डपदेन सुवृत्तादिशोभोक्ता एवं व्याजेन वीररसेन शृङ्गाररसोऽपि पुष्टो भवति ननु तथापि परदारसंबन्धलाञ्छनान्निष्कलङ्कोऽहंबिभेमीत्याशङ्क्य श्रीरेखोपरितर्ज्जनीं धृत्वा पृच्छन्त्य इवाहुः । वक्ष इति । श्रिया कीर्त्या एकं श्रेष्ठं रमणं यस्मिंस्तत् तथा च हे निष्कलङ्काग्रगण्य ! यदि कलङ्काद्बिभेषि तर्हि श्रीमन्नारायणभार्यां लज्जया गृहीतरेखारूपां किमिति वक्षस्युद्वहसि अस्मान्मैव मवोचस्त्वं तु ब्रह्माण्डस्यान्तर्वहिर्वाऽवस्थितस्य कस्यापि कामपि नारीं न त्यक्ष्यसीति सम्यग्जानीमो वयमतस्तादृशं स्वसामर्थ्यं मावलोपयेति भावः । क्रियाद्वयं च स्वानुरागवैशिष्ट्यस्य मुखचुम्बनभुजवक्षसोरालिङ्गनमिति प्रयोजनद्वयस्य च ध्वननाय अत्र वीनां पक्षिणामीक्षणीयेति श्लेषेण स्वनेत्राणां खञ्जनखगत्वं तत्राऽलककुण्डलपाशयोस्तद्बन्धःगण्डयोः पाशस्थानत्वं सुधाया आहारत्वं हसितावलोकमिति तन्नेत्रयोः स्वनेत्रखञ्जनाकर्षकजनत्वं भुजे वक्षसोः सञ्चारदेशत्वञ्च व्यज्यते तथा च यथोक्तस्वरूपदर्शननितान्तशक्तिमदन्तःकरणानां महाजालवद्धनयनखगानामस्माकं प्रतियात नेत्यादिवाग्वज्रप्रहारैर्वा हृदयानि मा विदारयेत्याशयः मानिनीपक्षे ननु कथं तर्हि ममाङ्गानि निरीक्ष्यमाणा एव तिष्ठथेति चेत्तत्राहुः । वीक्ष्येति विलोक्यापि किंवयं दास्यो भवामेति कापि नैवेत्यर्थः । यद्वा ननु साहसं माकृथा ममाङ्गानि विलोक्य विचार्य्य च वक्तव्यमित्याशङ्क्याहुः । वीक्ष्येति । तथा च न वयं दास्यो भवामेति काभितकोटिभिरङ्गैरपि धैर्य्याच्चालयितुं न शक्या इति भावः यद्वा यदि तवास्मान्दासीकर्तुं महत्युकण्ठा वर्त्तते तर्हि योषितद्रूपस्य तव विश्वासाभावात् स्वपतिं कञ्चन दर्शय भवतु तं दृष्ट्वा वयं दास्यो भविष्याम इति नर्म व्यञ्जयन्त्य आहुः । वीक्ष्येति वक्षश्च श्रिया युक्तं वीक्ष्य यस्तव एको रमणः कान्तस्तद्दत्ताभयं भुजदण्डयुगवत्तं विलोक्य वयं दास्यो भविष्यामः तेषां बहुत्वख्यापनायैकेत्युक्तं स अस्माकं प्रदर्शनीय इत्युपहासोक्तिः निवृत्तिपक्षे चित्तैकाग्र्यास्पदस्य भक्तानुग्रहार्थं गृहतिलीलाविग्रहस्य भगवतो मुखादिकं विचार्य तथैवालोक्य च वयं तवव दास्यं प्राप्तितयादयाम इति वक्ष्यति तथा च समस्तोपासनाविधायकश्रुतितात्पर्य्यगोचरस्यैवंविध स्वरूपस्य भगवतो दास्येनैवोद्धारो नान्यथेति भावः ॥ ३९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गृहपरित्यागपूर्वकं दास्यप्रार्थनायां कारणमाहुः । वीक्ष्येति । कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिन् तच्च तच्च तत् हसितयुक्तोऽवलोको यस्मिन् तदलकावृतमुखम् वीक्ष्य दत्तं बहुभ्यो भक्तेभ्योऽभयं येन तद्भुजदण्डयुगं च श्रियं एकमेव रमणं रतिजनकं वक्षश्च विलोक्य दास्यो भवाम ॥ ३९ ॥

भाषा टीका

तुम तौ अपने गृह प्रतनि की प्रेयसी (प्यारी) हौ फिर तुम मेरे दास्यभाव की इच्छा कैसे करौ, हो ऐसो श्रीकृष्ण को अभिप्राय देखिके गोपी वोलीं, कि–हे प्यारे ! यामें तेरे सौन्दर्य कोई दोष है हमारो दोष नहीं, देख अलका वालि सो ढकि रह्यो और कुण्डलन की शोभा युक्त गोल कपोल जामें, अधर में सुधा और हास पूर्वक चितवन जामें ऐसे तेरे श्रीमुख देखिके, तथा आश्रित न कूं अभय देवे वारी इन दोनों भुजाओं कूं देखिकै, और लक्ष्मी को एक रमण वक्षस्थल कूं देखिकै अब हम तेरी दासी हैं तू हमपै कृपा कर ॥३९॥

**का स्त्र्यङ्ग ! ते कलपदायतवेणुगीतसम्मोहितार्य्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥ ४० ॥**

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु जुगुप्सितमौपपत्यमित्युक्तं तत्राहुः । का स्त्रीति । अङ्ग हे श्रीकृष्ण ! कलानि पदानि यस्मिंस्तदायतं दीर्घं मूर्च्छितं स्वरालापभेदस्तेन अमृतेति पाठान्तरे कलपदं यदमृतमयं वेणुगीतं तेन सम्मोहिता सती का वा स्त्री आर्यचरितान्निजधर्मान्न चलेत् यन्मोहिताः पुरुषा अपि चलिताः किञ्च त्रैलोक्यसौभगमिति यद्यतः अबिभ्रन्नबिभरुः तद्द्योतकशब्दश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्तः किं पुनस्त्वदनुभवेनेति भावः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु शिष्टवर्गशिरोधार्य्यास्तथापि महद्वल्लोकशिक्षार्थमवश्यं सदाचारः पालयितुं युज्यते तत्र सदैन्यरोषमाहुः । केति । त्रिलोक्यां वर्त्तमाना का स्त्री न चलेत् अपि तु सर्वैव चलेदित्यर्थः । श्रीशिवाङ्कस्थपार्वत्यादीनामपि मोहदर्शनात् तच्च स्कान्दादौ प्रसिद्धमेव अत्रापि देव्यो विमानगतय इत्यादिना सूचितमेव कदाचिद्वा वेणुगीतं नोदेतु नाम रूपं च परममोहनं सदा विराजते इति सविकारमाहुः । त्रैलोक्येति । त्रैलोक्यस्य ऊर्ध्वाधोमध्यवर्त्तमानलोकत्रयस्य सौभगं सौभाग्यं जनप्रियत्वं सौन्दर्य्यं वा यस्मिन् यस्माद्वा तत् इदं प्रत्यक्षवर्त्तमानमित्यन्यथात्वं निरस्तं यद्वा असाधारणम् अनेन श्रीरघुनाथस्य यत् सौन्दर्य्यं दृष्ट्वा मुनयोऽपि मोहिता भावविशेषं गताः तथा च पाद्मोत्तरखण्डे—

पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।

इत्यादि महाकौर्म्ये च—

अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे ।
भर्त्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥

इति ततोऽपि वैशिष्ट्यमभिप्रेतम् अधुना निजाशेषभगवत्ताप्रकटनात् यद्वा इदमनिर्वचनीयं परमाद्भुतामित्यर्थः । प्रतिबिम्बादौ दर्शनात् तवापि भावविशेषोत्पादनेन विस्मापनात् तथा चौत्कमुद्धवेन विस्मापनं स्वस्य चेति । निरीक्ष्येति । वेणुगीतस्येव श्रवणस्मरणादिनापि मोहः स्यादेव तत्रापि साक्षात् दृष्ट्वा का वा न चलेदित्यर्थः । यद्यस्मादूरूपत् गोशब्देन वृषवत्समहिष्यजादयोऽपि ग्राम्यपशवो लक्ष्यन्ते गावः पशुत्वेन विवेकहीना अपि पुलकानीति बहुत्वेन सार्वाङ्गेषु सदैवेति द्योत्यते तैश्चान्येऽपि विकारा उपलक्ष्याः अस्पन्दनं गतिमतामित्याद्युक्तेः अबिभ्रन् भावविशेषोदयात् इति वेणुगीतादपि रूपस्य परममोहनत्वमुक्तं यच्च रुक्मिण्या देव्यावर्ण्यते "रूपं दृशां दृशिमतामखिलार्थलाभ„ मिति उद्धवेन चोक्त विस्मापनं स्वस्य चेति तत्तद्वचनादप्यस्य वैशिष्ट्यं ज्ञेयं चक्षुष्मतां सौन्दर्य्यग्रहणसम्भवात् तथा परमविदग्धशिरोमणेः स्वस्य सदसद्विचारनिष्ठासद्भावेनाश्चर्य्यविशेषदृष्ट्या सम्भवविस्मयसम्भवाच्च अत्र गवादीनां तत्तदभावेऽपि प्रेमविकारोक्तेरिति दिक् अन्यत्तैरुक्तं तत्र पुरुषा अपि चलिता इति द्विजद्रुममृगाणामपि पुलकोद्गमस्य किं वा शक्रशर्वपरमेष्ठिपुरोगा इत्यादिना वक्ष्यमाणस्य देवादीनामपि मोहस्यानुसारेणेति अथवा यदित्यव्ययं याभ्यां वेणुगीतरूपाभ्यामित्यर्थः । वेणुगीतस्य मोहनत्वं विशेषत एकविंशाध्याये व्यक्तमेवोक्तं पञ्चत्रिंशे च वक्ष्यते अन्यत् समानम् एवं तस्य वेणुगीतरूपयोः परममोहनत्वमुक्तं कृष्णनाम्नो मोहनत्वमङ्गेत्यनेन सूचितमेव परममोहनत्वेन श्रीकृष्णेति साक्षात्कुत्राप्यसम्बोधनात् अतोऽशक्तया शिष्टाचारपरित्यागे कोऽपि दोषो नाम न घटेतेति भावः । वस्तुतस्तु तादृशजनानां सदाचारेऽनधिकारात् तच्च पूर्वं विवृतमेव अत एव श्रीस्वामिपादैर्लिखितं तद्द्योतकशब्दश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्त इति ईश्वरस्य च सर्वशक्तिमत्त्वाल्लोकसंग्रहार्थं सदाचारपरिपालनं तस्य सम्भवेदेव तत् प्रेमविवशानां चाशक्त्या कथं सम्भवेत् एवमेव तेषां माहात्म्यविशेषो निगूढोऽपि तेनैव निरपेक्षं मुनिं शान्तमित्यादिवचनैरभिव्यञ्जित इति अनेन श्रवणादित्यस्योत्तरं पुरुषाणां तत्रापि मुनीनामपि पूर्वावतारे अत्र च गवादीनामपि साक्षान्मोहो यत्र स्यात् तत्रास्मादृशीनां का वार्त्तेति विवेकहानावस्माकं न दोष इति किं वा यस्य निरीक्षणवेणुगीतश्रवणमात्रेण गवादीनामपीदृशानन्दलक्षणं सम्पद्यते तस्य यथायथं साक्षादुपभोगेन प्रेमविशेषलक्षणः परमानन्दः सम्पत्स्यत एवेति सन्निकर्षो हि युक्त एवेति वस्तुतस्तु यस्य श्रवणादिनापि भावः स्यात् तस्य सन्निकर्षेण भावो विशेषतः सम्पद्येतैवेति श्लेषार्थः । अङ्ग हे कलपदायतवेणुगीतसम्मोहित ! का स्त्री आर्य्यचरितान्न चलेत् अपि तु न कापीत्यर्थः यन्निरीक्ष्य गवादयः पुलकानि बिभ्रति स्म इदं ते तव रूपसौन्दर्य्यं त्रिलोक्यां नास्ति किम् अपि त्वस्त्येवेत्यर्थः । अतोऽनेन त्वं मा गर्वमावहेति भावः । यद्वा हे कलपदायतवेणुगीत ! हे सम्मोहित कामसम्मोहित ! इत्यधैर्य्यमुक्तं ते त्वत्तः सकाशात् किं भूतात् आर्य्यचरितात् परमधार्मिकादिति सोत्कण्ठं यद्वा हे कलपदामृतवेणुगीतसम्मोहितार्य्य ! इति परमधाष्ट्यमुक्तं ते तव चरितात् पारदारिकत्वलक्षणात् का न चलेत् नापायात् केदं स्वीकुर्य्यादित्यर्थः अन्यत् समानम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नन्वेवं पतिव्रताभिरुपहसनीया आविष्यथ तत्र स्फुटमेव सरोषदैन्यमाहुः । का स्त्रीति । त्रिलोक्यां वर्त्तमाना का स्त्री न चलेत् अपि तु सर्वैव चलेदित्यर्थः । तच्च देव्यो विमानगतय इत्यादिना सूचितं कलेति पूर्वं व्याख्यातं पदेति प्रतिपदमपि तादृशं बोधयन्ति । आयतेति । तत्र श्रीकृष्णस्य निर्बन्धं बोधयन्ति तेषां च धैर्य्येणापि तत्कालक्षेपं वारयन्ति पाठान्तरे तस्यालौकिकत्वादत्वं व्यञ्जयन्ति तत्रादर्शने एवं वार्त्ता दर्शनेऽपि तथैवेत्येवं सर्वतो मार एवेति सभयमिवाहुः । त्रैलोक्येति । त्रैलोक्यस्य ऊर्ध्वाधोमध्यवर्त्तमानयावल्लोकस्य सौभगं सौभाग्यं जनप्रियत्वं सौन्दर्य्यं वा यस्मिन् यदन्तर्भूतमित्यर्थः । तदिदं प्रत्यक्षवर्त्तमानमित्यन्यथात्वं निरस्तं यद्वा इदमेतादृशमसाधारणमित्यर्थः । निरीक्ष्येति । यस्य श्रवणादिनापि मोहः स्यादिति कैमुत्यं बोधयन्ति

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

का स्त्रीति । यत्र पुरुषा अपि स्वयं भगवानपि मुह्येयुरिति भावः । शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुरिति वक्ष्यमाणात् विस्मापनं स्वस्य चेति तृतीयोक्तेश्च अहो अस्तु तावत्तादृशसारासारविदां तेषां वार्त्ता यद्यास्यां वेणुगीतरूपाभ्यां गवादयोऽपीति श्रवणदर्शने लभ्येते ते स्वप्रकाशत्वान्नासम्भाव्ये अनेन लोकेष्वपि भिरित्यस्योत्तरं निषेधार्थश्चायम् ननु यदि भवदङ्गदर्शनेन युष्माकं न धैर्यस्तर्हि कथमितश्चलितुमिच्छा तत्राहुः । का स्त्रीति । का स्त्री तज्जातिमात्रे कलेत्यादिलक्षणापि आर्य्यचरितात् सदाचाराद्धेतोः ते त्वत्तः सकाशात् न चलेत् नापययायात् तथा यत् यस्मात् गवादयोऽपि पुलकान्यबिभ्रन् तत् इदमीदृशं रूपं निरीक्ष्य च समवलोक्यापि तस्मादेव हेतोः का नापययायात् अपि तु सर्वैवापययायादित्यर्थः । सुन्दरीणां सुन्दरपरपुरुषनिकटे स्थितिर्हि वाढं लोकविगानहेतुरिति तदेवं यद्यपि न तत्संमोहिता नापि सम्यक् तद्वीक्षणकारिकाः तथाप्यपयास्याम इति भावः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आर्य्यचरितात् यद्यत् स्वेन रूपेण यत्संबन्धिततः ॥ ४०-४४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं जुगुप्सितं च सर्वत्र ह्यौपपत्यमिति तस्योत्तरमाहुः । का स्त्रीति । अङ्ग हे कृष्ण! कलानि मधुराणि पदानि यस्मिंस्तदायतं दीर्घं मूर्च्छितं स्वरालापभेदस्तेन संमोहिता सती कलपदायतवेणुगीतसंमोहितेति स्पष्टोऽर्थः । लोकत्रयसुन्दरमिदं रूपं निरीक्ष्य च त्रिलोक्यामपि का वा स्त्री आर्यचरितात्सतामाचारान्निजधर्मान्न चलेत्सर्वापि चलेदेवेत्यर्थः । यद्यतो गावो द्विजाः पक्षिणो मृगाश्चापि पुलकानि रोमाञ्चान् अबिभ्रन्नबिभरुः तद्योतकशब्दश्रवणमात्रेणापि तिरश्चामपि निजधर्मत्यागो दृष्टः किं पुनर्मादृशामिति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मत्स्मरशमनं च न चित्रमिति भावेनाहुः । का स्त्रीति । ते तव कलपदैः अव्यक्तमधुरशब्दावयवैः अमृतं श्रवणानन्दकरं यद्वेणुगीतं वंशगानं तेन समोहिता त्रिलोक्यां त्रैलोक्ये का स्त्री त्रैलोक्यसौभगमलंकारभूतमिदं रूपं सुन्दरतरावयवोपकल्पनमाकारं च नितरां दृष्ट्वार्याणां सतां चरितान्मार्गादिति शेषः । न चलेत्स्खलिता न भवतीत्यन्वयः इदं न चित्रमित्याहुः । यदिति । यद्यस्माद्वेणुगानात् यस्य रूपस्य स्पर्शादिना वा गवादयोऽन्तः प्रकाशश्चेतनताशयः पुलकानि रोमाञ्चानि अबिभ्रन् दधुरिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु यद्येवं भवत्यः स्वभावसिद्धाभिमानिन्यस्तदा कथं ब्रह्मचरसामभिप्रायानभिज्ञाः सत्यः किं तत्यथ तत्राप्यन्या आहुः । का स्त्रीत्यादि । हे अङ्ग ते तव कलपदायतवेणुगीतसंमोहिता सती आर्य्यस्य तव चरितात्प्रेम्णि चलन्त्य भ्रमेत् एवमेव तव भ्रामकं चरितं येन त्रिलोक्यां का स्त्री न चलेत् सर्वैव चलति अत्र स्त्रीणां न दूषणं तवैवेत्यर्थः । न केवलं तव चरितादेव इदं रूपं निरीक्ष्य च यतो रूपात् गोद्विजद्रुममृगा अपि पुलकान्यबिभ्रन् पुलकिनो भवन्ति ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ननु तथापि लोकविद्विष्टं स्त्रीणामभिसरणम् अतः सन्मार्गरक्षणार्थं प्रमाणसिद्धमप्येतन्न कर्त्तव्यमतः श्रवणदर्शनादिकमेव कर्त्तव्यमिति चेत्तत्राहुः । का स्त्रीति । अयं धर्मः पुरुषाणां वक्तव्यो ननु स्त्रीणामसम्भावितत्वात् यद्यसम्भावितो धर्मो भवति एवं धर्मनाशे धर्मस्थापकं स्वरूपमेव हेतुः अद्भुतकर्मत्वात् वस्तुतस्तु स्वरूपसम्बन्धिनां भक्तानां धर्मं स्वरूपेणैव रक्षति तन्नान्यभावेभ्यो रक्षणमेतद्भावपोषणं च स्वरूपधर्मसम्बन्धितस्तत्तिरोवेति न किञ्चिदनुपपन्नमिति भावः । अत एवैवं स्वरक्षणेन स्वान्तरङ्गज्ञापनायाङ्गेति सम्बोधनमप्रतारणाय च या स्त्री लोके स्त्रीशब्दवाच्या सा कथमार्यचरितान्न चलेत् त्रिलोक्यां सत्त्वरजस्तमः कार्यरूपायां तामसीनां मौढ्यात् आर्यचरिते स्थितिं मत्वा तन्निराकरणं राजसीनां स्वभाव एवं सात्त्विकानां सर्वत्राद्धर्मबुद्धिमाशङ्क्य तन्निराकरणम् आर्यमार्गपरित्यागे हेतुः ते कलपदामृतवेणुगीतसम्मोहितेति सम्मोहिता आर्यचरितान्चलत्येव सम्मोहः पञ्चपर्वाविद्यास्थानीयैः भगवत्सम्बन्धात् अविद्यातु न बाधते परमन्य एव बाधकाः तेषां बलं ते इति त्वदीया इति कलान्यव्यक्तमधुराणि यानि पदानि तत्राविर्भूतं यदमृतं तदेव वेणुगानगीतं तेन सम्मोहः गीतं देहमोहजनकं गायन्तं स्त्रियः कामयन्त इति स्त्री तु देह एव इन्द्रियाणां व्यामोहको वेणुः रसात्मकत्वात् अमृतं प्राणानां पदान्यन्तःकरणस्य अव्यक्तता आत्मन इति सम्यग्विमोहिताः आर्याः प्रमाणबलविवेकिनः प्रमाणे हि इन्द्रमहेन्द्रयोरपि भेदस्वीकारः पृथगुपस्थिताः सर्व एव भिन्ना इति अन्यथा इन्द्रयाजिनोऽग्रे सम्वत्सरान्ते प्रायश्चित्तश्रवणं न स्यात् संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेदिति अतो देहव्यतिरिक्तः स्वरूपेणोपस्थितोऽपि प्रमाणबले विरुध्यते वस्तुविचारस्तु प्रमेयबलमाश्रित्य, अन्यथा विधिनिषेधविधयो व्यर्थाः स्युः तदुत्तरत्र वक्ष्यति एकादशे अतो मार्गान्तरविरोधोपयुज्यत इति मर्यादाभङ्गो मार्गान्तरत्न न दूषणमुत्तरत्र ममैशुकश्च वक्ष्यति रासानन्तरं धर्मव्यतिक्रमो दृष्ट इति तत्सामर्थ्य फलस्य सिद्धत्वात् साधनदृष्ट्या अपकीर्त्तिः नास्मत्प्रतिबन्धिका किञ्च न केवलं नाम्ना मर्यादाभङ्गः किन्तु स्वरूपेणापि तदाहुः । त्रैलोक्यसौभगमिति । त्रैलोक्यस्यापि सुभगत्वं यस्मात् यथा सौर्येण दिनं चन्द्रमसा रात्रिः तथा त्रैलोक्यमेव भगवद्रूपेण सुभगतां याति इदमिति प्रत्यक्षसिद्धं चकारादनुभवाच्च तच्छ्रुत्वा एतद्दृष्ट्वा का वा आर्यचरितान्न चलेत् अस्त्ययं प्रमाणवार्त्ता तुला प्रकारान्तरेणापि चलति भगवतो रूपेण प्रमेयमर्यादाप्यपगच्छति या कथमपि भवति नान्यथा तदाह यद्गो द्विजद्रुममृगा इति । गावो हि प्रमाणवार्त्तानभिज्ञाः मातरमपि गच्छन्ति द्विजाः पक्षिणः वृक्षाः द्रुमाः स्थावराः कदाचिदपि बहिः सत्त्वेदनरी

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

निरिन्द्रिया एवेति केचित् मृगाः सर्वतोभयाः तेऽपि चेद्भगवद्रूपेण गीतेन वा आश्लिष्टरसाः पुलकानि धारयन्ति रसिकमनुष्यधर्मानाविष्कुर्वन्ति ये भगवता अन्यथैव स्टष्टाः स्त्रियस्तु स्वभावतोऽप्यन्यथा भवन्तीति नाश्चर्यं किञ्चिदत्र ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु युष्मा भिर्धर्ममार्गाय जलाञ्जलिर्दत्त एव तत् किमन्या अपि पतिव्रता "विदूषयति निर्लज्जः स्वयं दुष्टः परानपी„ति न्यायेन दूषयथ मद्वक्षस्यौत्पत्तिक्येव येयं लक्षणविशेषरूपा सुवर्णरेखा भ्राजते तां च दृष्ट्वा पतिव्रताशिरोमणिं लक्ष्मीमपि दूषयन्त्यस्तस्यामप्यपराधिन्यः कथं भवथेति तत्र न कामपि दूषयामः किंतु त्रिजगतामपि धर्मध्वंसनाय विधात्रा त्वं सृष्टोऽसीति सरोषचापलमाहुः । का स्त्री अङ्ग हे श्रीकृष्ण ! कलानि पदानि यत्र तदमृतरूपं यद्वेणुगीतं तेन कलपदायतमूर्च्छितेनेति पाठे आयतं दीर्घं मूर्च्छितं स्वरालापभेदस्तेन संमोहितेति न स्त्री दूष्यते किंतु त्वत्कर्तृकं गीतमेवेति भावः । आर्यचरितात् पातिव्रत्यलक्षणनिजधर्मान्न चलेत् अपितु सैव चलेदिति धर्मत्याजनलक्षणप्रत्यवायं त्वं प्राप्स्यस्येवेति भावः । न केवलं त्वद्गुणस्यैव धर्मध्वंसकता अपि तु त्वद्रूपस्यापीत्याहुः । त्रैलोक्येति । ऊर्ध्वाधोमध्यदेशवार्तिषु प्राकृताप्राकृतलोकेष्वपि सौभगमेव यस्य तत् नतु धर्मध्वंसकत्वहेतुकः कस्याप्यत्र द्वेष इति भावः । नच स्त्रीणां स्वाभाविकः कामोऽपि मोहे हेतुरस्तीति वाच्यं यतो जङ्गमस्थावराणां सर्वेषामपि वैवश्यप्रापकौ तव रूपगुणावित्याहुः । यत् यतो गीतरूपाभ्याम् अविभ्रन्नबिभरुः तस्मात् हे राजन् ! किं बहुना "शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययु„ रिति वेणुगीताध्यायात् परमतत्त्वविदामपि मोहः विस्मापनं स्वस्येति च तव तस्यापि चमत्कारो दृष्ट इति श्रीशुकोक्तिरप्यासीदिति ज्ञेयम् ॥ ४० ॥

केनचित्कृता विशुद्धरसदीपिका ।

नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथ तत्र स्फुटमेव सरोषदैन्यमाहुः । का स्त्रीति । त्रिलोक्यां वर्त्तमाना इति शेषः का न चलेत् अपि तु सर्वैवेत्यर्थः । तत्र देव्यो विमानगतयः इत्यादिना देवीषु यक्षपत्नीषु नागपत्नीषु च तथा तथानुभूतत्वात् कलेति व्याख्यात पदेति प्रतिपदमपि तादृशत्वं बोधयन्ति आयतेति तत्र तस्यापि निर्बन्धं द्योतयन्ति अमृतेति पाठे तस्यालौकिकारूपत्वं च इदं ते वेणुमाधुर्य्यस्यव तत्रापि रूपमाधुर्य्यस्य किं ब्रूम इत्याहुः । त्रैलोक्यस्य सौभगं सौभाग्यजनप्रियत्वं सौन्दर्यं वा यस्मिन् तदिदं प्रत्यक्षवर्त्तमानं रूपमित्यन्यथा निरस्तम् ॥ ४० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

नन्वेवमाचरणे कुलाङ्गना उपहसिष्यन्ति तत्र "यत्रोभयोः ! समो दोषः परिहारोऽपि वा समः । नैकः पर्य्यनुयोज्यः स्यात्तादृगर्थविचारणे„ इति न्यायमाश्रित्योत्तरमाहुः । कास्त्र्यङ्गेति अङ्ग हे प्रिय ! यदा सर्ववैदिकधर्माधिकारिणो ब्राह्मणादयोऽच्युतगोत्रत्वेन हरिवंशा वैष्णवास्तन्मुखरितं कलपदामृतं ते भगवत्स्वरूपसूचकं गीतं निशम्य "पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षुचर्यां चरन्ति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती„त्यादिश्रुत्यैहिकामुष्मिकफलसर्वकर्मत्यागेन त्वत्स्वरूपजिज्ञासवस्त्वदेकपरा भवन्ति विद्वांसोऽपि "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिश्रुत्या त्रैलोक्ये सौभगं यस्मात्तद्रूपं निरीक्ष्य साक्षात्कृत्य सर्वधर्माननुत्सृज्य त्वदेकनिष्ठा भवन्ति तदा या स्त्री ते कलानि पूर्वव्याख्यातगुणान्वितानि त्वत्पादपद्माविव मृदूनि पदानि यस्मिंस्तच्च शुष्कदग्धविद्धवेणुमुखरतोत्पादनेनामृतं च आयतेति पाठे त्रिलोकविदितत्वेन विस्तृतं च यद्वेणुगीतं तेन संमोहिता सती आर्य्यचरितान्न चलेत्सा का तथा त्रिलोक्यां भवं त्रैलोक्यं सौभगं युगपत्साकल्येन यत्र तादिदं रूपञ्च विलोक्य या न चलेत्सा का न कापीत्यर्थः । श्रियः सुराङ्गनानां पुलिन्दीनां च मोहितत्वश्रवणात् यद्यतो गीतश्रवणाद्रूपदर्शनाच्च गावो द्विजाः पक्षिणो द्रुमाः मृगाश्च पुलकानि अबिभ्रन् रोमाञ्चिता अभवन् किमु वाच्यं स्त्रीणां तद्गतत्वम् ॥ ४० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु युष्माकमपि भावोऽपेक्षितः स च यथा मच्छ्रवणादिना भवति न तथामत्सन्निकर्षेणेति मयोक्तमेवातः किमर्थं लोकविद्विष्टमार्गानुसरणं कुरुथ गृहे गत्वा मच्छ्रवणादिकमेवाचरतेति चेत्तत्राहुः केति । शक्तस्यैवाधिकारश्रवणात् स्त्रीणां चैतदुपादिष्टार्थानुष्ठानेऽशक्तित्वाद्यथोक्तोपदेशो न युक्तस्तस्मात्पुरुष एवैवमुपदेष्टव्य इति द्योतनाय का स्त्रीत्युक्तं किञ्च समाहिता एव धर्माधर्ममर्यादां विचारयन्ति नतु मोहिताः सम्यक् मोहिताश्चेत्किमु वक्तव्यमित्याशयमाहुः । व इति । तव समस्तजीवसंमोहकरमायाशक्तेर्यत्कलपदामृतमयङ्गीतं तेन संमोहिताः तव वेणुगीतेति सर्वेन्द्रियाणाममृतेति प्राणस्य कलपदेत्यन्तःकरस्य व्यामोह उक्तः आयतेति पाठे कलानि अव्यक्तमधुराक्षराणि पदानि यस्य तत् आयत दीर्घमूर्च्छितं स्वरालापभेदेना सम्यक् मोहिता का वा स्त्री आर्य्यचरितात् शिष्टाचारान्निजधर्म्मान्न चलेत् या स्त्री न चलेत्तथाविधा चतुर्दशभुवनेषु कापि नास्तीत्यर्थः । तथा च सर्वाविशिष्टदोषेणास्माकमुपालम्भो न युक्तः किञ्च "विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः । सर्वदा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्प„ इत्युक्तत्वाद्दुराराध्यलोकाराधनेनाप्येवंविधफलत्यागो न युक्तः अन्यथा सम्बन्धिजनानभिमतसंन्यासोऽपि केन चिन्न क्रियेतातःपरलोकविरोधिकर्म नानुष्ठेयं न च परब्रह्मणस्तवाराधनेन सर्वकर्मफलभूतेनास्ति परलोकबाधः—

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वाभद्रमभूदमुष्य किंको वार्थ आप्तो भजतां स्वधर्मतः ॥

नवै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्गसंसृतिम् स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यत इत्यादिशास्त्रात् सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते इत्यादिशास्त्रं तु जिजी-

श्रीधनपतिशूरिकृतभागवतगूढार्थदीपिका ।

विधुपरं लोकद्वयविरुद्धं कर्म्म निन्दापरं शिष्टनिन्दापरञ्च तत्र वयं त्यक्तसर्वैषणाः सन्यासिसदृशाः न त्वच्चरणसङ्गमरहितजीवनाभिलाषाः नापि परलोकविरोधिकर्मपरा नापि भगवत्स्वरूपाभिज्ञशिष्टविनिन्द्याचाररता इति भावः। का स्त्रीत्यनेन यन्मोहिताः पुरुषा अपि चालितास्तन्मोहिता स्त्री का न चलेदित्यपि सूचितं किञ्च यथा सूर्येण दिनं चन्द्रमसा रात्रिस्तथा त्रैलोक्यस्यापि सुभगत्वं सौन्दर्य्यं येन भगवद्रूपेण तत्त्रैलोक्यसौभगमिदमनुभूयमानं रूपं च निरीक्ष्य यत् यतः गोद्विजद्रुममृगाः पुलकानि अबिभ्रन् आबिभरुः गवादीनामनभिज्ञशिरोमणीनामपि यद्दशान्यथा दृश्यते तेन त्वत्स्वरूपाभिज्ञानां रसज्ञानामस्माकं स्वधर्मत्यागे किञ्चित्रं तत्रापि त्वद्द्योतकशब्दश्रवणमात्रेणापि निजधर्मत्यागो युक्तः किम्पुनस्त्वदनुभवेनेति भावः। अनभिज्ञापक्षे ननु नेयं लक्ष्मीः किन्तु मद्वक्षसि सहजा लक्षणविशेषरूपा सुवर्णरेखा विराजते तां दृष्ट्वा पतिव्रताशिरोमणिभूतां लक्ष्मीमपि स्वयं दुष्टाऽन्यानपि दूषयतीनि न्यायमनुसृत्य दूषयितुं प्रवृत्तास्तस्या मत्तश्च भयं न कुरुथेत्याशङ्क्य न वयं कामपि दूषयामः किन्तु सर्वधर्मध्वंसनाय त्वमेव विधात्रा सृष्टोऽसीति सरोषप्रलापमाहुः । केति । अङ्ग हे कृष्ण ! तव कलपदामृतवेणुगीतसंमोहिता आर्यचरितात्पातिव्रत्यलक्षणान्निजधर्म्मात्का स्त्री न चलेदपि तु सर्वापि चलेदेव ततस्त्वत्कर्तृकं गीतमेव दूष्यते धर्मत्याजनलक्षणं पापं च त्वं प्राप्स्यस्येवेति भावः। न केवलं तव गीतमेवैवम्विधम् अपितु रूपमपि त्वङ्ग त्रैलोक्यसौभगमिति। ननु नास्ति मम गीतादेरयं स्वभावः किं तु स्त्रीणामेवायं स्वभावो यद्यत्किञ्चिदपि गीतादिकमुपलभ्य मोहिता भवन्तीति चेत्तत्राहुः। यदिति । याभ्यां गीतरूपाभ्यां यद्वा ननु एवं पतिव्रताभिरुपहसनीयाः भविष्यथेत्याशङ्क्य तव गीतादिप्रसादाच्चतुर्दशभुवन उपहासकरा कापि न भविष्यति सर्वासां मोहावश्यंभावादित्याशयेनाहुः। केति। किञ्च चराचरात्मकं सर्वमपि तव गीतादिना मोहितमतः कोपहासशङ्केत्याशयेनाहुः । त्रैलोक्येति । मानिनीपक्षे ननु यदि मदीयं गीतादिकं भवतीनां न क्षोभकरं तर्हि किमर्थं चलितुमिच्छथेति चेत्तत्राहुः । केति । गीतमोहितापि आर्यचरिताद्धेतोस्त्वत्वत्तः सकाशात् का स्त्री न चलेन्नोपयायात् किञ्च यस्माद्गवादयोऽपि सपुलकास्तदिदं त्रैलोक्यसौभगं रूपं दृष्ट्वा च सदाचारभङ्गभिया का नोपयायात् सुन्दरीणां सुन्दरसन्निधौ स्थितिर्निन्दानिदानमिति मोहितापि यदि चलेत्तर्ह्यमोहिताः वयं कथं नापसराम इतिभावः यद्वा तवास्ति स्वगीतादिप्रयुक्तवशीकारे शक्तिरिति वयं जानीमस्तथापि तस्याःअस्मास्वाकिञ्चित्करतेत्याशयेनाहुः। केति। मोहितानामेव वशीकारो भवति या तु तव तादृशगीतेन न मोहिता सा स्त्री का आर्यचरिताच्चलेत्तादृशी कापि नास्तीत्यर्थः। किञ्च यतो गवादयः सपुलकास्तदिदं त्रैलोक्यसौभगं स्वीयं रूपं तु निरीक्ष्य स्वरूपोत्कर्षाभिज्ञा का सदाचाराच्चलेदिति निवृत्तिपक्षे तस्मात्त्रिलोक्यां नास्ति तथा विधा श्रुतिर्या त्वां न प्रतिपादयेदित्याहुः। केति । तव सर्वे वेदा यत्पदमामनन्ति सदेव सौम्येदमग्र आसीदित्यादिरूपं यत्कलपदामृतवेणुगीतं तदेव समा सम्यक् प्रमाणं प्रत्यगभिन्नपरमात्मपराणामुपनिषदां विषयस्य कालत्रयाबाध्यत्वात्तद्विषयकप्रमाणस्य पारमार्थिकतत्त्वावेदकत्वरूपप्रामाण्यवत्त्वात्सम्यक् किं तदितरप्रमाणानां तु स्वविषयाणां व्यवहारदशायां बाधाभावात् व्यावहारिकतत्त्वावेदकप्रामाण्यकत्वादसंयुक्तं तथा उद्दितो मननिदिध्यासनपूर्वकमवगतो यः प्रत्यगभिन्नः परमात्मा तस्य चरितात् सृष्टिकर्तृत्वादिलक्षणात्कापि स्त्री तदनन्यपरा श्रुतिर्न चलेन्न प्रचलति । अयमर्थः सृष्टिप्रतिपादकश्रुतीनां सृष्टिमुपन्यस्य तन्निषेधाभिविचिकित्सितमद्वितीयत्वं प्रतिपादितं भवतीति परम्परया निरस्ताखिलद्वैतविभ्रमेऽखण्डे सच्चिदानन्दैकरसे परमात्मनि तात्पर्य्यमन्यथा वायौ प्रतिषिद्धस्य रूपस्यान्यत्र सत्त्वाद्ब्रह्मणि प्रतिषिद्धस्य द्वैतस्यान्यत्र सत्त्वशङ्का स्यात् उपासनाप्रकरणपठितसगुणब्रह्मप्रतिपादिकानां तूपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं न गुणपरत्वं निर्गुणप्रकरणस्थानां निषेधविध्यपेक्षिते निषेध्यसम्पादकत्वेन विनियोगः कर्मप्रकरणपठितानां संयोगपृथक्त्वन्यायेन विविदिषायामुपयोग इति कापि श्रुतिः यस्मात्तवात्मचर्यावर्णनान्न चलतीति ननु महेन्द्रादिप्रतिपादनपरतयोपलभ्यमानानां तासां कथं परमात्मपरत्वमिति चेत्तत्राहुः । त्रैलोक्येति । इदमनुभूयमानं रूपं सत्तास्फूर्त्यात्मकं येन सेश्वरं जगत् सुन्दरं दृश्यते तदालोच्यते तत्तद्देवादिप्रतिपादनपराणां मध्ये च कापि न चलति—

> यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
> तत्तदेवावगच्छ त्वं मम तेजोऽशसम्भवम् इति

भगवत एव इन्द्रादिरूपेणावस्थानादिति भावः । इदमेवोदाहरणैः स्पष्टयति । यदिति । येन रूपेण

> सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
> सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति ॥

सर्वात्मभावप्रतिपादनादिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु यद्यप्युपदेशपदे इत्यनेन मुख्यः पतिरहमेव भवतीभिः प्रतिपादितोऽस्मि नात औपपत्यमस्ति तथाप्युत्सिद्धान्तानभिमतपरिजनानुकूल्यं कर्तव्यमेवेत्यत्राहुः। का इति। आर्यैः कुलवृद्धैश्चरितमनुष्ठितं पितृपुत्राद्यानुकूल्यं तत्तस्मात् यत् यतः कलपदायतवेणुगीतात् रूपदर्शनाद्वा अबिभ्रन् आबिभरुः ॥ ४० ॥

भाषा टीका ।

हे प्यारे या तीनो लोक मे कोउ स्त्री ऐसी होवेगी कि जो आपके मनोहर पद वडे सुरीले आपकी वंशी के गीतों को सुनके भी अपने पति व्रता धर्म से चलायमान न हो सकै जैसी ये मुरली है तैसोई आपको तीनौ लोक की शोभा की खान रूप भी है इन दोनों के सुनवे देखवे ते तो गउ पाक्षि मृग वृक्ष ए सव भी पुलकावलि को धारणा करैं हैं तो मनुष्यों कि और हम स्त्रियों की तो कहा कहनी है ॥ ४० ॥

व्यक्तं भवान् व्रजभयार्त्तिहरोऽभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता ।
तन्नो निधेहि करपङ्कजमार्त्तबन्धो ! तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥४१॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यक्तं निश्चितम् ॥ ४१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं प्रतिवचनैस्तदुक्तं सर्वं क्रमेण परिहृत्याधुना तस्यावतारप्रयोजनं प्रदर्शयन्त्यः परमार्त्या सकाकु प्रार्थयन्ते । व्यक्तमिति । व्रजस्य भयं भवादितः आर्त्तिश्च त्वदप्राप्तेः यद्वा भयं त्वदर्थं पूतनादिभ्यो दावादिभ्यश्च आर्त्तिश्च वर्षवातादिभ्यः यद्वा भयं त्वद्विरहशङ्कया आर्त्तिस्त्वदुपेक्षया पाठान्तरे व्रजजनानामार्त्तिः वाह्यान्तराशेषवाधा इदं न सर्वसम्मतम् एतच्चात्मोद्देशेनोक्तं किं वा व्रजस्य जनाः कालान्तरेऽप्येतद्व्रजभूम्याश्रिता ये जनास्तेषामपि किमुतास्माकं तद्धरः सन् तन्नाशनायेत्यर्थः । अभितः अशेषभगवत्ताप्रकटनविशेषेण जातः प्रादुर्भूतः यद्यपि भूभारहरणादिकमपि प्रयोजनं तत्र तदर्थकृतलीलयैव सर्वत्र मुख्यप्रयोजनं निजप्रेमरसविस्तारसिद्धेः तदर्थं दीनकारुण्यविशेषेण धर्मातिक्रमोऽपि कार्य्य इति दृष्टान्तेन बोधयन्ति देवः जगतामेव पूज्यः यतः आदिपुरुषः जगत्कारणभूतः परमेश्वरः सोऽपि यथा सुरलोकगोप्ता सुरलोकः स्वर्गः तेन तत्रत्या लक्ष्यन्ते यद्वा सुराश्च लोकाश्च अन्ये निजजनाः तेषां गोप्ता तत्प्रतिपक्षादिमारणेन रक्षकः सन् यथा जायते गोप्ता यथा भवतीति वा तथा तथा सर्वत्र तस्य साम्येऽपि भक्तापेक्षया वैषम्यमपि स्यात् तथार्त्तानामस्माकमपेक्षया धर्मस्त्वयालङ्घ्य एव तत्र चयथा तस्य न दोषो घटते किंतु गुण एव महान् तथा तवापीति भावः यद्वा देवोऽपि आदिपुरुषोऽपि सुरलोकगोप्तापि भवान् व्रजभयार्त्तिहरः सन् अत एव श्रीगोपेन्द्रनन्दनत्वेन यथावदभिजातः तच्च व्यक्तं निश्चितं स्पष्टमेवेत्यर्थः । तत्तस्मात् कर एव पङ्कजं सहजसुशीतलत्वात् सन्तापहरत्वात् आनन्दरसस्राविवाच्च तत् आदौ नस्तप्तेषु स्मरज्वराक्रान्तेषु स्तनेषु निधेहि तदार्त्तिनाशार्थं पश्चात् शिरःसु निधेहि सर्वत्राभयार्थं दासीत्वस्वीकारदार्ढ्यार्थं वा चकारद्वयमुभयत्रापि प्राधान्यबोधनार्थं त्वदेकप्रियाणामस्माकंभयार्त्तिहरणेनैव सर्वव्रजस्य भयार्त्तिहरणं ततश्चाशेषभगवत्तासारप्रकटनरूपं तवावतारप्रयोजनमपि सिद्धमेवेति भावः । ननु पतिव्रतानां व्रतपराणां शिरसि करनिधानाद्बिभेमि तत्राहुः । किंकरीणामिति । आर्त्तबन्धो ! त्वयि साक्षाद्विराजमाने त्वद्दासीनं तापोऽनुचित इति सूचितं यद्वा ननु काममत्ताः ! जितकामेन मया कथं स्तनेषु करो निधेयः किन्तु शिरःस्वेव निधेयस्तत्राहुः । आर्त्तेति । कामेन मा निधेहि किन्तु आर्तबन्धुत्वेन निधेहीत्यर्थः । अन्यथा सद्योऽस्माकमन्त्यदशापत्त्या तवार्त्तबन्धुत्वयशोहानिः गूढोऽयमभिप्रायः अवहित्थया छाद्यमानोऽपि मनोभवोऽस्मदङ्गेषु हस्तार्पणेन स्वयमेवाद्रवितेति ननु वह्वीनां समक्षं लज्जे तत्राहुः । किङ्करीणां त्वदनुरागानां सर्वासामेवास्माकमैकमत्येन नात्र लज्जावसर इति भावः । यूथशो वह्वीनामपि तासामेकस्मिंस्तस्मिन् तादृशप्रार्थनं तच्छक्तिविशेषपरिस्फूर्त्त्या किं वा अनुक्रमेणापि निधेहीत्याशयेन परमार्त्त्या वा यद्वा नः अस्माकं प्रार्थनेत्यध्याहार्य्यमेतासां किङ्करीणां तप्तस्तनादिषु करं निधेहीति भङ्ग्या प्रार्थनं श्लेषार्थः भवान् अभिजातः आभिजात्ययुक्तः व्रजेन्द्रात्मजत्वात् देवत्वमित्यादिपदत्रयेणाधर्म्मे तव प्रवृत्तिरनुचितेत्युक्तं यथा आदिपुरुषः सुरलोकगोप्ता सुरलोकभयहरः तथा भवान् व्रजभयार्त्तिहर इति सतीनामस्माकं बलादभिभवेन व्रजस्य त्वत्तो भयमार्त्तिर्भवितेवेति तच्च तवायुक्तं निजप्रयोजनप्रातिकूल्यात् नो निषेधे आर्तबन्धो ! इति वयं नार्ताः यदस्माकं बन्धुर्भविष्यसीति भावः । हे तप्त ! कामाग्निसन्तापितहृदय यद्वा तप्तः सन् स्तनेषु करपङ्कजं नो निधेहि नार्पय अप्ययें चकारः तव राजकुमारत्वेन चास्माकमपि व्रजे निवासेन दासीत्वमिव प्राप्तानामपि शिरस्यपि न निधेहीत्यर्थः । यद्वा किङ्करीणां व्रजेशगृहदासीत्वेन वर्तमानानां किशोरीणामपि किमुत मद्विधानामेवं दशश्लोक्या प्रत्युत्तरेण निर्जित्यैकादशेनानेनार्त्त्युद्रेकतो निजेष्टं स्पष्टमेव प्रार्थितं तत्र च श्लेषार्थोऽपि तदुक्तश्लेषपरिहारेण तत्र तत्रैव लिखितः अथवा तदुक्तदशश्लोकार्थस्य वैदग्धीविशेषेण एकादशानां श्लोकानामेषामेकैकेनैवोत्तरमूह्यं तत्र पौनःपुन्यं तथा तदुक्ततोऽप्याधिकमेकं पद्यं तत्र च दीर्घच्छन्दः तत्पदं न विजयार्थं किं वा प्रणयरोषावेशेन ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं चतुर्थदिक्स्थिता अप्यात्मनि धर्म्मादिदोषं परिहृत्योपक्रमवदेव प्रत्युत तस्मिन्नेव धर्मदोषापत्तिमुपसंहरन्त्यः पुनर्विवक्षितमेवाहुः । किञ्च ननु भवतु तत्तत्सर्वं मम तु नारायणसमगुणत्वेन पूर्णकामत्वात् नान्यत्र प्रवृत्तिः स्यात् किमुतेदृशे कर्मणीत्याशङ्क्याहुः । व्यक्तमिति । व्रजस्य यद्भयं पूतनादिभ्यो दावादिभ्यश्च त्वदर्थत्रासः आर्त्तिश्च वर्षवातादिभ्यः पीडा तथा भयं त्वद्विरहशङ्कया आर्त्तिस्त्वद्विरहेण तदुभयहरः सन् तं खण्डयितुमित्यर्थः—

तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहित इति

स्वयमेव विभाव्य पर्वतभारस्य ग्रहणात् क्वाचित्कपाठान्तरे व्रजजनानामार्त्तिः वाह्यान्तराशेषवाधा अभिजातः सत्कुलाज्जात इति तत्रापि वैशिष्ट्यमतोऽस्माकं नाशे तत्रापि त्वदेकहेतुकनाशकत्वे व्रतभङ्गापत्तितोऽप्याधिकोऽधर्मदोषः स्यादिति भावः । ईश्वरस्य पूर्णकामस्यापि तादृशव्रतरक्षा तादृशकामना च दृश्यत एवेत्याहुः । देव इति । सर्वथा दीव्यति विराजत इति देवः आदिपुरुषः सर्वपुरुषेषु श्रेष्ठः सोऽपि यथा सुरलोकगोप्ता स्वेच्छयैव तज्जनमात्रस्य रक्षिता सन्नदित्यादावभिजातो भवति तद्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तस्मात् करस्य पङ्कजत्वं तापहारितामात्रांशे रूपितं वस्तुतस्तु तापस्य तदप्राप्तिमात्रनिदानत्वात्तदारम्भ एवापगमः स्यादित्यभिप्रेत्यैव तप्तेष्वपि स्तनेषु परमस्निग्धाभिरपि ताभिस्तन्निधानप्रार्थनमिति ज्ञेयं पूर्ववत् सदैन्यमप्याहुः । शिरःसु च किङ्करीणामिति इत ऊर्ध्वं चास्मानात्मसात्कुर्विति विवक्षितं हे आर्त्तबन्धो ! इति आर्त्तबन्धो साक्षाद्विराजमाने त्वद्दासीनां तापोऽनुचित इति सूचितं तथा कामेन च मा निधेहि किन्तु आर्त्तबन्धुत्वेनैव निधेहीति च गूढोऽयमभिप्रायः अवहित्थयाच्छाद्यमानोऽपि मनोभवोऽस्मदङ्गेषु हस्तार्पणेन स्वयमेवोद्भावितेति निषेधार्थश्चायं तथापि तं बलादिव स्पृशन्तमाशङ्क्याहुः । व्यक्तमिति । तत्र पूर्वोद्धतोः धर्मभयादितोऽपि रक्षा तवोचिता ननु तन्नाश इति भावः । नो निधेहि मा निधेहि आर्त्तबन्धो ! इति स्वेषां धर्मभयादार्त्तिं व्यञ्जयन्ति तप्त हे कामाग्निसन्तापितहृदय ! किङ्कराणां स्वगृहदासीनामपि किमुत मादृशीनां तत्रापि शिरःसु च नो निधेहि मा निधेहि किमुत स्तनेष्वित्यर्थः । तदेवं स्वागतमित्यादिप्रकरणं सलापाख्योऽनुभावो ज्ञेयः “उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यते„ इत्युक्तेरिति ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्रजजनार्त्त्यपाकरणायावतीर्णस्य पुनस्तदार्त्त्योपादनमनुचितमित्यभिप्रायेणाहुः । व्यक्तमिति । यथा आदिपुरुष उपेन्द्रादिरूपेण सुरलोकार्त्तिनिरसनेन तद्रक्षणार्थमवतीर्णस्तथा त्वमपि व्रजजनस्यार्त्तिहरो नूनं जातः तत्तस्माद्धे आर्तबन्धो! किङ्करीणां तप्तेषु स्मरतापतप्तेषु स्तनेषु शिरःसु च पङ्कजवच्छीतलं कोमलं च करं निधेहि निधायार्त्तिं शमयेति भावः । आर्त्तबन्धो इति तदनुगुणं सम्बोधनं किङ्करीणामित्यपेक्षणीयसम्बन्धाविष्कारः ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वस्य स्वामित्वेन भर्तृगुणयोगादस्मत्कुलेऽभिजातत्वेन बन्धुत्वेन सम्बन्धयोग्यत्वादस्माकं त्वत्सम्बन्धेन जारसंसर्गदोषापगमनेन निन्द्यत्वं दूरोत्सारितं स्यादिति भावेनाहुः । व्यक्तमिति।भगवान् यथा सुरलोकगोप्ता वामनतयाभिजातः तथादिपुरुषो देवो भवान् व्रजभयार्तिहरोऽभिजात इति व्यक्तम् इदमसंदिग्धमिति यत्तत्तस्माद्यथा यस्मादिति वा कामाग्नितप्तेषु उभयत्र योज्यम् ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अतः प्रथमतो वेणुगीतेनैव सम्मोहिता तदनु त्वद्रूपं निरीक्ष्य च चरितादेव भ्रान्ताः तदनु त्रैलोक्यसौभगमिदं रूपं च निरीक्ष्य मूर्च्छिताः अतः परमपि त्वया सहोक्तिपराः स्म इतः परं किमस्माकं धैर्य्यं तस्मान्मापरम् आमय प्रसीदेत्युपसंहरन्त्योऽन्या आहुः । व्यक्तं भवानित्यादि । व्रजस्य भयमार्त्तिश्च तद्धरत्वेन भवान्प्रादुर्भूत इत त्वमेव सुरलोकगोप्ता देव आदिपुरुषो यथांऽशरूपेण भवानेव यथा आदिपुरुषत्वेन सुरलोकं गोपायसीत्यर्थः । व्रजे तु स्वयमेवेति भवच्छब्दार्थः अतस्तवाधिक्यं करुणाया भवितुमर्हति यद्वा देवो यथादिपुरुषः सुरलोकगोप्ता प्राप्तः तथा त्वं व्रजभयार्त्तिहर इति तस्मात् नोऽस्माकं किङ्करीणां तप्तस्तनेषु शिरःसु च करपङ्कजं निधेहि हे आर्त्तबन्धो ! व्रजार्त्तिहरत्वेन समुचितमेवास्माकमार्त्तिहरणमित्युपसंहारः ॥ ४१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं भगवदुक्तानां वाक्यानां निवारणार्थं पुष्टिसिद्धान्तं निरूप्य एतद्भगवत्कृपैकसाध्यमिति भगवत्कृपां प्रार्थयन्ति। व्यक्तमिति । नापि त्वदुक्तमस्मदुक्तं वा किञ्चित्साधकं बाधकं वा तथापि स्वावतारप्रयोजनं विचार्य अस्मासु कृपा कर्त्तव्या तत्प्रयोजनमाहुः । भवान् व्रजभयार्त्तिहर एव व्यक्तमभिजातः व्रजस्य आर्त्तिः पीडा भयं च त्वया दूरीकर्त्तव्यम् अन्यथा साक्षाद्भगवतः अवतारे प्रयोजनं न पश्यामः भूभारहरणं तु सङ्कर्षणांशेन वसुदेवादिप्रियं प्रद्युम्नेन धर्मरक्षात्वनिरुद्धेन यदि व्रजभयार्तिनिराकरणं न क्रियेत तदा किमवतारान्तरकार्यं स्यात् अतो व्यक्तं भवान् व्रजभयार्त्तिहरः इदानीं यथार्त्तिरस्माकं तथा न कदापि अस्मदपगमने तु सर्वस्यापि व्रजस्य महती आर्त्तिः अत आर्त्तिनिवृत्तिः कर्त्तव्या ननु मर्यादयैव निवृत्तिकरणमुचितं ननु अमर्यादया तथा सति भवतीनां कामशान्तिः ज्ञानं वा भवत्विति चेत् तत्राहुः । देवो यथादिपुरुष इति । भवान् ब्रह्मरूपः सर्वसमः तथापि इन्द्रादिषु कृपां कुर्वन् दैत्यान्मारयन् विषमतामङ्गीकरोति ननु देवेभ्यो ज्ञानं प्रयच्छति यत्र स्वरूपमेव अन्यथा करोति तत्र वाचमन्यथाकरोतीति किं वक्तव्यम् अतो यथा आदिपुरुषोऽपि देवो भूत्वा सुरलोकगोप्ता जातः तथा भवानपि धर्ममर्यादारक्षकः अस्मत्संबन्धं करोत्विति भावः । तदेव रसपोषणार्थं व्याजेनाहुः । तन्नो निधेहीति । आदावस्माकं शिरसि हस्तं स्थापय यथा अस्माकमभयं भवति ततोऽस्माकं हृदयतापनिवृत्त्यर्थं स्तनेषु च करपङ्कजममृतस्रावि तापनाशकं निधेहि अनौचिती तु नास्ति यतो वयं किङ्कर्यः परीक्षार्थं वा एतत् द्रष्टव्यमिति रसोक्तिः ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तस्मादलं चातुरीप्रपञ्चेन मुञ्चावहित्थमित्याहुः । व्यक्तं नतु कुत्राप्येतदाख्यानं गुप्तमित्यर्थः । किन्तत् भवान् व्रजस्य यत्र्यं दावानलादिभ्यः आर्त्तिः पीडा च वर्षवातादिभ्यस्ते हरतीति सः । व्रजजनार्त्तिहर इत्यपि पाठः । अभि सर्वतोभावेन नन्दगृहे आसीः यथा नारायण इति सर्वलोकैरुद्घुष्यते अद्य यदि शतकोटिसंख्या एता गोप्यो मरिष्यन्ति तदा व्रजजनानामेतत्पित्रादीनामार्त्तिः कथमेकदैवैता वनमध्ये मृता इति भयञ्च भविष्यतीति भावः । तर्हि किमभीप्सितं वस्तत्राहुः । तत्तस्मात् हे आर्त्तबन्धो ! अस्माकं तप्तेषु स्तनेषु करपङ्कजमर्पय । ननु तर्हि मृदुलमेतन्मे ज्वलिष्यतीति तत्राहुः ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किङ्कराणामिति । त्वत्परिचारिकाणामस्माकं तप्तावप्येतौ त्वत्परिचर्यासाधनावेव पङ्कजस्यापि सूर्योदयतापो न तापकः । प्रत्युत सुखद एवेति भावः । शिरःसु चेत्यतः परं वो मृत्यागभयं मास्त्विति ज्ञापयितुम् ॥ ४१ ॥

श्रीजीवगोस्वामिकृता विशुद्धरसदीपिका ।

किञ्च गम्भीराशयस्य नागरशिरोमणेर्भवतोऽभिप्रायं निर्धारयितुं न पारयाम आभीरबाला इति यथा जानीमस्तथाकुर्विति सदैन्यं सानुनयं ब्रुवन्त्य उपसंहरन्ति । व्यक्तमिति । प्रसिद्धं निश्चितमिति यावत् भवानित्यादि तत्र व्रजस्य भयं पूतनादावादिभ्यः आर्तिश्च त्वद्विरहेणेति यथायोगमूह्यं तथा अभिजातस्तु कुलजे बुध इत्यमरकोशात् हे आर्तबन्धो ! इति दैन्यं ततस्तनेष्विति । विरहेणेति शेषः तत्र करपङ्कजमिति तापापनोदनत्वं वस्तुतस्तु अवहित्थया छाद्यमानोऽपि मनोभवोऽस्मत्कुचस्पर्शादुद्भविष्यत्येवेत्यपदेशेन तद्भावोद्घाटनायाहुस्तप्तेति । किञ्च तत्पदेन रसानुगुणं दिव्यप्रदानमपि सूचितं तथा शिरःस्विति सोत्प्रासं कुरु शपथं नास्मासु तवाशक्तिरिति प्रणयोक्तिः यद्येवं कृतेऽपि तव धीरत्वमाकलयामस्तदावधीरयामः प्रेयसीभावमित्याशयेनाहुः किङ्करीणामिति । किं वा दैन्योक्तिः यद्वा नः अस्माकं ततस्तनेषु किङ्करीणां शिरःस्विति यथाक्रमं योज्यं ननु कथमनुचितमाचरेयमिति तत्राहुः आर्तबन्धो ! इति कामेन मानिधेहि कित्वार्तबन्धुत्वेनेत्यर्थः ॥ ४१ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

किञ्चास्तां बहुयोग्यायोग्यविचारो न वयं त्वां प्रतिवक्तुं शक्तास्तथापि त्वया सर्वव्रजभयार्तिहारिणा किं करीणां दुःखापहारः कैमुत्यन्यायेन कर्त्तव्य एवेत्याहुः । व्यक्तमिति । यथा आदिपुरुषो देवो विष्णुः सुरलोकगोप्ता तथा भवान् व्रजे भयार्तिहरोऽभिजात इति व्यक्तमित्यन्वयः । एवं दृष्टान्तकथनेन तेन स्वकृत्ये सुरक्षणे उपेक्षाभाववत्त्वयापि न वयमुपेक्षणीया इति भावः । यद्वा असमर्थस्य सम्भवेदप्युपेक्षा न तु तव समर्थस्येत्याहुः । व्यक्तमिति, । सुरलोकगोप्तादिपुरुषो देवो विष्णुर्यथा समर्थस्तथा भवान् व्रजभयार्तिहरोऽभिजात इति व्यक्तं "नारायणसमो गुणैः,, अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ,, इत्यादिगर्गवचनैः प्रत्यक्षतोऽपि गोवर्द्धनोद्धरणासुरवधादिना व्यक्तं यद्वा सुरलोकगोप्ता विष्णुरेव भवान् सर्वासामादित एव पुरुषः देवो रमणश्च यथेति यथावद्व्रजभयार्तिहरोऽभिजात इति व्यक्तं तथा च स्त्रीणां न उपेक्षायां पुरुषत्वक्षतिः रमणाभावे देवत्वहानिर्व्रजजनानामेव नो भयार्तिहरणाभावे तदर्थं जन्मासाफल्यं तत्रापि तव किङ्करीणां नस्त्वद्विरहतापानिवृत्तौ दीपमूलेऽन्धकारन्यायापातश्चेति ध्येयं तत्तस्मात् हे आर्तबन्धो ! स्वार्तबन्धुकत्वाद्यनुसन्धायास्मद्गुणदोषविचारमुपेक्ष्यानुपेक्ष्या चास्मान् किङ्करीणां नः शिरःसु ततस्तनेषु च करपङ्कजं निधेहि तत्र शिरःसु करधारणेनाभयदानाद्भाविविरहभयनिवर्तनं ततस्तनेषु तापापनोदनकरपङ्कजधारणेन वर्तमानार्तिहरणं तथा शिरःसु करधारणेन भयनिवृत्त्या चिन्ताग्न्युपशमनं स्तनेषु पाणिस्पर्शेन कामविरहाग्न्योर्निर्मूलनं तव करयोः पङ्कजत्वेन तापशमनस्येन्द्रत्वेन रसवृष्ट्या तापनिर्मूलनस्य सम्भावितत्वात् किञ्चार्तिहरणे त्वया गिरिकरधारणं कृतमधुनापि स्तनकनकगिरिकरधारणेनार्तिमपहृत्य शिरः करधारणेनाश्वासय यद्वा नः स्वविरहकामाग्नितापाविश्वासश्चेत्तप्तस्तनेषु करं धृत्वा परीक्ष्य ततस्ततोऽभयं दातुं शिरःसु करं निधेहि यद्वा वृकासुरकरधारणेन शम्भुरक्षा त्वया कृता अधुना तु शम्भुदग्धोऽनङ्गो यातुधानः सन् स्वाग्निना स्तनशम्भून्मूलतो दहति स्वकरधारणेन स्तनशम्भून् रक्ष यद्वा करपङ्कजं ततस्तनेषु निधेहि इति वदने प्रियकरयोस्तापो माभूदिति त्वरितं शिरःस्विति कथनं यद्वा शिरःसु करं धृत्वाश्वासनेन तापोपशमेनातप्तस्तनेषु करपङ्कजं निधेहि यद्वा न आर्तिहरणाय स्तनेषु करधारणे करयोः कामविरहाग्नितापभयं मा कुरु तव करधारणारम्भे करपङ्कजसंनिधानेनैवाग्निद्वयोपशमसम्भवेनातप्तेष्वेव स्तनेषु निर्भयं करपङ्कजं निधेहि यद्वा तथा व्यक्तत्वेऽपि नाहं व्रजभयार्तिहरोऽभिजात एवं वदसि चेत्तर्हि किङ्करीणामिति सम्बन्धद्योतनं तत्र किं कुर्म्मः किंकुर्म इति किं किं कुर्वन्त्यः किंकर्यो दास्यः किमपि रहस्यत्वात्प्रकटयितुमयुक्तं विहारं कुर्वन्त्यः प्रियसख्यः किमपि वाचामगोचरं परमाल्हादं प्रेमसुखं कुर्वन्त्यः परमानन्दघनस्यापि ल्हादजनेनैव तव प्रेमास्पदाल्हादिन्यः शक्तयः किंकर्यस्तासां नः शिरःसु करधारणेन शपथं ततस्तनेषु च करधारणेन दिव्यं च विधेहि यद्वा न मयोपेक्षाभिप्रायेणोक्तं येनैवं प्रार्थना क्रियते किन्तु प्रार्थनयेति चेत्तर्हि किङ्करीणां नः शिरःसु करं निधेहीति शपथं कुरु तेन तव शपथोनस्तुवरो तथा ततस्तनेषु करं धृत्वा दिव्यं कुरु तेन तव दिव्यं नस्तुदिव्यं सुखामित्युभयं सम्पद्येत यद्वा नोपेक्षा चेत्तर्हि तव स्नेहरसपूरितो वेदिस्थापितमणिमुक्ताहारादिसर्वतोभद्रालंकृतकनककुम्भात्मकत्वदाश्वासनगततापस्तनकलशेषु करपङ्कजं निधेहीत्येवं कलशस्थापनपूर्वकं नःशिरःसु करं निधेहि स्वीयत्वेन स्वीकुरु तथा च विधिवत्स्वीकारेण न कदाप्यावयोः शङ्का स्यात् यद्वा शिरःस्विति सामीपे सप्तमी तथा च शिरः समीपे ग्रीवायां करं निधेह्यालिङ्गयेति भावः ॥ ४१ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

अथोत्तरदिग्गताः प्रार्थयन्ते । व्यक्तमिति । आदिपुरुषो देवो भवान् यथा वामनादिरूपेण सुरलोकगोप्ता जातस्तथेदानीं व्रजभयार्त्तिहरोऽभिजातः प्रकटित इत्यस्माकं व्यक्तं विस्पष्टमस्ति ज्ञानं वसुदेवगृहेऽवतीर्णस्य सद्यो व्रजे प्रवेश एव मुख्यमवतारप्रयोजनं जानीमस्तत्र व्रजस्थानां गोपादीनां भयं भगवता नाशितं सम्प्रति तत्रस्थानामस्माकं कामार्त्तिहरणमवशिष्यते तदवतारसार्थक्याय तवावश्यकमिति भावः । ननु तथापि मर्यादयैवाऽऽर्तिहरणंयुक्तमतः कामार्त्तिं ज्ञानेन हरिष्यामीत्याशङ्कानिरासायोक्तं देवः यथादिपुरुषः सर्वकारणभूतस्ततश्च देवासुरादिषु समोऽपीन्द्रादिस्वभक्ताभिलाषानुसारेणोपेन्द्रादिर्देवो भूत्वा दैत्यानां मारणमङ्गीकरोति तथास्मदर्थं गृहीतगोपालविग्रहः स भवान्

॥ श्रीशुक उवाच ॥

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ।
प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

स्मदार्त्तिहरणाय मर्यादोल्लङ्घनमपि करोत्विति भावः । तस्माद्ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति स्वप्रतिज्ञामनुसरेत्याहुः । तदिति । यस्मान्मनोरथानुसारिफलप्रदातृत्वेन भवान्प्रसिद्धस्तस्मान्नोऽस्माकं स्तनेषु कामार्तिनाशाय करपङ्कजं निधेहि तत्र योग्यं सम्बोधनं हे आर्तबन्धो ! शिरःसु च निधेहि कामोपाधिकापीयं भवतीनां भक्तिः शुद्धायामपि तस्यां पर्यवस्यतीत्याश्वासनार्थमिति भावः । यद्वा अस्माकमेव भयार्तिहरणं तवावतारस्य मुख्यं प्रयोजनं तेनास्माकं हृदयतापनिवृत्त्यर्थं स्तनेषु करपङ्कजमस्तु तस्याविलात्तापनाशकं निधेहि संसारभयनिरासाय च शिरःसु तन्निधेहीत्यर्थः । यतो वयं किङ्कर्य्योऽतोऽस्माकं भयार्त्तिनाशनमार्त्तबन्धोस्तव योग्यमेवेत्याहुः । किंकरीणामिति । अनभिज्ञपक्षे तस्मादलं चातुरीनिबन्धनैर्वः स्विलासैःसर्वथाप्यस्मदभिलषितं सम्पादयेत्याहुः । व्यक्तमिति । यथा आदित्याज्जात आदिपुरुषो देवः सुरलोकगोप्ता तथा ब्रजस्य दावादिभयं वातवर्षादिपीडां च हर्तुं ब्रजेश्वर्य्यां भवानभिजातः नारायणसमो गुणैरित्युक्तत्वाच्छुक्तमिदं ननु गुप्तमतोऽस्माकं कामादिभयार्तिहरणमपि स्वव्रतरक्षणायावश्यकमिति भावः । ननु युष्मदङ्गीकारेण युष्मत्पतीनां भयार्तौ भविष्यतस्तद्धरणार्थमभिजातस्य तत्प्रदानमनुचितमित्याशङ्क्य अग्रहणे सत्यस्मन्मरणावश्यंभावादस्मत्पत्यादीनां तत्कृतभयार्त्तिनाशस्यास्मद्ग्रहणं विनासम्भवात् भवतु स्वस्याभीप्सितमवेद्यतामित्यपेक्षायामाहुः । तदिति । यस्मादेवं तस्मात्तेष्वस्माकं स्तनेषु करपङ्कजं निधेहि सम्यक् स्थापय तव हस्तस्य पङ्कजरूपत्वात्सूर्यतापेन कमलस्येव तस्मादस्मत्स्तनतापेन सुखमेव भविष्यतीति व्यङ्ग्यं यतो हे आर्त्तबन्धो ! नोचेदिदं नाम निरर्थकं भविष्यतीति भावः । सदैन्यमाहुः किंकरीणां शिरस्सु च निधेहि इतः परमेतावन्मात्रेणास्मान् दासीकुर्विति भावः । यद्वा शिरःसु करपङ्कजस्थापनेन त्यागभयेन निवर्त्तय यतो वयं किङ्कर्य्यस्त्वञ्चार्तबन्धुस्तस्मादस्माकमार्त्यादिकं त्वन्निबन्धनमन्यन्निमित्तं वा नोपपन्नमिति भावः।यद्वा नास्तीदमनुचितं यतो वयं किंकर्यस्ततः परीक्षार्थं वा तथा कर्त्तव्यमिति रसोक्तिः । मानिनीपक्षे बलात्स्तनादौ हस्तं धर्तुं प्रवृत्तमालक्ष्याहुः । व्यक्तमिति । ब्रजस्य भयार्त्तीहरणाय जातस्त्वमस्माकमुभयसाधने कर्मणि नियोजयितुं नार्हसीति भावः । तस्मात्करपङ्कजं हे आर्तबन्धो ! धर्मभङ्गभयार्त्तिनाशक ! हे तत ! कामं भिनाचितु किंकरीणां दासीनामपि किमुत सतीनामस्माकं शिरस्स्वपि नो निधेहि किमुत स्तनेषु नो निधेहीति यद्वा व्रजभयार्तिहरणायाभिजातस्य तव तद्धारहरणादिना तत्प्रदाननोचितमिति भावः । यद्वा बलात्कारेण यदस्मान्स्पृशसि तर्हि प्राणान्वयं त्यक्ष्यामहतेन सर्वेषां भयार्ती भविष्यतस्तच्च तथा भूतस्य तव नोचितमिति भावः । हे कामार्त ! किङ्करीणामपि स्वदभिलाष रहितानामतस्तेषु स्तनेषु शिरःसु च करपङ्कजं नो निधेहि यद्वा याः वः किङ्कर्य्यस्तासां तास्तस्तनेषु करपङ्कजं निधेहि उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यत इत्युक्तत्वात् स्वागतमित्याद्येतदन्तं प्रकरणं संलापाख्योऽनुभावः । निवृत्तिपक्षे । किञ्च जगत्कारणत्वेन प्रतिपादितो भवान् सर्वाधिष्ठानभूतोऽतः स्वव्यवऽध्यस्तस्य प्रतिपादनं त्वत्प्रतिपादनेमवेत्याशयेमाहुः । भवान् देवः स्वयंप्रकाशचिदानन्दस्वरूपस्तथा च प्रावरणे एको देव इति अत एवादिपुरुषः एकोऽहं बहुस्यामित्यादि जगत्कारणत्वेन प्रतिपादितोऽभिजातः सच्च त्यच्चाभवत् तत्सृष्ट्वा तदेवानुप्राविशदित्यादिना सर्वस्वरूपापन्नत्वेन निरूपितः यथा सुरलोकगोप्ता तथा ब्रजस्य काण्डत्रयात्मकस्य वेदस्य भयार्तिहरोऽपीति व्यक्तं निश्चितं यद्वा यथा आदिपुरुषो देवो भवान् वामनादिरूपेण सुरलोकगोप्ताभिजातस्तथा मत्स्यरूपेण व्रजभयार्तिहरोऽप्यभिजात इति व्यक्तं यद्वा तसद्वादिकृतवेदभयार्तिहरणार्थं कृष्णद्वैपायनादिरूपेण प्रकटित इति व्यक्तमित्यर्थः । यस्मादेवं तत्तस्मात्करपङ्कजं करोतीति व्युत्पत्त्या करशब्देनाज्ञानमुच्यते तल्लक्षणात्पङ्काज्जातमधिकारिवृन्तः करणं नोऽस्माकं श्रुतीनां शिरःसु शिरोभागेषु वेदान्तेषु निधेहि तद्विचारार्थं प्रवर्त्तय यथा तासस्तनेषु ब्रह्मपरत्वेन प्रतिपादनेन तत्सेषु स्तनस्थानीयेषु कर्मोपासनद्वारा ब्रह्मपरभागेषु च निधेहि वेदैश्च सर्वैरहमेववेद्य इत्यादिप्ररणेनेति भावः । यतो वयं सर्वा अपि भवत्किंकर्य्यः त्वय्येव तात्पर्यवत्यो भवांश्चार्त्तबन्धुस्तत्तद्वादिभिरसुरैश्च दत्तपीडानामस्माकं संसारिणां मुमुक्षूणां च बन्धुरतो योग्यमिदमिति संबोधनाशयः ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आदिपुरुषो भवान् अभिजात इति व्यक्तं सुनिश्चितम् ॥ ४१ ॥

भाषा टीका ।

हे प्यारे ! यह बात हमे खबर हैं कि जैसे आदि पुरुष नारायण वामन रूप से देवलोक की रक्षा कर वे को प्रकट भये हे तैसे ही आप भी या व्रज की रक्षा करवे भय के नाश करवे को आये हो तव आपकी रक्षा करके को समय यही है या समय हम आपको दासी प्राणांत कष्ट मे पडी हैं सो हे आर्तबन्धो ! पहिले तो हमारे सब के स्तनों पर हस्त कमल स्थापन करके हमारी कामाग्नी को बुझाओ फिर हमको संसार दुःख से छुटावे को हमारे मस्तकों पर भी हस्त कमल को स्थापन करो तो व्रज की रक्षा होवेगी नहीं तो नहीं ॥ ४१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विक्लवितं वैक्लव्यं गोपीररीरमत् रमयामास ॥ ४२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

"श्रीगोपीप्रियपादाब्जप्रसादरमितात्मभिः । यथारुत्यन्यथा प्यत्र कुतोऽर्थः स्यात्पदेपदे । अन्योऽन्यं तस्य तासां च वाचो ऽर्थोऽन्योऽन्यमेवहि । इत्येयोऽप्यंघ्रिया धाष्टर्याल्लिखितःप्रीतये सतां इत्थं च पूर्वमङ्गसङ्गो नूतं न वृत्तोऽस्तीति गम्यते अन्यथा तस्य तासां च तत्तदुक्त्यनुपपत्तिः अतएव श्रीमुक्ताफलग्रन्थकारादिभिः पूर्वसर्गे एकविंशाध्यायोक्तमक्षण्वतां फलमित्यादिकं संगृहीतम् अत एव श्रीस्वामिपादैरपि व्याख्यातं त्वयाभिरमिता आनन्दिता इति मुख्यार्थत्वेऽपि श्रीवल्लभभट्टपादादिभिः स्वप्नादाविति व्याख्यातं तत्तच्च लिखितमेव एवं पञ्चदशे तं गोरजच्छुरितमित्यादिपद्यद्वयम् ऊनविंशे गोपीनां परमानन्द इति पद्यम् अन्यच्चान्यत्रत्यं तादृशं तत्रैवोह्यं यद्वा अङ्गसङ्गः पूर्वमपि सकृत् द्वित्रवारान् वा तदेकरसिकत्वाद्वृत्तोऽस्त्येव एवं सति अभिरमिता इति मुख्यार्थ एव अधुना चासकृत्तदाचरणे रासविलासविशेषे वा तस्य तासां च तात्पर्युक्तिर्मन्तव्या यद्वा परमप्रेममधुररसमग्नमनसां तासां यद्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवं पदे पदे इत्यादिन्यायेनासकृत् कृतमपि परममधुरवस्तुनस्तादृशस्वभावात् सदा नूतनमिव मन्यमानानां तथा तादृशस्यैव रसिकशिरोमणेस्तस्यापि तत्तदुक्तिर्घटतैव ततश्चाभिरमिता इत्यस्य श्रीस्वामिपादकृतव्याख्यासंगच्छतेव एतच्च श्रीभागवतामृतोत्तरखण्डे विवृतमेवास्ति इति एतत् विक्लवितं वैकल्योक्तं वाचामुभयकोटिस्पर्शादुभयत्र संगतं सदयं प्रकर्षेण हसित्वेति हासो जनोन्मादकरी हि मायेत्युक्तवञ्चना निरस्ता तद्दिष्टयैव ताभिः प्रतिपादनात् यद्वा सदयं स्वहस्तेन तासामश्रुमार्जनादिपूर्वकमरीरमत् इति तत्रौदासीन्यं निरस्तं प्रीतिश्च दर्शिता यतो गोपीः प्रेमविशेषेण तादृशलीलाप्रसादयोग्या इत्यर्थः । हासस्तु निजाभिप्रायाज्ञानेन तासां वैकल्योक्तेः तेन निजावहित्थासार्थकत्वाच्च यद्वा प्रतिवचनेन प्रहर्षोदयात् शुद्धभावेन हसित्वा किंवा तासां तदुक्त्यावहित्थापगमेन मधुरभावविशेषोदयात् हासोऽपि शृङ्गारस्य व्यभिचारी ननु परस्परमासक्त्या वैदग्धीप्रकटनेन रतिः संपद्यते तच्च तस्यात्मारामत्ववादिना न घटते तत्राह - योगः चित्तैकाग्रता तस्येश्वरा वशीकृतयोगाः सनकादयस्तेषामीश्वरोऽपि आत्मारामोऽपीति विचित्रवैदग्धीप्रकटनेन योगनिष्ठा आत्मारामता च तदानीं न स्थितेत्यर्थः । पूर्ववत् विक्लवितेन योगेश्वरेश्वरता रमणेन चात्मारामता अपगतेति विवेचनीयम् अन्यथा तच्छ्रवणरमणासंभवः श्रीगोत्यनेनैकोऽपि बहुरूपः सन्निव पृथक् पृथक् युगपद्रमयामासेति सूचितमन्यत्तुल्यम् ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इति निजोक्तिवदुभयार्थस्पर्शात्मकमेतद्विक्लवितं प्रेमवैक्लव्यमयशैथवैन्योक्तं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः । ततः प्रहस्य परिहासेऽपि तासां वैकल्यविशेषोदयात् ततो निजाभीष्टश्रवणसिद्धेस्तत्रापि स्ववचनसदृशप्रतिवचनसौष्ठवात्ततोऽवहित्थापगमेन रत्याख्यभावोदयाच्च । प्रकर्षेण चेतोविकासिरूपतया रसशास्त्रप्रसिद्धमुखप्रसादानुभावं भावविशेषं लब्ध्वेत्यर्थः । तदेव च सप्रेमदैन्यवचनं श्रुत्वा सदयं चिन्तान्वितासहितं यथा स्यात्तथा गोपीररीरमत् । रन्तुं स्वयमेव प्रयोजयामास अत्याग्रहश्चकार इत्यर्थः । एवं तस्यैव च तत्रेच्छावैशिष्ट्यं लक्ष्यते । समानमपि क्रीडतसु वालकेषु प्रयोजकवालकस्यैवेति भावः । अत एव परस्मैपदम् "अणावकर्मकाच्चित्तवत्कर्तृकादिति कर्त्रभिप्राये तद्विधानात् । ननु किमेतदाश्चर्यं नागरेषु तत्राह । आत्मारामोऽपि । अहो तासां प्रेमगुणप्राबल्यं यतः आत्मारामाश्च मुनय इत्यादौ हरिगुणेनात्मारामगण इव तेन सोऽप्यात्मवशीचक्रे इति भावः । अतएवापिशब्दः सार्थकः स्यादन्यथा तु प्रत्युत विरुद्ध एव यद्यपि नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विनेति सामान्यभक्तपरमप्यस्ति वचनं तथाप्यत्र वैशिष्ट्यविवक्षया तथोक्तमिति न पौनरुक्त्यवैयर्थ्यम् । ननु कथमेकः सखसंख्या रमयामास तत्राह । योगेश्वरेश्वर इति । योगेश्वरा अपि कायव्यूहादिकं विधाय युगपन्नाना कृत्यं विधातुं शक्नुवन्ति सतु तेषामपीश्वरत्वेनाचिन्त्यस्वाभाविकशक्तित्वात्तदादिकं विनापि शक्नोतीति । वक्ष्यते च श्रीनारदेन । चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदिति भावः । गोपीशब्देन तत्तन्महाप्रसिद्धं तासां तदीयनित्यवल्लभात्वं स्मारयित्वा तत्रापि नातिविचयं सूचयतीति ॥ ४२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं तासां विक्लवितं परवश्यप्रलपितमाकर्ण्य योगेश्वरेश्वरोऽप्यात्मारामोऽपि गोपीररीरमत् रमयामास आत्मारामत्वाद्विषयविमुखोऽप्याश्रितहरस्वभावत्वात्ताभिः सह रेमे इत्यर्थः ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विक्लवं चिन्ता कामार्तवचनं न्यरीरमत् नितरां रमयामास ॥४२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति पूर्वोक्तप्रकारेण विक्लवितं प्रेमवैवश्यवचः श्रुत्वा योगेश्वरेश्वर इति । तत्तदलौकिककर्मसमाधायकाचिन्त्यशक्तिरित्यर्थः । आत्मारामोऽपीति तासां प्रेमगुणप्राबल्यम् आत्मारामाश्च मुनय इतिवत् । अरीरमत् रन्तुं प्रयोजयामासेति तस्यैव तत्रासक्तिर्मुख्या दर्शिता । क्रीडतसु वालकेषु प्रयोजकवालकस्येव ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तदनन्तरं यदभूत् तत् श्रीशुकाचार्य्यः प्रकटयति इति इत्यादि योगेश्वरेश्वरोऽपि आत्मारामोऽपि आत्मनि स्वसुखे आरमत इत्यात्मारामः तथाभूतोऽपि प्रहस्येत्यस्य कोऽर्थः मम योगेश्वरेश्वरता आत्मारामता च गलितेति प्रहासं कृत्वा अरीरमत् ननु

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

रेमेऽउक्तप्रकारेण स्वाधिकरणकेश्वरताज्ञाननिरासपूर्वकं सङ्कोचाभावेन यथा स्त्रि सर्वा एव मया सह रमन्तामिति णिच्प्रत्ययमहिमा ॥ ४२ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं प्रार्थनायां भगवान् यत्कृतवान् तदाह । इतीति—

षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयम् ।
स्वरूपेणापि शृङ्गारो द्विविधोऽपि निरूपितः ॥
सामान्यरमणं पूर्वं विशेषे मेलनं पुरा ।
वाह्येन रमणं पश्चादान्तरं च ततः परम् ॥
ततो नानाविलासेन जातकेलिविभेदतः ।
विप्रलम्भस्य सिद्ध्यर्थं तासां मान उदीर्यते ॥
तिरोभावस्ततश्चापि नायं लौकिककामुकः ।

प्रथमं तासां पापनोदार्थं सामान्यलीलामाह । इतीति । तासां विक्लवितं परमवैक्लव्यभाषितं श्रुत्वा प्रहस्य अरीरमत् ननु निरिन्द्रियः कथं रेमे तत्राह । योगेश्वराणामपीश्वर इति । योगादिषु सर्वे पदार्थाः स्फुरन्ति अणिमादयोऽपि तथा तदेव स्वरूपमेवेन्द्रियादिभावेन प्रकटीकृतवान् नतु स्वस्य कामेन तथा सति वीजनिवृत्तौ कामो निवर्त्तेत तासां यथा न कदाचिदपि स भावो गच्छति तदर्थं प्रहस्य प्रकर्षेण हास्यं कृत्वा तासामुद्धारार्थं नतु भिन्नगणनया मर्यादायां पातयित्वा नाशार्थमिति तदाह । सदयमिति । गोपीरेवारमयत् स्वयं त्वात्माराम एव—

क्रियासर्वापि सैवात्र परं कामो न विद्यते ।
तासां कामस्य-सम्पूर्त्तिर्निष्कामेनेति तास्तथा ॥
कामेन पूरितः कामः संसारं जनयेत् स्फुटः ।
कामाभावेन पूर्णस्तु निष्कामः स्यान्न संशयः ॥
अतो न कापि मर्यादाभग्नामोक्षफलापि च ।
अत एतच्छ्रुतौ लोको निष्कामः सर्वथा भवेत् ॥
भगवच्चरितं सर्वं यतो निष्काममीर्यते ।
अतः कामस्य नोद्बोधस्ततः शुकवचः स्फुटम् ॥

आत्मारामस्य आत्मनैव रमणं व्यावर्त्तयितुमपिशब्दःअरीरमत् बहुधा रेमे उत्तरोत्तररसाधिक्यं च प्रकटितवान् ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विक्लवितं वैक्लव्यव्यञ्जकं वाक्यं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः । प्रहस्य अहो भाववत्यो यूयं प्रतिदिनमेव मिलनसमये वाम्यमपारं कुरुध्वे एव । अहन्त्वेकस्मिन्नेव दिने अद्यैवावहित्थया यत् किञ्चिद्वाम्यमकरवं तदपि दाक्षिण्यगर्भमेव । तेनाप्येतावद्वैक्लव्यवत्यो लज्जायाः श्राद्धं कृतवत्यो मां हासयध्वे । तस्मात् युष्मत्प्रात्याहिकावहित्था स्थिन्धुलुकीकरणचुञ्चुना मयैव जितास्थ भोः सुबुद्धिशेखरम्मन्याः जितास्थ तत् स्वयमेवागत्य प्रतिवन्धकलज्जाधृत्याद्यभावान्मत्कण्ठे कनकमणिमालायिता भूत्वा स्वाधरसुधाः पायय चिरादुद्भूतमहातृष्णोऽस्मीति परिहस्य सन् अयः शुभावहो विधिर्यत्र तत् सस्नेहं वा यथा स्यात्तथा आत्मारामोऽपि ता गोपस्त्रीः रमयामास इत्थम्भूतप्रेमाणो गोपस्त्रिय इति । आत्मारामाश्च मुनय इति पद्ये इत्थंभूतगुणो हरिरितिवत् गोपीनां तदीयस्वरूपभूतह्लादिनीशक्तिवृत्तित्वात् ता अप्यात्मान इत्यात्मभूताभिस्ताभी रमणं सम्भवत्येव यद्यपि नच सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवानिति नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विनेत्यादि भगवदुक्तेस्तस्य स्वात्मतोऽपि भक्तानामानन्दप्रदत्वाधिक्यावगमादासाञ्च गोपीनां सर्वभक्तशिरोमणित्वादात्मारामस्यापि तस्यानन्दाधिक्यार्थमेवैताभी रमणमिति ज्ञेयम् । ननु प्रमदाशतकोटिभिराकुलित इति क्रमदीपिकाद्यागमदृष्ट्या शतकोटिसंख्याभिस्ताभिरेकत्रैव एकदैव एकस्य तस्य रमणं नोपपद्यते तत्राह । योगिनः सौभर्यादयः योगेश्वरा रुद्रादयस्तेषामपीश्वर इति सौभर्यादयः कायव्यूहं कृत्वैव रमन्ते कृष्णस्त्वतक्यचारतस्तं विना । यद्वक्ष्यते चित्रं वतैतदेकेन वपुषेत्यादीति ॥ ४२ ॥

केनचित्कृता विशुद्धरसदीपिका ।

इति एवं प्रकारं वक्तुमशक्यत्वादतिदेशः यद्वा इति अलमधिकोऽत्यर्थः विक्लिवितं प्रेमवैकल्यमयरोषदैन्योक्तं पारवश्यप्रलपितं यद्वा विगतं कातरत्वं, यस्मात्तत् उदारं वचः शुद्धसख्योद्गारमयत्वादिति भावः। तासामिति । प्रेयसीनां सखीनामिति यथास्वमूह्यं श्रुत्वा प्रहस्येति निन्हवः किं भवतीभिस्तथ्यमिति ज्ञातं मया तूपहासः कृतः इति भावः । एवं सरलस्वभावाः सदयं यथा स्यात्त था नत्वासक्त्येतिभावः । तर्हि आसक्त्या कुत्र रमत इत्यत आह । आत्माराम इति । परमप्रेमास्पदत्वादात्मनि श्रीराधायामेव रामो रमणं यस्य सः तदुक्तं स्कान्दे श्रीभागवतमाहात्म्ये—

आत्मा तु राधिका तस्य तयैव रमणादसौ ।
आत्माराम इति प्राज्ञैरुच्यते गूढवेदिभिः इति ॥

तथा भूतः सन् गोपीरपि अरीरमत् परस्मैपदप्रयोगेण तन्मनोरथपूरणायैव नत्वासक्त्येति सूचितं ननु तर्हि पक्षतटस्थादिना विषमस्वभावा एकत्र मिलिताः कथमेको रमयामास तथा सति कथं वात्माराम इति तत्राह । योगेश्वरेश्वर इति । अत्र द्वितीयेनेश्वरपदेन कायव्यूहशङ्कापरास्ता ततश्चानन्यसाधारणेन प्रकाशभेदेनारीरमदित्यर्थः एवं च—

चित्रं वतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥

इत्यादिषु प्रदर्शितात्प्रकारभेदादपि वैशिष्ट्यं दर्शितं तत्र हि पृथक् गृहेष्वित्युक्तेर्देशभेदः नात्र सः इति योगेश्वरपदेन च कामाद्यनासक्तिः स्पष्टैव तादृशत्वेऽपि रमणं प्राणप्रियायाः सादृश्यभ्रमेणेति दर्शयिष्यामः ॥ ४२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं भगवान् शुकः स्वयं भगवता गृहगमनपतिपुत्राद्यनु

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ।
उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥४३॥

श्रीरामनारायणकृतभावभावविभाविका ।

स्वतिप्रवृत्त्युपदेशेऽपि प्रेमिणां तदङ्गीकारेण भगवदेकपरत्वं प्रेम यथा चार्यगोपी चरितेन दर्शयित्वा स्वाज्ञोल्लङ्घनेऽपि भगवतः कृपया तत्पारवश्यं तत्पारवश्येऽप्यात्मारामत्वमेवाह । इति विक्लवितमिति । तासामतिविलक्षणप्रेमवतीनां स्वानुगृहीतानां प्राणप्रियांशानुगतानां स्ववाक्यदाक्षिण्यार्थावबोधेऽप्युपेक्षाभासमात्रेणेत्येवं विक्लवितं खेदवाक्यं श्रुत्वा अहो आसां स्वभावसरलत्वमिति प्रहस्य ननु किमुपहसनीयतया तासां नेत्याह । सदयमिति । करुणान्वितं यथा भवति तथा ता गोपीररीरमत् नन्वात्मारामस्य कथमन्यत्र रमणं तत्राह । आत्मारामोऽपीति । तस्य सामान्यतः सर्वात्मत्वात्सर्वत्र रमणेऽपि तदात्मारामत्वाक्षतेर्विशेषतो लीलाधामनि सर्वस्याप्यविवर्तितदात्मतया नात्मारामत्वे शङ्कास्पदं तत्रापि "आत्मा तु राधिका तस्येति वचनात्तदंशानुगतासु रमणे न शङ्कागन्धोऽपि किञ्च रमणस्य सुखैकगोचरत्वेन सुखमात्रस्य तु "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या तन्मात्रत्वेन तत्र रमणेऽप्यात्मारामत्वमेव किञ्च कैमुत्यन्यायेनापि तदात्मारामत्वमाह । योगेश्वरेश्वर इति । "यक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरं गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते,, इत्यादश्रुतिस्मृतिभिर्जीवन्मुक्तानां स्वसाधनतदनुग्रहसिद्धानां योगेश्वराणामपि प्राकृतविषयोपभोगेऽपि तदनुग्रहोद्भूतज्ञानमाहात्म्यादात्मारामत्वक्षतिस्तदा किमु वाच्यं तदीश्वरस्य तज्ज्ञानप्रदस्य स्वतो नित्यसिद्धबोधस्य यद्वा योगेश्वरेश्वर इत्यस्यायं भावः योगेश्वराः कामजयमिच्छन्तोऽपि सङ्गभीता रतिरणाविमुखा इन्द्रियनिरोधेनात्मरक्षामात्रं कुर्वन्ति कृष्णस्तु योगेश्वरेश्वरः अपरिमितमदनकामगकाञ्चनदुर्गात्मकगोपीतनुषु रतिरणं सम्पाद्य स्वात्मन्यवक्रसौख्यत्वेन कामविजयमिच्छन्नात्मारामोऽप्यरीरमत् ॥ ४२ ॥

श्रीधनपतिशूरिकृतभागवतगूढार्थदीपिका ।

ततः किं कृतमित्यपेक्षायामाह । इति इत्युक्तप्रकारेण तासां त्रिविधानां गोपाङ्गनानां विक्लवितं प्रेमपारवश्यप्रलपितं प्रार्थनोपालम्भनिषेधरूपं भाषितं श्रुत्वा तच्छ्रवणाभिलाषं पूरयित्वा प्रहस्य परिहासेनापि वैकल्यमुत्पाद्य यद्वा सुष्ठूक्तं भवतीभिरित्यपि तदुक्तानुमोदनेन रताख्यभावव्यञ्जनाय प्रकर्षेण हसित्वा यद्वा प्रहासेनाभिज्ञाः प्रति युष्मदिच्छया प्रीत्यात्यर्थमहं प्रसन्नोऽस्मीति अनभिज्ञाः प्रति अहो अद्यैकस्मिन्नेव दिने मया गृहीतेनावहित्थाभावेन ता भवत्यो लज्जायाः श्राद्धं कृतवत्य इति मानिनीः प्रति अहो अति कठिनाः भवत्यो जितं युष्माभिरिति सूचयित्वा सदयं यथा भवति तथा गोपीररीरमत् रमयामास अभिज्ञापक्षे सदयं सकरुणम् अनभिज्ञापक्षे सत्यमाह मानिनीपक्षे सत् अथ शुभावहो-त्रिविधैव तत् गोपीः अरमयदित्यनेन तत्तन्मनोरथानुसारेण भगवान् प्रेष्ठ आसक्त इत्येवं प्रतीतः सन् रमयामास स्वयं त्वसङ्ग एवेति सूचितं पूर्णकामस्य सङ्गनिर्विकारस्य परमात्मनो रमणे दयैव हेतुर्न कामेनेति बोधनाय सदयमित्युक्तम् आत्मारामोऽपीत्याश्चर्य्यबोधनाय अहो तासां प्रेमप्राबल्यं सनकाद्यात्मारामगणवशीकरणगुणगणोऽपि स्वयमात्मारामोऽपि ताभिर्वशीकृत इति ननु आत्मनि आरामः क्रीडा यस्य तस्य निरिन्द्रियस्यासङ्गस्य एकस्यासंख्याताभिः कथं रमणं सम्भवतीत्याशङ्क्याह । योगेश्वरेश्वर इति । योगिनस्सौभर्य्यादयः तेषामीश्वरस्तथाऽघटितघटनासमर्थोऽज्ञजनप्रतीत्यनुसारेण प्रपञ्चभानवत्प्रतीत्यनुरोधेन रमणोपकरणभानस्याऽप्यविरुद्धत्वादिति भावः । यद्वा अरीरमदपि वस्तुत आत्माराम एव यतः योगेश्वरेश्वरः यद्वा ताभिः रममाणोऽप्यात्मरूपाभिस्ताभिरारामः क्रीडा यस्येति न तस्य लौकिकं रमणमिति भावः । निवृत्तिपक्षे इति मिथोक्तिप्रकारेण तासां श्रुतीनां सदैन्यं प्रार्थितं श्रुत्वा प्रहस्य प्रसन्नो भूत्वा सदयं यथा स्यात्तथा आत्मारामोऽपि स्वप्रकाशचिदानन्दस्वरूपत्वात्प्रमाणप्रवृत्त्ययोग्योऽपि गोपीः श्रुतीररीरमत् अतन्निरसनद्वारा तद्विषयतामगच्छत् यतो योगेश्वरस्य सकलसम्बन्धघटनसमर्थस्याव्याकृतस्य मायादिशब्दप्रतिपाद्यस्येश्वरस्तथा च जगज्जन्मादिकारणत्वप्रतिपादनेन श्रुतयो मयि पर्य्यवस्यन्तीत्यधिकारिचेतसि दृढतरं निश्चयमुत्पादितवानिति भावः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विक्लवितं पारवश्यं प्रलपितं श्रुत्वा आत्मारामोऽपि निजानन्दपूर्णोऽपि गोपीररीरमत् रमयामास ॥ ४२ ॥

भाषा टीका

श्रीशुकदेव जी बोले सब योगीश्वरों के ईश्वर श्रीकृष्णचन्द्रजी इस प्रकार से उन गोपियों की अति दीनता वचन सुनकर फिर हंस कर बड़ी दया से युक्त हो कर आप आत्माराम होने पर भी गोपियों को रमण कराते भये ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः उदारहासश्च द्विजाश्च तेषु कुन्दकुसुमवद्दीधितिर्यस्य सः एणाङ्कश्चन्द्रः ॥ ४३—४५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

रमणप्रकारमेव ताभिरित्यादिभिश्चतुर्भिर्वर्णयन् आदौ ताभिः सह प्रेमसङ्गमेन तस्यापि शोभाविशेषं सदृष्टान्तमाह । ताभिरिति । समेताभिः अत्यन्तान्तिकं गताभिः यद्वा प्रणयकोपपरित्यागेन मिलिताभिः यद्वा मा शोभा परमसौन्दर्य्यं तया सह वर्तते समा

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

परमसुन्दरी श्रीराधा तया इताभिः प्राप्ताभिः एतेन प्रथमसुक्तिप्रत्युक्तिसमये तासां मध्ये श्रीराधानासीत् किंतु कृष्णस्यावहित्थापगमे जात एव सा मिलितेति ताभिर्वृतः परितो वेष्टितः सन् अच्युतः कामादिभिरनिर्जितोऽपि तथा च विश्वः अनिर्जितेऽच्युतस्त्विति यद्वा कथमपि कस्याश्चिच्छोभाया न च्युत इत्यच्युतोऽपि यद्वा रसप्रसरात् कथमपि न च्यवते इत्यशेषरस पूर्णतोक्ता अत एव विशेषेणारोचत अशोभत समेतत्वे हेतुः उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखप्रदानि वा चेष्टितानि स्पर्शनपुष्पाद्यर्पणकटाक्षादिरूपाणि यस्य सः यद्वा प्रहस्येति पूर्वोक्तो हेतुस्तत्र विराजत एव यद्वा प्रहस्यारीरमत् रञ्जयामास हेते रागात्मकत्वात् तथाच विश्वः रतिः स्मरप्रियायां च रागे च सुरते रतिरिति अयमेव सङ्गतौ हेतुः ततश्च उदारचेष्टित इति वक्ष्यमाणरमणोपकरणं विरोचनकारणं च ज्ञेयम् अत एव प्रियस्य ईक्षणं स्वकर्तृकं तत्कर्तृकं वा एवं शक्तिविशेषैश्वर्य्यमपि दर्शितं परितो वर्त्तमानास्ताः प्रतिसाम्येन युगपदीक्षणात् उत्फुल्लशब्देन मुखस्य कमलत्वमीक्षणस्य भास्करत्वं व्यञ्जितम् एवं तासां रसविशेषप्रकाश उक्तः तस्यापि तमाह । उदारे हासे द्विजेषु च कुन्दपुष्पवद्दीधितिर्यस्य सः एवं हासस्य च शुभ्रकान्तिरुक्ता यद्वा उदारहासे द्विजकुन्दानां दीधितिर्यस्य यद्वा उदारो हासो यया सा द्विजकुन्ददीधितिर्यस्य इतिश्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ता स्वतः परम काष्ठाप्राप्तस्य नित्यशोभामयस्यापि ताभिः शोभाविशेषं दृष्टान्तेन साधयति । एणाङ्क इति । पूर्णचन्द्रस्ताराभिः सर्वतो विराजमानाभिः सतीभिर्वृतः सन् यथा विरोचते तद्वदिति एवं ताभिः सह तस्यान्योऽन्यं शोभनत्वं प्रेष्ठत्वं नित्यसाहित्यं च सूचितम् ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रमणप्रकारमेव ताभिरित्यादिभिश्चतुर्भिर्वर्णयन् तत्प्रयोजककर्तृताञ्च दर्शयन्नादौ ताभिः सह प्रेमसङ्गमेन तस्यापि शोभाविशेषं सदृष्टान्तमाह । ताभिरिति । समेताभिः स्वयमेव श्रीकृष्णेन कर्त्री समागताभिः अरीरमदित्युक्तेः ततस्ताभिस्तादृशीभिर्वृतः परितो वेष्टितः सन् व्यरोचत विशेषेणाशोभत तत्राप्यच्युतः सर्वाभिः प्रत्येकमपि सङ्गमे च्युतिरहितः सन् अत एव उदारचेष्टितः उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखप्रदानि वा चेष्टितानि स्पर्शनपुष्पाद्यर्पणकटाक्षादिरूपाणि यस्य सः । अत एव प्रियस्य वीक्षणं स्वकर्तृकं तत्कर्तृकं वा ज्ञेयम् । उत्फुल्लशब्देन मुखस्य कमलत्वं व्यञ्जितं तदीक्षणे तदन्तःकरणतमोऽपगमेन तदीयविवसता प्राप्तेरिति भावः । एवं तासां रसविशेष उक्तः । तस्यापि तमाह । उदारो हासो यया सा । द्विजकुन्ददीधितिर्यस्येति श्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ता । स्वतः परमकाष्ठाप्राप्तनित्यशोभामयस्यापि ताभिः शोभाविशेषं दृष्टान्तेन साधयति । एणाङ्क इति । चन्द्रस्य पूर्णत्व—एणाङ्कस्यैणाकारत्वेनोपलम्भादेणाङ्कः पूर्णचन्द्रस्ताराभिः सर्वतो विराजमानाभिः सतीभिर्वृतः सन् यथा विरोचते तद्वदिति एवं ताभिः सह तस्यान्योऽन्यं शोभनत्वं प्रेष्ठत्वं नित्यसाहित्यं तासां तत स्तन्वीत्वं च सूचितम् ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव प्रपञ्चयति । ताभिरित्यादिना । प्रियस्य स्वस्येक्षणेन उत्फुल्लानि मुखानि यासां ताभिः सङ्गताभिः गोपीभिः सहाच्युतः उदारहासश्च । द्विजा दन्तास्त एव कुन्दकुसुमवद्दीधितिर्यस्य तथाभूतो व्यरोचत रराज उडुभिर्वृतश्चन्द्र इव ॥ ४३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समेताभिः मिलिताभिः उदार उत्कृष्टः हासः द्विजा दन्ताः कुन्दा मल्लिका आसां दीधितिः कान्तिर्यस्य सः द्विजा एव कुन्दाः द्विजकुन्दाः उदारहासेन विवृतानां द्विजकुन्दानां दीधितिर्यस्य स इति वा एणाङ्कश्चन्द्रः एणः कुरङ्गो हरिण इति हलायुधः ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रयोजकत्वमेवाह । ताभिरिति चतुर्भिः । समेताभिः श्रीकृष्णेनैव कर्त्री सङ्गताभिः । उपगीयमानः तदीयस्वरतालाद्यनुरूपेण तन्नामगानेनोपगायकरीत्या गीयमानः । तदुक्तं विष्णुपुराणे । —

कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् ।
जगौ गोपीजनस्त्वेकं कृष्ण नाम पुनः पुनरिति ॥ ४३ ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्प्रकारमाह । ताभिरित्यादिना । समेताभिः सह मिलिताभिर्वृतोऽतोरराज उदारं उचेष्टितं लीला यस्य ताभिः कीदृशीभिः प्रियेक्षणं प्रियकर्तृकं प्रियकर्मकं वा यद्दर्शनं तेनोत्फुल्लानि मुखानि यासां उत् उत्कृष्ट आरः प्रसरणं यस्य स चासौ हासश्चेति तथा तस्मिन् द्विजकुन्दानां दीधितिर्यस्य कः काभिरिव एणाङ्कश्चन्द्र उडुभिरिव स कीदृशः उदारमूर्ध्वमियर्तीति उदारं चेष्टितं यस्य प्रियेति तुल्यम् अच्युतः अनेकरात्रिव्यापी उदारो महान् यो हासः प्रकाशः तेन द्विजानां कुन्दानाञ्च दीधितिरिव दीधितिर्यस्य उडु वा स्त्रियमिति स्त्रीलिङ्गविशेषणम् ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं सामान्यलीलामुक्त्वा विशेषलीलामाह । ताभिरिति त्रिभिः । अजातस्मरकेलिभिः प्रथमतः ताभिः समेतो जातः मिलितः पूर्वं भयात् पृथक् स्थिताः ततः उदाराणि चेष्टितानि यस्य अत्र औदार्यं रसविषयकं यथा तासां मदमेव रस आविर्भवति तथा कामशास्त्रसिद्धा लीलाः सर्वा एव कृतवान् ततस्ता अन्तः पूर्णरसाः प्रियस्य भगवत ईक्षणार्थमुत्फुल्लानि मुखानि यासां

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तादृश्यो जाताः प्रियेक्षणेन वा सूर्यकिरणैरिव उत्फुल्लानि मुखानि वस्तुतो लोभस्थितरसार्थमेव तथा करणम् एतावति कृते रसो निवर्त्तते तदभावायाह । अच्युत इति । तासामपि रससमाप्त्यभावाय उदारो यो हासः पूर्णकामप्रदः कामार्थमेव यो मोहस्तेनैव स्नेहः सम्वर्द्धितस्तदाह । हाससहिता ये द्विजाः त एव कुन्दपुष्पाणि आरक्तान्यपि हासेन शुभ्राणि तेषु दीधितिर्यस्य कुन्दत्वं स्नेहस्यैतन्मात्रपर्यवसानार्थं पूर्वं निरुपाधिरेव स्नेहः स्थितो भगवता परं रसशास्त्रोक्तरीत्या स्वरूपानन्दं दातुं तत्सजातीयः कामोपाधिकः स्नेहोऽधुना जनित इति ज्ञापनाय स्नेहरूपरदानां द्विजपदेन कथनं तथा सति फलभोगात् कान्त्यभावमाशङ्क्य तत्र दीधितिरुक्ता यद्यपि भगवान् तन्निर्वन्धेन रेमे जगद्दोषनिराकरणार्थं च न तु स्वयं तथापि न पूर्णमनोरथ इव किन्तु यथा लौकिकः तदाह । दृष्टान्तेन एणाङ्क उडुभिर्नक्षत्रैः सह तथा व्यरोचतेति बन्धातिरिक्ताः सर्वा बाह्या एव लीला उक्ताः एषा विशेषतः प्रथमलीला बाधककामनिवारिका ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उदारं तासां रतिसुखप्रदं भावभक्तानां तच्छ्रवणाद्यैः प्रेमप्रदं च चेष्टितं लीला यस्य सः अच्युतः युगपदेव तत्प्रत्येकं रमणनिष्ठाच्युतिरहितः उदारैस्तासां सुखप्रदैर्महद्भिर्वा हासैर्द्विजानां दन्तानां कुन्दानामिव प्रकाशिता दीधितिर्यस्य सः ॥ ४३ ॥

केनचित्कृता विशुद्धरसदीपिका ।

इदानीं ताभिः समेतस्य भगवतः सुषमाविशेषं दर्शयति । ताभिरिति । अनिर्वचनीयप्रेमवतीभिः आत्मभूतायाः प्रतिविम्बरूपाभिर्वा तत्सहचरीभिर्वा समेताभिः स्वयमेव भगवतैव वाचः पेशैरेकमत्यं प्रापिताभिः तथा स्वयमपि उदारेति उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखमयानि वा चेष्टितानि यस्य सः तानि चाङ्गस्पर्शनपुष्पाद्यर्पणकटाक्षादीनि किम्वा वक्ष्यमाणानि वाहुप्रसारेत्यादीनि वस्तुतस्तु प्राणप्रियायाः स्वाधीनपतिकायाः श्रीराधिकाया अनुग्राह्यत्वाभिमानेन तासु समेतासु चानुग्रहमयानि चेष्टितानि यस्य सः अत एव अच्युतः तासां भावहावादिभिरनाकृष्टचित्तः अत एव प्रियेति स्वकर्तृकं वा यत्प्रियेक्षणं तेनोत्फुल्लानि मुखानि यासां ताभिः वृतः प्रीत्या स्वयं वृतः परिवारित इति यावत् किम्वा कान्तत्वेन यथोचितं वृतः वरणमात्र स्वीकारस्तेन गान्धर्ववृत्तिः सूचिता सा चानौचित्यपरिहारायेति ज्ञेयं तदुक्तम् "अनौचित्यादृते नान्यद्रस भङ्गस्य कारण,, मिति गान्धर्ववृत्तेश्चौचित्यमुक्तं महाभारते शकुन्तलां प्रति दुष्यन्तेन—

आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः इति ॥

सोपपत्तिकं श्रैष्ठ्यमाह—

सा त्वं मम सकामस्य सकामा वरवर्णिनि ।
गान्धर्वेण विवाहेन भार्य्या भवितुमर्हसीति ।

एतदभिप्रायेणैव गान्धर्ववृत्त्येत्युक्तमुज्ज्वलाद्यैः इदं च प्रेयसीष्वेव सहचरीपक्षे तु वृतःपरिवारित इत्येवार्थः व्यरोचत विशेषणाशोभत पक्षे विशेषेण मह्यं रुचित इत्यर्थः क इव एणाङ्क इव इति ताभिः सह तस्यान्योऽन्यं शोभाविशेषत्वं श्रेष्ठत्वं नित्यसाहित्यं ततस्तन्मीत्वं च सूचितं वस्तुतस्त्वेणाङ्कपदेन वर्णसाम्यान्मेघाम्वरं लक्ष्यते तेन च मेघाम्वरधरायाः श्रीराधायाः सान्निध्यमध्यवसीयते मेघाम्वर इति नीलाम्वरस्यैव नामान्तरकरणोद्देशाद्दौ ततश्च ताभिर्नित्यसहचरीभिः परिततो नित्य एको युगलरूपो मुख्यतमः प्रकाशो वर्त्तते तत्र प्रेयसीभावाभिरलक्षितः सहचरीभिश्च लक्षित इति ज्ञेयं सच सच कीदृशः उदारहासेत्यादि प्रस्तुते हासस्योदारत्वं च तारुनासत्त्या प्राणेश्वर्य्याः सानुकूल्यद्योतनाय वयस्यासु कलयत कलकण्ठ्यो मम कलाकौशलं यदेताः । सर्वा अपि वञ्चयन् प्राणप्रियामेवानुसरामीति चातुर्य्यद्योतनायेति ॥ ४३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

रमणोद्यतस्य शोभामाह । ताभिरिति । अच्युतस्ताभिर्व्यरोचतेत्यन्वयः अयमत्राभिप्रायः यतोऽच्युतः न च्युतं स्वरूपं स्वरूपात्मगुणावा हावभावगाननृत्यादिकला वा भगशब्दवाच्या ऐश्वर्य्यादयो वा यस्येति सर्वथा पूर्णत्वात्स्वत एव वारोचत पूर्णपुण्यापि अपि गङ्गाया नद्यन्तरसङ्गमे दशगुणमाहात्म्यश्रवणवत् नित्यसच्चित्परानन्दस्यापि परब्रह्मण उपनिषच्छ्रुतिगणविषयीकृतस्यैवाभिव्यक्तपरमानन्दत्ववत्ताभिर्विशेषेणारोचत ताभिः किं भूताभिस्तत्राह । समेताभिः ऐहिकामुष्मिकसर्वधर्मास्तत्र सेव्यत्वेनावभासमानतत्सर्वेवाननाश्रित्य तात्पर्य्यवृत्त्या पूर्वापराविरोधसमन्वयाभ्यां श्रुतीनां मुमुक्षूणां च ब्रह्मण्येव सम्यक् पर्य्यवसानवत्सर्वगृहकुलधर्मादिकृत्यतत्सेव्यपतिपुत्रादिबन्धुवर्गमुत्सृज्य भगवदेकपरतया परस्परसापत्न्यभावं चानवेक्ष्य सम्यक् प्राप्ताभिः साधनं निरूप्य फलोद्गमसाह । प्रियेक्षणोत्फुल्लमुखीभिरिति । प्रियस्य नित्यनिरतिशय प्रेमास्पदस्य कृष्णस्येक्षणेन दर्शनेनोत्फुल्लानि मुखानि यासां यद्वा प्रियस्य तस्यैव कृपादृष्ट्या उत्फुल्लानि सर्वदिव्यकुसुमेभ्योऽप्युत्कृष्टतया फुल्लानि मुखपङ्कजानि यासां ताभिरनेन भगवदीक्षणस्य रविरूपतया तत्प्रेमात्मककृपादृष्टेर्मुखकमलविकाशनयोग्यतापि ध्वनिता कथम्भूतो हरिस्तत्राह । उदारचेष्टितः उदाराणि अतिशयेन सर्वजनसर्वसुखप्रदानि चेष्टितानि यस्य नित्यपूर्णसुखघनस्य भगवतः कर्मणां स्वसुखहेतुत्वासम्भवात्तद्विषयभूतानां प्रियाणां तत्स्मरणादिपराणां च भोगापवर्गप्रेमसुखादिदातृत्वेनोदारत्वं ज्ञेयं पुनः किंभूतः उदारहासद्विजकुन्ददीधितिः उदारे तथैव सुखप्रदे हासे द्विजानां कुन्दकुसुमवद्दीधितिर्यस्य तथा च हासस्य स्वत एवोज्ज्वलत्वेऽपि द्विजदीधित्या अत्युज्ज्वलत्वं ध्वनितं यद्वा उदारहासरूपा द्विजकुन्दानां दीधितिर्यस्य तथा च द्विजा एव कुन्दपुष्पाणि तद्दीधितिरेव कुन्दविकाशस्तेन मुखे नित्यद्विजदीधित्या नित्यप्रहसितत्वं सूचितं यद्वा यथा द्विजैः कुन्ददीधितिभिः मुखपद्महासाकारत्वेन सम्भावितैः सहासमुखपद्मरुचिस्तथा ताभिर्व्यरोचतेति दृष्टान्तसूचनं मुखतोऽपि दृष्टान्तमाह । उडुभिर्वृत एणा

उपगीयमान उद्गायन् वनिताशतयूथपः ।
मालां बिभ्रद्वैजयन्तीं व्यचरन्मण्डयन् वनम् ॥ ४४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

चन्द्र इव अत्र उडूनां यथा बहुत्वं दीप्तिमत्त्वं दीप्त्याल्हादादिमत्त्वं च चन्द्रसाजात्यं तत्पत्नीत्वं च तथा गोपीनां बहुत्वं कान्तिमत्त्वमाल्हादकत्वं प्रतीयमानगोपजातित्वेन वस्तुतः सच्चिदानन्दघनत्वेन च साजात्यं तत्पत्नीत्वं च ध्वनितं ताभिर्वृत इति पदेनापि श्लेषाद्वरणं पतित्वेन स्वीकरणं द्योतितं तथा श्रैव गान्धर्वविवाहेन वा ब्रह्मणा वत्साहरणावसरे प्राजापत्यविधिनैवोद्वाहितत्वेन वा तत्पतीनामप्यात्मत्वेन वा बोध्यम् एणाङ्क इव कृष्णस्यैकत्वं कान्तिमत्त्वं तथैव साजात्यं तत्पतित्वं च द्विजकुन्ददीधितिरित्यत्र किरणवाचिदीधितिशब्देन द्विजानामुडुसादृश्यं मुखस्य चन्द्रसामान्यमपि द्योतितं तेन तस्यापि एणाङ्क इवोडुभिर्वृत इत्यस्योपमेयत्वम् ॥ ४३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रमणप्रकारमाह । ताभिरिति । यथोडुभिस्ताराभिर्वृत एणाङ्कः पूर्णश्चन्द्रः शोभते तद्वत्ताभिर्वृतोऽच्युतः व्यरोचत विशेषेण शोभितः अनेन दृष्टान्तेनाऽन्योऽन्यापेक्ष्यशोभमानत्वं गोपीनां वन्हित्वं स्वर्णत्वं च व्यज्यते ताभिः समीपमागताभिरादौ समेताभिर्मिलिताभिः भगवांश्चोदारचेष्टित उदाराणि अलौकिकानि निर्मलानि मुक्त्यादिफलदानि चेष्टितानि करस्पर्शेन पुण्याणां कटाक्षादिरूपाणि यस्य सः तस्य तादृशचेष्टितैः तासां रसोदयमाह । प्रियकर्तृकमक्षिण्यं स्वकर्तृकं वा तदीक्षणेनोत्फुल्लानि विकशितानि मुखानि यासाम् अनेन भगवन्मुखस्य चन्द्रत्वं तन्मुखानां कुमुदत्वं बोधितम् अथ भगवतोऽपि रसोदयमाह । उदारो हासो यस्याः सा दन्तलक्षणकुन्दपुष्पकान्तिर्यस्याः सा उदारहासेन द्विजकुन्देषु दीधितिर्यस्येति वा तादृशाभिस्ताभिः मनस्य ऽपि रसोदयेऽपि च्युतिर्न जातेति ज्ञापनायाच्युत इत्युक्तं यद्वा यथान्वयेऽपि स्वस्वरूपादच्युत एवासीदित्यच्युतपदेन ध्वनितं निवृत्तिपक्षे ताभिः सर्वाभि "गतिसामान्या„दिति न्यायादेकस्मिन्नद्वितीये ब्रह्मणि तात्पर्येण समेताभिः श्रुतिभिः उदाराणि सृष्टिकर्तृत्वादीनि चेष्टितानि यस्य सः प्रियस्यानन्दस्वरूपस्य परमात्मन ईक्षणाय तद्विषयकं प्रेमोत्पत्त्या उत्फुल्लानि विकाशितानि तत्प्रतिपादनोन्मुखस्थानीयानि पदानि यासां ताभिः उदारो यो हासः महामाया हासो जनोन्मादकरी च मायेत्युक्तत्वात्स्नेहकला द्विजानां तद्युक्तत्वात् द्विजपदेन स्नेहकला उच्यते उदारो महामायालक्षणो हासः स्नेहकलालक्षणा द्विजा दन्ताः यस्य स चासौ कुन्दः मुकुन्दः एव दीधितिः प्रतिमास्वरूपापन्ना कीर्तिर्यस्य सः कुन्दो माघ्ये मुकुन्दे च भ्रमे निध्यन्तरे पुमानिति मेदिनी मुकुन्दः कुन्दरः कुन्द इति भारते ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतः अखण्डैश्वर्यः उदारं स्वभक्तमनोरथपूर्तिकरं चेष्टितं कर्म यस्य सः उदारहासश्च द्विजा दन्ताश्च तेषु कुन्दकुसुमवद्दीधितिर्यस्य सः प्रियस्येक्षणेन उत्फुल्लानि मुखानि यासां ताभिः समेताभिः सह व्यरोचत उडुभिर्वृत एणाङ्कः मृगाङ्क इव॥४३॥

भाषा टीका ।

बेडी उदार भक्तन की सुखदायक लीलावाळे भगवान् जब उन गोपियों से मिले तब अपने प्यारे के देखवेते जैसे सूर्य के उदय होवे ते कमल खिळे तैसे उन गोपीजनों के मुख खिळउठे अच्युत भगवान् को जो उदारहास औ कुंदकी कळी की नांई जो दंत हैं उन के किरणों से जैसे कि अने को तारों के मध्य में पूर्णचन्द्रमा शोभित होवे तैसे उन गोपिन में भगवान् अत्यन्त शोभित भये ॥ ४३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं शोभाविशेषोदयेन श्रीवृन्दावनमपि शोभयन् गीतेन पुष्पादिप्रदर्शनेन च भावमुद्दीपयितुं किम्वा रतियोग्ययमुनापुलिनं गन्तुं गमनक्रमेण बभ्रामेत्याह । उपेति । रूपगुणलीलाविवर्णनेन स्तूयमानः यद्वा बहुधा तद्गीतगाने उपचतुर्षु पार्श्वेषु गीयमानः अतो हर्षेणोच्चैर्गायन् वनिताः जनितात्यन्तानुरागाः सीमन्तिन्यः तथा च विश्वः वनिता जनिता त्यर्थानुरागायां च योषितीति तासां शतानि यूथानि पाति सर्वदुःखाद्रक्षति यद्वा पिबति पिबन्त इव चक्षुर्भ्यामित्यादिवत् आसक्त्या सेवते यद्वा अधरामृतपानादिना साक्षात् पिबतीवेति तथा सः तासां निजनिजसाजात्यानुसारेण वंशो यूथत्वं तत्र श्रीगोलोकादिवर्त्तिन्यो नित्यप्रियाः काश्चित्तेनैव सह ततोऽवतीर्णाः काश्चित् काश्चित्तदंशभूता देव्यः या उद्दिश्य श्रीब्रह्मणादिष्टं सम्भवन्तु सुरस्त्रिय इति काश्चन मुनयः श्रुतयश्च दण्डकारण्य वासिनो मानस सरस्वती तीर महातपस्विनश्च काश्चन्मुनयः काश्चिन्महोपनिषदाद्याः प्रौढसाधनैर्भावविशेषसिद्धव्रजकिशोरीत्वं प्राप्तास्ता द्विविधाः श्रुतय इति तत्तद्वृत्तं पाद्मबृहद्वामनादौ व्यक्तमेव तत्रैव भावविशेषपाकान्तरभेदं प्राप्ता इत्येवं विभागशो वर्तमाना अपि सर्वासां प्रायो भावसाजात्यात् सर्वा एव ताः साम्येन रमयामासेत्यर्थः वैजयन्तीं पञ्चवर्णपुष्पग्रथितां पञ्चवर्णा वैजयन्तीति वचनात् नवरत्नखचितामिति केचित् यद्यपि रिरंसया पूर्वं धृतान्यन्यान्यपि भूषणानि विद्यन्ते तथाचाग्रे वक्ष्यते वलयानां नूपुराणां किङ्किणीनां च योषितां सप्रियाणामित्यादि तथापि तां बिभ्रदिति रात्रौ तस्याः शोभाविशेषाभिप्रायेण किम्वा ताभिः सद्यस्तत्रैव विरचय्य समर्पितत्वात् व्यचरत् परिबभ्राम ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इत्थं शोभाविशेषोदयेन श्रीवृन्दावनमपि शोभयन् गीतेन पुष्पादिप्रदर्शनेन च भावमुद्दीपयितुं रतियोग्यं यमुनापुलिनं गन्तुञ्च गमनक्रमेण बभ्रामेत्याह । उपगीयमान इति । उद्गायन् भावोद्दीपनं चन्द्रादिकं हर्षेणोच्चैर्गायन् ताभिश्चोपगीयमानः उपगायनरीत्या तैरेव गीतैरनुक्रियमाणैर्वर्ण्यमानः श्लेषेण तत्रैव सङ्क्रमितार्थत्वात् तच्चैवं ज्ञेयम् । यथा श्रीरसामृतासिन्धौ । अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः । कलितस्यामाललितो राधाप्रेयान् विधुर्जयतीति । क्वचिदेकद्व्यक्षरपरिवर्त्तनाच्च । यथा । यामिनीकृतरुचिः शुचिकान्तिश्चन्द्रिकावलिविभाविकचश्रीः । षट्पदालिकलितैः कलगीतैः पश्य भाति कुमुदाकर एषः । यामिनीकृतरुचिः शुचिकान्तिश्चन्द्रकावालीविभाविकचश्रीः । सत्पदालि कलितैः कलगीतैः पश्य भाति कुमुदाकर एष इति । यद्वा । तदीयस्वरतालादियुक्तेन तन्नाम्नैव तदुपगायन् तया गीयमानः मनसि तदेकाविष्टतया वचसि तदेकस्फूर्त्तेः । यथोक्तं श्रीविष्णुपुराणे । कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनरिति । तत्रार्थद्वयमपि रसनीयमिति । कृष्णश्च नाम च कृष्णनाम तदेवैकं केवलं जगाविति च व्याख्येयम् । वनिता जनितात्यर्थानुरागायाञ्च योषितीत्यमरः । तासां शतानि यूथानि पातीति तन्नायक इत्यर्थः । श्लेषेण तानि पिबति पिबन्त इव चक्षुर्भ्यामित्यादिवत् । आसक्त्या सेवते अधरामृतपानादिना साक्षात् पिबति वेति तथा सः तासां निजनिजभावसाजात्यानुसारेण वर्गशो यूथत्वं वैजयन्तीं पञ्चवर्णपुष्पग्रथितां पञ्चवर्णा वैजयन्तीति वचनात् । यद्यपि वलयानां नूपुराणामिति वक्ष्यमाणादन्यान्यपि भूषणानि विद्यन्ते तथापि तां बिभ्रदिति वनविहारयोग्याङ्गत्वेनोक्तम् । सा च ताभिरेवाशु निर्माय समर्पिता तद्वनदेव्या वृन्दयैव वा तदर्थं तत्र तत्र कुञ्जादौ स्थापितेति ज्ञेयं व्यचरत् परिबभ्राम ॥ ४४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

गोपीभिरुद्गीयमानः स्वयं चोद्गायन् वनिताशतानां यूथप इवेति भावः । वैजयन्तीं मालां बिभ्राणो वनमलंकुर्वन् व्यचरत् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शतशब्दोऽनेकवाची वैजयन्तीं विजयावहाम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

प्रथमतो हर्षोत्कर्षात् तेन च ताभिरपि गानमारब्धं वस्तुतस्तु सङ्गीतप्रधानोऽयं रासविलासः सङ्गीतं च गानप्रधानं तेनासां मध्ये काः कथं गायन्तीति प्रत्येकं गानशुश्रूषया स्वयमपि गायन् वनविहारं कृतवान् इत्याह।उपगीयमान इत्यादिद्वाभ्याम्।उपगीयमान इत्यर्थात्ताभिर्गीयमानस्त्यर्थास्ता एव वनितानां शतं यूथपं मुख्यं यस्य एकैकस्याः यूथपायाः कोटिर्यूथत्वेन ज्ञेया प्रमदाशतकोटिभिराकुलित इत्युक्तत्वात् वनं मण्डयन् व्यचरत् मालां बिभ्रदिति शुकदेवस्य स्फूर्त्तिसौभाग्यम् ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

द्वितीयलीलायां उद्बोधार्थं पूर्वं सामग्रीमाह । उपगीयमान इति । ताभिरुपगीयमानः निकटे गीयमानः स्वयमप्युद्गायन् जातः ततः वनितानामनेकविधस्त्रीणामनेकविधानेव यूथान् पातीति तथा जातः यावतीभिर्मिलितो रसहेतुर्भवति तावतीनामेकं यूथम् एवमनेकरूपाणि कृतानि तेषामत्र रक्षणं दूरादेवाश्वासनेन च तदा गायतो गच्छतः रूपमाह । मालामिति । वैजयन्तीं नवरत्नखचितां स्वाभाविकीमैश्वर्यबोधिकां कीर्त्तिमयीं मालां बिभ्रत् वनमेव सर्वं मण्डयन् अलं कुर्वन् व्यचरत् लीलागतिं कृतवान् एषा हि गतिः तासां कामोद्बोधिका स तासां कामपूरकः एकस्माद्वनात् वनान्तरं वा गत इति ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ताभिरुप आधिक्येन गीयमानः रागस्वरतालाद्यैः । तत्र तालत्रयेण गीतं यथा । वदनं मधुरिमसदनं चलनं दलनं करीन्द्रकीर्त्तीनाम् । हसितं सुहृगभिलषितं तव सवयः पातुमामनिशमिति । स्वयञ्च वनितानां शतयूथानि पान्ति यास्ता मुख्यतमाः श्रीराधाचन्द्रावल्याद्यास्तदनुगानरीत्या तैरेव गीतैः प्रत्येकमुद्गायन् । क्वचिदेकस्वरपरिवर्त्तनेन परस्परगानमुद्गीतं । यथा । त्वद्वदनं सदनं मधुरिम्णां तत्र हन्त हसन्ताविलासाः । तेऽस्य सुषमामुपजग्मुः सुन्दरि । कामकलाः सकलास्ता इति । कान्ते । त्वदास्योदयवृत्तामिदुर्भगकलादुर्यश एव धत्ते । जनो पहासा सह नोऽथवा किं द्विजोऽपि मूढो गरलं जघासेति । अत्र सुन्दरीत्यत्र सुन्दरेति कान्ते इत्यत्र कान्त इति प्रयुञ्जानः प्रेयसीजनोऽनुगायति स्मेति रीतिः । वैजयन्तीं पञ्चवर्णपुष्पग्रथितां पञ्चवर्णा वैजयन्तीति वचनात् ॥ ४४ ॥

केनचित्कृता विशुद्धरसदीपिका ।

उदारचेष्टितानि दर्शयति । उपेति त्रिभिः । उप अधिकं गीयमानः ताभिरिति पूर्वस्मात् स्वयमप्युद्गायन् तत्र प्रेयसीभिस्तु तन्नामगुणादिकमेव गीयते भगवता च चन्द्रादिकं तदुक्तं श्रीविष्णुपुराणे कृष्णः शरच्चन्द्रमसङ्कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनरिति यदि वा श्लिष्टमेकमेवोभाभ्यां गीयते यथा श्रीरसामृतसिन्धौ —

> अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः ।
> कलितश्यामा ललितो राधा प्रेयान् विधुर्जयति ॥

सहचरीभिस्तु पूर्वश्लोकगतैणाङ्कपदोद्बोधिततद्युगलनित्यविलासविशेषं प्रणयपरिणयात्मकं गीयत इति भेदः इदं च गानं तत्तद्भिन्नभावाभिरनाकलितमेव योगमायाप्रभावेण रसावेशस्वभावेन वा ज्ञेयं तत एव च बनितेत्यादि "वनिता जनितात्यर्थानुरागायां च योषिती"ति कोशादनुरागवतीनां योषितां निजनिजभा-

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ।
रेमे तत्तरलानन्दकुमुदामोदवायुना ॥ ४५ ॥

केनचित्कृता विशुद्धरसदीपिका

वसाजालेन द्विनाभिः पञ्चषाभिः षट्साष्टाभिश्च शतसहस्राभिश्च वर्गेण भिन्नानि यूथानि पालयतीति वनिताशतयूथपः तच्च पालनं यथास्वं तत्तद्वाञ्छापूरणमेव तथा वैयन्तीं मालां बिभ्रत् सा चेयं तत्तद्रसामिव्यञ्जकवर्णविशेषकुसुमाविरचिता पञ्चवर्णा-वैजयन्तीत्युक्तेः ते च रसाः प्रेयसीनां व्रजलीलासम्बन्धिनः सहचरीणां च निकुञ्जलीलासम्बन्धिनः तदुक्तं—

व्रजे रसाः शान्तदास्यसख्यवात्सल्यसूचकाः ।
निकुञ्जे रतिसौहार्दमैत्रीभावाभिधा मताः ॥
वर्णाः सितासितहरिद्रक्तश्यामलसंज्ञकाः ।
रक्तावदातहारिता व्यक्तरागाः सिताः क्रमात् इति ॥

एषा च श्रीवृन्दादेवीनिर्मिता निजभावानुसारेण ताभिश्च वर्णमालाभिप्रायेणैव निवेदितेति ज्ञेयं किं कुर्वन् वनं मण्डन् वनमालया माण्डितस्ताभिः प्राणप्रियाभिः प्राणसहचरी-भिश्च स्वयं वनमपि भूषितं कुर्वन्निति शोभोद्गारः सूचितः ॥ ४४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततस्तच्चरितमाह । उपगीयमान इति । वनितानां शतान्यसंख्या-तानि यूथानि पातीति तथा गजीयूथप इव वनं मण्डयन् व्यच-रत् इत्यन्वयः पुनः किम्भूतः सन् व्यचरत् तदाह । मालामिति । तासां प्रियेक्षणोत्फुल्लमुखोपलक्षितसर्वाङ्गानां मालां वैजयन्तीं च बिभ्रत् डुभृञ्धारणपोषणयोरित्यस्माद्वैजयन्तीं धारयन् तन्मालां उदारहासद्विजकुन्ददीधितिरित्यादिना मुखचन्द्रचन्द्रिकात्मकस्मित-सुधया पोषयन् यद्वा विभुत्वेन सर्वाङ्गुगतवपुषा प्रत्येकं सर्वासा-मालिङ्गनेन स्वगुणग्रथितोत्फुल्लसर्वावयवकुसुमास्ता मालामिव धारयन् तथा पुलकितकुसुमाङ्गीस्ताः श्यामतन्मधुपतया श्याममधु-पवदुद्गायन् स्वयं चोत्फुल्लनीलोत्पलाङ्गस्ताभिः स्वमधुपाभिः वैज-यन्तीं सुरभिसमाकृष्टमुनिगन्धर्वपालिभिश्चोपगीयमानः तत्रायं भावः तास्तु बहुपुलकमुकुलकराङ्गुलिप्रवालाङ्कुरस्वबाहुलतालिङ्गिततया पुलकमुकुलन्यासरसालपरसालाङ्गं कृष्णमाकलय्य कोकिलकलक-ण्ठ्यस्तं निर्वाणमपि कुसुमबाणव्यासं मत्वा मदनमदोन्मदतया रतिरणयोधकलस्वरगीतेनोद्गायन्त्यः कातरतया पलायनशङ्कया तद्गुणान् गायन्ति सोऽपि स्वात्मनस्तदुचततां बोधयन् ताः रति-रणायैवोत्साहयंस्तद्गुणान् गायति स्म ॥ ४४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथोदारलीलाभिर्वनमपि शोभयन् व्यचरदित्याह । उपगीयमान इति । ताभिः समीपे गीयमानः भक्तपराधीनत्व प्रेयसीजनमनोऽनुर-ञ्जकत्वमानवतीमनोद्दीपकत्वादिगुणगणालंकृतकृष्णनाम्ना पुनः पुनरुपगीयमानः स्वयं च शरच्चन्द्रादिमयं गोपीजनप्रेमा-तिरेकमयञ्च गीतमुद् ऊर्ध्वं ब्रह्मलोकपर्य्यन्तगामिगीतं गायन् तदुक्तं विष्णुपुराणे—

कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् ।
जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः इति॥

तत् स्वयमनुरक्तस्त्रीशतयूथपस्तत्पतिकामनायाः पालक इति वा तदधरपानकर्त्तेति वा पुनश्च वैजयन्तीं मुक्तामाणिक्यमरक-तेन्द्रनीलवज्राख्यरत्नरचितां स्वाभाविकैश्वर्यबोधिकां कौस्तुभमयीं पञ्चवर्णां वैजयन्तीमिति वचनात्पञ्चवर्णपुष्पग्रथितां वा मालां बिभ्रत् वनमेव सर्वं मण्डयन् अलंकुर्वन् व्यचरत् तासां कामो-द्दीपनाय लीलागतिं कृतवान् वनान्तरङ्गतवानिति वा निवृत्ति-पक्षे उपगीयमानो मुनिभिः स्वयं च कृष्णादिरूपेण-

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

इत्यादिना स्वात्मानमुद्गायन् वनिताशब्दनीयश्रुतिशतयूथपसत्यर्थस्ताक-त्पतिस्तथा च सूत्रस्मृतिश्रुतिलक्षणप्रस्थानत्रयलभ्य इत्यर्थमयीं वैजयन्तीं मालां बिभ्रत्तदवच्छिन्न सूत्रस्मृत्यादिरूपः सः

पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसङ्घाता भूत माला च वै द्विजेति ॥

विष्णुपुराणे अन्तःकरणलक्षणं वनं मण्डयन् व्यचरत् सर्वासु तद्व-स्थासु स एवास्फुरादित्यर्थः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गोपीभिरुद्गीयमानः स्वयमुद्गायन् ॥ ४४ ॥

भाषा टीका ।

सैकडों स्त्रीजन के यूथपति से हो भगवान् आप गान करत भये और गोपियें उनको गान करत भई ऐसे पञ्च वर्ण के फूलों की वैजयंतीमाला को धारण कर संपूर्ण वन की शोभा करत भगवान् विचरत भये ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततः श्रीयमुनापुलिने ता नीत्वा वैदग्धीविशेषप्रकटनेन रमया-मासेत्याह । नद्या इति द्वाभ्याम् । नद्याः कालिन्द्याः पुनः पुलिनमा-गत्य कालिन्द्या इति वक्ष्यमाणत्वात् तस्याश्च वनस्य च नामा-ग्रहणं तत्र तयोः प्रसिद्धत्वेन तथोक्तापि सुबोधत्वात् यद्वा निर्जनत्वमात्रापेक्षया वनत्वेन तस्य प्रवाहत्वेन च पुलिनोत्तमत्वमा-त्रापेक्षया नदीत्वेनैव तस्या उक्तिः गोपीभिः सह आविश्य लीलया प्रविश्येत्यर्थः हिमाः शीतला वालुका यस्मिन् तत् इति श्रमा-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

पनोदनत्वेन कोमलत्वेन च मनोरमता तस्य दर्शिता तस्या नद्यास्तरलैस्तरङ्गै रानन्दी सुखविहारी चासौ कमलामोदयुक्तवायुश्च तेन यद्वा तत्तरलैरानन्दी रात्रौ मुद्रितानामपि कमलानां कम्पनेन प्रकाशमानः सुखकारको वा आमोदो यस्मिन् वायौ तेन जुष्टं सेवितं कुमुदेति पाठः केषां चित् सम्मतः तरङ्गेन सम्बन्धेन शैत्यम् आनन्दीत्यनेन जुष्टमित्यनेन वा मान्द्यं सौरभ्यं च व्यक्तमेवेति गुणत्रयमुक्तम् इति सर्वथा पुलिनस्य रतिभूयोग्यत्वं तेन भाव दीपनं चोक्तम् ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततः श्रीयमुनापुलिने ताः प्रापय्य वैदग्धीविशेषेण रमयामासेत्याह । नद्या इति युग्मकेन । हिमवालुका कर्पूरः तद्वद्वालुका यत्र तत् शाकपार्थिवादि । एवं पूर्वत्र वनमपि वृन्दावनमेव । तस्या नद्यास्तरलैस्तरङ्गैरानन्दी सुखविहारी चासौ कमलामोदयुक्तवायुश्च तेन निशायामपि कमलविकाशः शरदि मल्लिकाविकाशा इव तदीयतादृशलीलारसमयप्रभावेणानन्दीति जुष्टमिति च मान्द्यम् । सौरभ्यशैत्ये स्पष्टे । कुमुदेति आनन्देति च पाठः एकेषाम् । जुष्टमित्यत्र रेम इति क्वचित् अत एव पृथगङ्कः कृतः ॥ ४५ ॥

श्रीमत्सुदर्शनसूरिकृतशुकपक्षीयम् ।

नद्याः कालिन्द्याः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हिममय्यो वालुकाः सिकता यस्मिंस्तन्नद्या यमुनायाः पुलिनं कथम्भूतं तस्या यमुनायास्तरलानां तरङ्गाणां सम्बन्धिनां कुमुदानामामोदो यस्य तेन वायुना जुष्टमासाद्याधिष्ठाय रमयाम्बभूवेत्युत्तरेणान्वयः ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिमवालुकं शीतलसैकतं तस्या नद्याः तरलैः मन्दकल्लोलैः आनन्दयितुं शीलमस्यास्तीति तरलानन्दी कुमुदानामामोदस्य वायुस्तत्तरलानन्दी कुमुदामोदवायुः तेन यद्वा तया नद्या तरलानि नृत्यन्तीव स्थितानि च तान्यानन्दीनि उत्फुल्लानि कुमुदानि तत्तरलानन्दिकुमुदानि तेषामामोदेन सौरभेण सम्पृक्तेन वायुना ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

किं कृत्वा वनं प्रापयन् व्यचरत्तत्राह । नद्याः पुलिनमाविश्य काभिः सह गोपीभिः किं भूतं हिमवालुकेव वालुका यत्र मध्यमलोपी हिमवालुका कर्पूरं तत्प्रसिद्धं तरलानि आनन्दीनि कुमुदानि तेषामामोदो यत्र तथाभूतेन वायुना जुष्टं सेवितमपीत्यपिशब्दोऽध्याहार्य्यः अयमाशयः प्रथमं तावत्ताभिः सुरतलीलैव पश्चादेव रासलास्यं पश्चाज्जलक्रीडेति व्यञ्जयतीयं लीलातिरहस्या सा तु पुलिने न सम्भवत्यनावृतत्वात् विमानचारिदृश्यत्वाच्च इति कृत्वा रासलास्यलीलैवात्र कार्येति पुलिनं दृष्ट्वैव पुनर्वनमगादिति आगत्येति पूर्वकालार्थः ॥ ४५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमुद्बुद्धे कामे ताभिः सह बन्धादिभिः रेम इत्याह । नद्या इति । नद्याः पुलिनमच्छकोमलमाविश्य आसमन्तात्प्रविश्य रमणे बन्धादीभिरतिकोमलं कृत्वा गोपीभिरनेकविधाभी रेमे हिमाः शीतलाः वालुका यत्रेति अन्तरूष्मा निवारितः बहिः शैत्यं चाह । तत्तरलानन्देति । तस्या नद्यास्तरलास्तरङ्गाः तैः कृत्वा आनन्दयुक्तं पुलिनमेव आनन्दयुक्तो वायुर्वा कुमुदानां चानन्दयुक्तः सुगन्धः तस्यानन्दजनकत्वेनैव मान्द्यं निरूपितं शैत्यं च कुमुदानां जलसंबन्धात् तादृशवायुना सहितं पुलिनं महाबन्धेषु वायोरत्यपेक्षा ॥ ४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

तस्यानद्यास्तरलैस्तरङ्गैरानन्दी शैत्यमान्द्याभ्यामानन्ददायकश्च रात्रावपि प्रफुल्लानां कमलानामामोदो यतःस च तेन वायुना रेमे जुष्टमिति पाठे रमयाञ्चकारेत्युत्तरेणान्वयः कुमुदामोदेति तरलानन्देति च क्वचित्पाठः ॥ ४५ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्च चङ्क्रमणेनातिरमणीयं रमणयोग्यं देशविशेषं गतस्य श्रीभगवतो रमणमाह द्वाभ्याम् । नद्या इति । न नदाशु नदीषु ब्रूयादिति निषेधात्तथोक्तिर्नद अव्यक्तायां वाचीत्यनुशानाद्योगवृत्त्या नादवतीत्वबोधनाय तथात्वञ्च कादम्बादिकूजितैरित्यूह्यं यथा—

> चञ्चत्खञ्जनलोचनाम्बुजमुखी लोलालिमालाकिणा ।
> खेलत्कोककुलालिभ्रंशितत था रक्तोत्पलोष्ठाधरा ॥
> कूजत्सारसपालिरम्यरसनानीलोत्पलोत्तंसिका ।
> कालिन्दीकलहंसकारविरवैर्नोथौ सिषेवे निजौ ।

पुलिने प्रसिद्धे आविश्य प्रविश्येत्यर्थः । अत्र प्रविश्येति वक्तव्ये आविशेत्युक्तिस्तत्रत्यानित्यप्रकाशेनाभेदं प्राप्येति विवक्षया पुलिनं विशिनष्टि । हिमवालुकामिति । हिमं वालुकं यत्र तत् कर्पूरो हिमवालुकेत्यमरः ततश्च हिमवालुकेव वालुका यत्रेति तद्रमणसम्पत्तिः सूचिता तथा तदित्यादिस्तस्या नद्यास्तरलानालम्ब्येत आश्रयति यः कुमुदामोदवान् वायुस्तेन उपलक्षितं पुलिनमिति वा तत्तरलानन्दीत्यपि पाठः ततश्च तत्तलैरानन्दीति विकसितानि यानि कुमुदानीत्यादि तत्र तत्तरलेतिशैत्यम् अनन्दीति मान्द्यमामोदेति सौगन्ध्यमिति त्रैविध्यं दर्शितं तदेतद्वर्णितं श्रीगोविन्दलीलामृते—

केन चित्कृता विशुद्धरसदीपिका ।

ऋतुराजादिसर्वर्तुगुणसेवितकाननम् ।
वृन्दसंमृष्टगन्धाम्भः संसिक्ताध्वाङ्गनालयम् ॥
तथा रतोणकोल्लोचपताकालम्बगुच्छकैः ।
पुष्पैश्चित्रितकुञ्जाध्वदोलाचत्वरमण्डपम् ॥
नवकमलदलालीपल्लवावृन्तनाना ।
कुसुमरचितशय्योच्छीर्षचन्द्रोपधानैः ॥
समधुत्रपकताम्बूलाम्बुपत्रादियुक्तैः ।
सुललिततलीलागारकुञ्जप्रपञ्चम् ॥
कल्हाररक्तोत्पलपुण्डरीकपङ्केरुहेन्दीवरकैरवाणाम् ।
क्षरन्मदारैश्च पतत्परागैः सुवासिताम्भः प्रसरं समन्तात् ।
हंससारसदात्यूहमद्गुकोकादिपत्रिणाम् ॥
वरटालक्ष्मणादीनां कलालापैः श्रुतिप्रियम् ।
शारीशुकानामन्योऽन्यपृथगासङ्गरङ्गिणाम् ॥
राधाकृष्णरसोच्छ्वासिकाव्यालापमनोरमम् ।
जलदभ्रान्तिकृत्कृष्णकान्तिजप्रणयोन्मदैः ॥
नदन् नृत्यच्छिखिव्रातैर्व्याप्तारामतटाजिरम् ।
हारीतपारावतचातकादिप्रहृष्टनानाविधचित्रपक्षिणाम् ॥
प्रियेक्षणानन्दविपुलवर्ष्मणां कर्णामृतध्वानमनोज्ञकाननम् ।
राकेशार्बुदनिर्मन्थराधिकास्येन्दुपायिभिः ॥
चकोरैर्व्यक्तत्यक्तचन्द्रैर्वृतनभस्तलम् ।
कुसुमितव्रहुवल्लीमण्डलैर्भीतिकल्पैः—
उपरि च पटलासैः श्लिष्टशाखसमूहैः ॥
निविडदलफलानां छादिताः पादपानाम्—
मणिमयगृहतुल्या यत्र कुञ्जा विभान्ति ॥
श्रीमत्केलिस्थलाख्यं तटमिदममलं प्रेष्ठसयोगपीठम् ।
वृन्दारण्योत्तमाङ्गं क्रमनतमभितः कूर्म्मपृष्ठस्थलाभम् ॥
कुञ्जश्रेणीदलाढ्यं मणिमयगृहसत्कर्णिकं स्वर्णरम्भा—
श्रेणीकिंजल्कमेषादशशतराजीवतुल्यं ददर्शेति

अत्र रेमे इत्यात्मनेपदप्रयोगादात्मना रमया रेमे इति ब्रह्मसंहितोक्तनित्यरमणं सूचितं त्यक्तकालसिलक्षयेति तत्रैव वाक्यशेषात् रहस्यातिरहस्यत्वात् प्रावश्यंति नोक्तं ज्ञानखलतापरिहाराय सूचनं त्वावश्यकतमस्तदनुसारेणैव व्याख्यातम् ॥ ४५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

संक्षेपेण वनविहारं सूचयित्वा रतिविहाराय मुख्यविहारस्थलपुलिनागमनमाह । नद्या इति । गोपीभिः सह नद्याः पुलिनमाविश्य रमया अकारेत्युत्तरेणान्वयः तत्र यत्कैश्चिद्व्याख्यातं नद्याः पुलिनं प्रविश्य इति वक्तव्येऽपि तदनुक्त्वा आविश्येति कथनेन पुलिनमागत्य नित्यविहारस्थलपुलिनगतनित्यविग्रहे आवेशो विवक्षित इति तत्—

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

इत्यादिवचनैरपरिच्छिन्नभगवद्विग्रहस्य परिच्छिन्नत्वविभागादनुपपन्नमपि प्रकाशभेदकल्पनया उपपन्नमेव नद्याः पुलिनमित्यनेन सर्वतीर्थात्मकगङ्गोद्भवचरणभगवत्सेव्यत्वेन समस्तभोगापवर्गवरदेश्वरहरितत्संसीजनकामप्रदत्वेन परतीर्थत्वं सूचितं पुलिनं विशिनष्टि । हिमवालुकम् अत्रायं भावः रवितनयया कालिन्द्या हरिपातिलाभस्य हरिहरिजनसेवनाधीनत्वमवधार्य्य हरिपदसेवनपथे मात्सर्य्याद्यभावं निश्चित्याशेषोद्यपहाय कलिन्दगिरिविविधमणिगणचूर्णं तूर्णं निजकरतरङ्गैरानीय कृष्णद्युरसात्मकामलसलिलेन तच्छीतलत्वं सम्पाद्य तत्तल्पास्तरणेन तल्पसेवा कृता पुनः किम्भूतं तत् तत्तरलानन्दिकुमुदामोदवायुना जुष्टं तत्र तत्तरलानन्दिशब्देन वायोः शीतलत्वं कुमुदामोदशब्देन सुरभित्वं मुखत एवाभिदधता मन्दत्वमप्युपलक्ष्यते त्रिगुणसमीरेण जुष्टं सेवितमित्यर्थः । अत्राप्ययं ध्वनिः रवितनयया हृदहृदये कृष्णागमनोत्साहेन तन्मुखस्मितचन्द्रिकासंनिधानेन बहुकुमुदाकारेणातिप्रेम्णा विकसितेऽपि स्वतरङ्गरूपभुजचालनेनानङ्गपरवशतयालिङ्गनमिच्छन्त्या नङ्गतया गन्तुमशक्तया स्वसूक्ष्मरूपेण शैत्येन स्वहृदयकुमुदसूक्ष्मरूपेणामोदेन च पवनमधिरुह्यागत्य पुलिनं सेवितं वायुना च रवितनयातनुविकलतां कलयित्वा तत्प्राणत्राणाय स्वात्मनो जगत्प्राणत्वं निर्वाहयितुं कृष्णसेवया स्वभाग्यं सम्पादयितुं च तद्वाहनत्वं स्वीकृतमिति ॥ ४५ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ततश्च नद्याः श्रीयमुनायाः पुलिनमाविश्योपविश्य तस्योपवेशनयोग्यतामाह । हिमवालुकं हिमवालुकः कर्पूरस्तद्वद्वालुका यत्र शाकपार्थिवादिवत्समासः तस्याः नद्यास्तरलैस्तरङ्गैरानन्दयुक्तस्तत्करः स चासौ कुमुदामोदवांश्च वायुस्तेनोपलक्षितं युक्तमानन्दीति मान्द्यं शैत्यसौरभ्ये स्पष्टे यद्वा यथोक्तवायुना हेतुना हिमवालुकं यद्वा तत्तरलानन्दीति पृथक् पदं पुलिनविशेषणं तत्रोपाविश्य गोपीभिः सह रेमे जुष्टमिति पाठे रमयाञ्चकारेति परेणान्वयः । निवृत्तिपक्षे नद्याः बुद्धिलक्षणायाः पुलिनं सात्त्विकं प्रत्ययमाविश्य प्रविश्य तत्तदारुह्येति यावत् ना पुरुषः परमात्मा गोपीभिः श्रुतिभिः सह रेमे तदुक्तं भगवता तेषामेवानुकम्पार्थमहमज्ञानजन्तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति तत्तद्विषयाभिकाङ्क्षालक्षणतो——यस्य निवृत्तत्वाद्धिमवालुकस्थानीयं शान्तमत एव तस्या नद्याः तरला स्वच्छध्यादिलक्षणास्तरङ्गा तत्तरलास्तैः शान्ततरलैरानन्दं अमन्दातिभावसाधनं यतः कुमुदामोदवायुः कुं पृथिवीं भगवताणादिना मोदयतीति कुमुदः परमात्मा कुमुदपुष्पस्थानीयः तत्सम्बन्धिहर्षो गन्धस्थानीयः तद्युक्तः वायुस्थानीयः निरुद्धः प्राणवायुः ॥ ४५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्या नद्याः तरलानन्दानां कुमुदानामामोदो यस्य तेन वायुना जुष्टमिति शेषः नद्याः पुलिनमाविश्य गोपीभी रेमे ॥ ४५ ॥

बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥

भाषा टीका

फिर सब गोपीजन सहित हो बरफ सी ठंडी बालु जामें ऐसे श्रीयमुनाजी के पुलिन में पधारे उहां यमुना जी ने अपने हिलोरों के कुमोदनी के गंधवाले शीतलवायु ते सेवाकीनी भगवान् गोपिन के संग क्रीडा करत भये ॥ ४५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बाहुप्रसारश्च परिरम्भश्च करादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया अवलोकैश्च हसितैश्च कामं तासामुद्दीपयंस्ता रमयामास ॥ ४६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

बाहुप्रसारादिभिरुत्तम्भयन्निति सहजलज्जादिना छाद्यमानमपि प्रकाशयन् यद्वा प्रेमविशेषविलासरूपत्वेन वर्त्तमानमेवाधुना विशेषतो वर्द्धयन्नित्यर्थः । अत एव श्लेषेणोक्तं रतेः प्रेमलक्षणायाः पतिं पालकमिति तथा रतिपतिमिति दग्धाङ्गस्यापि कामस्य रतिसुखार्थं पुनर्जननेनेव सामग्र्यमभिप्रेतमिति रतौ तस्यासक्तिर्वैदग्धी च परमा दर्शिता तत्र बाहुप्रसारो दूरस्थानामाकर्षणार्थं प्राक्परिरम्भानुकरणं वा यद्वा तासामेव बाहूनां प्रसारणं यद्वा बाहुप्रसारेण परिरम्भः गाढालिङ्गनमित्यर्थः । क्ष्वेलिः प्रस्तोमनादिरूपा अधरपानदंशनादिरूपा वा व्रजसुन्दरीणामिति तासामपि तादृशमेव वैदग्ध्यं सूचितम् अन्यथा तस्य तादृशीवैदग्धीप्रकाशनासम्पत्तेः रमणे च निजशक्तिमाधुर्य्यविशेषेणान्योऽन्यमलक्षितं युगपदेव ज्ञेयम् ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सहजलज्जादिनाच्छाद्यमानमपि रतेः कान्तोचितप्रीतिलक्षणायाः पतिं तदुचितमहाभावाख्यं परमप्रेमाणं वा बाहुप्रसारादिभिरुत्तम्भयन् इति तस्य रत्यासक्तिर्वैदग्धी च परमा दर्शिता । तत्र बाहुप्रसारः परिरम्भारम्भः यद्वा । बाहुप्रसारेण परिरम्भः गाढालिङ्गनमित्यर्थः । क्ष्वेलिः प्रस्तोमनादिरूपा व्रजसुन्दरीणामिति तद्योग्यं सौन्दर्यमत्र विवक्षितम् तेन च यत्राकृतिस्तत्र गुणावसन्तीति न्यायात्तादृशं वैदग्ध्यमप्युपलक्ष्यते रमणञ्च निजमोहनताशक्तिविशेषेणान्योऽन्यमलक्षितं ज्ञेयम् ॥ ४६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

रतिपतिं कामम् उत्तम्भयन् ॥ ४६—४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

किं कुर्वन् बाहुप्रसारः स्कन्धस्योपरि बाहुप्रसारणं परिरम्भ आलिङ्गनं करेणालकादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपाताश्च नखाग्रक्षताश्च तैः क्ष्वेल्या क्रीडया चावलोकनैश्च मन्मथं तासामुद्दीपयन् ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परिरम्भ आलिङ्गनं तदेव करालकेली तीव्रकाण्डं तस्यां नीवीवस्त्रग्रन्थिस्तस्यां स्तनेषु आलभनेन मोचनस्पर्शलक्षणेननर्मणा हास्योक्त्या च कराग्राणां नखानां पातैः उल्लेखलक्षणैश्च क्ष्वेल्यावलोकहसितैः बालसिंहनादनिरीक्षणमन्दहासैश्च रतिपतिं काममुत्तम्भयन् उज्जृम्भयन् उल्लोलयन्नित्यर्थः । रमयाञ्चकार रेमे बाहुपीडनकुचग्रहणाद्यैरहितैन नखदन्तानिघातैः बोधितस्तनुशयस्तरुणीनामुन्मिमील शनैकैरपि मार इति माघः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ प्रथमलीलामाह । बाहुप्रसारेत्यादि । बाह्वोः प्रसारेण यः परिरम्भस्तेन करयोरलकानां च उर्व्वोश्च नीव्योस्तनयोश्च आलभनेन स्पर्शनेन नर्मणा च नखाग्रपातैश्च क्ष्वेल्या क्रीडया अवलोकेन हसितेन च व्रजसुन्दरीणां रतिपतिम् उत्तम्भयन् वर्धन् रमयाञ्चकार वस्तुतस्तु तासां प्रेमैव साहजिकः न तु कामः तदभावे सा लीला सुरसा न भवतीति स्वयमेव तासामसन्तमपि कामं वर्धयामासेत्यर्थः । स च कामः प्राकृतो न भवति अपितु स एव भगवान् येनांशेन कामावतारो भवति स एवां शस्तासां मनस्याविरीतः किं वा रतिः स्थायीभावः तस्याः पतिं शृङ्गाररसम् अथवा सैवासमयोऽयं ममेति उपपन्नं कामदेवम् उत् उत्कर्षेण स्तम्भयन् केवलधात्वर्थे एव निरस्यन्नित्यर्थः त्वया सह, येन माभूयतां स्वत एव सुरसेयं लीलेति किन्त्वयेति तज्जयो बोद्धव्यः ॥ ४६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं सर्वभावेन तासां जातस्मरकेलित्वं संपादितमतः परम अष्टविधालिङ्गनादिपूर्वकं चेष्टितकामादियुक्तं रसविलासचरित्रमाह बाहुप्रसारेति । दूरस्थितानामवयवानां स्प्रष्टुं बाहुप्रसारणं ततो बलादपि परिरम्भस्ततः करालकोरुनीवीस्तनानामालम्भनानि करालम्भनं हस्ते ग्रहणं पुरुषायितलीला समवन्धो वा एवं कचोद्ग्रमनार्थमलकानां स्पर्शः ऊरुस्पर्शो बाहुवन्धार्थः नीवीस्पर्शः पुष्टे रसे मोचनार्थः स्तनयोस्तुरसोद्गमनार्थः एवं पञ्चस्पर्शा विहिताः नर्म परिहासवचनानि कामस्तम्भनार्थं ततो नखाग्रपाताः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

नखक्षतदन्तक्षतताडनादयः कामयुद्धनिरूपकाः तत्तत्स्थाने स्थितः कामः तैरुद्बोध्यते यथा सेनावधेन राजा समायाति क्ष्वेलिः क्ष्वेलिकः प्रस्तोभनादिः तत्पूर्वकान्येवावलोकनानि हसितानि एवं द्वादशविधोऽपि कामः द्वादशाङ्गेषु स्थितः प्रबुद्धो भवति तदाह । व्रजसुन्दरीणामुत्तम्भयन्निति रतिं संयुक्तः कामो रतिपतिः वियुक्तस्त्वनिरूपः एवमाधिदैविकं काममुद्बोधयन् रमयाञ्चकार गोपीनां सुखमेव प्रकटितवान् न तु कामान्ते विरतिमुत्पादितवान् ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

बाहुप्रसारस्तासां स्वस्ववक्षसि स्वस्तिकीभूतानां भुजानां प्रसारणं च परिरम्भश्च करादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडोक्त्या अवलोकैश्च हसितैश्च रतिपतिं प्रेमात्मकं कामं तासां स्वस्य च उत्तम्भयन् उद्दीपयन् तावद्भिरेव स्वप्रकाशैः प्रत्येकं रमयाञ्चकार ननु तत्र तावत्येव पुलिने बहुगोपीजनसङ्कटे निरावरणत्वात् सौरततल्पाद्यभावाच्च प्रत्येकं ताभिः शतकोटिप्रमदाभिः सह संप्रयोगलीला नसङ्गच्छते सत्यं भगवन्मूर्त्तेरिव वृन्दावनभूमेरपि विभुत्वात् तिलमात्रप्रदेशस्याप्यतिस्फारत्वं सावरणविविधकुञ्जवत्त्वं गन्धमाल्यताम्बूलादिसहितविचित्रसौरतपुष्पतल्पवत्त्वं च दुर्घटघटनापटीयस्या योगमाययैव प्रकाशितं लीलान्ते पुनरावृतं चेति सुसङ्गतिकमेवैतत् ॥ ४६ ॥

केनचित्कृता विशुद्धरसदीपिका ।

एवं श्लिष्टैः पदैः पिशुनयेषु रहस्यवस्त्विति कविसम्प्रदायानुसारेण नित्यविहारं सूचयित्वा वैदग्ध्येन साधकानुग्रहमपि सूचयन् यथोचितं ता अपि रमयामासेत्याह । बाह्विति । बाह्वोः प्रसारेण यः परिरम्भस्तेन गाढालिङ्गनेनेत्यर्थः । करयोरूर्वोर्नीव्याः स्तनयोरालम्भनेन स्पर्शेन नर्मणा केवलेन नखाग्राणां पातेन च क्ष्वेल्या प्रस्तोभनादिरूपया क्रीडया अवलोकितेन हसितेन चेति वचनविपरिणामेन व्याख्येयं तत्र परिरम्भः कराद्यालम्भनं च प्रौढानां नखाग्रक्षतं च कान्तभाववतीनां नर्मप्रस्तोभने च पतिभाववतीनां विवेचनादीनाम् अवलोकितहसितानि च सहचरीगणस्येति व्रजसुन्दरीणामित्यनेन ब्रह्मनायकता व्रजलीलायामेवेति सूचितं यथा श्रीमत्सुधानिधौ—

अकस्मात्कस्याश्चिन्नववसनमाकर्षति परा
मुरल्या धम्मिल्ले स्पृशति कुरुतेऽन्या करधृतिम् ॥
पतन्नित्यं राधापदकमलमूले व्रजपुरे
तदित्थं वीथीषु भ्रमति स महालम्पटमणिः ॥

आपिच—

एकस्या रतिचौर एव चकितं चान्यास्तनान्ते करं
कुर्व्यात्कर्षति वेणुनान्यसुदृशो धाम्मिल्लमल्लीस्रजम् ॥
धत्तेऽन्या भुजवल्लिमुत्पुलकितां सङ्केतयत्यन्यया
राधायाः पदयोर्लुठत्यलमयं जाने महालम्पटम् ॥

तदेवमत्र तदाचरणं श्रीराधायामेकताननताप्रदर्शनेनोत्कर्षलाभायेति दर्शितं किं कुर्वन् रतिपतिम् उत्तम्भयन् काममुद्दीपयन्नित्यर्थः । कान्तभाववतीपक्षे पक्षान्तरे रतेश्चेतोरञ्जकतयाऽनुद्भीतेः पतिं परमप्रेमाणमित्यर्थः । तदुक्तमलङ्कारकौस्तुभे चित्तद्रवस्थायीभावः प्रेमाख्यः प्रथमो रस इति चित्तद्रवस्थायिभाव इत्यर्थः । उत्तम्भयन् वर्द्धयन्नित्यर्थः । अथवा शुद्धप्रेमविलासे श्रीमति महारासे सर्वासामेकमत्याय कामं उत् उच्चैरतिशयेन स्तम्भयन् निरस्यन्नित्यर्थः । नायिकानायकविलाससाधारण्येन प्रवृत्तमपि कामं निरस्यन् पारिशेष्यात्प्रेम्णैव रमयांचकारेत्यन्वयः । रमणमिदं परस्परमलक्षितमेव ज्ञेयम् ॥ ४६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

विहारमेवाह । बाहुप्रसारेति । बाहुप्रसारादिभिर्निमित्तभूतैः व्रजसुन्दरीणां रतिपतिमुत्तम्भयन् उद्दीपयन् रमयाञ्चकारेत्यन्वयः तत्र व्रजसुन्दरीणामेव रतिपतिमुत्तम्भयन्नित्युक्त्या भगवतो रतिरणसंमर्देऽपि तदनाक्रान्तत्वं दर्शितं तत्र बाहुप्रसारस्तु तत्परिरम्भतत्तदङ्गस्पर्शेन च तासां स्वीकरणाय कुसुमशरासनत्रस्ताङ्गुलिपञ्चसु मनः शरयुतभुजधनुर्द्वयप्रदर्शनाय वा कामद्वन्द्वसङ्ग्रामे बहुयुद्धप्रागल्भ्यसूचनाय वा तासां गौरीणामुरसि कुचशम्भुदर्शनेन तद्भूषणपञ्चफणमणिधरश्यामपीवरपरिघभुजभुजगोल्लासाद्या करालम्भनं पाणिस्पर्शनं तच्च लताकुञ्जवेदिमण्डपे पाणिग्रहणविधिप्रदर्शनाय स्तनालम्भनं तु पाणिग्रहणकर्मणि नखाग्रपातरोचनलिपिसंस्कृतमङ्गलकनककुम्भकुचयोः नखमणिदीपान्वितकरकमलधारणेन मङ्गलकलशोद्धवनाय नर्मादीनां च तत्रोचितमन्त्रभाषणादावुपयोगः सस्नेहालकस्पर्शस्तु अलकेषु तत्रोचितस्नेहार्पणरीतिसूचनाय परिरम्भोरुनीवीस्पर्शरमणादिना तदनन्तरशोभाग्यरात्र्युचितचेष्टासूचनं यद्वा स्मरसमरे मल्लयुद्धे प्रथमं कचग्रहणवत्करालभनम् इषुवृष्टिवद्भ्रूयुगधनुःस्फूर्जनेनापाङ्गाक्षयवाणवर्षोऽवलोकः अलकस्पर्शश्च तन्नागपाशस्य स्वहस्तगतकरणं परिरम्भो बाहुयुद्धम् ऊरुनीवीस्तनालभनं च तद्दुर्गप्राकारप्रावरणोपवनोद्यच्छ्रृङ्गाणां वशीकारः नर्मोक्तिः सिंहवादः नखाग्रपातः तदीयदुर्गचैत्यप्रासादादौ स्वीयः कनकपत्रे मणिलिखितो रोचनलिपिजयलेखः हसितं संग्रामोत्साहकसुरकृता पुष्पवृष्टिः नूपुरादिभूषणरवः शौर्योत्साहकजयवाद्यध्वनिः यद्वा कृष्णस्य भगवतो गोपीः परिरभ्य बाहुप्रसारेण कण्ठकरकुण्डलितालकोरुस्पर्शो विष्णोः पद्मालिङ्गय शङ्खपद्मचक्रगदाकरत्वद्योतकः स्तनालभनेन कञ्चुकबन्धवारणं तु हरेर्हरसेवकबन्धासहिष्णुतासूचकं नीवीस्पर्शनं तु काञ्चीसेवनपराया नीव्या मुक्तिप्रदानाय एवमुत्प्रेक्षा यथायथमूह्या एभिरुद्दीपनैरङ्गनाङ्गदुर्गेष्वनङ्गमुद्दीपयन् रमणेन स्ववशं चकारेत्यर्थः ॥ ४६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं सर्वप्रकारेण तासां जातपरस्परकेलित्वं सम्पाद्य लोपकरणरसविलासचित्रमाह । बाहुप्रसारेति । तत्राष्टविधालि-

एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ।
आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

रमणमादौ दर्शयति । दूरस्थितानामवयवविशेषेण स्प्रष्टुं प्रसारस्ततो बलादपि परिरम्भ आश्लेषः ततः करादीनामालम्भनान्यालिङ्गनानि तत्र करालम्भनं हस्तेन हस्तग्रहणम् एवं कचग्रहणार्थं मलकानां स्पर्शः बाहुनान्यार्थमूरुस्पर्शः पुष्टे रसे नीवीमोचनाय तत्स्पर्शः रसोद्गमनार्थस्तने नखाग्रपाता तत्क्षतताडनादयः कामोद्दीपकनखक्षतादिभिस्तत्तत्स्थाने स्थितस्य कामस्योद्बोधाभिधानात् क्ष्वेल्या प्रस्तोभनादि तत्पूर्वकान्येवावलोकनानि हसितानि च तैः रसस्थापकैः व्रजसुन्दरीणां रतिपतिं काममुद्दीपयन् रमयाञ्चकार ताः रमयामास संयुक्तः कामो रतिपतिः वियुक्तस्त्वग्निरूपस्तत्रापि तासां सुखमेव प्रकटितवान् नतु कामान्तेन विरतिमुत्पादितवानिति भावः । निवृत्तिपक्षे अविवेकावस्थायां बाहुप्रसारादिभिर्जातो यो रतिपतिः कामस्तमुत्तमत्वस्तमनयन् व्रजसुन्दरीणामुपनिषदः कर्म्मणि षष्ठी रमयाञ्चकार अधिकारिचेतसि कामनिवृत्तिपूर्वकनिबोधितमखण्डैकरसानन्दस्वरूपमात्मानं प्रकटितवानिति भावः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रमणमेव वर्णयति । बाह्विति । बाहुप्रसारश्च परिरम्भश्च करादीनामालम्भनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च व्रजसुन्दरीणां रतिपतिं काममुत्तम्भयन्नुद्दीपयन् ता रमयामास ॥ ४६ ॥

भाषाटीका ।

अब विहारको प्रकार को कहै हैं सो ऐसो हैकि भुजोंको फलाय वो अलिङ्ग न करवो गोपियों के हस्त केश जंघ कौंचनी स्तन इनको स्पर्श करनो परिहास करनो नखो को मारनो क्रीड़ा करनो मीठी चिन्तवन ते देखनो हसनो या प्रकार ते बृजनारीन के कंदर्प को जगावत रमण करावत भये ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महात्मनो विमुक्तचित्तात् ॥ ४७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अधुना प्रेमविशेषोद्रेकेणाग्रे क्रीडाविशेषार्थं विप्रलम्भरूपरसविशेषं वक्तुमारभते । एवमिति । उक्तवैदग्धीविशेषप्रकटनप्रकारेण महात्मनः आत्मारामादपि लब्धो मानः समानः चित्तसमुन्नतिलक्षणभावविशेषो वा याभिस्ताः तत्र हेतुः भगवत इति रसविशेषानुभावार्थं निजभगवत्तामाधुर्य्यप्रकटनादित्यर्थः । अत एव कृष्णात् विचित्रमहारसार्णवात् परमचित्ताकर्षकाद्वा अतो मानिन्यः सत्यः भुवि वर्त्तमानानां स्त्रीणां मध्ये आत्मानम् अभ्यधिकं परमश्रेष्ठं ता मेनिरे यद्वा भुवि विहारभूमाविति सर्वासां सामान्यमेवाभिप्रेतं तथापि स्त्रीणां तासामेव गोपीनां मध्ये प्रत्येकमात्मानमभ्यधिकम्मेनिरे तेनैव तथा रमणात् अतो मानिन्योऽपि बभूवुरिति पृथक् वाक्यं वा मदमानयोर्वक्ष्यमाणत्वात् वस्तुतस्तु परमविदग्धानां तासां विदग्धवरप्रियसन्तोषार्थं रसस्वभावकृतं सेवाविलासरूपमेव तद्द्वयम् ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अधुना न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्द्धत इति भरतन्यायात्प्रेमविशेषोद्रेकादग्रे क्रीडाविशेषवर्णनार्थं विप्रलम्भरूपरसविशेषं वक्तुमारभते एवमिति । महात्मनो दिव्यातिदिव्यसर्वनायकवृन्देभ्यः परमात् तत्र हेतुः भगवतः स्वयं भगवत इत्यर्थः । कृष्णात्तथैव प्रसिद्धात्तस्मादित्यर्थः । एवं पूर्वोक्ततत्प्रेमवशताप्रकारेण लब्धो मानः संमानः सौभाग्यं याभिस्तथाभूता भूत्वा मानिन्यो लब्धप्रणयमानाः सत्यो भुवि अन्यत्र चात्र च याः स्त्रियस्तासां सर्वासां मध्ये प्रत्येकमात्मानमेवाधिकं मेनिरे तं प्रति मानिन्यो बभूवुः स्त्रियः प्रातिगर्वितचित्ता बभूवुरित्यर्थः । तत्र मानः—

दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः ।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते ॥
अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् ।
अतो हेतोरहेतोश्च यूनोर्मान उदञ्चतीति ॥

रसशास्त्रानुसारात् गर्वश्च अन्यत्रत्यानाम् तादृशनायकालाभात् अत्रत्यानां तल्लाभेऽपि स्वस्वदृशसौभाग्यलाभामननात् यथोक्तं ।

सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयः ।
इष्टलाभादिना चान्यहेलनं गर्व ईर्य्यते इति ॥

एवम्—

सञ्चारयन्ति ये भावं ते तु सञ्चारिणो मताः ।
उन्मज्जन्ति निमज्जन्ति स्थायिन्यम्बुनिधाविवेति ॥

रसतन्त्रात् गर्वोऽपि तादृशतत्प्रेमविशेषस्य स्थायिनः सञ्चारिभावत्वात्तन्मय एव ज्ञेयः अस्य हि रसस्यैवमेव स्थितिरुत्कर्षश्चेति ॥ ४७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं महात्मनः असक्तचित्ताद्भगवतो हेतोर्लब्धो मानो गर्वो याभिस्ता मानिन्यो गोप्य आत्मानं भुवि स्त्रीणां मध्येऽभ्यधिकं सर्वोत्कृष्टं मेनिरे ॥ ४७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भुवि स्त्रीणां मध्ये स्वात्माधिक्येनाभ्यधिकं मेनिरे ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

महात्मनः दिव्यातिदिव्यसर्वनायकेभ्यः परमश्रैष्ठ्यात् । मानिन्यः सत्यो भुवि अन्यत्र च या स्त्रियस्तासां मध्ये आत्मानमभ्यधिकं मेनिरे । तस्मिन् प्रणयमानवत्यो बभूवुः स्त्रीषु च गर्वं धृतवत्य इत्यर्थः । अन्यत्रत्यानां तादृशकान्तालाभात् तत्रत्यानाञ्च तादृशसौभाग्यलाभामननादिति भावः ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

इयं तु लीलातिरहस्या वर्णनीया न भवति तथापि शुकदेवेन संक्षेपादुक्त्वोपसंह्रियते स्म । एवमिति । एवं प्रकारिकया बहुविधया लीलयेति वाग्विषयत्वाभावाद्गुर्गम्ययेत्येवंशब्दार्थः कृष्णाद्भगवतो लब्धमाना लब्धपूजाः महात्मनो महच्छब्दस्य बहुमानप्रदत्वात् मानिन्यः सम्मानवत्यः तद्दत्तमानवत्त्वात् स्त्रीणा मभ्यधिकं मेनिरे कृतार्था वयमित्येवं मेनिरे ॥ ४७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं संयोगशृङ्गारमुपपाद्य विप्रयोगमुपपादयितुं तासां मानमाह । एवमिति । पूर्वोक्तप्रकारेण भगवतः सर्वसदानसमर्थात् कृष्णात् सदानन्दात् फलरूपात् लब्धकामाः प्राप्तमनोरथाः सत्यः आत्मानमेव पूर्णं मेनिरे ननु भगवत्त्वं पूर्णं तेन वा स्वपूर्णतां ननु भगवानेवं कथं कृतवान् न्यूना एव कथं न संरक्षितास्तत्राह । महात्मन इति । भगवान्महानेवात्मा नह्यगाधे जले प्रविष्टः अमग्नो भवति घटो वा अपूर्णो भवति किञ्च आत्मानं स्त्रीणां मध्ये अभ्यधिकं मेनिरे भुवि चाभ्यधिकं भुवि स्त्रीणां मध्ये वा अत एव मानिन्यो जाताः नह्यस्मत्सदृशोऽन्याः सन्ति अतो स्मान् यदि प्रार्थयिष्यति तदा रसं दास्याम इति मानयुक्ता जाताः भगवद्धर्मास्तासु समागताः तथा सति यथा प्रार्थनया पूर्वं भगवान् वशो जातः एवं वयमपि भविष्याम इति रसार्थमेवं भावः ननु दोषरूपो भगवद्भावात् ॥ ४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अधुना न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्द्धत इति भरतन्यायाद्रसपुष्ट्यर्थं लीलाशक्त्यैवाविर्भावितं विप्रलम्भव्याजमाह । एवमिति । महात्मनः दिव्यातिदिव्यनायकवृन्देभ्यः श्रेष्ठात् भगवतस्तत्रापि कृष्णात् स्वयं रूपात् लब्धमानाः प्राप्तादराः श्रीकृष्णरमणप्राप्ता भुवि भूतलस्थानामेव स्त्रीणां मध्ये आत्मानं प्रत्येकमेव स्वमभ्यधिकं मेनिरे मानिन्यः प्रत्येकमहमेवातिसुभगेति माननान्मानिन्यः गर्ववत्यः ॥ ४७ ॥

केनचित्कृता विशुद्धरससदीपिका ।

इदानीं कामकलितमहाप्रेम्णोऽपि विरहानुबन्धित्वं दर्शयन् शुद्धभावस्य च तदनुक्तावप्यविकृतत्वख्यापनाय तदाश्रयविषयभूतायाः स्वाधीनपतिकायाः श्रीराधिकायाः परमसौभाग्यौत्कर्ष्यास्वादनलोभाकृष्टचेताः शृङ्गारभावस्य विप्रलम्भपोष्यत्वावगमेन पर्य्यवसाययन् विप्रलम्भलीलामुपन्यस्यति । एवमिति । प्रागुक्ताविदेशोऽयं भगवतः स्वनिष्ठकामिनः भगं श्रीकाममाहात्म्येत्यादिकोशात् लब्धो मानः सौभाग्याभिमानो याभिस्ताः पक्षे भगवतः निजभाग्यशेवधिपरमावधिरूपया श्रीराधया नित्ययुक्तादित्यर्थः । तदुक्तं श्रीहरिलीलामृताख्यतन्त्रे श्रीराधामुद्दिश्य—

एतस्य भाग्यरूपेयं परमानन्दविग्रहा ।
यन्नामस्मरणाद्देवि ! श्वपचोऽपि द्विजोत्तमः इति ॥

भगवत्पदे तन्त्रेणोभयार्थमिति श्रीमुनीन्द्राभिप्रायः उपक्रमोपसंहारादिभिर्ग्रन्थस्यास्य युगलोपासनापरत्वावगमादिति निर्णीतं भक्तिमञ्जूषायां कृष्णात्सदानन्दाकृष्टात् नित्यं तदेकपरत्वात् इत्यर्थः लब्धमानाः लम्भितसमानसौभाग्याः उपनताभितचेतःसम्मदाः निजप्राणेश्वरीसौभाग्योत्कर्षहर्षिता इत्यर्थः । महात्मनः परमोदारात् दिव्यातिदिव्यनायकवृन्देभ्यः परमात् पक्षे महाशयात् अनन्तकोटिलक्ष्मीविजित्वरगोपसुन्दरीगणप्रेमविषयोऽपि निजप्राणप्रियाप्रीत्याश्रयो यस्तस्मादित्यर्थः । तासां लक्ष्मीविजित्वरत्वं बृहद्गौतमीये यत्कलांकोटिकोट्यंशा लक्ष्म्याद्यास्त्रिगुणात्मिका इति अत एव श्रीगोपालचम्पूमनु—

लक्ष्मीरभितः स्त्रीतमा गोप्यो लक्ष्मीतमाः प्रथिताः ।
राधागोपीतमाचेत्तस्याः का वा समा वामेति ॥

आत्मानं दाम्पत्येनानुरक्तानां स्त्रीणां कामुकीमित्यर्थः त्वमुक्तं भक्तिभावप्रदीपे—

पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोगं प्रति या स्पृहा ।
स एव कामजो भावः कदापि न तदर्थक इति ॥

अत एव मानिन्यः प्रतिक्षणमभिमानवत्य इत्यर्थः । पक्षद्वयेऽपि श्लिष्टमिदं तथाहि प्रथमे पक्षे लब्धप्रणयमानाः तं प्रति मानवत्यो बभूवुः स्त्रियः प्रति गर्वितचित्ता बभूवुरित्यर्थः । तत्र मानः

दम्पत्योर्भाव एकस्मिन् सतोरप्यनुरक्तयोः ।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते ॥
स च हेत्वहेतुजत्वेनानेकविधः ॥

तदुक्तम्—

अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् ।
अतो हेतोरहेतोश्च यूनोर्मान उदञ्चतीति ॥

विस्तृतमाकरे गर्वश्चान्यत्रत्यानां तादृशनायकालाभात्तत्रत्यानां च तल्लाभेऽपि स्वसदृशसौभाग्यलाभामननात् यथोक्तम्—

सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयैः ।
इष्टलाभादिना चान्यहेलनं गर्व ईर्य्यत इति ।

उभयोरपि सञ्चारित्वाद्रसपोषकत्वे न विरोधः पक्षान्तरे

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ।
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्याम्
दशमस्कन्धे पूर्वार्धे रासक्रीडावर्णनं नामै-
कोनत्रिंशोऽध्यायः ॥ २९ ॥

केनचित्कृता विशुद्धरसदीपिका

भुवि विद्यमानानां स्त्रीणां प्रकटलीलापरिकराणां मध्ये अधिकं प्रकटाप्रकटोभयानुगतमात्मानं मेनिर इत्यर्थः शेषं पूर्ववत् ॥ ४७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं लब्धमानानां भगवद्रतत्वेनासम्भावितमानानामपि मानस्य भगवद्विच्छेदकत्वोपदेशायैव यन्मानवदाचरणं तदाह । एवमिति । एवमुक्तप्रकारेण भगवतः निरतिशयस्वतः सिद्धषडैश्वर्य्यसम्पन्नात् कृष्णात् सत्यानन्दस्वरूपात्स्वरतानां सर्वदोषकर्षणात् महात्मनो विभोः कान्ताधीनरमणासम्भवेनैव रमणस्यानुग्रहमात्रत्वेन मानायोग्यतां भगवद्रतानां तदनुग्रहलब्धमानानां नितरां मानदोषासम्भवं सूचयित्वा केवलमुपदेशार्थमेव मानानुकारमाह । आत्मानमिति । ता मानिन्य आत्मानं स्त्रीणां मध्ये ऽभ्यधिकं मेनिरे इत्यन्वयः ॥ ४७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं संभोगशृङ्गारमुपपाद्य न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्धत इति भरतेनोक्तत्वात् तत्पुष्टयर्थं विप्रयोगमुपपादयितुं पीठिकां रचयति । एवमिति । एवं पूर्वोक्तप्रकारेण भगवतः सर्वदानसामर्थ्यात् सदानन्दस्वरूपात् कृष्णात्परिपूर्णत्वेन न्यूनतामतिरहितत्वात् महात्मनः लब्धो मान आदरो याभिस्ताः सत्य अमानिन्यः सास्पदं मानवत्यो बभूवुः भुवि स्त्रीणां सर्वासां मध्ये प्रत्येकं सर्वा एवात्मानमभिसर्वप्रकारेणाधिकं च मेनिरे स्त्रिय अतिगर्वितमानसाः बभूवुः "दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः । स्वामीष्टाश्लेषवीक्षादिविरोधी मान उच्यते । अहेरिव गतिः प्रेम्णः स्वभावकुटिला ततः। सनिमित्तोऽनिमित्तो वा यूनोर्मान उदञ्चति तथा चास्मत्समा न सन्त्यन्या अतोऽस्मान् यदि प्रार्थयिष्यति तदा रसं दास्यामस्तथा सविनयास्मत्प्रार्थनया यथा भगवानस्मद्वशो जातस्तथा तत्प्रार्थनया वयमपि भविष्यामः इति रसार्थमेवायं भावो न तु दोषरूपो भगवद्भावनया कृतत्वादिति भावः । निवृत्तिपक्षे इत्थं प्रत्यगभिन्नस्य परमात्मनः औपनिषदत्वं प्रतिपाद्य ताभिरपि दुर्ज्ञेयतयैव प्रतिपादनमुपक्रमते । एवमुक्तप्रकारेण प्रतिपादिताद्भगवतो निरङ्कुशैश्वर्य्यवतः कृष्णात्शुद्धात्सच्चिदानन्दरूपान्महात्मनः प्रत्यगभिन्नात्परमात्मनो लब्धो मानः प्रामाण्यं याभिः ताश्च "अस्य महतो भूतस्य निःश्वसितमेतदृग्वेद" इत्यादिश्रुत्या स्त्रीणां श्रुतीनां भुवि जन्मभूमौ परमात्मनि प्रामाण्यवत्यः सत्यः आत्मानमधिकं मेनिर इत्यर्थः ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महात्मनः मानदातुः अमानिनः ॥ ४७ ॥

भाषा टीका ।

या प्रकार ते जितेंद्रिय श्रीकृष्ण भगवान् ते जब विन गोपिन को वडो मान प्राप्त भयो तब वे गोपी अपने मन में अभिमान कर के संसार में सब स्त्रियों ते अपने ही को अधिक मानत भई ॥ ४७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्सौभगमदं सौभाग्येन मदमस्वाधीनताम् मानं गर्वं केशवः कश्च ईशश्च तौ वशयतीति तथा सः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तेन निजवैदग्धीभरेण यद्वा उक्तेन अहमेवानेन रमितेति रमणप्रकारेण यत् सौभगं सौभाग्यं तेन यद्वा तं स्वप्रीत्यर्थकमपि सौभगेन मदं वीक्ष्य तस्य प्रशमाय अन्यथा स्वाधीनत्वाभासेन निजप्रेष्ठरासविलासासिद्धिः मानं च वीक्ष्य प्रसादाय मानरूपकेलिना सन्तोषाय प्रसादविशेषं कर्तुम् अन्तर्धानं विना रासादिप्रेमविशेषासम्पत्तेरिति विवेचनीयं यद्वा मदमानयोः प्रशमाय प्रशमः किमर्थं तदाह । प्रसादायेति । रासेन रसज्ञविशेषाय यद्वा अन्तर्धानद्वारा न पारयेऽहं निरवद्येत्यादिवा वक्ष्यमाणनिजतदधीनतातिशयावज्ञापनरूपाय यद्वा तस्मात् यत्सौभगं तेन

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

मदः मत्तता हर्षो वा तथा च विश्वः मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति तद्रूपं मानं मानसोल्लासविशेषं वीक्ष्य अत एव प्रकृष्टः शमः सुखं रासक्रीडात्मकं तस्मै प्रसादाय च अन्तर्धानेऽपि तदपरित्यागतद्भजनविशेषाद्यनुरञ्जनाभिव्यञ्जनाय तच्चाग्रे व्यक्तं भावि यद्वा प्रशमाय सुखाय यः प्रसादस्तस्मै अन्यत्समानम् एवं सर्वथानुरञ्जनविशेषार्थमेवान्तर्धानं नत्वात्मारामत्वादिनासूयया वेति ज्ञेयं विदग्धवर्य्यासु विदग्धशिरोमणे स्तथैव अत एवानेनाग्रे वक्ष्यते मया परोक्षं भजता तिरोहितमित्यादि तत्रैवेति साक्षात् कुत्राप्यगमनात् अकस्मादेवादर्शनाच्च तच्च तस्याशक्यं न स्यादित्याशयेन परमेश्वरत्वमाह । केशव इति ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिण्याम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तासां तादृशीनां तदिति तं सौभगमदं सौभाग्यहेतुकं गर्वं तथा च विश्वः मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति तं मानं च वीक्ष्य विशेषेण दृष्ट्वा तत्र गर्वपक्षे युक्त्यन्तरासाध्यं मत्वा मानपक्षे कृतैरप्यनुनयादेभिरसाध्यं दृष्ट्वेत्यर्थः । गर्वं प्रति प्रशमाय मानन्तु प्रति प्रसादाय प्रसादनाय तत्रैवान्तरधीयत अन्तरदधात् धीञ् अनादर इति हि दैवादिकः नत्वन्यत्र गच्छन् दृष्ट इत्यर्थः । अत्र वक्ष्यमाणानुसारेण श्रीराधयैव सहान्तर्द्धानं ज्ञेयं तच्च तस्य तदिच्छायां जातायां योगमाययैव सम्पादितमिति यद्यपि सहेतुकस्येर्ष्यामानस्यैव शान्तये क्वचित् नायकोपेक्षापेक्ष्यते—

हेतुजोऽपि शमं याति यथायोगं प्रकल्पितैः ।
सामभेदक्रियादाननत्युपेक्षारसान्तरैः ॥

इत्युक्तेः निर्हेतुकस्य प्रणयमानस्य तु विनैव प्रतीकारेण यत्किंचित्प्रतीकारेण वा तथापि तच्छान्त्यर्थमुपेक्षेयं परस्परगर्वसम्बन्धेन गाढतापत्तेः तत उभयभावशान्त्यर्थमेव सा प्रेमविपाकयोरपि तयोः शमनेच्छा च स्वेच्छामयलीलेच्छया युगपदेव सर्वा एव प्रति महारसदानमयरासेच्छया च तथा चायं विप्रलम्भः परमप्रेमार्थमेवोपयोक्ष्यतीति वक्ष्यते च नाहं तु सख्य इत्यादि अन्तर्धाने मूलं कारणं त्वेकयैव तया सह लीलायाः लालसैव अत्र केशव इति—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः ।
सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति

भारतीयवाक्यात्परमदीप्तिमानित्यर्थः । ततश्च तदन्तर्द्धाने सर्वासु शोभासु विद्यमानास्वपि तत्र सहसैव शोभाराहित्यं व्यञ्जितमिति ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किमत आह । तासामिति । तासां गोपीनां स चासौ सौभगेन सौन्दर्याभिमानेन यो मदस्तं मानं चित्तसमुन्नतिमस्वाधीनतामितियावत् तं च वीक्ष्य केशवः ब्रह्मरुद्रयोरपि नियन्ता भगवान् प्रशमाय तासां मदमानयोः प्रशान्तये प्रसादायोत्तरोत्तराभिनिवेशापादनरूपानुग्रहाय च तत्रैव पुलिनेऽन्तर्हितवान् ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सौभगमदं सौभाग्यनिमित्तं मदं मानमहङ्कारं मदाहङ्कारयोः प्रशमाय नाशाय प्रसादायानुग्रहाय च प्रकर्षेण प्रसादजननाय च अन्तरधीयत तासां दृष्ट्या अदृश्योऽभवदित्यर्थः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सौभगमदं सौभाग्यजनितगर्वं गर्वस्य प्रशमनाय मानस्य च प्रसादनाय मानप्रशमायेति नत्युपेक्षा रसान्तरैरिति रसशास्त्रोक्तत्वात् । अत्र प्रणयमानत्वेन उपेक्षाया अत्र योग्यतेति तत्कृतिगर्वसाहित्येन गरिष्ठत्वात् ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

अथ अभिमानेन पूर्णाभिः पुनः क्रीडा सुरसा न भवति चेत स्प्रवणत्वं हि रसपोषकं तथा च "न विना विप्रलम्भेन सम्भोगः पुष्यते इति" तत्रैवान्तर्धानलीलां चकारेत्याह। तासामित्यादि । तासां तं तथाविधं सौभगमदं तथाविधं मानं चित्तसमुन्नतिं वीक्ष्य प्रशमाय तयोरुपशमाय तत्रैवान्तरधीयत अन्तर्दधे कर्त्तरि कर्म प्रत्ययः यथा कर्मकर्ता तथा कर्तृकर्म च बोद्धव्यं यथा विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा इत्यादि तत्र एव तासामदृश्यो बभूवेत्यर्थः । प्रशमाय कीदृशाय प्रसादाय प्रसादरूपाय तयोः प्रशम एव प्रसादः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भे
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधनी ।

भगवांस्तु ऐक्येनैव रसं प्रयच्छन् बहिस्तिरोहितो जात इत्याह । तासामिति । मानः पूर्णता च न दोषाय स्त्रीषु भूमौ च यदाधिक्यज्ञानं स दोषो भवति तदनूद्य तत्परिहारार्थं तिरोहितं इत्याह । तासां तत्प्रसिद्धं पूर्वोक्तं सर्वोत्तमत्वलक्षणं सौभाग्यमदं वीक्ष्य तस्य मदस्य प्रशमाय अन्तरधीयत ननु भगवद्रमणेन हि तासामेवं भावः अतः स्वकृत एवेति कथं तिरोधानं कृतवानित्याशङ्क्याह । वीक्ष्य मानं च प्रसादाय तत्रैवान्तरधीयतेति मानापनोदनं कर्त्तव्यं मानस्त्वान्तरः अशक्यो हि बहिरपनोदनार्थं यत्नं करोति चकारात्स्वधर्मं च अतः प्रसादाय प्रथमतस्तासां पश्चात्स्वस्य च तत्रैव गोपिकासु यूथमध्ये वा अन्तर्द्धानं प्राप्तवान् नन्वेतद्द्वयमपि न कर्त्तव्यमुपेक्षिताः कुतो नेति चेत्तत्राह । केशव इति । यथा रजोगुणं ब्रह्मणो निवार्य तस्मै मुक्तिं दत्तवान् यथा वा शिवस्य तमोगुणं निवार्य एवमेतासामपि मदं मानं च निवार्य मुक्तिं दातुं तथा कृतवानित्यर्थः । कायिकतिरोभावोऽयं प्रथमाधिकारित्वाद्गोपीनाम् ॥ ४८ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मज-
श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे
षड्विंशाध्यायविवरणम् ॥ २६ ॥
(अन्य मते एकोनत्रिंशोऽध्यायः ॥ २९ ॥)

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च सर्वासु भगवतः साधारण्येनैव रमणात् या सर्वमुख्यतमा वृषभानुकुमारी सा सहसोद्भवदीर्ष्याकषायिताक्षी मानिनी बभूव ततो न्यूना अन्याः सौभाग्यगर्ववत्यो बभूवुरित्यद्भुते वैमत्ये सति भगवतैव यत्तत्र समाहितं तदाह । तासामिति । ताश्च सा चेत्येकशेषेण तासां व्रजसुन्दरीणां तस्या वृषभानुकुमार्याश्चेत्यर्थः क्रमेण तत् तं सौभगमदं मानं च वीक्ष्य स चासौ सौभगमदश्च तमिति समासो वा तं सौभगमदमिति वा पाठः । प्रशमाय तासां सौभगमदं प्रशमयितुं प्रसादाय तां मानवतीं प्रसादयितुं च केशवः को ब्रह्मा ईशश्च तावपि वयते प्रशास्तीति तस्य सौभगमदप्रशमने कः प्रयास इति भावः । केशान् वयते संस्करोतीति केशप्रसाधनादिना तस्याः प्रसादनायां रसिकशेखरस्य तस्य चातुर्य्यमस्त्येवेति भावः । अन्तरधीयतेत्यार्षम् अन्तरदधादित्यर्थः धीञ् अनादर इति दैवादिकस्य वा रूपम् अत्राग्रिमग्रन्थदृष्ट्या श्रीवृषभानुनन्दिनीं बलाद्गृहीत्वैवेति ज्ञेयं तत्रैव नत्वन्यत्र गच्छन्तान्भिदृष्ट इत्यर्थः । तत्र तस्य तदिच्छायां जातायां योगमाययैव सम्पादितम् ॥ ४८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
ऊनत्रिंशोऽपि दशमे सङ्गतः सङ्गतः सताम् ॥२९॥

केनचित्कृता विशुद्धरसदीपिका ।

आसामपि त्यागः कान्तभाववतीसमुदितत्वेनैव आभिर्गवेषणमपि तथैवेति स्वरसः दिव्योन्मादादिकं तु रसोत्कर्षस्वभावादेवेति हृदयम् ततश्च—

आत्मनः परिभोगाय योऽनुरागो गुणादिषु ।
स एव कामजो भावः कदापि न तदर्थकः ॥

तथा—

यदापि कामिनः साक्षात्पश्यन्ति परमेश्वरम् ।
तथा ग्राम्येऽपि भावोऽत्र विरहाद्यनुबन्धन इति ॥

भक्तिभावप्रदीपोक्तानुसारेण श्रीभगवत्यकृतत्वं परिहरन्नन्तर्द्धानलीलामाह । तासामिति । उभयत्र यथायोगं तत्पूर्वोक्तप्रकारं सौभगमदं सौभाग्यहेतुकं गर्वं पक्षे सर्वनाम्नां बुद्धिस्थे शक्तिरित्युक्तेस्तत् तस्या निजेश्वर्य्याः सौभाग्यहेतुकं हर्षं तथा मानं संमानं चित्तसमुन्नतिमिति यावत् वीक्ष्य विशेषेण दृष्ट्वा तत्रैव तासामेव कामजन्यभावप्रतिबन्धसीमायामित्यर्थः । नहि भगवानकृतज्ञो यतस्तादृशप्रेमवतीः परित्यज्यान्यत्र गच्छेत् किन्तु तासां कामभावस्वभावेन तिरोहितोऽयं श्रीराधासहितोऽप्यदृश्यो जात इति भावः । एवं च कामजभावाभासस्यापि प्रत्यूहनमुहितं पक्षे तत्रैव यस्मिन् क्षणे मानभ्रमो जातस्तस्मिन्नेव क्षण इत्यर्थः ततश्चाधीरत्वं तेन च तत्प्रीतिनिघ्नत्वं च दर्शितं यतः केशव इति—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः ।
सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति ॥

महाभारतीयनिर्वचनानुसारेण सहसान्तर्द्धाने सन्तमसमिव जातमिति दर्शितं यद्वा को ब्रह्मा ईशश्च तौ वाति ज्ञानप्रदत्वेन नियम्यत्वेन प्रेरयति सः "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वश" इति श्रीद्वितीयोक्तेः ततश्च रजस्तमोऽधिष्ठात्रोस्तयोर्वशीकारित्वेन तत्कार्य्ययोर्मदमानयोर्वशीकारोऽप्यर्थसिद्ध इति दर्शितं तेन च तास्वनुग्रह एव स्पष्टीकृत इत्याह । प्रशमाय प्रसादायेति । मदमानयोरत्यर्थलभ्यं तत्प्रशमरूपाय प्रसादायेत्यर्थः । तदुक्तम्

हेतुजोऽपि समं याति यथायोगं प्रकल्पितैः ।
सामभेदक्रियादाननत्युपेक्षारसान्तरैरिति ॥

अत्रापीति शब्दान्निर्हेतुकस्य प्रणयमानस्य विनैव प्रतीकारेण यत्किञ्चित्प्रतीकारेण वा शान्तिरिति स्थितावपि परस्परगर्वसम्बन्धेन गाढतापत्त्या सुखभङ्गः स्यादिति तदनुग्रहायैवेयं लीलेति ज्ञेयम् अत एवोक्तं श्रीगोपालचम्पूमनु अन्तर्हितवानेवं नान्तर्हितवानिति वक्ष्यते च स्वयं भगवता मया परोक्षं भजता तिरोहितमिति वस्तुतस्तु प्रेयसीभावाक्रान्तचेतसां सचेतसामपि दूरतरं वरीवर्त्ति श्रीराधारमण इति ख्यापनाय आत्मनश्च तस्यामेवैकस्यां परमासक्तिद्योतनाय तासां च तस्यामेव सख्यतृष्णातिशयप्रदर्शनाय विरहलीलेयं श्रीभगवतानुष्ठीयते स्तूयते च मुनीन्द्रादिभिः तस्यां च परमानुकूलस्य तस्य सोऽतिशयोऽतिशयेन रोचते तास्वपि तत्तद्भावाभिमानिनीष्वनुग्रह एवेति संक्षेपः ततश्चान्तर्धाने मूलं कारणं निभृतनिकुञ्जेषु श्रीराधाया वक्ष्यमाणक्रीडैवेति सिद्धं तदेकपरवश्यं तस्य तस्याश्च स्वाधीनपतिकात्वमिति

इतिश्रीभागवत रासपञ्चाध्यायीव्याख्याने
विशुद्धरसदीपिकायां प्रथमोऽध्यायः ॥ १ ॥
मूलस्य एकोनत्रिंशोध्यायः ॥ २९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं मानदोषबोधाय तदनुकारं दर्शयित्वा भगवतोऽपि स्वप्रेमास्पदालये भक्तहृदये मानादिदोषासहिष्णोस्तद्दोषोपशमनाय तिरोधानेन सेवमानस्य भक्तानुपेक्षामाह । तासामिति । तासामतिप्रेमवतीत्वेनासम्भावितमदानां तज्जनोपदेशानुशीलितं सौभगमदं मानं च वीक्ष्य केशवः—

कः प्रजापतिरुद्दिष्ट ईशोऽहं सर्वदेहिनाम् ।
आवां तदङ्गसम्भूतौ तस्मात्केशवनामवान् इति ॥

शिववचनात् ब्रह्मेशयोरपीशस्य दीनेष्वशक्तेषु रोषदोषासंभवात् कृपया तासां सौभगमदशमनाय तासु प्रसादायानुग्रहाय तत्रैव तास्वेवान्तरधीयत यद्वा तासां तत्सौभगमदं तस्याः प्राणप्रियाया मानं च वीक्ष्य तासां तन्मदप्रशमाय तस्याः प्रसादाय तत्रैव तत्सहैवान्तरधीयतेत्यन्वयः ॥ ४८ ॥

श्रीश्रीशौ राधिकाकृष्णौ सखीः स्वीयान् गुरून् द्विजान् ।
गिराण्दुण्ढि विदो भक्तान् वन्दे विश्वं हरेर्वपुः ॥

इतिश्री चन्द्रभागाख्य विष्णुसख्यापन्न श्रीरामनारायणविरचितायां ।
श्रीमद्भागवतमहापुराणदशमस्कन्धान्तर्गत
श्रीरासपञ्चाध्यायीव्याख्यायां भावभाव-
विभाविकायां प्रथमाध्यायव्याख्या समाप्ता ॥ १ ॥
मूलेएकोनत्रिंशः ॥२९॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततो भगवान् यत्कृतवांस्तदाह । तासां स्वात्मानमभ्यधिकं मन्यमानानां सौभगान्मानाज्ञातमस्वाधीनतापादकं मानस्य गाढावस्थारूपं येनादरणीयोऽपि तिरस्क्रियते तादृशं मदं तद्धेतुभूतमनुनयाद्यसाध्यं चित्तसमुन्नतिरूपं मानं च वीक्ष्य विशेषतस्तदुपगम्य मदस्य निवृत्त्यर्थं तासां प्रशमाय चित्तोन्नतिवारणाय मानशान्तये तासां प्रसादाय प्रसन्नतया स्ववश्यतापादनाय केशवस्तत्रैवान्तरधीयत, नत्वन्यत्र गच्छन् कयाचिदपि दृष्टः केशा अंशवो यस्य सन्तीति भारतीयव्युत्पत्त्या कृष्णकान्त्या तासां शोभा चन्द्रकान्त्या नारायणस्येव या शोभासीत्तासां तदन्तर्धाने निवृत्तेति व्यज्यते यद्वा कश्च ईशश्च तौ वशयतीति केशवस्तथा च ब्रह्मरुद्रयोरपि रजस्तमोपशमनेन वशीकरणसमर्थस्य तासां मदमाननिरसने वशीकरणे किं चित्रमिति भावः ननु मदमाननिरासायोपायान्तरं कुतो न रचितवानितिचेदसम्भवात् नहि प्रत्येकं प्रसादनं सम्भवति एकस्याः प्रथमं प्रसादने सैवादौ किमिति प्रसादितेत्यपरस्या मानाधिक्योद्भवात् तस्मात्सर्वाः प्रति रासरसं दातुं प्रेमवर्द्धनार्थं विप्रलम्भः यद्वा सर्वासां मदमानयोः प्रशमाय प्रेयस्याः श्रीराधाभिधायाः सख्याः प्रसादाय वक्ष्यमाणग्रन्थानुरोधेन तया सहान्तरधीयत केशान् वपते संस्करोतीति केशवस्तथा च केशप्रसाधनादिवद्दुर्धोपायविधाने परमचतुर इति भावः । निवृत्तिपक्षे तासां श्रुतीनां यः सौभगमदस्तं वीक्ष्य मानं स्वास्मिन्ननन्यसाधारण्यं च वीक्ष्य दुरापत्वख्यापनाय मदस्य प्रशमाय "नावेदविन्मनुते तं बृहन्तमिति श्रुत्या श्रुतिरूपमानातिरिक्तमानागम्यत्वं ख्याप्यते तेन तासां प्रसादाय तत्रैव तत्तदन्तःकरणवृत्तिष्वेवान्तरधीयत सर्वप्रत्ययसाक्षित्वेनैवावगन्तुं शक्यतां प्राप्त इत्यर्थः । तथा च श्रुतिः यदि मन्यसे सुवेदेति दहमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं नो न वेदेति वेद च अविज्ञातं विजानतां विज्ञातमविजानतां प्रतिबोधविदितमतमित्याद्याः अत्र ब्रह्मणो दुर्बोधत्वं श्रुत्येकगम्यत्वं सर्वप्रत्ययसाक्षित्वेन वेद्यत्वं च दर्शितम् ॥ ४८ ॥

इतिश्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपाद
शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र
सूरिकृतायां भागवतगूढार्थदीपिकायां
दशमस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासां तत्सौभगमदं स्वकीयसौन्दर्येण मदं स्वस्वामिविवेकविप्लावकं मत्तत्वम् मानं गर्वं च वीक्ष्य केशवः कश्च ईशश्च तौ ब्रह्मशिवौ नियम्यौ स्तोऽस्य स केशवः "केशाद्वः" इति वः "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" इति तयोस्तन्नियम्यत्वोक्तेः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकोनत्रिंशाध्यायार्थप्रकाशः ॥ २९ ॥

भाषा टीका ।

तदनंतर श्री केशव भगवान् उन गोपियों के वा सौभाग्य तथा वा अभिमान को देख विन के मद के शांति के अर्थ विन पै कृपा करवे के अर्थ उहां ही अंतरधान होगये फिर नहीं दीखे ॥ ४८ ॥

इति श्री भागवत दशमस्कन्ध उन्तीस में अध्याय
की भाषा टीका समाप्त ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे एकोन त्रिंशोऽध्यायः ॥२९॥

अथ त्रिंशोऽध्यायः ॥

——:*:——

श्रीशुक उवाच ॥

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणम् ।
उन्मत्तवन्न नियतं भ्रमन्तीभिर्वने वने ॥

अचक्षाणा अपश्यन्त्यः ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तदन्तर्धानकथनेन श्रीवादरायणेरप्यार्तिभरोदयात् कथाविच्छेदेन मध्ये अध्यायापातः श्रीयुक्तः शुक उवाचेति श्रीभगवदन्तर्धानेन तस्यापि शोकोदयाच्छुकवदव्यक्तमधुरोक्तेः एवमग्रेऽपूर्वं क्षणात् स्वस्थः सन् विलपन्निवाह । अन्तरिति । सहसैवान्तर्हित इति । अन्तर्धानस्य प्रकाराद्यतर्कणात् अतर्किते तु सहसेत्यमरः अयं तापाधिक्येऽपि हेतुरूह्यः व्रजस्याङ्गना इति तासां तदेकप्रियत्वेन विरहतापस्यौचित्यमाधिक्यं चाभिप्रेतं यूथपं मत्तगजेन्द्रं करिण्य इवेति रत्यां विदग्धो हि गज इत्यादिवचनानुसारेण तदेकावलम्बनत्वेन वा तासां तद्विच्छेदात्तापाधिक्ये दृष्टान्तः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदन्तर्धानकथनेन श्रीवादरायणेरप्यार्त्तिभरोदयात् कथाविच्छेदेनाध्यायापातः । तदेवं ज्ञातदुःखत्वेऽपि तासामेकां सर्वतः परमां यामादाय श्रीभगवानन्तर्हितः तस्याः सौभाग्यं क्षणादनुसन्धाय धैर्यमवलम्बमान आह । अन्तरिति । सहसैवान्तर्हित इति । अन्तर्धानस्य प्रकाराद्यतर्कणात् । अतर्किते तु सहसा इत्यमरः अयं तापाधिक्ये हेतुरूह्यः । व्रजस्याङ्गना इति तासां तदेकप्रियत्वेन विरहतापस्यौचित्यमाधिक्यञ्चाभिप्रेतम् । यूथपं मत्तगजेन्द्रं करिण्य इवेति तदेकालम्बनत्वेन तासां तद्विच्छेदात्तापाधिक्ये दृष्टान्तः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अचक्षाणा अदर्शनेन प्रतिदिशमीक्षमाणाः ॥ १—२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथान्तर्हितभगवद्दर्शनजतापतप्तानां भगवतो गत्यनुरागासितविभ्रमेक्षितालापविहारविभ्रमापहृतचित्तानामुन्मत्तायितानां च गोपीनां तच्चेष्टानुकरणं तावच्चेतनाचेतनाविभागेन प्रश्नपूर्वकमन्वेषणप्रकारमुपलक्षणतस्त्वन्तरासक्त्यध्यवसायप्रकारं स्त्र्यन्तरस्यापि तद्वन्मदमानप्रशमनार्थमन्तर्धानं तया सह पुनरन्वेषणप्रकारं चाह त्रिंशेन । अन्तर्हित इति । भगवत्यन्तर्हिते सति तमवीक्षमाणाः यूथपमपश्यन्त्यः करिण्य इव सहसाविमर्शेनैवान्वतप्यन् ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरेव योगैश्वर्यमौत्पत्तिकं नान्यस्येति ज्ञापनभावेन गोपस्त्रीणां श्रीकृष्णे भक्त्यतिशयं कथयत्यस्मिन्नध्याये । तत्र गोपीनां सन्तापादिप्रकारं प्रवक्ति शुकः । अन्तर्हित इति । यूथपं गजेन्द्रम् ॥ १ ॥

श्रीमज्जीवगोस्वामीकृतक्रमसन्दर्भः

॥ १ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तदनन्तरं यदभूत्तदाह । अन्तर्हिते इत्यादि । अचक्षाणा अपश्यन्त्यः सहसैव अतप्यन् सन्तापं चक्रुः ॥ १ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्वानन्दस्थापनार्थाय लीला भगवता कृता ।
सबाह्यो जनितः पुष्टो यथान्तर्निर्विशेत्पुनः ॥
तदर्थं भगवांस्तासु लीलया सहितोऽविशत् ।
चत्वारोऽत्र निरूप्यार्थाः रसासक्तिर्हरेः क्रियाः ॥
गर्वाभावश्च तत्रादौ निरूप्यन्ते क्रमात्त्रयः ।
उद्देशतो लक्षणतः फलतश्च यथायथम् ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

सप्तविंशे तिरोधानाल्लीलान्वेषणतत्पराः ॥
रसमन्तर्गतं चक्रुर्गोपिका इति रूप्यते ॥

पूर्वाध्यायान्ते भगवतास्तिरोभाव उक्तः ततस्तदनन्तरं प्रथमतः तासां रसासक्तचित्तानामापाततो महांस्तापो जात इत्याह । अन्तर्हिते भगवतीति । भगवति अन्तः प्रविष्टे षड्गुणैश्वर्यसहिते यावदन्तरनुसंधानं न कृतवत्यः तावत्सहसैव अकस्मादतप्यन् अन्तर्विचाराभावे हेतुः । व्रजाङ्गना इति । तापे हेतुः तमचक्षाणा इति तापः सहज एव स्थितः कामात्मा तद्दर्शनस्पर्शनादिभिः शान्तो भवति यदा पुनः पूर्वसिद्धं बहिर्दर्शनं न जातं तत्ताप उचित एव तासां स्पर्श एव मुख्य इति ज्ञापयितुं दृष्टान्तमाह । करिण्य इवेति । यूथपो महामत्तगजः रतिं गज एव जानातीति वात्स्यायनः रत्यां विमर्द्दे गज इति विवृतश्च सन्ति च सिंहाः तथात्र कालः अतः करिणीनां यूथपादर्शने महानेव क्लेशः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रिंशे तु विरहोन्मत्ताः कृष्णं पृष्ट्वा नगान् स्त्रियः ।
तल्लीलामनुचक्रुस्ताः सम्भुज्य स च तां जहौ ॥

अचक्षाणाः अपश्यन्त्यः ॥ १ ॥

केनचित्कृता विशुद्धरसदीपिका ।

एवं च प्रागेव तदन्तर्द्धानकथनेन श्रीबादरायणेरप्यार्त्तिभरोदयात्कथाविच्छेदेनाध्यायापातः तदनन्तरं च सर्वतः परमां परमरमां यामादायान्तर्हितस्तस्या निजस्वामिन्याः सौभाग्योत्कर्षानुसन्धानहर्षितस्तासां तासां चेष्टितादिभिस्तदेव दर्शयन् श्रीशुक इव लीलागानेन तावपि हर्षयन् श्रीशुक उवाच । अन्तरिति । सहसैवान्तर्हित इत्यन्वयः तत्प्रकाराद्यतर्कणात्सहसेति अयं तापाधिक्ये हेतुः यतो व्रजाङ्गनाः तदेकजीवनादित्वेन प्रसिद्धाः ननु प्रीतेरन्योऽन्यनिष्ठत्वात्तस्य कथं न तापो जात इत्यत आह । भगवतीति । भगो भाग्यं तच्चास्य श्रीराधैव तद्वति नित्ययोगे मतुप्तत्सहित इत्यर्थः । तस्य तापाभावे हेतुरयम् अन्तर्धानमप्यन्ततः सुखनिधानमेव भविष्यतीत्यर्थः । ननु कान्तभावास्तप्यन्तु नाम सख्यस्तु सुखमेवानुभवेयुरिति चेत्सत्यं किन्तु अचक्षाणाः अपश्यन्त्य इत्यर्थः निजप्राणेश्वर्याः सौभाग्योत्कर्षस्य परोक्षत्वात्तासामपि सन्तापः सम्भवेदेवेति भावः । एवं च तदेकालम्बनत्वेन तासां तासां च तापाधिक्ये दृष्टान्तः । करिण्य इव यूथपमिति । तत्र पूर्वासां परमप्रेष्ठतमकान्तस्पर्शस्यालम्भेनान्यासां च यूथपतिक्रीडनादिदर्शनालाभेनेति यथायथमूह्यं सजातीयैः कुलं यूथमिति कोशात्सजातीयत्वेन प्राणसखीत्वमेव श्लेषेण निर्दिष्टमिति दिक् ॥ १ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥
द्वितीये कृष्णचेतोभिर्विह्वलोन्मत्तबुद्धिभिः ।
वर्णितं प्रियचेष्टाभिर्वनेषु प्रियमार्गणम् ॥

प्रियान्तर्धाने तत्प्रेयसीनां खेदमाह भगवान् शुकः । अन्तर्हित इति । अत्र श्लेषेणान्तर्हिते भगवति अन्तर्हिते सति व्रजाङ्गनास्तमचक्षाणा यूथपमचक्षाणाः करिण्य इव सहसैवातप्यन्नित्यन्वयः तत्रान्तः स्वमनसि हितं स्नेहो यस्मिन् यद्वान्तर्मनसि स्वविषयकं हितं यस्य यद्वान्तर्हृदयात् हितो विच्छेदकमदापहरणेन सर्वथोपकारकः तस्मिन्नन्तर्हिते भगवति अन्तर्हिते ऽन्तर्धानङ्कृते सति तत्र भगवति अन्तर्हिते इत्यत्रायं ध्वनिः नहि भगवतो विभुत्वेन कुत्रापि गमनेनादर्शनं मयापरोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रिया इति वक्ष्यमाणभगवद्वचनाच्च किन्तु स्वेच्छया स्वभगव्यक्तस्य स्वेच्छयैव तिरोधानमिति तथा च तस्मिन्नन्तर्हिते तमचक्षाणाः सहसैवातप्यन् तमानन्दघनं विना बहिरन्तर्व्याप्तविरहानलतप्तमनसः पूर्णचन्द्रमपि द्वादशरूपतां विहायैकतापन्नप्रलयार्कमिव किं शुकादीनि कुसुमानि दहनमिव स्वारुणवसनानि तप्तानि शुष्कस्वतनुव्याप्तदावज्वालवन्मन्यमानास्तप्ता अभूवन् युक्तं चैतत् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः सर्वेषां चन्द्रादीनां यदानन्दमात्रयाल्हादकत्वं तदन्तर्धाने जीवनस्याप्यसम्भाव्यत्वात् किमु वाच्यं तापाधिक्यस्य किञ्च "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमुत प्राणस्य प्राणं मनसो ये मनो विदुरि" त्यादिश्रुतेः प्राणवियोगे एव जीवनाभावदर्शनात्किमु वाच्यं प्राणप्राणविरहे ॥ १ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

त्रिंशे विरहसन्तप्तचेतसां गोपयोषिताम् ।
तन्मयत्वमुखप्रश्नमुखलीला निरूप्यते ॥

अथ भगवदन्तर्धानानन्तरं जातां तासां दशां वर्णयिष्यन्नादा रसासक्तचित्तानां भगवत्सखीनामकस्मात्प्रेष्ठादर्शनजन्यं महान्तं तापमाह । अन्तर्हित इति । भगवति पूर्णाखिलैश्वर्य्यसंपन्ने परमावधिभूते सहसैवाकस्मादेवान्तर्हिते ऽदर्शनङ्कृते सहसैव तं भगवन्तमचक्षाणा अपश्यन्त्यः सहसैवान्तरतप्यन्त निःसीमसन्तापवत्यो जाताः रङ्कः सहसा प्राप्तसार्वभौमाश्रियं सहसैवाचक्षाणो यथा सन्तप्यते तद्वत् यतो व्रजाङ्गनाः बालभावमारभ्य तस्मिन्नेवासक्तस्वान्ता इति भावः यद्वा अन्तर्हिते अन्तःकरण एव तासां प्रविष्टे सति बहिस्तं भगवन्तमचक्षाणाः बहिर्मुखत्वादन्तश्चाचक्षाणा अतप्यन् यतो व्रजाङ्गनाः अन्तरविचारकुशला इत्यर्थः । न च तासां कामात्मत्वं स्थितं कामात्मनां दर्शनादिना शान्त्युपलम्भात् अतस्तासां परमप्रेमवतीनां दर्शनस्पर्शनादिकमेव मुख्यमिति द्योतयितुं दृष्टान्तमाह । करिण्यः हस्तिन्यः यूथपं महामत्तगजमचक्षाणा यथा तप्यन्ति तद्वत् करिणीनां यथा गजदर्शनाद्यभावे

गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ।
आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥२॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

क्लेशो भवति तथा नान्यास्वामित्यतस्ता एव दृष्टान्तीकृताः निवृत्तिपक्षे अथ विजानतामविज्ञातत्वे तदपेक्षया अन्तर्हिते भगवति सहसैव तं परमात्मानमचक्षाणाः साक्षात्प्रतिपादयितुमशक्ताः स्वजन्यवृत्तिप्रतिफलितचैतन्येन विषयीकर्तुमशक्ताश्च व्रजाङ्गनाः श्रुतयः अतप्यन्त तथा बभूवुः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरहे भगवद्वियुक्तानां गोपिकानां चेष्टितं वर्णयति । अन्तर्हिते इति । अचक्षाणाः अपश्यन्त्यः ॥ १ ॥

भाषा टीका

श्रीशुकदेवजी बोले श्रीभगवान् के अकस्मात् अन्तर्धान होते ही सब व्रजाङ्गना विन के दर्शन के न होवे ते ऐसी व्याकुल होगई जैसे वन में हाथिके विना उसकी हथिनी दुखी होवै है ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गत्या चानुरागस्मिताभ्यां विभ्रमेक्षितानि सविलासानिरीक्षणानि तैश्च मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमा अन्ये विलासास्तैश्च रमापतेर्गत्यादिभिरेतैराक्षिप्तान्याकृष्टानि चित्तानि यासां ता अतस्तस्मिन्नेवात्मा यासां तास्तस्य विविधाश्चेष्टा जगृहुस्तदनुकरणेनाक्रीडन् ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तापमेवाभिव्यञ्जयति । गत्येत्यादिना पद्याधिकाध्यायद्वयेन गत्येति कायिकी चेष्टा सर्वोपलक्ष्यते अनुरागेण स्मितविभ्रमेक्षितानि च तैः मानसी तेषामनुरागकृतत्वात् मनोरमैरालापादिभिः मनोरमालापेन वाचिकी मनोरमविभ्रमैस्त्रिविधैव तत्तत्समुचितत्वात् विहारो गोवर्द्धनोद्धरणादिर्लीला वेणुवादनादि वा विभ्रमः शृङ्गारचेष्टाः तथाचोक्तं चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मत इति एषां यथोत्तरं चेष्टा तैः पूर्वाचरितैराक्षिप्तचित्ताः ततश्च तदात्मिकास्तन्मय्यः सत्यः तदात्मिकाश्च बभूवुरिति पृथग्वाक्यम् अनुकरणतन्मयत्वयोरपि वक्ष्यमाणत्वात् प्रकृष्टो मदो यासां ता इति पूर्वोक्तप्रकृष्यमाणाभिप्रायेण यद्वा प्रमदो हर्षः आनन्दरूपा अपि परमार्त्ताः सत्य इति भावः । रमायाः लक्ष्म्याः पत्युरिति परमवैदग्धी तया च गत्यादीनामुत्तमतापि सूचिता यद्वा रमा श्रीराधेति पूर्ववत् इति वक्ष्यमाणतत्साहित्यं सूचितं तास्ताः परमानिर्वचनीयाः इति तदनुकरणस्याशक्यत्वमुक्तं तथापि जगृहुः यद्वा पूर्वोक्ताः सर्वा विविधचेष्टा अयं च प्रेमविलासो नागरीणां स्वाभाविक एव अत एव प्रियानुकरणं लीलेति नाट्यशास्त्रे लीलेत्युच्यते यद्वा तास्ताः विचेष्टाः कृष्णस्य तास्ता लीलाः कर्त्र्यः प्रमदाः कर्मभूताः जगृहुः कथम्भूताः प्रमदाः तदात्मिकाः तच्चित्ताः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तापमेवाभिव्यञ्जयति । गत्येत्यादिना पद्याधिकाध्यायद्वयेन । गतिः सामान्या अनुरागः स्वविषयकः कान्तयोग्यो भावः स्मितं विभ्रमेक्षितानि च तैः । विभ्रमोऽत्र भ्रूप्रभृतीनां तत्तन्मधुरचेष्टाः विहारः शृङ्गारचेष्टा उत्तरो विभ्रमः शृङ्गारभावविशेषः । तथाचोक्तं चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मत इति । तत्रानुरागचित्तवृत्त्यनवस्थाने मानसे गतिस्मितविभ्रमयुक्तेक्षितविहाराः कायिकाः । आलापो वाचिक इति ज्ञेयम् । एतदुपलक्षणत्वेनान्येऽपि भावा ज्ञेयाः । अत्र च गतेः सामान्यत्वेन पृथगुक्तिः । स्मितादिकयोरनुरागारम्भमात्रजायमानत्वेन तत्समुदितोक्तिः आलापविहारयोर्विभ्रम जन्मनैव जायमानत्वेन तत्समुदितेति । तैर्गत्यादिभिस्ताभिः समेताभिरित्यादिवर्णितैः पूर्वाचरितैराक्षिप्तचित्ताः ततश्च तदात्मिकास्तन्मय्यः सत्यः प्रमदास्तास्ता बाहुप्रसारेत्यादिभिः पूर्वोक्ताः सर्वा विविधा चेष्टा जगृहुः प्राप्ताः तत्र प्रमदाः यौगिकार्थपुरस्कारेण जातित एव प्रकृष्टमदयुक्ताः किं पुनस्तत्प्रेमवत्यस्ता इत्यर्थः । रमायाः सर्वरूपगुणमाधुर्यैश्वर्यसम्पदधिष्ठातृशक्तेः पत्युरध्यक्षस्य इति सर्वातिशायिता सूचिता । यद्वा । रमा श्रीराधा इति पूर्ववत् । इति वक्ष्यमाणतत्साहित्यं सूचितम् । तास्ताः बाहुप्रसारेत्यादिभिः पूर्वोक्ताः सर्वाः विविधचेष्टा जगृहुः प्राप्ताः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गत्येति । रमापतेर्गत्या अनुरागस्मिताभ्यां यानि विलासनिरीक्षणानि तैश्च मनोरमालापाश्च विहाराः क्रीडाश्च विभ्रमा अन्ये विलासाश्च तैराक्षिप्तान्याकृष्टानि चित्तानि यासां ता अत एव तदात्मिकाः तस्मिन्नेवात्मा चित्तं यासां तास्तज्ज्ञानप्रचुरा इत्यर्थः । अत एव भगवतस्तास्ता विविधाश्चेष्टा जगृहुरनुचक्रुः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गत्या बालसिंहखेलनगमनेन अनुरागेण स्नेहेन उक्षितानि क्षितानि तैः राक्षितानि सम्पर्कं गतानीक्षितानि निरीक्षणानि अनुरागस्मितराञ्जतेक्षितानि तैः मनोरमौ आलापविहारौ तयोर्विभ्रमैः शृङ्गारैः आक्षिप्तचित्ताः आकृष्टमनसः या या भगवता

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रचिता विशिष्टचेष्टास्तास्ता जगृहुः त्यरूरुपन् तस्मिन् कृष्णे आत्मा मनो यासां तास्तथा ग्रहणम् अनुकरणं यत्तदात्मिकाः तदाकारमिता इति पाठार्थौ सुष्ठुतामादधाते ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गत्येत्यादि प्रकरणम् । अत्र रमापतेः सर्वरूपगुणमाधुर्यैश्वर्यसम्पदधिष्ठातृशक्तेः पत्युरधोक्षजस्येत्यर्थः । अथवा तास्ता वाहुप्रसारेत्यादिभिः पूर्वोक्ताः तत्र तदात्मकत्वमभिव्यञ्जयति ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः

तद्दर्शनसमकालमेव सौभगमदो मानश्च शान्तः तत्प्रकारमाह । गत्येत्यादिद्वाभ्याम् । रमापतेः श्रीकृष्णस्य गत्यादिभिराक्षिप्तचित्ताः सत्यः प्रमदास्तास्ता विचेष्टा रमापतेरेव तास्ता लीला जगृहुश्चेतसि दधुरित्यर्थः ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

यदा पुनः स तापः अन्तःप्रवेष्टुमैच्छत् तावता भगवल्लीला अन्तः प्रविष्टा तापं दूरीकृत्य स्वयमेवाविर्भूतेत्याह । गत्येति । ताः भगवदीयैः कायवाङ्मनोभिर्वशीकृताः तद्भावमापन्नाः तास्ता एव भगवच्चेष्टा जगृहुः प्रथमतः कायिकीमाह । गत्या कायचेष्टया वशीकृताः इन्द्रियसहितमनश्चेष्टया वशीकृता जाता इत्याह । अनुरागेति अनुरागः स्नेहो मानसः तत्पूर्वकं स्मितं तस्य विलासः स्वनिष्ठतात्याजनार्थः अन्यथैवं सति ज्ञानमेवोदयं प्राप्नुयात् अतः स्मितेन मन्दहासेन ईषद्विमोहिताः न बहिर्गताः नान्तः स्थिताः किन्तु भगवति मध्ये स्फुरिते तद्धर्मेषु च समागताः अनुरागस्मितेन सहितो यो विभ्रमो विलासः अलसवलितादिः तत्सहितानीक्षितानि सर्वे एव कटाक्षाः वाचिकैरपि विमोहमाह । मनोरमालापेति । मनोरमयतीति मनसि रमते इति वा मनोरमः योऽयमालापः भगवतो गुह्यभाषणानि केवलवाक्यस्य चित्ताक्षेपकत्वं न भविष्यतीति प्रामाण्यावधारणं स्त्रीणां प्रकारान्तरेण न भवतीति फलमेवादौ निरूपितं सुखार्थं हि भगवद्वाक्यानि तदानीमेव च सुखमुत्पादयन्ति ते चालापाः कश्चिद्भन्धादिबोधका लीलोपयोगिन इत्याह । विहार इति । तत्रापि विलासा अवान्तरभेदाः यथोक्तानेक ग्राम्यादयः तैः पूर्वकृतैः तमः सत्त्वरजोरूपैः त्रिविधमपि चित्तमाक्षिप्तमिति आक्षिप्तचित्ता जाता अतः तापं न प्राप्तवत्य इति भावः । प्रमदा इति वाह्याभ्यन्तरानुसंधानहेतुभूतोऽत्युत्कटरसभावोऽत्र मदपदेनोच्यते तेन प्रभुलीलाविष्करणमुचितमितिभावः । किञ्च प्रमदाः प्रकृष्टो मदो यासां स्वभावत एव अन्यथा दास्यभावान्न प्रच्युताः स्युस्तदा केवलभगवतः लीला स्वानुपयोगिनी सांप्रतं च नानुभूतेति रमापतेर्लक्ष्मीपतेः लक्ष्म्या सहविलासरूपां चेष्टां जगृहुः एकस्या अपि वह्वयश्चेष्टा इति तास्ता उक्ताः नन्वीश्वरधर्माविष्करणं दासीनां निषिद्धमितिचेत्तत्राह । तदात्मिका इति । भगवानेवात्मनि यासां तथात्वेन स्फुरितः अतो भगवल्लीलाग्रहणं तापनिवारकत्वेनोद्देशत उक्तं विस्तरमग्रे वक्ष्यति क्रमहेतुं च वक्ष्यामः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततस्ततस्ततः कुञ्जेष्वन्विष्यन्तीनां तमप्राप्तवतीनां प्रतीक्षणविवर्द्धमानविरहपीडया यः खलून्मादः सञ्चारी अभूत्तस्य प्रकटप्राकट्यप्रकारं वर्णयति । गत्येति द्वाभ्याम् । रमापतेः सर्वसौन्दर्य्यसम्पत्तिस्वामिनः कृष्णस्य गत्या स्वाभाविकेन पादविन्यासेन प्रथमं स्वान्तिकागमनम् आगत्य यानि अनुरागयुक्तानि स्मितानि च विशिष्टो भ्रमो भ्रमणं तारकाया यत्र तथाभूतानीक्षितानि च तैः ततश्च मनोरम आलापः अयि स्थलपद्मिनि ! अतितृष्णार्ताय मधुपाय स्वमकरन्दं दास्यसि न वा भो भ्रमर ! पद्मिन्याः पतिः सूर्य एव ननु भ्रमरस्तत्कथं त्वां स्वं स्वीयं मधु पाययिष्यति भोः पद्मिनि ! पद्मिनीनां भवतीनां स्वभाव एवायं यत्ताः स्वपतिं सूर्यं स्वीयं मधु नैव पाययन्ति किन्तूपपतिं भ्रमरमेवेति ततस्तदालापेनैव पराजितया विहसन्त्या तया सह अधरमधुपानादिविहारः एवं वा आज्ञानामि मत्समीपस्थनीपतरुतलं गच्छन्तीं त्वां महादर्पकः सर्पोऽदशत् तद्विषं ते वक्षःस्थलपर्य्यन्तमुदसर्पत् तदपि त्वं कुलवधुत्वादेव मां तदुपशमं न पृच्छसि तदहं दयालुत्वात् स्वयमेव त्वदन्तिकमेत्य तद्विषोपशमकं मन्त्रं पठन् करतलाभ्यां त्वदङ्गं संघट्टयामि भो भो जाङ्गलिक ! न मां सर्पोऽदशत् यां सर्पो दशति स्म तद्गात्रमेव करतलाभ्यां संघट्टय भो कुलाङ्गने ! त्वदीयगद्गदस्वरादेव विषज्वालाकुलत्वं तत्र ज्ञायते इति ज्ञात्वापि यद्यहं त्वामुपेक्षे तदा मां स्त्रीवधो लगिष्यतीत्यतस्त्वद्विषमुपशमयिष्याम्येवेत्युक्त्वा तस्या वक्षःस्थले नखार्पणादिकं चकार ततो विहारः सम्प्रयोगः ततो विभ्रमः कामोन्मत्तता यदुक्तं "चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः" इति तैर्विरहावस्थायामतिशयेन स्मृत्या रूढैराक्षिप्तानि अरे किमिह कुरुध्वे वहिर्भूय प्राणप्रेष्ठमन्वेष्टुं गच्छतेति तिरस्कृत्य देहतो निःसारितानि स्वचित्तानि याभिस्ताः यतः प्रमदाः प्रकर्षेण माद्यन्तीति ताः ततश्चोन्मादं प्राप्य तदात्मिकास्तस्यैवात्मानो बुद्ध्यादयो यासां ताः अतस्तास्तास्तदीया विविधाश्चेष्टा जगृहुः बुद्धिपूर्वकं ग्रहणादीमनुचक्रुरित्यर्थः ॥ २ ॥

केनचित्कृता विशुद्धरसदीपिका ।

इदानीं स्वतापकार्थ्यं दिव्योन्मादं दर्शयति । गत्येत्यादित्रिभिः अहो कुत्र गतोऽस्माकं प्राणनाथ इति गमनस्यैवानुसन्धानात् गतिशब्दस्य प्राक्प्रयोगः एवमनुरागस्मितादिष्वपि निमित्तमनुसन्धेयम् उन्मत्तेष्वपि मानसस्य तस्य स्वीकारात् तत्र गतिः सामान्या तत एवास्याः पृथगुक्तिः स्मितविकयोरनुरागारम्भमात्रजायमानत्वेन तत्समुदितोक्तिः आलापविहारयोर्विभ्रमजन्मनैव जायमानत्वेन तत्समुदितोक्तिरिति तत्र चानुरागः स्वविषयकः

केनचित्कृता विशुद्धरसदीपिका ।

कान्तयोर्यो भावः स्मितं विभ्रमेक्षितानि च, तैः तत्र विभ्रमः चित्तवृत्त्यनवस्थितिः तथा विहारविभ्रमः शृङ्गारचेष्टानुकूला मधुरलीलेत्यर्थः—

"चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः"

तथा—शृङ्गारचेष्टाविहृति विभ्रमो मधुराकृतिः ॥

इत्युक्तेः ततश्च तैस्तैराक्षिप्तचित्ताः तत्र तत्राविष्टचेतस इत्यर्थः । तत एव तास्ता विचेष्टाः बाहुप्रसारेत्यादिना प्रागुक्ता वा विविधाश्चेष्टाः जगृहुः आत्मनि स्वीचक्रुः तथा तथा क्रीडन्नित्यर्थः यतस्तदात्मिकाः तद्भावभावितान्तःकरणाः यतश्च प्रमदाः यौगिकार्थपुरस्कारेण जातित एव प्रकृष्टमदयुक्ताः किम्पुनस्तद्विरहेणेत्यर्थः । दिव्योन्मादस्य परमां भूमिमारूढा इति भावः । तत्रानुरागचित्तवृत्त्यनवस्थाने मानसे गतिस्मितविभ्रमेक्षितविहाराः कायिकाः आलापो वाचिक इति विवेकः । रमापतेः आसक्तामस्येत्यर्थः । सहचरीपक्षे च रमते नितरामिति रमा श्रीराधा आत्मना रमया रेमे इति ब्रह्मसंहितायां ह तामुद्दिश्यैव तादृशप्रयोगात् साक्षान्नामानुक्तिश्चाऽऽदरविशेषादतिरहस्यत्वाद्दुस्तरूपत्वाच्चेत्यादिनिर्णीतं भक्तिमञ्जूषायां नायं श्रियोऽङ्ग इत्यादिवक्ष्यमाणानुसारेणात्यन्तनिकृष्टायाः प्रसिद्धरमाया रूपकं च प्रस्तुतयोरुभयोरनपायिसम्बन्धद्योतनाय अनपायिनी भगवती श्रीः साक्षादात्मनो हरेरिति श्रीद्वादशोक्तेः वस्तुतस्तु मुकुन्दादिपदानां श्रीकृष्ण इव रमादिपदानां परमरमायां तस्यामेव मुख्यावृत्तिरिति सूचनाय "सर्वलक्ष्मीमयीसर्वकान्तिः सम्मोहिनी परे"ति बृहद्गौतमीयोक्तेः तस्याः पतेः धवप्रियः पतिर्भर्तेति कोशात् राधावल्लभस्येत्यर्थः । ततश्च दाम्पत्यव्यवहारस्तस्यामेव समुचित इति सूचितं तदुक्तमलङ्कारकौस्तुभे—

राधामाधवयोरेव शृङ्गारः श्रुतिरोचकः ।
वैदग्ध्यं यत्र पर्याप्तं कृतार्थश्च मनोभवः इति ॥

अत्र पार्थ एव धनुर्द्धर इति वदेवकारोऽन्ययोगं व्यवच्छिनत्ति ॥ २ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

नन्वेवं प्रलयसाम्यश्रीसम्पत्तौ प्राणप्राणवियोगे च कथं तज्जीवनं संवृत्तं तत्राह । गत्यानुरागेति । गजराजराजहंसादिगतिं लज्जयन्त्या गतिमनिच्छतामपि परमहंसानां रुचिं जनयन्त्या आसमन्तात्सर्वतः सर्वविधानुरागस्य तत्पूर्वकं स्मितं च विशेषेण भ्रमयति देहगेहाद्यनुसन्धानादिभ्यः परावर्तयतीति तथाभूतं यदीक्षितं सापाङ्गनिरीक्षणं तैः तथा मनोरमाहृदयंगमा ये आलापा मृदुचित्रगम्भीरार्थवाक्यविशेषा विहारा विशेषेण हारा मनोहराः शृङ्गाररसोपयोगिविलासा विभ्रमाणि नृत्यावर्तनादीनि तैः करणैः रमापतेः रमायाः सर्वसौभाग्यसम्पत्सौन्दर्यादिश्रिया अधिष्ठात्र्याः सर्वमनोरमाया लक्ष्म्या अपि सर्वत्र दोषदृष्ट्या तत्त्यागेन स्वास्मिनिःस्पृहत्वेऽपि गुणालयत्वेन वृतो यः पतिः तस्य तत्सम्बन्धिभिः रेतैराक्षिप्तानि आकृष्टानि चित्तानि यासां यद्वा रमापतेरिति कर्तरि षष्ठी तथा च रमापतिना कर्त्रा एतैः करणैः प्रलयसनिभार्त्तित्राणाय स्वस्मिन्नाकृष्टानि चित्तानि यासाम् अत एव प्रकृष्टप्रेमोन्मादलक्षणो मदो यासामिति प्रमदाः तथा स एवात्मनि मनसि रक्षकत्वेन वर्तमानो यासां यद्वा तस्मिन्नेवात्मा प्राणो यासां तथाभूतत्वे लिङ्गमाह । तास्ता इति । यतस्तथाभूता अतस्तत्तद्गुणाकृष्टचित्तत्वेन प्रकृष्टमदविगतदेहाद्यनुसन्धानत्वेन तदात्मकत्वेन च तदीयास्तास्ता विचेष्टाः जगृहुः यद्वा स्वीयगत्यादिभिर्मनो रमालापादिभिश्च रमापतेराकृष्टं चित्तं याभिरत एव रमापतेरपि प्रकृष्टो मद उन्मादो याभ्य इति प्रमदा; ननु भगवत आत्मारामत्वात्कथं ताभिराक्षिप्तचित्तत्वं तत्राह । तदात्मिका इति । तासां तदात्मकत्वेन तदाक्षिप्तचित्तत्वेऽपि नात्मारामत्वक्षतिः ननु तथाभूतानां कथं तद्वियोगविरहवैक्लव्याद्युक्तिस्तत्राह । तास्ता इति । सर्वोद्धारकप्रेमप्रथोपदेशाय तास्ता विरहव्याकुलत्वतल्लीलानुकारादिविचेष्टा जगृहुरिति भावः ॥ २ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

तापानन्तरं जातां तासां दशामाह । गत्येति । रमापतेः प्रेष्ठस्य गत्या यत्स्वाभाविकेन नूपुरस्वनयुक्तेन पादन्यासेन अनुरागः स्नेहस्तत्पूर्वकं स्मितं मन्दहसितं तत्सहितो विभ्रमो विलासः तत्सहितानीक्षितानि कटाक्षास्तैः तथा मनो रमयति मनसि रमते च य आलापः गुह्यं भाषणं वाचिकव्यापारः विहारः शृङ्गारचेष्टा: "चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः" इत्युक्तलक्षणो विभ्रमश्च तैराक्षिप्तान्याकृष्टानि चेतांसि यासां ताश्चातस्तदात्मिकाः तन्मय्यः यतश्च प्रमदाः जात्यैव प्रकृष्टमदयुक्ताः रमापतेः विविधाश्चेष्टा जगृहुस्तदनुकरणैश्चक्रीडुरित्यर्थः अत्रानुरागचित्तवृत्त्यनवस्थाने मानसे आलापो वाचिकः गत्यादयः कायिका अन्यभावानामप्युपलक्षणमेतत् अत्राभिज्ञापक्षे रमापतेर्लक्ष्मीपतेः श्रीविष्णोरन्तरेवाविर्भूतस्वरूपस्य लक्ष्मीपतेः सह विलासरूपाः स्वात्मना च सहविलासरूपा याश्चेष्टा स्तास्ताः जगृहुः ननु दासीनां तासां भगवल्लीलानुकरणमनुचितमित्याशङ्कानिवृत्त्यर्थमुक्तं तदात्मिकाः स भगवानेवाविर्भूत आत्मनि यासां ता अन्तस्तापनिवृत्त्यर्थं तल्लीलाग्रहणं न विरुध्यत इति भावः । किञ्च प्रमदास्तथा च प्रमदहेतुको यथा दासीभावं विहाय कान्ताभावस्तथा प्रभुचेष्टानुकरणमपीति भावः । अनभिज्ञापक्षे रमापतेः सर्वसौन्दर्यसम्पत्स्वामिनः मानिनीपक्षे गतश्चेष्टच्छतु नाम वयमेव तदीया स्ताश्चेष्टाः कर्तुं शक्ता इति बहिः प्रकटीकर्तुं तास्ताश्चेष्टा जगृहुः यतस्तदापि प्रकृष्टो मदो यासां ताः यतश्च तदात्मिकाः परस्परातिगाढप्रेमवशादभेदाभिमानवत्यः अतस्तस्य गत्यादिभिराक्षिप्तचित्ताः निवृत्तिपक्षे श्रोत्रस्य श्रोत्रं मनसो मनो वाचो ह वाचं प्राणस्य प्राण इत्यादिश्रुतयश्चेतनार्थाश्चष्टिते गत्यादिभिः परमात्मानं प्रत्याकृष्टचित्ताः यतः प्रकर्षेण मदः परमात्मप्रतिपादने हर्षो यासां ताः रमापतेः सत्तास्फूर्तिलक्षणशोभास्वामिनः चैतन्यस्यैव तास्ताः गमनादिरूपाश्चेष्टाः जगृहुः स्वयं वाच्यवाचकयोरभेदात्तदात्मकाः ॥ २ ॥

गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ।
असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रमदा व्रजाङ्गनाः कृष्णात्मिकाः रमापतेः गत्या अनुरागस्मिताभ्यां यानि विभ्रमेक्षितानि सविलासनिरीक्षितानि तैश्च मनोरमाः मनोहराः आलापाश्च विहाराः क्रीडाश्च विभ्रमाः अन्ये च विलासास्तैश्च आक्षिप्तचित्ताः आकृष्टचित्ताः तस्य विविधाश्चेष्टा जगृहुरनुचक्रुः ॥ २ ॥

भाषा टीका

लक्ष्मीपति भगवान् की चाल अपने पै अनुराग पूर्वक मुसक्यान चितवन क्रीडा वडो मनोहर भाषण विहार और अनेक विलास इन ते जिन के चित्त खिचगये ऐसी जो व्रजनारी तिन को मन श्रीकृष्णचंद्र में लग गयो तव सव भगवान् की चेष्टा करत भईं ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि च गतिस्मितेति प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः अहमेव कृष्ण इति परस्परं निवेदितवत्यः ॥ ३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तत्र तदात्मिकत्वमभिव्यञ्जयति । गतीति । गत्यादिषु उक्तेषु आदिशब्दात् विहारविभ्रमौ उक्तानुवादत्वेन पूर्वोक्ततत्तद्विशेषणान्यत्र नोक्तानि प्रतिरूढलीलाभिराविष्टा मूर्तय इन्द्रियाङ्गादिसङ्घातात्मकदेहा यासां ताः इत्यन्तर्बहिस्तद्भावापत्तिरुक्ता तथा चोक्तं प्रह्लादेन तद्भावभावानुकृताशयाकृतिरिति अवलाः स्त्रियः इति स्त्रीचेष्टानुकरणमेव युक्तमिति ध्वनितं तथापि यद्वा लीलाविष्टता वा तत्र हेतुः तदात्मिकाः तन्मय्यः सत्य इति तच्छब्देन श्रीकृष्णस्तदस्यादयो वा श्रीकृष्णोऽहमिति साक्षादुक्तिः विरहवैवश्यात् तदात्मकत्वादेव वा तन्मयत्वं च प्रेमलीलाभरस्वभावेनैव न त्वभेदध्यानादिमयाग्रहेणेत्याह । प्रियाः प्रियस्येति । कृष्णेति परमाकर्षकत्वाभिप्रायेण अन्यत्तैर्व्याख्यातं यद्वा अनुकरणमेवात्रापि ज्ञेयं ततश्च पूर्वश्लोके तदात्मिका इति अनुकरणसम्यक्त्वं बोधिता सामेव दर्शयति । गतीति । हे अवलाः असौ तत्तद्विहारनामरोऽहमित्येतत् श्रीकृष्णवाक्यमिति शेषः पूर्वमस्माभिर्विना कदाचिदेतत्सम्यक्तस्तीत्यत एवं श्रेय कुतो वाक्यं न समापितमित्यपेक्षायामाह । तदात्मिका इति तन्मनस्काः यद्वा अयमनुकरणसम्यक्त्वावबोधनार्थं पुनरपि पूर्ववद्धेतुः अत एव कृष्णविहारवद्विभ्रमः चुम्बनालिङ्गनादिचेष्टा विशेषो यासां यद्वा कृष्णस्येव विहारविभ्रमः विगतो ह्रासो यस्मात्तादृशो विभ्रमो विलासो यासां यद्वा कृष्णविहार इति विभ्रमो भ्रान्तिर्याभ्यः न निश्चेतुं शक्यते कृष्ण एवायं विहरति ता वा तमनुकुर्वन्तीत्यर्थः । वाक्यासमापने विरहविह्वलतैव हेतुर्विभाति यद्वा असौ तत्तत्प्रकारैर्बहुशः श्रीकृष्णेन रमिता या साहमित्यर्थः । तत्प्रकाशनं वैदग्ध्या विरहविह्वलतयैव वा तादृशनिवेदने हेतुः तस्मिन् अवाच्ये मरणे आत्मा चित्तं यासां ताः अत्यन्तदुःखेन मुमूर्षया तन्न्यवेदयन्नित्यर्थः । अतः कृष्णविहारैर्विभ्रम उन्मादो यासां तद्विलासस्मरणेन परमविह्वला इत्यर्थः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

तत्र तदात्मकत्वमेवाभिव्यञ्जयति । गतीति । प्रियस्य गत्यादिषु उक्तेषु आदिशब्दाद्विहारविभ्रमौ उक्तानुवादित्वेन पूर्वोक्ततत्तद्विशेषणानि नोक्तानि । तेषु प्रतिरूढाः सदृशीभूता मूर्तयः इन्द्रियादिसङ्घातात्मकदेहा यासां ताः इत्यन्तर्बहिस्तद्भावापत्तिरुक्ता । अवलाः स्त्रियः इति स्त्रीचेष्टानुकरणमेव युक्तमिति ध्वनितम् । तथापि तु एव यत्र युष्माकमुत्कण्ठा अहमेवासौ तत्तद्विहारनागर इति प्रत्येकं सर्वा मिथो न्यवेदयन्त । कीदृश्यः सत्यः । कृष्णवद्विहारे विभ्रमो विलासो यासां कृष्णविहारस्य विभ्रमो भ्रान्तिर्याभ्यो वा तादृश्यः । तन्मयत्वञ्च प्रेमलीलाभरस्वभावेनैव नतु अहंग्रहोपासनावेशेनेत्याशयेनाह । प्रियाः प्रियस्येति । प्रियास्तस्मिन् स्वाभाविकप्रेमवत्यः प्रियस्य स्वस्मिन्नपि स्मर्यमाणतादृशप्रेमकस्येत्यर्थः । लीलाख्यश्चानुभावोऽयम् । प्रियानुकरणं लीलारम्यैर्वेशक्रियादिभिरित्युक्तेः । तथाच प्रयोगः । मुहुरवलोकितमण्डनलीला, मधुरिपुरहमिति भावनशीला इति ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रतिरूढमूर्तयः असावहं कृष्णोऽहम् अनेन वक्ष्यमाणकारणस्य प्रस्तावः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव प्रपञ्चयति । गतीति । तदात्मिकाः अत एव प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढमूर्तयः भगवद्गत्याद्यनुकारेषु चिकीर्षितेषु सत्सु हृदयारूढास्तस्य मूर्तयो यासां ताः अतः कृष्णविहारा इव विभ्रमाः क्रीडा यासां तास्तस्य प्रिया अवला गोप्यः असावहं कृष्णोऽहमिति मिथो निवेदितवत्यः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विशिनष्टि । गतीति । प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढा अङ्कुरिता अङ्गीकृता मूर्तियासां तास्तथा तत्र निमित्तं दर्शयति । असाविति । असौ कृष्णोऽहं वा नु इति विकल्पान्योऽन्यं पृष्ट्वा वा तदात्मिकाः तद्गतचित्ताः प्रश्ने विकल्पे नु सिद्धेति यादवः न्यवेदिषुः आत्मानमिति शेषः कृष्णविहारविभ्रमवत्त्वं विघृतम् ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गतीति । गत्यादिषु प्रतिरूढाः सदृशीभूताः मूर्तयः इन्द्रियादिसंघातात्मकदेहा यासां ताः ततश्च चिरात् प्राप्तावधानानां तासामवस्थां वर्णयति ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

कीदृश्यः तस्मिन्नेव आत्मा मनो यासां तास्तदात्मिका ननु तास्ता लीलास्तदात्मिकाः सत्यो जगुरनुचक्रुः तथा सति गायन्त्य उच्चैरित्यादीन्यसङ्गतानि स्युः किन्त्वेषामन्ते लीला भगवतस्तास्ता अनुचक्रुस्तदात्मिका इत्यादिकमेव तादात्म्यम् ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो भगवतः स्वरूपपरिग्रहो जात इत्याह । गतिस्मितेति । धर्माश्चेत् स्वस्मिन्नागताः तदैकत्रोभयधर्मा विरुद्धा इति भगवति स्वधर्मारोपितवत्यः कायवाङ्मनसां इष्टेश्च चत्वारः प्रधानधर्माः तेषु सर्वेष्वेव प्रतिरूढा मूर्तियासां भगवद्धर्मेषु स्वमूर्तिरारोपिता अन्यथा अन्योऽन्यधर्माभिनिवेशाभावे सख्यकाविलासो न स्यात् तदाह । गतिः कायिकी स्मितं मानसं प्रेक्षणमैन्द्रियकं भाषणं वाचिकं तदादयो यावन्तो विभ्रमाः वल्ग्वादयः रतिरूपा एव तेषु सर्वेष्वेव प्रियस्य सम्बन्धिषु स्वयं प्रियाः भोगावस्थामेव प्राप्ताः विपरीता जाताः रसाविक्ये स्त्रियः पुरुषत्वमापद्यन्त इति वात्स्यायनः अत एव स्वयं प्रिया योग्याः प्रतिरूढा विपरीततया आरूढा मूर्तयः स्वरूपाणि यासामिति तत्र यासां भगवानल्पव्यवहितः पूर्वमासीत्ताभिर्भगवत्प्रश्ने कृते अन्तर्हितानामासत्रोत्तरवक्त्र्यो भवन्ति असौ कृष्णः अहं कृष्ण इति अथवा योऽन्विष्यते सोऽसावहमिति अन्यासां प्रतीत्यर्थं नटः कपटवेषं कृत्वापि वदति क्रीडायां तथा न किन्तु स्वत एवेत्याह । अबला इति । अबलाः स्त्रियः भगवद्रूपाविष्कारे च बलरहिताः । स्पष्टैव लक्षण्यं च स्त्रीपुरुषयोः तथा कथने प्रसारकत्वमालक्ष्याह । तदात्मिका इति । न केवलं धर्मप्राप्तिः किन्तु तद्धर्माणामपि तदात्मिका इति । न केवलं धर्माप्तिः किन्तु तद्धर्माणामपि त्याह । कृष्णविहारः कायवाङ्मनोव्यापारः विभ्रमाः तत्रत्या विलासाः सन्त्यासाम् ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्यैवोन्मादस्य प्रौढत्वे सति तासामवस्थामाह । गतीति । प्रियस्य गत्यादिषु पूर्वोक्तेषु प्रतिरूढा मूर्तयो देहा यासां ताः आदौ प्रियस्य गतिस्मितादय आसां प्रत्येकं मूर्तौ चित्तेन्द्रियादिमय्यामारूढाः ततस्तेषु गतिस्मितादिषु आसां मूर्तिश्च प्रत्यारूढा इत्यर्थः । ततश्चोन्मादादेकीभावे सति असौ कृष्ण एवाहं किंवा अहमेव कृष्ण इति सावधारणां भावनां विहाय असावहं कृष्णोऽहमिति रसास्वादप्रौढिममयीमवस्थां प्राप्य तदात्मिकाः प्राप्तकृष्णतादात्म्याः नत्वहंग्रहोपासनावेशादेवेति ज्ञेयं प्रियाः प्रियस्येत्युक्तेः न्यवेदिषुः परस्परं निवेदितवत्यः ननु वयं व्रजस्त्रिय इति मनागपि का अपि जानन्तिस्मेत्यर्थः । तत्र हेतुः कृष्णविहारैः स्मर्यमाणैर्विभ्रम उन्मादो यासां ताः ॥ ३ ॥

केन चित्कृता विशुद्धरसदीपिका ।

तदेवं सहसान्तर्धानहेतुकां दिव्योन्मादस्यारोहभूमिकां केवलमानसचेष्टया वर्णयित्वा मानसवाचिकचेष्टया तदवरोहकमं दर्शयति । गतीति । प्रियस्य गत्यादिष्वारूढा आविष्टा मूर्तयस्तत्प्रायः पिण्डवदिन्द्रियावयवादिसङ्घातात्मका देहा यासामित्यन्तर्बहिस्तदेकभावापत्तिरुक्ता अत एव कृष्णेति कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः न्यवेदिषुः यत्र युक्ताकमुत्कण्ठा सोऽहमेव श्रीकृष्ण इति परस्परं सम्वेदितवत्यः ज्ञापितवत्य इत्यर्थः अयमेवोन्मादस्य पूर्वस्मादपकर्षः नहि तत्राहमेवासौ कृष्ण इत्यनुसन्धानं चेति तदात्मिकाः तन्मयाः सत्वं च प्रेमभरस्वभावादेव नत्वहंग्रहोपासनावदित्याह । प्रियाः प्रियस्येति । तस्मिन् स्वाभाविकप्रेमवत्यः स्वस्मिन्नपि स्मर्यमाणतादृशप्रेमकस्येत्यर्थः । अयं लीलानामनुभावः "प्रियानुकरणं लीला रम्यैर्वेषक्रियादिभिरि"त्युक्तेः यदाह श्रीजयदेवः—

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीलेति ॥

॥ ३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तदात्मकत्वद्योतकचेष्टामाह । गतिस्मितेति । ता अबलाः तत्र स्त्रीत्वेन सामान्यत एवाबलात्वेऽपि विरहवैकल्येन विशेषतोऽप्यबलाः यद्वा बलशब्देनात्र बलहेतुः प्राणः अकाराभिधेये वासुदेव एव प्राणो यासां यद्वा स्वतो निर्बलत्वेन अशब्दसंज्ञस्य हरेरेव बलं तच्चेष्टानिमित्तं यासु तथाभूता यतस्तदात्मिका अत एवात्मत्वेन निरतिशयप्रेमास्पदतया प्रियास्तस्मात्तस्यैव नित्यप्रियस्य तस्य या मदनमदोन्मत्ततया स्खलितमृदुपदन्यासा न्यासिनमपि स्मरविगतिकरी गतिः यच्च स्मरस्यापि विस्मितकरं तदीयस्मितं यच्च प्रकृष्टमनाक्षेपनत्वमपेणनापाङ्गीकरणापाङ्गत्राणाक्षमनिक्षणमके कृष्ण गतिविगतगतीनां स्मितेन विस्मितानामपाङ्गेक्षणामपि सखीमनामनुप्रियभाषणम् आदिशब्देन आलिङ्गनचुम्बनादिविला-

गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनम् ।
पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

स्मादयः तेषु प्रतिरूढमूर्तयः तत्र प्रतिरूढमतय इति वक्तव्येऽपि मत्यावेशातिशयेन शरीरेऽपि तदाभिव्यक्तिमवधार्य प्रतिरूढमूर्तय इत्युक्तं तथाचैवंभूततया कृष्णस्य चित्ताद्याकर्षकस्य विहारविभ्रमवद्विहारविभ्रमा यासां ताः असौ कृष्ण एवाहमिति परस्परं न्यवेदिषुर्निवेदयामासुः ॥ ३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तदात्मिका इत्युक्तं भगवत्स्वरूपपरिग्रहमाह । गतीति । प्रियस्य गत्यादिषु प्रतिरूढा मूर्त्तिर्यासां भगवद्धर्मान् स्वात्मन्येवाविर्बोधयन्त्यः यतः प्रियास्तथापि मनसा प्रतिरूढमूर्त्तयो नतु नरवद्वेषादिकं धृतवत्यो ऽवलास्तादृशबलरहिताः अतस्तदावेशवशात्तासां तथात्वमित्याह । तदात्मिकाः ततः कृष्णविहारविभ्रमाः कृष्णस्येव विभ्रमाः क्रीडा विलासा यासां ताः अतो यो ऽर्चिष्यतेऽसावहमिति परस्परं निवेदितवत्यः नतु वयं व्रजस्त्रिय इति मनागपि काश्चिदपि जानन्ति स्मेत्यर्थः कृष्णविहारैः स्मर्य्यमाणैर्विभ्रमः उन्मादो यासामिति वा लीलाख्यानुभावोऽयं समानमिदं पद्यमितरपक्षयोरपि निवृत्तिपक्षे गत्यादिषु देहेन्द्रियादिव्यापारेषु या प्रियाः स्तत्तदाकारवृत्तयस्ताः प्रियस्यात्मनः प्रतिरूढा आत्मन्यारूढा मूर्त्तयो यासां ताः अत एवास्य वासुदेवस्य विभोश्चिदात्मन एव बलं विषयप्रकाशनसामर्थ्यं यासां किञ्च तस्मिन्नारोपकृतत्वात्तदात्मिकास्तत्सत्तातिरिक्तसत्ताविधुरा इति कृष्णस्य सदानन्दस्वरूपस्य परब्रह्मणः सत्तास्फूर्तिप्रदातृत्वादिलक्षणविहारे तद्वर्णनविभ्रमो यासां ताः श्रुतयः न्यवेदिषुः बोधयामासुः तथा असौ परमात्माहमेवेति न्यवेदिषुरित्यर्थः । तथाच श्रुतयः यद्वाचानभ्युदितं येन वागभ्युद्यते यन्मनसा न मनुते येन हु मनो मतं यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति अहं ब्रह्मास्मि योऽसावादित्ये पुरुषः योऽसावहमित्याद्याः ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदेव वर्णयति । गतिस्मितेति । तदात्मिकाः कृष्णार्पितचित्ताः प्रियाः कृष्णप्रियाः प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढाः आविष्टा मूर्तयो यासां ताः अत एव कृष्णविहारा इव विभ्रमा विलासा यासां ताः तुशब्दोऽवधारणे अहमेव असौ कृष्ण इति मिथो न्यवेदिषुः निवेदितवत्य ॥ ३ ॥

भाषा टीका ।

भगवान् की चाल चितवनि हसन चितके भाषण आदि लीला में गोपिन के मन औ देह सब रमगये तब वे व्रज अवला श्रीकृष्ण चन्द्र के विहार में विलास करनेवाली होगई उनके मन कृष्ण मय होगये तौ आपस में मैं कृष्ण हूं ऐसे एकते दूसरी कहने लगीं ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च गायन्त्य इति । वनाद्वनान्तरं गच्छन्त्यो विचिक्युरमृगयन् उन्मत्तस्य तुल्यत्वमाह । वनस्पतीन्पप्रच्छुः भूतेष्वन्तरं मध्ये सन्तं पुरुषं बहिश्च सन्तमिति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

नचैवं केवलमनुकरणे लीलाविष्टता वा किन्तु विरहविह्वलाः सत्य इतस्ततोऽन्वेषयन्त्यः पुरो दृश्यमानान् सर्वानेवापृच्छन्नित्याह । गायन्त्य इति । उच्चैर्गानं तं प्रति दूरास्थिजार्त्तिश्रावणार्थं किम्वा गीतप्रियस्य तस्य तेनाकर्षणार्थं किम्वा आर्तिभरस्वभावादेवमेवेति यद्यपि त्यागेन दुःखप्रदत्वेन च तद्गानादिकं न युज्यते तथापि अमुमेवेति तदानीमपि तदेकप्रियत्वं किम्वा तदेकगानशीलत्वमुक्तं संहताः अन्योऽन्यं मिलिताः सत्यः सर्वत्र सम्यङ्मार्गणार्थं किम्वा सख्येनान्योऽन्यमार्त्युपशमनार्थं किम्वार्तिविशेषस्वभावादेव वनस्पतीन् प्रति प्रश्ने हेतुः । उन्मत्तकवदिति । स्वार्थे तदाधिक्ये वा कन् तेन केशाद्यसंस्वरणं व्यज्यते तथान्वेषणे प्रश्ने च विचाराभावेनाभिनिवेशोऽपि निरस्तः अन्यथा वृक्षेषु प्रश्नानुपपत्तिः वनाद्वनमिति प्रतिवने अन्वेषणेनेतस्ततो बहुलपरिभ्रमणं तेनानेककालमन्वेषणमपि सूचितम् आकाशो यथा बहिरन्तर्व्याप्यास्ते तथाभूतेषु सर्वजीवेषु पुरुषं पुरुषरूपेणान्तरमन्तर्वहिश्च व्याप्य सन्तं यद्वा भूतेषु प्राप्तेषु कुञ्जादिषु अन्तर्बहिश्च स्वनिकटे सन्तमप्युन्मादादेव वृक्षादीन् पप्रच्छुः यद्वा पुरुषं निजस्वामिनमिति तादृशप्रश्ने मार्गणे च हेतुः यद्वा अहो वत सर्वत्र सन्तमपि स्वयं तथा ज्ञायमानमपि विरहजप्रेमभरेण वृक्षानपि ताः पृष्टवत्य इति तादृशात्याह । आकाशेत्यादि । अर्थः स एव अहो शृणु प्रेमार्त्तिवैवश्यमहात्म्यमिति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्च चिरात् प्राप्तावधानानां तासां पुनरुन्मादाख्यामवस्थां वर्णयति । गायन्त्य इति । गानमत्र गोकुले प्रसिद्धं पूतनावधादिमयं तच्च विषजलाप्ययादित्यादि वक्ष्यमाणरीत्या स्वरक्षणाभिप्रायेण । उच्चैर्गानन्तु तं प्रति दूरस्थिजार्त्तिश्रावणार्थम् । किम्वा गीतप्रियस्य तस्य तेनाकर्षणार्थं किम्वा आर्त्तिभरस्वभावादेव अमुमेवेति । यद्यपि त्यागेन परमदुःखदोऽसौ तथापि तमेवेत्यर्थः । गणयति गुणग्रामं ग्रामं भ्रमादपि नेहते इत्यादिवत् । संहता अन्योऽन्यं मिलिताः सत्यः सर्वत्र सम्यङ्मार्गणार्थम् ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

किम्वा सख्येनान्योऽन्यमार्त्युपशमनार्थम् । किम्वासैविशेषस्वभावादेव । गानान्वेषणयोर्यौगपद्यमिदं गायन्त्य एव भ्रमन्ति मध्ये मध्ये तु पृच्छन्तीत्यर्थः । वनस्पतीन् प्रति प्रश्ने हेतुः । उन्मत्तकवदिति । स्वार्थे कन् । तेन केशाद्यसम्वरणं व्यज्यते पुरुषं सर्वान्तर्यामिरूपमपि अत एवाकाशवद्भूतेषु अन्तरं बहिश्च व्याप्य सन्तमपि पप्रच्छुः । निजप्रेमावलम्बनकेवलनरलीलारूपेणैव तस्य तत्प्रश्नविषयत्वादिति भावः । यद्वा । अहो वत तासामिदं सर्वं किमरण्यरुदितमेव जातं नेत्याह । आकाशेति । वक्ष्यते च स्वयम् । मया परोक्षं भजतेति । यद्वा । पुरुषं स्वनायकं पप्रच्छुः । तत्र भूतेषु स्थावरजङ्गमेषु आकाशवदन्तरं बहिश्च सन्तं साक्षादिव सत्तया स्फुरन्तं पप्रच्छुः । तादृशज्ञानस्फूर्तिश्च तासां प्रेमविवर्त्तविशेषादेव "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्या" इतिवत् । तत्र बहिःस्फुरणं दूरतः अन्तःस्तु निकटात् । तत्र च सत्युन्मादेनैवानिन्द्रियेष्वपि वनस्पतिजातिषु प्रश्नो योग्य इति भावः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अन्तरं बहिः सन्तमन्तरं बहिश्च सन्तम् ॥ ४—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च गायन्त्य इति । सङ्गताः समुदिताः सङ्घीभूता इति यावत् अमुं कृष्णमेव गायन्त्यो वनाद्वनं गच्छन्त्यः उन्मत्तवद्विचिक्युरमृगयन् वनस्पतीन् प्रति पप्रच्छुश्च कथंभूतमाकाशवद्भूतेषु चराचरेष्वन्तर्बहिश्च व्याप्य सन्तं पुरुषं पुरुषाकारं पुरुषशब्दवाच्यं वा परमपुरुषं वा एवम्भूतमपि प्राकृतमिव पप्रच्छुरित्यर्थः । वनस्पतीन् पप्रच्छुरित्यनेनोन्मत्ततुल्यत्वं दर्शितम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सङ्गताः मिलिताः आकाशवद्भूतेषु बहिरन्तरं सन्तं बाह्याभ्यन्तरदेशयोर्वर्तमानम् "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इति श्रुतिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गायन्त्य इति । गानमत्र गोकुलप्रसिद्धं पूतनावधादिमयं गानान्वेषणयोर्यौगपद्यमिदं गायन्त्य एव भ्रमन्ति मध्ये मध्ये तु पृच्छन्ति पुरुषं सर्वान्तर्यामिरूपमपि अत एवाकाशवत् भूतेष्वन्तरं बहिश्च व्याप्य सन्तमपि पप्रच्छुः । तत्र हेतुः । अमुं तासु तु निजप्रेमालम्बनरूपेणैव स्फुरन्तमित्यर्थः । यद्वा । पुरुषं स्वनायकं पप्रच्छुः । तत्र भूतेषु प्राणिषु आकाशवदन्तरं बहिश्च व्याप्य सन्तं पप्रच्छुः । तस्य तत्र तत्र सत्तां पप्रच्छुरित्यर्थः । किञ्चित् प्रतिबिम्बं पृच्छन्तं पृच्छन्तीतिवत् । तादृशज्ञानञ्च तासां प्रेम्णा तत्र तत्र स्फूर्तेरेव "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्या" इतिवत् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तास्ताश्चेष्टा हृदि कृत्वैव तस्थुरिति न अपितु तद्गानपूर्वकं वनाद्वनं च विचारयामासुरित्याह । गायन्त्य उच्चैरित्यादि । उच्चैरिति कदाचिद्दूरे वा गतो वर्त्तेत इत्याशङ्क्य उच्चैर्गानम् अमुं श्रीकृष्णं संहता एव मिलिता एव कदाचिदात्ममध्ये कापि वियुज्येतेति उन्मत्तकवत् उन्मत्तिका इव अनुकम्पायां कन् न केवलं विचिक्युः पप्रच्छुश्च प्रच्छिर्द्विकर्मकः तत्रामुं श्रीकृष्णमिति मुख्यं कर्म भूतेषु आकाशवत् अन्तरं अन्तरे बहिर्बाह्ये च सन्तं पुरुषमात्मानमिति गौणं कर्म तत्र प्रष्टव्यान्तराभावात् तांल्लक्ष्यीकृत्यैव पप्रच्छुरित्यर्थः । भूतेषु सन्तमिति भूतं लक्ष्यीकृत्येत्याद्यान्ते वनस्पतीनिति वनस्पतीन् प्रति इत्यर्थः । तेन गानं कर्म अमुमिति गौणं कर्म पुरुषमिति वनस्पतीनिति कर्मप्रवचनीयार्था द्वितीया वनस्पतीन् प्राप्येति वार्थः द्वारमित्युक्ते पिधेहीत्यादिक्रियाध्याहारेणान्वयबोधात् ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तापलीला भगवता उद्देशतस्ताश्च सम्बन्धमुक्त्वा प्रथमं तापनिवृत्त्यर्थमन्वेषणं कृतवत्य इत्याह । गुणानामिव त्रयाणामेषामन्योऽन्योपमर्द्देन भगवदिच्छया विभाग इति न परस्परकार्यप्रतिबन्धकता आपाततः अतो यदा प्रपञ्चसंवेदनं तदा पृष्टवत्य इत्याह । गायन्त्य इति । प्रथमतो मिश्रभावात् गायन्त्यो जाताः शब्दो हि धूमवल्लोके बाह्याभ्यन्तरयोगतः विराजते विनिर्गच्छन् तारतम्यं च गच्छति अतोऽत्र धर्मिधर्मोणामाधिक्यात् ज्ञानमुत्तमं यथा भगवतो गानात् स्वयमागत्य सङ्गताः एवं स्वयं भगवतः आगत्यर्थं जगुः स्फुटं "कृत्रिमत्वात्तु भावस्य मिलिताश्च स्वतोऽन्यतः । ततो विशेषविज्ञानात् तिरोभावोऽस्फुरत् स्फुटः" तदा विचिक्युः क्व भगवानस्तीत्यन्वेषणं कृतवत्यः तत्रापि न सर्वात्मना तिरोभावः स्फुरित इति अन्वेषणेऽपि अनियतवृत्तयो जाता इत्याह । उन्मत्तकवदिति । अज्ञात उन्मत्तः उन्मत्तकः कुत्सितो वा स यथा स्वपरविवेकं न जानाति वस्त्रादिरहितश्च भवति एवमवस्थां प्राप्ताः एकस्माद्वनाद्वनान्तरं गताः किञ्च न केवलमन्वेषणमात्रं किन्तु उन्मत्तवत् पृच्छन्ति स्मेत्याह । पप्रच्छुरिति । शुको हि भगवत्स्वरूपाभिज्ञः आनन्दमात्रकरपादमुखोदरादिकृष्णं सर्वत्रैव विद्यमानं पश्यति यदि भक्तिसहितं ज्ञानमाविर्भवति तदान्योऽपि पश्यति सर्वत्रैव तिरोधाननाशात् तादृशमेताः परिच्छिन्नं मत्वा पृच्छन्तीति तासामज्ञानकथनार्थमाह । आकाशवदन्तरं बहिर्भूतेषु सन्तमिति बाह्याभ्यन्तरविवेकहेतुराकाश इति पूर्वं निरूपितं तद्वदेवायमपि अत एवाकाशस्य ब्रह्मलिङ्गत्वम् एतादृशं सर्वत्रैव विद्यमानमदृष्ट्वा आत्मनि विचारं त्यक्त्वा चेतनांश्च पृष्ट्वा

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्थावरान् पृच्छन्ति वनस्पतीन् पप्रच्छुरिति ते हि वैष्णवा इति मूढा अपि वैष्णवा एव हि विष्णुगतिं जानन्ति न त्वत्यन्तं निपुणा अप्यवैष्णवाः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यदा च स तासामुन्मादः स्वप्रौढिमानं विहाय मन्दीबभूव तदा ता अर्धबाह्यानुसन्धानवत्यो यथा चेष्टन्ते स्म तद्वर्णयति । गायन्त्य इति । कान्तविच्छेदेन दुःखिन्यो वयं व्रजस्त्रियस्तमन्वेषयामः इति बाह्यानुसंधानं संहता मिलिता वनाद्वनं गच्छन्त्यः उन्मत्तकवदीषदुन्मत्ता इव अल्पार्थे कः प्रत्ययः पुरुषं श्रीकृष्णं वनस्पतीन् पप्रच्छुरित्युन्मादलक्षणं ननु सर्वमुख्यया वृन्दावनेश्वर्या सह कृष्णस्तदा सुखेन रमत एवेति जानीमः किन्तु तद्विरहदुःखोन्मत्तानां तासां गोपीनामुन्मादप्रश्नादिकं स जानाति न वेत्यतो विशिनष्टि । भूतेषु सर्वेष्वेव अन्तरं बहिश्च आकाशवद्व्याप्य सन्तमपि तेन कृष्णस्वरूपस्य परिच्छिन्नत्वेऽपि सर्वगतत्वात्तासां प्रश्नादिकं स तत्र तत्रैवालक्ष्यमाणः शृणोत्येवेति द्योतितम् ॥ ४ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्चोन्मादस्यानवस्थितिस्वभावात्किञ्चिदवधानेनाधिगतदेहानुसन्धानानां कायिकीमपि चेष्टामाह । गायन्त्य इति । यद्यपि त्यागेनार्त्तिदोऽसौ तथाप्यमुमेव गायन्त्य इति सम्बन्धः । गानं यथा

नाथ हरे ! वन नाथ हरे ! करुणां कुरु परिजननिकरे ।
गर्वितचित्तास्तव सुखवित्ता नान्यनिमित्ताः प्राणपते ! ॥
रसिकशिरोमणिरासे हृदयंगमरमणमहाशयविमलमते ! ।

इत्यादि उच्चैरित्यार्त्तिभरस्वभावादेव संहताः सम्यगैकमत्येन मिलिताः एवं च मैत्री सूचिता मनोवृत्तिमयी प्रीतिर्मैत्री स्पर्शादिकोचिता सा च परस्परं सख्येनैवेत्युकमलङ्कारकौस्तुभे वनाद्वनं विचिक्युः अमृगयन् अमुमेवेति परिवृत्त्यान्वयः उन्मत्तकवदित्यल्पार्थे कन् ततश्चावरोहः सूचितः वनस्पतीन् पप्रच्छुश्च कामित्याकाङ्क्षायामाह । पुरुषं स्वनायकं नश्च भूतेषु स्थावरजङ्गमात्मकेषु आकाशवदन्तरं बहिश्च सन्तं साक्षादिव सत्तया स्फुरन्तं तादृशस्फूर्त्तिश्च प्रेमविवर्त्तविशेषादेव "वनलतास्तरव आत्मनि विष्णुमित्यादिवक्ष्यमाणवत् तत्र बहिः स्फुरणं दूरतः अन्तस्तु निकटादीति विवेकः तदेवं सत्युन्मादेनैवान्निन्द्रियेष्वपि प्रश्नः सङ्गच्छत इति नचेदमसंभावितं मौढ्यादन्यत्रापि तथा दृष्टत्वात् तथाहि

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाकोटकम् ।
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ॥
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते ।
न च्छायापि परोपकारकरिणी मार्गस्थितस्यापि मे ॥

इत्यादि वस्तुतस्तु पृच्छतेर्द्विकर्मकत्वादयमर्थः अमुं श्रीकृष्णमिति मुख्यं कर्म भूतेष्वाकाशवदन्तरं बहिश्च सन्तं पुरुषमात्मानमिति गौणं कर्म तत्र प्रष्टव्यान्तराभावात्तं लक्ष्यीकृत्य च वनस्पतीन् पप्रच्छुः किम्वा वनस्पतीनिति कर्मप्रवचनीयार्थो द्वितीया ततश्च वनस्पतीन् प्राप्येत्यर्थः । अथवा प्रथमश्लोके कान्तभावानां चेष्टा द्वितीये च नित्यप्रेयसीनां तृतीये नित्यसहचरीणामिति क्रमो ज्ञेयः ततश्चायमर्थः वनस्पतीन् प्राप्य तदात्मानं पप्रच्छुः तेषामात्मा च द्विविधः परिकररूपो वनस्पतिरूपश्च तत्राद्यो नित्यासिद्धत्वादासां ज्ञानचर एव दिव्योन्मादेऽपि तमेव लक्ष्यीकृत्य पप्रच्छुरित्यर्थः "पश्याम चान्तर्नयनैः किशोरीं तथा किशोरं प्रचुरं प्रपन्ना" इत्यादिना पुराणादौ दर्शितत्वात् ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अथ प्रेमविकलत्वादुन्मादस्य दिव्यदृष्टिसम्पादकत्वसूचकं तदन्वेषणप्रकारमाह । गायन्त्य इति । संहता अमुमेवोच्चैर्गायन्त्य उन्मत्तकवद्वनाद्वनं विचिक्युरित्यन्वयः तत्र संहता इत्यनेन ईर्ष्यामात्सर्यद्वेषादित्यागेन भगवत्परिजनसङ्गो भगवन्तमन्विषतां प्रेमपथप्रवृत्तानां प्रथमं साधनमुपादिष्टं गायन्त्य इत्यत्र "नाहं वसामि वैकुण्ठे योगिनां हृदये न च । मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ! इत्यादिभिर्भगवतो गुणगानप्रियत्वाद्भगवज्जनसमागमे गुणगानमुपदिष्टम् उच्चैरिति—

शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः ॥

इत्यत्र विहितगानगतविलज्जत्वोपदेशः । अमुमेवेति । प्रत्ययसातत्येन तदेकपरत्वमुपदिष्टं तत्वन्यत्र द्वेषः उन्मत्तकवदित्यनेनोच्चैर्गानमपि न दम्भेन किंतु प्रेमपरवशतया देहाद्यनुसंधानराहित्येनेति ध्वनितं तदप्युक्तम्—

एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥

इति—

वनाद्वनमित्यनेन यत्र यत्र प्रियप्राप्तिसम्भावना तत्र तत्रान्वेषणो क्त्या मूढग्राहेण स्वसंप्रदायाभिनिवेशेनान्यसत्सङ्गाभावनिवृत्तिर्दर्शिता विचिक्युरिति प्रियान्वेषणे अनलसत्वं तं विना विश्रामाभावश्च दर्शितः किं च तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवयेति वचनात् परिप्रश्नाभावे भगवदवगत्यसम्भवात्तदपि स्वाचरितेनैव बोधयन्ति तत्र गुरौ प्रश्नस्यावश्यकत्वेऽपि न गुरावेव प्रश्नेन तद्वेदनमित्यस्ति काश्चिन्नियमः किन्तु भगवन्मार्गप्रदर्शकानां सर्वेषां गुरुत्वमिति यत्र यत्र भगवदुपदेशस्य यथा कथञ्चिदपि सम्भावना तत्र सर्वत्र प्रश्नाविधानाय परिप्रश्नेनेत्युक्तं तमनुसृत्य सर्वत्र प्रश्नं कृतवत्य इत्याह । पप्रच्छुरिति । भगवतः सर्वत्र प्रश्नोपयोगमाह । आकाशवदिति । भूतेषु प्राणिषु अन्तरं प्रत्यगात्मरूपेण बहिः सर्वानुगतसच्चिदात्मना सन्तमाकाशवद्व्याप्तं पुरुषं वनस्पतीन् पप्रच्छुः यद्वा अन्तरं पुरुषं प्रत्यक्तया पुरिशयं बहिश्च भूतेषु पृथिव्यादषु कारण सदात्मनानुगतम् अहमात्मा गुडाकेश सर्वभूताशयस्थितः । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवद्वचनात् तत्राकाशस्य देशकालपरिच्छेदशून्यत्वेऽपि वस्तुपरिच्छेदवत्तया त्रिविधपरिच्छेदरहितभगवद्दृष्टान्तत्वासम्भवेऽपि न्यून

दृष्टो वः कच्चिदश्वत्थ ! प्लक्ष ! न्यग्रोध ! नो मनः ।
नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

स्यापि चन्द्रकमलादेर्मुखनेत्रदृष्टान्तत्ववत्तदुदाहरणं वनस्पतीन् पप्रच्छुरित्यत्र प्रेमोन्मादनिदर्शनं प्रसिद्धमेव किञ्च मानिनां स्वबुद्ध्यभिमानेनान्यत्र कुशलेष्वपि जडत्वबुद्धिः प्रेमिणां तु तृणादपि सुनीचेन तरोरपि सहिष्णुना । अमानिना मानदेन कीर्तनीयः सदा हरिरित्यादिवचनात् स्वाभिमानाभावेन न कुत्रापि जडत्वमतिरिति भावः । वस्तुतस्तु प्रेमोन्मादो भूतदिव्यदृष्ट्या वृन्दावनद्रुमादिकं नाचेतनं किन्तु मुनिसुरादिरूपमिति पश्यन्त्यः प्रेमपथमुपदिशन्त्यश्च पप्रच्छुः ॥ ४ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

एवं तदात्मतां प्राप्तानां लीलामुपवर्ण्य पुनः प्राप्तस्वशरीरानुसन्धानानां चेष्टामाह । गायन्त्य इति । अहो येन वयं रमिताः स प्रेष्ठ इदानीं क गत इति विचिन्त्य संहता मिलिताः प्रथमं प्रेष्ठमेव गायन्त्यः पूर्वं यथा वयं तदीयं कलगीतमाकर्ण्य झटिति तत्समीपमागतास्तथा ऽस्मद्गीतमाकर्ण्य सोऽप्याश्वस्मत्सन्निधावायास्यतीत्याशयेन तथा जाता नागते प्रेष्ठे उन्मत्तकवद्वनाद्वनं विचिक्युः अस्मिन्वने प्रेष्ठः स्यादित्याशया तत्र वने प्रति वृक्षादिकमन्वेषणं कृतवत्यः परिपूर्णत्वात्तदतिरिक्तस्य सर्वस्यप्यानिरूपणाच्च तदन्वेषणतत्परत्वयोः परमोन्मत्तचेष्टितत्वमित्याभिप्रायेणोन्मत्तकवदित्युक्तं मयेति द्योतनायाऽऽहाऽऽकाशवद्भूतेष्वन्तर्बहिः सन्तमतएव पुरुषं पूर्णं सर्वात्मानमन्वेषणाद्ययोग्यमित्यर्थः । निवृत्तिपक्षे आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनन्तं ब्रह्मेत्येवममुमेवाकाशवदन्तरं बहिश्च भूतेषु सन्तं पुरुषं गायन्त्यः सोऽन्वेष्टव्य इति तं विचिक्युस्तस्यान्वेषणं प्रतिपादयामासुः तथा गुहाहितं गह्वरेष्ठं पुराणमित्यन्तःकरणलक्षणस्य वनस्पतीन् उन्मत्तकवदविद्यावशं सुखमात्मविशिष्टमन्तःकरणं वनं तस्माद्वनाद्वनं तद्वृत्ति विशिष्टादितरवृत्तिनिर्विशिष्टं तथात्मा विजिज्ञासितव्य इति प्रश्नपूर्वकं विचारं वनस्पतीन् अन्तः करणवनस्पतीन् सत्त्वगुणादीनुद्दिश्य बोधयामासुरित्यर्थः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च संहताः समुदिता अमुं श्रीकृष्णमेवाद्यैर्गायन्त्यः वनाद्वनं गच्छन्त्यो विचिक्युः अमृगयन् भूतेषु अन्तर्मध्ये बहिश्च सन्तं पुरुषं श्रीकृष्णं वनस्पतीन् उन्मत्तकवत् पप्रच्छुश्च भूतेषु सन्तमित्यनेन तत्र तत्र तासां प्रेमोद्रेकविलसितां विरहव्यथां श्रीकृष्णस्त्वपश्यदेवेति सूच्यते ॥ ४ ॥

भाषा टीका ।

फिर सब इकट्ठी हो वाही प्राणप्यारे को ऊंचे स्वर ते गान करत बावरे की नांईं या वन ते वा वन में जाय श्रीकृष्ण को ढूंढत भईं जो परमात्मा आकाश की नांईं सब भूतों के बाहर भीतर सर्वत्र है वा परम पुरुष को पेडों ते पूंछत भईं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्प्रपञ्चयति नवभिः । तत्र महत्त्वादेते पश्येयुरित्याशयाश्वत्थादीन् पृच्छन्ति । दृष्ट इति । प्रेमहासविलसितैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतो वो युष्माभिः किं दृष्ट इति ॥ ५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

वो युष्माभिः युष्मदीयो वा सम्बन्धज्ञापनं तद्दर्शनसम्भावनार्थं ततः स्नेहेन कथनार्थं च यद्वा प्रेमभरस्वभाव एवायं येन निजभावोऽन्यं स्वसदृशं लक्ष्यीकल्प्योच्यत इति प्रत्येकं पृथक् सम्बोधनं वैष्णवत्वेनादरात् तत्राश्वत्थस्य विष्णुविभूतित्वेन वैष्णवत्वं प्रसिद्धमेव वटे वटे च मां विद्धीत्युक्तेर्न प्रति भूतलवर्तिमुख्यश्रीमूर्तिप्रसङ्गे श्रीभगवदुक्तेन्यग्रोधस्य तथा तयोः साहचर्येण प्लक्षस्यापि श्रीविष्णुरुद्रब्रह्मणां क्रमेण ते अधिष्ठानानीति केचित् यद्यपि विरहविह्वलतया उन्मत्तवत् तान् प्रति प्रश्नात्तादृशाभिप्रायो न घटते यश्चासौ कुत्र कुत्रापि स्वामिपादैर्व्याख्यातोऽस्ति स तु निवृत्तिपरेयं पञ्चाध्यायीति व्यक्तीकरिष्याम इति स्वप्रतिज्ञानुसारेणैव न तु श्रीव्रजदेवीभावानुसारेण अतः केवलं पुरतो दृश्यमानान् प्रत्येव प्रश्नः तथापि पूर्वापरवाक्यसङ्गत्यर्थं तेषां व्याख्यानुसारेणैव किञ्चिदुल्लिख्यते नन्दसूनुरिति निजस्वामिनं प्रति तथैवोक्त्युपपत्तेः किम्वा रसिकताद्यभिप्रायेण एवमग्रेऽपि ननु किमर्थमसौ युष्माभिः पृच्छ्यते इत्यपेक्षायामाहुः । नो मनो हृत्वा गत इति हृत्वेति मनसो रत्नत्वं व्यज्यते अतो नष्टोद्देशित्वेनागतास्तं चोरं साधून् युष्मान् पृच्छाम इति भावः । कच्चिदिति प्रश्नात् तर्हि कथ्यतामिति शेषः । विरहविह्वलतया वाक्यसमाप्त्यसम्भवात् ततश्चात्रैव यत्नात् सम्यगन्वेषयामः किम्वात्र भवद्भिर्दृष्टे सत्यनुमीयते सोऽत्र निकटेऽस्तीति तथाप्याश्वस्ताः प्राणान् निरुध्य रक्षेवेतिभावः । यद्वा उन्मत्तकवदित्युक्तेस्त्यन्त तिविवशतया प्रत्युत्तरापेक्षाद्यसम्भवात्तथैव वाक्यसमाप्तिरिति ज्ञेयम् एवमग्रेऽपि ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वो युष्माभिः प्रत्येकं पृथक् सम्बोधनं श्रीकृष्णप्रियत्वेनादरात् । ननु किमर्थमसौ युष्माभिः पृच्छ्यते तत्राहुः । नो मनो हृत्वा गत इति । हृत्वेति मनसो रत्नत्वं व्यज्यते । अतो नष्टोद्देशित्वेनागतास्तं चौरं साधून् युष्मान् पृच्छाम इति भावः । नन्दसूनुरिति स्वविश्वासहेतूपन्यासस्तथापीत्यर्थः । नन्देति । यौगिकवृत्त्या तस्य प्रत्युत सर्वब्रह्मानन्दहेतुत्वमेव युज्यत इति भावः । अत एव दुःखेन साक्षात्तन्नामोक्तिरपि माक्षात् श्रीकृष्णनामानुक्तिस्त्वीर्ष्ययापि । अपिशब्दाच्चोरस्य नाम्नोऽग्राह्यत्वेन सूचकस्यापि तद्धर्वेदित्युक्तेः । कचित् प्रश्ने । भवद्भिर्दृष्टे सति चास्यामेव दिशि विहरतीति समाश्वासमासाद्यान्वेषयाम इति भावः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवद्विरहव्यथामुषितचेतनाचेतनतिर्यगतिर्यग्विवेकानां प्रश्नप्रकारमाह नवभिः । अश्वत्थादीनां प्रत्येकसम्बोधनेन प्रश्नोऽपि प्रत्येकमवगन्तव्यः प्रेमहासावलोकनैरस्माकं मनोहरत्वाच्चोर इव नन्दसूनुर्गतः वो युष्माभिः किं दृष्टः अश्वत्थादीनां महत्त्वाद्यज्ञाङ्गत्वात्तत्राश्वत्थस्य भगवद्विभूतित्वाच्च ते पश्येयुरित्यादावश्वत्थादीन् पृच्छन्ति ततो महान्तः पुष्पैर्बहूपकारिणश्चेति कुरवकादीन् पृच्छन्तीत्येवं यथा सम्भवं केचिद्व्याचक्षते ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उन्मत्तत्वं स्पष्टयति । दृष्ट इति । हे शब्दः प्रत्येकमभिसम्बध्यते हे न्यग्रोध वटे ! न्यक् अधः रोधः आवरणं यस्य सः पादैरधोभूमिमावृणोतीति, किंशुकः पलाशः पलाशः किंशुके पर्णे इत्यमरः रक्तपुष्पवान् ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्दसूनुरिति स्वविश्वासे हेतुः तथापीत्यर्थः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तदेव प्रपञ्चयति । दृष्टो व इत्यादि । अश्वत्थप्लक्षन्यग्रोधा वनस्पतयः तैरपुष्पाद्वनस्पतिरिति तथा कारणं विनापि फलवत्त्वेऽमी भाग्यभाज एव तदवश्यमेभिर्दृष्टोऽसावित्याशयेन तानेव प्रथमं पप्रच्छुः ननु तत्पृच्छया किं व इत्यत आहुः । नोऽस्माकं मनो हृत्वा गत इति भवत्यो बह्व्यः स त्वेकः कथमहार्षीदित्यत्राहुः । नन्दसूनुः नन्दस्य व्रजराजस्य पुत्रः तेनासौ बलभिर्वतीत्यर्थः । केन साधनेनापहृतं वो मनस्तत्राहुः । प्रेमहासावलोकैनरस्माकमन्तरन्तस्थं मनो बहिराकृष्येत्यर्थः ॥ ५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्रापि प्रथमं विष्णुब्रह्मशिवतां लोके प्राप्ताः अश्वत्थप्लक्षवटास्तान्पृच्छन्ति । दृष्ट इति । अश्वत्थो हि वैष्णवो वृक्षः विष्णुवत् लोके सन्मानमर्हतीति प्रायेणायं ज्ञास्यति तथाप्ययं स्तब्धः स्वोत्तमभावनया न ज्ञास्यतीति तदर्थं हेतुभूतं नामाह । अश्वीस्तिष्ठत्यास्मिन्निति अश्वत्थः लोका स्त्वश्वेति अस्मिंस्त्वश्वस्थितीति अश्वे रूपं कृत्वा यदश्वत्थे तिष्ठत इति श्रुतेः तर्हि प्राजापत्योऽश्व इति तदपेक्षया प्राजापत्यो वृक्षः प्रष्टव्य इति प्लक्षं पृच्छन्ति । प्लक्षेति । तत्रापि तस्याज्ञानं नाम्ना वदन्ति अयं हि मनुष्याणामज्ञानार्थं पावित्र्यक्षारणादुत्पन्नः अपवित्रः लोकानामज्ञानहेतुरेव अतः कथं वक्ष्यतीति पशुना वै देवाः स्वर्गं लोकमायन् ते ऽमन्यत मनुष्या नो न्वाभाविष्यन्तीति तस्य शिरश्छित्वा मेधं प्राक्षारयन् स प्लक्षोऽभवदिति श्रुतेः तर्हि कर्मसम्बन्धरहितवैष्णवधर्मोपदेष्टा शिवः प्रष्टव्य इति तद्रूपं न्यग्रोधं पृच्छन्ति । न्यग्रोधेति । तस्यापि दूषणं नितरामग्राण्यधो यस्येति अतोऽन्ते हीनभावं गच्छतीति अग्रे गमने हेतुर्भविष्यति । वः युष्माकं सम्बन्धी भवद्भिः किं दृष्टः प्रश्नसम्भावनायां कच्चिदिति दृष्टोऽस्माभिः पूर्वं सर्वदेव वातः किम्भवतीनामितिचेत् नो मनः हृत्वा गत इति ननु स विष्णुः कथश्चौर्यं करिष्यतीति तत्राहुः । नन्दसूनुरिति । नन्दस्य चेत्पुत्रो जातः तदा तत्कार्यं कर्त्तव्यं ते हि दधिदुग्धादिचौर्यं कुर्वन्ति अतो मनश्चौर्यमपि नात्यन्तं विरोधि भर्तृनामाग्रहणं वा अत एव हरणपर्यन्तं प्रभुपुत्र इति न ज्ञानः अन्यथा भोगं परित्यज्य कथं गच्छेत् नन्वन्तःस्थितं मनः कथं गृहीतमित्याशङ्क्य त्रिविधं मनः त्रिभिरपि धर्मैर्गृहीतवानित्याह । प्रेमहासावलोकनैरिति । प्रेमपूर्वकहास्यसहितावलोकनानि मनोहराणि नमो रजः सत्त्वभावा उक्ताः प्रेम्णा अन्तः प्रवेशः हास्येन ग्रहणमवलोकनेन हरणमिति ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रश्नं प्रपञ्चयति नवभिः तत्रात्युच्चतरत्वादेते दूरवर्तिनमपि तमवश्यं पश्येयुरिति सम्भाव्य पृच्छन्ति । दृष्ट इति । प्लक्षः पीलुखदिरेति ख्यातः न्यग्रोधो वटः किमर्थं पृच्छ्यतेति तेषामपि प्रश्नमाशङ्क्याहुः नन्दस्य साधोः सूनुरपि नो ऽस्माकं स्त्रीजनानां मनो हृत्वा गतः प्रेम्णः सर्वलोकोन्मादकेन महामोहनौषधविशेषेण सहितैर्हासावलोकनैः प्रेषितैर्भृत्यैरस्माकं नेत्रद्वारतोऽन्तःकरणमन्तः पुरं प्रवेशितैर्मनोरत्नं चौरयित्वा पलायित इत्यर्थः क्षणं स्थित्वा अहो किमेताभिः क्षुद्राभिरित्यस्माननवजानन्तः स्तब्धा अमी प्रत्युत्तरं न ददते तदलमेतैः क्षुद्रफलैः परोपकारधर्मानभिज्ञैरप्रफुल्लैः अशुद्धान्तःकरणैरिति तान् विहायान्यत्र गताः ॥ ५ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तत्प्रपञ्चयति । दृष्ट इति । गोपकन्यानामियमुक्तिः तारल्येनाग्रेसरत्वादिति ज्ञेयं यद्यप्यासां प्रकटलीलान्तःपातित्वात्तेषां वनस्पतीनां परिकररूपस्फूर्त्यसम्भवस्तथापि काश्चांचिन्नित्यसहचरीसङ्गेन तथाभावान्न विरोध इति प्राधान्येनैवमुक्तं कच्चिदिति कोमलालापे अश्वत्थ इति श्रीभगवद्विभूतित्वादत्युच्चशिखरत्वाच्च प्राथम्यं श्लेषेण न श्वः स्थास्यतीत्यश्वत्थ इति निर्वेदसूचनं तथाहि—

सौमो भूरुह ! ते दिशो दश गताः शाखाः शिरश्चाम्बरम्
गोपः कोऽपि तमालकोमलरुचिः कच्चिन्न दृष्टस्त्वया ॥
एवं तानभिरुदाहृते वत मुहुर्वक्तुं वचोऽनीश्वरः ।
पत्रैरेव निसर्गचञ्चलतरैः प्रत्युत्तरं दत्तवानिति ॥

ततश्च मया न दृष्ट इति चलदलतया तच्चेष्टितमध्यवस्याहो वत सख्यौ युक्तमुक्तमाक्षिरहितेनानेन कथं दृश्य इति परस्परमवगत्याक्षिमन्तमुद्दिश्याहुः । लक्ष्येते प्रकृष्टे अक्षिणी यस्येत्यकारस्य पूर्वरूपत्वमार्षं रलयोरैक्यं चेति सिद्धम् । अथ पश्यन्नपि वागिन्द्रियाभावाद्वक्तुं न पारयतीति तद्वन्तं वटमध्यवस्याहुः । न्यग्रोधेति । नवपल्लवान्यस्य जिह्वाकाराणि प्रकल्प्य न्यञ्चि अधः कृतानि रोधांस्यग्राणि येनेति व्युत्पत्तेः अस्मासु तत्स्थितिं सूचयितुमेव नम्रो जात इति भावः । कं पृच्छथ इत्याशङ्क्याहुः । नन्दसूनुर्नो मनो हृत्वा गत इति । मनसो रत्नत्वं सूचितं कैरित्याकाङ्क्षायां प्रेमेत्यादि तत्र प्रेम्णा वशीकृतं हासेन हस्ते कृतं अवलोकनेन बहिर्निष्कासितमिति तथोक्तं यद्वा चित्तादिभिर्हृतं कथं हृतमित्यत आहुः प्रेम्णा चित्तावरणं भेदितं हासेन बुद्ध्यावरणमवलोकनेनाहङ्कारस्येति प्रतिपदमवसेयं नन्देति साक्षाद्गुरुनामग्रहणं मुग्धत्वादेव हृत्वेत्यादिकमपि बालभाषितमेव वः युष्माभिरिति प्रत्येकमामन्त्रणमुक्ताभिप्रायेणादरणीयत्वादिति दिक् ॥ ५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अत्र प्रश्नप्रकरणे रसविशेषास्वादाय प्रश्नयोग्यत्वतन्निवृत्तियोग्यत्वाभ्यां नामव्युत्पत्तयः प्रदर्श्यन्ते तत्र यत्र काचित्काचित्प्रसिद्धकल्पना उणादिगणान्तःपातितया तत्साधुत्वं ज्ञेयं तत्राश्वत्थप्लक्षन्यग्रोधान् उच्चतनुत्वेन दूरं पश्यतो हर्यजहरविभूतित्वेन तद्रहस्यज्ञान् वनस्पतित्वेन वनजनपालकान् चौरग्रहणाधिकारिणश्च मत्वा पप्रच्छुस्तदाह । दृष्टो व इति । कच्चिदिति कोमलालापे तेन स्वकार्यप्रार्थने सामो दर्शितः यद्वा जडानस्मान्किं पृच्छथ तत्राहुः । कच्चिदिति कदिति कुत्सितं चिदपि चेतनमत्रगौऽपि यस्मादिति तस्य सम्बोधनं तथा परोपकारितनुत्वात् तीर्थवासित्वाद्द्वैपादिहिंस्रद्वयाहित्यात् भगवद्विभूतित्वाच्चेति भावः । हे अश्वत्थ ! न श्वः प्रभातपर्य्यन्तमपि स्थास्यतीति विश्वासार्हमिति भगवत्स्वरूपातिरिक्तस्य सर्वस्यानित्यत्वबुद्ध्या स्वीकृतपरोपकार ! हे प्लक्ष रलयोः सावर्ण्यात्प्रक्षप्रकृष्टतया परोपकारार्थं तीर्थे क्षयति निवसतीति तथा हे न्यग्रोध ! न्यक्कारं याच्ञा नञ्जीकारं रोधयतीति तथा परोपकारित्वेनास्मदुपकारोऽपि विधेय इति एवं सम्बोध्य स्वप्रयोजनमाहुः । नन्दसूनुर्वः युष्माभिर्दृष्टः किमर्थं पृच्छथ तत्राहुः । हृत्वा गतः कस्यापि केनचिद्धरणे किम्भवतीनां तत्राहुः । न इति । किमपि पयोदधिफलादिहरणे किमन्वेषणेन तत्राहुः । मन इति । मनसः सर्वप्राधान्यात्तद्धरणे न किमप्यवशिष्टमिति भावः । ननु हृदन्तर्गतं मनः कथं हृतं तत्राहुः । प्रेमहासावलोकनैरिति । प्रेमस्नेहसुपक्के मृदुमधुरहासे तीक्ष्णदृष्टिलक्षणं मदनमदेन मादकं मदनं मेलयित्वा तदा स्वादनेन मोहयित्वा हृत्वा गतः ननु गोपजातीयानां चौर्य्यं स्वाभाविकमेवेति किङ्कथनीयं तत्राहुः । नन्दसूनुरिति । नन्दस्य न समानगोपत्वं गोपराजसुतस्य तु स्वज्ञातिचौर्य्यमनुचितमेवेति भावः । किं युष्माभिर्दृष्ट इति दृष्टो नवेति तस्य छलित्वात्सन्देहप्रश्नः उच्चत्वात्तद्विभूतित्वाद्दृष्ट एव वाच्यमस्मभ्यमिति एवं प्रश्नेऽपि यदा न ब्रूयुस्तदा एतेषां वृन्दावनतरुत्वेन चित्त्वेऽपि कचित्त्वं कुत्सितं चित्त्वं परोपकाराभावात् विभूतित्वेऽपि कृष्ण एव चौरस्तद्विभूतित्वमश्वत्थस्य तत्सहकारिब्रह्मरुद्रविभूतित्वे प्लक्षन्यग्रोधयोरिति चौरपक्षपातित्वमेव वनस्पतित्वेऽपि कलिनृपाणामिव चौरसाहाय्यम् उच्चतनुत्वमप्येषां निर्बुद्धित्वसूचकं स्वनाम्नाप्यश्वत्थस्यानवस्थितत्वं प्लक्षस्यापि प्रकृष्टात्सतः क्षयति नाशयतीति सद्द्वेषित्वं न्यग्रोधस्यापि न्यक्कारेण रोधयतीति तथेति स्वनाम्नैव सतिरस्कारित्वं गम्यते इति तानुत्सृज्यान्यत्र गताः ॥ ५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तत्कृतप्रश्नान् प्रपञ्चयति । दृष्ट इति । तत्रादौ विष्णुप्रजापतिरुद्रावतारभूता एतेऽश्वत्थादयोऽवश्यं पश्येयुरत एते प्रष्टव्या इत्याशयेनाश्वत्थादीन् पृच्छन्ति । हे अश्वत्थ हे प्लक्ष हे न्यग्रोध ! वो युष्माभिः कच्चित्किं नन्दसूनुर्दृष्टः नन्देन परमभक्तेन जन्मान्तरे आराध्य पुत्रत्वेन लब्धः अस्मदनुग्रहाय वा तत्पुत्रत्वेन प्रकटितः अत एव नोऽस्माकं मनः प्रेमहासावलोकनैर्हृत्वा गतः अन्तर्हितः यद्यपि स सर्वत्र व्याप्तस्तथापि नन्दसूनुत्वेनास्माकं प्रेष्ठोऽतस्तद्रूपोऽन्विष्यते युष्माभिर्दृष्टश्चेत्तर्हि करुणया वक्तव्यं तं लब्ध्वा सुखिन्यः स्याम इति भावः । यद्वा ननु विष्णुः कथं चौर्य्यं कृतवानित्याशङ्कानिरासार्थं नन्दसूनुरित्युक्तं तथा च यथा दुग्धादिचोरितवांस्तथा मनोऽपीति भावः । ततस्तेभ्य उत्तरमलब्ध्वा अहो अलक्ष्मीसंस्थानभूतः पशुना देवाः स्वर्गलोकमायन् तत्तस्य शिरः छित्त्वा मेदः प्राक्षारयन् स प्लक्षो ऽभवदिति श्रुतेरयमपि प्लक्षो लोकानामज्ञानहेतुरेव नितरां न्यग्राण्यधोभूतानि यस्येत्यधो दाष्टर्न्यग्रोधोऽत एते न वदिष्यन्तीति विचार्यान्यत्र गताः अनभिज्ञापक्षे अत्युच्चतरत्वादेते दूरचरमप्यस्मत्प्रेष्ठमवश्यं पश्येयुरिति सम्भाव्य पृच्छन्ति दृष्टा किमर्थं पृच्छथ इति चेत्तत्राहुः नन्दस्य साधोः सूनुरपि नोऽस्माकं स्त्रीजनानां प्रेम्णा सर्वलोकमहामोहनैरधाविशेषेण हसितैर्हासावलोकनैर्भ्रूत्यैश्चौर्यकर्मकुशलैर्विवृतनेत्रादिद्वारान्तःकरणलक्षणान्तः प्रवेश्य समर्थैर्मनोरत्नमञ्जूषां चोरयित्वा पलायितोऽतस्तं पृच्छाम इत्यर्थः । तत उत्तरमलब्ध्वा महत्त्वपूज्यत्वाद्यभिमानादेते ऽस्मान्क्षुद्राः प्रति अवज्ञया न कथयेयुरिति विचार्य्यान्यत्र गताः । मानिनीपक्षे एते सर्वलोकपूज्याः प्रष्टव्या इत्याशयेन पृच्छन्ति । दृष्ट इति । दृष्टो वक्तव्यः यतो नो मनो हृत्वा नत्वस्माभिस्तस्य मनो दत्त

कच्चित्कुरबकाशोक नागपुन्नागचम्पकाः ।
रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मितिभावः । ननु बलात्कथं भवतीनामन्तरस्थं मनो हृतवानितिचेत्तत्राहुः । प्रेमेति । स्वागतमित्यादिवचनैराविष्कृतेन प्रेम्णाऽन्तः हासेन ग्रहणमवलोकनैर्हरणं ननु तदुपरि भवतीभिर्विश्वासः किमर्थं कृत इति चेत्तत्राहुः । नन्दस्य सर्वानन्दप्रदस्य परमविश्वसनीयस्य सूनुरतोऽस्मभ्यं सुखमेव दास्यतीति मत्वा विश्वासः कृत इति भावः । ततो ऽलब्धोत्तराः क्षणं स्थित्वा अहो किमेताभिरित्यस्मानवज्ञानन्तः स्तब्धाः प्रत्युत्तरं न ददते तदलमेतैः क्षुद्राभक्ष्यफलैरफुलैश्चेति न्यग्रोधो रुधिर आवरणे नो न्येक्षत्यधो गच्छतीत्यर्थत्वात्प्रष्टुमयोग्यैश्चान्तर्बहिरत्यन्तकठोरैः परोपकारमाहात्म्यानभिज्ञैरिति विचार्य्यान्यत्र गताः निवृत्तिपक्षे गुणा न विदुरात्मानामित्युक्तत्वाद्गुणाद्यभास्यताभाविष्कुर्वन्ति । दृष्ट इत्यादिना । अश्वत्थादिपदैः सत्वरजस्तमाऽभिधा गुणा गृह्यन्ते नोऽस्माकं प्रेम प्रसन्नतापूर्वकमवलोकनैः श्रवणादिरूपैः मनो हार्द हृत्वा उद्धृत्य नन्दः आनन्दश्चासौ सूनुश्चानन्दः स्वयंप्रकाशरूपः परमात्मा गतोऽवगतः स युष्माभिर्दृष्टः कच्चिद्भवद्भिरप्रकाश्य इति भावः सूनुः पुत्रे ऽनुजेऽर्के चेति मेदिनी ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उन्मत्तवत् प्रश्नप्रकारं वर्णयति । दृष्ट इति नवभिः । नोऽस्माकं प्रेमहासविलसितैरवलोकनैर्मनो हृत्वा गतो नन्दसूनुः हे अश्वत्थादयः वो युष्माभिः कच्चित्किं दृष्टः अत्राश्वत्थादीनां महत्त्वादिरूपः कुरबकादीनां पुष्पादिभिः परोपकारित्वरूपः तुलस्यादीनां कृष्णचरणप्रियत्वादिरूपस्तत्तद्गुणविशेषः कृष्णसंनिधिभावनाजनकः स्पष्टत्वान्नोच्यते ॥ ५ ॥

भाषा टीका

वा पूछवे के हालको कहैं हैं गोपी वोलीं हे पीपर ! हे अमिली (पियाखल) हे वट ! नन्दराय को लाला अपने प्रेम-वारे हसन वोलन चितवन ते हमारे मनको चोराय चलो गयो जो तुमने देखो हो तो वता दीजिओ ॥ ५॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महान्तः स्वपुष्पैर्बहूपकारिणश्चेति कुरबकादीन्पृच्छन्ति । कच्चिदिति । हे कुरवकादयः दर्पहरं स्मितं यस्य सः इतो गतः कच्चिद्दृष्ट इति ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

महत्तमत्वादेतेऽस्मान् क्षुद्राः प्रत्यवज्ञया न नूनङ्कथयेयुरिति मत्वाऽन्यान् पृच्छन्ति । कच्चिदिति । कुरबकः शोणोऽम्लानः नागो नागकेसरः किमितः गतः यद्वा अत्र वर्त्तमाने पूर्वं दृष्ट इति पृष्टमधुना त्वित, इति दूरतोऽपि दर्शनं सम्भवेत् तथापि न सुलभः स्यादिति निकटागतस्य सतोऽत्रैव तत्पदान्यन्विष्य तैश्च तमन्वेषयाम इति भावः । ननु मानिन्यः कथं तं पृच्छथ तत्राहुः । मानिनिनामिति । तत्स्मितमात्रेणैव मानो न तिष्ठेत् केवलमात्मनो वैदग्धीविशेषेण तेनैवास्माकं मानो जनितो न तत्रास्माकमपराध इति किं वा तदानीमेव तत्स्मितेन मानो हतः अत एवान्वेषयाम इति किं वा तादृशमहामोहनस्य विच्छेदेन क्षणमपि जीवितुं न शक्नुम इति पृच्छाम इति भावः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

महत्तमत्वादेतेऽस्मान् क्षुद्राः प्रत्यवज्ञया नूनं न कथयेयुरिति मत्वान्यान् पृच्छन्ति । कच्चिदिति । कुरबकः शोणोऽम्लानः नागो नागकेसरः किमितो गतः । यद्वा अत्रान्तर्हितो वर्त्तते पूर्वं दृष्ट इति पृष्टम् । अधुनात्वित इति दूरतोऽपि दर्शनं सम्भवेत् । तथापि न सुलभः स्यादिति निकटागतस्य सतोऽत्रैव तत्पदान्यन्विष्य तैश्च तमन्वेषयाम इति भावः । गत इति च पाठे बहुत्र तन्मते टीकायामित इत्यध्याहृत्य व्याख्यातम् । रामानुज इति नन्दसूनुरितिवत् । ननु मानिनीनां युष्माकं कथं तेन मनो हृत तत्राहुः । मानिनीनामिति ॥ तासां दर्पहरं स्मितमपि यस्य तादृशोऽपीति तस्याविमृश्यकारित्वञ्च ध्वनितं दर्पो गर्वः । तदानीमेव तत्कृतेन कपटस्मितेन मानमयगर्वो हृतः । अत एवान्वेषयाम इति तथा तादृशमहामोहनस्य विच्छेदेन क्षणमपि जीवितुं न शक्नुम इत्यतः पृच्छाम इति भावः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कच्चिदिति । हे कुरबकादयः ! मानिनीनां दर्पहरं स्मितं यस्य स रामानुजः इहागतः कच्चिदितीष्टप्रश्नद्योतकमव्ययं दृष्ट आगतश्च किन्तदस्मदिष्टमित्यर्थः । एवमुत्तरत्रापि ज्ञेयम् ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुरबकः करञ्जः नागः नागकेसरः पुन्नागः पुरुषस्तुङ्ग इति दोग्धा जिह्मम्भुरः ॥ ६—७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इत इति इण् धातोर्निष्ठाप्रयोगः मानिनीनां दर्पहरस्मित इति यश्च त दृशोऽपि गत इत्यविमृश्य कारित्वं तस्य व्यञ्जितम्॥६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

हे सख्य एभिरसौ न दृष्ट एव एषां कुसुमाभावात् समीपं सतायात् तेन सकुसुमानेव तरून् पृच्छाम इत्याहुः। कच्चिदित्यादि। कच्चित्प्रश्ने हे कुरवकादयः रामानुजः दृष्ट इत्यध्याहार्य्यः पूर्व एव वा आवर्तनीयः तस्यैवं कार्यमयुक्तं किं तदाहुः मानिनीनामस्माकं दर्पहरणमिति यत इत्याहुर्मानिनीनां दर्पहरस्मितः॥६॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तेषामनुत्तरं मत्वा एते अमुख्यफला महान्तोऽपि काकसेव्या एवेति ये महान्तः पुष्पवन्तः सुगन्धाः तान् पृच्छाम इति कुरबकादीन् पृच्छन्ति। कच्चिदिति। कुरबकाशोकौ कामोद्दीपकौ एते कामबाणपुष्पाः नागो नागकेसरः पुन्नागश्च चम्पकश्च अतिसुगन्धपुष्पाः ते हि कामिनं व्यावर्त्तयन्ति अतः पश्चाप्येते ज्ञास्यन्तीति रामानुजः कच्चिद्भवद्भिर्दृष्ट इति पृच्छन्ति पूर्ववदेव प्रयोजनकथनं मानिनीनां दर्पहरं स्मितं यस्य व्यर्थमेव गतो भगवान् स्मितमात्रेणैव दर्पो गच्छति किं गमनेन भयं तु नास्त्येव यतो रामानुजः बलभद्रभ्राता भर्तृनामाग्राह्यमिति वयं सर्वा एव मानिन्यः स्थिताः मतोऽस्मद्दर्पदमनार्थं गतः प्रायेणैतैर्न दृष्टः कुत्सितरवात् कं सुखं यस्य रोदनप्रियोऽयम् अशोकश्च शोकनाशक एव नतु कस्यचित्सुखं प्रयच्छति नागोऽयं नाम्नैव भयानकः गजपक्षेऽपि पुंसामपि नागः चम्पकोऽपि परिणामविरसः अफलाश्चैते॥६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुष्पोद्यानं प्रविश्याहो सत्यमेव एते शुद्धान्तःकरणाः प्रष्टव्याः यदहो स्वमकरन्दैर्मधुव्रतातिथीन् सेवन्ते इति। वृक्षानासाद्याहुः। कच्चिदिति। कुरवकः शोणोऽम्लानः। नागो नागकेसरः। कच्चिद्गतः किम्वा कच्चिदिहैव निन्हुत्य स्थितो वेति भावः। ननु किमर्थं पृच्छथेत्याशङ्क्याहुः। मानिनीनां मानधनानामस्माकं दर्पं मानं हरति स्मितं यस्येति वयं निर्धनीकृता एवाभूमेति भावः। तदैवाकस्मिकेन पवनेन चालिताग्रशाखांस्तानालक्ष्याहो शिरोधूननेन वयं न जानीम इति ब्रुवते तदलममीभिः कठोरैः पुरुषजातिभिरित्यन्यतो जग्मुः॥६॥

केनचित्कृता विशुद्धरसदीपिका ।

अहो सख्यो! महत्तमत्वादेतेऽस्मान् क्षुद्रा इत्यवज्ञया नूनं न कथयेयुः अपि च वनस्पतीनामेषामप्रसूनत्वान्नन्दसूनुपरिचय एव नास्तीति तद्भन्तः प्रष्टव्या इति तानेव निर्दिशन्ति। कच्चिदिति। कुरवकः शोणोऽम्लानः नागो नागकेसरः पुन्नागः केसरः रामानुज इति तज्ज्येष्ठनामग्रहणात्कान्तभावाभिनिवेशेन साक्षात्तन्नामाग्रहणाच्च परकीयाभिमानिनीनामिदं वाक्यं प्रष्टव्येषु च नर्मसचिवत्वमपि सम्भावितम् अत एव मानिनीनां दर्पहरस्मितः निजदोषाविष्कारेण तत्परिकरप्रायेष्वेतेषु तत्प्रतिक्रिया च सूचिता यद्वा स्मितमात्रसाध्ये दर्पोपशमने किमनेन पलाय्य गतमित्यधीरत्वमुक्तम्॥६॥

श्रीरामनारायणकृतभावभावविभाविका ।

अन्यान् पप्रच्छुः। काचित्कुरबकेति। तत्र कच्चिदिति सर्वत्र सम्भावनासम्भावनयोः पूर्ववत् कौ पृथिव्यां परोपकारतया रवः सुयशो यस्य स कुरबः स्वार्थे कः यद्वा कौ रवेण सुयशसा कं सुखं यस्येति व्युत्पत्तिद्वयेन परोपकारिणं यशस्विनं कृष्णस्यापि कौरवः सुयशो यस्यास्मत्सम्मोहनवेणुरवो वा यस्य तेनैव कौ विस्तृतस्वयशोरवेण सतां कं सुखं वा यस्माद्वेणुरवेण वा रसिकसखीनां कं सुखं यस्मादेव कुरवकत्वात् तत्समाननामसीलत्वेन तद्रहस्यज्ञं सुमनोविकासामोदाभ्यां चोपलक्षितकृष्णदर्शनाह्लादं मत्वा तं पप्रच्छुः। हे कुरवक! रामानुजो नो मनो हृत्वा गतस्त्वयोक्तरीत्या समाननामगुणत्वात् दृष्ट इति पूर्वेणैवान्वयः तथा च नो ब्रूहीति प्रार्थना। ननु भवतीनामेव मानदोषेण तेन तथा कृतमिति स्वयमेव तत्प्रश्नोत्तरं सम्भाव्याहुः मानिनीनां दर्पहरस्मित इति। तथा चास्मद्दर्पहरणस्य तदीयस्मितमात्रसाध्यत्वादेतावन्नैर्घृण्यमनुचितमेवेति भावः। एवंप्रश्नेऽप्युत्तरालाभे यथा कृष्णो मृगयुरिव स्ववेणुगतिरवेण हरिणीरिव नो मोहयित्वा तन्मारणमिव विश्वासघाताचरणेन कुत्सितरवत्वात्कुरवकस्तथायमपि कुत्सितरवतया कुरवकत्वान्नात्रभाषते इति तमुत्सृज्यान्यत्र गच्छन्त्यः अशोकं दृष्ट्वा तरति शोकमात्मविदित्यादिश्रुत्यात्मस्वरूपकृष्णदर्शनं विना तदशोकत्वानुपपत्त्या तद्दर्शनं सम्भाव्य न शोको विद्यते यस्मादिति व्युत्पत्त्या पुनस्तत्स्वविस्तेन तरुतनुत्वेन करुणार्शलत्वञ्च सम्भाव्याशोकेति सम्बोधनेन त्वदुपसन्नानां नो नो शोको भवतु चन्दनद्रुमस्य स्वसमीपोपगतचन्दनत्वसम्पादनवदस्मदशोकत्वं सम्पाद्यतामिति पूर्ववत्सम्प्रार्थ्योत्तरमलब्ध्वा—

> यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम्।
> जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः॥

इत्यादिवचनात् शोकवानेव परशोकं ज्ञात्वा तन्निवृत्तय उपकरोति नाशोकः अयं चाशोकतया नास्मच्छोकं जानाति येनोपकारं विदध्यात् किञ्चाशोकस्यास्मद्विधसदृशमत्वात्सदद्वेषित्वमेव असंख्याताशोकवने साक्षाल्लक्ष्मीः सर्वमान्या सीता शोकग्रस्ता निवासिता तैर्बहुभिर्बहुमान्याया अपि तस्या एकस्याः शोकहरणाय वचनमपि नोक्तम् एकेनाशोकेन बह्वीनां नः शोकग्रस्तानां शोकापनोदस्य सम्भावयितुमप्यशक्यत्वाद्वृथात्र प्रश्न इति मत्वाग्रे गच्छन्त्यो नागपुन्नागाख्यौ वृक्षविशेषौ दृष्ट्वा न अगो नागः पुमांश्चासौ न अगश्चेति व्युत्पत्त्या पुलकादिना च तयोः समानद्रुमत्वाभावं निश्चित्य नागत्वादेव नागगतिकृष्णगतिज्ञत्वं

श्रीरामनारायणकृतभावभावविभाविका ।

पुंनागमोगभुजकृष्णभोगोपयोगित्वं नागशयनस्य तस्य नित्यसहकारित्वं च सम्भाव्य स कृष्णः कृष्णनाग इव मुखोन्मुखमुखतया कामविषाग्निं नोऽङ्गेषु विस्तार्य सुरनागगतिनटनागरवरः नो मनो हृत्वा कृष्णो गतः इति प्रश्नेऽप्युत्तरमनवाप्याय नागः स्वयं विषविस्तारको मारकः कथं वचनामृतेन जीवयेत् पुंनागस्तु स्वनाम्नैव पुंसो नागत्वं बोधयतीति मत्वान्यत्र गच्छन्त्यः चम्पकं विलोक्य तत्पीताम्बरवर्णतया च चपि चापल्ये इत्यस्मात् चम्पयतीति चम्पकः इति व्युत्पत्त्या तस्य चपलत्वेन चपलकृष्णसमानशीलतया तद्रहस्यज्ञत्वं यद्वा चपिगतावित्यस्माच्चम्पयतीति चम्पकः अत्र इदित्त्वान्नुम् ये गत्यर्थास्ते प्राप्त्यर्थास्तस्मात् प्राप्तत्वेन तदभिज्ञत्वं दूरेस्वामोदप्रदत्वेनोपकारकत्वं च सम्भाव्य पूर्ववत्प्रश्ने उत्तरानवाप्तौ च तदीयचपलत्वेनैवाविश्वस्य सुरभिविस्तारोऽपि कृष्णवत् मनोहरणायैव नोपकारायेत्यवधार्य्य काश्चित्तु स्ववत्तमपि कृष्णदर्शनविरहेण पीतवर्णं वैकल्येनैव भाषितुमशक्तमाकलय्यान्यत्र गताः ॥६॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ कुरवकादीन् दृष्ट्वा एते महान्तः पुष्पवन्तः सुगन्धाः मधुपैरतिथिभिरनिशं सेव्यमानाः शुद्धान्तःकरणाः कथयिष्यन्तीति मत्वा पृच्छन्ति । कश्चिदिति । कुरवकः शोणोऽम्लानः नागरङ्गः केसरः हे कुरवकादयः ! रामानुजः कश्चिदितो गतः अनेन मार्गेण गच्छन् दूरतोऽपि दृष्टः स्यादिति भावः । रामावतारे कृतस्य फलप्रदानायाऽस्मिन्नवतारे स्वीयं नाम ज्येष्ठत्वं च लक्ष्मणाय दत्तवान् स सक्ता अस्मांस्त्यक्तुमयोग्यस्त्यक्त्वा गतोऽतः पृच्छामस्तस्माद्दृष्टश्चेत्कृपया वदतेति रामानुजपदाशयः करुणासागरोऽपि भगवान् कठोरचित्तः क्षत्रियजात्युत्पन्नत्वात्स्वभावमनुकुर्वन्नस्मत्प्राणहरचेष्टो जात इति वा [१] तदाशयः यद्यपि तेन रमितानामस्माकं मान उत्पन्नस्तथापि तन्निरासार्थमन्त-

(१) ननु रामानुज इत्यत्राट्कुप्वाङिति णत्वं प्राप्नोतीति चेन्मैवम् रामनमित्यादौ णत्ववारणाय निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वरूपार्थकेन रषाभ्यामित्यत्र कृतेन समानग्रहणेन वारणात् तदर्थश्च निमित्तानाधिकरणनिमित्तिमत्पदघटितं यत्तद्भिन्नं यत्पदं तदवयवत्वं यत्र द्वयोस्तत्र णत्वमिति तेन मातुर्नमनमित्यादौ णत्वाभावो विभिन्नपदत्वेन मातृभोगीण इत्यत्र णत्वं समानपदत्वाभावेन सुपर्वणेत्यादौ णत्वं निमित्तानाधिकरणानिवेशेन गन्धर्वगानमित्यादौ णत्वाभावो लौकिकार्थवत्पदाभावेन रामेणेत्यत्र णत्वं रामनामेत्यादौ णत्वाभावश्चेति सर्वं सिध्यतीति नन्वेवमपि नारायणरामायणादाविव पूर्वपदादिति णत्वं प्राप्नोत्येवेति चेन्न रामानुजो मानिनीनां गतो दर्पहरस्मितः रामानुजं लक्ष्मणपूर्वजं चेत्यादि प्रयोगैरस्य संज्ञात्वावगमेन रघुनाथादाविव संज्ञाभङ्गभिया तत्सूत्रप्राप्त्यभावात् भूम्नोऽसंज्ञायामिति सूत्रभाष्यपर्यालोचनया कृतणत्वेन चेत् संज्ञाऽक्षय्यर्थौ गम्यते तदा णत्वमिति पूर्वपदादिति सूत्रार्थादित्यलम् ।

र्धानं नोचितं यतः दर्पहरं स्मितं यस्य सः तथा च मिष्टौषधप्रदानेन रोगानिवृत्तिसंभवे विषप्रदानं नोचितम् अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति न्यायादतस्तदन्यार्थं विचार्य्य वक्तव्यमितिभावः । तेभ्योऽलब्धोत्तरास्तदैवाकस्मिकेन वायुना चालिताग्रशाखांस्तानालक्ष्याहो शिरो धूननेन न वयं जानीम इति सूचयन्त्यतोऽलमेभिः सम्पद्गर्वितैरिति मनसि निधायान्यत्र याताः । अनभिज्ञापक्षे अहो किमर्थं गत इतिचेद्दूरैव गत इत्याशयेनाहुः । रामानुजस्तथा च बलभद्रानुजस्य तस्य नास्ति भयसंभावनाऽतो भयनैमित्तिकमपि तद्गमनं न सम्भवति नाप्यस्मन्मानानिरासार्थं तस्य स्मितमात्रेणैव वशीकृत्वादित्याहुः । दर्पेति । तथा च, स्मितमात्रेण हृतमानास्तद्वियोगे क्षणमपि जीवितुमशक्ता अन्वेषयामः पृच्छामश्चातः कृपया वदतेति भावः । तेभ्योऽप्यलब्धोत्तरा अहो अयं कुरवकः मकरन्ददत्वादलीनां कुत्सित ईषद्वा रवो यत्र सः यद्वा कुत्सिताद्रोदनशब्दात्कं सुखं यस्य सः रोदनप्रियः अशोकः शोकरहितः पीडानभिज्ञत्वाद्दयावर्ज्जितः नागोऽयं नाम्नैव भयानकः अयन्तु पुंसामपि नागः चम्पकोऽपि परिणामविरसस्तस्मादेते न प्रष्टव्या यतो नास्मान्सुखयिष्यन्तीति विचार्य्यान्यत्र गतः मानिनीपक्षे कुरबकाशोकौ कामोद्दीपकौ नागादयः कामबाणपुष्पाः कामिनं व्यावर्त्तयन्त्यतः कामिनन्तं पश्चाप्येते ज्ञास्यन्तीति मत्वा तान्पृच्छन्ति । कश्चिद्रतः किंवा क्वचिदत्रैव निन्हुत्य वर्तते ननु किमर्थमन्विष्यत इत्याशङ्क्याऽस्मत्सर्वस्वमपहृत्य पलायितः इत्याहुः मानिनीनां मानैकधनानामस्माकं स्मितादिना दर्पं हृतवानिर्द्धनाश्चास्मान्कृत्वा गतोऽतो धूर्तशिरोमणिरस्माभिर्धर्तव्य इति भावः । ननु अबलाभिर्युष्माभिः कथं धर्तुं शक्य इतिचेत्तत्राहुः । रामानुजः तस्य ज्येष्ठो भ्राता बलरामोऽप्यस्मदपेक्षया न प्रबलस्तस्यायमनुजः कथं प्रबलः स्यादन्यथा पलायनं न कुर्यादिति भावः । ततोऽलब्धप्रतिवचना अहो एते पुरुषजातित्वेन कठोरचित्ताः कृष्णपक्षपातिनो न कथयिष्यन्तीति मत्वान्यत्र गताः निवृत्तिपक्षे कुरवकादिशब्दैः कुरवकादिस्थानीयानामाकाशादीनां स्थूलसूक्ष्मभूतानां ग्रहणं रामा महामाया अनुजानुगामिनी यस्य सः सर्वकार्य्योपादानमायाधिष्ठानभूतः कश्चिद्युष्माभिरितोऽवगतः सत्वस्माकं मानिनीनां तत्र प्रामाण्यवतीनामपि दर्पहरं स्मितं स्मयनीयं चराचरात्मकं जगद्यस्यास्माकमपि सत्वासत्त्वाभ्यां वक्तुमशक्यत्वात् तथा च महाभूतेभ्योऽपि परं इति भावः ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे कुरबकादयः ! मानिनीनां दर्पहरं स्मितं यस्य स रामस्य बलस्य अनुजः इतो गतः कश्चित् किम् ॥ ६ ॥

भाषा टीका

हे कुरवकवृक्ष ! हे अशोक ! हे नाग पुन्नाग हे चम्पा हो [रामनुज] बलदाउ जी को छोटो भाई अपनी मन्दमुसक्यान ते अभिमान को हरवेवारो जब हमने मान कीनो तब चलो गयो सो कहीं तुमने देखो हो तो बता दीजियो ॥ ६ ॥

कच्चित्तुलसि ! कल्याणि ! गोविन्दचरणप्रिये ! ।
सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अलिकुलैः सह त्वा त्वां बिभ्रत्तवातिप्रियस्त्वया किं दृष्ट इति ॥ ७ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

एते श्रीकृष्णसेवका अस्माकं मानं विज्ञायासूयया न किल कथयेयुरिति निजसखीमिव मन्यमानाः सौभाग्यविशेषेण च संदर्शनं सम्भाव्य श्रीतुलसीं पृच्छन्ति । कच्चिदिति । कल्याणि ! हे जगन्मङ्गलकारिणि परमसौभाग्यवतीति वा तत्र हेतुः गोविन्दस्य गोकुलेन्द्रस्य निजाशेषमाधुर्यप्रकटनपरस्य भगवत श्चरणौ प्रियौ यस्यास्तत्सम्बोधनं तयोः प्रिये वा इति महालक्ष्मीतोऽप्याधिकसौभाग्यं सूचितं बहुलप्रयासेन लक्ष्मीकाम्यरजसोः श्रीकृष्णचरणयोः स्वतः प्रियत्वात् अब्जादिरूपकाप्रयोगस्तत्प्रियत्वेनैव्यया अतोऽलिकुलैः सह वर्त्तमानामपि त्वां बिभ्रत् पूर्वमेव वैजयन्त्यन्तर्गतत्वेन अधुनैव वा अवच्छित्य मालादिरूपेण धारयन् अत एव तवातिप्रियत्वेन त्वया दृष्टोऽस्ति कच्चित् अलिकुलैरिति तस्याः सदा मकरन्दमयत्वं तेन च सदैवापरित्याज्यत्वं तथा मत्तानां तेषां झंकारेण निन्हुत्यसम्भवत्वं च सूचितम् अतोऽवश्यं त्वदन्तिकमागतस्त्वया दृष्ट इति भावः अच्युत इति । कदापि त्वत्तो न विच्युतो भवतीति तदेव दृढीकृतं श्लेषेण अलिकुलैरिति बहुवल्लभामपि त्वां प्रियत्वेन बिभर्ति नच तदेकप्रिया अस्मान् अतोऽतिक्रान्ताः प्रियाः किंवा अतिक्रान्तं प्रियं सर्वमपि येन तथेतीर्ष्ययाऽसूयोक्तिः॥७॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एते पुरुषजातित्वेन प्रायः श्रीकृष्णपक्षग्राहिणोऽस्माकं मानं विज्ञायासूयया न किल कथयेयुरिति स्त्रीजातित्वेनात्मपक्षग्राहिणीं मन्यमानाः शश्वत् दृष्टतत्प्रीत्यनुमितसौभाग्यविशेषेण च तस्याः श्रीकृष्णदर्शनं सम्भाव्य श्रीतुलसीं पृच्छन्ति । कच्चिदिति । कल्याणि ! हे जगन्मङ्गलकारिणि ! परमसौभाग्यवतीति वा । अत्र हेतुर्गोविन्देति गोविन्दो गोकुलेन्द्रः तच्चरणप्रिया त्वं श्रीर्यत्पदाम्बुज इत्यादिवत् । यद्वा चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत् । आदरश्चाधुना दैन्येन हे गोकुलेन्द्रप्रिये इत्यर्थः । इति तस्यागमनावश्यकत्वं विवक्षितम् । तत्प्रियत्वे हेतुः सहेति । नच तत्र तवानवधानं सम्भवेत् । यतस्तेऽतिप्रिय इति श्लेषेणातिक्रान्तप्रियानस्मद्विधानित्यपि ध्वनितम् । अलिकुलैः सह इति तस्याः साद्गुण्यं दर्शितम् अलीनामप्यनिवार्यत्वसूचनात् । यद्वा । अतिप्रियत्वमेव विवृनं तत्प्रियत्वेनैव ते शिलीमुखा अपि न निवार्यन्त इति सूचनात् तथा मत्तानां तेषां झङ्कारेण निह्नवासम्भवत्वं च सूचितम् । अतोऽवश्यं त्वदन्तिकमागतस्त्वया दृष्ट इति भावः । अच्युत इति श्लेषेण कदापि त्वत्तो न विच्युतो भविष्यतीति तदेव दृढीकृतम् ॥ ७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

हे तुलसि ! गोविन्दचरणप्रिये ऽत एव हे कल्याणि ! अलिकुलैः सह त्वां बिभ्राणस्तवातिप्रियश्चाच्युतस्त्वया दृष्टः कच्चित् ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गोविन्दस्य श्रीविष्णोश्चरणौ प्रियौ यस्याः हे तादृशे ! यद्वा । चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत् । आदरश्चाधुना दैन्येन हे गोकुलेन्द्रप्रिये इत्यर्थः ॥७॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

हे सख्यः ! एते तत्सहचरप्रायाः दृष्ट्वापि न कथयिष्यन्ति एषा तु तुलसी स्त्रीस्वभावात् कोमलहृदया अतः कथयिष्यत्येव दृष्टश्चानया स इति सम्भाव्यते तत्प्रियत्वात् तदेनामेव पृच्छाम इत्याहुः । कच्चित्तुलसीत्यादि हे कल्याणि ! चिरजीविनि कल्याणीत्वे हेतुर्गोविन्दचरणप्रिये ! तेऽतिप्रियोऽच्युतो दृष्टः अतिप्रियत्वे हेतुः त्वा त्वां बिभ्रद्दधानः अलिकुलैः सह एवमेव त्वयि तत्प्रेम अलिकुलैराकुलामपि त्वां वहत्येव ॥ ७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधनी ।

पूर्वोक्तास्त्वपुष्पा एते अफलाः फलपुष्पाभ्यां नानाविधविनियोगसम्भवादज्ञानं मत्वा तुळस्यास्तदुभयं नास्तीति भगवदीयत्वेन प्रसिद्धां पृच्छन्ति । कच्चिदिति । तुलसीति सम्बोधनं सखीमिव मत्वा सा चेत् पूर्वसम्बन्धस्मरणेन भक्तेव भगवन्तं भजेत् तदा रसो न पुष्ट इति तां भगवत्पत्नीं मन्यमाना आहुः । कल्याणीति एवमपि सति भक्तिप्रधानेत्यस्मदाद्यपेक्षया उत्कृष्टेत्याहुः । गोविन्दचरणप्रिय इति किञ्च तव दर्शने उपायोऽप्यस्ति त्वत्सजातीयस्य तत्र विद्यमानत्वात् सजातीयो हि सजातीयमार्गस्थं दृष्ट्वा गच्छति तदाहुः । अलिकुलैः सह त्वा त्वां बिभ्रत् दृष्ट इति किञ्च ते भगवानत्यन्तं प्रियः यद्यनेन मार्गेण गतः स्यादवश्यं त्वया दृष्टः स्यात् इति ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एता अस्मत्पक्षग्राहिण्यः स्त्रीजातयः स्त्रीजनदुःखपीडां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

विदुष्यः कृपावत्यो भविष्यन्ति तदिमाः पृच्छाम इत्यासाद्य तन्मध्ये परमसुख्यतमां तुळसीं पप्रच्छुः । कच्चिदिति । हे कल्याणीति वयमकल्याण्यः कृष्णविच्छेदात् त्वमेव कुशालिनी । अत्र हेतुः गोविन्देति । यद्वा । चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत् ननु यूयमपि तच्चरणप्रिया भवथैव सत्यं तदपि सादृगुण्याधिक्यात्त्वमेव सौभाग्यवती विच्छेदाभावादित्याहुः । त्वा त्वां विभ्रदेव गतः । तत्र तव सौरभ्याधिक्यमेव कारणममिति व्यञ्जयामासुः । अलिकुलैः सहेति परःसहस्रभ्रमरकृतोद्वेगमप्यगणयित्वा त्वां बिभ्रदिति सुगन्धप्रियेण तेनास्माकमग्रहणमेतादृशसौरभ्यवस्त्वाभावादेवेति निश्चिनुम इति भावः ॥७॥

केन चित्कृता विशुद्धरसदीपिका ।

एते च पुरुषजातित्वात्तत्पक्षग्राहिणो नर्मसचिवप्रायाश्च प्रायोऽस्मान्मानवतीस्त्यवज्ञया न किल कथयेयुरिति सम्भाव्य शश्वदङ्गसङ्गसौभाग्यवतीं तदादृतां निजपक्षग्राहिणीं च मन्यमानास्तुळसीं पृच्छन्ति । कच्चिदिति । नित्यसखीनामिदं वाक्यं आभासस्तु कान्तभावानां संग्रहाभिप्रायेण सङ्गमनीयः तत्र तुलसीति स्कान्देतिहासानुसारेण वृन्दादेव्या एव नामान्तरमिति तद्वनाधिदेवीं निजसहचरीं मत्वा साक्षान्नामोक्तिः कल्याणि ! जगन्मङ्गलकारिणीत्यर्थः । यद्वा परमसाम्यवतीति अथवा कुशलिनी भवसीति प्रश्नभङ्ग्या सम्बोधनं गोविन्देत्यादि वृन्दावने तु गोविन्दमिति वाराहतन्त्रोक्तेस्तस्य तस्याश्च नित्यसबन्धः सूचितः गुरुचरणा इत्यादिवच्चरणपदं गौरवाभिप्रायं श्लेषेण चरणमाचरणं तच्च गोप्येकया युतस्तत्र परिक्रीडति नित्यदेत्यादिब्रह्मयामलाद्यनुसारेण विहरणमेव एवं च तदेकप्रियत्वमादिश्य तस्यापि त्वं प्रियतमेति दर्शयन्ति । सहेति । अलिकुलैरिति श्यामलत्वाद्वर्णसाम्येन तदभिलाषैरेव मूर्त्तैरित्यर्थः अलीनामनिर्वाच्यत्वेन दोषानुद्भावनमपि सूचितम् अत एव तेऽपि सो ऽतिप्रियः स च त्वत्तो ऽच्युत इति परस्परप्रीत्याश्रयविषयत्वेन शुद्धः प्रेमा दर्शितः ततश्च तादृशप्रेमप्रसंशयात्मनश्च सजातीयत्वं प्रदर्श्यावश्यकथनीयत्वमावेदयन्ति अन्यथा मित्रद्रोहः स्यादिति तत एव विश्रम्भेणाहुः । दृष्ट इति । अथ दृष्टो ज्ञात इति सापह्नवोक्तिः ॥ ७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततोऽग्रे तुलसीं दृष्ट्वा तां तुलसीं भाग्यवतीं भगवत्प्रियां सर्वसज्जनसेविताम्—

> तुलसीदलमात्रेण जलस्य चुलकेन च ।
> विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥

इत्यादिवचनैः सर्वजनेषु भगवत्कृपोत्पादनेन तत्प्रापिकां स्त्रीत्वेन स्वपक्षपातिनीं स्वदुःखाभिज्ञां चावगत्य तामाहुः । कच्चित्तुलसीति । कल्याणि ! स्वयंसुखरूपे सर्वसुखकारिणि च तथा गोविन्दचरणप्रिये गोविन्दस्य गवामिन्द्रस्य चरणौ प्रियौ यस्या इति मुखहासविलासाद्यनभिज्ञत्वेन ज्ञातासि न वयमिव तव वैकल्यं यद्वा पादसेवापरतया प्रथमत एव दैन्येन तव सौभाग्यातिशयः अस्माकन्तु मानापराधेन दुःखवैकल्यं यद्वा गोभिः श्रुतिभिर्विद्यते चरणो यस्य स गोविन्दचरणः सर्वे वेदा यत्पदमामनन्तीति श्रुतेः वेदान्तवेद्यचरणेन मयैव गीतमिति स्मृतेश्च स प्रियो यस्याः तस्य प्रिया वा यद्वा आचार्यचरणा इत्यादिवदादरेण चरणशब्दप्रयोगः यद्वा गोविन्दस्य चरणं प्रियं यस्यास्तस्याः सम्बोधनं तथा च तव तदाचरणस्यापि प्रियत्वेनोभयप्रीतिनिर्वाहः अस्माकन्तु तस्य प्रियतमत्वेऽपि तदाचरणं स्नेहिजनविरहदानान्तर्द्धानादिनाप्रियमतः खेदमनुभवाम इति भावः नन्वेवं बहुधा सम्बोधयन्त्यः किंपृच्छथ इति तदभिप्रायं सङ्कलय्य सहेति नोऽन्वेषयतीरनुचरीः संत्यज्य अलिकुलान्येव तवालिकुलानि तवानुगत्वे सति त्वद्यशोगानपरत्वात् तैः सह त्वा त्वां बिभ्रत्स्वस्कन्धे धारयन् अत एव तेऽतिप्रियोऽस्मद्भाग्यात्तु नित्यमच्युतो द्रवितचित्त एव स इतो गतस्त्वया दृष्टस्तव स्वाश्रितजनतत्प्रापकत्वादनुकम्पया ब्रूहि एवं प्रश्नेऽप्युत्कण्ठोत्तरत्वे तस्यास्तदीयातिप्रियत्वेन दुर्मदत्वे सापत्न्यभावेन मात्सर्ये सोऽन्त कर्मणीत्यस्मात्तत्प्रियात्वप्रसिद्ध्या तुल्या नः स्यति अन्ते प्रापयतीति उणादित्वाद्धातो रोकारलोपः एवमग्रेऽपि तन्नामव्युत्पत्त्या तद्वेषं सम्भाव्य कल्याणित्वेऽपि भद्राख्यकरणरूपतया विघ्नकारित्वमवगत्यान्यत्र गताः ॥ ७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथान्यत्र गत्वा तुलसीं ददृशुः तत इयं भगवतोऽतिप्रिया सर्वदा तन्निकटवर्तिनी स्यात्त ध्यानवती भगवदीया तथा दयावती वक्ष्यति चेति मत्वा तुलसीसन्निधौ गत्वा तां पृच्छन्ति । हे तुलसी त्वयाऽच्युतो भगवान् कच्चित् दृष्टः यतस्त्वङ्कल्याणी भगवत्प्राप्तिसाधनपुण्यपुञ्जानुष्ठानवती अत एव गोविन्दचरणौ प्रियौ यस्याः सा तच्चरणयोः प्रियेति वा अत एवातिप्रियः अत एवाच्युतस्त्वया कदापि न वियुक्तः अत एव त्वामलिकुलैः भ्रमरसमूहैः सह विक्षेपमप्यमगणय्य बिभ्रत् धारयन् यत्तत् यद्यप्यस्माकमप्यतिप्रियस्तथापि नास्माकं तादृशं कल्याणम् येन कामापोधिं विना तच्चरणावेवातिप्रियौ भवेतामतो नास्माकमच्युतः किञ्च पलाय्यास्मत्सकाशादितः सर्वस्यापि कल्याणकरी त्वमिति वा अतो दृष्टश्चेत्तर्हि कथयेति भावः । तस्या अप्राप्तोत्तरा अहो भगवदीयेयं भगवदाज्ञां विना न कथयिष्यतीति मत्वान्यत्र गताः । अनभिज्ञापक्षे हे तुलसि हे कल्याणि ! दर्शनभगवच्चरणार्पणादिना सर्वलोककल्याणप्रदे ! यतः गोविन्दस्य महाविष्णोश्चरणयोरतिप्रिये अत एव नारायणसदृशत्वादस्माकमतिप्रियोऽप्यच्युतः अलिकुलैः सह त्वा विभ्रत्त्वया दृष्टः कच्चित् त्वत्सुगन्धप्रिया मधुव्रता अपि तेन न निवार्य्यन्ते वयन्तु तादृशसुगन्धरहितत्वात्तेन त्यक्ताः किं कुर्मस्तस्मादस्मज्जीवनाय तं कथयेति भावः अहो विष्णुपूजावर्तिनी जारासक्तमानसा अकल्याणी अस्माभूत इति मत्वान्यत्र गताः मानिनीपक्षे हे तुलसि ! हे कल्याणि ! पर-

मालत्यदर्शि वः कच्चिन्मल्लिके ! जातियूथिके ! ।
प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥ ८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मकल्याणवति ! यतो गोविन्दचरणप्रिये चरणेत्यादरव्यञ्जकं गुरुचरणैरुक्तमितिवत् हे गोविन्दस्य प्रिय इत्यर्थः । यतो ऽलिकुलैः सह त्वां ज्ञात्वा बिभ्रत् अहो त्वदीयं भाग्यं यतोऽतिक्रान्ताः प्रियाः अस्मादृश्यो येन सः त्वां सर्वदा बिभ्रदास्ते ऽत एव त्वया अच्युतस्तस्मादृष्टश्चेदवश्यं कथयेति भावः । अहो इयं तता लब्धादरा जाता ऽखर्वगर्वा न कथयेदिति मत्वान्यत्र प्रस्थिताः निवृत्तिपक्षे अथ ज्ञानेन्द्रियपञ्चकमध्ये मुख्यत्वाच्चक्षुरिन्द्रियं पृच्छन्ति । हे तुलसि ! तत्स्थानीय चक्षुरिन्द्रिय कल्याणि कल्याणस्य साधनभूते गोविन्दस्यैतद्रूपकसुखभोक्तृश्चरणं तत्तद्विषयं प्रतिविवरणं यैरिन्द्रियैस्तेषु मध्ये प्रिये अलिकुलैस्तत्तद्वृत्तिरूपत्वात्सखिसमुदायैः सह त्वा बिभ्रत् प्रियत्वात्त्वतः वस्तुतः स्वरूपतः कदाचिदपि न प्रच्युतः स ते त्वया दृष्टः कच्चित् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे तुलसि ! अलिकुलैः भ्रमरयूथैः सह त्वा त्वां बिभ्राणः ते तवातिप्रियोऽनो भवत्या किं दृष्टः ॥ ७ ॥

भाषा टीका ।

हे तुलसि ! हे कल्याणवारी हे श्रीगोविन्द के चरणों की प्यारी गुञ्जार करते बहुत भौरों के सहित तो कों धारण करवे वारो तेरो बडो प्यारो अच्युत तैंने देखो हो तो वता दीजो ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणातिरेकेऽपि नम्रत्वादिमाः पश्येयुरिति पृच्छन्ति । मालतीति । हे मालति ! मल्लिके ! जातियूथिके ! वो युष्माभिः किमदर्शि दृष्टः करस्पर्शेन वः प्रीतिं जनयन् किं यात इति अत्र मालतीजात्योरवान्तरविशेषो द्रष्टव्यः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

सापत्न्यादियं खलु तं न कथयेदिति श्रीकृष्णसेविकाः पृच्छन्ति । मालतीति । सत्पुष्पार्पणेन श्रीकृष्णस्य दासीर्मत्वा स्नेहेन प्रत्येकं सम्बोधनं व इति पूर्ववत् यातः किमिति तैर्व्याख्यातं, यद्वा पूर्ववत्तासां तद्दर्शनं सम्भावयन्ति प्रीतिमिति यातः सन् करस्पर्शेनेति युष्मत्पुष्पाणामुत्कृष्टानां श्रीहस्तद्वाराऽवचयेनेत्यर्थः । अतो युष्मत्पार्श्वे तदागमनं सम्भवेदेवेति भावः । श्लेषेण दासीषु तासु नखक्षतैर्नर्मणाभिप्रेता नखैरेव पुष्पच्छेदनात् पुष्पावचयप्रयोजनं वितर्कयन्ति । माधव इति मधुना मधुररसेन क्रीडतीति मधुररसक्रीडार्थमित्यर्थः । वस्तुतस्तु मा श्रीराधैव तां भूषणार्थमेव तत्र तासां तदनुसन्धानाभावेऽपि दैवगत्या विशुद्धप्रकृत्या वा स्वतः सर्वपरिस्फूर्तेः स्वयमेव मुखान्निःसरतीति ज्ञेयम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तथापि तदाद्रियमाणत्वाभिमानादियं खलु न कथयेदिति नम्रीभूय पुष्पार्पणेन नूनं श्रीकृष्णसेविका अपि निरभिमाना एता एव पृच्छन्ति । मालतीति । वैयग्र्येण प्रत्येकं सम्बोधनम् । अतः किमिति तैर्व्याख्यातम् । तत्र किमिति कच्चिदित्यस्यैवानुवर्त्तमानस्यार्थः । दर्शनं तावज्जातमेव तत्र स्पर्शोऽपि किं जात इति पृच्छाम इति भावः । यद्वा तासां तद्दर्शनं सम्भावयन्ति प्रीतिमिति । करस्पर्शचिन्हदर्शनादिति भावः । तत्र हेतुश्च पुष्पप्रियत्वान्माधवो वसन्त इव माधव इति । करस्पर्शेनेति युष्मत्पुष्पाणामुत्कृष्टानां श्रीहस्तद्वारावचयेनेत्यर्थः । यात इति समानदुःखत्वेनास्मभ्यं तत् कथयितुं योग्यमेव च इति भावः । एवं दासीषु पुष्पिणीष्वपि तासु नखक्षतादिसूचनेन सेर्ष्यं नर्म चाभिप्रेतम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणातिरेकेऽपि नम्रा इतीमाः पश्येयुरिति पृच्छन्ति । मालतीति । हे मालति ! हे मल्लिके ! हे जाति ! हे यूथिके ! वो युष्माभिरदर्शि कच्चिद्दृष्टः किं माधवः करस्पर्शेन युष्माकं प्रीतिं जनयन् यातः अत्र मालतीजात्योरवान्तरविशेषो द्रष्टव्यः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

मालती जातिभेदः वो युष्माभिरदर्शि दृष्टः यूथिका शतपत्रिका ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुष्पप्रियत्वात् माधवो वसन्त इत्यभिप्रायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

हे सख्यः ! अनया दृष्टोऽसौ सापत्न्यादेव न कथ्यते तदेता मालत्यादीः पृच्छाम एतास्त्वस्माकं सखीप्राया एवेति तथा पृच्छन्ति । मालतीत्यादि । हे मालति ! हे मल्लिके हे जाति ! हे

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

यूथिके ! माधवः करस्पर्शेन वः प्रीतिं जनयन् यात इति सिद्धवन्निर्दिष्टेन हेतुना अदर्शीति निःसन्देहपरं कच्चिदिति संबोधनार्थमेव तेन नो वचनं याथातथ्यमेतावता केन पथा गतोऽ प्रीति भावार्थः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तत्राप्यरुचिं मत्वा इयं सपत्नीवत् स्वोत्कर्षं ख्यापयन्ती कथमन्याभ्यो वक्ष्यतीति साधारण्यः स्त्रिय एवास्माकमुपकारिण्य इति ताः पृच्छन्ति । मालतीति । हे मालति वः युष्माभिः प्रत्येकं नानारूपाभिर्दृष्टः कच्चित्तथैव मल्लिके हे जाति हे यूथिके एताश्चतस्रो लता अति सुगन्धपुष्पाः भगवत्प्रियाः अतो वः युष्माकं करस्पर्शेन प्रीतिं जनयन् पुष्पावचयं कुर्वन् माधवो लक्ष्मीसहितः लक्ष्म्या सह तिष्ठति अतस्तस्याः चूडाबन्धनार्थं पुष्पावचय आवश्यक इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अहो सौभाग्यगर्वेणोन्मत्तेयमस्मान्न पश्यति तदेतादृशसौभाग्यरहिता एतत्सपत्नीर्मादृशीरिमाः पृच्छाम इत्यन्यतो गत्वा आहुः । मालतीति । युष्मत्पुष्पावचयनार्थं यत् करेण स्पर्शस्तेन वर्षाशरदतिप्रफुल्लत्वलिङ्गेन मालतीजात्योरवान्तरभेदो द्रष्टव्यः ॥ ८ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ काश्चिल्लताजातिषु तयोर्दासीत्वमारोपयन्त्यो निजसजातीयत्वमाविष्कुर्वन्ति । मालतीति । एतानि प्रायो दासिकानामेव नामानीति वक्रीणामपि तथात्वं सुव्यक्तं श्रीकृष्णयामले "गोपयन्ति यतो देवि ! श्रीकृष्णं विश्वनायकम् । अतस्ता गोप्य उच्यन्ते स्थानस्था व्रजनाथयोः । गोप्यः पञ्चविधाः साध्वि ! स्थायिगोप्य इमाः स्मृताः ! तासां मध्ये प्रधाना यास्तासां नामानि मे शृणु । माधवी मालती जाती लवङ्गा मल्लिकाह्वया । अशोकलतिका-कुन्दी शेवती शतपर्विका । यूथिकारङ्गमल्ली च रङ्गिणी चापराजिता । स्वर्णाख्या मृदुला वृन्दा चन्द्रबिम्बा मधुश्रिया । कुटिला पाटला कुब्जा केतकी कामदायिनी । बकुला झिल्लिका तारा वाणी ब्राह्मी विषघ्निका । मल्लिका सिंहिका कृष्णा वासन्ती नवमालिका । इत्येताः कथिताः स्थायिप्रधानाः सर्वकामदाः । याः कृष्णमङ्कमारोप्य रमयन्ति व्रजाङ्गनाः । समस्तवैभवैर्युक्ता रहस्या रासमण्डले । क्रीडाकुञ्जानि भूत्वा ताः सुपुष्पफलवैभवैः तर्पयन्त्यो वसन्त्यत्र वृन्दासख्यो लताह्वया" इति । ध्यानशतकेषु तासां स्वरूपं यथा "लोलद्वेण्यः पृथुभुजघनाः क्षाममध्याः किशोरीः सुव्यीतश्रीस्तनमुकुलयोरुल्लसद्धारयष्टीः । नानादिव्याभरणवसनाः स्निग्धकाश्मीरगौरीर्वृन्दारण्यां स्मररसमयीं राधिकाकिङ्करीस्ताः" इति । ततश्चापन्हवायार्थान्तरसमाच्छन्नप्रश्नव्याजेन हृदयज्ञतामावेदयन्ति । हे मालतीत्यादि । प्रत्येकं सम्बोधनमादरेण वः युष्माभिः अदर्शि दृष्टः क इत्यपेक्षायां माधवः वसन्त इत्यर्थः । वस्तुतस्तु मायाः श्रीराधाया धवः श्रीराधावल्लभ इत्यर्थः युष्माकमस्माकं च परमसेव्य इति भावः । किङ्कुर्वन् करस्पर्शेन प्रीतिं जनयन् प्रयोगविषया रतिः प्रीतिर्निगद्यते सा च मैत्रीस्पर्शादिकोचितेत्यादिना अलङ्कारकौस्तुभे लक्षिता तत एव करस्पर्शेनेत्युक्तम् एवञ्च स्पष्टीकृतं दासीत्वम् आसां क्रियाशतकेषु "काश्चिच्चन्दनघर्षिणीः सुघुसृणं काश्चित्स्रजो गुम्फतीः काश्चित्केलिनिकुञ्जमण्डनपराः काश्चिद्वहन्तीर्जलम् काश्चिद्दिव्यदुकूलकुञ्चनपराः संगृह्णतीः काश्चनालङ्कारं नवमन्नपानविधिषु व्यग्राश्चिरङ्काश्चन । ताम्बूलोत्तमवीटिकादिकरणे काश्चिन्नियुक्ता नवं काश्चिन्नर्तनगीतवाद्यसुकलासामग्र्यसम्पादकाः । स्नानाभ्यङ्गविधौ च काश्चन रताः सम्वीजनाद्यैः सदा काश्चित्सन्निधिसेवनातिमुदिताः काश्चित्समस्तेक्षिकाः । काश्चित्स्वप्रियुग्मचेष्टितदृशः स्तब्धाः स्वकृत्ये स्थिताः क्षिप्त्वान्यालिषु वर्त्तितादपि तयोः काश्चित् सुखेलापराः इत्थं विह्वलविह्वलाः प्रणतयः श्रीराधिकाकृष्णयोर्दासीरद्भुतरूपकान्तिवयसो वृन्दावनेऽन्वीयतामिति" तत्रैताः स्तब्धेन लताप्राया इति सम्भाव्य प्रश्नोऽयम् ॥ ८ ॥

श्रीरामनारायणकृतभावभावविभाविका

तत्रैवाग्रे मालतीमल्लिकाजातियूथिका दृष्ट्वा तासां मुकुलजालैः कृष्णदर्शनाह्लादजरोमहर्षं सितपुष्पैः तदीयसुमनोविकासपूर्वकस्मितं सुमनआमोदेन सुमनआमोदं पुष्पमधुबिन्दुभिरानन्दाश्रुकणांश्च सम्भाव्य पुष्पसमर्पकत्वेन तत्तन्नामभिश्च तत्किङ्करीत्वमवधार्य तत्र मा लक्ष्मीर्नित्यवक्षोऽधिवासिनी तात्प्रिया तस्या लतिकात्वेन मालत्या माधवप्रियात्वं मल्लिकाया रतिगणमल्लाः सर्वावयवाः सन्त्यस्येति मल्ली हरिस्तस्य कं सुखं यस्याः तस्माद्वा सुखं यस्याः इति व्युत्पत्त्या तत्सुखकारित्वं तल्लब्धसुखत्वं वा जात्यास्तु जनि प्रादुर्भावे इत्यस्माज्जनयति अर्थात्प्रियं कृष्णमिति जातिरिति तद्व्युत्पत्त्या तत्प्रापकत्वं यूथिकायास्तु सखीनां यूथोऽस्यास्तीति यूथी कृष्णस्तस्य यूथिनः तस्माद्वा कं सुखं यस्या इति व्युत्पत्त्या सखीयूथतत्प्रियमेळनेन सयूथस्य तस्य सुखप्रदत्वं तल्लब्धसुखत्वं च तथा सर्वासां सुमनोनम्रशिरस्त्वेनामोददातृत्वेऽपि निरभिमानित्वञ्चालक्ष्य पप्रच्छुः । मालत्यदर्शीति काचिदिति सम्भावनासम्भावनयोः सर्वत्र पूर्ववत् बहूनां युगपत्सम्बोधनन्तु विरहकातर्येण कापि वैकल्यदर्शनेन कृष्णाय प्रियं दर्शयेच्चेत् जीवितं स्यादित्यभिप्रायेण जातियूथिके इत्येकं पदं द्वयोः सम्बोधनं माधवो वो युष्माभिरदर्शि तथा च नो ब्रूत नो दृष्टमिति ब्रूयुश्चेत्तत्राहुः । प्रीतिमिति । यतः सोऽपि माधवः मा लक्ष्मीः तस्या धवत्वात्तल्लतिकादप्रीतिमान् तथा मा श्रीस्तस्या धवत्वात्सर्वश्रीप्रदः तथा मा यथार्थमतिस्तस्या धवत्वा युष्माकं तस्मिन् या यथार्थमतिः सत्या प्रीतिस्तन्नियन्तृत्वेन तद्दाता तदभिज्ञस्तत्फलप्रदश्च तथा माधवस्य वस तस्य सुमनःप्रसादकत्ववत्त्वोऽपि माधवत्वात्सुमनःप्रीतिमांस्तत्प्रसादकश्चातो यथा चन्द्रः सकरस्पर्शेनाह्लादयति तथा पुष्पावचयमिषतया करस्पर्शेन वः प्रीतिं जनयन् यातोऽन्यथा तत्करस्पर्शं विना

चूतप्रियालपनसासनकोविदारजम्ब्वर्कबिल्वबकुलाम्र कदम्बनीपाः!।
येऽन्ये परार्थभवका यमुनापकूलाः शंसन्तु कृष्णपदवीं रहितात्मनां नः॥९॥

श्रीरामनारायणकृतभावभावविभाविका।

सुमनोविकासामोदयोरनुपपत्तेरसमभिस्तत्करस्पर्शसुमनोविकासादिहेतुहेतुमद्भावस्य स्वस्मिन्ननुभूतत्वात् एवंप्रश्नेऽप्युत्तरमलब्ध्वा मालत्या नित्यवक्षोऽधिरूढसपत्नीपक्षपातित्वं मल्लिकायूथिकयोः स्वतत्सुखप्रदत्वेन तदभिमताचरणपरत्वं जात्यास्तु निपातेन जिअभिमते इत्यस्मात्सज्जनाभिभवकारित्वं सुमनोविकासादिना खलानामिव स्वसुखपरदुःखदर्शने प्रहासकारित्वं चालक्ष्य निराशाः सत्योऽन्यत्र गताः तदुक्तमभियुक्तेन—

नृत्यन्ति भोजने विप्रा मयूरा घनगर्जने।
साधवः परकार्येषु खलाः परविपत्तिषु॥८॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका।

इति तुलसीमुक्त्वा अहो एताः तद्धारिण्यः स्त्रिय एवास्माकमुपकारं करिष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति। मालतीति। हे मालति हे मल्लिके हे यूथिके मां लक्ष्मीं लतति वेष्टयतीति मालती मल्लते सुगन्धादिकं धारयतीति मल्लिका जायते इति जाती सुखजनकत्वात्सफलजन्मवती यूथमस्त्यस्या असौ यूथिका एवम्भूता अन्वर्थसंज्ञा यूयं चतस्रो लता अतिसुगन्धपुष्पाः भगवत्प्रिया अतो भवतीर्वयं पृच्छामः वो युष्माभिः कच्चिद्दृष्टः न दृष्ट इति न वक्तव्यं यतो वो युष्माकं हस्तकमलस्पर्शेन प्रीतिमुत्पादयन् यातः करस्पर्शजन्यस्यात्यन्तविकाशस्य दर्शनात् ननु नस्त्वास्मत्स्पर्शने किं प्रयोजनमिति चेत्तत्राहुः। माधवः लक्ष्मीपतिः सर्वदा तत्सहितस्य तदलङ्कारार्थं पुष्पावचय आवश्यक इति भावः। अहो एता अल्पाः फलरहिताः लक्ष्मीपक्षपातिन्यो न कथयिष्यन्तीति मत्वान्यत्र गताः अनभिज्ञापक्षे मालजीजात्योरवान्तरभेदः यूथिका जूहीतिख्याता अत अहो सौभाग्यातिरेकवत्यो नम्रस्वभावाः सर्वसुखकरा विकसितवदनाः परोपकारिण्यो भविष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति। मालतीति। हे मालत्यादयः कश्चिद्वोऽदर्शि भवतीनां न केवलं दर्शनमात्रमपितु स्पर्शोऽपि जात इत्यनुमीयते इत्याहुः। प्रीतिमिति। यतो माधवः परमशोभाधीशत्वात्स्पर्शेनापि शोभाजनकः स्पर्शश्च पुष्पप्रियत्वात्तस्यावश्यमेवजातः स्यात् माधवो वसन्त इवेतिश्लेषेण तद्वियोगो न भवतीनामप्यसह्योऽतस्तुल्यदुःखत्वादवश्यं वदतेति भावः। अहो एताः करस्पर्शेन निवारणं कृत्वा गतः स्यादत स्तल्लज्जयात्र कथयन्तीतिमत्वान्यत्र याताः मानिनीपक्षे अहो इमा मालत्यादयः सौभाग्यादिगुणैरस्मत्समाना अत एताः प्रष्टव्या इत्याशयेन पृच्छन्ति। मालतीति। यतो भवत्यः पुष्पिण्योऽतः करस्पर्शेन वः प्रीतिं जनयन् यात इति सनर्मोक्त्या व्यञ्जयन्ति परत्वेतावता भवतीभिर्गर्वो न विधेयो यतः स न कस्यापि पतिः किन्तु मायाः शोभामात्रस्य धवः स्वामी तस्मादस्मत्पक्षपातिन्यो यूयमवश्यं कथयतेति भावः। अहो सद्यः स्पर्शोत्थाखर्वगर्ववत्य एता न ब्रुवत इति मत्वान्यत्र प्रस्थिताः निवृत्तिपक्षे मालत्यादिस्थानीयानि श्रोत्रत्वक्रसनाप्राणाख्यानीन्द्रियाणि पृच्छन्ति। मालतीति। वः प्रीतिं विषयोपलब्धिसुखं तत्प्रकाशेन जनयन् यातीत्याविषयं व्याप्य स्थितः। ननु व्यापकस्य तस्य कथं गमनामिति चेत्तत्राहुः। माधवः मायायाः प्रेमवृत्तेः धवः स्वामी तथा च प्रमाणचैतन्यस्य गमनादिकमिति भावः॥८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे मालति! हे मल्लिके! हे यूथिके! करस्पर्शेन वो युष्माकं प्रीतिं जनयन् यातः माधवः वो युष्माभिः किमदर्शि दृष्टः मालतीजात्योरवान्तरजातिभेदो ज्ञेयः॥८॥

भाषा टीका।

हे मालति! हे मल्लिका हे जाइ हे जुई हाथ ते स्पर्श कर के तिहारे को प्रसन्न कर के गयो जो माधव तुमने देखो हो तो बतादीजो॥८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

फलादिभिः सर्वप्राणिनां सन्तर्पका एते पश्येयुरिति पृच्छन्ति। चूतेति। चूताम्रयोरवान्तरजातिभेदः कदम्बनीपयोश्च हे चूतादयः! येऽन्ये च परार्थभवकाः परार्थमेव भवो जन्म येषां ते यमुनोपकूलास्तस्याः कूलसमीपे वर्त्तमानाः तीर्थवासिन इत्यर्थः। ते भवन्तो रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य मार्गं शंसन्तु कथयन्तु॥९॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

श्रीकृष्णस्य तस्या वा दास्य एताः शङ्कया तं वर्त न कथयेयुरित्यन्यानाप्तान् पृच्छन्ति। चूतेति। चूताम्रयोरभेदेन कदम्बनीपयोश्च वर्णादिभेदेन भेदः प्रियालः सालभेदः असनः पीतसालः उत्तमपुष्पफलरहितोऽप्यर्कः शिवप्रियपुष्पत्वादत्रोक्तः अन्ये पीलुकरीरमधूकनागरङ्गनालिकेरपूगतालकदलीलवलीवदरीप्रभृतयः ननु युष्मान् प्रति तत्कथनेन किमस्मत्प्रयोजनं तत्राहुः। परेति। अत्र श्रीस्वामिपादमते भवका इतीकाररहितः पाठः भवो जन्मेति व्याख्यानात् बहुव्रीहौ कः इकारयुक्तपाठस्तु सर्वत्र दृश्यते ततश्च भविकं मङ्गलमभ्युदय इत्यर्थः। तथाप्यर्थः स एव तत्रापि यमुनोपकूला इति परदुःखासहिष्णुता सूचिता श्रीसूर्य्यनन्दिन्यास्तस्या भ्रातुः श्रीयमस्य पापलोकदण्डाधिकारितः परदुःखासहिष्णुतयावतीर्णायाः सङ्गेन तादृशत्वात् तदाख्या-

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

थिका पद्मपुराणे श्रीयमुनामाहात्म्ये प्रसिद्धैव यद्वा तीर्थवासित्वेन सत्यमेव शंसनीयं नतु वञ्चनीयमिति भावः। ननु स्वयमेव युष्माभिरान्विष्य गृह्यतामित्याशङ्क्य निजार्त्तिज्ञापनेन कृपां जनयन्त्यः सकातर्य्यमाहुः रहितात्मनां विरहहतज्ञानानामित्यर्थः यद्वा आत्मा प्रियः श्रीकृष्णस्तत्त्यक्तानामित्यर्थः। अतो मृतप्रायाः स्वयमन्वेष्टुं न शक्नुम इति भावः। पूर्वपूर्वेषु प्रायोदर्शनं पृष्टम् एषु च गुणविशेषेण तद्दर्शनस्य निश्चयसम्भावनया केवलं तद्वर्त्मोपदेश प्रार्थनमिति ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

श्रीकृष्णदास्य एताः शङ्कया तं वत न कथयेयुरिति मुनिप्रायत्वेनाप्तानन्यान् पृच्छन्ति। चूतेति। चूतो लताजातिः। आम्रो वृक्षजातिः। पूर्वत्रैव नत्वात्र कविभिर्लतात्वं प्रयुज्यते मध्यदेशादौ लताकाराश्च ते दृश्यन्ते इति नीपश्च नीपो धूलिकदम्बे स्यादिति विश्वप्रकाशात् परागप्रधानो महापुष्पोऽसौ ज्ञेयः प्रियालः तस्यैव बीजं चारुबीजतया ख्यातं भुज्यते पनसः कण्टकिफलः असनः पीतसालः कोविदारो युगपत्रकः कोयिलाव इति विन्ध्यादौ प्रसिद्धः काञ्चनारतुल्यः काञ्चनारभेदोऽयम् अर्कोऽतिनिकृष्टोऽपि पृष्ट इति तासामुत्कण्ठातिशयः स्पष्टीकृतः। ननु युष्मान् प्रति तत्कथनेन किमस्मत्प्रयोजनं तत्राहुः। परेति। अत्र श्रीस्वामिपादमते भवका इति इकाररहितः पाठः भवो जन्मेति व्याख्यानात्। बहुब्रीहौ कः इकारयुक्तपाठस्तु सर्वत्र दृश्यते ततश्च भविकं मङ्गलम् अभ्युदय इत्यर्थः तस्याप्यर्थः स एव। तथापि यमुनोपकूला इति तीर्थवासित्वेन सत्यवादित्वात् कृपालुत्वाच्च सत्यमेव शंसनीयं नतु वञ्चनीयमिति भावः। उपसमीपे कूलं येषां ते उपकूलाः यमुनाया उपकूला यमुनोपकूला इति तु विग्रहः। ननु स्वयमेव युष्माभिरन्विष्य गृह्यतामित्याशङ्क्य निजार्त्तिज्ञापनेन कृपां जनयन्त्यः सकातर्यमाहुः। रहितात्मनां विरह-हत-ज्ञानानामित्यर्थः। अतो मृतप्रायाः स्वयमन्वेष्टुं न शक्नुम इति भावः। पूर्वं सर्वेषु प्रायो दर्शनं पृष्टमेषु तु पूर्वपूर्वेषु प्रत्युत्तरालाभेन चातुर्योन्निश्चित्यैव केवलं तद्वर्त्मोद्देशप्रार्थनम् ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

परार्थसम्भवाः परोपकारार्थमुत्पन्नाः रहितात्मनां शून्यमनसाम् ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

फलादिभिः सर्वप्राणसन्तर्पका इमे पश्येयुरिति पृच्छन्ति। चूतेति। चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदः द्रष्टव्यः हे चूतादयः भवन्तः ये चान्ये परार्थमेव भाविकं जन्म येषां ते यमुनाकूलसमीपे वर्त्तमानास्तीर्थवासिन इत्यर्थः। रहितात्मनां शून्यचेतसामस्माकं कृष्णपदवीं शंसन्तु कथयन्तु ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रियालो राजादनः देवदारुर्वा कोविदारः काञ्चनारकः असनः पीतसारकः अर्क्षं शुकनासं परार्थभविनः लोकोपकारार्थमुत्पन्नाः यमुनाकूलसमीपे जाताः राहत आत्मा स्वामी कृष्णो यासां तास्तथा तासाम् ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

चूतो लताजातिः। आम्रो वृक्षजातिः। पूर्वत्रैव लतात्वं प्रयुज्यते इति। नीप इति नीपो धूळिकदम्बे स्यादिति विश्वप्रकाशात्। महापुष्पोऽसौ ज्ञेयः। अर्कोऽतिनिकृष्टोऽपि पृष्ट इति तासाम् उत्कण्ठातिशयः स्पष्टीकृत इति ॥ ९—१० ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

हे सख्यः तेनैवैवामू निषिद्धा यतो न कथयन्ति तत किमासामुपरोधकरणेन अमी तावद्यमुनातीरवासित्वेन तीर्थवासितया परोपकारित्वेन च सत्यवचस एव तावत्तदेतानेव पृच्छाम इति पुनरन्यान् पृच्छन्ति। चूतेत्यादि। कदम्बनीपयोरवान्तरभेदात् पृथङ्निर्देशः येऽन्येऽगृहीतनामानः प्रति निषेधाभिमाननिरासाय यमुनोपकूला इति तीर्थवासित्वं परार्थभविकाः परार्थकुशला इत्यवश्यमेवैभिर्वक्तव्यं ननु वयं मौनिन इत्याशङ्क्याहुः। कृष्णपदवीमिति। वाक् प्रयोगं विनापि पल्लवादिव्यापारेणापि पदव्याः कथनसम्भवात् तस्मात्पदवीं पन्थानमेव तस्य कथयत आत्मराहित्यकथनेन विशेषदैन्यप्रकटनम् ॥ ९ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ननु यद्यप्येताः स्त्रियः तथाप्यफला इति अल्पा इति स्वार्थपरा इति लक्षपक्षपातम्य इति न वदिष्यन्तीति ज्ञात्वा आम्रादीनयुक्तमान् वृक्षान् पृच्छन्ति। चूतेति। चूताम्रौ मधुराम्लप्रकृतिकौ कालभिन्नफलौ वा प्रियालस्तु बीजेऽप्याधिकरसयुक्तः पनसो महाफलः अन्ये चासनादयो वृक्षाः पुष्पफलप्रधानाः किंबहुना अन्येऽपि ये मधूकादयः परार्थमेव जन्म येषां ते परार्थभवकाः किञ्च यद्यपि सर्वे एव वृक्षाः परार्थजन्मानः तत्रापि ये यमुनोपकूलाः यमुनाया उपकूले तपस्विन इव तिष्ठन्ति ते ह्यवश्यं भगवन्तं पश्यन्ति बोधयन्ति च अतः सदानन्दस्य पदवीं शंसन्तु यथास्मद्धृदये समायाति दयार्थमाहुः। रहितात्मनामिति। केचिद्गृहरहिता धनरहिता देहरहिता वा वयं त्वात्मरहिता एव अतः सर्वापेक्षया वयं दीनाः अतः कृष्णपदवीमस्मदर्थे शंसन्तु ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अहो एताः स्वसपत्न्यास्तुलस्यास्तस्मात् कृष्णाच्च भीत्या

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जानन्त्योऽपि न ब्रुवते तदलमेताभिः परतन्त्राभिरित्यन्यतो गत्वा सत्यमिमे एव यमुनातीर्थवर्त्तिनो निस्पन्दत्वेनैवानुमीयमानविष्णुस्मरणवन्तो भवन्त्यतो न मृषा वादिष्यन्तीति विश्वस्याहुः । चूतेति । चूताम्रयोर्लतावृक्षजातित्वेन भेदः । नीपो धूलिकदम्बो बृहत्पुष्पः । कदम्बः क्षुद्रपुष्पोऽतिसुगन्धः । प्रियालः शालभेदः असनः पीतशालः कोविदार काञ्चनारभेदः । अर्को निकृष्टोऽपि गोपीश्वरप्रियत्वात् तत्समीपे सदा वर्त्तमानः । अन्ये नारिकेलगुवाकादयः हे भवन्तः आत्मशून्यानां नः कृष्णमार्गं कथयत ननु कस्मै प्रयोजनाय कथयामस्तत्राहुः । परार्थमेव भविकमभ्युदयो येषां ते । यमुना उपकूले येषां ते इति गङ्गादि ॥ ९ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ माधवपदश्रवणेनोद्बुद्धविहारदर्शनसंस्कारास्तदेकहाराः प्राणसहचर्य्यः प्रख्यातप्रभावान् श्रीराधाकृष्णयोरसंकुचितलीलावलोकाय स्वीकृतबहिर्जडीमावानुभयोर्भावानुकूलस्वभावान् महानुभावानिव यमुनोपकूलांस्तरून् पृच्छन्ति । चूतेति । चूतो लताजातिः आम्रो वृक्षजातिरितिभेदः परागप्रधानो महापुष्पो नीपः स्तोकफलः कदम्ब इति च प्रियालश्चारुवीजवृक्षः पनसः कण्टकिफलः असनो विजयसारः कोविदारः काञ्चनारः जम्बूः प्रसिद्धः अर्कोऽपि निकृष्टस्याप्यस्य प्रच्छोत्कण्ठातिशयेन यद्वा सूर्यनामभ्रमात् एवं विल्वस्यापि विल्वे शाण्डिल्यशैलूषाविति कोशाद्दषेर्नामान्तरभ्रमेणेति एवञ्च श्लिष्टपदयोरुपादानेन देवत्वमृषित्वं च सूचितं वकुलो ऽशोकः येऽन्ये इति तत्र तरूणां बाहुल्यसूचितं परार्थभवकाः परोपकारैकफलः भवः प्रादुर्भावो येषान्ते इति प्रोत्साहन भविका इति पाठे परायै परदेवतायै इति परार्थे चतुर्थी तदर्थायेति समासः राधिका परदेवतेति गौतमीयाद्राधिका अर्थः सुखमेव भविकं मङ्गलं येषां यद्वा पराभ्यामिति परार्थः सत्यम्परमितिश्रीप्रथमात् परः स्यात्पुरुषोत्तम इति कोशाच्च परः श्रीकृष्णः शक्तिः सम्मोहिनीपरेति गौतमीयात् श्रीराधेत्यर्थः । ततश्च द्वयोरेवार्थो मङ्गलं येषां तत्सुखसुखिन इत्यर्थः । यथा च श्रीकृष्णयामले—

द्रुमाश्च कल्पपूर्वा ये नानामोदविधायकाः ।
वृन्दावनस्थास्तान् विद्धि बलभद्रांशसम्भवानिति ॥

तस्य सात्त्विकत्वं युक्तमेव ते चोक्ताः शतकेषु—

केचित्पीयूषसारोत्तमपरिणतरुचयः —
कैचन क्षीरसारैः ।
दिव्यैः सन्निर्मिताः केऽप्यतुलमदकृता —
मासवानाञ्चनाञ्चाः ॥
केचिच्छैलोपलाः केप्यतिहिमकरकातुल्यरूपा इति
श्रीवृन्दारण्ये दधति बहुविधा राधिका कृष्णतुष्ट्यै
श्रीराधाकृष्णनर्म्मौक्त्यनुसरणपरा —
बिभ्रतः केऽपिशाखा ।
भूलग्नाःसूनभारावहशतपरितो —
मण्डपाकाररम्याः ।
हस्तग्राह्यं प्रसूनाद्युपरिच शिखरः —
स्वश्च सन्धारयन्तः ॥
शाखीन्द्रा यत्र धन्या दिशतु मम शिदम् —
सैव वृन्दाटवीयम् ।
केचिन्माध्यान्हिकादप्यतिबहलरुच —
श्चण्डमार्त्तण्डकोटि ॥
भ्राजद्दिव्यप्रभामण्डलितउरुरुचः —
केऽपिकल्पाग्नकोटेः ।
केचिद्राकेन्दुकोट्युज्ज्वलशिशिरलस —
च्चारुरोचिः पुञ्जापुञ्जा ।
चन्द्रिकाभिरामद्युतिविततिमहा —
मञ्जुलाः केऽपि यत्र ।
केचिद्विद्योतमानाद्युतिभिरगणितो —
दीप्तविद्युल्लतानाम् ।
विस्फूर्जद्दिव्यकोटिस्फटिकमणि महा —
स्वच्छभासोऽपि केऽपि ।
केचिद्बालप्रवालाधिकललितमहः कन्दलीसुन्दराङ्गाः केचिन्नभीन्यनन्तद्रुत कनकरुचो —
हारहारित्विषोऽन्ये ॥
केऽपि प्रोत्फुल्लदिव्यस्थलकमलरुचः —
केऽपि नीलोत्पलाभाः ।
केचित्सत्पाटलप्रोञ्चय रुचिररुचोऽ—
न्येजबापुष्पभासः ।
इत्थं स्वानन्दसच्चिद्घनभवपुषो —
यत्र शाखीन्द्र वृन्दस्या ।
इत्यर्यवर्णभेदा अथाविविधिरुचां —
वीचयोदुर्न्निरूपाः ।
आकाराणां प्रकारा अपि परमचमत्कारिणः यत्र पुष्पा ।
द्यत्याश्चर्यैकसम्निः स्फुरतु मम सदा —
सैव वृन्दाटवीयम् ॥—

श्रीबृहद्भागवतामृते च —

यस्यैकवृक्षोऽपि निजेन केनचिद्द्रव्येण —
कामांस्तनुतेऽर्थिनोऽखिलान् ।
तथापि तत्रैव सदाप्रकाशये —
दैश्वर्यमीशः स्वविहारविघ्नत इति ॥

मूलं प्रमाणं श्रीरुद्रयामले —

वीथ्यां वीथ्यां निवासो ऽथरमधुसुवच,
स्तत्र सन्तानकानामेके ।
एकेन्दुकोटयातपविशदकरास्तेषु चैके क्रमन्ते ॥
रामे रात्रे विरामे समुदिततपन -
द्योतिसिन्धूपमेया ।
रत्नाङ्गानां सुवर्णाचित्तमुकुररुच —
स्तेभ्य एके द्रुमेन्द्राः ॥
यत्कुसुमं यदा मृग्यं यत्फलञ्च वरानने ।
तत्तदेव प्रसूयन्ते वृन्दावनसुरद्रुमाः ॥

एवं च परार्थभविका इति प्रतिपादितं सत्यार्थो विहार एव गोप्येकया युतस्तत्र परिक्रीडति नित्यदेव्यादिब्रह्मयामलवाक्यात् श्रीकृष्णयामले च —

केनचित्कृता विशुद्धरसदीपिका।

तया सह विहारो यः कृष्णस्य परमात्मनः।
स एवोपनिषद्भिस्तु नित्यानन्द इतीर्यते॥

इत्यादिबहुशः रेमे तयेत्यादि वक्ष्यमाणाश्च परंत्वतिरहस्यत्वात्कण्ठोक्त्या न प्रकाशित इति विवृतं मञ्जूषायाम् अथवक्रीणां प्राणसखीत्व प्रतिपादनाय तासां स्वरूपं भेदाश्च प्रदर्श्यन्ते स्वप्राणसख्याः प्रेमैकपात्रीर्दात्रीः सुखस्य ताम्। वन्दामहे महोदारा मारास्पृष्टां विलासिनीम् आसां सामान्यलक्षणं श्रीकृष्णार्चनचन्द्रिकायाम्—

प्रेमलीलाविहाराणां सम्यग्व्यस्तारिका सखीति—

श्रीमदुज्ज्वलनीलमणौ च–

आत्मनोऽप्याधिकं प्रेम कुर्वाणान्योऽन्य मच्छलम्।
विश्रम्भिणी वयोवेषादीमि स्तुल्या सखीमता॥

सा च सखी नित्यसखी प्राणसखी प्रियसखी परमप्रेष्ठसखीति पञ्चविधा तत्र सखी यथा तत्रैव—

निरुपाधिप्रीतिपरा सदृशी सुखदुःखयोः।
वयस्यभावादन्योऽन्यहृदयज्ञा सखी भवेदिति॥
सख्येनैव सदा प्रीता नायिकात्वानपेक्षिणी।
भवेन्नित्यसखी सा तु द्विधैकान्त्यतिकी लघुः॥
आपेक्षिकलघूनाश्च मध्ये ऽन्या काचिदीरिता।
सैव प्राणसखी नित्यं तन्सुखासक्तमानसा।
छायेव यानुसरति सा च प्रियसखी भवेत्॥
सुरते नर्म्मणि रता सैव नर्म्मसखी भवेत्।
आत्मनो मूर्त्तिरन्येव प्रियनर्म्मसखी हि सा॥
अथासामपरः कोऽपि विशेषः पुनरुच्यते।
असमं च समश्चेति स्नेहं सख्यः स्वपक्षगाः॥
श्रीकृष्णे राधिकायाश्च वहन्त्यो द्विविधा मताः।

तत्र हरौ स्नेहाधिका यथा—

अहं हरेरिति स्वान्ते गूढामभिमतिं गताः।
अन्यत्र कथनासक्त्या स्वेष्टां श्रीराधिकां श्रिताः॥
मनागेवाधिकं स्नेहं वहन्त्यस्तत्र माधवे।
तत्सहायपराश्चेमा हरौ स्नेहाधिका मताः॥
याश्चात्र सख्य इत्युक्तास्ताश्च स्नेहाधिका हरौ।
शेषाः स्नेहाधिकाः सख्यामुत्कर्षश्च यथोत्तरम्॥
तत्रापि नित्यसख्यो याः प्राणसख्यश्च काश्चन।
समस्नेहाः स्मृतास्तासामुदाहरणमुज्ज्वले॥
तिस्र एता व्रजगता ज्ञेयाः काश्चिन्निकुञ्जगाः।
अथ तुल्यप्रमाणकं स्नेहं वहन्त्योऽपि द्वयोरिमाः॥
राधाया वयमित्युच्चैरभिमानमुपाश्रिताः।
परमप्रेष्ठसख्यश्च प्रियसख्यश्च ता मताः॥
उदाहरणमेतासां मञ्जूषायां विलोक्यताम्।

अथ शुद्धायाः प्रीतेर्गाताकाष्ठापरा सख्ये मुख्ये रसे स्वरूपं तद्भेदं गीयते सद्भिः अथसख्यलक्षणं–

आत्मोचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि।
शुद्धा रतिर्भवेत्सख्यं तच्च निर्हेतुसौख्यदम्॥

तत्र रतिश्चेतोरञ्जकतासुखभोगानुकूल्यकृत् चेतोरञ्जकाद्रवीभावः सा प्रीतिर्मैत्री सौहार्दभावसंज्ञां च गच्छति तत्र—

या सम्प्रयोगविषया सा रतिः परिकीर्त्तिता।
सम्प्रयोगः स्त्रीपुरुषव्यवहारः सतां मतः॥

स चात्र द्वयोरेव तदुक्तमलङ्कारकौस्तुभे–

राधामाधवयोरेव श्रृङ्गारः श्रुतिरोचक इति।

अत्रैवपदमन्ययोगव्यवच्छेदि विशेष्यसङ्गतत्वात् पार्थ एव धनुर्द्धर इतिवत् असम्प्रयोगविषया सैव प्रीतिर्निगद्यते सा च द्वयोरपि स्त्रीपुरुषयोः स्त्रीणां सखीषु पुरुषाणांच सखिषु काचिन्मनोवृत्तिविशेषात्स्त्रीपुंसयोरपि यथा द्रौपदीकृष्णयोरिति मनोवृत्तिमयीप्रीतिर्मैत्री स्पर्शादिकोचिता सा च श्रीराधासखीनां श्रीकृष्णसखीनां च परस्परविषया–

निर्विकारा सदैकाभा सा सौहार्दमितीष्यते।
तत्सुखापरपर्य्याया सेयं श्रीलालितादिषु॥

सदैकाभा सदैकरूपा सा चेतोरञ्जकता सौहार्दम् सेयं तत्सुखात्मिका परा रतिः सख्यमिति सिद्धं निर्हेतुसौख्यदमित्युक्तेः अत्र प्रमाणं सखीनामनुभव एव श्रीमदुज्ज्वले–

यथाधिपत्येऽप्यौचित्यं दधाना ललितादयः।
श्रीराधाप्रेष्ठभावस्य लोभात्सख्यरुचिं दधुरिति॥
न चैवं वाच्यमानस्यापरकर्षो भवेदिह।
मधुरादवरत्वेन युक्तिरत्रावधार्य्यताम्।
सायुज्याख्या परा मुक्तिर्भक्तैर्यद्वदुपेक्षिता॥
सेवान्तरायादत्रापि तत्सुखस्य विघाततः।
मधुरोपेक्षितालीभिर्योगे सिद्धिस्तु नित्यदा॥
वियोगे प्रकटायान्तु लीलायामुच्यतेऽधुना।

सा च सिद्धिविधुरपरिभावितसाक्षात्काररूपा द्राक् तदावेशरूपा च नन्वन्यत्राप्रसिद्धमितिचेदलौकिकत्वाद्भूषणमेतन्नदूषणं लोकोत्तरचमत्कारिसुखं रस इत्यालङ्कारिकाः अलंप्रसक्तानुप्रसक्त्या मूलमनुकूलयामः तत्र यमुनोपकूला इति नित्यविहारभाण्डाराधिकारिणीयं नित्यसहचरीति स्कान्दसिद्धेः यमुना उपकूला अनङ्गरङ्गाख्यप्रदेशद्रुमाः श्रीराधिकाकुञ्जवाटिकावृक्षा इत्यर्थः कृष्णपदवीं शंसन्तु अत्र कृष्णेत्याद्यपन्हवः विपक्षादिसमुदाये तथाकेदेवोचितत्वात् यद्वा आराध्या मम नाम्नापि तेन राधेति गीयत इति कृष्णयामलनिर्वचनानुसारेण तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकमिति सम्मोहनतन्त्रोक्तभेदाभिप्रायेण वा तथोक्तं यदि वाऽतिरहस्यत्वान्न तस्याः साक्षान्नामोक्तिः तदुक्तं श्रीकृष्णयामले—

स्थानं नित्यविहारस्य ख्यातं वृन्दावनं वनम्।
यत्र नित्यं विहरति कृष्णो राधिकया सह॥
आविर्भावं द्वापरान्ते विहारस्य करोति सः।
अन्यदान्तर्हितो नित्यविहारं कुरुते प्रभुः॥
कुञ्जे कुञ्जे चतुर्वेदपुराणभ्रमराकुले।
वैकुण्ठादपि सङ्गोप्यसम्भोगस्थितमीश्वरम्॥
सर्वं रहस्यं कृष्णस्य प्रोक्तवान्नारदः पुरा।
वेदव्यासाय विविधान् राधिकाकृष्णयोर्गुणान्॥
गोपयित्वा ततो व्यासः पुराणादिषु केवलम्।
कृष्णलीलां निजगदे न राधाश्रितां कथाम्॥
रुक्मिण्याद्याः स्त्रियो यास्तु ताः राधायाः न संशयः॥

ननु स्वयमेव विचीयतामिति तेषां गाम्भीर्य्यमवधार्य्यचुः रहितात्मनां विगलानुसन्धानानां न इति सजातीयत्वेन सख्यसूचितम्॥ ९॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततोऽग्रे गच्छन्त्यो चूतप्रियालपनसासनकोविदारजम्ब्वर्कविल्व-वकुलाम्रकदम्बनीपान् दृष्ट्वा तेषां सफलत्वेन फलप्रदत्वेन च तद्विषयकप्रश्नस्यापि सफलत्वमालक्ष्य तथा च्यवति परदुःखकरुणया द्रवतीति चूतः उणादित्वान्निपातन यकारस्थले उकारादेशः तकारागमश्च इति व्युत्पत्त्या कृपालुतया द्रवितचित्तः तथा चिति संज्ञाने इत्यस्माच्चेतति चेतयतीति वा चूतः उणादित्वादेवेकारस्य उकारादेशस्तत्संज्ञा ज्ञापकश्च तथा चः शोभायां समाख्यातः—

उकारः शङ्करः प्रोक्त ऊकारो विष्णुरेव च ।
तकारः कथ्यते चौरे क्रीडे पुच्छे प्रकीर्तितः ॥

इति कोशोक्तेःशोभनो विष्णुशिवयो राक्रीडश्च प्रिया आलयः सख्यो यस्येति सखिषु स्निग्धः ग्रियमालाति आददातीति प्रियप्रापको वा प्रियालः आलीः संत्यज्य गच्छतः पनङ्गमनं स्यति तनूकरोति ता मेलयितुं निरोधयन्ति दुःखितान् पातीति पः न स्यति न नाशयतीति वा पनसः आसयति प्रियं सखीजनानां समीपे उपवेशयतीत्यासनः अकारं वासुदेवं सनति भजतीत्यसनः तद्भक्तत्वात् तत्प्रियो वा कोविदं रसाभिज्ञं रसिकशिरोमणिं कृष्णं आसमन्तात् सर्वसखीभ्यो रातीति कोविदारः जायते इति जम्बूः परोपकारित्वेन सुफलजन्मेति भावः। ये गत्यर्थास्ते प्राप्त्यर्था इत्यस्मात् ऋणाति प्रियङ्गमयतीत्यर्कः अर्कवत्स्वरूपाव भासकतया तमो दुःखनाशको वा अर्कः विरुद्धं तत्प्राप्तिप्रातिबन्धं लुनातीति विल्वः उः शिवः अः कृष्णस्तयोर्भक्तत्वेन कुलं यस्य कुलत एव हरिहरपरः परमभागवतो वकुलः तौ कौ पृथिव्यां लाति प्रापयतीति वा वकुलः अमरोगे गतौ चेत्यस्मात् आमयति गमयत्यर्थात्प्रियमित्याम्रः कं सुखं ददातीति कदः कृष्णस्तद्धंदं वाति प्रापयतीति कदम्बः नयति प्रापयतीति नीप इति तन्नाम्ना च कृष्णप्रापकत्वं सम्भाव्य पप्रच्छुः। चूतप्रियालेति। पूर्ववद्विकलतया युगपदेव सोपकारसूचकत्वत्तन्नाम्ना सम्बोधनं ये चान्ये तथाविधास्ते नः कृष्णपदवीं शंसन्तु ननु किंनस्तत्कथनेन तत्राहुः परार्थभविका इति। परार्थौ भवो जन्म येषां तथा परार्थे भवः शिवः को ब्रह्मा तयोः सदृशा आशु तोषफलप्रदाः परार्थभविका इति पाठे तु परार्थमेव भविकं मङ्गलमभ्युदयो येषां तथा यमुनोपकूलाः परोपकारायैव तीर्थवासिन इत्यर्थः एवं प्रार्थनायामप्युत्तरालाभे चूतस्य प्रच्युतमतित्वं प्रियालस्य प्रियं न लातीति प्रिया प्रापकत्वं पनं गतिं प्राप्तिं स्यतीति पनसस्य प्राप्तिप्रातिबन्धकत्वम् असनस्य न कमपि सनति भजतीत्यसनः न कस्यापि सुखप्रदत्वम् आसनस्य आसमन्तात्स्यति अन्तं प्रापयतीति नाशकत्वम्वा कोविदारस्य कोविदानां रसज्ञानामारत्वं खण्डकत्वं जम्वोस्तु अम्बूजम्बूकफेलूप्रभृतीनामुणादिव्युत्पत्त्या व्युत्पन्नत्वात् जि अभिभवे इत्यस्माज्जायतेऽभिभवति स्वत इति सतामभिभावकत्वम् अर्कस्य स्वत एव विषात्मकतया मारकत्वं विल्वस्य विशेषेण लुनातीति विच्छेदकत्वं वकुलस्य कुलत एव हरिहरपरत्वेन तत्पक्षपातित्वम् आम्रस्य आमयति रोगं प्रापयतीति दुःखप्रदत्वं कदम्बस्य कुत्सिता अम्बा यस्येति काकविद्प्रभवत्वेन कुत्सितत्वं नीपस्य प्रियमन्यत्र नयतीति प्रियवियोजकत्वमन्येषामपि तत्सहवर्तिनां तादृशत्वं सर्वेषां तेषां परार्थानां भवो रुद्रस्तद्रूपेण संहारकत्वं परार्थेनैव भाविकमभ्युदयो येषामिति परार्थहारकत्वं यमुनाया यमभगिन्याः सामीप्येन क्रूरताश्चावगत्यान्यत्र गताः ॥ ९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो एते आम्रादयः परोपकारशीलास्तपस्विनस्तीर्थसेवापराश्चेति मत्वा तान् पृच्छन्ति। चूतेति। चूताम्रयोः मधुराम्लफलत्वेन भेदः नीपो धुलिकदम्बा वृहत्पुष्पः कदम्बः क्षुद्रपुष्पोऽतिसुगन्धः प्रियालः शालभेदः पनसः कटहर इति ख्यातो वृहत्फलः असनः पीतशालः कोविदारः कचनारभेदः अर्कः क्षुद्रवृक्षोऽपि गोपीश्वराप्रियत्वात्प्रश्नार्हः च्यवतेऽतिरसमिति चूतः च्युतिर्क्षरणे प्रीणातीति प्रियालः प्रिञ्तर्पणे पनस्यते स्तूयत इति पनसः अस्यति परदुःखमिति असनः असु क्षेपणे कुं भूमिं विदारयतीति कोविदारः दृ विदारणे परोपकारार्थं झटिति भूमिमानार्भिद्य निःसृतः जमति परदुःखमिति जम्बूः जमुअदने अर्कः भानुवज्जाड्यहरः विलति परदुःखमिति विल्वः विलभेदने वङ्कतेऽवगच्छति परदुःखमिति वकुलः बाकि गत्यर्थः अम्यते स्वदुःखनिरासार्थं जनैरित्याम्रः अम गत्यादौ कन्दति हिनास्ति परदुःखमिति कदम्बः नयति सुखं प्रापयतीति नीपः णीञ् प्रापणे एवं भूता हे चूतादयः! अन्येच्च ये मधुकादयः परार्थभवका परार्थमेव भवो जन्म येषान्ते भविका इति पाठे भविकं मङ्गलं फलाद्युत्कर्षोऽपीत्यर्थः तत्रापि यमुनोपकूला यमुनायाः कूलसमीपे वर्त्तमानास्तीर्थनिकटवार्त्तित्वादिति नोऽस्मभ्यं कृष्णस्य सदानन्दरूपस्य भगवतः पदवीं मार्गं शंसन्तु स्वस्य करुणापात्रतामाविष्कुर्वन्ति रहितात्मनामिति काश्चिदूगृह्यादिरहितानाःवयत्वात्मना अतस्तच्छंसनेनात्मप्रदानं कुरुतेति भावः अत्र दर्शनासिद्धावत्रन्य मार्गं पृच्छन्ति अहो एते समाधिनिष्ठाःन शृण्वन्त्यतो न किञ्चिदपि वदन्तीति निवृत्ताः अनभिज्ञापेक्ष कृष्णस्त्वस्मच्चित्तरत्नमञ्जूषामाकृष्य गतस्तच्चोरचक्रवर्त्तिनः पदवीं शंसन्तु तत्रापि मृषाभाषणं न विधेयं यतो यमुनोपकूलाः यमुनासन्निधौ वर्त्तमाना इति शपथो व्यज्यते ननु स्वयमेवान्विष्य तस्य मार्गो निश्चेतव्य इत्याशङ्क्याहुः। रहितात्मानां विरहव्याकुलतया न्वेषणसमर्थसमाहितमनोरहितानां नः कृपया भवन्त एव वदन्तु अहो एते तीर्थवासिनोऽतो ऽत्यन्तकठोरहृदयाः अतो न कथयिष्यन्तीति ततो निवृत्ताः मानिनीपक्षेऽप्येवं निवृत्ताः निवृत्तिपक्षे चूतादिस्थानीयानि पञ्चकर्मेन्द्रियाणि जम्वादिस्थनीयान् पञ्चप्राणान् कदम्बनीपौ चित्ताहंकारौ पृच्छन्ति । चूतेति। ये वान्ये विषयाः परार्थभवकाः आत्मशेषभूताः यमुनास्थानीयात्मप्रदेशे स्थिताः नोऽस्माभिः श्रुतिभिः रहितात्मनामस्माकमविचारविधुराचित्तानां कृष्णस्य परमात्मनः पदवीं मार्गं शंसन्तु स्वप्रकाशकस्य प्राप्त्युपायं सूचयन्तु तथाच तदनुमापका भवन्ति नतु तदवभासका इति भावः ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे चूतादयः! भवन्तः अन्ये च ये यमुनोपकूला यमुना-

किं ते कृतं क्षिति ! तपो बत केशवाङ्घ्रिस्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि ।
अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरम्भणेन ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कूलसमीपे वर्तमानाः परार्थभविकाः परार्था भविका जनिर्येषां ते रहितः वियुक्तः आश्रयः कृष्णः यासां तासां नोऽस्माकं कृष्णपदवीं शंसन्तु कथयन्तु चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदः ॥ ९ ॥

भाषा टीका

हे आम के वृक्ष हे पियाल ! हे कटहर ! हे असन हे कचनार हे जामुन हे अर्कवृक्ष हे वेल हे मोरसली हे आम्र विशेष हे नीप हे कदम्ब और भी जो पराये उपकार करवे वारे यमुना के किनारे निवास करवे वारे सो हम श्रीकृष्ण सङ्ग से छूटगई हैं हमें उनको मार्ग वताओ ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे क्षिति क्षिते ! त्वया किं तपः कृतं या त्वं केशवाङ्घ्रिस्पर्शोत्सवा केशवस्याङ्घ्रिस्पर्शोत्सवो यस्याः सा कुतः अङ्गरुहैरुत्पुलकिता रोमाञ्चिता विभासि शोभसे तत्र विशेषं पृच्छन्ति । अपि किमयमुत्सवोऽङ्घ्रिसम्भवोऽधुना तवैकदेशाङ्घ्रिस्पर्शसम्भूतः यद्वा नैतावत्किन्तु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् आहो अथवा नैतावदेवापितु ततोऽपि पूर्वं वराहस्य वपुषः परिरम्भणेनेति अतस्त्वया नूनं दृष्टस्तं दर्शयेति ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं निजार्तिविज्ञापनेनाधिकदुःखोदयाविवशतया भूमौ निपातात् किम्वा पदवीप्रार्थनेन पदवीस्मरणाद्भूमौ दृष्टिं निधाय तस्यां स्निग्धदूर्वाङ्कुराद्युद्गमरूपं दृष्ट्वा श्रीकृष्णपादाब्जस्पर्शजातपुलकजातं दृष्ट्वा तस्याः परमसौभाग्यं मत्वा परमार्त्ता आहुः । किमिति । केशवेति परमेश्वरत्वं पूर्ववत् किम्वा प्रकृष्टाः केशाः सन्त्यस्येति व्युत्पत्तित्वात्परमसौन्दर्य्यं सूचितं विशेषेण भासीति शोभाविशेषेणानन्यहेतुकोत्सवत्वमभिप्रेतम् अङ्घ्रेरब्जादिरूपकाप्रयोगः कोमलादिगुणैरपेक्ष्येणापि केवलतत्तलस्पर्शमात्रेणैव तदुत्सवविवक्षया ईदृश उत्सवः केवलमङ्घ्रिसम्बन्धमात्रेण न स्यात् किन्तु सम्भोगेनैवेति पक्षान्तरमाहुः । आहो इति । अन्यैस्त्वेर्जितं यद्वा तादृशशोभादृष्ट्या श्रीकृष्णपादाब्जस्पर्शेनैव तमुत्सवं सम्भाव्य तस्य सर्वोत्कृष्टतां सूचयन्त्यस्तस्याः सौभाग्यमाधिक्यं वर्णयन्ति । अपीति । अङ्घ्रिसम्भवो ऽयमुत्सवः आपि किं त्रिविक्रमस्य लोकत्रयाक्रमणार्थं प्रकटितैश्वर्य्यस्य श्रीविष्णोः पादेन सर्वाक्रमणाद्बभूव आपि तु नैव तदानीमीदृशोत्सवशोभाविशेषासम्पत्तेः अहो न भवतु वा पादस्पर्शमात्रात् त्वदुद्धारार्थं प्रकटितमहावरा-

हमूर्त्तेर्भगवतः साक्षात्सम्भोगेऽपि न सिद्ध इत्याहुः । आहो इति यद्वा अङ्घ्रिसम्भव उत्सवस्त्रिविक्रमपादस्पर्शात् कारणात् किम्वा वराहमूर्त्तिपरिरम्भणेन कारणेन बभूव तत्कथयेति शेषः । इति सर्वथा श्रीकृष्णस्य तत्तत्सकाशान्माहात्म्यविशेषः सूचितः अतस्तद्विरहं कथं सहेमहीति किम्वा त्वं परमसुभगा वयं च तद्रहिता दुर्भगा एवेति कृपया तत्पदवीं सम्यग्दर्शयेति भावः ॥ १०

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

एवं पदवीप्रार्थनेन पदवीस्मरणाद्भूमौ दृष्टिं निधाय तस्याः सर्वव्यापकत्वेनावस्य तद्दर्शनं सम्भाव्य तस्यां स्निग्धदूर्वाङ्कुराद्युद्गमं पुलकजातिं मत्वा तच्च श्रीकृष्णस्य पादाब्जस्य स्पर्शोत्सवेनैव सम्भाव्य तस्य सर्वोत्कृष्टतां सूचयन्त्यस्तस्याः सौभाग्यमधिकं वर्णयन्ति । किन्ते इति । तपोऽत्र पुण्यजनकं कर्म । अपीति अङ्घ्रिसम्भवोऽयमुत्सवः । आपि किं त्रेधा विष्णुर्विचक्रम इति श्रुतिवर्णितस्य त्रिविक्रमस्य लोकत्रयाक्रमणार्थं प्रकटितैश्वर्यस्य श्रीविष्णोश्चरणत्रिक्षेपेण सर्वाक्रमणाद्बभूव अपितु नैव तदानीमीदृशोत्सवशोभाविशेषासम्पत्तेः आहो न भवतु वा पादस्पर्शमात्रात् त्वदुद्धारार्थं प्रकटितमहावराहमूर्त्तेर्भगवतः साक्षात्सम्भोगेऽपि न सिद्ध इत्याहुः । आहो इति । यद्वा तप एव विकल्पयन्ति केशवाङ्घ्रिस्पर्शसम्भव उत्सवस्त्रिविक्रमपादस्पर्शात् कारणात् किं वा वराहमूर्त्तिपरिरम्भेण कारणेन बभूव तत्कथयेति शेषः इति । श्रीकृष्णस्य तं तमतिक्रम्य माहात्म्यविशेषः सूचितः अतस्तद्विरहं कथं सहेमहीति किम्वा त्वं परमसुभगा वयं च तद्रहिता दुर्भगा एवेति कृपया तत्पदवीं सम्यग्दर्शयेति भावः ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अङ्गरुहैः अङ्घ्रिसम्भवैः अङ्घ्रिसंस्पर्शसम्भवात् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमिति । हे क्षिति क्षिते ! त्वया किं तपः कृतमन्यथेदं न घटते इत्याहुः या त्वं केशवस्याङ्घ्रिस्पर्शेन उत्सवो यस्यास्तथाभूता कुतः अङ्गरुहैरुत्पुलकिता रोमाञ्चिता विभासि शोभसे उदञ्चितानि तृणान्यालक्ष्य तेन रोमाञ्चस्तत्र हेतुः केशवाङ्घ्रिस्पर्शः तत्र च हेतुः प्राक्तनं तपश्चेति सम्भाव्याथोत्सवे हेत्वन्तराण्यपि सम्भावयन्ति । अपि किमयमुत्सवोऽङ्घ्रिसम्भवोऽधुनैकदेशे भगवदङ्घ्रिस्पर्शसम्भवः किंवा पूर्वमेव उरुक्रमस्य त्रिविक्रमस्य विक्रमात् पदा सर्वाक्रमणाज्जातः अथवा ततोऽपि पूर्वं वराहवपुषो भगवतः परिरम्भणेनालिङ्गनेन जातः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे क्षिति ते त्वया किं शुभं तपोलक्षणं कृतं पर्याप्तमङ्गोपाङ्गपूर्णं शुभं ते तव किं वशमन्त्रितं सत्कारपूर्वकं व्यावृत्तमस्तीत्यर्थः युगे क्षयान्ते पर्याप्तं कृतं क्लीबे हिनेऽर्थवदिति यादवः खेदानुकम्पासन्तोषविस्मयामन्त्रणेबतेत्यमरः अस्तीति कथमवगम्यते इत्यत्राहुः केशवेति । केशवस्य सुकेशभारस्याङ्घ्रयोः स्पर्श एवोत्सवस्तेन उत्पुलकितैः ऊर्ध्वमुखोल्लसितैः अङ्गरुहैः रोमलक्षणैर्वृक्षैः विभासि यत्तस्तदिति शेषः यद्वा केशवाङ्घ्रिस्पर्शोत्सवा प्रकृष्टप्रसवा सती त्वमङ्गरुहैर्वृक्षैः उत्पुलकिता रोमाञ्चिता विभासि यद्वा अङ्घ्रिस्पर्शनलक्षणेनोत्सवेनोत्पुलकिताङ्गरुहैरङ्कुरितपुष्पितफलितैर्वृक्षैः हे अंघ्रिसम्भवे नारायणश्रीपादसम्भवे उत्पन्ने अपि पद्भ्यां भूमिरिति श्रुत्या लोकसम्भाविते उरुक्रमस्य त्रिविक्रमस्याविक्रमात्पादविक्रमणात् अङ्गरुहैः उत्पुलकिं विभासि वा आहोस्वित् वराहवपुषा नारायणेन कृतेन परिरम्भणेनालिङ्गनेनोद्धृतिलक्षणेन केशाश्चोऽन्यतरस्यामिति सूत्रेण शोभमानाः केशा अस्य सन्तीति मत्वर्थे वप्रत्ययो विधीयते अर्थान्तरविवक्षायां गोपीनामनभीष्टत्वम् ॥१०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

हे सख्यः अमी तावन्निःस्पन्दतया तदेकध्याननिष्ठा अस्माकं वचनमपि न शृण्वन्ति किं पुनः कथयिष्यन्ति । तदेतान् हित्वा क्षितिमेव पृच्छामः इयं तावत्तद्विषैव यत्र यत्र गच्छतु नास्याः अगोचरः स दृश्येत च तद्देशचरत्वगमकं पुलकमस्या ज्ञाते तथा कुर्वन्ति । किन्ते कृतमित्यादि । हे क्षिति ते त्वया किं तपः कृतं ननु तपः कृतमिति कथमनुमितं तत्राहुः वत हर्षे केशवाङ्घ्रिस्पर्शेन उत्सवो यस्याः सा तथा त्वम् उत्सव एव कथमनुमितः तत्राहुः । अङ्गरुहप्रायैस्तरुभिः पुलकिता सती चेद्विभासि स्वसुकृतं स्वयमकथनीयमिति चेन्न कथयसि तदस्माभिरेव तत्कथ्यते श्रृण्वित्याहुः । अपीत्यादि । उरुक्रमो वामनस्तस्य विक्रमात्पादस्पर्शाद्वा आहो वराहवपुषः वराहावतारस्य भगवतः परिरम्भणेन उभयोः कारणयोरेकतरेण भावितव्यं मिलितमेव वा एकस्य चरणस्पर्शः अन्यस्य सर्वालिङ्गनमिति तस्माद्दृष्टः त्वया श्रीकृष्णः कथ्यतां क्वास्त इति शेषः ॥ १०—१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमतिविलापे दीनतायामाविष्कृतायां भूमौ भगवच्चरणारविन्दानि दृष्टानि तदा भूमिं स्तुवन्ति । किंते कृतमिति । हे क्षिति ते त्वया किंवा तपःकृतमस्माभिरपि पतः कृतमेव परं नैव फलमनुभूतं सर्वथा पुण्यव्यतिरेकेण नेष्टसिद्धिः सुतरां भगवल्लक्षणा स्वस्य तदभावमाशङ्क्य वलेति खेदेन केवलं तव पादसंवन्धमात्र किन्त्वन्येऽपि भावा दृश्यन्त इत्याहुः । केशवस्य ब्रह्मादेरपि मुक्तिदातुर्ब्रह्मप्रार्थितचरणारविन्दस्य अंघ्रिस्पर्शेन उत्सवो यस्याः खेदो दृश्यत एव अन्यथा पदानि स्पष्टानि न भवेयुः अन्योऽप्युत्सवो दृश्यते उत्पुलकिता च सर्वत्र दूर्वाङ्कुरा उत्थिता इति अङ्गरुहैः रोमाञ्चैः कृत्वा विशेषेण भासि उत्पुलकिताङ्गरुहैर्वा अङ्घ्रिस्पर्शोत्सवा विभासि ननु सर्वत्रैव पुलको दृश्यते यदि केशवाङ्घ्रिस्पर्शेन स्यात् तत्रैकदेशे स्यात् खेदवदित्याशङ्क्य हेत्वन्तरमुत्प्रेक्षन्ते । अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद्वेति । अपीति सम्भावनायामनेन चरणस्पर्शेन पूर्वस्थितचरणस्पर्शः स्मृतः स तु सर्वत्र भूमौ व्याप्तः अतस्तेन अङ्घ्रिणा सम्भवो यस्य उत्सवस्य उरुक्रमः त्रिविक्रमः तस्य विक्रमात् पदन्यासाद्वेति तत्राप्यनिर्द्धारः नहि चरणसंबन्धमात्रेण सम्भोगरहितेन सात्विकभावरूप उत्सवो रोमाञ्चो भवितुमर्हतीति तदर्थं पक्षान्तरमाशङ्कन्ते । आहो वराहवपुषः परिरम्भणेनेति । अनेन स्वसमानता च वर्णिता ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अहो किमेते विष्णुसमाधिमत्त्वादस्मत्प्रश्नं न शृण्वन्ति किंवा तीर्थवासिनोऽमी कठोरा एव यतः किमपि न वदन्ति हं हो के जानन्ति के वा तं न जानन्तीत्यनिश्चिततत्त्वास्तीर्थवासिनोऽमी कथं वृथा निन्द्यन्ते योजनस्तमपश्यन् जानात्येवेति । निश्चिततत्त्वो भवति स पृच्छ्यतामिति कयाचिदुक्ते प्रियसखि स एव जनः खलु कस्तं किं त्वं जानासीति सर्वाभिः पृष्टा सा तर्जन्या पृथिवीं दर्शयामास ततश्च सत्यमेव त्वं ब्रूषे यत्र तत्र स वर्त्तते सा पृथिव्येवेति पृथिव्या अस्यास्तद्विच्छेदो नास्तीति कृष्णस्य पितृवर्गसखिवर्गप्रेयसीवर्गादासवर्गेभ्योऽपि विरहदुःखानभिज्ञत्वात्त्वमेव धन्येत्यतोऽस्याः पूर्वपूर्वेष्विव प्रश्नो न घटते किं त्वस्याः प्राचीनं तप एव जिज्ञास्यं यत्कृत्वा कृष्णविरहासम्भावनां वयमपि भवामेति विमृश्य पृच्छन्ति । किमिति । हे क्षिति क्षिते ! त्वया किं तपः कृतं यतस्त्वं केशवस्याङ्घ्रिस्पर्शेन उत्सवो यस्याः सा त्वं विभासि यतोऽङ्गरुहैस्तृणाङ्कुरैरुद्गच्छद्भिरुत्पुलकिता उत्कृष्टपुलकयुक्ता यत्र तत्र स वर्त्तते तत्रैव त्वामङ्घ्रिभ्यां स्पृष्ट्वैव तिष्ठतीति कृष्णाङ्गसङ्गसुखं तव रात्रिंदिवं व्याप्यैव यतो ऽभूत्तपो वक्तुमर्हसि वयं विरहिण्यो दुर्भगास्तच्छ्रुत्वापि कृतार्थी भवामेति भावः । तद्बुवाणां तामभिलक्ष्य पुरावृत्तस्मरणात् स्वयमेवाभ्यूहन्ति । अपीति । उरुक्रमस्य त्रिविक्रमदेवस्य विक्रमात् योऽङ्घ्रिसम्भवः अङ्घ्रिप्राप्तिः भूप्राप्ती सम्पूर्वः तत्रयदिमहाभारसहन लक्षणं यत्तपस्तदेव किमित्यर्थः । वै इति निश्चये पादपूर्णे वा आहोस्वित् महावराहवपुषः परिरम्भणेन तदीयदृढपरिरम्भणोत्थपीडाप्राप्तिलक्षणं तपस्तदेव किमित्यर्थः । अन्याभिर्दुर्लभं तदैतदुत्सवप्राप्तिसाधनं यत्तपस्तदपि स्त्रियास्तव पुरुषसङ्गलक्षणत्वात् सुखमयमेवेति नास्ति त्वत्तोऽन्या धन्येति भावः ॥ १० ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्च पदवीप्रश्नेन पृथिवीमप्युदत्तदृष्टयः प्रियनर्मसख्यः स्निग्धदूर्वाङ्कुराद्युद्गमरूपं तच्चरणाब्जस्पर्शसञ्जातपुलकजालं मत्वा तामप्यात्मपक्षग्राहिणीमभिमन्यमाना आहुः । किन्त इति । हे क्षिति क्षिते इत्यर्थः छान्दसमिदं यद्वा इदं तोयं क्षितिः क्षिती इतिशब्दप्रकाशात् तत्संबोधनमिदं सर्वेषां निवासस्थानत्वात्त्र कुत्रापि क्षितस्त्वया ज्ञायत एवेत्यनपह्नवाय वस्तुतस्तु यत्र प्रदत्तशादलस्थली-

केनचित्कृता विशुद्धरसदीपिका ।

यमिति गम्यते यथा च भावामृते—

प्रश्लिष्टपुष्पोच्चयसन्निवेशां ताम्बूलरागाञ्जनचित्रिताङ्गीं ।
व्यक्तीभवत्कान्तविलासचिन्हां शय्यामपश्यन्स्वसखीमिवाल्यः ॥

इति ततश्च तत्क्रीडास्थानस्यास्य स्वपरिचितत्वसूचनेन तदन्तरङ्गत्वाभिमानेन ससोत्प्रासमाहुः । वत अहो ते त्वया किं तपः कृतमित्याभिलाषः या त्वं केशवांघ्रिस्पर्शोत्सवेति प्रशस्ताः केशाः सन्त्यस्या इति केशवा स्वाङ्गानुडीप्विकल्पः तस्या अंघ्रिस्पर्शेनोत्सवो यस्याः सा यद्वा केशाः प्रसाधनीयाः सन्त्यस्येति केशवः तस्य च तेषां प्रसाधनाय तत्पश्चाग्निविष्टस्य प्रपदमात्रस्पर्शनानन्दोदयान्नवांकुरोद्गरूप उत्सवो यस्याः सा एवं च क्षितेरपि सहचरीत्वं व्यञ्जितं यत् उत्पुलाकिन्ताङ्गरुहैर्विभासीति उदिति सात्त्विकानां सूद्दीप्तत्वं ततश्चानन्दाधिक्यं वेति सम्भावनायाम् अपिचेत्यर्थः । उरुक्रमाविक्रमात् उरुबहुतरस्तत्रतत्रोपलभ्यमानत्वात् क्रमः विक्रमः सच केशवेषाय पुष्पाद्यचयार्थमितस्ततो भ्रमणं तच्च द्वयोरपि गोपनायैकत्वेन पुंस्त्वेनन्वाभिधानम् अथवा उरुक्रमयोर्विक्रमादिति समासः अयमेव केलिनामालङ्कारः तदुक्तं विहारे सह कान्तेन क्रीडितं केलिरिष्यत इति यथालङ्कारः अपि सह विहरन्त्या कृष्णमुल्लङ्घ्यरम्ये सुरभिणि कुसुमेऽहंपूर्विका कौतुकेन अनियतपदभङ्ग्या पार्श्वसङ्घट्टनेन स्तनहातिपरिभूतो राधयाऽसौ व्यधायि ततश्चपरस्परसङ्घट्टनेन तारुण्योदयान् मदनमदाविष्टया यदनुष्ठितं तत्सम्भाव्याहुः । आहो वराहवपुषः पारिरम्भणेनाति । आहो ज्ञातं ज्ञातामिति सोत्प्रासं पतिवरयितावरइत्याभिमानकोशात् वरेण निजवल्लभेन साकं य आहवः कृतस्यानुकरणरूपः सुरतसंग्रामः तं पुष्णातीति वपुट् ववयोरैक्यात् तस्य वराहवपुषः अर्थात्त्वया कृतेन पारिरम्भणेन एवञ्च प्रागतस्य वराहवपुषः अर्थात्त्वया कृतेन पारिरम्भणेन एवञ्च प्रागलभ्यं सूचितं तद्दर्शितमलङ्कारे श्लिष्टा श्लिष्यति गोकुलेन्द्रतनयेनाचुम्बिता चुम्बति स्वच्छन्दं लिखितानैर्खनखपदैराभूषयत्यङ्कं शिक्षित्वा तत एव पुष्पधनुषः संग्रामविद्यामियं तस्य क्षोभकरी यदेव तदियं विद्यागुरुक्षोभिकेति यद्वा वेषपरिवर्त्तनेनावेशात्पुरुषायितं संभाव्याहुःतदुक्तं तत्रैव सीमन्तमस्य दयितस्य बबन्ध वेणीं राधा शिखण्डवलयैः स च मौलिमस्याः अन्योऽन्यवेषपारिवर्त्तनकौतुकेन द्वाभ्यामलभ्यत विशेषरतेः प्रमोदः अयं लीलाख्यानुभावः तदुक्तम् अङ्गैर्वेषैरलङ्कारैर्लीलाकान्तानुकारितोति तदेवमव्यवतश्लोके सुरतान्तवर्णनान्यथानुपपत्त्यातिरहस्यो विहारोऽत्रानुसन्धेयः प्रकटार्थेतु न कश्चिच्चमत्कार इत्युपेक्षितः ॥ १० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे गच्छन्त्यः पदवीमन्वेषयन्त्यः क्षितिं दृष्ट्वा ताञ्च सर्वसहां सर्वापराधसहनेऽपि क्षि निवासगत्योरित्यस्मात्सर्वनिवासगतिप्रदां सर्वोपकारिणीं सर्वाधारां व्यापकतया चावश्यं प्राप्तसंयोगाम् उत्फुल्लतातृणादिना कृष्णाङ्घ्रिस्पर्शजातरोमहर्षां सम्भाव्य पूर्वं बहुभ्यो ऽप्राप्तोत्तरत्वेन प्रार्थनायां लघुत्वेन स्वार्थासिद्धिं मत्वा तपः श्लाघनेनैव स्वकार्य्यसिद्ध्यै तां प्रोत्साहयन्ति किंते कृतामिति । हे क्षिति ते त्वया किन्तपः कृतं तन्नो ब्रूहि यतो वयं स्वाभाग्यात्कृष्णसङ्गममप्राप्य दुःखिता भ्रमामस्त्वन्तु पूर्वमुरुक्रमविक्रमात्—

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदामति ।

श्रुतिसिद्धादपि ते तदङ्घ्रि सम्भव उत्सवो जात आहो इति अथ बराहबपुषस्त्वदुद्धारार्थमेवावतीर्णस्य परिरम्भणेन संभोगातिशयेन ते उत्सवः संभूतः अधुना तु सर्वतोऽतिशायिकेशवस्य कृष्णस्यांघ्रिस्पर्शेन य उत्सवस्तेऽत उत्पुलकिताङ्गरुहै रोमहर्षैर्विभासि विशेषेण शोभसे एवं तत्तपोमाहिमवर्णनेऽप्यसंभाषमाणां दृष्ट्वा भगवत्संगमेन जातमदां सापत्न्येनाभिभवन्तीं वा पतित्रयसंगमश्रवणेन जातलज्जां वा संभाव्य तूष्णीं ययुः ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवमतिविकलमानसाः प्राप्तात्यन्तदैन्या मार्गकथनप्रार्थनयो र्मार्गस्मरणाद्भूमौ निहितदृष्टयस्तस्याः सर्वत्र सत्त्वेनावश्यन्तदर्शनं सम्भाव्याहुः । किमिति । हे क्षिति ते त्वया किं कीदृशं किंनामधेयं तपः कृतं यद्यप्यस्माभिरपि तपः कृतमेव० तथापि तादृशफलानुकूलं न कृतमतो महान् खेद इत्याशयेनाहुर्वेतेति यतो या त्वं केशवस्यांघ्रिस्पर्शेनोत्सवो यस्याः सा कश्च अश्च ईशश्च केशाः ब्रह्मविष्णुशिवास्ते ऽस्य वश्यतया सन्तीति केशवः केशान्नियामकतया वा गच्छतीति वा तथा च तादृशस्य परमात्मनोऽङ्घ्रिस्पर्शोत्सवो नाल्पस्य तपसः फलमिति भावः । एतज्ज्ञापकं चिन्हमाहुः । अङ्गरुहैरुत्पुलकिता विभासि विशेषेण शोभसे तत्र विशेषं पृच्छन्ति । अपि सम्भावनायां किमय मुत्सवः अंघ्रिसम्भवः संप्रति तवैकदेशे चरणस्पर्शसम्भूतः यद्वा नैतावत् किन्तु पूर्वमेवोरुक्रमस्य वामनस्य पदा सर्वाक्रमणात् अधुना भगवच्चरणस्पर्शेनास्मृतत्वात् अथवा नैतावदेवअपितु ततोऽपि पूर्वं वराहस्य वपुषा परिरम्भणेनालिङ्गनेन तदानीमंध्रिस्पर्शात्स्मृतेरेव तथाचास्मत्साजात्यं भवत्या अप्यतस्तं पश्यन्ती त्वं दर्शयेति भावः। अनभिज्ञापक्षे अहो किमर्थं तीर्थवासिनोऽमी निन्द्यन्ते यस्तमवश्यं जानाति स प्रष्टव्य इत्युक्तवतीनां मध्ये काचित्तर्जन्या क्षितिं सूचयामास ततः सर्वास्तामाहुः । किमिति । हे क्षिते त्वया किन्तपः कृतं यतः पुलकितैरङ्गरुहै रंकुरैः केशवस्याभिरूपैः केशवस्य तस्य परमसुन्दरस्य कृतस्यांघ्रिस्पर्शोत्सवा विभासि तादृशोत्सवजनके तपसि पृष्टेऽदत्तोत्तरान्तामुपलभ्य स्वयमेवोत् प्रेक्ष्यन्त्योऽपि अयमंघ्रिसम्भव उत्सव उरुक्रमविक्रमजनितपीडारूपतपसो वा अहोस्विन्महावराहवपुषः परिरम्भणजनितव्यथारूपेण तपसा यद्वा तच्चरणस्पर्शजनितपुण्याद्वा किम्वा तत्परिरम्भणजनितपुण्येन तथाच तत्पादस्पर्शादिरहितत्वाद्दुर्भगानामस्माकं तत्पादस्पर्शमनुभवन्ती सुभगा त्वं कारुण्यात्तन्मार्गं प्रदर्शयेति भावः ॥ मानिनीपक्षे ऽप्येवं निवृत्ताः निवृत्तिपक्षे अपि क्षितिस्थानीयं मनः पृच्छन्ति । किमिति । केशवः परमात्मा तस्यांघ्रिरंश इवांशो जीवात्मा ममैवांशो जीवलोके जीवभूतः सनातनः इत्युक्तत्वात्तस्य स्पर्शेनोत्सवो यस्याः सा पुलकितैर्हर्षितै रङ्गरुहैः सङ्कल्पात्मवृत्तिभिर्विभासि स उत्सवः किं यथोक्तांघ्रिस्पर्शसम्भवः यद्वा उरुक्रमस्यान्तर्यामिणः विक्रमात्प्रेरणारूपपराक्रमात् आहोस्वित् वराहस्य वपुषः सेवनेन स्वरूपस्य परिरम्भणेनेति ॥ १० ॥

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि ! सुनिर्वृतिमच्युतो वः
कान्ताङ्गसङ्गकुचकुंकुमरञ्जितायाः कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे क्षिति क्षिते ! त्वया किं तपः कृतम् या त्वं केशवाङ्घ्र्युत्सवा केशवस्य ब्रह्मशिवयोरपि जनकस्य अङ्घ्रिस्पर्शेन उत्सवो यस्यास्तथा भूता यस्मादङ्गरुहैरुत्पुलकिता रोमाञ्चिता विभासि शोभसे अपि किमयमुत्सवः अङ्घ्रिसम्भवः अङ्घ्रिभ्यां त्वयि अधुना अर्पिताभ्यां सम्यक् भवो जन्म यस्यैवंभूतः किंवा उरुवितत: क्रमः पादविन्यासो यस्य स तथा तस्य वामनस्य विक्रमात् चरणेनाक्रमणात् आहो किं वा वराहवपुषः क्रोडशरीरिणः परिरम्भेण आलिङ्गनेन तस्मात्त्वया दृष्ट एवातस्तं दर्शयेति भावः ॥ १० ॥

भाषा टीका

पृथिवी को देख कहवे लगीं हे भूमि ! तुमने कौनसो तप कियो है जाते कि श्री केशव के चरण के स्पर्श के सुख ते तुमारे शरीर में पुलकावली हो रही है का ये त्रिविक्रम भगवान् के चरण के स्पर्श को आनन्द है या वराह अवतार के आलिङ्गन करवे को आनन्द है सो हमैं बताओ ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हरिण्या दृष्टिप्रत्यासत्त्या कृष्णदर्शनं संभाव्याहुः। अपीति। हे सखि ! एणपत्नि अपि किमुपागतः समीपं गतः गात्रैः सुन्दरैर्मुखबाह्वादिभिः प्रियया सहेति यदुक्तं तत्र द्योतकं कान्ताया अङ्गसङ्गस्तेन तत्कुचकुंकुमेन रञ्जितायाः कुन्दकुसुमस्रजो गन्धः कुलपतेः श्रीकृष्णस्य वात्यागच्छति ॥ ११ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी।

द्वयमपि श्रीतुलसीवत्तस्य नित्यप्रिया सापत्न्यात्तदिच्छानुसाराद्वा न कथयेदिति सख्येन विस्रम्भैणीः पृच्छन्ति। अपीति। हे एणस्य पत्नीति त्वयापि प्रियविरहदुःखं ज्ञायत एव अतः कथ्यतामिति भावः। एकत्वं विरहार्त्तिभरेण दूरे दृष्टत्वप्रसरणादेकस्या एव दृष्टेः दृशामिति व इति च बहुत्वमच्युतोपगमेन गौरवात् यद्वा एकत्वं जात्यपेक्षया किम्वा बह्वीषु तासु मध्ये अन्तिकवर्त्तिनीमेकां प्रत्येव प्राधान्येन प्रश्नात् प्रियया कयाचिद्गोप्या सह प्रिययेति सह गमनात् तेनेर्ष्ययैव वा गात्रैर्दृशां सुनिर्वृतिं परमसुखं तन्वन्निति अन्यथा विशालप्रसन्ननेत्राणामसाफल्यं किम्वा अन्यथेद्दृशादृष्टयसम्भव इति भावः। सुशब्दः मोक्षसुखादपि वैशिष्ट्यविवक्षया तेनात्यन्तात्यन्तिकसंदर्शनमप्यभिप्रेतम् अन्यथा सुनिर्वृत्यसम्प्राप्तिः हे सखीति तस्या अपि श्रीकृष्णविषयकसानुरागादृष्ट्या वने सह विहारादिना वा अतोऽस्मासु वञ्चना नैव कार्य्येति भावः। अच्युत इति सुनिर्वृतिविस्तारणे किम्वा इहोपगमने विच्युतिर्नास्तीति भावः। तदेवाभिव्यञ्जयन्ति। कान्तेति। ताद्धि जानन्ति तद्विद इतिन्यायेन तासां तद्गन्धपरिचयोऽस्तीति तथोक्तं मालां बिभ्रद्वैजयन्तीमिति पूर्वमुक्तं ततश्च सहत्वालिकुलैर्बिभ्रदिति तुलसीमालां अधुना च कुन्दस्रज इत्येवं मालात्रयं गम्यते यद्वा वैजयन्त्यामन्यत्रापि तुलसीसम्भवात्तद्धारणं ज्यौत्स्न्यां रात्रौ कुन्दमालया: शोभाभरार्द्धं जयन्तीपारित्यागेनाधुना तस्या एव धारणं ज्ञेयं कुलपतेर्गोकुलेन्द्रस्य किम्वा गोपीकुलस्वामिनः लज्जया वैदग्ध्या वा साक्षात्तथानुक्तिः अतस्तेदकप्रियाणामस्माकं तदभावेन प्राणरक्षा न स्यादिति सर्वथा शीघ्रं कथयेति भावः। श्लेषेण कुत्सितं लाति आददाति यो जनस्तस्यैव पतिरिति तया साहित्यं युक्तमेवेतीर्ष्ययोक्तिः अन्यत्तैर्व्याख्यातं यद्वा प्रियया उपगतः सङ्गतः सन्निहास्ते ननु तर्हि नात्र वर्त्ततैव नेत्याहुः। कान्तेति अन्यत् समानम् ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अथात्रेति विचार्यते कामप्यादाय श्रीभगवानन्तर्हितः इति व्यक्तीभविष्यदपि पूर्वं यन्मुनीन्द्रः स्वयं न स्फुटमुक्तवान् तस्यायमभिप्रायः। सत्स्वपि नानाभगवदाविर्भावेषु मम स्वयं भगवति श्रीकृष्णाख्य एव तस्मिन्नाग्रहविशेष इति तथा सत्स्वपि नाना तत्तत्परिकरेषु श्रीव्रजवासिष्वेव स इति तथा सत्स्वपि तेषु श्रीव्रजदेवीष्वेव ततोऽप्यधिकतरः स इति रहस्यं सर्वेऽपि ज्ञातवन्त एव किन्तु तास्वपि सतीषु श्रीराधिकायामेवाधिकतमः स इति न ज्ञातवन्तः तदेतन्मदाग्रहतारतम्यञ्च तत्तदुत्कर्षतारतम्यादेव। अस्याः परमरहस्यायास्तदेतत्तु साक्षाज्ज्ञापयितुं संकुचति मच्चित्तम्। ज्ञानखलताभिया विज्ञापयितुमपीच्छति तस्मादस्याः सखीनां वचनात्तत्राप्रतीतौ च प्रतिपक्षाणामपि वचनाद्व्यञ्जनयैव वृत्त्या यथावसरं मध्ये मध्ये प्रकटयिष्यामः। यदि च जातु स्वयमप्यावेशवशात् प्रकटयिष्यामः तदा नाम तु तस्याः साक्षान्न वक्ष्यामः। एतस्यास्तत् पुनरास्तामन्यासामपि न किञ्च। व्यञ्जनावृत्तिरेव सर्वत्र नानारसप्रकाशिनी ननु मुख्या सा च यदि प्रसङ्गे अवधारिते विशेषव्यञ्जनार्थमभ्युदयते तदातीव चमत्कारिणी स्यादिति तदेतदभिप्रेत्य प्रथमं सखीद्वारेदं ज्ञापयति यदा तामादाय श्रीभगवान् सहसान्तर्हितस्तदा तस्याः सख्यस्तु संशयाना एवासन् किन्तु केवलवलानुजान्वेषणपराभिस्ताभिः सहचारित्वेऽपि किञ्चिदुन्मादधारित्वेऽपि तन्मिथुनान्वेषणव्यग्रतया पृथगवस्थितस्वयूथतया तदवधानदूरस्फुरदीहाः सत्यः पर्यटितवत्यो वक्ष्यमाणं तत्पादचिह्नदर्शनं विनापि क्वचित् किञ्चिदुपलब्धवलक्ष्य। तथाहि तासां वाक्यमप्येणपत्नीति। अत्राखण्डस्य वाक्यस्य निखिलपदानामप्यनुमोदनव्यञ्जक एवार्थः प्रतिपद्यते। ततः सख्यमेवासां तन्मिथुनमनुलक्ष्यते तद्दर्शनोत्कण्ठा च तत्र वाक्यार्थः। अपीति सम्भावनायाम्। तदिदं सम्भावयाम इत्यर्थः। अथवा अपीति प्रश्ने। तदेतत् पृच्छाम इत्यर्थः। किन्तत्रत्राहुः। हे सखि ! अच्युतो वो युष्माकमुपगतः समीपं प्राप्तः। ननु वनविहारि-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जस्तस्य वन्यानामस्माकं समीपप्राप्तौ किमाश्चर्यं तत्राहुः । प्रियया सहेति । ननु तत् खल्वाश्चर्यमेव किन्तु यत्र तस्य दर्शनं तत्र तस्याः सहयोगेन किमाश्चर्यमधिकं सुखं नाम तत्राहुः । तयैव सह गात्रैस्तादृशानन्दव्यञ्जकनानानुभावविचित्रैरङ्गैर्वो युष्माकं भवत्या भवत्सन्धन्धिनीनाञ्च दृशां सुनिर्वृतिं केवलस्य तस्य दर्शनादपि तत्साहित्यदर्शने परमानन्दं तन्वन् विस्तारयन्निति तदिदञ्च नास्मासु गोपयितुमर्हसि वयं हि तदन्तरङ्गधर्मविदः सहचर्यः तद्गन्धवाहमात्रेणापि तदीयं सर्वं ज्ञातुं शक्नुम इत्याहुः । कान्ताङ्गेति । प्रथमं तावत् कुलपतेस्तस्य तत्र कान्तायास्तस्यास्तत्र तदङ्गसङ्गस्य तत्र तत्कुचसङ्गिकुङ्कुमस्य तत्र च तल्लिप्तकुन्दस्रजः स एष गन्धः स्फुटमत्रायाति । स चाभ्यस्तत्वादस्माभिरुपलभ्यत इत्यर्थः । अथ द्रष्टृदृष्टिदृश्यप्रशंसया तदनुमोदनव्यञ्जकपदानामर्थः । अत एव प्रथममपीति सकाकु सम्भावनया तत्रोत्कण्ठां व्यानञ्जुः । एणपत्नीति जात्यैव दृष्टिप्रशंसा। एणपत्नीत्यनेन "पत्युर्नो यज्ञसंयोग" इति पाणिनिस्मृतेरेणानां याज्ञिकत्वं तस्या यज्ञपत्नीत्वं व्यञ्जितमिति द्रष्टृ प्रशंसा । उपगतः समीपमपि प्राप्त इति तद्भाग्यप्रशंसा तत्रापि प्रिययेति द्रष्टृदृश्ययोर्द्वयोरपि प्रशंसातिशयः । गात्रैर्मिथः सङ्गमेनासाधारणतां प्राप्तैरिति पूर्ववदेव तन्वन् दृशां सखि ! सुनिर्वृतिमित्येभिर्दृष्टेश्च तदतिशयः अच्युत इति प्रियया सह विचाररहित्येन पुनर्दृश्यप्रशंसा च इति यत्र भवतीदृशी तत्र भवत्सङ्गिनीनामपि ईदृशत्वं युक्तमिति द्रष्टृ प्रशंसा । अथ कान्तेति दृश्यायास्तस्यास्तदङ्गसङ्गेति लब्धदुर्लभस्य दृश्यस्य कान्तस्य कुचकुङ्कुमेति तत्संयोगलब्धभाग्यस्य दृश्यस्य कुंकुमस्य तद्राञ्जिताया इति तत्सम्बन्धेन लब्धशोभातिशयायाः दृश्यायाः कुन्दस्रजः शुभ्रतया तदुदयशोभायोग्यायाः स्वरूपेण च तस्या एव । कुलपतेरिति दृश्यस्य कान्तस्य । इहेति लब्धतद्गन्धसौभाग्यस्य दृश्यस्य तत्स्थानस्य वातीति वातमप्यात्मसात्कृत्य स्वयमेव सर्वतश्चलतीति गन्धविलसितस्य गन्ध इति तत्तद्विशेषयोगात्तस्य च प्रशंसावगतेति ॥ ११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उपगतत्वमुपपादयति । कान्ताङ्गेति । कुलपतिः कृष्णः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरिण्या दृष्टिलालित्यस्य श्रीकृष्णदर्शनजहर्षप्रयुक्ततां सम्भाव्य पृच्छन्ति । अपीति । हे एणपत्नि वो युष्माकं दृशां सुनिर्वृतिं निरतिशयानन्दं गात्रैः सुन्दरैः पाणिपादादिभिरवयवैर्वितन्वन्विस्तारेण जनयन्नच्युतः प्रियया सहहोपगतः अपि किमागतः किमित्यर्थः नोपगत इति मावोच इत्यभिप्रेत्य तत्र लिङ्गमाहुः । कापट्येन न ब्रूयुरिति सख्यमापादयन्त्यः संबोधयन्ति हे सखीति । कान्ताया अङ्गसङ्गमेनालिङ्गनेन यत्कुंकुमं तेन रञ्जितायाः कुलपतेर्गोकुलनाथस्य कृष्णस्य कुन्दस्रजो गन्ध इह वाति प्रसरत्यनेन कान्तया सह उपगतत्वे लिङ्गमुक्तं भवति ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे एणपत्नि ! मृगजाये ! ने ईश्वरः कयाचित्प्रियया प्रियतमया इहोपगतः सामीप्यमाप्तः किं कीदृशः हे सखि मृगभार्ये गात्रैराननादिशरीरावयवैः वो युष्माकं दृशां सुनिर्वृतिं तन्वन्नपि विस्तारयन् प्रश्ने निमित्तमाह । कान्तेति । कान्तायाः कमनीयायाः अङ्गसङ्गादालिङ्गनलक्षणात्सङ्क्रान्तकुचकुंकुमेन रञ्जिताया अनुरागीकृतायाः अस्मत्कुलपतेः कृष्णस्यासावलम्बिन्याः कुन्दस्रजः कुन्दपुष्परचितमालाया गन्धः वाति आगच्छतीति यद्यस्मादिति शेषः वा गतिगन्धनयोरिति धातुः यद्वा कान्तस्य भगवतोऽङ्गमङ्गस्याङ्गो यस्याः सा तथा अत्र स्त्रीशब्दोऽध्याहार्यः सा कान्ताङ्गसङ्गा स्त्री तस्याः कुचकुंकुमरञ्जितायाः कुलपतेः कुन्दस्रजः गन्धोऽस्यास्तीतीति मत्वर्थे अच्प्रत्ययात् गन्धवान् वायुरिह वाति वीजयतीति गोपीनामेकवचनबहुवचनाभ्यां भक्त्यतिशयपिशाचीग्रहणं सूचयति यद्वा एणपत्नीतुल्यनेत्रत्वात्सखीत्युपचर्यते वः ईश्वरो भर्ता मृगः कयाचित्प्रियया उपगतः आश्लिष्टोऽपि किं न भवति गर्हितत्वात् अस्मत्कुलपतिरस्मान् विहाय कयाचिदालिङ्गित इत्याशयेनाहुः कान्तेति । कान्ताया अङ्गे उरोऽवयवे सङ्गो ययोस्तौ कान्ताङ्गसङ्गकुचौ तयोः कुंकुमेन रञ्जितायाः अरुणीभूतायाः कुलपतेः कुन्दस्रजो गन्ध इह वाति स्वयञ्च न दृश्यते तत्सद्भावो विज्ञायत इति व्यङ्ग्यालङ्कारोक्तिः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अपीति द्वयम् ॥ ११—१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं स्थावरान् पृष्ट्वा जङ्गमान् पृच्छन्ति । अपीति । हे एणपत्नि कृष्णसारपत्नि ! प्रियया कयाचित् लक्ष्म्या अन्यया वा उपगतः मिलितः स्त्रीसहितः अनेन मार्गेण गच्छन्स्वगात्रैः स्वावयवैः भवतीनां दृशां सुनिर्वृत्तिं तन्वन् दृष्टः कश्चित् अनेनैव मार्गेण गत इति चरणारविन्ददर्शनात् निश्चीयते यदि दृष्टो भवेत् तदा अस्माभिरपि द्रष्टुं शक्य इति त्वं त्वन्यस्य पत्नी आस्माकञ्च सखी भवसि अत आहुः । हे सखीति सखित्वं कृष्णानुरक्तानेत्रतुल्यत्वेन भीरुत्वादिधर्मैः अन्यथा भवतीनां विकसितनयनानि न भवन्तीति । ननु कृतलीलः किमिति प्रार्थ्यते तत्राहुः अच्युत इति । ननु कथं ज्ञायते प्रियया उपगत इति तत्राहुः कान्तेति । कान्ताया अङ्गसङ्गे यत्कुचयोः कुंकुमं तेन रञ्जितायाः कुन्दस्रजः कुन्दपुष्पमालायाः गोकुलपतेः सम्बन्धिन्या इह गन्धो वाति आर्द्रश्च गन्धः आर्द्रकुङ्कुमं ज्ञापयति सात्त्विकभावादेव वार्द्रता अतो ज्ञायते प्रियया सङ्गत इति ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्चाहो हंत तेन स्वकान्तेन ध्वजवज्राङ्कुशादिभिश्चिन्हे

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

र्विचित्रिताङ्गी विहरन्ती स्वाधीनभर्तृकामहागर्वान्धा कथमस्मांस्तमेवाचक्षीतेत्यग्रतो गत्वा कामपि हरिणीमालक्ष्याहुः । अपीति । हे सखि ! एणपत्नि ! प्रिययया त्वया किमुपगतः स्वसमीपे सम्प्राप्तः सम्बोधनपदसाहचर्य्यादेवात्र त्वयेति लभ्यते एणस्य पत्नी भवन्त्यपि त्वमस्मत्तुल्या तस्यैव प्रिया तमेव प्रियं मन्यसे इति भावः । यतः गात्रैर्मुखबाह्वादिभिर्वो दृशां सुनिर्वृतिमत्यानन्दं तन्वन् सन् व इति दृशामित्यादरे बहुत्वम अच्युत इति स्वदृशानन्दलोभात्त्वया तदनुगमनादेव हेतोस्त्वत्तः स न विच्युत इति भावः । ततश्चाग्रतः स्वभावादेव गच्छन्तीं तामालक्ष्य हं हो स दृष्ट इति किं ब्रवीमि तं वो दर्शयाम्येव मदनुपथमागच्छतेति ब्रुवाणेवाग्रत इयं गच्छन्ती ग्रीवां परावृत्य मुहुरस्मान् पश्यति तादियमेवात्र निर्दये वृन्दावने दयावतीति तदनुगच्छन्त्यौ दैवात् क्कापि गतां तामदृष्ट्वा हं हो कृष्णं दर्शयिष्यन्ती हरिणी किं न दृश्यते ति पृष्टाः काश्चिदाहुः तर्हि कृष्णोऽत्रैव क्कापि वर्त्तते हरिणी त्र कृष्णाद्बिभ्यतीति स्वीयसूचकत्वदोषापलापार्थं क्कापि निन्हुताभूदिति वितर्कयन्त्यो दैवादायातं सौरभ्यमनुभूयाहो सत्यं सत्यमेतदेव तत्त्वमिति सहर्षं मुहुराहुः कान्ताया अङ्गसङ्गतस्तत्कुचकुंकुमेन रञ्जितायाः कुन्दपुष्पस्रजो गन्धः वाति आगच्छति अत्र कान्तयोर्गात्रद्वयस्य च कुचयोश्च कुंकुमस्य च कुन्दस्य च गन्धस्तासां नासाभ्यामेव निश्चीयते स्मेति भावः । कुलपतेर्गोपीकुलरमणस्येति कुलपत्नित्वानिष्ठां परित्यज्य सम्प्रत्येकयैव कयाचित्कान्तया रममाणस्य तस्यान्यायं पश्यतेति भावः ॥ ११ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्च नित्यं तत्सङ्गिनीं सुराङ्गिणीं नाम हरिणीं तत्रैवाकस्मादागतां दृष्ट्वा परमप्रेष्ठसख्य आहुः । अपीति । पूर्वस्मिन् वाक्ये श्लिष्टैः पदैः पिशुनयेच्च रहस्यवस्त्विति प्रेक्षावत्प्रमाणितन्यायमादाय प्रियनर्म्मसखीभिः सूचितेन निजप्राणसख्याः सौभाग्यातिशयेनात्मानं सिद्धार्थं मन्यमानाः सुरतान्तवर्णनभङ्ग्या किञ्चित्प्रकाश्योचुः । अपीति सम्भावनायाम् अत्राखण्डवाक्यस्य निखिलपदानामप्यनुमोदनव्यञ्जक एवार्थः प्रतिपाद्यते ततश्च सख्यमेवासां तान्मिथुनमनुलक्ष्यते तद्दर्शनोत्कण्ठातिशयेन भावोत्कर्षश्च तत्र वाक्यार्थोऽपीति यथा तदिदं सम्भावयामः अथवा प्रश्ने तदिदं पृच्छाम इत्यर्थः । किं तत् हे सखि ! अच्युतो वो युष्माकमुपगतः समीपं प्राप्तः ननु वनविहारिणस्तस्य वन्यानामस्माकं समीपप्राप्तौ किमाश्चर्य्यमिति तत्राहुः । प्रियया सहेति । ननु वनविहारिणः तत्खल्वाश्चर्यमेव किन्तु यत्र तस्य दर्शनं तत्र तस्याः सहयोगेन किमधिकं नाम सुखं तत्राहुः । तयैव सह गात्रैस्तादृशानन्दव्यञ्जनानुभावविचित्रैरङ्गैः वो युष्माकं भवत्या भवत्सम्बन्धिनीनाञ्च दृशां सुनिर्वृतिं केवलस्य तस्य दर्शनादपि तत्साहित्यदर्शनेन परमानन्दं तन्वन् विस्तारयन् तदिदञ्च नास्मासु गोपयितुमर्हसि वयं हि तदन्तरङ्गधर्मविदो नित्यसहचर्य्यः तद्गन्धवाहमात्रेणापि तदीयं सर्वं ज्ञातुं शक्नुम इत्याहुः । कान्तेति । प्रथमं तावत्तत्पतेस्तस्य तत्र च कान्तायास्तस्याः तत्र च तदङ्गसङ्गस्य तत्र तत्कुचसङ्गिकुंकुमस्य तत्र च तल्लिप्तकुन्दस्रजः स एव गन्धः स्फुटमत्रायाति स चाभ्यस्तत्वादस्माभिरुपलभ्यत इत्यर्थः एतेन तासां तथानुभवेन प्रागपि सम्प्रति चाग्रेऽपि स एव सख्यभावोऽखण्डित इति दर्शितं ततश्च रासावसर एव नवसङ्गम इति केचिदाहुस्तत्परास्तम् एवञ्च पूर्णाः पुलिन्द्य इति पूर्वानुरागप्रकरणेऽप्यखिलप्रागुक्ततत्तद्भावविजयिनीनित्यसखीनामेवोक्तिरिति ज्ञेयमासाञ्च पूर्वानुरागोऽपि तन्मिथुननिष्ठः सर्वविलक्षण इत्यलौकिकत्वमपि तत्रोरुगाय पदाब्जरागश्रीकुंकुमेनेति वाक्ये तादृशव्यवहारस्य स्वाधीनपतिकायां विरोधः तत्समानन्तु पुरुषायितसुरतविशेष उभयोरपि स्वभावविनिमयेनेति सर्वचतुरस्रम् एतेन रमाया दत्तक्षणामित्यपि व्याख्यातं समानयोगक्षेमत्वादिति ज्ञेयम् अथ द्रष्टृदृश्यप्रशंसया तदनुमोदनव्यञ्जकः पदानामर्थः ता एव प्रथमम् अपीति सकाकु सम्भावनागिरा तत्रोत्कण्ठां व्यानञ्जुः एणपत्नीत्युपचारात् ततश्च जात्यैव दृष्टिप्रशंसा तत्र पत्नीत्यनेन यज्ञसंयोग एव तादृशप्रयोगस्य पाणिनिस्मरणात्साङ्केतिकं यज्ञपत्नीत्वमिति द्रष्टृप्रशंसा उपगतः समीपमपि प्राप्त इति तद्भाग्यप्रशंसा तत्रापि प्रिययेति द्रष्टृदृश्ययोर्द्वयोरपि प्रशंसातिशयः तस्याः प्रेमविषयत्वञ्च गात्रैर्मिथः सङ्गमेनासाधारणतां प्राप्तैरिति पूर्ववदेव तन्वन् दृशां सुनिर्वृतिमित्योभिर्दृष्टैश्चेत्तदतिशयः अच्युत इति प्रियया विच्यवराहित्येन दृश्यप्रसंसा व इति यत्र भवतीदृशी तत्र भवत्सङ्गिनीनामपीदृशत्वं युक्तमिति द्रष्टृप्रशंसा अथ कान्तेति दृश्यायास्तस्याः तदङ्गसङ्गेतिलब्धदुर्लभस्य दृश्यस्य कान्तस्य कुचकुंकुमेति तत्संयोगलब्धभाग्यस्य दृश्यकुंकुमस्य तद्रञ्जिताया इति तत्सम्बन्धेन लब्धशोभातिशया या दृश्यायाः कुन्दस्रजः शुभ्रतया उदयशोभायोग्यायाः स्वरूपेण च तस्या एव कुन्द इति देवभोग्यगन्धवत्त्वेन तदनुभाविनां स्वेषां तासाञ्च नित्यपरिकरत्वस्य दिव्यगन्धतुलसीमधुमत्तैरिति वत्तथात्वं कुलपतेरिति दृश्यस्य कान्तस्य कुलशब्दः समूहवचनः ततश्च तस्याः कान्तायाः पतिरेव छत्रिन्यायेन गणलक्षणया तद्यूथगतानां सर्वासामस्माकं पतिरित्युपचरितस्येति तदेकसुखसुखित्वस्य इहेति लब्धतद्गन्धसौभाग्यस्य दृश्यस्य तत्स्थानस्य वातीति वनमप्यात्मसात्कृत्य सर्वतश्चलतीति गन्धविलासितस्य गन्ध इति तद्विशेषयोगात्तस्य च प्रशंसा वगतेति सुरतान्तोऽयं जीवातुरिव परमप्रेष्ठसहचरीणां परमास्वादनीय इत्युत्कण्ठातिशयेन वर्णित इति संक्षेपः ॥ ११ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे कृष्णमृगगृहिणीर्हरिणीर्दृष्ट्वा तासां कृष्णमृगगृहिणीत्वन मृग्यनेऽस्माभिरिति मृगः कृष्ण एव मृगः कृष्णमृगः आत्मनश्च तद्गृहिणीत्वेन समानशीलव्यसनेषु मैत्रीतिन्यायान्मैत्रीयोग्यतां संभाव्य हरिणीत्वेन च दुःखहरिणीत्वमवगत्य तन्नेत्रेषु च श्याममुग्धमोहनसुभगचपलतीक्ष्णत्वादीनि कृष्णासाधारणलक्षणान्यालक्ष्य तद्दर्शनातिशयेन तद्दृशोः कृष्णच्छविव्याप्तत्वं तत्रापि रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवतीति श्रुत्या कृष्णस्य सर्वरसात्मकत्वेऽपि यथाबहुगुणान्वितस्य रसायनस्य तत्तदनुपानयोगे एवतत्तद्गुणाविर्भावस्तथा सर्वरसायनस्य हरेः प्रियासङ्गम एव माधुर्य्यरसाविर्भाव इति मत्वा तद्दृशां रसनिमग्नतया प्रियया सह दर्शितं सम्भाव्य पप्रच्छुः । अपीति । अपीति सम्भावनायां प्रश्ने च वयं सम्भावयामः पृच्छामश्च तथा च नासम्भावितोऽस्मत्प्रश्नो नवा प्रश्नाभावेन कथनायोग्यत्वं हे एणपत्नि इत्यत्र संबोधने जातावेकवचनम् अग्रे वः दृशामिति बहुवचन-

श्रीरामनारायणकृतभावभावविभाविका ।

निर्देशात् एणः कृष्णमृगस्तस्य पत्नि कृष्णो मृग्यतेऽनेनेति कृष्णमृगस्तम्मृगयितुं बहुतरयागानुष्ठातुःपत्नीत्वेन बहुपुण्यनिचयाद्भस्तद्दर्शनलाभ इति तत्पुण्यतद्भाग्ययोः प्रसंसा 'पत्युर्नोयज्ञसंयोग' इति पाणिनिना यज्ञसंयोगे एव पत्नीशब्दव्युत्पादनात् पत्नीशब्देन माथुरपत्नीनां स्नेहश्चध्वानितस्तेन न केवलं यज्ञाद्यनुष्ठानफलं कृष्णदर्शनं किन्तु स्नेहातिशयस्य तदुक्तमभियुक्तैः—

गोपालाङ्गणकर्दमेषु विहरन्विप्राध्वरे लज्जसे ।
ब्रूषे गोवृषहुंकृतैः स्तुतिशतैर्मौनं विधत्से सताम् ॥
दास्यं गोकुलपुंश्चलीषु कुरुषे स्वाम्यं न दान्तात्मसु ।
ज्ञातं कृष्ण ! तवांघ्रि पङ्कजयुगं प्रेमैकलभ्यं मुहुरिति ॥

कृष्णपत्नीनामासामस्मत्कृष्णपत्नीत्वेन सापत्न्यं माभवत्विति पुनः संवोधनं सखि इति अच्युतः प्रियया सह इह वः उपगत एव नो ब्रूत सखित्वेन मा उपेक्षां कुरुत नोपगत इति ब्रूयुश्चेत्तत्र सम्भावनावीजं सूचयन्त्यस्तद्विशेषणमाहुः । गात्रैः आनन्दमात्रकरपादमुखोदरादिरिति स्मृत्या तस्य प्रियमेवः शिर मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मेति श्रुत्यानन्दात्मकैः वः दृशां सुनिर्वृतिं तन्वन्निति एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या तद्विना कस्याप्यानन्दासम्भवात् किंचोक्तश्रुत्या सर्वेषां तत एवानन्दलाभेऽपि दृशां सुनिर्वृतिमित्युक्त्या दृशां तत्स्वरूपविदामेव सुनिर्वृतिः परमानन्दाविर्भाव इति ध्वनिः ननु नो दृशां सुखलाभेन किमीर्ष्यया पृच्छथ नेत्याहुः । अच्युत इति । प्रच्युतसुखे एवान्यसुखदाने तदीयानन्दक्षयेनात्मसुखहानिबुद्ध्येर्ष्योद्गमः अच्युते तथा त्वाभावेन नेर्ष्यासम्भावनागन्धोऽपीति भावः । एवं सम्भाव्य पृच्छन्त्यःप्रिययेतिशब्देन प्रियानुसन्धानेनोद्धृतेनेव तयोरनुग्रहेणाविर्भूतातिविलक्षणसुरभिमाघ्रायाहुः यद्वैवं सम्भावनासूचनेऽपि गोपयन्तीं प्रत्याहुः कान्ताङ्गसङ्गेति । अहो कान्तायाः कान्तिमत्याः कस्य सुखस्यान्तः पर्य्यवसानं वा यस्यां तस्याम् अङ्गसङ्गेति प्रेम निर्भरालिङ्गने तस्याः कुचकुंकुमेन हृदयहृदानुरागरसपूरितकुचकाञ्चनकलशद्वयोच्छालिततयाङ्गरागत्वेनावभासमानेन रञ्जितायाः कुलपतेः गोपीनां नः कुलस्य समूहस्य पत्युः कुन्दस्रजो गन्ध इह वाति एवं बहुप्रश्नेऽप्युत्तरालाभे एता अपि वयमिव तदीयभ्रूधनुर्युगविस्फूर्जन वक्रापाङ्गेषुवृष्टिविभिन्नहृदयाश्चकितदृष्ट्यो वा कृष्णगृहिणीत्वसाम्याज्जातमात्सर्या वा हरिणी तेन सुखापहारिण्यो वा न वदन्तीति मत्वोपेक्ष्य ययुः ॥ ११ ॥

— ——

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं व्याकुलमानसा अकस्माद्धरणीं दृष्ट्वा तामेव पृच्छन्ति। अपीति । हे कृष्णसारपत्नि अत एव हे सखि तुल्यपातित्वेन भीरुत्वादिधर्मसाम्येन भवत्या अस्मत्सखित्वमतो वो युष्माकम् अपि किमुपगतो मिलित इहास्मिन्वने प्रियया सह गच्छन्सुन्दरैर्मुखवाग्घासादिभिः स्वगात्रैर्भवतीनां दृशां सुनिर्वृतिं परमसुखं तन्वन् विस्तारयन् यतोऽच्युतः परमात्मा तदुपगमो नेत्रादेः परमानन्दजनक एवेति भावः । ननु प्रियया साहित्यं कथमवगत-मित्याशङ्क्याहुः । कान्तेति । कान्ताया अङ्गेन कुंकुमरञ्जितायाः कुलपतेः गोपीसमुदायस्वामिनः स्रजो मालायाः गन्ध इह वाति आगच्छति तथानुभूतगन्धप्रत्यभिज्ञया प्रियासाहित्यं निश्चीयत इति भावः । अत्रैणपत्नीत्यनेन "पत्युर्नो यज्ञसंयोग" इति स्मरणात् एणानां जन्मान्तरे याज्ञिकत्वसूचनेन तत्पत्नीनां यज्ञपत्नीत्वं सूचितमिति द्रष्टृप्रशंसा उपगत इति तद्भाग्यप्रशंसा दृशामित्यादिना तन्नेत्रप्रशंसा अच्युत इति परमानन्दप्राप्तियोग्यता कान्तेत्यादि दृश्यप्रशंसा कुन्दस्य शुभ्रतया कुंकुमशोभायोग्यता इहेति स्थानस्यानन्दवैशिष्ट्यं वातीति तत्संसर्गवतः प्रशंसेति व्यङ्ग्यमाला अनभिज्ञापक्षे अहो पुराकृततपःप्रभावात्प्रियचरणसरोजैरनिशं प्राप्तसङ्गातिगर्ववती क्षितिरियं न वदति यद्वा प्रत्युत्तरं दातुमसमर्थाः जडा न प्रष्टव्याः किन्तु चेतनः कश्चित्प्रष्टव्य इति चिन्तयन्त्योऽकस्मात् काञ्चिद्धरिणीं दृष्ट्वाहुः हे सखि ! एणपत्नि ! अच्युतः किन्त्वयोपगतः संप्राप्तः तव दृष्टिगोचर एव संप्रति कचिद्वर्त्तते ननु त्वत्तो वियुक्त इति सूचयितुमच्युत इत्युक्तं तत्र हेतुमाहुः । प्रिययेति । ततः स्वभावादेवाग्रे प्रचलितां तामवलोक्याहो इयं दृष्ट इति किंब्रवीमि तं दर्शयाम्येव मत्पृष्ठत आगम्यतामिति सूचयन्त्यग्रतो गच्छति ग्रीवां परावृत्य मुहुरस्मान् पश्यति तत एषैवात्र निर्दये वृन्दावने दयावतीति तामनुगच्छन्त्यो दैवात्कापि गतां तामदृष्ट्वा परस्परं पृच्छन्ति स्माहो संप्रति हरिणी न दृश्यते क गतेति ततः काचिदब्रवीत् अत्रैव कृष्णो वर्तते सा तु तद्भयात्सूचकत्वदोषापलापार्थं काचित्तिरोहितेति श्रुत्वा तत्रैव स्थिताः दैवादागतसौरभ्यमाघ्रायाहो सत्यं सत्यं त्वदुक्तमेव तत्त्वमिति सहर्षं पुनराहुः । कान्तेति । गोपीकुलरमणस्य तस्य गोपीसमुदायं विहायैकयैव कयाचित्कान्तया रममाणस्याऽन्यायं पश्यतेति कुळपतिपदाशयः मानिनीपक्षे भगवान् राधया सहान्तर्हित इति पूर्वं स्पष्टमनुक्तमर्थं सपत्नीनां मुखेन मध्ये मध्ये व्यञ्जयति तस्याः सौभाग्यातिरेकं द्योतयितुं तत्र क्षितेरप्यलब्धोत्तराः अहो सर्वदास्मत्प्रार्थनापरायणस्याऽस्मान् विहायैकाकिनो गमनं कथं जातमिति विचारपराणां मध्ये काचिदब्रवीत् सत्यमेव कयाचिद्धूर्तया नीतः स्यादिति ततश्च सन्दिहाना एव पर्यटन्त्यः तादृशं गन्धमाघ्राय कयाचिन्नीत इत्यनुमीय दैवादागतां मृगीमवलोक्याऽहो इयं श्रोत्रनेत्रादिमतीति ज्ञास्यतीति मत्वा तां पृच्छन्ति । हे सखि ! एणापत्नि अच्युतो वो युष्माकं समीपं गतः किं ननु प्रत्यह गच्छति किमाश्चर्य्यमित्याशङ्क्याहुः । प्रियया यतो भवादृशामलौकिकानन्दं ददत् प्रतिदृश्यत इत्याहुः । गात्रैरिति । ननु प्रियया सहैव गत इति कथं ज्ञातमिति चेत्तत्राहुः । कान्तेति । सैव प्रिया न वयं तयैवाच्युतोऽस्मांस्तु विहाय गतः कुलपतेस्तस्य वैषम्यं नोचितमितीर्ष्या व्यज्यते यद्वा इहास्मिन् वने वो दृशां गात्रैः सुनिर्वृतिं तन्वान्प्रियया सह सङ्गतः किम्वर्तते नेति न वक्तव्यमित्याशयेनाहुः । कान्तेति । निवृत्तिपक्षे अथ मृगीस्थानीयां बुद्धिं पृच्छन्ति । अपीति । हे सखि ! बुद्धे वो दृशां वृत्तीनां गात्रैस्तत्र वृत्त्यवच्छिन्नचेतनरूपैर्गात्रैः सुनिर्वृतिं तन्वन् प्रियया ब्रह्मप्रतिपादिकया तत्त्वमस्यादिरूपया मुख्यया श्रुत्या स उपगतः सङ्गतः इहान्तःकरणे वर्तते किं यतः कान्तस्य परमात्मन अङ्गसङ्गाय प्रतिपाद्य प्रतिपादकसम्बन्धाय कुचयो

बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदान्धैः ।
अन्वीयमान इह वस्तरवः ! प्रणामं किम्वाभिनन्दति चरन् प्रणयावलोकैः ॥ १२ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

स्तत्स्थानीयोपासनीदकर्म्मणोः कुंकुमेन तज्जनितविविदिषया रञ्जितायाः कुलपतेः क्षेत्रस्वामिनश्चिदात्मनस्तत्सम्बन्धिन्याः कुन्दस्रजः तत्स्थानीयबुद्धिप्रत्ययमालायाः गन्ध इह वाति शान्त्यादिरूपसुगन्धयुक्ता प्राणचेष्टात्र दृश्यत इत्यर्थः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे सखि ! एणपत्नि ! वो युष्माकं दृशां सुनिर्वृतिं निरतिशयं सुखं गात्रैः सुन्दरतरैर्मुखादिभिरङ्गैर्वितन्वन् प्रियया सह अपि किमुपगतः समीपं गतः प्रियासाहित्यद्योतकमाहुः । कान्ताङ्गसङ्गतस्तत्कुचकुंकुमेन रञ्जितायाः कुलपतेः व्रजनाथस्य श्रीकृष्णस्य कुन्दस्रजः कुन्दपुष्पमालायाः गन्धः वाति आगच्छति ॥ ११ ॥

भाषा टीका।

हे सखि ! मृगिणी अपनी प्यारी को साथ ले अपने सुंदर अङ्गों की शोभाते तुमारे नेत्रों को आनंद देत अच्युत इहांते गयो होगो वा गोकुल नाथ की प्यारी के संयोग ते कुंकुम ते रंगी जो कुंद की माला ताको ए गंध चलो आवै है ताँतै गयो ही है ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

फलभारेणावनतांस्तरून् श्रीकृष्णं दृष्ट्वा प्रणतान् मत्वा प्रियया सह गतस्य गतिविलासं सम्भावयन्त्यः पृच्छन्ति। बाहुमिति । तुलसिकाया अलिकुलैः अतस्तदामोदमदान्धैः अन्वीयमानः अनुगम्यमान इह चरन्नित्यर्थः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

हरिणीनां विलोकनाभिनिवेशेन निजविरहार्तिदृष्ट्या तासामप्यार्तिभरोदयात् स्तब्धतां मत्वा ता विहाय फलपुष्पादिभारेण नतान् वृक्षान् वीक्ष्य विनयभरनम्रान् परमसाधून् मत्वा सर्वानेव तान् पृच्छन्ति । बाहुमिति । बाहुं प्रियांस उपधायेत्यादिकं पूर्वोक्तगन्धप्राप्त्या प्रियया सहागमनं सम्भाव्य तत्र च ललनास्कन्धसौरभ्यामिश्रितश्रीमद्बाहुसौरभ्यं तथा श्रीहस्तामोदाक्तपद्मगन्धं तथा भ्रमरगन्धसञ्चलितं तदङ्गतुलसीगन्धं च प्राप्योक्तं किम्वा भ्रमरादीनामीदृशी परिपाटी भवेदिति युक्त्या तथोक्तं तुलसिकया अलिकुलैरिति तस्या एव सर्वतो मधुमोदविशेषात् अत एव मदान्धैस्तैरन्वीयमान इत्यनेन बाहुमित्यादिना च रसविशेषप्रकटनं तथा तुलस्याः सौभाग्यं तत्सम्बन्धादलीनाञ्च सूचितम् अन्वीयमानत्वेनैव मदान्धानां तेषां महाध्वनिना निजनिन्हुतिलीलाभङ्गशङ्कया युष्मद्भिर्व्यवधानेन तान् परिहर्तुं किम्वा युष्मत्पुष्पेषु सञ्चारयितुम् इह चरन् विशेषतश्च प्रणतवत्सलत्वादत्रैव चरन् सन्निति भावः । प्रणयावलोकैः किमभिनन्दति अनुमोदते स्वीकरोति वेति तेषां सुदुर्लभत्वात् यद्वा स्थावरजाला तुलसीसाम्येन निजप्रयोजनापेक्षयापि समयविशेषेऽस्मिन् अपुष्पादिष्वपि तत्कृपासम्भाव्यते इत्यतः विशेषतः किम्वेति सकटाक्षप्रश्नः अतस्तत्कथयतेति शेषः अन्यत्तैर्व्यञ्जितम् अथवा तच्छ्रीमत्पदानि तत्र च वामे सम्मिलितश्रीपदानि वीक्ष्य दक्षिणे चाश्वासप्राप्त्या वाधिकनतान् वृक्षान् वीक्ष्य तेन श्रीदक्षिणहस्ते पद्मग्रहणं सम्भाव्य क्वचिच्च भयादिवाग्रतो द्रुतपतितान्यधिकमग्नान्याकुलानि च प्रियापदानि वीक्ष्य तेन च मदान्धभ्रमरानुगमनं सम्भाव्य किम्वा तत्तत्पदोपरि भ्रमरमुखनिर्गलितमधुकणान् सर्वतो वीक्ष्य तथा तथोक्तमिति ज्ञेयं यद्वा केवलमुन्मत्ततयैव तत्तदुक्तिः नच किञ्चिद्दर्शनविचारादिनेति इत्युन्मत्तवच इति वक्ष्यमाणत्वात् श्लेषेण मदान्धा एव तमनुसरन्तीति तथा तेषां सम्बन्धात् सोऽपि मदान्ध एवेति प्रणयरोषोक्तिः यद्वा मदान्धैरपि अतो गतमानाभिरस्माभिर्यदयमनुगम्यते तद्युक्तमेवेति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ तस्या भौनमयविलोकनाभिनिवेशेनाशङ्किताम्निजविरहार्तिदृष्ट्यार्त्तिभरोदयात् स्तब्धतां मत्वा तां विहाय फलपुष्पादिभरनम्रान् वृक्षान् वीक्ष्य विनयभरप्रणतान् मत्वा सर्वानेव तान् पृच्छन्ति । बाहुमिति । इहापि तत्तत्प्रशंसयानुमोदनं व्यज्यते तत्र वाक्यार्थेन यथा हे तरवो ! रामानुजो वो युष्माकं प्रणामं किम्वा प्रणयावलोकैरभिनन्दति इति स्वस्नेहस्य तत्कृपायाश्च योग्यास्पदतां सूचयित्वा तेषां द्रष्टॄणां गुणप्रशंसा कथं नाभिनन्देदित्याशङ्क्य तत्र तस्य तया सह मधुराविलासावेशं कारणमाहुः । तज्ज्ञाने च कारणं गन्धमात्रेण पूर्ववन्निजतदन्तरङ्गधर्मविज्ञतामाहुः । बाहुमित्यादिना । तत्रानाभिनन्दने सामान्यतः कारणं चरन्निति तत्तत्क्रीडास्थानगमनव्यग्र इत्यर्थः । ननु सदा सर्वत्र भ्रमति पश्यति चास्मान् अद्य वा को विशेषस्तत्राहुः। बाहुं प्रियांस उपधायेति । प्रियायाः स्वस्मिन् परमस्निग्धाया अंसे स्कन्धे उपधाय कोमलेयमिति यत्किञ्चिदाधायेति ननु तामेवास्मान् दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देत् इत्याशङ्क्याहुः । तुलसिकालिकुलैरन्वीयमानः सन् गृहीतपद्मः प्रियायास्तान्निवारयितुं दक्षिणेन भुजेन लीलापद्मधूननासक्त इत्यर्थः । तर्हि कथमभिनन्देदिति भावः । अत्र तु तुलसिकालिकुलैरिति तत्क्रीडावनतुलसीनां सर्वसुगन्धित उत्कर्षो द्योतितः तथा च वक्ष्यते "दिव्यगन्धतुलसीमधुमत्तै„रिति अत एव मदान्धैस्तद्रसपानमदनान्धैरपि तैरन्वीयमान इति प्रियासङ्घर्षेण

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

परिमलविशेषप्रकाशो दर्शितः इतीत्थमत्रापि पूर्ववत्तत्तत्प्रशंसा दर्शिता अथ च मालां बिभ्रद्वैजयन्तीमिति या वैजयन्ती प्रोक्ता मध्ये कच्चित्तुलसीत्यादौ त्वां बिभ्रदित्यनेन तत्प्राशस्त्यातिशय-प्रस्तुतत्वाद्या च तुलसीमाला सूचिता पुनश्च कुन्दस्रज इत्यनेन या कुन्दस्रक् च दर्शिता संप्रति तस्यास्तस्याः स्खलनहेतवो विहाराश्च व्यञ्जिताः तादित्थं वाक्यार्थेन तत्तत्प्रशंसयानुमोदन-मेव व्याञ्जितम् अथ पदानामर्थैरपि पूर्ववदनुसन्धेयं तदेवं वक्रीणां सख्यमेव लब्धं तस्या अमूनि नः क्षोभमित्यादौ विरोधमुखेन च तदेव हि निश्चेतव्यम्॥ १२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

प्रणामं फलभारनम्रत्वज्ञापकत्वमेव प्रणाम उच्यते॥ १२—१४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

फलभारेण नतांस्तरून् कृष्णदर्शनात्प्रणतान्मत्वा प्रियया सहितगतिविलासं सम्भावयन्त्यः पृच्छन्ति। बाहुमिति। हे तरवः! रामानुजो गृहीतं दक्षिणपाणिना धृतं पद्मं येन तथाभूतः प्रियायाः स्कन्धे बाहुं वामं भुजं निधाय तुलसिकाया अलिकुलैस्तदामोदमदान्धैरन्वीयमानोऽनुगम्यमान इह चरन् प्रणयसहितैरवलोकैर्वो युष्माकं प्रणाममभिनन्दति किमित्यर्थः॥ १२॥

श्रीमाद्विजयध्वजतीर्थकृतपदरत्नावली

विटवृत्तिमनुवर्तमानस्य पुंसो मालत्यादिपुष्पादानेच्छया तत्समीपजिगमिषासम्भवेन तत्प्रश्न उपयुज्यते अश्वत्थादिप्रश्नः कोपयुज्यते इत्यतः सम्भवं दर्शयितुमाहुः। बाहुमिति। हे तरवः! प्रणामप्रदक्षिणादिना प्रसन्नाः संसारात्तारयन्तीति तरवोऽश्वत्थादयः भगवच्चरणप्रियतुलसिकापुष्पमकरन्दलोलैरलिकुलैरन्वीयमानो रामानुज एकं बाहुं प्रियाया अंसे उपधायापरेण गृहीतपद्मः प्रणामं चरन् कुर्वन् प्रणयावलोकैः वः अभिनन्दति किंवेत्यन्वयः। प्रावण्यालङ्कारोक्तिः यद्वा इह चरन् रामानुजः प्रणयावलोकैः वः प्रणाममभिनन्दति किञ्चानेन स्थावराणां भक्त्युन्नतिः सूचितेति॥ १२॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

एवं हरिणपत्नीं पृष्ट्वा इयं भर्तृसमीपे वक्तुं न शक्तेति पूर्वं भगवत्स्तुतान् वृक्षान् पृच्छन्ति। बाहुमिति। प्रियाया अंसे बाहुमुपधाय द्वितीयेन हस्तेन गृहीतपद्मः रामानुजो निर्भयः तुलसिकायाः संबन्धिनो ये अलयः तेषां कुलैः कृत्वा अन्वीयमानः पश्चाद्भ्रम्यमानः हेतरवः! पूर्वं भगवता भक्तत्वेन स्तुताः अतो भवद्भिः कृतं प्रणाममिहैव किमभिनन्दति न वेति प्रश्नः प्रियांसे बाहुमुपधायेति समतया गमनेन लक्ष्यते उभयोः पदानां पङ्क्त्याकारेण गमनात् कदाचित्पदानां चाञ्चल्येन भ्रमरोपरुद्धगत्या तन्निराकरणार्थं यत्नो लक्ष्यते तरवश्चलाः नम्राः नमस्कारार्थमेव फलोपहारं कृत्वा भूमिसंबद्धशिरसो जाताः अतो ज्ञायते प्रणामः कृत इति अनुत्थानात् सन्देहः अभिनन्दति न वेति अनभिनन्दने हेतुः चरन्निति यो हि गच्छति सः अनवहितोऽपि भवति ननु निकट एव स गच्छति यद्यभिनन्दनं कृतं स्यात् तदैव श्रूयेत कथं सन्देह इति चेत्तत्राहुः। प्रणयावलोकैरिति प्रणयपूर्वकमवलोकैर्ननु वाचा अतो ये निकटस्थाः त एव जानन्ति नान्ये॥ १२॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तस्य तत्रैव वर्त्तमानत्वेऽन्यदपि लक्षणं मिथो ज्ञापयन्त्यस्तरून् फलपुष्पभारनम्रान् प्रणतान् मत्वा, सावितर्कमाहुः। बाहुमिति। हे तरवः! इह चरन् कृष्णः फलपुष्पादिकरप्रदायिनां वः प्रजारूपाणां प्रणामं किं प्रणयपूर्वकावलोकैरभिनन्दति नवा हन्त हन्त युष्मद्विधेषु सात्त्विकसाधुषु लोकेषु कुतस्तस्य प्रीत्यावलोकनावकाश इति सासूयमाहुः। रामानुजो मत्तः तत्रापि प्रियाया अंसे बाहुं वामभुजमुपधायेति सम्प्रयोगश्रमवशात् श्लथदुर्बलः प्रियास्कन्धार्पितं बाहुमेव कोमलमुपधानं कृत्वा तस्या मुखगन्धेनोत्पतिष्णूनां भ्रमराणां विद्रावणार्थमेव दक्षिणपाणिगृहीतनीलकमलः अतस्तत्रैवैकतानमानसस्य तस्य नान्यत्र दृष्टिपातसम्भवः इति भावः। तुलसिकानां कोमलतुलसिकाननस्य अलिकुलैः अन्वीयमानः तुलसिकाः परित्यज्य इह अत्रैव सः अन्विष्यत इत्यत स क्वचिदत्रैव निन्हुतो विहरतीति भावः। ननु तर्हि अलिकुलानामेवानुपदं गच्छामस्तत्राहुः। मदान्धैरिति। नहि मदान्धानामनुगतिर्भव्यजनैः कर्तुमुचितेति भावः १२॥

केन चित्कृता विशुद्धरसदीपिका।

अथ तस्या मौनमयावलोकनाभिनिवेशेनाशङ्किताभिजविरहार्त्तिदृष्ट्यार्तिभरोदयात् स्तब्धतां मत्वा तां विहाय फलपुष्पादिनम्रान् द्रुमान् वीक्ष्य विनयभरप्रणतान्मत्वा सर्वानेव तान् पृच्छन्ति। बाहुमिति। इदमपि परमप्रेष्ठसखीनां वाक्यं तरवोऽप्येते तद्युगलपालिता लालिताश्च किल विलक्षणशक्तिभाजोऽन्तश्चेतना अपि तत्कुञ्जकेतनावेशेनाङ्गीकृतवहिर्जडीभावा भावज्ञतया परिकरप्राया इति गम्यते वक्रीणामपि तत्सुखावेशविवशानां सुरतान्तवर्णनोद्दीपिततदनन्तरलीलासंस्काराणां वैशिष्ट्यमिहापि तत्तत्प्रशंसयानुमोदनं व्यङ्ग्यं तत्र वाक्यार्थेन यथा हे तरवो! रामानुजो वो युष्माकं प्रणामं किम्वा प्रणयावलोकैरभिनन्दति इति स्वस्नेहस्य तत्कृपायाश्च योग्यतां सूचयित्वा तेषां द्रष्टॄणां गुणप्रशंसा रामानुज इति साक्षात्तज्ज्येष्ठभ्रातुर्नामकथनान्निजस्य सख्यमेव सुव्यक्तं श्लेषेण धातोः प्रादुर्भावार्थतामवगत्य रामामनुपश्चाज्जायते प्रादुर्भवतीति सङ्केताभिधानात्तदनुगतत्वमपि व्यज्यते साङ्केतिकपदैश्चाश्लीलत्वं न दोषः ननु तदेकाश्रयाणां प्रणामं कथं नाभिनन्देदित्याशङ्क्य तत्र तस्य तया सह मधुरातिमधुरविलासावेशं कारणमाहुः। तज्ज्ञाने च कारणं गन्धमात्रेण पूर्ववन्निजस्य तदन्तरङ्गधर्मज्ञतैव तत्रानभिनन्दने सामान्यतः कारणं चरन्निति तत्तत्क्रीडास्थानगमनव्यग्र इत्यर्थः। ननु सदा सर्वत्र भ्रमति पश्यति चास्मान् अद्य वा को विशेषस्तत्राहुः। बाहुं प्रियांस उपधायेति प्रियायाः परमप्रेष्ठतमाया अंसे स्कन्धे सप्तमी सामीप्ये अतिसुकुमारिकेयं मम प्राणसञ्जीवनी वनीति ललितगत्यावेशेन स्खलदपि

केनचित्कृता विशुद्धरसदीपिका ।

कदाचिदिति तत्सम्भालनार्थमंससमीपे बाहुं ननु हस्तमात्रमित्यादरातिशयः उपधाय उपधानीकृत्येत्यर्थः । ततश्च पूर्वस्मिन् श्लोके सुरतान्तवर्णनश्रवणात्स्वतः सतां ह्रीः परतोऽतिगुर्व्वीतिन्यायेन सञ्जातापत्रपायाः प्राणप्रियायाः वनशोभावलोकनमिषेण ततो विहारस्थानादन्यत्र गमनमिति गम्यते प्राणनाथश्च तामनुसेवनपरः प्रयातीति सम्भाव्य तस्याः स्वाधीनपतिकात्वमनुमंहितं ननु तामेवास्मान् दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देदित्याशङ्क्याहुः तुळसिकालिकुलैरन्वीयमानः सन् गृहीतपद्मः निजस्य स्यामसुन्दरत्वेन वर्णमास्यादात्मीयैरेवोदित्वरैरभिलाषविशेषैरेवाळिभिः पद्मिनीगणशिरोमणिमञ्जरीनीराजितचरणां प्राणप्रियां परितो भ्रमद्भिस्तदात्वोचितसेवै पयिकळीळापद्मेन निवारितैरप्यन्वीयमानः लोलुपतयानुगम्यमानः निवारणे निमित्तश्चातिसुकुमारिकेयमेषां छाययापि ग्लानिमावहेदिति शङ्कैव एवञ्चाभिलाषैरपि तां स्प्रष्टुं न पारयतीति तत्सुखसुखित्वेन प्रीत्यातिशयः तस्याश्चातिसौकुमार्य्यं सूचितं यद्वा तुलसिकेति श्रीवृन्दादेव्या एव नामान्तरेणाभिधानं तस्या आलिकुलैः सहचरीगणैःअन्वीयमान इत्यर्थःस्वासाञ्च तद्विरहित्वाद्दैन्येन तदभिनन्दनम् एवञ्च लीलाकमलस्यापि हृदयाम्बुरुहत्वं व्यज्यते ततश्च प्राणप्रियायाः सुरतान्तां तां रूपमाधुरीं निपीय चक्षुष्मतेव हृदयाम्बुजेन निर्मञ्छनं यातीति गृहीतपद्मत्वेन सूच्यते ततश्चैतादृशस्तत्सेवाव्यग्रो युष्माकं प्रणामं कथमभिनन्देदिति प्रश्नाभिप्रायः । ततश्च तस्या अपि मदनमदालसाया ललितगतिः सूचिता यथालं० "स्थितिर्मदभरालसा न गरिमाणमालम्बते गतिः प्रकृतिमन्थरा त्वरत ईषदेव क्रमात । सलीलमवलोकितं नमति वङ्कते शङ्कते स्वभाव इव लक्षितःप्रियसमीपतो राधये"ति विलासालङ्कारोऽयं तदुक्तं तत्रैव—

> यानस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् ।
> विशेषोदयिता लोके विलास इति कीर्त्त्यते ॥

ततश्च तस्या अपि रसासक्तेः प्रागल्भ्यञ्च सूच्यते एतदुक्तं भवति स्वाधीनपतिकायामस्यां श्रीराधिकायां मुग्धामध्याप्रगल्भेति भेदादवस्थात्रयं यथावसरमुत्सवाय प्राणनाथस्य नित्यदा विराजते तदेव किन्ते कृतामित्यादिश्लोकत्रये क्रमेण निष्टङ्कितामिति अत्र तुळसिकालिकुलैरिति तत्क्रीडावनतुलसीनां सर्वत उत्कर्षो द्योतितः दिव्यगन्धतुलसीमधुमत्तैरितिवक्ष्यमाणात् अत एव मदान्धैरित्युक्तं स्थानास्थानपतनविचारविधुरैरित्यर्थः।तद्द्वारा निजस्यापि प्रेममत्ततानुभूतेति । अन्वीयमान इति । प्राणप्रियाङ्गसङ्घर्षेण परिमलविशेषोदयादात्मनोऽपि तद्वत्तानुभवेन तदनुगमनकर्म्मत्वाभिमानः सूचितः एवमत्रापि पूर्ववत्तत्प्रशंसा दर्शिता अथ च मालां बिभ्रद्वैजयन्तीमिति या वैजयन्ती पूर्वमुक्ता मध्ये कच्चित्तुलसीत्यादौ त्वां बिभ्रदित्यनेन तत्प्राशस्त्याशयस्य प्रस्तुतत्वाद्या तुलसीमाला सूचिता पुनश्च कुन्दस्रज इत्यनेन या कुन्दस्रकू च दर्शिता सम्प्रति तस्यास्तस्यास्खलनहेतवो विहाराः सूचिताः ततश्च मदनालसावस्थेयं तस्याः सौभाग्यातिनन्दनेन सहचरीगणस्थातिरहस्यतापि दर्शिता तदुक्तं भावामृते"जाळादथोद्दकूशफरीस्तदाळयो लावण्यवन्याः सम्चारयंस्तयोः क्रीणन्ति याः प्राणपरार्द्धकोटिभिस्तयोः प्रमोदोत्थसच्चीच्छटाकण„मिति तादित्थं वाक्यार्थेन तत्तत्प्रशंसया ऽनुमोदनमेव व्याञ्जितम् अथ पदानामर्थैरपि पूर्ववदनुसन्धेयं तदेवं वक्रीणां परमप्रेष्ठसखीत्वं लब्धं तच्च तस्या अमूनि नः क्षोभमित्यादिविरोधमुखेन निश्चेतव्यमित्यलमतिप्रपाञ्चितेन

> अन्तर्वाणिरभाणि श्रीशुकदेवो निगूहयित्वा याम् ।
> लीलान्ता मतिचपलप्रकटं कथयन्न जिह्रेमि ॥
> राधाकृष्ण सुखानामास्वादो जीवनं येषाम् ।
> तत्रार्च्चनैकप्राणा मत्प्राणाः साधवः शरणम् ॥ १२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे पुष्पफलभारेण नतांस्तरून् दृष्ट्वा एते सफलजन्मानः सफलत्वेऽपि नतत्वेन निरभिमानाः कृष्णदर्शने फलानि मूर्ध्न्याधाय प्रणततया कृष्णैकपरा बहुसुमनसः कृष्णेनाग्रजं प्रति शंसितत्वात् तत्प्रियाश्च परोपकारशीलतया वदिष्यन्तीति मत्वा पप्रच्छुः । बाहुमिति । स हरिः इह युष्माकं समीपे चरन् वः प्रणामं प्रणयावलोकैरभिनन्दति किम्वा नेति विकल्पार्थः तत्र तस्य स्वभावत एव प्रणतवत्सलत्वादभिनन्दनसम्भावना अस्मद्दुःखे स्वमानदोष एव निमित्तं सम्भवानाविशेषानिमित्तं सूचयन्ति रामानुज इति । यूयमपि तत्प्रियाः रामं स्वाग्रजं प्रति भवतां प्रशंसनात् स एव कथं स्नेहदृष्ट्या वो नाभिनन्देत् किञ्च गृहीतपद्मः तुळसिकालिकुलैरन्वीयमान इति पदाभ्यामपि पुष्पपत्रधारणोक्त्या द्रुमलतादिप्रियत्वं सूचितं बाहुं प्रियांस उपधायेत्युक्त्यापि स्वर्णयूथिकालताक्रान्ततमालवेषत्वात् भवदनुकारित्वेन भवत्प्रियत्वं विद्युत्द्युतिप्रियालंकृततुलसिपुष्पवन्यस्रग्धनुरनुरञ्जितमेघवर्णतनुत्वेन रसवृष्ट्या नित्यं भवत्पोषकःकथं न प्रणयावलोकरसवृष्ट्याभिनन्देत् तथा वन्यस्रग्वसन्तालिङ्गिततदालिकुलमधुकरीनिकरकरम्बिततनुपतिरतिपतिमिलनमङ्गलरतिमतिशतरतिमोहनवामतमालंकृतवामघूर्णकामवामस्वभावकामाभिरामाङ्कः कामेषुकुसुमपूरकर्तुपालितसञ्चिवानां वः प्रणामं कथं नाभिनन्देत् तथा गृहीतपद्म इत्यनेन स्वकर पद पद्माभ्यामालज्जितमपिपद्मं यदा संगृह्य स्वकराशिरश्छत्रकरेणनास्मन्मानदः कथं न भवतां सफलप्रणामं सफलं कुर्य्यात् असम्भावनायां तु बाहुं प्रियांस उपाधाय गृहीतपद्म इत्यनेन तामालिङ्ग्य करपद्ममालितितन्मुखपद्मत्वात् तदेकपरत्वेन सर्वज्ञत्वेऽपि यथा प्रियया संपरिष्वक्तो न वाह्यङ्किञ्चित् वेद नान्तरमिति श्रुति सिद्धमदान्धतया कथमभिनन्देत् तथा नित्यवारुणीमदोन्मत्तरामस्यानुजः कुलस्वभावप्रासोन्मादः तुलसिकायाः सर्वपुष्पमानोपमर्दिन्याः नः सपत्न्या अलिकुलैस्तत्रापि मदान्धैरन्वीयमान इत्यनेन प्रतिपक्षमदान्धसंगी च कथं वः प्रणाममभिनन्देदिति एवं वदन्त्योऽप्यसम्प्राप्तोत्तरत्वेन ताननभिनन्दितप्रणामतया वैकल्येन विचेतसो मत्वाग्रे ययुः ॥ १२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततो दैवात् क्वापि मतायां हरिण्यां फलभारेण नम्रांस्तत्रत्यांस्तरूनवलोक्य भ्रमन्तं दृष्ट्वा प्रणता इति मत्वा प्रियासहितस्य गतिविलासं सम्भावयन्त्यस्तान् पृच्छन्ति । बाहुमिति । प्रियायाः स्कन्धेबाहुमुपधाय द्वितीयहस्तेन गृहीतं पद्मं येन स रामानुजः अग्राह्यनामाऽस्मत्पतिः मदान्धैस्तुलसिकासम्बन्धिभ्रमरसमुदायैरन्वीयमानः अनुगम्यमानः अनेन प्रियासाहित्य-

पृच्छतेमा लताबाहूनप्याश्लिष्टा वनस्पतेः ।
नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मनुमीयते तुलसिकां विहाय तदङ्गलिप्तोत्कृष्टसौरभद्रव्यसुगन्धलोभादनुगच्छन्तीति तथेह वने चरन् हे तरवः ! प्रणामं च प्रणयावलोकैः प्रेमपूर्वकै रवलोकनैरभिनन्दति किं न वाभिनन्दतीति प्रश्नः यद्वा तथा चरन्नभिनन्दति आनन्दं प्राप्नोति वः प्रणामं चाभिनन्दत्यनुमोदति किम् अनभिज्ञापक्षे तादृशं गन्धमाघ्राय तत्रैवस्थास्तत्रत्यान् वृक्षान् पृच्छन्ति । हे तरवः ! किमर्थं प्रणामं कुरुत कृष्णप्रसादार्थमिति चेत्स किमिह चरन् वः प्रणाममभिनन्दति यद्यपि भवन्तः साधवः परोपकारशीला अनुकम्प्यास्तथापि भवदीयं प्रणामं नाभिनन्दतीति वयं जानीमः कुत इत्याशङ्कयाहुः । तस्यान्यत्रासक्तचित्तस्य कार्य्यान्तरव्यग्रत्वाश्चास्त्यवलोकनावकाश इति सासूयमाहुः । बाहुं वामभुजं प्रियास्कन्धे उपधाय तत्कोमलत्वमालोच्य किञ्चिदाधाय तन्मुखगन्धेनोत्पतिष्णूनां भ्रमराणां निवारणार्थमेव दक्षिणकरगृहीतलीलापद्मः तथाचादौ चरन् तद्गतिविलासव्यग्रः पुनश्च तत्सैवैकतानमानसश्चातो न तस्यान्यत्र दृष्टिप्रसारणावकाश इति भावः । एतेन ननु तामेवास्मान्दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देदित्याशङ्कापि निरस्ता तेन निवारिता एव एते भ्रमरा अनुगच्छन्तीत्याहुः । तुलसिकेति । ननु भ्रमरकुलानामेवानुपदं गच्छतेत्याशङ्कयाहुः । मदान्धैरिति । मदोन्मत्ताः मदान्धैरनुगम्यन्ते भव्यजनैस्तु मदान्धा नानुगन्तुमुचिता इति भावः । रामानुज इति कठोरतामभिव्यञ्जयन्ति अभिनन्दतीति वर्त्तमानापदेशाच्छाखानामनुत्थानाच्च क्वचिददर्शनयोग्यस्थाने स्थित इति सूचयन्ति । अभिनन्दाक्षेपाच्च किमर्थं नम्रीभूताः शाखा उत्थाय समाहिताः सन्तोऽस्मच्चित्तचौरे स्वाज्ञाकरं निश्शङ्कं सूचयन्त्विति व्यञ्जयन्ति निवृत्तिपक्षे वृक्षस्थानीयान् सङ्गातान् पृच्छन्ति । बाहुमिति । प्रियायाः मायाया अंसे बाहुं निधाय तामधिष्ठाय गृहीतं पद्मं जगदुपादानभूतं पुष्कररूपं येन सः यतो रामा माया अनुजा आधीना यस्य सः तुलसि प्रकाशशीलं कं सुखं यस्य तन्मकरन्दास्वादनपरैः परमहंसलक्षणालिकुलैः ब्रह्मानन्दलक्षणमदेनान्धैर्विषयदर्शनरहितैरनुगम्यमान इह सङ्गातेषु चरन् हे तरवः ! सङ्गाताः वः प्रणामं नमस्कारादिलक्षणकर्म किमभिनन्दति तथाचाभिनन्दनकर्त्तारमात्मानं भवन्तः किं जानन्तीत्यर्थः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे तरवः ! तुलसिकासंबन्धिभिर्भ्रमरसमूहैरन्वीयमानः इह वने प्रियया सह चरन् वो युष्माकं प्रणामं प्रणयसहितैरवलोकैः किमभिनन्दति ॥ १२ ॥

भाषा टीका ।

वृक्षों को देख कहवे लगीं कि अपनी प्यारी के कान्धे पै गलवांई दै दूसरे हाथ ते कमल को फिरावत (रामानुज) बलदाउजी को छोटो भैया तुलसी माला के सुगन्धते मतवारे अन्धे भौंरा जा के पीछे चलैं हैं सो ऐसो जाती वेर हे वृक्षो हो ! तुमारे प्रणाम को प्रेमभरी चितवनते ग्रहण करै है कि नहीं ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

काश्चिदाहुः हे सख्य इमा लताः कृष्णेन सङ्गता नूनमत इमाः पृच्छत ननु स्वपतिसंगतौ तत्सङ्गतिर्दुर्घटा न वनस्पतेः पत्युर्बाहूनाश्लिष्टा अपि अहो भाग्यं नूनं तन्नखैः स्पृष्टा यतः उत्पुलकानि बिभ्रति नहि स्वपतिसङ्गतावीदृक् पुलक सम्भव इति भावः ॥ १३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एते हि तद्भक्ताः तन्मतमनुसरन्तो नूनं न कथयेयुर्नाम तर्हि स्त्रीत्वेनात्मीया लता एवैताः पृच्छाम इत्यन्योऽन्यमाहुः पृच्छतेति । बाहूनाश्लिष्टा इत्यादिकं सर्वं निजभावानुसारेण ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

तदेतत्सर्वं कस्याः पदानि चैतानीति या वक्ष्यन्ति तासाम वधानास्पदमेव न बभूवेति लभ्यते संशयासम्भवात् काश्चित्तु किञ्चित्कृतावधाना अपि रागद्वेषाभावात्तदश्रुत्येव स्वाभीष्टमेव दर्शयन्ति मुनीन्द्रश्चात्र पूर्वाभ्यस्तासां वासनाभेददर्शनाथ तदुदासीनतां व्यञ्जयति । पृच्छतेमा लता इति । वनस्पतिरूपस्य पत्युर्बाहूनप्याश्लिष्टा इमा एव लताः पृच्छत नन्वेवं चेत्तर्हि कथमासां तत्सङ्गनिस्तर्क्यते तत्राहुः नूनं वितर्के तस्य श्रीकृष्णस्य करजैः स्पृष्टा इति ननु तदिदमपि कथं वितर्कितं तत्राहुः । उत् उच्चैः पुलकान्यंकुररूपाणि बिभ्रति बिभ्रत्य एवासते अहो इत्यपूर्वतायां नन्वेवं पुरेत्यर्थः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र काश्चित्काश्चिद्गोपीराहुः । पश्यतेति । हे सख्यः ! इमा लताः कृष्णेन नूनं सङ्गताः पश्यत पृच्छतेति पाठान्तरं तदा इमाः पृच्छतेत्यर्थः । ननु स्वपतिसङ्गतौ तत्सङ्गतिर्दुर्घटा तत्राहुः वनस्पतेः पत्युर्बाहून् स्कन्धानाश्लिष्टा अपि कर्तरि क्तः आश्लिष्येति पाठान्तरे आश्लिष्यापि नूनं तस्य कृष्णस्य करजैर्नखैः स्पृष्टाः कुतः यत उत्पुलकानि बिभ्रति नहि स्वपतिसङ्गतानामपीदृक् पुलकसम्भव इति भावः । उदञ्चितकोरकाणि पुलकत्वेन सम्भावयन्तीनामियमुक्तिः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नूनं निश्चयेन यास्तस्य कृष्णस्य करनखस्पर्शादुत्पुलकितानि पुष्पफललक्षणानि बिभ्रति ताः लताः वनस्पतेः बाहून् शाखा आश्लिष्टा अपि सम्भाव्याः पश्यत अहो उन्मुख्यो भवतेत्यन्वयः अयं रूपकालङ्कारः सुरतसुखस्मारकः ॥ १३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ते ज्ञानिनो वृक्षाः स्त्रीभिः सह सम्भाषणं न करिष्यन्तीति तत्तत्पत्न्य एव प्रष्टव्या इत्याहुः । पृच्छतेमा लता इति । वनस्पतेर्बाहूनाश्लिष्टा अप्येताः पृच्छत यद्यपि तासामप्यनवसरः ताश्च पुनर्भर्तृभुजालिङ्गिताः अपि भगवत्करजैरेव नखैः स्पृष्टाः सत्यः उत्पुलकानि बिभ्रति नहि रसान्तराविष्टानां रसान्तरार्थं स्पृहा भवति अत एव ज्ञायते सर्वोपमर्दी भगवत्सम्बन्धी रस इति एवं सर्वेषामेवावचने मूर्छिता इव जाता इति एतदन्ता प्रश्नकथा नवविधा एता गोप्यो निरूपिताः दशमी तु भगवता नीयते एवमन्वेषणेन रसस्थैर्यं निरूपितम् ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अन्यदपि लक्षणमन्या दर्शयन्त्य आहुः । पृच्छतेति । हे सख्यः ! इमा लता एव कृष्णसङ्गमलक्ष्मधारिणीः पृच्छत नच स्वपतिसङ्गतौ तत्सङ्गतिर्दुर्घटेति वाच्यं यतो वनस्पतेः पत्युर्बाहून् सम्यगाश्लिष्टा अपि अहो कामोद्रेकः नूनं तन्नखैः स्पृष्टा एव उत्पुलकानि बिभ्रति नहि स्वपतिसङ्गतावीदृक् पुलकः स्यात् अत एतल्लक्षणस्यास्मद्दृश्यमानत्वात् पूर्वपूर्वा इव न वयं तमद्राक्ष्मेति मिथ्या वक्तुं प्रभविष्यन्तीति भावः ॥ १३ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथान्योऽन्यं सुरतालसा रूपमाधुरीमनुभूय भूयोद्दीपितविहारयोः कुञ्जान्तरं प्रवेशं सम्भावयन्ति । तदुद्दीपितत्वं दर्शितं श्रीगोविन्दलीलामृते "स्फुरन्मकरकुण्डलं मधुरमन्दहासोदयं मदालसविलोचनं कमलसन्निलोलालकं मुखं स्वदशनक्षताञ्जनमलीमसौष्ठं हरेः समीक्ष्य कमलेक्षणा पुनरभूद्विलासोन्मुखी । परस्परालोकनजातलज्जानिवृत्तचञ्चद्दरकुञ्चिताक्षम् ईषत्स्मितं वीक्ष्य मुखं प्रियाया उद्दीप्ततृष्णः पुनरास कृष्ण" इति ततश्च चंक्रमणक्रमेण कुञ्जान्तरः प्रविष्टयोर्विहाररसाविष्टयोस्तत्तल्लीलानुकरणपरा द्रुमालिङ्गिता लता अवलोक्य सम्भाविततत्क्रीडाविशेषाः परस्परमाहुः । पृच्छतेति । प्रियनर्म्मसखीनामिदं वाक्यं हे सख्यः ! इमाः साक्षादनुभूयमानाः तल्लीलावलोकहर्षवैवश्येन तदनुकरणपराः लताः पृच्छत एता अस्माकं सजातीया अपि नितरान्तयोरानुकूल्यमनुशीलयन्त्योऽस्मासु साक्षाद्धकुमशक्ताश्चेष्टया सूचयन्तीति भावः । तामेव दर्शयन्ति । वनस्पतेः तरुणतमालस्य बाहूनिव विटपानित्यर्थः आश्लिष्टा आलिङ्गिताः ननु कुतो ज्ञातं तदनुकृतिपरा इति चेत्तत्राहुः । बिभ्रतीति । उत्पुलकानि उच्चैरोमाञ्चिता इति भावोद्रेकः तत्कुतः यतस्तत्करजस्पृष्टाः यद्वा अपि समुच्चये तयोरन्योऽन्यनेपथ्यरचनार्थे करजैर्नखैः स्पृष्टा अपीत्यर्थः । एवं चोभयोर्नखस्पर्शोत्पुलकितत्वेन तन्मिथुनमनुसख्यमेवासां सुव्यक्तम् अनुकरणञ्च भावोद्रेकादस्मात्तु तत्सूचनाय वेत्यविरुद्धं तदेवं पञ्चश्लोकीयं सख्यरसोत्कर्षदर्शिका व्याख्याता कारिका "क्षिते मृगीणां वृक्षाणां लतानां च सुखोदयः । द्वयोः सुखानुभूत्येति सख्यमेव दृढीकृतम् । किमन्यच्छ्रीमुनीन्द्रोऽपि सख्यं प्रकटयिष्यति । निजस्य रेम इत्यादिवाक्येन तत्क्रीडितं वदन् ॥ १३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे गच्छन्त्यो वनस्पतिभुजवलिता नृत्यन्तीरिव वायुवेगचलिता लता अंकुराद्युत्पुलकोत्कलिता विलोक्य पुरुषान् परुषानवधार्य ताः प्रष्टुं तत्सौभाग्यं प्रशंसन्त्यो मिथोऽभिमन्त्रयन्ति पृच्छतेमा इति । हे सख्य ! इमा लताः पृच्छत ननु क आसामुत्कर्षस्तत्राहुः । अहो इत्याश्चर्ये परमाद्भुतभाग्यमासां यतो वनस्पतेः पत्युर्बाहूनाश्लिष्टा अपि नूनं तस्य नन्दनन्दनस्य करजैः स्पृष्टाः ननु कथमेवमुत्प्रेक्षसे तत्राहुः । उत्पुलकानि हर्षेणोदितानि पुलकानि दृष्टरोमाणि अंकुररूपाणि उपलक्षणमेतत्सुमनोविकासमधुधारानन्दादीन् बिभ्रति यतोऽतः एवमवधारयामः नैवंविधो हर्षः पतिसङ्गमे सम्भवत्यनुभूतमेतदस्माभिः प्रतिरोमव्याप्त्योच्छलितो ऽयमानन्दः पूर्णानन्दस्य नन्दनन्दनस्यैव ततोऽतिचित्रमासां भाग्यमासां पतयोऽपि धन्याः स्वालिङ्गितानामपि तत्करस्पर्शामोदमामोदमवलोकयन्तोऽपि न वारयन्ति किन्तु स्वयमप्युत्पुलकानन्दाश्रुभी राजन्तेऽस्मदभाग्यान्नास्मद्बन्धवो ऽप्येतादृशा इति ॥ १३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो किमर्थं तरवः पृच्छ्यन्ते स्वस्त्रीसन्निधौ परस्त्रीभिः सह भाषणं न करिष्यन्त्यत इमा लताः प्रष्टव्या इति काश्चिदाहुः । पृच्छतेति । हे सख्य! इमा दृश्यमाना लताः पृच्छत ननु यथा स्वसन्निधौ अन्यपतिना अस्माभिः सह भाषणं दुर्घटं तथा स्वपतिसङ्गतानामासां हृदि मनसां गतिर्दुर्घटेत्याशङ्क्याहुः । बाहूनिति । यद्यपि वनस्पतेः शाखालक्षणान्भुजानाश्लिष्टास्तथापि नूनं निश्चयेन तस्य श्रीकृष्णस्य करजैर्नखैः स्पृष्टाः यतः पुलकानि बिभ्रति अहो सर्वरसोपमर्दी अस्मात्प्रेष्ठरसः स्वपतिरसाविष्टानामपि तत्स्पृहादर्शनात् नहि स्वपतिसङ्गतावीदृक्पुलकोद्गमः सम्भवतीति भावः । सममेतदितरपक्षयोरपि निवृत्तिपक्षे हे सख्यः ! वनस्पतेः सङ्घातलक्षणस्य वृक्षस्य विषयचपळान्बाहुनप्याश्लिष्टा इमा लतास्तत्स्थानीया रागद्वेषादयः इन्द्रियस्येन्द्रियार्थे रागद्वेषौ व्यवस्थितावित्युक्तत्वात् नूनं तस्य चिदात्मनः कराः प्रत्ययास्तत्र जातेन प्रादुर्भूतेन चेतनेन स्पृष्टा अहो उत्पुलकानि बिभ्रति स चेतनतयावभासन्त इत्यर्थः ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चिदाहुः इमाः वनस्पतेः स्वभर्तुर्बाहून् आश्लिष्टा अपि अहो अत्याश्चर्यमिदं भर्तृसमीपेऽपि तत्तेन श्रीकृष्णेन नूनं करजैर्नखैः स्पृष्टाः उत्पुलकानि बिभ्रति आनन्दातिशयेन रोमाञ्चिता भवन्ति अतः इमाः लताः हे सख्यः ! पृच्छत ॥ १३ ॥

[1]इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ।
लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १४ ॥

भाषा टीका

आपस मे गोपी कहैं हैं एरी सखि ! इन लतान तें पूछो जिन ने अपने पति की भुजा की नाईं पेड की शाखा पकर रखी हैं इन के फूलों के रोमटा से हो रहे हैं तातें हम जाने हैं कि सांचे ही प्यारेने नखोंते इन को स्पर्श कियो है ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उन्मत्तवत्प्रजल्पुरित्येतत्प्रपञ्चितमिदानीं रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयति । इतीति । उन्मत्तवचो गोप्यः उन्मत्तवचसश्च ता गोप्यश्च ताः कृष्णान्वेषणेन कातरा अतिविह्वलाः अनुचक्रुरनुकृतवत्यः ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

इति उक्तप्रकारेण यद्वा इति ईदृशमुन्मत्तानां वच इव वचो यासां गोपीनां ताः उन्मत्तवच इत्युक्तानुवादः तत्तद्वाक्यानि केवलमुन्मत्ततयैवेति पूर्वोक्तमुन्मत्तकवादित्वस्य दार्ढ्यार्थं तत्र चोन्मत्तवचस्त्वमयोग्येष्वपि प्रश्नात् तत्रापि तथा तथा तत्तत्प्रश्नादिति अनुचक्रुरित्यत्र हेतुः कृष्णस्य परमाकर्षकस्य अन्वेषणाय कातरा इति अतः कान्त्यैणैव तत्तदनुकरणं नच स्वाच्छन्द्येनेत्यर्थः । तत्रैव हेतुः तदात्मिकाः तेन हृतचित्ताः यद्वा तच्छन्देन लीलाः परामृश्यन्ते ततश्चानुकरणे अभिनिवेशेन तत्सस्यकत्वमभिप्रेतं यद्वा ननु तत्तल्लीलास्मरणेनापि विरहार्तानां प्रेम्णा दुर्धराः अनुकरणघृतेन च विवृद्धविरहवह्निज्वालानां तासां हृदि कथमात्मा अतिष्ठदित्याशङ्क्याह । तस्मिन्नेवात्मा यासां ताः अतः सुशीतलामृतार्णवसम्बन्धेन निःसृतः अन्यथा स्वस्थानस्थः सन् दग्धोऽभविष्यदेवेत्यर्थः । यद्वा श्रीकृष्णाविष्टचित्ता इति तत्तदनुकरणं तद्रूपतयैव नत्वात्मबुद्ध्येत्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इति पूर्वोक्तप्रकारकमुन्मत्तस्य वच इव वचो यासां तादृश्यो गोप्यः कृष्णान्वेषणे कातरा विरहदुःखेन तदपि कर्तुमसमर्था इत्यर्थः । तथा सत्यो गायन्त्य उच्चैरित्याद्यनुसारेण गानानुवृत्तिप्राप्ता या याः पूतनावधादिलीलास्तास्ता अपि मध्ये मध्येऽनुचक्रुरित्यर्थः । तत्र हेतुः तदात्मिकाः तस्मिन् श्रीकृष्णे आत्मा चित्तं यासां ता गाढं तदासक्ता इत्यर्थः । तत्र कृष्णानुकरणं स्फुटमेव तादात्म्यकतया तत्र च स्वभावपरित्यागेन नातितत्वभेदस्फूर्तिः यतस्त्युक्तिदधेऽस्मदाविस्तत्र तत्तत्कथनात् कृष्णोऽहं पश्यत गतिमिति सस्मितं कृष्णत्वसाधनार्थं तच्छब्दप्रयोगाच्च पूतनाद्यनुकरणं च कृष्णविषयकतद्धेतुकभयेनेति तदात्मकतयैव यथा स्वविषयकभयेनोन्मत्तस्य व्याघ्राद्यनुकरणम् अतो न तदीयप्रेमविरुद्धभावयोगः कस्याश्चिच्छ्रीयशोदानुकरणं च न स्वेन रत्याख्येन भावेन तस्य वाल्यभावनया वृतत्वात् किन्तु प्रीतिसामान्यातिशयाल्लब्धकृष्णभावत्वेन ततो भयादेव ततस्तस्याभावेन न मातृभावस्पर्शः किन्तु कृष्णभावेनैवेति न मिथः स्पर्शानुचितयोर्भावयोर्युतिः सर्वमेतत्तासु तदानीमुन्मादस्यानुगतत्वात्सहसैव समपद्यत नान्यदेवेति च ज्ञेयम् ॥ १४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

उन्मत्तकवत्प्रजल्पुरित्येतत् प्रपञ्चितम् अथ रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयति । इतीति । इत्युन्मत्तस्येव वचांसि यासां ताः गोप्यः कृष्णान्वेषणेनातिकातरा अतिविह्वलास्तदात्मिकाश्च भगवतस्तास्ता लीला अनुचक्रुरनुकृतवत्यः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति पूर्वोक्तप्रकारेण उन्मत्तस्य वच इव वचो यासां तादृश्यः गोप्यः कृष्णान्वेषणेन कातरा भीता इव भीताः विरहदुःखेन तदपि कर्तुमसमर्था इत्यर्थः । तथा सत्यो गायन्त्य उच्चैरित्याद्यनुसारेण गानानुवृत्त्या या याः प्राप्ताः पूतनावधादिलीलास्तास्ता अपि मध्ये मध्येऽनुचक्रुरित्यर्थः ॥ १४—२३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

इति प्रत्येकं पृष्ट्वा कस्यापि प्रत्युत्तरमनासाद्य चोन्मादे जाते सति कृष्णो नान्यत्र गतवानस्मास्वेव प्रविष्टस्तदहमेव कृष्ण इति प्रत्येकं तादात्म्यमभूदिति दर्शयति । इत्युन्मत्तवच इत्यादि । इत्येवं प्रकारेण उन्मत्तं वचो यथा भवति तथा कृष्णान्वेषणकातराः सत्यस्तास्ता भगवतः कृष्णस्य लीला अनुचक्रुः तास्ता इति पूर्वपूर्वानुभूताः अनुकरणे हेतुः तदात्मिकाः तादात्म्यं गताः ॥ १४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं तिरोधानेन जाततापनिवारणार्थं यत्नो निरूपितः प्रतनुपमर्दिका भगवल्लीला प्रादुर्भूता तस्याः विलासं वक्तुं पूर्वोपसंहारपूर्वकमुपक्रमते । इतीति । इतिशब्दः प्रकारवाची एवंप्रकारेण प्रश्नायोग्येऽपि प्रश्नकरणादुन्मत्तवाचो गोप्यो जाताः कृष्णस्यान्वेषणे कातरा अपि दीना अपि जाताः तनुर्बाह्यत्व प्रश्नता मनसि तु प्रयो

१ इतश्चयोविंशपर्यन्तं दश श्लोका श्री विजयध्वज मते नैव सन्ति ।

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

वर्त्तन्त इति प्रथमस्यापगमे द्वितीय आविर्भूत इत्याह । लीला इति । भगवतस्तास्ताः पूर्वमुक्ताः कृताश्च तदात्मिकाः सत्यः अनुचक्रुः उन्मत्तवच इति छान्दसो ह्रस्वः अथवा इति पूर्वोक्तमुन्मत्तवचः एतावदिति ततो गोप्यः कृष्णान्वेषणार्थे कातरा जाता इति भगवतो लीलाः षड्विधाः स्वाभाविक्यः तासामपि भेदास्तास्ताः युक्तश्चायमर्थः भगवति हृदि समाविष्टे लीलाभिः सहिते यदा यदा भगवानवतरति तदा तदा पूतनासु पयःपानादिकं करोति तथैव सम्वत्सरलीलायां पुरुषोत्तमादिषु प्रसिद्धिः एतासामपि मनसि आविर्भूतेन कर्त्तव्यं तत्साक्षात्कर्तुमशक्यमिति भावनयैवाविर्भूत इति अनुकरणमात्र कृतवत्यः—

भक्त्यातिमत्तास्तद्भावमीषन्मत्तास्तु रोषतः ।
द्वेषभावं समाश्रित्य क्रीडन्त्यो ऽजातमत्सराः ॥
सत्वादिगुणभावेन नवलीलाः प्रपेदिरे ।
अतो न न्यूनभावोऽत्र ह्याविष्टाः शकटादिभिः ।
सर्वत्र हरिबुद्ध्या वा पादस्पर्शेच्छया पुनः ।
उलूखलादिभावोऽपि तत्सम्बन्धप्रसिद्धये ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इमा आनन्दजाड्यात्र किमपि ब्रुवते इत्येवमचेतनेष्वपि प्रश्नकामादिदर्शनाख्यामुन्मत्तानां वचांसीव वचांसि यासां ताः तश्च तस्यान्वेषणेऽपि कातरास्तन्मध्ये काश्चिदेव प्रत्येकं परामृश्युः सम्प्रत्यहमेव स्वरूपचेष्टाद्यनुकरणेनात्मानं कृष्णाकारं दर्शयित्वा अतिकातरताममीषां स्वस्याश्च मौहूर्तिकीमपि निर्वृतिं निष्पादयामीति मानसि कृत्वा तस्य सर्वा एव लीलाः क्रमेण स्मृत्यारूढीकृत्य पूतनावधलीलामनुचक्रुः तस्मिन्नेवात्मा मनो यासां ताः तत्र च प्रतिकूलानामनुकरणं योगमायैव तन्मध्य एव गोपीस्वरूपा भूत्वा तत्तल्लीलासिद्ध्यर्थं चकार अनुकूलानुकरणं तु गोप्यश्चक्रुरिति ज्ञेयं "नो नः कथा वद सदः स्विति ताश्चित्तेऽप्यानन्दनिघ्न इह ता प्रदवोचमेवनामानि तु प्रथयितास्मि तदत्र तासामित्थं मुनिर्मनसि सम्प्रति निश्चिकाय ॥ १४ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तदेवं रासपञ्चाध्याय्याः प्राणैरिव पञ्चभिः श्लोकैस्तयोरतिरहस्यां रतिलीलां सहचरीणां च तद्युगलमन्वनर्गलां प्रेमपरिपाटीं च दर्शयित्वा यथोचितमन्यासामप्युन्मादचेष्टितानि संगृह्णाति । इतीति । अहो विपक्षतटस्थादिसमुदाये तत्प्राणसख्यस्तयो रतिगोपितां क्रीडां कथं प्रकाशयामासुरित्यत आह । उन्मत्तवच इति । उन्मदस्यान्यानुसन्धानस्वभावात् यद्वा वचांस्येव तासामुन्मत्तानि स्वयं कथयामासुर्नतु ता इत्यर्थः । तथापि तत्सुखसुखितानामनुचितमेव हितरहस्यप्रकाशनमिति चेत्तत्राह । गोप्य इति । वैदग्ध्येन गोपयितुं न शक्ता इत्यर्थः । अत एव श्लिष्टपदोपादानमिति ननु ताभिः किंचिदनुभूतं न वेत्यत आह । कृष्णान्वेषणकातराः तदेकव्यग्रा नानुसन्दध्युरिति भावः । तर्हि कि-

मनुतस्थुरिति तत्राह । लीला इति । पृच्छतेत्यादि श्लोकस्य यत्किञ्चिदनुसन्धानेन तदावेशविवशास्तल्लीलामेवानुचक्रुः तास्ताः प्रागनुभूता इत्यर्थः । ननु प्रेम्ण उभयानुगतत्वात्सोऽपि कथं नानुचकारेत्याशङ्क्य भगवत इत्युक्तं स तु भगेन निजानन्दमूर्त्यां प्राणेश्वर्य्यां नित्ययुक्त इत्यर्थः । यद्यपि निजानिजभावावेशेन सर्वमिदं प्रागुक्तं कस्याः पदानीत्यादि वक्रीणां नानुसन्धानगोचरः शंसयाभावात् तथापि काश्चित्किञ्चित्कृतावधानाः कान्तभावावेशेन लीलामात्रमनुचक्रुरिति ज्ञेयम् ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं विमृश्यापि प्रेमोन्मादाविह्वलतया ताः पृष्टमपि विस्मितमतयो यदाचेरुस्तदाह । इत्युन्मत्तेति । इति पूर्वोक्तप्रकारेणोन्मत्तानामिव वृक्षलतादिप्रश्नरूपाणि वचांसि यासां ता उन्मत्तवचसः यद्वा उत्कृष्टः सर्वज्ञस्यापि स्वैश्वर्यादिविस्मारको मदः प्रेमसुधासवस्तद्युक्तानि वचांसि यासां ता यद्वा उत्कृष्टानामपि ब्रह्मादीनां ब्रह्मविदां मत्तता येभ्यस्तादृशानि वचांसि यासां ता गाः वाचः कृष्णगुणगानेन सर्वदोषेभ्यः पान्तीति गोप्यः—

मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ।
यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य ॥
लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ।

इत्यादिभिस्तद्गुणगानहीनवचसां हेयत्वनष्टप्रायत्वश्रवणात् प्रेमवैक्लव्येन कृष्णान्वेषणेऽपि कातराः यद्वा बहुधा बहिरन्विष्यालब्धतत्समागमा बहिः कृष्णान्वेषणेऽपि कातराः अन्तर्भवेऽनन्त भवन्तमेव ह्यन्तरयजन्तो मृगयन्ति सन्त इत्यादिभिरन्तरन्वेष्यतामवगत्यान्तर्दृष्टयस्तदात्मकाः सत्यस्तद्गात्मकतयैव भगवतस्तास्ताः लीला अनुचक्रुः यद्वा लीलाहीने केवलं तदन्वेषणे सर्वथा विरहानुसधानदुःखेन कातरास्तदात्मिकास्तदालिङ्गितमतयः प्रेममार्गाचार्य्यभूता गोप्यो नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृता इत्यादौ स्मृतानुशीलनाव्यवहितपरप्राप्तिमाकलय्य इह भगवति यानि कर्माणि तानि कुर्वन्ननुकुर्वन्नेव शतं समा यावदायुर्जिजीविषेदित्यर्थक "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा" इत्यादिश्रुतिसिद्धलीलानुकारं स्वाचरितेनैवोपदिशन्त्यस्ता गुणगान स्मारितास्तास्तत्पदलक्ष्यस्वरूपात्मिका भगवतो लीला ह्यनुचक्रुः ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

उन्मत्तकवत्पप्रच्छुरित्येतत्प्रपञ्चितं तदुपसंहरन् रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयितुमुपक्रमते । इतीति । इत्येवं प्रकारेणोन्मत्तवचो गोप्यः ह्रस्वः छान्दसः यद्वा उन्मत्तस्य वच इव वचो यासां ताश्च ता गोप्यश्च यद्वा उन्मत्तवच एतावत्ततो गोप्यः कृष्णान्वेषणार्थे कातरा अति विह्वला भगवतस्तास्ता लीला अनुचक्रुः अनुकृतवत्यः यतस्तदात्मिकाः तत्स्फूर्त्या कृष्णानुकरणं तदासक्तिप्रकृत्या वा पूतनाद्यनुकरणन्तु कृष्णविषयिकतद्धेतुकभयादिजनितपूतनाद्यात्मकत्वस्फूर्त्या व्याघ्रादिमनोन्मत्तस्य व्याघ्राद्यनुकरणवत् अतो न प्रेमविरुद्धभावसङ्करः यद्वा प्रतिकूलानामनुकरणं योगमायैव तन्मध्ये

कस्याश्चित्पूतनायन्त्याः कृष्णायन्त्यपिबत्स्तनम् ।
तोकायित्वा रुदन्त्यन्या पदाहन् शकटायतीम् ॥ १५ ॥
दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ॥
रिङ्गयामास काप्यंघ्री कर्षन्ती घोषनिःस्वनैः ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

गोपीस्वरूपा भूत्वा तत्र लीलासिद्ध्यर्थं चकार यद्वा तत्तल्लीलाविशिष्टे भगवति अन्तराविर्भूते बहिस्तल्लीलादर्शनस्य साक्षादसम्भवात् तथानुकरणं कृतवत्यः तत्रोत्कृष्टाः कृष्णरूपं मध्यमाः बलरामादिरूपं निकृष्टाः पूतनादिरूपं नासक्तवचस्त्वात् कृष्णस्य सदानन्दरूपस्य परमात्मनोऽन्वेषणे कातराः व्यग्राः कातर्य्यं प्राप्ता इति वा ततः षड्गुणैश्वर्यसम्पन्नस्य परमात्मनः सम्बन्धिन्यस्तास्ता लीला हि प्रसिद्धौ अनुचक्रुः भगवत्कृततत्तल्लीलानुकरणं वर्णयामासुः वाच्यवाचकयोरभेदादनुचक्रुरित्युक्तमिति सूचयितुमाह । तदात्मिकाः द्वावेव ब्रह्मणो रूपे परं चापरं चेत्यादिश्रुतेः ॥ १४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयति । इतीति दशभिः । तत्रैकेनोपक्रम्यानुकरणं चतुर्भिस्तन्मयत्वं चतुर्भिः पुनरेकेनानुकरणं च प्रपञ्चयति । इत्येवमुन्मत्तस्येव वचांसि यासां ताः उन्मत्तवचसः ताश्च ताः गोप्यश्च तथाभूताः कृष्णान्वेषणेन कातरा अतिव्याकुलाः तास्ताः प्राक् प्रदर्शिताः भगवतो लीलाः अनुचक्रुः अनुकृतवत्यः ॥ १४ ॥

———

भाषा टीका ।

या प्रकार ते पागळ की नांई वचन कह बे वारी गोपी श्रीकृष्ण चन्द्र के ढूंढवे में हैरान हो गई तव श्रीभगवान् मे मनलगजानेते भगवान् की ही वा वा लीला को करत भई ॥ १४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

कस्याश्चिदित्यादिभिश्चतुर्भिरनुकरणं प्रपञ्च्यते ततश्चतुर्भिस्तन्मयत्वं पुनरेकेनानुकरणमिति विवेकः पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती स्तनमपिबत् तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥

दैत्यायित्वा दैत्यवत्तृणावर्तवदात्मानं कृत्वा एका कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयति या तामन्यां जहार ॥ १६—१७ ॥

———

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

अनुकरणमेव प्रपञ्चयति । कस्याश्चिदिति नवभिः । तच्चिवेकस्तैर्व्यञ्जित एव तत्र चानुचक्रुरित्युक्ते स्वनुकरणस्यैव प्रपञ्चने कार्य्येऽपि तन्मयत्वस्य प्रपञ्चनमनुकरणस्यैव सम्यक्त्वबोधनार्थमिति अथवा केवलमनुकरणस्यैव प्रपञ्चो ज्ञेयः तत्र चादौ प्रायो देहचेष्टयैवानुकरणं दैहिकचेष्टायाः वाक्चेष्टासम्वलितायाः प्रायस्तथैव मानसचेष्टासम्वलितायाश्च तथैवेत्येवं त्रिधानुकरणं तत्र यद्यपि प्रायो भावनयैव सर्वत्रानुकरणं तथापि तत्र तत्र तत्तत्प्राधान्यापेक्षया त्रैविध्यं तत्रादौ देहचेष्टाप्राधान्यानुकरणमाह त्रिभिः । पूतनायन्त्याः पूतनायमानायाः पूतनाद्यनुकरणं केवलं भावनयैव किञ्चित्तत्तन्मुद्राद्याचरणेन नतु वेषादिना सर्वथा तदसम्भवात् अत एव वक्ष्यते कृष्णार्भभावनामिति तदपि विरहवैवश्येन यद्यपि न सुसिध्येत् तथापि विरहार्त्तिभरस्वभावेन तत्तल्लीलाभिनिवेशात्स्वयमेव सम्पद्येतेति पूर्वमध्यायारम्भे उक्तमेव तत्र यद्यपि कृष्णप्रियाणां तासां दैत्यानुकरणं न युज्यते तथापि केनापि सुदुरूहेण भाववैचित्रीविशेषेण विष्टास्ताः कृष्णस्यैव लीला अनुचक्रुः तासां प्रियसख्यस्तु तत्तद्भावाविष्टास्ता वितर्क्य तत्रैव तच्चितासञ्जनेन महादुःखापनोदनार्थं बुद्धिपूर्वकमेव पूतनाद्यनुकारं कृतवत्य इति अथवा इति एवन्ताः कृष्णान्वेषणकातरा बभूवुः अनु अनन्तरं तासां प्राणरक्षार्थं तास्ता लीलाः कर्त्र्यः विह्वलाः सर्वा एव व्रजसुन्दरीस्तदात्मिकाः लीलामयीश्चक्रुः अतस्तत्तल्लीलापरिकरत्वाद्दैत्याद्यनुकरणं नायुक्तमिति सर्वमनवद्यं स्तनमपिबदिति चानुकरणमात्रं नतु तत्त्वतः अनुकरणस्यैवापेक्ष्यत्वात् एवमग्रेऽदन्यप्यूह्यं शकटायतीं शकटायमानाम् एवमग्रेऽपि शकटानुकरणं तोकायमानाया उपरि शकटवत् कथञ्चिदवस्थानं ज्ञेयम् ॥ १५ ॥

घोषाः किङ्किण्यस्तेषां निःस्वनैः कृत्वा सहिता इति वा तत्र साक्षादेव तासामपि पादेषु नूपुरसद्भावात् एतच्च घोषप्रघोषरुचिरमित्याद्युक्तरिङ्गणलीलानुकरणम् ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदात्मकत्वानानुकरणस्य प्रपञ्चमाह नवभिः । पूतनायन्त्या इति । तथापि स्वभावस्थितत्वेन पूतनावदाचरन्त्या एव नतु तद्वद्रूढभावाया इत्यर्थः । कृष्णायन्तीत्यत्र तु कृष्णार्भभावनामिति वक्ष्यमाणानुसारेण भावतोऽपि तदाचरन्तीति लभ्यते एवमुत्तरत्रापि स्तनमपिबदिति चानुकरणमात्रं तन्मात्रस्यापेक्षितत्वात् शकटायतीं शकटायमानां तादृशत्वञ्च हस्तपादाभ्यां भुवमवष्टभ्याधोमुखतयैवोच्चैरवस्थानम् ॥ १५ ॥

कृष्णस्य आर्भभावना बाल्यवासना सैव सा यस्यास्तां जहार तद्भयावेशेन तद्धरणमनुकृत्य दर्शितवतीत्यर्थः । घोषाः किङ्किण्यस्तेषां निस्वनैः कृत्वा सहिता सेविता वा तत्र साक्षादेव तासामपि पादेषु नूपुरसद्भावात् एतच्च घोषप्रघोषरुचिरमित्याद्युक्तरिङ्गणलीलानुकरणम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

पूतनायन्त्याः पूतनायमानायाः ॥ १५ ॥

कृष्णाभिभावनाम् अर्भकावस्थकृष्णानुकारिणी रिङ्गयामास चंक्रमणमकरोत् ॥ १६—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कस्याश्चिदित्यादि चतुर्भिरनुकरणं प्रपञ्च्यते । ततश्चतुर्भिस्तन्मयत्वं पुनरेकैकानुकरणमिति विवेकः । कस्याश्चिद्दीपिकायाः पूतनावदाचरन्त्याः काचित् कृष्णवदाचरन्ती स्तनमचुम्बदन्या तु तोकायित्वा शिशुवदात्मानं कृत्वा रुदन्ती शकटासुरवदाचरन्तीं काञ्चित्पदा चरणेनाहन् ताडयामास ॥ १५ ॥

काचित्तु दैत्यायित्वा तृणावर्तवदात्मानं कृत्वान्यां काञ्चित्कृष्णस्यार्भकं बाल्यं भावयन्ती जहार हृतवती काचिद्घोषाणां ध्वनतां भूषणानां निःस्वनो ययोस्तौ भूषणानिःस्वनाविति पाठान्तरं तावङ्घ्री चरणौ कर्षन्ती रिङ्गयामास जानुचंक्रमणं चकार ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्र तास्ता इत्युक्तेः सर्वा एव लीळा इत्यायाते मूलतः प्रभृति पूतनामोक्षादिलीलानुकरणस्योपस्थितौ तदेवाह । कस्याश्चिदित्यादि बहुभिः ननु तदात्मिका इति तादात्म्यभाजः तादात्म्यं तु प्रेम्णो मर्यादया चेतसो वृत्यन्तरराहित्येन तन्मयीभावः न च तदात्मिका इति लीलात्मिका इति वक्तुं शक्यते लीला भगवतस्तास्ता अनुचक्रुरित्युक्तेः न हि लीला भूत्वा लीला अनुचक्रुरिति सम्भवति तेन कृष्णावेशात् कृष्णतादात्म्यमेव तदा कथं प्रतिकूलेषु पूतनादिष्वभिनिवेशाभावात् पूतनायन्त्या इति (१) ॥ १५—२७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

प्रथमतो भगवच्चरित्रे पूतनासुपयःपानमिति काचित्पूतनाभूता जाता अन्यां ह कृष्ण इत्युक्तवती तदा तामङ्के भगवद्बुद्ध्या अगृह्णात् ततस्तस्याः पूतनायन्त्याः कृष्णायन्ती स्तनमपिबत् तस्यास्तु मरणभावना न स्थितेति सा न मृता नाप्यनुकरणं कृतवती कृष्णायन्तीच स्तनमात्रमेव पिबति अलौकिकसामर्थ्याभावादिति स्तनपानमात्रमुक्तम् अमङ्गलतानिवृत्तये च शकटभङ्गलीलामाह । तोकायित्वेति । तोकवदाचरति आत्मानं तोकं मन्यते वा तोकवदात्मानं कृत्वा वा शकटायतीं शकटवत् स्थितामहन् ताडितवती ॥ १५ ॥

तृणावर्तलीलामाह । दैत्यायित्वेति । दैत्यवदात्मानं कृत्वा कृष्णस्यार्भं बाल्यं भावयन्तीं कृष्णाभभावनां तामेका आत्मानं दैत्यायित्वा जहार काऽपि अङ्घ्री कर्षन्ती घोषनिःस्वनैः रिङ्गयामास चलितवती यथा बाल्ये मुग्धप्रभीतवत् घोषप्रघोषरुचिरं भगवान् गच्छति पूर्वश्लोके चतस्रः उक्ताः लीलाद्वयेन तास्तामसनामस्यः अत्र तिस्र एव राजसतामस्य इति चरित्रलीलायामुक्ता विशेषा अत्राप्यनुसन्धेयाः अथ युगलास्तिस्रो निरूपिताः गुणातीता त्वेका पुनः प्रकारान्तरेण बह्व्यः एकभावमापन्नाः भगवदिच्छया प्रधानगुणभावं प्राप्य रजसा अनेकधा विक्षिप्ताः बहुरूपा जाताः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवमनुकरणं चतुर्भिराह । पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती स्तनमपिबत् पानमनुचक्रे तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥

दैत्यायित्वा तृणावर्त्तदैत्यवदाचरन्ती एका कृष्णस्य आर्भं बाल्यं भावयति या ताम् ॥ १६-१७ ॥

केनचित्कृता विशुद्धरसदीपिका ।

लीला एव प्रपञ्चयति । कस्याश्चिदिति दशभिः । अत्र पूतनादिविजातीयतादात्म्यं न गोपीनामपि तु सर्वनाम्नां बुद्धिस्थवृत्तित्वात्किंशब्देनात्र योगमायैव वक्तव्या कार्य्यार्थे सम्भविष्यतीति प्रागुक्तेः सैव तासामदृष्टरूपा सती योगेऽयोगे च साहाय्यं करोति तथा श्रीकृष्णतादात्म्येन तद्बाललीलानुकरणमप्यनुचितमुन्मादमूलकमेव तस्यानियतवृत्तित्वान्न विरुद्धं यथा श्रीकृष्णानुकरणं स्फुटमेव तदात्मकतया तत्र च स्वभावापरित्यागेन नातिभेदस्फूर्तिः यतन्तीत्यादौ ग्लकथनात् कृष्णोऽहमिति कृष्णत्वसाधनार्थं तच्छब्दप्रयोगाच्च पूतनाद्यनुकरणञ्च कृष्णविषयकतद्धेतुकभयेन तदात्मकतयैव यथा स्वविषयकभयेन व्याघ्राद्यनुकरणं अतो न तदीयप्रेमविरोधः श्रीयशोदानुकरणञ्च न स्वेन रत्याख्येन भावेन तस्य बाल्यभावनया ऽऽवृतत्वात् किन्तु प्रीतिसामान्यातिशयलब्धकृष्णभावेन ततो भयादेव ततस्तस्याभावेन न मातृभावस्पर्शः किन्तु कृष्णभावेनैवेति न मिथः स्पर्शानुचितयोर्भावयोर्युतिः सर्वमेतत्तासु तदानीमुन्मादस्यानुगतत्वात्सहसैव समपद्यत न पूर्वाभ्यासेनेत्यपि ज्ञेयं वस्तुतस्तु कस्याश्चिदित्यनाकलितस्वरूपाया भावनालब्धायाः नतु साक्षाद्दीपिकाया इत्यर्थः।अत एव पूतनायन्त्या इति पूतना इवाचरन्त्या इत्युक्तम् एवञ्च प्रतिस्वमेव निजभावनावेशस्वभावेनैवानुकृतिः तत्तल्लीलया कृता नत्वन्यानुसंहितेति तदुन्माद एव सर्वसाधकः अन्यानुसन्धाने तु तद्विरोधः स्फुट एव तदात्मिका इत्युक्तेःबाललीलानुकरणञ्च तदीयभावविरुद्धमपि नन्दसूनुरिति प्रागुक्ताभिप्रायेण बाल्योऽयमस्मत्प्रीतिं नावकलयतीति स्फूर्त्या सङ्गमनीयमिति संक्षेपः कस्याश्चिदिति । पूतनायन्त्याः सेवाचरन्त्या नतु तद्विरुद्धभावाया इत्यर्थः। कृष्णायन्ती भावतोऽपि स इवाचरन्तीत्यर्थः। स्तनमपिबदित्यपि भावेनैव तोकायित्वा बाल इवाचरित्वा रुदन्ती सती शकटायतीं काञ्चिद्भावनालब्धामहन् भावेनैवेति सर्वत्र योज्यम् ॥१५॥

दैत्येति । एका कृष्णार्भभावनां कृष्णार्भोऽहमिति भावना यस्यास्तामेका अन्या काचिद्भावनालब्धा एके मुख्यान्यकेवला इत्यमरः दैत्यायित्वा तृणावर्त्त इवाचरित्वा भावेनैव जहार शेषं स्पष्टम् ॥ १६ ॥

---

(१) इतः पाठो नष्ट इति प्रतीयते ।

कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन ॥
वत्सायतीं हन्ति चान्या तत्रैका तु बकायतीम् ॥ १७ ॥
आहूय दूरगा यद्वत्कृष्णस्तमनुवर्ततीम् ॥
वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥ १८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तदनुकारमेवाह । कस्याश्चिदित्यादि नवभिः । कस्याश्चित्तु प्राणस्य प्राणमिति श्रुतिसिद्धप्राणप्राणकृष्णवियोगे तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति श्रुतिविरुद्ध-प्राणावस्थित्यनौचित्यं मन्यमानायाः कृष्णगुणगाने पूतनामोक्ष-चरितमनुस्मृत्य तदुरसि कृष्णविहारं तत्प्राणानां कृष्णप्रवेशंचा-कलय्य तस्या एवं भाग्यातिशयं मत्वा स्वोरसि तद्विहारस्य तत्सङ्गस्यां तदवियोगस्य च कामनया पूतनायन्त्याः पूतनावदाच-रन्त्या न तु तस्या विरुद्धभावमपि दधत्याः काचित्कृष्णायन्ती तदात्मकतया कृष्ण इवाचरन्ती स्तन मपिबत् उपलक्षणमेतत् तदुरसि विहारश्च कृतवती तदा चोभे अपि स्वस्मिन्स्वोरसि च कृष्णाकारे क्षणे न क्षणं क्षणमायतुः स्वामिन् दुष्टाया यातुधान्या विरोधमप्यनवेक्ष्य तदुरसि विहरन् स्निग्धा नः संप्रेममानमात्रेणा पेक्षसेऽतः प्रसीदेति प्रार्थनाञ्च चक्रतुः अन्या तु गुणगानानुमतत-च्चरितमनुस्मृत्य तदात्मकतयैव तोकायित्वा रुदन्ती पयःपानार्थं कृष्णरोदनवत् तदधरामृतपानाय रोदनेन तदनुकुर्वती रोदनदशायां विरहपवनोत्क्षिप्तरूपसरः पद्मपदा कामपि हरिपदपद्मस्पर्शेच्छया शकटायती स्वहस्तपादाभ्यां भुवमवष्टभ्योन्नतया स्थितां तल्ली-नचित्तत्वेन जडीभूततया च शकटमिवाचरन्तीमहन् परतः क्षिप्त-वतीत्यर्थः तत्रापि पूर्ववत्स्वास्मिन् कृष्णाकारदर्शनं तत्पादस्पर्शसौख्यं प्रार्थनं चोहनीयम् ॥ १५ ॥

अन्यां तदात्मकतयैव कृष्णार्भभावनामेका कृष्णगुणगाने हरेस्तृणावर्तवक्षोऽधिलम्बनमनुस्मृत्य तद्भाग्याधिक्यं मत्वा कृष्ण-वियुक्तसुरमुनिमनुजेभ्यस्तदालिङ्गितासुरश्रेष्ठ्यमवगत्य तदालि-ङ्गनाभिलाषेण दैत्यायित्वा जहार सा च कृष्णार्भभावनतया व्याप्तत्वेन दैत्यायन्त्या भावपूरकस्वात्मगतकृष्णप्रेरणया च तां विगा-ढमालिङ्गितवर्ती तदा सा स्वस्मिन् कृष्णाकारदर्शनेन सौख्यमवाप सातु कृष्णाकारसखीवक्षोऽधिमागमोद्बुद्धसंस्कारस्मृतकृष्णा-लिङ्गनसौख्योत्तरतद्विरहपीडयाधीरा प्रवहदकसमधुनीरातत्क्लिन्नत-नुचीरा खिन्नमुखभिन्नहृत्खिन्नशरीरा भुव्यपतत्पूर्ववत्प्रार्थयामास च कापि कृष्णगुणगाने—

तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेष्विं । त्यात्रो क कृष्णशिशुचरितमनुस्मृत्य तदात्मकतया तदनुकुर्वती स्वकरेण भुवमवलम्ब्याङ्घ्री कर्षन्ती वन्यालिबोधितकुसुमराजाब्जवद्घो-षाणां निःस्वनैः विकासितमुखपद्मा रिङ्गयामास स्वामिन्नेवं बाल्ये एव सुखं दत्त्वाधुना कैशोरे वनमाहूयोपेक्षसीति चित्रमतः प्रसीदेति प्रार्थयामास च ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

यथैतद्विवृणोति ॥ कस्याश्चिद्गोप्याः पूतनावदाचरन्त्याः काचि-त्कृष्णवदाचरन्ती अहं कृष्ण इत्युक्तवती तां कृष्णं बुद्ध्याङ्के कृतवत्याः तस्याः स्तनमपिबत् यावच्छक्यते तावदनुक्रियते ऽतोऽसुपानसामर्थ्याभावात् स्तनपानमात्रमुक्तं तस्यापि द्वेषभावना-भावान्मरणाभावः अनुकरणात् तोकायित्वा तोकवदाचरित्वा तोक-मात्मानं मत्वेति वा तोकवदात्मानं कृत्वेति वा शकटायतीं शकटवत्स्थितां पदा चरणेन अहन् निवृत्तिपक्षे कस्याश्चिदाति पूतनावदाचरन्तं परमात्मानं वर्णयामास काचित्कृष्णरूपेण स्तन-पानमनुकुर्वन्तं काचित्तोकरूपमनुकृत्य रोदनमनुकुर्वन्तं शकटरूपापन्नमात्मानं चरणेनाहन् तमनुकुर्वन्तं निरूपयामासे-त्यर्थः एवमग्रेऽपि ॥ १५ ॥

अन्या तृणावर्तदैत्यवदात्मानं कृत्वा कृष्णार्भं तस्या बाल्यं भावयन्तीमपरां जहार कापि अङ्घ्री कर्षन्ती घोषनिः-स्वनैः रिङ्गयामास चलितवती ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ॥

काश्चित्कृष्णायन्ती कृष्णवदाचरन्ती कस्याश्चित्पूतनायन्त्याः पूत-नावदाचरन्त्याः स्तनमपिबत् अन्या काचित् तोकायित्वा तोक-वत् बालवदात्मानं कृत्वा रुदन्ती शकटायतीं शकटवदाच-रन्तीं पदा अहन् चरणेन ताडितवती ॥ १५ ॥

एका दैत्यायित्वा तृणावर्ताख्यदैत्यवदात्मानं कृत्वा अन्यां कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयन्तीं जहार कापि काचिदपि घोषाणां किङ्किणीनां निःस्वनैरुपलक्षितैः अङ्घ्री कर्षन्ती रिङ्गयामास ॥ १६—१७ ॥

भाषा टीका ।

तहां कोई एक गोपी पूतनासी बन गई दूसरी गोपी कृष्ण बन वाके स्तन को पान करवे लगी एक गोपी गाडा बन गई दूसरी गोपी कृष्ण बन वाके नीचे सो गइ रोदन करते समय पांय के ठोकर ते वा शकटासुर को गिरा देत भई ॥ १५ ॥

एक गोपी बाल कृष्ण बन गई वाको दूसरी गोपी तृणावर्तदैत्य बन दूर उठा लेगई कोई गोपी पांय के घुंघुरून को बजा बजा पैयां चल पैरों को खैंच बाल लीला करत भई ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ॥

दूरगा दूरे वर्तमाना सा यद्वद्यथा कृष्णस्तथाहूय तं कृष्णमनुवर्तन्तीमनुवर्तमानाम् अनुकुर्वतीमिति वा पाठः ॥ १८—१९ ॥

कस्यांचित्स्वभुजं न्यस्य चलन्त्याहापरा ननु ॥
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥
मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥
इत्युक्त्वैकेन हस्तेन यतन्त्युन्निदधेऽम्बरम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यतन्ती प्रयत्नं कुर्वती अम्बरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २०—२१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

गोपायन्त्य इति गोपबालायन्त्य इति ज्ञेयं तदानीं बालकैरेव सह वत्सचारणात् चकारात् अघायमानां च हन्ति अहन् सामीप्ये वर्त्तमाना ॥ १७ ॥

अधुना वाक्प्रधानानुकरणं पञ्चभिर्विवक्ष्यन् आदौ प्रलम्बवधात् प्राक्तनग्रीष्मकृतविचित्रलीलानुकरणमाह । आहूयेति द्वाभ्याम् अत्र वाक्प्रधानानुकरणत्वात् किंवानुकरणे क्रमशो इत्यन्तांशेन तदात्मकत्वात् कृष्णायन्तीत्यादिकं पूर्वमोक्तं दूरगा इति तैर्व्याख्यातमेव यद्वा दूरवर्तिनीर्व्रजादिवक्षिता गोपीर्वेणुनादसंकेतेन यथा कृष्ण आह्वयति तथाह्वयेति एवमनुवर्त्तती काचित् क्रीडन्तीं च गानादिक्रीडां कुर्वतीम् अन्या गोपभावनापन्ना इति ज्ञेयम् ॥ १८ ॥

ननु निश्चितमेवाह अतः कृष्णोऽहमित्युक्तौ न संदेहः कार्य्य इति भावः । अनेन कृष्णोऽहमिति दोषो निरस्तः कृष्णः सर्वगुणरूपादिसंपूर्णोऽहम् अतो गतिं ममाश्रयभूतां ललिताख्यां गोपीं पश्यत इति एतत् तदुक्तम् हो किं स्मरतेति शेषः तच्च तेन कदाचित् केनापि भावेन पूर्वमुक्तमस्तीति पूर्ववत् बोद्धव्यं ननु कुतो वाक्यं न समापितं तत्राह । तन्मनाः कृष्णहृतचित्तेति यद्वा ननु हे गोपा ! गोप्यो ! वा पश्यत गतिं मम चेष्टां गमनं वा ललितां मनोहरां तन्मनाः श्रीकृष्णाविष्टचित्तेत्यर्थः । अनेनानुकरणस्य सम्यक्ता पूर्ववदेवाभिप्रेता ॥ १९ ॥

वातवर्षाभ्यामिति । अनुकरणवशाद्वा भ्रमात्रैणैव किंवा तत्तल्लीलावेशेन साक्षाद्वातादेस्फूर्तेरितिज्ञेयम् एवमग्रे दावाग्निं पश्यतेत्यपि यतन्तीति विरहार्त्त्या बलहानिः सूचिता उच्चन्तीति वा उन्निदधे श्रीगोवर्द्धनवदुच्चं नितरां धृतवती ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

द्वे विक्रीडतुः तत्र काश्चन गोपायन्त्यः गोपबालायन्त्यश्चिक्रीडुः तदानीं बालकैरेव वत्सचारणात् तस्यामेव समायां लीलान्तरमाह । वत्सेति । अन्या कृष्णायमाना तत्र तस्मिन् सति एका च कृष्णायमाना हन्ति हननानुकरणमनुकरोति अघास्त्रियर्थः ॥ १७ ॥

तदेवमनुकरणमात्रमुक्तम् अधुना प्रलम्बवधप्राक्तनग्रीष्मकृतविचित्रलीलानुकरणे शृङ्गारालम्बनरूपतदीयकैशोरादिभावात्पुनरपि प्रियानुकरणरूपं लीलाख्यमनुभावमाह । आहूयेति द्वाभ्याम् । दूरगा इति । समासान्तविधेरनित्यत्वात् दूरगवीरित्यर्थः । अन्या गोपम्मन्याः ॥ १८ ॥

गतिं नृत्यलीलाम् ॥ १९ ॥

वातवर्षाभ्यामिति । तत्तल्लीलावेशेन साक्षाद्वातादिस्फूर्तेः एवमग्रे दावाग्निं पश्यतेत्यपि अत्र आसक्तिरेकेण शृङ्गाररस-सङ्कोचात् तल्लीलोदाहरणम् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वेणुं क्वणन्तीं क्वणयन्तीम् ॥ १८—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वे गोप्यौ कृष्णरामाविवाचेरतुः काश्चन तु गोपाव त्साश्च तद्वदाचेरुः तत्र काश्चिद्वत्सासुरवदाचरन्तीं काचित् गृहीत्वा भ्रामयित्वा न्यपतत् काचिद्बकासुरवदाचरन्तीं प्रतीवबभूव ॥ १७ ॥

तथा दूरगाः दूरे वर्तमानाः गाः गोवदाचरन्तीः काश्चित् यद्वत्कृष्णस्तद्वदाह्वयदाजुहाव आह्वयेति पाठे यद्वत्कृष्णस्तद्वत् दूरगाः आहूय पुनस्तमनुकुर्वती कृष्णत्वमिति पाठे कृष्णभावमनुकुर्वती तदेव दर्शयति वेणुं क्वणयन्तीं केवलं मुखेन गायन्तीं क्रीडन्तीमिति पाठान्तरं काश्चित्साधु साध्विति शंसन्ति प्रशशंसुः ॥ १८ ॥

काचित्तु तन्मनाः कृष्णाभेदाभिमानयुक्तमनाः कस्यांचित्स्वभुजं न्यस्य कस्याश्चिदंसे स्वभुजं निधायेत्यर्थः । चलन्ती पादन्यासान् कुर्वत्यपराः प्रत्याह किमिति ननु हे सख्यः ! अहं कृष्णः मम ललितां सुन्दरतरां गतिं पश्यतेति ॥ १९ ॥

तथा काचित्कृष्णोऽहमिति यतन्ती वर्षवाताभ्यां माभैष्ट भयं माकार्ष्ट ताभ्यां वर्षवाताभ्यां त्राणं मया विहितमित्युक्त्वाम्बरमुत्तरीयमेकेन स्वहस्तेन वितत्य विस्तार्योन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

वृन्दावनक्रीडायां वत्सपालकरूपा जाताः तत्र प्रकारमाह । कृष्णेति द्वे कृष्ण रामायिते कृष्णरामवत् जाते काश्चन गोपायन्त्यः गोपा अत्र बालकाः जातिशब्दोऽयं वत्सरूपाश्च काश्चन जाताः चकारेण समुच्चिताः अन्या पुनर्वत्सायिता वत्सासुरवदाचरितां प्रतीव जाता कृष्णायिता अथोव चकारात् फलानि पातयन्ती च अन्या पुनः बकायतीं प्रती जाता वत्सवधो

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

लोके बलभद्रकृत इत्यपि प्रसिद्धः प्रलम्वो निहतोऽनेन वत्सको धेनुकादयः अत उभयोर्मध्ये एका वकायतीम् अन्या वत्सायन्तीम् ॥ १७ ॥

ततः परं गोपरूपेण वृन्दावनलीलामाह । आहूयेति । गोरूपाः काश्चन जाताः गोपालरूपाः काश्चन तत्र यद्वत् कृष्णः दूरगाः गाः आहूय वेणुक्वणनं करोति एवं दूरगा गोपीराहूय तं कृष्णमनुकुर्वती काचिज्जाता तां वेणुं क्वणन्तीं ततो नानाविधक्रीडां कुर्वतीम् अन्याः गोपायिताः साधु साध्विति शंसन्ति॥१८॥

एका पुनः क्रीडायां कृतापि लीला भागवते अनुक्ता तां भावयित्वा तादृशीं लीलां कृतवती तदाह । कस्याञ्चिदिति । अत्रापि पूर्ववत् युगलास्तिस्रः चतुर्थ्येषा कृष्णरामायिते द्वे युगले साध्वाशंसनसहिता वेणुवादनपरा च तृतीया एषा तु निर्गुणा कस्याञ्चिद्गोपरूपायां स्वभुजं स्थापयित्वा चलन्ती अपरा गोपरूपा यातोऽन्या ननु हे गोप्यः ! अहं कृष्णः मे ललितां गतिं पश्यतेति दोषाभावार्थमाह । तन्मना इति । पूर्वं कायिकीं चेष्टां केवलां कृतवती इदानीं वाचा सहिताम् ॥ १९ ॥

पुनः प्रकारान्तरेण चातुर्विध्यमाह । माभैष्टेति । एषैव निर्गुणा काश्चन गोपगोपीरूपा जाता वृष्टिभीता इव वातवर्षाभ्यां हेतुभूताभ्यां माभैष्ट मया तत्त्राणं विहितम् इत्युक्त्वा एकेन हस्तेन अम्बरं नयन्ती पर्वतवत् स्थापयन्ती ऊर्ध्वं निदधे गोवर्द्धनवत् धारितवती यतन्ती प्रयत्नं कुर्वती वा ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दूरगाः दूरवर्तिनीर्गाः यद्वत् कृष्ण आह्वयति तद्वदेवाहूय तं कृष्णमनुवर्तनीम् अनुकुर्वतीमिति च पाठः ॥ १८ ॥

ततश्चान्या अपि लीला अनुचिकीर्षन्तीनामपि तासां तद्व्याधिक्यवशेनोन्मादसञ्चारिप्रावल्येन चात्मानुसंधानापगमात् कृष्णतादात्म्यमाह चतुर्भिः । कस्यांचिदिति । अहं सुवलस्कन्धार्पितभुजः कृष्णः प्रसिद्धस्तस्मान्मम ललितामतिरमणीयाम् ॥ १९ ॥

यतन्ती प्रयत्नं कुर्वती अम्बरमुत्तरीयवस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

केन चित्कृता विशुद्धरसदीपिका ।

एका कृष्णायिता अन्या भावनालब्धा रामायिता तथैव काश्चन गोपायन्त्यः वत्सायन्तीं भावनालब्धाम् अन्या ततो भिन्ना निजरूपेण वर्त्तमाना घ्नती हननमनुकुर्वतीत्यर्थः । तत्रैवान्या वकायतीं घ्नतीत्यन्वयः ॥ १७ ॥

दूरगा दूरगवीरित्यर्थः । अन्या गोपंमन्याः ॥ १८ ॥

कस्यामिति गतिं नृत्यादिलीलां शेषं स्पष्टम् ॥ १९ ॥

मेति । वातवर्षाभ्यामिति तल्लीलावेशेनैव साक्षाद्वातादिस्फूर्त्तेः भयेति अत्र त्रासातिरेकेण शृङ्गाररससंकोचनात्तल्लीलोदाहरणं यतन्ती यत्नं कुर्वती अम्बरमुत्तरीयम् उन्निदधे ऊर्ध्वं धृतवतीति ॥२०॥

श्रीरामनारायणकृतभावभावविभाविका ।

द्वे गोप्यौ कृष्णरामायिते तत्रैका तदात्मकतयैव कृष्णायिता द्वितीया तु तत्सादरालिङ्गनविलासाद्यभिलाषेण रामायिता अन्यास्तु गोपदारास्तदुदारविहारविस्ताराय गोपायन्त्यः गोपकुमाराकारानुकारास्तत्सहप्रचारा बभूवुः उपलक्षणमेतत्काश्चित्तच्छविमोहिता विरहखेदपशुवृत्तयो वत्सायन्त्यो दशनगृहीततृणैः स्वमानापराधं क्षमापयामासुः अन्या तदात्मकतयैव कृष्णायन्ती अन्यां वत्सायतीं तत्करस्पर्शे तनुत्यागेन तदविच्छेदसङ्गतिमभिलषन्तीं वत्साकारां हन्ति स्म भूमौ पोथनाय पादावग्रहीत् साच कृष्णाकारसखी स्वपादग्रहणसमये कृष्णेन स्वमानमोचनं सम्भाव्य स्वत एव गतमाना तमालिङ्गितवतीति शेषः । तथैव तत्रैका वकायती हन्ति स्म तत्रायं क्रमः काचित्सखी सत्वमये मनस्यनुरागकलेव शुक्लवस्त्ररचितपक्षव्याप्तवपुष्यरुणवसनेन तुण्डं रचयित्वा कृष्णप्राप्तिकामा वकवत्तद्ध्यानपरा बभूव कृष्णरूपासखीसु सत्त्वमयमनासि प्रेमवृतावभिव्यक्तकृष्णच्छविवत्तच्छोणवस्त्रतुण्डगता ह्यशोभत ततश्च तन्निःसृता प्रेमिणां बहिःप्रादुर्भूतकृष्णवद्व्यरोचत ततश्च हरिः यथानुरागिणमनुरागं गृहीत्वा तदीयसात्त्विकधर्माध्यासमपि निवारयति तथा दारुणतुण्डं गृहीत्वा शुक्लवेषं दारयतीव बभौ सा च तदा मुखतः पाटनाय गृहीततुण्डाधरायाः करौ रसावेशाच्चुचुम्बेति भावः । रसानुकारे रसोद्भवस्यावश्यकत्वात् ॥ १७ ॥

तत्रैवं कुमारलीलानुकारमभिधाय कैशोरलीलानुकारमाभिवदन् शृङ्गारालम्बनरूपाविर्भूतकैशोरविहाराभिनयमाह । आहूयेति द्वाभ्याम् । यद्वत्कृष्णो दूरे वर्तमाना गाः आह्वयति तद्वत्तमनुकुर्वतीं मनसि च भवान् दूरे निपतितान् स्वीयान् पशूनपि नोपेक्षते कथमधुना रसिकशिरोमणी रसिकाः स्निग्धा न उपेक्षते इति भावयन्तीं तथावेणुं क्वणन्तीं तत्रायं भावः यथा वेणुरवमोहिता वयं कृष्णगृहिण्यो मृग्य इवागतास्तथा कृष्ण इव कृष्णोऽपि वेणुरवमोहित आगमिष्यतीति वेणुं वादयन्तीं यद्वा न गोपानां वेणुधारणं क्वचित्प्रसिद्धं किन्तु पूर्वं विहारावसरे कृष्णवेणुरेव तयापहृतो बहुनृत्यगानादिना प्रार्थनेऽपि न प्रकटीकृतोऽधुना विरहवैकल्ये स्ववेणुं ग्रहीतुमागमिष्यत्येवेति सम्भाव्य तं वादयन्तीं कृष्णाभिनयेन बहुधा क्रीडन्तीमन्या तद्विहारलोलुपतया तद्गोपसखाकारा गोपी साधुसाध्विति शंसति स्तौति ॥ १८ ॥

काचित्तदात्मकतया कृष्णायती कस्यांचित्कृष्णाभिमर्षाभिलाषिण्यां स्वभुजं न्यस्य तदंसे बाहु निधाय चलन्ती प्रेमपवनचालितपदपद्मौ हंसगतिमोहनगत्या न्यस्यन्ती ब्रह्मस्वरूपाविर्भूतमुभयो जिज्ञासून् प्रतीवापरा गोपकुमाराकारा गोपीराह । अहं कृष्णो मे ललितां गतिं पश्यत बहिरन्तास्तद्भावैक्यमाह । तन्मनाः यथा आह तथैव कृष्णाविष्टचित्ता इति भावः ॥ १९ ॥

काचित्तु सर्वासां गोपीनां विरहदुःखोच्छ्वासानश्रुधाराश्च प्रलयकारिवातवर्षत्वेन परिकल्प्य स्वस्मिंस्तद्भावनयाविर्भूततदात्मकत्वेन कृष्णस्वरूपत्वमवगत्यापरा आह । माभैष्टेति । भो गोपा यूयं वातवर्षाभ्यां माभैष्ट भयं माकुरुत यतो वो युष्माकं तत्त्राणं ताभ्यां रक्षणं मया विहितमित्युक्त्वा यतन्ती अनुभूत-

आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप ! ॥
दुष्टाहे ! गच्छ जातोऽहं खलानां ननु दण्डधृक् ॥ २१ ॥
तत्रैकोवाच हे गोपा ! दावाग्निं पश्यतोल्बणम् ॥
चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममञ्जसा ॥ २२ ॥
[1]बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले ।
भीता सुदृक्पिधायास्यं भेजे भीतिविडम्बनम् ॥ २३ ॥
एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् ।
व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

विरुद्धकुःबकार्येन शाकिह्वासात्प्रयत्नं कुर्वती एकेन हस्तेनाम्बरमुन्निदधे ऊर्ध्वं गोवर्धनाकारेण दधार ततश्च सर्वा अपि सुरपालकोपाल्प्राणान् संरक्ष्याधुना स्वयं प्राणग्रहणमनुष्ठितं प्राणग्रहणस्यैवेष्टत्वे त्वस्मन्निवेदिततनुमनआदिभिः सहैव गृहाणेति प्रार्थयामासुः ॥ २० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तत्कृतं वृन्दावनविहारलीलानुकरणमाह । द्वे गोप्यौ कृष्णरामायिते कृष्णरामवज्जाते काश्चन गोपायन्त्यः गोपबालानुकरणं कृतवत्यः काचिद्वत्सरूपा च जाता इत्यादिद्रष्टव्यं तत्र वत्सासुरवदाचरन्तीं काचिदन्या बलरामरूपा प्रलम्बो निहतोऽनेन वत्सको धेनुकादय इत्यनुसारेण हन्ति हननमनुकरोति स्म काचिद्बकवदाचरन्तीमन्या कृष्णरूपा हन्ति स्म ॥ १७ ॥

अथ तत्कृतं गवाह्वानादिलीलानुकरणमाह । आहूयेति । तत्र काश्चन गोपरूपा जाताः काश्चन गोपालरूपास्ते यद्वत्कृष्णः दूरगा आहूय वेणुक्वाणं करोति तद्वत्कृष्णमनुकुर्वती दूरगाः गोरूपा गोपीराहूय वेणुं क्वणन्तीं क्रीडन्तीं काचिदन्या गोपरूपाः साध्विति शंसन्ति स्म ॥ १८ ॥

गोपरूपायां कस्यांचिदपरा कृष्णरूपा भुजं निधाय चलन्ती आह ननु कृष्णोऽहं ललितां मदीयां गतिं हे गोप्यः ! पश्यतेति यतस्तस्मिन्मनो यस्याः सा यतस्तदावेशात्तद्रूपा जातेति भावः यद्यपीयं लीला पूर्वमनुक्ता तथाप्यत्र तदनुकरणस्योक्त्वा जातेति द्रष्टव्यम् ॥ १९ ॥

अपरा कृष्ण इवावस्थिता गोपादिरूपा आह हे गोपादयः ! वातवर्षाभ्यां भयहेतुभूताभ्यां माभैष्ट ताभ्यां वातवर्षाभ्यां मया त्राणं विहितमित्युक्त्वा यत्नवती एकेन हस्तेनाऽम्बरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्वत् यथा कृष्णस्तथा दूरगाः दूरे वर्तमाना गाः आहूय तं कृष्णमनुवर्ततीमनुवर्तमानां कृष्णायन्तीमित्यर्थः । अत एव वेणुं क्वणन्तीम् ॥ १८—१९ ॥

यतन्ती गोवर्द्धनोद्धरणे इव प्रयत्नं कुर्वती अम्बरमुत्तरीयं वस्त्रमुन्निदधे धृतवती ॥ २० ॥

भाषा टीका ।

दो गोपी कृष्ण तथा बलराम जी बन गईं और बहुत गोपी गोप होगयीं एक ने बकासुर रूप वारी को गिराया दूसरी ने वत्सासुर रूप वाली को गिराया ॥ १७ ॥

जैसे श्रीकृष्ण दूरसे गऊओं को बुलावैं एक गोपी तैसे गौअन को पुकारवे लगी एक गोपी बंसी बजाय क्रीडा करत भई और ग्वाल बाल रूपी गोपी वाकी बडी प्रशंसा करत भई ॥ १८ ॥

एक गोपी दूसरी किसी एक गोपी के कान्धे पै अपने भुजा को रख चलती श्रीकृष्णचन्द्र के विषै जाको मन लगो है सो बोली मैं कृष्ण हूं मेरी मनोहर चाल को देखो ॥ १९ ॥

एक गोपी बडे यत्नते एक हाथ ते पिछौरा को उपर उठा कर बोलवे लगी कि तुम कोइ मत डरो तुमारे पव न वर्षा के डर छुटा वे को रक्षा कर वे को मैंने गोवर्धन धारण कियो है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपिदध्वं निमीलयत ॥ २२ ॥

सुदृक् सुनयनमास्यं पिधाय सुदृक् वराक्षीति वा भीतिविडम्बनं भयानुकरणम् ॥ २३ ॥

एवं पुनरपि वृन्दावने लतास्तरूंश्च कृष्णं पृच्छन्त्यो वनोद्देशे वनप्रदेशे व्यचक्षतापश्यन् ॥ २४—२५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु निश्चये संबोधने वा नृपेति पाठे आश्चर्यया संबोधनं

[1] बध्नन्त्येका स्रजा काचि स्वामथोलूखले हरे । बध्नामि भाण्ड भेत्तारं हैयङ्गवमुषं त्विति भीतेत्यादि वीरराघव पाठः ।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

दुष्टाहे रे कालिय ! गच्छ इतो निःसर अन्यथा दण्डं करिष्य इत्याह । जात इति । ननु निश्चितम ॥ २१ ॥

तत्र चेति चकारान्वयः कालियदमनलीलानुकरणे त्वित्यर्थः एवं तत्र कृतं चक्षूंषीत्याद्युक्तेश्च मुञ्जाटव्यामपि कृतं दावतो रक्षणं द्विविधमेवानुकृतमिति ज्ञेयं यद्वा तत्र तासु मध्ये च ततश्च मौञ्जाटविकतदनुकरणमेव पाठान्तरं स्पष्टमेव अञ्जसा अनायासेनैव ॥ २२ ॥

अधुना मानसचेष्टाप्रधानानुकरणमाह । बद्धेति । अन्यया ताभ्यो भिन्नया पश्चादागतया दूतीरूपया कयाचिद्वृद्धया तन्मतानुसारिण्या यद्वा अन्यया स्रजा जगद्विलक्षणया परममृदुलयेत्यर्थः । पूर्वं मात्रापि परमकोमलगोवालादिरज्जुभिरेव वद्धत्वात् यद्वा पूर्वं स्रजैकया पश्चादन्यया स्रजा बद्धा पूर्ववद्बहुधा वन्धनार्थं तासां स्रजोऽपि बन्धनसामर्थ्यं तन्मतानुसारित्वं च संभवेदेव तन्वी विरहार्त्या सद्य एव कार्श्यं प्राप्ता अत एव प्रेमविशेषात्तया श्रीभगवद्भक्तवश्यतागुणविशेषमयलीलाप्रादुर्भावपक्षे सर्वं समञ्जसमेव तत्र अनुकरणे तास्विति वा उलूखल इति उलूखलानुकारिण्यां कस्यांचिदित्यर्थः । सुदृगिति दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः । मुखं पिधाय हस्ताभ्यामेतच्च वालकस्वाभाविकभयलक्षणं भीतिविडम्बनं कम्पपुलकादि किंचिद्रोदनकाकुवाक्यादि च ॥ २३॥

एवं प्रायो भयादिना मानसचेष्टानुकरणमेव द्योतितं भयस्य मनोधर्मत्वात् एवमत्यन्तभक्तवश्यतामयी श्रीदामोदरलीला सर्वासां लीलानां मध्ये श्रेष्ठतमेति तदनुकरणं मधुरेण समापयेदिति न्यायेन सर्वान्ते प्रोक्तं धेनुकप्रलम्बयोर्वधः श्रीवलदेवकृतत्वान्नानुकृतः कुमारीवस्त्रहरणं यज्ञपत्नीगणाकर्षणं च लज्जया किंवा तत्तल्लीलारसस्यात्मन्येव पर्यवसानात्ततदनपेक्षया यमलार्जुनभञ्जनं च श्रीदामोदरलीलान्तर्गतत्वात् पृथङ्नानुकृतमिति पूर्वोक्तलीलाक्रमातिक्रमस्तु तासां विरहविह्वलतावर्णनेन श्रीवादरायणेरपि तादृशभावापत्त्या । तदनुसंधानापगमात् किंवा लिखितन्यायेन चेष्टादीनां तिसृणामुत्तरोत्तरस्मिन्नेकैकस्य समवेततया केवलत्वसंवलितत्वयोस्तत्रापि न्यूनाधिकत्वयोः क्रमापेक्षयोक्ते तास्वेव केवलसम्वलितत्वादिक्रमेणैव तत्तल्लीलानां परिस्फूर्तेः यद्वा विरहकातरतया तन्मनस्तया वा पौर्वापर्यानुसंधानाभावादिति पदानीति पूर्वोक्तप्रश्नप्रकारेण यद्वा तत्तल्लीलानां पूर्वोक्तप्रकारकपुनः पुनरनुकरणेन तत्र हेतुः कृष्णं चित्ताकर्षकमिति पदानि व्यचक्षत पुनर्भूमौ दृष्टिनिपाताद्विशेषेणाचक्षतेति केशवाङ्घ्रिस्पर्शोत्सवेत्याद्युक्तौ पूर्वं केवलं संभावनयैव अधुनातु साक्षादेवापश्यन्नित्यर्थः । साक्षाद् दृष्टपक्षे च पूर्वसाक्षाद् दृष्टान्यपि विरहविह्वलतया ऽनुसंधानाभावाददृष्टानीवाभवन् अधुना च लीलाविष्टत्वेनानुकरणात् किंच तदुपशान्त्या बुद्ध्युदयेनानुसंधानपूर्वकमपश्यन्नित्यर्थः । अत एव विशब्दः परमात्मनः परमप्रियतमस्येति रात्रावपि तल्लक्षणस्तद्दर्शने हेतुः अन्यैर्व्याख्यातं यद्वा प्रदोषे गते शारदपूर्णचन्द्रस्य चन्द्रिकासु विस्तृतासु दूरादपि स्पष्टतया तद्दर्शनमभूत् यद्वा एवमित्यादिकमनुवादमात्रं प्रश्नमध्ये एवं दर्शनाववक्षया ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

पदाक्रमणपूर्वकमारुह्येत्यर्थः ननु निश्चये सम्बोधने वा नृपेति पाठे आश्चर्य्येण सम्बोधनं दुष्टाहे ! इति कालियस्य न्यक्कारेण सम्बोधनं गच्छ इतो निःसर अन्यथा दण्डं कारिष्य इत्याह । जात इति । ननु निश्चितं तल्लीलायामेतद्वाक्यं भावेऽप्यनुकरणं तत्रस्थस्य वाक्यस्य शेषेण तात्पर्य्येण वा ॥ २१ ॥

तत्र चेति चकारेणान्वयः कालियदमनलीलानुकरणेत्वित्यर्थः तत्रैकोवाच हे गोपा इति पाठस्तु बहुत्रैव रेशब्दस्त्वहृद्यत्वान्नाद्रियते एवं श्रीकृष्णेनापि तत्र च चक्षुःपिधानमादिष्टमिति गम्यते दावाग्निं पश्यतोल्वणमिति तु तत्र हेतुवाक्यम् उल्वणं चक्षुस्तेजोहरमित्यर्थः । तच्च निमीलनार्थव्याजादेव एवं मुञ्जाटवीसम्बन्ध्यपि सम्बन्धनीयामिति पृथग् न वर्णितमिति ज्ञेयं आपिदध्वमिति दधस्तथोश्चेति स्मरणादभ्यासस्य भष्भावप्राप्तेरपिधद्ध्वमिति वक्तव्येऽपिदध्वमिति पाठ आर्षो लेखकप्रमादजो वा भष्भावो वर्गचतुर्थत्वमञ्जसा अनायासेनैव ॥ २२ ॥

अन्यया पूर्वमुक्तेर्व्रजेश्वरीचेष्टामात्रं कुर्वत्या तन्वी विरहार्त्या सद्य एव कार्श्यं प्राप्ता तत्र अनुकरणे उलूखलं इति उलूखलानुकारिण्यां कस्यांचिदित्यर्थः । सुदृगिति दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः । मुखं पिधाय हस्ताभ्यामेष वालकभयस्वभावः भीतिः कृष्णस्य भयकार्य्यं कम्पादिकिञ्चिद्रोदनवाक्यादि च तदनुकरणं भेजे एवमन्यासामपि लीलानामनुकरणं यथार्हमूह्यम ॥ २३ ॥

एवं तत्तल्लीलानां पुनः पुनर्गानानुकरणयोः प्रकारेण तत्प्रकारविशिष्टं प्रश्नं कुर्वाणा इत्यर्थः । परमात्मनः सर्वेषामपि मूलस्वरूपस्य पदानि वनोद्देशे व्यचक्षतेत्याश्चर्य्यं यस्य मुनयो वेदेऽपि यथाकथञ्चिदेव सूचकतया शब्दरूपाण्येव पदानि तर्कयन्ति मात्र तस्यैव ताः स्वविहारवनोद्देशे साक्षाच्चरणचिह्नरूपाण्येव पदानि व्यचक्षतेति अहो एतन्मात्रांशेऽपि वयं सर्वेऽपि मुनयो नो तासां साम्यं प्राप्नुमः किम्पुनस्तादृशप्रेमविशेषासादितनित्यतदीयप्रेयसीत्वांशेऽ इति भावः । अन्तर्हित इत्यादिप्रकरणे तेषां व्याख्यायां प्रथमं तापमात्रं द्वितीयं गानसहितान्वेषणं तृतीयं पूतनावधाद्यनुकरणं चतुर्थं पुनरप्यन्वेषणं पञ्चमं पददर्शनमिति क्रमः स्वव्याख्यायां प्रथमं तापमात्रं द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहितान्वेषणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणं चतुर्थं पददर्शनमिति विवेचनीयम ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचान्द्रिका ।

हे नृप ! काश्चित्कालियायतीं शिरसि पदा आक्रम्यापरा काचिदुवाच किमिति हे दुष्टसर्प ! गच्छ इतो ह्रदादपसर ननु हे अहे ! अहं खलानां दण्डधृग् दण्डयिता जातोऽवतीर्ण इति ॥ २१ ॥

तथा तत्र गोपीनां मध्ये काचिदुवाच किमिति हे गोपा ! उल्वणं दुःसहं प्रभूतं वा दावाग्निं पश्यत चक्षूंषि पिदध्वं निमीलयत वो युष्माकमाशु क्षेममञ्जसा सुखेन विधास्ये करिष्यामीति ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एका तु स्रजा काञ्चिद्बध्नन्ती प्रोवाच किमिति हे हरेऽधुना त्वां हैयङ्गवमुषं नवनीतचोरं तद्भाण्डस्य भेत्तारं बात उलूखले बध्नामीति तथैवं बद्धा का च सा भीतेव शोभने दृशौ यस्मिंस्तदास्यं पिधाय हस्ताभ्यामाच्छाद्य सुदृग् वराक्षी वा सती मुखं पिधाय भीतिविडम्बनं भयानुकरणं भेजे चकारेति ॥ २३ ॥

इत्थं पुनरपि वृन्दावने लतास्तरूंश्च कृष्णं पृच्छमानाः वनप्रदेशे परमात्मनः कृष्णस्य पदानि व्यचक्षतापश्यन् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

उपसंहरति । एवमिति । वनोद्देशे वनप्रदेशे ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परमात्मनः सर्वेषामपि मूलस्वरूपस्य पदानि वनोद्देशे व्यचक्षतेत्याश्चर्यमित्यर्थः । अन्तर्हित इत्यादिप्रकरणे तेषां व्याख्यायां प्रथमं तापमात्रं द्वितीयं गानसहितान्वेषणं तृतीयं पूतनावधाद्यनुकरणं चतुर्थं पुनरप्यन्वेषणं पञ्चमं पददर्शनमिति क्रमः। स्वव्याख्यायां प्रथमस्तापः द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहिताद्यनुकरणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणं चतुर्थं पददर्शनमिति विवेचनीयम् ॥ २४—२६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सात्त्विकयाहङ्कारमाह । आरुह्येति । एकामारुह्य पदा च आक्रम्य शिरसि पादाघातं कृत्वा नृपेति संबोधनं विश्वासाय एषा लीला कठिना उपरि वृक्षशाखामवलम्ब्य वा तथा कृतवती वस्तुतस्तु या लीला यथा प्रभुणा कृता सा तथैवात्राविर्भवतीति निरालम्बनत्वेऽपि नानुपपत्तिः दुष्टाहे कालिय ! इतो गच्छ यतो ऽहं खलानां दण्डधृक् जातः नन्विति संबोधनम् अमारणार्थम् ॥ २१ ॥

राजसी पुनस्तत्रैका जाता उवाच वक्ष्यमाणं गोरूपाः काश्चन गोपरूपास्तथापराः एका तु कृष्णरूपा आह । हे गोपा ! उल्वणं दावाग्निं पश्यतेति विरहेण दावाग्निं दृष्टवती भावनया वा तथा भातं सर्वापि क्रीडा भगवद्रूपा तत्र तत्राविरासीदिति दावाग्नेरपि दर्शनम् अन्यासां विशेषाकारेण तस्यां भगवद्भावात् न तत्प्रार्थना एवमेव वातवर्षस्थलेऽपि आतिमतानामेव भगवद्भावेन तल्लीलावेशात्तस्या एव दर्शनमिति निष्कर्षः ॥२२॥

तामसीमाह । बद्धेति । उलूखले कयाचिद्बद्धा स्रजा मालया उलूखलस्थानीयापि काचित् अन्या तु यशोदारूपा तदा भीता सती सुदृक् उत्तमदृष्टियुक्ता आस्यं पिधाय हस्तेन सम्पूर्णमुखमाच्छाद्य भीत्यनुकरणं भेजे अत्र क्रमे गुणा एव प्रयोजकाः भगवद्वशीकरणतदधिकारानुसारेण तत्तल्लीलाः प्रादुर्भवन्ति भगवद्वशीकरणान्ता च लीला अन्यथा अन्ते उलूखललीला न कृता स्यात् लीलाभावनातः परं कर्तव्यमस्तीति लीलायां विरतिः । एवं लीलाभावमुपपाद्य भगवद्भावे वक्तव्ये भगवतो भीतिविडम्बनलीलासितरोहिताः ततः पूर्ववत् पुनः प्रश्न एव स्थितः तस्य सम्वेदनपूर्वकत्वात् एतत्त्वावेशेन जातमिति सम्वेदनरहितम् अतस्तस्य नोपसंहारः ॥ २३ ॥

पूर्वन्तु इत्युन्मत्तवच इति वचनमेवोपसंहृतं नतु प्रश्न उपसंहृतः अत इदानीं मध्ये लीलामुक्त्वा तस्यास्तिरोधाने पुनरेव वृन्दावनलतास्तरून् कृष्णं पृच्छमाना जाता इत्याह । एवमिति । तदा पुनरत्युत्तरे प्राप्ते भगवानाविशत् मोहं दूरीकृत्य सर्वं ज्ञापितवानित्याह । व्यचक्षतेति । तापापनोदनार्थमेव त्रयम् अन्वेषणं लीलावेशो भगवदावेशश्चेति तत्र प्रश्नोऽन्तरङ्ग इति स एव सर्वत्र अनूद्यते वृन्दावनलताः तरून् कृष्णं पृच्छमाना जाता इति ततो वनोद्देशे वनभूमौ भगवतः पदानि दृष्टवत्यः परमात्मन इति पदानां परमपुरुषार्थता सूचिता भगवदावेशे हि सर्वज्ञता भवति तेषां च कार्यं भगवत्पददर्शनं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति श्रुतेः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुष्टाहे हे कालिय ! ॥ २१-२२ ॥

ततश्चाकस्मादुन्मादस्य प्राबल्ये शान्ते सति कृष्णतादात्म्यस्यापि शैथिल्यमभूत् ततश्च अहं गोपीत्यात्मानमनुसन्दधाना काञ्चिद्भाण्डस्फोटनहैयङ्गवमोषणलीलानुकरणोद्यतामालक्ष्य योगमायैव श्रीयशोदायमाना तदुचितं चकारेत्याह । बद्धेति । हैयङ्गवमुषं तु त्वां बध्नामीत्युक्त्वा अन्यया काचित् स्रजा बद्धा सुदृक् आस्यमाच्छाद्य भीतिविडम्बनं भयानुकरणं भेजे इत्यन्वयः ॥ २३ ॥

एवमनेन प्रकारेण कृष्णं पृच्छमाना इत्ययमत्र प्रकारैः प्रलम्भिकस्योन्मादस्य प्रौढिमनि आत्मविस्मृतौ सत्यां स्वप्रेष्ठतादात्म्यमेव स्यात् यदुक्तं प्रियाः प्रियस्य प्रतिरूढमूर्तयः असावहं त्विति कृष्णोऽहं पश्यत गतिमित्यादि तस्यैव मध्यत्वे यत्किञ्चिदात्मानुसन्धानवत्त्वे सत्यनुकरणं यदुक्तं श्रीप्रह्लादचरिते क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकारहेति अत्राप्युक्तं कृष्णायन्त्यपिबत्स्तनमित्यादि तस्यैव मान्द्ये आत्मानुसन्धानस्य प्रायिकत्वे अचेतनेष्वपि तरुगुल्मादिषु प्रश्नः ॥ २४ ॥

केनचित्कृता विशुद्धरसदीपिका ।

आरुह्येति । एका गोपी परां भावनालब्धामाह । दुष्टाहे गच्छेति जातोऽहमिति तल्लीलावेशेन तद्वाक्याभावेऽप्यनुकरणं तात्पर्येणैव ज्ञेयम् ॥ २१ ॥

तत्रेति । गोपा इति भावनालब्धाः प्रत्याह । स्पष्टमन्यत् ॥ २२ ॥

बद्धेति । अन्यया भावनालब्धया श्रीव्रजेश्वरीमनुकुर्वत्या अन्या काचिद्गोपी उलूखले भावनालब्धे बद्धा भावनयैव भीता सती भीतिविडम्बनं भयकार्यं कम्परोदनादिकं भेजे इत्यर्थः । तन्वी विरहार्त्या सद्य एव कार्श्यं प्राप्तेत्यर्थः ॥ २३ ॥

उपसंहरति । एवमिति । अत्र प्रथमं तापमात्रं द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहितान्वेषणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणं चतुर्थं पददर्शनमिति संग्रहः । एवमिति । यथैता अनुचक्रुः एवं याः कृष्णं वृन्दावनलतास्तरून् पृच्छमानास्ताः

केनचित्कृता विशुद्धरसदीपिका ।

परमात्मनः परमरमायाः श्रीराधिकाया आत्मनः परमप्रेष्ठस्य पदानि पदचिन्हानि श्लेषेण पदानि तत्तल्लीलास्थानानीत्यपि उद्देशे उत्कृष्टे देशे प्रागुक्ते इति शेषः व्यचक्षत ददृशुः ॥ २४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

लीलानुकारान्तरमाह । आरुह्येति । नृपेति मुनीन्द्रेण परीक्षित्सम्बोधनम् एका तदात्मकतया कृष्णायमाना अपरां कामपि विरहविषाग्निज्वालेन दंदह्यमानतया स्वशिरसि कृष्णचरणस्पर्शकामनया नीलाम्बरवेष्टनशिरोमणिधारणादिभिः कृतकालीयानुकरणां शिरस्यारुह्य ललितनृत्यगतिवलितप्रेमपवनचलितनलिनायमानपदाक्रम्याह हे दुष्टाहे । गच्छ यतोऽहं ननु नूनं खलानां दण्डधृक् जातः तल्लीलायां यद्यपि नेयं भगवदुक्तिर्दृश्यते तथापि तद्वाक्यशेषेण योग्यतया वायमभिनयः चित्रं चैतत्स्नेहचरित्रं गोप्याः स्वशिरःपदाक्रमणेऽपि तदीयकृष्णानुकारदर्शनेन नेर्ष्यामात्सर्योद्भवः प्रत्युताल्हादवृद्धिरिति ॥ २१ ॥

कश्चित्तु गोप्यः करालां स्वविरहज्वालां स्वरोमद्रुमवनसंलग्नां सर्वदिग्व्यापिनीञ्च पश्यन्त्यः प्रेमवैक्लव्यविगतमतितया तामेव दावाग्निं मत्वा तद्भीता गोपा इव गोपाल रक्षेति ब्रूयुः तत्र तस्मिन् सति एकातु तथैव पश्यन्त्यपि तदात्मकतया कृष्णावेशेनोवाच हे गोपाः ! उल्वणं चक्षुर्भ्यां द्रष्टुमशक्यं दावाग्निं पश्यत अतस्तदुल्वणत्वादेवाशु चक्षूंषि अपिदध्वम् अत्र दधस्तथोश्चेति स्मरणादभ्यासस्य भषभावेनापिधद्ध्वमिति प्रयोग सम्भवेऽप्यपिदध्वमित्यार्षम् अहमञ्जसा क्षेमं विधास्ये तथाच सर्वा नेत्रमीलनेध्यानळयेन रत्नवर्षं घनस्यामं छत्रमेव्योमसमालोक्य शमितविरहज्वालाः कृष्णेन दावाग्ने रक्षिता वयमिति मत्वोन्मीळने पुनः पूर्ववद्बभूवुः अत्र कालीयदमनोत्तरनिशि गतायां मुञ्जाटवीगतायाश्च दावाग्निमोचनलीलाया अनुकरणं ज्ञेयम् ॥ २२ ॥

पूर्वं बाललीलां निरूप्य कैशोरलीलानिरूपणेऽपि न प्रेमविह्वलितानां क्रमानुसन्धाननियम इति द्योतयन्मुनीन्द्रः पुनर्बाललीलानुकारमाह । बद्धेति । काचित्तु सुदृक् शोभनाक्षी तन्वी सुलनुमती कृष्णानुकारेण सफलशरीरा वा अन्यया कृष्णस्य स्नेहगुणबन्धनाधीनत्वमनुसन्दधत्या स्रजा कृष्णगुणग्रथितसुमनस्त्वेन स्रग्रूपया स्रजा पुष्पमालयेति करणनिर्देशो वा तत्र उलूखलाभावेन अत एव प्रेमविरहजडीकृतदेहत्वेन तत्र उलूखलकारोपविषयां कास्याश्चिद्दोष्याभेव कृष्णसंश्लेषकामिन्यां बद्धा स्वयं विरहदुःखेन भीता आस्यं हस्ताभ्यामधःकरेण वा पिधाय भीतस्य यशोदाबद्धभीतकृष्णस्य विडम्बनमनुकारं भेजे भीता अलघो दृशौ च यस्या इत्येकम्वा पदम् ॥ २३ ॥

श्रीशुको मुनीन्द्रः प्रेमपथाचार्य्यरूपगोपीनां चरितेनैव तत्पथमुपदिशंस्तेनैव प्रथमं भगवत्पददर्शनमाह । एवमिति । एवं विरहोपतापपूर्वकं मिथः सङ्गत्य तदात्मकतया शुणगानानुकारपरा वृन्दावनलतास्तरून् कृष्णं पृच्छमाना वनोद्देशे परमात्मनः पदानि व्यचक्षतेत्यन्वयः तत्रैव पृच्छमाना व्यचक्षतेत्युक्त्या परमात्मकृष्णान्वेषणे तत्पददर्शने प्रति पारप्रश्नस्य प्राधान्यमन्वेषामेवेत्युक्त्या प्रकारान्तःपातित्वेन तदङ्गत्वं तत्र लतास्तरूनित्युक्त्या यत्र यत्र तदुपदेशसम्भावना तत्र तत्र प्रश्नकथने नैकत्र स्वगुरावेव प्रश्ननियमो वारितः तत्राङ्गेष्वपि अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् इत्यादिना प्रदीप्तशिरा जळराशिमिवेत्यधिकारपठिततदप्राप्त्युपतापः प्रथमं गृहगमनाशात्यागेन वृन्दावने एव तत्प्राप्त्याशयावस्थानं द्वितीयं तत्र गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनमित्यत्र संहता इति सत्सङ्गस्तृतीयः तत्रामुमेव गायन्त्य इति भगवद्गुणगानं चतुर्थं तत्र गाने एवकारेणेतरव्यावृत्ति रुच्चैरित्यनेन लज्जाव्यावृत्तिश्च गुणः विचिक्युरित्यनेन गानान्वितान्वेषणं पञ्चमं तत्रान्वेषणे उन्मत्तकवदिति प्रेमपथकुशलत्वेऽपि प्रेमपथोन्मत्तैहिकामुष्मिककुशलदृष्ट्योन्मत्ततया तत्तुल्यत्वकथनं तच्चान्वेषणे गुणः वनाद्वनमित्युक्त्यान्वेषणे आश्रमविशेषाग्रहत्यागोऽपि गुणो दर्शितः तथा लीळा भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका इत्यत्र भगवल्लीलानुकरणं प्रधानं षष्ठं निर्दिष्टं तत्र तदात्मकत्वम् दृष्टकैशोरशृङ्गारलीलानुकरणप्राधान्येऽपि प्रियतमलीलात्वाल्लीळान्तरानुपेक्षणश्च गुणः एवं साङ्गं प्रश्नं कुर्वत्यो वनोद्देशे व्यचक्षतेत्यनेन वृन्दावनस्याराधनसिद्धभूमित्वोक्तिः भगवता स्वपदाङ्कानां प्रथमाविष्कारस्तु तत्रानुरागेण मदमानभङ्गतया सानुरागगानेन स्वाविष्काराय यत्तु कैश्चित् वनोद्देशे परमात्मनः पदानि व्यचक्षतेत्यनेन गोपीनामुत्कर्षकथनं तद्बहुसमीचीनं यत्तु तत्पदादर्शनेन सर्वमुनीनामपकर्षोक्तिः सा त्वनुचिता तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इत्यादिश्रुतिविरुद्धत्वात् कस्यचिदपि तद्भक्तस्यापकर्षासम्भवात् शुकादीनामभक्तत्वस्य वक्तुमशक्यत्वाच्च ॥ २४ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

एका कृष्णरूपा कालियरूपां कां चिच्चरणेनाक्रम्य तस्याः शिरसि आरुह्याह हे दुष्टाहे । इतो गच्छ ननु निश्चयेन खलानामहं दण्डधृक् जात उपरि शिरसि काचिद्वृक्षशाखामवलम्ब्यान्तःकरणे भगवतः आवेशान्निरालम्बतयैव वा यथा तदीयपाळनशास्त्रावेशान्तरस्य नृपेति सम्बोधनाशयः ॥ २१ ॥

तत्र तासु मध्ये एका कृष्णरूपा गोपरूपा उवाच हे गोपाः ! उल्वणं दावाग्निं पश्यत शीघ्रं चक्षूंषि पिदध्वं निश्चयेनाञ्जसा क्षेमं विधास्ये अत्र विरहेण दावाग्निदर्शनं भावनया वा अन्यासां तु तस्या वस्तुतः भगवद्भावभावनात्त्राणप्रार्थना एवमेवजातं वर्षस्थलेऽपि अत्यन्तमत्तानामेव तदावेशेन भगवद्भावोदयात् ॥ २२ ॥

तत्र तासु मध्ये सुनयनमास्यं वामहस्तेनाच्छाद्य भीत्यनुकरणं कृतवती ॥ २३ ॥

एवमनुकरणं कृत्वा पुनरपि तथैव पृच्छमानाः भगवतः पदानि ददृशुरित्याह । एवमिति । तथाच गाढोन्मादे भगवल्लीळानुकरणमप्रमादे प्रश्न इत्येवं भ्रमणात्तासां भगवत्प्रसादेन समाहिततापासा तच्चरणदर्शनं जातमित्याशयेनाह । व्यचक्षतेति । परमात्मनः परमेश्वरस्य श्रीकृष्णात्मनावतीर्णस्य पदमप्रिमस्येति वा कस्मिंश्चिच्छन्नप्रदेशे भूमौ संळग्नानि पदानि दृष्टवत्यः निवृत्तिपक्षे चित्तैकाग्रतासिद्ध्यर्थं भगवत्कृतलीलानुकरणं वर्णयन्त्यः पुनस्तदन्वेषणप्रकारं बोधयन्त्यः वनोद्देशे अन्तःकरणलक्षणस्य वनस्य सात्विकप्रदेशे पदानि चिदाभासलक्षणानि

पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः ॥
लक्ष्यन्ते हि ध्वजाम्भोजवज्राङ्कुशयवादिभिः ॥ २५ ॥
तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।
वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः समब्रुवन् । २६

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

चिल्लक्षणपदज्ञाप्रकाति तत्रातिकृतिभूतानि व्यचक्षत तदवलोकनं निरूपयामासुरित्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहे ! सर्प ! ॥ २१ ॥

आशु शीघ्रमपिदध्वं निमीलयत ॥ २२ ॥

सुदृक् शोभने दृशौ यस्मिन् तदास्यम् पिधाय पाणिभ्यामाच्छाद्य भीतिविडम्बनं भयानुकरणं भेजे ॥ २३ ॥

एवं वृन्दावने लताः तरूंश्च कृष्णं पृच्छमानाः वनोद्देशे वनप्रदेशे परमात्मनः पदानि व्यचक्षत अपश्यन् ॥ २४ ॥

भाषा टीका।

हे राजन् ! एक गोपी दूसरी के मस्तक पै पांव रख दवा कर बोली अरे दुष्ट काली नाग तू इहांते चलो जा मैं सब दुष्टों को दंड देवे वारो पैदा भयो हूं ॥ २१ ॥

तिनमें ते एक गोपी वोली गोपो हो यह वडो भयङ्कर दावानल है देखो तुम सव अपने आंख मूंदो जल्दी तुमारे भयको मैं छुटाऊंगो ॥ २२ ॥

एक गोपी ने दूसरी को मालाते वांध दामोदर लीला कीनि दूसरी ने सुंदर नेत्रों वाले मुख आंख को ढांक के भयभीत सी हो कृष्ण की चेष्टा दिखाई ॥ २३ ॥

या प्रकारते सव गोपी वृंदावन में वृक्ष लतानते पूछत घूमत भई इतने में वन में काउ उत्तम स्थान पै परमात्मा श्रीकृष्णचंद्र के चरणों के चिन्हों के दर्शन कीने ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुपृक्तानि सम्मिश्राणि ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततश्चान्योऽन्यमाहुः । पदानीति । पदचिह्नानि व्यक्तं निश्चितम् एतानि नन्दसूनोरेव भवन्ति नान्यस्य हि यतः ध्वजादिभिर्विलक्ष्यन्ते तत्रैव हेतुमाहुः । महात्मनः महापुरुषत्वादित्यर्थः आदिशब्दाच्चक्रशङ्खादयः अत्र विशेषः श्रीविष्णुपुराणे—

विलोक्यैका भुवं प्राह गोपीगोपवराङ्गना--

पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला॥
ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि ! पश्यत ।
पदान्येतानि कृष्णस्य लीलालंकृतगामिन इति ॥

ध्वजादीनां धारणप्रयोजनमुक्तं स्कान्दे—

दक्षिणस्य पदो ऽङ्गुष्ठमूले चक्रं बिभर्त्यजः ।
तत्र नम्रजनस्यारिषड्वर्गच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम् ।
भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि ॥
तथा वामपदाङ्गुष्ठमूलतस्तन्मुखं दरम् ।
सर्वविद्याप्रकाशाय दधाति भगवानसौ ॥
पद्मादीन्यपि चिह्नानि तत्र दक्षिणपादवत् इति ।

॥ २५ ॥

तैस्तैर्ध्वजादिलाक्षितैः वीप्सा बाहुल्यस्य कैवल्यस्य वा विवक्षया अबलाः विरहान्वेषणाभ्यां बलहीना अपि तस्य कृष्णस्य पदवीं वर्त्म अग्रतोऽन्विच्छन्त्यः मृगयमाणाः वध्वाः कस्याश्चित् व्रजदेव्या यद्वा स्वभावत एव लज्जाशीलत्वात् स्नुषावत् सर्वतः सङ्कुचितत्वेन किम्वा श्रीव्रजेश्वर्या मनोरथविशेषेण वधूरिति तन्मुखोद्गत्या गोकुले वधूत्वेन प्रसिद्धायाः श्रीराधाया एव तन्नामाग्रहणकारणं लिंखितमेव वधूपदलक्षणमुक्तं श्रीविष्णुपुराणे—

कापि तेन समं याता कृतपुण्या मदालसा ।
पदानि तस्याश्चैतानि घनान्यल्पतनूनि चेति ॥

सुष्ठु पृक्तानि मिलितानि पदानि अंसन्यस्तप्रकोष्ठत्वात् एवमात्मारामत्वादिना तासां मानतोऽसूयया वा अन्तर्हित इति निरस्तं तासामेकस्या नयनात् तत्र तत्रैव ताभिः सह स्थितया तया केनापि सङ्केतेन ततो निःसारितया तदर्थं दूरे प्रादुर्भूतस्याग्रे कियत्पदप्रयाणानन्तरं मिलनादित्यूह्यम् आर्ताः स्वपरित्यागेन तदेकपरिग्रहात् यद्वा विरहेणार्ता अपि सम्यग्विचारादिपूर्वकमब्रुवन् अन्योऽन्यमूचुः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्चान्योऽन्यमाहुः । पदानि इति । पदचिह्नानि व्यक्तं स्फुटमेवैतानि नन्दसूनोः पदानि लक्ष्यन्ते । कैर्ध्वजादिभिः हि प्रसिद्धौ ध्वजादीनि तत्र प्रसिद्धान्येवेत्यर्थः । ध्वजादियोगे हेतुः महात्मनः परमपुरुषोत्तमस्येत्यर्थः । आदिशब्दादन्यान्यपि । तत्र पाद्मे ब्रह्मनारदसम्वादे श्रीकृष्णमभिलक्ष्य "चीडशैवन्तु चिह्नानि

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मया दृष्टानि तत्पदे । दक्षिणे चाष्ट चिह्नानि इतरे सप्त एव च । ध्वजा पद्मं तथा वज्रमंकुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथैव च । सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम ! । इन्द्रचापं त्रिकोणञ्च कलशं चार्द्ध चन्द्रकम् । अम्बरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम् षोडशञ्च तथा चिह्नं शृणु देवर्षिसत्तम ! । जम्बूफलसमाकारं दृश्यते यत्र कुत्रचिदिति । क्रमदीपिकायाम् । मत्स्यांकुशारिदरकेतुयवाब्जवद्भैरिति । श्रीगोपालतापिन्याम् । शङ्खध्वजातपत्रैस्तु चिह्नितं चरणद्वयमिति आदिवाराहे मथुरामण्डलमाहात्म्ये । यत्र कृष्णेन सञ्चीर्णं क्रीडितं च यथासुखम् । चक्राङ्कितपदा तेन स्थाने ब्रह्ममये ऽगुणे इति । एवं चक्रशङ्खातपत्रैरधिकैरूनविंशतिश्चिह्नानि । स्कान्दे तु यच्च-क्रादिषट्कमात्रमुक्तं तत्तु श्रीविष्णादावेव । यत उक्तं षोडश-चिह्नप्रसङ्ग एव पाद्मे । अङ्कान्येतानि भो विद्वन् ! दृश्यन्ते तु यदा कदा । कृष्णाख्यन्ते परं ब्रह्म भुवि जातं न संशयः । द्वयं वाथ त्रयं वाथ चत्वारि पञ्च चैव च । दृश्यन्ते वैष्णवश्रेष्ठ ! अवतारे कथञ्चनेति । तेषां स्थाननियमो यथा तत्रैव । मध्ये ध्वजातुविज्ञेया पद्मं त्र्यङ्गुलमानतः । वज्रं वै दक्षिणेपार्श्वे अङ्कुशो वै तदग्रतः । यवो ऽप्यङ्गुष्ठमूले स्यात् स्वस्तिकं यत्र कुत्रचित् । आदिं चरणमारभ्य यावद्वै मध्यमा स्थिता । तावद्वै चोर्ध्वरेखा च कथिता पाद्मसंज्ञके । अष्टकोणन्तु भो वत्स मानञ्चाष्टाङ्गुलैश्च तत् । निर्दिष्टं दक्षिणे पादे इत्याहुर्मुनयः किल । दक्षिणेतरस्थानानि सम्वदामीह साम्प्रतम् । चतुरङ्गुलमानेन त्वङ्गुलीनां समीपतः । इन्द्रचापं ततो विद्यात् स्वत्र न भवेत् कचित् । त्रिकोणं मध्यनिर्दिष्टं कलशो यत्र कुत्रचित् । अष्टाङ्गुलप्रमाणेन तद्भवेदर्द्धचन्द्रकम् । विन्दुर्वै मत्स्यचिह्नञ्च आद्यन्ते वै निरूपितम् । गोष्पदं द्विखुरं ज्ञेयमाद्या-द्यङ्गुलिमानतः । इत्येतल्लक्षणं तत्रैव पद्माकारा ध्वजा प्रोक्ता प्रान्ते त्रैकोणिकान्वेत्यादि । व्याख्यायते च त्र्यङ्गुलमानतः । मध्यमाङ्गुल्यग्रात् तावन्मानं परित्यज्येत्यर्थः । वक्ष्यमाणयुक्तेः । पद्मस्याधो ध्वजं धत्ते इति स्कान्दसम्वादाच्च । यत्र कुत्रचिदिति यथाशोभं बहुत्रेत्यर्थः । आदिं चरणम् अङ्गुष्ठतर्ज्जन्योरन्तरालं यावन्मध्यं मध्यदेशं तावद्व्याप्य स्थिता तत्तस्याष्टकोणस्य मानमष्टाङ्गुलैर्ज्ञेयम् अग्रतोऽष्टाङ्गुलीः परि-त्यज्येत्यर्थः । स्वरूपमाने स्थानासमावेशः संच चरणस्य दैर्घ्ये चतुर्दशाङ्गुलप्रमाणत्वं विस्तरो षडङ्गुलिप्रमाणत्वमिति हयशीर्ष-मत्स्यादिप्रसिद्धत्वात् एतदनुसारेण त्र्यङ्गुलमानत इत्यपि व्याख्यातं व्याख्यास्यते चान्यत्र इन्द्रचापत्वं निर्गुणत्वात्तादृशवर्णमयत्वाच्च चतुरङ्गुलमानेनेति तावन्मानपरित्यागत उक्तं मध्यमाङ्गुल्यधः स्थितत्वात् तथा दैर्घ्यतोऽपि ज्ञेयं शोभोपयोगात् मध्यनिर्दिष्टं चरणमध्ये स्थितम् अष्टाङ्गुलप्रमाणेन त्रिकोणस्याध इत्यर्थः । तत्को-टिद्वयस्य किञ्चित्त्रिकोणप्राप्तित्वात् विन्दुरम्बरपर्य्यायः अयं च बाह्याभ्यन्तरमण्डलद्वयात्मकः द्विरेखासु समान्वितमिति तत्रैव सलक्षणोक्तेः सर्वचिन्हानामुपरि विन्दुः मत्स्यः सर्वचिन्हानामधः द्विखुरं द्विशफम् आद्याद्विन्दोर्द्व्यङ्गुलमानत इति इन्द्रचापादध इत्यर्थः पताकाकारावर्त्मतुल्या प्रान्ते त्रैकोणिकं पताकास्थानीयं यस्यां सा तत्तस्या अलङ्कृ एतच्च त्रैकोणिकं दक्षिणत एव ज्ञेयं वामत ऊर्ध्वरेखापि हतेः षोडशं चिह्नं पादद्वय एव ज्ञेयम् अनियमेनोक्तत्वात् जम्बूफलस-मतया निर्देशेन तद्वर्णतदाकारमयमेव तच्चिन्हं नतु रेखाकारं चक्रशङ्खौ तु–

> दक्षिणस्य पदोऽङ्गुष्ठमूले चक्रं बिभर्त्यजः ।
> तथा वामपदाङ्गुष्ठमूलतस्तन्मुखं दरमिति ॥

स्कान्दानुसारेणैव ज्ञेयौ छत्रं तु प्राधान्याद्दक्षिणचरण एव तत्रापि चिह्नान्तरशून्यप्रदेशत्वाच्चक्राध एव ज्ञेयं तासां तद्दर्शनप्रकारश्चायं श्रीविष्णुपुराणे–

> विलोक्यैका भुवं प्राह गोपीगोपवराङ्गना ।
> पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला ॥
> ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि पश्यत ।
> पदान्येतानि कृष्णस्य लीलालङ्कृतगामिनः ॥

इति ॥ २५ ॥

तैस्तैर्ध्वजादिशोभितैः वीप्सा मध्ये मध्ये दूर्वामय्यादि भूमौ विच्छिन्नत्वात् स्थानबाहुल्यस्य विवक्षया । अग्रत इति तावत् पर्य्यन्तं कृष्णेनैवाङ्के निधाय तस्यानयनात् । अवला विरहा-न्वेषणाभ्यां वलहीना अपि तस्य कृष्णस्य पदवीं वर्त्म अन्वि-च्छन्त्यः मृगयमाणाः । वध्वाः श्रीराधायास्तस्या एव परमसौ-भाग्यवतीत्वेन स्थापयिष्यमाणत्वात् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा दृष्टभगवत्पदानां तासामुक्तिमाह । पदानीति । इमानि महात्मनो नन्दसूनोः पदानि व्यक्तं नूनं कुतः हि यस्मात् ध्वजा-दिभिः रेखात्मकैर्लक्ष्यन्ते इति ॥ २५ ॥

ततस्तैस्तैर्ध्वजादिचिन्हितैःपदैस्तस्य कृष्णस्य पदवीं पुरःपुरोऽन्वि-च्छन्त्यः अन्वेषयन्त्यः अबला गोप्यस्तदा कस्याश्चिद्वध्वाः पदैः सुपृक्तानि अन्तरान्तरा युक्तानि भगवतः पदानि विलोक्यार्ताः दुःखिता ऊचुः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ॥

परमात्मचरणाकृतित्वं कथमवगम्यत इति तल्लक्षणमुच्यते पदानीति । लता कल्पलता आदिशब्देन चक्रादिकं गृह्यते यवा-दीत्यपि पाठः ॥ २५ ॥

आन्विच्छन्त्यः अन्वेषणं कुर्वन्त्यः वध्वाः कस्याश्चिद्गोपस्त्रियः पदैश्चरणैर्निक्षिप्तैः सुपृक्तानि अन्तराले मिश्रितानि ईर्ष्यार्ताः समब्रुवन् संलापमकुर्वन् ॥ २६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ॥

एता अपि पूर्ववत् दशविधाः तथैव तासां वचनानि पदानि प्रत्यक्षयोग्यानि सर्वैरेव दृश्यन्त इति तेषां याथात्म्यज्ञानं साम्यम् अतः प्रथममाहुः । पदानि व्यक्तमेतानीति । एतानि पदानि नन्दसूनोरेव व्यक्तं सत्यं नात्र सन्देहः चिन्हैः पदानां विशे-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

षण्णां चिन्हान्येव कथं भवन्तीत्याशङ्क्य तत्रोपपत्तिमाहुः महात्मन इति । महतामप्यात्मा महान्वा ब्रह्मरूपः तस्य तत्तत्कार्यार्थं पदे चिन्हानि भवान्ति प्रकृतेऽपि तेषामुपयोग इति तद. भिव्यक्तिः क्रियते तानि चिन्हान्याहुः । लक्ष्यन्त इति । अनुमी. यन्ते पदानि असाधारणधर्मैः लोकेऽप्येतादृशोऽर्थः प्रसिद्ध इति सम्मतिः ध्वजस्य स्थापनं भक्तानां निर्भयावासार्थम् अम्भोजस्थापनं सुखसेव्यत्वाय चक्रस्थापनं रक्षायै मनोनिग्रहार्थमंकुशस्थापनं कीर्तिसिध्यर्थं यवः वज्रादयोऽप्यादिशब्देनोच्यन्ते पापपर्वतादिनि. राकरणार्थाः ॥ २५ ॥

एवमसाधारणधर्मैः पदानि निश्चित्य तन्मार्गेण गता इत्याह । तैस्तैरिति । ज्ञानं क्रियापर्यवसायीति क्रिया निरूप्यते तत्पद्वीमन्विच्छन्त्योऽग्रतोऽबलाः जाताः पदान्यन्विष्य तत्पदवीं गता इत्यर्थः । मध्ये तासां प्रतिबन्धमाह । वध्वा इति । यदि तासां मत्सरदोषो न स्यात् गच्छेयुरेवान्तिकं दोषवशाच्च परं कुण्ठिता भवन्ति तदाह । वध्वाः कस्याश्चिद्गोपिकायाः पदैः सुपृक्तानि पङ्क्त्याकारेण गतानि भगवत्पदानि दृष्ट्वा तानि विलोक्य च आर्त्ता जाताः तदा अन्योऽन्यमेवाब्रुवन् ज्ञानाक्रिययोरुपस. र्जनत्वं कृत्वा वाचि प्रतिष्ठिताः जाताः अन्यथा शीघ्रगमने भगवान् प्राप्तः स्यात् ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदेवं त्रिविधमुन्मादं निर्वर्ण्य, तदन्तरेवाकस्मात्कृष्णस्य पदचिन्हान्यालक्ष्य सानन्दवितर्कमाहुः । पदानीति । ध्वजादीनां धारणस्थानं प्रयोजनं चोक्तं स्कान्दे—

> दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः ।
> तत्र भक्तजनस्यारिषड्वर्गच्छेदनाय सः ॥
> मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः ।
> ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् ॥
> पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ॥
> कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
> पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम् ॥
> भोगसंपन्मयं धत्ते यवमङ्गुष्ठपर्वणीति ॥
> वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रत इति ॥

तत्रैव स्कान्दे कृष्णामधिकृत्योक्तत्वात् कनिष्ठामूलेऽङ्कुशस्तले वज्रमित्याहुः सांप्रदायिकाः पार्ष्णावंकुशस्तु नारायणादेर्ज्ञेयः तदेवं चक्रध्वजकमलवज्रांकुशयवा इति षट्चिन्हानि कृष्णस्य दक्षिणे चरणेऽन्यान्यपि चिन्हानि वैष्णवतोषणीदृष्ट्या लिख्यन्ते अंगुष्ठतर्जनीसन्धिमारभ्य यावदर्द्धचरणमूर्ध्वरेखा ७ चक्रस्य तले छत्रम् ८ अर्द्धचरणतले चतुर्दिगवस्थितं स्वास्तिकचतुष्टयं ९ स्वास्तिकचतुःसन्धिषु जम्बूफलचतुष्टयं १० स्वस्तिकमध्ये अष्टकोणमित्येवमेकादशचिन्हानि ११ तथा वामपदांगुष्ठमूलतस्तन्मुखं दरं सर्वविद्याप्रकाशाय दधाति भगवानसाविति १ मध्यमामूलेऽम्बरं अन्तर्बाह्यमण्डलद्वयात्मकं २ तदधः कार्मुकं विगतज्यं ६ तदधो गोष्पदं ४ तत्तले त्रिकोणं ५ तदभितः कलशानां चतुष्टयं कचित्रितयं च दृष्टं ६ त्रिकोणतलेऽर्द्धचन्द्रोऽग्रद्वयस्पृष्टत्रिकोणकोणद्वयं ७ तदधो मत्स्य इत्यष्टौ मिलित्वा ऊनविंशतिः ॥ २५ ॥

सुपृक्तानि मिश्रितानि ॥ २६ ॥

केन चित्कृता विशुद्धरसदीपिका ।

दृष्ट्वा च परस्परमूचुः । पदानीति । व्याख्यातं व्यक्तं निश्चितं नन्दसूनोरिति गुरुनामोक्त्या सख्यं सूचितं महात्मनः सर्वसल्लक्षणयुक्तस्य परमधीरस्य ह्यि हि यतः ध्वजादिभिर्लक्ष्यन्ते आदिपदादन्यैरपि तान्युक्तानि पाद्मे "षोडशैव तु चिन्हानि मया दृष्टानि तत्पदे । दक्षिणेचाष्टचिन्हानि इतरे सप्त एवच । ध्वजा पद्मं तथा वज्रमङ्कुशो यव एवच । स्वास्तिकं चोर्ध्वरेखा च अष्टकोणं तथैवच । इन्द्रचापं त्रिकोणञ्च कलशं चार्द्धचन्द्रकम । अम्बरं मत्स्यचिन्हञ्च गोष्पदं सप्तमं स्मृतम् । षोडशन्तु तथा चिन्हं शृणु देवर्षिसत्तम ! जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् इति । "क्रमदीपिकायाञ्च मत्स्यांकुशारिदरकेतुयवाब्जवज्रैरिति शङ्खः तापनीश्रुतौ शङ्खध्वजातपत्रैरिति छत्रं वराहतन्त्रे चक्राङ्कितपदा तेनेति चक्रमिति त्रीण्यधिकानि ततश्चैकोनविंशतिचिन्हानीति सिद्धम् एषां स्वरूपं स्थानानि च वैष्णवतोषिण्यां यथा पाद्मे "मध्ये ध्वजा तु विज्ञेया पद्मं त्र्यङ्गुलमानतः । वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रतः । यवोऽप्यङ्गुष्ठमूले स्यात्स्वास्तिकं यत्र कुत्रचित् । आदिं चरणमारभ्य यावद्वै मध्यमा स्थिता । तावती चोर्ध्वरेखा स्यात् कथिता पापसंज्ञके अष्टकोणं तु भो वत्स ! मानं चाष्टाङ्गुलैश्च तत् । निर्दिष्टं दक्षिणे पादे इत्याहुर्मुनयः किल । दक्षिणेतरस्थानानि सम्वदामीह साम्प्रतं चतुरङ्गुलमानेन स्वङ्गुलीनां समीपतः । इन्द्रचापं ततो विद्यादन्यत्र न भवेत्कचित् । त्रिकोणं मध्ये निर्दिष्टं कलशो यत्र कुत्रचित् अष्टाङ्गुलप्रमाणेन तद्भवेदर्द्धचन्द्रकम् विन्दुर्वै मत्स्यचिन्हञ्च आद्यन्ते वै निरूपितम् । गोष्पदं द्विखुरं ज्ञेयमाद्याद्यङ्गुलमानतः । एतल्लक्षणं तत्रैव पद्माकारा ध्वजा प्रोक्ता प्रान्ते त्रैकोणकादनु इति व्याख्यायते च त्र्यङ्गुलमानतः मध्यमाङ्गुल्यग्रात्तावन्मानं परित्यज्येत्यर्थः । वक्ष्यमाणयुक्तेः पद्मस्याधो ध्वजं धत्ते इति स्कान्दसम्वादाच्च यत्र कुत्रचिदिति यथाशोभं बहुत्रेत्यर्थः आदिं चरणमङ्गुष्ठतर्जन्योरन्तरालं यावन्मध्यं मध्यदेशं तावद्व्याप्य स्थिता तत्तस्याष्टकोणस्य मानमष्टाङ्गुलैश्चेयमग्रतोऽष्टाङ्गुलीः परित्यज्येत्यर्थः । स्वरूपमाने स्थानसमावेशः स च चरणस्य दैर्घ्ये चतुर्दशाङ्गुलपरिमाणत्वं विस्तारे षडङ्गुलपरिमाणत्वमिति हयशीर्षमात्स्यादिप्रसिद्धत्वात् एतदनुसारेण अङ्गुलमानत इत्यपि व्याख्यातं व्याख्यास्यते चान्यत्र इन्द्रचापं निर्गुणत्वात्तादृशवर्णमयत्वाच्च चतुरङ्गुलमानेनेति तावन्मानपरित्यागत इत्युक्तेः माध्यमाङ्गुल्यधः स्थितविन्दोरधः स्थितत्वात् तथा दैर्घ्यतोऽपि ज्ञेयं शोभोपयोगात् मध्यनिर्दिष्टं चरणमध्ये स्थितम् अष्टाङ्गुलप्रमाणेन त्रिकोणस्याध इत्यर्थः । तत्कोटिद्वयस्यकिंचित्कोणग्रासित्वात् विन्दुरम्बरपर्यायः अयञ्च बाह्याभ्यन्तरमण्डलद्वयात्मकः द्विरेखासुसमन्वितमिति तत्रैव तल्लक्षणोक्तेः सर्वचिन्हानामुपरि विन्दुः मत्स्यः सर्वचिन्हानामधः द्विखुरं द्विशफमाद्याद्विन्दोर्द्व्यङ्गुलमानतः । इन्द्रचापादध इत्यर्थः पद्माकारावर्त्यनुल्या प्रान्ते त्रैकोणिकं पताकास्थानीयं यस्याः सा सप्तम्या अलुक् एवञ्च त्रैकोणिके दक्षिणत एव ज्ञेयं वामत ऊर्ध्वरेखापहतेःषोडश चिन्हं पादद्वय एव ज्ञेयम् अनियमेनोक्त-

केनचित्कृता विशुद्धरसदीपिका ।

त्वात्तु जम्बूफलसमतया निर्देशेन तद्वर्णत्तदाकारमेव चिह्नं तत् नतु रेखाकारं चक्रशङ्खौ तु दक्षिणपादाङ्गुष्ठमूले चक्रं विभर्त्येजः तथा वामपदाङ्गुष्ठम् ततस्तन्मुखं दरमिति स्कान्दानुसारेणैव ज्ञेयौ छत्रन्तु प्राधान्यात् दक्षिणचरण एव ज्ञेयम् तत्रापि चिह्नान्तरशून्यप्रदेशत्वाच्चक्राध एव ज्ञेयं तासां दर्शनप्रकारश्च श्रीविष्णुपुराणे—

विलोक्यैका भुवं प्राह गोपीगोपवराङ्गना ।
पुलकाञ्चितसर्वाङ्गी विकाशिनयनोत्पला ॥
ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि पश्यत ।
पदान्येतानि कृष्णस्य लीलालंकृतगामिन इति ॥

एवञ्चैकोनविंशतिषु कतिचिदेव यत्र तत्र संगृहीतानि इति तेषामसाधारणं प्रयोजनं प्रकृतोपयोगि यथा ध्वजस्य रूपगुणादिभिरनङ्गायनेकसैन्यायकवृन्दविजेतृत्वं वज्रस्य वैरिविदारणम् अंकुशस्य सर्ववशीकारित्वम् अम्भोजस्य रमास्पदत्वं यवस्याखिलवृत्तिप्रदत्वमिति यथा योगमन्येषामप्यूह्यम् ॥ २५ ॥

ततश्च तैस्तैर्ध्वजादिशोभितैः वीप्सा मध्ये मध्ये दूर्वादिमय्यां भूमौ विच्छिन्नत्वात् एता विपक्षाः आर्त्ता इत्युक्तेः अत एवाबलाः शुद्धप्रेमाख्येन मदीयताभिमानेन बलेन हीनाः, यद्वा अबलीयन्ते इत्यबलाः अधीरत्वादग्रेसरत्वादवाङ्मुखीभूता इत्यर्थः यद्वा अग्रत इति वध्वा इत्यनेन योज्यम् अग्रतो वर्त्तमानाया वध्वा इत्यर्थः । ततश्च तावत्पर्यन्तं श्रीकृष्णेनैवाङ्के निधाय नयनात् स्त्रीत्वज्ञानञ्च तत्पदानां श्रीकृष्णचरणापेक्षया द्व्यङ्गुलोनेत्वेन लघुत्वात्तनुचिताङ्कवत्त्वाच्च वध्वा इति मुनीन्द्रस्यानुरागोक्तिः तस्या एव परमसौभाग्यवर्तित्वेन स्थापयिष्यमाणत्वान्नववध्वा इत्यर्थः । सुपृक्तानि सानन्दं सोत्कण्ठं सन्निकृष्टतया गमनात् यद्वा अबलाः तस्याः पदचिह्नानि विलोक्यैव सौभाग्यबलहीना जाता इत्यर्थः तानि चोक्तानि सुधर्मोध्वबोधे कुमारः—

श्रीकृष्णप्राणनाथायाः राधाया परमश्रियः ।
यवं वामपदाङ्गुष्ठमूले सन्ध्यङ्करूपिणम् ॥
अनुवृत्तञ्च तन्मूलतले चक्रं सुलाञ्छनम् ।
निम्ने छत्रं ततः पश्चात्सन्ध्यायेदग्रश्टङ्गकम् ॥
आरभ्याङ्गुष्ठतर्जन्योरन्तरा यावदर्द्धयत् ।
ऊर्ध्वरेखा नामिकाया मूलदेशे तथाम्बुजम् ॥
ध्वजमग्रोच्छ्रयं पश्चात्तथा दक्षिणचैलकम् ।
सपताकं ततः पश्चात्कल्पवल्लीं किलोर्ध्वगाम् ॥
तस्या दक्षिणपार्श्वे वै पङ्कजं वसुपत्रकम् ।
कनिष्ठामूलतलतो दक्षिणे वक्रमंकुशम् ॥
अग्रश्टङ्गं समाध्यायेद्राधापदप्रविष्टधीः ।
पार्ष्णौ तिर्यक्श्चमर्द्धेन्दुमर्द्धभागाग्रखण्डितम् ॥
तस्य दक्षिणपार्श्वे वै बलयं मम चिन्तयेत् ॥
श्रीराधादाक्षिणे पादे चिह्नान्यथ विचिन्तयेत् ।
अङ्गुष्ठमूलतलतः शङ्खमञ्जालपरन्ध्रकम् ।
चतुष्टयाङ्गुलीमूलतलतोऽद्रिं क्रमादृजुम् ॥
ततःपश्चाद्रथं त्वग्रमुखं सर्वाङ्गसंयुतम् ।
वामपार्श्वेऽग्रकोटिं तु शक्तिं दक्षे गदां स्मरेत् ।

तत्पश्चिमे तु पार्ष्णिस्थे प्रायो ह्यग्रमुखं झषम् इति ॥
विशेषजिज्ञासायां भक्तिमञ्जूषा द्रष्टव्या ॥ २६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

काश्चिद् दृष्ट्वा अन्याः प्रति दर्शयन्त्यः प्रेमपथिमात्सर्याभाव परस्परोपकारशीलत्वञ्चोपादिशन्त्य आहुः । पदानीति । एतानि नन्दसूनोर्महात्मनः पदानि ध्वजाम्भोजादिभिर्व्यक्तं लक्ष्यन्ते इत्यन्वयः तत्र यद्यपि महात्मनोऽसंख्यातब्रह्माण्डतदधिष्ठातृब्रह्माद्यधिष्ठानस्य नन्दसूनुत्वमिति चित्रं यानि च पदानि लक्ष्यन्ते श्रुत्यापि लक्षणावृत्त्या कथञ्चिद्बोध्यन्ते नतु साक्षात्तानि व्यक्तं भान्तीत्यपि चित्रं तथाप्यतिचित्रं प्रेममाहात्म्यं भगवतस्तद्वश्यत्वञ्च येन महात्मनोऽपि नन्दसूनुत्वं दुर्लक्षतत्पदानाञ्च व्यक्तत्वमिति ध्वनिः ध्वजाम्भोजवज्रांकुशयवादिभिरित्यत्रादिशब्देन पाद्मादिसंगृहीतानि ग्राह्याणि तथा चोक्तं पाद्मे ब्रह्मनारदसम्वादे कृष्णपदमुद्दिश्य ।

षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे ॥
दक्षिणे चाष्टचिह्नानि इतरे सप्त एव च ।
ध्वजा पद्मं तथा वज्रमंकुशो यव एव च ॥
स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथैव च ।
सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम ! ॥
इन्द्रचापं त्रिकोणञ्च कलशं चार्द्धचन्द्रकम् ।
अम्बरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम् ॥
षोडशञ्च तथा चिह्नं शृणु देवर्षिसत्तम ।
जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् इति ॥

श्रुतौ च शङ्खध्वजातपत्रैस्तु चिह्नितं चरणद्वयम् आदिवाराहेतु ब्रजमाहात्म्ये यत्र कृष्णेन सञ्चीर्णं क्रीडितञ्च यथासुखं चक्राङ्कितपदा तेन स्थाने ब्रह्ममये शुभ इति शङ्खचक्रातपत्रैकोनविंशतिः भवन्ति तत्र ध्वजो भक्तानामभयायाम्भोजं मनोऽलिमोहनाय वज्रः पापागध्वंसायांकुशो मनोमत्तगजवशीकाराय यवो जगज्जीवनत्वसूचनाय स्वास्तिकं शरणापन्नस्वस्तये ऊर्ध्वरेखानूपगतानामूर्ध्वप्राप्तिसूचिका अष्टकोणञ्च स्वजनानामष्टदिक्षु सर्वतः स्वप्रान्तरष्टसिद्धीनाञ्च तदनुसृतत्वस्य सूचनाय चापशङ्खचक्राणि भक्तरक्षार्थं त्रिकोणन्तु त्रिगुणत्रिभुवनाद्याश्रयत्वदेवतिर्यङ्नरत्रिविधसर्वाराध्यत्वमुक्तमुमुक्षुविषयित्रिविधसर्वेष्टत्वमनोवाक्कर्मत्रिविधसेव्यत्वादिसूचकम् अमृतकलशस्तूपगतामृतत्वप्राप्तिमाङ्गल्यादिव्यञ्जकश्चन्द्रस्तुशिवाशिवादिशिरोभूषणस्य पादानुगतत्वसखिजनाह्लादकत्वादिबोधकः अम्बरन्तु व्यापकत्वेऽप्यसङ्गत्वद्योतकं मत्स्यस्तु कामध्वजत्वेन स्वानुमतकामिनीनां कामपूरकत्वज्ञापकः गोष्पदं चरणापन्नानां संसारसिन्धोः गोष्पदत्वापादकं जम्बूद्वीपवासिनां चरणसेवनप्राधान्यप्रख्यापकम् आतपत्रं तापत्रयापहमिति बोध्यम् ॥ २५ ॥

भगवत्पदपदव्यैव तत्प्राप्तिमुपदिशन्तीनां तत्पदव्या तदन्वेषणमाह । तैस्तैरिति । तादृगसाधारणलक्षणान्वितैर्ध्वयतया स्वबुद्धिस्थैर्भगवता कृपया बहिः प्रकटितैः पदैः एवं कृष्ण एवमिति तथाभूतैस्तत्पदवीं कृष्णप्राप्तिमार्गमन्विच्छन्त्यो ऽनुकूलभावेनेच्छन्त्यः

श्रीरामनारायणकृतभावभावविभाविका ।

अवलास्त्रियो यद्वा विरहदुःखकातर्येण बलहीनाः यद्वा रूपगुणयौवनादिबलजातमानेन प्राप्तभगवद्वियोगखेदाविकलतया अवलास्त्यक्तमानादिबला यतोऽतएव तत्पदैस्तत्पदवीमन्विच्छन्त्यः अनेन तपोयोगादिस्वसाधनबलमनवेक्ष्य तत्पदाश्रयणेनैवतत्पदवीलाभो भवतीति ध्वनितम् एवमन्विच्छन्त्योऽग्रतोवध्वा नित्यवृन्दावनलीलायां गोलोकादौ च नित्यवधूत्वेन प्रसिद्धाया लोकोद्धाराय परमभक्तात्मना प्रकटितपृथक्त्वाया वस्तुतस्तु नित्याचिदानन्दघनकृष्णचन्द्राल्हादिन्याः प्रभायाः पदैस्तत्प्रापकैः सुष्ठु यथा स्यात्तथा पृक्तानि मिलितानि विलोक्य समाधौ सिद्धतत्पददर्शिनां मायोपहितपददर्शने विक्षेपार्तिवद्बधूपददर्शने सापल्यभावेन जातमात्सर्यतया आर्ता दुःखिताः समब्रुवन्निति केचित् स्मतेतु न क्रोधोनच मात्सर्यमित्यादिना भगवत्पदवीमनुगतानां मात्सर्याद्यनुपपत्तेः निवारणतयाभिव्यंकत्वेन प्रेमवृत्तिप्रतिफलितत्वेन च द्विगुणीभूतस्वरूपानन्दवत्परंभक्तिरूपप्रियापदसुपृक्तनन्दकृष्णपदानि विलोक्य मात्सर्यादिकापथ्यराहित्येनासमन्तात् ऋतं सत्यमेव यासां वहिरन्तर्निष्कपटस्नेहवत्यः समब्रुवन्नित्यर्थः ॥ २६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तानि दृष्ट्वा परस्परमाहुः । एतानि स्पष्टं नन्दसूनोर्महात्मनः सन्ति परमात्मनो नन्दसूनुत्वेनावतीर्णत्वात्तत्पदानां सर्वविलक्षणत्वादिति भावः यद्वा नारायणसमो गुणैरित्युक्त्वा महात्मनः सर्वोत्कृष्टस्य हि यतः ध्वजादिभिर्लक्ष्यन्ते ध्वजादीनां धारणस्थानान्युक्तं स्कान्दे—

> दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः ।
> तत्र भक्तजनस्यास्ति षडूर्मिच्छेदनाय सः—
> मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः ।
> ध्यानचित्तद्विरेफाणां लोभनायातिशोभनम् ॥
> पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ।
> कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
> पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम् ।
> भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि ॥
> आदिपदात्स्वस्तिकादिसंग्रहः ।
> तथाच श्रीकृष्णमेवाधिकृत्य पाद्मे ॥
> षोडशैव तु चिन्हानि मया दृष्टानि तत्पदे ।
> दक्षिणेचाष्टचिन्हानि इतरे सप्त एव च ॥
> ध्वजः पद्मं तथा वज्रमङ्कुशो यव एव च ।
> स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथाष्टमम् ॥
> इन्द्रचापं त्रिकोणञ्च कलशश्चार्द्धचन्द्रकम् ।
> अपरे मत्स्यचिन्हं च गोष्पदं सप्तमं स्मृतम् ॥
> षोडशञ्च तथाचिन्हं शृणु देवर्षि सत्तम ! ।
> जंबूफलसमाकारं दृश्यते यत्र कुत्रचिदिति ॥
> शङ्खध्वजातपत्रैश्च चिन्हितं चरणद्वयमिति ।

तापिन्युक्तञ्च चक्राङ्कितपदा तेनेति वाराहाद्य चक्रशङ्खातपत्रैः सहैकोनविंशतिः तत्र सर्वाणि चिन्हानि श्रीकृष्णपादयोरेव तदुक्तं पाद्मे—

> अङ्कान्येतानि भो विप्रन् ! पश्यन्ते तु यदा तदा ।
> कृष्णाख्यन्तु परं ब्रह्म सुविज्ञातं न संशयः ॥
> द्वयं वाथ त्रयं वाथ चत्वारः पञ्च चैव च ।
> दृश्यन्ते वै द्विजश्रेष्ठा ! अवतारे कथञ्चनेति ॥

निवृत्तिपक्षे नन्दसूनोः आनन्दरूपसूर्यस्य परमात्मन एतानि चिदाभासलक्षणानि पदानि व्यक्तं किञ्च भगवच्चरणारविन्दस्थध्वजादिभिः ध्यातैरर्थचरणासक्तिसर्वानर्थविजयपापवासनाध्वंसमदनिवृत्तिवैराग्यादिजनकैर्युक्तानि लक्ष्यन्ते तथाच सत्त्वगुण उद्रिक्ते भगवच्चरणारविन्दध्यानासक्ते ऽन्तःकरणे कामक्रोधादिनिवृत्त्या पुनः पुनर्भगवद्ध्यानात्मप्रत्ययनिष्ठचिदाभासैर्भगवत्स्वरूपपर्यन्तं गम्यमानैस्तत्स्वरूपप्राप्तेरिति भावः ॥ २५ ॥

भगवतः पदानीति निश्चित्य तैस्तैस्तथाभूतैरेव भुवि संलग्नैः पदैस्तस्य पदवीं मार्गमन्वेषणं कुर्वन्त्यः स्वभावत एवाऽबलाः विरहान्वेषणाभ्यां विशेषतो बलहीनाः कृताः वध्वाः श्रीमत्या राधायाः पदैः भुवि संलग्नैः संपृक्तानि मिश्रितानि विलोक्य तन्मध्ये तत्तत्येर्ष्यावत्यो मानिन्यः काश्चिदार्ताः पीडिताः सत्यः समब्रुवन् प्रथममतिविह्वलत्वात्तत्पदोपरि तासां दृष्टिर्न पतिता भगवत्पददर्शनेनैषत्समहितानां किञ्चिद्दूरं गतानां तदुपरि दृष्टिः पतितेति ज्ञेयं निवृत्तिपक्षे तैस्तैर्यथोक्तैरेकाग्रतां प्राप्तैः साभासप्रत्ययैरग्रे भगवत्स्वरूपान्वेषणमप्रतिपादयन्त्यो ऽबळाः प्रत्यक्षादिभिः उक्तानुवादपरत्वान्निर्बलाः द्वा सुपर्णेत्याद्यभेदानुवादिन्यः श्रुतयः मुख्यवधूस्थानीयायास्तत्त्वमसि श्रुतेः स्त्रीभिः पदैः सुपृक्तानि तदर्थविचारपरत्वेन तत्संमिश्राणि विलोक्यार्ताः सत्यः समब्रुवन् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्यक्तं निश्चितम् ॥ २५ ॥

सुपृक्तानि सुष्ठु मिश्राणि ॥ २६ ॥

भाषा टीका

उन चरणों को देख वोलीं यह तो वाही महात्मा नन्दनन्दन के चरण चिन्ह हैं जिन मे कि ध्वजकमल वज्र अंकुश यव आदि के चिन्ह दीखें हैं ॥ २५ ॥

उन चरण न के देखते देखते कृष्ण के पतेको ढूंढती गोपी जव आगे गई तब काउ प्यारी वहू के पाद चिन्हन को मध्य मे मिले देख वडी दुखित हो वोलवे लगीं ॥ २६ ॥

कस्याः पदानि चैतानि यातायाः नन्दसूनुना ।
अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७ ॥
अनयाराधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेनांसे न्यस्तः प्रकोष्ठो यस्याः करेणोर्हस्तिन्याः ॥ २७ ॥

रह एकान्तस्थानम् ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

किं तदाह । कस्या इत्यादिना ध्रुवमित्यन्तेन । नन्दसूनुना सह यातायाः एतानि कस्याः पदानि परिचीयन्तामितशेषः श्रीभगवता स्वांसेन तत्प्रकोष्ठस्य न्यसनं च रसविशेषेण किंवा रात्रौ स्खलन्त्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थं वा अनेन तस्यामधिकप्रीतिः सूचिता तामेव दृष्टान्तेनाहुः । करेणोरिति । तयोरपि काममदेन प्रीत्या तथैव गमनात् ॥ २७ ॥

पश्चाच्च श्रीराधादेव्यास्तानि पदानि परिचित्याश्वस्तास्तन्नामनिरुक्तिद्वारा तस्या भाग्यं सहर्षमाहुः । अनयेति । नूनं वितर्के निश्चये वा हरिः सर्वदुःखहर्ता भगवान् श्रीनारायण ईश्वरः भक्तेष्टप्रदानसमर्थः स्वतन्त्रोऽपि वा अनयैवाराधितः आराध्य वशीकृतः नत्वस्माभिः अन्यथा अस्माकमेतद्विरहाल्पोऽसम्भवः राधयति आराधयतीति श्रीराधेति नामकारणं च दर्शितं यत् यस्माद्गोविन्दः गोकुलेन्द्रत्वेन तस्या अस्माकञ्च तुल्योऽप्यसौ नोऽस्मान् विशेषेण हित्वा दूरतो निशि वनान्तस्त्यक्त्वा तत्रापि रहः अस्मदगम्ये एकान्तस्थाने यामनयत् यद्वा गोविन्द एवासावनया राधितः तस्याः परमभाग्यबोधनार्थं गोविन्दमेव विशिंषन्ति भगवान् निजाशेषैश्वर्यप्रकटनपरः अतो हरिः सर्वार्तिहर्ता किम्वा रूपगुणादिना सर्वमनोहरः ईश्वरः व्रजजनप्राणनाथः अतस्तदनुभवस्तस्यैव कृत इति भावः । अन्यत्समानं यच्छब्दद्वयं हेतोस्तस्यैव दार्ढ्यार्थं किम्वा यत् प्रीतः तस्माद्यामनयदिति वाक्यद्वयकल्पनया योज्यम् एवमग्रेऽप्यूह्यं यद्वा यन् रहोगच्छन् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र सर्वा एवाहुः । कस्या इति । अत्र स्त्रीत्वज्ञानं तत्पादानां लघुत्वात् निम्नत्वतदुचिताङ्गलाञ्छितत्वादिना च इति ज्ञेयं नन्दसूनुना इति पूर्ववत् एतानि कस्याः पदानि परिचीयन्तामिति शेषः । श्रीभगवता स्वांसे तत्प्रकोष्ठन्यसनं च यद्यपि रसविशेषेणैव तथापि रात्रौ स्खलन्त्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थञ्च भवति । अनेन तस्यामधिकप्रीतिः सूचिता । तामेव दृष्टान्तेनाहुः । करेणोरिति । तयोरपि काममदेन प्रीत्या तथैव गमनात् ॥ २७ ॥

तत्र सखीनामन्तरङ्गत्वेन गाम्भीर्यात् प्रतिपक्षाणामापाततो दुःखव्यासत्वात् तटस्थानाञ्च तदनभिनिवेशात् प्रथमं तस्याः सुहृद एवाहुः । अनयेति । नूनं वितर्के निश्चये वा । हरिः सर्वदुःखहर्ता भगवान् श्रीनारायणः । ईश्वरः भक्तेष्टप्रदानसमर्थः स्वतन्त्रोऽपि वा । अनयैव आराधितः आराध्य वशीकृतः नत्वस्माभिः । राधयति आराधयतीति राधेति नामकारणञ्च दर्शितं । तत्र हेतुर्गोविन्दः नोऽस्मान् विशेषेण हित्वा दूरतो निशि वनान्तस्त्यक्त्वा । तत्रापि रहः अस्मदगम्ये एकान्तस्थाने यामनयत् यद्वा सर्वा अप्यस्मान् विहाय यन् गच्छन्नपि यामेव रहोऽनयदित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह । कस्या इत्यादिभिः सार्द्धैरष्टभिः । करिणा सहकरिण्या इव नन्दसूनुना सह गच्छन्त्याः कस्याश्चिदङ्गनायाः पदानि हे गोप्यः पश्यत कथं भूतायाः अंसे स्कन्धे न्यस्तः प्रकोष्ठो यस्यास्तस्याः अन्यथैवंविधः पदानां सम्पर्को न स्यादिति भावः ॥ २७ ॥

अनया कृष्णेन सह यातया भगवान् हरिरीश्वरो नूनमाराधितः पूर्वजन्मनीति शेषः । कुतः यद्यस्मान्नोऽस्मान् सर्वा विहाय गोविन्दः प्रीतियुक्तो रहः एकान्तं यामनयत् नह्यनाराधितेश्वराणां रहसि गोविन्दसङ्गः सुलभ इति भावः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रकोष्ठः करतलमूलभागः करिणा सहितायाः करिण्याः पदानि यथा स्वांसन्यस्तहस्तायाः करिण्याः पदैः सम्पृक्तानि करिणा कृतानि पदानि वा ॥ २७—२८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कस्याः पदानीत्यादि ॥ २७—३३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

यत् यस्मात् प्रीतस्तस्यामिति शेषः ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तासामसूयावाक्यान्याह । कस्याः पदानीति । पुरुषोऽत्र न सम्भाव्यते नापि ग्रामान्तरस्त्रियः अतोऽस्मन्मध्य एव कस्याश्चिद्भविष्यन्ति अयं प्रश्न इतरपरिच्छेदेन विशेषज्ञानार्थः नन्वत्र एते

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

लक्षणानि सन्ति चकाराद्भगवतः तस्याश्च चेष्टाज्ञापकानि चिन्हान्यप्युच्यन्ते सा हि नन्दसूनुना सहैव याता अन्यथा भगवान्न गच्छेत् तयैव प्रायेण नीतः स्वापेक्षया तस्याः महद्भाग्यमाहुः अंसे न्यस्तः प्रकोष्ठभागो यस्याः प्रकोष्ठभागो भगवदीयः करतलादर्वाचीनभागः तावता करेण कचित्सम्बन्धः सूचितः तावदेव नैकट्यं पदयोरिति किञ्च मध्ये तयोरसाविर्भावोऽपि जायत इति दृष्टान्तेनाहुः । करेणोः करिणा यथेति करेणोर्हस्ते करिणा यथा हस्तः प्रसार्यत इति करेणुः स्त्री तस्या अंसे यथा करी हस्तं प्रसारयति तथा पदानि मिलन्ति सम्मुखश्च भवति उद्घृष्टकण्ठो भवति स्पर्शसुखमेव प्रधानमिति गजो दृष्टान्तीकृतः एवं त्रिविधा गोपिका उक्ताः ॥ २७ ॥

गुणातीताया वाक्यद्वयमाह दोषाभावप्रतिपादकं गुणप्रतिपादकञ्च तामसतामसा भगवदाविष्टा न भवतीति । अनयाराधित इति द्वाभ्याम् । तत्र प्रथमं तया सह विशेषरमणे तस्या भाग्यं हेतुत्वेनाहुः । अनया हरिर्नूनमाराधितः यद्यप्यस्माभिरप्याराधितः तथापि नूनं नाराधितः भगवदनाराधकैरपि फलत्वात् भगवतः संबन्धसम्भवात् आराधितेतु फलंस्ववशे भवति तत्रापि तारतम्यं ननु तुल्यकर्मणां मध्ये कथमवान्तरभेदः तत्राहुः भगवानिति सामग्रीभेदात् कर्माणि सर्वत्र विलक्षणानि भवन्ति तदवान्तरवैलक्षण्यं स एव जानाति अतस्तथा फलनिरूपको जातः ननु तथापि वयन्तथा न ज्ञापनीयाः दुःखसाधकत्वादिति चेत्तत्राहुः । हरिरिति । सहि सर्वदुःखहर्त्ता वैलक्षण्यज्ञापनार्थं तथा बोधितवान् ननु भक्तिस्तुल्येति कथं भक्तानुसारेण तुल्यं फलं न कृतवान् तुल्यफलत्वेन कर्म कुतः स्वीकृतवान् तत्राहुः । ईश्वर इति । कदाचिद्भक्तिमुररीकरोति कदाचित्कर्म कदाचित्स्वेच्छां नहीश्वरो नियन्तुं शक्यः अस्मान् भक्तिमार्गे योजयति न कर्ममार्गे इति अत एव नः अस्मान्विहाय गोविन्दः साधारणेन्द्रोऽपि रह एकान्ते प्रीतः सन् तामेवानयत् कामरसः स्त्रीसमूहापेक्षयाप्येकस्यामेव मुख्यतयोत्पद्यते तथा करणे प्रीतिर्हेतुः प्रीतौ भक्तिः कर्म वा ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अंसन्यस्तेति यस्याः स्कन्धे नन्दसूनुना वामप्रकोष्ठो न्यस्त इत्यर्थः ॥ २७ ॥

पदचिन्हैरेव तां श्रीवृषभानुनन्दिनीं परिचित्यान्तराश्वस्ता बहुविधगोपीजनसंघट्टे तत्र बहिरपरिचयमिवाभिनयन्त्यस्तस्याः सुहृदस्तन्नामनिरुक्तिद्वारा तस्याः सौभाग्यं सहर्षमाहुः । अनयैव नूनमिति निश्चये हरिर्भक्तजनदुःखहर्त्ता भगवान्नारायणः ईश्वरो भक्ताभीष्टदानसमर्थ आराधितः नत्वस्माभिः यतो नो विहाये-त्यादि ततश्च राधयतीति राधेति नामव्यक्तीबभूवेति मुनिः प्रयत्नेन तदीयनामाप्यधात् परं किन्तु तदास्यचन्द्रात् स्वयं निरेति स्म कृपा तु तस्याः सौभाग्यं भेर्य्या इव वादनार्थं यद्वा हे अनयाः अतिमहीयस्या तया सह वृथैव साम्याहङ्कारादनीतिमत्यः नूनं हरिरयं राधितः राधामितः प्राप्तः शकन्ध्वादित्वात्पररूपं भगवान् सुन्दरः कामातुरः स्वकीर्तिप्रख्यापको वा भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यरः ईश्वरः युष्मान् वञ्चयितुं समर्थः यत् यस्मान्नो सुन्दरीर्विहाय गोविन्दः गास्तस्या इन्द्रियाणि रमणार्थं विन्दति विन्दयतीति वा सः तस्याश्च पदचिन्हान्युज्ज्वलनीलमणितट्टीकादृष्ट्या लिख्यन्ते वामचरणे अङ्गुष्ठमूले यवः १ तत्तले चक्रं २ तत्तले छत्रं ३ तत्तले वलयं ४ अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्द्धचरणमूर्ध्वरेखा ५ मध्यमातले कमलं ६ तत्तळे ध्वजः सपताकः ७ तत्तले वल्ली ८ पुष्पं च ९ कनिष्ठातलेऽङ्कुशः १० पार्ष्णावर्द्धचन्द्रः इत्येकादश ११ दक्षिणचरणे अङ्गुष्ठमूले शङ्खः १ तत्तले गदा २ कनिष्ठातले वेदी ३ तत्तले कुण्डलं ४ तत्तले शक्तिः ५ तर्जन्याद्यङ्गुलितले पर्वतः ६ पर्वततले रथः ७ पार्ष्णौ मत्स्य इत्यष्टौ ८ मिलित्वा एकोनविंशतिः ॥ २८ ॥

केनचित्कृता विशुद्धरसदीपिका ।

किमब्रुवन्नित्यपेक्षायामाह । कस्या इति । सामर्षोक्तिः चकारः समुच्चयार्थः नन्दसूनुनेति बालत्वसूचकेन पदेन प्रेमानभिज्ञत्वं द्योतितं तत एव नन्देति सावज्ञोक्तिरपि । याताया इति । कर्त्तरि क्तः ततश्च स्वयमेव याताया नतु तेन नीताया इत्यर्थः । एवं चासूया व्यञ्जिता तथा अंसेन्यस्तः न्यासीकृतः नतु दत्तः प्रकोष्ठो विस्तृतकरो नतु बाहुरित्यर्थः । ततश्चौदासीन्यमेव विशदीकृतं वस्तुतस्तु अंसे न्यस्तोऽर्पितः प्रकोष्ठोऽर्थात्तेन यस्यास्तस्याः इदं यद्यपि रसविशेषेणैवं तथापि मदनालसत्वेन स्खलितगतेस्तस्या अवलम्बनदानेन सुखगमनाय दूरनयनाय चेति गजगामित्वं दृष्टान्तयन्ति करेणोरित्यादिना ॥ २७ ॥

इत्थन्तासां सासूयोक्तिमसहमानास्तदेकप्राणाः प्राणसख्यस्तासां क्षोभाय किञ्चित्प्रकाश्याहुः । अनयेति । अहो कस्या इति किन्तत्परिज्ञानेन या कापि परमसौभाग्यवती सर्वाभिरप्यस्माभिः परिचरणीयेत्याशयेन गोप्यः किमाचरदित्यादिवत्तद्भाग्यमभिनन्दन्ति अनयेति सर्वं वाक्यं सावधारणमिति न्यायादनयैवेत्यर्थः । नत्वस्मदादिभिरिति निर्वेदः राधितः पूजितः नूनं वितर्के निश्चये वा कोऽसौ हरिः सर्वदुःखहर्त्ता भगवान् श्रीनारायणः ईश्वरः भक्तेष्टप्रदानसमर्थः तत्र हेतुः यदित्यादि गोविन्दो गोकुलयुवराजः नः अस्मान् प्रेमातुरास्तदेकपरा अपि विशेषेण बुद्धिपूर्वकं हित्वा यामनिच्छतीमपि स्वयमेव रहः अस्माभिरप्यलक्ष्ये देशेऽनयत् तत्कुतः यतः प्रीतः प्रेमपरवानित्यर्थः । यद्वा यो हरिरीश्वरो भगवानित्यादिनामभिः श्रीभागवतादिषु प्रसिद्धः सर्वस्य वशी सर्वस्येशान इति स उ एष वामनीत्यादिना श्रुतिशिरोभिरपि गीतः नारायणसमो गुणैरित्याद्यभियुक्तोक्त्यास्माभिरपि निर्णीतः स चानया सह यातया राधितः वशीकृतः सन् गोविन्दः श्रीवृन्दावनेश्वरीत्वादस्यास्तस्य च वृन्दावनेश्वरत्वादिति भावः । वृन्दावनेतु गोविन्दमिति वराहतन्त्रोक्तेः इयमेव दैववागित्युच्यते यल्लीलायामपि प्रयुक्ता सिद्धान्तमेव प्रकाशयति अथवा अनया सह आराधितो गोविन्दः हरिः सर्वदुःखहर्त्ता अन्यथा सर्वकर्त्तेत्यर्थः तदुक्तं सम्मोहनतन्त्रे–

गौरतेजो विना यस्तु श्यामतेजः समर्चयेत् ।
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे ॥

केनचित्कृता विशुद्धरसदीपिका ।

स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः ।
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि ! ॥
तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकमिति ।

अत्र ज्योतिरित्येकत्वनिर्देशाच्छक्तिशक्तिमत्त्वमपि निराकृतम्बोद्धव्यं तथा ईश्वरः सर्वविधानसमर्थः नान्यथा एतत्प्रसादोपनतमेवैतस्यैश्वर्य्यादिकमिति एकत्वेऽपि प्राधान्यं दर्शितं तथा भगवान् सकलैश्वर्य्यमाधुर्य्यप्रकाशकः यद्वा ईश्वरो हरिश्चेत्यैश्वर्य्यमाधुर्य्यप्रतिपादके विशेषणे वस्तुतस्तु अनया सह तया गोविन्दोभगवान् एतत्कृतैवास्य भगवत्तेति भावः । तथाराधितः राधामितः प्राप्त इत्यर्थः। द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरित्यनेन समासः यद्यपि श्रितादिषु इतशब्दो नास्ति तथापि द्वितीयेति योगविभागात्समासः ततः शकन्ध्वादिषु पररूपं वाच्यमित्यनेन पररूपमितिसाधुः यद्वा राधामाख्यातवान् राधामाचष्टे राधयतीति वा राधितः राधीति धातोः क्ते इडागमे सिद्धः शेषं पूर्ववत् अथवा यत् यतो अनयाराधितो वशीकृतस्तत एव भगवान् भाग्यवानित्यर्थः अस्या वशवर्तितैव भाग्यं नतु निजस्य सर्ववशीकारित्वमिति भावः तत एव हरिः मनोहरः अर्थादस्माकं ननु तस्याः प्रियसखीनां कथमसौ मनोहरः तथा सति कान्तभावस्फूर्त्या सख्यविरोधस्तत्राहुः ईश्वरः परमाराध्यः नतु प्रियः कान्त इति यावत् रसं मे राधाया भजति किल भावो ब्रजमणाविति श्रीसुधानिधेः रतिर्देवादिविषया भाव इति कविसमयानुसारेणेदं रसं सख्यमित्यर्थः स च भावस्तत्रैव यथा रसघनमोहनमूर्तिं विचित्रकेलीमहोत्सवोल्लसितं राधाचरणविलोडितरुचिरशिखण्डं हरिं वन्दे इति तदेवं पर्य्यायोक्त्या श्रीराधयेमिति व्याञ्जितं साक्षान्नामानुक्तिश्च विपक्षादिसमुदायगोपनीयत्वाद्रसिकानां मते व्यञ्जनाया एवमुख्यत्वं नतु मुख्याया इति सञ्चरीणामभिप्रायः श्रीहरेरात्मत्वेन वक्ष्यमाणायाः परपरब्रह्मभूताया मनोवचोऽगोचराया अनिर्देश्यत्वाद्गौरवाच्चानामानुक्तिरिति श्रीमुनीन्द्राभिप्रायः आत्मना रमयेत्यन्यत्रापि आत्मनश्चानिर्वचनीयत्वेनैव कथनम् अवचनेनैव प्रोवाचेत्यादिश्रुतेरिति संक्षेपः ॥ २८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तद्वाक्यान्येवाह । कस्या इत्यादिना । तत्र प्रथमं परीक्षार्थं तासां परस्परवचनं कस्याः पदानीति भो सख्य ! एतानि सम्पदा मिश्रविपक्षा सदृशानि कस्याः पदानि ननु किन्तत्परिज्ञानेन तत्राहुः । नन्दसूनुना यातायाः । स्वसुखाय सर्वाः सखीः त्याजयित्वा स्वयन्तेन सह गतायाः नहि केवलं स्वनयनविलासविभ्रमैस्तन्मतिविभ्रमेण तन्नयनमपितु अंसन्यस्तप्रकोष्ठायाः हरिचन्दनभुजसदृशसचन्दनहारिभुजमूले न्यस्तो मणिधरविषधरनागिनी समानसभूषणसमानप्रकोष्ठो यया तस्याः अनेन सर्वासां प्राणवल्लभं बलाद्वाहनात् कृष्णप्रणयनेन प्रणयपथविपरीताया इति ध्वनिः तत्र दृष्टान्तमाहुः । करिणा सह यातायाः करेणोर्यथा अत्र दृष्टान्तेन स्वीयमदमोहितत्वं स्पर्शसुखाधिक्येन विस्मृतसन्मर्य्यादतया पशुवृत्तित्वञ्च सचितमिति केचिन् स्वमते मात्सर्य्याभावेन प्रशंसैव तथाहि कस्याः पदानीति जिज्ञासायां निमित्तमाहुः । नन्दसूनुना यातायाः इति । अस्मासु मानकापट्येन प्रेमपथप्रच्युततया स्वदोषेणैव तद्वियुक्तास्वपि तस्यास्तत्कापट्यभावेन शुद्धप्रेमवत्यास्तत्प्रमवश्येन रसिकशिरोमणिना नन्दसूनुना सह नीतायाः नन्वेवं सा निर्दोषप्रेमवतीचेत्किमिति स्वसखीर्वर्जयित्वा गता तत्राहुः । अंसन्यस्तप्रकोष्ठायाः तेन प्रेष्ठतमेनांसे न्यस्तः स्वप्रकोष्ठो यस्या इति तथा तथा च तत्पारवश्येनास्मत्यागेऽपि तया मानाभावेन रक्षिते प्रेमपथे सम्पादिते च तत्प्रसादेऽस्मद्द्रमपि भविष्यति सह नयने दृष्टान्तः करिणा सह मिलितायाः करेणोर्यथा तदेतत् स्नेहाधिक्ये स्पर्शसौख्यभरेण गतिसौष्ठवे च दृष्टान्तः यद्वा कथम्भूतेन नन्दसूनुना तदाहुः यथा यथावत्

करिणाल्हादामृतमयमतिहरस्मितसुधासीधुकरयुयुक्तचन्द्रमसा

किम्भूतायास्तस्या करेणोः कं सुखं तद्रूपा रेणवः पादरजांसि यस्यास्तद्रेणुस्पर्श एवास्मत्सौभाग्यवर्धक इति भावः ॥ २७ ॥

तदनुष्ठानसौभाग्यातिशयाभ्यां तन्नामापि निर्द्धारयन्त्य आहुः । अनयेति । अनया नूनं भगवान् ब्रह्मा हरिर्विष्णुरीश्वरः शिवश्चाराधितो यद्यस्माद्देवत्रयवरेण गोविन्दो गवामिन्द्रो गोपालो नोऽस्मान् विहाय यां प्रीतो रहः अनयत् यद्वा अनयः कृष्णोऽनया राधितः ननयतीत्यनयस्तथाभूतोऽप्याराधितः यतोऽनयत्वेन नो विहायाराधितत्वेन यां रहः अनयत् यद्वा नो अनयः यथा स्यात्तथा आराधितः यद्वा अनयेनान्यायेन सख्यधर्मत्यागेनाराधितो यतो नयेन समानप्रेम्णा प्राप्तत्वेन नयनयोग्या नो विहाय अनयेन वैषम्यभावेन यां रहः अनयत् किञ्च गोविन्दोऽपि करुणया सर्वगोगोपगोपिकारक्षकत्वेन सर्वेश्वरोऽपि गवामिन्द्रत्वं गतोऽपि भगवानपि ज्ञानविरागधर्मयशःश्रीप्रभृतिपरोऽपि त्यक्तकारुण्यज्ञानविरागयशोधर्म्मादिमर्यादतया तस्या हरिः सह हरणशीलः पालकश्च न ईश्वरोऽन्यथाकर्तुं समर्थः संहारकश्च जात इति केचित् स्वमतेऽपि मात्सर्यास्वीकारात् अनयैव प्रेमातिशयवत्या भगवान् स्त्रीपारतंन्त्र्यविरुद्धज्ञानाविरागयशोधर्मादिमानपि स्वयं सर्वमनोहरोऽपि ईश्वरः सर्वथा स्वतन्त्रोऽपि गोविन्दो गवामिन्द्रो गवामिन्द्रियाणामिन्द्रो हृषीकेशोऽपि नूनं निश्चितमाराधितो वशीकृतः यद्यस्मात् यत्प्रेमप्रभावाभिभूतरसप्रतिबन्धकहेयतापादकविरागधर्मादिमर्यादो नो विहाय यां रहः अनयत् इतितत्प्रेम्णैव रसपरस्तद्भृत्या नोऽपि भाजिष्यति अत्र राधितः अनया इति राधेति नामापि दर्शितम् ॥ २८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यदब्रुवन् तदाह । कस्या इति । अहो लघुत्वनिम्नत्वादिचिन्हैश्चिन्हितानि स्त्रिया एतानि पदानि वर्त्तन्ते तथापि कस्याः अस्माकं मध्ये कस्याः नच ग्रामान्तरस्त्रियः यतः नन्दसूनुना सह यातायाः अन्यस्याः प्रेष्ठसाहित्यं न सम्भवति तथाच का वा निष्ठुरा प्रेष्ठमेकान्ते नीतवती सा निश्चेतव्येति भावः । तत्रापि तेन स्कन्धे न्यस्तः प्रकोष्ठभागो यस्याः सा पदानि मनुपृक्तत्वादिदं ज्ञातव्यं तच्च तस्यां रात्रौ सुखेन नयनार्थं दूरे बलान्नयनाय वा रसाभिव्यक्त्यर्थं वा तदनुरूपं दृष्टान्तमाहुः । करेणोः हस्तिन्याः करिणा हस्तिना यथा एतेन तस्यां तस्य प्रीत्यतिशयः काममदाक्रान्तत्वात्तदधीनता च ध्वनिता निवृत्तिपक्षे एतानि यथोक्तप्रत्ययेषु प्रविष्टानि पदानि कस्याः नन्दसूनुना परमात्मना सहितायाः

धन्या अहो अमी आल्यो गोविन्दांघ्र्यब्जरेणवः ॥
यान् ब्रह्मेशो रमा देवी [१]दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥
तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यत् ॥
यैकापहृत्य गोपीनां रहो भुङ्क्ते ऽच्युताधरम् ॥ ३० ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

प्रतिपादकभावेन सह प्रविष्टायाः तत्राप्यनेन परमात्मना अंसे शुद्धचैतन्यलक्षणे भागे न्यस्तः प्रकोष्ठस्थानीयस्तत्पादभागो यस्याः साहित्ये दृष्टान्तः तथा च का वा अहेतुप्रतिपादने समर्थेत्याद्याः ततस्ताः श्रुतयः युक्तवत्य इति भावः ॥ २७ ॥

तस्याः सौभाग्यमाहुः । अनयेति । तत्राभिज्ञापक्षे अनया तेन सार्धं यातया सख्या नूनं भगवानाराधितः यद्यप्यस्माभिरप्याराधितस्तथाप्यनया यथाराधितस्तथा नाराधितः फलवैलक्षण्यदर्शनात् नचास्माभिरपि तथैवाराधित इति भ्रमितव्यम् आराधनतारतम्यस्य तेन सम्यक् ज्ञात्वैव फलप्रदानाय प्रवृत्तत्वात् यतो भगवान् अत एव हरिः विलक्षणप्रेमवत्याः प्रेमसमानं सुखं दत्तवानिति तदीयदुःखस्य हर्ता ननु तदाराधनपराणामस्माकमन्तर्द्धानेन किमिति दुःखं दत्तवानिति चेत्तत्राहुः । ईश्वरः कर्तुमकर्तुमन्यथा कर्तुं समर्थः तत्कालिकं विलक्षणम् फलमावेदयन्ति । यस्मान्नोऽस्मान्सर्वा विहाय प्रीतः सन् यां रह एकान्तमनयत् गोविन्दः साधारणोऽपि सर्वेन्द्रियग्राहकस्तस्या असाधारणो जात इत्यहो तस्या उत्कर्षातिशय इति भावः । अनभिज्ञापक्षे अनया जन्मान्तरे नूनं निश्चयेन हरिर्दुःखहर्ता महाविष्णुराराधितो नत्वस्माभिस्तत्रापि भगवत्त्वेनेश्वरत्वेन च यतोऽत्र भाग्यातिशयः परमस्वातन्त्र्यं च तथालब्धमित्याशयेनाहुः । भगवानीश्वर इति । यतः सर्वासां रक्षणेन लब्धगोविन्दानामपि नो विहाय प्रीतः यां रहोऽनयत् अनेन राधयत्याराधयत्याऽऽराध्यते वा राधेत्यर्थात्तन्नाम सूचितं तथाच तादृशी राधैवाऽतस्तस्या एव पदानीति किमर्थमसूयया कस्या इत्युक्तं भवतीभिरिति भावः । स्पष्टं नामाक्षरं प्रतिपक्षाणां गोपीनां राधाया वा सङ्कोचान्मुनिना तु ब्रह्मवैवर्तादौ तन्नाम्नः स्पष्टमुक्तत्वात्तत एव गोपीनामानि ज्ञातव्यानीति कस्या अपि नामानुक्त्या सूचितं परोक्षप्रिया हि देवा इति न्यायश्चानुसृतः एतद्ग्रन्थस्य गम्भीरार्थकत्वञ्च ध्वनितं मानिनीपक्षे हे अनयाः ! परमोत्कर्षवत्याः स्पर्द्धाद्याचरणरूपान्यायवत्यः हरिः सर्वासां सामान्यतो मनोहर्ता श्रीकृष्णो राधितः पृथक्कृतया राधामेवेतः प्राप्तः शकन्ध्वादित्वात्पररूपं यद्वा राधा सर्वापेक्षयाधिक्येन प्रिया सा जाता अस्येति तारकादित्वादितच् यतो भगवान् कामातुरः श्रीमानिति वा कीर्तिमानिति वा

भगः श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्तिष्वित्यमरः ।

तत्रापीश्वरः ग्रहणपलायनवञ्चनादौ समर्थः यद्यस्माद्गाः इन्द्रियाणि विन्दति विन्दयति वा गोविन्दः तया परस्परं रमणाभिलाषुः श्रीराधायाः पदचिह्नान्येकोनविंशतिसंख्याकान्युक्तानि तत्र वामचरणे यवं चक्रं छत्रं वलयोर्ध्वरेखाकमलध्वजवल्ली पुष्पांकुशार्द्धचन्द्रा इत्येकादश दक्षिणचरणे शङ्खगदावेदीकुण्डलशक्तिपर्वतरथचमसा इत्यष्टौ निवृत्तिपक्षे तत्पक्षपातिन्यः "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा नेह नानास्ति किञ्चन"त्याद्या आहुः अनया नूनं भगवान् जगत्पालकः हरिः संहर्ता ईश्वर उत्पादकः आराधितः प्रतिपादितः अखण्डैकरसस्य प्रतिपादनेन तत्त्वभगवत्त्वादेः प्रतिपादितत्वात् यद्यस्मात्सकलश्रुतिगम्यत्वाद्गोविन्दोऽपि प्रीतः सन् नो विहाय यां रहः अनयत् तज्जन्यचरमवृत्तिविषयत्वमगच्छदिति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अंसे स्कन्धे न्यस्तः प्रकोष्ठो यस्याः करिणा हास्तिना सह गच्छन्त्याः करेणोर्हस्तिन्याः यथा तथा नन्दसूनुना सह यातायाः ॥ २७ ॥

यां रहः एकान्तं स्थानमनयत्तया नूनं निश्चितं हरिः खलु राधितः राधा संज्ञास्य तथा तारकादिभ्य इतच् राधाकृष्णविहारे हेतुभूतयामित्यर्थः । हेतौ तृतीया श्रीराधादासीप्राधान्यकथनं कैमुतिकन्यायेनास्या अतिप्राधान्यं द्योतयति विशेषतस्तया सह विहारोऽतिगोप्यत्वान्नोक्तः तस्याः स्वरूपादिनिर्णयः प्राचां ग्रन्थेषु द्रष्टव्यः ॥ २८ ॥

भाषा टीका।

ये कौन के पांय पड़े हैं ये कौन नन्दनन्दन के पीछे गई है जाने वा प्यारे के कांधे पै अपनी भुजा को स्थापन कियो है जैसे हाथी के संग हथिनी चलै तैसे वाके संग गई है ॥ २७ ॥

हम ठीक जानैं हैं कि या गोपी ने हरि ईश्वर भगवान् की बड़ी आराधना कीनी है जातें कि गोविन्द भगवान् हम सब को छोड़ वाही को अकेले में लै गये हैं ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे आल्यः ! सख्यः अहो धन्या अतिपुण्या गोविन्दाङ्घ्र्यब्जरेणवः तत्र हेतुः यानिति अस्माभिरप्येतद्रेणवभिषेकेण तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥

अन्या आहुः । तस्या इति । गोपीनां सर्वस्वम् अयं भावः भवेदेवं यदि तस्याः पदानि संपृक्तानि न भवेयुस्तानि तु नो दुःखं कुर्वन्तीति ॥ ३० ॥

[१] मूर्ध्ना तदुत्तये इति विजय० पाठः ।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अमी इमे आल्य इति सम्बोधनं तत्र सर्वासामैकमत्यार्थं भक्तिविशेषजननार्थं वा धारणे सर्वेषां प्राधान्यविवक्षया चशब्दाप्रयोगेऽपि तेषां यथोत्तरं श्रैष्ठ्यमूह्यं कृष्णस्य पश्चात् पादाब्जरेणून् गृह्णन्तो ब्रह्मेशादयः सदैव तैरभिद्दश्यन्ते अतो दृष्टमेव वर्ण्यते नत्वैश्वर्याभिप्रायेण देवीति श्रीवृषभानुगोपनन्दिनीव्यावृत्त्यर्थं यद्वा तद्रेणुधारणेन लक्ष्म्यां भक्त्युदयेनोक्तं देवी पूज्येति यद्वा श्रीराधाया लक्ष्म्याश्च प्रायः पदादितुल्यत्वात् सन्देहः व्यवच्छिद्यते देवीति देवीत्वेन लक्ष्म्यां भूम्यस्पर्शत्वात् यद्वा देवी व्रजदेवी श्रीराधैव मूर्ध्नीति भक्तिभरं द्योतयन्ति अघमपराधो विरहादिदुःखं वा अतस्तेऽनघा एव अस्माकञ्च भक्त्या तद्धारणादघं युक्तमेवेति भावः। अन्यत्तैर्व्याख्यातं यद्वा रेणव एव धन्या उत्तमाः श्रीकृष्णरूपपरमधनदानयोग्या वा यद्वा अमी वैकुण्ठादौ वर्तमाना गोष्ठाङ्गणपातिता वा पूर्वदृष्टा वा । अस्याः पदै रसंपृक्तास्त एव धन्याः एषा मात्सर्य्योक्तिः यद्वा इमे रेणवः आल्यश्चैमा धन्याः गोविन्दनीतस्वाद्गौरवेण बहुत्वम् एवं दृष्टान्तत्वेन रेणूनामिव तस्या अपि धन्यत्वमभिप्रेतम ॥ २९ ॥

श्रीचन्द्रावल्याः सखीनामुक्तिस्तस्या इति । उच्चैः आधिकं क्षोभं वैकल्यं पूर्वोक्तिधैर्य्यहानिं वा यद्वा उच्चैः गर्वादुन्नतानि अस्मन्मूर्धोपर्य्यर्पितानि वेत्यर्थः। अपहृत्येति । एकाकित्वेन रहसि भोगात् यद्वा चौर्य्येण तया नीतत्वादेव सो ऽस्मान् विहायागतः अन्यथा कथमागच्छेदिति भावः । गोपीनां सामान्यतः सर्वासामेव धनमिति पाठस्तेषां सम्मतः सर्वस्वमिति व्याख्यानात् अन्यथा गोपीनां भोग्यमित्येव व्याख्यातं स्यात् अच्युतस्य तां त्यक्त्वा ऽन्यत्र काप्यगच्छतो ऽधरमिति यद्वा तस्मादच्युता अविच्छिन्ना सतीति चिरम्भोगोऽभिप्रेतः श्लेषेण च्युतोऽस्मन्मुखोच्छलितो योऽधरस्तमिति निजोच्छिष्टभोगस्तस्याः सूचितः इमे रेणव आल्यश्चेमा धन्या इत्येतत् पक्षे उच्चैरसमदतिक्रमणारेणव आल्यश्चेमा धन्या इत्येतत् पक्षे ... दुःखान्यपि क्षोभं कुर्वन्ति किंतु का अपितु नैवेत्यर्थः। एवमेषां सर्वासामेवोक्तिर्ज्ञेया ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

ततस्तटस्था आहुः । धन्या इति। अमी इमे आल्यः इति सम्बोधनं समदुःखत्वेन प्रायः सर्वासामेकभावात् सर्वासामेव युगपत् सम्बोधनं चमत्कारातिशयात् । दधुरिति अतीतनिर्देशो निश्चयज्ञापनार्थः । ब्रह्मादीनां यथोत्तरं श्रैष्ठ्यमूह्यम् । रमायास्तु विशेषणं तथापि श्रैष्ठ्यबोधनार्थं मूर्ध्नीति भक्तिभरं बोधयति । अघमपराधो विरहादिदुःखं वा । धन्यत्वे हेतुगोविन्दाङ्घ्रीति सुपां सुलुगिति षष्ठीलुक् च्छान्दसः तत्सम्बन्धेन धन्या इत्यर्थः । अत एव यानिति अतो रेणवोऽपि तत्सम्बन्धलाभेन धन्याः वयन्तु तदभावात्ततोऽपि तुच्छा इति भावः । इयञ्च तत्पादरेणूनां माहात्म्यभावना प्रेमकृतैव । प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत् । ततस्तदतिशयस्तु तदतिशयमेव । यथादिभरतचरिते । किम्वा अरे आचरितं तपस्तपस्विन्या यदियमवनिरित्यादि गद्ये तेन सम्पूर्णपदस्पर्शेन पृथिव्या भाग्यं वर्णितम् ॥ २९ ॥

प्रतिपक्षा आहुः। तस्या इति । उच्चैराधिकम । क्षोभं अतिदुःखम् । अपहृत्येति एकाकित्वेन रहसि भोगात् । यद्वा । चौर्येण तया मायाविन्या नीतत्वादेव सोऽस्मान् विहायात्रागतः । अन्यथा कथमागच्छेदिति भावः । गोपीनां सामान्यतः सर्वासाम् । अस्माकमेव धनमिति पाठः क्वचित् । सच प्रायः सर्वस्वमिति तेषां व्याख्यामवीक्ष्य । रह इति पाठस्तु सर्वत्र । अच्युतस्य तां त्यक्त्वा ऽन्यत्र काप्यगच्छतोऽधरमिति ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काश्चिदाहुर्धन्या इति । हे आल्यः! सख्यः ! अमी गोविन्दस्य पादाब्जरेणवः धन्याः अहो तत्र हेतुः यानिति यान् गोविन्दाङ्घ्र्यब्जरेणून् ब्रह्मादयो देवाः अघनुत्तये गोविन्दप्राप्तिप्रतिबन्धकपापापनुत्तये मूर्ध्नि धृतवन्तः अस्माभिरप्येतदभिषेकेण तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥

अन्यास्त्वाहुः। तस्या इति गोविन्देन सह यातायाः अमूनि पदानि नोऽस्माकम् उच्चैर्भृशं क्षोभं चित्तक्षोभं कुर्वन्ति तत्र हेतुः या स्वयमेकैव सर्वासां गोपीनां संबन्धि सर्वस्वभूतमच्युतस्याधरमधरामृतमपहृत्य रहसि भुङ्क्ते ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे आल्यः! सख्यः धन्या निरपेक्षाः आली सेतौ सखीपंक्त्योरिति यादवः । निरपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैरिति च ब्रह्माद्या मूर्ध्नि यान्दधुरिति यत्तस्माद्धन्या इत्यर्थः तस्माद्विष्णोरूतये अभिप्रायसिद्धये रक्षासिद्धये वा ॥ २९ ॥

ननु धन्यानां कृष्णपादतलयुक्तानां रेणूनां सन्दर्शनं युष्माकमभूदितः परं शोकस्य किङ्कारणमित्याशङ्क्य सत्यमथापि तदीयपद्सम्पृक्तमन्यस्त्रीपदं संदृश्य संस्मृत्य महाशोको जायत इत्याशयेनाहुः । तस्या इति । गोपीनां मध्ये एका गोपी कृष्णमपहृत्य वशीकृत्य अच्युताधरम् अच्युतस्य हरेरच्युतं सन्ततस्यन्दमानामृतमधरोष्ठं रहो रहस्येकान्तदेशे भुंक्ते यत्तत्तस्या गोप्या अमूनि पदानि संदृश्याधरपानं संस्मृत्य उच्चैः क्षोभं चित्तविक्षेपं कुर्वन्ति तस्माच्छोक इत्यर्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

चरणरजोऽभिनन्द्य ऊचुः । धन्या इत्यादि । अघं दुःखं तन्नुत्तये तन्नाशाय धन्याः सुखदा इत्यर्थः यान् ब्रह्माद्या मूर्ध्नि दधुः तस्माद्वयमपि तथा कुर्म इत्यर्थः ॥ २९ ॥

अन्याः काश्चिदूचुः । तस्या इत्यादि । एते रेणवो मूर्ध्नि धर्तुं युज्यन्ते एव किन्तु तस्या अमूनि पदानि नोऽस्माकं क्षोभं कुर्वन्ति तया किमपराद्धमित्यत आहुः । यैकेत्यादि । गोपीनां सर्वासामेव धनमच्युताधरमपहृत्य या एका सती भुङ्क्ते प्रधानाया नैतदुचितमिमि नैकाकी मिष्टमश्नीयादित्युक्तेः ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं तस्या भाग्यमभिनन्द्य मात्सर्येऽपि गूढे तथा वचनं भवतीति स्वभाग्याभिनन्दनमप्याहुः । धन्या इति । अहो आश्चर्ये हे आल्यः ! सख्यः अमी अंघ्रिरेणवो धन्याः मात्सर्याभावार्थं चैतदुच्यते यथा रेणवः तथा सेति विश्वासार्थमप्रतारणार्थश्च सम्बोधनम् अनेन रेणूत्कर्षेण रेणव एव धार्याः स्वदोषनिवृत्त्यर्थमित्युक्तं भवति पूर्वमत्रैवैते रेणवः स्थिताः न तदा तेषामुत्कर्षः यदा पुनश्चरणसम्बद्धास्तदा धन्नमर्हन्तीति धनं कृष्णः यथेन्द्रो देवानां यथा धनेन सर्वविषयप्राप्तिः एवं प्रभुणापि तेषां धन्यत्वमुपपादयन्ति यानिति ब्रह्मा ईशः रमा च देवता रूपा पालिका शक्तिः तेषां स्वस्वाधिकारे दोषसम्भवात् तन्निवृत्त्यर्थं मूर्ध्नि दधुः ब्रह्मानन्दरूपाया निवृत्त्यर्थे देवतापदम् अतः कारणादेतद्धारणेन वयमपि निर्दुष्टाः नीयमानगोपिका तुल्या भविष्याम इति ॥ २९ ॥

अन्या रजःप्रकृतय आहुः । तस्या इति । भगवच्चरणारविन्दरजस्तथैव परमस्याः गोपिकाया अमूनि पदानि सङ्गे गच्छन्त्याः नोऽस्माकं क्षोभं कुर्वन्ति तत्राप्युच्चैरत्यर्थं नन्वेकाकी भगवान् गच्छेत् तदनया ससहायः भक्तिमार्गे युक्त इति चेत्तत्राहुः । यद्यस्मात् गोपिकानां सर्वासामेव भोगरूपमच्युताधरं ता विहाय एकैवोपभुङ्क्ते तत्रापि रहः एकान्ते तासामनुज्ञाव्यतिरेकेण ननु विरतो भगवान् बहुस्त्रीसम्बन्धाद्भविष्यति कुतः सा भोक्ष्यते तत्राहुः । अच्युतेति । स हि पूर्णकाम एव न तस्य च्युतिरस्ति ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तटस्थपक्षास्तु तत्रानवधानाः कृष्णपदान्यैवालक्ष्याहुः । धन्या इति । ब्रह्माद्या अघनुत्तये विघ्नच्छेदनु शापनोदनाय यान् मूर्ध्ना दधुरित्यपराह्णे गोष्ठागमनसमये कृष्णसहचरबालकैः प्रत्यहन्ते स्वर्गादवरुह्य कृष्णपादधूलिग्राहिणो दृश्यन्त एव यद्वक्ष्यते वन्द्यमानचरणः पथिवृद्धैरिति वन्दिनस्तमुपदेवगणा ये इति च वयं तु लज्जयैव यद्धर्तुं न शक्नुमस्तेनैव तावदधं प्राप्नुम इति भावः ॥ २९ ॥

प्रतिपक्षसख्य आहुः । तस्या इति । उच्चैःकर्तुं जनयन्ति गोपीनां सर्वासामेवास्माकं भोग्यमच्युताधरं मेकैव रहश्चोरयित्वा भुङ्क्ते तथैव कामिन्या केनापि कर्मणैनं वशीकृत्य अस्मान् प्रेमवतीस्त्याजयित्वा कृष्ण एतावद्दूरमानीत इति भावः ॥ ३० ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ तदुक्तौ किञ्चित्कृतावधानाः श्रीकृष्णैकतानाः श्रीराधिकामनुताटस्थ्यमवलम्बमानाः प्रेयसीभावाभिमाना आहुः । धन्या इति अहो आल्य इति तात्पर्यं तेनैता गोपकन्या इति गम्यते गोविन्दस्य गोकुलयुवराजस्येति सम्बन्धयोग्यता निगमगीत इति च माहात्म्याभिप्रायेण, अङ्घ्रीति पातिव्रत्याभिमानेन अब्जेति सौन्दर्यादिकैः कान्तभावः सूचितः तत्सम्बन्धाद्रेणवः परागस्थानीया इति रूपकानिर्वाहः धन्याः अस्माभिरभिलषणीयाः यद्वा रेणवोऽपि तत्सम्बन्धलाभेन धन्याः तद्विरहिता वयं ततोऽप्यतितुच्छा इति दैन्यव्यक्तिः कीदृशाः यान् अनिर्वचनीयसौभाग्यान् ब्रह्मेशौ विख्यातौ यद्वा वदन्तीत्यादिश्लोकोक्तौ ब्रह्मपरमात्मानौ रमा देवी अन्तरङ्गा चिदानन्दात्मिकाचिन्त्यशक्तिः मूर्ध्नीति परमादरः अघनुत्तये अंहोदुःखव्यसनेष्वघमित्यनेकार्थात् यथायोगं तत्तदपनोदनाय इयञ्च तत्पादरेणूनां माहात्म्यभावना प्रेमकृतैव प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत् यथा भरतचरिते किम्वाअरे आचरितं तपस्तपस्विन्येत्यादि सत्त्वञ्च लीलायां तत्र तत्रानुभूतत्वात् यद्वाञ्छया श्रीरित्यादिना पत्नीभ्यः श्रुतत्वादित्यनुसन्धेयम् ॥ २९ ॥

तस्याः प्रतिपक्षा आहुः । तस्या इति । पूर्वार्द्धं स्पष्टं तत्र यत् यतः येति सासूयम् एकेति मात्सर्य्यम् अपहृत्येति असम्मतिः गोपीनामिति बहुवचननिर्देशेन भेदः सूचितः अच्युतेति विच्यवराहित्येनान्यास्पृष्टत्वं रह इति स्वातन्त्र्यं भुङ्क्ते नतु पिबति ततश्च पानातिशयः अधरमिति सम्भोगातिशयः धनमिति पाठः स्पष्ट एव यद्वा अच्युतेति गाढपरिरम्भेण यद्वा अच्युतस्य त्वया नित्ययुक्तस्येति वाग्देवी सूचितोऽर्थः ॥ ३० ॥

श्रीरामनारायणकृतभावभावीवभाविका ।

कृष्णस्वरूपात्मिकाया लोके प्रेमपथप्रवर्तनायैव परभक्तिरूपतया पार्थक्येनाविर्भूतायाः पादरजोदर्शनेन प्रवृद्धप्रेमोत्कर्षा रजो वर्णयन्ति । धन्या इति । हे आल्य इति सम्बोधनन्तु मात्सर्य्याभावेनैकमत्या च परस्परमात्मवत्स्नेहाधिक्याल्लब्धतद्रजोदर्शनसौख्यस्यान्योऽन्यख्यापनाय सम्बन्धोक्त्या प्रीतिख्यापनेनोक्तार्थविश्वासायच अहो इत्याश्चर्ये अमी इमे गोविन्दांघ्र्यब्जरेणवो धन्याः तद्धन्यत्वापादनायाहुः । यानिति । तत्र देवानामिन्द्रादीनां जीवत्वेन तैर्धारणेप्युत्कर्षाधिक्याभावादीश्वराणां ब्रह्मादीनां ग्रहणं तत्र रजोगुणाधिष्ठातेशो ब्रह्मा तमोऽधिष्ठातेशः शिवः सत्त्वाधिष्ठात्री रमा तत्रोपाधिगुणप्रयुक्ततदुत्कर्षज्ञापनाय देवी रजस्तमोवत्सत्त्वस्य विक्षेपावरणाभावात् द्योतनात्मिका नच ब्रह्मेशसहकारे विष्णोर्वक्तव्यतया रमोक्त्यनौचित्यामितिवाच्यं विष्णोरेव गोविन्दत्वेन तदङ्घ्रिरेणूनां तेनैव धारणोक्त्यसम्भवात् हरिर्हि निर्गुणः साक्षादित्यादिवाक्यैस्तत्र गुणविशिष्टत्वासम्भवेन निर्गुणे विष्णौ श्रूयमाणसत्त्वाधिष्ठातृत्वस्य तत्रासम्भवे सविशेषणेहीतिन्यायेनाङ्गावतरणन्यायेन च विशिष्टप्रधानयोः श्रूयमाणस्य तत्रासम्भवे विशेषणेऽङ्गेचावतरणवत्तच्छक्तौ रमायामेव कथनौचित्याच्च ते ब्रह्मादयो मूर्ध्नि दधुरिति रेणूनां धन्यत्वोत्कर्षस्तद्धस्तुत्कर्षश्च दर्शितः अघनुत्तये इति प्रयोजनकथने तु नवै देवा पापान् स्पृशन्तीति श्रुत्या देवेषु तद्देहोत्पन्नपापास्पर्शेऽपि यथाकथञ्चिज्जन्मान्तरीयपापानां जीवत्वेन सम्भावनाभवेदीश्वरेषु तु सर्वथा तदनुपपत्तेस्तत्तदधिकारप्रयुक्तकर्मविक्षेपे सम्भावितकृष्णस्वरूपाननुसन्धानमेव पापत्वेन सम्भाव्य तदभावायेति मन्तव्यं यद्वा स्वभक्तानामघापनोदाय ब्रह्मेशयो रजस्तमोभ्यां तदसम्भवाद्रमायाः सत्त्वेन तत्सम्भवेऽपि बोधे भारतेरेव प्रमात्वसदनन्वितसत्त्वस्याप्यकिंचित्करत्वात्तद्रजोधारणं रेणूनां तथोत्कर्षे हेतुगर्भितं तद्विशेषणं गोविन्दांघ्र्यब्जेति गोभिः श्रुतिशिरोभिर्विद्यते

न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ॥
खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥
अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥
प्रपदाक्रमणे एते पश्यतासकले पदे ॥ ३२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अविद्यानिरसनेनाविर्भाव्यते इतिगोविन्दः "सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्यो वासुदेवपरा वेदा" इत्यादिश्रुस्मृतिभ्यः तस्याङ्घ्रिरेवाब्जं तद्रेणव इत्यङ्घ्रेरब्जतोक्त्या मृदुमञ्जुसुरभित्वं तत्सम्बन्धिरेणूनां च तदब्जपरागरूपतया तापहारित्वमिति ध्वनिः । रेणूनां लघूनां तदङ्घ्रिसम्बन्धेनैवेदृग्धन्यत्वं वयं तद्धीना मन्दभाग्या एव परन्तु ब्रह्मादीनां तत्सम्बन्धेनैवाघापनोदवद्वयमपि तद्धृत्यैव तद्वियोगदुःखहेतुमानाख्यपापमपनेष्याम इति भावः ॥ २९ ॥

ननु प्रथमं पदचिह्नदर्शनेऽपि नेदृग्धन्यत्ववर्णनं कृतं कथमधुनेदृक्माहात्म्यस्फूर्तिस्तत्राहुः । तस्या इति । तस्या अतिविलक्षणरूपगुणप्रेमसमृद्धायाः सम्बन्धीनि अमूनि अस्मद्भाग्यात् प्रादुर्भूतानि पदानि पद्यते एभिरिति व्युत्पत्त्यैवेष्टप्रापकाणि नो मानादिदोषग्रस्तमनसामपि उच्चैः क्षोभमेवं माहात्म्यज्ञानपूर्वकतद्दर्शनात्युत्साहं कुर्वन्ति ननु किमेवं तस्या उत्कर्षो येन भगवत्पददर्शनादप्युत्साहवर्द्धनं तत्पदानां तत्र प्रेमोद्धर्षात् ध्यानेनैवाविर्भूतयुगलविहारमनुभवन्त्य आहुः । यैकेति । या सर्वासां गोपीनां मध्ये एका मुख्या यतः सर्वथा अच्युतस्य बहूनां नो हावभावकटाक्षैरपि च्युतिरहिततया विसृज्य गतस्याधरम्विचित्रप्रेमगुणमाहात्म्यादपहृत्य प्रेमगुणभुजदृढबन्धनेन बलादाकृष्य रह इति विक्षेपशून्यतया भुंक्ते अन्यथा तदाविर्भावंविना भुंक्ते इति निश्चितवर्तमानोक्तिर्न भवेत् अतस्तत्पदान्याश्रित्य तत्कृपयोद्भूततादृक्प्रेमप्रभावादेव तत्प्राप्तिरिति भावः । विपक्षतयावस्थानन्तु परभक्त्याचार्य्यभूतानां भगवदात्मिकानामस्पृष्टप्राकृतगुणानां मात्सर्याद्यसम्भवान्नो नो रोचते लोकविडम्बनेन भवतु वा तथाऽतो नो निरासिष्यामः ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तटस्थास्तु अहो किमर्थं विवादो भवतीभिरारब्धः सखीचरणोपरि दृष्टिमदत्त्वा भगवच्चरणरेणून् पश्यतेत्याहुः । धन्या इति । तत्रापि हे आलयः ! सख्यः गोविन्दस्य परमात्मनश्चरणकमलरेणवोऽमी उपलभ्यमाना अहो आश्चर्य्ये धन्या अतिपुण्या यस्माद्यान् रेणून् ब्रह्मा ईशो महादेवः रमादेवी पालनशक्तिः अघस्य स्वस्वाधिकारे सम्भावितस्य दोषस्य विरहदुःखस्य वा निवृत्तये मूर्ध्नि दधुः तथा च तद्वियोगजनकदोषनिवृत्तये तद्धारणं कर्तव्यमिति भावः । स्ववचसि विश्वासार्थं सम्बोधयान्ति हे आल्य ! इति अनभिज्ञापक्षे अहो तत्स्पर्शाभावे रेणुतोऽपि वयं तुच्छा इति भावः । प्रेम्णोऽसतोऽपि माहात्म्यस्य स्फोरकत्वस्वाभाव्यात्प्रेमकृतैवेयं रेणुमाहात्म्यभावना यथा भरतेन किं वा अरे आचरितमित्यादिना मृगपदस्पर्शेन भुवो भाग्यं वर्णितं मानिनीपक्षे यथा रेणवस्तथात्माप्यतो नास्ति मात्सर्य्यकृता मीति भावः निवृत्तिपक्षे सत्यं ज्ञानमनन्तं ब्रह्म सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्याद्यास्तटस्था आहुः । हे सख्यः ! अहो अमी गोविन्दस्यौपनिषदस्य परमात्मनो विसम्बन्धिनः तद्ध्यानास्पदस्य हृदयकमलस्य रेणवस्तत्रस्थाः शुभ्राश्चित्तप्रत्यया धन्याः यतस्तथाभूतान्प्रत्ययान्ब्रह्मादयो देव्याः वेदशरीरायाः सरस्वत्याः मूर्ध्नि मस्तके दधुः वेदान्तार्थाखण्डचिदेकरसपरमात्मस्वरूपानुसन्धानपराः समाधिस्था बभूवुः अघस्य विक्षेपस्य निवृत्तये ॥ २९ ॥

पुनस्तत्प्रतिपक्षा अहो किमुच्यते भवतीभिः समाहितमनसामियं कथा नतु क्षुब्धचित्तानामित्याशयेनाहुः । तस्या अमूनि अशक्यदर्शनानि पदानि नोऽस्माकं वियुक्तानमुच्चैः क्षोभं दुःखव्याकुलतां जनयन्ति यतो या सर्वासां गोपीनां समानमच्युताधरमेकापहृत्य तत्रापि रहसि स्थित्वा भुंक्ते ननु वः स्त्रीसम्बन्धवशादुपरतिं प्राप्तस्य भगवतः कुतोऽधरामृतदानाय प्रवृत्तिः सम्भाव्यत इत्याशङ्कानिरासायाच्युत इत्युक्तं तथाचाऽप्रच्युतस्य नास्ति विरतितासम्भावनेति भावः । यद्वा तद्विरहदुःखादप्यस्माकं तस्यास्तत्संयोगजन्यं दुःखं महदुर्लभमित्यच्युतपदेन ध्वनितं न मानप्रच्युत इत्यर्थागमात् निवृत्तिपक्षे पुनस्तद्विरुद्धार्थका आहुः । तस्या उक्तश्रुतेरुच्चैः सर्वोत्कृष्टत्वेनानुसधीयमानानि पदानि नः क्षोभं स्वार्थप्रच्युतिलक्षणं जनयन्ति यतो यैका सर्वासां श्रुतीनां प्रतिपाद्यमर्थमच्युताधरमेकरसानन्दस्वरूपं रहो भुंक्ते तत्तत्प्रतिपाद्यतद्वैशिष्ट्यादर्थाद्विशेष्यमात्रमपहृत्य सर्वविशेषविनिर्मुक्तं प्रतिपादयतीत्यर्थः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धन्या इति । सर्वतीर्थतीर्थभूतानां ब्रह्मेशरमाणां तीर्थभूताः सर्वतीर्थेभ्यः उत्कृष्टा इत्यर्थः ॥ २९ ॥

यत् यस्मात् ॥ ३० ॥

भाषा टीका ।

हे सखी ! हो श्रीगोविन्द के चरण कमल के ये रज बडे धन्य हैं जिन को अपने अघों को दूर करवे के लिये ब्रह्मा महादेव लक्ष्मीदेवी अपने मस्तक मे धारण करैं हैं ॥ २९ ॥

वा गोपी के ए चण चिन्ह हमारे मन को बडो क्षोभ करैं हैं जोकि हम सब गोपिन के भाग अधरामृत को छीन एकान्त में अकेली भोगै है ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदसंपृक्तान् केवलं कृष्णपादरेणूनेव विचिन्वत्यस्तान् दृष्ट्वा पुन-

१ इमान्यधिकमग्नानि पदानि वहतो वधूम् ।
गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः ॥
अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ॥०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्यन्त समतपन् तदाह श्लोकत्रयेण । न ळक्ष्यन्त इति । खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्तामुन्निन्ये स्कन्धमारोपितवान् ॥ ३१ ॥

प्रपदाभ्यामाक्रमणं क्षोणीमर्दनं ययोः अत एवासकळे पदे पश्यतेति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

उन्नित्ये स्कन्धमारोपितवानिति स्कन्ध आरुह्यतामिति वक्ष्यमाणानुसारेण तैर्व्याख्यातं प्रेयसीं प्रियतमां प्रिय इति पैशुन्योक्तिः अन्त्यपक्षे च अन्योऽन्यं प्रियत्वेन तत्रापि प्रेयसीत्वेन सर्वाभ्यस्तस्यां प्रीतिरधिका सूचिता अत उन्नयनं युक्तमेवेति भावः । यद्वा उन्निन्य इति हस्ताभ्यामुत्थाप्याङ्के कृत्वा वा निन्य इति ज्ञेयं तथा सत्येव तादृशालिङ्गनादिरससंपत्त्या प्रेयसीत्वं सुसिध्येदिति तल्लक्षणमाहुः । इमानीति । हे गोप्य इति विदग्धाभिर्युष्माभिरेतल्लक्ष्यत एवेति भावः । कामिन इति । अन्यथा तदसम्भवः ईर्ष्योक्तिरेषा वस्तुतस्तु कामयुक्तत्वेनैवाधिकात्मतदपेक्षा सूचिता अन्त्यपक्षे च तस्यामासक्तिरभिप्रेता एतत्पद्यं बहुपुस्तकेषु न दृश्यते पश्चादग्रे तस्याः पदानि वीक्ष्याहुः । अत्रेति । महात्मना विदग्धशिरोमणिनेत्यर्थः । श्लेषेण महान् पर्वतवत् स्थूल आत्मा बुद्धिर्यस्येतीर्ष्योक्तिः इदं पद्यं क्वचिदेव दृश्यते ॥ ३१ ॥

प्रियार्थं प्रेयसेत्यनेन पूर्वोक्तस्य प्रेयसीं प्रिय इत्यस्य वैपरीत्योक्त्यान्योऽन्यं तुल्य एव प्रेमा सूचितः यद्वा उन्नयनापेक्षया पूर्वं प्रेयसीमित्युक्तमिदानीञ्च प्रेयसेति प्रियतमत्वेन तया कृतेनादेशेन पुष्पावचयः कृत इत्याद्यभिप्रेतं तत्र पदे इति द्वित्वं श्रीवृन्दावनवर्तिपुष्पवृक्षाणामेकतमस्यैकदेशे स्थित्यापि बहुलपुष्पावचयासिद्धेः किम्वा स्थाने स्थाने बहूनामप्युदितानां पदानामेकद्वयोर्दृष्टेः अत एव श्रीविष्णुपुराणे ।—

पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम् ।
येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मनः ॥

इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

न लक्ष्यन्ते इति मत्सरोक्तित्वात् स्कन्धमारोपितवान् इति तैर्व्याख्यातम् । अत्र तान् दृष्ट्वेति तदसंपृक्तान् दृष्ट्वेत्यर्थः । यद्वा सख्योऽप्याहुर्नेति । सखीवाक्यत्वादेव खिद्यदित्यादि प्रेयसीम् अतिशयेन तत्प्रीतिविषयामित्यर्थः । अत उन्निन्ये हस्ताभ्यामङ्के विधाय निन्य इत्यर्थः । अथ प्रतिपक्षाः सासूयमाहुः । इमानीति । हे गोप्य ! इति विदग्धाभिर्युष्माभिरेतल्लक्ष्यत इति भावः । कामिनः केवळकामपरतन्त्रस्य न तु प्रेमरसविदग्धस्येत्यर्थः । पुनः सख्य आहुः अत्रेत्यर्द्धम् । महात्मना विदग्धशिरोमणिनेत्यर्थः । तदेतत् सार्द्धपद्यं क्वचिन्न दृश्यते च अतो नाङ्कः कृतः ॥ ३१ ॥

अथान्याः सख्य आहुरत्र प्रसूनेति । प्रेयसा अतिशयेन प्रीतिकर्त्रा । पूर्वत्र लिङ्गमाहुः । प्रपदे इत्यर्द्धेन । पदे इति प्रति पुष्पवृक्षमितिशेषः । अत एव बहुत्वं श्रीविष्णुपुराणे

पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम् ।
येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मन इति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्या तु केवलमसम्पृक्तानि कृष्णस्यैव पदानि दृष्ट्वा सामर्षमाहुः । नेति । तस्या वध्वाः पदान्यत्र न लक्ष्यन्ते कुतः यतो नूनं तृणांकुरैः खिद्यती सुजाते सुकुमारेऽङ्घ्रितले यस्याः तां प्रेयसीं प्रियः कृष्णः उन्निन्ये स्कन्धमारोपितवानित्यर्थः ॥ ३१ ॥

अपरास्तु सत्यमत एवाधिकमग्नानि पदानि पश्यतेत्याहुः । इमानीति । हे गोप्यः वधूं वहतो गामिनः गच्छतः कामिन इति पाठे कामिनोऽत एव वधूं वहतः कृष्णस्यात एवाधिकमग्नानीमानि पदान्यत्र पश्यत ॥ ० ॥

काश्चिद्भूमिसम्मर्दमाळक्ष्याहुः । अत्रेति । महात्मना कामिनात्र पुष्पहेतोः पुष्पावचयार्थं कान्ताऽवरोपिता अत्र तु प्रियार्थं प्रियामलङ्कर्तुं प्रेयसा कृष्णेन प्रसूनावचयः पुष्पलवनं कृतः अत एव प्रपदाभ्यां पादाग्राभ्यामुच्चप्रसूनावचयार्थमाक्रमणं ययोस्ते अत एवासकलेऽर्द्धमग्ने एते पदे पादाङ्कौ पश्यत ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदमधिकं शोककारणमित्याशयेनाहुः । नेति । नूनं तर्के एवं कथं तस्याः गोप्याः पदानि न लक्ष्यन्ते न दृश्यन्ते अदर्शने कारणमूहयन्ति । तृणांकुरसम्बन्धेन खिद्यत्परिघातमाप्नुवत् सुजातं ळलितमंघ्रितलं यस्याः सा तथा तां प्रेयसीमुन्निन्ये उद्धृत्यानीतवान् उद्धृत्य नयनेन भूमिसम्बन्धाभावात्पदादर्शनमपि अत एव तादृशप्रेम नास्माकं प्राप्तमिति शोकोऽस्माकम् ॥ ३१ ॥

युष्मत्परित्यागवत्प्रेयसीपरित्यागेन गमनाच्चेत्पदादर्शनं किं न स्यादित्यतः कुत उद्धृत्य गमनमनुमीयत इत्यत एतल्लिङ्गमप्रतिहतमित्याहुः । इमानीति । धूमाग्न्योरविनाभाववत् भारवहपुरुषपदमज्जनं भारवहनाविनाभूतं प्रत्यक्षसिद्धत्वादूह्यागमनमनुमीयत

---

१ इदं सार्धं बहुषु पुस्तकेषु न विद्यते बहुभिष्टीकाकैर्व्याख्यातं च

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्यर्थः । मानयितुं शीळमस्यास्तीति मानी तस्य अधिकमङ्गारो- क्तिरियम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

कियद्दूरं गत्वा न चलितवती यतः तृणांकुरैः खिद्यत्सुजाताङ्घ्रितलां कथमनुमितं तत्राहुः । न लक्ष्यन्त इत्यादि । प्रियत्वात् प्रेयसीत्वाच्च योग्यमेवैतत् ॥ ३१ ॥

हे सख्य असिद्धोऽयं हेतुः तथाहीत्याहुः मव्यभिचारात् तत्कृतोऽप्यत्र गतेति तत्पदानि न लक्ष्यन्ते तामुन्नयनात् नैव पश्यत व्यभिचार्य्येवायं हेतुः तथाहीत्याहु । इमानीत्यादिः । अधिकमग्नानि वधूं वहतश्चेत् यतो भाराक्रान्तस्य वहने हेतुः कामिनः कियद्दूरमन्यतो गत्वा पदळक्ष्मप्रकारान्तरमाळोक्य सनिर्णयमाहुः । अत्रेत्यादि प्रियार्थे प्रियानिमित्तम् अत्र स्थले तेन प्रसूनावचयः कृतः तल्लिङ्गमाहुः असकळे खण्डे पदे पश्यत कीदृशे प्रपदाक्रमणे प्रपदं पादाग्रं तेन आक्रमणमवष्टम्भनं ययोः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अन्याः पुनस्ततोऽपि खेदं कृतवत्य इत्याह । न ळक्ष्यन्त इति । अहो किमिति विचार्यते अधरामृतम् पिबतीति एतावद्दूरे समागतानि तस्याः पदानि अग्रे न लक्ष्यन्ते नच वक्तव्यं समीचीनं जातमिति तत्राहुः तस्याः तृणांकुरैः खिद्यत्पादतळं जातं तदा तादृशीमुन्निन्ये ऊर्ध्वं नीतवान् कटिभागे स्कन्धभागे वा वस्तुतस्तु हस्ताभ्यामेवोद्धृतवानिति सुतरां खेदे हेतुः ननु कथमेवं करिष्यतीत्याशङ्क्याहुः । प्रेयसीमिति । साप्यत्यन्तं प्रिया स्वयमपि तस्याः प्रियः अतो ज्ञायते न सा स्कंधमारूढा किंतु केवलमुन्निन्ये ॥ ३१ ॥

किञ्च तेन प्रकारेण न बहुदूरे गमनं सम्भवति अतः कचिद्विश्रम्य पुष्पावचयमपि तदर्थे करोतीत्याहुः । अत्रेति । प्रसूनानामवचयः वृक्षादुत्तारणं – नच स्वार्थे भविष्यतीति शङ्कनीयं सा हि श्रान्ता अतः प्रियार्थ एव सा तु कर्तुमशक्तैव तदाहुः प्रेयसा कृत इति सा हि भगवदपेक्षया खर्वा प्रपदाभ्यामुत्थातुमप्यशक्ता अतः प्रेयसैव कृतः यतः प्रपदाक्रमणे पादाग्राभ्यामेवाक्रमणं ययोः अत एवासकळे पार्ष्णिभागो नाभिव्यक्त इति पश्यतेति सन्देहाभावार्थे वचनम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भो मत्सरमहारोगग्रस्ताः मा खिद्यत नात्र तस्याः पदानि सन्तीति तस्याः प्रियसख्य आहुः । नेति । ताः प्रत्येव सहर्षापाङ्गमन्याः सख्यो नीचैः सवितर्कमाहुः । नूनमिति । उन्निन्ये भुजाभ्यामुद्धृत्य स्ववक्ष आरोहयामासेत्यर्थः । यतः प्रेयसीमति प्रीतिविषयत्वात्तच्चरणतलखेदस्यासह्यत्वात् इह खलु तत्सखीनामुभयविधं सुखं तस्यास्तादृशसौभाग्यदर्शनोत्थं विपक्षाणां तादृशदुःखदर्शनोत्थं चेति ज्ञेयम् ॥ ३१ ॥

भो असतीस्य भाषिण्यः मा खिद्यतेति किं ब्रूथे तत्पादानां दर्शनादप्यदर्शनमतिदुःखाकरमस्मत्प्राणानामदर्शनं सम्भावयतीति द्योतयन्त्यः प्रतिपक्षा आहुः । इमानीति । वधूमित्यनुपनीतेनापि कृष्णेन वनेऽत्र सा स्ववधूरेव कृतेति भावः अत एव भाराक्रान्तस्य गृहस्थाः खलु कलत्रभाराक्रान्ताः इतस्ततो भ्रमन्त्येवेति भावः । कामिनः ननु प्रेमिणः प्रेमवतीनामप्यस्माकं त्यागादित्यत एव काम एव तं तां वाहयेदन्यथा व्रजेन्द्रकुमारो ह्यतिसुकुमारः किं गोपालिकाया वाहनो भवेदेति भावः ॥ ३२ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तदुक्तिमसहमानास्तत्प्रतारणाय सुहृद आहुः । नेति । निषेधस्य प्राक्प्रयोगस्तदुक्तिप्रतिषेधाय नैवं वाच्यमित्यर्थः । अस्यदेहलीदीपत्वेनाग्रेऽपि सम्बन्धः न लक्ष्यन्ते लक्षणैरपि न ज्ञायन्त इत्यर्थः । नूनं सम्भावयामः खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्तां प्रेयसीं कोटिगुणाधिकप्रियां प्रियस्तत्प्रेमाश्रयः उन्निन्ये अङ्के कृत्वा नीतवान् तत्र हेतुः । तृणेति । इदं प्रतीत्यभिप्रायेण वा प्रेमविवर्त्तन वा श्रीवृन्दावनतरुलतातृणाङ्कुरादीनां तयोरिच्छया तत्प्रेमावेशेन च स्वीकृतजडीभावानां खेदप्रदत्वाभावात् सुजातेति सौहृदं सुचितम् ॥ ३१ ॥

कान्तभावासाधकसहचर्य्यः सेर्ष्यमाहुः । इमानीति । हे गोप्य इति साधुविज्ञातं विदग्धाभिभवतीभिरित्यधीरत्वम् इमानि कृष्णस्य तत्प्रेमाकृष्टस्य पदानि अधिकमग्नानि पश्यत भाराक्रान्तस्येति सानुशयं वधूं वहतः देशान्तरं नयतः तत्र वधूमिति साभिलाषोक्तिः कामिन इति सासूयं नतु प्रेमविदग्धस्येत्यर्थः । वाग्देवी तु तत्सेवैककामयितुः परमानुरक्तस्येत्यर्थः ॥ ३२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे तत्पदान्यदृष्ट्वा किन्तामपि कुत्रचित् त्यक्तवांस्तथा चेत्तदृश्यास्त्यागे नो नैराश्यमेवेति मुग्धभावेन खिद्यतीः प्रति काश्चित्सुज्ञा आहुः । न लक्षन्ते इति । अत्र यत्तस्याः पदानि न लक्षन्ते तेन न तत्त्यागः सम्भावनीयः परमदयालोर्भक्तवत्सलस्यानुरक्तत्यागानुपपत्तेरसमदुपेक्षापि मानदोषपरिहारायैव किमिति तर्हि न लक्ष्यन्ते तत्राहुः । नूनमिति । निश्चितमेतत्तामुन्निन्ये आलिङ्गनसौख्यस्य मार्गेऽप्यनुभवायाङ्के उत्थाय नीतवान् करुणातिशयेन स्वोद्वहनेनापि भक्तातिसुखदातृत्वमूहित्वा भक्तदुःखासहिष्णुतां सूचयन्त्य आहुः । खिद्यत्सुजाताङ्घ्रितलामिति । खिद्यती सुजाते सुकुमारे अङ्घ्रितले यस्यास्तां ननु किमत्यानन्दघनस्यापि तद्दुःखदुःखितं तत्राहुः । प्रेयसीमितिशयेन प्रियतमां ननु समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय इति वदतस्तस्य कथं सा प्रेयसी तत्राहुः । प्रिय इति तथा च तस्य सर्वसमत्वेन रूपलावण्यादीनां तत्राकिञ्चित्करत्वेऽपि प्रेम्ण एवायं स्वभावो यदात्मारामस्य प्रेयसीत्वमापादयति—

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति ॥

तेनैव प्रतिज्ञातत्वात् ॥ ३१ ॥

इमान्यधि कमग्नानीति सार्द्धपद्यन्तु बहुपुस्तकेष्वदृश्यमानं श्रीश्रीधरस्वामिभिः श्रीवल्लभाचार्यैश्चाप्रामाणिकत्वेनाव्याख्यातं तोषणीकारैस्तु तद्वहिर्भूतत्वप्रकटनार्थेव स्वग्रन्थे लिखित्वा तदेत-

केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥
तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ ३३ ॥
रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः ॥
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ ३४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

त्साद्रूपं कचिन्न दृश्यते अतो नाङ्कः कृत इति लिखितमतोऽस्माभिरप्युपेक्ष्यतेतत्पदलापनिकात्वेवम्भाव्या "इमान्यधिकमग्नानिपदानिवहतो वध्वूम् गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना" कृष्णस्य नित्यानन्दस्वरूपस्यापि तदीयप्रेमभाराक्रान्तस्यात एवाकामत्वेऽपि सति प्रेमभाराक्रान्तत्वेनैव कामिनस्तमिवाचरतोऽत एव वधूंस्कां वहत इमानि पदान्यधिकमग्नानीति पश्यत अत्र च पुष्पहेतोस्तेन महात्मना सा कान्ता अवरोपिता उत्तारिता अग्रे पुष्पावचयचिन्हमवलोक्याहुः । अत्रेति । अस्मिन्प्रदेशे प्रेयसातिप्रेष्ठतमेन कृष्णेन नित्यानन्दस्वरूपेणापि प्रेमवशीकृतचित्तेन प्रियार्थं एव प्रसूनावचयः कृतः आप्तकामस्य भगवतः स्वार्थप्रवृत्त्यनुपपत्तेः प्रियार्थप्रवृत्तेस्तु तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति तेनैव प्रतिज्ञातत्वाच्च तत्र लिङ्गमाहुः । प्रपदेति प्रपदाभ्यामेवाक्रमणं ययोरत एवासकले भूम्यलग्नपार्ष्णिभागे पदे पश्यत तथा चैवं प्रेमाधीनभक्तवत्सलरसिकशिरोमणेरस्मदुपेक्षाऽसम्भवेऽपि स्वमानदोषकृतमेवावमानमनुभवाम इति भावः ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो मास्तु कलहस्तत्पदानि संप्रति न दृश्यन्त इति तटस्थाभिरुक्ते सति अहो सत्यं तत्पदान्यत्रास्मिन्प्रदेशे न लक्ष्यन्ते इति तद्वाक्ये सर्वाभिरङ्गीकृते तदनन्तरज्ञाः काश्चित्सुहृद आहुः । नेति । अहो सा प्रेयसा विश्लिष्टेति न भ्रमितव्यं किन्तु तामुन्निन्ये बाहुभ्यामुत्थाप्य स्वकटिभागे गृहीतवानतस्तस्याः पदान्यत्र न लक्ष्यन्ते इत्येवं निश्चयेन ज्ञातव्यम् उन्नयननिमित्तमाहुः । तृणांकुरैः खिद्यती यतः सुजाते अङ्घ्रितले यस्याः तां ननु एवं तर्हि स्कन्धमारोपितमिति कुतो न कल्प्यत इति चेत्तत्राहुः । प्रेयसी रसाविर्भावकरी खेदाद्य जनकं कटिभागारोपणमेव तादृश्याः प्रेयस्याः समुचितमिति भावः ननु विश्रम्भं दत्त्वा तत्रैव कुतो न स्थितेत्याशंक्याहुः । प्रियः यतस्तस्या अपि सत्यविश्लेषे तथा परिरम्भणायाभीष्ट इति भावः । निवृत्तिपक्षे अहं ब्रह्मास्मीत्याद्यर्थतदेकार्थप्रतिपादिका आहुः । तस्याः पदानि अत्राखण्डैकरसे परमात्मनि न लक्ष्यन्ते शक्तिवृत्त्या प्रवृत्तानि नोपलभ्यन्ते ऽतो नूनं तृणांकुरस्थानीयैर्वाच्यांशैः खिद्यती सुजाते एकार्थनिष्ठत्वात्समानाधिकरणभूते अङ्घ्रितले कोमलपदे यस्यास्तामुन्निन्ये ऊर्ध्वं शक्तिवृत्ते प्राच्याः भागत्यागलक्षणया सर्वोत्तमं स्वरूपमानन्दैकरसमाशोधितवान् यतः प्रेयसी प्रियः संसर्गासंगिसम्यक्ज्ञानदातृत्वात्प्रेयसी स्वयं च तदेकपरस्तस्याः प्रिय इति भावः ॥ ३१ ॥

एतच्छ्रुत्वा अधिकमग्नानि प्रेष्ठपदानि च दृष्ट्वातिक्षुब्धस्वान्तास्तटस्थाभिमुख्यः प्रतिपक्षा आहुः । इमानीति । अहो सत्यमुक्तमेताभिर्यतो वधूं कामिनो ननु प्रेमिणः प्रेमवतीनामस्माकं त्यागात् कृष्णस्येमानि उपलक्ष्यमाणानि पदानि भाराक्रान्तानि यतोऽधिकमग्नानि पश्यत स्थित्वा विचारयत यतो भवत्यो विचारचतुरा इति गोप्य इति सम्बोधनाशयः कामिन इत्यादिपदैरसूया व्यज्यते तथा च स्थूलदेहाया वध्वाः सुकुमारशरीरिणो वहनं भारेण पीडाकरमत्यन्तकामिचेष्टितं पददर्शनादप्यधिकखेदकरमिति भावः । निवृत्तिपक्षे सर्वकाम इत्यादिश्रुतय आहुः । हे गोप्यः ! पालनशक्तिमत्परमात्मस्वरूपप्रतिपादनपराः यथोक्तश्रुतिलक्षणां वधूं वहतो यथोक्तरीत्या प्रतिपादकत्वेन धारयत इमानि कृष्णस्य सदानन्दविग्रहस्य सिसृक्षादिकामनाविशिष्टस्य पदानि ध्यानायोग्यधिकार्यन्तःकरणप्रत्ययलक्षणानि अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यत इत्युक्तत्वात् भाराक्रान्तानि यथोक्तश्रुत्यर्थवहनासमर्थानि पश्यत ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खिद्यती सुजाते सुकुमारे अङ्घ्रितले यस्यास्ताम् उन्निन्ये स्कन्धमारोपितवानित्यर्थः ॥ ३१ ॥

पुष्पहेतोः पुष्पावचयार्थमवरोपिता स्कन्धादवतार्य स्थापिता पुष्पाणामपचयः लवनं कृतम् अत एव प्रपदाभ्यां चरणाग्राभ्यामुच्चपुष्पावचयार्थमाक्रमणं क्षोणीमर्दनं ययोस्ते अत एवासकले हे गग्ने एते पदे पादचिन्हे पश्यत कामः भक्तमनोरथपूरकः सङ्कल्पोऽस्यास्तीति तथा ॥ ३२ ॥

भाषा टीका ।

इहां वा के चरण चिन्ह नहीं दीखैं हैं सो ठीक हमैं मालूम पडै है कि जब वाके कोमल सुन्दर चरण घांस के अंकुरो ते दूखवे लगे तव अपनी प्यारी राधिका प्यारे ने उपर उठाय लीनी है ॥ ३१ ॥

या ठिका ने वा प्यारी के लिये प्यारे ने झुक के फूल तोरे हैं ताते या ठिकाने एक तरफ उठे आधे चरण दीखैं हैं सो तुम सब देखो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्याः कृष्णजान्वन्तरुपविष्टायाश्चिह्नं दृष्ट्वाऽहुः । केशप्रसाधनमिति । कान्तामधिकृत्य तानि प्रसूनानि चूडतया चूडानुकारेण बध्नता ध्रुवमुपविष्टम् ॥ ३३ ॥

रेमे इत्यादिशुकोक्तिः आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखण्डितः स्त्रीविभ्रमैरनाकृष्टोऽपि तथा चेत्किमिति रेमे ऽत आह । कामिनामिति ॥ ३४ ॥ ३५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

केशानां प्रसाधनं संस्करणं तच्च स्वाङ्गुलिभिः तदर्थात्मशिरो न्यस्तकङ्कतिकया वा तुशब्दो भिन्नोपक्रमे हीतिपाठे निश्चितं प्रसाधनप्रयोजनं सूचयन्ति । कामिन्याः कामिनेति । कामक्रीडासुखार्थमित्यर्थः । किम्वापूर्वोक्ताकामिन शतवत् ध्रुवं निश्चितमिति साक्षात्तल्लक्षणाभिव्यक्तेः ॥ ३३ ॥

स्वस्मिन् आत्मनि आत्मना स्वयमेव यद्वा स्वस्य आत्मना स्वभावेनैव रतस्तुष्टः चेति पाठे रेमे चेत्युक्तसमुच्चये चकारः ततश्च आत्मनैव रतस्तुष्टः तादृशोऽपि रेमे इति तादृशत्वमधुना न स्थितमिति पूर्ववदर्थः पुनः पुनस्तथोक्तिस्तद्दार्ढ्याय अतस्तयैव तुष्टः तयैवारमात तद्विभ्रमैर्वशीकृतश्चेति तात्पर्यम् अतः प्रेमनिर्जितत्वेन तस्यां स्वर्वस्वमर्पितमिति सूचितं तच्च भक्तवत्सलवरस्य प्रियजनप्रेमपरवशस्य तस्य न दोषः कश्चित् प्रत्युत निजभगवत्तासारप्रकटनरूपमहागुण एवेति पूर्वे बहुशो लिखितं श्रीभागवतामृतेच विवृतमेव यद्वा स्वात्मानः सख्येना समतुल्याः किंवा स्वस्यात्मानः प्रिया व्रजसुन्दर्य्यस्तासु रतोऽपि अखण्डितः सम्पूर्णः सन् कायमनोवचनासक्त्या साकल्येन रेमे इत्यर्थः । अन्यत्समानं नचैवं केवलं निजाप्रिया एवा नन्दिताः अन्येषामपि हितं कृतमित्याह । कामिनामिति । कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकान् शिक्षयामासेत्यर्थः । तदेवाह साचेति । यद्यपि तादृशो व्यवहारो मानश्च न दुरात्मतया किंतु केवलमुभयोर्महानागरयोरन्योऽन्यं प्रेमविवर्द्धनो विशेषतश्च स्वाधीनभर्तृकात्वेनोचित एव तथापि दर्पस्तत्कृतोक्तिविशेषश्चेश्वरे ऽनुचित एवेति वैधोपासनाशास्त्रपरैस्तथा व्याख्यायते तद्दोषः परिहृत एव तयोर्ल्लोकशिक्षापरत्वात् यद्वा कामिनामिन्द्रादीनां दैन्यं दर्शयन् प्रेयसीकृततादृग्विलासादिसुखाभावात् स्त्रीणां च दुरात्मतां दुष्टविषयकात्मतां दुर्बुद्धितां वा श्रीकृष्णेतरकुत्सितपतिभजनात् अथवा कामिनः प्रति दैन्यं स्त्रियश्च प्रतिदुरात्मतामेव दर्शयन् शिक्षयन्नित्यर्थः । अयंभावः यदि कामक्रीडायां रसिकतास्ति तदारिरंसुभिः पुंभि रीदृश्या स्त्रीवश्यतया दीनैरेव भाव्यं स्त्रीभिश्च कंदर्पक्रीडादिषु लज्जादिकं परित्यज्य पुरुषं च वशीकृत्य स्वातन्त्र्यरूपदुश्चेष्टापराभि र्भाव्यमिति एतच्च तयोर्वक्ष्यमाणवचनव्यवहारादेः किंवा उक्तव्यवहारस्याभिप्रायेण यद्वा अत्रोक्तरमणप्रकार एवायं दर्शितः ततश्च वेदध्वीविशेषेण कामशास्त्रोक्तविविधवंधादौ स्कंधद्वयोपरि स्त्रीपादद्वयनिधारणादिना दैन्यं दौरात्म्यं वाधरदशननखक्षतिकेशग्रहणपुरुषायितादिनोह्य दैन्यदुरात्मता शब्दप्रयोगश्च ज्ञानादिनिष्ठमुनिविशेषापेक्षया वस्तुतस्तु निजरसविशेषेण उक्तिभंग्येवेति यद्वा आत्मरत इति सप्तम्यन्तं तेन सहानयोरन्वयः ततश्च भावे कः आत्मरतो दैन्यं दुःखमेवेति कामिनः प्रति दर्शयन् तया कामभोगासिद्धेः आत्मरतौ दौरात्म्यमेवेति स्त्रियश्च प्रतिदर्शयन् तत स्वामिसेवाद्यसिद्धेः अतएवात्मारामता नादरेण तया सह स्वयं रेमे इत्येषा दिक् अलमतिविस्तरेण एवंतद्वचनं श्रीव्रजदेवीनामपि संगच्छेत श्रीभगवत्तत्त्वज्ञाने निजभावान्यभिचारेण रसविशेषमयत्वात् ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

गर्भकाव्यमाल्यखण्डपतनं दृष्ट्वा पुनर्विपक्षा आहुः । केशेत्यर्द्धेन । तुशब्दो भिन्नोपक्रमे हीति पाठे निश्चयम् । प्रसाधनप्रयोजनं सूचयन्ति । कामिन्याः कामिनेति । कामक्रीडासुखार्थमित्यर्थः । तादृशोपवेशं दृष्ट्वा सख्यस्त्वाहुः तानीत्यर्द्धेन । चूडयतेति ज्ञानन्तु स्वदेशे तादृशवेशस्य प्रायशो दृष्टेति ज्ञेयम् ॥ ३३ ॥

तदेवं श्रीगोपीजनमुखेनैव तया सह तल्लीलां प्रशंस्य स्वयमपि प्रशंसति रेम इति । स्वैः स्वांशरूपैर्वैभवैः वैकुण्ठीयलक्ष्म्यादिभिर्गोष्ठसम्बन्धिप्रेयस्यादिभिश्च हेतुभिरपरापेक्षारहिततया तत्तदंशिनि आत्मनि स्वस्मिन्नेव रतः स्वेनैव पूर्णकाम इत्यर्थः । तादृशोऽपि तथा आत्मारामः स्वरूपानन्दावेशतत्पर इत्यर्थः । तादृशोऽपि तया हेतुना रेमे तत्तदनादृत्य नन्दति स्म । तत्र हेतुस्तयेत्यर्थः । तच्छब्दस्य वक्तृबुद्धिस्थवैलक्षण्यव्यञ्जकत्वात् सर्वाधिकतत्प्रेमाश्रयविषयरूपयेत्यर्थः । रेमे तया चात्मरत इति पाठे आत्मारामशब्देन पौनरुक्त्यापातात् तत्पूर्णकामात्मकत्वादेवात्मरत इति लभ्यते । चशब्दश्च यथा तया तस्य रमणं ताभिर्वितर्कितम् । तथा रेमे च इति बोधयति । तदेवमपि पूर्ववदेव विवक्षितम् । ननु ताभिर्लक्ष्म्यादिभिः प्रेयस्यादिभिरपि तस्य रमणं दृश्यते तत्राह । अखण्डितः अनया हेतुना यथा ततस्ततः खण्डितः स्यात् । खपतेः सकाशात् खण्डितानायिकावन्मनसा विच्युतः स्यान्न तथास्याः सकाशादयं लक्ष्म्यादिभिर्हेतुभि र्न कदाचिदपीत्यर्थः । अतः प्रेमनिर्जितत्वाद्नेन तस्यां स्वं सर्वं समर्पितमिति सूचितम् । तच्च प्रियजनप्रेमवशत्वं तस्य महानेव गुण इति पूर्वं बहुशो लिखितम् । श्रीभागवतामृते च विवृतम् । तदेवं तस्या एतादृश प्रेमा येन तादृशोऽप्यसौ वशीचक्रे तस्य चैतादृशः येन तादृशात्मारामतापि तिरश्चक्रे । तदेवं तादृशालम्बनत्वप्रेमवशत्वविहीनाः कामिनः कामिन्यश्च स्वमहिम्ना परास्ततया दर्शिता इत्याह । कामिनां दर्शयन्निति । अत्र कामिनामिति मलमूत्रादितया परिणामिभिरन्नजलादिभिस्तर्प्यमाणो यो देहस्तत्तर्पणेच्छारूपकामस्वभावानां नतु सच्चिदानन्दविग्रहतया स्वतस्तृप्तानां नतु वा प्रियजनतर्पणमात्रस्वसुखलक्षणप्रेमस्वभावानामित्यर्थः । तेषां दैन्यं दुर्गतत्वम् । तथा स्त्रीणामपि मलमूत्रेत्यादिलक्षणानां नतु तस्यापि रमणहेतुतावगतसच्चिदानन्दत्वादिलक्षणानामित्यर्थः । तथा च तासां तद्विरोचनयोग्यता वक्ष्यते ताभिर्विधूतशोकाभिरित्यादिना । तदन्यस्त्रीणां दुरात्मतां तादृशदुर्गतनायकं वशीकृत्य हर्षगर्वादिदुष्टस्वभावतामित्यर्थः । तदुक्तं श्रीरुक्मिणीदेव्या त्वक्श्मश्रुरोमनखकेशेत्यादिना । अत्र श्रीकृष्णस्य तावद्वैलक्षण्यमुक्तमेव । याते पदाब्जमित्यादौ तद्वैलक्षण्यानुभवयोग्यास्च काश्चिदेव तद्वद्विलक्षणा एव भवन्तीति च ज्ञापितम् । तदेवं तेषाञ्च दैन्यं तासां दुरात्मतां दर्शयन्निति दर्शयन्निधुपराजयं रमावक्त्रामुल्लसति धृतलाञ्छनमितिवत् । सत्सरसिजोदरश्रीमुषेति वच्च । वाग्भङ्ग्या स्वतस्तत्ताच्छिल्यर्थोऽतिशय एव प्रतिपादितः । नतु बुद्धिपूर्विका तेन तद्दर्शना सति स्वात्मरतत्वादिके कामिदैन्यादि दर्शनार्थमुपहासकजनवत्तदनुकरणमपि न घटते इत्यन्यथा तु न व्याख्यातम् । भक्तप्रेमवशता तु नाहं मात्मानमाशासे इत्यादिषु बहुषु सम्मतैव ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तानि चूडयता शिरोभूषणं कुर्वता ॥ ३३—४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काश्चित्तस्याः कृष्णस्यान्वन्तरुपविश्याथिन्हं क्षोणीसमर्दना- दिकमालक्ष्याहुः । केशप्रसाधनमिति । अत्र कामिना कृष्णेन कामिन्याः केशानामितस्ततो विश्लथतां प्रसाधनं पुनः सीमन्त- समीकरणाभ्यां बन्धनं कृतं कान्तामुपेत्य तानि प्रसूनानि चूडयता शिरोभूषणं कुर्वता कृष्णेन तत्रमुपविष्टम् ॥ ३३ ॥

१ इत्युक्तप्रकारेणैव प्रकारान्तरेणापि प्रलपन्त्यः कुर्वत्यः दर्श- यन्त्य इति पाठे मिथः तल्लीला दर्शयन्त्यस्तच्चिह्नानि दर्शयन्त्यस्ता गोप्यस्तत्र तत्र विचेरुः उन्मत्तचित्ता विचेरुः ॥ ९ ॥

किं विलासोऽभिर्गोपीभिः केवलमित्थं सम्भावनामात्रं कृतमुत तत्सत्यमेवेति राज्ञः संशयं निराह मुनिः । रेम इति । तया गोपी- भिरुक्षावितया कयाचिद्गोप्या च सह भगवान् रेमे कथम्भूतो- ऽप्यात्मारामोऽप्यखण्डितोऽप्यवाप्तसमस्तकामत्वेन स्त्रीविभ्रमैरखण्डि- तचित्तोऽपि तथा चेत्किमिति रेमे तत्राह । कामिनां विषयासक्तचि- त्तानां दैन्यं तत्पारवश्यात्मकं स्त्रीणां दौर्जन्यञ्च दर्शयन् दर्शयितु- मित्यर्थः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अवरोहणं स्नेहाधिक्यादित्याशयेनाहुः । महात्मनेति । कथमिदम- वगम्यं पुष्पाणिमित्यादित्याहुः । अत्रेति । अस्याः नखादिसंयोगेन यथा म्लानं न भवति तथा प्रलूनमिदमपि प्रेयसा प्रसाधितायाः प्र- कटनम् ॥ ७ ॥

इदमपि चित्रमित्याहुः । प्रपदेति । हे गोप्यः । प्रपदयोः पादाग्र- योराक्रमणं ययोरस्ति ते प्रपदाक्रमणे एते पदे पादलाञ्छने असकले असम्पूर्णे उन्नतशाखापुष्पावचये प्रियकृष्णकर्तृकावनमि- तशाखाग्रहणे तुः स्थपदत्वाद्यावत्पादप्रमाणरहिते पश्यतेत्यन्वयः केशमार्जन्या केशप्रसाधनं केशसंस्कारः कसु गताविति धातोः काम आनन्दः कामो गतिर्ज्ञानं चास्य स्त इति कामी पूर्णानन्द ज्ञानवानित्यर्थः । तेन कामिना प्रशस्तेच्छावता वा ॥ ३३ ॥

कान्तायाः स्त्रियं तानि पुष्पाणि चूडयता संस्कृतकेशपाशे सुदर्शनीयं निदधता कृष्णेनेह स्थले उपविष्टं पश्यतेति शेषः इदं ध्रुवं निश्चितं सन्देहं न कुरुतेत्यर्थः । अयं सर्वस्मादधिक- शोकतम इत्याहुः । रेम इति । तया कामिन्या रेमे च सुरतशी- लाप्यनुबभूव न स्वार्थमिति सूचयन्ति । आत्मरत इति । आत्मनि स्वरूपानन्दे रतः आत्मन्येवारामः क्रीडा यस्य स तथा आत्म- रत आत्मक्रीड इति श्रुतिः अनेन विशेषणद्वयेन इयमिष्टवृत्ति निषिध्यन्ति भगवत्प्रीतिसाधनभक्तिज्ञानादिदातारतस्यात्प्रीतिदातार- त्वमनुभूतिः इति ज्ञायते तथा चान्या गोप्यः इन्द्रियवृत्तयः कृष्ण- नीता कामिनीमत्किबुद्धिर्वा प्राह्येति बुद्धिमता तत्तत्पदानि तत्तदर्थबोधकत्वेन याजनीयानीति सम्यक्समिति सन्तोष्टव्यं

शोकादिकं च गुणानीमित्तमिति अत एवाखण्डितः कामेनेति शेषः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं स्वयमपि तया सह तल्लीलां प्रशंसति । रेमे इति ॥ ३४॥ ३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ततः क्वापि गत्वा उपवेशचिह्नमालोक्य काश्चिदाहुः । केशप्रसाधनमित्यादि । तु निश्चितम् अत्र कामिन्याः कामिना तेन केशप्रसाधनं कृतं तत्र हेतुमाहुः । तानीत्यादि । तानि अव- चितानि प्रसूनानि चूडयता इह उपविष्टं ध्रुवं साक्षादेव दृश्यतामित्यर्थः ॥ ३३ ॥

अथ तस्या एव वृत्तान्तं श्रीशुकदेवः प्रस्तौति । रेमे तये- त्यादि तया सर्वा विहाय या नीतेत्यर्थः । ननु तस्य वैषम्य मेतदित्याहुः । आसु विरहितासु गोपीषु आत्मरतः आत्मना मनसा रतं रमणं यस्य भावे कः तया सहनीतया सह रेमे ननु कथमेतज्ज्ञातमित्याहुः । आत्मारामः आचिन्त्यपरमै- श्वर्यैः अत एव अखण्डितः अखण्डप्रेमा तुल्यप्रेमेत्यर्थः । दक्षि- णनायकत्वात् मया परोक्षं भजता विरहितामिति तस्य स्वोकेश्च तेन तासु मानसं रमणमस्त्यां कायिकमिति किंकु- र्वन् कामिनां दैन्यं दर्शयन् स्त्रीणां च दुरात्मतां दर्शयन् अनु- मानप्रयोगेण बोधयन् तथाहि यो यः कामी स स दीनः अनीश्वरत्वात् यत्र यत्रानीश्वरत्वं तत्र तत्र दीनत्वं पुरूरवो ययातिप्रभृतिवत् यो यो नैवं स स नैवं यथाह मित्यन्वयव्य- तिरेकिणानुमानेन कामिनां दैन्यम् एवं गोप्यादयो न दुरा- त्मानः मदङ्गसङ्गवत्त्वात् यत्र यत्र मदङ्गसङ्गवत्त्वं तत्र तत्र न दुरा- त्मत्वं यथा लक्ष्म्यादिः या मदङ्गसङ्गवत्यो न भवन्ति ता दुरात्मानो भवन्ति यथा गोप्यादिभिन्नाः स्त्रियः इत्यन्वयव्य- तिरेकाभ्यां सामान्यस्त्रीणां दुरात्मतां च । दर्शयन्निति यावत् एतेन नाहं कामी नैताश्च स्त्रीत्वेन दुरात्मानः अपितु मल्लीलैप- यिकत्वादासां स्त्रीत्वभावात् वाम्यादि मम तु आसामनुव- र्तनं लीलैवेति वाक्यार्थः आत्मसु आत्मप्रायासु गोपीषु रमत इत्यात्मारामः ॥ ३४—३५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततोऽप्यन्या अधिकमेव सूचयन्त्य आहुः । केशप्रसाधन- मिति । नखैरेव केशानां प्रसाधनं वेण्याकारेण आपीडाकारेण वा तुशब्दो ऽन्यथापक्षं व्यावर्त्तयति । नह्यत्र ज्ञानोपदेशः सम्भवति तदाहुः । कामिन्याः कामिना कृतमिति । एतदुत्थायापि भवति चूडायां पुष्पप्रवेशनन्तु उत्थितेन न भवति क्रोडे पुष्पाणि स्थाप- यित्वा क्रमेण तानि निवेशनीयानि अतः तानि चूडयता इहो- पविष्टं ध्रुवमिति सत्यं कान्तामुप कान्तासमीपे कान्तामुद्दिश्य वा तथैवाकृतिर्दृश्यत इति ॥ ३३ ॥

एवं रसार्थं तस्या नयने सामग्रीसम्पादनमलङ्करणं चोक्तं

१ अत्र मूलटीकयोः परिवर्तनं विद्यते ।

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

यदर्थमेतावत्तदाहुः। रेमे इति। पुष्टत्वात् कामस्य आत्मरतः तया च सह रेमे चकारात् लक्ष्म्या च अन्तः प्रविष्टाभिर्वा सापि रेमे इति वा आत्मन्येव रतिर्यस्य तेन निष्काम एव तस्या यथेच्छं कामं पूरितवान् अस्यामपि दशायामात्मरत एव रसाधारत्वाय तस्यामात्मानं स्थापितवान्। आत्मन्येव मुख्या रतिः आत्मन्येव रमणं क्रीडा च यस्य यतः अखण्डितः इन्द्रियैरन्तःकरणैर्विषयैर्वा यदि स्वानन्दोऽन्यत्र गच्छेत् तदान्यत्र रतो भवेत् ननु कथमेवमसमीचीनस्थाने एतावता प्रयासेन एवं रमणं कृतवानिति तत्र प्रयोजनमाहुः। कामिनां दर्शयन् दैन्यमिति कामिनस्त्वेवमेव दीना भवन्ति कामार्त्ता हि प्रकृतिकृपणा इति तेषामनुकरणं करोति अन्यथा तेषां निरोधो न स्यात् प्रयोजनान्तरमप्यस्तीत्याहुः। स्त्रीणामिति। स्त्रीणां च दुरात्मता प्रदर्शिता न तासां कदाचिदशक्तिरस्ति नापि सौकुमार्य्यं किंतु वशीकृते पुरुषे दौष्ट्यमेव कुर्वन्ति शालावृकाणां हृदयान्येता इति अत उभयबोधनार्थमेव रेमे॥ ३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

पुनः सख्य आहुः। अत्रेति। महात्मना विदग्धशिरोमणिनेत्यर्थः यद्वा महे तत्प्रसाधनोत्सवे आत्मा मनो यस्य तेन पुष्पहेतोः पुष्पार्थमवरोपितेत्यशोकवृक्षोऽयमस्याः पादस्पर्शं प्राप्य सद्यः पुष्प्यति यथाहमेतत्पुष्पैरिमां प्रसाधयेयमिति बुद्ध्येत्यर्थः। अत एव महात्मना महाबुद्धिमता अत्राशोकशाखायां प्रसूनानामवचयः कृत इत्यत एवात्र प्रसूनानि न सन्तीति भावः। किंचिद्दूरशाखायां हस्ताप्राप्यायाः पुष्पावचयनार्थं प्रपदाभ्यामाक्रमणं क्षोणिसम्मर्दनं यतस्ते पदे अत एव असकले सम्पूर्णयोस्तयोर्भुवि चिन्हादर्शनात् कृष्णजान्वन्तरुपविष्टायास्तस्याश्चिन्हं दृष्ट्वा पुनर्विपक्षा आहुः। केशानां प्रसाधनम् अत्रत्यवनदेवतावृत्तकङ्कतिकयेति बुध्यते कामिन्याः नतु प्रेमवत्याः स्वसखीरपि वञ्चयित्वा कामुकं नीत्वा रहो गतत्वात् कामिना नतु प्रेमवता प्रेमवतीनामप्यस्माकं विरहपीडाननुसन्धानात् ततश्च तानि तैः प्रसूनैः केशैर्वा कान्तां कामिनीं चूडयता नर्मणा पौरुषं व्यञ्जयितुं चूडावतीं कुर्वता इह ध्रुवमुपविष्टामिति रहः केलिवार्ताप्यभूदिति भावः चित्मतोर्लुगिति मतुपो लुक्॥ ३३॥

तदेवं गोपीनामुक्तिभिरेव तस्याः सौभाग्यातिशयं दर्शयित्वा स्वयमपि तमुपपादयति। रेम इति। आत्मारामोऽपि तया सह रेमे। तत्र हेतुः स्वात्मरतः तया सह शोभमानमात्मनो रमणं यस्य सः। आत्मारामतायां तथा सुखं न तस्य भवेत् यथा तया सह रमण इत्यर्थः। चात्मरत इति पाठे आत्मारामशब्देन पौनरुक्त्यापातादेवं व्याख्येयम्। च एवार्थे। तयैव सह आत्मना यत्नेन रतं रमणं यस्य सः। आत्मा यत्नो धृतिर्बुद्धिरित्यमरः। आत्मारामतायां तादृशसुखलाभाभावादेव तावान् यत्न इति भावः। ननु तर्हि तस्याः पूर्णत्वं प्रसक्तमत आह। अखण्डितः। तदपि पूर्ण एव नतु खण्डितः। तस्या ह्लादिनीशक्तित्वेन स्वरूपभूतत्वादिति भावः। ह्लादिनीशक्तित्वेऽपि सर्वाह्लादसारो यः प्रेमा तस्यापि परमावधिर्यो महाभावस्तद्रूपत्वादेव हेतोर्भगवान् आत्मारामत्वेन ह्लादमात्ररमणादपि ह्लादे महासारभूतया सह रमणस्याधिक्यमस्त्येव यदुक्तं तन्त्रे ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी तत्सारभूता राधेयमिति महाभावस्वरूपेयं गुणैरतिवरीयसीति ततश्च आत्मारामोऽपि तया सह स्वात्मरतः स्वात्मरतोऽप्यखण्डितः पूर्ण एव रेमे इत्यन्वयः तेन च भगवत्तत्त्वानभिज्ञानां प्राकृतविवेकिनां हितं च तेभ्यः स्वविलासतत्त्वस्य गोपनं चकारेत्याह। कामिनामिति। कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकान् शिक्षयन्नित्यर्थः। कामवशत्वे सति पुमांसो दीनाः स्युर्दैन्ये च सति स्त्रियो दुरात्मानः स्युरित्यत्रार्थे भगवत्प्रेयसी च प्रमाणमिति यतस्ते इतस्ततो जल्पन्त उज्ज्वलप्रेम रसत्वगोपनस्य हेतवो बभूवुरिति भावः। तथा दर्शयन्नेव प्रेमरसतत्वं च गोपयामासेति चेवशब्दाभ्यामेवं व्याख्येयं यद्वा कामिनां सम्बन्धे दैन्यं दर्शयन् आत्मवन्मन्यते जगदिति न्यायेन ये कामिनस्तं दीनमेवापश्यन् याश्च स्त्रियः कामिन्यस्तां दुरात्मानमेवापश्यंस्तत्प्रयोजकौ भवन्नित्यर्थः। यद्वा कामिनां दैन्यं दर्शयन्निति कामिभिः सुरतप्रार्थनादिना दीनैर्भवितव्यं स्त्रीभिस्तत्रासम्मत्या दुरात्मभिर्भावितव्यमिति दर्शयन् रसिकजनान् ज्ञापयन् एवमेव रसपोषो नान्यथेति भावः॥ ३४॥

केनचित्कृता विशुद्धरसदीपिका।

सख्य आहुः। अत्रेति। पूर्वार्धेन तासां सख्य आहुः उत्तरार्द्धेनेति विवेकः। तथाहि अत्र गोप्य इत्याद्यनुक्तिरात्मनस्तत्सौभाग्यमदेन महात्मना विदग्धशिरोमणिना कान्ता कामानामखिलसुखानामन्तः पर्य्याप्तिर्यस्यां सा परमानन्दरूपिणीत्यर्थः अत्रावरोपिता मत्प्रावतारिता कुतः पुष्पहेतोः तदभिलषितपुष्पावचयकृते इत्यर्थः। प्रियार्थे प्रेयसा कृत इति वक्ष्यमाणात् यतो महात्मना तस्या हृदयज्ञेनेत्यर्थः। तदनुमोदमानास्तत्सख्य आहुः हंहो साधु ज्ञातं प्रेयसा प्रीत्यतिशयवता प्रियायै इति प्रियार्थः चतुर्थ्यर्थे इति समासः तस्याः केशवेशायेति भावः। अत एव केशवपदस्य तादृशं व्याख्यानं प्राणसख्यस्तत्रालिङ्गमाहुः। पदाग्रं प्रपदमिति कोशात् तदाक्रमणे तरुशिखरस्थपुष्पावचयाय विचरणे ययोस्ते असकले असमग्रे पदे पश्यत तदसहमाना गर्भकाव्यमाल्यखण्डनं दृष्ट्वा विपक्षा आहुः। केशेति। कामिन्या इत्यादि सामर्षम् तासां क्षोभाय तस्याः सुहृदः सोल्लासमाहुः। तानीति कुसुमानि चूडयता चूडायां योजयता कान्तानुपाविष्टम् उपाधिके चेति कर्मप्रवचनीयः धम्मिल्लरचनाय किञ्चिदुपनतयोपविष्टमित्यर्थः॥ ३३॥

ततश्च तादृग्वर्णनेनोद्दीपितभावा अर्द्धमेव वाक्यमसमाप्य सखीजनानामानन्दजननाय तस्याः सौभाग्यमभिनन्दन्ति तदावेशेन श्रीमुनीन्द्रचरणा अप्याहुः। रेम इति। आत्मनेपदसन्निहितपदाभ्यामात्मत्वेन निर्दिष्टायाः प्राणप्रियायाः सुखमेव स्वसुखमित्यनुमननाय तस्याश्च प्रकरणादेव लाभे तयेत्युक्तिस्तत्पदलक्ष्यार्थभूतयेति मुनीन्द्राभिप्रायः तया अनिर्वचनीयसौभाग्यास्मदनुभूतयेति वा रेमेत्येति चकारः समुच्चयार्थः आत्मरतः आत्मनि तस्यामेव रतः तत्त्वमस्या आत्मना रमस्व रेम इति ब्रह्मसंहितोक्तेः ततश्च शक्तिवादो निराकृतो बोद्धव्यः

केनचित्कृता विशुद्धरसदीपिका।

तत एव च परिकरत्वमपि अन्यासां शक्तित्वे पारिकरत्वे च न कोऽपि विरोधः तदुक्तं श्रीकृष्णयामले—

याः शक्तयः समाख्याता गोपीरूपेण ताः पुनः।
सख्यो भूत्वा राधिकायाः कृष्णचन्द्रमुपासते॥

तस्याः सख्यस्त्रियोऽपरा इत्यादिपुराणे च या च तस्या अपि यत्र कुत्रापि शक्तित्वश्रुतिः सा त्वाकृतिसाम्यादभेदाभिप्राया चेत्येतत्परमतोपन्यासेन प्रदर्शितं मूर्द्धाम्नायतन्त्रे तस्या एव स्तव-राजे—

केचिच्छ्रियं त्वां कतिचिच्च गौरीं परे परेशीं ब्रुवते कवीन्द्राः।
परात्परं ब्रह्म सनातनत्वं गुणत्रयेणैव बिभर्षि लोकमिति॥

अत्रोत्तरार्द्धे स्वमतमित्युत्तरत उपन्यस्तं गुणत्रयमुक्तं बृहद्गौतमीये—

सत्त्वं तत्त्वं परत्वं च तत्त्वत्रयमहं किल।
त्रितत्त्वरूपिणी सापि राधिका परदेवतेति॥

सत्त्वं कार्य्यं तत्त्वं कारणत्वं परत्वं ततोऽपि भिन्नत्वमित्यर्थः। यद्वा श्रीत्वेन तदेकाश्रयत्वं गौरीत्वेनार्द्धाङ्गीत्वं परेशीत्वेन तादात्म्यमिति शक्तिवादाभिमतं गुणत्रयं तेन लोकम् अवान्तरोपासकं बिभर्षि तत्तदात्मत्वेन पोषसि स्वरूपतस्तु तुरीयं त्रिषु सन्ततमित्याविन्यायेन परादपि परं यद्ब्रह्म तदेव त्वं परस्याप्यात्मेति ब्रह्मात्मनोः पर्य्यायत्वमयमात्मा ब्रह्मेति श्रुतिभिरुद्भिति संक्षेपः तथाथर्वणि पुरुषबोधन्यां द्वादशवनवर्णनप्रस्तावे तस्याद्या प्रकृती राधिका नित्या निर्गुणा सर्वालङ्कारशोभिता प्रसन्नाऽशेषलावण्यसुन्दरी अस्मदादीनां जन्मदात्री अस्या अंशांशा बहवो विष्णुरुद्रादयो भवन्तीति श्रुतिरपि अस्या अर्थः तस्य परब्रह्मणः आद्या प्रकृतिः आद्यस्वरूपामित्यर्थः। संसिद्धिप्रकृती त्विमे स्वरूपञ्च स्वभावश्च निसर्गश्चेत्यमरः स्वरूपस्यादिमत्त्वमविकृतत्वमेव प्रकृतिशब्दस्य शक्तिवाचित्वे तस्येति आद्या इति च विरुध्येतेति ध्येयं कासावित्यत आह। राधिका आराध्या मम नाम्नापि विज्ञेया तेन राधिकेति श्रीकृष्णयामलनिर्वचनानुसारेणाभेदाध्यवसायाच्छक्तिशक्तिमत्त्वं परास्तं नित्या कालत्रयेऽप्येकरूपा निगुणी अप्रसिद्धैस्तद्गुणानां रहस्यत्वाच्च निर्गुणा यद्वा मायागुणातीता तथात्वे च सर्वालङ्कारशोभिता सर्वसन्द्रस्यासंकुचिततया वृत्त्या सात्त्विकैराङ्गिकैश्चालङ्कारैः स्वरूपभूतैरेव शोभिता तथा दर्शिता मुक्ताचरिते श्रीरघुनाथेन यथा महाभावस्वरूपेयं नित्यदा वार्षभानवी। सखी प्रणय सद्गन्धवरोद्वर्तनसुप्रभा कारुण्यामृतवीचीस्ताऽरुण्यामृतधारया लावण्यामृतवन्याभिः स्नापिता ग्लापितेन्दिरा ह्रीपट्टवस्त्रगुप्ताङ्गी सौन्दर्य्यकुङ्कुमाञ्चिता श्यामलोज्ज्वलकस्तूरीविचित्रितकलेवरा कम्पाश्रुपुलकस्तम्भस्वेदगद्गदरक्तता उन्मादोजाड्यमित्येतैरत्नैर्नवभिरुत्तमैः क्लृप्तालङ्कृतिसंश्लिष्टा गुणालीपुष्पमालिनी धीरा धीरात्वसद्वासः पटवासैः परिष्कृता प्रच्छन्नमानधम्मिल्ला सौभाग्यतिलकोज्ज्वला कृष्णनामयशः श्रावितवतंसोल्लासिकर्णिका रागताम्बूलरक्तोष्ठी प्रेयकौटिल्यकज्जला प्रणयक्रोधसच्चोली बन्धगुप्तीकृतस्तनी नर्म्मभाषितनिष्यन्दस्मितकर्पूरवासिता सौरभान्तरगृहे गर्वपर्य्यङ्कोपरिलीलया निविष्टा प्रेमवैचित्र्यविचलत्तरलाञ्चिता मध्यतालसखीस्कन्धलीलादत्तकराम्बुजा श्यामा श्यामस्मरामोदमधूलीपारिपोषिकेति अथवा सर्वानलङ्करोति ऐश्वर्यादिना भूषयति सर्वालङ्कारः स्वयं भगवान् तेन नित्यपार्श्वस्थेन शोभिता वर्त्तमाने क्तः एवं नित्ययोगोऽपि दर्शितः तथा बह्वृचश्रुतिः राधया माधवो देवो माधवेनैव राधिकेत्यादिपरिशिष्टे दर्शिता तत एव प्रसन्ना आनन्दितेत्यर्थः शेषं स्पष्टं तत्र अंशांशा अंशो मायाख्या शक्तिः अंशः शक्तिसमावेश इत्यादिपुराणात् तस्या अंशा इवांशाः गुणत्रयाधिष्ठातारः अधिष्ठानाधिष्ठेययोरभेदाभिप्रायेणेदमिति संक्षेपः ननु श्रीमुनीन्द्रैरपि यत्र तत्राचिन्त्यशक्तिरियमित्यभिधायीतिचेत्सत्यं तादृक्सर्वथाराध्यत्वाभिप्रायेणेत्यवेहि यथा श्रीसुधानिधौ प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं शृङ्गारलीला कळा वैदग्धी परमावधिर्भगवतः पूज्यैव कापीशता ईशानां च शचीमहासुखतनुः शक्तिः स्वतन्त्रा परा श्रीवृन्दावननाथपादपद्ममहिषी राधैव सेव्या ममेति स्वात्मरत इति पाठे स्वैः स्वांशरूपैर्वैभवैर्वैकुण्ठलक्ष्म्यादिभिर्गोष्ठसम्बन्धिप्रेयस्यादिभिश्चापरापेक्षाराहित्यतया न तदंशिनि आत्मनि स्वस्मिन्नेव रतः स्वेनैव पूर्णकाम इत्यर्थः। तथा आत्मारामः स्वरूपानन्दावेशतत्परः तादृशोऽपि तया हेतुना रेमे तत्तदनादृत्य नन्दति स्म तत्र हेतुस्तयेत्येव तच्छब्दस्य वक्तृचित्तस्थवैलक्षण्यव्यञ्जकत्वात् सर्वाधिकप्रेमाश्रयाविषयरूपयेत्यर्थः। ननु लक्ष्म्यादिभिः प्रेयस्यादिभिरपि तस्य रमणं दृश्यत इतिचेत्तत्राहुः। अखण्डितः अनया हेतुना यथा सक्त इति तत्ततः खण्डितः स्वपतेः सकाशात् खण्डिता नायिका वन्मनसा विच्युतः स्यात्तथा अस्याः सकाशात्ताभिर्हेतुभिर्न कदाचिदपीत्यर्थः। अथवा अखण्डितः आविशिष्टमपर्य्यायानेकशब्दप्रकाशितम् एकं वेदान्तनिष्णाता अखण्डम्प्रतिपेदिर इत्यादिना लक्षितः श्रीराधाश्रीकृष्णेत्याद्यनेकशब्दप्रकाशितत्वेऽप्येक एव इत्यर्थः श्रीपञ्चरात्रेऽपि—

हरेरर्द्धतनू राधा राधिकार्द्धतनूर्हरिः।
अनयोरन्तरादर्शी मूर्त्यवच्छेदकोऽधम इति॥

अत्र तनुशब्दः स्वरूपवचनः उत्तरपादे मूर्त्यवच्छेदक इत्युक्तेः अत एव लीलायामपि प्रथमेऽर्थे प्रेमनिर्णीतत्वात्तदनेन तस्यां स्वं सर्वमप्यर्थितमिति दर्शितं तदेव तादृशालम्बनप्रेमविहीनाः कामिनः कामिन्यश्च स्वमहिम्ना परास्ततया दर्शिता इत्याह। कामिनामित्यादि एवं च नायं कामविहारः किन्तु प्रेमविहार इति फलितम् अत्र कामिनां तत्तत्तर्पणेच्छारूपकामस्वभावानां नतु सच्चिदानन्दरूपतया स्वतस्तृप्तानां नवा प्रियजनतर्पणमात्रस्वसुखलक्षणप्रेमस्वभावानामित्यर्थः। तेषां दैन्यं दुर्गतत्वं तथा स्त्रीणां तदन्यासां तादृशदुर्गतनायकं वशीकृत्य गर्वादिदुष्टस्वभावानां दुरात्मतां दर्शयन् लोकेष्विति शेषः अत एवानन्दवृन्दावनचम्पूमनु० एवं राधाप्रेमधामा यया सावात्मारामोऽप्याप्तकामोऽप्यदभ्रं रेमे यस्मात्कामिनां कामिनीनां न्यक्कारोभूदात्मनैवोति मन्ये अथवायमर्थः नन्वित्थं तत्तद्वाक्यानुसारेण परमानुकूलस्य नित्यदा तस्यामेवासक्तस्य रासक्रीडायां वल्लीभिर्विरूढवासनाभिश्च बाहुप्रसारेत्यादिना रमणमयुक्तमित्याशङ्क्याह। रेम इति। तया सह यासया लोकोत्तरसौभाग्यसम्पत्त्यैव आत्मरतः तथैव चात्मारामः तस्या एव तदात्मत्वान्निर्देशादिति भावः अतएवाखण्डितः प्रेमाखण्डरसो मत इत्युक्तेः अखण्डपरमप्रेमाणं प्राप्तः सततासक्त इति यावत् आत्मनः अखण्डैकरसत्वेन प्रसिद्धेः यद्वा अखण्डितत्वमविच्छिन्नत्वं तेन नित्यविहारः सूचितः एवंभूतश्च सन् आत्मापि

केनचित्कृता विशुद्धरसदीपिका ।

रेमे अपीत्यनेनौदासीन्यव्यक्तिः ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्यादिन्यायेन कासां चित्कान्तभाववतीनां व्रजादौ सिद्धानां साधकचरीणां च मयेमा रंस्यथ क्षपा इतिदत्तवराणाञ्च संकल्पसिद्धये ननु निजाभिलाषेणेति भावः । नचेदमसम्भावितम् इत्थम्भूतगुणो हरिरितिवत्सङ्कीर्णस्यापि प्रेम्णस्तादृशसामर्थ्यात् अत एव कामिनामिव दैन्यं दर्शयन् अर्थात्तासु स्त्रीणाञ्च तादृशीनामपि दुरात्मतां कामात्मताञ्च लोकेषु दर्शयन् नच स्वयं तथाभूत इत्यर्थः । एवञ्च साधकानुग्रहः साधितः ततश्च सत्यपि प्रेमाविलासेऽन्तरान्तरा सौभगमदोदयेन कामित्वव्यक्त्या सम्भावितमेवौदासीन्यं तच्च तासान्तत्सौभगमदमित्यादिना दर्शितं निजस्य केवलपरमवत्त्वादिति भावः । यद्वा तयैव कास्माश्चिल्लीलाविशेषे नियुक्तः संस्तथाञ्चक्रे ननु तया कथमेवम्विधे कर्म्मणि निर्बन्धेन नियुज्येतेत्याशङ्क्य फलवलकल्प्यं कारणमाह । कामिनामित्युत्तरार्द्धेन । तथा हि अहो कामिनः स्वप्रियासु कथं दैन्यमनुशीलयन्ति ताश्च तादृशेषु तदेकतानेषु कथं दुर्ग्राह्यहृदया भवन्तीति कौतुकावलोकनेच्छया कासाञ्चित्साधकचरीणां नित्यसहचरीसङ्गप्रभावेणोपनततादृशभावानां शुद्धप्रेमपरीक्षणाय स्वप्रियतमस्य तस्यैव वाऽऽनुकूल्यास्वादाय प्रयोजित इति अर्थश्चायं मदमानाद्यात्मके कामिनीनां प्रेमणि कामिनां यद्दैन्यं लोकप्रसिद्धं तदेव स्वद्वारा दर्शयन् प्रकटयन् स्त्रीणाञ्च तत्र तत्र या मदमानात्मिका दुरात्मता दुर्द्धर्षचित्तता स्वतन्त्रता स्वाधीनपतिकात्वमिति यावत् दुर्ग्राह्य आत्मा दुरात्मा तस्य भावो दुरात्मतेति व्युत्पत्तेः तां च स्वप्रेयसीद्वारा स्वप्रणयलालित्येन च स्वयमेव प्रकटयन्निति सा च तासामतिविहारेणेत्यादिना दर्शयिष्यते तासां तु रसावेशात्तदनुसन्धानाभावो युक्त एवेति सर्वमनवद्यम एवं च स्वाधीनपतिकात्वं सुसिद्धं तदुक्तं निरन्तरप्रेमवशात्पार्श्ववर्तीत्र यत्प्रियः । वाग्वशप्राय आभाति सा स्यात्स्वाधीनभर्तृका यथालङ्कार एवं मम सखीप्रियां त्वय वेशमस्याः स्वयं प्रसादय सखीमिमां मयि वृथैव जातक्रुधम् इतिप्रणयकौतुकादिषु नियोजितो राधया चकार रसिकाग्रणीरथ तथा स्वयम्माधवः अत एव दर्शयन्नित्युक्तं नत्वाचरन्निति अर्थात्तस्या एवेत्यर्थः । तच्च यथा कामिनो दीना भवन्ति तथा तासु दैन्यमभिनीय स्त्रीणां च तासामेव तत्सखीनां दुर्ग्राह्यात्मतां तादृशपरमलम्पटमपि ना तथा तथाचरणेऽपि शुद्धसख्यावेशेन भावान्तरस्फूर्तिंच स्वद्वारैव स्वयमेव दर्शयन्निति तासां तदेकनिष्ठतया तत्स्फूर्त्याभासो निराकृतः तथा दर्शितं श्रीसुधानिधौ तादृङ्मूर्तिर्व्रजपतिसुतः पादयोर्मे पतित्वा दन्ताग्रेणाथ धृततृणकःकाकुवादान् ब्रवीति नित्यंचानुव्रजनि कुरुते साहसायोद्यमश्चेत्युद्वेगं मे प्रणयिनि किमावेदयेयं त्वराधे इति अथवा तया खण्डितो रेमे कथमित्याकाङ्क्षायामाह । आत्मरतः आत्मारामोऽपि आत्मनि तस्यामेव रतं निधुवनं यस्य सः आत्मा सैव आरामो यस्य सः आरामः स्यादुपवनमिति कोशाद्वनेऽपि पुष्पाद्यवचयायेतस्ततो भ्रमणं तस्या एव तत्तदङ्गभ्रान्त्येति भावः प्रसिद्धेऽर्थे पौनरुक्त्यं दुर्वारमेव एवं च विशेषणद्वयेन कुञ्जवनक्रीडे सूचिते किं कुर्वन् कामिनामित्यादि कामिनो हि यथा प्रतिक्षणं संभोगसुखमनुभवन्तोऽप्यतृप्ततया दीना भवन्ति यथा च स्वाधीनपतिकाः स्त्रियः सौभाग्यमदगर्विता निजरमणं नवनवायमानं सुखमनुभावयन्त्योऽपि दुर्ग्राह्यात्मतयाचास्यमनुशीलयन्ति तत्तच्च स्वात्मद्वारा दर्शयन्नित्यर्थः । तत्कर्तृत्वानिर्देशश्चाभिप्रायेण यदाहुः वामता दुर्लभत्वं च स्त्रीणां या च निवारणा तदेतत्पञ्चवाणस्य मन्ये परमामायुधमिति तथाप्यखण्डितः यत्कस्याञ्चिदप्यवस्थायां तत्सुखान्मनसोऽविरतिस्तदेवाखण्डितत्वमित्यर्थः । यद्वा तया कर्त्र्या आत्मनि स्वस्मिन् रतं पुरुषायितं निधुवनं यस्य स आत्मरतः आत्मैव आसर्वतो वेषेण भावेन च रामा यस्य स आत्मारामः तदेवं स्वभावविनिमयो दर्शितः यथाऽयं हरीयते सा सच राधिकायते निरन्तरं भावनयोभयोरुभौ विपर्य्ययेणापि विपर्य्ययोत्थितां सम्भोगसीमां सदृशीमुपेयतुरिति तत्र हेतुः अखण्डितनित्यविहारीत्यर्थः । एवं च परमावेशवैवश्येनातिरहस्यलीलाप्रकाशनेऽपि श्लिष्टपदप्रयोगेण संगोप्यैव कथनान्मुनीन्द्रस्य तासां तत्सखीनां च तामनु ममत्वातिशय एव स्पष्टं प्रकाशित इति ज्ञेयं वस्तुतस्तु तया तत्पदलक्ष्यत्वेनात्मभूतयाऽखण्डितो रेमे तत एवात्मरतः तत एवात्मारामोऽपि रतिरत्र शुद्धा प्रीतिः रामो रमणं तत एव च कामिनो दैन्यं स्त्रीणां च दुरात्मतां दर्शयन् नहि स्वयं कामी आत्मरतत्वान्नासौ स्त्री आत्मत्वादिति संक्षेपः एवं चसाधूक्तं कंदर्पदर्पहेति स्वामिपादैरितीदिक् ॥ ३४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे केशप्रसाधनाद्विहृ(?)मनुभूयाहुः । केशेति । अत्र तु यथा आल्हादिन्या अपि चन्द्रप्रभायाश्चन्द्राश्रयं विना स्थित्यसम्भवात्स्वाश्रयतया चन्द्रकामस्तथा तदाल्हादशक्तिरूपायास्तस्याः सर्वोद्धाराय परभक्तिरूपतया विभूतायाः स्वाश्रयविषयतया तत्कामस्यावश्यकत्वात्तत्कामिन्याः परां भक्तिं विना नित्यसिद्धस्यापि निरतिशयपरमानन्दस्याविर्भावासंभवात्स्वरूपानन्दस्य लीलासोख्यात्मनानन्तगुणतयाविर्भावाय तत्कामिना केशयोः प्रसाधयतापि तेन तस्याः केशप्रसाधनं विशालभालसीमन्तमुक्तादामशिरोमण्यादिभूषणपरिधानपट्टिकानिर्माणपूर्वकं वेण्याकारेण संग्रथनं कृतं तथा तानि स्वयं तदर्थं प्रपदाक्रमणादिना सञ्चितानि प्रेमातिशयेन स्वतः प्रफुल्लितद्रुमलताकुसुमानि नीलनिशानभासि भगणानीव श्यामस्निग्धस्ववक्षसि मुक्ताफलानीव कृष्णाकारस्निग्धस्वभक्तमनांसि सितसात्त्विकगुणगणानिव स्वकान्तौ भक्तजनासितमृदुमञ्जुसुमनांसीव कान्तां प्रति चूडयता तत्केशबन्धे संग्रथयता इह मत्सौभाग्यवत्यां भूमौ तामुपविष्टम् उप समीपे तां जान्वोर्निवेशयित्वा स्थितं ध्रुवमिति निश्चितं नात्र संदेहलेशोऽपीति भावः । उपलक्षणमेतत्सर्वाङ्गश्रृङ्गाररचनायाः ॥ ३३ ॥

एवं कृततच्छृङ्गारस्य तस्य तया रमणमाहुः । रेमे तयेति । आनन्दस्यैव प्रेमास्पदतया स्वात्मना एव नित्याविर्भूतपरमानन्दतया स्वात्मन्येव रतः आनन्दानास्पदे रमणासंभवात् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या यत्र यत्र रमणं तत्र तत्रात्मलेशाविनाभावात् आत्मन्येवारामो यस्य तथाभूतः सर्वत्र तन्मात्राया एव प्रतिबिम्बात्मना रमणास्पदत्वेऽपिअत्र तु बिम्बात्मना अखण्डित एवानन्दघनोऽपि तया अतिविलक्षणरूपगुणशीलप्रेमनिधिरूपया स्वयं रेमे नात्र चित्रम् आत्मा तु राधिका तस्येत्यादिभिस्तस्यास्तदात्मकत्वाच्चया रमणेऽपि नात्मारामत्वादीनां क्षतिः नन्वात्मारामे स्वानन्दपूर्णे तस्मिन् रमणफलस्यात्मशामित्वानुपपत्तेः

श्रीरामनारायणकृतभावभावविभाविका ।

कथमात्मने पदप्रयोगस्तत्राहुः । दर्शयन्निति । अखिलकलादिगुरुर्भगवान् संसारानुबन्धिनीं प्रत्युत कामिनामपि सञ्जायविहारप्रकारेन मनोहरणेन ध्यानादिद्वारा संसारमोचिकामतिविलक्षणां कामकलामाविष्कुर्वन् कामशास्त्रानुसारेण कामिनां दैन्यमेव रसोद्बोधकतयोचितस्त्रीणां तु दुरात्मतां न्यक्कारादिना वाम्यभाव एव रसोद्बोधक इति दर्शयन् रेमे तथा च रमणफलस्यात्मगामित्वदर्शनं विना दैन्यानुपपत्तेरात्मने पदप्रयोग इति भावः ॥ ३४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो एतावतैव श्रुकृष्णस्वान्ताः सम्पन्नाः प्रेयसा प्रेयस्यर्थे ऽन्यदपि यत्कृतं तत्पश्यतेति तत्सुहृद आहुः । अत्रेति सार्धेन । अत्र पुष्पहेतोर्महात्मना चतुरशिरोमणिना कान्ता अवरोपिता महे केशप्रसाधनोत्सवे आत्मानमनो यस्येति वा अत्र तु प्रसूनानां पुष्पाणामवचयः प्रियाया अर्थे प्रेयसा कृतः पुष्पहेतोः प्रियार्थे इत्यनेन तत्प्रियार्थमेवावरोपणं नतु भारजनितश्रमानिवृत्त्यर्थमिति सूचितं ननु इदं कुतो ज्ञातमित्याशङ्क्याहुः । प्रपदाभ्यां पादाग्राभ्यामाक्रमणं भुवो यत्र ते असकले पदे पश्यत सम्पूर्णयोस्तयो र्भुवि चिन्हानवलोकनात् प्रतिवृक्षाभिप्रायं पद इति द्वितीया तेन पदान्यत्र महात्मन इति, विष्णुपुराणोक्तबहुत्वेन पूर्वोक्तबहुत्वेन च न विरोधः निवृत्तिपक्षे नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोतेत्याद्यास्तत्पक्षपातिन्य आहुः सार्धेन मात्रेषु ध्येयाकारकयोऽन्यप्रत्ययेषु महात्मना यथोक्तकान्ता अवरोपिता स्वार्थबोधकत्वात्प्रहिता कुत इत्यत आहुः पुष्पस्य तदर्थाकारवृत्तिलक्षणफलहेतुभूतावितिकाग्रलक्षणस्य हेतोः एषु प्रत्ययेषु प्रियाया अर्थस्यविभाव्यर्थेकाग्रलक्षणपुष्पसंचयः प्रेयसा सम्पादितः यतः पदाभ्यां पदयोर्वा वाच्यार्थाभ्यां माक्रमणं ययोस्ते असकले जीवनोपासकत्वेश्वरत्वोपास्याक्रान्ते पदे चैतन्ये पश्यत इदं श्रुत्वा सम्यक्तद्भूमिभागमवलोक्य कृष्णजान्वन्तरुपविष्टायास्तस्याः चिन्हमालक्ष्य विपक्षा आहुः । केशेत्यर्धेन अहो सत्यमुक्तं यतो ऽत्र कामिन्याः ननु प्रेमवत्याः स्वसखीः वञ्चयित्वा कामुकं गृहीत्वा गतवत्यास्तु कामिना ननु प्रेमवता प्रेमवतीनामस्माकं विरहपीडानमनुसन्धानात् केशानां प्रसाधनं वेण्याकारेणा ऽऽपीडाकारेण वा देवदत्तकङ्कतिकया नखै र्वा कृतं तुशब्दो विपक्षनिरासार्थः नन्वत्र ज्ञानार्थमुपवेशनं सम्भवति द्वयोरपि कामाक्रान्तत्वादिति सूचयितुं कामिन्या इत्यादि अहो सत्यमिति तत्सुहृद आहुः तानीत्यर्धेन कान्तामधिकृत्य तानि पुष्पाणि चूडयता चूडाकारेण बन्धनाय ध्रुवमुपाविष्टं यद्वा चूडायां पुष्पप्रवेशनं ग्रथितेनापि भवति अतस्तानि क्रमेण चूडायां निवेशयता कान्ता समीपोपविष्टं अर्थितमपि ध्रुवमतस्तत्सदृश्यं दुर्लभमतः किमर्थं स्पर्धया खिन्ना भवतेति भावः । निवृत्तिपक्षे अतः परं पराजितास्तत्पक्षमनुमोदयन्ति । केशेति कामिन्यास्तत्प्रतिपादनकामनावत्यास्तत्पदप्रतिपाद्यस्य केशवस्य ब्रह्माद्यधीशस्य प्रसाधनमत्र ध्येयाकारप्रत्ययेषु कामिना स्वानुभूतिमोक्षाभिलाषुणा प्रभुणा कृतं तत्त्वमसि श्रुतिलक्षणं कान्तामधिकृत्य तानि तत्त्वमसीति पदानि चूडयता चूडास्थानीयैक-

व्याक्यपरत्वं नयाधिकारिणा सहोपविष्टमभिन्नतया स्थितमित्यर्थः ॥ ३३ ॥

एवं गोपीमुखेनैव राधया सह भगवल्लीलामुपवर्ण्य स्वयमाह शुकः । रेम इति । आत्मनि स्वस्वरूप एव रतः ननु स्त्र्यादौ आत्मन्येवारामः क्रीडा यस्य ननु स्त्र्यादौ अत एवाखण्डितः स्वस्वरूपा दप्रच्युतस्तथाभूतोऽपि भगवांस्तत्प्रेमवशीकृतस्तया राधया यथा तामिस्तपः कृतं तथा रेमे चेत्यर्थः । यद्वा अखण्डितः अस्याः सकाशादविच्युतः सन् यद्वा अप्यर्थे चः आत्मारामोऽपि अखण्डितोऽपि स्त्रीविभ्रमैरनाकृष्टोऽपि तथा रेमे ननु तथा भूतः किमर्थं रेमे इत्याशङ्क्य लोकोपदेशार्थं च विडम्बनं चकारेत्याह । कामिना मिति । कामिनस्त्वेवमेवातिदीना भवन्ति दैन्येन चैवमेव निरादरं प्राप्नुवन्तीत्युपदिशन् तेषामनुकरणं कृतवानिति तथा स्त्रीणां दुरात्मतां दौष्ट्यं दर्शयन् वशीकृतपुरुषे दौष्ट्यमेव कुर्वन्तीत्युपदिशन् एवं कृतवानित्यर्थः । तथाच कामवशो स्त्रीवशो च न भाव्यमिति लोकान् शिक्षयामासेति भावः । यद्वा ईदृशप्रेमविहीनाः कामिनः कामिन्यश्च स्वक्रीडया सदा तर्षिता इत्याह । कामिनां देहेन्द्रियादितर्पणेच्छारूपकामस्वभावानां दैन्यं दुर्गतत्वं स्त्रीणामपि तादृशीनां तदन्यासां दुरात्मतां दुर्गतनायकवशीकारेण गर्वादिदुष्टस्वभावतां दर्शयन्नित्यर्थः । यद्वा कामिभिः सुरतप्रार्थनाविषये दीनैर्न भावितव्यं स्त्रीभिस्तथासम्भवान्ते परामिभावितव्यमिति रसिकान्बोधयन्नित्यर्थः । निवृत्तिपक्षे सर्वश्रुतिविरोधानिवृत्त्या तथा रेमे तत्प्रतिपाद्याऽखण्डितः अखण्डकरसः आत्मरतः सर्व कामविनिर्मुक्तः अतः एवात्मारामश्च चकाराभ्यां सत्यज्ञानानन्तानन्दस्वरूपः आधिकार्यन्तःकरणवृत्त्याऽऽरूढो जात इत्यर्थः । नचास्ति द्वा सुपर्णा सयुजासखाया समानं वृक्षं परिषस्वजाते तयोरन्यः स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति श्रुतिविरोधः तत्प्रकरणपर्यालोचनयास्य मन्त्रस्याऽभेदपरत्वावगमात् तथाहि ब्रह्मैवेदममृतं पुरस्तादिति वाक्ये ब्रह्मणः सर्वात्मत्वेन निर्दिष्टे ननु ब्रह्मणो भोक्तृत्वमपि स्यात्तेन न युक्तं सर्वात्मत्वमित्याशङ्कानिरासायायं मन्त्रः पठ्यते यौ द्वौ बिम्बप्रतिबिम्बभूतौ जीवेश्वरावस्मिन्शरीरे वर्तेते तयोर्मध्ये यो बुद्धिप्रतिबिम्बभूतस्तदभेदाध्यासात्तद्धर्माभिमानी कर्मफलं भुङ्क्ते स एवान्यः बुद्धितादात्म्यरहितः सन्स्वरूपभूतचैतन्यात्मना भोगरहितः प्रकाशते औदासीन्यबोधाभ्यां चैतन्यमात्रमुच्यते तथा च भोगानुवादो भोगनिषेधशेष इति नच समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्युत्तरश्रुतिविरोधः अस्याः पूर्वोक्तानशनस्य स्वाभाविकत्वबोधनार्थकत्वात् तथाहि जीवेश्वरपुरुषाश्रये शरीरे पुरुषो बुद्ध्युपाहितो निमग्नः कर्तृत्वाभिमानी अत एव तत्करणमोहान्नोऽनीशया स्वस्या नन्दरूपैश्वर्यभावाप्रतीत्या शोचति विषयागमापायिनामेतद्दुःखमनुभवति जुष्टं कार्यकारणसङ्घातैः सेवितम् अविवेकिभिस्तत्तदात्मतया गृहीतं यदाधिकारणवदन्यद्विवेचात् शरीरत्रयात् पृथग् भूतं तत्साक्षितयावगतं बोधितत्वं पदार्थमात्रं सन्तं पश्यति तदास्यात्मत्वेनावगतस्य महिमानमपरिच्छिन्नानन्दात्मतामिति एतेनान्तरीयकतया वीतशोकः सर्वानर्थविनिर्मुक्तः यद्वा जुष्टं विवेकवैराग्यादिभिः प्रक्षालितान्तःकरणैः सनकादिभिर्नैरन्तर्येणात्मत्वेन सेव्यमान

इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ॥
यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने ३५
सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम् ॥
हित्वा गोपीः कामयाना मामसौ भजते प्रियः॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

मन्यकार्य्यकारणलक्षणादिलक्षणमीशं यदा पश्यतीति नापि पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति श्रुतिविरोधः नह्यात्मानं प्रेरितारञ्च पृथक्मत्वामृतत्वमेतीति श्रुत्यर्थः पामराणामपि तादृशमननसत्वेनामृतत्वप्राप्तिप्रसङ्गात् किन्तु शरीराद्यभेदेन गृहीतमात्मानं पृथक्कृतमात्मानं प्रेरितारञ्च मत्वा ईश्वरत्वेनच निश्चित्यामृतत्वमेतीति तस्मान्नास्ति कयाचिदपि श्रुत्या तस्याः श्रुतेर्विरोधः तत्र को मोहः कः शोक एकत्वमनुपश्यतः यस्मात्परं नान्यदस्ति कस्मान्नु बिभेमि तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति उदरमन्तरं कुरुते अथ तस्य भयंभवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यात्र काचनभेदास्त्यत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्युमाप्नोतीत्याद्याः श्रुतयो भेदमपाकुर्वन्त्येवेति स्थापितश्रुत्येव मुख्य रमणमावेदयतीति संक्षेपः । विपक्षे दोषं दर्शयन् रेमे इत्याह । कामिनां पुरुषाणां श्रुत्यर्थविचारसाधिकृवतां दैन्यमज्ञानशाल्वीभमानेनाथजालप्राप्तिं दर्शयन् तथाविधानां स्त्रीणाञ्च दुरात्मतां दुष्टात्मरूपतां सन्नारानर्थास्पदजीवात्मतां दर्शयन् यथोक्तश्रुत्यर्थविचारविधुरस्य पुरुषादेरनर्थानिवृत्त्यभावं बोधयन्तीत्यर्थः । तथा च श्रुतिः यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीति ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ॥

केशानामितस्ततो विश्लथतां प्रसाधनं समीकरणं कृतम् कान्तामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकारेण बध्नता शिरोभूषणं कुर्वता इह ध्रुवमुपविष्टम् ॥ ३३ ॥

तया सह आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखण्डितः नित्यावाप्तसकलकामत्वेन स्त्रीविभ्रमैरखण्डितचित्तोऽपि रेमे तथा चेत्किमिति रेमे अत आह । कामिनां स्त्रैणानां दैन्यं कृपापात्रत्वं स्त्रीणां च दुरात्मतां दुष्टचित्ततां दर्शयितुम् ॥ ३४ ॥

भाषा टीका ॥

या ठिकाने वा कामी ने वाही कामिनी के बाल जूडा सम्भारे हैं बिन फूलन को सिंगार करवे को वे दोनों या ठिकाने बैठे हैं यह बात हमें ठीक मालुम पड़ै है ॥ ३३ ॥

यद्यपि वे आत्मा राम हैं और अखण्डित हैं आत्मा ही में सदा रत हैं तथापि लौकिक कामिजनन की दीनता स्त्री जन की दुरात्मापन जतावे को सब लीला दिखाई है॥३४॥

श्रीधरस्वामिकृतभावार्थदीपिका ॥

स्त्रीणां दुरात्मतामाह । सा चेति द्वाभ्याम् । कामो यानमागमनसाधनं यासां ता गोपीहित्वा मां भजत इति हेतोरात्मानं वरिष्ठं मेने इति ॥ ३६— ३७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ॥

तदा मेने इति पूर्वं तासु मध्ये वर्त्तमानायाः अपि तस्यास्तादृशो मानो नासीदिदानीमेव जात इति केचिद्व्याचक्षते वस्तुतस्तु तदा तादृशरतौ सत्यामित्यर्थः यद्वा त तथा तेन रमितमात्मानं सर्वासां योषितां व्रजसुन्दरीणां माने हेतुः गोपीः सर्वा एव तत्रापि कामयानाः कामयमानाः हित्वा असौ अनिर्वचनीयविचित्रमाहात्म्यः परमस्वतन्त्रो ऽतिदुर्लभ इत्यर्थः । तत्रापि प्रियः मदेकप्रेमकर्त्ता सन् यद्वा सर्वासामेव प्रियोऽपि मामेव भजते प्रेम्णानुवर्त्तते अयञ्च स्वाधीनभर्तृकाया विदग्धवर्याया मानस्तद्रसपरिपोषको युक्त एवेति तदनुरूपतत्प्रसादश्चाग्रे भविष्यत्येव ॥ ३५ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ॥

अत्रैत्येवमिति पद्यार्द्धद्वयं तेषामसम्मतं पूर्वार्द्धे सति रेमे तयेत्यस्य शुकोक्तित्वासङ्गतेः । उत्तरार्द्धे सति साचेति मात्रोत्थापनासङ्गतेः तदेवं तयोस्तं प्रेमाणं प्रशस्य प्रकृतं तादृशं तद्विलाससमयं मानं तत्प्रसादनादिकमपि तत्पोषणार्थं वर्णयति । साचेति सपादत्रयद्वाभ्याम् सा च तदा मेने इत्यनेन पूर्वं तासु मध्ये वर्तमानाया अपि तस्यास्तादृशो मदो नासीदिदानीमेव जात इति लभ्यते ॥ तच्चैवं तादृशभावे हि तासां द्विधा मानावस्था सम्भवति । कान्तैकस्फुरणे हर्षादिप्रचुरस्थायिमयी कथञ्चिदन्यस्फुरणे गर्वादिप्रचुरव्यभिचारीति ॥ अतस्तस्या गाढानुरागप्राधान्येन तदैकस्फूर्तिमयी बहुकालं व्याप्य हर्षादिमय्येव जाता । सम्प्रति कथञ्चिद्गर्वो जाते तु एवेति ॥ आत्मवरिष्ठत्वे हेतुः गोपीः सर्वा एव तत्रापि कामयाना अपि हित्वा असौ अनिर्वचनीयविचित्रमाहात्म्यः परमस्वतन्त्रोऽतिदुर्लभ इत्यर्थः । तत्रापि प्रियः मदेकप्रेमकर्त्ता सन् भजतेऽनुवर्त्तते ॥ अत्रान्य स्फुरणेऽपि गोपीनामेव स्फूर्त्तिर्नेन्द्र पूर्वोक्तवत् सामान्यस्त्रीणामित्येतदंशोऽपि वैशिष्ट्यं दर्शितम् ॥ ३५ ॥ ३६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीणां दुरात्मतामाह । यामिति । अन्याः स्त्रियो विहाय कृष्णो यां गोपीमनयत् सा च तदा सर्वयोषितांमध्ये स्वात्मानं वरिष्ठं श्रेष्ठं मेनेऽमन्यत ॥ ३५ ॥

मनतप्रकारमेवाह हित्वेति । कामो यानं गमनसाधनं यासां ताः सर्वा गोपी विहायासौ प्रियो मामेव भजते ऽतोऽहं सर्वयोषितां श्रेष्ठेति मेन इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति शब्द आदिवचनः प्रकृष्टं कृष्णविषयं प्रलापं कुर्वत्यः विट-विषयमनर्थवचनं कुर्वत्यश्च विशिष्टचेतना अविपरीतचेतनाश्च कामिनां दुरात्मतां स्त्रीणामेव दैन्यं दर्शयन् दर्शयन्त्यश्च ॥ ३५ ॥

अयं भावः सर्वथा त्याज्य इति दर्शयितुमाह । यामिति । अनेन राक्षस्याः बुद्धेः स्वभावो दर्शितः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं स्वत एवोक्तं प्रेमाणं प्रशंस्य प्रकृतं तादृशं तद्विलक्षणमेव वर्णयति । सा चेति । तदा मेन इत्यनेन पूर्वं तासु मध्ये वर्त्तमाना वा मापि तस्या तादृशो मानो नासीदिदानीमेव जात इति लभ्यते तथैवं तादृशभावं हि तासां द्विधा मनोभवा-वस्था सम्भवति कान्तेकस्फूर्त्या केवल स्वायिमयी कथञ्चि-दन्यस्फुरणे गर्वादिसञ्चारि प्रचुरस्थायिमयीति अतस्तस्या गाढानुराग प्राधान्येन बहुकालं व्याप्य केवलं स्थायी मय्येव जाता सम्प्रति कथञ्चिद्गर्वो जातेति परेति ॥ ३५ ॥

तदेव तस्याः स्वाधीनभर्तृकात्वोचितं कृत्रिममालस्यादिमयं नर्म वचनं श्रुत्वा स्वयमपि स नर्मणैवान्तर्हित इत्याह एवमिति पादत्र-येण तदेवं सम्भोगोचितं स्वाधीन भर्तृकामयीं प्रेमपराकाष्ठां दर्शयित्वा नर्मणापि विप्रलम्भे परमदैन्यमोहात्मिका तत्पराकाष्ठां दर्शयंस्तत् प्राशस्त्यमेव सूचयति । सेति सपादश्लोकेन ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ सा राधापि सर्वा विहाय मय्येवासौरत इत्यात्मनोनौ-चित्यं मनसि कुर्वती यदचेष्टत तत्कथयति । साचेत्यादि । सा राधा तदा आत्मानं वरिष्ठं मेने वरिष्ठैव सा तथापि मेन इति यदुक्तं तस्यायमभिप्रायः अहं सर्वप्रधाना ममैतन्नोचितं कितत् तत्राह । हित्वेत्यादि । सर्वा विहाय मामसौ भजते प्रधानजनस्य नैतदुचितं तदैव मत्रैव विलम्बयामि यावत्सर्वा मिलन्तीति ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं सर्ववस्तुयाथात्म्यस्फुरणं भगवदावेशात्तासां निरूपित-मुपसंहरति । इत्येवमिति एवम्प्रकारेण भगवल्लीलाः प्रदर्शयन्त्यः चेरुः गतिं कृतवत्यः तासामनेकविधत्वे हेतुमाह । गोप्य इति । नहि ताः शास्त्रेण भगवदीया जाताः किन्तु स्वभावेन स्वभावस्त्वनेकविध इति सर्वमुपपद्यते किञ्च न हि ताः किञ्चिज्ज्ञात्वा वदन्ति किन्तु विचेतस एव अथवा एवं दर्शयन्त्यो विचेतसो जाताः प्रकारत्रयस्यापि समाप्तत्वात् अतस्तासां नाग्रे गतिर्निवच-नानि एवमेतासां स्वरूपं निरूप्य निरूपयति । यां गोपीमिति । सार्द्धैस्त्रिभिः—

दोषोऽभिमानवचनो वचनोत्तरमेव च ।
पूर्ववच्चतिरोभावो विज्ञेयं दोषदर्शने ॥

यां गोपीं पूर्वमजातदोषामनयत् यतः कृष्णः सदानन्दः तस्यामानन्दं स्थापयितु मन्यास्तु स्त्रियो जाताः सातु मुग्धेव गोपी अतस्तां वने विहाय तामनयत् वनस्थानां विवेको भवतीति ॥ ३५ ॥

स्वयंल्लयुक्करणात् प्रकृत्याद्यधिकारिणः बुद्धिं स्म नाशयामासुः साप्यन्येवाभवत्तत् तदाह । साच तदा सर्वयोषितां मध्ये वरिष्ठं मेन इति चकारः पूर्वसमुच्चयार्थोऽप्यर्थे तदेति पूर्वं तस्यास्तथा त्वं न जातमिति । अनेन समुदायदोषेण न भगवांस्त्यजति किन्तु प्रत्येकदोषेणेति ज्ञापितं तस्या स्तथा दोषे हेतुः हित्वेति कामयाना अपि सर्वाः गोपीर्हित्वा असौ मां भजत इति तत्रापि प्रियः यथैव मम प्रीतिर्भवति तथैव करोति नतु कश्चिदप्यप्रियविषयः अतोऽहं वरिष्ठा अन्यथानुपपत्त्या तथा त्वं कल्प्यते ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वृषभानुनन्दिन्याः सर्वाधिकमुज्ज्वलरसस्य सम्भोगमङ्गं निर्वर्त्य विप्रलम्भमङ्गमपि वर्णयितुं तद्बीजमुत्थापयति । यामिति साचेति पूर्वं सर्वाः सौभाग्यमदयुक्ता आसन्नाधुना साच तत्र हेतुर्हित्वेति कामयानाः कामयमानाः यद्वा कामो यानमागमनसाधनं यासां ताः अत एवान्यगोपी सौभाग्यहेतुको यः पूर्वमान उद्भूतः सोऽपि निःशेषेणैव शान्तः ॥ ३५ ॥ ३६ ॥

केन चित्कृता विशुद्धरसदीपिका ।

उपसंहरति । इतीति द्वाभ्याम् । इत्येवमिति । अन्यदप्येवं विधं विहारादिकमनिर्दिष्टं ता गोप्य इति कविवक्तृनिवद्धत्वादात्मानि रहस्यप्रकाशनदोषः परिहृतः ननु तादृशविपक्षादिसमुदाये ताभिः किमिति तद्रहस्यं प्रकाशितं तासां चानुभवगोचरः कथं न जात इतिचेत्तत्राह । विचेतसः प्रकाशने ऽनवधाने च तन्त्रेणैक एव हेतुः ननु रासक्रीडार्थं मुरलीकलेन सकला एवाहूय वाचः पेशैश्च परिभूय तत्प्रतिवचनचातुर्य्यमनुभूय कारुण्येन ताभिः सम्भूय लीलावेशेन रमयित्वा तादृशीश्च ता हित्वा किमित्यन्तर्हित इत्याशङ्क्य सर्वोऽयमप्रयासः प्राणप्रियामन्वात्मन आनुकूल्यप्रदर्शनायेति समादधन्नाह । यामिति । तादृशी स्ताः सर्वा अपि वञ्चयन् मां रहोऽनयत् सा चात्मानं सर्वयोषितां मध्ये वरिष्ठं वरस्य प्राणप्रियस्येष्टं मेने अनुभूतवती एतदर्थोऽयमाखिलः समुद्यम इति भावः । एवंच उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः इतिन्यायात्रास-क्रीडेयं श्रीराधिकायाः स्वाधीनपतिकात्वप्रदर्शनार्थेति गम्यते ॥ ३५ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ननु तस्यास्तासां च को विशेषस्तत्राह । गोपीरिति गोपी भूपेत्य मरः ततश्च तासां सर्वासां पट्टराज्ञी स्वामिनीत्यर्थः । अन्याः स्त्रियः भोगिनीकल्पा इति भावः । एवञ्चान्या शक्तिमेण तस्या मानमाशङ्कयैव तासां त्याग इति हृदयं तत एव तयाप्येवमभिमत मित्याह गोपीरपि कामयाना अपि हित्वा यतोऽसौ मां भजते प्रियः परमप्रेष्ठ इत्यर्थः ॥ ३६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

मुनीन्द्रोऽग्रे गोपीचरितमाह । इत्येवमिति । प्रेमप्रभावादाविर्भूत स्वरूपा यतो गोप्यो गा इन्द्रियाणि सर्वतोऽसद्विषयेभ्य आकृष्य भग वदेकपरत्वेन पान्तीति तथा पराञ्चि खानि व्यतृणत्स्वयं भूस्तस्मात्पराङ्पश्यतिनान्तरात्मन्निति अत्यान्य परत्वमेवेन्द्रियाणां हिंसनमिति निर्णयात् अत्मानमन्तरो यमयतीत्यादि श्रुति सिद्धान्तरात्म भगवत्परत्व एव तदहिंसनसूचनात् तथा सा वाग्यया तस्य गुणान् गृणीते इत्यादिस्मृतिवाक्यैश्च तदा-साधने सर्वेन्द्रियसाफल्यप्रतीतेश्च अत एवं लोकव्यवहारेभ्यो विले-त्सी विगतमसंयोभगवद्विषये अविचेतसो वाकाराभिधेये वासु-देवे विशिष्टं सर्वलोकविलक्षणं चेतो यासां तथा भूता वा एवं पूर्वोक्तदिशाप्रियाप्रियतमयोर्लीला एवं दर्शयन्त्योऽपि प्रेमवैचित्र्या-त्केवलमन्वेषयन्त्यो भगवत्सवेशेनैव विचेरुरेवं देहाद्यभिमानस्यात्म-स्वरूपविच्छेदकत्ववत् प्रेमपथाचार्यभूतानां गोपीनां स्वाचरितै-स्तन्मार्गे मानस्य भगवद्विच्छेदकत्वमुपदिशन्तीनां चरितमुक्त्वा-साक्षात् तदात्मभूतायाः प्राणवल्लभाया अपि स्वाचरितेन कैमुत्यन्या-येन मानस्य प्रेमपथपरिपन्थित्वं प्रख्यापयन्त्याश्चरितमाह यामिति अन्याः स्त्रियः श्रीवने विहाय यां गोपीं कृष्णो नित्यानन्दस्व-रूपोऽपि तदानीं मानाभावादनयत् नीतवान् ॥ ३५ ॥

सा च तदा तद्रमणोत्तरम आत्मानं मेने इत्यनेन पूर्वमेताव-द्विहारादौ कृष्णैकपरत्वेनात्मप्रतीतिरेव तस्यानाभूदिति दर्शितं नैतच्चित्रं तस्यापराभक्तितयाविर्भूतायाः कृपाकटाक्षावलोकन-मात्रेणान्येषामपि जीवन्मुक्तानां यक्षत् क्रीडन् रममाणः स्त्री भिर्वा यानैर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति देहा-द्यननुसन्धानं श्रूयते तदा किमुवाच्यं तस्याः ततश्चात्मभानोत्तरं-त्वर्मस्फूर्तिमाह । वरिष्ठं मेने इति । तद्वेत्वनुसन्धाने बहिः प्रवृत्तौ प्रियसेवनस्फूर्तिमाह यतोऽसौ निरुपमगुणमाहात्म्यः प्रियः सर्व-प्रेमास्पदत्वेन परमानन्दरूपोऽपि मां भजते परमानन्दघनभजनी-यत्वप्रयुक्तवरिष्ठत्वानुसन्धानोत्तरं हेयविलक्षणतया वरिष्ठत्वानु-सन्धाने बहिर्दृष्ट्या तत्प्रतियोगिप्रतीतिमाह । सर्वयोषितामिति । अत्र परमानन्दकृष्णसेव्यत्वेन सर्ववरिष्ठत्वे वक्तव्ये सर्वयोषिता-मित्युक्तिस्तु कृष्णदन्येषां पुरुषत्वाभावात्तदसम्भत्या सर्वयोषि-तामात्मनोऽन्यूनत्वे हेतुमाह । हित्वेत्यादिना । ततः सर्वयोषिभ्यः दत्युर्वशीशाद्य स्त्रियो वरिष्ठा गोप्यः ताश्च पुनः कामयमाना अपि हित्वा मां भजते इति ॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथेतरगोपीकृतं तल्लीलावर्णनमुपसंहरति । इत्येवं भगवल्लीलां प्रत्यहं प्रदर्शयन्त्यश्चेरुः यतो गोप्यः गोपरूपेणावतीर्णस्य भगवतः सम्बन्धिन्यः यद्वा स्वभावादेव गोपालजे तस्मिन्प्रेमवत्यः ननु शास्त्रेण भगवदीया जाताः विचरन्त्यश्च विचेतसो जाताः प्रकार-त्रयस्यापि समाप्तत्वादिति व्याकुलमानसाः बभूवुरित्यर्थः । अथ वृष-भानुनन्दन्याः विप्रलम्भांशं वर्णयितुं पीठिकां रचयति । यामिति । कृष्णः सदानन्दरूपः तस्यामानन्दमाविर्भावयितुं यां गोपीमन-यत् अन्याः स्त्रियो वने विहाय अन्यासु स्त्रीत्वप्रागल्भ्यता-मालोच्य तासां त्यागस्तयोः गोपीत्वमुग्धात्वमालम्ब्य नयन-मिति द्योतयति । स्त्रियो गोपीमित्युक्तं निवृत्तिपक्षे इत्येवम् अवि-चेतसः समाहितचित्तस्य पुरुषस्य ब्रह्मस्वरूपं दर्शयन्त्यस्तस्यान्तः-करणवृत्तिषु विचेरुः अन्याः श्रुतिलक्षणाः स्त्रियो वने अन्तःकरणे विहाय यां गोपीं कृष्णः सदानन्दस्वरूपः परमात्मा अनयत् मम स्वरूपाववोधिकेयमित्यवभासयत् ॥ ३५ ॥

तस्यास्त्वागे निमित्तमाह । साचेति । चकारात् पूर्वं सर्वासां विस्मयो जात इदानीमस्यामिति गम्यते सर्वाभ्य उत्कृष्टमात्मानं मन्यमानायाः साधारणं रमण मस्माकं नासीदधुनात्वसाधा-रणं तस्मात्सापि गर्वं प्राप्ता अनेन समुदायदोषेण भगवान्नत्यजति किन्तु प्रत्येकदोषेणेत्यपि ध्वनितम् सापि सर्वासां योषितां मध्ये आत्मानं परमोत्कृष्टं मेने तन्निमित्त तच्चेतसि स्फुरितमाह । कामयानाः । कामो यानमागमन-साधनं यासामिति वा गोपीः स्वभाव्यभावदित्वा सर्वासामपि साधारण्येन प्रियः असौ सर्वासमो मामेकां भजते मत्स्मनोऽनुकूल-माचरतीति विचार्येत्यर्थः । निवृत्तिपक्षे निकृष्टापि श्रुतिरात्मानं सर्वश्रुतीनां मध्ये श्रेष्ठं मेने यतः सर्वा अपि गोपीः स्वस्वार्थघटी स्वप्रतिपादनकामनावतीर्हित्वा असौ प्रत्यगभिन्नः परमात्मा प्रियः आनन्दघनो मां भजते मत्प्रतिपाद्यतां प्राप्तः महा-वाक्यश्रुतिवोध्यः परमात्मेत्यर्थकारिचेतसि स्फुरितमिति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्त्रीणां दुरात्मतामाह । इत्येवमिति त्रिभिः । पूर्वं याः प्राप्त-गर्वाः इत्येवं विहाय यां निर्गर्वां मत्वा अनयत्सापि आत्मानं वरिष्ठं मेने इत्यत्रिमेणान्वयः कामो यानमागमनसाधनं यासां ताः कामातुरा अपि गोपीर्हि त्वा मां भजते इति हेतोः सा आत्मानं वरिष्ठं मेने ॥ ३५—३६ ॥

भाषा टीका

या प्रकार ते बेहोस भई वे गोपी नाना प्रकार की चेष्टा दिखावत भई उहां जा गोपी को कृष्ण और सब स्त्री जनको वन मे छोड़के लेगये हे ॥ ३५ ॥

व न विचारो कि अपने को चाहवे वारी सब गोपिजन को छोड़ मोको हि प्यारो मानें हैं ऐसी जानि सब स्त्री जनते अपने को बड़ी मानत भई ॥ ३६ ॥

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥
न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३७ ॥
एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति ॥
ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

कामिनां दैन्यं दर्शयति। एवमुक्त इति। अखाण्डितत्वमाह। ततश्चेति। तस्यां स्कन्धारोहोद्यतायामन्तर्हित इत्यर्थः॥ ३८॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

ततः मानानन्तरं तस्माद्वा मानात् रतिस्थानाद्वा दृप्ता गर्विता सती वनोद्देशं वनप्रदेशं तेनैव सह गमनक्रमेणाग्रतो गत्वा यद्वा मदनुगोऽयमवश्यं भवितेति दृप्तत्वात् स्वयमेव गत्वा केशवं परमेश्वरमपि किंवा केशिमथनात् व्रजहिताचरणपरमिति यद्वा केशवैशिष्ट्येन परमसुन्दर इति तदीयसौन्दर्य्यमोहितेति भावः अत एवाब्रवीत् किं तदाह। न पारये रत्या परिश्रान्तत्वादिति भावः लज्जया साक्षात्तथानुक्तिः किंवा सौभाग्याङ्गत्वादेव तथोक्तिः ननु मुग्धे ताभ्यो दूरमग्रे स्थानान्तरं द्रष्टुं गन्तव्यमितिचेत्तत्राह। नयेति। पूर्ववदङ्कादौ निधाय त्वमेव नयेत्यर्थः॥ ३७॥

स्कन्धे मदंसे आरुह्यतामित्याह इदं च नर्म्मणैव प्रियामित्युक्तेः यद्वा कायो मदीयं वक्षः कटीरं वा तथा च विश्वः--
स्कन्धः प्रकाण्डे काये च बाहुमूलसमूहयोरिति॥
ततः पश्चात् किंवा तस्मात् तस्याः सकाशाद्वा त्वर्थे चकारः भिन्नोपक्रमे अन्तर्दधे चेति समुच्चये वा अन्तर्द्धानप्रयोजनं पूर्वमेवोक्तं तदेव सूचयति कृष्णः परमानन्दघनमूर्तिरिति आनन्दविशेषार्थमेवेत्यर्थः। अत एवोक्तं प्रियामिति अत्र चकोश्चिद्विशेषः--
श्रीविष्णुपुराणे पुष्पबन्धनसंमानकृतमानामपास्य ताम्॥
नन्दगोपसुतो यातो मार्गेणानेन पश्यत॥
अनुयाने ऽसमर्थान्या नितम्बभरमन्थरा।
या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः॥
हस्तन्यस्ताग्रहस्तेयं नेत याता तथा सखि॥
अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः॥
हस्तसंस्पर्शमात्रेण धूर्त्तेनैषा विमानिता।
नैराश्यान्मदगामिन्या निवृत्तं लक्ष्यते पदम्॥
नूनं मुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकम्॥
तेन कृष्णेन येनैषा त्वरिता पदपद्धतिरिति॥
सा दृप्ता तद्दर्शनैकजीवना वा अन्वतप्यत मुहुर्विललाप॥ ३८॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

ततो वरिष्ठ गानानन्तरं वनप्रदेशविशेषं तेनैव सह गमनं क्रमेणाग्रतो गत्वा दृप्ता गर्विता सती केशवं केशान् तदीयान् वयते ग्रथ्नाति अत एवाब्रवीत् किं तदाह। न पारये इति। बहुपरिभ्रमणेन परिश्रान्तत्वादिति व्याजमयी हेतुव्यञ्जना। ननु मुग्धे ताभ्यो दूरमग्रे स्थानान्तरं द्रष्टुं गन्तव्यमिति चेत्तत्राह। नयेति। पूर्ववदङ्के निधाय त्वमेव नयेत्यर्थः॥ ३७॥

तदेवं तस्याः स्वाधीनभर्तृकात्वोचितं कृत्रिमालस्यादिमयं तत्प्रवचनं श्रुत्वा स्वयमपि सनर्मैवान्तर्हित इत्याह। एवमिति पादत्रयेण। स्कन्धे मदंसे आरुह्यतामित्याह। इदञ्च नर्मणैव प्रियामित्युक्तेः। तथाहि। योऽन्यमुखे दुर्वादः प्रियतमवदने स एव परिहासः। इतरेन्धनजो धूमः सोऽयसगुरुसम्भवो धूप इति। यद्वा स्कन्धः प्रकाण्डे काये च बाहुमूलसमूहयोरिति विश्वप्रकाशात्। कायः स च शुक्लत्वाद्वक्षोभाग इतीदमपि नर्मैव। ततस्तदनन्तरम्। त्वर्थे चकारः भिन्नोपक्रमे अन्तर्दधे च इति समुच्चये वा। तस्याः सकाशादप्यन्तर्द्धानेऽस्मिश्रीर्षापगमात्। सपत्नीनामैकमत्यमपि प्रयोजनं ज्ञेयम्। पूर्वान्तर्द्धानेऽपि तदपि चिकीर्षितमिति एवमेकयैव क्रिययानेकदुर्घटसम्पादनं परमचातुरी दर्शिता। अहो उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति भावः। तदेवं सम्भोगोचितां स्वाधीनभर्तृकात्वमयीं प्रेमपराकाष्ठां दर्शयित्वा सनर्मण्यपि विप्रलम्भे परमदैन्यमोहात्मिकां तत्पराकाष्ठां दर्शयंस्तत्प्राशस्त्यमेव सूचयति। सेति सपादेन। सा तद्दर्शनैकजीवना अन्वतप्यत मुहुर्विललाप॥ ३८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तत एवमभिमत्यनन्तरं किञ्चिद्दूरे गत्वा गर्विता सती केशवं सर्वेश्वरं कृष्णमब्रवीत् किमिति अहं गन्तुं चलितुं न शक्नोम्यतो यत्र ते मनः यत्र जिगमिषसि तत्र मां नयेति॥ ३७॥

कामिनां दैन्यं दर्शयति। एवमिति। इत्थमुक्तो भगवान् प्रियामाह। किमिति स्कन्धमारुह्यतामिति त्वयेति शेषः अखाण्डितत्वमेवाह ततश्चेति। तस्यां स्कन्धा रोहोद्यतायां सत्यामन्तर्हितवांस्ततः तदैव सा वधूरनुतप्तवती॥ ३८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अत्यधिकं भजते इति इत्यनेन विषयलोलुपानां प्रवृत्तिरीदृशी इति दर्शयति कथान्तरारम्भं वा तमाह। तत इति। अत्यारम्भे प्रसिद्धे हेति यादवः। वनोद्देशं विषयप्रदेशं केशवं प्रशस्तकेशपाशं वने कामिनम्॥ ३७॥

पारये समर्थये पारं गन्तुं न शक्नोमीति वा यत्र गन्तुं विदग्धस्वभावं दर्शयितुमाह। एवमिति॥ ३८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तया कथितमाकर्ण्य तत्रैव सङ्गनयनादिलक्षणां मानप्राप्तिश्चाकर्ण्य परित्यागलक्षणमवमानञ्चाकर्ण्येत्यन्वयः । अत्र तु दौरात्म्यशब्दप्रयोगस्तद्दैन्यवचनानुवादात् वस्तुतस्तु दूरः श्रीकृष्णस्यानिकट आत्मा देहो यस्यास्तस्या भावो दौरात्म्यं तस्माद्धेतोरिति ॥ ३७—४१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तथैव मनसि कृतत्वात्स्फुटाक्षरमेवाह । तत इत्यादि । वनोद्देशं वनमध्यं गत्वा केशवमब्रवीत्कीदृशी दृप्ता निःसाध्वसा किं तदित्याह । नेत्यादि । अहं चलितुं न पारये अस्यायं भावः यद्यहं न चलामि तदायमपि न चालिष्यति तावता अपि सर्वामिलिष्यन्तीति तत्साधूक्तं न पारये इति न पारयासि चेत्तदा किं कर्तव्यमित्याशङ्क्याह । नय मामित्यादि । मां नय क नेष्ये यत्र ते मनः ते तव मनो यत्र यात्वित्यर्थः । मनस्तु तव विरहितास्वेव तासु मयितु तव श्रीविग्रह एवेति वक्रोक्तिः अतस्तत्रैव नय । किमेतेन निर्ममव्यापारेण व्यवहारेणेति वहिर्वान्यप्रकाशः ॥ ३७ ॥

भगवानपि तमभिप्रायं विदित्वापि विपरीतबोधमभिनीय यदकरोत्तदाह । एवमुक्त इत्यादि । प्रियां राधां स्कन्ध आरुह्यतामिति आह एषा तु कपटरोषोक्तिः तेन तदसंप्राप्त्यान्तर्धाने स्वोक्तेर्वैयर्थ्यापत्तेः कपटत्वेनाकलितत्वमेव सत्यत्वं न केवलमेतदाह अन्तर्दधे चेत्याह । तत इत्यादि ततस्तत्रैवेत्यर्थः । सप्तम्यां तसिल् अन्यथा निर्दयत्वापत्तेः स्वयं पश्यति सा न पश्यत्येवं यथा भवति तथान्तर्दध इत्यर्थः । तदनन्तरं सा वधूरन्वतप्यत ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

दोषाभावेनैवोत्तमता ननु धर्मान्तरेण अतस्तस्या भ्रमः भ्रान्ताया वाक्यमाह । ततो गत्वेति । ततो भोगस्थानादग्रे गत्वा वनोद्देशमतिरमणीयं स्वार्थमयं गच्छति ननु मदर्थे ततश्चास्यार्थे यथा कथञ्चिदेः प्राप्तव्य इति दृप्ता तादृशभगवत्कृपाया मनधिकारिणी प्राप्तप्रसादेन जाता जीर्णा ब्रह्मादिभ्योऽपि मोक्षदातारं देहेन्द्रियादिसर्वरहितं परमानन्दरूपं केशवमब्रवीत् तस्या वाक्यमाह । न पारय इति । अहं चलितुं न पारये तथा पीष्टदेशे गन्तव्यमितिचेत्तत्राह । यत्र ते मनः तत्र मां त्वमेव नय ॥ ३ ॥

तदा भगवान् अतिचतुरः तद्वाक्यस्योत्तरमाह । एवमुक्त इति । प्रियेति कृत्वा उत्तरमुक्तवान् उत्तरमाह । स्कन्धमारुह्यतामिति । एषा हि नृत्यं कर्तुं वाञ्छति स्वान्तर्गतं रसमभिनेतुं तद्भूमौ पदस्थापने ऊर्ध्वभावाभावाद्रसः च्युतो भवेत् अतः स्वस्कन्धमेवारुह्यतामिति स एवात्यन्त नटवर्युः स्वं स्कन्धमारुह्य नरीनर्ति अशक्यं ह्युपदिशति प्रार्थितं तथेति भगवतो हि मनः अलौकिकरसाभिनयने तद्भूमौ पदस्थापने न भवति अशक्ताचेत्कथं वदेत् अतो मम तत्रैव मनः यदि तथा करिष्यति तदा नेष्यामीति नह्यनधिकारी नेतुं योग्यः भगवांस्तु नान्यथा वदतीति न स्वस्कन्धसम्भावना तथातु मोहवशात् तथैव बुद्धं ततो मोहवशात्तथा चिकीर्षमाणां तां दृष्ट्वा ततोऽप्यन्तर्दधे यतोऽयं कृष्णः सदानन्दः ततः पूर्ववदेव सापि जातेत्याह । सा वधूरन्वतप्यतेति सा अनन्यपूर्वा अतमध्यस्था तत्रापि गुणातीता अतः अन्वतप्यत अनुतापं कृतवती एवं सति भङ्ग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति तथा हि भगवता ह्यस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावाः सर्वे स्वहृदि स्फुरद्रूपा जाताः तथा च सर्वतः आधिक्यमपि स्वस्मिन् स्फुरितं तदेतदुक्तं हित्वा गोपीरित्यादिना एवं सति द्वितीयरसलीलाचिकीर्षा यदाभूत्सापि तदा हृदि स्फुरिता तामविषह्यां मन्यमानापि न कातरा जाता किंतु पूर्वरसगरिम्णा दृप्ता सती प्रियमब्रवीत् एतदेव दृप्तापदेनोक्तं दुष्टगुणव्याप्तयोरप्यमृतं ददात्यहं त्वेतद्गुणैरेव पूर्णेत्यवश्यं सुखमेव दास्यति नतु दुःखमित्यभिप्रायज्ञापनाय केशवपदं ततो भोगस्थानादग्रे वनसम्बन्धिनमुत्कृष्टं देशं स्वयं स्वेच्छया गत्वा नतु प्रियेण नीता गत्वा अब्रवीदित्युक्त्या प्रियनैकट्यं ज्ञायते तेन तदधीन एव प्रियस्तत्सङ्गे गत इति ज्ञापितं भवति अथवा वनमित्युद्देशो नाममात्रं वस्तुतस्तु महारसनिधानं तेन रसोद्दीपकमित्युक्तं भवति एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति तदा कीदृशो रसः स्यादित्याशयेनाब्रवीदृत एव दृप्तात्वमुक्तं पूर्वरसातिमदात् तथाचेत्करिष्यति तदाहं चलितुं स्यन्दितुमपि न पारये जीवनमेव न सम्पत्स्यत इति भावः । एवं चेत्किञ्चित्कर्तव्यमित्याकाङ्क्षायामाह । नयेत्यादि यत्र स्वान्तर्धाने ते मनस्तत्रान्तर्धाने मां नय तिरोहितां मां कुरु त्वं मा तथा भवेत्यर्थः । प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति स्कन्धेत्यादिना यथा स्वस्कन्धारोहणमशक्यं तथा मत्तोऽन्तर्धानं भवत्याः नहि पूर्णज्ञानशक्तेरविषयः कोऽपि भवितुं शक्नोति यद्यपि विरुद्धसर्वधर्माश्रयत्वेन तं धर्मं प्रकटयितुं न पारय इति भगवदाशयज्ञापनाय प्रियापदमुक्तम् उत्तरदानमप्यत एवान्यथात्वेवमुक्तस्तूष्णीं तिष्ठेत्तिरोधीयेतैव वा प्रियात्वान्ममाशक्यं भवत्यास्तिरोधापनं तत्सामर्थ्याभावाद्भवत्याः स्वतस्तिरोधानं तथेति भावः । एवं सति प्रियया प्रार्थितं देयं यद्यपि तथापि प्रियात्वेन स्वाशक्यमिति लक्षणो यो हेतुस्ततो हेतोः स्वयमेव तथाकरोदित्याह ततश्चेति एवं कृते प्रभुनिष्ठं हेतुमाह । कृष्ण इति अस्यां दशायां हृदि प्रकटः सन्नेवानन्दात्मकतद्रसपोषको यत इत्यर्थः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वनस्योत्कृष्टप्रदेशं गत्वा केशवं केशान् वयमानं प्राकृतनमेघोतकपूज्यमुन्मोचयन्त्यास्तस्या विचित्रवेणीत्वेन ग्रथ्नन्तमत एव दृप्ता स्वाधीनकान्ताया दर्प एव रसमावहतीति भावः चलितुं न पारये इति बहुवनभ्रमणोत्थो मे श्रमोऽभूदिति भावः ॥ ननु मुग्धे ताभ्यो दूरमग्रे इदं स्थानान्तरं गन्तव्यमिति चेत्तत्राह । नयेति पूर्ववन्मां वहन्नित्यर्थः ननु किमग्रिमप्रदेशे अन्यजनदुष्प्रवेशे कुञ्जान्तर्गतं पुष्पतल्पं त्वां नयामि किं वा पौष्पाभरणार्थं पुष्पोद्यानं तत्राह । यत्र ते मन इति ॥ ३७ ॥

ततश्च कृष्णेन मनस्येवं विचारितमहो अनया स्वाभाविकः स्वधर्मः परित्यक्त एव नहि सन्नायिका पुष्पतल्पं प्रति स्वनयने वचसा नायकाय सम्मतिं दत्ते यदि चानया वाम्यरूपः स्वधर्मस्त्यक्तस्तदा मयापि सन्नायकेन सम्भुक्तकान्तानुवर्तित्वलक्षणो दाक्षि-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवमयः स्वधर्मस्त्यक्तव्य एव नहि द्वयोरेव दाक्षिण्ये वामे वा रसः सुरसः स्यात् नचात्र रसिकलौकैरहं दूषणीयः रसोहिं नायिका प्रक्रान्तपरिपाटीक एव साधु भवेत् किञ्च महाप्रेमवत्या अस्या मद्विप्रलम्भजनितदशाविशेषदिदृक्षासाक्षादेव या चिरं मे वर्तते साप्येतदवसरे पूर्णा भविष्यति मत्संश्लेषजनितमस्याः सौभाग्याधिक्यं ताभिरनुभूतमेव मद्विश्लेषजनितामपि प्रेमोद्रेकपरमवधि व्यञ्जिकां दशामसाधारणीं दृष्ट्वा ताः परमचमत्कारसिन्धुनिमग्ना भवन्तु अस्याः मद्विरहवाडवानलज्वालाया अग्रे तासां मद्विरहो दीपदहनायितो भवतु ततश्चास्याः पूर्णतमाभ्यां सम्भोगविप्रलम्भाभ्यां शृङ्गाररसोऽप्यद्य पूर्णतमत्वमापद्यताम अस्या अपि विरहे मत्सम्पादिते सर्वविरहोपशान्त्यनन्तरं सर्वासामैकमत्ये सति विधित् सितोरासोऽपि सेत्स्यत्यन्यथात्वे तत्सङ्गरङ्गिणा मया तासां मानोऽद्य सर्वथैव दुरुपशम इत्यादीनि बहूनि प्रयोजनानि पर्यालोचयन् सहसैवान्तर्धित्सुराह । स्कन्ध इति । अन्तर्दधे तत्रैव स्थित्वा तां पश्यन्नपि तन्नयनगोचरतां जहावित्यर्थः । अत्र नय मां यत्र मे मन इति वदन्त्या वृषभानुनन्दिन्या मनस्येवं विचारितं विलासश्रमवनविहारश्रमखिन्नाया मम क्षणं सुषुप्सा वर्त्तते अस्यापि स्वापाभावेनैव सर्वरजनीयापनभङ्गलग्नाणमसुखोदर्कमेव अतः पुष्पं तल्पं नयेति चेन्नयत्वावां तत्र स्वप्स्याव इत्यतस्तत्राशास्मातिर्न कृता तत्र भगवतस्तदन्तः करणविज्ञताप्रेमरसमयलीलाशक्त्यैव तिरोधापिता तत्तल्लीला सिध्यर्थमिति ज्ञेयम् अन्वतप्यत मुहुर्विललाप ॥ ३८ ॥

केनाचित् कृता विशुद्धरसदीपिका ।

किन्तु मम सुहृदोऽपि तासां सङ्गेन विरहखेदमनुभवन्तीत्यनुचितमिति विचारितवती तथा दर्शितमानन्दवृन्दावनचम्पूमनु अथ सा परमकोमलहृदयादयालुतमानामग्रणीः सुभगानां सुभगानां सुचिरकुरापताकापताका केवलमात्मनिष्ठया रतनिष्ठया स्तमानसा विचारयामास यथा मय्येकस्यामतिशयरतिः प्राणनाथो मदालस्ता विच्छेदादह दधते हा कथं देहयोगं तस्मा द्राम्यक्किमपि करवै येन नेतो विदूरं यायादेष क्रमत इह तास्ताश्च सर्वा मिळन्तीति अर्थहि शुद्धप्रेमानुभावो विभ्रमविशेष इत्युक्तमुज्ज्वले अधीनस्यापि सेवायां तस्यानभिनन्दनं विभ्रमो वामतोद्रेकात्स्यादित्याख्याति कश्चन यद्वा सख्येमवदमिति तत्रैव विश्रम्भः साध्वसान्मुक्तः सख्यं स्वयशनामयः भावज्ञतानुभावोऽस्य दोषानुल्लेख एव चेति द्वयमेव दर्शयतीति।तत इति।तदादीनां बुद्धिस्थशकेस्तादृशावचारानन्तरमित्यर्थः । दृप्ता सौभाग्यदर्पयुक्ता सोऽयमस्य रसनीयः नतुपूर्ववदुपेक्षणीय इत्याह।केशवमिति । सुरतविलुलितान् केशानुवातियमयति गन्धयति व्युत्पत्त्या निजपरिचरणपरमिति दोषानुल्लेखः अयमेव तस्या तासाञ्च विशेषः भावज्ञतापि सर्वथा मदीयोऽयं मदीयं मनोगतं जानात्येवेति विश्रम्भात् वनोद्देशं यत्र स्थितयाता विधुरता निजसहचर्योऽवलोकितास्तादृशमुत्कृष्टं देशमित्यर्थः । किमब्रवीदित्यत आह । नेति।पारये नातःपरं अन्यत्र चलितुमपि समर्था सखीप्रेमपरवसत्वादिति भावः । किन्तु यत्र ते मनस्तत्र नयेति अनुमननभङ्ग्या यत्र मदीये मनस्त-

त्रैवापि निश्चितं मयेति सूचितं शब्दशक्तिवलेनान्यत्राशक्तिसूचनान्नर्म्मापि व्यञ्जितम् ॥ ३७ ॥

अथ श्रीभगवतो हृदयज्ञतामभिनयति । एवमिति । तथा स्वाधीनपतित्वोचितकृत्रिमालस्यव्यञ्जकनर्म्मवचसा एवमुक्तः सन् सोऽपि प्रियां कोटिप्राणाधिकप्रियत्वेनाभिमतामिति नर्म्मवचसैवाह इतीति किंस्कध इति अत्र प्रियामित्युक्तेः स्कन्धादिपदानां प्रकटार्थमनुसृत्यान्यथा भ्रमो न कार्य्यः वाम्यन्तु दम्पत्योरन्योऽन्यविषयकं रसाधायकमेव तदुक्तं योऽन्य मुखे दुर्वादः प्रियतमवदने स एव परिहासः । इतरेन्धन जन्मा यो धूमः स एवागुरुसम्भवो धूप इति अयमेव दोषानुल्लेख इत्युच्यते अत्रैव च भावज्ञतापि स्कन्ध पदस्यानेकार्थतामाश्रित्य सङ्गमनीया तथाहि स्कन्धः प्रकाण्डे काये च बाहुमूलसमूहयेरिति विश्वप्रकाशात्स्कन्धशब्दः समूहवचनः ततश्च समुचितत्वात्सहचरीसमूहः सेनास्कन्ध इति महाकविप्रयोगश्च तथाश्लिष्टपदोपादानात्स्कन्धशब्दस्य कायपरतामपि योग्यतया परिकल्प्य पुनरेवं विचारितवान् मम प्राणकोटिनिर्मञ्छनीयललितचरितायाः श्रीमत्याः प्राणप्रियायाः समुत्कर्ष एव यथास्यात्तथा मयानुष्ठेयमिति वाञ्छितञ्च प्रियायाः सखीनां सङ्गतमिदानीं मिलिताभ्यामेव यद्यपि प्रकटीभूय सख्यः सुखनीयास्तथापि विरुद्धस्वभावास्वीर्ष्योदयादसूयादयःस्याद्यदि च सोऽपि मद्विषयकस्यात्तदा न तादृशो दोषः प्राणप्रियाविषयोऽसहनीय इत्यन्तार्हितवानिति।तत इति।अन्तर्दधे श्लेषेण तामेवान्तर्हृदये धारितवानित्यर्थः कृष्णाः तया वशीकृतः अथवायमप्यन्तार्हितत्वे हेतुः एवं स्थितेऽपि प्रेमास्याः प्रकाशयति मुग्धतामित्याह । सेति वधूः तत्प्रेमवद्धा अन्वतप्यत कोमलहृदयत्वात्किमुक्तं मयेत्यनुतापं कृतवतीति ॥ ३८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

मानदोषमुद्घाटयितुं वरिष्ठत्वभानप्रयुक्तदर्पमनुकुर्वत्याश्चरिमाह । तत इति । तता वरिष्ठमाननानन्तरं यथा पूर्वंमानभानभाराभावेन कृष्णात्मतया सर्वसमर्थाऽभूदधुना तथाभावादनुकारमात्रमानभारश्रान्ता यथा कथं चिद्वनोद्देशं वनस्योत्कृष्टदेशं गत्वा दृप्ता मानदजयाक्रान्तत्वेनातिश्रान्ता केशवं ब्रह्मेशयोरपि कारणं तदुक्तं शिवेन कः प्रजापतिरुद्दिष्ट ईशोऽहं सर्वदेहिनाम् आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवानिति तादृशमपि प्रेमाधीनतया केशवं केशांस्तदीयान् वयते पुष्पादिना ग्रथ्नातीति तथा तादृशं दृष्ट्वा स्वाधीनदृष्ट्या विस्मृततदुत्कर्षा ब्रवी त् तद्वचनमेवाह । न पारयेऽहमिति । यद्वा मानमनुकुर्वती नर्म्मणैवाह । न पारयेऽहमिति । अहं चलितुं न पारये न समर्था ननु महत्सुखप्रदं रम्यतमं केळिप्रदेशमग्रे वर्तते तत्रावश्यं गन्तव्यं तत्र पूर्वानुभूततदङ्कनयनसौख्याह । नय मामिति यत्र ते मनस्तत्र मां नयेति यद्वा दृप्तापि लोकदर्पदोषोपदेशाय कृतदर्पानुकारापि केशवं केशप्रसाधनादिना निश्चितस्वाधीनभावं पातिव्रत्यप्रेममर्यादामनुलङ्घ्य स्वासामर्थ्यतादिच्छाधीनत्वबोधकमेवाह । न पारय इति ॥ ३७ ॥

मानानुकारमिश्रस्वासामर्थ्यस्वामी स्वाधीनत्वद्योतकतत्त्वनर्म्मवचनश्रवणानन्तरं भगवानपि नर्म्मतयैवावददित्याह । एवमिति । एवमतिविलक्षणवानुर्यघटितमानप्रेमात्रास्वाधीन्यगमकनर्मवचसोक्तो

हा नाथ ! रमण प्रेष्ठ ! क्वासि क्वासि महाभुज ! ॥
दास्यास्ते कृपणाया मे सखे ! दर्शय सन्निधिम् ॥ ३९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

नर्म्मणैवाह । स्कन्धं आरुह्यतामिति । ननु रोषेण प्रियामाहेति श्रीशुकोक्तेः नत्र स्वामिनः स्कन्धारोहोः पवादायैव भवति तदुक्तिः कथन्नर्म्मणेति वाच्यं यस्त्वन्यमुखेनापवादस्तस्यैव प्रियतममुखेन नर्म्मत्वसम्भवात् प्रियामिति पदस्यैव तत्सूचकत्वात् तदुक्तमभियुक्तैः योऽन्यमुखे दुर्वादः प्रियतमवदने स एव परिहासः इतरेन्धनजो धूमः सोऽगुरुजन्मा भवेद्धूपः यद्वा रसिकशिरोमणि भगवान् रतिकालिकतदीयपादस्कन्धारोहसौख्यमनुस्मृत्य यदन्यत्र गन्तुमशक्तासि तर्ह्येव पुनः स्कन्ध आरुह्यतामित्याहसा तु मानानुकारेण तथारोढुमानिच्छती देशान्तरगमनायैवारोढुंप्रसारितचरणाऽभवत्ततश्च भगवान् कृष्णो नर्म्मणे त्थापितपादामेव त्यक्त्वा मानदोषप्रकटनाय तदभिप्रायं विद्वांस्तदनुसारेणैवान्तर्दधे ततस्तत्प्रेमोत्कर्षद्योतकं तच्चरितमाह । सा वधूरिति । सापि सर्व्वजगदाल्हादिकापि वधूस्तस्य नित्यप्रियभार्य्यापि कृष्णस्य क्षणान्तर्द्धानमात्रेणानु पुनः पुनरतप्यत योयं चैतत् नित्यानन्दकृष्णविरहे तपनं जीवनदुःसहत्वञ्च एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या यदानन्दमात्रावियोगे सर्वभूतानां जीवना सम्भावना तदा तस्य साक्षात्सर्वानन्दाविम्वभूतनित्यपरमानन्दकृष्णस्य वियोगे जीवनासहनं कैमुत्यसिद्धम् ॥ ३८ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

तत इत्येवं मनसि स्फूर्त्यनन्तरं तेनैव सार्द्धं कस्मिंश्चिद्वनप्रदेशे प्रियेण सहैव गत्वा अखर्वगर्वाक्रान्तस्वान्ता सा केशवं स्वस्याः केशान्वयते प्रथतीति तथा च स्वाधीनकान्ताया स्तस्याः रसावहो दर्पो जात इति भावः । रमणबहुधनभ्रमणादिना जातश्रमाहमितः परं चलितुं न पारये न भवामि ननु भो मुग्धे ताभ्यो दूरमग्रेऽपि मनोऽस्थानं प्रतीते तत्पर्यन्त यथा कथञ्चिच्चलनीयमितिचेत्तत्राह । नयेति । एवं तर्हि पूर्ववन्मामङ्के निधाय त्वमेव नय प्रापयाहन्तु पदमात्रमपि गन्तु न शक्नेत्यर्थः । ननु किम्पौष्पाभरणपुष्पतल्पशयनाद्यर्थं पुष्पोद्यानं नयामि किम्वा यमुना पुलिनं तत्र विहाराद्यर्थमित्यपेक्षायामाह । यत्र ते मनः अनेनालक्ष्यो मनुमोदनं च सूचितं यद्वा स्वप्रेमरज्जौ प्राप्तबन्धनं कान्तं निश्चित्य प्राप्तगर्वा केशवं ब्रह्मादिसमस्तस्वामिनं देहादिस्वस्वन्धातीतमब्रवीत् निवृत्तिपक्षे ततोऽन्तःकरणलक्षणस्य वनस्योद्देशे श्रेष्ठप्रदेशे शोभनमत्यर्थं गत्वा अहमेव प्रत्यगभिन्नब्रह्मावभासिकेति गर्ववती ब्रह्माद्यधिष्ठानभूतं परमात्मानमब्रवीत् अहं चलितुं स्वार्थादपितु केनापि प्रमाणेन वादिना वारणेऽशक्या अतस्त्वत्सम्बन्धाधिकरिमनः यत्राखण्डैकरसे त्वयि वर्तते तत्रैव मां नय तत्प्रतिपादकत्वेनैव मां स्थापय तथा च यथोक्तश्रुतिवेद्यत्वं ब्रह्मणोऽस्तीति विवेकिचेतसि स्फुरितमिति भावः ॥ ३७ ॥

एतच्छ्रुत्वा भगवतैवं विचारितमनया मां स्वाधीनमवगत्य कृत्रिमालस्यादिमयं नर्मवाक्यमुक्तमतो नर्मवाक्यमुक्त्वाऽन्तर्द्धानं कार्य्यं तत्रावश्यकं यत एतेनैतच्छृङ्गाररसपोषणं महाप्रेमवत्या अस्या मद्वियोगजनितदशाया अवलोकनं मत्संश्लेषजनितसौभाग्यमवलोक्यातिविस्मितस्वान्तानां तासां परमचमत्कारसिन्धुनिमज्जनकर्या असाधारण्या अस्यां मद्विरहावस्थायां दर्शनपूर्वकं सर्वाभिरभिरमणानुकूलस्यैकमत्यस्य सम्पादनञ्च सेत्स्यतीति तदेतदभिप्रेत्याह । एवमिति । एवमुक्तः श्रीकृष्णः मम स्कन्ध आरुह्यतामिति प्रियामाह । यद्वा स्कन्धः प्रकाण्डे कायेचेति कोशात् स्कन्धः कायः स च योग्यत्वादङ्करूपः सापि तत्कृतं नर्ममबुद्ध्वा ततस्कन्ध मारोढुं प्रवृत्ता ततस्तत्प्रवृत्त्यनन्तरमेवान्तर्दधे यतः कृष्णः सदानन्दस्वरूपोऽन्तर्धानतः सा तद्दर्शनैकजीवना वधूः परमप्रिया विश्लेषासहा अन्वतप्यत परमपश्चात्तापमगच्छत् तेन च बहुधा विललाप निवृत्तिपक्षे एवमुक्तः परमात्मास्कन्धस्थानीयं देशविशेषं चैतन्यमात्रमारुह्य तां प्रतिपाद्यतामित्येवं वधूमाह भगवत्त्यागलक्षणया चैतन्यमात्रविकत्वं यथोक्तश्रुतेरधिकारिणावगतमित्यर्थः । ततो यथोक्तश्रुत्या ब्रह्मणः सुवेद्यत्वावगत्यनन्तरं कृष्णः अपरिच्छिन्नसदानन्दस्वरूपः परमात्मा अन्तर्दधे परिच्छिन्नतां प्राप्त्या विज्ञाततां गतः यदि मन्यसे सुवेदेति दहरमेव नूनं त्वं वेत्थ अविज्ञातं विजानतामित्यादिश्रुतेः सा वधूः तल्लक्षणा श्रुतिरन्वतप्यत पुनरनधिकारिणा विचारिता अहो अवेद्यस्य ब्रह्मणः श्रुति वेद्यता कथमिति ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चलितुं न पारये गन्तुं न शक्नोमि ॥ ३७ ॥

कामिनां दैन्यं दर्शयति । एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति । अखण्डितत्वमाह । ततश्चान्तर्दधे कृष्ण इति । ततस्तस्यां स्कन्धारोहोद्यतायां सत्यां कृष्णः सदानन्दः स्वाभाविकपरमानन्दोऽन्तर्हित इत्यर्थः सा चान्वतप्यत ॥ ३८ ॥

भाषा टीका ।

फिर थोडी देर कुछ वनको जा अभिमान कर केशव भगवान् ते बोली कि मौं पै तो नाय चलो जाय है जहां कहीं जावे को तुमारो मन होय तहां मो को ले जाओ ॥ ३७ ॥

या प्रकारते प्यारी के वचनको सुन भगवान् बोले प्यारी हमारे कांधे पर बैठो जब वो बैठवेलगी तब ही भगवान् अंतर्धान होगये तब वा गोपी गोपवधू को बडो ही अनुताप भया ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुतापमाह । हा नाथेति ॥ ३९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

हा खेदे आर्तिसंबोधने वा ततश्च सर्वत्रैव योज्यं नाथ ! प्राणेश्वर ! रमण रतिदायक प्रेष्ठ प्रियतम महाभुज ! गाढालिङ्गनदातरित्यर्थः । एषां यथोत्तरं हेतुहेतुमत्तोह्या यद्वा नाथ प्रभो न केवलं तथा किंतु रमणसुखप्रद विविधक्रीडाकारकेति वा अतः स्वभावत एव वा प्रेष्ठ आत्मनोऽपि सकाशात् परमप्रियेत्यर्थः । यतो महाभुज परममनोहरसच्चिदानन्दघनमूर्त्ते इत्यर्थः । यद्वा परमभोगकर्त्तः इति सततं रत्यादिसुखसंपत्तिबोधिता यद्वा व्रजेश्वरत्वेन नाथेति तत्रापि पतिप्रयोजनसिद्धा रमणेति तत्राप्युपपतित्वेन प्रेष्ठेति तत्रापि परमसुन्दरत्वादिना महाभुजेति यद्वा कासि कासीति परमार्त्त्या विलपन्ती सुविह्वला भूमौ निपतन्ती तदालिङ्गनमिच्छन्ती स्मरन्तीवाह महाभुजेति नच दूरे स्थित्वा ऽत्राहमस्मीति वक्तव्यमित्याह मे मां प्रति तव संनिधिं दर्शय संनिहितो भवेत्यर्थः । कुतः दास्याः तत्रापि कृपणायाः अन्यथा मदन्यदशायां सत्यां त्वयाऽनुतप्स्यते एवेत्याशयेनाह । हे सखेति यद्वा सन्निधि दर्शनेच्च कापि वञ्चना पूर्ववन्न कार्येत्याह सखे परमविश्वासास्पदेति अथवा ननु प्रियतमे त्वां हित्वा नाहं कुत्रापि गतोऽस्मि त्वदन्तिक एव वर्त्ते इति चेत्तर्हि त्वामहं मुग्धा नैव पश्यामि सख्येन त्वमेवात्मानमभिव्यञ्जयेत्याह । दास्या इति अन्यत्समानं यद्यपि विरहवैकल्येनानुसंधानापगमाद्विलापेऽर्थसङ्गतिर्नोपेक्ष्येत असङ्गतिश्च गुण एव तथापि तादृशीनां यत् किंचिद्वाक्यमेव सर्वार्थं सेवते इति यथाशक्ति किंचिल्लिख्यते एवमग्रेऽपि ज्ञेयं ततश्च सा विमुह्यन्ती भूमावपतदिति ज्ञेयम् अग्रे मोहितामित्युक्तेः अथवा स्कन्ध आरुह्यतामित्युक्तेः प्रेमौत्कण्ठ्यकृतेन वैचित्त्येन पुरोवर्त्तमानस्यापि कृष्णस्य तयाऽनवलोकनात्तदन्तर्धौ कृष्ण इत्युक्तं वस्तुतस्तु कौतुकत्वादेव स तत्र तूर्ष्णीं स्थितः ततः प्रेमवैचित्त्यभाजस्तस्या अनुतापः तथान्या गोपीः सन्निहिता दृष्ट्वा कृष्णेनान्तर्हितमेवेति ज्ञेयम् ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विलापमेवाह । हा नाथेति । हा खेदे आर्त्तिसम्बोधने वा । ततश्च सर्वत्रैव योज्यं नाथ स्वामितया पालक रमण कान्तोचितसुखप्रद प्रेष्ठ मद्विषयकतदुचितप्रेमविस्तारक कासि एवमेवं मयि स्निग्धोऽपि सम्प्रत्येकाकी क वर्त्तसे । हा हा तदज्ञानेन मम चित्तं क्षुभ्यतीति भावः । वीप्सापि वैयग्र्येण पुनरालिङ्गनादिनिजसौभाग्यस्मारकेण निजरसोद्दीपकतदङ्गविशेषसौन्दर्यस्मरणेन मुह्यन्तीवाह । महाभुजेति । पुनरतिदैन्येनाह । दास्या इत्यादि । तत्रैव किं पुनरपि ममालिङ्गनादिलाभाय मम वासं मृगयसीत्याशङ्क्य नहि नहीत्याह । सखे दत्तनिजसाहचर्यसौभाग्य सन्निधिं निजसविधानमपि दर्शय ज्ञापय मात्रम् । साहचर्यदानेन भवतैव जनितव्यसनानि सम्प्रति तत्र मां गृह्णामि किन्तु त्वमत्र विद्यस इति मनसापि निश्चयतः स्वस्था भवेयमिति भावः । तत्र हेतुः । दास्याः सख्यादावयोग्यायाः किन्तु तादृशत्वत्कृपयैव बलादुत्पादितत्वदेकसुखानुकूल्यतात्पर्यायाइत्यर्थः । तत्रापि कृपणायाः तदिदं दुःखं सोढुमशक्तायाः परिहर्तुं चाजानत्या इत्यर्थः । अतो न मयि वञ्चना कार्या नापि

निजानुतापबीजं वक्ष्यामीति भावः । औदार्यनामा चानुभावोऽयं यथोक्तम् । औदार्यं विनयं प्राहुः सर्वावस्थागतं बुधा इति । ततश्च सा विमुह्य हन्त भूमावपतत् इति ज्ञेयम् । अग्रे मोहितामित्युक्तेः ॥ ३९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनुतापप्रकारं वाह हा नाथेति हेति खेदे हे नाथ प्रियतम हे महाभुज क्वासि तव किङ्कर्याः कृपणाया दीनायाश्च मम हे सखे तव सन्निधिं दर्शय ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या लभ्यो नान्यथेति भावं दर्शयति । तत इति शुद्धबुद्धेः स्वभावोऽयमिति दर्शयितुमाह । सा वधूरिति । हा विषण्णास्मि वने हा विषादशुगार्तिष्विति च हे नाथ आशाप्रद हे रमण रति प्रद हे प्रेष्ठ ! प्रियतम ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अनुतापप्रकारमाह हा नाथेति हे महाभुज सान्निध्यं दर्शय यद्यपि सन्निधिस्तवास्तु मीयते अत्रैवासि न कापि गतोऽसि तथापि तं दर्शयेत्यर्थः महाभुजेति भुजस्पर्शसुखानुभवसूचकम् अन्तर्धाय भुजाभ्यां परिरभ्य स्थित इति बोद्धव्यं तच्च स्वप्नलब्धसुहृद्गाढालिङ्गनवत् तत् कासि भुजस्पर्श एवानुभूयते ननु त्वं पश्चात् पुरतः पार्श्वतो वासीति नोपलभ्यसे तस्मात्सन्तमपि सन्निधिं दर्शयेत्यर्थः ॥ ३९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

न केवलमन्तरनुतापः किन्तु तज्जनितो बहिरपि विलापो जात इत्याह । हानाथेति हा इति पश्चात्तापे अयुक्तं कृतमिति तथापि हे नाथ त्वमेव स्वामी अतो दोष एव दूरीकर्तव्यः ननु त्यक्तव्या ननु दूरे स्थित्वा पाळनं करिष्यामीति चेत्तत्राह । रमणेति त्वमेव रतिवर्द्धको भोक्ता भोग्यरूपाश्च वयमतो निकट एव स्थातव्यमिति भावः । नन्वनुरोधेन केवलं पाळनं करिष्यामि भोक्तुरिच्छाभावात् नहि भोग्येच्छया भोक्ता भुंक्ते तत्राह । प्रेष्ठेति नहान्यः प्रीतिविषयोऽस्ति येन जीविष्यामि अत्यन्तं व्याकुलाया वचनमाह । क्वासि क्वासीति । मोहवशात् अन्धा पतिता च जाताः तत उत्थापनार्थं संबोधयति महाभुजेति महान् भुजो यस्य महती क्रिया शक्तिः अतो दोष एव दूरीकर्त्तव्यो नत्वहं यतोऽहं दासी तत्रापि तवैवाहं दासी स्वभावत एवाहं कृपणा अनालोचितयाचिका अतो मद्वचनान्यथाभावः कर्त्तव्यः एवम्प्रार्थनायां परमकृपालुस्तामुत्थाप्य स्वस्थां कृतवान् अदृश्यरूपेणैव तदा पुनराह । हे सखे स्पर्शेन स्वधर्मारोपात् स्वसन्निधिं दर्शय वर्त्तसे निकटे तथापि यथा सान्निध्यं दृष्टं भवति तथा कुरु एवमेव वदन्ती स्थिता भगवानपि तत्रैव स्थितः ॥ ३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

विलापमेवाह । हा नाथेति । त्वद्वियोगमहाग्निना दह्यमाना दस्माद्देहान्मे प्राणाः सम्प्रति निःसृतप्रायाः यत्नेनापि मया रक्षितुं न शक्यन्ते एषां तु त्वमेव नाथोऽतो दर्शनं दत्त्वा शीघ्रं मे तान् रक्षेति भावः । नचैषां रक्षामहं स्वार्थमेव प्रार्थये किन्तु त्वदर्थमेवेत्याह हे रमणेति सर्वा अप्यन्या गोपीस्त्यक्त्वा रमणसुखविशेषार्थं यामेतावद्दूरं रहः समानैषीस्तस्यां मयि मृतायामेवं रतिसुखमन्यत्रालभमानो मां स्मरंस्त्वमपि दुःखेन विलपिष्यसीति भावः । नन्वस्तु मद्दुःखं तेन तव किं तत्राह । हे प्रेष्ठेति तव मत्प्रेष्ठत्वात्त्वदीयं तद्दुःखं कोटिगुणीभूय मय्येव फलिष्यति मत्प्राणकोटिनिर्मञ्छनीयपादाब्ज नखैकदेशस्य तव तद्दुःखमहं मृत्वापि सोढुं न पारयिष्याम्यतः कृपया सन्निधाय तदेव दुःखं दूरीकुर्विति भावः । ननु यदि निःसृतप्राया एव प्राणास्तदा तानहमपि कथं निवर्त्तयितुं प्रभविष्यामि तत्राह । हे महाभुजेति त्वद्भुजस्य मत्सञ्जीवनौषधस्पर्शमात्रेणैव सुस्थसुशीतलीभूते देहेऽस्मिन् प्राणाः स्वयमेवागत्य स्थास्यन्तीति भावः ननु मां विना स्वस्या गतिमेवं जानासि चेन्महाराजकुमारं परमसुकुमारमादरणीयं मां नय मां यत्र ते मन इत्याद्दिष्टवती किमकोपयस्तत्र स काकुवैयग्र्यमाह । दास्यास्ते कृपणाया मे इति । तदानीं विलासश्रमनिद्रालस्याभिभूतयैव दीनया मया तथोक्तं क्षमस्व माकुप्येति भावः किञ्चायोग्ययापि मया सह त्वमेव दृढं यत्सख्यमकरोस्तेनैव तथाहमवोचमित्याह हे सखे इति । हे प्रिये तर्हि प्रसन्नोऽभूवं मत्समीपमेहीति चेत्सम्प्रत्यनुतापदुःखेनान्धास्मि त्वं क्व वर्त्तसे इति न पश्यामीत्याह । दर्शय सन्निधिमिति । एतावदेव विलप्य विरहोद्घूर्णावशात् सम्मुह्य भूमावपतदिति ज्ञेयम् अग्रे मोहितामित्युक्तेः ॥ ३९ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ प्रेमवैचित्यकृतं मौग्ध्यमनुनयति । हेति अतिखेदे तत एव नाथेति परुषोक्तिरपि तस्यास्तथात्वमुक्तमभियुक्तैः नाथेति पुरुषमुचितं प्रियेति दासेत्यनुग्रहो यत्र तद्दाम्पत्यमतोऽन्यन्नाररिज्जुः पशुः पुरुष इति मधुरविलासाभिप्रायेणैव व्याख्यातम् अथवा प्रेमवैचित्योक्तावपि वैदग्ध्याद्यनन्तगुणसेवितचरणकमलत्वाद्विविधस्वभावानां गोपीनामनुग्रहाय वदभिमतभावसंग्रहाय च वाग्देवी विलसितमिदं तथाहि नाथेति दाम्पत्येन सुखप्रदेत्यर्थः । इदञ्च दाम्पत्याभिमानिनीनामैकमत्यायोक्तं तथा रमण कान्तोचितसुखप्रदेत्यर्थः इदञ्च प्रेयसीनां नचेदमसम्भावितं सैव चाष्टविधा राधा तत्तद्भावविभावनीति आदिपुराणोक्तेः अथ प्रेष्ठ मद्विषयकतदुचितप्रेमविस्तारकेत्यर्थः । इति सहचरीणाम् एवं तद्विषकं तत्तद्भावजातमभिव्यज्य स्वाश्रितभावं वदति । सख इति अथवा दास्या इत्याद्यानां कृपणाया इति प्रेयसीनां सखा इति स्वपक्षाणामभिप्रायेणेति तथाक्रमं योजना यद्वा ते दास्याः नाथ हे कृपणाया रमण मे सखइति प्रेष्ठेतिच तासां तासां संग्राहकत्वान्महाभुजेति संग्रहसूचनमपि कृतम् औदार्य्याख्यानुभावोऽयम् औदार्य्यं विनयं प्राहुः सर्वावस्थागतं बुधा इति प्रेमवैचित्येऽपि तथात्वात्परमत्वमपि प्रेमवैचित्यमुक्तमुज्ज्वले प्रियस्य संनिकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषाधियार्त्तिस्तत्प्रेमवैचित्य मुच्यत इति अत्र कारिकाः ।

> किंवा स्वीयापरोढालिभावावेशितचेतसाम् ।
> गोपीनां संग्रहायाह नाथेत्यादिपदत्रयम् ॥
> क्रमेण दासी कृपणा सखीत्याद्यभिमानिनी ।
> स्वमतं सख्यमेवात्र प्रदर्शितवती स्फुटम् ॥
> सिद्धान्त उत्तरः पक्ष इति शास्त्रविदां मतात् ।
> तत्तथा दैन्यवचनं तासामतिसुखावहम् ।
> स्वसाम्यानुभवादद्धा सखीमिति मुनीन्द्रगीः ॥ ३९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तदनुतापवाक्यमेवाह । हा नाथेति । हा इत्यनुतापे सखेदसंबोधने च नाथेति नाथृनाधृयाञ्चोपतापैश्वर्याशीःषु इत्यस्मात् हेनाथास्मद्याच्यमानैश्वर्येण स्वामितयापालकोऽसितत: तद्रूपेति वा तथाच प्रार्थनापूरणेन स्वामितया पालय स्वयमेव वररूपतया कामं पूरय नोचेद्विरहेणोपतापकतया त्वयि नाथे सति अहं नाथ अथानन्तरमेव न स्यामिति भावः । कथं पालनं कामपूरणं वा तत्राह रमणेति तथाच रमणत्वात् रमय नोचेद्रमणस्य किंचिदपि वैपरीत्ये मम मरणमेव ननु रमुक्रीडायामित्यस्मात्क्रीडेच्छायां स्वसखीभिरमस्व तत्राह प्रेष्ठेति अतिशयेन प्रियेत्यर्थः । तथाच त्वदतिरिक्तातिप्रियाभावात्त्वद्वियोगे जीवनस्यैवासंभावनायां क्व रमणमिति भावः । इत्थं संबोधनैरेव स्वखेदं निवेदयन्ती प्रार्थनां च सूचयन्ती प्रेमान्धतया क्वासि क्वासीति बाहुप्रसारेणान्वेषयन्ती वैक्लव्यतया निपतन्ती स्वोत्थापनार्थं संबोधयति महाभुजेति ततश्चाविज्ञातसखेव तेन प्रियेणान्तर्हितेनेव भुजाभ्यामालिङ्ग्य उत्थापिता प्रियस्पर्शलब्धप्राणा आप्तदर्शना सख्येन संबोधयति दैन्याविष्कारेण संबोधयति दर्शनं च प्रार्थयति दास्या इति दास्याः स्वानुरागेणवामूल्यक्रीतायाः नखरदादिविविधरत्नान्वितसुवर्णरूपधनेन वा क्रीतायास्तदात्मीयजीवनधनापगमे कृपणाया दीनाया मे हे सखे ! स्पर्शेन वर्तमानतया सम्भावितं ते सन्निधिं दर्शय यद्वा कृपणायाः सन्निधिं सम्यङ्निधिमिव दास्या मे सम्यङ्निधिं ते सन्निधिं दर्शय ॥ ३९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तत्कृतावल्लापमाह हेति आर्तिसम्बोधनमिदं सर्वत्र योज्यं हा नाथ स्वामिन् ! पालक हा रमण प्रियोचितसुखप्रद हा प्रेष्ठ प्रेमविस्तारक तथाचैवं विधस्य तव मद्वियुक्ततयावस्थानं नोचितमित्याशयेनाह । कासीति । आलिङ्गनं स्मृत्वा हा महाभुज दैन्येनाह ते दास्याः सख्यादावयोग्यायास्तत्रापि कृपणाया एवंविधं दुःखं सोढुमशक्तां मामपरिहर्तुं वा नास्यतो मम सान्निधिं दर्शय सन्निहितोऽस्मीति ज्ञापय यतस्त्वं सखा सुख्यसख्या अपराधाः क्षन्तव्या एवेति भावः । यद्वा हेति पश्चात्तापे अयुक्तं जातमित्यर्थः । यद्यपि मया अयुक्तं कृतं तथापि त्वया नाहं त्याज्या किन्तु दोष एवोपेक्षणीयो यतस्त्वमेव मम स्वामीत्याशयेनाह । हा नाथ ननु शङ्कप्राप्ती साहाय्यं करिष्यामीति

अन्विच्छन्त्यो भगवतो मार्गं गोप्योऽविदूरतः ॥
ददृशुः प्रियविश्लिष्टां मोहितां दुःखितां सखीम् ॥ ४० ॥
तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥
अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥ ४१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

चेत्तत्राह । हे रमण ! ते दास्याश्च रमणस्य भोक्तुस्तव भोग्याया मत्तो दूरेऽवस्थानं परमसङ्कटरूपं तस्मात्त्राणं कर्तुं योग्योऽसीति भावः । ननु भोग्येच्छया भोक्ता न प्रवर्तते किन्तु स्वेच्छया तथाच ममेच्छाभावात्कथं रमणे प्रवृत्तिरित्याशङ्क्याह । हे प्रेष्ठ मम प्रीतिविषयस्यान्यस्या भावात्त्वद्विरहे मरणमेव सम्भाव्यते तेनानुग्रहबुद्ध्या तथा कुर्वित्यभिप्रायः अतस्तथा भूतस्त्वं कापि गन्तुमयोग्यः अत्रैव स्थातव्यमहं व्याकुलत्वान्न जानामि ततः पृच्छामि कासीति झटिति कथय नोचोद्गच्छेयुर्मम प्राणा इत्याशयेन पुनराह । कासीति इत्युक्त्वा भूमौ निपतिता मूर्च्छाभिमुखा उत्थानार्थं सम्बोधयति हे महाभुजेति यतस्त्वैवाहं दासी तत्रापि संप्रति कृपणा तस्मात् मम सन्निधिं दर्शय हे सखे सख्युस्तवेदमुचितमिति भावः । यद्वा हे नाथ ! त्वदेकप्राणायास्त्वदधीनाया इत्येते प्राणाः संप्रति गन्तुकामाः मया रक्षितुमशक्या अतस्त्वमागत्याशु संरक्षेत्याशयः । तद्गमने तवात्यन्तदुःखं भविष्यति सर्वापेक्षयोत्कृष्टत्वेन सम्मतायां मयि मृतायामन्यत्र रतिमलभमानस्य पश्चात्तापेन रोदनावश्यंभावादित्याशयेनाह हे रमणेति । ननु अस्तु मम दुःखं तव तेन किमिति चेत्तत्राह । प्रेष्ठेति प्रेष्ठस्य तव दुःखं कोटिगुणितं सन् मय्येव फलिष्यतीति भावः ननु सर्वथा निर्गन्तुं प्रवृत्ताः प्राणा मयापि कथं संरक्ष्या इति चेत्तत्राह । हे महाभुज कासि कासि झटित्यागत्य स्वभुजामृतसंजीवनौषधेन सुकरं तद्रक्षणं सम्पादयेति भावः । नन्वेवन्तर्हि न पार्ये ऽहं चलितुमित्येवं किमर्थमुक्तवत्यासि ततः सापराधां त्वां न स्पृशामीति चेत्तत्राह । दास्यास्ते यद्यपि तदानीं प्राप्तगर्वयाऽऽलस्यादिवशात्तथोक्तं संप्रति तत्तन्निवृत्त्या दासीभावं प्राप्तास्मीति तत्रापि कृपणा परमदीना जातास्मि ततः क्षमैवोचिता इतः परं मरणस्यैवावशेषादपराधनिमित्तस्य दोषस्य निवृत्तत्वान्न कोप इतिभावः । किंच वस्तुतो नास्ति ममापराधस्त्वयैव दास्ययोग्याया मम सख्यं कृतं तदनुरूपं च मयानुष्ठितमित्याशयेनाह । हे सख इति । ननु नास्ति मम कोप इतिचेत्तर्हि सन्निधिं दर्शय प्रसन्नः सन्मत्समीपमागतोऽसि चेत्तर्हिविरहव्याकुलस्वान्तायाः पश्चात्तापदुःखेनान्धीकृतनेत्राया मम सन्निधिं स्पर्शादिना दर्शय पश्चात्तिमहतीं मूर्तिंद्रक्ष्यामीतिभावः । एवं विलपती भगवत्स्पर्शादिकमलब्धवती ततः परं विलापेऽप्यक्षमा मूर्च्छिता सती भूमावपतदित्यपि ज्ञेयं मोहितां ददृशुरिति वक्ष्यमाणानुसारात् निवृत्तिपक्षे अथ ब्रह्मणः साक्षात्स्ववेद्यत्वाभिमानं विहाय स्वजन्यवृत्त्यावरणनिवृत्त्या सन्निधिं प्रार्थयते हा नाथेति हेति स्वजन्यवृत्तिरहिता नाक्रोशति हेनाथ सर्वेश्वर हे रमण जगत्सृष्टिस्थिति मङ्गलक्षणक्रीडापरायण तत्पदार्थ हे प्रेष्ठ वरप्रेमास्पद महाभुजासंख्याभुजादिमदीश्वरत्वपदार्थ आसि असीत्येवं नवकृत्वस्तत्त्वोपदेशपराया दास्या अधिकारिभिर्मदर्थाग्रहे कृपणायाः दीनतां प्राप्तायाः मम कश्चित्सखे निरुद्धै रिन्द्रियैः सह वर्तमाने शुद्धेऽन्तःकरणे सन्निधिम् आवरणनाशकवृत्त्युत्थानेन मत्प्रतिपाद्यतां प्रकटयेत्यर्थः ॥ ३९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुतापं वर्णयति । हा नाथेति । हा इत्यव्ययमनुतापाविष्करणे हे रमण ! हे प्रेष्ठ हा त्वां विनानुतप्तास्मि हे महाभुज ! अनुतापजलधौ निमग्नामुद्धर हे नाथ ! याच्यदास्याः याचक्याः सन्निधिं दर्शय॰ हे सखे सखित्वात्कृतापराधायाः अपराध क्षन्तुमर्हसीति संबोधनपदानामाशयः ॥ ३९ ॥

भाषा टीका ।

तव श्रीराधा जी कहवे लगीं हे नाथ हे रमण प्रिय हे महाभुज आप कहांहो हे सखे मैं आपकी दासी हूं अतिदुःखीहूं मोकूं अपनो दर्शन कराओ ॥ ३९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्विच्छन्त्यो मृगयमाणाः अविदूरतः समीपे ॥ ४० ॥ ४१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विदूरतः अत्यन्तदूरेऽपि ददृशुः तस्याः कान्तिविशेषतः यद्वा विदूरतो अन्विच्छन्त्यः अग्रतो दूरङ्गत्वा अन्वेषयन्त्य इत्यर्थः यद्वा अकारप्रश्लेषेण अविदूरतः निकट एव ददृशुः ततश्च निजवैकल्यभरेण निकटेऽपि पूर्वं तस्यास्तमार्तस्वरं न शुश्रुवुरिति ज्ञेयम् प्रियस्य श्रीकृष्णस्य विश्लेषाद्विच्छेदात् दुःखितां पश्चान्मोहितां च भूतलविलुठनलग्नधूलिकण्टकक्षतरक्तस्वेदाक्तसर्वाङ्गतादीनां बहुलाश्रुधारालालापङ्किलमुखस्रस्तवस्त्रत्वादीनां लक्षणानां तादृशमोहस्य च तद्विश्लेषं विनान्यथानुपपत्तेः मोहितामित्यनेन सर्वाभ्योऽन्येभ्योऽस्याः प्रेमविशेषोऽपि दर्शितः तासां हि विरहार्त्या भ्रमणादिकं अस्यास्तु चरमदशातुल्यो मोह इति सखीमिति तां तादृगवस्थापन्नां दृष्ट्वा सख्येन तुल्यव्यथा एव विशेषतश्च द्विगुणितनिजवेदनाः सर्वा अपि परिवृत्य रुरुदुरित्यर्थः । विश्लेषे खल दवेप्यविरपगमात् तथा, पश्चाद्बहुप्रयत्नैस्तां संज्ञाविचित्रचातुर्य्यैश्च स्वस्थतां शनैरीषत् प्रापयामासुः ततश्चास्याः तद्वृत्तं पप्रच्छुरिति च ज्ञेयम् ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततश्च तया कथितं सर्वं मितिशेषः यद्वा पुनर्दुःखोदय-भयेन ताभिरपृष्टमपि सखीनां समागमात् स्वयमेव विलापरूपेण वर्णितं तद्वृत्तमिति शेषः इतिपृथग्वाक्यमेकमेव वा ततश्च मानप्राप्तिमाकर्ण्य एवमग्रेऽपि यद्वा कथितमेवा . भिव्यञ्जयन्ति मानेत्यादिना अवमानं परित्यागलक्षणं च निजदौरात्म्यान्मानादि लक्षणादाकर्ण्य चकाराभ्यामुभयोरेव प्राधान्यं द्योत्यते तत्तत् प्रकारेण रमणात् तथा ऽकस्मादेव रसावसरे अन्तर्धानाच्च माधवात् लक्ष्मीकान्तादपीति यद्वा मधुना मधुररसेन क्रीडति सदेति तस्मान्मानप्राप्तियोग्या मत्तोऽ प्यधिका काचिद्-न्यैव नत्वहं तथापि केवलं तत्कारुण्यमहिम्नैव नच निजगुणैस्तादृशमानं प्राप्तमितिभावः एवंभद्रं श्रीभगवत् कारुण्यादिगुणात एव अभद्रंच सर्वं निजदोषादेव वक्तव्यं मन्तव्यं चेति साधूनपि शिक्षयामासेति ज्ञेयं यद्वा श्रीकृष्णात् दूरे आत्मा स्वयं यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तद्भावो दौरात्म्यं तस्मात् तद्दूरगमनादित्यर्थः परमं विस्मयं सद्य एव तादृशानुग्रहनिग्रहाभ्याम् ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अविदूरतो नातिदूरत इत्यर्थः । अतिदूरे व्यवधानसद्भावात् । राकेशशोभाविजयिशोभाविशेषेण दूरेऽपि दर्शनसम्भवात् । दुःखितामत एव मोहितां मूर्च्छितां समदुःखभावनया विशेषतस्तस्या एकाकिन्या अपि परित्यागदर्शनेन सुतरामीर्ष्यापगमादेकमत्याच्च । सखीमित्युक्तं किन्तु निजसखीनामत्र प्रेमावेशविशेषो ज्ञेयः ॥ ४० ॥

अत एव च तया कथितमाकर्ण्येति रोदनसंज्ञाप्रापण प्रश्नान्तरमिति ज्ञेयं कथितम कथं भवतीभ्यो विच्छिन्ना बभूवाहमिति नाज्ञासिषं किन्तु दूरत एवात्मानुसन्धानमकार्षमित्यादिप्रकारकं सर्वं वृत्तमाकर्ण्य तत्रापि माधवात् नूनं लक्ष्यापि रमणतया स्पृहणीयात् सर्वगुणादिसम्पत्तेः पत्युर्वा तस्मात् स्वत एव परमसौभाग्यलाभलक्षणां सम्मानप्राप्तिं चाकर्ण्य तत्रैव गर्वलक्षणान्निजदौरात्म्यात् परित्यागलक्षणमवमानं चाकर्ण्य विस्मयमित्यादिकोऽन्वयः । अत्र तु दौरात्म्यशब्दप्रयोगस्तद्दैन्यवचनानुवादात् वस्तुतस्तु श्रीकृष्णाद्दूरे आत्मा देहो यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्माद्दूरविश्लेषादित्यर्थः । परमं विस्मयमित्यादिकस्य तया कथितमित्यादिना त्रयेणाप्यन्वयश्च । तत्सहितान्तर्धानादि सर्वं तच्चरितस्य स्वसहित तच्चरितादपि दुर्वितर्क्यत्वात् । तत्रापि तादृशमानप्राप्तेः स्वेषु परः कोटिष्वप्यदृष्टचरत्वात् । तत्रच सति तस्यामप्यवमानस्य परमासम्भवादिति ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थंप्रियस्य विश्लेषेण मोहितां विचित्तां दुःखितां च तां सतीमविदूरतस्ता गोप्यः ददृशुः कथंभूताः भगवतो मार्गमन्वेषयन्त्यः ॥ ४० ॥

ततस्तया स्वस्याः माधवान्मानप्राप्तिं सम्मानप्राप्तिं तथात्मनो दौरात्म्याद्धेतोरवमानं च कथितमाकर्ण्य सर्वा गोप्यः परमं विस्मयं प्रापुः ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दास्याः शिक्षायोग्यायाः दासृहिंसायामिति धातुः कृपणायाः कृपाविषयायाः गां दृष्टिं पान्ति रक्षन्ति दुर्विषयग्रसनराहित्येनेति गोप्य इन्द्रियवृत्तयः शास्त्रविषयाः अविदूरतः ज्ञात्वा समीपे स्थिताः ॥ ४० ॥

मुक्तेः पूर्वमपरोक्षबुद्धेः आविर्भावतिरोभावौ कथितवतीमिति भावदर्शनायोच्यते प्रियेत्यादिना मानप्राप्तिम् अपरोक्षलक्षणमानप्राप्तिम् ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तस्याः पूर्वचिन्तितमेवाह । अन्विच्छन्त्य इत्यादि । प्रियाविश्लेषात् विचेतसो विरहिण्यो गोप्यः सखीं तां राधां ददृशुः कीदृशीं ऊहितां वितर्कितां सांचेद्भवति कथमेकाकिनी साचेन्न भवति तदाकेयमन्येति प्रथममूहितां पश्चाद्ददृशुर्ज्ञातवत्यः किन्तु मादुःखितां आत्मवत् विच्छेददुःखभाजं न ददृशुरित्यर्थः प्रच्छन्न भगवदङ्गसङ्गवत्त्वात् ॥ ४० ॥

अथ मिलने सति ताभिः पृष्टया तया सर्वमेव कथितमित्येतदाह । तयेत्यादि । तया कथितमित्येकं वाक्यं तया आनुपूर्व्या सर्वमेव कथितमित्यर्थः । तत्र कथने माधवात् मानप्राप्तिमाकर्ण्य विस्मयं ययुरित्यर्थः ॥ ४१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो यज्जातं तदाह । अन्विच्छन्त्य इति । पूर्वोक्ता गोप्यः भगवन्मार्गमन्विच्छन्त्यः अविदूरत एव तां ददृशुः तासां क्रोधाभावायाह दुःखिता मिति । नहि दुःखितायां क्रोधो भवति दुःखे हेत्वन्तरनिराकरणायाह । प्रियविश्लेषमोहितामिति । भगवत एव विश्लेषेण परममोहं मूर्च्छां प्राप्तां सापि तासां सखी अतः सख्यभावेन वहन्त्यः तां प्रबोधितवत्यः न दुःखं पञ्चभिः सहेति पूर्वमेता भगवानेवमेव कौतुकार्थं गतः नत्वस्मद्दोषेणेति ज्ञातवत्यः अन्यथा दोषनिराकरणार्थमेव यत्नः कृतः स्यात् स्वदोषपरिज्ञानं च भगवत्कृपयैव भवति न स्वत इति ज्ञापयितुं सा नीता पश्चात्यक्ता कथनार्थमेव ॥ ४० ॥

अतो भगवदिच्छया सर्वं कथितवती तत्र वक्तव्ये यत्प्रयोजकं तदाह मानप्राप्तिं च माधवात् अवमानं च दौरात्म्यादिति तया कथितं यद्यपि बह्वेव श्रुतं तत्रैतावान् अर्थो निर्धारितः सन्मानमं यत्प्राप्तं तत्रस्वगुणैः किंतु लक्ष्मीपतेरेव गुणैः लक्ष्यंशा एता इति दौरात्म्यात् स्वधर्मादेवावमानं चकारात् खेदभ्रमादय एवं भगवतः अलौकिकं सामर्थ्यं दृष्ट्वा परमं विस्मयं प्राप्ताः एवं तद्वाक्यैः पदार्थनिर्धारो जातः अन्वेषणाद्विना भगवान् प्राप्तव्य इति ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अन्विच्छन्त्यः अन्वेषयन्त्यः विदूरतोऽपि ददृशुरिति तस्या विद्युत्तुल्यकान्तिमत्त्वात् सखीमिति तस्यास्तादृशदशादर्शनेन विपक्षाणामपि तत्र स्नेहोदयात् किञ्च उज्ज्वलरसस्य स्वभाव एवायं यत्कान्तस्य कान्तामात्रवियुक्तत्वे ज्ञाते सति कान्तानामीर्ष्यादोषाद्यभावः परस्परस्नेहवत्त्वं च यदुक्तमत एव हि विश्लेषे स्नेहस्तासां प्रकाशत इति ॥ ४० ॥

ततश्च सखीभिरत्युच्चरोदनेन व्यजनादिपरिचर्यया यत्नतस्तत्प्रबोधे सम्पादिते सति अयि प्रियसखि ! स्ववृत्तान्तः कथ्यतामिति ताभिः पृष्ट्या तया कथितमपि प्रियसख्यः कथं भवतीभ्यो विच्छिन्नाहमभूवमिति मुग्धाहं परतन्त्रा नाज्ञासिषं किन्तु मानप्राप्तिरवमानश्च दौरात्म्यादेव निश्चिनोमि युष्मान् परः सहस्राः प्रेमवती रवमत्य स्वविरहानलेन ज्वालयित्वा मह्यमेकस्यै यत्सौभाग्यं दत्तमिदं तस्य दौरात्म्यं तं दुर्ल्ललमहाराजपुत्रं प्रति वराक्यपि मुग्धा न पारये ऽहं चलितुं नय मामिति यदवोचम् एतत्तु ममैव दौरात्म्यं यत एतावान् अवमानः प्राप्त इत्युभयथापि मे महामनोदुःखमेवेति स्वकान्ते तासु स्वस्मिंश्च क्रमेणासूयाविनयदैन्यानि व्याञ्जिताधि अत्र श्रीमन्मुनीन्द्रेण दौरात्म्यशब्दप्रयोगस्तु तस्य वचनानुवादादेव वस्तुतस्तु श्रीकृष्णात् दूरे आत्मा यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्माद्विश्लेषादित्यर्थः विस्मयं परमं ययुरिति प्रियसखि ! भवत्याः सौभाग्यमुचितमेव नात्र तस्य दौरात्म्यं रतिश्रान्तायाः स्वाधीनभर्तृकायास्तव कान्तप्रत्याज्ञापनमपि न दौरात्म्यं प्रत्युत रसावहमेव किन्त्वनुकूलनायकेन सम्भुक्तकान्ताया यदुल्लङ्घनमेतादृग्दुरवस्थाप्रापणं च एतदेव रसप्रतिकूलं दौरात्म्यव्यञ्जकं हन्त हन्त महारसिकशेखरस्य महाप्रेमवतो दयानिधेस्तस्य कथमेवं चिकीर्षितमभूदिति परमं विस्मयं ययुः ॥ ४१ ॥

केन चित्कृता विशुद्धरसदीपिका ।

अन्विच्छन्त्यः गवेषयन्त्यः यद्वा मार्गमनुगन्तुमिच्छन्त्य इत्यन्वयः भगवत इत्यनेकार्थत्वाद्यथायोगमन्वयः गोप्यः सर्वा एव ऐकमत्याभिप्रायेण सामान्यनिर्देशः अविदूरतः ईषद्दूर इत्यर्थः नञीषदर्थे अनुदरा कन्येतिवत् ततश्च मोहाधिक्यं सूचितं सखीं ददृशुस्तामिति वक्तव्ये सखीमित्युक्तिस्तासामेव तथानुभवात् यथा मदनन्तरमानन्दवृन्दावनचम्पूमनु ता अपि सैवेयमिति सहर्षविषादविस्मयसम्भ्रमौत्कण्ठ्यमुपकण्ठमुपसर्पन्त्यः कनककमलिनीमूळं कलहंसवध्व इव सुरसरितं सरिदन्तराणीव स्थापितां प्राप्तवतीरातिं सर्वभावानां श्रेणय इव स्वरसप्तकसम्पदं सर्वाः श्रुतय इव सुकविलां रसभावालङ्कारसंपदिव उपमालङ्कतं रूपकाद्यल कृतय इव अमृत किरणकन्दलीं चकोरललना इव नवोद्यानलक्ष्मीं नानाविहङ्गवध्व इव अमृतकिरणकन्दलीं च कमलाकरसम्पदं कमलिनीविततय इव सकलाः परितः परिवव्रुः अथ तासां सख्यं तत्रैव यथा "काचिद्वीजयति स्म पल्लवकुलैः काचित्कचानान्ततिं वन्नाति स्म चकार काचन करेणास्याम्बुजोन्मार्जनम् ऊचे काचन माधव भवती हा हतं कष्टां दशामेतामासदती कथं हि स तव प्राणाधिनाथः शठः अस्मान् विहाय भवतीं यदसावहार्षीत्तेनैव हि प्रसमितो विरहज्वरो नः सोऽयम्पुनर्द्विगुण एव बभूव धिङ्नोयद्वीक्ष्यते तदवशेयमभूतपूर्वो न कश्चित्ते दोषः सुमुखि ! मनसोऽवापि वचसो जगत्येव ख्याता त्वमभिगुणरत्नावळिखनिः त्वयि प्रमा तस्य प्रथित इति सर्वस्य विषयः कुतो जाता तस्य व्यवसितिरियं हन्त कठिना," इति अत एव प्रियविश्लेषमोहितामित्युक्तं प्रियस्य विश्लेषो विशिष्टः श्लेषो मा ऊहितो यस्यास्तां किन्तु निजसाजात्येन विरहमात्रमेव तर्कितमित्यर्थः अत्र कारिकाः —

> सर्वाभिरपि विज्ञातं दुर्ग्राह्यहृदयः शठः ।
> सखीयं सरलास्माकं तत्प्रतारणमन्वभूत् ॥
> इयं प्रेम्णः परा काष्ठा यत्प्रेष्ठक्षेमवाञ्छया ।
> निजकापट्यविख्यातिर्दोषानुद्भावनं प्रिये ! ॥

एवञ्च विलोक्यरतिचिन्हानि ज्ञातमेताभिरेतया भ्रमन्त्या विपिने प्राप्ता दशेयमतिदुस्तरा रसावेशस्वभावेन तत्कृतं तासु नास्फुरत् यथोक्तं श्रीव्रजेश्वर्य्या बृहद्भागवतामृते—

> पश्यन्त्या रतिचिन्हानि न पश्यन्त्यास्य चेष्टितम् ।
> तथाहि] हन्त वालो ममावित्वा गा वनेष्वखिलं दिनम् ॥
> श्रान्तो निद्रासुखं प्राप्तो न जागर्त्यधुनाप्ययम् ।
> अरण्यकण्टकैर्दुष्टैः क्षतानीमानि सर्वतः ॥
> आक्रियन्तास्य गात्रेषु परितो धावतो मुहुः ।
> अहो कष्टं न जानाति किञ्चिन्निद्रावशङ्गतः ॥
> भ्रक्षयामास गात्रेषु स्वस्येदे नेत्रकज्जलम् ।
> तथात्माधरताम्बूलरागं चेतस्ततो विदन् ॥
> विच्छेद हारमाल्यादिपरिव्रासे मुहुर्भजन् ।
> नूनं काश्मीरवर्णेयं यमुनातीरमृत्तिका ॥
> न परित्याजिता हन्त स्नानेनापि वपुः सखी ।
> बालाभिश्चपलाभिर्यः सन्ध्यायामवधानतः ॥
> स्नानं न कारितं सम्यङ्नाभ्यङ्गोन्मर्द्दने तथेति ।

एवञ्च तामनु सर्वासां सख्यमेवं साधितं किञ्च प्रियविश्लेषमोहितामिति श्लेषानाश्रयणे प्रेमवैचित्त्यं स्पष्टीकृतं भवति तत्र च मोहितामित्युक्त्या दुःखितामित्युक्तिर्मोहस्यास्य तद्दुःखचिकित्सितत्वाभिप्रायेण तथा दर्शितमानन्दवृन्दावनचम्पूमनु यथा स्वच्छायेव सरोजिनीदलमयी शय्येव तस्या अभूज् ज्योत्स्नैवाजनि गन्धसारसलिळासेकः शरीरोपरि बाहु एव मृणालवल्लिवलयस्तस्या वियोगज्वरे मूर्च्छैवाभवदुत्तमा प्रियसखी दुःखानुभूतिच्छिदे, इति तदेवं प्रकरणस्यास्य श्रीराधिकोत्कर्षपरत्वं दर्शितम् अपिच विपक्षसपक्षतटस्थादिविभेदोऽप्येतामुद्दिश्यैव वर्णित इति सुसिद्धमाधिक्यं प्राधान्यञ्च वरमनुजन्यसमूह इतिन्यायात् वस्तुतस्तु निखिलस्यापि ग्रन्थस्य तात्पर्यमत्रैवेति गम्यते रुद्रयामळे तस्याः सहस्रनामस्तोत्रे—

> श्रीभागवतहार्द्दज्ञा श्रीभागवतमानसा ।
> श्रीभागवतसंविद्या श्रीभागवतभासिता ॥
> श्रीभागवतनिष्ठा च श्रीभागवतभावितेति ॥

सन्नाम्नां तथाश्रुतत्वात् साक्षान्नामानुक्तिश्च रहस्यत्वाद्भूषणमेव न दूषणमित्यलमतिप्रपञ्चितेन विस्तृतं भक्तिमञ्जूषायाम् अपिच परीवर्तिं रसिकजनसञ्जीविनी व्यञ्जनावृत्तिस्तदेकजीवनाश्च पर्य्यायोक्त्याद्यलङ्कृतिसंग्रहादतिरिति निःशङ्कमेव मुनीन्द्रपदैस्तथोक्तम् ॥ ४० ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्च तयेति माधवात् लक्ष्म्या अपि रमणतया स्पृहणीयात् सर्वगुणसम्पन्नात् स्वत एव परमसौभाग्यलाभलक्षणां मानप्राप्तिमाकर्ण्य तत्रैव दौरात्म्यात् तद्वियोगात् दूरे आत्मा देहो यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्मादित्यर्थः । तद्विश्लेषादवमानमाकर्ण्य विस्मयश्चोभयोरलौकिकप्रेमश्रवणात् यद्वा माधवादिति मुनीन्द्रोक्तिः मायास्तस्या एव धवात्तस्या एव पूर्वोक्तप्रकारां मानप्राप्तिं पारिशेष्यादात्मनश्च दौरात्म्यात् कामजभावाक्रान्तचेतस्त्वादवमानं चाकर्ण्य विस्मयं ययुः तत्सुखबुद्ध्याप्यनुकृतः कामजो भावः प्रेमविरोधीति विस्मये हेतुः अन्यथा व्याख्याने प्रकरणविरोधः ॥४१॥

श्रीरामनारायणकृतभावभावविभाविका ।

अग्रे यद्वृत्तं तदाह । अन्विच्छन्त्य इति । गोप्यः पूर्वं विच्छिन्ना भगवतो मार्गं मृग्यतेऽन्विष्यते ऽनेति तथा प्राप्तिपन्थास्तमेवानु पुनरव्युच्छिन्नवृत्त्या इच्छन्त्यः कामयन्त्यो नतु अन्वेषणविलेखन ततो निर्विघ्न गृहं स्मृतवत्यः अनेन " दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमि " रिति पतञ्जलिसूत्रितप्रेमपथदृढभूमित्वं दर्शितं ता अविदूरतः सखीं भगवत्सहगामितया तत्सहायभूतां ददृशुः ततस्तद्दर्शनेनात्रैतत्संनिधाने हरिर्भविष्यत्येवेत्युत्साहेन तत्सामीप्यं प्राप्य दूरात्तां स्वसखीं ददृशुस्तत्र हेतुः दुःखितां समानशीलव्यसनेषु मैत्रीतिवचनात्पूर्वं सर्वत्यागेन कृष्णैकपरत्वलक्षणसमानशीलत्वेऽपि समानव्यसनत्वाभावेन तत्सखीत्वमेव सम्भाव्य तद्विरहदुःखलक्षणसमानव्यसनत्वमप्याकलय्य स्वसखीत्वं व्यवसितवत्यः स्वाभ्यस्तस्यामाधिक्यमपि ददृशुरित्याह प्रियेति । प्रियस्य यो विश्लेषो विच्छेदस्तेन मोहितां मूर्च्छितां निश्चेष्टां ततश्च तन्मूर्च्छाभङ्गाय सुरभितोयसेचनव्यजनसमीरप्रियनामकीर्तनादियत्नं चक्रुरिति शेषः अन्यथा मोहितायाः वक्ष्यमाणभाषणानुपपत्तिः ॥ ४० ॥

ततः किंवृत्तमित्यत आह । तया कथितमिति । संज्ञाप्राप्तिविलापानन्तरं तत्प्रश्नोत्तरतया तया यत्कथितं माधवच्छविमाध्वीमध्वास्वादनोन्मत्ततयात्मानुसन्धानराहित्येन सखीसमाजवियोगात्तदनुसन्धानं तथा माधवात् लक्ष्म्यासर्वसौन्दर्यशोभाशृङ्गाररसम्पत्सौभाग्याद्यधिष्ठातृदेवताया अपि समस्तचाञ्चल्यादिस्वभावपरित्यागेन तदीयनित्यनिरतिशयगुणगणलुब्धतया स्पृहणीयोपपत्तेः स्वानुग्रहादेवास्मद्दोषाननवेक्ष्यगुणाननपेक्षमानप्राप्तिं यद्वा मान प्रमा तद्विषयिण्यव्यभिचारिणी यथार्थमतिस्तस्या एव धवात् मानप्राप्तिं ततश्च तस्य स्वपतित्वे स्वस्यास्त द्यूतेच न पाणिग्रहणादिविधिः रूपलावण्यगानवृत्यरसकौशल्यैश्वर्यधर्मादिगुणा वा हेतवः किंत्वव्यभिचारिणी प्रेममतिरेवेति तत्त्वं तथा वमानं वने परित्यागलक्षणश्च न तद्रसनभिज्ञत्वात् कौर्याद्वा किन्तु स्वस्यैव दौरात्म्यात् प्रेमदौर्थिल्यदर्पादिरूपात् यद्वा दूरे आत्मा कृष्णो यस्या दूरे आत्मा देहः कृष्णाद्वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं कृष्णावियोगित्वं तस्मादवमानं दुःखं तद्विरहिते स्वस्मिन् धिक् प्रियविरहितं मम जीवनमित्याद्यनादरं चाकर्ण्य विचित्रप्रेममाहात्म्यस्फूर्त्या परमं विस्मयम् आश्चर्यं समयो रूपगुणादिक्षपेक्षतद्राहित्यं वा ययुः यद्वा तस्य एव प्रेमवैलक्षण्यं तदास्वाद स्वदेहसखीसमाजवनानुसंधानं स्वसौभाग्यातिशयं सर्वत्यागपूर्वकात्यादरप्राप्तावपि स्वगुणान विगणय्य तदनुग्रहमात्रावधारणं तेन वने परित्यागेऽपि तदीयदोषमननुसन्धाय स्वस्मिन्नेव दौरात्म्यदर्शनमवगत्य परमं विस्मयं स्वीयप्रेमोत्कर्षस्मयराहित्यं वा ययुः ॥ ४१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ ता अपि तत्रागु समागता इत्याह । भगवतो मार्गं मृगयमाणा गोप्यः अविदूरतः सामीप्यतः दुःखितां प्रियविश्लेषजन्येन तापेन मूर्च्छितां समानदुःखाक्रान्तत्वेन सतीं तथाभूतां दृष्ट्वा विमतेर्ष्यास्तां वस्त्रवाय्वादिना सचेतनां कृतवत्य इत्यपि द्रष्टव्यं निवृत्तिपक्षे भगवतो मार्गं विदूरतो ऽन्विच्छन्त्यो गोप्यः परमात्मसम्बन्धिन्यः श्रुतयः दुःखिता आसन् अहो अस्माकं साक्षात्परमात्मप्रतिपादिका नास्तीति यदा मुख्यामपि सखीं समानविषयत्वात् प्रियेण चिदात्मना योऽयं विशेषेण श्लेषो वाच्यवाचकत्वलक्षणः सम्बन्धस्तत्र मोहितामत एव दुःखितां ददृशुस्तदा यत्किञ्चित्स्वास्थ्यं प्राप्ता इत्यर्थः ॥ ४० ॥

अयि सखि ! किंवृत्तमिति तामिः पृष्टया तया हे सख्यो ! मुग्धाहं तेन नेतीत्यादिनिश्रेयसपर्यन्तं कथितं वृत्तमाकर्ण्य तत्र माधवाल्लक्ष्मीपतेः कान्तिपतेः सुन्दराद्वा मानप्राप्तिं चाकर्ण्य दौरात्म्याद्दौर्जन्यादवमानत्यागलक्षणं चाकर्ण्य परमविस्मयं ययुः अहो महान्तमिव मानं लब्धवती सखैव विधं मानं दत्त्वा कथमवमानं कृतवान् नानाश्चर्यमिदामिलेवं परमं विस्मयं प्रापवत्यः निवृत्तिपक्षे तया श्रुत्या तत्त्वपदार्थैकोऽभिन्नत्वं कथितमाकर्ण्य माधवात्स्वजन्यब्रह्मविद्यापतेः मानस्य प्रामाण्यस्य प्राप्तिं चा कर्ण्य दूरे आत्मा शुद्धचिदानन्दघनो निर्विशेषोपास्यः दूरात्मा तस्माद्ब्रह्मविषयप्रीतिपादकत्वादेव मानं तत्तद्विषयप्रेमानुत्पादकत्वं चाकर्ण्य योहो लब्धप्रमाण्याया अस्याः कथमप्रामाण्यमिति परमं विस्मयं ययुरित्यर्थः ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवतो मार्गमन्विच्छन्त्यः मृगयमाणाः अविदूरतः समीपे प्रियस्य श्रीकृष्णस्य विश्लेषेण मोहितां तामपि ददृशुः ॥ ४० ॥

भक्तमनोरथपूरणार्थं भक्तवश्यो भवति वस्तुतस्तु सर्वनिरपेक्षो भगवान् परमानन्दघनत्वादित्यवधार्य परमं विस्मयं ययुः ॥ ४१ ॥

भाषा टीका ॥

श्री शुकदेवजी बोले सब गोपी या प्रकार ते भगवान् के मार्ग को ढूंढती बहुत दूर जब चली गई तब प्यारे के वियोग होवे ते बडी दुखी मोहित बेसी वा सखी को देखत भई ॥ ४० ॥

वाके कहवे ते माधव ते अपने को मान को होवो फिर अपने अभिमान तें अपनो अपमान होवो सुन सब गोपी बड़े विस्मय को प्राप्त भई ॥ ४१ ॥

ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते ॥
तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥ ४२ ॥
तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥ ४३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततस्तयापि सहिताः कृष्णान्वेषणाय वनमविशन् ततो हरेरन्वेषणान्निवृत्ताः ॥ ४२ ॥

एवं तमप्राप्ता अपि स्वगृहान्नैव स्मृतवत्यः तदात्मिकाः स एवात्मा यासां ताः तन्मय्य इत्यर्थः ॥ ४३ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषणी ।

ततः परमप्रेमवैयग्र्येण तया सहिताः पुनरप्यन्वेषयामासुरित्याह । तत इति । यावद्वनं व्याप्य ज्योत्स्ना विभाव्यते लक्ष्यते तावद्वनमविशन् प्रविश्य तमन्वेषयामासुरित्यर्थः । तमसा प्रविष्टमत्यन्तघनत्वादन्धकारमयमालक्ष्य ततस्तस्माद्वनान्निवृत्ताः तत्र तदन्वेषणासिद्धेः तथा च श्रीविष्णुपुराणे-

प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते ।
निवर्त्तध्वं शशाङ्कस्य नैतद्दीधितिगोचर इति ॥

स्त्रिय इति स्त्रीणामन्धकारवनप्रवेशे सामर्थ्याभावादित्यर्थः हरेरिति पाठोऽत्र केषांचिन्मतः सच श्रीस्वामिपादानामसंमतो लक्ष्यते तत इति पुनरुक्तेः समाधानार्थं तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात् अन्यथा तत इत्यस्य अन्वेषणादिव्याख्याने तस्य प्राक्लिखनायोगात् तथा हरेस्तत इत्यन्वयाद्यसौष्ठवं वा ॥ ४२ ॥

तथापि स्वगृहान् गच्छेयुरिति किम्वक्तव्यं नच स्मृतवत्योऽपीत्याह । तन्मनस्का इति । आत्मागाराणि स्वातन्त्र्यमनोज्ञसुखमयानीत्यर्थः किम्वा गृहकृत्यार्थमभ्यासवशेन गम्यान्यपि यद्वा आत्मानं देहं क्षेत्रज्ञं वा अगाराणि गृहाणि देहगेहानि वा इतिभोक्तृभोगसाधनभोग्यान्युक्तानि तदस्मरणे हेतुः तन्मनस्का इत्यादि पदत्रयेण तस्मिन् मनोवाक्कायाभिनिवेश उक्तः तत्र मनसो ऽभिनिवेशः तद्गुणादिस्मरणेन तद्विषयकविविधसङ्कल्पविकल्पकादिना वा वाचः अन्योऽन्यं तद्वार्तया कदाचित्तदाह्वानादिना च कायस्य च पूर्ववत्तच्चेष्टानुकरणेन प्रणामार्थदण्डवन्निपातेन तदर्थपुष्पमालाग्रथनशय्याविरचनादिनाच अत एव तदात्मिकाः । तन्मय्यः किम्वा उक्तप्रकारेण तदर्पितात्मानः अतस्तस्य गुणानेव नतु परित्यागेऽपि नैठुर्यादिदोषान् गायन्त्यः गानञ्च श्रीभगवतो गतिप्रियत्वात् तथाचोक्तं तेनैव—

नाहम्वसामि वैकुण्ठे योगिनां हृदये नच ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारदेति ॥

एवं श्रीभगवद्वशीकरणहेतुत्वाद्गानस्य सर्वतः श्रैष्ठ्यमभिप्रेतं यद्वा तदानीं तासां तदनुसन्धानाभावेन केवलं विरहार्त्तिभरस्वभावादेव तथापि सर्वान्ते निर्देशात् तथा शतरुपस्रयान्तत्वेनानुस्मरणे प्राधान्यात्तस्य श्रैष्ठ्यं सिद्धमेव तत्र चालापगानयोर्युगपदसम्भवात् कदाचिदालापः कदाचिद्गानं कासाञ्चिदालापः कासाञ्चिद्गानमिति बोद्धं यद्वा तन्मनस्का इत्यादिपदचतुष्केण तासां सदातनः स्वभाव उक्तः अत एवाधुना विरहार्त्या गायन्त्य इति तदात्मिका इति पूर्ववदन्यदशापरिहारार्थं वा यद्वा तत्परिहारार्थमेव ता विशिनष्टि विरहार्त्तिविवृद्धिस्वभावेन तदावेशेन वा तस्य मन इव भयादिरहितं मनो यासां तस्यालाप इव गम्भीरमधुराक्षरार्थभङ्गीपूर्वनर्म्मादिमय आलापो यासां तस्य चेष्टेव विचित्रालिङ्गनादिरूपा चेष्टा यासां तस्य आत्मा देह इव त्रिभङ्गानुकरणादिना मनोहर आत्मा यासां ताः तथापि तद्गुणानेव गायन्त्य इति तासां स्वभाव उक्तः किञ्च तेन तत्प्राप्त्युत्कण्ठा विवृद्धैव नतु निवृत्तेति च सूचितम् अन्यत्समानम् ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषणी ।

ततः परमवैयग्र्येण सखीभिर्दत्तावलम्बनया तयैव सहिताः पुनरप्यन्वेषयामासुरित्याह । तत इति । यावद्वनं व्याप्य ज्योत्स्ना विभाव्यते लक्ष्यते तावद्वनमविशन् प्रविश्य तमन्वेषयामासुरित्यर्थः । तमसि महागहनगते प्रविष्टं श्रीकृष्णं पदाचिन्हादिना वितर्क्य ततस्तस्माद्वनान्निवृत्ताः तथा च विष्णुपुराणे । " प्रविष्टो गहनं कृष्णः पदं यत्र न लक्ष्यते । निवर्त्तध्वं शशाङ्कस्य नैतद्दीधितिगोचर इति „ । स्त्रिय इति स्त्रीणामन्धकारवनप्रवेशनासामर्थ्यादित्यर्थः । शङ्कादिग्धस्निग्धस्वभावतया निजदयितस्य स्वेभ्य एवापन्नतया तत्र प्रविष्टोऽयामिति वितर्कितः तस्य तस्मात् दुःसञ्चर स्थलान्निष्क्रमणाय व्यग्राः सत्य इत्यर्थः । हरेरिति पाठोऽत्र केषाञ्चिन्मतः । सच टीकाकृतामसम्मतो लक्ष्यते । तत इति पुनरुक्तेः समाधानार्थं तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात् । अन्यथा तत इत्यस्य प्राग्विशेषणायोग्यता स्यात् । हरेस्तत इत्यन्वयाद्यसौष्ठवं च ॥ ४२ ॥

ततश्च ततो निवृत्तास्तत्र प्रविष्टस्य तस्य व्यथते न किंस्वित् कूर्पादिभिरिति वक्ष्यमाणरीत्या दुःखशङ्कया परमदुःखमग्ना बभूवुरित्याह । तन्मनस्का इति । तादृगवरोधस्थलं प्रविष्टे तस्मिन्नेव मनो यासाम् । ततस्तादृशे तस्मिन्नेव विषये आळापस्तद्दुःखस्मरणमयः संलापो यासां ततस्तस्मिन्नेव निमित्ते विचेष्टा यत्नान्तरेण तन्निष्क्रमणसम्भावनया परितः परिक्रमणरूपा यासाम् । ततस्तस्मिन्नेव आत्मा यत्नो यासां तथा भावाः सत्यस्तस्य निलीनता कारणापन्नाः तादृशवशीभावमयकृपादिलक्षणान् गुणानेव केवलं तया स्फुरितान् नतु स्वपरित्यागादिदोषान् गायन्त्यः गानेन तं भावयन्त्यः आत्मानमपि न सस्मरुः किमुतागाराणीत्यर्थः ॥ ४३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तदात्मिकाः कृष्णानुसारदशायां तद्ध्यानयुक्ताः ॥ ४३ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तया सहिताः कृष्णान्वेषणाय यावच्चन्द्रिका प्रकाशते तावद्वनं चेरुः ततस्तमसा सान्द्रतरुच्छायाकृतेन प्रविष्टं व्याप्तं वन-मालक्ष्य ततोऽन्वेषणान्निवृत्ताः ॥ ४२ ॥

एवमेव प्रातः अपि स्वगृहासान्नैव स्मृतवत्यः तत्र हेतुं वदन्वि-शिनष्टि तस्मिन्कृष्ण एव मनो यासामतएव तदात्मिकाः तज्ज्ञान-प्रचुराः अत एतस्यैवालापो यासां तास्तस्यैव विविधा चेष्टा यासां तस्यैव गुणान् गायन्त्यः इति ॥ ४३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यावच्चन्द्रज्योत्स्ना विभाव्यते तावद्वनाद्वनं गत्वा ततश्चन्द्रच-न्द्रिकास्तमयानन्तरं प्रविष्टं प्राप्तं तम आलक्ष्य दृष्ट्वा निववृतुः निवृत्ता इत्यनेन दुःशास्त्रान्निवृत्य सच्छास्त्राभ्यसनाय यत्नं चक्रु-रिति सूच्यते स्त्यै ष्ट्यै शब्दसङ्घातयोरिति धातोः शास्त्रविषया बुद्धयः ॥ ४२ ॥

सत्त्वबुद्धीनां स्वभावं दर्शयति । तन्मनस्का इति ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्गुणानेव गायन्त्यः न तु स्वदुःखादिकमपि ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्र एकीभूय तत्रैव विचारणक्रमसञ्चारक्रमेण यत्र चन्द्रज्यो त्स्नाप्रवेशो नास्ति तद्वनमुपस्थितमिति कृत्वा ततो निवृत्य प्राग्दृष्टं पुलिनमेवाययुरित्याह । ततोऽविशन्नित्यादित्रिभिः ॥ ४२ ॥

तस्मिन्मनो यासां तमुद्दिश्य आलापो यासां तदर्थमेव विचेष्टा यासां स एवाश्रयो यासां तद्गुणानेव गायन्त्यः सत्यः आत्मागाराणि शरीराणि न सस्मरुः ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अतः परं भगवत्प्रसादे को हेतुरिति विचार्य सर्वपरित्यागेन देहत्यागपर्यन्तं साधनमिति निश्चित्य तथा कृतवत्य इत्याह । तत इति । ततो वनमभिविशन् मोहनिवृत्त्यर्थं वनप्रवेशः वनकृतानामपि देहमोहः तदा किं वनप्रवेशेनेति चन्द्रज्योत्स्ना यावद्विभाव्यते तावद्दूरमेव गताः अतिनिबिडं वनन्तु न प्रविष्टाः यदा पुनर्गाढवने अन्तश्चन्द्रकिरणा न प्रविशन्ति तदा तत्र तमः प्रविष्ट-मालक्ष्य ततो निववृतुः निवृत्ता जाताः ननु प्रथमं यदुद्योगेन वनं गताः तदकृत्वा कुतो वा निवृत्ता इत्याशङ्क्याह । हरेरिति हरेः सकाशात् हरेः संबन्धिन्यो वा ततः अन्धकारान्निवृत्ता नहि भगवदीया अन्धकारं प्रविशन्ति भगवतैव निवर्तिताः ॥ ४२ ॥

निवृत्ताश्चेत् गृहङ्गता भविष्यन्तीत्याशङ्कायामाह । तन्म-नस्का इति । ता नात्मागाराणि सस्मरुः आत्मानं देहमागारं गृहं तत्संबन्धीनि वस्तूनि स्मृतवत्य एव न कुतो गमिष्यन्ति अस्मरणे हेतवः तन्मनस्का इत्यादिभिः पञ्चभि पदैः पञ्च निरूप्यन्ते स्मृतिर्मनसि जायते तन्मनस्तु केवलं भगवत्येव अतः तन्मनस्का भगवन्मनस्का न सस्मरुः अन्यद्वाराप्यस्मरणार्थमाह । तदालापा इति । अन्यां अपि वेदन्यवार्तां कुर्युस्तदा तत्प्रसङ्गाद् गृहादिस्मरणं भवति सर्वा एव तस्मिन्भगवत्येवालापो यासामतो ऽन्यतोऽपि न स्मरणं ननु दैहिकी क्रिया क्षुत्पिपासाकृता आवश्यकी तया देहादिस्मरणं भविष्यतीति चेत्तत्राह । तद्विचेष्टा इति । तस्यैव भग-वतः पूर्ववच्चेष्टा विशिष्टाः ननु तथापि सर्वज्ञानेष्वात्मांशः स्फुरति घटमहं जानामि पटमहं जानामीति अतः कथमात्मास्फूर्ति-स्तत्राह । तदात्मिका इति । स एवात्मा यासां सर्वदा कृष्णात्म-भावनैव चित्ते सहजा तासामत आत्मत्वेन भगवानेव स्फुर-तीति न देहादिस्फुरणं ननु—

सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः ।

अदृष्टवशात् कथं न स्मृतिस्तत्राह । तद्गुणानेव गायन्त्य इति । यदि तूष्णीं तिष्ठेयुः भवेदपि स्मृतिः अन्यासक्तास्तु ताः कार्या-न्तरपराः यतस्तस्य भगवतो गुणानेव गायन्ति गुणैः कृत्वा दुरदृष्टञ्च नश्यति अतो नादृष्टद्वारापि स्मृतिबोधः ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च वैयग्र्येण सखीदत्तहस्तावलम्बया तया सहैव ताश्च त-मन्वेषयामासुरित्याह । तत इति । चन्द्रज्योत्स्ना यावता विभाव्यते इति पूर्णिमारजन्यामपि निबिडवृक्षच्छायावशादेव तमः यदुक्तं विष्णुपुराणे प्रविष्टो गहनं कृष्णः पद मत्र न लक्ष्यते निवर्त्तध्वं शशाङ्कस्य न तद्दीधितिगोचर इति वस्तुतस्तु हंहो खेदसिन्धुनिमग्नाः सख्यो घनश्यामतमे ऽस्मिंस्तमसि घन श्यामवपुषं तमस्तदवलोकनशङ्कयैव प्रलीनीभूय स्थितं मा सङ्कोचयत यत्र यत्र यूयं यास्यथ ततस्ततोऽन्यत्रैव स पलायि-ष्यते इत्यलमतिसुकुमारशरीरस्य तस्य श्रमोत्पादनव्यवसा-येनेति विमृश्यैव निववृतुरिति ॥ ४२ ॥

तन्मनस्कत्वेनैव पूर्ववदुन्मादस्य मान्द्ये तदालापाः दुष्टो वः कश्चिदश्ववधैतिवृत्तमालपन्त्यः उन्मादस्य मध्यत्वे तद्विचेष्टाः कृष्णायन्त्यपिबत्स्तनमितिवत्तच्चेष्टामनुकृतवत्यः उन्मा-दस्य प्रौढत्वे तदात्मिकाः कृष्णोऽहं पश्यत गतिमिति वदात्मविस्मृतौ तन्मयीभूताः पूर्वसंस्कारवशादेव गायन्त्य उच्चैः स्वमेवेतिवत्तद्गुणानेवेति ॥ ४३ ॥

केनचित्कृता विशुद्धरसदीपिका

तत्सङ्गभावं प्रदर्शयति । तत इति । तदाकर्णनानन्तरं यावदवधि यावच्चन्द्रज्योत्स्ना विभाव्यते तावदेव वनमविशन् ततश्च हरेः परममनोहरस्य तमः प्रविष्टं गह्वरप्रवेशमालक्ष्य निववृतुः निवृत्ता बभूवुः अयं तत्सुखस्योदयस्तस्याः संसर्गादेवेति यथा श्रीमत्सुधानिधौ "राधादास्यमपास्य यः प्रयतते गोविन्दसङ्गाशया सोऽयं पूर्णसुधारुचेः परिचयं राकां विना काङ्क्षति किञ्च श्याम-रतिप्रवाहलहरीबीजं न ये तद्विदुस्तेप्राप्यापि महामृताम्बुधिमहो विन्दुं परं प्राप्नुयुरिति ॥ ४२ ॥

किं गृहान्प्रति निवृत्ता नेत्याह तदिति । तन्मनस्काः ताद्दगवरोध-स्थलं प्रविष्टं तस्मिन्नेव मनो यासां ताः ततस्तस्मिन्नेव विषये तादृश आलापः तद्दुःखस्मरणमयः संलापो यासां ताः तास्मि-न्नेव निमित्ते विचेष्टा वर्त्मान्तरेण निष्क्रमणसम्भावनया परितः परिक्रमणरूपा यासां ताः ततस्तास्मिन्नेवात्मा यत्नो यासां तथाभावः सत्यः तन्निलीनतादिकरताद्दशा पत्र यदि कारणस्व-वशाभावमयकूपादिलक्षणान् गुणानेव केवलतया स्फुरितान् ननु स्वपरित्यागदोषान् गायन्त्यः नात्मानमपि सस्मरुः किमुतागाराणी-त्यर्थः । यद्वा तन्मनस्काइति पञ्चहेतवोऽस्फुरणे स्मृतेर्मनोधर्म्मत्वा-त्तन्मनस्काः अन्यवार्त्तया प्रसङ्गादन्यस्मरणं स्यादिति तदालापाः दैहिकक्रियायांतु क्षुत्पिपासादिनापि स्मरणान्तरं वारयति । तद्वि-चेष्टाःघटमहञ्जानामीत्यादिज्ञानेच्छा दिनात्मानि स्यादिति तदात्मिका वइशाद्दष्टविन्ताया: स्मृतिबीजस्य बोधका इति न्यायाददृष्टवशाद-न्यस्फूर्तिः स्यादिति तद्गुणानित्यादिना ॥ ४३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततस्तां गन्तुमशक्तां हस्तावलम्बेनपुरतःकृत्वान्वेषयन्तीनां चरित माहततोऽविशन्निति ततस्ताःस्त्रियस्तां पुरस्कृत्य भगवन्तमन्वेषयन्त्यो यावच्चन्द्रज्योत्स्नाविभाव्यते तावद्वनमविशन् अग्रे तमः प्रविष्टम् यस्मिंस्तादृग्वनमालक्ष्य तत्र हरेरन्वेषणान्निववृतुः युक्तश्चैतद्गङ्गा-सहकारेण नदीनां सिन्धुम्प्रति गमनवत् पराभक्तिपुरस्कारेण साधनभक्तीनां भगवदभिगमनवत् श्रुतिशिर एकवाक्यतयावान्तर-श्रुतीनां तदुपकरणोपयोगितया च समस्तश्रुतीनां ब्रह्मणि पर्य्य-वसानवच्च तत्पुरस्कारेणान्वेषणे यत्र यत्राश्रमवनादौ सत्त्वविभा-वना तत्र भगवदन्वेषणवच्चन्द्रप्रभान्वितवने एवान्वेषणं तमः प्रविष्टाश्रमेभ्यः पाषण्डादिभ्यो भगवत्प्राप्तिसम्भवनाशून्येभ्यो जिज्ञा-सूनां निवृत्तिवत्तमःप्रविष्टवनेभ्यो निवर्त्तनञ्च यद्वा मनसश्चन्द्ररूप-त्वात् यावच्चन्द्रज्योत्स्नामनोवृत्तिप्रकाशो जागर्ति स्वप्ने वा विभाव्यते तावदेव विविधसाधनैर्भगवत्स्वरूपान्वेषणसम्भववत् तमः प्रवेश-सुषुप्तौ साधननिवृत्तिवत् यावच्चन्द्रज्योत्स्नान्वेषणमन्तः प्रवेशे ततो निवर्त्तनञ्च युक्तमेव यद्वा कृष्णं तमसि प्रविष्टमालक्ष्य ततो दूरेव हेतोःस्वान्वेषणे तस्य पलायमानस्य प्राणनाथस्य तमसि प्रवेशे शर्कराकण्टकादिना खेदसम्भवादेव निववृतुः यद्वा भगवल्लीला वने तमःप्रवेशासम्भवेन भगवतो वासुदेवस्य च तमसि प्रवेशास-म्भवेन यावच्चन्द्रज्योत्स्ना विभाव्यते शशिप्रभाया भानं जातं ताव-दन्वेषयितुं वनमविशन् ततो विरहाति वैकल्येन नेत्रयोस्तमः प्रवि-ष्टमालक्ष्य प्रकाशमानमपि चन्द्रं तद्रश्मि व्याप्तमपि वनं नेत्रयो-स्तमश्छादनेनापश्यन्त्यो निववृतुः सापि निवृत्तिर्नस्वतः किन्तु यत्र तत्र पतन्त्य एवोन्मेषयन्त्योऽपि हरेरेव भक्तदुःखासहिष्णोर्मनासि तथा प्रेरिता निववृतुः ॥ ४२ ॥

ननु ततो निवृत्ताश्चेत्तदा गृहान् गता भवेयुस्तत्राह । तन्मन-स्का इति । ता आत्मानं शरीरमागाराणि च न सस्मरुः यदात्मा-नमपि न सस्मरुस्तदागारस्मरणस्यैव कैमुत्यन्यायेनासम्भवे तद्गमनस्य का कथा तदेवापादयति पञ्चभिः स्मरणस्य मनो-धीनत्वात्तत्स्वास्थ्ये एव तत्स्यात् तास्तु तन्मनस्काः तस्मिन्नेव मनांसि यासां स एव वा मनःसु यासान्तथाभूताः इति कथं स्मरेयुः ननु तन्मनस्त्वेऽपि अन्योद्बुद्धसंस्काराः स्मृत्वा गच्छेयुस्तत्राह तदालापा इति तद्विषय एवालापोभाषणं यासां ततश्च तासु सर्वासु अन्यवार्त्ताप्रवेशस्यैवाभावात्कथमन्यसंस्कारोद्बोधस्तत्स्मरणं वा दैहिकक्षुदादिचेष्टया संस्कारोद्बोधे देहगेहादिस्मरणमाशङ्क्याह तद्विचेष्टा इति पूर्वनिरूपितरीत्या तल्लीलानुकारविषया एव विचेष्टा यासां ननु तमेव भान्तमनुभाति सर्वमिति श्रुत्या घटमहंजानामी-त्याद्यनुभवैश्चात्मनः सर्वप्रत्ययवेद्यत्वात्कथं तासां नात्मस्मरणं तत्राह । तदात्मिका इति स एवात्मा वस्तुत इतरास्फूर्त्त्या च यासां पूर्वन्तासां परस्परभाषणस्य तद्विषयत्वमुक्तमधुना तद्गान-स्यापि तद्विषयत्वमाह । तद्गुणानेव गायन्त्य इति । यद्वा तेन वनेत्यक्तास्तत्कौर्य्यादिदोषालापपरा भवेयुस्तथाच दोषदृष्ट्या ततो-विरज्य गृहगमनादिसम्भावनापत्तिस्तत्राह । तद्गुणानेव गायन्त्य इति नहि प्रेमिणां गुणैर्विनाभियतमे दोषस्फूर्तिसंभावनापीति भाव-स्तदुक्तं गीतगोविन्दे श्रीमत्या श्रीमुखेनैव गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहतिच परितोषं दोषं विमुञ्चति दूरतः युवतिषु वलतृष्णे कृष्णे विहारिणि मां विना पुनरपि मनोवामं कामं करोति करोमि किमिति तथाचैतैः पदैस्तासां मनोवाक् मैभिस्तदेकपरत्वं स्वरूपतस्तदनतिरिक्तत्वञ्चोक्तं भवति यद्वा तन्म-नस्कत्वे लीनमनसां मनोधीनतद्बाह्यव्यवहारलोपमाशङ्क्याह तदा-लापा इत्यादि तेनैव तत्प्रेरणयैवालापो विचेष्टा विविधा तदनुका-रादिचेष्टा यासां तत्र हेतुस्तदात्मिका इति स एवात्मा प्रेरको यासां ताः अत एव ज्ञानिनां देहाद्यध्यासाभावेऽपि भगवतैव जिज्ञासुज-नोपकाराय तद्वागादिप्रेरणयोपदेशादिसम्भववत्सर्वोपकारकभक्ति-प्रवर्त्तनाय भगवत्प्रेरितवाचा तद्गुणानेवगायन्त्य इतिभावः यद्वा तन्मनस्कत्वेन मनस्याविर्भूतेन तेनैव जीवनाधारं कं सुखं यासा तथामनस्याविर्भावेन स्फुरता तेनैव सहालापोयासां तास्तथाते नैव तथाविर्भूतेन विविधा नाना विहारादिचेष्टा यासां तास्तथा-तेनैव सहगुणानेव गायन्त्य एवंसर्वथा तदात्मिका न सस्मरुः यद्वा काश्चिदेवमुक्तरीत्या तदात्मिकाः काश्चित्सु व्युत्थानदशापन्ना स्तस्यैव गुणानेव गायन्त्य एव न सस्मरुः ॥ ४३ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ततस्तां हस्ते धृत्वोत्थाप्य तया सहिता अन्वेषणे प्रवृत्ता इत्याह । तत इति ततो विस्मयप्राप्त्यनन्तरं पदाचिह्नानां वने प्रवेश-मालक्ष्य वनमविशन् तत्र यावत्पर्य्यन्तं वृक्षाणां विरलत्वा-च्चन्द्रज्योत्स्ना विभाव्यते तावत् ततो निविडवृक्षेषु घनीभूतं तमः प्रविष्टं प्रेष्ठपदचिह्नैरालक्ष्य हरेरन्वेषणान्निवृत्ताः भीत्वा-द्वयेन तमो नाविशन्निति भावः । यद्वा हरेः सम्बन्धिन्यः

पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ॥
समवेता जगुः कृष्णं तदागमनकाङ्क्षिताः ॥ ४४ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां दशमस्कन्धे रासक्रीडायां श्रीभगवदन्वेषणं नाम
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तथा च तत्रापि धूर्तान्तरस्थितिशङ्कया न प्रविष्टा इति भावः। यद्वा अस्मासु तमः प्रविष्टासु सतीषु स वहिर्निःसृत्य गमिष्यतिचेत् सर्वथा न मिलिष्यतीति तत्राप्रवेशाशयः यद्वा स्मास्वन्तः प्रविष्टासु संभ्रमादन्धकारपलायनपरायणस्य परमसुकुमारपादाद्यवयवस्य प्रेष्ठस्य खेदो भविष्यतीति विचार्य्य निवृत्ता इत्यभिप्रायः । अथवा प्रकाशकराङ्गस्य भगवतोऽत्र प्रवेशे तमः प्रवेशो न सम्भवतीति तत्र प्रविष्टं तम आलक्ष्य तर्कयित्वा निववृतुरित्याशयः निवृत्तिपक्षे ततो विस्मयप्राप्त्यनन्तरं यावद्विवेकलक्षणं चन्द्रस्य ज्योत्स्ना तत्तत्पदार्थतत्त्वप्रकाशो विभाव्यते तावदत्तन्निरसनार्थमविशन् अग्रे चैतन्यघने परमात्मनि तमः प्रविष्टप्रकाशसामर्थ्यमालक्ष्य हरेः सम्बन्धिन्यः श्रुतयो निववृतुः ॥ ४२ ॥

ननु सर्वथा कृष्णमलब्धवत्यः प्राप्तपरिश्रमाः स्वगृहान् प्रति कुतो न गता इति चेत्तत्राह। नात्मागाराणि सस्मरुः आत्मानं परिश्रमादित्यक्तं देहं गृहागाराणि गृहांस्तत्रत्यानि वस्तूनिच न स्मृतवत्यः स्मरणं विना कथं गमनादिकं तासां भवेदिति भावः ननु कुतो न सस्मरुरित्याशङ्क्याह । तन्मनस्का इति। तस्मि भगवति मनो यासां ताः तथाच स्मरणकारणस्य मनसो भगवति प्रविष्टत्वात्कथमन्यत्स्मरणं भवेदिति भावः। आलापद्वारापि स्मरणं वारयति तदालापाः तत्सम्बन्ध्यालापो यासां ताः तथाच गृहान् प्रतिगन्तव्य मिति भाषणे कस्या अप्यवकाशो न जात इति भावः। नापि हस्तादिसंज्ञया सूचनावकाशः कस्या अप्यासीदित्याशयेनाह । तस्यैव विचेष्टा पूर्वकं कथा यासां ताः ननु कदाचिन् मनसा गेहाद्यनुसन्धानं कुतो न जातमितिचेत्त्राह । तदात्मिकाः स आत्मा यासां ताः तथाचा तैयुतात्मनां तासां तदन्यीऽनुसन्धानादिकं दुर्लभमिति भावः किञ्च गेहादिस्मृतिसम्पादकं दुरदृष्टमपि नोत्थितं तन्नाशकतद्गुणकीर्तनपरत्वादित्याह । तदिति गुणान् गोवर्द्धनोद्धरणादिना गोकुलरक्षणादीन् यद्वा यतः काश्चित्तन्मनस्काः अहो प्रेष्ठः संप्रति कुत्र वर्तते कथं मिलिष्यतीत्यादि तद्विषयकमनोरथपराः काश्चि त्तदालापाः अहोऽस्मान्विहाय कथंगत इतः परं कुत्रान्वेषणीय इत्यादि तद्विषयकवार्तालापपराः काश्चित्तद्विचेष्टाः पूतनास्तनपानादि तद्विचेष्टाकारपराः काश्चित्तदात्मिकाः तस्मिल्लीनमनस्कत्वात्समाधिस्था इव तदेकस्फूर्तयः काश्चि तद्गुणानेव गायन्त्यस्तस्मान्नात्मागाराणि न सस्मरुः यद्वा कदाचित्तन्मनस्काः कदाचित्तदालापा इत्येव योज्यं निवृत्तिपक्षे काश्चित्तन्मनस्काः प्रत्यगभिन्नब्रह्मविषयकभिप्रायाः काश्चित् साक्षादेव तदालापाः सत्यत्वादिरूपेण तस्य प्रतिपादिकाः काश्चित्तद्विचेष्टाः सर्जनादिरूपाः काश्चित्तदात्मिकाः तस्मिन्नात्मा प्रयत्नस्तत्प्राप्तिसाधनाः शान्त्यादिरूपाः स आत्मत्वेन वा प्रतिपाद्यो यासां ताः कारागृहस्थानापन्नानि काश्चिद्गुणान् सर्वज्ञत्वसर्वेश्वरत्वादिरूपानेव गायन्त्य आत्मनो आगाराणि अज्ञानाहंकारादीनि न सस्मरुः परमार्थत्वेन न प्रतिपादयामासुरित्यर्थः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततस्तदनन्तरं तया सह कृष्णा प्रियया सह यावत् चन्द्रज्योत्स्ना चन्द्रिका प्रकाशते तावद्वनमविशन् ततस्तमः प्रविष्टमतिनिबिडं वनं तमसा व्याप्तमालक्ष्य ततः कृष्णान्वेषणात् अतिनिबिडवना द्वा निववृतुः निवृत्ताः बभूवुः ॥ ४२ ॥

एवं भगवन्तमप्राप्यापि आत्मागाराणि न सस्मरुः न स्मृतवत्यः किन्तु तत्प्राप्त्याकाङ्क्षया तत्रैव तस्थुः तत्र कारणमाह। तन्मनस्का इत्यादि ॥ ४३ ॥

भाषा टीका

ताके अनन्तर सब गोपी आगे वन में गमन करत भई जहां तक चांदनी दीखी तहां ताई गई फिर अन्धेरे को आते देख सब स्त्री उहां ते निवृत्त होगई ॥ ४२ ॥

वा श्रीकृष्ण में ही उनको मन लग गयो उनके हिभाषण करवे लगी उनकी ही सब चेष्टा करवे लगी तिनमें ही तिनके आत्मा लग गया तब उनके गुणके गाते गाते देह गेह की सब यादि को भूल गई ॥ ४३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किंतु पूर्वं यत्र श्रीकृष्णेन संगतिरासीत्तदेव कालिन्द्याः पुलिनमागत्य कृष्णं भावयन्ति ध्यायन्तीति तथा ताः कृष्णस्यागमनं काङ्क्षितं यासां ता मिलिताः सत्यः कृष्णमेव जगुरिति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

पुनः पुलिनागमनं तत्र परित्यक्तान् अस्मान् श्रीकृष्णो नूनं कृपया सान्त्वयितुं तत्रैवागतः स्यादिति मत्या किम्वा तद्दर्शनाभावेन स्वसहितं तत्क्रीडास्थानस्यैव दिदृक्षया अत एवोक्तं कृष्णभावनाः कृष्णं चित्ताकर्षकं परमानन्दप्रदं वा भावयन्त्यः तत्र गतं मन्यमानाः किम्वा कृतक्रीडं चिन्तयन्त्यः समवेता इति उच्चैः श्रीकृष्णस्य श्रवणार्थं न दुःखं पञ्चभिः सहेतिन्यायात् विरहस्वभावादेव वा कृष्णं परमानन्दघनमूर्त्तिमिति तद्ध्यानेनैव न किल प्राणा निर्गता इति भावः तदागमन एव काङ्क्षितं यासामिति कथञ्चिदप्यत्येच्छा न जाता तदागमनाकाङ्क्षा च निवृत्ता तत्र चागमनशब्देनात्यन्तविरहार्त्या सन्दर्शनमात्रमेवा काङ्क्षितं नत्वन्यदिति भावः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिण्याम्
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततस्तत्रापि स्वैस्तस्यावरोधशङ्कया सर्वमपि तदन्वेषणमार्गं परित्याज्य सर्वासां समेतानामस्माकं निकटमिदं निर्व्यवधानतया दूरप्रसरच्छन्दं तदेव लीलापुलिनं गतानां दैन्योपालम्भादिमयमुच्चैर्गानमाकलय्य स्वयमेव करुणया श्रीकृष्णस्त्वरितमागमिष्यतीति तं भावयमानास्तथा चक्रुरित्याह । पुनरिति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिण्याम्
त्रिंशोऽध्याय ॥ ३० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

काङ्क्षिताः काङ्क्षितायः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किन्तु पूर्वं कृष्णेन यत्र सङ्गताः तदेव कालिन्द्याः पुलिनमागत्य समवेताः समुदिताः कृष्णभावनायुक्ताः कृष्णस्यागमने काङ्क्षा यासां ताः कृष्णमेव जगुः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समवेता एकविषयीकृताः तस्य कृष्णस्यागमनकाङ्क्षिण्यः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तविंशोऽध्यायः ॥ २७ ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कीर्त्तयन्त्यः पुनः पुलिनमागमने हेतुः । कृष्णभावनाः तं तत्र गतं मन्यमानाः । पुनर्दूराच्छून्यतादृष्ट्यैव तदागमनं काङ्क्षितं यासां तादृश्यः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

पुनरिति । पूर्वं श्रीकृष्णेन सह यत्राजग्मुः तदागमनं तदाविर्भावः तत्र काङ्क्षितं काङ्क्षा यासां भावे क्तः समवेताः हृदयेन सम्वादभाजः एकवासनत्वात्कृष्णे भावना यासां तास्तथा कृष्णं जगुः श्रीकृष्णोऽप्यन्तर्हित एवादृष्टः सन् सहैव तिष्ठतीति मन्तव्यम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे
त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तर्हि किं जातमित्याकाङ्क्षायामाह । पुनः पुलिनमागत्येति पूर्वं पुलिने स्थिता यत्र तत्रैव पुनरागताः ननु विवेकरहिताः कथं तत्रागतास्तत्राह । कृष्णभावना इति कृष्ण एव भावना यासां तेन भगवदिच्छया भगवत्प्रेरणया तत्रैव स्थाने भगवान् रतिं करिष्यतीति निश्चित्य तत्स्थानमस्माकं हितकरमिति तत्रैवागताः ततः कस्या वा भाग्यात् स्नेहेन कृपया वा आगच्छेदिति सन्देहात् समवेता जाताः तदा साधनान्तरमलभमानाः कृष्णं सदानन्दं जगुः दोषनिवारणे हरिगुणगानमेव साधनमिति निवृत्ते पुनर्दोषे स्वयमेवायास्यतीति तदागमनकाङ्क्षया जगुः श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणौ समुदायेन भिन्नावागतगर्वाः असाधनाः । हरेर्गानं प्रियं मत्वा जीवनार्थमपि क्रिया ससन्देहात्तु मिलिता जगुर्नानाविधैर्गुणैः ॥ ४४ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मज-
श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे
सप्तविंशाध्यायः विवरणम् ॥ २७ ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हन्त हन्त यत्र तदन्वेषणार्थं यामस्तत स्ततः स पलायिष्यते तस्माद्वनपर्यटनकष्टं किं तस्योत्पादयिष्यामस्तदिच्छां विना स न लभ्यो यमेवैष वृणुते तेन लभ्य इति श्रुतिं प्रमाणीकुर्वत्य इव तद्दर्शने तत्कारुण्यमेव हेतुस्तत्कारुण्ये च तत्सङ्कीर्तनमेव हेतुरिति सिद्धान्तं प्रकाशयन्त्य इव पूर्वं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यत्र तेन सङ्गतिरासीत्तदेव स्थानमाजग्मुस्तमेव जगुरित्याह । पुनरिति ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रिंशोऽध्यायोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ३० ॥

केनाचित् कृता विशुद्धरसदीपिका ।

किमचेष्टन्तेत्यत आह । पुनरिति । पुलिनं प्रेष्ठसंयोगपीठमागत्य कालिन्द्याः निजसख्याः पर्वतसम्बन्धोक्तिः स्थैर्यलाभाय यद्वा कानि सुखानि मिलिन्दे यस्याः, यद्वा कानां सुखानामालिपरम्परां ददातीति तस्याः सर्वथा सुखोपलब्धिसिद्धपीठमिति भावः । ननु कीदृशं समुद्दिश्यागतास्तत्राह । कृष्णभावनाः तदेव तासां सुखं नान्यदितिभावः यद्वा आत्मविस्मरणं दृढीकरोति कृष्णोऽहमिति भावना यासां ताः कृष्णं जगुरित्याश्चर्ये अयं च स्वयमेव तथाविध इतिन्यायेन झटिति सिद्धौ हेतुः समवेताः ऐकमत्येन मिलिता ननु तद्वदेकाकिन्यः कृष्णं स्वचित्ताकर्षकं मूर्त्तिमद्गानं जगुः यद्वा स्पष्टं तन्नामैव जगुः मतुतद्गलकलमित्यर्थः । कुतःतदिति तस्यैकस्यैवा काङ्क्षितं यासामिति तदेकालम्बना इत्यर्थः । ततश्च तदाकृष्टा वयमत्रागतास्तथैवास्माभिराकृष्टः सोऽप्यायास्यतीति भावः ॥ ४४ ॥

इति श्रीभागवत रासपञ्चाध्यायीव्याख्याने
विशुद्धरसदीपिकायां द्वितीयोऽध्यायः ॥ २ ॥
मूलस्य त्रिंशोऽध्यायः ॥ ३० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ततो ध्यानगानसमाधेरुत्थितास्तं प्रेष्ठमपश्यन्त्यस्तद्विरहविक्लवितचित्ता वह्न्वेषणेऽप्यलब्धप्रियवृत्तान्ताः पूर्ववत्कालिन्द्याः पुलिने प्रियकृतवेणुगानाह्वानतत्समागमविहाराद्यनुस्मृत्य तदेव तीर्थपादसङ्गमप्रदं तीर्थराजं श्रुतिगणगिरागिरेशगिरिजागिरिशगीतगुणं मङ्गलमङ्गलं भूभूषणमवधार्य यत्र यदुज्झितं तत्रैव तल्लभ्यते इतिन्यायं चानुसन्धाय पुनः पुलिनमेवागत्य योगिमनसामपि दुरधिगमस्य भगवतोऽन्वेषणादिवैयर्थ्यं व्यवस्य गानप्रियस्य तस्य —

नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥

इत्यादिप्रतिज्ञां विश्वस्य तद्गुणानेव जगुरित्याह । पुनः पुलिनमिति । पुनः कालिन्द्याः पुलिनमागत्येत्यत्र पुनःशब्देन प्रथमं तत्र कृष्णसमागमस्मारकेण तत्पुलिनस्य तत्सङ्गतियोग्यताध्वनिता नरोधयति मां योगो न साङ्ख्यं धर्म उद्धव इत्यादिना साधनान्तराणां तथाऽनवरोधकत्वमभिधाय यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि मामित्यादिना सत्समागमस्यैव तदवरोधकत्वबोधनात्समवेतास्तथाविधिश्चितगानस्यापि तदनवरोधकत्वात्कृष्णभावनाः कृष्णमेव भावयन्तीति तथा तस्य कृष्णस्यैवागमनं काङ्क्षितं यासां ताः कृष्णमेव नित्यानन्दस्वरूपं स्वमनःकर्षकञ्च जगुः यद्वा यतः कृष्णभावना अतो भावनया कृष्णं समवेता एव बहिःप्राकट्याभावात्तदागमनकाङ्क्षिताः कृष्णमेव जगुः यद्वा यतस्तदागमनकाङ्क्षिताः अतः कृष्णस्यापि सर्वमनःकर्षकस्य भावना मनोरोचिका यथा भवेयुस्तथा समवेता मधुरमिलितस्वरा जगुः यद्वा यतः कृष्णभावनास्तद्ध्यानान्विताास्तन्मनोरोचिकाश्चातः क्वचिद्भावनाप्रादुर्भूतेन क्वचिदन्तर्हितेनैव तद्गानहृतचित्तेन तद्गानतानवितानतालापानुसृतललितनृत्यगतिमताः कृष्णेन समवेता एव गायन्त्योऽपि तद्विरहविभ्रमेण ध्यानलयेनैव तं पश्यामो न साक्षादिति भ्रमितचित्तास्तदागमनकाङ्क्षिता जगुः ॥ ४४ ॥

श्रीश्रीशौ राधिकाकृष्णौ सखीः स्वीयान् गुरून् द्विजान् ।
गिरां दुर्णिढ विदो भक्तान् वन्दे विश्वं हरेर्वपुः ॥

इतिश्री चन्द्रभागाख्य विष्णुसख्यापन्न श्रीरामनारायणविरचितायां ।
श्रीमद्भागवतमहापुराणदशमस्कन्धान्तर्गत
श्रीरासपञ्चाध्यायीव्याख्यायां भावभाव-
विभाविकायां द्वितीयाध्यायव्याख्या समाप्ता ॥ २ ॥
मूलेत्रिंशः ॥३०॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

पुनर्विरहव्याकुलचित्ताः परस्परं विचारयामासुः अहो कुत्र गत्वा तदन्वेषणं विधेयमिति कयाचिदुक्ते अहो अन्वेषणं प्रियस्य क्लेशमात्रावहं समीपमागता अस्मानालक्ष्य पलायनपरस्य मिलना भावादित्यन्याभिहितम् अहो अहो सत्यं तस्य करुणां विना तत्प्राप्तिर्दुर्घटातस्तदुपायस्तूपायो विधेय इत्यपराभिः कथनं सर्वा विचार्य तत्कीर्तनमेव सदुपायं निश्चित्य तदर्थं पुनः कालिन्द्याः पुलिनमागता इत्याह । पुनरिति यत्र प्रेष्ठेन पूर्वं सङ्गतिरासीत्तदेव कालिन्द्याः पुलिनं स्वसुखहेतुभूतं प्रसरच्छन्दं यत्र वस्तु लभ्यते तत्रैवान्विष्यत इत्याशयेनागत्य कृष्णभावनाः प्रेष्ठमेव भावयन्ति ध्यायन्तीति तथा तस्य श्रीकृष्णस्यागमनं काङ्क्षितं यासां ताः समवेताः मिलिताः सत्यः कृष्णमेव जगुरूर्ध्वं गानं चक्रुः विरहजनकदोषनिवृत्त्यर्थं तस्य करुणोत्पत्त्यर्थञ्चोच्चैर्गानं तदर्थञ्च समवेतत्वं कस्याः भाग्यात्स्नेहेन कृपया वागच्छेदित्याशयेन वा समवेताः अन्यां काञ्चिदादाय पुनः पलायनं न कुर्य्यादित्याशयेन वा निवृत्तिपक्षे पुनः पुन मायालक्षणायाः कालिन्द्याः पुलिने शुद्धान्तःकरणे आगत्य सदानन्दस्वरूपे परमात्मन्यभिप्रायवत्वाः गतिसामान्यादिति न्यायेनैकार्यबोधकत्वेन मिलिताः तस्यागमने साक्षादेव गति माकाङ्क्षितं यासां ताः कृष्णमेव जगुः ॥ ४४॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपाद
शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र
सूरिकृतायां भागवतगूढार्थदीपिकायां
दशमस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कुत्र तस्थुरित्याकाङ्क्षायामाह । पुनः पुलिनमिति । यत्र पूर्वं श्रीकृष्णेन सङ्गतिरासीत्तदेव कालिन्द्याः पुलिनमागत्य कृष्णं

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भावयन्ति प्रार्थयन्तीति कृष्णभावनाः कृष्णागमनं काङ्क्षितं वाञ्छितं यासां ताः समेताः कृष्णं जगुः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे।
त्रिंशाध्यायार्थप्रकाशः ॥ ३० ॥

भाषा टीका।

फिर श्रीकृष्ण की भावना करती हुई उसी कालिन्दी के पुलिन में, पहुंच कर सब इकट्ठी होकर श्रीकृष्ण भगवान् के आय वे कि आशा ते कृष्ण को गान करत भई ॥ ४४ ॥

इति श्री भागवत दशमस्कन्ध तीस में अध्याय
की भाषा टीका समाप्त ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥

॥ एकत्रिंशोऽध्यायः ॥

गोप्य ऊचुः ॥

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ॥
दयित ! दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः ।
कृष्णमेवानुगायन्त्यः प्रार्थयन्ते तदागमम् ॥

जयतीति । हे दयित ! ते जन्मना व्रजोऽधिकं यथा भवति तथा जयत्युत्कर्षेण वर्त्तते यस्मात्त्वमत्र जातस्तस्मादिन्दिरा लक्ष्मीरत्र हि श्रयते व्रजमलङ्कृत्य वर्त्तते एवं व्रजे सर्वस्मिन्मोदमानेऽत्र तु तावकास्त्वदीया गोपीजनास्त्वयि त्वदर्थमेव कथंचिद्धृता असवो यैस्ते त्वां विचिन्वते मृगयन्तेऽतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति यद्वा अस्माभिर्भवान् दृश्यतां यद्वा एवं त्वया दृश्यतामेते विचिन्वत इति ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कृष्णैकगम्यो वागर्थो यासां लेखितुमिष्यते ।
ज्ञात्वापराधं देव्यस्ता भक्तिं तन्वन्तु मे निजाम् ॥
पीतश्रीगोपिकागीतसुधासारमहात्मनाम् ।
श्रीधरस्वामिनां किञ्चिदुच्छिष्टमुपचीयते ॥

अधिकं पूर्वतः सर्वतो वा श्रीवैकुण्ठादपि वा व्रजेन तत्रत्या लक्ष्यन्ते हि यतः अत्र व्रजे शश्वन्निरन्तरं यद्वा आधिकमित्यस्यात्राप्यन्वयः प्रति मुहुराधिक्येनेत्यर्थः । मूर्त्तिमती लक्ष्मीरिव उत्तरोत्तरं वर्द्धमाना परमोत्तमा सम्पूर्णा सर्वसम्पत् श्रयते अनपेक्ष्यमाणापि स्वयमेव श्रयते यद्वा वैकुण्ठेश्वर्य्यपि सा शरणागतभावेन किम्वा सङ्कोचतो निरन्तरावस्थित्यशक्त्या मुहुरायाततया तैर्वसति सदाभिनववैकुण्ठाद्याधिकसम्पत्तेः किंवा प्रतिगृहं भ्रमन्त्याः परमविनयनम्राया लक्ष्म्या एव साक्षाद्दर्शनात् हीति निश्चये वा तथाचोक्तं नतः प्रभृतिनन्दस्येत्यादि मधुपुर्य्यामपि जन्मना व्रजस्यैवोत्कर्षसिद्धेः किम्वा व्रज एव तज्जन्मनिश्चयाज्जन्मना व्रज इत्युक्तम् एवन्तत्प्रभावेणात्रत्यानां सर्वेषामेव सर्वमङ्गलं जातं केवलं दैवहतानामस्माकमेव सदा दुःखं तत्राप्याधिक्यमिदं सर्वज्ञेन परमदयालुनाऽस्मत्प्राणवल्लभेनापि त्वया तन्न ज्ञायते इति तदधुना अन्यत्तावदस्तु तन्मात्रमपि ज्ञायतामिति प्रार्थयन्ते तत्दयितेति दृश्यतां ज्ञायतां किम्वा साक्षात् क्रियतां तस्य प्रत्यक्षत्वात् दुःखदर्शने सति परदुःखकातरोऽवश्यं साक्षाद्भवेदिति भावः किन्तदाहुः दिक्ष्विति अनेन बहुलपरिभ्रमणादिदुःखं सूचितं तावकाः त्वया स्वीकृताः त्वदीयताभिमानवन्तो वा अत एव विचिन्वते अन्वेषणेन बहुदुःखमनुभवन्तीत्यर्थः । अतस्तावकत्वेनैवैतत् दुःखमन्यथा तदनुत्पत्तिरितिभावः । कथमिति गोपीजना वेति साक्षादनुक्तिः परित्यागेन हताभिमानतया परमदैन्येन तथोक्तावप्यशक्तेः किम्वा निजार्त्तिभरेण सर्वेषामपि तदीयानां दुःखनिवेदनेच्छया सामान्येनैवोक्तेः किंवा सामान्योक्तौ यथार्थगाम्भीर्य्योपपत्तेरिति दिक् एवमग्रे अपश्यतामित्यादावपि ननु निर्बुद्धयस्तर्हि कस्यचिदन्यस्य भवत तत्राहुः । दयितेति त्वदेकप्रियेभ्यो जनेभ्यः कथञ्चिदप्यन्यसम्बन्धमात्रमपि न रोचते इत्यर्थः—

ननु कइअवरहिअम्पेम्मणहि होइमाणुषे लोए ।
जइ होइ कस्सविरहो विरहेहो तम्मि कोजि अइ ॥

इत्यादिना येन दयितस्य विरहे दयिता न जीवेयुर्नाम सत्यं त्वत्तएव न म्रियन्त इत्याहुः । त्वयि निमित्ते धृतासवः त्वत्प्राप्त्याशया जीवन्तीत्यर्थः । यद्वा त्वयि विषये त्वन्न्यस्तत्वेन प्राणा न नश्यन्तीत्यर्थः एषु श्लोकेषु गीते मात्रापदवर्णादिसाम्यापेक्षया प्रतिपादं द्वितीयाक्षरस्यैवाधिक्यं तथा दलद्वये कुत्रचिदन्यत्रापि कचित् प्रथमाक्षरषष्ठाक्षरयोश्च कुत्रापि कथञ्चिद्विचार्य्यं तच्च श्रीमुक्ताफलटीकाकारैर्विवृतमेवास्ति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णैकगम्यो वागर्थो यासां लेखितुमिष्यते । ता एव करुणामय्यः स्वीकुर्वन्तु मदाग्रहम् । पीतश्रीगोपिकागीतसुधासारसभियाम् । श्रीधरस्वामिनां किञ्चिदवशिष्टं विचीयते । अधिकं सर्वतः । व्रजे न तत्र तत्र ह्यालक्ष्यन्ते । हि यतः । अत्र व्रजे । शश्वत् निरन्तरम् । यद्वा । अधिकमित्यस्यात्राप्यन्वयः । प्रतिमुहुराधिक्येनेत्यर्थः । इन्दिरेति सम्पत्तदधिष्ठात्र्योरभेदेन निर्देशः । तदधिष्ठानेनैव तद्वृद्धेः एवं तत्प्रभावेणात्रत्यानां सर्वेषामेव सर्वमङ्गलं जातम् । केवलं दैवहतानामस्माकमेव सदा दुःखं तत्राप्याधिक्यमिदम् । सर्वज्ञेन परमदयालुनास्मत्प्राणवल्लभेनापि त्वया न ज्ञायत इति । तदधुनान्यत्तावदस्तु तन्मात्रमपि ज्ञायतामिति व्यञ्जयितुं प्रार्थयन्ते दयितेति । दृश्यतां ज्ञायतां दुःखदर्शने सति परदुःखकातरोऽवश्यं साक्षाद्भवेदिति तु निगू-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ह्रोऽभिप्रायः । किं तदुःखं तदाहुर्दिक्ष्विति अनेन बहुलपरिश्रमादिकं परिभ्रमणञ्च सूचितम् । तावकास्त्वया स्वीकृतास्तदीयताभिमानवन्तो वा अत एव विचिन्वते अन्वेषणेन बहुदुःखमनुभवन्तीत्यर्थः । अतस्तावकत्वेनैवैतद्दुःखम् । अन्यथा तदनुत्पत्तिरिति भावः । तत्र दयितेत्यनुकम्पां जनयन्ति दयतेऽनुकम्पते इति निरुक्त्या दैन्यात् दयते चित्तमादत्ते दयित इति क्षीरस्वामिनिरुक्त्यनुसारेण तु किञ्चिदुपालभ्भतोऽपि तामेव । ननु । कै अव रहिअं पेम्मं णहु चिठ माणवे लोए । जहे होइ कस्स विरहो विरहे होन्तम्मि को जिअइ । कैतवरहितं प्रेम न तिष्ठति मानुषे लोके । यदि भवति कस्य विरहो विरहे भवति को जीवति । इति न्यायेन दयितस्य विरहे दयिता न जीवेयुर्नाम । सत्यं त्वत्त एव न म्रियन्ते इत्याहुस्त्वयि निमित्ते धृतासवः त्वत्प्राप्त्याशया जीवन्तीत्यर्थः । यद्वा । त्वयि विषये असवः प्राणा इन्द्रियाणीति यावत् । त्वन्मयत्वेन पश्यन्तीत्यर्थः । एषु श्लोकेषु पदवर्णादिसाम्यापेक्षया प्रायः प्रतिपादं द्वितीयाक्षरस्यैक्यम् । तथा दलद्वये कुत्रचिदन्यत्रापि क्वचित् प्रथमाक्षरस्यसप्तमाक्षरयोश्चेति कुत्रापि कथञ्चिद्विचार्यम् । तच्च मुक्ताफलटीकायां विवृतमस्ति तत्र दृश्यतामित्यत्र तेषां प्रथमार्थः । पञ्चविंशतितिविकल्पनावद्दृशोरपि प्रकाशप्रकाशनार्थत्वात् समर्थनीयः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

जयति प्रकृष्टो भवति इन्दिरा गतिः समृद्धिः अत्र व्रजे ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तद्गुणानेव गायन्त्यः कृष्णं जगुरिति चोक्तं तदेव गानं प्रपञ्चयत्येकविंशत्या जयतीति । व्रजस्ते तव जन्मना हेतुना नितरां जयति उत्कर्षं प्राप्नोति किञ्च तव जन्मना इन्दिरा लक्ष्मीरपि नित्यमत्र वसते व्रजमलं कुर्वती अस्माभिरलक्ष्यमाणाचाश्रयतइत्यर्थः यद्वा ते अत्र व्रजे श्रयते त्वामिति शेषः नित्यानपायित्वादिति भावः इन्दिरा महती समृद्धिर्वा एवं सर्वस्मिन् व्रजे मोदमाने तत्र त्वदीया वयन्तु त्वयि निमित्ते त्वदर्थमेवेत्यर्थः । कथञ्चिद्धृता असवः प्राणा याभिस्तथा भूतास्त्वामेव मृगयन्ते अतस्त्वया दृश्यताम् अत्र कुत्रचाहुल्यात्प्रतिश्लोकमवतारणग्रन्थव्या तत्र यथा सम्भवं पूर्वोत्तर वचसा सगतिरूह्यते दृश्यतां प्रत्यक्षीभूयतामस्माकमितिशेषः॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

वेदान्ताद्यधिकारिणां मुमुक्षुविविदिषूणां समर्थानां हरेः सङ्कीर्तनमेव तदुपासनं स्यात्तत्प्रसादजनकत्वेनेत्यतः स्त्रीभूतानां गोपीनामुपासनाप्रकारं निरूपयत्यस्मिन्नध्याये । तत्र गोप्यः चित्ते संनिहितत्वात्सम्बोध्यागायन् । जयतीति । कृष्णेत्यध्याहार्यं हे कृष्ण ! व्रजन्ति यस्मिन्निवासलोपा इति गोपनिवासस्थानं व्रजः अयन्ते तव जन्मना अधिकं जयति सर्वोत्कर्षेण वर्तते तत्र हेत्वन्तरं चाहुः । श्रयत इति । तत्र व्रजे "इदि परमैश्वर्ये" इति धातुः । इन्दिमैश्वर्यं राति ददातीति नित्यैश्वर्यरूपत्वादिन्दिरा श्रीः साऽधुना श्रयते आश्रयते हि यस्मात्तस्मादित्यर्थः तव जन्मनिमित्तं श्रियः श्रयणं च त्वयाऽविनाभूतत्वाच्छिद्य इति भावः । स्वाभिप्रायं दर्शयन्ति । दयितेति हे प्रेष्ठ ! भवान् स्वात्मनैव त्वां दिदृक्षतां द्रष्टुकामानां त्वयि गतासवः समर्पित प्राणाः त्वां त्वां विचिन्वते साकाङ्क्षत्वाद्दर्शनदानं युक्तमित्यर्थः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वृषेति वृषमयात्मजात् वत्सासुरात् मयात्मजाद्व्योमासुराच्चेत्यर्थः ॥ १—२ ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ भगवद्गानं सर्वोत्कर्षयुक्तं भवतीति सर्वोत्कर्षवाचिना जयतिशब्देन तदारम्भः कर्तुयोग्य इति तथैवाहुः । जयतीत्यादि । तव जन्मना प्रादुर्भावेण व्रजः अधिकं जयति भूवैकुण्ठत्वात् जयत्येव सम्प्रति तत्प्रादुर्भावेण अधिकं जयति भौमाभौमवैकुण्ठत्वात् तत्र हेतुः इन्दिरा लक्ष्मीः शश्वदेव अत्र हि अत्रैव श्रयते अत्रैव तिष्ठतीत्यर्थः अतो व्रजस्य सर्वोत्कर्षे सति व्रजस्थाना मस्माकमेतादृशं दौस्थ्यमनुचितन्तदस्य खण्डनार्थं त्वद्दर्शनं प्रार्थयाम इत्याहुः । दयितेत्यादि । हे दयित ! तावका जना अस्माभिः अस्मदादयः प्रपास्त्वां दृश्यतां विचिन्वते तव दर्शनं प्रार्थयन्त इत्यर्थः वृक्षमवचिनोति फलमिति कचिन्नो क्षिकर्मकत्वात् त्वं दृश्यो भवेत्याशयः त्वद्दर्शनमेव काङ्क्षितम् अन्यथा व्रजोऽधिकं जयतिशब्दने नेयां इन्दिरा श्रयते इति च यतः तत्किं तेनास्माकंकृतार्थता नेति वाक्यार्थः ॥ १ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अष्टविंशे हरेर्गानं स्वभावादपराधतः ।
कृतावज्ञा गोपिका हि स्तोत्रं चक्रुरितीर्यते ॥
एकोनविंशतिविधा गोप्यः स्वस्याधिकारतः ।
एकोनविंशतिविधां स्तुतिं चक्रुर्हरेः प्रियाम् ॥
राजसी तामसी चैव सात्विकी निर्गुणा तथा ।
एवं च तुर्विधा गोप्यः पतिमत्यो निरूपिताः ॥
तथैवानन्यपूर्वाश्च प्रार्थनामाहुरुत्तमाम् ।
गुणातीताः सात्विकीश्च तामसी राजसी तथा ॥
कृष्णभावन या सिद्धा विशेषेणाह ताः शुकः ।
अनन्य पूर्विका एव पुनस्तत्र मुदा जगुः ॥
सात्विकी तामसी चैव राजसी चेति विश्रुताः ।
सर्वाश्च ततस्तिस्रः तामसी राजसी परा ॥
पुनस्ता एव त्रिविधा अटतीत्यादिभिस्त्रिभिः ।
राजसी तामसी चैव सात्विकीति विभेदतः ॥
अनन्यपूर्वा द्विविधा राजसी सात्विकी तथा ।
तमसा तामसी तत्र नास्तीत्येकोनविंशतिः ॥
अथवा प्रार्थनाद्या या ससेति द्विविधाः पुनः ।
चतुर्थ्यस्तु समास्तत्र इत एकोनविंशतिः ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तत्तद्वाक्यानुसारेण नासां भावो निरूप्यते ।
अन्यथानेकता स्तोत्रे प्रकारैर्नोपयुज्यते ॥

तत्र प्रथमं राजस्यः काश्चन गोप्य आहुः । जयतीति । मङ्गलार्थोऽत्र जयशब्दः यथा फलं साधयेत् स्तोत्रं तथा निर्विघ्नार्थः अन्यथा क्रियामादौ न प्रयुञ्ज्यात् त्वदवतारेण व्रजः सर्वोऽपि कृतार्थः वयमेव परमकृतार्थाः एवेति यथा वयमपि कृतार्था भवामः तथा यत्नः कर्तव्य इति वक्तुं व्रजस्य तवावतारेण सर्वोत्कर्षो जात इत्याहुः । ते जन्मना व्रज आधिकं जयतीति सर्वोत्कर्षेण स्थितिर्जयः अधिकजयो वैकुण्ठादप्युत्कर्षः नहि वैकुण्ठे भगवानेवं लीलां करोति यद्यपि मथुरायां जन्म जातं तथापि तेन जन्मना न मथुरा सर्वोत्कर्षेण स्थिता किंतु व्रज एव ननु भगवज्जन्मनः सर्वोत्कर्षहेतुत्वं न लोके प्रसिद्धमनन्यत्वेनैकत्वात् अतस्तादृश उत्कर्षहेतुर्वक्तव्यः यो लोके प्रसिद्ध इतिचेत्तत्राह । श्रयत इन्दिरा शश्वदत्रहीति । अत्र व्रजे इन्दिरा सर्वदा श्रयते हीनभावेनाश्रयं कुरुते वैकुण्ठे तु सैव नियता आर्येति न तस्याः सर्वदाश्रयणं कर्तव्यं भवति इह तु तादृश्यो वयमनेका इति तस्याः स्वास्थ्याभावात् कदा वा ममावसरो भविष्यतीति निरन्तरं सेवते अतो लक्ष्मीस्थित्या लोका उत्कर्षं मन्यन्ते सा पुनर्लक्ष्मीः गोकुलाश्रया जाता हि युक्तश्चायमर्थः पतिव्रता हि सा यत्र पतिः स्वयमन्याधीनतया तिष्ठति भक्तेषु कृपा स्थापयितुं तदुक्तमुलूखलप्रकरणे तत्र तद्भार्यासुतरामेवाश्रयत इति किमाश्चर्यं तव जन्मना व्रजस्य सर्वोत्कर्षः सर्वजनीनः अतस्तव रमणे न कापि न्यूनता न वा लक्ष्म्या मनसि विषादः अङ्गीकृतत्वात् अतः कारणादस्मदर्थमेवागतेन त्वया दृश्यतामिदं गोकुलमेकदा द्रष्टव्यं वा क्यार्थो वा कर्म अग्रे वक्ष्यमाणः तावत्कालं त्वयि धृतासवः दिक्षु त्वां विचिन्वत इति दृश्यताम् एतादृशोऽर्थोऽनुचित इति अनुचितप्रदर्शनेन बोधयन्ति लोके हि ब्रह्मादयः स्वयमवतीर्णो वर्तस इति निश्चित्य समायान्ति अजेश्याः पुनरस्मदादयः दिक्षु विचिन्वन्ति इतीयं महत्यनौचिती ननु व्रजस्थानां भक्तिर्नास्ति अन्यथा विरहे म्रियेरन् अतः अभक्ता न पश्यन्तीति युक्तमितिचेत्तत्राहुः । त्वयि धृतासव इति त्वदर्थमेव धृता असवः प्राणायैः यदैव त्वदनुपयोगं ज्ञास्यन्ति तदैव त्यक्ष्यन्तीति भावः अत एव त्वां विचिन्वते प्राणा नाश्वासयितुमल्पविलम्बेऽपि प्राणा गमिष्यन्तीति अन्यथा व्रजे गच्छेयुः प्रातस्त्वमेवायास्यतीति अन्वेषणं व्यर्थमेव स्यात् दिक्षु त्वदीयाः त्वयि सतीति महद्दैन्यम् अतः एकवारं त्वदीयाः पश्येति प्रार्थना एवमेकया दर्शनं प्रार्थितं दयितेति सम्बोधनात्त्वदर्शने स्त्रीणां जीवनं न युक्तमिति निरूपितं यद्यपि भगवांश्चेत्पश्येत्तदा न कोऽपि पुरुषार्थः सिद्ध्येत तथापि दैन्यं दृष्ट्वा आत्मानमपि प्रदर्शयेदिति तथा प्रार्थना एवं स्वदैन्यानौचित्यादिनिरूपणेन तस्या राजसत्वं निरूपितम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकत्रिंशे प्रेममधुस्वरवाल्लादिसौरभा ।
गोपीगीताम्बुजश्रेणी कृष्णाल्याकर्षिणी बभौ ॥

सनातनेभ्यः स्वामिभ्यः श्रीगुरुभ्यो नमो नमः ।
यदुच्छिष्टैकजीवातुश्चेष्टे सम्प्रति शं प्रति ॥

पूर्वं जगुरित्युक्तं तदेव किमित्यत आह । गोप्य ऊचुरिति ।

हे दयित ! ते जन्मना व्रजो जयति सम्बन्धिविशेषात्तस्य सर्वस्य एव लोकेभ्य उत्कर्षेण वर्तत इत्यर्थः । वैकुण्ठलोकेऽपीदृश इति तद्व्यावृत्त्यर्थमाहुः । अधिकं यथा स्यात्तथेति वैकुण्ठः सर्वोत्कृष्ट एव । व्रजस्तु सर्वोत्कृष्टतम इत्यर्थः । तल्लिङ्गान्तरमप्याहुः इन्दिरा महालक्ष्मीः शश्वत् श्रयते सेवते "श्रिञ् सेवायाम्" वैकुण्ठे तु सा एव सेव्यत इत्यतो वैकुण्ठादपि व्रजः सर्वसमृद्धिपूर्ण इति भावः । एवं तद्धेतुकमहासुखपरिपूर्णे व्रजे त्वत्प्रेयस्यो वयमेव सर्वलोकादृष्टश्रुतचरपरमासह्यदुःखं यदनुभवामस्ततस्तत्त्राणं त्वां न प्रार्थयामहे किन्त्वेकवारं दृष्ट्वा स्वनयने सफलयेत्याहुः । अत्र वृन्दावने । हि निश्चितमेव । दृश्यतां किं द्रष्टव्यं तावका जनास्त्वां विचिन्वते इति कथमेतावत् सन्तापवत्योऽप्येतावन्निपद्यन्तु इति मा संशयिष्ठा इत्याहुः । त्वयि धृता अर्पिताः असवो यैस्त्वय्येवोन्मादितैस्ते यद्यस्माकमसव अस्मास्वेवास्थास्यंस्तदा तेषु विरहानलदग्धेषु सत्सु वयमेतावत् क्षणे मृत्वा सुखिन्य एवाभविष्यामेति । त्वयि तु स्वनाथे महासुखिनि ते सुखमेवानुवर्त्तन्ते इति कथमसूनां सुखे सति देहा विपद्यन्तामित्यतस्तुवास्मद्दुःखदर्शनात्मकं सुखं शाश्वतिकमेवेति भावः । अत्र श्लोके प्रतिपादं द्वितीयाक्षरस्यैक्यं तथा प्रथमाक्षरसप्तमाक्षरयोश्च । एवमन्येष्वपि श्लोकेषु प्रायः क्वचित् क्वचिदस्ति तच्च मुक्ताफलटीकाकारैर्विवृतम् ॥ १ ॥

केनचित्कृता विशुद्धरसदीपिका ।

गीतमेवाह-गोप्य ऊचुरित्यारभ्य यावदध्यायम् । अत्र यद्यपि सर्वासामेव गानं सम्भवति तथापि समवेता इत्युक्तेः समानभावापन्नानामेव तज्ज्ञेयं नित्यसम्बन्धत्वात्समवायस्य तच्च यथास्थानं दर्शयिष्यामः । जयतीति । हे दयित ! परमदयालो ! अस्मत्प्राणनाथेति वा एवंचेदं प्रेयसीभावानां कन्यानां च गानमिति रुचिरं ते जन्मना व्रजः आधिकं सर्वतो जयति "वृन्दावनं सखि भुवो वितनोति कीर्तिं" मिति व्रजे तदाश्रितो जनसमूहो लक्ष्यते तत्र वयं किमिति दुःखिताः इति भावः । तथाहीन्दिरा सर्वसम्पदधिष्ठात्री शश्वन्निरन्तरमत्र श्रयते आश्रयते हि निश्चितं तत आरभ्य तत्स्थो व्रजः सर्वसमृद्धिमानिति जनश्रुतेरेवमुक्तं ततः किमस्मास्वेव विपदिति भावः । हहो ज्ञातं नास्मास्वन्यः कश्चिद्दोषः परं तावका इति निर्वेदोक्तिः कुत एतत् यतः त्वयि निमित्ते धृतासव इति तदपि कुतः त्वां विचिन्वत इति दृश्यतां त्वयेति शेषः प्रत्यक्षीभूयतामित्यर्थः । यद्वा अधिकतरमिदमेव दुःखं सर्वज्ञेन परमदयालुना अस्मत्प्राणनाथेनापि त्वया न ज्ञायत इति तदिदानीं तावन्मात्रन्तु ज्ञायतामिति व्यञ्जयितुं प्रार्थयन्ते । दयितेति । दृश्यतां ज्ञायतामित्यर्थः । "दृग्ज्ञाने ज्ञातरि त्रिषु" इत्यमरः ततश्च परदुःखदर्शनकातरोऽस्मासु दययेदिति गूढोऽभिप्रायः यद्वा अस्माभिर्भवान् दृश्यतां किंवा त्वयि धृता असवो याभिस्ताः विगतासवोऽपि त्वां विचिन्वत इत्याश्चर्य्यं त्वया दृश्यतां कौतुकित्वादायास्यतस्ति-

केन चित्कृता विशुद्धरसदीपिका ।

परेशोक्तिः । यद्वा ननु यदि मामकास्तर्हि मां विना कथं जीवथ तत्राहुः । त्वयीति । त्वयि विषये धृताः प्राणा इन्द्रियाणि यासां ताः एवं च यद्यसवोऽस्मासु भवेयुस्तर्हि न जीवेम त्वयि न्यस्तत्वात्तेन न नश्यन्तीति भावः । यद्वा त्वयि निमित्ते धृतासवः अस्मद्विरहे तवापि वैमनस्यं स्यादेव दयितत्वात्तन्माभूदित्येतदर्थं जीवाम इति भावः । एवं हि चकोरीणां चन्द्रत्वमेववास्मादिन्द्रियाणां जीवातु भेव अन्यथा निषेव्यसरितां पत्युस्तटीः पक्षिगणाश्चिरं यतिपवन्ति सरस्तीयं सैव लज्जामहोदधेरित्यभियुक्तोक्त्या तवैवापत्रपा स्यादिति तथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायात्त्वत्पाळिताशालतोच्छेदेनानुचितत्वमपि स्यादिति भावः । वयं तु त्वेदकजीवना अनन्यगतिका एवेति यद्वा—

विरहात्त्यग्निभीतोऽयं मृत्युश्येनो विमुञ्चति ।
प्राणपक्षिणमेतद्धि निश्चेनव्यं दयानिधे ! ॥

इति संक्षेपः । एतेषु च गीतेषु पदवर्णादिसाम्यापेक्षया प्रायः प्रतिपादं द्वितीयाक्षरस्यैक्यं तथा दलद्वये कुत्रचिदन्यत्रापि क्वचिच्च प्रथमसप्तमाक्षरयोरिति चित्रत्वमपि ततश्च सकळचातुर्य्यचर्चितरसज्ञासमज्ञायां स्वगुणैर्नैपुण्यमारोपयन्ती वाग्देवी नित्यदा ज्ञाताऽज्ञातापि परिचरतीत्येव गम्यते ॥ १ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

श्रियं हरिं गुरून् विप्रान्विदो भक्तान् गिरामजम् ।
ढुण्ढिं शिवां शिवं वन्दे विश्वं तत्तदात्मकम् ॥
वन्दे राधां सखीरिच्छंस्तत्कृच्छ्रष्टां हरेरितम् ।
कृष्णैकवश्यतद्गीतभावार्थस्य च सन्मतिम् ॥

पञ्चाध्याय्यां तृतीयेऽस्मिन् प्रेमभावसमन्वितम् वर्णितं गोपिकागीतं कृष्णाविर्भावकं शुभं, तद्गीतमेवाह । श्रीगोप्य इति । पूर्वं पुनः पुळिनमागात्येत्युक्त्या धामसमाहात्म्येन प्रियप्राप्तिमिच्छन्त्यो गीतारम्भे भगवद्गुणान् वर्णयन्त्यस्तत्सम्बन्धेनैव धाम स्तुवन्ति जयतीति । जयतिशब्दोऽत्र मङ्गलाय विनियुक्तोऽपि वाक्यार्थान्वयी मङ्गलार्थत्वाभावे क्रियापदस्यादौ निवेशो न स्वारस्यं लभेत यथाधुनिकव्रजवासिनो भगवत्प्राप्त्यै प्रदक्षिणादि कुर्वन्ति तथा साक्षाद्भगवत्प्रेप्सा गोप्योऽपि तदाविर्भावाय व्रजं स्तुवन्तीत्यद्भुतो व्रजमहिमेति भावः । अन्यत्राचार्य्यत्वकामैस्तत्तद्ग्रन्थकारैस्तत्तद्ग्रन्थारम्भे तत्तत्समाप्तिविख्यातिमुद्दिश्य मङ्गलप्रयोगदर्शनात्तदेव फलमत्र गोपीनां तथोद्देशाभावात्तद्गीतप्रार्थ्यभगवदभिव्यक्तिमुद्दिश्यैव पदप्रयोगात्सैव फलं तथावैतद्गीतस्प्रेमभावनयानित्यमनुसन्दधतां गोपीनामिव भगवदभिव्यक्तिरावश्यकीति रहस्यं यद्यपि सदैव व्रजो जयति तव नित्यविहारास्पदत्वात्सर्वोत्कर्षेण वर्तते तत्र वैकुण्ठादीनां नित्यविहारास्पदत्वात्सर्वोत्कर्षेऽप्यैश्वर्य्यमिश्रमाधुर्य्यास्पदत्वादसंकुचितस्नेहचेष्टासम्पत्तिपत्तेरत्र तु माधुर्यैकप्राधान्येन तदसङ्कोचमभिप्रेत्य सर्वोत्कर्षमतिः तथापि नित्यविहाराभिज्ञानामेव तज्ज्ञानं नान्येषां तव जन्मना तु अधिकं बहुतमं जयति तत्र व्रजस्य स्वत एवानन्दघनत्वात्तदुत्कर्षस्यात्मार्थत्वासंभवेन

सर्वलोकहितार्थत्वासम्भवेन सर्वलोकहितार्थतया परस्मैपदधातु प्रयोगः पूर्वस्मादुत्कर्षाधिक्यान्तरद्योतनाय आहुः । श्रयत इति पूर्वन्तु नित्यविहारास्पदत्वेऽपि अत्रत्यक्लृप्तशक्तीनामत्र त्वयाविहारो वैकुण्ठादिशक्तीनान्तु तत्र तत्रैव तव जन्मना तु वैकुण्ठेश्वरी सर्वसंपदैश्वर्य्याद्यधिष्ठात्री इन्दिराप्यत्रैव श्रयते ननु कदाचित्कीदृशी व्रजश्रीरिति परीक्षितुमाश्रिता भविष्यति तत्राहुः शश्वदिति वैकुण्ठात्प्राणेश्वरस्य तवेहावतारे तत्र मनोऽवलम्बाभावादत्रैव निरन्तरम् श्रयते ननु मम आगमने मत्प्रसादाय व्रजं शोभयितुं श्रिता भविष्यतीतिचेन्न श्रयत इत्यात्मनेपदप्रयोगाच्छ्रयणफलस्यात्मगामित्वप्रतीतेर्व्रजसम्बन्धेनात्मसौभाग्यातिशयायैव श्रयणं ननु तच्छोभार्थं युक्तचैतद्यदा भवांस्तत्स्वामी सच्चिदानन्दघन ईश्वरोऽपि व्रजे विचित्रवात्सल्यशृङ्गारादिरसप्रादुर्भावेन जनोपकाराय श्रयते तदापतिव्रतायास्तस्यास्तदाश्रयणमिन्दिरेत्युपलक्षणं तथा चेन्दिराया ईश्वर्य्या आश्रयणे कैमुत्यन्यायेन सर्वा अपि सर्वगुणाधिष्ठात्र्यो देवतास्तत्तद्गुणैः सह व्रजमेव श्रयन्ते नैतच्चित्रत्—

यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते—
सुरा इति ।

वाक्येनाकिञ्चनाया आल्पाया भक्तेः सद्भावे सर्वगुणैः सहतदधिष्ठातृसुरावासबोधकेन व्रजे भक्तसमूहास्पदे नित्यविहारस्थले तत्रापि तव सर्वजनगोचरत्वेनप्रादुर्भावे किमुवाच्यं तदवस्थानस्य अत एवाधिकसमधिसन्ततः कं सुखं यथा स्यात्तथा जयति यद्वा कं शिरोऽधिकृत्य सर्वधामशिरोऽलंतस्तया जयति एवं सर्वस्मिन् स्वत एव त्वज्जन्मना चानन्दसंप्लवनिमग्ने व्रजवासिनीनां त्वदीनां नो दुःखं नोचितमित्याशयेनाहुः दयितेति हे प्रियनाद्धिप्रियस्य प्रियाणां दुःखप्रदातुमुचितं तथा दयते नुकम्पते इति तस्य संबोधनं तथाचानद्यनुकम्पयापरदुःखकातराणां दीनबन्धुर्य्ये युक्तमितिसंबोधनाभिप्रायः स्वस्वभावमनुसृत्य तावका दिक्षु त्वां विचिन्वत इति दृश्यतां त्वया ज्ञायतां ज्ञात्वा कृपापारवश्ये स्वयमेव प्रादुर्भविष्यति करुणानिधिरितिभावः यद्वा दृश्यतां त्वया प्रत्यक्षीभूयत ननु सर्वे मदीया इति को भवतीनां विशेष इतिचेन्न सर्वेषां तावकत्वेऽपि द्वा सुपर्णा सयुजा सखायाइत्यादिश्रुतिसिद्धसखित्वेऽपि स्वभ्रान्त्या न तथाभिमतिरस्माकन्तु वस्तुतःस्वाभिमत्या च तथात्वं तथाच

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

इत्यादिवचनैःसर्वभूतभीतिरक्षणप्रतिज्ञानां प्रथमं स्वाविरहदुःखं दिक्षु भ्रमणदुःखं मार्गणदुःखमित्येवं दुःखजातमनुचितं किं चात्र चित्रमिदं स्तावका ब्रह्मादयोऽपि त्वां द्रष्टुं व्रजं समायान्ति अत्रत्यास्तत्रापि स्वात्मनिवेदनेन त्वत्स्वीकारेण च तावका दिक्षु त्वां विचिन्वते इति दीपसमीपे तमोन्यायापत्तिः, यदि तावकत्वमेव त्वत्तुष्टिकरं तर्हि वयं तावका अपि स्तावका जाता इत्यधुनापि प्रसीद ननु मदीयाश्चेन्मद्वियोगे कथं जीवथ तत्राहुः । त्वयि धृतासव इति । त्वयि विषये धृता असवो बाह्याभ्यन्तरकरणानि प्राणाश्च याभिस्तस्तव गुणगानकथारसपानादिनास्मज्जीवनं त्वत्प्रविष्टप्राणानां मृत्युप्रवेशाद्वारा त्वयि निमित्तभूते धृता असवो यासां तास्तथा त्वयैवान्तर्य्यामिणा दुःखदानायास्मदसवो धृताः यद्वा

श्रीरामनारायणकृतभावभावविभाविका ।

त्वयि त्वद्दर्शनार्थं धृता असवो याभिस्तास्तथा च यावत्त्वद्दर्शनाशा तावदेवास्मदसवस्तदाशाभङ्गे सद्य एवास्मन्मरणमिति भावः । यद्वा त्वयि त्वन्निमित्ते अस्माकं प्रियाणां मरणे तव खेदो माभूदिति धृता असवो याभिस्ताः ॥ १ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एकत्रिंशे शुभाध्याये गोपिकागीतसंज्ञके-
प्रार्थयन्त्यो जगुः कृष्णं प्रेम्णा गोप्य इतीर्य्यते ॥

अहो तस्य कलगीतेनाकृष्टा वयं यथा तदन्तिके प्राप्तास्तथा सोऽप्यस्मद्गीतेनाकृष्टोऽस्मदन्तिकं प्राप्स्यतीत्याशयेन गानप्रवृत्तानां भगवत्प्रियाणां गानमुदाहरति । जयतीति । मङ्गलार्थमादौ जयतीति प्रयोगः तथाच मङ्गलार्थकत्वादादौ क्रियापदप्रयोगो न दोषावहः अधिकमहो- व्रज कृतार्थतार्थं कृतावतारेण त्वया सर्वोऽपि व्रजः कृतार्थीकृतस्तत्रत्या वयं किमर्थमुपेक्ष्येमहि इत्याशयेनाहुः । तवाजस्य जन्मादिकारणाविधुरस्य जन्मना स्वेच्छयात्र विलसितेन दिव्येन जन्मना प्रादुर्भावेन व्रजस्य स्थानत्त्वाज्जयति समस्तभूमिः भूर्भुवः स्वर्लोकप्रदेशेभ्यः सर्वेभ्यो ब्रह्मलोकान्तेभ्य उत्कर्षेण वर्तते तत्राप्यधिकं वैकुण्ठादपि जयति यद्यपि तत्रापि भगवान् वर्त्तते तथाप्येवं विधं जन्माद्येवंविधा लीला नाचरति यद्यपि जन्मस्थानं मथुरा तथापि तत्रत्यानां नानुपलभ्याद्देवकीवसुदेवाभ्यामपि नन्दयशोदानन्तजन्मोपलब्धमपि तु विष्णुस्वरूपदर्शनमाधमत्रत्यलीलादर्शनन्तु सर्वस्यापि सुकरमतो व्रज एवोत्कृष्टतम इति भावः । ननु मज्जन्मना व्रजस्य परमोत्कर्षो भवतीभिः कथमवगत इति तत्राहुः । श्रयत इति । हि यस्मादिन्दिरा श्रीः अत्र व्रजे श्रयते वैकुण्ठे तु सैव प्राधान्यात्सर्वैराश्रयत इत्यर्थः । शश्वत्सर्वदा । तत्र तु सैव निर्भयाभावतस्तस्याः नैश्चिन्त्याच्च सर्वदाश्रयणमावश्यकमत्र तु बह्वीनां सपत्नीनामस्माकं सत्त्वादवसरलाभाय सर्वदा सेवनं युक्तं च तत् पतिव्रताशिरोमणिभूतायास्तस्याः भक्तेष्वनुग्रहातिशयं ख्यापयितुमत्याधीनतया वर्तमानस्य पत्युरनुवर्तनमिति भावः । यस्मादस्मदग्रमत्र भवतो जन्म यस्माच्च नास्ति लक्ष्म्याः भयं तया- श्रीकृतत्वादतः हे दयित ! दृश्यतां त्वया प्रत्यक्षीभूयतां प्राणप्रियस्य प्रत्यक्षं तव प्राणस्थितिसाधनमिति सम्बोधनाशयः किञ्च तावकाः व्रजस्त्रियस्त्वां दिक्षु विचिन्वते तथा च अस्मदनुग्रहार्थमवतीर्णस्य तव ब्रह्मादिभिरन्वेषणमुचितं न तु व्रजवासिभिरिति भावः । ननु युष्माकं तादृशी भक्तिर्नास्ति इति कृत्वाहं तिरोहित इति चेत्तत्राहुः । त्वयि धृता असवः प्राणाः सर्वेन्द्रियाणि याभिस्ताः तथाचैवं विधास्त्वदीया अनाथवद्दिक्षु भ्रमन्तीतीदं महदसङ्गतमिति महद्दैन्यं व्यज्यते अनभिज्ञापक्षे हे दयित ! ते जन्मना व्रजस्य सर्वोऽपि जनोऽधिकं जयति यद्दिनमारभ्यात्र तव जन्म जातं तद्दिनमारभ्य ब्रह्माण्डस्थेषु मध्ये कस्मादपि व्रजवासिनां मध्ये कस्यापि पराजयो न जात इत्यैश्वर्य्यस्य परा काष्ठा ध्वनिता इन्दिरा सम्पदादिरूपा श्रीरपि अत्र व्रजे शश्वन्निरन्तरं श्रयते श्रीरिति स्वनाम्नः सार्थक्याय व्रजमलंकृत्य वर्तते हि प्रसिद्धमिदमिदानीं लोकत्रये तथा च नारायणसमो गुणैरिति ज्योतिर्विदग्रगण्येन गर्गाचार्य्येण भवज्जन्मपत्रे लिखितत्वा न्नारायणसमत्वं त्वय्यनुभूयते व्रजे वैकुण्ठतुल्यत्वमतोऽस्माकं विरहरहितवैकुण्ठवासिसमानत्वं कुतो नास्ति तस्मादस्मास्वपि तथात्वं सम्पादयितुं भवस्यमस्माभिर्भवान् दृश्यतां ननु वैकुण्ठवासिनां नारायण इव युष्माकं नाहं प्रेष्ठ इति चेत्तत्राहुः किञ्च तावका इति सर्वासु दिक्षु यावच्छक्त्याऽध्याप्यऽस्माभिरन्विष्यते तथापि भवान्न लभ्यते तत्र वयं किंकुर्म इति भावः तत्रापि तावकाः शश्वदनन्या अत एव त्वामेवान्वेषमाणा समाहितता निरस्ता ननु परीक्षार्थं तिरोहितेन मयावगतं नाद्यापि युष्मत्प्रेमपरिचयावस्थात्सम्पन्ना मद्विरहोऽपि जीवनादर्शनादितीति चेत्तत्राहुः । त्वयि त्वत्प्राप्त्याशया धृतासवः जीवन्ति त्वर्थः तन्निवृत्त्यातु तावकानां जीवनं दुर्लभमतो झटिति दृश्यतां मरणपर्य्यन्तं परीक्षाया अनुचितत्वादिति भावः । मानिनीपक्षे तव व्रजो यासामस्माकं जन्मना अधिकं जयति श्रीश्च शश्वदत्रैव श्रयते तथाभूतास्तावकास्त्वां विचिन्वन्त इति दृश्यतां श्रूयतां परमोत्कर्षैश्वर्य्यादिहेतुभूतस्वजनदुःखाऽपरिज्ञानरूपमन्यं नोचितमिति भावः । नच साधारणसम्बन्धः किन्तु प्रेष्ठो भवानिति सम्बोधनाशयः किञ्च त्वयि धृतासवः त्वत्प्राप्त्याशया धृतजीवनाः तथाच तन्निवृत्त्या मृतास्स्मातु तवापि परमोत्कर्षादिकं नश्यतीति भावः । यद्वा ननु दयित मयि वियुक्ते भवतीनामेतावत्पर्यन्तं कथं प्राणा देहे स्थिता इति चेत्तत्राहुः । त्वयीति । कठोरशिरोमणिभूते असंख्यातस्वसखीजनपरमतापहेतुक्रीडापरे स्त्रीदुःखजनितसुखाम्बुधिमग्ने धृताः स्थापिताः प्राणा याभिस्ताः तथाच यथा स्वगृहे दह्यमानेऽप्यन्यदीयगृहस्थं वस्तु न दह्यते तथा त्वयि स्थितत्वादस्मत्प्राणानामेतावत्पर्यन्तं रक्षा जातेति भावः । यद्वा यद्यपि तव जन्मना व्रजोऽधिकं जयति श्रीः शश्वदत्रैव श्रयते तथापि वृथैवेदं सर्वं यतः त्वयि धृतासवस्त्वदर्पितप्राणादयस्तावकास्त्वां विचिन्वते अद्यापि दुःखिता एव सन्ति तस्मात्सुहृदनुग्राहिकयाः सम्पदैवै व्यर्थ्यं दृश्यतां श्रूयतां तद्वैयर्थ्यपरिहाराय प्रत्यक्षीभूयतामिति वा दयितत्वात्तवेदं हितं वदाम इति सम्बोधनाशयः निवृत्ति पक्षे अधिष्ठानभूतचिदात्मनैवेदं देहादिसमस्तं शोभत इति श्रुतय आहुः । जयतीति । हे दयित ! परमप्रेमास्पद तव जन्मना प्रादुर्भावेन व्रजो देहेन्द्रियसङ्घातोऽधिकं जयति सत्तास्फूर्तिवत्तयाऽवभासते अथेन्दिराशोभाप्यत्रैव निरन्तरं श्रयते सौन्दर्य्यादिगुणाक्रान्ततया प्रतीयते तस्माद्यस्यात्मनस्तव सत्तादिना मिथ्याभूतस्यात्यन्तमनित्यस्याप्येवं प्रतीतिस्तेन त्वया दृश्यतां विद्वदनुभवविषयत्वं प्राप्यतां के ते विद्वांस इत्यपेक्षायामाहुः ये त्वयि धृतासवस्तावकास्तानि सर्वाणि संटाम्य युक्त आसीतमत्परःमच्चित्ता मद्गतप्राणा इत्यादिनोक्तलक्षणाः भवदीयास्त्वां सर्वाधिष्ठानभूतं परमात्मानं विचिन्वते अन्वेषणपराः सन्ति तथाच पञ्चकोशविवेकेनच आत्मकान्वेषणप्रकारउक्त स्तैत्तिरीयश्रुतौ तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरआत्मा प्राणमयः तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तरात्मा मनोमयः तस्माद्वा एतस्मान्मनोमयादन्योन्तरात्माऽविज्ञानमयः तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्मानन्दमयस्तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरपक्षः आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा असन्नेव भवत्यसद्ब्रह्मेतिवेद चेत् अस्तिब्रह्मेतिचेद्वेद सन्तमेनं ततो

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरत नाथ ! ते ऽशुल्कदासिका वरद ! निघ्नतो नेह किं वधः ॥ २ ॥

विदुरिति यद्वा व्रजः श्रुतिकदम्बस्तव जन्मना प्रादुर्भावेन प्रकटवेदार्थभूतेन त्वयाधिकं जयति शोभाञ्च महतीं प्राप्नोति हि यस्माद्तो ये त्वयि धृतासवस्त्वां विचिन्वते तेषां श्रुतिकदम्बेभवान्दृश्यतामित्यर्थः । यद्वा तवाविर्भावेन व्रजः सञ्जातो ऽधिकं जयति श्रीश्च विद्वद्देहादौ शश्वच्छ्रयते अतो ये विचिन्वते तेषां दृश्यताम् एषु पद्येषु पादद्वितीयाक्षरं हलैक्यं केषुचित्पादेषु प्रथमसप्तमाक्षरं हलैक्यं आलङ्कारिकसमयसिद्धसावर्ण्यात्कविदैक्यमितिद्रष्टव्यम् एकादशाक्षरं त्रिष्टुप्सञ्ज्ञकं छन्दसि चतुःषष्ठ्युत्तरषडशीति तमोभेदः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णगमनाकाङ्क्षिताः कृष्णं जगुरिति यदुक्तं तदेकत्रिंशे प्रपञ्चते । जयतीति । हे दयित ! हे प्रिय ! ते जन्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते तथा ऽत्रेन्दिरा लक्ष्मीः शश्वन्निरन्तरं श्रयते व्रजमलंकृत्य वर्तते एवं सर्वस्मिन् व्रजे कृतार्थतां प्राप्ते अत्र तु तावकास्त्वदीयाः गोपीजनाः त्वयि त्वदर्थमेव कथंचिद्धृता असवः प्राणा यैस्ते त्वां दिक्षु विचिन्वते मृगयन्ते हि अतो हेतोस्त्वया दृश्यतां प्रत्यक्षीभूयताम् ॥ १ ॥

भाषा टीका ।

गोपी गीत गान कर के लगीं हे गोविंद हे प्रिय आप के जन्म हो लेते या व्रज की शोभा सबलोकों से बडी भारी हो गयी है श्रीमहालक्ष्मी जी या व्रज में सदा निवास करे हैं या व्रज में एक तुमारी हमहीं दुःखी हैं सब दिशा में आप को ढुण्ढती फिरे हैं और काऊ प्रकार आशा में ही हमारे प्राण ठहरे है नहीं तो तबही चले जाते ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्र स्वतन्त्राणां बह्वीनां वक्तृत्वादपरा आहुरिति सर्वश्लोकेष्ववतारणा यथापि सङ्गतिरुच्यते । तत्र विचिन्वतु मम किमिति चेत्तत्राहुः । शरदिति । शरदुदाशये शरत्कालीने सरसि साधु जातं सम्यक् जातं यत्सरसिजं विकासितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तया तया दृशा नेत्रेण हे सुरतनाथ ! सम्भोगपते ! वरदाभीष्टप्रद ! अशुल्कदासिका अमूल्यदासीर्नो निघ्नतो मारयतस्ते तव त्वया क्रियमाण इह लोके ऽयं वधो न भवति किं शस्त्रेणैव वधो वधः किं दृशा वधो वधो न भवति किंतु भवत्येव अतस्तव दृशापहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति यथा सम्भवं सर्वत्र वाक्यशेषः ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

मुषेति दृशः परमतस्करत्वं ध्वनितम् उत्तमकाले जलदुर्गे साधूनामुत्तमद्रव्यान्तर्यस्तलक्ष्मीतुल्यमहार्थस्य हरणात् अत ईदृशचौरेण वधोऽपि सुघट एवेति भावः वस्तुतश्चैव दृशः परमसौन्दर्यमुक्तं दृशेत्येकवचनेन भावविशेषसूचनात् क्षोभकत्वं यद्वा एकयापि दृशेत्यर्थः अशुल्कदासिका इति मूल्यं विना क्रीता अधमदासीरपीत्यर्थः सम्बोधनाभ्यां वधस्यानौचित्यं सूचितं वधेन सुरतस्य भक्ताभीष्टदत्वस्य च पूर्वदत्तवरस्य वा हानेः श्लेषेण सुरतेश्वरेति त्वयैवास्मासु तदिच्छाकारिता तत्र च वरदानेन दृढीकृतेति न तत्रास्माकं धार्ष्ट्यादिदोष इति भावः अन्यत्ते व्याख्यातं यद्वा ननु प्राज्ञप्रवर ! अस्मन्मरणात्त्वयि दोषप्रसङ्गः स्यादेवेत्याहुः । शरदिति । दृशा सुरतनाथ दृष्ट्यैव सम्भोगसुखप्रदोऽसीत्यर्थः । निघ्नतः तादृग्दानानाचरणात् वधः तज्जन्यं पापमित्यर्थः । आयुर्घृतमितिवत् अन्यत्समानं यद्वा तादृशदृशैव तद्रूपेण शुल्केन दासिकाः किंवा शुल्कं विनैव दास्यः निघ्नतः विरहार्त्या त्यागेन वेति स्वत एवायाति तदुपसक्तेः सम्बोधनद्वयं प्रणयकोपात् विरहार्त्तिविशेषाद्वा तथाहि सुष्ठुरतानां जनानां सुपतापकेति नाथतेरुपतापार्थकत्वात् निजवरच्छेदकेति लज्जाधर्माद्यावृत्तिच्छेदकेतिवा "दोअवखण्डने" अतो निजदोषपरिहारार्थमप्यागम्यतामिति भावः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

शरदुदाशये इति । जन्मकालस्थानयोः साद्गुण्यं दर्शितम् । साधुजातेति जन्मनः । सदिति जातेर्व्यक्तेश्च । उदरेति तत्रापि तदन्तःकोषस्य इति कमलस्य शोभा परमकाष्ठा दर्शिता तादृशत च्छ्रीमुषा स्वश्रिया तच्छ्रियं हरत्येवेत्यर्थः यत्र यत्र सा शत च्छ्रीमुषा [illegible] स्फुरति तत्र तत्र तत्श्रीर्न दृश्यते इति नवनवश्रीयुजानया नूनं चोर्यत एव सेति भावः । दृशेत्येकवचनमेकयैव भावसूचनात् । एकयापि किमुत द्वाभ्यामिति श्लेषात् । दृशेति सुरतनाथे-त्यत्राप्यन्वयः । हे दृशैव सुरतयाचके ति त्वयैवास्मासु तदिच्छाकारिता तत्रच वरदेति वरदानेन दृढीकृता चेति तत्रास्माकं न दोषः । अशुल्कदासिका इति प्रत्युत गुण एव भवतस्तु सोऽपि दोषः सम्प्रति तु महानेवेत्याहुः निघ्नत इति । श्लेषेणापि तास्मिन्नेव दोषार्पणाय चौर्यक्रियाभिनिवेशो दर्शितः । सहि चौरेषु त्रिधा सम्भवति साधूनामपि सम्पत्त्यादानादत्युत्कटदोषस्यागणनेन । अतिनिगूढपरवस्तु ज्ञानेनातिदुर्लङ्घ्य लङ्घनेन च । तत्र प्रथमं सत् सरसिजेतिपर्यन्तेनोक्तम् । शरदुदाशय इति स्वच्छतादिगुणयुक्तस्य जनयितुः साधुजातेति जन्मनः सदिति स्वरूपगुणस्य च प्रशंसनात् । द्वितीयं महाजलान्तःसरसिजोदरे विलीयस्थिततेन । तृतीयञ्च वर्षानन्तरकालीनत्वात् अतिपूर्णस्योदाशयस्य दुरवगाहमध्यदेशत्वेन सहस्रपत्रास्य-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सरसिजोदरस्य दृग्भिर्दुर्भेद्यत्वेन चेति किञ्च त्वद्भयादिव तथा निगूढापि श्रीनायिका मुष्टा । ततः सरलानां व्रजवृन्दावनयोर्निर्भयं भ्रमन्तीनामस्माकं वा का वार्त्ता भवत्वस्माकमपि तद्द्वारा मोषणं किन्तुसा कृततादृक्कौटिल्यापि स्वचक्षुषोरन्तरे रक्षिता वयन्तु तादृशसरला अपि बलान्मोषणे प्रत्युताशुल्कदासिकाः तत्रेर्ष्यां त्यक्त्वा निरुपाधितया सेवमाना अपि तद्द्वारा पुनर्निहन्तुमारब्धाः इति परमान्याय्यमित्याहुः । निघ्नत इति । नेह किं वध इति चौर्याल्लोकेन न ज्ञायतां नाम इत्यपि किं न स्यादित्यर्थः सम्बोधनद्वयेन चेदं ज्ञाप्यते अहो ज्ञातं तत्तत्सर्वं त्वयैतदर्थमेव मृषा प्रपञ्चितमिति । अन्यत्तैः । यद्वा तादृशदृशैव शुल्क-दासिकाः । तद्रूपेणैव शुल्केन दासिका इत्यर्थः । ता दृशोरपि निघ्नतः त्यागेन मारयतः । हे सुष्ठुरतानां जनानामुपतापक ! नाथतेरुपतापार्थत्वात् । तथा हे निजवरच्छेदक ! अतो निजदोषपरिहारार्थमप्यागम्यतामिति भावः ॥ २ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

शरदुदाशये, शारदे जलाशये अशुल्कदासिकाः स्वद्गुणक्रीता दासिकाः ते वधः वधदोषः किं नास्ति शस्त्रादिभिर्विना वधेऽपि वधदोषोऽस्तीत्यर्थः ॥ २ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अत्रवक्तृबाहुल्यात् प्रतिश्लोकमपरआहुरित्यवतारणाद्दृष्टव्या तत्र यथासम्भवं पूर्वोत्तरवचसां गतिरुच्यते । तत्र विचिन्वन्तु मम किं तत्राहुः । शरदिति । शरत्कालिके सरसि सम्यग्जातस्य अनेन गम्भीराम्भस्समुद्भूतत्वमाभिप्रेतं , सत्सरसिजस्य सत्त्वमत्र सुमृष्टनालत्वरविकरविलसितत्वादिकं विवक्षितम उदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तस्करोतीति यावत्तथा तया दृशा नेत्रेण हे सुरतनाथ ! सम्भोगवर्द्धक ! तदर्थं याचनीयेति वा हे आत्मपर्यन्ताभीष्टप्रद ! तवाशुल्कदासिकाः मूल्यरहिताः दासीः मूल्यं विनापि दास्यम्प्राप्ताः शुल्कदासिका इतिच्छेदे तव संनिधाना शुल्केन सौन्दर्यात्मकेनमूल्येनदासीरस्मानिघ्नतो मारयतस्ते तव त्वया क्रियमाण इहैवलोकेऽयं वधो नभवति किं शस्त्रेणैव वधो वधः किन्नभवतीति भावः दृशा निघ्नत इत्यनेनदृशा नः प्राणानपहृतवत इत्यभिप्रेतम् अतस्त्वं दृशापहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति यद्वा सम्बन्धं वाक्यशेषः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

व्रजजनस्य आर्तिं हन्ति हिनस्ति नाशयतीति व्रजजनार्तिहा तस्य सम्बोधनं व्रजजनार्तिहन् ! वीरशूर निजजनस्य स्मयो गर्वः तंध्वंसिस्मितवत् स्मितं यस्य स तथा तत्संबुद्धिः निजजनस्मयध्वंसनस्मितयुक्पूर्वकामसमृद्धावितिधातोः यो षितां समृद्धिकामानां नः कामसमृद्धिं पारयेति शेषः कथंकारं पालनमत्राहुः । भजेति । हे सखे ! चारु सुन्दरं तव जलरुहस्य पद्मस्य सम्मानन्नं प्रभूतिशून्यस्य यदाननच्छायस्यातादृकृशाकिव-

न्मुखं दर्शयन् त्वत्किङ्करीः दासीः नो भज पालय स्म स्मृत्वा पत्यादीन्विहायार्धरात्रे वनं प्राप्ता इति भवे भव इतिद्विरावृत्तिः कर्तव्या जन्मनि जन्मनि किङ्करीरित्यर्थः । यद्वा भवे तादर्थ्ये सप्तमी अस्मद्भद्रार्थमित्यर्थः यद्वाऽस्मज्जीवनसत्तायां विवक्षितायाम् अन्यथामरणमेवास्माकमापद्यत इत्यर्थः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

अन्यच्च व्रजस्यैवमुत्कर्षके इन्दिराया अप्यत्रैव शश्वद्भावे स्त्रीनिकरवधोऽत्यन्तायोग्यः यदि वा वदसि नाहं वो हन्मीति तदपि न अशस्त्रवधः किं वधो न भवतीत्याहुः । शरदुदाशय इत्यादि हे सुरतनाथ अथवा हे सुष्ठु रत हे नाथ दृशा अपणा अशुल्कदासिका अपणक्रीता दासीः उपेत्य दासीभूता इति यावत् इह वृन्दावनभूमौ किं वधो न सामान्यपुण्यस्थले एव जनो हत्यां न करोति त्वं नु इहापीति इह शब्दमहिमादयेत दृश्यतामिति पूर्वोक्ता साक्षाद्विभूतामिव मत्वा तद्दृशोभाग्यादन्तः क्षोभमनुभवन्त्यः काश्चिदेव मुक्तवत्यः दृशा कीदृशा शरदुदाशये शरत्कालीने सरसि साधुजातं सम्यक् उत्पन्नं यत् सत् उत्कृष्टं सरसिजं तस्य उदरे या श्रीस्तां मुष्णातीति तथा तया चौरस्य तदङ्गान्यपि चौराणीत्यर्थः अथवा एवं भूताया दृशः अनुपलब्ध्या इत्यर्थः तृतीयान्ते दृक् शब्दे लक्षणा यथा अन्नेन म्रियन्ते अन्नानुपलब्ध्येत्यर्थः यद्वा दृशा वरद अभिलाषाप्रद एता दृश्यतां तदकृत्वा इह किंवधो न वधः इति न केवलं सुरतनाथोऽसि वरदोऽप्यासि हे वरद वरदकर्तृको वधोऽत्यन्तमनुचित एव ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तामसी तु वधासंभवं प्रार्थयितुमदर्शनस्य वधसाधकत्वमाह शरदुदाशयइति । शरत्कालीनो योऽयमुदाशयः पुष्करणी तत्र साधुसम्यक्प्रकारेण जातं यत्सरसिजं कमलं तदन्तर्वर्तिनी या श्रीः तामपि मुष्णातीति तादृग्रूपया दृशा दृष्ट्या हे वरद यो निहन्ति तस्य किं वधो न अपि तु वधदोषो भवत्येव येनैव साधनेन परस्य प्राणा गच्छन्ति तत्संपादनसाधको घातकः दोषभाग्भवति अनेन भगवद्दृष्टिः सर्वघातुकी निरूपिता आयुर्मनांसि च दृशा सह ओज आच्छेदिति वाक्यात् तथास्मानपि प्रायेण क्रूरदृष्ट्या पश्यसि अन्यथा कथं प्राणबाधा स्यात् रूपं त्वानन्दमयामिति दृष्टं सदैव जीवयेत् अतस्तदभावात्केवलं घातयस्येव किञ्च न वयं वधार्हाः यतो दासिकाः कुत्सितादास्यः नहि स्त्रियः अप्ययोजिकाश्चहन्यन्ते किञ्च वयं शुल्कदासिकाः त्वञ्च सुरतनाथः सर्वपुरुषार्थसाधकत्वेन सम्बोधनानि यथाधिकारं नियतानि यथाधर्ममार्गे हे धर्मपालक ब्रह्मण्य हेयज्ञेश्वरेत्यादीनि अर्थे हे लक्ष्मीपते हे सर्वसिद्धिदेत्यादीनि तथामोक्ष हे मुकुन्द हे योगेश्वर ! हेज्ञाननिधे इत्यादीनि धर्मार्थमोक्षार्थिभिरुच्यन्ते एवमस्माभिरपि सुरतनाथेत्युच्यते सुरतं सम्भोगः जगति यावानस्ति तस्य भवानाथः त्वदाज्ञाव्यतिरेकेण सुरतं जगति न प्रवर्तते अतो ब्रह्मणा कामेन वा लोके सुरतप्रवृत्त्यर्थं वयं शुल्करूपादासिका दत्ताः शुल्कः मार्गनिर्वाहकं द्रव्यं

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

प्रतिबन्धनिवर्तकं सुरतं चेद्भवत्येव निरुद्धं तिष्ठेत्तदा लोके रसो न भविष्यतीत्यस्मद्द्वारा त्वत्तः तल्लोके प्रसृतं भवत्विति वयमागताः तत्कार्यं दूरत एव स्थितं प्रत्युतास्मान्मारयसि एवं सति सर्वमेव कामशास्त्रं व्यर्थं स्यात् तृतीयः पुरुषार्थश्च न भवेत् अतः सर्वदा यदर्थं वयं प्रेषितास्तत्कर्तव्यम् अथवा यदा कदाचित् कर्त्तव्यम् इदानीं जीवयितव्या रूपप्राकट्येन दृशो मारकत्वमुपपादयन्ति । श्रीमुषेति । यस्तु चौरो भवति स घातको भवति यथा यथा चौरे नैपुण्यं तथा तथा घातकत्वं तदर्थमाहुः । उदरश्रीमुषेति । तत्रापि ये दुर्गजाताः ते अतिनिपुणाः तत्रापि जलदुर्गजाः तत्सरसिजं तत्रापि ते दुर्ग एव तिष्ठन्ति ते साधुजाताः प्रभवः तत्रापि प्रकाशवति काले शीताद्युपद्रवरहिते एवं देशकालस्वरूपादिभिः अशक्यचौर्य्यादपि पुरुषात् बहुदूरवर्तिसर्वस्वनेता अन्तः स्थितप्राणान् साधारणगोपिकादीनां नेष्यतीति किमाश्चर्यं चौर्यं हि क्रियते वलिष्ठेन अपकीर्त्यभावाय तदत्र तु न भविष्यतीत्युक्तं किं वधेनेति अथवा अदृशा अदर्शनेन दर्शनमदत्त्वा निघ्नतः किं वधो न सुरतार्थमागतास्तद्दूरं दूरे अन्तरा मरणमुपस्थितं तथा सति सुरतस्याप्रकटितत्वात् नाथत्वमपि न स्यात् नहि योगी अश्वनिर्माणसमर्थोऽप्यश्वपतिरुच्यते प्रकटयति चेत्तथा तथा किञ्च अस्मद्वधे किमाश्चर्यं तवादर्शने लक्ष्मीरपि न तिष्ठेत्तदाहुः । श्रीमुषेति । उदरस्थिता श्रीश्चेद्बहिरानीता तदैव म्रियते अपुष्टत्वात् आमगर्भवत् यद्यपि तस्याः जीवने कालद्रव्यदेशवस्तूनि बहून्येव सन्ति तथापि त्वददर्शने न जीवति तथा वयमपि किञ्च त्वं सर्वेषां वरान् प्रयच्छसि अस्मांस्तु मारयिष्यसीति महदाश्चर्यं वरदाता हि प्रत्यक्षो भवति अथवा ते वयममूल्यदासिका धर्मदासिकाः अतो न हन्तव्याः एवमनेकविधकौर्यभावनया काश्चिद्भगवन्तमुपालभन्ते अन्तः स्थितो रसः पुष्टो बहिश्चेन्न विनिर्गतः तदा पूर्णो नैव भवेदिति वाङ्निर्गमस्तथा ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु किमहं युष्मभ्यं दुःखं दित्सामि यदेवं सुचयथेति तत्र त्वमस्मान् खलु हंस्येवेत्याहुः । शरदिति । दृशैव सुरतं नाथसि याचसे–अथच दृशैव वरदः अभीष्टसुखं ददासि अथच तथैव दृशा प्रेमानलपुञ्जप्रक्षेपिण्या निघ्नतोऽशुल्कदासिका अस्मान् मारयतस्तव इह किं न वधः किं शस्त्रेणैव वधो वधः दृशा वधो वधो न भवति अपि तु भवत्येव तस्मात् हे वरद ! अभीष्टं ददद्देव अर्थिभ्यमैहिकं पारत्रिकञ्च सुखं द्यसि खण्डयसीत्यर्थः किञ्चास्मासु ते स्वत्वञ्चेद्भवति तर्हि स्वधनं पालय जालय वा न दोषः । वयन्तु त्वया न शुल्केन क्रीता नापि परिणयेन गृहीताः किन्त्वशुल्कदासिका वयं स्वयमेव मौग्ध्येनाभूमेत्यर्थः । तत्र तस्य मोहनोन्मादनमहाचौरचक्रवर्त्तित्वमेव हेतुं वदन्त्यो दृशं विशिषन्ति शरत्कालसम्बन्धी य उदाशयः गम्भीरस्वच्छजलपूर्णस्तडाग इत्यर्थः । तत्र साधु जातं साधु समयप्रदेशप्रकारतो जातं सत् जात्याप्युत्तमं यत् सरसिजं विकासितपद्मं तस्योदरस्थां श्रियं शोभां सम्पत्तिं मुष्णाति चोरयतीति तथेति दृशः सौन्दर्यसारस्य शैत्यसौकुमार्य्याण्यसाधारणान्युक्तानि या खलु तादृशीं जनदुर्गमप्युलङ्घ्य तादृशाभिजातस्य सज्जनस्यान्तःपुरं प्रविश्य सम्पत्तिं चोरयति सा तव दृक् चोरिका केनापि मोहनोन्मादनधूलिप्रक्षेपणोन्मादिताभिरस्माभिः स्वयमेव दत्तं सुरतधनं प्राणांश्च नीत्वा तुभ्यं दशावत एव पूर्वमुक्तं त्वयि धृतासव इत्यतो वयं त्वया निर्धनीकृत्य हता एवेति परःसहस्रस्त्रीवधपातकं त्वया गृहीतमेवेति ध्वनिः । अतः पापाद्भीत्यापि दर्शनं देहीत्यनुध्वनिः ॥ २ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ननु विचिन्वन्तु नाम स्वकपोलकल्पितप्रेमाणस्तत्र मम को दोष इत्याशङ्क्य सर्वस्य सर्वापहारिण्या तव दृशैव सर्वस्वं हृतमस्माकमिति तस्मिन्नेव दोषं पर्य्यवसाययन्त्य आहुः । शरदिति । जन्मकालस्थानयोः साद्गुण्यं साधुजातेति जन्मनः सदिति जातव्यक्तेश्च उदरेति तदन्तः कोशस्येति प्रतिपदं शोभा सूचिता तादृशस्य ते श्रीमुखस्वश्रिया तामपि न्यक् कुर्वन्त्येत्यर्थः । अयंभावः यत्र यत्रैष स्फुरति तत्र तत्र तच्छ्रीस्तिरस्कृतेव लभ्यत इति नवनवश्रीयुजानया सैव नूनं चोरितेति चौर्यक्रियाभिनिवेशो दर्शितः सच चौरेषु त्रिधा संभवति साधूनामपि संपत्यादानादत्युत्कटदोषस्यागणनेन, अतिनिगूढपरवस्तुज्ञानेन अतिदुर्लङ्घ्य लङ्घनेन चेति तत्राद्यः–सत्सरसिजेत्यनेनोक्तः शरदुदाशयेति स्वच्छतादिगुणयुक्तस्य जनयितुः साधुजातेन जन्मना सदिति स्वरूपस्य गुणस्य प्रशंसनात् द्वितीयो महाजलान्तःसरसिजोदरे निलीनायास्तस्याः परिज्ञानेन तृतीयश्च वर्षानन्तरकालीनत्वादतिपूर्णस्योदाशयस्य दुरवगाहमध्यदेशस्थत्वेन सहस्रपत्राख्यसत्सरसिजोदरस्य दृग्भिर्दुर्भेद्यत्वेन चेति एवंच त्वद्भयादेव तेन निगूह्यावस्थापितापि श्रीर्नायिका दृशा मुष्टेति तवैव महान्दोषो दारापहारित्वेनाततायितापीति भावः, तस्य द्विजत्वं च ब्रह्मणोऽपि जनकत्वेनान्तः सूक्ष्मसूत्रोपवीतधारित्वेन "कुर्य्यादन्यन्न वा कुर्य्यान्मैत्री ब्राह्मण उच्यत" इति स्मृतिसंवादान्मित्रामित्रत्वेन तद्दर्शनैकजीवनत्वादिना स्पष्टमेव ततश्च ब्रह्मस्वापहारित्वं सिद्धं तत्र स्त्रीधनापहारित्वं सुतरामेवेति तत्रापि दृशोन्येकत्वेनैकयापि किमुत द्वाभ्यां यद्वा सुरतनाथ दृशा त्वयैवास्माकं तदिशाकारितेति भावगोपनम् तत्र च वरदेति वरदानेन दृढीकृतेति ततश्च शुल्कदासिका निघ्नतः नितरां मारयतः । नेह किं वधः श्लेषेण दृशा वशीकुर्वत इत्यर्थः । अधीनो निघ्न आयत्त इत्यमरः लोकैश्चौर्य्यं माशायतां नाम हत्यापि किं न स्यादिति भावः । यद्वा दृशा निघ्नताः नहि शस्त्रेणैव वधो वधः अपि तु दृशापीति यद्वा दृशा वरद ततश्च निघ्नत इति विश्वासघातकत्वमिति एवंचेद्दृशोः सरसिजरूपकेणानुरागित्वं सूचितमिति संक्षेपः ॥ २ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ननु मया तु नैव कस्या अपि वधः क्रियते भवतीभिः स्वयं म्रियते चेत्किं मम दूषणमित्यत आहुः । शरदुदाशय इति । शरदिति जन्मकालश्रैष्ठ्यं उदाशय इति तद्देशस्योत्तमत्वं साधुतया जातेति जन्मकारणानुगुण्यं सदिति स्वरूपोत्कर्ष एतादृशो यः

श्रीरामनारायणकृतभावभावविभाविका ।

सरसिजः पद्मः पद्मालयालयस्तस्योदरे तद्दलेषु वर्तमाना या श्रीस्तां मुष्णातीति तथा तया शरत्सरोजान्तर्गर्भदळश्रीपराभवकारिण्या सानुरागारुणायततापोपशमना ह्लादकदृशा अशुल्कदासिका नो निघ्नतः किमिह लोके प्रेमपथि च वधो न भवति शस्त्रादिना निघ्नत एव वधोऽपि तु शस्त्रादीनां प्रतिनियतवधसाधनत्वात्तैर्वधो न तथा तापापहरणाल्हादकसानुरागदृशा स्वभावपरित्यागेन तद्विरुद्धवधाचरणमतिनैष्ठुर्यमिति भावः । एवं करणे स्वभाववैपरीत्येन वैचित्र्यद्योतनं तथा करणस्य कर्त्रधीनतया स्वभावत्यागसम्भवेऽपि स्वतन्त्रे कर्तरि स्वभावपरित्यागानौचित्यमाहुः । हे सुरत ! सुष्ठु शोभना सर्वसौख्यप्रदाभ्युदयापवर्गकामधेनू रतिः प्रीतिर्यस्य यद्वा सुष्ठु कामसुखप्रदत्वेऽपि भवबन्धनाननुबन्धिनी रतिर्मिथुनविहारो यस्य तथा हे नाथ ! नाथृ नाधृ याच्ञोपतापैश्वर्याशीःष्विति विधानादस्मत्स्वामिनीश्वरसमर्थ अस्माभिर्याच्यमानस्वभावत एवाशीःप्रद यद्वा सुष्ठु रतिरनुरागो येषां तेषां नाथ स्वामिन्नभिलषिताशीःप्रद । यद्वा सुरतविहारे नाथ ईश्वर समर्थ याचिताशीःप्रद तत्रापि विशेषतो वरदास्माकं वरप्रदातः न त्वया स्वतन्त्रेणेश्वरेण स्वस्वभाव वरदानयोर्विरुद्धं विधेयमिति भावः । यद्वा हे सुरतनाथ ! सुरतानां सुष्ठ्वनुरागवतामपि नाथ उपतापक तथा वरद स्वदत्तानपि वरान् द्यति अवखण्डयतीति तथा स्वभावत एवातिक्रूर तदुक्तं सोपपत्तिकमभियुक्तैः अटति भवानवला कवलायवनेषु न तत्र विचित्रं प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रमिति अतः स्वस्वभावानुसारेणैवाशुल्कदासिका अपि नो निघ्नतः किमिह वधो न स्यात्स्यादेवेति भावः नन्वन मया वधः क्रियते किमिति वृथैवोपालम्भो दीयते तत्राहुः । दृशा नेत्रद्वारा निघ्नत इति स्वयमनिघ्नतश्चौरद्वारा हन्तुरपि राज्ञो वधः स्यादेव ननु कथं मम दृशश्चौरत्वं तत्राहुः । शरदित्यादि । बहिः शरद्वतुरक्षिते उदाशये जलपूरिते निखाते वर्तमाने बहिः सहायान्विते जलदुर्गरक्षिते साधुजातं साधु तया बहु कुसुमशरशरूपपत्र प्रकारैः प्रादुर्भूतं सत् सुदृढदुर्गात्मकं यत्सरसिजं पद्मं पद्मालयालयस्तदुदरे वर्तमानां सुदृढजलशस्त्रदुर्गगतामपि श्रियं मुष्णाति तथा तया तादृक् श्रीमुषश्चौरस्य नाऽस्मद्वधो दुष्कर इति भावः । दृशेत्येकवचनं जातौ एकयैव दृशापाङ्गनिरीक्षणेन वधसम्भवाद्वा एकयैव वधसम्भावनायां द्वाभ्यां तु कैमुत्यन्यायेन प्रलय एव स्यादिति सूचनाय वा अत्रोदरश्रीमुषेत्यनेनातिनिगूढदुर्गप्रवेशवस्तुज्ञानं तथा शरदित्यादिभिर्दुर्गमदुर्गप्रवेशेन हरणं पूर्वव्याख्यातरीत्या साधुजातसत्सरसिजानां साधुशीळानां सताम्आजन्मतीर्थसेविनां श्रीहरणेनातिनैष्ठुर्य्यं त्रिधा चौरक्रिया दर्शिता यद्वा इत्थं शरदि तीर्थजळमध्ये कृतालयाया बहुपत्रपुटोदरे वर्त्तमानतया एकान्तरताया: पद्मासनस्थतया च सम्यग्योगिन्याः श्रियोऽप्येकान्तरतायाः सयोगिन्याः कान्तया इव शफरीविहारदर्शनेन सौभरेरिव सफरीचपलदृग्विहारहारतया जारशिरोमणिताविष्कारपरयादृशैव सुरतनाथ सुरतसुखयाचक तयैव भावयास्मदभिळाषवृद्धौ तथा दृशैव सुरताशीःप्रद वरदतया दृशैव पद्मरागजळजर्त्तिलमणिप्रभतया शुल्करूपया क्रीताः शुल्कदासिका नः तया दृशैव स्मरशरूपया निघ्नतो विश्वासघातिनः किमिह वधो न स्यात् यद्वा अशुल्कदासिका नः स्वविरहेण निघ्नतस्तव सम्मतो योऽस्मद्वधः स किमुकरीत्या चौरावतंसयासुमशरशरप्रधानपद्मश्रीहारया मनोरमरामामारया मारशराकारया दृशा इह न स्यात् अस्मद्वध एव चेत्सम्मतस्तदा दृशैव कुरु नतु विरहेणेति भावः यद्वा अशुल्कदासिका नो विरहेण निघ्नतस्तव यः किम्वधः किमप्यनिर्वचनीयो वधः सम्भावितस्तेन विशेषि चेत्स इह तादृशदृशैव न स्यात् अन्यथा त्वदृङ्मेलनं विनातु स्यादेव यद्वा जारैरपि भामिनीनामपहार एव क्रियते नतु संहारः कैश्चिदतिक्रूरैर्वधोऽपि चिन्त्यते चेत्सोऽप्यप्राप्तानां नतु अशुल्कदासिकानां तव तादृशा दृशापि निगूढाया अपि श्रियो मोषणमेव कृतं नतु वधस्तथा च तादृङ्निगूढश्रीमुषा दृशा न स्वत आगतानां वने रहः विहरन्तीनामशुल्कदासिकानां मोषणं दुष्करमिति तदेवोचितं यत्तु विरहेणेह निघ्नतो वध इति तत्किं न किमपि अनुचितमेवेति भावः ॥ २ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो यो गुडदानेन म्रियते तस्मै विषं किमर्थं देयमिति लोकन्यायादीषदारक्तकटाक्षसाध्यास्मद्वधार्थं तिरोधानं नोचितमित्याशयेनाहुः । शरदिति । शरत्कालीनो यः स्वच्छजलाशयस्तत्र साधु सम्यक्प्रकारेण जातं सत्समीचीनं यत्सरसिजं कमलं तदन्तर्वर्तिनी या श्रीरारुण्यशोभा तां मुष्णातीति तथा तादृशरूपया रोषेणेषद्रक्तया दृशा नेत्रेणामूल्यदासिकाः नो निघ्नतो मारयतस्तव त्वया क्रियमाणोऽयमिह लोके किं वधो न भवति किं विरहानलज्वालया वधो भवति यतो हे सुरतनाथ ! सुरतस्य सम्भोगस्य नाथ तत्प्रद तथा च सुरतनाथस्य तव रोषदृष्ट्यैवास्माकम्मरणं सुकरमिति भावः । ननु रोषतिरोधानयोरुभयोरपि मरणहेतुत्वाविशेषात्किमर्थमेवमुच्यत इतिचेत्सत्यं तथापि क्षाम्यादिना रोषदृष्ट्यामस्यापि सम्भवादस्तिनरोष इत्याशयेनाहुः । हे वरदेति समक्षं प्रेष्ठेऽपि प्रार्थितं वरं दत्तं संपादयितुं शक्यमसमक्षे त्वशक्यं प्रतीकारतोऽत भावः । तथात्रास्मद्दर्शनाशा एव भवतः कर्तुं समीहितो ननु प्राप्तवियोगः करुणानिधेरिष्टदेवस्य तत्साधने प्रवृत्त्यसम्भवादतस्तस्मिन्नुचितरूपं षड्दृष्ट्यैव सुकराऽतो वृथैव तिरोहितोऽसीति भावः । यद्वा । ननु नाहं युष्मन्मारणे व्यापृतः स्वत एव भवतीनां प्राणा अपक्रामन्ति चेत्तत्र मम कोऽपराध इति चेत्तत्राहुः । शरदिति । तव दृशा दर्शनेन निघ्नतः किं वधो न तत्रापि हे सुरतनाथ सुरतार्थमागतानां तत्प्राप्तिस्तु दूरे गता प्रत्युत मरणमेव मध्ये उपस्थितमस्तीत्यतोऽस्मन्मन्दभाग्यस्य सुरतप्रदत्वमरणप्रापकस्य माहात्म्यमिति भावः । किञ्चास्मद्वधे किञ्चित्रं त्वद्दर्शनं तथाभूतां श्रियमपि मुष्णाति नाशयतीति तथा किञ्च सर्वेषां वरप्रदस्त्वमस्मान्मारयसीति महच्चित्रमित्याशयेन संबोधयन्ति हे वरदेति तथा च सर्वेषां वरप्रदानाय प्रत्यक्षभवनशीलस्य तवास्मन्मन्दभाग्यवशादस्मन्मरणसाधनं तव तिरोधानं सम्पन्नमित्याक्रोशोऽपि ध्वनितः अनभिज्ञापक्षे ननु विचिन्वन्तु भवत्यो मया तु नागम्यत इतिचेत्तर्हि दृशास्मत्सर्वस्वमपहृत्य गतेन त्वयास्मद्वध एव सम्पादित इत्याशयेनाहुः । शरदिति । यथोक्तया दृशा निघ्नतस्तव त्वया किम-

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ।
वृषमयात्मजाद्विश्वतोभयादृषभ ! ते वयं रक्षिता मुहुः ॥ ३॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

माण इह लोके बधो न किमभिचरणादिकर्मणा कृतो लोकैरक्षतोऽपि बधोऽनिष्टसाधनं किन्न भवतीति भावः। इत्थैव शुल्केन मूल्येन दासिका अपि मारयतः कन्प्रत्ययेन सूचनेनात्यन्तकरुणापात्रतां व्यञ्जयन्ति यद्वा वयन्तु न त्वया मूल्येन क्रीता नापि विवाहिता अपित्वशुल्कदासिकाः स्वयमेव मोहिताभूमेत्यर्थः तस्मात्सुरतरूपरप्रदानेनास्मत्प्राणप्रत्यर्पणाय दृश्यतामित्याशयेनाहुः। हे सुरतनाथ ! हे वरद मानिनीपक्षे अहो अस्मद्वधायोद्यमं कर्तुम्प्रवृत्तस्य तव वधकात्वत्तदानीमस्माभिर्वधोत्पत्त्या संख्यातस्त्रीवधादपिभपरुचा न्यस्तथा प्रवृत्तस्य इत्याशयेनाहुः। शरदिति। दृशा सुतरया च न केवलं याचनमात्रं सर्वथा तव दृक् किन्तु चौर्यकर्मापीति द्योतनाय विशेषान्ति। शरदिति। यथा चौरः सतामपि निगूढां कठिनदुर्गस्थामपि श्रियं हरति तथा साधु जातस्य सतः पद्मस्य जलदुर्गसहस्रप्राकारगर्भस्थायिनीं त्वद्भयादेव तत्र निगृह्य स्थापितामपि श्रियमपि नायिकां मुष्णातीति तथा यदेव भूता श्रीरपहृता तदा सरलानां सर्वत्र भ्रमन्तीनां विवृतश्रोत्रादिकपाटानां मनआदिहरणे किंचित्रमिति भावः। यद्वा हे सुष्ठुरतानां नाथ ! उपतापक हे निजवरच्छेदक अशुल्कदासिकाः परमप्रेमवतीः सखीर्नः अतो मित्रद्रोहादिदोषपरिहारायागस्यतामिति भावः। निवृत्तिपक्षे तव दर्शनेनैव संसारनिवृत्तिर्नान्यथेत्याहुः। शरदिति। शरत्कालीनजलवत्स्वच्छे आशये अन्तःकरणे ते तव दृशा दर्शनेन किं किमन्यानिर्वचनीयमज्ञानं शुल्कस्य तत्तद्विषयस्य दासिकास्तत्तदाकारा अन्तःकरणवृत्तीश्च निघ्नतो नाशयतो विभुष इह बधो नाशः जन्ममरणलक्षणसंसृतिप्रवेशलक्षणेन भवति तथा च श्रुतयः "आत्मन्येवात्मानं पश्येत् तरति शोकमात्मवित् ब्रह्मविदाप्नोतिपरं न स पुनरावर्त्तते" इत्याद्याः अज्ञानतत्कार्ययोर्ज्ञानान्निवृत्त्यर्थत्वमुक्तमित्याशयेनाहुः। असाधुजातमनिर्वचनीयोत्पत्तिमत्सरसिजं सद्रूपब्रह्मलक्षणे सरसि अधिष्ठाने प्रतीतकल्प्यनीयमज्ञानं तदुदरश्रीश्च तदुभयं मुष्णाति नाशयतीति तथा तयेत्यर्थः ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत्रान्योऽन्यनैरपेक्ष्येण हरिः प्रार्थ्यतेऽतः प्रतिश्लोकमन्या आहुरित्यवतारणा एकैकः श्लोक एकैकयूथस्य अतः सङ्गतिर्नास्त्यपेक्षिता। शरदुदाशये शरदि यो जलाशयस्तस्मिन्साधुजातं सम्यगुत्पन्नं यत्सत् सरसिजं समीचीनं पद्मं तदुदरे गर्भे या श्रीः शोभा तां मुष्णाति हरति तिरस्करोतीति तथा तया दृशा नेत्रेण हे सुरतनाथ ! सम्भोगार्थं याचनीय हे वरद ! हे मनोरथपूरक अशुल्कदासिकाः शुल्कं मूल्यं विनैव सर्वपरित्यागपूर्वकं त्वदेकशरणाः अस्मान् निघ्नतो मारयतस्ते तव त्वया क्रियमाण इह लोके अयं बधः न किमपि त्वस्त्येव अयमर्थः प्रथमतस्तु पद्मश्रीमुट् नयनप्रहारैरस्माकं वधोऽस्मिन् लोके त्वया कृतः लोकव्यवहारतोऽवरोपितत्वात् अयमेव लोके मुख्यो वधः तथापि पिष्टपेषणवत् पुनः परोक्षी भूत्वा घातयसीति ॥ २ ॥

भाषा टीका

दूसरी गोपी वोली शरद् ऋतु के दिव्य सरोवरमें उत्पन्न जो कमल ता के मध्य की शोभा को भी जीव वे वारी जो आप को कटाक्ष वा ते हे सुरतनाथ हे वरद इन विना मूल्य की दासीन को जो आप मारो हो सो का वध नहीं कहावे गो वो भी व धही है ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च बहुभ्यो मृत्युभ्यः कृपया रक्षित्वा किमितीदानीं दृशा मन्मथं प्रेष्य घातयसीत्याहुः। विषेति ऋषभ ! श्रेष्ठ विषमयाज्जलाद्योऽप्ययो नाशस्तस्मात्तथा व्यालराक्षसादघासुराद्वर्षान्मारुताच्च वैद्युतानलादशनिपाताद्वृषोऽरिष्टस्तस्मान्मयात्मजाद्व्योमाद्विश्वतोऽन्यस्मादपि सर्वतो भयाच्च कालियदमनादिना रक्षिताः किमिदानीमुपेक्षस इति भावः ॥ ३ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विषजलादिभ्यो गोगोपादीनां वर्षादिभ्यश्च सर्वव्रजस्यैव रक्षणेनात्मीयात्मपालनात् किंवा तत्र तत्र श्रीकृष्णविषयकमाङ्गल्येनैव सर्वरक्षामननात् वयं रक्षिता इति प्रेमोद्रेकेणोक्तं वृषमयात्मजादिति भाविसूचनं सहजसार्वज्ञ्यात् विशेषतश्च विरहार्त्या प्रेम्णां विशेषोच्छलनात् स्वत एव तत्तत्परिस्फूर्त्तेः तस्य भावित्वेऽपि भूतनिर्देशः स निश्चितत्वात् अहो कति गण्यानि बहुभ्योऽपि दुःखेभ्यो रक्षिता इत्याहुः। विश्वतः पूतनाशकटतृणावर्त्तयमलार्जुनेभ्यो वकवत्सदवानलादिभ्योऽपि भयादित्येवं पुनः पुनस्ते त्वया त्वदीया वयं रक्षिताः तच्च तव युक्तमेवेति सम्बोधयन्ति ऋषभ ! कारुण्यादिना सर्वतः श्रेष्ठेति यद्वा व्रजेश्वरेति वयमित्यत्र स्पष्टनिर्देशः स्वविषयकोपकारविज्ञापनाय तच्चाधुनापि तदर्थं मुहुरिति तत्रौदासीन्यराहित्येन परमकृपालुत्वं सूचितं किंवा प्रेमविवशानां तासां स्वप्नमनोरथादौ पुनः पुनः स्तेषामेव साक्षादिव स्फूर्त्यभिप्रायेण पूर्वोक्तक्रमातिक्रमो विरहवैवश्यात् किम्वा श्रीकृष्णविषयकतत्तद्भये तेषां यथोत्तरं न्यूनताभिप्रायात् अत एवैते स्पष्टं निर्दिष्टाः ततश्च विषजलाप्ययादपि रक्षिताः किम्वक्तव्यं व्यालरक्षसादित्येवं व्याख्येयम् अन्यस्तैर्व्यञ्जितं यद्वा व्यालाः कालियाजगरादयः राक्षसाः पूतनावकाघाद्याः शङ्खचूडश्च यक्षराक्षसयोरभेदात् स च दुर्योपाख्यानान्ते व्यक्त एव तेषां जातानेकत्वं पुनर्द्वैरूप्यम् एवमग्रेऽपि वर्षं दुर्मदेन्द्रप्रेरितसम्वर्तकरूपं मारुतः

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तदानींतनस्तृणावर्तश्च वैद्युतं विद्युत्समूहः तद्वर्षकालीनमेव अनलश्च स्यानद्वयदावः विश्वतः तदितरेभ्यः शकटादिभ्यः ते गोपा वयञ्च रक्षिताः त्वयेति प्रकरणवलात् गोपा इति साक्षादनुक्तिस्तदानीं तत्प्रसङ्गस्यायुक्तत्वात् तत्र विषजलाप्ययाद्गोपाः सुधा दृष्ट्या जीवनादिना वयं च शोकभरेण तत्र प्रविश्य मरणोद्यताः कालियमर्द्दनादिना अजगराच्छ्रीव्रजेन्द्रः पूतनातः सान्निपातभयात् प्रायःसर्वोऽपि व्रजः शकटार्जुनाभ्यो वत्सवकाघासुरेभ्यश्च सखायः शङ्खचूडाद्वयस्वर्षात्सर्वोऽपि व्रज इत्येवं विवेचनीयं तत्र ते इतिदृष्टान्ततथोह्यम् एवं सामान्येनैव वयं रक्षिताः स्मः अधुना तु त्वदेकगतयो वयं विशेषेण रक्ष्या इति भावः। अन्यत्समानं यद्वा किंशब्दः पूर्वपद्यादनुवर्तते ततश्चायमर्थः तस्मात्तस्मात्किमिति रक्षिताः मारिताः स्याम चेत्तदैव भद्रमभविष्यदित्यर्थः ततश्च तेषां दुर्म्मारकतापेक्षया यथोत्तरं श्रैष्ठ्यमूह्यम् ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं परम्परया सर्वसाधारणतया च त्वया वयं सदा रक्षिता स्म एव । तर्हि विषवृक्षोऽपि सम्वर्ध्य स्वयं छेत्तुमसाम्प्रतमिति नीतिः कथं न स्मर्यतामित्याभिप्रेत्याहुः । विषजलाप्ययादिति । विषजलं कालियह्रदजलं तेन पीतेनाप्ययात् गवां गोपानाञ्च मरणात् व्यालराक्षसादघात् "रक्षो विदित्वाखिभूतहृत्स्थित," इत्यनेन तस्यैव व्यालरूपस्य राक्षसत्वेन निर्देशः कृत इति तस्माद्वालवत्सान् गिळितवतो वयं रक्षिता इति सर्वगोकुळजीवरूपाणां तेषां रक्षणेन गोकुलस्य रक्षणात् वयमपि रक्षिता इत्यर्थः । इति परम्परा दर्शिता । वर्षमारुतात् वर्षमिश्रान्मारुता त्तत्रैव वज्राश्म वर्षानिलैरित्युक्ता वैद्युतानलाच्च श्रीगोवर्द्धनधरणेन त्वया रक्षिता इति सर्वसाधारणता दर्शिता वृषमयात्मजादिति समाहारं वृषात् वत्साकारत्वेन गतादपि परिणामे वृहद्दर्शनात् वृषात् वत्सासुरात् मयात्मजात् तल्लीलाया अतिवाल्यचरितत्वेनैव निर्णेष्यमाणत्वात् पूर्वमेव व्योमासुराच्चेति पुनः परम्परा दर्शिता वराहतोको निरगादितिवत् । वृषात्मजाद्वत्सात् मयात्मजाद्व्योमाच्चेति वा । अथ सर्वमेव संगृह्य आहुः । विश्वतो भयादिति । तत्र तत्र योग्यतामाहुः । हे ऋषभ । सर्वश्रेष्ठ इति ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विषजलाप्ययात् विषजलेन विनाशात् ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च कृपया बहुभ्यो मृत्युभ्यो रक्षितवतोऽधुना दृशैव घातोऽनुचित इत्यभिप्रेत्याहुः । विषेति । हे ऋषभ श्रेष्ठ ! विषमयात्कालियह्रदजलाद्योऽप्ययो नाशस्तस्मात्तथा व्यालराक्षसादघासुराद्वर्षमारुताद्वैद्युतानलादशनिपातजादग्नेः वृषेऽरिष्टः तस्मान्मयात्मजाद्व्योमासुराद्विश्वतः अन्यस्मादपि सर्वतो भयाच्च कालियमर्द्दनादिभिः पुनः पुना रक्षिताः किमिदानीं केवलं दृशा मारयसीति भावः ॥ ३ ॥

अलुक् समासन्यायेन शरदुदाशय इत्येकं पदं शरदुदाशये शरत्कालसम्बन्धिसरोवरे साधु भूम्याद्युपद्रवमन्तरेण जातमुत्पन्नम् अत एव सत्प्रशस्तं थिकासिजं यत्सरजितं पद्मं तस्य उदरमरुणाय मानमन्तर्दलं तस्य श्रियं शोभां मुष्णातीति शरदुदाशये साधु जातसत्सरसिजोदरश्रीमुट्ट तया दृशा शुल्कदासिकाः क्रीतदासीः नो निघ्नतः मारयतः तेऽस्मदाशादिहनने किं वधो न भवति खड्गादेरप्यधिको वधोऽर्धरात्रेऽस्मत्त्याग इत्यर्थः । सुरतनाथ निधुवनवीर ! ॥ २ ॥ *

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

यद्येवमस्माकं वध एव तवोद्देश्यः तदा कथमुपसर्गेभ्यः पूर्वपूर्वहेतुभ्यो रक्षिताः स्म इति दर्शयन्ति । विषजलाप्ययादित्यादि विषजलाप्ययः कालियकलिलयमुना ह्रदो व्यालः अघासुरः स एव राक्षसः शरीरग्रासित्वात् वर्षादिः प्रसिद्ध एव कुपितशक्रकृतत्वात् वृषोऽरिष्टः मयात्मजो व्योमासुरः किं बहुना विश्वतो भयादेव तत्रापि मुहुर्वारंवारं नन्वेषां भवद्विधवधहेतुत्वं वा कुतः कुतो वा यूयं रक्षिता इति न वक्तव्यं व्रजस्थानां रक्षणमेवास्माकं रक्षणन्तेन व्रजोत्कर्षेऽस्माकमप्युत्कर्षो भवितुमर्हति तन्न चेदत एवास्माकं क्षोभ इत्याशयः ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अन्याः पुनः कोमलाः बहुधा त्वया रक्षिता इदानीमपि पालयेत्याहुः । विषजलाप्ययादिति । विषजलं कालीयह्रदजलं तत्पीत्वा सर्व एव बालका गावश्च मृताः ते पुनर्जीविताः व्यालाः सर्पाः कालीयसुदर्शनादयः राक्षसाः तृणावर्तादयः तेषामेकवद्भावः तस्मादपि रक्षिताः वर्षमारुतादिन्द्रकृतात्तत्रैव वैद्युतानि अनलो दवाग्निश्च तयोरप्येकवद्भावः वृषो योऽयं मयात्मजः व्योमासुरः तस्मादपि रक्षिताः न तासां भूतभविष्यद्विषयकपदार्थज्ञाननिर्बन्धोऽस्ति सर्वज्ञत्वात् किं बहुना विश्वत एव भयात् पालने हेतुः ऋषभेति भर्ता हि पालयत्येव अतः सर्वदा पालक इति इदानीमपि पालयेत्यर्थः । ते च मारका बाह्याः इदानीतनस्त्वान्तर इति सर्वथा पालनीयाः अन्याः पुनर्भगवतो महानुभावत्वं ज्ञात्वा तस्य स्वरूपं कीर्त्तयन्ति ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च जिघांसैव चेत् तव वर्त्तते तदा पूर्वपूर्वविपद्भ्यः किमिति रक्षिताः रक्षित्वा वधः खल्वनुचित एवेत्याहुः । विषमयाज्जलात् योऽप्ययस्तस्मात् । व्यालराक्षसादघासुरात् वर्षादिन्द्रकृतवृष्टेः । मारुतात् तृणावर्त्तात् । वैद्युतानलादिन्द्रकर्तृकवज्रक्षेपात् । वृषादरिष्टात् । मयात्मजाद्व्योमात् । विश्वतः अन्यस्मादपि सर्वतो भयात् कालियदमनादिना हे ऋषभ पुरुषश्रेष्ठ! त्वद्रक्षणादेव त्वदेकप्राणा वयं रक्षिताः । वर्षादिभ्यस्तु सर्वव्रजरक्षणादेव तदन्तःपातिन्यो वयमपि रक्षिताः । अत एव रक्षके

---

*अयं विजयध्वजमते षष्ठश्लोको द्वितीयत्वेन पठितः द्वितीयश्च तृतीयत्वेनेति तदनुसारेणैव टीका विद्यते ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्वयि विश्वस्य पञ्चशरजालोपशमार्थं वयमागताः त्वया तु ततोऽपि कोटिगुणितया स्वविरहानलज्वालया दन्दह्यामहे इति विश्वस्तघातादपि त्वं न बिभेषीति भावः । अतः अरिष्टव्योमवधस्य भावित्वेऽपि गर्गभाण्डर्यादिमुखतः कृष्णजन्मपत्र्यां श्रवणस्य भूतत्वेनैव भूतनिर्देशः ॥ ३ ॥

केनचित्कृता विशुद्धरसदीपिका

किञ्च मुहुर्मुहू रक्षया संवर्द्धितायास्तदाशाया श्छेदोऽनुचित इत्याहुः । विषेति । विषयुक्तजलं कालियह्रदजलमितिशाकपार्थिवादि तेनाप्ययात् तत्र या गवादि रक्षा सा स्मदाजीव्यान्नादिसंबन्धेनास्मास्वेव पर्य्यवस्यतीति किन्त्वास्मत्संबन्धेनैव तत्तदनुष्ठानमिति भावः एवमग्रेऽपि । व्यालराक्षसादघासुरात् रक्षोविदित्वाखिलभूतहृत्स्थित इति तत्रैवोक्तेः वर्षमारुताद्वैद्युतानलादित्येकमपि द्विधोक्तमुपकारबाहुल्याभिप्रायेण सीदत्पालपशुस्त्रीत्याद्युक्तेः वृषमयात्मजात् तत्र वृषात्मजाद्वत्सासुरात् मयात्मजाद्व्योमासुरात् समासैनैक्याव्यवसायाच्छलयोरव्यवहितत्वमप्युक्तं सर्वमेव संगृह्याहुः । विश्वतो भयादिति । यद्वा साकूताभिधानं पूर्वश्लोकोक्तसुरतनाथ वरदेत्यादिना परममनोहरे त्वय्येव सक्तानामैहिकामुष्मिकविषयान्तरानासक्तिरपि त्वयैव कारितेति भावः । हे ऋषभ ! प्राणवल्लभ संबन्धोऽपि सूचितः ॥ ३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

किञ्च स्वरक्षितहनने सौनकत्वापत्त्या गोपालत्वक्षतिरित्याशयेन तत्कृतां बहुधा रक्षां स्मारयन्ति । विषजलाप्ययादिति । वयं त्वया कालियविषव्याप्तयमुनाजलाप्ययात् त्वां यमुनाहृतं विलोक्य दुःखैः कल्पसाहस्रात्तत्प्रवेशोद्यतानां नः सम्भाव्यमानात्क्षया ततस्त्वरितं हृतसुखं हित्वैव बहिरागमनेन रक्षिताः अधुनातु त्वद्विरहेण सुधाकरकरव्याप्तं विश्वमेव विषजलसिन्धुरिवास्मान् स्नावयति भवानेव तदप्ययादव्यात् तथा कालियकुलव्यालानां रमणकद्वीपप्रेषणेन त्वया वयं रक्षिता अधुनातु त्वद्रमणकद्वीपे विहारपुलिने सर्वा गोप्यो विरहविषविषमपञ्चफणनखमणिधरव्यालम्बिभुजव्यालयुगलगुञ्जास्तास्ता विरहविषयोपरामेण विशालभुजव्यालानी वनमालत्वसम्पादनेन ततो भवतैव रक्षणीयाः तथा राक्षसेभ्यः वकीवकादिभ्यो मुहुरक्षितास्तत्र राक्षसानां व्रजप्रवेशे सर्वेषां भयसम्भावनाभिप्रायेण वा ततः स्वरक्षणोक्तिः स्वीयानां जीवनरूपस्वात्मन एव रक्षोरक्षणेन स्वावनाभिप्रायेण वा अधुना तु 'द्वा सुपर्णा सयुजा सखाया' इतिश्रुतिसिद्धविश्वमित्रेण त्वयैव स्वविरहद्वारा दुःखप्रदतया विश्वामित्रतां यातेन विश्वामित्रेण प्रहितः प्रहितोऽपि स्वमनोजो मनोजो रक्ष इव नो भक्षणे प्रवृत्तस्त्वदक्षिणतयैव जक्षणादिना ततो रक्षणसम्भावना त्वद्वामत्वे तु वामानां तव वामतां कामेन निकामतयोपरामेण नामापि नावशेषणीयं व्यालराक्षसादित्यत्र जातावेकवचनं निर्दिश्य पुनर्द्वन्द्वैक्यमेवमेवाग्रेऽप्यूहनीयं तथा स्वभागतर्षगतस्वोत्कर्षसामर्षसहस्रदृक्कृतवर्षोद्धर्षाद्रिमिकुर्व्यैव कृष्णेन स्वकरकञ्जे कञ्जवद्धारणेन तत्त्रासवारणेन दुःखनिवारणं कृतमधुना तु सहस्रदृशः सदृश एव वारिधारासारैश्चतुर्दशभुवनात्मकस्वापिण्डब्रह्माण्डान् प्लावयन्ति वहुमेरुयुगस्वसखीकुचगिरिकरधारणेन त्वयैव स्वपक्षावनदक्षतया रक्षाविधेया तथा तत्कृतात्कृतान्तकृताद्दुरतिक्रममारुतात् वृष्टि वातात्त्वयाविता बताधुनातु तद्विरहतापं बिभ्राणो घ्राणान्निःसृतः स्वप्राणो जगत्प्राणश्च प्राणहरो जातस्तत्त्राणन्तु तव मुखसौरभावघ्राणेनैव तथा तत्प्रयुक्ताद्वैद्युतादपि त्वयैवाविता अधुना तु त्वदुत्कटविरहात्स्वकाटिनिकटपटतटकाञ्चनाञ्चलाश्चञ्चलाश्चञ्चलवतापप्रपञ्चनेन तनुतञ्चनाजाताः त्वयैवैतत् दुःखवञ्चरञ्चनीयं तथा अनलात् द्विविधवनोद्भूतादग्नेस्त्वया रक्षिता अधुना तु कामविरहानलाभ्यामनलाभ्यां सकला अबला अलास्विकलाः कृताः बहिः प्रतिद्रुमारुणसुमनांसि वनदाववदरुणाप्रावरणान्याभरणमणिगणाश्च करालाग्निज्वालतदङ्गारवद्दाहका जाता स्त्वमेवावेति भावः वृषमयात्मजादित्यत्र वृषोऽरिष्टो मयात्मजो व्योमस्तयोर्द्वन्द्वैक्यं तस्मात् तथा चारिष्टाद्रक्षणस्य भावित्वेऽपि भगवत्प्रेमाविर्भूतसार्वज्ञ्येन तदुक्तिः यद्वा वृषमययोरात्मजौ वत्सव्योमौ तयोः समाहाराभिप्रायेणैकवचनं तस्मात् वयं त्वया रक्षिता अधुनातु त्वाम्विना पशुवृत्तीनां नः सर्वे पशवो वृषवत्सवद्भयावहा व्योमगतसोमः सोमयुतव्योमश्च व्योमोद्भवस्तोमेन रोमाञ्चको जातः तथाच विश्वतो भयान्मुहुस्त्वद्राक्षिता अधुना विश्वतोभयव्याप्ता इतिस्वरक्षितानां स्वविरहेण बधोऽनुचित इति त्वया दृश्यतामिति यथासम्भवं सर्वत्र वाक्यशेष उपादेयः नच भवतीनां मद्दोषेण मयोपेक्षा कृतेति वाच्यम् आश्रितेषु गुणदोषदृष्ट्यनौचित्यात् तदुक्तं नीतिविद्भिर्दोषाकरोऽपिकुटिलोऽपि कलङ्कितोऽपि मित्रावसानसमये विहितोदयोऽपि चन्द्रस्तथापि गिरिशः शिरसा बिभर्ति नैवाश्रितेषु गुणदोषविचारणा स्यादिति ॥ ३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

किञ्च बहुभ्यो मृत्युभ्यो रक्षितवान् विरहाग्निना मारणाय प्रवृत्तौ निमित्तं न विद्म इत्याशयेनाहुः । विषेति । विषजलं कालियह्रदजलं तेनापि गोपानां नाशस्तस्मात् व्यालराक्षसात् सवत्सपाल गिलिनोऽघासुरात् वत्सपालादिरक्षणेन परंपरया वयमपि रक्षिताः वर्षयुक्तात् मारुतात् वैद्युतानलादशनिपातोच्चन्द्रकृताद्गोवर्द्धनधारणेन साक्षात् वृषो वृषभासुरोऽरिष्टः मयात्मजात् व्योमासुरात् तच्चरितमग्रे वक्ष्यमाणमपि रासोत्सवात्पूर्वं जातमिति द्रष्टव्यं तल्लीलाया अतिवाल्य एवाऽयोग्यत्वात् किम्बहुना अन्यस्मादपि सर्वतो भयात् हे ऋषभ ! सर्वोत्तम वयं रक्षितास्तथा च यथा प्रेष्ठत्वात्पूर्वं रक्षितास्तथेदानीमपि दर्शनप्रदानेनास्मद्रक्षणमेवोचितं नतु स्वस्वभावत्याग इतिभावः । अनभिज्ञापक्षे तत्र तत्र स्वरक्षणेन यथा वयं रक्षितास्तथेदानीमपि स्वप्रकटनेन रक्षणीया इति भावः । मानिनीपक्षे ननु यदि भवतीनां वधो ममाभीप्सितः स्यात्तर्हि भवत्यो न रक्षिताः स्युरित्याशङ्क्याहुः । विषेति । तथा च स्वहस्तेन वधार्थमेव रक्षिता इति वर्तमानकालीनया प्रवृत्त्या ज्ञायत इति भावः । तत्र तत्र रक्षणपरायणश्रेष्ठत्वेन ख्याते त्वयि विश्वस्तानामस्माकं घातो नोचितो विश्वासघाताख्यकर्मकर्तृत्वायोग्यत्वाच्छ्रेष्ठस्य तवेति सम्बोधनाशयः निवृत्ति पक्षे किञ्चास्माकमपि तव तत्त्वज्ञानादेव रक्षणं भवति नान्यथेत्याहुः । विषेति । ते तव ज्ञानादिति शेषः हे ऋषभ श्रेष्ठऽस्म-

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ॥
विखनसार्थितो विश्वगुप्तये सख ! उदेयिवान् सात्वतां कुले ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रातीतपुरुषोत्तम ! तव ज्ञानाद्धेतुभूतादधिकारिभिस्त्वदनुग्रहेण सम्पादिताः पुनः पुनर्वयं रक्षिता जाताः परमात्मज्ञानस्य विशेषणानि विषरूपस्य "बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यती"ति भयहेतुत्वेनाभिमतस्य जलस्य डलयोरभेदादज्जस्य उत्पत्त्याश्रुतस्याप्ययात् पलायनकरात् पुनश्च व्यालानां बहुश्रुतत्वेऽपि विपरीतार्थकल्पकत्वात्खलानां राक्षसात् राक्षसवद्भयं "व्यालो दुःखे गजे सर्पे खले श्वापदसिंहयो"रिति मेदिनी वर्षस्य दुःखवर्षो मारुतात् अथवा तन्नाशकरात् "तत्र को मोहः कः शोक एकत्वमनुपश्यत" इत्यादिश्रुतेः तथा वैद्युताद्विद्युताग्निप्रभं तृणपर्णादिस्थानीयमज्ञानं "विद्युत् तडिति सन्ध्यायां स्त्रियां त्रिषु तु निष्प्रभे" इति मेदिनी तदेवं वैद्युतं तत्सम्बन्ध्यहङ्कारादिकं वा तस्यानलादनलवद्दाहकात् तथा वृषमयात्मजात् भगवदाराधनलक्षणं निष्कामं कर्म नित्यादिसन्ध्यान्नं वृषशब्दप्रतिपाद्यं तन्मयादात्मनोऽन्तः करणाज्जातात् अत एव विश्वतः सर्वतः अभयात् सर्वप्रकारेणानुच्छेद्याद्वैतवादेन सर्वभयोच्छेदकरादिति वा द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे ऋषभ ! श्रेष्ठ विषजलात् योऽप्ययो नाशस्तस्मात् व्याळराक्षसादघासुरात् वर्षात् मारुताच्च वैद्युतानलात् अशनिजादग्नेः वृषात् वृषभासुरात् मयात्मजात् व्योमासुरात् विश्वतोऽन्यस्मादपि सर्वतो भयाच्च ते त्वया वयं रक्षिताः इदानीमपि विरहजादग्ने रक्षां कुर्वीति भावः ॥ ३ ॥

भाषा टीका ।

हे प्रभो ! पुरुष श्रेष्ठ विष के जळ ते सर्प ते राक्षस ते वर्षा ते पवन ते अग्नि ते वृषासुर ते मय के पुत्र ते और भी नाना प्रकार के भयों ते वारं वार आपने हमारी रक्षा करी है तो अवहु आप हमारी रक्षा करो ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अपि च विश्वपालनायावतीर्णस्य तव भक्तोपेक्षात्यन्तमनुचितेत्याशयेनाहुः । न खल्विति । हे सखे ! भवान् खलु निश्चितं यशोदासुतो न भवति किन्तु सर्वप्राणिनां बुद्धिसाक्षी ननु स किं दृश्यो भवति तत्राहुः । विखनसा ब्रह्मणा विश्वपालनाय प्रार्थितः सन् सात्वतां कुले उदेयिवानुदित इति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विचित्रक्रीडाकारिसाक्षादेतद्वर्त्तमानरूपो बहिरेव केवलं भवान् न भवति किन्तु अन्तरप्येवं वर्त्तते इत्याहुः । अखिलेति । अतोऽस्माकमिदं हृत्तापवृत्तं भवान् जानात्येव किन्तस्य बहुवर्णनेनेति भावः । ननु सत्यञ्जानाम्येव किन्तु कृत्यं सर्वमवसर एव सम्पद्यते तत्राहुः । विखनसेति । स्वभक्तवरप्रार्थनया भक्तकुलेऽवतीर्णेन भवता ऽवश्यं भक्ताः अनवसरेऽपि परिपाल्या एवेति त्वत्प्रियाणामस्माकमप्यवसरापेक्षा न युक्तेति भावः । स्वयमधुना भक्तापेक्षया स्वकृतनिबन्धस्याप्यतिक्रमणात् तच्चाग्रे गुरुपुत्रानयनादौ व्यक्तमेव ननु यूयं न मद्भक्ता इतिचेत्तथापि परिपाल्याः श्रीब्रह्मणावतारेऽस्मिन् सर्वेषामेव पालनस्य प्रार्थनादित्याहुः । विश्वगुप्तय इति । अतो निजभक्तवरप्रार्थनस्यावश्यपाल्यत्वाद्वयं नोपेक्ष्या एवेति भावः । किञ्च तत्रापि भावविशेषभाजो वयं विशेषतः परिपाल्या इत्याशयेनाहुः । सखे ! इति अन्यत्तैर्व्याख्यातं यद्वा अन्तरात्मदृगपि भवान् गोपिकानन्दनो न भवति खलु किमपितु भवत्येव कथं तदाहुः । विखनसेति । अतो वयमानन्दनीया एवेति भावः । यद्वा गोपिकानन्दनः कारुण्यादिगुणरूपलीलादिनिजमाधुर्य्यप्रकटनपरः श्रीकृष्णो भवान् न भवति किन्तु परमात्मैवेति परमदुःखेन ज्ञानपक्षमङ्गीकृत्याहुः । न खल्विति । खलु निश्चितम् इत्यधुना ज्ञातमिति सर्वत्राग्रेऽपि शेषः किञ्च न विश्वस्य गुप्तिः अविश्वगुप्तिस्तस्यै विश्वसंहारायैवेत्यर्थः । सात्वतां यादवानामेव कुले नतु गोपकुले जात इति च अन्यत्समानम् अथवा हे सखे ! इति सोल्लुण्ठं नञः प्राङ्निर्देशात् सर्वपदैरेवान्वयः तेन हेऽसखे प्रतिकूलेति खलु वितर्के श्रीयशोदानन्दनो न भवति तथा सति तत्सम्बन्धेन दामोदरत्वादिभक्तवश्यताभरप्रदर्शनेन चास्माकमुपेक्षानुपपत्तेः यद्वा गोपिकाः ब्रजसुन्दरीः सर्वा आनन्दयतीति तथा सति तद्वैपरीत्यासम्भवात् किंच अखिलदेहिनामन्तरात्मदृगपि न भवति तथा सति अस्मद्दुःखज्ञानसम्भवात् नच ब्रह्मणा विश्वगुप्तये ऽर्थितः तथा सत्यस्माकमपि रक्षाया योग्यत्वात् सात्वतां भक्तानां कुले च नोदेयिवान् तथा सति तत्सम्बन्धेन निरुपाधिकृपालुतासम्भवादिति । यद्वा सः प्रसिद्धो भवान् अखिलदेहिनामन्तरात्मदृगिति विश्वगुप्तये ब्रह्मणा सात्वतां भक्तानां कुलेऽवतरितुमर्थितः भवान् खलु खे आकाश एव उदेयिवान् इत्याकाशगुणत्वेनासङ्गोदासीनत्वाद्भवान् गोपिकानन्दनो न भवतीत्यर्थः । यद्वा उ इति पदं सम्बोधने उ भो गोपिकानन्दन विखनाः पितामहः तेन च कृष्णस्य पितामहो गृह्यते प्लवगसैन्यमुलूकजिताजितमितिवत् अत्रोलूकशब्देन कौशिक उच्यते तेन च शक्रः नात्र नेयार्थतादोषः तस्य काव्यैकविषयत्वात् अतोऽयमर्थः तव पितुः पित्रा विश्वगुप्तये विश्वेषां सकलानां ब्रजवासिनां गुप्तये रक्षायै भवान् अर्थितः सन् सात्वतां भक्तानामेषां गोपानां कुले उदेयिवान् साम्प्रतं रक्षा दूरेऽस्तु हृदयदुःखमपि न जानातीत्याहुः । अखिलदेहिनामन्तरात्मदृक् अन्तर्हृदयज्ञोऽपि न भवति वाढमन्तर्दह्यमानानामस्माकं यदेतां महार्त्तिं विनाशय-

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

तीत्यर्थः । व्रजेन्द्रपित्रा सर्वोत्तमसन्तानार्थं विष्णुराराधित इति प्रसिद्धः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं प्रभावत्वादिदमनुमिमीमह इति स्तुत्यर्थमाहुः । न खल्विति । श्रीगोपेश्वर्य्या अपि स्वकुलश्रेष्ठत्वेन स्वान्तःपातं विधाय स्वदैन्येनैव न्यूनतयं किन्ने दोषाय अनोऽस्माकमिदं हृत्तापवृत्तं भवान् जानात्येव किन्तस्य बहुवर्णनेनेति भावः अवतारकारण-मनुमीयते ॥ विखनसेति । अतः स्वभक्तवरप्रार्थनया भक्तकुलेऽसि-न्नुदितम त्वत्वेनापि भवता भक्ता अनवसरेऽपि परिपाल्या एवेति त्वत्प्रियाणामस्माकमप्यवसरापेक्षा न युक्ता । सोऽयन्तु परम एवावसर इति भावः । ननु यूयं न मद्भक्ता इति चेत्तथापि परिपाल्याः श्रीब्रह्मणा किल सर्वेषामेव पाळनस्य प्रार्थनादित्याहुः । विश्वगुप्तये इति । वस्तुतस्तु भक्तेष्वपि भावविशेषभाजो वयं विशेषतः परिपाल्या इत्याशयेनाहुः । सखे इति । यद्वा ऐश्वर्यज्ञान-मिदं मुन्यादिमुखतः तन्माहात्म्यश्रवणेन ततो निजभावानुरूप्येण श्रीगोपिकानन्दनतामयकेवलमाधुर्यानुभवेऽपि नदेतदैश्वर्यं याच-कलीला निजाभीष्टसाधनमात्राय प्रयोजितमिति श्रेयम् एवमुत्तर-त्रापि । अन्यत्तैः । यद्वा खल्विति प्रतिषेधे खलूक्त्वेतिवत् । अन्तरात्मदृगपि भवान् गोपिकानन्दनो न भवति अल्पपि तु भवत्येव इत्यर्थः । कथं तदाहुः । विखनसेति । अतो वयं पाल्या एवेति भावः । सेर्ष्यमाहुर्गोपिकायाः परमदयालुतया श्रीव्रजेश्वर्या नन्दनो भवान्न भवति किन्तु परमात्मैव स्वतः सर्वत्रौदासीन्यात् एवं नूनमपि ब्रह्मभक्तिवशीकृतत्वादेव भवान् एतन्नन्दनन्दनता-व्याजेन विश्वगुप्तये प्रकटोऽस्ति तत्र च बाल्यक्रीडामयाद्यनुवृत्त्या-स्माकं सखिताञ्च प्राप्तोऽस्तीति भवता प्रति पाल्या एव वय-मित्याहुः । विखनसेति । अथवा नञः प्राङ्निर्देशात् सर्वपदैरेवान्वयः तेन हे असखे प्रतिकूल । खलु वितर्के । भवान् श्रीयशोदा-नन्दनो न भवति तत्र तत्सम्बन्धेनास्माकमुपेक्षानुपपत्तेः तथा-खिळदेहिनामन्तरात्मदृगपि न भवति तत्रास्मद्दुःखज्ञानसम्भवात् न च ब्रह्मणा विश्वगुप्तयेऽर्थितस्तत्रास्माकमपि रक्षाया योग्य-त्वात् । सात्वतां भक्तानां कुले च नोदेयिवान् । तत्र तत्स-म्बन्धेन निरुपाधिकृपालुतासम्भवादिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न खल्विति । न केवलं गोपीतनयत्वं किन्तु अखिलदेहवता-मन्तरात्मातो दृक् दृष्टिश्च सत्ताहेतुः ज्ञानप्रदश्चेत्यर्थः । अन्तः प्रविष्टः शुभाशुभसाक्षीत्यर्थः । विखनसा विरञ्चेन ॥ ४—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च निखिळजगत्पाळनार्थमवतीर्णस्य तत्रापि स्वाश्रितप-क्षपातिनस्तवाश्रितोपेक्षानुचितेत्यभिप्रेत्याहुः । न खल्विति । हे सखे ! भवान् खलु नूनं यशोदासुतो न भवति प्राकृतः केवलक्किन्त्वखिळ-देहिनामन्तरात्मातो दृक् कर्तरि क्विप् अन्तःप्रविष्टः शुभाशुभ-साक्षी परमात्मेत्यर्थः । स किं कर्मायत्तदेहभाग्भवति नेत्याहुः । विख-नसा विरञ्चिना विश्वपालनाय प्रार्थितः सात्वतां भक्तानां कुले उदेयिवान् स्वेच्छयावतीर्णः नतु प्राकृतवत्कर्मणा जात इत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीमपि अस्मद्रक्षा भवता कार्या तथा यथा पुरा कृता इत्याशयेनाहुः । विषेति । विषजलाशयात् विषयुतयमुनाहृदात् यद्वा विष-जलपानेन आशयो दीर्घनिद्रामरणं तस्मात् व्याळात्सर्पात् राक्ष-सात् तृणावर्तनाम्नः वर्षयुक्ताद्वायोः वैद्युतानलात् निर्घातलक्ष-णाद्वेः वृषमयाद्वत्सासुरनिमित्ताद्भयात् किम्बहुना हे वृषभ ! श्रेष्ठ विश्वतो मुखाद्भयात् ते त्वया वयं मुहुः रक्षिता इत्य-न्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न खल्विति । अथवा पूर्वानुसारेणैवाश्चर्यमनुमीय स्तुत्यर्थमाहुः न खल्विति द्वाभ्याम् । संस्तुतेर्भयाव तत्सम्बन्धिनः सर्वस्मा-देव स्वगोकुले सर्वसम्पत्तिवशीकरणात् श्रियः करामिव साक्षा-द्वहाति यस्तं तव ॥ ४—१३ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

अपिच केचित्त्वां गोपिकासुतमेव वदन्ति केचित्सर्वप्राणिना-मन्तर्यामीति केचन विश्वरक्षणार्थमतीर्णोऽसीति मतत्रयं प्रसिद्धं तत्रास्मान् प्रति मतत्रयभिन्नवक्रयवहरसि तत्केयं ते लीलेति दर्शयति न खल्वित्यादि । खलु भोः कृष्ण भवान्न गोपिकानन्दनः तथा चेदस्मासु सजातीयासु कृपाभविष्यत् नाप्यखिलदेहिनाम-न्तरात्मदृक् तथा सत्यस्माकमप्यन्तरात्मदुःखज्ञताभविष्यत् नापि विखनसा ब्रह्मणार्थितः न विश्वगुप्तये सात्वतां कुले उदेयिवान् तथा सति विश्वान्तर्वर्तिनीनामस्माकमपि गुप्तिरभविष्यत् तस्मा-दद्भुतैवेयं तव लीलेति भावः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततश्च ज्ञानिभ्यो यथा मोक्षं प्रयच्छति तथास्मभ्यमपि अस्मदुचितं मोक्षं दास्यतीति तं स्तुवन्ति न खल्विति । भगवतो नन्दसूनुत्वे सर्वे उपालम्भा युक्ता भवन्ति तदेव नास्तीति सर्वमयुक्तमुपालम्भनं खल्विति निश्चये नात्र-तिरोहितामिव गोपिकाया यशोदाया नन्दनः पुत्र इति तथा सति यथा त्वया स्वाधीनः कृतः ज्ञातो वा तथा गोपिका-नामपि भवेत् गोकुलस्वामिपुत्रत्वात् तुल्यतायामेव हि विवा-योनिसम्बन्धः किंच न केवलं भवान् वैकुण्ठाधिपतिः पुरुषोत्तमः किंतु अखिलदेहिनां सर्वेषामेवास्मदादीनामन्तरात्मान्तःक-रणं पश्यतीति यद्यस्मद्धृदये तादृशं तापं पश्येत्तदा प्रसन्न एव भवेत् अतो नास्मिन् वक्तव्यं किंचित् किंच आगतस्यास्म-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

दादीनां परिपालनार्थमेव यदि जानीयात् एता नङ्क्ष्यन्तीति तदा परिपालयेत् रक्षणार्थं च प्रार्थित एव ननु स्वेच्छया समागतः तदाहुः विखनसार्थित इति । विखना ब्रह्मा विशेषेण खनतीति सर्वथा वेदार्थविचारकः अत एव वैखानसं मतं ब्रह्मणा कृतं भगवद्भजनप्रतिपादकं तेनैव मार्गेण पूजां भगवान् गृह्णातीति वेङ्कटादौ तथैव पूजा अतः सर्वेषां पूजामपि ग्रहीतुं ब्रह्मणार्थितोऽपि विश्वगुप्तये इति । मुख्यं प्रयोजनम् एवमन्तरात्मत्वात् सर्वेषामेव जीवानां भवान् सखा तादृशः लोके सख्यं प्रकटयितुं सात्वतां यादवानां वा कुले उदेयिवान् प्रादुर्भूतः अत एतदर्थमेवागतः पूर्वमपि सखा यथेच्छमेव प्रेरयसि आगतस्य पुनर्विशेषो वक्तव्यः सखात्मनिवेदनरूपो भवति अतो वयं किं विज्ञापयामः यथोचितमेव कर्त्तव्यमिति भावः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अयि शश्वदसमीक्ष्यभाषिण्यो गोपाल्यस्तिष्ठत सर्वानन्दकन्दो नन्दनन्दनोऽहं स्त्रीवधपातकी विश्वस्तघाती च युष्माभिर्निर्द्धारितः तदितो निःसृत्य रहसि क्वचिदेवं स्थास्यामि यथा जन्ममध्ये सकृदपि मद्दर्शनं न प्राप्स्यथेति तदीयभीषणोक्तिमाशङ्क्यानुतप्तास्तं प्रसादयितुं स्तुवन्ति । नेति । भवान् गोपिकानन्दनः खलु न भवति किन्त्वखिलदेहिनामन्तरात्मा अन्तःकरणप्रेरकः दृग् द्रष्टा चेत्यन्तर्यामी भवतीति भाण्डरिगार्गि पौर्णमास्यादि मुखादश्रौष्म इत्यतो यथास्मान् प्रेरयति तथा ब्रूमहे इत्यतो मा कुप्य प्रसीद । त्वदाविर्भावकारणं च श्रुतमित्याहुः विखनसा । ब्रह्मणा विश्वपालनाय प्रार्थितः सन् सात्वतां यदूनां कुले उदेयिवान् श्रीयशोदागर्भोदयशैलादाविर्भूतः । नन्वेवञ्चेज्जानीध्वे तत् किमिति रूक्षं ब्रूध्वे तत्राहुः । हे सखे ! इति त्वयैव सख्यरससिन्धौ वयं निमज्जिता इति परामृश्य विश्वं पालयन् विश्वमध्यवर्त्तिनीरस्मानपि पालय कृपयैवेति भावः । यद्वा स्वप्रेयसीनामेवं दुःखं द्रष्टुं नृदेवतिर्यगादिषु मध्ये कोऽपि न समर्थः । यथा त्वं दुःखं पश्यन्नपि सुखमास्से तस्मादेवं वितर्कयाम इत्याहुः । नेति । गोपिकायाः श्रीयशोदायाः परदुःखलवेऽपि श्रुतचित्तायास्तस्याः कुक्षौ त्वं न जातोऽसि तत् कुक्षेरेकस्यापि लक्षणस्य त्वय्यनुपलम्भादिति भावः । तर्हि कोऽहं त्वं सर्वप्राणिनामन्तर्यामीति वितर्कन्ते । स एव जीवानां दुःखं पश्यन्नपि तदन्तः सुखं वसति । उदासीनशिरोमणेस्तवात्राविर्भावेऽपि कारणं न जानीम इत्याहुः । विखनसा ब्रह्मणा स्वसृष्टिवृद्धिमभीप्सता विश्वगुप्तये विश्वस्मिन् जगत्यत्र गुप्तये त्वं प्रार्थितः त्वद्भक्त्या जीवा मुच्यन्त इत्यतस्तथा त्वमवतीर्य गुप्तस्तिष्ठ यथा केऽपि त्वामीश्वरं न मन्यन्ते । तदा च तवेश्वरत्वममन्यमानानामीश्वरानुवर्त्तिनामपि जरासन्धादिवदसुरत्वमेव भविष्यति तत एव मे सृष्टिवृद्धिर्भवित्रीति ब्रह्मवाञ्छितसिद्ध्यर्थं परदारपरद्रव्यचौर्यमात्सर्यहिंसादम्भादिकं स्वप्रतिकूलं धर्मं स्वगोपनार्थमङ्गीकरिष्यन् दुस्त्यजं स्वधर्ममौदासीन्यञ्चाजहदेव सात्वतां कुले उदेयिवान् । सखे ! इति परदारग्रहणाद्वास्माकं सखाप्यभूरिति भावः ॥ ४ ॥

केनचित् कृता विशुद्धरसदीपिका ।

तदेवं प्रभावत्वादिदमनुमिमीमह इति स्तुत्यर्थमाहुः । न खल्विति । श्रीगोपैश्वर्य्यां अपि स्वकुलश्रेष्ठत्वेन स्वान्तःपातं विधाय स्वदैन्येनैव तन्न्यूनोक्तिर्न दोषाय अतोऽस्माकं हृत्तापस्य प्रवृत्तिं भगवान् जानात्येव किं तस्य बहुवर्णनेनेति भावः अवतारकारणमनुमिमते । विखनसेति । अतः स्वभक्तप्रार्थनया भक्तकुले ऽस्मिन्नुदितभावत्वेन भवता भक्ता अनवसरेऽपि परिपाल्या एवेति त्वत्प्रियाणामस्माकमप्यवसरापेक्षा न युक्ता सोऽयन्तु परम एवावसर इतिभावः । ननु यूयं न मद्भक्ता इतिचेत्तथापि परिपाल्या इत्याहुः । विश्वगुप्तय इति । तत्रापि भावविशेषभाजो वयं विशेषतः पाल्या इत्याहुः । सखे इति । ऐश्वर्यज्ञानमिदं मुन्यादिमुखतस्तन्माहात्म्यश्रवणेन ततो निजभावानुरूप्येण श्रीगोपिकानन्दनतामयकेवलमाधुर्यानुभवेऽपि तदेतदैश्वर्यं याचकरीत्या निजाभीष्टसाधनमात्राय प्रयोजितमिति ज्ञेयं यद्वा सेर्ष्यमाहुः । गोपिकायाः परमदयालुतयास्मत्पालिकायाः श्रीव्रजेश्वर्या नन्दनो भवान्न भवति किंतु परमात्मैव स्वतः सर्वत्रौदासीन्वान् एवमपि विश्वगुप्तये प्राकटनादपि तदन्तः पातिन्यो वयं पाल्या इत्यर्थः । यद्वा सखे सच्छिद्रे प्रेमशून्ये सात्वतां कुले कंसादिक्रूरजनबहुले उदेयिवान् जात इत्यर्थः । प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इति गर्गोक्तेः अत्र नन्दनन्दन इत्यनुक्तिः सम्बन्धस्फूर्त्या लज्जोत्पत्तेः ततश्चैताः स्वीयाभिमानिन्यो नन्दव्रजकुमारिका एव वरदेत्यादि ज्ञापकात् गाऽनन्यधीरतया प्राथम्यं तत एवेति ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

स्वस्वैर्येण दुःखाभिक्षत्वरक्षणसमर्थत्वाद्याविष्कुर्वन्त्यः प्रार्थयन्ति । न खल्विति । खलु भवान् गोपिकाया नन्दन एव न येन नास्मद्दुःखं जानाति यद्वा भवान् गोपिका "नाहं प्रकाशः सर्वस्य योगमायासमावृत" इत्यादिवचनात् स्वरूपानन्दावरका माया तस्याः कार्यं न भवति अपितु अखिलदेहिनामन्तरात्मा च दृक् चेति तथा तत्रान्तःकरणगताभासस्य साक्षिभास्यत्वे सति प्रमातृत्वाद्बहिरात्मत्वं साक्षिणस्तु अन्तरात्मत्वं तस्यान्तरात्मत्वे हेतुर्दृगिति तदुक्तं भगवत्पूज्यपादैः रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृष्टृ मानसं दृश्या धीवृत्तयः साक्षी दृगेव न तु दृश्यते इति साक्षात् भगवतापि—

> इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
> मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥
> श्रुत्यापि इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
> मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
> महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
> पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिरिति ॥

तथाचान्तरात्मत्वाद्विच्छेदानौचित्यं दृग्रूपतया स्वप्रकाशत्वेनाज्ञानौचित्यमिति भावः । यद्वा अन्तरात्मनामन्तः करणानां दृक् प्रकाशक इति अस्माद्दुःखं ज्ञात्वाप्युपेक्षानुचितैव नन्वहमेतादृशश्चेत्कथङ्गोपिकानन्दनताङ्गतस्तत्राहुः । विखनसार्थित इति । विश्वगुप्तये ब्रह्मणार्थितः सात्वतां कुले यादवानां वंशे उदेयिवान् नतूत्पन्न इति श्रुति रूपतया प्रेमोद्भूतसार्वज्ञ्येन वोक्तिः यद्वा सात्वतां सहजभक्तानां व्रजवासिनां कुले समूहे उदेयिवान् अतो ब्रह्मणा

श्रीरामनारायणकृतभावभावविभाविका।

विश्वगुप्तये प्रार्थितत्वान्नोऽपि विश्वबाह्यत्वाभावादसुरेभ्य इव
विश्वस्य स्वविरहदुःखादस्मद्रक्षा विधेया विशेषतो व्रजवासिनो नामु-
पेक्षानर्हा तथा सखे ! इति सम्बोधनेन सखीनामुपेक्षासुतरामयोग्येति
भावः। यद्वा अन्तरात्मदृगपि भवान् खलु गोपिकानन्दनो न भवतीति
नेति अपितु भवत्येव ब्रह्मणार्थितत्वात्तथा च तत्सम्बन्धेन नोपेक्षा
वयं यद्वा नकारस्य प्रागुक्त्या सर्वपदैरन्वयस्तथा च भवान् खलु
गोपिकाया यशोदाया नन्दनोपि न भवति तथात्वे तस्याः
सरलकृपालुस्वभावत्वात्तव कौटिल्यनिष्ठुरते न स्यातां जाति-
सम्बन्धेनापि अस्मासु करुणैव जायेत तथाखिलदेहिनामन्त-
रात्मा च न भवति तथाच विरहसम्भावनैव न स्यात् तथान्तरात्म-
दृगपि न भवति तथात्वेऽस्मदुःखं ज्ञात्वा मनोद्वेदेव विश्वगुप्तये
विखनसार्थितोऽपि न भवति तथात्वे विश्वान्तर्गतानां नो विरहेण मारणं
न घटेत सात्वतां कुले भक्तसमुदायेऽपि नोदेयिवान् तथात्वे भक्तेषु
वात्सल्यं स्यात् तथा असखे इति सम्बोधनेन श्रुतिसिद्धः समानतः
सर्वसखा विशेषतो नित्यविहार्य्यस्मत्सखा च न भवति तथात्वे
सखीदुःखप्रदानं न युज्येतातः पूर्वानुभूतश्रुतिमुनिगीतकृपालुस्व-
भावातिक्रमदर्शनेन किञ्चिदन्य एव भवान् यद्वा खलु भवान् गोपि-
कानां नो नन्दनो न भवति तथात्वे गोपिकानां नो नन्दनमभीष्टसुख-
प्रदानमेव स्यात् अपितु अन्तरात्मैव अन्तरात्मतयास्मत्स्वविरह-
दर्शनेन बहिर्लीलां सङ्कोचितुमेव प्रवृत्तः तथा ब्रह्मणा विश्वरक्ष-
णाय नार्थितः अपितु विखनसा खनधातोः असुप्रत्ययव्युत्पन्नेन
विशेषतः खननशीलेन स्वयं खनितुमशक्तेन विश्वगुप्तये गोपनाय
प्रलयकरणायार्थितः यादवकुले उदेयिवान् तथा च विश्वस्य प्रलय-
प्रकारसम्भवेऽपि स्वानुरागिणा "त्वत्पादाब्जं प्राप्य यदृच्छयाद्य
स्वस्थः शेते मृत्युरस्मादपैति" त्यादिवचनैर्मृत्युभयासम्भवात्स्वविरहे-
णैव हन्ति हे असखे इति पूर्ववत् यद्वा खलु भवान् किं गोपिकानां
सर्वासां नः श्वश्रूणां नन्दनो न भवति अपितु भवत्येवेति सर्वत्र
काकु तथाच ब्रह्मवत्सहरणदशायां त्वयि तासां नन्दनत्वे जाते
त्वयैव पाणिगृहीता वयं तथाच साक्षात्पाणिग्राहकत्वादृजुनाप्यस्म-
त्पतिमन्यमानानामपि देहित्वेन तव चाखिलदेहिनामन्तरात्मत्वेना-
प्यस्मन्मुख्यपतित्वात् उपेक्षा नोचिता तथा विखनसा विश्वगुप्तयेऽ
र्थितः सात्वतां कुले उदेयिवानित्यनेन तेनापि तदा यदुक्तं "तत्प्रि
यार्थं सम्भवन्तु सुरस्त्रियः" इति तत्त्वाभियोगादेवेति त्वत्प्रियार्थमेव
त्वदाज्ञया ब्रह्माज्ञया नो जन्मेति तद्विफलीकरणमनुचितमेव तवाप्य-
स्मत्प्रियमेव संमतं वृथा नामलीलया वामाखेदनमिति भावः ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

युक्तं चास्मदादिरक्षणं तदर्थमेव नन्दनन्दनविग्रहात्मना-
विर्भूतत्वादित्याशयेनाहुः। नेति। गोपिकाया यशोदाया नन्दनः
सुतो भवान्न भवतीति प्रसिद्धं किन्तु सर्वप्राणिनां योऽन्तरात्मा
तस्य दृक् साक्षी अन्तर्यामी भवानेवम्भूतोऽपि विखनसा ब्रह्म-
णार्थितः विश्वस्य रक्षणाय प्रार्थितः सन् सात्वतां यादवानां कुले
उदेयिवान्प्रादुर्भूतः ननु एवं जानतीभिः किमित्युक्तं निघ्नता नेह
किम्वध इति तस्मात्तिरोहित एव स्थास्याभि यथा युष्माकं कदापि दर्शनं
न भवेदित्याशङ्क्याहुः। सखे इति। तथाच भवद्वृत्तसख्यानुरूपयमुक्तिः

करुणोद्दीपिका ननु कोपावहातो विश्वगोपनाय प्रादुर्भूतस्य
तव तन्मध्यगतानां स्वयं सखीभावेप्सितानां कारुण्यात्पालनमेवा-
नुरूपमिति भावः। यद्वा सर्वान्तरवृत्त्यभिज्ञस्य तवास्मदन्तः
करणनिष्ठप्रेमातिरेकोपरि दृष्टिः कर्तुं युक्ता ननु दर्पाभासोपाल-
म्भोत्पादिगुणेनेत्याशयेनाहुः अनभिज्ञापक्षे तथा च कालियमर्दना-
दिना स्वीयरक्षणादिना लोकोत्तरसामर्थ्यप्रकटनाद्वा वयमेवं
तर्कयाम इत्याशयेनाहुः। नेति। खलुशब्दो वितर्के सर्वापेक्षयाल्प-
बलाया गोप्याः सुतो भवान्न किन्तु सर्वदेहिनामन्तरात्मदृगिति
तर्क्यतेऽस्माभिः ननु सर्वान्तर्यामिणो मम देहिभावेन कथमुत्पत्ति-
रित्याशङ्क्याहुः। विखनसेति। सत्वतां सात्त्विकानां समानानां कुले
विश्वगुप्तये उदेयिवान् तस्मात्तवाविर्भावो ननु जन्माऽतः सर्व-
पालनायावतीर्णस्य तव सखीनामस्माकमुपेक्षा नोचिता दर्पो-
प्यस्माकं त्वदुत्कर्षहेतुरतः कोपं विहायागन्तव्यमिति भावः
मानिनीपक्षे अहो निर्दयाशिरोमणिरयङ्क इति वक्रोक्त्याचार्य यथास्माभि-
र्भवान्निश्चितस्तथेत्याशयेनाहुः। नेति। भवान्करुणाहीनः प्रेयसी-
दुःखसन्ततिमवलोक्याप्यद्रवीभूतस्वान्तः गोपिकायाः अस्म-
दादिगोपजनपरायाः करुणानिधिभूतायाः परकीयसुखदुःखाभ्यां
तद्वाविष्टस्वान्तायाः श्रीयशोदायाः नन्दनस्तदीयानां दुःखप्रदत्वादा-
नन्दजनकः सुतो न भवति तर्हि कोऽहं निश्चित इतिचेत्तत्राहुः। सर्व-
प्राणिनामन्तर्यामी स एव परदुःखवतां दुःखं पश्यन्नपि
तदन्तः सुखं वसति सर्वान्तःस्थस्य तस्य बहिराविर्भावे
निमित्तमपि वयं विद्म इत्याहुः। विखनसेति। स्वसृष्टिवृद्धिमभीप्सुना
ब्रह्मणा विश्वगुप्तये प्रार्थितस्त्वद्भक्त्या जीवानां मोक्षो भवेत्ततस्त्व-
मवतीर्य्य गुप्तस्तिष्ठ तदेश्वरवादिनामपीत्वीश्वरं मन्यमानानामपि
मोक्षो दुर्लभो भविष्यति अत एतेन मे सृष्टिवृद्धिर्भविष्यतीति विधिवा-
ञ्छितसिद्ध्यर्थं परदारपरद्रव्यचौर्य्यादिस्वस्वभावप्रतिकूलं स्वगोपना-
र्थमङ्गीकृत्य सात्वतां कुले उदेयिवान् अत एव परदाराणामस्माकं
सख्यमाश्रितवानिति सम्बोधनाशयः यद्यपि स्वगोपनार्थमेव
त्वं प्रवृत्तस्तथाप्यस्मद्दुःखकरमौदासीन्यं किमिति स्वज्ञापकं चिह्नं
पुनर्गृहीतवानतः स्वप्रकटतासम्पातात्सर्वथानाश्रयणीयामिति भावः
यद्वा विश्वस्य प्रपञ्चस्य मोक्षमार्गे प्रवृत्तिसम्पादनेन स्वरक्षणार्थं
सात्वतां दयादिसात्त्विकधर्मवतां कुले तेषामपि त्वत्तो वैमुख्य-
सम्पादनार्थमुदेयिवान् अस्माकमपि स्वधर्माद्विच्युतिसिद्ध्यर्थं सख्यं
गृहीतवानिति सम्बोधनाशयः यद्वा प्रथमनिर्दिष्टस्य नञः सर्वपदैः
सम्बन्धः भवान् गोपिकानन्दनो न खलु प्रसिद्धं तद्द्वक्षणाव्यावृत-
त्वात् नाप्यखिलदेहिनां हृद्गतभावज्ञः अस्मन्मनोगतप्रेमातिरेकाज्ञानात्
तथा विखनसा न हिंस्यात् सर्वाभूतानीत्यादिवेदवाक्यैर्विश्वगुप्त्यर्थं
न प्रार्थितो यथोक्तप्रार्थनावाक्यमपि न श्रुतवान् अस्मद्धिंसापरायण-
त्वात् नापि सात्वतां कुले उदेयिवान् तत्कुलोचितकृपालुत्वाद्यदर्शना-
त्तथा तद्धर्माऽसम्पादनाद्वृथैव गोपिकानन्दनेत्यादिना ख्यातोऽसीति
भावः अत एव सखित्वेन ख्यातः सखा न भवसि शत्रुधर्म्माक्रान्तत्वा-
दित्याशयेन सम्बोधयन्ति हे असखे इति निवृत्तिपक्षे खलुशब्दो निषेधे
भवान् गोपिकानां श्रुतीनामस्माकमानन्दकरो न भवतीति न
यतोऽखिलदेहिनामन्तरात्मदृक् "योविज्ञाने तिष्ठन्विज्ञानमन्तरोयम-
यति यो विज्ञानं वेदैष त आत्मान्तर्याम्यमृत" इतिश्रुतेः विशेषेण
खनति वेदार्थं विचारयतीति विखना विद्वान् तेनार्थितः प्रार्थनावि-
षयीभूतमोक्षस्वरूपो विश्वस्य सर्वस्य कार्यकारणसङ्घातस्य गुप्तये

विरचिताभयं वृष्णिधुर्य ! ते चरणमीयुषां संसृतेर्भयात् ॥
करसरोरुहं कान्त ! कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

सह खैरिन्द्रियैः सह वर्तमानः सखः सन् सत्त्ववतां मनआदीनां समुदाये उदेयिवान् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् जीवभूतां महाबाहो ! ययेदं धार्य्यते जग"दिति श्रुतिस्मृतिभ्याम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भवान् सर्वात्मा सर्वेश्वरो यथान्येषां जनानां तत्तदधिकारानुसारेण मनोरथान् पूरयति तथास्माकं मनोरथमपि पूरयेत्याशयेनाहुः काश्चत् । हे सखे ! भवान् गोपिकानन्दनः यशोदासुतो न किमपि त्वस्त्येव तथा विखनसा ब्रह्मणा विश्वगुप्तये नार्थितः किं न प्रवर्तितः किमपि तु प्रवर्तित एव तथा सात्वतां यादवानां कुले न उदेयिवान् न उदितः किमपि तूदित एव किंबहुना अखिलानां देहिनामन्तरात्मदृक् न किमपि त्वस्त्येव एवमस्मन्मनोरथसम्पादने तव को भार इति भावः ॥ ४ ॥

भाषा टीका ।

हे सखे आप गोपिका यशोदा के पुत्र नहीं हो । आप सब प्राणिन के अंतरात्मा हो सर्वज्ञ हो हे सखे इस संसारकी रक्षा करबे को ब्रह्मा की प्रार्थनाते आप भक्तों के कुल में उदित भये हो ॥४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मात् त्वद्भक्तानामस्माकमेतत्प्रार्थनाचतुष्टयं सम्पादयेत्याहुः । विरचिताभयमित्यादिचतुर्भिः । हे वृष्णिधुर्य ! संसृतेर्भयात्त्वच्चरणमीयुषां शरणं प्राप्तानां प्राणिनां विरचितं दत्तमभयं येन तत्तथा हे कान्त ! कामदं वरदं तथा श्रियः करं गृह्णातीति तथा तव करसरोरुहं नः शिरसि धेहि ॥ ५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विरचिताभयमिति । मोक्षप्रदत्वमुक्तं कामदम् अर्थिनां सर्वाभीष्टप्रदमिति त्रिवर्गदत्वं भक्तिदत्वं च श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं रसिकत्वञ्च एषां यथोत्तरं श्रैष्ठ्यमूह्यं सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितमेव अतो नः शिरसि धेहि अस्माकं तत्तत्सिद्धये इति भावः । तत्र मोक्षो नाम निर्विघ्नप्रेमसम्पत्त्युदये विविधसंसारदुःखपरम्परानिवृत्तिरेव श्रेयः त्रिवर्गोऽयं प्रेमसाधनोपयोग्येव अन्यच्च भक्तानामुपेक्ष्यमेव एतच्च प्रीतभक्तिसिद्धान्तमते ज्ञेयं तासान्तु मते शिरसि श्रीहस्तधारणमेव फलमन्यत्र सत्स्वभावमात्रस्तोत्रं ननु तद्योग्यानुरूपमितिचेत् सत्यं निजमाहा-

त्म्यापेक्षया धेही त्याहुः । वृष्णिधुर्य्य वृष्णीन्द्र धुर्य्य ! दमनसमर्थ इति स्वपक्षे कृपाकरणं दर्शितं यद्वा वृष्णिधुर्य्य हे निजाशेषगुणरूपादिमाधुरीप्रकटनाय यदुकुले ऽवतीर्णेत्यर्थः । गोपानामपि यादवत्वात् तत्र भावविशेषेण त्वयां धेयमित्याशयेनाहुः । कान्त ! हे प्रियेति अन्यत्तैर्व्याख्यातं यद्वा सरोरुहरूपकेण ध्वनितं तापहारित्वादिना दुःखध्वंसनसुखापादानाद्यात्मकं सर्वार्थप्रदत्वं तथा सहजशीतलत्वादिना च ध्वनितं स्वतः परमफलत्वमेव दर्शयन्ति विरचितेत्यादिना । संसारभयादपि प्रपद्यमानानां विरचितमभयं सर्वतो भयाभावो येन अतोऽस्माकं पुनर्विरहभयं नाशयेति भावः कान्तश्च तत्कामदश्चेति स्वतः सर्वार्थरूपत्वं सर्वार्थप्रदत्वञ्चोक्तं कामदत्वात् कान्तत्वस्य श्रैष्ठ्येन पश्चान्निर्देशस्तस्याप्यन्ते निर्देशः श्रीभागवतामृतकप्रीतभक्तिसिद्धान्तापेक्षया तात्कालिकस्वाभिप्रेतानुसारेण वा अतस्तत्प्राप्तिर्निजकामपूर्त्तिश्चाभिप्रेता तच्च सम्भवेदेवेत्याहुः । श्रीति तत्कूटदृष्टान्तेनास्मास्वप्यपेक्षास्त्वस्येति भावः यद्वा श्रीकरग्रहमपि धेहि तत्र हेतुः वृष्णिधुर्य्येत्येव एतदनुसारेणाग्रमनोरथं कुर्वतामूरेण विस्तार्य्य वक्ष्यते यत्राङ्घ्रिमूले पतितस्येत्यादि तत्र कान्तेत्यस्य यच्चेति कामदमित्यस्य च समर्पणमिति विस्तरः परं स्पष्टमेवेति । यद्वा भयतः शत्रुभयेन संसृतेरितस्ततः संसरणात् पलायनात् चरणमीयुषां प्रपद्यमानानां जनानां वैरिविनाशेन विरचित भयं श्रीकरग्रहं श्रीकराः सम्यक्करशेखामयः शङ्खचक्रादयः तान् गृह्णातीति तथा तदैश्वर्य्यं विनायमर्थः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पूर्वानुसारेणैश्वर्य्यं सम्भाव्याहुः । विरचितेति । विरचिताभयमिति मोक्षप्रदत्वमुक्तं कामदमिति धर्मार्थार्थिनां सर्वाभीष्टप्रदमिति त्रिवर्गदत्वं भक्तिदत्वं च श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं च एषां यथोत्तरं श्रैष्ठ्यमूह्यं सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितं सतो मोक्षो नाम निर्विघ्नप्रेमसम्पत्त्युदये विविधदुःखपरम्परा निवृत्तिरेव श्रेयः त्रिवर्गोऽयं प्रेमसाधनोपयोग्येव अन्यच्च भक्तानामुपेक्ष्यमेव एतच्च सर्वं तद्गुणवर्णनं प्रेमोल्लासेनैव ज्ञेयं ननु तद्योग्या न यूयमिति चेत् सत्यं निजमाहात्म्यापेक्षया धेहीत्याहुर्वृष्णिधुर्य्य ! हे निजाशेषमाधुरीप्रकटनाय यदुविशेषकुलेऽवतीर्णेति तच्च भावविशेषेण त्वया धेयमित्याशयेनाहुः । कान्त ! हे प्रियेति अन्यत्तैः यद्वा विरचितेत्यादिना संसारसंबीन्धपापहारित्वेन शौर्य्यमुक्तं कान्तं च तत्कामदं चेति स्वतः सुखदत्वेन सर्वाभीष्टप्रदत्वेन च दातृत्वं श्रीकरग्रहम् श्रियः सम्पद्धिष्ठात्र्याः स्वगोकुले वशीकारात् करमिव गृह्णाति यस्तदित्यनेन सर्वसंपदाश्रयत्वमतोऽस्माकं विरहभयनाशः तद्रूपाभीष्टप्राप्तिः तत्प्रात्प्यानुषङ्गिकसर्वपत्प्राप्तिश्च तेनैव सिध्येदिति भावः । वृष्णिधुर्य्य वृष्णिविशेषव्रजराजकुलतिलकेति वयं स्वाभाविकत्वत्पाल्या नैवोपेक्ष्या इति

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भावः । उभयथापि शिरसि धेहीति तेनास्मान् वाढमङ्गीकुरुष्वेति तात्पर्यम् ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मात्तावकानामस्माकमभिमतमेतच्चतुष्टयं सम्पादयेत्याहुश्चतुर्भिः । विरचितेति । हे वृष्णिधुर्य ! संसृतेः भयदात् संसाराद्भयात्तव चरणमीयुषां शरणङ्गतानां विरचितं दत्तमभयं येन तत्कामदमभीष्टदं तथा श्रियो लक्ष्म्याः करं गृह्णातीति तथा तत्करसरोरुहं कान्तं कमनीयं नोऽस्माकं शिरसि निधेहि ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गोप्यः स्वतत्त्वज्ञानं विज्ञापयन्ति । स इति । गोपिका नन्दयतीति गोपिकानन्दनः सः भवान् हे सखे ! विश्वगुप्तये जगद्रक्षार्थं सात्वतां यदूनां कुले उदेयिवान् उदयं गतः । जन्मभजनाय योग्यो नेत्याशयेनाहुः । अखिलेति । अखिलदेहिनामन्तर्यामित्वेन द्रक्ष्यति पश्यतीति यद्वान्तरात्मानं स्वरूपं पश्यतीति अनश्नन्नन्यो अभिचाकशीतीति श्रुतिः किञ्च विखनसार्चितः ब्रह्मणा पूजितः विरिञ्चिगुरुरित्यर्थः । यद्वा यः सात्वतां कुले उदेयिवान् स भवान् गोपिकानन्दनः खलु न भवतीत्यर्थः । निषेधे वागलङ्कारे वीप्सनेनुनयेष्वपीति अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति त्वायोग आक्षेपापेक्षिकः तर्हि क इति तत्राहुः । अखिलेति । न खल्विति पाठे वाक्यालङ्कारार्थं ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननूक्तप्रकारेण मन्त्रयेण ये यथा मां वदन्ति तथैवाहं नान्यथा शङ्कनीयमिति चेत् तदेवं क्रियतामित्याहुः । विरचिताभयमित्यादि । हे वृष्णिधुर्य्य ! विश्वगुप्तिपर विश्वगुप्तये सात्वतां कुले उदेयिवानिति विश्वगुप्तिनिष्ठत्वपक्षमाश्रित्य संबोधने सर्वासां नो रक्षणं क्रियतामिति भावः । तदेव किम्प्रकारं तमाहुः हे कान्त ! करसरोरुहं नः शिरसि धेहि तदा सर्वा एव वयं जीवाम इत्यर्थः कीदृशं विरचिताभयं केषां ते तव चरणमीयुषां कस्मात् संसृतेर्भयात् अभयमित्यावत् कीदृशं श्रियो लक्ष्म्याः करग्रहो यत्र तत्तथा श्रियः करग्रहणमात्रप्रयोजनमिति अस्माकन्तु कामदं सर्वाभीष्टप्रदं शिरसीति याच्ञारीत्या प्रथमतोऽल्पमेव याचनं तेन दैन्यं च व्यज्यते ॥ ५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

अन्याः पुनः सात्त्विकसात्त्विक्यः राजसप्रधानाभ्यो विशिष्टाः अप्रार्थितश्च भगवान्न दास्यतीति भगवत्करस्य स्वशिरः संबन्धं प्रार्थयन्ति । विरचिताभयमिति । हे स्वामिन् ! हृदयं स्फुटति अतः यथा सर्वाङ्गे आप्यायनं भवति तथा शिरसि करसरोरुहं धेहि शीतलं हि कमलं भवति तत्रापि सरोजातं तत्रापि कर एव सरः स्थानं सरसिजस्थानञ्च अत उद्धरणादिना न रसालतापगमः कान्तेति संबोधनं प्रथमतः शिरसि हस्तस्थापनेन स्वाधीनीकरणं द्योतितं किञ्च न केवलं हस्ततापमेव दूरीकरोति किन्तु कामदश्च अभिलषितं कामं प्रयच्छति । ननु भगवान् पुरुषोत्तमः योगिध्येयः कथं स्त्रीणां स्पर्शं करिष्यतीति चेत्तत्राहुः । श्रीकरग्रहमिति । श्रियाः करस्य ग्रहो ग्रहणं येन ततो भगवान् गृहस्थ इति यत्र लक्ष्म्या हस्तं गृह्णातीति तत्रास्मच्छिरोग्रहणे किम्भविष्यतीति भावः । ननु लक्ष्मीर्विवाहितेति विधिवशात् तस्या हस्तग्रहणं भवतीनां ग्रहणे को हेतुरितिचेत्तत्राहुः । संसृतेर्भयात् शरणमीयुषां विरचिताभयामिति । यथा विधिर्विवाहे तथैव शरणागतपालनेऽपि विवाहापेक्षया शरणागतरक्षा महती स साधारणधर्मः अयमश्विरधर्म इति । नन्वयं निषिद्धः प्रकार इति कथम्पालनमिति चेत्तत्राहुः । हे वृष्णिधुर्येति वृष्णिर्हि यदुवंशोद्भवः बहुस्त्रीकः यदुवंशकर्ता तद्वंशेऽपि भगवान् धुर्यः श्रेष्ठः तत्रापि स्त्रियः संसारभयात् समागताः नहि संसारः स्वभावत एव दुष्टः किन्त्वसह्यदुःखहेतुरिति तथा वयमपि महद्दुःखं प्राप्नुम इति दृष्टादृष्टद्वारा भयांस्तान्निवर्तक इति अनेनैव निर्भयतापि सूचिता अतः कान्तबोधनात् भवानेव भर्ता अतः स्त्रीणां व्रतमनुस्मरन् वाञ्छितं कुर्वित्यर्थः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु भोः प्रियभाषिण्यः ! युष्माकं प्रणयकोपोक्तिपीयूषपानार्थमेवान्तर्हितं तदधुना लब्धाभीष्टोऽस्मि यथेष्टं वरं वृणुतेति तत्प्रसादे किं सम्भाव्य साश्वासं पृथक् पृथगभीष्टं प्रार्थयन्ते विरचितेत्यादि चतुर्भिः । हे वृष्णिधुर्य ! निजकुलकमलप्रभाकर नः शिरसि करसरोरुहं धेहि अर्पय । किमर्थं तत्राहुः । कामदं यस्य शरप्रहारभयात् त्वां प्रपन्नास्तं कामं द्यति खण्डयतीति तच्छेषभङ्ग्या कामं ददवपि । न चात्र तस्याः शक्तिरिति वाच्यम् । यतः संसृतेर्भयात् चरणमीयुषां प्रपन्नानां जनानां विरचितमभयं येन तत् । येन संसारभयादपि रक्षितुं शक्यते तस्य कामभयाद्रक्षणे कः खल्वायास इति भावः । ननु तर्हि वो वक्षःसु दधामि तत्रैव ममापि धित्सा वर्त्तते तत्र नेत्याहुः । श्रीकरग्रहमिति श्रिया लक्ष्म्या कराभ्यां ग्रहणं तद्धारणार्थं यस्य तद्वक्षसि कराधित्सायां यथा लक्ष्म्या वार्यते तथैवास्माभिरपि तद्वारणीयमेवेति भावः ॥ ५ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ परकीयाभिमानिन्यः किञ्चिदैश्वर्य्यमवलम्ब्य श्लोकचतुष्टयेन मनोरथचतुष्टयं प्रार्थयन्ति अयमाशयः प्राणनाथ ! यदि भवान्नियमन इति मन्यसे तर्हि त्वदेकजीवनानां प्रार्थितमिदं त्वरितमेव सम्पादय यदि चेश्वरस्तदा त्वद्भक्तानामस्माकं प्रार्थितं साधयेति यदि वा स्माकमनवलोकनं प्रतिज्ञातं तर्हि वाञ्छाकल्पतरुस्वभावेनैवं विधेयमिति धर्मराजसाक्षिणिवाद भवतारयास्ति तव हि तत्पतेर्जीवनं विनान्यत्सर्वमपि सम्पादयि-

केन चित्कृता विशुद्धरसदीपिका ।

व्यामीति धर्मराजप्रतिज्ञायां सत्यवत एव सकाशात्पुत्रपौत्रमुत्पादयिष्यामीति सावित्र्या प्रार्थितसिद्धिरिति महाभारते ख्यिततत्र विरचिताभयमिति मोक्षप्रदत्वमुक्तम् "अभयं वै जनकप्राप्तोऽसी"ति श्रुतेः कामदमिति त्रिवर्गप्रदत्वं तत्र मोक्षो नाम नविधप्रेमसमृद्धये विविधदुःखपरम्परानिवृत्तेरेव ज्ञेया त्रिवर्गोऽपि भक्तसाधनोपयोग्येव अन्यस्य तदेकभक्तैरुपेक्षितत्वात् श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं रसिकत्वं च यद्वा सैव्यमाहुः—

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धराभराक्रान्ते शेते नारायणः सुखम् ॥

इत्यभिप्रेतो त्वास्मद्दुःखानवकलनं हि त्वत्संसर्गदोषादेवेति भावः यद्वा साकूताभिधानं तथा हि—

धनवन्तो हि जानन्ति करुणाः परवेदनाम् ।
श्रीदामा न वासुदेवश्चकार धनदोपममिति ॥

सरोरुहरूपकेण च शीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितम् एतच्च तद्गुणवर्णनं प्रेम्णा ग्लानिरैव वस्तुतस्तु श्रुतिमुनिरूपत्वादेतासां प्राग्जन्महितसंस्कारणामत्वाच्च रसतापत्यविरुद्धमिति श्रेयं वृष्णिधुर्येति कान्तेति च व्रजराजकुलतिलकपरमप्रेष्ठत्वाभिप्रायेण कर्म ॥ ५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तस्मादेवं विधेह त्वाहुः विरचिताभयमिति । वर्णितसम्बन्धेन स्वमानानुरोधेन च सम्बोधयन्ति । कान्त ! हे त्वा मिश्रेति बहुस्त्रीकान्तत्वे सङ्कोचं सम्भाव्याहुः । वृष्णिधुर्येति वृष्णियदुवंशभवो बहुस्त्रीकस्तद्वंशधुर तवंश्यश्रेष्ठ बहुकान्तत्वस्य वृष्णिवंशाविन्दुमप्रतिकूलपरम्पराप्राप्तस्य न हित्वव्यसम्भव इतिभावः । कामवर्षिणां सुरतिलतां चकानां श्रेष्ठ इति वा ते करसरोरुहं सरोरुहवत्स्वसुखसुशीतलतापोपशमक त्वदजनकं नः शिरसि धेहि तथा च तव नः कामजलोपतापपरीक्षात्वत्करसरोरुहसम्बन्धेनास्मत्तापोपशमश्च भवेत् न इति बहुवचननिर्देशेन शिरसीत्यत्र जातावेकवचनं बोध्यं तथा चैकमेककरधारणे सम्भावितकालविलम्बस्य विरहविकलानामसह्यतया युगपत्सर्वशिरस्सुकरसरोरुहं धेहीति प्रार्थने करे बहुवचननिर्देशो भाव्यस्तत्र तदृदर्शनेनैकवचनप्रयोगेण भगवत्करस्य सर्वतः पाणिपादं सर्वतः शिरोमुखं, प्रसिद्धं विभुत्वमेव सूचितं तथा च विभोर्विभुसर्वाङ्गस्य युगपद्धाविर्भावसंभवेन न समस्तापोपशमोद्देशक इति ननु बहुकामिनीनां निकामकामतापोपशमे कामन शक्तिस्तत्राहुः । विरचिताभयमिति । संसृतेः आधिदैविकाध्यात्मिकात्रिधानादितापलक्षणसंसारस्य भयात् चरणवारणमीयुषामसंख्यातानां विशेषेण पुनः कदापि तत्सम्भवसम्भावनाशून्यतया तन्मूलाज्ञ नवाधेन रचितमभयं येन तथाभूतेन तस्यैतत्तापोपशमनमशक्यं विशेषतः कामतापोपशमकत्वमेवाहुः । कामदमिति । कामं धनि खण्डयतीति तथा पञ्चाङ्गुलिपञ्चशिरोनखशिखरतयास्मरहररूपत्वत्करस्य कामज्वरहरणकरणं न दुष्करं यद्वा संसृतिभयोपशामकपरमहंसध्येयस्य कमनीयस्पर्शोनोचितस्तत्राहुः । कामदमिति । कामान्ददातीति तथा न केवलमपवर्गप्रदमेव किन्तु सर्वकामप्रदमपि किञ्च त्वत्कामविहार एव कामसंसृत्युभयतापापहारको त्वद्विहार एव परमहंसैर्ध्येयस्तदुक्तम्—

चौरो यो नवनीतस्य जारो वल्लवयोषिताम् ।
ध्येयः सदैव साधूनां चौरजारशिरोमणिः ॥
भगवतापि न मय्यावेशितधियां कामः कामाय कल्पते ।
भर्जिताः कथिता धानाः प्रायो बीजाय नेष्यते ॥
जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन इति ॥

कामदत्वे सर्वकामदत्वाश्रयत्वं प्रमाणयन्ति । श्रीकरग्रहमिति श्रियोऽपि कामदत्वे किमुवाच्यमन्यकामदत्वमित्यपि ध्वनिः यद्वा हे कान्त ! मधुरकोमलकान्तिमत्करसरोरुहं नः सर्वासां शिरसि धेहि तथा च संसृतेर्भयाद्विरचिताभयं यत्करं तदपि यथा सरोरुहवत्कोमलं तथा तव कोमलपद्मचर्या यद्वत्संसरणं तद्वयादेव चरणमीयुषां नो विरचिताभयं तावद्विधेहि त्वद्विरहकामसन्तापापेक्षयापि त्वत्पदकञ्जखेदसम्भावनाभयं नो दुःसहं तन्निवर्त्तय ततः सर्वकामदं यत्त्वं नः कामदं कुरु तथा श्रियः करं गृह्णातीति तथाभूतं करं नः श्रीकरग्रहं नः श्रीशोभाकरग्रहे एव यस्य तादृशं विधेहि त्वद्विरहे निःश्रीका नः करग्रहेण श्रीमतीः कुर्वित्ति भावः । यद्वा हे कान्त ! कानां सर्वकामादिसुखानामन्तं पर्य्यवसानं यस्मिन् त्वच्चिवासास्पदे नो इदि यत्कामात्संसृतिः सम्यग्वलद्रैकेण सोमद्रवतया सरणं तद्भयादेव चोद्यवधारणे तद्विलयोद्यतस्य तव चरणमीयुषां नो विरचिताभयं यथा स्यात्तथा करसरोरुहं नः शिरसि धेहि पञ्चकुसुमशरस्मरणस्मरकरणाय पञ्चाङ्गुलिदलं करसरोरुहमेवालं यद्वा विपुलो तद्विपरीतीकरणं नीतिः तथाच सर्वकामदोऽपि पञ्चशिरः शशिधरो इव कामदः कामाखण्डक इति पञ्चाङ्गुलिशीर्षेण नखाग्रधर एवं नः सर्वथा कामसुखदोऽपि कामज्वरावखण्डकोऽग्रणीतया तं नः शिरसि धेहि ततश्च तादृक्करसरोरुहस्य शिरस्यारोहे स्वत एव कामोपद्रवोपशमस्तथा श्रीकरग्रहं स्वश्रियैव भर्त्तान् करे गृह्णाति वशीकरोतीति तथा भूतमस्मदास्यापादकं नः श्रीकरग्रहं श्रियं इव करग्राहकं विधेहीति भावः ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ॥

तस्मात्त्वद्धकानामस्माकमेतत् प्रार्थनाचतुष्टयं सम्पादयेत्याहुः । विरचितेति चतुर्भिः । करसरोरुहं नोऽस्माकं शिरसि धेहि तत्र स्थापनेनान्तःकरणस्य तापस्योपशमो भविष्यति सरोरुहात्मकस्य हस्तस्यात्यन्तशीतलत्वादिति सरोरुहं इदयेन सूचितं न केवलं तापोपशमकं किन्तु कामदं सकलमनोरथपूर्तिकरं ननु सकान्तस्येदं कृत्यमिति चेत्तत्राहुः कान्तेति । ननु योगिध्येयः कस्यापि कान्तो न भवति कुतो भवतीनामित्याशङ्क्याहुः । श्रियः करस्य ग्रहो ग्रहणं येन तत् तथाच गृहस्थो भगवान् यथा श्रियं हस्ते गृहीतवांस्तथास्मच्छिरसि हस्तं धारयितुं नास्ति किञ्चिद्बाधकमिति भावः । ननु श्रियो विधिपूर्वकं हस्तग्रहणे भवतीनां शिरोग्रहणे को हेतुरिति चेत्तत्राहुः । शरणमीयुषां तव शरणागताभिलाषुणां विरचितमभयं येन तत् एवञ्च विवाहितापेक्षयापि शरणागतानामस्माकं कामशत्रोः शकासात्पालनमत्यावश्यकं शरणागतपालनस्यैश्वरस्य तव निजधर्मः ननु तथापि निषिद्धोऽयं प्रकारः सर्वथापि वर्जनीय इति चेत्तत्राहुः । वृष्णिधुर्य्य ! यदुकुलोद्भवस्य बहुस्त्रीकस्य वृष्णिवंशे धुर्य्यः श्रेष्ठो भवान् पतित्वेन वृतोऽस्माभिरतो नास्ति दोषस्तस्मात्तद्दृष्टादृष्ट-

व्रजजनार्त्तिहन्! वीरयोषितां निजजनस्मयध्वंसनस्मित !।
भज सखे ! भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

दुःखमपाकर्तुं योग्योऽसीति भावः।यद्वा यस्माद्विश्वस्य गुप्तये भगवत उदयस्तस्माद्रक्षणस्यावश्यकत्वाद्यथास्मद्रक्षणं तथा त्वयावश्यं विधेयमित्याहुः। विरचितेति। मदीयाः भवत्य इत्याश्वासनार्थं करसरोरुहं नः शिरसि निधेहि तत्स्थापनेन त्रिवर्गसिद्धिरस्माकम्भविष्यतीत्याशयेनाहुः। कामदं यतोऽस्मात्कान्तत्वेनात्रतीर्णस्य भगवतोऽस्मत्मनोरथपूर्त्तिरावश्यकीत्याशयेन सम्वोधयन्ति। कान्तेति ननु भवतीनां सन्ति पतयोऽतः कथमहङ्कान्तः कथञ्च मद्धस्तसरोरुहं कामदमितिचेत्तत्राहुः। श्रीकरग्रहं यथा श्रीपतित्वेन प्रसिद्धा अपि न वस्तुतः श्रियः पतयः किन्तु सुवर्णादिमायिकरूपान्तायास्तस्या अत एव भगवद्धस्तकमलं तत्करग्रहं तथास्माकमपि मायिकरूपान्तरपतयस्ते मुख्यस्तु कान्तो भवानेवात एवास्मान्स्वीयत्वेन स्वीकृतवानित्याशयः किंच संसृतेर्भयाच्छरणमीयुषां विरचिताभयं मोक्षप्रदं पाठान्तरे चरणप्रपन्नानामित्यर्थः। सर्वस्य मनोरथपुरुषफलप्रदानाय वृष्णिषु श्रेष्ठत्वेन भवानवतीर्ण इत्याशयेनाहुः। वृष्णिधुर्य्य! अनभिज्ञापक्षे युष्मत्प्रार्थनामाकर्ण्य स्वस्मित्करणसामर्थ्यमवधार्याहं प्रकटितो भविष्यामीति तदभिप्रायमालक्ष्य सुकरं प्रार्थयन्ति हे कान्त! करसरोरुहं नः शिरसि धेहि किमर्थमिति चेत्तत्राहुः। कामादिशरप्रहारपरस्य कामस्य खण्डनकरं तदुद्दीपकं चानेन रतिप्रार्थनमपि व्यञ्जयन्ति अन्यथा सर्वाप्यस्माकमलंक्रिया कान्ताननुमोदनाद्वृथा भविष्यतीतिचेत्तत्राहुः। संसृतेर्मार्गाद्भयं तदुल्लङ्घनजन्यं तस्मादपि तव शरणागतानां विरचिताभयं इन्द्रादेरपि पराजयं कर्तुं समर्थस्य तव त्वदीयानाञ्च नास्ति सन्मार्गादपि भयं प्रवलेन त्वया प्रवर्तितस्य सन्मार्गत्वात् तदुक्तं "सर्वं वलवतां पथ्यं सर्वं वलवतां शुचिः। सर्वं वळवतां धर्मः सर्वं वलवतां स्वकमिति प्रागयं वसुदेवस्येत्यनुरोधेन वृष्णिधुर्य्येतिसम्बोधनं तथाच पालनशक्तिमतस्तवाऽस्मत्पालनमेवोचितमिति तदाशयः मानिनी पक्षे नोऽस्माकं मध्ये तव सृतेः सम्यक् पलायनादितोऽपि दूरतरतिरोधानाद्भयंतदस्माकं प्राप्तानां शिरसि करसरोरुहं निधेहि यतः सर्वं चिरचितमभयं येन जन्मान्तरे क्षत्रवंशोद्भवत्वादभयप्रदत्वमुचितमेव तव हस्तस्येति द्योतयन्त्यः सम्वोधयन्ति हे वृष्णिधुर्य्येति पुनश्च हे तत्कान्त! तासां कामदं तथाच कान्तभावमङ्गीकृत्य येन हस्तकमलेन कामन्दत्तवांस्तस्याधुना शिरसि स्थापनेको विलम्ब इतिभावः पुनश्च श्रीकरग्रहं शोभाकरग्रहणयोग्यं तथाच तदभावे तासां शिर एव पातिष्यतीति भावः। निवृत्तिपक्षे अतः स्वस्वरूपप्रकाशनाश्रैवं कुर्वीति प्रार्थयन्ति। विरचितेति। हे वृष्णिधुर्य्य! नृणां निःश्रेयसार्थं गृहीतकृष्णाद्यवतार तव शरणमीयुषां भगवद्वित्त्वाद्विप्रपद्मलक्षणवतां श्रीकरग्रहं मोक्षश्रीसम्पादकमाग्रहं नोऽस्माकं श्रुतीनां शिरसि मस्तके उपनिषद्भागे कं सुखं तद्रूपो रसो ब्रह्मानन्दात्मकं रसं ददातीति करसरस्तं निधेहि श्रीकरेति सम्बोधनं वा तथात्वे सति मत्प्राप्तिस्तेषां सुकरेत्यत्राहुः हे कान्ताऽस्मत्प्रतिपाद्य कामं द्यति खण्डयतीति तं सर्वंवासनोच्छेदकरं

पुनश्चारुहम् अरूणि वेदरूपशब्दे प्रमाणाद्बाह्यानि मतानि हन्तीति तथा तम् अत एव संसृतेर्भयाद्विरचिताभयम् एवंभूतग्रहस्य त्वत्कृपां विनोदायासम्भवात्तदर्थं त्वां प्रार्थयामइति भावः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे वृष्णिधुर्य्य!संसृतेर्भयात् पुनःपुनर्जन्ममरणादिरूपात् संसारभयात् ते तव चरणमीयुषां पादपद्मशरणं प्राप्तानां जनानां विरचितं संपादितमभयं येन तत् तथा बहूनां कामदमभीष्टदं तथा श्रियः करं गृह्णातीति श्रीकरग्रहम् एवं भूतं ते करसरोरुहं हे कान्त! नः शिरसि धेहि ॥ ५ ॥

भाषाटीका।

हे यादवों के श्रेष्ठ! संसार के भयते जो आपके चरण के निकट आये तिनको अभय देवेवारे सव के मनोरथ पूरण करवे वारे लक्ष्मी के हस्त को ग्रहण करवे वारे हस्त कमल को हमारे मस्तकों पै धारण करो ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हे व्रजजनार्तिहन्! हे वीर! निजजनानां यः स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य तथा भूत हे सखे! भवत्किङ्करीर्नोऽस्मान् भज आश्रय स्मेति निश्चितं प्रथमं तावज्जलरुहाननं चारु योषितां नो दर्शय ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

न केवलं शिरसि श्रीहस्तनिधानमात्रं कार्य्यं किं त्वस्माकं कामश्च पूरयितव्य इति प्राक् सूचितमेवौत्सुक्येनाभिव्यञ्जयन्ति व्रजेति। एतेन भजनस्य योग्यत्वमुक्तम् अन्यथास्मदन्यदशायस्या आर्तिहननासिद्धिः वीरेत्यदेयस्यापि दाने सामर्थ्यमुक्तं स्मयो मानः तव स्मितमात्रेणापि मानो निरस्यते तदर्थमन्तर्धानेनालमिति भावः। यद्वा अनेन परममनोहरत्वमभिप्रेतम् अतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः। सखे! इति भजने प्रकारविशेषः सूचितः यद्वा अभजनेऽस्माकं दुर्दशया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात् किंवा विश्वासघातिदोषप्रसक्तत्वादितिभावः। ननु तत्र तत्रादरो नास्तीतिचेत्तत्र सदैन्यमाहुः भवतः किङ्करीरिति दीनानां शरणागतानामुपेक्षापरमायुक्तेतिभावः। यद्वा तर्हि कश्चिदन्यमनुगच्छतेतिचेत्तत्राहुः। भवत एव नत्वन्यस्य किङ्करीरिति जलरुहवदाननं चारु यथा स्यात्तथेति प्रेम्णा स्मितभ्रूविलासकटाक्षचालितं किम्वा निकटागमनेन सम्यक्तया

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

दर्शयेत्यर्थः । जलरुहेत्युपमया दर्शनमात्रेण विरहसन्तापहारित्वमभिप्रेतं योषितामिति तत्रास्माकं सामर्थ्याभावात् स्वयमेव कृपया दर्शयेति भावः । यद्वा अनन्यजीवनानामस्माकमन्यथा मरणमेवेति किम्वा त्वद्दर्शनसुखस्य योषितां हृदयैकानुभवनीयत्वात् प्रत्येकं तद्दानं योग्यमिति सूचितम् अन्यत्तैर्व्याख्यातं यद्वा योषितां मध्ये ये निजजनास्त्वत्परिग्रहाः स्वीयत्वेन स्वीकृता वा तेषां स्मयध्वंसनस्मित अत एव निजदासीर्भज तत्प्रकारमेवाहुः । जलेत्यादिना । आप्याययस्व न इत्यन्तेन यद्वा योषितां वीर हे योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्ताः तदधुना अभवत्किङ्करी अन्या अदासीरेव भज चारुजलरुहाननञ्च नो दर्शय न दर्शय मरणस्यैव निश्चितत्वात् इदञ्च प्रणयकोपेन परमार्त्या चोक्तमन्यत्समानम् ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवं वैयग्र्येणादावङ्गीकारमात्रं प्रार्थ्याभीष्टविशेषान् प्रार्थयन्ते त्रिभिः तत्र प्रथमेन सामान्यतः सङ्गं प्रार्थयन्ते व्रजेति भज अस्माकं दुःखं प्रतिकुर्वन्निकटे तिष्ठ अहो आस्तां तादृशोऽपि मनोरथः प्रथमं तावच्चारु मनोहरं जलरुहतुल्यमाननमपि दर्शय तत्र व्रजजनार्तिहन्निति भजनस्य योग्यत्वमुक्तम् अन्यथास्मदन्त्यदशापत्त्या आर्तिहन्तृतासिद्धिः स्यात् वीरेत्यदेयस्यापि दानसामर्थ्यमुक्तं निजजनो निजप्रियाजनः तव स्मितमात्रेणापि मानो निरस्यते तदर्थमन्तर्द्धानेनालमिति भावः । अनेनैव परममनोहरत्वमप्यभिप्रेतम् अतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सखे ! इति भजने प्रकारविशेषः सूचितः यद्वा अभजनेऽस्माकं दुर्दशया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात् किंवा विश्वासघातदोषप्रसक्तेरिति भावः । अथ सख्ययोग्यस्यात्मनो विरहदैन्येन औद्धत्यमाशङ्क्याहुः । भवतः किंकरीरिति योषितामिति तत्रास्माकं सामर्थ्याभावात्स्वयमेव कृपया दर्शयेति भावः । अन्यत्तैः यद्वा योषितां मध्ये ये निजजनास्त्वत्परिग्रहाः तेषां स्मयध्वंसनस्मित ! अत एव निजदासीरस्मान् भज तत्प्रकारमेवाहुः । जलेत्यादिना । आप्याययस्व न इत्यन्तेन यद्वा परमार्त्या प्रणयकोपेनाहुः व्रजजनार्तिहन् तथाभूतोऽपि योषितां वीर योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तथा निजजनसुखलापनरूपस्मित अधुना अभवत्किङ्करीरन्या अदासीरेव भज चारु जलरुहाननं च नो दर्शय न दर्शय मरणस्यैव निश्चितत्वात् अन्यत्समानम् ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

निजजनस्मयध्वंसनस्मित ! माननीजनमानभञ्जनस्मित ! ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे व्रजजनार्तिहन् ! हे वीर ! निजजनानां यः स्मयो गर्वस्तं ध्वंसयतीति तथा नन्द्यादेराकृतिगणत्वात्कर्तरि ल्युः तथाभूतं स्मितं यस्य हे तथाभूत ! हे सखे ! भवतस्तव किङ्करीर्नोऽस्मान् भज अनुवर्तस्व स्म निश्चितमद्भुतं वा सुन्दरं जलरुहाननं तावत् योषितामस्माकं दर्शयस्वेति ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विरिञ्च गुरुश्चेदपेक्षिताशेषपुरुषार्थप्रदः स्यात्तत्र कथं निर्णय इत्याहुः । विरचितेति श्रियः करं गृह्णातीति श्रीकरग्रहं शरणमीयुषां पुंसां निधेहि हे कान्त ! कमनीय ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु शिरसि करार्पणेनैव चेद्यूयं जीवथ तदा सर्वा एव नयनं निमीलयत शिरसि वः करमर्पयामि मैवमित्याहुः । व्रजेत्यादि हे व्रजजनार्तिहन् इति । हेतुमत्सम्बोधनं हे वीर ! सर्वसमर्थ तथा सति यथापेक्षायां समर्थस्तथापेक्षायामपि तर्हि किमहमुपेक्षकः न निजजनस्मयध्वंसनस्मित किङ्करीरस्मान् भज ननु भजनं किं श्रयणं सेवनमित्यत्राहुः । जलरुहाननं दर्शय स्ववदनदर्शनमेव हि भजनमित्यर्थः । योषितामिति निर्धारणे षष्ठी योषितां मध्ये किङ्करीर्न इत्यर्थः । अथवा हे व्रज जनव्रजा व्रजस्था एव जनाः परिजना यस्य हे योषितामार्तिहन् वीरेति देशीयस्नग्धसंबोधनं वा ॥ ६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततस्तामसी किञ्चिद्वैलक्षण्येन धाष्टर्येन तमेवार्थं प्रार्थयति । व्रजजनार्तिहन्निति । हे भगवन् एता वक्तुं न जानन्ति मया तु निर्धारितमुच्यते हे सखे ! इति अप्रतारणार्थं सम्बोधनं नः अस्मान् भजेति हितोपदेशः । ननु कथमेवं धाष्टर्यं निषिद्धञ्च बोध्यते तत्राहुः । भवत्किङ्करीरिति । ये यथा मां प्रपद्यन्त इति हि तव प्रतिज्ञा अतो यथा किङ्कर्यो वयं भवन्तं भजामः तथा भवानपि भजतु किंकरीः त्वं तव प्रतिज्ञा च प्रसिद्धेत्याहुः । स्मेति न केवलमस्मद्भजने तव सैवैका प्रतिज्ञा हेतुः किन्तु अन्येऽपि हेतवः सन्ति प्रथममवतारप्रयोजनं व्रजजनार्तिहन्निति व्रजजनानामार्तिं हन्तीति तथा नातः परमन्या आर्तिरस्ति सामान्यप्रयोजनमेतत् विशेषप्रयोजनमाहुः । योषितां वीरेति कृष्णो भगवान् वीरे हि शूरा निराकरणीयाः अन्यगतकामादयः तत्र मुख्यः कामः सच बहुविधः अन्तर्बहिः पदार्थेन पूरणेन पूरयित्वा आश्रयाभावात् निवारणीयः अत एव लोके दातारः कीर्तिमन्तो भवन्ति वीरेभ्यः अतो भवान् महावीरः अन्तः स्थितेनानन्देन अतिदरिद्राणां ब्रह्मणापि पूरयितुमशक्यानामिच्छापूरकः अयश्चार्थस्तव सर्वजनीनः अतः योषितां वीरेतिसम्बोधनं नहि कृष्णाज्जगति कश्चिदेवं सम्बोधनमर्हति अपूर्णकामत्वात् अतोऽवतारसामान्यविशेषप्रयोजनाभ्याञ्च नो भज ननु सत्यं तथापि भवतीनामभिमानदोषनिवृत्त्यर्थं भजनं न क्रियत इति चेत्तत्राहुः । निजजनस्मयध्वंसनस्मितेति । निजजनाः सेवकाः तेषां स्मयो गर्वः तस्य ध्वंसनार्थं स्मितं यस्य निजजनानां स्मयदूरीकरणार्थं परित्यागो नोपायः किन्तु तदर्थं स्मितमेव कर्त्तव्यं स्मितं हि मन्दहासः हासो जनोन्मादकरी च माया तस्या मन्दत्वं भक्तेष्वे

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

प्रवर्त्तनं नहि मायामोहव्यतिरेकेण कस्यचित् स्मयो भवति अत एव हास्यसङ्कोच एव साधनं निजजनानामपि धर्म एव दुष्टः ननु धर्मी अन्यथा निजजनत्वमेव न स्यात् इत्यलौकिकोपायः लौकिकेऽपि तव हास्येन ता अपि आत्मानं तुल्यं मन्यन्ते यदा पुनर्हास्ये सङ्कोचः तदैव तासां गर्वो निवर्त्तते किञ्च अभिमानो हि दोषः स तावदेव तिष्ठति यावत्तव स्मितयुक्तमाननं न पश्यन्ति नहि काचित्तादृशमप्याननं दृष्ट्वा स्वाभिमानं पालयितुं शक्ता नन्वेतल्लोके अप्रसिद्धं साधनमिति कथं ज्ञातुं शक्यत इत्याशङ्क्याहुः । जलरुहाननं चारुदर्शयेति । जलरुहं कमलं तत्सदृशमाननममृतस्रावि नह्यमृते पीते कस्यचिद्दोषास्तिष्ठतीति युक्तेः साधनत्वे चेत्सन्देह एकवारं प्रदर्श्य पश्येत्यर्थः किञ्च अभिमानो हि मनोधर्मः तव आननन्तु चारु मनोहरं नहि धर्मिणि हृते धर्मस्तिष्ठति सख्युः सखिभजनं युक्तमेव ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अपरा आहुः । योषितां मध्ये ये व्रजजनास्तेषामार्त्तिं कन्दर्पशरप्रहारजनितां हन्तीति तथा तेन देव्यादीनामप्यन्ययोषितां सा न करोषि । यद्वक्ष्यते व्योमयानवनिताः कश्मलं ययुरपस्मृतनीव्य इति । हे वीर ! दुर्वारमारसंप्रहारमहाग्निशमनो किञ्चास्माकं सौभाग्यार्थं गर्वं तद्दुःखं वामलक्षणं मानमपि न सहसे इत्याहुः निजजनानां स्मयध्वंसनं माननाशकं स्मितमपि यस्य । ननु वरं शीघ्रं वृणुत तत्राहुः । भवत् किङ्करीरस्मान् भज परिचर । ननु यदि मत् किङ्कर्य एव यूयं तदा मां स्वपरिचरणे किमिच्छ पयथ तत्राहुः । हे सखे । इति । तर्हि ब्रूत किं वः परिचरणं तत्राहुः । जलरुहेत्यादि ॥ ६ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अपि च व्रजेति भजनयोग्यत्वम् अन्यथास्मदन्यदशापत्तिरिति हमनासिद्धचार्थत्वासिद्धेः धीरेत्यदेस्यापि दनयोग्यत्वं योषितामिति तत्रास्माकं सामर्थ्याभावात्स्वयमेव कृपया दर्शयेति भावः यद्वा योषितां मध्ये ये निजजनाः त्वत्परिग्रहाः तेषां स्मयो मानस्तस्य ध्वंसनं स्मितं यस्येति परममनोहरत्वं यद्वा ननु मयत्यो यौवनमत्ता इति त्यकास्तत्राहुः । निजेति । तव स्मितमात्रेणैव तत्प्रतीकारो भवेत्किमन्तर्धानेनेतिभावः । सख इति भजने प्रकारउक्तः कथमित्यत आहुः जलरुहाननं दर्शयेति परमार्त्या प्रणयकोपेनाहुः । भवत्किङ्करीरिति ॥ ६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

मनोरथान्तरं प्रार्थयन्ति । व्रजजनार्तिहन्निति । व्रजजनानाम् आर्तिं हन्तीति तत्सम्बोधनं तथा च व्रजजनानां नो वृजिनं वर्जयेति भावः अन्यथा तथात्वं न स्यात् नच हनहिंसागत्योरिति स्मृतेर्व्रजजनान् आर्तिं गमयतीति व्युत्पत्त्या वा व्रजजनानार्त्तीर्हन्तीति व्युत्पत्तिभेदेन वा भवतीनामार्त्यगतावपि न तथात्वहानिरिति वाच्यं सर्वव्रजजनार्तिनिवर्तकस्यास्मदर्थेऽर्थान्तरप्रयोगोऽनुचित एव तथा हे वीर ! विशब्दः पक्षित्वेन गरुडवाचकस्तमीरयतीति तथा नारायण एवार्तिं हरणायावतीर्णः कथमार्तिं दास्यसीति भावः । ननु नाहमार्तिं ददामीतिचेत्तत्राहुः योषितां वीर प्राणस्य प्राणमिति श्रुतेः सर्वेषामीरः प्राणोऽपि योषितां त्वन्मूर्तिहृदयमनः प्राणानां नो विशेषेण ईर प्राणभूत तथा च प्राणवियोगे जीवनाशम्भवप्रसिद्धौ किमुवाच्यं प्राणप्राण वियोगे वा ननु किमिति परकीये मयि प्रीत्यतिशयस्तदतिशये चैवं गर्वो गर्वे पुनरेवं दैन्यं तत्राहुः । हे वीर विशेषेण प्रेरक सामान्यतः सर्वान्तर्यामिन् विशेषतो योषितां नो वीर विविधतया प्रेरक तत्रान्तर्यामितया सर्वव्यवहारे मनोहरतया प्रीत्यतिशये वरदानेन तदार्यवशीलादेन गृहादागमने वक्रोक्तिसुस्मितनिरीक्षणादिभिः स्थूणानिखननन्यायेन रागस्मरयोः सुदृढीकारे अत्यादरविहाराभ्यां स्मयः पुनश्च विरहेण दैन्ये प्रवर्तक तथाच स्वयमेव तथा प्रेरणेऽप्यधुना योषितां वीरत्वे स्वाविरहेण घातप्रवृत्तौ विश्वासघातः तादृशवीरस्य योषितां वीरत्वे यशोहानिश्च किञ्च स्मयनिवृत्त्यर्थमेव त्वयान्तर्हितेनाप्यन्तर्हितं तत्तु गुडदानेन रिपुशान्तौ विषदानमनुचितमिति न्यायेन मधुरसुस्मितेनैव सम्भवति स्मयोपशमे विरहविषोपयोगो न विधेय इत्याहुः । निजजनस्मयध्वंसनास्मितेति । स्मयध्वंसस्य स्मितमात्रसाध्यत्वेऽप्यन्तर्द्धानं त्वस्मद्धतार्थमेव प्रतिभाति तच्च निजजनेषु अनुचितमेवेति भावः किञ्च हे निजजन ! वस्तुतः सार्वात्म्याद्रोपरूपेणपरिणयात् वरदाने स्वीकरणादस्मदाद्यन्तर्भावादाह्वानाद्रातौ सुखप्रदानाच्च सर्वथा स्वीयतया निजजनस्मयत्वदीयनिजजनानाम्—

> न क्रोधो नच मात्सर्यं न लोभो नाशुभा मतिः ।
> भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

इत्यादिवचनेभ्योऽसम्भावितोऽपि स्मयो यस्मात् तथा यथाकथंचिज्ज्ञातेऽपि स्मये यस्य नाशायैव धनुरादिविस्फूर्जनवत्शौर्य्यापेक्षानिजजनानां नः स्मयध्वंसनं तु भ्रूधनुर्विस्फूर्जनपूर्वकसुस्मितेनैवेति वृथान्तर्द्धानादिकमिति भावः । किञ्च स्मयो मनोधर्मः स्मितेन मनोहरणे कुतस्तद्धर्मस्मयावस्थितिरिति तस्मात् हे सखे ! सामान्यतः सयुजा सखाया इति श्रुतिसिद्धसखे विशेषतो वरदानस्वीकारादिनाविष्कृतसख्य नोऽस्मान् भज सख्योःपरस्परभजनौचित्येऽपि नोऽसमर्थत्वेन तव तु समर्थतया त्वयैव भजनीयं किञ्च श्रुत्वाभावेनच सख्योऽपि वयं स्वीयभावेन भवत्किङ्कर्य्य एवेति भवतो भृत्यानुग्रहकातरस्वाभाव्याद्भवत्किङ्करीर्नो भज यद्वा यद्यपि वयमपि किमप्यतिविलक्षणत्वदेकगम्यसुखकर्योऽपि त्वद्भजनाधीनमेव तत्सम्पादनसामर्थ्यं न स्वातन्त्र्येण मैथुनसुखस्य मिथुनसाध्यत्वादिति ननुपरोक्षं भजाम्येवाहं मम भजनाभावे भवतीनामनुरागविह्वलत्वाज्जीवनादिकमेव न स्यात् कथमधुना भजनं प्रार्थ्यते तत्राहुः । जलरुहाननं दर्शय जलरुहवन्मञ्जुमधुरसुरभितापह्लादकमाननमपरोक्षं कुरु ननुभवद्गृहे बहुजलरुहमाला यूयञ्च जलरुहकरचरणविशाला कथंकराला कामज्वरज्वाला नोपशाम्यति कथञ्चैकेन मज्जलरुहाननेन तदुपशमस्तत्राहुः । चार्विति । तवाननमेव चारु त्वदाननाभावे तु जलरुहाणि दाहकत्वाज्ज्ञानि चाचारुतया स्मरशरवद्भेदकान्येवेति भावः ॥ ६ ॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ॥
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अपराः प्रार्थयन्ति हे व्रजनार्तिहन्! व्रजजनपीडानाशाय कृतावतार! तथा च स्वावतारसामान्यप्रयोजनमवलोक्यास्मदार्तिनाशनं तवोचितं नचातोऽधिका काचिदार्तिरस्त्यस्माकमिति भावः। किञ्च हे योषितामवीर! दीनशूर ब्रह्मादिभिरप्यशक्यपूर्णायाः अस्मदिच्छायाः पूरक! ननु सत्यमेव तथापि भवतीनाम् मानरूपं दोषमवलोक्य तन्निरासाय तिरोहितोऽस्मीतिचेत्तत्राहुः निजेति। निजजनानामस्मदादिस्वसेवकानां स्मयस्य गर्वस्य ध्वंसनं स्मितं यस्य तथाच स्मितमात्रस्यैवोत्कटप्रार्थनोत्पादनेन तन्नाशस्य संभावात्किमर्थं तिरोधानाय प्रवृत्तोऽसीति भावः स्मितेन हाससंकोचेनैव गर्वध्वंसो भवतीति वा अतोऽस्मान्भज सेवय ननु पालनप्रार्थनाधिकारवतीनां भजेति प्रार्थनादद्यापि स्मयो न निवृत्त इति गम्यत इतिचेत्तत्राहुः। भवत्किङ्करीरिति। अस्मत्कृतसेवनसदृशभवत्कर्तृकसेवनेनैवाऽस्मत्पालनं नान्यथा तच्चावश्यकं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मिति भवत्प्रतिज्ञा सत्या तदनुसारेणैव गृहीतसखिभावस्य यथोक्तप्रार्थनायामनौचित्यशङ्का नोऽकार्येति द्योतनाय सम्बोधयन्ति हे सख! इति अस्मात्कैङ्कर्य्यं प्रसिद्धं यद्वा यथेच्छसि तथा कुरु संप्रति कुड्मलात्मकं स्वमुखं चारु मनोहरमस्माकं दर्शयेति सदैन्यप्रार्थनम् अनभिज्ञापक्षे हे वीर अदेयस्य दाने समर्थ नोऽस्मन्निकटे सर्वदा तिष्ठ प्रथमन्तु चारु जलरुहाननं योषितामबलानां नो दर्शय यतो हे व्रजजनार्तिहन्! अन्यथास्मन्मरणावश्यंभावादार्तिनाशनव्रतभङ्गः स्यादिति भावः गर्वध्वंसनायान्तर्धानंतु नोचितं तस्य सुकरोपायसाध्यत्वादित्याशयेनाहुः। निजेति। ननु पूर्वं कुतो गर्वं कृतवत्यः इत्याशङ्क्य किङ्करीणामप्यस्माकन्त्वयैव सख्यपदे स्थापितत्वेन इत्याशयेनाहुः सखे भवत्किङ्करीरिति। यद्वा अस्मत्त्याग एव यदि तवाग्रहस्तर्हि सम्प्रत्यस्मन्मरणकाले चौर स्वमुखपद्मं सन्दर्शय दृष्ट्वा प्राणत्यागं करिष्याम इत्यर्थः। मानिनीपक्षे व्रजजनार्त्तिहर्त्तापि योषितां वीरस्तद्वधे समर्थं अत एव निजजने यः स्मयस्तेन निजजनस्मयस्य ध्वंसनं स्मितं यस्य अतो भवतो यथोक्तप्रवृत्तिं दृष्ट्वा वयमपि सम्प्रति मरणायोद्युक्तास्तस्मात्तवास्मज्जीवनमपेक्षितमस्ति चेत्तर्हि शीघ्रमागत्य भवत्किङ्करीरस्मान्भज सेवनायाश्रय शठम्प्रतिशाठ्यं कुर्यादित्युक्तत्वाद्यथा सखापि भवानस्मद्दुःखाय तिरोहितस्तथा सख्योऽपि वयं तव दुःखाय धूर्तशिरोमणेस्तवाग्रे तिरोधानसामर्थ्याभावान्मरिष्याम इति सूचयन्त्यः सम्बोधयन्ति हे सख इति किञ्च झटितिजलरुहाननं चारु दर्शयान्यथा पश्चात्तापङ्करिष्यसीति भावः यद्वा जिघांसन्तंजिघांसीयादित्युक्तत्वात्सर्वा दण्डयितुङ्किमर्थं प्रवृत्तोऽसि एता भवत्किङ्करीर्भजप्रेष्ठ सेवय नोऽस्माकन्तु चारु जलरुहाननमात्रं दर्शय अपकर्तुरपि सख्युर्मुखदर्शनेच्छा न निवर्त्तते इदं प्रार्थयामः किङ्कर्म इति सख इति सम्बोधनाशयः निवृत्तिपक्षे स्व अनुग्रहादुपनिषत्सु लब्धाग्रहस्य व्रजो वेदस्तत्सम्बन्धिना आस्तिकशिरोमणिभूतस्य जनस्यार्त्तिं जन्ममरणलक्षणसंसृतिदुःखं हरतीति तथा यतो योषितां श्रुतिलक्षणानामस्माकं वीक्ष्यते अस्माकमस्मदीयानां च रक्षणे परमसमर्थ! एव णप्रकारमाहुः। निजजनानां स्वभक्तानां स्मयाहङ्कारादिदोषस्य ध्वंसनाय स्मितं मन्दहासो यस्य हासो जनोन्मादकरी च मायेति हासशब्दाभिधेयायाः सर्वानर्थजीवभूतायाः मायाया मन्दत्वं स्वभक्तेष्वप्रवर्तनं तस्मात् सखे सर्वदास्मत्संपृक्त भवत्किङ्करीः प्रभवत्प्रतिपादनरूपसेवापरायणा अस्मान्भजास्मत्प्रतिपाद्यतामाश्रय तथाच विवेक्त्वन्तःकरणेऽस्मत्प्रतिपाद्यताम्प्राप्य तस्य जलरुहस्य चतुर्दशभुवनात्मकपुष्करस्य कमलस्य चाननं सत्तास्फूर्तिप्रदं स्वस्वरूपं दर्शय को वान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादित्यादिश्रुत्या सर्वसत्तास्फूर्त्तिदः परमात्मा प्रतिपादित इतिप्रकाशयेत्यर्थः ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे व्रजजनार्तिहन्! व्रजस्य अन्येषां जनानां शरणागतानां च क्लेशनिर्नाशक! हे वीर हे निजजनस्मयध्वंसनस्मित निजजनानां स्मयस्य गर्वस्य ध्वंसनं नाशकं स्मितं यस्य सः तस्य संबोधने तथा हे सखे! भवत्किङ्करीर्नोऽस्मान्भज अनुवर्तस्वेति निश्चितम् योषितामस्माकं चारु सुन्दरं जलरुहाननं तावद्दर्शय ॥ ६ ॥

भाषा टीका

हे व्रजवासिनके दुःख के नाश करवे वारे हे वीर! स्त्री जन के तथा अपने भक्तन के अभिमान को नाश करवे वारो आपको मन्दहास है हे सखे! आपकी दासी हमको अंगीकार करो आपके मुख कमल को हमे दर्शन कराओ ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अविशेषेण प्रणतानां देहिनां पापकर्शनं पापहन्तृ तृणचरान् पशूनप्यनुगच्छति कृपयेति तथा सौभाग्येन श्रियो निकेतनं वीर्यातिरेकेण फणिनः फणास्वर्पितं ते पदाम्बुजं नः कुचेषु कृणु कुरु किमर्थं कामं हृच्छयं कृन्धि छिन्धि ॥ ७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

ततश्च ते तावकमसाधारणं किंवा त्वदीयानामस्माकं कुचेषु कृणु निधेहि पापं संसारदुःखं परमोत्कटव्यसनं वा तृणचरानुगमिति सर्वव्रजपशुवर्गपालकत्वेन कृपालुत्वं एवं चतुर्भिर्विशेषणैः पापहन्तृत्वादिकमुक्तं ननु किन्तत्तदर्थमेवेष्यते नेत्याहुः। हृच्छयं कृन्धीति। अस्माकमेतदेव प्रयोजनं तत्तदशेषमेतदनुगतमेवेतिभावः। ततश्च स्वभक्तार्थे किञ्चिदात्मार्थे च किञ्चिदिति यथायोग्यं विवेचनीयम् अम्बुजरूपकेण पुंसां कसरोरुहरूपकवत् सर्वसाधनत्वं परमसाध्यत्वञ्च ध्वनितं ज्ञेयम् अन्यैर्व्याख्यातं यद्वा

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

ननु निर्भयाः । पापादहं बिभेमि तत्राहुः । प्रणतेति । सकृत्प्रणामकारिणामपि यथा कथञ्चिच्छरणागतानामपि वा प्राणिनां पापहन्तृ कुतस्तव पापशङ्केति भावः । मदादिना सागःसु युष्मासु तदाचरणमयुक्तमिति तत्राहुः । प्रणतेति । त्वत्प्रणतानामस्माकमागो नश्येदेवेति भावः—

सकृदेव प्रपन्नो यस्तवास्मीति च याचते ।
अभयं सर्वदा तस्मै ददाम्येतद्व्रतं ममेत्यादिवचनात् ॥

ननु तथापि परमक्रूरेषु मृदुलतरं तद्दुःखशङ्कया कर्तुं न शक्यते तत्राहुः पशुसङ्गत्या वने भ्रमणादिदं नाधिकं दुःखमिति यद्वा अनभिज्ञाभिः युष्माभिः सङ्गो मेऽनर्ह एव तत्राहुः । तृणेति तृणान्येव नत्वग्रतो न्यस्तानि शर्करादीन्यपि चरन्तीति परमाज्ञता सूचिता पशव इव वयमप्यनुकम्प्या इति भावः । ननु सुष्ठु शोभनेषु युष्माकं स्तनेषु कथं पदार्पणं कर्तुं युज्यते इत्यत आहुः श्रीति । सर्वातिशायिशोभास्पदत्वादलङ्करणवर्य्यमेव भावीत्यर्थः । ननु तथापि भीरुस्वभावत्वात् युष्मत्पतिभ्यो बिभेमि तत्राहुः । फणीति । यद्वा फणिफणार्पितत्वेन विषायनर्थवंसनत्वमुक्तं ततो विषोपमहृच्छयमपि हृदि पादार्पणेन कृन्धीति भावः । शिरसीति । पूर्वं सर्वासामैक्याभिप्रायेणोक्तं मूर्द्धि करार्पणमात्रेण सापत्न्यविशेषानुदयात् अधुना च स्तनेष्विति बहुत्वेन प्रत्येकं तेषु करणमभिप्रेतम् अत्र रसविशेषेण सापत्न्यसम्भवात् अतोऽन्योऽन्यं भेदानुत्पत्तये सर्वासामेव प्रत्येकं युगपद्विशेषेण तत्कार्य्यमिति भावः । हृच्छयमिति अदृश्यतद्रोगस्य तथैव प्रतिकार्य्यत्वात् अन्यत्समानम् ॥ ७ ॥

श्रीसज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ द्वितीयेन हृदयान्तरकृतविरहतापशान्तये प्रलेपौषधमिव प्रथमं हृदयबहिरेव तदङ्गसङ्गं प्रार्थयमाना दैन्येन तच्छ्रवणमात्रस्यैव सङ्गं तद्गुणानुवादपूर्वकं प्रार्थयन्ते । प्रणतेति । चरणपङ्कजं ते तावदसाधारणं किम्वा त्वदीयानामस्माकं कुचेषु कृणु निधेहि ननु निर्भयाः । पापादहं बिभेमि तत्राहुः । प्रणतेति सकृत्प्रणामकारिणामपि यथा कथञ्चिच्छरणागतानामपि नलकूबरकालियादीनां प्राणिनां पापहन्तुः कुतस्तव पापशङ्केति । किम्वा मदादिना सागःसु युष्मासु तदाचरणमयुक्तमिति चेत्तत्राहुः प्रणतेति । कालियादिवत् त्वत्प्रणतानामस्माकमागो नश्येदेव । ननु तथापि परमक्रूरेषु मृदुलतरं तत् कर्तुं न शक्यते तत्राहुस्तृणेति पशुसङ्गतो वने वने भ्रमणादिदं नाधिकं दुःखमिति । यद्वा अनभिज्ञाभिर्युष्माभिः सङ्गोऽनर्ह एव तत्राहुः । तृणेति । तृणान्येव नत्वग्रतो न्यस्तानि शर्करादीनि अपि चरन्तीति परमाज्ञता सूचिता । पशव इव वयमनुकम्प्या इति भावः । ननु सुष्ठु शोभनेषु युष्माकं स्तनेषु कथं पादार्पणं कर्तुं युज्यते इत्यत आहुः । श्रीति । सर्वातिशायिशोभास्पदत्वादलङ्करणवर्य्यमेव भावीत्यर्थः । ननु भीरुस्वभावत्वात् युष्मत्पतिभ्यो बिभेमि तत्राहुः फणीति । एतेन विषाद्यनर्थध्वंसनत्वात् विषोपमहृच्छयध्वंसनयोग्यतायुक्ता । एवं चतुर्भिर्विशेषणैः पापहन्तृत्वादिकमुक्तम् । ननु तत्तदर्थमेवेष्यते नेत्याहुः । हृच्छयं कृन्धीति । अस्माकमेतदेव प्रयोजनमिति भावः । यत्ते सुजातेति रीत्या हृच्छयोऽप्ययं स्नेहमयत्वेनैव स्थापयिष्यते । शिरसीति पूर्वमेकवचनं दैन्येनैकस्मिन्नपि करधारणात् सर्वा एव वयमङ्गीकृताः स्यामेति । अधुना तु कुचेष्विति बहुत्वं प्रत्येकं लोभेन कियत् किञ्चित् सम्बन्धेन पर्य्याप्तत्वाद्दैन्यस्य तेनापर्याप्तत्वात् प्रत्येकं लोभस्येति ७

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तृणचराः गावः तदनु ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अविशेषेण प्रणतानां देहिनां पापहन्तृ तृणचरा गावः ताः अनुसृत्य गच्छतीति तथा सौभाग्येन श्रियो निकेतनमाश्रयभूतं वीर्यातिरेकेण फणिनः कालियस्य फणेष्वर्पितं ते तव पदाम्बुजं नोऽस्माकं कुचेषु कृणु निधेहि हृच्छयं कामं कृन्धि छिन्धि ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न केवलं करनिधानेन पूर्यते अपितु कुचेषु चरणनिधानं चापेक्षितमित्याहुः । प्रणतेति । तृणचरान् पशून् अनुगच्छतीति तृणचरानुगं फणिफणेष्वर्पितं कृणु कुरु हृच्छयं कामं कृन्धि छिन्धि ॥ ७ ॥

श्रीसज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु मद्वदनदर्शनेनैव चेत् कृतार्थास्थ तदा प्रागेव दृष्टं तत्किं पुनरुत्कण्ठध्वे इतिचेन्न केवलं ते वदनदर्शनमेव नोऽभिलषितम् अपितु तव पदाम्बुजं स्तनयोः कर्तुमपीत्याहुः । प्रणतेत्यादि । ते तव पदाम्बुजं नोऽस्माकं कुचेषु कृणु कुरु तदा किं भविष्यतीत्याशङ्क्याहुः हृच्छयं हृत्तापं कृन्धि ननु मत्पदाम्बुजस्य हृच्छयच्छेतृता कथं प्रसिद्धा तत्राहुः । प्रणतदेहिनां पापकर्षणं पापकर्षणतोऽधिको हृच्छयच्छेदः तस्यागन्तुकत्वात् ननु ते प्रणता इति तथा क्रियते नैतदपि यतस्तृणचरानुगं तृणचराणां पशूनामप्यनुगं एवमेव तस्य स्वाभाविकमेव क्षणिकत्वं ननु कुंकुमादिपङ्किलेषु परममनोज्ञेषु वस्तनेषु पदार्पणमनुचितमेव नेत्याहुः । श्रीनिकेतनं शोभास्पदं तत्सम्पर्कादस्माकं स्तनयोः कमलच्छादितकनकपूर्णकुम्भवच्छोभातिशयो भावी ननु सत्यं ब्रवीमि कठिनेषु वस्तनेषु कमलकोमले पदे कथमर्पयितव्ये इत्यत आहुः । फणिफणार्पितं फणिनः कालियस्य मणिभिः कठोरासु फणासु अर्पितं तत्कथं शङ्का इत्युपलहारः ॥ ७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

राजसीतु तत उत्तमा तमेवार्थं प्रकारान्तरेण । प्रार्थयते प्रणतदेहिनामिति । ते पदाम्बुजं नः कुचेषु कृणु कुरुष्व छान्दसो लोपः स्थापय तस्य प्रयोजनं । कृन्धि हृच्छयमिति । हृदये चोरवत् स्थितं कामं कृन्धि कुचेष्विति समुदायाभिप्रायेण बहुवचनं

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

विरहेणभिन्ना मन्यन्ते शिरसि हस्तदानेन निकटे समानयनमुक्तं ततो भजनेन संवन्ध उक्तः अनेन विपरीतरस उच्यते बन्धविशेषो वा तिर्यग्भेदः एकवचनात् तावता हि हृदयस्थितः कामो गच्छति स्त्रीणां समूहे लीलाशयने परितः स्थितानां तथा संबन्धो भवतीति वा ननु कर्कशेषु स्तनेषु कथं कोमलचरणस्थापनमितिचेत्तत्राहुः । फणिफणार्पितमिति । नहि कालीयफणात् क्रूराः अस्मत्स्तनाः तत्र यथा चरणस्थापनं कृत्वा तदन्तर्गतो दुरीकृतः एवमत्रापि कर्तव्यः अम्बुजपदेन प्रत्यक्षतस्तापहारकत्वं ननु तथापि स्त्रीणां वक्षसि चरणस्थापनमयुक्तमितिचेत्तत्राहुः । श्रीनिकेतनमिति । लक्ष्म्याः स्थानं तल्लक्ष्मीः किल तत्र स्पर्शमर्हति अन्यासु कः सन्देह इति । ननु भवत्यो मूढाः कथम्भवतीनां हितं कर्तव्यमितिचेत्तत्राहुः । तृणचरानुगमिति । तृणचरा गावः तेषा मनुगं पश्चाद्गच्छति तद्धितार्थं ते किम्भगवता प्रेर्यमाणा इति तृणं परित्यज्यामृतं भक्षयन्ति तेषां तृणमेवामृतं तथास्माकमपि काम एवामृतं नैतावता परमकृपालोः कश्चनार्थः क्षीयते असामर्थ्यं तव नास्तीत्याहुः । हे वीरेति । ननु भवतीनां जितेन्द्रियत्वाद्यभावात्पापमस्ति तदपगमे पश्चात्पदं स्थापयिष्यामीतिचेत्तत्राहुः । प्रणतदेहिनापापकर्षणमिति । वयं प्रकर्षेण नताः नास्माभिः प्रकारान्तरेण निवर्तयितुं शक्यते किन्तु तव चरणप्रसादादेव नम्राणां पापं गच्छति तत्रापि देहिनः प्रकर्षेण न तत्त्वेन धर्ममार्गादपरित्याग उक्तः देहाभिमानस्य विद्यमानत्वात् न ज्ञानमपि प्रणतानां हि नान्यथा गतिः अतस्तव पदमेव तेषां पापनाशकं चिन्तितं दृष्टं स्पृष्टमालिङ्गितं वा ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अपरा आहुः कुचेषु पदाम्बुजं कृणु अर्पय किमर्थम् । हृच्छयं कामं कृन्धि छिन्धि । अत्राभिः समर्थरतिमत्त्वेन महाप्रेमवतीभिः स्वीयदुःखापायसुखप्राप्तिज्ञानरहिताभिः श्रीकृष्णसुखैकप्रयोजनककायिकवाचिकमानसव्यापाराभिस्तस्यैव सौरतसुखोद्दीपनार्थमेव स्वीयरूपयौवनकामपीडां विवृणवतीभिः परमविदग्धाभिः प्रायः प्रेम्णो वाङ्निष्ठतालाघवं न क्रियते । किन्तु कामस्यैव यथा भोजनलम्पटं कश्चित् स्वमित्रं बुभुक्षुमभिलक्ष्य स्नेहेन तं भोजयितुकामः चतुर्विधमिष्टान्नसाधने प्रयतमानो जनस्तेन पृष्टोऽपि स्वार्थमेवाहं प्रयास्यामि न त्वदर्थमिति ब्रूते तदैव प्रेमा गुरुर्भवति यदि त्वेतावान् ममायासस्त्वत्सुखार्थमेव मम तु स्वार्थे निष्कामत्वादिति ब्रूते तदा प्रेमलघु भवति । यदुक्तं प्रेमसम्पुटे । प्रेमा द्वयो रसिकयोरपि दीप एव हृद्वेश्म भासयति निश्चलमेव भाति । द्वारादयं वदनतस्तु बहिष्कृतश्चेन्निर्याति शीघ्रमथ वा लघुतामुपैतीति । तत्रासां स्वसुखतात्पर्याभावो न पारयेऽहमिति भगवद्वाक्यादेव स्ववशीकारव्यञ्जकाद्दर्शायते । तस्य प्रेमैकवश्यत्वमेव सर्वशास्त्रदृष्टं नतु कामवश्यत्वमिति ज्ञेयम । ननु पापाद्बिभेमि तत्राहुः । प्रणतानां देहिनां पापनाशकं तव कुतः पापशङ्केति भावः । ननु च कठोरेषु युष्मत् कुचेषु सुकुमारं मत्पादाम्बुजं व्यथिष्यते तत्राहुः

तृणचरानुगं तृणचरा गावस्तासामप्यनुगच्छति गावो हि कठोरस्थलेऽपि घासं चरन्ति । यदि तत्रापि त्वच्चरणस्य सहिष्णुता तर्हि किमुतास्मत्कुचेषु कुचकाठिन्यं प्रत्युत तस्य सुखदमिति भावः । ननु नानारत्नालङ्कारमण्डितानां युष्मत्कुचानामुपरि पादार्पणमनुचितं तत्राहुः । श्रियः शोभाया निकेतनमिति कुचानामलङ्कारवर्यमेवैतद्भविष्यतीति भावः । ननु युष्मत्पतिभ्यो बिभेमि तत्राहुः । फणिनः फणेषु अर्पितं त्वं कालियनागादपि न बिभेषि किमुत तेभ्य इति भावः ॥ ७ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अपि च । प्रणतेति । चरणपङ्कजं ते तावकम् साधारणं त्वदीयानामस्माकं कुचेषु कृणु निधेहि ननु निर्भयाः पापाद्बिभेमि तत्राहुः । प्रणतेति । सकृत्प्रणतानामपि कथंचिच्छरणागतानामपि नलकूवरादीनां च प्राणिनां पापहन्तृ ततश्च कुतस्तव पापशङ्केति भावः । किं मदादिना सागःसु । युष्मासु तदाचरणमयुक्तमितिचेत्तत्राहुः प्रणतेति । कालियादिवत्प्रणतानामस्माकमप्यागो नश्येदेवेति भावः । ननु तथापि मृदुलतरमतिकठोरेषु धर्तुं न शक्यते चेत्तत्राहुः तृणेति पशुसङ्गत्या वने वने भ्रमणादिदं नाधिकमाधिदमिति भावः । यद्वा अनभिज्ञाभिर्युष्माभिः संगोऽनर्ह एव तत्राहुः तृणान्येव नत्वग्रतो न्यस्तानि शर्करादीन्यपि चरन्तीति परमाज्ञता तद्वदेवानुकम्प्या वयमिति दैन्यमपि नन्वतिमनोज्ञेषु पादार्पणमनुचितमित्यत आहुः । श्रीति सर्वातिशायि शोभास्पदत्वादलमलंकरणमेव भावीत्यर्थः । स्यादेतद्दीनजनकृपापरवशत्वेन कामिनीनां युष्माकं तु स्पर्शेन ममाप्यनिष्टं भावीति तत्राहुः । फणीति । नहि तत्स्पर्शेऽप्यनिष्टं जातं प्रत्युततन्महाविषार्तिहरणामेवास्माकं हृच्छयं कृन्धीति एतदेव प्रयोजनमिति भावः ॥ ७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

दर्शनोत्तरमनोरथं प्रार्थयन्ति । प्रणतदेहिनामिति । यतोऽन्यजलरुहानामपि न नस्तापोपशमकत्वं प्रत्युत विरहकामाग्न्युद्दीपनेनोपतापकत्वमेवातस्ते त्वत्संबन्धि यत्पदाम्बुजं तदेव ते त्वदीयानां नः कुचेषु कृणु निधेहि किमर्थं तद्धारणं तत्राहुः । कृन्धीति । त्वदेकभोग्यमस्मद्रूपानुरागादिधनं कुचेष्वेव काञ्चनकलशेषु निधिवद्व्यवस्थापितं तदपहर्तुं चोरवद्धृदि त्वन्निवासास्पदे शेते निर्भयतया निवसतीति तथा कृन्धि निःसारं ततो निःसारय यथा त्वदाक्रीडे कालिन्दी ह्रदे बहुयुगावासमपि कालियं निःसार्य तद्विषोपशमनं कृतं तथास्मद्धृदि ह्रदे तदपनयनेन तत्तापविषोपशमो विधेय इत्यभिप्रेत्य दृष्टान्तीकुर्वन्त्य आहुः । फणिफणार्पितमिति । यद्वा कामविरहाग्नितप्तेषु कुचेषु कथम्पदाम्बुजधारणं भयास्पदत्वात्तत्राहुः । फणिफणार्पितमिति तथाच विषानलव्याप्ततत्फणार्पितस्यास्य न भयशङ्कासम्भावनापीति भावः । नः कुचेषु तु नखमणिप्रदीपानि तत्पदाम्बुजधारणेमङ्गलकलशत्वोपपात्तिरेव स्यात् ननु परमसौभाग्यवत्सुयोषितां कुचेषु कथमनुत्तमाङ्गधारणं तत्राहुः । श्रीनिकेतनमिति । पद्मापद्मालयेत्यादिवाक्येषु अम्बुजानां तदालयत्वप्रसिद्धावप्यम्भोजवनं विहाय ते पदाम्बुजाश्रयश्रवणात्तदेव मुख्यं श्रियो

श्रीरामनारायणकृतभावभावविभाविका।

निकेतनमिति तद्धारणे एतास्मत्स्तनशोभान्यथा निःश्रीकत्वमेव यद्वा श्रियि नितरां केतनं यस्य तथा च सर्वसम्पत्सौभाग्याधिष्ठातृदेव्याः श्रियोऽपि हृदलङ्करणं कथं ग्राम्याणां नोहृदलङ्कारायालं न स्यात् ननु तथापि श्रियो हृदि श्रितं कथंग्राम्यत्वेनारसज्ञानां हृदि धारणीयं तथापि मृदुलं नलिनीदलललश्रीललनाकरतललनेऽप्यमलं पदाम्बुजं कथं रोमाञ्चितकणाक्रान्तातिकठोरेषु कुचगिरिषु श्रियेत तत्राहुः। तृणचरानुगमिति। तथाच वयं धीरिव रूपिण्योऽपि त्वद्विरहेणैव ननु ग्राम्यत्वेन पशुवृत्तयस्त्वदुपभोग्या अनुकम्प्यश्च तथातृणचरानुगमनशीलस्य न रोमाञ्चतृणान्वितकुचगिरिस्पर्शभयशङ्कापि ननु पतिं तुत्सृज्य परपुरुषानुरतानां पापिनीनां परदाराणां विहारे पापमेवाश्रयेत तत्राहुः प्रणतदेहिनामिति। तथाच यत्प्रणतानां देहिनां देहाध्यासाक्रान्तमतीनामपि पापासम्भवः किमुवाच्यं तत्प्रणतानां प्रेम्णापगतदेहानुसन्धानानां नो देहदेहिभावशून्यस्य सच्चिदानन्दविग्रहस्य वा तव सर्वपापापहारकस्य पापशङ्कातः सर्वपापापहारिणस्तव नो मानमात्रपराधहेतुवचनं विरहे वैक्लव्यपशुवृत्तीनां नोऽनुकम्पयानुगमनं त्वद्वियोगमतश्रीकाणां श्रीसौभाग्यवर्द्धनं कामतापविशेषशमनञ्च सर्वथापिन्याय्यमिति भावः॥ ७॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अन्याः प्रार्थयन्ति। प्रणतेति। ते पदाम्बुजं नः कुचेषु कृणु कुरु बहुवचनं समुदायाभिप्रायेण ते त्वदीयानां न इति वा ननु विरहानलज्वालाव्याप्तेषु स्तनेष्वतिसुकुमारचरणस्थापनप्रार्थनं नोचितमितिचेत्तत्राहुः। फणिनः कालियस्य शेषस्य फणासु अर्पितं तथा च परमकोमलमपि विलक्षणशक्तिमत्त्वात्केनापि पीडयितुमशक्यमिति भावः। ननु तथापि स्तने चरणस्पर्शो नोचित इतिचेत्तत्राहुः। श्रीनिकेतनं लक्ष्म्यावासस्थानं तथा च श्रीर्यत्र सर्वदा तिष्ठति तस्य स्तनेषु स्पर्शोऽन्यासाङ्कः सन्देह इति भावः। ननु कामाक्रान्तत्वात्तया निकृष्टानां युष्माकमनुरोधो नोचित इति चेत्तत्राहुः। तृणचरानुगं यथा भगवता पाल्यमाना अपि गावस्तृणं परित्यज्यामृतं नाश्नन्ति किन्तु तृणमेव तासाममृतं तथापि कृपालुना त्वया नोपेक्ष्यन्ते अपितु तदनुरोधएव क्रियते तद्वद्भगवदीया अपि वयं यद्यपि कामासक्तास्तथापि नोपेक्ष्या इति भावः। ननु तथापि युष्माकमजितेन्द्रियतादिसम्पादकं पापं वर्त्ततेऽअतस्तत्सत्त्वे कथं मत्पादस्पर्शाधिकारस्तस्मात्तन्निवर्तककर्मानुष्ठानानन्तरं तथा करिष्यामीति चेत्तत्राहुः। प्रणतदेहिनां पापकर्षणं प्रकर्षेण स्वधर्मत्यागपूर्वकं ये नरा देहाभिमानानिवर्तकतत्त्वज्ञानरहिताश्च तेषां पापनिवर्तकयोः स्वधर्मतत्त्वज्ञानयोरभावात्त्वत्पदाम्बुजमेव स्मृतं दृष्टं स्पृष्टम्वा तन्निवर्तकं मत्यानन्दं तथाभूतानामस्माकं तेनैव पापनिवृत्तिसम्भवान्नानुष्ठानान्तरमपेक्षितमिति भावः। तत्र तदर्पयित्वा हृच्छयं कामं छन्धि नाशय तथाच न पापनिवृत्तिरस्माकमभिलषिता किन्तु कामस्य निवृत्तिरितिभावः। यद्वा ननु भवत्यः कामोपाधिकप्रीतिमत्योऽतोमम दर्शनमात्रस्यापि नाधिकारिण्य इति चेत्तत्राहुः। एवञ्चेतर्हि तत्प्रतिबन्धकं काममेव छन्धि कथमित्यपेक्षायामाहुः। नः कुचेषु स्वपदाम्बुजं कुरु ननु—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥

इत्युक्तत्वात्तत्स्थापनेन न तन्निवृत्तिर्भविष्यति किन्तु प्रत्युताभिवृद्धिरितिशङ्कापि पदस्थापनप्रार्थनया निराकृता हस्तस्थापनस्य तदभिवृद्धिहेतुत्वात् ननु तत्स्थापनस्याभिवृद्धिहेतुत्वाभावस्यापि कथं तन्निवृत्तिहेतुत्वमित्याशङ्क्याहुः। फणीति तथाच कालियफणार्पणेन यमुनाह्रदस्य निर्विषत्वं त्वया सम्पादितं तद्दृष्ट्वा देहलक्षणफणिनः कुचलक्षणफणार्पणेन यमुनाह्रदस्थानीयहृदयस्य कामरूपविषस्य निःसरणेन निर्विषत्वसम्पादनसमर्थत्वमित्यनुमिमीमहइति भावः। न केवलं दोषानिवर्त्तकमात्रं किन्तु गुणाधायकमपीति द्योतनायोक्तं श्रीनिकेतनं तथाच तत्त्वाद्भगवानैश्वर्यादिलक्षणश्रियःस्पर्शमात्रेणाधायकमिति भावः। ननु परमोत्कृष्टस्य मत्पदाम्बुजस्य स्पर्शोऽपि दुर्लभ इत्याशङ्कानिरासायोक्तं तृणचरानुगं तथाचास्मदधिकाराभावेऽपि तव करुणया तस्य सौलभ्यमिति भावः ननु तथापि पापनिवृत्तिंविना कथं तत्सम्भव इत्याशङ्कानिवृत्त्यर्थमुक्तं प्रणतेति अनभिज्ञापक्षे अथवा हृत्तापशान्तिकरपलेपौषधिमिव हृदि अङ्गसङ्गमभीप्सन्त्यो दैन्येन चरणसङ्गमेव प्रार्थयन्ते प्रणतेति। ते पदाम्बुजमस्माकं तत्तेषु कुचेषु निधेहि ननु पापभयाश्चैवं कर्तुं शक्नोमीतिचेत्तत्राहुः। प्रणतानां नलकूवरादीनां स्थावरत्वादिप्रदपापस्य कर्षणमतस्तेन तव का पापप्राप्तिसम्भावनेति भावः। यद्वा ननु किमिति करपद्मस्थापनं न प्रार्थ्यत इत्याशङ्क्य स्वापराधनिवृत्त्यर्थमादौ पदाम्बुजस्थापनमेव प्रार्थ्यत इत्याशयेनाहुः प्रणतेति। प्रणतानामस्मदादीनामपराधनाशकमित्यर्थः। ननु नैवं प्रार्थनीयं काठिनेषु तेषु स्थापनेन मृदुलस्य चरणस्य पीडोदया दित्याशङ्क्याहुः तृणचरानुगं। तृणशर्करादयन्तकठोरवस्तुषु स्थापनादेवं कृतेनाधिकं दुःखमितिभावः। अनेन यथातृणचराग्रहवशात्तदनुगमनजन्यपीडा त्वया न गण्यते तथास्मदनुग्रहवशादपि सा न गणनीयेत्यपि ध्वनितं ननु नानारत्नालङ्कृते पादार्पणं न शोभत इतिचेत्तत्राहुः। श्रीनिकेतनं नखचन्द्रादिशोभास्पदत्वात्ततोऽप्याधिकालंकृतिकरमिति भावः। ननुयुष्मद्धृदयस्थतापजन्यदाहः कथं सोढुं शक्य इतिचेत्तत्राहुः। फणीति। भवतु किन्तत इति चेत्तत्राहुः हृच्छयं कामं छन्धि पश्चाद्यथाकामोपशमः स्यात्तथा कुरुत्वेति भावः। मानिनीपक्षे ननु युष्मद्दर्शनमात्रस्य कामोद्दीपकत्वान्मानवतीनां युष्माकमालिङ्गनादेर्दुर्घटत्वात्कामबाधाभयान्नाहमाविर्भवामीतिचेत्तत्राहुः। प्रणतेति। अहो सत्यमिदं तथाप्यनन्तव्यभागलभ्यं नः कुचेषु यथाकथं चित्पदाम्बुजं कृणु एतावन्मात्रमस्माभिरनुज्ञायत इति भावः। नन्वेतं विना मम प्रयोजनं कथं भवतीति चेत्तत्राहुः। छन्धीति। अस्माकं लोकोत्तरसौन्दर्यत्वादेतावतैव तवोपतिर्भविष्यतीतिव्यङ्ग्यं। ननु सर्वोत्तमानां युष्माकं पदेन स्पर्शे कृते पापं भविष्यतीति नाहं तथा कर्तुं शक्नोमीति चेत्तत्राहुः। प्रणतेति। ननु परमकोमलस्य पदाम्बुजस्यातिकठोरयुष्मत्कुचस्पर्शेन पीडाभविष्यति तथाच तथा व्याप्तहृदयस्य मम रसाविर्भावोदुर्लभ स्ततः कराम्बुजार्पणमतुज्ञायतामिति चेत्तत्राहुः। तृणेति। अहो प्रलापलापपरायणचूडामणे तृणशर्कराद्यपेक्षयाप्यस्मत्कुचः किङ्कोर इतिभावः। ननु भवतु यथाकथञ्चित्स्थापयिष्यामि तथापि तेन कुचानां शोभा न भवतीति चेत्तत्राहुः। श्रीति। शोभाविर्भावकार्ये तव चरणस्पर्शः शोभास्पदत्वं अस्माभिज्ञायत इतिभावः

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ! ।
विधिकरीरिमा वीर ! मुह्यतीरधरसीधुनाप्याययस्व नः ॥ ८ ॥

श्रीवनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु मदीयतिरोधानरूपापराधेन भवतीनामन्तः करणे महान्क्षोभो वर्तते तथाच क्रोधानलज्वालया तद्दाहावश्यंभावात्कथं रसानुभव इतिचेत्तत्राहुः ।फणीति । अहो किमित्येवमनुभूतसामर्थ्यानामस्माकमग्रतो बहुविधं चातुर्य्यं प्रकाश्यते त्वया नहिकालियाविषदग्धस्यान्येन केनाचिद्दाहःसम्भवतीतिभावःतस्माद्भयं विहायागन्तव्यमितिभावः । निवृत्तिपक्षे नन्वन्तःकरणशुद्धिं विनेदङ्कथं भविष्यतीतिचेत्तत्रापि त्वदधीनेत्याशयेनाहुः । प्रणतेति । तव पदाम्बुजोपासनेन हि चित्तस्यशुद्धिर्भवत्यतस्तन्नः कुचेषु कर्मोपासनप्रतिपादनभोगेषु कुरु भवत्पदाम्बुजाराधनमेव कर्मोपासनाकाण्डयोरर्थ इत्यधिकारिचेतसि प्रकाशयेत्यर्थः । यतस्तव पदाम्बुजं फणिनः शेषस्य फणास्वर्पितं तथाच ।—

नारायणपरा वेदा नारायणपरा मखाः ।
नारायणपरा योगा नारायणपराः क्रियाः ॥

इत्युक्त्वाच्छेषशायिनारायणस्य भगवतस्तव पदाम्बुजसेवनमेव काण्डद्वयार्थ इतिभावः । यतश्च श्रीनिकेतनं भोगमोक्षश्रीप्रदं यतश्च साधकानुग्रहार्थं रामकृष्णाद्यात्मनावतीर्णस्य तव तृणचरानुगं गोमृगाद्यनुगमनपरं तृणचरैस्त्यक्तसर्वभोगैस्तपस्विभिरनुगम्य प्राराध्यत इति तदिति वा यतश्च प्रकर्षेण नतिमात्रमपि कृतवतां देहिनां समस्तपापोच्छेदकं तदुक्तम् ।—

एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवायेति ॥

एवम्भूतेन काण्डद्वयप्रतिपादितेन सम्यगुपासितेन निजजनस्य हृच्छयं कामं कृन्धि नाशयेत्यर्थः ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रणतानां शरणागतानां देहिमात्रोपलक्षितानां पापकर्षणं दुरितापहं सर्वशरण्यत्वात् तृणचरान् पशूननुगच्छतीति भक्तेच्छानुसारित्वात् सौभाग्येन श्रियो निकेतनमाश्रयभूतम् फणिनः कालियस्य फणास्वर्पितं दुष्टदमनकर्तृ एवंभूतं ते पदाम्बुजं नः कुचेषु कृणु निधेहि किमर्थमित्यत आहुः कुरु हृच्छयं कामं कृन्धि छिन्धि ॥ ७ ॥

भाषा टीका ।

शरणागत प्राणीन को पाप नाश करवे वारो तृणाचर गऊअन के पीछें जायवे वारो महालक्ष्मी को निवास स्थान कालि के फणालि पै नृत्य करवे वारे आप को जो चरण कमल ताको हमारे स्तनों पै स्थापन करो हमारे हृदय के कामदेव को शान्त करो॥७॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे पुष्करेक्षण।तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गम्भीरयेत्यर्थः । मुह्यतीरिमा नो विधिकरीः किङ्करीरधरसीधुना आप्याययस्व सञ्जीवयेति ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततश्चाधरसीधुना ऽस्मानाप्याययस्व अन्यथा सद्य एव म्रियेमहीति भावः । कुतः तव गिरा पूर्वोक्तया ऽधुना स्मर्य्यमाणया नहि भवतीभ्यो मम कुत्रापि किञ्चिदन्यत् प्रियमस्तीत्यादिलक्षणया मुह्यतीः मोहस्यान्त्यदशानुगत्वात् विरहेण सौख्यप्राप्त्या जनितस्य मोहरोगस्य वैद्यशास्त्रोक्तनिदानविपर्य्ययन्यायेन तत्प्राप्त्यैवोपशमःसिद्धेस्तत्त्वन्यथा तच्च युक्तमेवत्याहुः । विधिकरीः त्वदाज्ञाकारिणीः गिरो मोहहेतुत्वं दर्शयन्ति । मधुरया अमृतवान्मिष्टया यद्वा मधु मद्यमेव साक्षादिव राति ददातीति तया इतिपरममादकत्वमुक्तं कथं तदाहुः । वल्गूनि अर्थस्य प्रियत्वादिना शब्दस्य च सद्गुणबन्धादिना मनोहराणि वाक्यानि यस्यां तया अतो बुधानां विदग्धानां चित्ताकर्षिण्या इति श्रोत्रमनः प्रियत्वमुक्तं इमा इति प्रत्यक्षत्वादिना असन्दिग्धत्वं तत्कालीनत्वं च मोहस्योक्तं ननुवाङ्मात्रेण कथं मोहः स्यात् तत्राहुः । वीर हे महासामर्थ्ययुक्तेति त्वं दूरेऽपि तादृशत्वादित्यर्थः । यद्वा कथमदेयं दातव्यमित्यत आहुः । हे वीर ! दयावीर दानवीरेति वा पुष्करेक्षण ! हे परमसुन्दरेत्यर्थः । यद्वा गिरा मुह्यतीः अत एव विमोहनत्वमधिकमभिप्रेतं तथाच कर्णामृते पर्य्याचितामृतरसाभिपदार्थभङ्गीवल्गूनि वल्गितविशालविलोचनानीति अन्यत्तैर्व्याख्यातं यद्वा गिरा मुह्यतीः अत एव विधिकरीः दासीत्वं गताः मोहेन विवेकापगमात् यद्वा गिरैव विधिकरीः अधुना विरहार्त्त्या इमा मुह्यतीः अकारप्रश्लेषेण अबुधानामपि किमुत विदग्धानां यद्वा बुधानां ज्ञानिनामपि किम्पुनर्भक्तानां किम्वा बुधानां पण्डितानामपि किमुताबुधानामस्माकं मनोज्ञया अन्यत्समानं अथवा मधुरया श्रोत्रमात्रप्रिययेत्यर्थः । वस्तुतस्तु अवल्गुवाक्यया अबुधमनोज्ञया तथापि विधिकरीः कुत इमाः त्वत्प्रेमहृतविचारा गोपीः अत एव त्वदधरशीधुं प्रति तदर्थं मुह्यती नाप्यायय न स्वस्थय किन्तु मारयेत्यर्थः । तदेव विवेकिनीनामस्माकमुचितमिति भावः । एषा प्रेमार्त्तिभरोक्तिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ तन्मुखसौरभानिभतद्भाषितविशेषजनिततत्पातेच्छारम्भकस्य मोहपर्यन्तदशागामिनस्तापस्य पुनरन्यदुःखैकिवत्समामाशङ्कमानास्तस्मिन्नेवाङ्कलङ्के पेयौषधमिवान्तरङ्ग सङ्गमनीयं तन्मुख सुधाकरसुधारसमपि प्रार्थयन्ते । मधुरयेति । अधरसीधुनास्मा-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नाप्यायस्व अन्यथा सद्य एव म्रियेमहीति भावः । कुतस्तव गिरा स्मर्यमाणया स्वागतं वो महाभागा इत्यादिलक्षणया । कठोरा भव मृद्वी वा प्राणा स्त्वमसि राधिके ! । अस्ति नान्या चकोरस्य चन्द्रलेखां विना गतिरित्यादि लक्षणया वा यया कयाचिद्वा मुह्यतीः अन्त्यदशानुगं मोहं प्राप्तवतीः । कीदृश्या गिरा मधुरया, स्वरविशेषेण वर्णविन्यासविशेषेण प्रेममृदुतया प्राणिमात्राणां रुचिरतया । तथा वल्गूनि आकाङ्क्षायोग्यतासत्तिसौष्ठववन्ति वाक्यानि सुप्तिङन्तवर्गो यत्र तादृश्या । तथा बुधानामर्थज्ञानां मनोज्ञयाभिधालक्षणाव्यञ्जनादिवृत्तिप्रतिपादितवस्तुरसभावालङ्कारार्थगाम्भीर्येणानन्दप्रदया । इमा इति प्रत्यक्षत्वादिना असन्दिग्धत्वं तत्कालीनत्वं च मोहस्योक्तं कथमदेयं दातव्यमित्यत आहुः । हे वीर ! दयावीर दानवीरेति वा । पुष्करेक्षणेति उक्तावसरे सस्मितविलाससुन्दरदृष्ट्यादिना गिर एव विमोहनत्वमाधिकमभिप्रेतम् । तथाच कर्णामृते । पर्याचितामृतरसानि पदार्थभङ्गीवल्गूनि वल्गितविशालविलोचनानीति। अन्यत्तु ॥ यद्वा । गिरा मुह्यतीः अत एव विधिकरीः दासीत्वं गताः मोहेन विवेकापगमात् । यद्वा । गिरैव विधिकरीः अधुना विरहार्त्या इमा मुह्यतीरिति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मधुरया कोकिलादिशब्दवच्छ्राव्यया वल्गुवाक्यया वचनभङ्गीविशेष वत्या विधिकरीः नियोगकरीः ॥ ८ ॥

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे पुष्करेक्षण ! बुधानां हृद्यया वल्गूनि वाक्यानि यस्यां तथात एव मधुरया कोकिलादिशब्दवच्छ्राव्यया ते तव गिरा मुह्यतीः विधिकरीश्च इमा नोऽस्मानधरामृतेनाप्यायस्व सञ्जीवय ॥८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वल्गूनि मनोहराणि वाक्यानि निराकाङ्क्षाणि पदात्मकानि यस्यां सा तथा तथा बुधानां विदुषां मनोज्ञया हृद्यया मधुरयेति इत्यनेन प्राप्तां बालभाषणशङ्कां निराकरोति विधिकरीः दासीः अधरसीधुना अधरामृतेन आप्यायस्व सेचय जीवय वा मुह्यतीः मोहं गच्छतीः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु भवत्यो नियतवचसः प्रागुक्तकरसरोरुहं शिरसि धेहि ततश्च अलकहाननं दर्शयेति । ततश्च पदाम्बुजं कृणु कुचेष्विति निश्चित्य कथ्यतां तदेव करोमीतिचेत् भूम इत्याहुः ।" मधुरयेत्यादि हेपुष्करेक्षण कमललोचन मुह्यतीर्मोहं प्राप्नुवतीरिमा विधिकरीः किङ्करीरस्मान् अधरसीधुना अधरमधुनाप्यायस्व जीवय अधरमधु पाययित्वा तदर्पयेतियावत् नच तत्र तूष्णीकेन त्वयाधरः पाययितव्यः किन्तु मधुरकथापूर्वकमित्याहु मधुरया गिरा मा मोहं व्रजत पिबत पिबताधरमिति कोमलेन वचसा विशेषेण तृतीया कीदृश्या वल्गु सुन्दरया वाक्यमाकांक्षादिमत्पदकदम्बं यत्र तथाभूतस्यैव शब्दस्य प्रामाण्यात् अत एव बुधानां पण्डितानां विदग्धानामिति यावत् मनोज्ञया रुचिरया इत्येव यमवधिर्नोपरं याचितव्यमिति ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

इममेवार्थं ततोऽप्युत्तमा प्रकारान्तरेण प्रार्थयते । मधुरया गिरेति । "हस्तेन च स्वरूपेण पदा चोपकृतिर्मता । मुखेन चोपकारो हि कर्त्तव्य इति ता जगुः । पूर्वोक्तमपि सर्वं हि यावत् स्पष्टं न भाषते । तावत्सरसतां याति न कदाचिदिति स्थितिः„ हे स्वामिन् मधुरया गिरा मुह्यतीरिमा गोपीराप्यायस्व मोहोहि मरणपूर्वावस्थारूपः तासामाप्यायेन हेतुः विधिकरीरिति आज्ञाकारिणीः सेवाकारिणीर्वा असामर्थ्यंतु तव नास्तीत्याहुः । हे वीरेति शौर्यं हि आर्त्तानामार्तिनिराकरणार्थम इमा इति प्रदर्शनेन क्षणमात्रविलम्बेन मरिष्यन्तीति सूचितम् ननु वाङ्मात्रेण कथं मोहनिवृत्तिरितिचेत्तत्राहुः । मधुरयेति । मोहो हि मायारूपः स भवत्स्वरूपेणैव निवर्त्तते सच्चिदानन्दरूपेण तत्र तव वाणी आनन्दरूपेत्याहुः । मधुरयेति । मध्वसाधारणो रसः तद्युक्ता मधुरा वल्गु मनोहरं वाक्यं यत्र वाक्यस्य मनोहरत्वं सत्यप्रियप्रतिपादकत्वेन अतः सद्रूपता निरूपिता बुधानां मनोज्ञा आल्हादकारिणी अनेन ज्ञानरूपा निरूपिता ते हि ज्ञानेनैव रता भवन्ति मुखे नयने वर्तेते इति तयोरपि व्यापारं कृत्वैव वक्तव्यमित्याहुः पुष्करेक्षणेति कमलवत्परतापापहारके ईक्षणे यस्य किञ्च अधरसीधुना अधरामृतेन च आप्यायस्व वक्तव्याःद्रष्टव्याः पाययितव्या इति मूर्च्छितानां हि मुर्च्छानिवारणार्थं महामन्त्राः पठ्यन्ते कमलादीनि च शीतलद्रव्याणि स्थाप्यन्ते सर्वथा असाध्ये अमृतमपि पाय्यते अतिगोप्यान् पाययन्ति इयन्तु मूर्च्छा नाल्पेन निवारयितुं शक्येति वीरेति संबोधनम् अनेन अन्तिमावस्था प्रदर्शिता पूर्वप्रार्थितश्चार्थाः स्मारकत्वेनाधिकमूर्च्छाहेतवो जाताः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भो भो मत्प्राणैकवल्लभा ! रत्नवल्लभाः जीवातुभूतासु भवतीषु नाहमुदासे दासे मयि सन्ततहेमप्रेमहेमशृङ्खलानिबद्धे कथमविश्वस्ता विश्वस्ता भवत भावत्कं कङ्कणमिव शस्तां हस्ताङ्कगतमेव मां जानीतेति स्फूर्तिप्राप्तं तद्वाक्यमाकर्ण्यापरा आहुः । मधुरया माधुर्यव्यञ्जकवर्णघटितत्वात् सुश्रवया वल्गूनि मञ्जुलपदार्थवैचित्रीकाणि वाक्यानि यस्यां तया बुधानां विदग्धानां मनोज्ञया नमो जानत्या गिरा विधिकरीः किङ्करीः नः इमा मुह्यतीस्तन्माधुर्यास्वादभरादानन्दमोहं प्राप्नुवतीः पुनरधरसीधुना आप्यायस्व । यद्वा । मोहं प्राप्नुवतीर्नः अधरसीधुनापि पाययस्व पुनर्मोहं प्रापयस्वेत्यर्थः ॥ ८ ॥

केन चित्कृता विशुद्धरसदीपिका ।

अपिच । मधुरयेति । हे पुष्करेक्षण विशालोत्फुल्ललोचनेति स्मितावलोकितं सम्भाव्याहुः । वीरेति परमादेयमपि दातुं समर्थेति अधरसीधुनास्मानाप्याययस्वेति परमार्त्या प्रलपनमित्यदोषः अन्यथा चरमदशापत्तेः कुतः तव स्वागतं वो महाभागा इत्यादिकया गिरा मुह्यतीः मधुरयेति बहिस्तादृशत्वे ऽप्यन्तः कटुतरयेति भावः रसात्रेधतकत्वात् मोहोऽत्रान्त्यदशैव ननु मया त्वादराभिप्रायेणैव तथोक्तमिति तत्राहु । बुधेति । न वयं बुधाः किन्तु परमाज्ञाः स्त्रिय इत्यपि वक्रोक्तिः यद्वा श्लेषेण मधु मद्ये पुष्परसे इत्यादिकोशाद्बिरेपिमादकमधुसीधुस्पर्शादेव ततस्तन्मोहिताभिस्तदेव प्रार्थ्यत इति यद्वा अधरं धर्तुमशक्यं यत्सीधु तेनेति प्राचुर्य्यमभिप्रेतं यद्वा अधरमवरं सीधु यस्मादित्यतिमादकत्वमुक्तमित्यदोषः वल्गुवाक्ययेति अर्थविचारे त्वतितीक्ष्णयेत्यर्थः ननु किमर्थमाप्यायनीयास्तत्राहु विधिकारीः किङ्करीः मोहनाविवेकापगमादेवमुक्तं किं वा प्रणयकोपेनेति यद्वा दासीत्वं गता इति सर्वात्मार्पणमभिहितम् एवं प्रार्थनचतुष्टयी दर्शिता ॥ ८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तापोपशमं प्रार्थयित्वा रसाप्यायनं मनोरथान्तरं प्रार्थयन्ति । मधुरयेति । यथा मधु आस्वादनमात्रेण प्रलोभकं मादकञ्च यत्स्वर्गादि तदेव रातीति मधुरा तया वल्गूनि वाक्यानि "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्भवती„त्यादीनि यस्यां तया त एव बुधानामैहिकामुष्मिकव्यवहारदक्षाणां परमार्थस्वरूपेण तु अबुधानां वा मनोज्ञया रोचकया गिरा सकामश्रुतिरूपया मुह्यतीरिमा विधिकरीर्विध्यधीनानुष्ठानवतीः प्रजाः हे पुष्करेक्षण हृदयकमलसाक्षिन् ! तथा वीर विशेषेण धीप्रेरक ताः अधरे वेदान्तिमभागे वर्तमानेन सीधुना ज्ञानामृतेनाप्याययासि तथा मधुरया स्वरतो वर्णतश्च स्निग्धसुस्मितापाङ्गनिरीक्षणमिश्रतया च मधुरया सर्वैहिकामुष्मिकसुखतत्साधनविस्मारकानुरागात्मकमधु रातीति तथाभूतया वा तथा वल्गूनि स्नेहरसोद्बोधकगम्भीरभावार्थवन्ति वाक्यानि प्रियहितत्वेन वक्तुं योग्यानि वचनानि यस्यामतएव बुधानां रसविशेषभावनाचतुराणामबुधानाञ्च सर्वप्राणिनां मृगपक्षिद्रुमलतादीनां स्वरादिसौष्ठवेन मनोज्ञया तव गिरा तव मुखपङ्कजसौरभरूपया मुह्यतीः सर्वलोकवेदधर्मविस्मृत्या त्वदेकपराःतथा गतदेहाद्यनुसंधाना अधुना तदनुस्मृतिजनिततन्मुखकञ्जदलाधरमधुसीधुकामलक्षणान्यदुर्विचिकित्स्यतापजान्तिमदशाशोकमोहव्याप्ताः „इमा इति प्रत्यक्षाविह्वलतया मोहासान्दिग्धत्वसूचनं विधिकरीः अमूल्यदासिका आज्ञानुसारिणीः सेवारता वा इति सम्बन्धद्योतनं ता नोऽधरसीधुनामृतसञ्जीवनरसेनाप्याययस्व पुष्करेक्षण वीर इति सम्बोधनाभ्यां विह्वलतया सर्वप्रत्यक्षापि नो दशा न हृत्कमलसाक्षिणो विशेषान्तः प्रेरकस्य तव ज्ञाताताः प्रसीदाधुनोपेक्षायां सद्यो मरणमिति भावः । यद्वा त्वद्विरहकामचिन्ताग्निसन्तापदन्दह्यमानतयान्तिमदशां प्राप्ता मुह्यतीर्नः प्रथमं तावत्पूर्वं निरूपितमधुरया गिरा हे पुष्करेक्षण ! कमलनयन तद्वद्वा तापापहारीक्षणं दर्शनं यस्य तथा वीर विशेषेणास्मत्प्राण आप्याययस्व सचेनाः कुरु परमामृतेनाधरशीधुनाप्याययस्व विगतज्वराः फुल्लिताङ्गीर्विधेहि यद्वा स्वात्मनोऽमृतसञ्जीवनसुरवैद्यत्वमाख्यापयितुं विरहादिनामारयित्वा पुनःसञ्जीवनं त्वयाभिमतं तदनुचितं सितादानेन मरणसंभवे विषं न देयमिति लौकिकन्यायात्तस्मात्पूर्वनिरूपितया मधुरया गिरैव मुह्यतीः कृत्वा ऽधरसीधुना प्याययस्व नो विधिकरीरित्युक्त्या स्वाधीनासु इदमेव मोहनं जीवनं च युक्तं नतु विरहेण मारणमिति भावः ॥ ८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अपरा एतावता दुःखनिवृत्तिमपश्यन्त्यः प्रार्थनीयं किन्दारिद्र्यमिति विचिन्त्य परमोत्कृष्टं वस्तु प्रार्थयन्ते । मधुरयेति—

मां हि प्रार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

कौन्तेय ! प्रतिजानीहि न मे भक्तः प्रणश्यति । सर्वधर्म्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि माशुच इत्यादिरूपया मधुरया अर्थतोऽत्यन्तमिष्टया वल्गूनि मनोज्ञानि वाक्यानि यस्यां तया शब्दतोऽप्यर्थमधुरया अत एव बुधमनोज्ञया बुधानां विदुषां हृद्यया विधिकरीः किङ्करीरस्मान् तथा च नास्माकमविचारिता प्रवृत्तिरितिभावः । संप्रति तिरोधानलक्षणया लीलया मुह्यतीर्मूर्च्छां मरणपूर्वावस्थां लभमाना इमा झटित्यागत्य द्रष्टव्याः हे पुष्करेक्षण ! पुष्करे हृदयकमले ईक्षणं यस्य सः तथा च अन्तर्यामिणा त्वया सर्वं ज्ञायत एव नास्ति विज्ञापनकृत्यमिति भावः । विशालनेत्रेण त्वयेदमागत्य प्रत्यक्षेणोपलब्धव्यमिति वा दृष्ट्वा च स्वाधरामृतेन नोऽस्मानाप्याययस्व संजीवय यतो हे वीर ! निजजनार्तिनिराकरणमेव शौर्य्ये कृत्यमिति भावः । यद्वा स्वभावतएवाज्ञाकरीः संप्रति विरहदुःखेन मुह्यतीरस्मानागत्याप्याययस्व कथमितिचेत् आदौ गिरा ननु वाणीमात्रेण कथं मोहनिवृत्तिरितिचेत्तत्राहुः । मधुरयेति । मायामयस्य मोहस्य सच्चिदानन्दरूपस्य तव मुखाब्धिः सृतया माधुर्य्यव्याप्तया तया निवृत्तिरवश्यं भविष्यतीति भावः । तत्रापि सत्यप्रियाद्विसार्थकत्वाद्वल्गूनि वाक्यानि यस्यां सा तत्रापि बुधजनमनोज्ञया ज्ञानरूपया यद्वा तन्निवृत्तिप्रतिबन्धकं तदाप्यायनं कुर्वित्याशयेनाहुः । पुष्करेक्षण ! तथाच लोकोत्तरसौन्दर्य्याद्यलंकृतविग्रहं दर्शयित्वा तद्दर्शनाभिलाषं निर्वर्त्य तथाऽधरामृतपानेच्छामपि तत्प्रदानेन पूरयेत्याशयेनाहुः । अधरेति सर्वमपि कर्तुं प्रदातुञ्च समर्थोऽसीति द्योतयन्त्यः सम्बोधयन्ति हे वीरेति । अनभिज्ञापक्षे न केवलं बहिर्हृदिलेपमात्रेणाऽस्मत्तापस्य शान्तिः कर्तुं वा शक्या किन्तु अत्रोपायबाहुल्यमपेक्षितमित्याहुः मधुरयेति । नोऽस्मानाप्याययस्वाल्हादय यतो मुह्यतीरुपान्त्यान्दशां प्राप्ताः कथमितिचेत्तत्राहुः । गिरा तत्रापि न प्रतियात व्रजामिति वज्रवत्कठोरया किन्तु मधुरया नापि स्वागतमितिवत्प्रतारणरूपयेत्याहुः । वल्गुवाक्यया यद्यपि मुग्धानामस्माकं नास्ति विवेकस्तथापि त्वया बुधजनमनोज्ञैव सा प्रयोक्तव्येत्याशयेनाहुः । बुधेति तथाचैवंविधया गिरा वयं वक्तव्या इत्येको मूर्च्छानिवृत्त्युपायः द्वितीयमाहुः हे पुष्करेक्षण ! तथाच कमलवद्विशालनेत्राभ्यां वयं सम्यक् द्रष्टव्या इति भावः । तृतीयमाहुः । अधरेति । तथाभूतममृतरूपमौषधं मृतानामप्युज्जीवनकरं मापयितव्यमिति भावः । तत्रापि विलम्बो नोचित इत्याहुः इमाः क्षणमात्रमपि विलम्बासहाः ननु मम का ममता यदर्थमेवंविधपरिश्रमो मया कर्तव्य इत्याशङ्क्याहुः । विधिकरीरिति तथाप्यनल्पामिदमौषधं दातुं न शक्नोमीति चेत्तत्राहुः । वीर परमोदार

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ॥
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

त्वाद्दानशूर ! सर्वस्वमपि दातुं समर्थं यद्वा यथोक्तोपायेन गतमूर्च्छाः भवत्यो यथोक्तोपायकर्त्रे सद्वैद्याय मह्यं किम्प्रदास्यथेति चेत्तत्राहुः । विधिकरीरिति । जन्मजन्मान्तरेषु तव किङ्कर्यो भविष्यामो नचान्यत्किंचित्तुभ्यं दातुं वयं योग्यास्तस्मादेतत्प्रतिनिधिभूतस्येतरवस्तुनोऽभावाच्छरीरमेवार्पयिष्याम इति भावः । तावतापि नास्ति ऋणपरिहारो यद्यपि तथापि दानशूरेण त्वया न किमपि विचार्य प्रत्युपकारानपेक्ष्य दानस्यैव सात्त्विकत्वाभिधानात् मानिनीपक्षे ननु नैतावता मम हृच्छयस्य शान्तिर्भविष्यति तदुपशामकमस्त्येकं युष्मत्सन्निधौ वस्तु तथापि भयान्न तत्प्रार्थयामीति सदैन्यप्रार्थनामालक्ष्याहुः । मधुरयेति—

कठोरा भव मृद्वी वा प्राणास्त्वमसि राधिके ! ।
अस्ति नान्या चकोरस्य चन्द्रलेखाम्विना गतिः ॥

इत्य दिरूपया मधुरया वल्गुवाक्यया प्रतारणरूपया अतएव बुधमनोज्ञया गिरा पूर्वं तव वचनकर्त्र्यो वयं जाताः अतएव संप्रति प्रतारणफलभोगसमये मुह्यन्त्यः मरणोपान्त्यदशां प्राप्ताः यद्यप्येवं तथापि सज्जनैरपकर्तर्यप्युपकर्तव्य इति न्यायमनुसृत्यास्माभिरनुज्ञापितोऽस्माकमधरामृतेनस्वात्मानमाप्यायस्वागत्याल्हादय भयाद्रोहितो मातिष्ठेति भावः । भूलक्षणधनुर्द्वयेक्षणलक्षणवाणधारी वीर शिरोमणिस्त्वं किमर्थं बिभेषीति सम्बोधनद्वयाशयः निवृत्तिपक्षे तस्मात्साधकानुग्रहार्थं लीलाविग्रहमादाय—

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥

क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते । यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म सम्पद्यते तदेत्यादिरूपया मधुरया पथ्याभूतार्थप्रतिपादकत्वाद्वल्गुवाक्यया अत एव बुधजनमनोज्ञया अतस्तवीष्टपुष्टिः सृतामृतरूपया नोऽस्मानाप्यायस्व यतस्तद्वाद्युद्भावितमिथ्याभूत तिककर्कशतर्कातिपुष्टवादान्धकारेण मुह्यतीर्नचोपेक्ष्याः यतो विधिकरीर्भवदाज्ञारूपा विधिप्रतिपादिकास्तव किङ्करीभूता अतस्तथाभूता गिरऽऽश्रयमस्मानागत्याप्यायनेन धर्मसंस्थापनरूपं स्वपालनहेतुरुकं साधुपरित्राणारूपं धर्मेतयन्त्यः सम्बोधयन्ति । पुष्करेक्षण सौन्दर्यद्विगुणालंकृत विग्रहेण स्वस्मिन्नासक्तिसम्पादनेन सर्वं परिपालयेति भावः । अस्मत्पालनाय दुष्कृतिनोऽपि न शायेत्याशयेनाहुः । हे वीरेति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे पुष्करेक्षण ! कमलनयन भवदीयेनैव निरीक्षणेन मुह्यतीः तथा भवदीययैव मधुरया चित्तापहारिण्या वल्गूनि मनोहराणि वाक्यानि यस्यां तया बुधमनोज्ञया स्वरूपतः स्वतोऽर्थतश्च बुधानां हृद्यया गिरा च मुह्यतीः इमाः विधिकरीः किङ्करीः नोऽस्मान् अधरसीधुना अधरामृतेन आप्यायस्व सञ्जीवय ॥ ८ ॥

भाषाटीका ।

हे प्रभो ! हे कमलनयन अत्यन्त मधुर मनोहर वचनवाली और पंडितन के मन के हरवेवाली आप की वाणी ते आप की दासी मोहित भई हमको अपने अधरामृत को पान कराय कर हमको संतुष्ट करो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च अस्माकं त्वद्विरहे प्राप्तमेव मरणं किन्तु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्विलम्बितामित्याहुः । तवेति । कथैवामृतमत्र हेतुः तप्तजीवनं प्रसिद्धामृतादुत्कर्षमाहुः । कविभिर्ब्रह्मविद्भिरपीडितं स्तुतं देवभोग्यं त्वमृतं तैस्तुच्छीकृतं किञ्च कल्मषापहं कामकर्मनिरसनं तत्वमृतं नैवं भूतं किञ्च श्रवणमङ्गलं श्रवणमात्रेण मङ्गलप्रदं तत्त्वनुष्ठानापेक्षं किञ्च श्रीमत्सु शान्तं तत्तु मादकम् एवम्भूतं त्वत्कथामृतमाततं यथा भवति तथा ये भुवि गृणन्ति निरूपयन्ति ते जना भूरिदाः बहु दातारः जीवितं ददतीत्यर्थः यद्वा एवं भूतं त्वत्कथामृतं ये भुवि गृणन्ति ते भूरिदाः पूर्वजन्मसु बहु दत्तवन्तः सुकृतिन इत्यर्थः । एतदुक्तं भवति ये केवलं कथामृतं गृणन्ति तेऽपि तावदति धन्याः किम्पुनर्ये त्वां पश्यन्त्यतः प्रार्थयामहे त्वया दृश्यतामिति ॥ ९ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विरहादितस्मान् जनान् जीवयतीति तथा तत् नच तस्य श्रवणार्थं प्रयासोऽपेक्ष्यते इत्याहुः । कविभिः । पूर्वैराधुनिकैश्च ईडितं स्वत एव संलापव्यवर्णितमित्यर्थः । नच कामक्रोधादिना पापेन वा तदर्शनानुभवाख्य फलं सिध्येदिति वक्तव्यं तस्यैव तन्निरसनस्वभावत्वादित्याहुः । कल्मषेति । अतो ऽर्थानुभवः स्वत एव भवतीति । नच तदपेक्षापीत्याहुः । श्रवणेति । यद्वा न केवलं तप्तजीवनत्वेन सर्वो दुःखहरमात्रं किन्तु कविभिः सर्वार्थप्रापकत्वेन स्तुतं कथं तदेव प्रपञ्चयति । कल्मषापहं संसारध्वंसकमित्यर्थः । संसारस्यकल्मषैकमूलत्वात् सर्वदुःखध्वंसकं चा । किञ्च श्रवणेति एवमुभयथा दुःखदोषहरत्वेन च मङ्गलत्वे सर्वार्थसाधनत्वमुक्तं स्वतः परमफलत्वञ्चाहुः । श्रीमदिति । एवमेषां यथोत्तरं श्रैष्ठ्यम् अतः कथैवामृतं यथा तस्य क्षुत्तृड्रोगादिहरणात् बलपुष्ट्यादिकरत्वाच्च साधनत्वं मधुररसमयत्वात् साध्यत्वं च तथा कथाया अपीत्यर्थः । आततं यथा स्यात् विस्तरेणेत्यर्थः । यद्वा व्यापकमित्यर्थः । इति देवभोग्याद्विशेष उक्तः तस्य व्यापकत्वाभावात् अन्यैर्लब्धुमशक्यात्वात् यद्वा अत्राधुना तादृशजनाभावादस्माकञ्च विरहादैवैवश्येन तत्राशक्तेर्वयं मृता एवेति भावः । यद्वा अरे परमव्यग्राः यावदप्याययेयं तावत् क्षणमध्ये मद्वार्तया कालो नीयतामिति तत्रेत्तत्र सन्त्रास माहुः कथैवामृतं मूर्तिमेणं कायें-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कारणयोरत्यन्ताभेदविवक्षयोपचारः कुतः तप्तं जीवनं यस्मात् अतो ये गृणन्ति उच्चारयन्ति ते भूरिदाः दो अखण्डने महाप्राणघातका इत्यर्थः । एषा परमार्त्युक्तिरेव । ननु तर्हि कथं पुराणादिषु स्तूयते तत्राहुः । कविभिर्व्यासादिभिरीडितं कवीनां वर्णनमत्रस्वभावेन तस्यापि वर्णनीदिति भावः पापनाशनमात्रं किञ्च श्रवणेनैव मङ्गलं सुखकरं नतु प्रयोजनेन यद्वा काविभिरीडित मित्यत्र हेतुः कल्मषेत्यादिपदद्वयं पापहरत्वेन श्रवणयोः सुखद त्वेनच तैरीडयते इत्यर्थः । अत एव श्रिया मदो येषां राजादीनां तेषु आततं कविभिरेव विस्तृतं किम्वा श्रीमदेजेनै मोक्षागौ दिद्वारात तम् अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेन नाल मिति भावः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ कथं तर्हि जीवथेत्याशङ्क्य प्रेममयस्वानुभव प्रमाणनिर्णीततत्कथामहिमवर्णनेन तत्र कारणमाहुः । तवेति । कथैवामृतम् अमृतवत् स्वतः फलं फलान्तरसाधनञ्च । तत्तद्रूपत्वं दर्शयन्ति तप्तान् त्वद्विरहतापखिन्नान् किमुत संसारतापखिन्नान् जीवयति मृत्युपर्यन्तदुर्दशातो रक्षतीति तत् । पूर्वेषां जीवनरूपञ्चेति तथा वन्द्यमानचरणः पथि वृद्धैरित्यादेः । शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुरित्यादेश्च दर्शनात् । कविभिर्ब्रह्मशिवचतुःसनादिभिरात्मारामैः किमुतान्यैरीडितम् । वर्त्तमाने क्तः । अस्मद्व्रजवासिभिर्यद्वर्ण्यते तदेवानूद्य श्लाघ्यते ननु स्वयं वर्णयितुं शक्यत इत्यर्थः । रहस्याच्छादनात् । तथा कल्मषं सर्वरोचकत्वादि प्रभावमयत्वात् स्वान्तरायमपि किमुत संसारहेतुपुण्यपापरूपं हन्तीति तत् । एवमेवं भूतमपि श्रवणमात्रेणैव मङ्गलं तत्तत्सर्वार्थसाधकं किमुतार्थविचारेण । अत एव श्रीमत् सर्वतं उत्कर्षयुक्तम् । आततं सर्वव्यापकञ्चेति प्रसिद्धामृताद्वैलक्षण्यमप्युक्तम् । तदीदृशं कथामृतं भुवि यत्र कुत्रापि ये गृणन्ति कथनरूपेण ददति ते भूरिदाः सर्वेभ्योऽपि सर्वार्थप्रदातारः । किमुत गोकुले नवाप्यस्मासु तु त्वद्विरहतप्तासु जीवनमेव ददतीति भावः । ते चान्यत्र पूर्वोक्ता ब्रह्मादयः व्रजे तत्र एवास्मासु तु विशेषतः सख्य इति ज्ञेयम् ॥ यद्वा । अहो परमव्यथा यावत्प्राणायये तावत् क्षणं मिथो मद्वार्त्तया कालो नीयतामिति चेत्तत्र सत्रासमाहुः । कथैव मृतं मृतिः कथैव मारयतीत्यर्थः । कुतः । तप्तं जीवनं यस्मात् । तप्ते तैलादौ जलमिवेति श्लेषः । कविभिस्तावकैरेव कल्मषापहं यथा स्यात्तथेडितं तत्राशक्ततया श्लाघितमित्यर्थः । किञ्च श्रवणेनैव मङ्गलं मङ्गलमिति श्रूयते नत्वनुभूयते इत्यर्थः । श्रीमदाततं श्रिया सौन्दर्यादिना तत्कृतेन मदेन निजजनानादरादिलक्षणेन चाततं सर्वतः प्रसृतम् । अतो ये तद्गृणन्ति ते भूरिदाः महाप्राणघातका इत्यर्थः । एषा परमार्त्युक्तिरेव । दो अवखण्डने । अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेनाल मिति भावः ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तव कथामृतं सदसि ये गृणन्ति ते भूरिदा महाधनप्रदाः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चास्माकं त्वद्विरहेण गसप्राणमेव मरणं किन्तु त्वत्कथामृतं मिथः ये पिबन्ति तैर्वेञ्चितमित्यभिप्रेत्याहुः । तवेति तव कथैवामृतं तत्र हेतुः तप्तानां तापत्रयतप्तानां जीवनं प्रसिद्धामृताद्युत्कृष्टत्वमाहुः । कविभिर्ब्रह्मादिभिरीडितं स्तुतं देवभोग्यममृतन्तु तैस्तुच्छीकृतमिति भावः । किञ्च कल्मषापहं श्रोतॄणां वदतां स्मरतां च पापहरं प्रसिद्धन्तु नैवमिति भावः किञ्च श्रवणमात्रेणैव मङ्गलं निःश्रेयसरूपं यस्मात् तथाभूतं प्रसिद्धन्तु पुनः संसारनिमित्त मितिभावः । श्रीमच्छान्त्यादिगुणावहं प्रसिद्धन्तु मादकमिति भावः एवंभूतं त्वत्कथामृतमाततं विस्तृतं यथास्यात् भुवि ये गृणन्ति निरूपयन्ति ते जना सुखिनः बहुवदान्या जीवितं ददतीत्यर्थः । पूर्वजन्मसु बहुदत्तवन्तः सुकृतिन इतियावदिति वा ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तप्तं जीवयतीति तप्तजीवनं श्रवणमात्रेण मङ्गलं श्रीमत्सम्पद्दिमत् आततं विस्तृतं भुवि ये जनाः तव कथामृतं गृणन्ति पानादिना ते भूरि बहुलं दुःखं घ्नन्ति खण्डयन्तीति भूरीणि हिरण्यादीनि ददतीति वा भूरि स्वर्णं जातरूपं हिरण्यं राः कल्याणं हेमरुक्मं सुवर्णमिति भवन्तीति शेषः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

नन्वेवञ्चेत्तथैव करिष्यामि क्षणं विलम्बः क्रियतामितिचेत् तव कथायां प्रतीतिर्नास्तीत्याहुः तव कथामृतमित्यादि । तव कथैव अमृतं कथामृतं नतु कार्य्यं कथया यथा तर्पयसि न तथा कार्य्येणेत्यर्थः । अतएव तप्तजीवनं तप्तं जीवनं यस्मात् कार्य्यासम्भवात् तथा कथया जीवनं तप्तमेव भवति अतः कविभिः शास्त्रकृद्भिरेव ईडितं नतु प्रेमज्ञैः अतः कल्मषापहं नतु दुःखापहं अतः श्रवणमङ्गलं नतु चेतःसुखदं यतः श्रीमदेन ऐश्वर्य्यमदेन स्वच्छन्देन आततम् अतस्तां कथां ये भुवि गृणन्ति ते भूरिदा भूरिच्छेदकाः दोऽवखण्डने इति आक्षेपः अतस्तव कथा तप्तजीवनं कविभिः स्तुतं कल्मषापहम् इत्यादिस्तुत्याप्रस्तुतप्रशंसा ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं पदार्थचतुष्टयं संप्रार्थ्य तददाने स्वयमेवहेतुमाशङ्क्यपरिहरन्ति तव कथेति । ननु सर्वमिदं प्रार्थितं भक्तेभ्यो देयं नत्वभक्तेभ्यः अभक्तत्वंच विरहेऽपि जीवनादवसीयते भगवांस्तु सर्वनिरपेक्षः न तस्य भवज्जीवनेन कार्य्यं लक्ष्मीसदृश्यो यस्य कोटिशो दास्यः अतस्त्वयि धूर्ताश्चेव इत्यप्यसंगतं तस्माद्व्यर्थमेव प्रार्थनमित्याशंक्य परिहरन्ति नेदं जीवनमस्मत्कृतिसाध्यं किंतु तव कथाविरहेण प्राणानां

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

गमने प्रतिबन्धं करोति कथायाः पुनः यथा तव सामर्थ्यं तथा सापि षड्गुणात्मिका मोक्षदायिनी परमानन्दरूपा च तदाहुः तव कथा अमृतमिव अमृतं भगवद्रसात्मकं सर्वेषां मरणादिनिवर्तकं यद्रूपं तदमृतशब्देनोच्यते अतो मोक्षदातृत्वं परमानन्दरूपता च सिद्धा इदानीं षड्गुणान् निरूपयन्ति । तप्तजीवनमित्यादिषड्भिः पदैः तप्ता ये संसारे तेषां जीवनं यस्मात् अमृतं हि ताप निवर्तकं प्रसिद्धमेव वैराग्यं च भगवतो ज्ञानं वा सर्वतापनिवर्त्तकं यत्संस्कारयोग्यं तज्ज्ञानेन नश्यति यदयोग्यं तत्परित्यागेन अत एव स्मार्तैः संस्काराशक्तैः परित्याग एव बोध्यते अतो ज्ञानं वैराग्यं च तापनाशके भवतः आपाततस्तापनाशकत्वं जलादावपि वर्तत इति तद्व्यर्थमाहुः । कविभिरीडितमिति । कविभिः सर्वैरेव शब्दार्थरसिकैः ज्ञानिभिरीडितं ज्ञानं वैराग्यं वा आपाततः स्त्रीषु तथात्वमस्तीति तद्व्यावृत्त्यर्थमाहुः । कल्मषापहमिति । कल्मषं पापमपहन्तीति ऐश्वर्यस्य समग्रस्य धर्मस्येत्यपि क्वचित्पाठः अलौकिकसाधकं च वीर्यं महत्तद्धर्मरूपमेव भवति धर्म्यं च पुनः कल्मषनिवर्त्तकं भवति पूर्वोक्तधर्मविशिष्टं च कथायाश्च तथात्वं सर्वत्र प्रसिद्धं प्रायश्चित्तादीनामप्यापाततस्तथात्वमस्तीति तद्व्यावृत्त्यर्थमाहुः । श्रवणमङ्गलमिति । तद्रोमयादिलेपनात्मकमुपवासात्मकं च स्वरूपतोऽप्यमङ्गलं घोरात्मकत्वात् श्रवणेऽप्यमङ्गलम् इदन्तु उदारचरितं श्रुतमेवानन्दं जनयतीत्यनुभवसिद्धत्वात् श्रवणमङ्गलं कीर्तितुल्यता निरूपिता पुत्रजन्मादिश्रवणस्यापि किंचिद्धर्मसाम्यात् श्रवणमङ्गलत्वमाशङ्क्य तद्व्यावृत्त्यर्थमाहुः । श्रीमदिति तद्धनव्ययसाधकं नतु धनसाधकं कथामृतं तु लक्ष्म्या अप्यपेक्षितत्वात् तदुक्तं भवति तेन श्रोतुर्वक्तुश्च तत्सिद्धिः राज्यप्राप्तिश्रवणं तथा भवतीति तद्व्यावृत्त्यर्थमाहुः आततमिति । आ सर्वतः ततं व्याप्तं राज्यादिकं तु परिच्छिन्नं भगवत ऐश्वर्यं तु न तथा अन्तर्बहिः सर्वेषां सर्वथा व्याप्तमिति कथामृतं च पुनः सर्वलोकान् व्याप्य तिष्ठति स्वसामर्थ्यं सर्वत्रैव संपादयति तस्मात् स्वरूपतो धर्मश्च भवत्कथेति तया कृत्वा जीवनं नतु स्वतः अनेनोत्कर्षोऽप्युक्तः त्वं कदाचिन्भास्यपि कथमृतं तस्मिन्नपि काले जीवयतीति भगवान् स्वतन्त्रः कथामृतं परतन्त्रमित्येतावान् विशेषः त्वं च अवतारे ब्रह्मादिभिः प्रार्थित आगच्छसि आगतोऽपि तिरोभवसि कथा तु समागता न तिरोभवति अत एव तादृशं कथामृतं ये भुवि गृणन्ति त एव भूरिदाः बह्वर्थदातारः य इति प्रसिद्धाः व्यासादयः भूरिदाश्च ते अजनाश्च ते केवलं भगवद्रूपाः जननादिदोषरहिता वा परं विरलममृतं केवलं मरणोपस्थितौ तन्निवर्तकमेवेति नतु संभूयैकत्र रसजनकं रसपिण्डयोरिव तव कथयोश्च विशेषः अन्यथा कथार्थमेव यत्नः कृतः स्यात् परं विरहे मरणनिवर्त्तकत्वेन तदुपयोग इति भगवत्त्वेन स्तूयते अतस्तैर्भगवत्कथाकथकैः वेदुदत्तामिति तद्वशात् जीवनम् एतत्सात्त्विकपाः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्कर्तृककथायाः माधुर्यमहिमा कैर्वाच्यः । त्वत्सम्बन्धिकथा अन्यवक्तृकाप्यमृतद्वयात् स्वाद्वी श्रेष्ठा चेत्याहुः । तव कथैव अमृतं केन साधर्म्येण तप्तान् महारोगादिसन्तप्तान् संसारतप्तांश्च जीवयतीति त्वद्विरहतप्तांश्च जीवयतीति स्वर्गीयान्मोक्षरूपाच्चामृतादाधिक्यञ्च कविभिर्ध्रुवप्रह्लादादिभिः या निर्वृतिस्तनुभृतामित्यादिपद्यैरीडितम् । अन्यदमृतद्वयं, सा ब्रह्मणि स्वमहिमन्यपि नाथ ! माभूत् किन्त्वन्तकासिलुलितात् पततां विमानादित्याद्युक्तिभिर्न रोचितम् । कल्मषाणि प्रारब्धपर्यन्तानि पापानि अपहन्ति । स्वर्गीयामृतन्तु तानि न हन्ति कामादिवर्द्धकत्वात् प्रत्युत तान्युत्पादयत्येव । मोक्षामृतमपि प्रारब्धपापं न हन्ति श्रवणेनैव स्वाद्यमानत्वादभीष्टसाधकत्वाच्च मङ्गलं तद्द्वयन्तु नैवम्भूतम् । श्रीमत् प्रेमपर्यन्तसम्पत्तिप्रदम् आततं प्रतिक्षणमेव वक्तृभिर्विस्तृतं तदुभयन्तु न तथा ये गृणन्ति कीर्त्तयन्ति ते एव भूरि बहुतरं ददति तेभ्यः सर्वस्वं ददाना अपि तत् परिशोधयितुं न क्षमन्त इति भावः । यद्वा । तव गीस्तदैव मधुरा यदि त्वद्दर्शनसहिता स्यात् अन्यथा तु महानर्थकरीत्याहुः । तव कथैव मृतं मरणकारणमित्यर्थः । कुतः तप्त जीवनं यतः । तप्ततैलादौ जलमिवेति श्लेषः । ननु तर्हि कथं पुराणादिषु श्लाघ्यते तत्राहुः । कविभिर्व्यासादिभिरीडितं कवीनां वर्णनमात्रस्वभावेन तस्यापि वर्णनादिति भावः । कल्मषापहमिति दुःखभोगेन प्राचीनं कल्मषं नश्यत्येवेति भावः । लोककर्तृकश्रवणेनैव मङ्गलं स्वस्त्ययनमाविनाशो यस्य तत् यदि जनाः सुधियस्तच्छ्रवणपरिणामं दुःखं विचार्य न तत् श्रोष्यन्ति तदा तदपि नङ्क्ष्यत्येवेति भावः । श्रीमदैर्धनमदान्धैर्दुर्जनैरेव लोका म्रियन्तामित्यभिलष्य धनव्ययेनापि आततं देशे देशे ग्रामे ग्रामे पुराणवाचकान् संस्थाप्य विस्तारितम् अत एव भुवि ये गृणन्ति ते भूरिदाः भूरीन् श्रोतृलोकान् घ्नन्ति खण्डयन्ति मारयन्ति तस्मात्ते कथाजालं वितत्य सौम्या इवोपविष्टा मनुष्यमारकात् व्याधादप्यधिका दूरत एव सुधीभिरुपेक्ष्या एवेति भावः । यद्वक्ष्यते यदनुचरितलीलेत्यादि वस्तुतः कथायाः कथकस्य च सर्वोत्कर्षव्यञ्जिकेयं व्याजस्तुतिः ॥ ९ ॥

केनचित्कृता विशुद्धरसदीपिका ।

नन्वेवं गिरैव यदि मोहितास्तर्हि कथमेतावन्तं कालं जीवथेत्याशङ्क्य प्रेममयस्वानुभवप्रमाणनिर्णीतत्वत्कथामहिमानं कारणमाहुः तवेति । पूर्वाभ्यस्तातटस्थ्येनैताः सख्याभिमानिन्यस्तच्चर्चितामृतैकजीवनास्तत्सुखसुखिन्य इति स्वाभिप्रायमावेदयन्ति कथा तव रूपगुणलीलावर्णनात्मको वाक्यसंदर्भः सैवामृतमिव स्वतः फलं फलान्तरसाधनं परमास्वादनीयं मृत्युहरं चेति अथवा ननु तदेकजीवनानां मीनादीनाममृताद्वियुक्तानां जीवितमसम्भावितमितिचेत्सत्यं तव कथामृतं पिबद्भिर्यथाकथंचिज्जीवितमिति तत्प्रशंसन्ति अत्रामृतं जलमेवेति तदेव दर्शयन्ति तप्तान् त्वद्विरहतप्ताखिलान् जीवयतीति तप्तजीवनं कविभिर्ब्रह्मादिभिः पीतामृतैरपीडितं स्तुतं वत्सहरणादौ ज्ञाने प्रयासमुदपास्येत्यादिना मृडविरिञ्चिसभासु गीता इतिश्रीरुक्मिणीवाक्येन चेदं कल्मषं स्वान्तरायमपि किमुतान्यदप्यपहन्तीति तथा तत् एवंभूतमपि श्रवणमात्रेणैव मङ्गलं सर्वार्थसाधकं किमुतार्थविचारेणेति श्रीमत् सर्वत उत्कृष्टं श्लेषेण

केनचित् कृता विशुद्धरसदीपिका ।

श्रीरानन्दात्मिका श्रीराधिका तया तल्लीलया च नित्ययुक्तमित्यर्थः तत एव च तद्गुणशालीतिभावः ततश्चाततं सर्वतो विस्तृततरं यद्वा प्रसिद्धामृताद्वैलक्षण्यमाहुः । तवेति । चतुरशिरोमणेः परमानन्दरूपस्य तत्तु सामुद्रं कथामृत मिति विशिष्टं तत्त्वमृतमेव तप्तजीवनं तत्तु देहान्तरलभ्यत्वान्न तथेति । कविभिरीडितं तत्तु सत्कविरसनासूर्यनिस्तुषतरशब्दशालिपाकेन तृप्तो दयिताधरमपि नाद्रियते का सुधा दासीति तदन्तदृतं कल्मषापहं तत्तु हिंसाप्रायकर्म्मसाध्यत्वात्तद्विपरीतं श्रवणमङ्गलं तत्तु तद्विरुद्धं तन्माहात्म्यश्रवणेन तदाकाङ्क्षाया मरणस्याभिलषितत्वात् श्रीमत् सुखकरं सुखमत्र रसः रसं ह्येवायं लब्ध्वानन्दी भवतीति श्रुतेः ततश्च द्वादशरसात्मकं किंवा शुद्धप्रेमैकरसं तत्तु षड्रसात्मकं तत्रापि रसनेन्द्रियास्वाद्यत्वात्मसुखरूपामिति आततं सर्वत्र लभ्यं तत्तु देशादिनिरुद्धम् ईदृशं कथामृतं भुवि यत्र कुत्रापि ये गृणन्ति ते भूरिदाः ॥ ९ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवमन्तिमदशापन्नाश्चेत्कथमद्यावधिजीवनं भाषणञ्च तत्र प्रेमोत्कर्षात्स्वानुभवप्रमाणसिद्धं तथा साङ्ख्य श्रुति रूपतया सर्वश्रुति सिद्धान्तरहस्य निमित्तमाहुः । तव कथामृतमिति । यद्वा सर्वमेव तत्प्रार्थितमनुरतेभ्यो देयं नत्वननुरतेभ्यो भवत्यश्चानुरतिं निरूपयन्त्योऽपि नानुरता यतो लब्धमदङ्गसङ्गसौख्या अपि मद्वियोगेऽपि जीवथेति शङ्कापनोदायाद्यावधि स्वजीवननिमित्तमाहुः तव कथामृतमिति । तव विरहे असम्भावितमप्यस्मज्जीवनं परन्तु तन्न कथैव यतोऽमृतम् अमृतरसात्मकतया फलरूपा मरणप्रतिबन्धिका एवममृतरूपत्वेन सर्वथा पुरुषार्थरूपापि नास्मत्सुखायापि तु यथा मृतमयोऽपि चन्द्रमण्डलः प्रलयार्कायते तथादुःखितानां मरणप्रतिबन्धेनैव वैरिणी तदेवाहुः । तप्तजीवनमिति आध्यात्मिकादितापत्रयवतां तत्तापापनोदपूर्वकजीवनं विस्मरणनष्टप्रायस्वरूपानन्दस्यावरणरागबाधेन पुनराविर्भावकमपि नास्माकं तथा किन्तु त्वद्विरहकामचिन्ताग्नितापापनयमशक्तत्वेऽपि त्वद्भक्तपक्षपातकरुणरसिकत्वादिस्मारकतयाश्वासनेन तप्तानामपि जीवनहेतुतया मरणेन सम्भावितातापनिवृत्तेः प्रतिरोधकतया दुःखहेतुरेव तथास्मद्गीतं तव कथामृतं कविभिस्तव गुणगणार्णवरानरसिकैः सकलमषहानिर्दिष्टा–

यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ।

इत्यादिना कल्मषापहमितीडितमपि नस्तु त्वद्वियोगेऽपि रूपमाधुर्यादिस्मारकतया कामग्लानिरूपकल्मषमपहन्ति नाशयतीति तथा तादृग्रूपतामिति यद्वा हन हिंसागत्योरित्यस्मात् कल्मषं गमयति प्रापयतीति तथा भवति किञ्चान्यानि कल्मषापहानि तपः प्रायश्चित्तादिरूपाणि कर्माणि यदिन्द्रियानुष्ठेयानि तच्छोषकत्वात्स्वरूपतः क्लेशात्मकत्वान्मरणो स्वफलविधायकत्वादमङ्गलरूपाणि भवन्ति तव कथामृतन्तु मङ्गलश्रवणयोः कर्णयोः मङ्गलं सुखप्रदं तदुक्तं श्रोत्रमनोभिरामादिति तथा श्रवणमेव मङ्गलं यस्येति तथा तदप्युक्तम्—

तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोदयम् ।
तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकगुणोऽनुगीयते ॥

तथा——

त्वत्कथामृतपाथोधौ विहरन्तो महामुदः ।
कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपममिति ॥

तथा श्रवणमात्रेणैव नतु श्रवणोत्तरानुष्ठानदेहत्यागादिफलाविर्भावादिप्रतिबन्धनिरासापेक्षं लोके मङ्गलत्वेन प्रसिद्धानां विषयसुखात्मकमनोवृत्तिगतस्वरूपसुखप्रतिविम्बानां विम्बभूतम् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति रसो वै स रसं ह्येवायं लब्ध्वानन्दी भवतीत्यादिश्रुतिसिद्धं मङ्गलं परमानन्दो यस्मात्तथाभूतमपि नस्तु श्रवणमात्र वर्णस्वरमाधुर्य्येण मङ्गलं भवति हृद्गतन्तु क्षोभकमेव तथा श्रीमतनित्यसंयोगे मतुप् विधानादन्येषां नित्यश्रीयुक्तमपि श्रियो नो नित्यसपत्नीत्वेन तन्नित्यसम्बन्धत्वात्सपत्नमेव एवञ्चेद्भवतीभिर्हेयमितिचेत्तत्राहुः । आततं सुरनरादिसर्वत्रलोकेषु सर्वसुखप्रदातृतया व्याप्तमपि नस्तु कायमनोवचःस्वासमन्तात्त्वेन त्यक्तुमशक्यं तथा चेदृक्कथामृतं सुरैर्लब्धामृतपानैरपि प्रार्थ्यं तदीयामृतस्य मर्त्यापेक्षयामरत्वापादकत्वादमृतत्वेऽपि कल्पान्ते देवनाशश्रवणान्नामृतत्वं कथामृतस्य तु—

मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भयं नाध्यगच्छत् ।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैतीत्यादिना ।

सर्वथामृतत्वं तदीयामृतस्य संसारानलदन्दह्यमानानां सुराणां तापमनपहृत्य तप्तानामेव जीवनत्वमस्य तु भवतापमपहृत्यातिमृत्युस्वरूपाविर्भावकत्वं तदीयामृतस्य कविभिर्विरागबोधवर्द्धिगर्हितत्वमस्य तु तैरीडितत्वं तस्य भोगेन पूर्वपुण्यापहर्तृत्वमस्य तु कल्मषापहत्वं तस्य तु पाने एव क्षुद्रसुखप्रदत्वेऽपि श्रवणेऽभिलाषजनकत्वेन तापोद्भवकत्वमस्यतु श्रवणमात्रेण मङ्गलत्वं तस्य भगवता स्वयं श्रियं गृहीत्वाऽमृतमात्रदानेन श्रीवियोगान्निःश्रीकत्वमस्य तु नित्यश्रीतत्पतिसम्बन्धवत्त्वान्नित्यश्रीमत्त्वं तस्य तु स्वर्गैककोणे निपतितत्वमस्य तु आततत्वमिति तदीयामृतातिविलक्षणत्वात् तादृक्कथामृतं ये जना भूरिदा पूर्वबहुपुण्यवन्तस्ते एव भुवि गृणन्ति ते जनाः सफलजनिमन्तो भूरिदा बहुपुण्यवन्तो ज्ञेया ये इति वा यद्वा ये जना गृणन्ति ते एव भूरिदा बहुदातारो अक्षयधनदातृत्वात् न धनदास्तद्दत्तधनस्य क्षणभङ्गुरत्वान्नानानर्थरूपत्वात्—

जीवाभयप्रदानस्य कलां नार्हन्ति षोडशीम् ।

इत्यादिवचनाच्च यद्वा ते भूरिदाश्च तथा अजना भाविजन्मप्राप्त्या नतु तद्दानफलभोगाय पुनर्जन्मवन्तोऽजनभगवत्स्वरूपा वा—

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥

इत्यादिवचनात् लब्धत्वदीयाङ्गसङ्गादिसौख्यानां पुनस्त्वदभिलाषविकलानामस्माकं तु तत्कथामृतं भुवि अस्मत्सान्निधाने ये गोपदारा जना गृणन्ति ते तप्तानां जीवनमात्रहेतुश्रवणसुखमात्रप्रदत्वेन बह्वभिलाषिणमभूरिदा एव यद्वा तव कथामृतं पापिनां कल्मषापहमातिधर्मप्रदञ्च आविर्भूतपापफलतापतप्तानामार्तानां तप्तानां जीवनं जलं यथा तथा तापापहं तथा श्रवणमात्रेण मङ्गलतया सर्वकामसुखकं श्रीमत्त्वयार्थानामर्थदं जिज्ञासूनामपि मालिन्यहेतुकल्मषापहं भवतापोपशमेन स्वरूपसुखदम् औत्सुक्यबोधकं श्रवणे मङ्गलं सर्वविघ्नापहं बोध्यं श्रीमत आततं पूर्णसुखममृतरूपमेवेति सर्वसुखत्वेन कविभिरीडितं स्तुतं यद्वा कविभिर्विद्वद्भिस्तु सर्वाभिलाषशून्यैर्विद्भिर्मुक्तादिरसत्वामात्यात्प्रेयोजनाभावेऽपि

श्रीरामनारायणकृतभावभावविभाविका ।

निरन्तरमीडितं निवृत्ततर्षैरुपगीयमानात् कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरित्यादिवचनात् तथा सर्वसुखदमपि प्रेमिणां त्वद्वियुक्तानामस्माकमेव क्षोभकमित्यतिचित्रं यद्वा तव कथामृतमपि त्वमिव षड्गुणाश्रयम् आततमित्यैश्वर्यस्य कथनं कल्मषापहमित्यनेनादृष्टकल्मषनिवर्तकतया धर्मस्य दृष्टकल्मषात्मकरोगादिनिवर्तकतया वैराग्यस्य कविभिरीडितमित्यनेन यशसः श्रवणमङ्गलश्रीमच्छब्दाभ्यां श्रियः तप्तजीवनामृतशब्दाभ्यां सर्वानर्थोपशमकस्वरूपानन्दाभिधलक्षणामृताभिधमोक्षाभिव्यञ्जकज्ञानस्य निर्देशस्तथा च त्वमिव भगवन्नति प्रिय त्वं विरहेण खेदयसे तथैव नो मरणप्रतिबन्धेन खेदयतीति भावः । यद्वा भवान्मद्वियोगं कथामृतेनैव जीवयसीत्यत आहुः । कथापि नामृतं किन्तु मृतमेव कथं तत्राहुः । तप्तजीवनं तप्ते सस्नेहपात्रे जीवनं जलं यथा बहून्युद्बोधकं तथा त्वद्विरहाग्नितप्ते स्नेहपूर्णेऽस्मद्धृत्पात्रे कामचिन्ताग्न्युद्बोधकं तथा कविभिः कं सुखं मियन्तीति कवयः प्रेमदुःखापहाः यद्वा वन्दिन इव श्रीमतस्तव काव्यादिस्तवेन स्वार्थसाधकैस्तैरेवेडितं न तु प्रेमरसाभिज्ञैस्तद्दशापन्नैः तथा कल्मषापहं कल्मषफलदुःखोपभोगेन तन्निवर्तकं त्वद्वियोगे कामकल्मषोद्बोधेनापहन्तीति वा तथा श्रवणमात्रेण मङ्गलं श्रीमग्रहवदतिपोषकं तथा श्रियोऽसाधारणरूपगुणादेर्मद आततो यस्मिंस्तत् ये जना भुवि गृणन्ति ते भूरिदा "दोऽवखण्डने" इत्यस्मात् भूरि द्यन्ति अवखण्डयन्तीति तथा ह्यन्तश्छेदका इति भावः ॥ ९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु युष्माकं प्रेमातिरेकपरीक्षार्थमन्तर्हितोऽहं ततश्च सम्प्रति ज्ञातवानहं माद्यापि भवत्यो मत्प्रेमातिरेकभूमिमारूढाः मद्विरहेऽपि जीवनधारणादित्याशङ्क्य नास्माकमपराधस्तव कथा त्वत्सदृशगुणास्मान्जीवयति वयं किं कुर्म इत्याशयेनाहुः । तवेति । तव कथामृतम् अत एव तप्तानामस्माकं जीवनं तत्र प्रमाणमाहुः कविभिस्तत्त्वदर्शिभिः सर्वज्ञैर्नारदादिभिरीडितम् स्तुतं एतेन प्रसिद्धामृतादुत्कृष्टत्वं सूचितं तद्धि विषयार्थिभिः स्तूयते ननु कविभिः किञ्च कल्मषापहं नहि प्रसिद्धं तत्कल्मषं निवर्तयति किन्तु निवृत्तकल्मषप्राप्यमिदन्तु तन्नाशार्थं साधनान्तरं नापेक्षत इति भावः । किञ्च श्रवणमङ्गलं नित्यं तच्छ्रवणमात्रेण मङ्गलप्रदमिदं श्रवणमात्रेण मङ्गलरूपं किञ्च श्रीमत् प्रसिद्धन्तु तत् न श्रीप्रदं इदं मोक्षश्रीपर्यन्तसमस्तश्रीप्रदं यद्वा श्रीमत्तु शान्तं तत्तु मादकं तत्राप्याततं चतुर्दशभुवनेषु व्याप्तं प्रसिद्धन्तु तन्नैवं अतो ये भुवि गृणन्ति तेऽस्माकं भूरिदाः बहुप्रदाः परमोपकारकास्तस्मादेवंविधषड्गुणयुक्तेन भवतुल्येन जीवनहेतुत्वादतिरोहितत्वाच्च किञ्चिदधिकेन च तव कथाऽमृतेन त्वत्प्रीत्यर्थं जीवामोऽतो न वयं परीक्षायोग्याः किन्त्वनुकम्प्या इति भावः । अनभिज्ञापक्षे अहो महति सङ्कटे निमग्नाः मरणमप्यस्माकं न भवति किं कुर्म इत्याशयेनाहुः तव कथालक्षणममृतं तप्तानां मरणयोग्यानामप्यस्माकं जीवनसाधनं जातं ननु कुतस्तल्लभ्यत इतिचेत्तत्राहुः । कविभिः पूतनाघातादिकानां भवच्चरितानां गीतविशेषरचनायां कुशलैरीडितं स्तुतम् उत्तमश्लोकतादिचरितत्वात्कल्मषनिवर्तकं श्रवणमात्रेण मङ्गलकरञ्च यतः श्रीमत् शोभायुक्तं नचैवंविधं किञ्चित्स्थानमस्ति यत्र न सास्तीत्याहुः आततम्व्याप्तं यतो ये भूरिदाः महान्तो दातारस्त उत्तमश्लोकाश्चापि भुवि सर्वस्यामपि भूमौ तत्र तत्र स्थिता गृणन्ति तस्मात्किमर्थं स्वविरहसन्तापं भाजयितुं स्वकथामृतेन जीवयसि यदि सर्वथा तवानागमननिश्चयः स्यात्तर्हि किञ्चिदस्मन्मरणोपायं रचयित्वा निश्चिन्ततया पलायस्वेति भावः । यद्वा ननु मत्कथया क्षणमात्रं जीवनं धार्य्यतामितिचेत्तत्राहुः । तव कथैव मृतिरुद्दीपनविधया मरणसाधनं यतस्तप्ते तैलादौ जलमिव अतः कविभिरननुभूतार्थकल्पनाकुशलैरेव कल्मषापहत्वेनेडितं स्तुतं दुःखभोगेन कल्मषनिवर्तकमिति वा तथा श्रवणमङ्गलमापातरम्यमतो व्यर्थमेव श्रीमदेन सौन्दर्य्याखर्वगर्वेण सर्वत्र प्रसृतं तस्मादस्मदग्रे ये गृणन्ति ते भूरिदा महाघातुकाः "दोऽवखण्डन" इति स्मरणात् तस्मादलं तव कथयेति भावः । मानिनीपक्षे ननु अनेकगुणवत्त्वेन यत्कथामृतं कविभिरीडितं तस्मिन्नपि मयि भवत्यो नानुरज्जन्ते इत्याशङ्क्याहुः तव कथेति कविभिरतिशयोक्तिपरैस्तप्तजीवनत्वादिरूपेणेडितमपि तव कथामृतं भूरिदा उदारा अस्मत्तुल्या जनाः श्रीमदेन ततं व्याप्तं गृणन्ति अतो नास्माभिस्त्वय्यनुरज्यत इति भावः । निवृत्तिपक्षे किञ्चित्तव चरित्रकथामृतपानेन केषामुद्धारो भविष्यतीत्याहुः । तव कथामृतं यतस्तप्तानां त्रिविधतापतप्तानां जीवनं तापनिवर्तकं पीता गावः इतिवत् तप्तानां ज्ञानिनां जीवनरूपं तपआलोचनइति स्मरणात् यतः कविभिर्ब्रह्मविद्भिः सनकादिभिरीडितं किञ्च तव कथामृतसेविनां न कृच्छ्रचान्द्रायणादिकर्मापेक्षेत्याहुः । कल्मषापहं निरयप्रदकथान्तरायभूतपापकर्मनिवर्तकं तत्रापि श्रवणमङ्गलं कृच्छ्रादिघोररूपत्वाच्छ्रवणेऽप्यमङ्गलं तथोदारचरितामृतन्तु श्रवणमात्रेणाप्यानन्दप्रदं नचापातरम्यमपि तु श्रीमत् वास्तवसमस्तोद्धारशोभालंकृतम् अत एवाततं सर्वत्र व्याप्तं न त्वेकदेशि तस्माद्ये भुवि अधिकारभूमौ गृणन्ति ते भूरिदा महान्तो दातारः सर्वयज्ञानुष्ठानसर्वस्वदक्षिणादिफलवन्तः यद्वा ये जन्मान्तरेषु भूरिदास्त एवास्मिन् जन्मनि गृणन्ति यद्वा मुमुक्षूणामनुग्रहार्थं ये गृणन्ति ते भूरिदा जनाः अभयदानसमं दानं नास्तीत्युक्तत्वात् अभयदातृत्वेनानल्पदाः यद्वा ये गृणन्ति ते भूरिदाश्च ते अजनाः विष्णुस्वरूपाश्च हे भूरिदेति वा तस्माल्लीलाविग्रहमादायास्मदुद्धारो लोकोद्धारश्चावश्यं सम्पाद्य इति भावः ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काश्चित् त्वद्विरहाग्निनास्माकं मरणं प्राप्तं यद्यपि तथापि त्वद्गुणश्रावयितृभिर्वञ्चितमित्याहुः । तवेति । तव कथारूपममृतं तप्तानां त्वद्विरहज्वालादग्धानां जीवनम् ननु प्रसिद्धममृतम् अत एव कविभिर्मुनिभिर्व्यासादिभिः क्रान्तदर्शिभिर्वेदैर्वा ईडितं स्तुतं देवभोग्यममृतं तु तैस्तुच्छीकृतमिति भावः । न केवलं तप्तजीवनमात्रमपि तु कल्मषापहं तव प्राप्तिप्रतिबन्धकपापघ्नम् किञ्च श्रवणमात्रेण मङ्गलावहम् किञ्च श्रीमत् त्वद्विषयकज्ञानभक्त्युत्पादनरूपा श्रीर्विद्यते यस्मिन् तत् एवं भूतं त्वत्कथामृतमाततं यथा भवति तथा भुवि ये गृणन्ति निरूपयन्ति ते भूरिदाः

प्रहसितं प्रिय ! प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ॥
रहसि संविदो या हृदि स्पृशः कुहक ! नो मनः क्षोभयन्ति हि ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बहुदातारः जीवननिष्कल्मषत्वद्विषयकज्ञानभक्त्यादीनां दातार इत्यर्थः ॥ ९ ॥

भाषा टीका

आप की कथा रूपी जो अमृत है सो संसार ताप से तपायमान प्राणिन कों जिवायवे वारो है ब्रह्मादि कवि जन वाको गान करें हैं सब पापों को नाश करवे वारो है श्रवण करवे ते ही मंगल कारक है वैष्णवसंपत्ति दायक है सब संसार में व्याप्त है ऐसो जो आप को चरित्र ताको जो गान करें हैं वेही महात्मा बडे दान देवे वारे हैं ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु मत्कथाश्रवणेनैव निर्वृता भवत किं मद्दर्शनेन, न त्वद्विलासक्षुभितचित्ता वयं तत्रापि शान्तिं न विन्दाम इत्याहुः । प्रहसितमिति । हे प्रिय ! कुहक कपट संविदः सङ्केतनर्माणि ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ननु निर्बुद्धयस्तथाप्यौषधवद्वलान्मत्कथां मिथः सेवध्वमित्यत्राहुः । यद्वा आशयापि चिरंजीवितं न शक्नुम इत्याहुः । प्रहसितमिति । भावे क्तः प्रकृष्टहसितं शुद्धभावेन स्मितमित्यर्थः । प्रेम्णा वीक्षितं विहरणं क्रीडा ते इत्यस्य प्रहसितादिभिः सर्वैरप्यन्वयः ध्यानमात्रेणापि मङ्गलं सुखकरं यद्वा ध्यानमङ्गलं शुभावहं सुखेन प्रेमध्यानसंपादकमित्यर्थः । एतच्च त्रयाणामपि विशेषणम् अत एवोक्तं श्रीकपिलदेवेन ध्यानायनं प्रहसितमित्यादि हृदि स्पृशः हृदयंगमाः यद्वा स्मरणपथमात्रं गच्छन्त्योऽपि सत्यः याः संविदस्ताः सर्वा एवेति तासां सर्वासां हृत्स्पृक्त्वं क्षोभणत्वं चाभिप्रेतं क्षोभयन्ति कामेनाकुलयन्ति संविद इत्यस्यान्तिके प्रयुक्तत्वेन तस्यैव विशेषणत्वेऽपि हृदिस्पृश इति सर्वान्त्यत्वाद्वचनविपरिणामेन सर्वैरपि योज्यं तत्राद्यद्वयं प्रायो भावत्वान्मानसं प्रहसितस्य शुद्धभावनाजन्यत्वात् प्रेम्णश्च मनोवृत्तिविशेषे स्फूर्तेः विहरणं प्रायो दैहिकं संविदश्च वाचिक्य इत्येवं त्रिविधा चेष्टोक्ता तेषां च क्षोभणत्वे यथोत्तरं श्रैष्ठ्यमूह्यं हि निश्चितं क्षोभणत्वे हेतुः हे प्रियेति अन्यथा क्षोभणाशक्तिः एवं त्वदेकप्रियत्वेन वयं सदा मनः क्षोभदुःखं लभामहे त्वं चास्मान् वत वञ्चयसे एवेत्याशयेन सम्बोधयन्ति । कुहकेति । अन्यैर्व्याख्यातं यद्वा प्रियजने प्रेमतद्दर्शनादिमात्रेण पुलकादिलक्षणं वीक्षितं विशेषेण प्रेमास्मितादिना ईक्षितं ध्यानं प्रियजनस्य चिन्ता तदेव मङ्गलम् अस्माकमाशालम्बनादिहेतुत्वात् संविदः प्रतिश्रुतानि सर्वापेक्षया भवतीनामिष्टमवश्यमेव सम्पादयिष्यामीत्यादिलक्षणानि खेकस्यान्यथाकरणात् तथाधुना स्वदुपेक्षया तत्र सर्वत्रैव कापट्यपर्य्यवसानाच्च कुहकेति अथवा ननु सत्यं तत्रापि साध्वीनां धैर्य्यमुपयद्येतेतिचेत् तत्र सुप्रेमविकारं सदैन्यं चाहुः । प्रहसित मिति । क्षोभयन्ति धैर्य्यं हरन्ति तत्तत्स्मरणादधुनापि यज्जीवेन एतदेव नः परमधैर्य्यं विज्ञीति भावः अन्यत्समानम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र प्रथमेऽर्थे । ननु विचारलुब्धाः दुर्लभे मयि कथमेतावन्तमनुरागं कुरुथ यदि कुरुथ तदा मत्कथाश्रवणेनैव निर्वृता भवत इत्यादिकमाशङ्क्य तेन निर्वृतौ तस्यैव पूर्वानुरागमयं चरितं दूषयन्ति त्रिभिः । द्वितीयेऽर्थे । आशयापि चिरं जीवितुं न शक्नुम इत्याहुः । प्रहसितमिति भावे क्तः । वीक्षितमित्यत्र वीक्षणमिति तु क्वचित्पाठः । प्रथमतः प्रहसितं तासां दर्शनमात्रेण भावोल्लासात् प्रकृष्टं सहजस्मितं तु किञ्चिदुद्रेकं हसितम् । कीदृशं ततः प्रेम्णा वीक्षितं यत्र तादृशं ततो विहरणं सखिभिः सहक्रीडाविशेषः । तच्च कीदृशं ध्याने मङ्गलं तदनुचिन्तने आशाबन्धकारकं निजभावाभिव्यञ्जनामयत्वात् । ततश्च रहसिसंविदः दूरतः स्वयं निर्जने गत्वा वेण्वादिना नर्मोक्तयः ताश्च कीदृश्यः या हृदि स्पृशो हृदयङ्गमा इति सर्वतोऽन्तरङ्गत्वं दर्शितम् । यच्छब्दोऽत्र चमत्कारविशेषार्थः । ततो लिङ्गविभक्तिविपरिणामेण पूर्वपूर्वत्राप्यनुषञ्जनीयः । तेषु यथोत्तरं श्रैष्ठ्यम् । कुहकेति उदर्के दुःखमयत्वात् । तदुक्तनतरकुहकानामयमेवेति भावः । न इति तत्र बहूनामनुभवं प्रमाणयन्ति क्षोभयन्ति आकुलयन्ति हि निश्चितं क्षोभणे हेतुः प्रिय ! हे ळोभनेत्यर्थः । एवं त्वदेकप्रियत्वेन वयं सदा मनः क्षोभदुःखं लभामहे त्वं पुनरस्मान् वत वञ्चयस इत्याशयेन च सम्बोधयन्ति हे कुहकेति ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रियेति सम्बुद्धिः ॥ १०—११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि मत्कथामृत श्रवणेनैव तृप्ता भवथेत्यत्र तथापि त्वद्विलासक्षुभितचित्ता वयं न शान्तिमाप्नुम इत्यभिप्रेत्याहुः । प्रहसितमिति । हे प्रिय ! हे कुहक ! वञ्चक तव प्रहसितं च प्रेम्णा वीक्षणञ्च ध्यानमङ्गलं ध्यानमपि मङ्गलं सुखं यस्मात्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विहरणञ्च याश्च रहसि संविदः सङ्केतचेष्टाः कथम्भूता हृदि स्पृशो हृदयारूढाः ताश्च नोऽस्माकं मनः क्षोभयन्ति हि ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तव कथामृतं तप्तजीवनादिफलदं चेत् अधरसीधुनाप्यायनं किमर्थमित्याशङ्कय तव हसितादिना मुग्धा वयं तवाधरसीधुं प्रार्थयामह इत्याशयेनाहुः । प्रहसितमिति । हे प्रिय ! प्रेम्णा वीक्षणं ध्यानमङ्गलं विहरणं विहारः विक्रमणलक्षणः हृदि स्पृशः हृदयंगमाः संविदः सम्भाषणादयः संविच्चुद्धे प्रतिज्ञायां सङ्केताचारनामसु । सम्भाषणे क्रियाकारे विज्ञाने तोषणेऽपि चेति वचनात् एते सर्वेऽपि सुरते संभवन्ति कुहक ! धूर्तेतिप्रणयकोपे हि यस्मात्तस्मात् अधरामृतपानप्रार्थनम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः

न केवलं तव कथैव तादृशी प्रहसितादिकं च तव यदन्यन्तदपि नो मनः क्षोभकमित्याहुः । प्रहसितमित्यादि । हे प्रिय ! ते तव प्रहसितं प्रहासः विहरणं विहारः रहसि संविदः विजनसंवादा हि निश्चितं मनः क्षोभयन्ति पूर्वं मनः सुखदत्वेन ज्ञातान्यासन् सम्प्रति तदन्यथा भावात् मनः क्षोभकान्येव सर्वाणि जातानीति वाक्यार्थः त्रयाणां त्रीणि विशेषणानि प्रहसितं कीदृशं प्रेमयुक्तं वीक्षणं यत्र विहरणं कीदृशं ध्यानं मङ्गलं ध्यानस्यैव मङ्गलं नतु ध्यातुर्मनः क्षोभकत्वात् संविदः कीदृश्यः हृदि स्पृशः मर्मस्पृशः यतस्त्वं कुहकत्वेन कापट्यवत्त्वेन प्रसिद्धोऽसीति योग्यं संबोधनं हे कुहक ! कापट्यपटो अतोयुक्तमेवोक्तं तव कथामृतं तप्तजीवनमित्यादि ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

तामस्या वचनमाह । प्रहसितमिति । यद्यपि कथया स्थातुं शक्यते यदि त्वदीयैर्धर्मैः क्षोभो नोत्पादितः स्यात् यथा भगवति षड्गुणाः सन्ति तथा षड्व्यामोहका अपि गुणाः सन्ति अन्यथा कथयैव चरितार्थता स्यात् तदर्थं भगवान्मायया कुहकलीलामपि करोतीति स्वस्वभावदोषात् भगवति तथा स्फूर्तिरिति यथा ज्वरितस्यान्ने विरसताप्रतीतिः अत आहुः । तव प्रहसितादिकं नो मनः क्षोभयतीति प्रकर्षेण हासितं स्वभावत एव खिन्नातां त्यक्त्वा अन्यया सह स्थित इति ततश्चेत्समागत्य प्रकर्षेण हसति सुतरां क्षोभं प्राप्नोति प्रियेति संबोधनात् तव संबन्धोऽपि स्मृतः क्षोभजनको जायते अत एव यासां न संबन्धस्तासां न क्षोभः किंच तव यत्प्रेमवीक्षितं प्रेम्णा वीक्षितं तदपि क्षोभयति स्मृतं सत् अन्यविषयकं वा विश्वासजनकत्वाद्वा अन्तः कपटरूपमिति क्षोभजनकम् अन्यथा कार्ये विसंवादोनस्यात् मनस उत्तोलकं वा आशाजनकं आशायांच भ्रमः तव विहरणमपि क्षोभजनकं विहरणं यत्स्खलनं वेणुवादनादिना रसो भगवदीयः आकारादाहि स्यात्पञ्च इति विशेषणं हरणं यस्मादिति त्रिभङ्गललितादिकं भवति तत्पूर्वमस्माभिर्ध्यातमिति ध्यान एव मङ्गलं त्वल्लक्षणं शुभफलं प्रयच्छतीति तत्पीदानीं क्षोभजनकं तिरोहितत्वात् त इति सर्वत्र संबन्धः अन्यन्माययापि करोतीति मुख्यतया अत्रोक्तिः एवं रूपसंबन्धे चतुष्टयं क्षोभकमुक्तं नामसंबन्धिद्वयमाह । रहसि संविद इतिया हृदि स्पृश इति रहसि एकान्ते संविदो ज्ञानरूपाः भगवद्वाचः ज्ञानान्येव वा शास्त्रजनितानि बन्धाद्यभिज्ञारूपाणि तत्रापि या वाचो हृदि स्पृशः हृदयंगामिन्यो भवन्ति अस्मदनुगुणा एवं विधसंविदो वा नतु केवलं नायकानुगुणाः अत एवमेते सुखहेतवो भगवान् वञ्चयति चेत्तदा क्षोभं जनयन्ति अयमर्थः सर्वानुभवसिद्ध इत्याह । इति ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अस्माकन्तु त्वद्दर्शनं विना त्वत्सम्बन्धि वस्तुमात्रमतिदुःखदमित्याहुः । प्रहसितमिति । विहरणं सम्प्रयोगः । याश्च सम्विदः संलापनर्माणि हृदि स्पृश इति दुःखदत्वाद्विस्मर्तुमिष्टा अपि न विस्मर्तुं शक्यन्त इति भावः । ध्यानेनापि मङ्गलं परमसुखदमिति चतुर्णामपि विशेषणं मनः क्षोभयन्ति व्याकुलयन्ति । एतानि मनसि प्रविश्य सद्यः सुखं दत्त्वा तद्विनिर्गच्छन्त एव महादुःखं ददत्यत एव हे कुहक ! कुहकदत्तवञ्चकान्यपि सद्यः परमस्वादून्याप्यायन्त्यां परमदाहकानि प्राणघातकानीत्यर्थः ॥ १० ॥

केन चित्कृता विशुद्धरसदीपिका ।

हंहो शान्तं पापं मम कथैकजीवना यूयं तदाचरमाणाः सुखं विचरथ किं मम दर्शनाद्याग्रहेणेत्यत आहुः । प्रहसितमिति । दाक्षिणानां वाक्यं हे कुहक ! बहुप्रियत्वात्कपटविलासिन् तदुक्तं

धातस्तात विरुद्धोऽसि द्वितयं माकथा नृणाम् ।
भृत्यत्वमविवेकज्ञे स्नेहमन्यपरे जने इति ॥

ततश्च हे रतिहिण्डकेत्यर्थः । ते तव प्रहसितं प्रकृष्टं सव्रजास्मितात्किञ्चिदुत्कृष्टं हासितं मध्यातिवञ्चकत्वादेव सरला एताः कथं मया प्रतार्य्यन्त इत्यभिप्रायात् तदुपरि प्रेम्णा वीक्षितं ततः सखिभिः सह विरहणं क्रीडाविशेषः सा सा श्रृङ्गारचेष्टेति यावत् ततश्च कीदृशं ध्यानेति तदनुचिन्तने आशाबन्धकारकं निजभावाभिव्यञ्जनमयत्वात् ततश्च रहसि सम्विदः दूरतः स्वयं निर्जने गत्वा वेस्वादिना नर्मोक्तयः ताश्च कीदृश्यः या हृदिस्पृशः हृदयङ्गमाः इतिसर्वतोऽन्तर ङ्गत्वं दर्शितं यच्छब्दाऽत्र चमत्कारविशेषार्थः ततो लिङ्गविभक्तिविपरिणामेन पूर्वपूर्वत्राप्यनुषञ्जनीयः तेषु यथोत्तरं श्रैष्ठ्यात् न इति बहूनामनुभवं प्रमाणयन्ति क्षोभयन्ति आकुलयन्ति हि निश्चितं क्षोभणे हेतुःप्रियलोभना तथा तथापि परमश्रेष्ठेति परमासक्तिः सूचिता ॥ १० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

किञ्च यथाकथञ्चित्क्षणमप्यस्मज्जीतिसम्भावनया विलम्बो न विधेयः यतो भगवतस्ते यथा षड्गुणाः प्रसिद्धास्तथा क्षोभका अपि

श्रीरामनारायणकृतभावभावविभाविका ।

बहवो गुणाः सन्ति ते च नः क्षोभयन्ति क्षणमपि विश्रामप्राप्त्याऽस्मज्जीवनं न सहन्ते इत्याहुः । प्रहसितमिति । यद्वा तद्वैकल्यविनयाभ्यां जातानुकम्पतया ळीलयैवाविर्भूतवपुषं भगवन्तं पश्यन्त्यस्तेन सहैव विहरन्त्योऽपि साक्षात्सम्बोधयन्त्योऽप्यन्तर्द्धानभ्रमेणान्तर्धानमेवाकलय्याहुःप्रहसितमिति।हेप्रिय हेकुहक इतेसम्बोधनाभ्यां प्रियत्वेन मनः संळोभ्य स्ववशीकृत्य कुहकत्वेन तत् क्षोभयन्ति यथा कश्चिन्मधुरध्वनिमृगयुर्गीतमाधुर्य्येण मृगीराहूय प्रियनादेन विश्वासमुत्पाद्य कुहकतया पुनर्घातयति तद्वदिति द्योतितं प्रहसितं प्रकृष्टं सितातोऽपि मधुतयावसितं मुखचन्द्रासितामृतमयप्रभेवोल्लासितं यत् हासितं प्रकृष्टा अपि संभेदादयः स्वभान्यूनतया वा हसिता येन प्रकृष्टा अन्या गोपीः प्रति वा हासितं प्रकृष्टञ्च ह स्फुटं च सितञ्चेति वा मुखकञ्जविकासात्मना हृदाकाशोदितरसेन्दुसितमृदुसुधासुधमासात्मना वा नित्यसिद्धमन्दास्मितापेक्षयापि विचित्रभावविशेष प्रकाशतया प्रकृष्टं यत् हासतमुखेन्दावरुणदसनवसनप्रावरणरदभगणावळिसमागमप्रदर्शनेनात्मनोबहुसखिविलासभावावभासकतयाभिलाषोल्लासकं वा यत् प्रहसितम् अत्र भावे क्तः प्रेमवीक्षितमित्यत्र च क्वचिद्वीक्षणमित्येव पाठः तथा यत्ते प्रेम्णावीक्षणं प्रेमान्वितविशेषणानिमेषदत्तदृष्टितयेक्षणम्वा विविधभावविभावकायाङ्गीकरणापाङ्गाक्षयेषु क्षयेक्षणं वा तथा भूतमीक्षणं नयनम्वा तथा च जातावेकवचनं तथा ते विहरणं विहारः नृत्यगतिविलासविविधपादन्यासानिलचलितनलिनीदलमृदुलकरोल्लासादिरतिसुखविस्तरणरतिरणरमणादिवाश्लेषेण किम्भूतं तत्विशेषण हरणं मनोहरं स्वात्मनोऽपि मनोहरत्वात् विविधप्रकारेण मनोहरणम्वा पुनः किंभूतं तत् ध्यानमङ्गलम् अनुचिन्तनेऽपि मङ्गलं निजभावाभिव्यञ्जकत्वादाशोद्भावकं ध्यातृणां ध्यानेऽपि मङ्गळं परमसुखरूपं किमु वाच्यंसानन्दोत्साहं विहरतां पूर्वोक्तसर्वविशेषणम्वा यद्वा ध्यानेन मा सकामानां लक्ष्मीः निष्कामानां जिज्ञासूनां मा प्रमाब्रह्मात्मबोधोविदुषामपि मा शोभा यस्मात्तत् ध्यानं नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमळं निरञ्जनमित्यादिवचनात्तद्भावनयैव ज्ञानशोभाश्रवणात् तथा ते मधुरमुखरस्फीतगीतस्वरान्वितं नृत्यदोलनादिना विचित्रमनोज्ञभावदर्शकं गलं कण्ठं तथा गायतीतिगः तेनैव गानेन लाति अनुगृह्णातीति लः सच सच तथा तं तथा रहसि संविदः एकान्तिकनर्मोक्तयः रहसि गत्वा वेण्वादिनाह्वानाद्युक्तयो वा मनोगतमनोजसंज्ञापकाः संज्ञाविशेषा वा कथंभूतास्ताः हृदिस्पृशः हृदि प्रविश्य स्पृशन्ति संलग्नास्ततो न चलन्ति न वियुज्यन्तेइतिभावः । यद्वा हृदिस्पृशः प्रेमनिमित्तालिङ्गनानि नः सर्वासां मनः क्षोभयन्ति हीति सर्वासां नस्तत्तच्चानुभवसिद्धत्वात् प्रसिद्धं प्रियत्वात् नहि प्रियाणां क्षोभ प्रियस्याज्ञातो भवति अस्मत्प्रहसितादिना स्वमनः क्षोभानुभवेनानुमानाद्वा तवापि प्रसिद्धं ननु भवतीनां मनः क्षोभमाने स्वमनः क्षोभसम्भवे वा अन्तर्हितत्वे कथमन्तर्हितत्वं तत्राहुः । कुहकेति।अस्माभिः सरलस्वभावेन स्वदैन्याविष्कारेणाप्यन्तर्भावोऽपि स्फुटं निगद्यते त्वया तु स्वतनुवञ्चनकुटिलमनस्त्वेन सङ्गोप्यते इत्येव विशेष इति भावः ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु यावद्रमणं जातं तावतैव सन्तोषो विधेय इतः परञ्च मत्कथामृतपानेन जीवतीभिर्मद्ध्यानमेव सम्पाद्यमितिचेत्तत्राहुः । प्रहसितमिति । हे प्रिय ! हे कुहक यद्यपि परमात्मा त्वं कपटलीळयास्मत्प्रियविग्रहं प्रकटितवांस्तथापि त्वद्विषयकरमणेच्छास्माकं न निवर्तते तादृशदोषवशादेव मनः स्थिरं न भवति तत्र भगवतस्तव प्रहसितं प्रेमपूर्वकं वीक्षणं विहरणं क्रीडनञ्च एतत्त्रितयं ध्यानेऽपि मङ्गलं तथा रहसि याः सम्विदः क्रीडासङ्केताः हृदिस्पृशः अन्तःकरणे प्रविष्टाश्च नोऽस्माकं मनः क्षोभयन्ति क्षणमात्रं तदनुसन्धानपरायणमपि मनः हासं प्रतिभगवत्प्रहसितादिकं नोपलभ्यत इति वृत्त्युदये क्षुब्धं भवति प्रहसितादयो यद्यपि गुणास्तथाप्यस्यां विरहदशायां दोषा जाता अतो वयं किं कुर्म इति भावः न इति बहुवचनेन बह्वीनामनुभवं प्रमाणयन्ति । हिशब्देन प्रसिद्धिं द्योतयन्ति अनभिज्ञापेक्ष तव कथायां क्रियमाणायां तत्र नान्तरीयकतया स्मृतानि प्रहसितादीनि मारकाणि भवन्ति स्मृतिपथमारुहन्तीत्याहुः । प्रहसितं प्रकर्षेणोच्चैर्हसितमस्मान्दृष्ट्वात्यन्तप्रसन्नताविष्करणरूपं तव प्रहसितं सम्प्रति स्मृतं सदस्मन्मनःक्षोभकरं भवति यतो हे प्रिय ! प्रियेण समक्षे कृतं यदानन्दावहं प्रहसितं तत्तस्य विरहदशायां मरणावहमेव भवतीति भावः । तथा प्रहासानन्तरं यत्प्रेमपूर्वकं वीक्षणं विशिष्टं शोभनमीक्षणं कटाक्षधारा च केवलं वा तत् तथा विहरणं सखिभिः सखीभिर्विहारः विशेषेण वेणुनादादीनां हरणमाकरणमिति वा एतत्त्रितयं ध्यानमङ्गळं ध्याने स्मरणे मङ्गलं स्वस्वरूपं न भवति किन्तु दर्शन एव तथा रहस्येकान्ते याः सम्विदस्ता अपि गतौ हृदिस्पृशः फलपर्यवसायिन्यः सत्यो हृदयविळीकसः तदेतत्परमसुखकरमपि सर्वं तवानया कपटप्रवृत्त्या परमदुःखावहं सम्पन्नमित्याशयेन सम्बोधयन्ति । हे कुहकेति । हि निश्चितं क्षोभयन्ति अत्र संशयं विहाय स्वकुहकतानिरासायाऽऽगत्यास्मन्मनः क्षोभं निवर्तयेति भावः मानिनीपक्षे अहोऽस्माभिरदीर्घदर्शित्वादबुद्ध्वैव यदनुष्ठितं तस्य फलमिदानीमुपास्थितामित्याशयेनाहुः । प्रहसितामति । त्वया यदस्माकं प्रहसितं यच्च प्रियस्य तव प्रेमपूर्वकं वीक्षणं हे प्रियेति वा प्रियं मत्वेति भावः । विहरणम् एतत्त्रयं ते ध्याने अहो एतासां कदा प्रहसितादिकं द्रक्ष्यामीति चिन्तिते मङ्गलं यावत्तादृशं तव चिन्तनं स्थितं तावदेव तत्कर्तृकप्रार्थनादि परमस्माकं मङ्गलं स्थितं संप्रति तवाचिन्तनासिद्धावसरे ऽस्माकं परममङ्गलं जातमिति भावः । तथा रहसि यास्तव हृदिस्पृशः संविदः ताश्च नो मनः क्षोभयन्ति अहो नायं प्रहसितादिपात्रभूतः स्थितोऽतो वृथैवा ऽनभिज्ञाऽपकृतज्ञशिरोमणीभूतस्याग्रे प्रहसितादिकमनुष्ठितं कुटिलभ्रूविग्रहश्चरणोपान्तपातनयोरवस्थितस्तस्मान्मौर्ख्येण विपरीतमनुष्ठितमतः किं कुर्म इत्येव स्मृतानि प्रहसितादीनि नो मनः पुनः पुनर्व्याकुलयन्ति हि निश्चितं यथा कश्चिद्वञ्चकः सेवको भूत्वा दैन्यसेवनादिना मनो रञ्जयित्वा स्वस्मिन्विश्वासमुत्पाद्य मादकं वस्तु प्रदाय सर्वस्वमादाय पळायते तथा त्वमपि कृतवानस्य हो कष्टं किं कुर्म इति कन्यावेशेन संबोधयन्ति हे कुहकेति । निवृत्तिपक्षे एवंरूपोऽपि त्वं जीवरूपेण स्वस्यैव च वञ्चको जातस्तस्य तव स्ववञ्चनहेतुभूतानि चेष्टितानि नो दुःखकराणीत्याशयेनाहुः । प्रहसितेति । दुःखे सुखताभ्रमात्तथा हे प्रिय । अनित्यासत्येषु नित्यत्वस-

चलसि यद्व्रजाच्चारयन् पशून्नलिनसुन्दरं नाथ ! ते पदम् ॥
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त ! गच्छति ॥ ११ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

त्यत्वभ्रमाद्विषयाणां प्रेमपूर्वकमीक्षणं तथाऽशुचौ शुचित्वभ्रमाद्विहरणं तदेतत्त्रयं ध्यानेऽपि न मङ्गलं तथा रहसि विषयसम्भोगसंकेतास्तत्रापि हृदयप्रविष्टाः सम्यगुत्पादिताभिनिवेशा एतानि कुहकत्वं प्राप्तस्य तव चेष्टितानि नो मनः क्षोभयन्ति अहो किमिति नित्यमुक्तपरमात्मना स्वबन्धुचेष्टितान्याश्रितानीति क्षोभम् जनयन्ति हि निश्चितम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वत्प्रहसितादिभिः क्षुभितचित्तानां त्वद्दर्शनादेव शान्तिर्भविष्यतीत्यन्या आहुः हे प्रिय ! हे कुहक हे मगाधाशय ध्यानमात्रेणापि मङ्गलं यस्मात्तद्विहरणम् संविदः सङ्केतन्मणि ॥ १० ॥

भाषा टीका ।

हे प्यारे ! हे कपटि ! तुमारो जो हंसवो प्यारे के सहित देखवो विहार करवो ध्यान में मङ्गल कारक सव चारित्र एकान्त में संवाद वे हमारे मन को क्षोभित करै हैं ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किंच त्वयि वयमति प्रेमार्द्रचित्तास्त्वं पुनरस्मासु केन हेतुना कठिनमाचरसीत्याहुः श्लोकद्वयेन । चलसीति । हे नाथ ! हे कान्त यदा व्रजाच्चलसि पशूंश्चारयंस्तदा तन्नलिनसुन्दरं कोमलं ते पदं शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति एवंभूतास्त्वद्दुःख शङ्कितचित्ता वयम् ॥ ११ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

व्रजादिति । ततश्चलनमारभ्यागमनपर्य्यन्तमेव कलिलता सूचिता व्रजे तदवसादानुत्पत्तिश्चोक्ता स्वयं ताभिस्तच्छोधनात् पशूंश्चारयन्निति विविधानामनन्तानां तेषां चारणार्थं वर्त्मपरित्यागेन इतस्ततो भ्रमणाच्छिलादिभिरवसादः सम्भावितः तथा पशुतया निर्बुद्धित्वेन ते त्वत्पादाब्जदुर्गमपदेऽपि बत भ्रमन्तीति श्लेषेण सूचितं पदमित्येकत्वेऽपि द्वित्वमायात्येवेति पूर्वं लिखितमेव तथाप्यत्रार्थोऽयं ज्ञेयः एकमपि किमुत द्वयमिति गोचारणप्रदेशस्य प्रायो घनमृदुतृणमयत्वेन भूतलवर्तिशर्करादेः सम्पर्काभावात् तन्नोक्तम् अझिल्लिकण्टकवनमित्यादिहरिवंशोक्तेः सर्वत्र कण्टकाभाव एव हरिदासवर्य्येण गिरिराजेन श्रीगोवर्द्धनेन तत्पार्श्ववर्तितदनुगगिरिवर्गेण च स्वशिलानां श्रीपादाब्जन्यासपदेन नवनीतायमानत्वसम्पादनात्ताश्चात्र नोक्ताः नाथ ! हे व्रजेश्वरेति तत्तवायुक्तमिति कान्तेति अस्मत्कोमलकरस्पृश्यमेव तदिति प्रेमसंबोधनद्वयं कलिलतायां हेतुविशेषः तेनाधिककलिलतापि सूचिता यद्वा नाथत्वेन सर्वेषां व्रजजनानां कान्तत्वेन च विशेषतोऽस्माकमिति भावः । यद्वा नाथ एवं प्रियजनोपतापक ननु विवेकिन्यस्तर्हि अवसादहेतुमद्विषयकचिन्ता त्यज्यतां तत्राहुः । कान्तेति प्रियजनचिन्ताया विवेकेऽप्यपरिहार्य्यत्वात् इति भावः । यद्वा, कलिलतागमने हेतुः नाथ हे प्राणेश्वरेति ननु "यावतः कुरुते जन्तुः संबन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः„ इत्यादिवचनेन प्रीतेर्दोषत्वप्रतिपादनात् प्रीतिरेव निरस्यतां तत्राहुः । कान्तेति हे मनोहरेति अलमति विस्तरेण अन्यैर्व्याख्यातं यद्वा सीदति व्यथते इति एतच्चिन्तया कलिलतां वैकल्यमिति अतो वनभ्रमणं विहायात्र द्रुतमेहीति भावः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तच्च भवता क्षोभदानं संयोगवियोगयोरविशेषमेव नतु कादाचित्कमित्याहुः चलसीति द्वाभ्याम् । व्रजादिति । ततश्चलनमारभ्यागमनपर्यन्तमेव कलिलता सूचिता । पशूंश्चारयन्निति विविधानामनन्तानां तेषां चारणार्थं वर्त्मपरित्यागेनेतस्ततो भ्रमणाच्छिलादिभिरवसादः सम्भावितः । तथा पशुतया निर्बुद्धित्वेन ते त्वत्पादाब्जदुर्गमपथेऽपि बत भ्रमन्तीति श्लेषेण सूचितम् । शिलं पतितसश्शूकवन्यधान्यादिकम् । अझिल्लिकण्टकवनमित्यादि हरिवंशोक्तेः । सर्वत्र कण्टकाभावात् न तदुल्लेखः । नाथ ! हे व्रजेश्वरेति तत्तवायुक्तमिवेति । कान्तेति अस्मत्कोमलकरस्पृश्यमेव तदिति प्रेमसम्बोधनद्वयम् । कलिलतायां हेतुविशेषः । यद्वा । नाथत्वेन सर्वेषां व्रजजनानां कान्तत्वेन च विशेषतोऽस्माकमिति भावः । यद्वा । नाथ एवं प्रियजनोपतापक ! । ननु विवेकिन्यस्तर्हि अवसादहेतुमद्विषयकचिन्ता त्यज्यतां तत्राहुः । कान्तेति । प्रियजनचिन्ताया विवेकेऽप्यपरिहार्यत्वात् । यद्वा । कलिलतागमने हेतुः नाथ हे प्राणेश्वर इति । ननु "यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कव„ इत्यादिवचनेन प्रीतेर्दोषत्वप्रतिपादनात् । प्रीतिरेव निरस्यतां तत्राहुः मनो गच्छतीति सङ्कल्पमात्रात्मकं तच्चास्माकं बुद्धिवृत्तिं विवेकमपेक्षत इति भावः । ननु मनोऽपि युष्माकमेवेत्याशङ्क्य तस्यापि न दोष इत्याहुः । कान्त हे मनोहर इति । अतो वनभ्रमणं विहायात्र द्रुतमेहीति भावः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च त्वयि वयमतीव प्रेमार्द्रचित्तास्त्वन्तु कुतोऽस्मान् वञ्चयसीत्यभिप्रेत्याहुः द्वाभ्यां हे नाथ हे कान्त यद्वा पशूंश्चारयन् व्रजाच्चलसि तदा नलिनवत्सुन्दरं कोमलं ते तव पदं शिलैः कठिनैस्तृणैरङ्कुरैश्च सीदतीति क्लिश्येदिति नोऽस्माकं मनः कलिलतामस्वास्थ्यं गच्छति याति ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्वच्चरितं ज्ञानिनामपि दुर्बोधकं किमुतास्माकमिति भावेनाहुः । चलसीति । पशूंश्चारयन् यद्यदा व्रजाच्चलसि गच्छसि तदा शिलतृणाङ्कुरैः छिन्नशिखरत्वेन परुषैरिषीकादितृणाग्रैः शिलाः शर्करास्ताभिस्तृणाङ्कुरैश्च वा सीदति व्यथतीति कलिलतां नारायणोऽन्यो वेति संशयपङ्किलताम् ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

न केवलमिदानीमेव वने सम्प्रति नः कदर्थयसि तव विहारोऽस्माकं चोभक एवासीदित्याहुः । चलसीत्यादि । हे नाथ । यत् व्रजात पशून् चारयन् चारयितुं चलसि तत्र ते तव नलिनादपि सुन्दरं पदं शिलतृणाङ्कुरैः सीदतीति कृत्वा नोऽस्माकं मनः कलिलतां दुःखगहनभावं हे कान्त ! गच्छति अतः साधूक्तं विहरणञ्च ध्यानस्यैव मङ्गलं यस्य तत्तथा नतु ध्यातुर्मङ्गलमिति ॥ ११ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

राजस्या वचनमाह । चलसीति । अस्माकन्तु स्नेहवशात् त्वद्विषयिका समीचीनेऽपि खेदबुद्धिर्जायते तथतु नास्मद्विषयिणी सत्य पिखेदे जायत इति न्यायाविरोधमाहुः यत् व्रजात्पशून् चारयन् चलसि तत्र चलने नलिनापेक्षयापि सुन्दरं कोमलं हे नाथ ! ते पदं मार्गस्थितैः शिलतृणाङ्कुरैः शिलाः पाषाणाः तृणानि अङ्कुराः दर्भादीनां तामसानि सात्त्विकानि राजसानि अथवा शिलारूपं यत्तृणं शिलतृणं कठिनं तृणं तस्याङ्कुरैः अतिपुरुषतीक्ष्णैः सीदतीति क्लेशं प्राप्नोतीति वस्तुतो न प्राप्नोत्येव तथापि हे कान्त भवेः ! मनः कलिलतां गच्छति । व्रजादिति । प्रातरारभ्य खेदः सूचितः चलनादेव च खेदः अतः प्रथमतस्तदेवोक्तं वस्तुतस्तु तव पदे अस्मत्स्थानं विहाय न गच्छतः तथापि भवानेव तथा चालयति किंच व्रजस्थिता गावः अरण्ये नयिन्ते तासां चारणं न मार्गगमनेन भवति अत अमार्गेऽपि गन्तव्यं भूम्य दनिाम् अनुग्रहार्थं न पादुकाग्रहणं पाल्यानां चर्मेच न परिधेयम् अतो नलिनसुन्दरं पदमेव शिलतृणांकुरैः सीदति जले एव स्थातुं योग्यं जलपूर्णे वा नलिनादपि सुन्दरं चेतस्यामस्मासु वा स्थातुं योग्यं नाथेति सम्बोधनात् बहव एवात्रार्थे नियोज्याः सन्ति तथापि स्वयमेव गच्छसीति वने हि त्रिविधा भूमिः पर्वतरूपा अरण्यरूपा कच्छरूपा च तत्र क्रमेणैकमेकत्र भवति सर्वं वा सर्वत्र अवसादः अयातत्र एकत्र स्थितः तदा चिन्ता भवति स्वयं गत्वा स्वहृदये स्थापनीय इति मनः कान्तेति च तेन मनः स्थापितमपि न तिष्ठतीति ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च त्वं न केवलमधुनैव दुःखयस्यपि तु अन्यदपि स्वमपि दुःखयित्वा अस्मभ्यं दुःखं दातुं यतसे इत्याहुः । चलसीति । यत् यदा । तदा नलिनादपि सुन्दरं सुकुमारं शिलैः कणिशैः तृणैरंकुरैश्च सीदति क्लिश्येदिति सम्भाव्य मनः कलिलताम् अस्वास्थ्यं प्राप्नोति । यद्वा । कलिं कलहं लाति गृह्णातीति कलिलं तद्भावः कलिलता ताम् अस्माभिरेव सहास्मन्मनः कलहं करोतीत्यर्थः । सच कलिर्यथा । अरे मनः स यदि वने भ्रमणात् खिद्यति तदा व्रजान्निःसृत्य नित्यमेव तत्रैव किं यात्यतस्त्वं किमिति वृथा खिद्यसि । अयि निर्बुद्धयो गोपालिकास्तस्य चरणतलद्वयं स्थलकमलादपि सुकुमारं भवत्येव वने च शिलतृणाङ्कुरशर्कराः सन्त्येव कथं पीडा न स्यात् । अरे मुग्ध स सुकोमलवालुके पथि पथ्येव भ्रमति । अयि निर्विवेकाः गावः किं पथि पथ्येव घासं चरन्ति । अरे प्रेमान्ध स चक्षुष्मान् शिलतृणाद्युपरि कथं पादावर्पयेत् । अयि प्रेमगन्धेनापि रहिता यद्यावेगवशात्क्रमाद्वा तदुपरि पादः पतेत् तदा किं स्यात् । भो भ्रातश्चेतः सत्यं ब्रूषे । एतावद्दुःखमनुभवितुमेव जीवन्त्यो विधात्रा वयं सृष्टाः भो दुःखिन्यः खलु जीवत यूयं अहन्तु युष्मत्प्राणैः सार्द्धं युष्मद्देहेभ्यो निस्सृत्यात्रैव यामीति ॥ ११ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तच्च क्षोभणं संयोगवियोगयोरविशेषमेव तत्कृतमेव भवतोनिदितमासि च परिभ्रमणं व्यर्थमेवेत्याशयेनाहुः । चलसीतिद्वाभ्याम् । व्रजादिति । ततश्चलनमारभ्यागमनपर्यन्तमेव कलिलता सूचिता पशूंश्चारयन्निति अनन्तानान्तेषां चारणार्थं वत्सपरिचारणेन तस्ततो भ्रमणाच्छिलादिभिरवसादः स म्भावितः तथा पशुतयानिर्बुद्धित्वेन ते त्वत्पादाब्जे दुर्गमदेशेवनेऽपिभ्रमन्तीति खेदः सूचितः शिलं पतितकणशश्चङ्कवन्यधान्यादिकं इदंच अखिलिलकण्टकवनमित्यादिहरिवंशोक्तेः सर्वत्र कण्टकाद्यभावेऽपि प्रेमविशेषात्तुक्तं नाथेति कान्तेति परमप्रेमास्पदत्वं ननु "यावतः कुरुते जन्तुः संबन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः„ इति भारतोक्तेः । प्रीतिरेव त्यज्यतामिति तत्राहुः मनो गच्छति सङ्कल्पमात्रात्मकं तन्नास्माकं बुद्धिवृत्तिमपेक्षत इति भावः ॥ ११ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

किञ्च नस्तु तव प्रियत्वात्त्वदीयस्वाभिलषितविहारप्रवृत्तावपि त्वदीयवृथाखेदसम्भावनेनापि खेदो भवति तवतु कुहकत्वादस्मत्खेदे

श्रीरामनारायणकृतभावभावविभाविका ।

स्वहृदि तद्धानेऽपि नतत्प्रतीकारः अत्यन्तस्वविरहेणतद्धर्धनामित्याहुः। चळसीति।यद्वा तव स्वेच्छया स्वविहारकौतुकेन दिनचलनेऽपि यदा नो दुर्दशा भवति तदा रात्रौ वनभ्रमणे किमु वाच्यमित्याहुः। चलसीति। तत्रहे नाथ ! हे कान्तेति सम्बोधनाभ्यां त्वं सामान्यतः सर्वस्य नाथः स्वामी विशेषतो व्रजस्य तत्रापि नोऽस्माकं तु कान्त एवातः सर्वविश्वस्थितिपालनयोः प्रवृत्तस्यात्मीयत्वेन विशेषतो व्रजपक्षपातः नः स्वकान्तानां स्वकान्तः स्वकान्तश्च स्वकान्तेनानुचितएव यत् यदा व्रजात्पशूंश्चारयन् चलसि तदा नलिनादपि सुन्दरं मञ्जु मृदु चते पदं शिलतृणांकुरैः सीदति वृन्दावने भगवद्विहारभूमौ कण्टकासम्भावनया तदनुक्तिः यद्वा भगवत्प्रियमृदुपदे कण्टकस्पर्शसम्भावनेऽपि वैकल्येन भीतमनसा तदनुक्तिः यदा प्रेमाश्रितस्वस्तनेषु तृणांकुरैर्व्याप्तशिळासाम्यसम्भावनया स्वपरमसुखार्थमपि त्वन्मृदुपदे तस्य स्पर्शखेदोमाभूदितिधारायितुं नपारयामः तदा किमु वाच्यं मृदुतृणांकुरस्पर्शो तृणस्पर्शो वा शिलास्पर्शो वा तदवसादसम्भावना तथा च सीदतीति सम्भावनयैव नो मनःकलिळतां द्रवीभावं तत्तत्सादृश्यं गच्छति यद्यपि यथात्वत्पदावसादसम्भावनया नो मनसां द्रवीभावस्तथा व्रजशिळतृणांकुराणामपि व्रजवासित्वाविशेषात्त्वत्प्रेमैकव्याप्तानां साक्षात्तव पदसम्बन्धिनां त्वत्पदावसादशङ्कया सम्भवति द्रवीभावः तथा दिनचलने सुपथेन गमनसम्भवे तदस्पर्शसम्भवोऽपि तथापि जडमतीनां नो वृन्दावनशिळादिष्वपि शिलादित्वाविशेषभ्रमेण जाड्येन जाड्यकल्पनया तथा सम्भाव्यखेदः तथा सर्वज्ञस्यापि सर्वसुपथदर्शकस्यापि तव दिनेऽपि पशुचारणे तदनुगतया कुपथगमनं सम्भाव्य सच्चिदानन्दाच्छेद्याभेद्यत्वत्पदेऽपिप्रेमवैक्लव्येन तद्विस्मृत्यमाधुर्यरसाक्रान्तचित्तानां मृदुत्वमेवानुसन्धाय तथावसादसम्भावनया खेद इति न तच्चित्रं यद्वा नलिनसुन्दरं ते पदमपि नः प्रेमरसनाभिर्वन्द्यं तथा तव चलनारम्भे उक्तसम्भावनया कलिलताङ्गतेषु नो मनः एकेषु निरुद्धमनएव चर्वितुमशक्यमपि त्वं बलात्कारयंश्चलसि तत्रापि रसाभिज्ञ द्रष्टुमनुनिःसृता अनुगतचित्ता अनुचरीनों हित्वा नाथोऽप्यनुचर इव पशूननुचरसीति चित्रं तव रसवैदग्ध्यं यदि पशूनामनुरतत्वं तदा नोऽननुरतत्वं यदि तेषां तथ तदानोऽपि तथात्वं यदा पशुषु देवानां प्रियत्वप्रसिद्ध्या सर्वदेवात्मकस्य तव पशुप्रियत्वं तदा विदग्धा अपि वयं कामविरहचिन्तानलेभ्यो विदग्धवैदग्ध्या पशुवृत्तयो जाता इति नाधुनोदासीन्यावसरः यदि गोपजातिजातत्वेन गोचारणं स्वभावानुमतं तदा गोपत्वेन नाथत्वेन कान्तत्वेन गोप्यः कान्ताः स्वभावानुगा अपि नोपेक्ष्याः यदि नाथ जनैरितरगोपबाळैर्विहाराय स्वजनैः स्वसौख्याय याच्यमानतया तदाप्रदानाय वनगमनं तदा वयंवन विहाभिकांक्षिण्यः स्वसौख्याय याचनपराइत्यस्मदानं प्रदातुमप्याविर्भव न हि नाथ ! सर्वार्थपरित्यागेनास्मदर्थे उपतापकार्थेत्वं कान्तस्य च तव वैपरीत्येनान्तकत्वं न्याय्यम अपितु रतासु विपरीतत्वेऽपि विपरीतरतिरेवोचिता बन्धनविधानेऽपि भुजनागपाशबन्धनं कोपरसावेशेऽपि नखदन्तच्छेदो यथाकाममधोनिपात्याज्ञावपेषणं वेति भावः ॥ ११ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अहो रात्रौ परमकोमलपादपद्मकृतपलायनस्यास्मत्स्वामिनः का वा पीडा जाता स्यादित्यनुसंदधत्यः मूर्च्छावस्थामेवानुसंदधत्यः अस्मन्मनो दिनेऽपि यदा त्वं व्रजाच्चलसि तदाऽस्वास्थ्यमेव गच्छतीत्याशयेनाहुः। चलसीति।यद्यदा व्रजात्पशून् चारयन् चळसि तदा हे नाथ ! नलिनात्स्थलकमलादपि सुन्दरं कोमलं ते पदं शिलैः सशूकवन्यधान्यकणिशैः तृणैः कुशकाशादितीक्ष्णाग्रतृणैरंकुरैश्च सद्यो भूमिं निर्भिद्य निःसृतैः सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति तत्र व्रजादिति प्रातरारभ्य खेदः चलसीति चलनात्खेदत्वं चलसीत्युक्त्या तव पदं त्वमस्मान्विहाय न गच्छसि वयमेव चळाः तच्चाळयसीति सूचितं तत्रापि पशून् चारयन् पशवश्च पर्वतारण्यकच्छरूपायां भूमौ चरन्ति तदनुगमनं च नग्नपद्भ्यां भूम्यांद्यनुग्रहार्थं पाल्यानां चर्मणोऽपरिधेयताबुद्ध्या पादुकाग्रहणात् नलिनरूपत्वाच्च कोमळे स्थाने अस्माकं वा अङ्के स्थातुं योग्यं नाथेति सम्बोधनाद्वयमेवात्रार्थे नियोज्याः सति तथापि स्वयं चलसीत्यत्यन्ताश्चर्यमिति ध्वनितं कान्तेति सम्बोधनात्तदेतदस्मद्दुःखावहमिति सूचितम् अनभिज्ञापक्षे किञ्च स्वस्मिन्नत्यन्तार्द्रस्वान्तास्वस्मासु कपटाचरणं न न्याय्यमित्याहुः। चलसीति। यद्वा न केवलमधुनैवास्मद्दुःखाय स्वात्मानं दुःखयस्यपितु सर्वदैव तवेयं रीतिरित्याहुः। चलसीति कळिलतां ,व्याकुळतां यद्वा कळि कळहं लाति गृह्णातीति कलिलं तस्य भावः कलिलता कळहकर्तृता तां गच्छति प्राप्नोति कलहं करोतीति यावत् तथाहि अहो वने भ्रमतः कृष्णस्य परमकोमलं पदं सीदति अरे मनः नैवं तथाचेत्प्रत्यहं तत्र न गच्छेत्तस्मात् किमर्थं वृथा खिद्यसि अयि निर्बुद्धिगोपालिकास्तदीयं पादयुगलं स्थळपद्मादपि कोमलतरं किन्न पश्यत अरे मुग्धमनः वालुकामये कोमले पथि पदं स्थापयत्यतो न सीदति तत् अयि विचारविधुराः पशवः किं तथा भूते स्थले चरन्त्यतस्तांश्चारयंस्तदनुगच्छति तदा तदीयं पदं शिलादिभिः कथं न सीदति अरे प्रेमान्ध विशालनेत्रोऽसौ तदुपरि पदं किमर्थं स्थापयति अयि प्रेमलेशेनापि विधुरास्त्वरया तदनुभ्रमणकाले तदुपर्य्यवश्यं पदं पतत्येव तेन च पीडा भवत्येव अहो भो भ्रातश्चेतः सत्यमुक्तं त्वया नास्त्यसावस्मदधीनो येन वयं तं वारयामोऽत एवं विधं दुःखं सहन्त्यो जीवामोऽस्मदर्थमेव विधात्रा सृष्टत्वात् भो दुःखिन्यो जीवन्तु भवत्योऽहन्तु युष्मत्कान्तपददुःखं द्रष्टुं नालमतो युष्मद्देहेभ्यः प्राणैः सार्धमधुनैव यामीति मानिनीपक्षे अहो वृथैव वयं त्वामुपालब्धुं प्रवृत्ताः स्वाङ्गेषु दयालेशरहितस्यान्यत्र तत्प्रसक्त्यभावादित्याशयेनाहुः। चलसीति। हेनाथ शोभनवस्तुमात्रोपतापनस्वभाव यदा पशून् चारयन् व्रजाच्चलसि तदा शिलादिभिः परमकोमलं पदं सीदतीति नो मनः कलिलतां दयया आर्द्रीभावं गच्छति परमकठोरान्तःकरणस्य तव तु तत्र करुणालेशोऽपि नोत्पद्यते अतोऽकान्त ! कस्य स्वकीयस्य परकीयस्य च सुखस्यान्त नाशक तथाच एवं त्रिधकठिनचित्तस्तुविधातृसृष्टौ कोऽपि नासीन्नास्ति न भविष्यति चेति भावः निवृत्तिपक्षे पुनः क्षोभकरीं तच्चेष्टामोवर्णयन्ति यत् यदा व्रजाद्देहमध्यात्पशूनिन्द्रियलक्षणान् चारयन्विषयलक्षणेषु मार्गेषु भ्रामयन् स्वयमपि चलसि अहं श्रोता स्पृष्टेत्याद्यभिमानवान्भवसि तदा पद्यते गम्यते इति पदं सच्चिदानन्दघनस्वरूपं नलिनं चतुर्दशभुवनात्मकम् पद्मं सुन्दरं येन यदधिष्ठितं सत्सुन्दरतया प्रतीयते तत् तथा-

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ॥
धनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर ! यच्छसि ॥ १२ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

भूतपदं यथोक्तया प्रवृत्त्या शिलतृणाङ्कुरस्थानीयैराध्यात्मिकाधिदैविकाधिभौतिकसंज्ञकैर्दुःखैः सीदतीति कृत्वा नो मनः कलिलतां व्याकुलतां गच्छति यतो हे नाथ ! स्वतन्त्रस्य तवैवम्विधं पारतन्त्र्यमासाद्य दुःखोपभोगो नोचित इति भावः । किञ्च हे कान्त कस्य कस्यापि सुखस्यान्तः परिसमाप्तिरन्तर्भावो यस्मिन्स्तथा च यथा श्वा शुष्कास्थिचर्वणं कुर्वन्स्वदन्तनिःसृतरुधिरमस्थिसम्बन्धि मन्यते तथा स्वस्वरूपभूतं सुखं विषयसम्बन्धि मत्वा तदर्थं वृथा खेदं प्राप्नुवन्तं त्वामाऽऽलोच्यास्माकं खेदो भवतीति भावः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दिवसे पादपद्माभ्यां वने गमनं त्वदीयं तावदस्माकं न रोचते रात्र्यां तास्यां तव चङ्क्रमणमतिसन्तापदमतोऽस्माकं समीपे आगच्छेत्यभिप्रायेणान्या आहुः हे नाथ ! हे कान्त यत् यदा पशून् चारयन् व्रजाच्चलसि तदा नलिनवदारुण्येन मार्दवेन सुगन्धितश्च सुन्दरं ते पदं शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नोऽस्माकं मनः कलिलतां क्षुभिततां गच्छति, याति रात्र्यां त्विदानीं सुतरां कलिलतां गच्छत्यत एहि ॥ ११ ॥

भाषा टीका ।

जा समें आप गउअन को चरायवे को वन को जाय हैं ता समय कमल की नाईं जो आप के चरण वे घांसककरों ते दुःखित होंगे या चिंता ते हमारो मन वडो दुःखित होवे है । ११ ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

किन्तु दिनपरिक्षये सायंकाले नीलकुन्तलैरावृतं धनरजस्वलं गोरजश्छुरितं वनरुहाननमलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रच्च मुहुर्मुहुर्दर्शयन्नो मनसि केवलं स्मरं यच्छस्यर्पयसि न तु सङ्गं ददासीति कपटरूपमिति भावः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं संपूर्णदिनं दुःखेनैव वयं गमयामः सायं व्रजे त्वदागमनेऽपि दुर्भगा न सुखं लभामहे इत्याहुः । दिनेति । दिनस्य परितः क्षये अत्यन्ते सति इति दुःखाधिक्यं सूचितं नीलाः कुन्तला अलकाः तेषामेवोपरि श्रीमुखस्यावरणेन शोभाभरापादनात् अतएव वाग्रे वक्ष्यते अक्रूरेण मुखं मुकुन्दस्य गुडालकावृतस्मितेति । तैरावृतमित्यादिना परमसौन्दर्य्यमभिप्रेतं तच्च मुहुः स्मरार्पणे हेतुः तथा दिनपरिक्षय इति च तस्य कामोदयवेलात्वात् कुन्तलावृतत्वादिकं सहजसौन्दर्यपरिकरत्वेन बिभ्रत् प्रकटयन् तच्च नोऽस्मान् दर्शयन् यदि चादर्शयन् स्वगृहान्तः प्रविशसि तथापि मुहुः कामार्पणं न स्यादिति भावः । मुहुरिति गोसम्भालनादिच्छलेन पुनः पुनः परितो बहुधा निरीक्षणेन स्मरार्पणस्यापि पौनःपुन्यं यद्वा कथं चिद्विचारभरेण संव्रियमाणस्यापि स्मरस्य मुहुरर्पणमुद्भटीकरणं मनसीति स्मरस्यात्यन्तमनोव्यापकत्वमप्रतिकार्य्यत्वञ्च श्लेषेण स्मरमिति यः स्मरणमात्रेण क्षोभकः तं साक्षाद्यच्छसीति दर्शनेन परमक्षोभं कुर्य्यादेवेति सूचितं तत्र सामर्थ्यं दर्शयन्ति हे वीरेति किंवाऽन्यत्र तव वीरत्वं नत्वन्यत्रेति सरोषनर्मोक्तिः अन्यच्चैर्व्याख्यातं यद्वा घनरजो बिभ्रत् अत एव सलङ्कृतमित्यर्थः । यद्वा सुष्ठु अलमतिशयेन बिभ्रदित्यनेन दर्शयन्नित्यनेन वा स्यान्वयः यद्वा बिभ्रत् वेणुमितिशेषः । मोहनमयेन प्रेमवैवश्येन वा साक्षात्तदुच्चारणाशक्तेः यद्वा धनं वेणुलक्षणं रजश्च गव्यमेव बिभ्रत् अन्यत्समानम् अहो व्रजान्तस्तादृशवेशदर्शनेनापि स्मरोऽभूत् अधुना च वनान्तर्निशि रत्यर्थं नागरवेशेन तत्रापि विरहे स्मरणेन सो वर्द्धतैवेति विलम्बं माकुर्वीति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

दिनस्य परितः क्षये अत्यन्तप्रान्ते सतीति दुःखाधिक्यं सूचितं नीलाः कुन्तला अलकास्तेषां ललाटोपरि श्रीमुखस्यावरणेन शोभाभरापादनात् तैरावृतमिति सहजपरमसौन्दर्यमभिप्रेतम् । अत एव घनरजस्वलम् । धनं गोधनविक्तयोरिति विश्वप्रकाशाद्गोरजश्छुरितमिति । रजसापि तदुल्लासोऽभिप्रेतः । पङ्काङ्गरागरुचिराविति वत् । विशेषतस्तु गोपोचितवेशस्य तस्य गोपीजातिषु स्वेषूद्दीपनत्वादनुवादः । ततश्च सामान्यतः स्मरार्पणे हेतुः । विशेषतस्तु दिनपरिक्षये नीलकुन्तलैरिति दर्शयन्निति च पूर्वस्य कामोदयवेलात्वात् उत्तरस्य च भावातिशयसूचकत्वात् । यदि चादर्शयन् स्वगृहान्तः प्रविशसि तथापि तादृशं कामार्पणं न स्यादिति भावः । तत्रापि मुहुरिति । गोसम्भालनादिच्छलेन पुनः पुनः परितो बहुधा निरीक्षणेन स्मरार्पणस्यापि पौनःपुन्यं दर्शितम् । तच्च कथञ्चित् विचारभरेण सम्वरीतुमिष्यमाणस्यापि तस्य मुहुरुद्भटीकरणं मनसीति स्मरस्यात्यन्तमनोव्यापकत्वमप्रतिकार्यत्वञ्च श्लेषेण स्मरमिति यः कान्तजनस्मरणमात्रेण क्षोभकः तं साक्षाद्यच्छसीति तस्य महत्वं सूचितम् । तत्र सामर्थ्यं दर्शयन्ति हे वीरेति । तत्रैव तव वीरत्वं नत्वन्यत्रेति सप्रणयरोषनर्म ध्वनितम् । वस्तुतस्तु तादृशस्वीयभावोद्दीपनमिति भावस्य भावनैव मुहुरनूद्यते ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

अहो व्रजं न्तस्तादृशदर्शनेनापि स्मरोऽभूत् । अधुना च वनान्तर्निशि स्वथयनामरवेशेन तत्रापि विरहे स्मरणविशेषणासौ वर्द्धतैवेति विलम्बं माकुरु इति भावः । एवं श्लोकद्वयेऽस्मिन्निदमपि व्यज्यते नित्यमेवास्मदभीष्टमपूरयित्वापि गच्छसि त्वय्यस्माकं मनः स्नेहमेव वहति नतु तदभावेनौदासीन्यं यं स्मरं वहति तन्तु त्वत्प्रेरितनयैव नतु स्वतः । तथा त्वत्स्नेहमयतयैव नतु रूक्षतया स्नेहस्यं स्वभावजत्वात् त्वं पुनरस्मासु सङ्गेच्छया सङ्गच्छमानासु स्मरमेव ददासि नतु मिथः स्नेहोचितं सङ्गं तस्मादस्माकं सर्वं स्नेहमयमेव भवतस्तु कपटमयमेवेति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

वनरुहाननं जलजसमुखं घनरजस्वलं घनरजोधूसरितम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवम्भूतास्त्वत्क्लेशशङ्कितचित्ता वयं तु दिनक्षये सायंकाले नीलकुन्तलैः केशैरावृतं गोरजश्छुरितं वनरुहाननमालिमालाकुलपद्मरजश्छुरितपद्मतुल्यमाननं मुहुर्मुहुर्दर्शयन्नोऽस्माकं मनसि केवलं हे वीर स्मरं यच्छसि कामनुद्दीपयसि नतु सङ्गं ददासि ततः कपटस्त्वमिति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ननु व्याकुलचित्तानां कामोद्बोधायोगात् क्वचिद् दृच्छयमिति कथमुक्तम् अत्र वदन्ति। दिनेति। दिनपरिक्षये संध्याकाले वनाद् गच्छन्निति शेषः वनरजस्वलं वनभूमौ सता गोरजसा युक्तं दर्शयन् नीलकुन्तलैरावृतं वनरुहं जलजं कमलं तद्वच्छोभमानमाननं बिभ्रत् त्वं नो मनसि स्मरं कामं मुहुरनिशं नूतनम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

गमनसमये तावद्दुःखदत्वमुचितमेव आगमने वा सुखदोऽपि नच तथेत्याहुः दिनपरिक्षय इत्यादि हे वीर दिनपरिक्षये सायंव्रजगमनसमये नीलकुन्तलैरावृतं वनरुहाननं दर्शयन् नोऽस्माकं मनसि स्मरं बिभ्रत् यच्छसि अलन्तमप्यस्माकं हृदये स्मरं धृत्वा अर्पयसि सोऽपि नागच्छति बलादेवाकृष्यार्पयसीति विभ्रच्छन्दतात्पर्यं हेनीलश्याम यद्वा नितरा मिलयतीति नील इलप्रेरणे कुन्तलैरावृतमिति गोचारणश्रमव्यञ्जकं चारु यथा स्यात्तथा दर्शयन् कुन्तलावृतत्वं कुन्तलान् संवार्य दर्शयन्निति चारु शब्दार्थः तत्साधूक्तं कुहक नो मनः क्षोभयन्तीति ॥१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

एवं सप्तविधा अनन्यपूर्वा निरूपिताः चतस्रश्च सपूर्वाः अतः परं क्रमेण षड् ता एव निरूप्यन्ते तत्र प्रथमं राजसतामस्या वचनं ता हि बहिर्गत्वा द्रष्टुमशक्ता अतो यदा संध्यायां भगवानायाति तदा भगवन्तं दृष्ट्वा मनसि कामो भवति ततो बन्धप्रार्थना अधरामृतप्रार्थना च रजसा सत्त्वेन च भविष्यतः अनन्यपूर्वाणां तु नित्य एव कामः दिनपरिक्षये संध्याकाले क्षयोक्त्या दिने द्वेष्यत्वं ज्ञाप्यते रजोगुणस्यायं समयः कामस्यच कालः नीलकुन्तला भ्रमरा इव रसबोधकाः ये हि मुखकमललावण्यामृतं पिबन्ति ते उद्बोधका भवन्ति अतस्तैरावृतं वनरुहवत्कमलवत् आननं बिभ्रत् हे वीर ! नः मनसि स्मरं यच्छसि संध्यायां नीलवर्णैरावृतत्वे तत्प्रभवत्यात्तत्वं भवतीति तदुक्त्या वनरुहत्वोक्त्या च कुवलयाभत्वं ज्ञाप्यते तथाच प्रियामुखेन्दुदर्शनेनोत्तरोत्तरमधिकविकासवत्त्वमितः पूर्वमतादृशत्वं च ज्ञाप्यते तेन प्रियस्य सर्वास्वासक्तिः सूचिता भवति अत एव जलपदं विहाय वनपदमुक्तं तेन वने यावस्था तां ज्ञापयितुं तान् धर्मान्बिभ्रदेवाननं दर्शयतीति ध्वन्यते घनेन गोभिः रजस्वलं मुहुश्च प्रदर्शयन् मध्ये मार्गे गच्छन् उभयतः स्थिता गोपीः पर्यायेण पश्यति अतो मुहुः प्रदर्शनम् अग्रे गच्छन्पुनः पुनर्व्यावृत्य पश्यतीति वा तथा तादृग्दर्शनं स्वापेक्षाज्ञापकमिति स्मरजनकं निरन्तरदर्शनेन तत्रैव रसास्वादनमिति न स्मरोत्पत्त्यवसरः स्यात् अतो वारंवारं प्रदर्शनं स्मराग्नेः संधुक्षणमिव भवति तादृशं कृत्वा तत्पूरणार्थं तन्निराकरणार्थं वा युद्धमवश्यं कर्तव्यं तत्सूचयन्ति वीरेति घनेन रजस्वलं च श्रमसूचकं भवति श्रमनिवृत्तिश्च स्माभिरेव वनरुहमिति वन एवतत्सर्वथा भोग्यम् अतोऽत्रैव समागमतम अनेन गृहे दर्शं दास्यामीति पक्षो व्यावर्त्तितः बिभ्रदिति बलात्कारेण तामेवावस्थां स्थापयति यदि मुखसम्मार्जनं कृत्वा समागच्छेत्तदा प्रसन्नमुखदर्शनात् ज्ञानं वा भवेत् घनमेवन्बिभ्रज इति काम एव नतु क्रोधः यश पात्रं धृत्वा तत्स्थितमन्नं भोगार्थं दीयते तथा मुखं धृत्वा तत्रत्यो रसः कामात्मा मनसि स्थाप्यत इति मुखधारणस्य हेतुत्वम् अतो भोगार्थं दत्त इति भोगः करणीयः अयं काम आगन्तुक इति नास्यान्येन पूरणं भवति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

किञ्च त्वं संयोगेऽपि नैव सुखं दित्ससीत्याहुः । दिनपरिक्षये। सायङ्काले नीलकुन्तलैः कुटिलालकैर्मन्दमारुतलोलैरावृतम्। धनरजस्वलं धनं गोधनवित्तयोरिति विश्वप्रकाशाद्गोरजश्छुरितम् । वनरुहाननं लोलानि मालालिलतपरागभरच्छुरितसरसिजसदृशमाननं बिभ्रत् तच्च मुहुर्दर्शयन् गोसम्भालनप्रियसखान्वेषणच्छलेनेतस्ततःपरिवृत्यास्मन्नयनगोचरीभवन् स्वदर्शनस्य सर्वजनानन्दकं स्वभावं ज्ञात्वा एताः कष्टसिन्धावेव निमज्जयामीति विमृश्य नोऽस्मभ्यं स्मरं यच्छसि । य एव कुलधर्मपदवीं विषज्वालामिवानुभाव्यास्मानुन्माद्य वनेष्वानीयैवं रोदयतीति भावः । हे वीर ! व्रजस्त्रीणां धर्मध्वंसनार्थमेव प्रवर्तितस्मारशरप्रहार ! ॥ १२ ॥

केनचित्कृता विशुद्धरसदीपिका ।

दिनेति । दिनस्य परितः क्षये अत्यन्तं प्रान्ते सति इति दुःखाधिक्यं सूचितं तत्रापि यथाकथंचिद् दृश्येत तदर्थं नीलकुन्तलैरावृतं तत्र नीलेत्यावरकत्वं कुन्तलैरिति कुन्तः शस्त्रविशेषस्तत्सादृश्यं गृह्णद्भिरिति मारकत्वं तत्रापि धनरजस्वलं धनं गोधनवित्तयोरिति विश्वः गोधनरजसा च्छादितं मुहुरिति पुनः पुनर्गोसंभालनादिमिषेण दर्शयन्निति विच्छिद्यादर्शने नातृप्तिः सूचिता स्मरमिति पूर्ववत्क्षोभकमेवेति वीरेति निर्दयत्वमिति संक्षेपः ॥ १२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

किञ्च त्वयैव प्रेरितः कामस्त्वां विना न यापितः स्यादित्याहुः । दिनपरिक्षये इति । दिने पूर्वदिनचिन्ताविरहाभ्यां क्लेशसम्भावनया तत्परिक्षयोक्तिः सर्वस्मिन् दिने यानस्त्वत्कमलकोमलपदोः शिलायवलादचिन्ता समस्तदिने संचिता सा चिन्तातो विन्दुनाधिकत्वाच्चद्शगुणा भवति यथाकथंचिद्दिनक्षये तु त्वत्सुखागमावगमेन तां विस्मार्य त्वत्प्रवेशेऽपि नः क्षयोपायमेव करोषि नतु दुःखापायमिति तदेवाहुः । नो मनसि स्मरं यच्छसि आदौ स समय एव स्मरस्मारकः स च स्मरः स्मरणमात्रेणासन्मारकः तत्र त्वं विस्रम्भानाभावैः पोषयन् बलान्मनसि यच्छसि तत्र स्ववेश्मनि नो मनसि तत्प्रेरणमेवानुचितं तदपि प्रेरणं न सामान्यत इति संबोधनेनैवाहुः । वीरेति । विशेषत ईरयतीति तथा किञ्च यद्विजयाय समुद्यतस्तस्य स्ववेश्मनि निवेशे तद्युद्धमेवोचितं नतु पळायनमित्यपि श्लेषेणाहुः । वीरेति । वीरेत्यत्र तत्र कामसंग्राम एव भिरामो विरामे तु वीरत्वक्षतिः यतस्त्वं मारणे एव नतु मारमण मोरण अतो वीरवरस्त्वं वरवर्णिनीनां वरत्वात् वयं नहि मारमणेन मारेण मारयेति भावः । नन्वहं ... र...यामीति शङ्कायामपि श्लेषेणैवोत्तरमाहुः । वीरेति । विविधतयेरयसि नैकधेति भावस्तदेव विविधत्वं दर्शयन्ति मुहुराननं दर्शयन्निति आश्लेषदपि नेति याचितमङ्गीकारो न यस्मिं स्तदातिशेहभावाविशेषैर्गोपायाच्चास्वीकारणोश्वास्य कामं पूरयित्वा मुहुरिति पुना रूक्षभावैर्दासन्तात् ननेति विनयास्वीकारो यस्मिंस्तं दर्शयंस्तेन हृदयमति क्षोभयसि तथा वनरुहेति तद्विशेषणेन वनरुहं कमलं तत्सादृश्यद्योतकेन तस्य मुख्यमदनबाणत्वं ध्वनितं तस्य दर्शनञ्च दृग्द्वारेण तस्य हृदयप्रवेशनमिति तदिषुप्रवेशो तत्प्राबल्यसम्भवात्सुतरां तान्निवेशः एतङ्कामोद्दीपनं मुख्यं विषयं दर्शयंस्तद्विशेषयन्ति नीलकुन्तलैरावृतमिति । नीलैः कृष्णस्निग्धैर्मुखाब्जमधुपमधुपवलितयावलि कुन्तलैरलकैरावृतं वेष्टितमित्यनेन कामोद्दीपकविषयसन्निधाने कदाचित्कामोदयाभावोऽपि विषयतन्द्भोक्तुभयसन्निधावावश्यकत्वमेव कामोद्भवस्येति भावः । मुखपद्मस्य तत्तन्मधुपरागाद्भावकमधुपरागान्वितत्वं दर्शयन्त्य आहुः । धनरजस्वलङ्गोधनरजोव्याप्तं धनरजस्वलमिति पाठेतु बहुतररजोयुक्तमित्यर्थः । तथाच स्वसजात्याय गोपोचितवेषविशेषद्योतनेनातितरां स्वमनोमनोज्ञाकत्वं ध्वनितं यद्वा वनरुहाननमिति पद्मनिधिरूपमाननं मुहुः गोगणनादिषु क्रीडादिसुहृत्क्रीडाव्याजेन पुनःपुनर्दर्शयन्नकिंभूतं तत्धनं रूपधनं तेन रजस्वलं तेन तद्रजसा मदेन च व्याप्तं नीलकुन्तलैस्तद्रक्षककृष्णनागाकारैरावृतम्मुहुर्हसितापाङ्गनिरीक्षणादौ तत्सम्भूतीभूतदर्शनमुकाधरादिषु मपद्मरागतोरन्द्रनीलानामाविष्कारेण दर्शयन् तत्काम नो मनसि यच्छसीति भावः यद्वा नीलकुन्तलैरावृतं तथा धनरजस्वलमेवाननं बिम्बद्दर्शयन् ननु कुन्तलसमूहसमूहनरजः क्षालनाभ्यां स्पष्टं दर्शयन् अतिशोभनसमानभानेन अविद्याक्षोभवद्स्पष्टतया मुखस्य मुहुर्दर्शनेनमनः क्षोभयन् स्मरं यच्छसि यद्वा काम एष क्रोध एष रजोगुणसमुद्भव इत्यादिस्मृतिभी राजसस्य कामस्योपशमकनिरतिशयसत्त्वात्मकसितामृतमयराजसोपलक्षितसच्चित्सुखदर्शनेन तदुपशमस्सम्भवेऽपि तव कुन्तलादेः स्वरूपात्मकत्वेऽपि नीलवर्णप्रयुक्ततमः प्रा...भ्रमेण धनरजोरजोयुक्तत्वमत्या रजः प्रभवः कामप्रभवः प्रभवतीति भावः । किंच व्रजे वनरुहाननं दर्शयित्वा स्मरदानेन नो नो रोहयित्वा वनरुहाननादर्शनमनुचितम् अतो वनरुहाननस्य नो नयनपद्मनयनेनावनतवनितावनं विधेहि ॥ १२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

भगवतस्त्वस्मद्भाग्यवशात्करुणा नोत्पद्यत इत्याशयेनाहुः दिनेति । दिनस्य परिक्षये सन्ध्याकाले परिक्षयपदेन न दिने प्रदोषो ध्वनितः दिनपरिक्षये अगत्या आयासीति भावः । प्रविष्टान्धकारकालेऽप्यागतौ कमलरूपमाननं नीलवर्णैः कुन्तलैरावृतं सम्यगदृश्यमानं तत्रापि धनं गोधनवित्तयोरिति कोशाद्गोरजोव्याप्तमितस्ततः प्रेक्षणेन नयनं दर्शयन्नपि नो मनसि स्मरं काममेव यच्छसि नत्वङ्गसङ्गं तत्रापि कामवाणैर्वेधयन्वीरत्वमेव प्रकटयसीति संबोधनाशयः अनभिज्ञापक्षे त्वन्तु संयोगसमयेऽप्यस्मद्दुःखायैव भवसि इत्याशयेनाहुः । दिनस्य विरहनिमित्तत्वात्स्मशत्रोः परिक्षये सम्यक्नाशे सायङ्काले अनेनोद्दीपनकाल उक्तः भ्रमरकुलमालावृतजलवन्नीलकुन्तलावृतं मुखमित्यालम्बनस्य सौन्दर्य्यातिशयो व्यज्यते तत्रापि धनरजस्वलमिति गोपोचितवेषेणोद्दीपनं तादृशं मुखं सर्वतो व्यावर्तनेन पुनः पुनर्दर्शयन् तेन स्वापेक्षां सूचयन्नो मनसि स्मरं स्मरणमात्रेणापि क्षोभकरं बलाद्यच्छसि अर्पयसि हे वीर अत्रैव त्वं वीरो नतु कामयुद्धेऽत एव सर्वदा स्मरमेव यच्छसि न त्वङ्गसङ्गमिति तत्र सर्वं सकपटमेव चेष्टितमस्मा कंतु तत्सकळं प्रेममयमितिभावः । मानिनीपक्षे यथा दयां विहाय स्वाङ्गेषु त्वया चेष्टितं तथास्माकमपीत्याहुः । दिनेति तथाभूतं मुखं मुहुर्दर्शयन्नो मनसि स्मरं यच्छसि तथाचास्मान्कामयुद्धाय बलात्कारेणोद्यताः सम्प्रति तद्युद्धावसरे पलाय्य गतोसीति दुष्टं तव वीरत्वमित्याशयेन संबोधयन्ति । हे वीरेति । निवृत्तिपक्षे तथा दिनस्य तत्स्थानं यस्य विनिकस्य परिक्षये वनरुहस्य यथोक्तपद्मस्याननं सत्तास्फूर्तिप्रदं चैतन्यं नीलकुन्तलस्थानीयैः घटपटादिप्रत्ययैरावृतं विभूतं तथा धनरजस्वलं वित्ताद्यर्थं विक्षेपोत्पादकेन रजोगुणेनावृतं पुनः पुनस्तत्तज्जन्म सुदर्शयन्नोऽस्माकं मनसि स्मरवित्तं यच्छसि स्मे त्वाश्चर्य्ये यतस्त्वं वीरः अविवेकादिसमस्तशत्रुपराजयसमर्थ इत्याशयेन संबोधयन्ति हे वीरेति ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विहारानन्तरं सायं कालेऽपि त्वां दृष्ट्वा विहारेच्छास्माकं जायते विहारयोग्येऽस्मिन् समये तु वयमत्यातुरा अतश्चरणपङ्कजं मस्तकेषु अर्पयेत्याहुरन्या । दिनपरिक्षये सायं काले नीलकुन्तलैः

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ॥
चरणपङ्कजं शन्तमं च ते रमण ! नः स्तनेष्वर्पयाधिहन् ! ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भ्रमरमालावत्परितः स्थितैरावृतं घनरजोभिः सघनैर्गोरजोभिश्छुरितम् वनरुहाननं पद्मतुल्यमाननम् बिभ्रत् तन्नाननं मुहुर्दर्शयन् नो मनसि स्मरं कामं यच्छसि अर्पयसि इदानीं तु निर्जने वने रात्र्यां त्वदर्थमस्यौत्सुक्यमस्माकमस्ति ॥ १२ ॥

भाषा टीका ।

हे वीर ! जा समये संध्या होवै ता समय कारे घुंघुरारे वाल जामें शोभित गौअन की धूर रजते शोभित आप के मुख चंद्रको हमें दिखाय हमारी कामं चेष्टा को बढावो हो ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽधुना कपटं विहायैवं कुर्विति प्रार्थयन्ति श्लोकद्वयेन । प्रणतकामदमिति । हे आधिहन् हे रमण । पद्मजेन ब्रह्मणार्चितं आपदि ध्येयं ध्यानमात्रेणापन्निवर्त्तकं शन्तमं च सेवासमयेऽपि सुखतमन्ते चरणपङ्कजं कामतापशान्तये नस्तनेष्वर्पयेति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं गीतेन जातस्मरक्षोभात् पूर्वतोविशेषेण वर्णयन्त्यः प्रार्थितमपि वैयर्थ्यात् पुनः प्रार्थयन्ते । प्रणतेति द्वाभ्याम् । प्रणतानां कामदम् अभीष्टदमिति सर्वार्थप्रदत्वमुक्तम् अत एव पद्मजेनार्चितमिति परमैश्वर्यं धरणिं भूतलं सुन्दरासाधारणलक्षणैर्ध्वजादिभिः प्रेमभक्तिप्रवर्त्तनेन च मण्डयतीति तथा तत् इति सौन्दर्यं कृपालुत्वं च ध्येयमापदीति भक्तिविघ्नादिसर्वापन्निवर्त्तकत्वम् अनेन भक्तिप्रवर्त्तनमेव दृढीकृतम् एवं सर्वार्थसाधनत्वं पूर्ववत् पङ्कजरूपकेण सूचितं दुःखादिध्वंसनेन कामदत्वेन च दर्शितं स्वतः परमफलत्वं चाहुः । शन्तमंचेति । प्राय एतदात्मोद्देशेन तद्द्वयानुसारेण संबोधनद्वयं विवेचनीयम् अतोऽस्माकं विरहादिव्यथां नाशय विचित्रक्रीडादिना सुखंच संपादय तथा आत्मानं चार्पयेति भावः अन्यैर्व्याख्यातं यद्वा प्रणतानां भक्तानां ब्रह्मादीनां कामदं पद्मजया लक्ष्म्या अर्चितमिति परमसौभाग्यनिधित्वं धरणिं लक्ष्मीद्वितीयां निजप्रियां विचित्रक्रीडया स्तनोपर्य्यवस्थित्या च मण्डयतीति यद्वा धरण्या मण्डनं किंच कुङ्कुमादिना चित्रादिनिर्माणेन चालङ्कारो यस्य इति प्रियजनपरवशत्वं रसिकत्वं च एवं लक्ष्मीतोऽपि धरण्यां प्रेमाधिक्यं ध्वनितः स च श्रीवाराहपुराणादौ प्रसिद्ध एव ध्येयमापदीति । विरहदुःखमोचकत्वं शन्तमं परमसुखप्रदं सुखात्मकं च एवं पक्षद्वयेऽप्येषां यथोत्तरं श्रैष्ठ्यं ते त्वदीयानां नः अतोऽर्पणं युक्तमेव किंच हे रमणेति तत्रापि तव रतिशीलत्वादिस्वर्यः । आधिहन्निति अन्यथा अस्माकमन्त्यदशापत्त्या तवाधिहन्तृत्वकीर्त्तेर्लोपः स्यात् इति भावः । अस्यैव विस्तरोऽग्रे श्रीमदक्रूरमनोरथे यदर्चितमिति तत्र प्रणतेत्यस्य विस्तरः ब्रह्मेत्यादि ध्येयमित्यस्य मुनिभिरिति धरणीत्यस्य सात्वतैरिति गोचारणायेति च शन्तममित्यस्य यद्गोपिकानामिति एवं पूर्वमुक्तात् पापहन्तृत्वादिमाहात्म्यादत्र कामदत्वादिना विशेष ऊह्यः तत्र च पूर्वद्वितीयपद्ये निजदैन्यनिवेदनपूर्वकमेव प्रार्थनम् अधुना च गीतक्रमेण श्रीमत्प्रियतमपादपङ्कजे मनोऽभिनिवेशविशेषात् तस्यैव सुखाद्यपेक्षा केवलं तदेकवर्णनेनैवेति भेदः किंच । पूर्वतत्प्रयोजनं साक्षादेवोक्तं इच्छथ कृन्धीति अत्रच आधिहन्निति संबोधनद्वारा परोक्षवादेनैव तस्य चोत्कर्षः भङ्ग्याप्रोक्तत्वात् परोक्षेच मम प्रियमिति श्रीभगवदुक्तेः तेनच पूर्वं स्मरतेरेव साधुनाचारोपमानसपीडया एव नाश इत्येषा दिक् ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं प्रहसितमित्यादिभिस्तासामेव प्रेमोक्तिद्वारा पूर्वसंवलितः श्रीकृष्णस्य तासु पूर्वरागः श्रीमुनीन्द्रेण स्पष्टीकृतः तासु तदीयरागस्य ताभिरनुभूयमानतया वर्णितैव महारसावहत्वादिति ज्ञेयम् एवं तदनुरागे तस्यैव दोषं विन्यस्य तथैव तत्प्रार्थनाद्वयमुपसंहरन्त्यः स्वयं गीतेन जातस्मरक्षोभाः पुनः प्रार्थयन्ते । प्रणतेति द्वाभ्याम् । प्रणतानां नलकूवरनागतत्पत्न्यादीनामभीष्टदमिति सर्वार्थप्रदत्वमुक्तम् अत एव बालवत्सान् हृत्वा ज्ञाततत्त्वेन वन्द्यमानचरणः पथि वृद्धैरित्यनुसारान्नित्यमेवागच्छता वा विधिनसार्चितं इत्यस्य व्याख्यानुसारेण वा पद्मजेनार्चितमिति परमैश्वर्यं धरणिं भूतलं सुन्दरासाधारणलक्षणैर्ध्वजादिभिर्मण्डयतीति तथा तत् इति सौन्दर्यं कृपालुत्वं च ध्येयमापदीति इन्द्रकृतवृष्ट्यादावनुभवात्सर्वापन्निवर्त्तकत्वम् एवं सर्वार्थसाधकत्वमुक्त्वा स्वतः परमफलत्वमाहुः । शन्तमं चेति एवं दुःखहानिसुखावाप्तिहेतुत्वं यदुक्तं तदनुसार्येव संबोधनद्वयं विवेचनीयम् अतोऽस्माकं विरहादिव्यथां नाशय विचित्रक्रीडादिना सुखं च संपादयेति भावः ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

शन्तमं सुखतमम् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतोऽधुना कपटं विहाय संगतो भवेति प्रार्थयन्ते द्वाभ्याम् । हे रमण ! तव चरणपङ्कजमस्माकं स्तनेष्वर्पय निधाय कामाग्निं शमयेति भावः । तदनुगुणं संबोधयन्ति हे आधिहन्निति आधिर्मनःपीडा कथम्भूतं शन्तमं सेवासमये सुखतमम् आपदि ध्येयं च

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

धरण्या मण्डनमलङ्कारभूतं हस्तत्वमार्षं पद्मजेन ब्रह्मणार्चितं प्रणतानामभीष्टदश्च ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धरणिमण्डनं भूमिभूषणं सर्वापदि ध्येयं पद्मजार्चितं ब्रह्मणाराधितं शन्तमं सुखतमम् आधिहन्! मनोदुःखनाशन! ते चरणपङ्कजं नः स्तनेष्वर्पय निधेहीत्यन्वयः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अतो व्रजाद्गमनसमये पशुचारणजनितशिलतृणाङ्कुरलब्ध्यावसादचरणस्मरणदुःखस्य शान्तिर्विन्यस्तस्तनाधिकरणकतदीयस्पर्शेन भवतीति तथैव कर्तुमुचितम् एवमागमनसमयेऽपि वदनाम्बुजदर्शनकरणकमनोऽधिकरणकस्मरार्पणजनितदुःखं च नवीनाधरामृतदानेनापसरतीति च तथैव कर्तुमुचितमिति च दुःखद्वयस्य निर्वापणार्थमुपायद्वयं क्रमात् श्लोकद्वयेनाहुः । प्रणतकामदमिति द्वाभ्याम् हे रमण हे आधिहन् चरणपङ्कजं स्तनेषु अर्पय कीदृशं शन्तमं कल्याणतमं शशब्दोऽव्ययं शंयुरित्यादिदृष्टेः प्रणतानां कामदम् अभीष्टदम् इति इष्टं पद्मजेन ब्रह्मणार्चितम् इतिदुर्लभं धरणिमण्डनमितिकरुणाभकरन्दनिष्यन्दि आपदि ध्येयमिति सर्वापद्विनाशकम् ॥ १३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत उत्तमा अनन्यपूर्वावत् स्तनयोश्चरणधारणं प्रार्थयन्ति । प्रणतेति । अत एव न पौनरुक्त्यं परं पूर्वापेक्षया अत्र चरणमाहात्म्यमधिकं गुणाधायकमेतत् पूर्वं तु दोषनिवर्तकं हे रमण रतिकर्तः नः स्तनेषु चरणपङ्कजमर्पय प्रयोजनमाहुः । आधिहन्निति आर्तिहन् इति वा हृदयतापः चिन्ता च निवारणीये दृष्टोपकारेणैव तापो गमिष्यति अस्माभिर्हृदयेऽर्पितं न बहिः समायाति अतस्त्वया व हिःस्थापनार्थं चरणपङ्कजस्यापि भगवान् इव षड्गुणानाहुः । तत्र प्रथममैश्वर्यं प्रणतकामदमिति प्रकर्षेण येन ता अनन्यशरणाः तेषां कामदमभिलषितार्थदातृ ईश्वर एव तथाविधो भवति तत्रत्यः कामः स्तब्धैर्ग्रहीतुं न शक्यत इति प्रणतत्वमुक्तं पद्मजार्चितमिति धर्मरूपता निरूपिता ब्रह्मप्रार्थनयैवात्रागतमिति कीर्तिरूपतामाहुः । धरणिमण्डनमिति । धरण्या मण्डनमलङ्करणरूपं श्रीरूपं वा आपदि ध्येयं श्रीरूपं कीर्तिरूपं वा पङ्कजसाम्यात् रूपोत्कर्ष उक्तः शन्तमं कल्याणतमं ज्ञानरूपम् आर्तिहन्निति संबोधनात् ते चरणपङ्कजमिति संबन्धनिरूपणात् वैराग्ययुक्तं च रमणेऽभीष्टप्रापकः आर्तिहन्नित्यनिष्टनिवारकः अथवा यल्लोके पञ्चविधमुपकारं करोति तदस्मास्वेकमेव करोत्विति प्रार्थ्यते प्रणतासु कामं ददाति तत्पूर्वमुक्तं मनाले नः स्मरं वीर! यच्छसीति प्रकर्षेण नम्रेषु कामं द्यति खण्डयति पद्मजेन पद्मजया वा अर्चितम् ऐश्वर्यार्थं कामार्थं वा पद्मजेन अर्चितं तत्तुल्यार्थम् अन्यथा तानि चरणपङ्कजजन्म कथं ... धरण्यपि स्त्री अमलंकृता न भुज्यत इति तस्यां पदस्थापनं भगवदपेक्षयापि चरणौ महान् आपदि ध्यानमात्रेणैवापदं दूरीकरोतीति यथैतेषां सर्वोपकारकर्तृ तथास्माकमपि करोत्विति प्रार्थना अनेन सर्व एव सुरतबंधा आक्षिप्ताः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु यद्यहं सदा दुःखयाम्येवेति निश्चिनुध्वे तर्हि मया युष्माकमिति तत्कोपमाशङ्क्य हन्त हन्त स्वकर्मफलदुःखान्धाभिस्त्वय्यपि दोष आरोपित इत्यनुतप्य तं प्रसादयितुं सर्वसुखदत्वेन स्तुवन्त्यस्त्वय्यैवास्माकं प्रयोजनमिति द्योतयन्त्यः स्वदुःखोपशमनं प्रार्थयन्ते । प्रणतेति द्वाभ्याम् । प्रणतानामपराधीभूयापि नम्राणां कालियतत्पत्न्यादीनां कामदं पद्मजेन ब्रह्मणा स्वापराधोपशमनार्थमर्चितमतोऽस्माकमपराधः क्षम्यतामिति भावः । धरणिमण्डनमित्यस्मात् कुचानपि तेषु चरणार्पणेन मण्डयेति भावः । ध्येयमापदीति अनेन सर्वदुर्गाणि यूयमस्त्राहि... येति गर्गोक्तेरिति आपदोऽस्मांस्त्रायस्वेति भावः । सर्वत्र हेतुः । शन्तमं सर्वकल्याणरूपं सर्वसुखरूपञ्च । आधिहन्! आधिं हन्तुमित्यर्थः । नच स्तनेषु चरणार्पणे नव कोऽपि श्रमः प्रत्युत सुखमेवेत्याहुः । हे रमण! रिरंसोस्तव तेनैवाभीष्टसिद्धिर्भवि... नीति भावः ॥ १३ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तदेवं प्रहसितमित्यादिभिस्तासामेव प्रेमकिङ्करा पूर्वमवर्णितः श्रीकृष्णस्य तासु पूर्वानुरागः सूचितः तासुतदीयरस्यताभिरनुभूयमानतया वर्णनेनैव रसावहत्वादितिज्ञेयं तदेवं स्मरक्षोभवर्णनेनोद्दीपिततद्भावाः प्रार्थयन्ते प्रणतेति द्वाभ्याम् प्रणतानां नागपत्न्यादीनामभीष्टदम् इति सर्वार्थप्रदत्वं पद्मजेनार्चितमिति पारमैश्वर्यं तथा वत्सहरणप्रसङ्गे अथवा वन्द्यमानचरणः पथि वृद्धैरित्याद्यनुसारात् धरणिमण्डनमिति सौन्दर्यं कृपालुत्वं च ध्येयमापदीति आर्तिहरत्वं च एवं सर्वार्थसाधनमुक्त्वा स्वनः परमफलत्वमाहुः शन्तमंचेति एवं दुःखहानिसुखावाप्तिहेतुत्वं यदुक्तं तदनुसार्येव संबोधनद्वयम् आधिहन्! रमणेति च अतोऽस्माकं विरहादिव्यथां न ग्राय विचित्रक्रीडासुखं संपादयेति भावः ॥ १३॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं तदुद्भूतामेव स्वव्यथां निवेद्य तदुपशमाय प्रार्थयन्ति । प्रणतकामदमिति । हे रमणेति संबोधनेन स्वभावत एव रमणस्य तव रमणं भाविष्यत्येवेति वृथैवायं तवाग्रहः यद्वा रमणशीलस्यापि तव किमस्मदभाग्यादेव "राजन्कनकधाराभिस्त्वयि सर्वति नित्यदा। अभाग्यच्छत्रच्छन्नास्तान्मयि नायान्ति विन्दवः" इत्युक्तन्यायेन रमणवैमुख्यमेवमपि तव नान्याय्यं भगवतः सखीनामभाग्या नौचित्यात् अतो रमस्व तथा हे आधिहन्! आधिं मानसी व्यथा तथाच कृच्छ्रपीडानिवर्तकस्य तव

श्रीरामनारायणकृतभावभावविभाविका ।

तत्क्रीडाभावेव्रीडास्पदमेव यद्वा रमणेतिपदेनैश्वर्यधर्मयशःश्रीतिभगचतुष्टयेनाभ्युदयप्रदत्वमुक्तं आधिहन्निति ज्ञानवैराग्याभ्यामपवर्गप्रदत्वं तथाचार्थप्रदस्यानर्थमकं चिन्त्य पहत्वं धर्मप्रदस्य कामाग्नि दाहकत्वं कामप्रदस्य विरहस्वरूपाभेदस्यापि मोक्षाविर्भावकस्य स्वरूपातिरेकेण नाधिवर्धनं विरुद्धं तस्मात् रमणत्वेन रमणप्रवृत्त्यासुष्ठुरमणेनाधिहनना यादौ चरणपङ्कजं नःस्तनेष्वर्पय तेन हृच्छयाधिशमनं भवेत् यथा तत्र भगवद्वज्राङ्कुशवत्त्वात्सैष्टदत्वं सर्वानिष्टानिवर्त्तकत्वञ्च तथा तत्स्पर्शमेव तव चरणमिति भावः । तदेवाहुः । प्रणतकामदामिति । धर्मो दर्शितः तत्र धर्मो द्विविधः सकामो निष्कामश्च तयोः सकामस्य सर्वकामप्रदत्वं प्रसिद्धं भगवच्चरणमपि प्रणतानां सर्वकामदं उक्तञ्च किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने इति तथा आशाम हे यदि त आशिष ईश नान्य इतिच निष्कामस्तु हृदयशोधकतया कामनिवर्तकः भगवच्चरणं च प्रणतानां कामं द्यति खण्डयतीति तथा उक्तं च तथापि तत्परा राजन्नहि वाञ्छन्ति किञ्चनेति तथा —

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवमिति ॥

किञ्चसवच्चरणस्य कामप्रदानेऽपि तन्निवर्तकत्वं तदुक्तं भगवतैव —

न मय्यावेशितधियां कामःकामाय कल्पते
भर्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यत इति ॥

अनेनैव वैराग्यमपि ध्वनितं तथाच कामपूरकत्वेन कामपूरणपूरणद्वारैव तदुपशमनमप्युचितम् ऐश्वर्य्यं दर्शयन्ति । पद्मजार्चितमिति । पद्मजेन सर्वपरमेष्ठिना ब्रह्मणापि पूजितं तदा च ब्रह्मणा स्वतः पूर्णेनापि सर्वजनसुखार्थमेव दुःखस्य सत्त्वाधीनतया रजसा तन्निर्वाहमभिप्रेत्य पूजितमित्यस्माकमपि सुखदानमेव योग्यमितिभावः । यशोऽपि जनवृजिनवर्जनेन भवति अन्येषां मण्डनेन वा तत्राद्यमाहुः । ध्येयमापदीति । आपदि ध्येयं ध्यानमात्रेणापक्षिवात्वयं तथाच तद्ध्यायतां न विरहाद्यापद्योग्यैवेति भावः । द्वितीयमाहुः । धरणिमण्डनमिति । कतिचिज्जनमण्डनेन यशोविस्तारसम्भवे किमु वाच्यं धरणिमण्डनस्य, अत्र धरणिगतसर्वजनमण्डनमेव धरणिमण्डनत्वं सर्वोत्कर्षवत् । यद्वा असाधारणवज्राङ्कुशादिभिरङ्कैर्धरणिगतयावत्तन्मण्डनं त्वमनेन पृथिव्या श्रीकारितया निरतिशया श्रीरपि दर्शिता अन्यशोभकत्वेन श्रियोऽतिशयं द्योतयित्वा स्वरूपतः शोभनत्वेन श्रियमाहुः। पङ्कजमिति तत एव शोभनं तथाच सर्वश्रीकरस्य स्वतः श्रीमयस्य नः श्रीकरणमेवोचितं ज्ञानं फलेन द्योतयन्त्य आहुः । शन्तममिति । तथाच स्वयंशन्तमेन सर्वशङ्करेण चरणेन नस्तनशङ्करयोः शङ्करणीयमिति व्यञ्जना ॥ १३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु यद्यहं करुणारहितस्तर्ह्यलं मया युष्माकमिति तत्कोपमाशङ्क्याहुः। भगवन्न वयंत्वयि दोषमारोपयामःकिन्तु स्वमन्दभाग्यं वर्णयामो ऽतस्तव सङ्गमप्रतिबन्धकदोषनिरासाय त्वां प्रार्थयाम इत्याशयेनाहुः । प्रणतेति । ते तव चरणकमलं नः स्तनेष्वर्पय यद्यपि त्वदीयं चरणसरोजमन्तर्हृदयेऽस्माभिः स्थापयिषितं तथापि न तत्र स्थापयितुं शक्यमतस्तत्र त्वमेव स्थापय चरणस्यापि षड्विधैश्वर्यसम्पन्नत्वात्तत्स्थापनेनास्माकं सर्वं प्रयोजनं संस्थास्यतीत्याशयेन तद्वैभवप्रतिपादकानि विशेषणानि तत्र प्रकर्षेण नतानामनन्यशरणानां कामप्रदमभिलषितसमस्तैश्वर्य्यप्रदं पदं पद्मस्थानं स्तब्धैर्ग्रहीतुमशक्यमतः प्रणतेत्युक्तं पद्मजेन ब्रह्मणा पद्मजया लक्ष्म्या वार्चितमिति धर्माधारतोक्ता तथा धरण्या मण्डनमलङ्करणरूपमनेन यशोऽधिकरणता निरूपिता तथा आपदि ध्येयं भीप्रदानेनापन्निवर्तकमिति श्रियोऽधिकरणता कथिता शंतमं कल्याणतममिति वैराग्यज्ञानाश्रयता दर्शिता ततश्च हृदयस्थं कामाधिं नाशयेति ध्वनयन्त्यः सम्बोधयन्ति हे आधिहन्निति तन्निवृत्तिरपि नैतावता किन्तु रमणे कृते इत्याशयेनाहुः। हे रमणेति । एवञ्चान्येषां तत्तत्फलप्रदमप्यस्माकं यथोक्तफलमात्रप्रदमास्त्विभावः।यद्वा चरणपङ्कजमस्माकं स्तनेषु अर्पय एतावतैवास्माकं मनोरथपूर्तिर्भविष्यति तस्य सर्वफलप्रदत्वादित्याशयेनाहुः । पद्मजेति एवं ब्रह्मलक्ष्म्यादिभिरपि तदेवाऽर्चितं किञ्च धरणिमण्डनमतोऽस्मत्स्तनमण्डनं कथं न भविष्यतीति भावः किञ्च ध्यानमात्रेण पापनिवर्तकं स्पर्शेन त्वापन्नाशोऽपि भविष्यतीतिभावः।किञ्च शन्तमं मोक्षपर्य्यन्तशान्तिसम्पादकं ततश्च तत्स्पर्शेनास्माकं मोक्षोऽपि नालभ्य इति भावः । नचास्ति भगवतोऽस्माकम्वाऽनेन कश्चिद्दोष इत्याशयेनाहुः हे रमणेति । किञ्च समस्ताधिनाशाय कृतावतारस्य तवावश्यं स्वीयानामस्माकमाधिनाशः कर्तव्य इत्याशयेनाहुः । हे आधिहन्निति अनभिज्ञापक्षे अतः सम्प्रति कपटं विहायैवङ्कुर्विति प्रार्थ्यमावेदयन्ति।प्रणतेति।प्रणतानां नागपत्न्यादीनां कामदं सर्वार्थप्रदम् अतएववत्साहरणान्ते पद्मजेनार्चितं धरणिं ध्वजादिचिन्हैर्मण्डयतीति तथ अनेन कृपालुत्वं सौन्दर्य्यातिशयत्वञ्च दर्शितं तथापदि ध्येयं महेन्द्रकृतवातवर्षाद्यापन्निवर्तकत्वेनानुभूतम् एवंसुखसाधनत्वमभिधाय सुखरूपत्वमाहुः । शन्तममिति । एतावताप्यस्मदाधिनाशे तव किञ्चिद्यत इत्याशयेनाहुः हे आधिहन् ! तत्र तदर्पणयोग्यश्च त्वमित्याशयेनाहुः । हे रमणेति यद्वा तेन तवापि सुखमेव भविष्यत्यतो न वयमायासकरे कर्मणि त्वां प्रेरयामः त्वन्तु स्वार्थाऽविरुद्धमप्यस्मत्प्रयोजनं न सम्पादयस्यत्यन्तमाश्चर्य्यमिति ध्वनयन्त्यः सम्बोधयन्ति । हे रमणेति । मानिनीपक्षे ननु युष्मद्दर्शनान्मम मनसि कामोद्दीपने तच्छान्त्युपायः को वा भवतीभिर्वाच्योऽङ्गीकृत इति चेत्तत्राहुः । चरणपङ्कजं स्वीयं नः स्तनेष्वर्पय तेन च स्वकामाधि नाशयेत्याशयेनाहुः।हे आधिहन् यत एव तावतैव रतिसुखमवाप्स्यसीत्याशयेनाहुः।हे रमणेति।नचैतावतास्माकं मानहानिस्तव पादपद्मस्य सर्वकामप्रदत्वात्सर्वैरादृतत्वाच्चेत्याशयेनाहुः । प्रणतेत्यादि निवृत्तिपक्षे तस्मात्स्वात्ममतस्य जीवात्मनो यथोक्तसंसृतिप्रवाहोपशमार्थं स्वचरणसरोजं नः स्तनेषु कर्मोपासनापरभागेषु अर्पय ते तादृशावेद्भागाः भगवच्चरणारविन्दार्चनध्यानपरा इत्यधिकारिचेतस्याविर्भाव्य ततश्च तदर्चनध्यानपरस्य तस्य सर्वं सेत्स्यतीत्याशयेनाहुः । प्रणतेति।अत एव ब्रह्मादिभिरार्चितं भक्तपारवश्यमाहुः । धरणीति । स्वीकृतरामकृष्णाद्यवतारस्य तत्आपदि गजेन्द्रादिभिर्ध्येयं शन्तमम् आराधितं ज्ञानोदयद्वारा मोक्षसुखप्रदं जीवरूपेण संसरणमीश्वररूपेण नित्यमुक्ततया वस्थानमाराध्याराधकाभावश्चेत्येतत्सर्वं तव लीलामात्रं नतु वस्तुत इत्याशयेनाहुः । हे रमणेति ॥ १३ ॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर ! नस्तेऽधरामृतम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतोऽधुना चरणपङ्कजं नोऽस्माकं स्तनेषु आधिहन ! हे रमण अर्पय कथंभूतं शन्तमं प्राप्तकाले निरतिशयानन्दजनकम् आपदि ध्येयं स्मरणमात्रेणापन्नाशकम् धरणिमण्डनं धरण्याः भूषणम् इस्वत्वमार्षं प्रणतानां सर्वकामपूरकम् पद्मजो ब्रह्मा तदर्चितम् ब्रह्मादिपूज्यमित्यर्थः ॥ १३ ॥

भाषा टीका

हे रमण ! शरणागत पुरुषों के मनोरथ पूर्ण करवे वारो ब्रह्मा ते पूजित पृथिवी को शोभितक करवे वारो आपत्के समय ध्यान करवे योग्य कल्याणदायक ऐसो जो आपको चरण कमल ताको हे दुःखनाशक ! हमारे स्तनों पै अर्पणकरो ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि च हे वीर ! तेऽधरामृतं नो वितर देहि स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितमिति नादामृतवासितमिति भावः इतररागविस्मारणं नृणामितरेषु सार्वभौमादिसुखेषु रागमिच्छां विस्मारयति विलापयतीति तथा तत् ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

सुरतं सुशोभनं रतं रतिः प्रेम किंवा सम्भोगसुखं वर्द्धयतीति तथा तत् इति मुहुर्लब्धेऽपि तस्मिन्नतृप्तिः सूचिता निजधाष्टर्यादिकञ्च परिहृतं शोकः अकृतार्थत्वादिना विरहेण वा तं नाशयतीति तथा तदिति अन्यथा शोकनाशो न भवतीति सूचितं तथा स्वरितेति गुणविशेषेण परममादकत्वमुक्तं तस्मादस्य जगदुन्मादकताहेतुसम्पर्कमात्रकत्वात् इति तेनैव सर्वं दुःखविस्मृतिर्नित्वन्यथेति ध्वनितं यद्वा पूर्वोक्तवेणुभाग्यभराभिप्रायेण तत्सुष्टुचुम्बिततया परममधुरत्वं सौभाग्यभरप्रदत्वं च चुम्बितमिति भोगानाचरणेन तत्त्वीणतापि परिहृता नृणां यानि इतराणि अधरामृतव्यतिरिक्तानि सार्वभौमादिमोक्षान्तसुखानि तेषु रागविस्मारणमितिपरममोहनत्वम् एवन्देवभोग्यादमृतात् मोक्षाख्याद् पि वैशिष्टचं दर्शितं तथा श्रवणादपि भक्तिप्रकारेभ्योऽप्यूह्यम् एवं तद्दर्शनसुखादपि वैशिष्ट्यमूह्यं तादृशप्रियजनैकप्राप्यत्वात् एवंविशेषणनामेषां यथोत्तरं क्रमेण हेतुमत्तोह्या नच तवादेयं किञ्चिदस्तीत्याशयेनाहुः वीर हे दानशूरेति यद्वा श्लेषेण कन्दर्पयुद्धवीरेति तद्युक्तमेवेति भावः । वीरेति किशोरं प्रति सम्बोधनं मध्यदेशरीत्यैतेन च रसिकत्वमेव बोध्यते अत एव तस्य पौनःपुन्यं तथापि सङ्गत्यनुसारेणार्थभेदो लिख्यते इतिदिक् अन्यत्तैर्व्याख्यातं यद्वा स्वरितेन षड्जादिस्वरं प्रापितेन वेणुना नृणामिति किमुत नारीणामित्यर्थः तेषां तत्प्राप्तिस्ताम्बूलचर्वितादिसंबन्धेन कथञ्चिदूह्या यद्वा नृणां मध्ये वीरेत्यन्वयः अर्थः स एव इतरेति तस्मिन् प्राप्ते पुनरन्यत्किञ्चिन्नेष्टव्यमिति प्रार्थनाचातुर्यं यद्वा इतरत् ततोऽन्यत् सर्वं रागेण स्वविषयकरसोत्पादनेन विस्मारयतीति सदा तदेकप्राप्त्यर्थं च तत्स्वभाव एवोक्तः एवम्पूर्वतोऽत्र विशेषः स्पष्ट एव अत एव पूर्वं शीधुनीति अत्र चामृतमिति ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अधरामृतम् अधर एवामृतं तत् सुरतं प्रेमविशेषमयसम्भोगेच्छां वर्धयतीति तथा तत् इति मध्वादिवन्मादकत्वमुक्त्वा मुहुर्लब्धेऽपि तस्मिन्नतृप्तिः सूचिता निजधाष्टर्यादिकं च परिहृतं शोकं त्वदप्राप्तिदुःखस्यानुभवमपि नाशयति विस्मारयतीति तथा तदिति चोक्तम् इतररागविस्मारणं तु नृणामपि किमुत नारीणां तास्वप्यस्माकं तु तद्विस्मारणमिति किं वाच्यं शाश्वतत्स्पृहया तदत्यन्ताभावस्यापि सम्पादकमित्यर्थः । तदेव प्रमाणयन्ति । स्वरितेतिविणीः पुम्भावेन व्यातत्वात् तेषां तत्प्राप्तिस्ताम्बूलचर्वितादिसम्बन्धेन तदीयरसे तदुपचारात् क्रमतस्त्रयेण स्वेच्छावर्धनदुःखान्तरस्फूर्तिनाशनविषयान्तरविस्मारणान्युक्त्वा तस्य परमपुरुषार्थत्वं दर्शितम् एवमर्थत्रयमेव पूर्वपद्येऽपि दर्शितमित्यैकार्थ्यं च ज्ञेयं नच तवादेयं किञ्चिदस्तीत्याशयेनाहुः वीर हे दानशूरेति अन्यत्तैः अत्र नादामृतवासितमिति वेणुद्वारा सुष्ठु पायकमित्यर्थः इदं च लोभविशेषोत्पादकतागमकं सुगायनस्य श्रोतृषु सुखादिना स्पर्शादीच्छाजनकत्वात् तत्र चामृतस्याप्यमृतवासितत्वं गन्धयुक्ति न्यायेन परस्परं किञ्चिद्वैलक्षण्यमिति ज्ञेयम् यद्वा स्वरितेन सञ्जातषड्जादिस्वरेण वेणुना चुम्बितमिति तस्य मादकत्वमेव दर्शितं वेणोस्तच्चुम्बनं गानपौनःपुन्येन वैयात्याभिव्यक्तेस्तत्सम्पर्कजस्वरेणापि जगतोऽप्युन्मादकत्वाभिव्यक्तेश्च ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

स्वरितवेणुना षड्जादिस्वरसंयुक्तवेणुना ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा हे वीर ! तवाधरामृतं वितर देहि कथंभूतं नृणामितरेषु सार्वभौमादिषु सुखेषु रागम् इच्छां विस्मारयतिलोपयतीति तथा स्वरितेन नादितेन वेणुना स्वरयुक्तवेणुना सुष्ठु यथा तथा चुम्बितं नादामृतवासितमित्यर्थः । शोकनाशनं तापत्रयदुःखनाशकम् उत्तरोत्तरं रतिवर्द्धकं च ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्तनतटेषु चरणार्पणात्कुटुज्वलितकामाग्निज्वालाशमनाय तवाधरामृतं पिपासुभ्यो ऽस्मभ्यं देहीत्याहुः । सुरतेति । सुरतं ग्राम्यधर्मः स्वरितवेणुना स्वरयुक्तवेणुना ध्वनितस्य इतरेषां रसानामास्वादनसुखं विस्मारयतीति इतररागविस्मारणम् इतरेषु मधुरेषु वस्तुषु रागं स्नेहं विस्मारयतीति इतररागविस्मारणं वा वितर देहि "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्,,मिति हलायुधः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधर एवामृतं नृणामपि ताम्बूलचर्वितादि किमुत नारीणां तत्र अधरतदीयरसयोरभेदोपचारः ॥ १४—१७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

दुःखान्तरनाशायोपायान्तरमाहुः। सुरतेत्यादि । हे वीर । ते त अधरामृतं वितर कीदृशं सुरतं प्रेम तद्वर्धनं यतः शोकनाशनं ननु तद्वेणुनैव पीतमितिचेन्न तेन सुष्ठु चुम्बितमेव नतु सम्यक्पीतं ननूच्छिष्टं पातुं न युज्यत इतिचेत्तत्राहुः । इतररागविस्मारणं परमरसायनमौषधं देहि तथा विचारः क्रियते मध्वादिवत् इति चलसि यद्व्रजादित्यादि दिनपरिक्षय इत्यादि द्वाभ्यां श्लोकाभ्यां प्रतिपादितदुःखद्वयशान्त्युपायत्वेन कथितयोः स्तनाधिकरणकचरणाधरामृतवितरणयोः कृणु कुचेषु कृन्धि हृच्छयमिति अधरसीधुनाप्यायय इत्याभ्यां वा सह न पौनरुक्त्यम् ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तदनन्तरं तत उत्तमाः प्रार्थयन्ते । सुरतेति । अधरामृतं वितरेति अत्राप्यधरामृतं गुणाधायकम् एतस्य चतुर्गुणत्वमेव वि रहि तं ज्ञानवैराग्ययोरत्रानुपयोगात् तस्यैश्वर्यमाह । सुरतवर्धनमिति । गोपिकासु परिच्छिन्नः कामः अपरिच्छिन्नेन सह संयोगे क्षिप्तो भवति यथा रसाः क्षुदुद्बोधका भवन्ति तथायं रसः कामोद्बोधकः किंच न केवलमयं काममेव पोषयति किंतु सर्वानेवान्तःकरणदोषान् निवर्तयति अतः शोकनाशकत्वं ज्ञानवैराग्यरूपता च निरूपिता ऐश्वर्यधर्मरूपता च यशो रूपतामाह स्वरितो नादयुक्तो यो वेणुः तेन सुष्ठु चुम्बितं यशो हि नादैः कीर्त्यते वेणुश्च परमभक्त इति तेनापि चुम्बितमेव नतु पीतमितररागविस्मारणमिति श्रियो रूपं साहि सर्वं विस्मारयतीति स्वतः पुरुषार्थत्वेन प्रमेयबलमुक्तं पूर्वेण प्रमाणबलं शोकनाशनमिति फलबलं सुरतवर्धनमिति साधनबलम् एवं चतुर्विधपुरुषार्थमिदं स्वतः पुरुषार्थरूपं नृणामस्माकमधिकारिणां दुर्लभपुरुषार्थानां वा यद्यपीदं देयं न भवति तथापि भितरगुणेन दातुं शक्यत इति वितरेत्युक्तं वीरेति संबोधनात् शौर्येऽन्यथा संभवतीति निरूपितम् ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च । भो धन्वन्तरिप्रतिम ! भिषक्शिरोमणे कामरोगमूर्च्छिताभ्यो ऽस्मभ्यं किमप्यौषधं देहीत्याहुः । सुरतवर्धनमिति । पुष्टिकरत्वं शोकनाशनमिति पीडाहरत्वं तस्योक्तम् । नच तदपि महार्घं मूल्यं विनैव कथं देयमिति वाच्यं दानवीरेण त्वया तदपि निष्क्रयाय निष्प्राणायापि सप्राणीकर्तुं विनैव मूल्यं दीयत एवेत्याहुः । स्वरितेन नादितेन वेणुना कीचकेनापि सुष्ठु सम्यक्तया चुम्बितं स्वादितम् । ननु धनजनकुटुम्बाद्यासक्तिरेवात्र कुपथ्यं तद्धि जनयितव्य दीयते तत्राहुः । इतररागविस्मारणम् इतरवस्तुष्वेतदेव रागमासक्तिं विस्मारयतीत्यद्भुतमौषधमिदं यत् कुपथ्यान्निवर्त्तयतीत्यस्माभिरनुभूयैव दृष्टमिति भावः । नृणां मनुष्यजातिस्त्रीणां वितर देहि हे वीर ! दानवीर दयावीरेति वा ॥ १४ ॥

केनाचित् कृता विशुद्धरसदीपिका ।

सुरतेति । अधर एवामृतम् अधरसम्बन्धिनममृतं यस्मादिति वा सुरतं प्रेमविशेषसंभोगेच्छां वर्धयतीतितथा तव इति मुहुर्लब्धेऽप्यतृप्तिः सूचिता शोकं त्वदप्राप्तिदुःखानुभवं नाशयतीति तथा तत् इतररागविस्मारणं नृणामिति किंमुत नारीणामित्यर्थः । तदेव प्रमाणयन्ति । स्वरितेति । वेणुनेति पुंजातित्वाभिप्रायेण यच्चा वमित्यमृतात्मकं बीजम् अमृतं च परमानन्दः इरिति कामसुखं वश्च इश्च ये आत्मकामसुखे अणू यस्मादसौ वेणुः सर्वतः परमसुखदेनेत्यर्थः । "वेति ब्रह्मसुखं विद्यादिकामसुखमुच्यते । तावेवाणूतमौ यस्मात् स वेणुरिति कथ्यते,, सुष्ठु चुम्बितमिति परमास्वादनयत्वम् ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

चरणस्तनार्पणेनाधिनिवृत्तिं संप्रार्थ्य परमसुखकरमनोरथान्तरमाहुः सुरतवर्धनमितिहे वीरेति ऽधरामृतं नोऽस्मान् प्रति वितर ते तवाधरबिम्बे यदमृतामित्यत्र ते शब्देन वैलक्षण्यद्योतनं नहि सर्वत्र बिम्बरसः नवा सर्वाधरेष्वमृतं तथात्वे स्वाधरामृततृप्तानां प्रार्थनैव न स्यात् न इत्यधिकारकथनं कामाग्निदग्धानामेव तदमृतदानपात्रत्वं नान्येषां वीरेति सम्बोधनेन तु हे रतिदानशूर इति युद्धकुशलेति नहि वीरस्य तव कामस्यैव विशेषत हरणं युक्तमपितु तदुभेषजामृतस्यापि तदमृतमपि नोऽधिकारकमित्यत्र हेतुगर्भं विशेषणं सुरतवर्द्धनमिति । सुरतानामेव वर्द्धनं विलक्षणसुखदानेन महत्त्वद्योतकं सुरतसम्भोगस्य वर्द्धनं वा यथा रसायनादिपानेन सम्भोज्यरसास्वादरुच्यभिवृद्धिः मधुपानेन च प्रकृतजनलौकिकसम्भोगरसाभिवृद्धिस्तथा परमरसायनरूपालौकिकाधरमधूकमाध्वीमधुपानस्य त्वदधरप्रेममयसुरतसम्भोगवर्द्धकत्वं यथा यथाधरामृतपानं जायते तथा तथा मदनमदोन्मदतया सुरतसम्भोगरसो वर्द्धते इति भावः तथा शोकनाशनम् अन्यानौचिकित्स्यस्यापि त्वद्विरहशोकस्य नाशनम् उभयत्रमानमाहुःस्वरितवेणुना सुष्ठु चुम्बितमिति तथाचउपमानन्तःशून्यकठोरग्रन्थिवंशवंशोत्पन्नस्वपरिच्छिन्नशुष्कदग्धविद्धनीरसवेणोः सुमधुरस्वरेणामृताभिवर्षकत्वं त्वदधरामृतसुस्तुचुम्बननिमित्तमेव किमुवाच्यं वेणोस्तद्वत्सुखमापूर्य यद्धि प्रसरितनादात्मकत्वदधरामृतकणपुटास्वादनमात्रेण नःपूर्णसिद्धसुरतत्वस्याप्यागमनोत्साहात्मनाभिवृद्धिस्तद्वैसुख्यशोकनाशश्च जातः किंभूतं तत् इतररागविस्मारणं नृणामिति नृणामप्यमृतमपि संभाव-

श्रीरामनारायणकृतभावभावविभाविका ।

नामात्रेणतरेषां सार्वभौमादिस्थानगुणत्वनास्वादितानां ब्रह्मसुखपर्य्यन्तानां यो रागोऽभिलाषस्तद्विस्मारणं किं वाच्यं नारीणामनुगतरसानां तदुक्तमभियुक्तैः

अद्वैतवीथीपथिकैरुपास्याः स्वाराज्यसिंहासनलब्धदीक्षाः ।
शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेनेति ॥

किं चात्र श्रुतिरूपा गोप्यः सच्चिदानन्दभगवदधरामृतस्यापि तदात्मकत्वं भगवत्त्वं च वर्णयन्त्यस्तदात्मकत्वात्तत्प्रार्थयन्तीति फलांशोऽपि नानन्त्यत्वक्षतिः । तत्राधरामृतमित्यमृतशब्दस्य तत्स्वरूपवाचिनः कालादिपरिच्छेदरहितसच्चित्सुखघनस्वरूपद्योतकत्वम् । सुरतवर्द्धनमिति । सुरतानां वर्द्धनं धर्मद्वारेश्वरेण भवतीति धर्मैश्वर्ययोः कथनं शोकनाशनं "तरति शोकमात्मविदि"ति श्रुत्या ज्ञानेनेति ज्ञाननिर्देशः स्वरितेत्यादिना वेणुस्वरद्वारा विख्यातिगुत्पत्त्या यशोनिरूपणं स्वाश्रिया इतररागविस्मारकत्वोत्पत्त्या श्रीविरागस्य निरूपणं यद्वा ज्ञानस्यैव परमपुरुषार्थरूपतया भगवत्स्वरूपजिज्ञासुजनसेव्यत्वेन वैराग्यस्य च तदन्तरङ्गत्वेन तयोरेवोक्तिः तत्र ज्ञानस्याप्यधरानिःसृतत्वममृतत्वं चाधररसस्यापि उत्कर्षज्ञानेनैव त्युपदर्शनाद्दर्शने तदभावात् ज्ञानस्याप्यधरानिष्ठसुरतवर्द्धनत्वं तस्यैव उक्तश्रुत्या शोकनाशकत्वं तस्यैव स्वरितेत्यादिना शब्दब्रह्मात्मकवेणुसम्बन्धेनानुश्रावकत्वसाम्यमितरेत्यादिना अतान्तरसतत्त्वरूपज्ञानतदङ्गवैराग्ययोः साम्यसूचनम् ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

इदन्तु स्वदोषनिवृत्त्यर्थमस्माभिः प्रार्थितं त्वं प्रसन्नश्चेत्तर्हि मुख्यमस्मदीयं प्रार्थनीयं श्रृण्वित्याशयेनाहुः । सुरतेति । हे वीर ! स्वधराधरामृतं वितर देहि ननु अनेन किम्भविष्यतीति चेत्तत्राहुः सुरतेति । यथा बहुभोजनानुकूलाक्षुत्तत्कारणरसेनोद्बोध्यते तथा परिच्छिन्नकामेन त्वया सम्भोगयोग्यतासिद्ध्यर्थं परिच्छिन्नत्यास्मत्कामस्य वर्धनं तत्रापि न लौकिकसाम्यमित्याशयेनाहुः । शोकस्य नाशनं मोक्षप्रदमपि लौकिकं नैव तदन्यत् प्रत्युत शोकोत्पादकत्वात् किञ्च स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितं परमभक्तेन वेणुना लोकोत्तरमाहात्म्यवत्त्वेन गीतं ब्रह्मलोकपर्य्यन्तं ख्यातकीर्त्तीत्यर्थः अत एव नृणामपि इतरेषु सार्वभौमादिसुखेषु रागमिच्छां विस्मारयति विलोपयति तथा तत्र किमुत वक्तव्यमस्माकमतस्तत्तेऽस्माकमपेक्षितत्वादवश्यं देहीत्यर्थः । यद्यपीदमल्पं वस्तु तथापि दानशूराणां किमप्यदेयं न भवतीत्याशयेन सम्बोधयन्ति । हे वीरेति । यद्वा नृणां स्वरितवेणुना चुम्बितं सततच्छिद्रद्वारा नादरूपेण निःसृतं सत्स्य कर्णद्वारा हृदये प्रविष्टं सत् इतररागविस्मारणं स्वरितवेणुरूपेण परिणतेनान्तःकरणेन चुम्बितं स ददाति वाऽस्माकन्तु साक्षाद्ग्रहणेऽधिकारात् साक्षादेव हि यतः साक्षादेव पीतं सदस्माकं सुरतवर्द्धनं शोकनाशनञ्च भविष्यतीत्यर्थः अनभिज्ञापक्षे हे वीर ! यदि त्वं स्मरयुद्धे कातरस्तर्हि स्तनेषु चरणाम्बुजमर्पय यदि च सुरतसमरप्रतिभटप्रियजनविजयसमर्थस्तर्ह्यधरामृतं देहीति भावः । ननु वस्तमेव पूर्वं किमिति पुनस्तदेव प्रार्थ्यत इत्याशङ्क्योक्तं सुरतस्य प्रेमरसस्य सम्भोगेच्छां वर्द्धयतीति तत् अनेन तस्य सर्वदिवन्मादकतोक्ता तत्र तस्य भावश्च दर्शितः अत एतत्त्वद्विरहादिजनितशोकस्य नाशनं तत्रापि स्वरितवेणुना सुष्ठु चुम्बितं नादामृतवासितमिति भावः । ननु लोकद्वयनाशनिबन्धनशोकोत्पादकत्वात्कथं सर्वथाशोकनाशनमित्युक्तमित्याशङ्क्योक्तम् इतरेषु लोकद्वयभोग्येषु रागं विस्मारयतीति एवञ्च निमित्तापायेऽपि नैमित्तिकस्यापायइति भावः तत्रापि नृणामनधिकारिणामपि तथा रागोः सुरादिरागविस्मारकमसृतं जातं तद्वत् किमुत नारीणां तत्राप्यस्माकमिति भावः । यद्वा नृणां मध्ये तव यदेवम्विधमधरामृतं तन्नो देहीत्यर्थः । मानिनीपक्षे ननु नैतावतामन्तःकरणनिष्ठदाहस्य निवृत्तिर्भविष्यतीत्यतोऽन्यदपि किञ्चित्तदुपशामकमाज्ञायतामिति प्रार्थयन्तीमिवालक्ष्य विरहव्याकुलत्वादोषात्तिरोहितस्य भावः सर्वमप्यनुजानन्ति । सुरतेति । नोऽस्माकमधरामृतं ते तुभ्यं स्वस्मै वितर देहि तेन तव मनोरथपूर्तिर्भविष्यति यतः सुरतवर्द्धनं शोकस्यास्मदप्राप्तिहेतुकस्य नाशनम् अनुभूतपूर्वत्वादत्र संशयो न कर्तव्य इत्याशयेनाहुः । स्वरिते वेणुयस्य तेन त्वया पूर्वं सुष्ठु चुम्बितं किञ्चिदममृतस्वागतोचरमात्रानुभूतमाहात्म्यमित्याहुः । इतरेति । सर्वेषामपि नृणां योषिदधरामृतमितररागविस्मारकत्वेन प्रसिद्धम् असुराणां मोहिन्यधरामृतपानाशया क्षीराब्धिमन्थने त्वमृतविषयकरागस्य त्यक्तत्वादिति भावः । तथापि यथोक्तामृतास्वादनसमये प्रायो नायकस्य पराजयो भवत्यतस्त्वया तदानीं वीरता विधेया नोचेदुपहास्यो भविष्यसीति हितैषित्वात्प्रथममेव त्वां सूचयाम इत्याशयेन सम्बोधयन्ति । हे वीरेति । निवृत्तिपक्षे ततश्च भवदर्चनध्यानाभ्यां येषामन्तःकरणशुद्धिरैकाग्र्यञ्च प्राप्तं तेषां विवेकवैराग्यादिसम्पन्नानामधिकारिणां नृणां धारयत्यज्ञानादिकं सर्वमिति धरः सर्वाधिष्ठानभूतः परमात्मा तस्य सम्बोधने हे धर ! तेन यथोक्तस्य तव प्रतिपादिकानामस्माकमुपनिषदाममृतम् । अस्मच्छ्रवणजन्यज्ञानामृतं वितर करुणया देहि यतस्त्वमेव वीरः "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्युक्तत्वात्स्वैकप्रमाज्ञानामृतदातृत्वेन दानशूरस्तदन्तःकरणवृत्त्यारूढः सन् तदज्ञानादिसमस्तशत्रुध्वंसकत्वाद्युद्धशूरश्चेति "ददामि बुद्धियोगं तं येन मामुपयान्ति ते । तेषामेवानुकम्पार्थमहमज्ञानजं तमः" इत्यादिध्वनयन्त्यः हे वीरेति न च स्वस्य त्वदभिन्नज्ञानवतस्तत्प्रकाशिनिवृत्तिः शक्या प्रियो हि ज्ञानिनोऽत्यर्थमित्याशयेनाहुः । सुरतस्य परस्परप्रीतेर्वर्द्धनं नचैतदमृतं विना जीवस्य शोकनिवृत्तिः सम्भवतीत्याशयेनाहुः । शोकस्य तदुपलक्षितबन्धस्य नाशनं "तरति शोकमात्मवित् ब्रह्मविदाप्नोति परं तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये"ति श्रुतेः नन्वेदमस्मद्विचारमन्तरा लभ्यमित्याशयेनाहुः । स्वरिते ध्वनिव्यञ्जितो वेणुस्थानीयोपनिषत्कदम्बो येन तेन वेदान्ताभ्यासवता पुरुषेण सुष्ठु चुम्बितं सम्यगास्वादितं "वेदान्तविज्ञानसुनिश्चितार्था" इत्यादिश्रुतेः अनात्मपदार्थेषु राग एवानर्थकरः स च मिथ्याज्ञानविजृम्भितस्तत्त्वज्ञानामृतेन मिथ्याज्ञाननिवृत्त्या निवर्तत इत्याहुरितरानात्मपदार्थेषु रागस्तस्य नाशकं यं लब्ध्वा चापरं लाभमित्युक्तत्वात् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यास्तु अधरामृतपानेनैव कृतार्था भविष्याम इत्यागत्य

अटति यद्भवानह्नि काननं त्रुटि युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सम्पादयेत्याशयेनाहुः । सुरतवर्द्धनम् शोकनाशनं तापत्रयनाशनम् स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितं नादामृतवासितमिति भावः । इतरेषु ऐहिकामुष्मिकेषु सुखेषु रागमनुरागं विस्मारयति त्वदेकप्रवणं जनं करोतीति तथा तत् एवंभूतं तेऽधरामृतम् हे वीर ! वितर देहि ॥ १४ ॥

भाषा टीका ।

हे वीर ! रति प्रेम को बढायवे वारो शोक के नाश करवे वारो स्वर के सहित जो वंशी तासे चुंबित होवे वारो मनुष्यों की और सब इच्छान को भुलायवे वारो जो आप को अधरामृत ताको हमें प्रदान करो ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किंच क्षणमपि त्वददर्शने दुःखं दर्शने च सुखं दृष्ट्वा सर्वसङ्गपरित्यागेन यतय इव वयं त्वामुपागतास्त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे इति सकरुणमूचुः । अटतीति द्वयेन । यद्यदा भवान् काननं वृन्दावनं प्रत्यटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्द्धमपि युगवद्भवति एवम् दर्शने दुःखमुक्तं पुनश्च कथंचिद्दिनान्ते ते तव श्रीमन्मुखमुदुच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव निमेषमात्रमप्यन्तरमसह्यमिति दर्शने सुखमुक्तम् ॥ १५ ॥

श्रीसनातनगोस्वामिकृतबृहत्तोषिणी ।

काननमटतीति श्लेषेणारसज्ञत्वमभिप्रेतम् । अह्नीति तदानीं तत्र निजगमनाशक्तिरुक्ता युगायते दुःखमयस्य दुरतिक्रमत्वेन विशुद्धिमिव गतत्वात् इति परमं दुःखम् अतश्चिरमदर्शनदुःखमसह्यमिति सत्वरं दर्शनं देहीति भावः । अपश्यतामस्मादृशजनानां किंवा सर्वेषामपि व्रजजनानां किमुतास्माकमिति यद्वा तावकादूतिवत् त्वज्जनानां कुटिलाः कुन्तलाश्चूर्णकुन्तलाः उपरिभागे यस्मिन् तत् अत एव श्रीमुखं श्रीयुक्तं श्रीमुखं वेणुधारणादिना वा उदीक्षतां चेति चकारान्वयः अन्यत्तैर्व्याख्यातं यद्वा दुर्वितर्क्यप्रकृते कदापि त्वत्तोऽस्माकं न किंचित्सुखं जातं किन्त्वदर्शने दर्शनेऽपि दुःखमेवेत्याहुः । अटतीति पूर्वार्द्धेन । व्यक्तमेवादर्शने परमदुःखम् अतश्चिरमदर्शनदुःखं सोढुं न शक्नुमः सत्वरं तद्दर्शनं देहीति भावः । दर्शनेऽपि दुःखमाहुः । कुटिलेति । जडः अनभिज्ञः अनिमिषत्वाकरणात् पश्यत इति शेषः तादृशश्रीमुखस्य सद्दर्शनासंपत्त्या दुःखमेवार्थः अहो बतास्माकं परमदौर्भाग्यमिति भावः । तथापि तद्दर्शनोत्कण्ठा नितरां बोधितेव दर्शने निमिषमात्रव्यवधानासहिष्णुत्वात् यद्वा उदीक्षमाणानां सतां पक्ष्मकृत् कृती छेदने यः पक्ष्माणि कृन्तति अकारप्रश्लेषेण स एव अजडः रसज्ञः विद्वान् वा यद्वा दृशां पक्ष्मच्छिद् अजड एव उदीक्षताम् उच्चैः पश्यतु वयन्तु पक्ष्मच्छन्नदृशो जडाः साक्षादपि किं पश्याम इति भावः । एवमधिकदिदृक्षापि सिद्धैव ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

युगायते दुःखमयस्य दुरतिक्रमत्वेन इति परमदुःखम् अतश्चिरमदर्शनदुःखमसह्यमिति सत्वरं दर्शनं देहीति भावः । अपश्यतां सर्वेषामपि व्रजजनानां किमुतास्माकं कुटिलाः कुन्तलाश्चूर्णकुन्तला उपरि भागे यस्मिन् तत् अत एव श्रीयुक्तं मुखम् उदीक्षतां चेति चकारान्वयः भवत्वन्येषां पक्ष्मकृत् उदीक्षमाणानामपीत्याक्षेपार्थः । अन्यत्तैः यद्वा दुर्वितर्क्यप्रकृते कदापि त्वत्तोऽस्माकं न किंचित्सुखं जातं प्रत्युतादर्शनकाले दर्शनकालेऽपि दुःखमेवेत्याहुः । अटतीति पूर्वार्द्धेनादर्शनकाले दुःखमुक्तं दर्शनकालेऽपि दुःखमाहुः । कुटिलेति । जडः अनभिज्ञः अनिमिषत्वाकारणात् शपनीय इति शेषः । यद्वा उदीक्षमाणानां सतां पक्ष्मकृत् कृती छेदने यः पक्ष्माणि कृन्तति स एव अजडः रसज्ञः विद्वान् वा यद्वा स्वदृशां पक्ष्मच्छेदेवाजडः स एव च उदीक्षताम् उच्चैः पश्यतु वयं तु पक्ष्मच्छन्नदृशो जडाः साक्षादपि किं पश्याम इति भावः ॥ १५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कृदीति अविभक्तिनिर्देशः आर्षः चक्षूरूपविघाताज्जडः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किंच क्षणमपि त्वद्विश्लेषमसहमानाः सर्वसङ्गपरित्यागेन वयं यतय इव त्वामुपागतास्त्वं तु कथमस्मांस्त्यक्तुमुत्सहस इत्यभिप्रेत्याहुः द्वाभ्याम् । भवान् यत् यदा अह्नि वृन्दावनं प्रत्यटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्धमपि युगवद्भवत्येवमदर्शने दुःखमुक्तं पुनश्च कथंचिद्दिनान्ते तव कुटिलाः कुन्तलाः यस्मिंस्तच्छ्रीमन्मुखम् उत् उच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव निमेषमात्रमप्यसह्यमिति दर्शने सुखमुक्तम् ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किंच अहोरात्रमस्माकं त्वत्संचिन्तनमेवान्यो व्यापारो नेष्यते इत्याशयेनाहुः । अटतीति । यद्यदा यस्मिन्नह्नि काननमटति गच्छति तदा तस्मिन्नह्नि त्रुटिः त्रुटीति प्रातिपदिकग्रहणं तेन विभक्त्यन्तं पदं लक्षयति अणुद्वयलक्षणः परमाणुः त्रयः परमाणवस्त्रसरेणुः त्रयस्त्रसरेणवस्त्रुटिः सः कालावयवः नः त्वामपश्यतामस्माकं युगायते युगवदाचरति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दिव्यद्वादशसहस्रपरिमितसमानो वर्त्तते पक्ष्मनुदन्ति व्यथयन्तीति पक्ष्मनुदः तादृश्यो दृशो यासां तास्तथा तासामनिमिषनेत्राणां तव मुखमीक्षतामीक्षमाणानामस्माकं प्रवृत्तिर्जडवदचेतनवन्निश्चेष्टनमित्यर्थः । अनेन बहुकालोऽपि त्रुटितुल्य इति सूच्यते नुदृशामिति पाठे नुर्मानवस्य तव मुख — मीक्षतां दृशां पक्ष्म जडवदुत्क्षेपावक्षेपलक्षणप्रवृत्तिशून्यमित्यर्थः । अनेन मानवस्याप्यनिमिषत्वं सूच्यते ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

प्रातर्व्रजतो गमनात् सायंव्रजागमने च प्रकारभेदेन दुःखकारित्वादन्तरालकालेऽपि सुतरां दुःखद एव त्वमिति निरूपयन्त्य आहुः । अटतीत्यादि । हे रमणेति बोध्यं यत् यदा अह्नि दिने भवान् काननम् अटति तदा त्वामपश्यतां मद्विधानां त्रुटिः त्रुटिकालः युगमिवाचरति दुःखदत्वात् तदनन्तरं वा समये कदाचिद्दर्शनं भवति तत्रापि निमेषो युगायत इत्याशयेन विधिं प्रत्यसूययाहुः । कुटिलेत्यादि । ते तव श्रीमुखमुदीक्षतामुदीक्षमाणानां च दृशां पक्ष्मकृत् विधाता जडः तं प्रति किं ब्रूमः अतोऽस्माकं कस्यामपि दशायां न स्वास्थ्यमिति भावः ॥ १५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं त्रिविधा निरूप्य पुनस्तामस्यस्त्रिविधा निरूप्यन्ते देवनिन्दिकाः सात्त्विकतामस्यः भगवन्निन्दिकास्तामसतामस्यः स्वनिन्दिका राजसतामस्य इति । अटतीति । भवान् अह्नि काननं यदाटति तत्र दिवसे त्रुटिः युगायते तत्र निमित्तं त्वामपश्यतामिति यदा पुनः पश्यामः तदा कुटिलकुन्तलं श्रीमुखं ते उदीक्षतां नोऽस्माकं यः पक्ष्मकृत् ब्रह्मा स जडः यथा देवानां पक्ष्म न करोति अलौकिकद्रष्टृत्वात्तदपेक्षयात्यलौकिकद्रष्टृत्वात् अस्माकमपि पक्ष्मकरणमनुचितम् अतोऽनुचितकरणात् जडः देवा हि बहुकालं जीवन्ति तथा वयमपि न कृताः त्रुटिर्युगायत इति त्रुटिशब्दोऽस्त्रियां यदि सार्थकं गमनं भवेत् तथापि न काचिच्चिन्ता परमह्नि काननमेवाटति नतु कानने कश्चन पुरुषार्थः अस्माकञ्च न वहिर्गमनं सम्भवति ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्चास्माकं दुरदृष्टमेव दुःखदं तत्र त्वं किं कुर्या इत्याहुः । यत् यदा भवान् काननं वृन्दावनमटति गच्छति तदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिः क्षणस्य सप्तविंशतिशततमो भागः सोऽपि युगतुल्यो भवति । क्लीवत्वमार्षम् । दिवसे त्रैमासिकमेव त्वद्विरहदुःखं सर्वेषां व्रजजनानामस्माकन्तु त एव त्रयो यामाः शतकोटियुगप्रमाणा यद्भवन्त्यत्र दुरदृष्टं विना किमन्यत् कारणं भवेदिति भावः । पुनश्च कथञ्चिद्दिनान्ते श्रीमन्मुखं तव उदीक्षतामुत्कण्ठया ईक्षमाणानां तेषामेव गोपीजनानां दृशां पक्ष्मकृत् पक्ष्मस्रष्टा विधाता जडो निर्विवेको दुःखं करोतीति शेषः । एवञ्च त्वददर्शने दुष्पार एव दुःखसिन्धुः दर्शने तु पक्ष्मोद्भवो निमेष एव यो दर्शनविरोधी सोऽपि नवशतत्रुटिप्रमाणो भवन्नवशतयुगायते इत्युभयथापि दुःखं दुरदृष्टवशादेवेति भावः । त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः । शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः । निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षण इति मैत्रेयः । यद्वा । कृती छेदने । दृशां स्वचक्षुषां पक्ष्मकृत् पक्ष्मच्छेत्ता अजडश्चतुरो जनस्ते श्रीमुखमुदीक्षतामुत्कर्षेण पश्यतु नतु वयमचतुरा इति भावः ॥ १५ ॥

केन चित्कृता विशुद्धरसदीपिका ।

तथा वेणुनेति । कर्तृत्वोक्त्याऽचेतने चेतनाधायकत्वं ततश्च दर्शने दुःखमसहमानाः परमार्त्या स्वपूर्ववृत्तमावेदयन्ति । अटतीति । अहो भवान् यदा अह्नि काननमटति तदा त्वामपश्यतां किमुत रात्रावित्यर्थः । तथा कुटिलकुन्तलं श्रीयुतं मुखमुदीक्षतां किमुत गह्वरवनान्तरमितिभावः । पक्ष्मकृत् निमेषकर्ता जडः रसज्ञःखानभिज्ञः किमुत वनकुञ्जादिनिर्माता यद्वा उदीक्षतां पक्ष्मकृत् यः पक्ष्माणि कृन्तति स एव अजड इति रसज्ञः विद्वानित्यर्थः । यश्च द्रुमलताद्यन्तरितं त्वां समानीय दर्शयेत्सतु परमोपकारी परमविद्वांश्च तादृशश्च भवानेवेति भावः ॥ १५ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

वितरिष्यामि किन्त्वरया तव दर्शन[illegible] आहुः । अटतीति । यदिति यदा भवान् अन प्राणने इत्यस्मात् [illegible] दग्धकामस्यापि प्राणो जीवनभूतः किमुत कामिनीनां नः [illegible] त्ययान्तत्वाद्बलन्तत्वं यद्वा सामान्यतः सर्वस्य भवस्य जीवनभूतोऽधिष्ठानतया सत्तास्फूर्तिप्रदः यद्वा भवत्यस्मादिति [illegible] अनत्यस्मादित्यन् सचासौ सच भवान् [illegible] सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतेः तर्हि किमु[illegible]तहेतुरिति यद्वा भवस्य जन्मनो जीवनः साफल्यहेतुर्यद्दर्शने एव जन्मसाफल्यं यद्वा काननं भाति प्रकाशयति घाति सुगन्धयति अनिति जीवयतीति तथा स भवान् काननं केवलमटति न किञ्चिदपि तत्र कार्य्यं साधयति तत्र काननमित्यनेन वननामानिर्देशेन का कुत्सितमस्मद्विरहदुःखदत्वादाननं यस्मिन्निति प्रियमुखे तथोक्त्यनौचित्याद्वा कानि कुत्सितान्येवासुन्दरतया दर्शनीयानि पक्षिमृगाद्याननानि यस्मिन्निति नास्मन्मुखानीव तव दर्शनयोग्यं तत्र किमप्यस्तीति वृथैव तत्राटनं यद्वा गोपकुमाराणां सुन्दरमुखानां तत्र वर्त्तमानत्वात् भगवद्विहारवनपक्षिमृगादीनामपि कुत्सिताननत्वासम्भवात् कुत्सितानि स्वविरहदुःखकालत्वेन स्वग्लान्यन्वितानि आननानि यस्मात्त्वदीयपक्ष्मनाद् यद्वा कं सुखरूपं त्वदीयमाननं यस्य तत्काननं वृन्दावनस्थावरजङ्गमानां सर्वेषां चेतनत्वात्प्रेमरसान्वितत्वेन त्वदेकजीवनत्वात् त्वद्ध्यानपरतया जडीभूतत्वेऽपि त्वद्दर्शने मुकुलपुलकसुमनोविकासप्रहासमध्वानन्दाश्रुस्रावदर्शनात् भवांश्च स्वमुखदर्शनेन नः सुखदानवत्सुखदानायैवाटतीति न वृथाटनं तथापि नस्त्वदर्शनत्रुटिततनूनां त्रुटिर्युगायते

पतिसुतान्वयभ्रातृबान्धवानति विलङ्घ्य तेऽन्त्यच्युतागताः।
गतिविदस्तवोद्गीतमोहिताः कितव ! योषितः कस्त्यजेन्निशि ॥ १६ ॥

श्रीरामनारायणकृतभावभावविभाविका।

दुःखकालत्वेन कालात्मकतया युगकाल इव दुस्तरतामेति किमु वाच्यं त्वददर्शने त्रुटेर्युग इवाचरणं त्वद्दर्शने पक्ष्मप्रतिबन्धोऽपि दुःसह इत्याहुः। कुटिलकुन्तलमिति। तव श्रीमुखं नित्यश्रियान्वितं मुखमुदीक्षतामुत्कृष्टतया निविष्टचित्ततया ईक्षतां किम्भूतं तत् कुटिला वक्राः कुन्तलाः कुं पृथ्वीं स्वशोभया तलमधः कुर्वन्तीति तथाभूता अलका यस्मिन् निशालिङ्गितानिशापतिवदस्मदुत्ककुमुदविकासहेतुः यद्वा कुटिला मुखावरणेन दर्शनप्रतिबन्धकतया कपटयुताः कुन्तळा यस्मिन् कृष्णवर्णानां स्निग्धत्वेऽप्यहो कौटिल्यमिति भावः तत्पश्यतां नः पक्ष्मकृद्ब्रह्मासर्वज्ञतयाबुद्ध्यधिष्ठातृदेवत्वेन प्रसिद्धोऽपि जड एव यत आत्मना निमेषरहितनेत्राष्टकामिन्द्रस्य मिथ्याविषयजातदर्शनायानिमेषदृक्सहस्रमस्माकं सच्चित्सुखात्मकं कृष्णवपुः पश्यतां गोपीजनानां दृग्द्वयेऽपि पक्ष्मकृत् कथं जडतामतीयात् यद्यधुनापि त्वन्मुखमुदीक्षतां पक्ष्मकृत्पक्ष्मच्छेदकः स्यात् तदा अजडो यथावत्सर्वज्ञ एव भवेत् यद्वा यः पक्ष्मकृत्तच्छेदकस्तथैवाजडश्च स ते कुटिलकुन्तलं श्रीमुखम् उदीक्षतां पश्यतु वयन्तु निमेषकृतप्रतिबन्धाः प्रेमजडीकृतचित्ताश्च कथम्पश्याम इति भावः ॥ १५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अहो अधरामृतायोग्यकालेऽपि त्वद्विरहोऽस्माकमसह्यः किमु वक्तव्यमस्यां रात्रावित्याशयेनाहुः। अटतीति। भवान् स्वतन्त्रः वारयितुमशक्यः यदा दिने दिने काननं वृन्दावनं प्रति अटति गच्छति तदा त्रुटिः क्षणस्य कश्चिद्देशोऽपि त्वामपश्यतां व्रजस्थानां सर्वप्राणिनां युगवत्प्रतीयते किमु वक्तव्यमस्माकं पुनश्च कथंचिद्दिनस्य परिक्षये व्रजं प्रत्यागतस्य तव कुटिलकुन्तळाननं श्रीमुखमुद्वीक्षमाणानां प्राणिनां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्दः भवच्छ्रीमुखापेक्षयाऽतिक्षुद्रसुखविषयदर्शनार्थं देवानां पक्ष्म न कृतवान् अळौकिकविषयदर्शनपराणामस्मदादीनां तु तत्कृतवान् काळं च तेषां महान्तं कृतवान् अतस्तस्य जडत्वं स्पष्टमेवेति भावः। तथाच निमेषप्रतिबन्धोऽपि यत्रासह्यः दुःखप्रदस्तत्रैवं विधसमये बहुकाळं त्वद्विरहं कथं सहामस्तस्मात्कृपां कुर्वित्याशयः अनभिज्ञापक्षे किञ्च प्रत्यहं क्षणमपि त्वददर्शने दुःखदर्शनेच सुखमनभूय सर्वसङ्गपरित्यागेन यतय इव त्वामुपागतास्त्वन्त्वेवंविधा अप्यस्मान् परित्यज्य गत इत्यहो कष्टमिति सकरुणमाहुः। अटतीति। त्वामपश्यतां त्रुटिरपि युगायते त्वन्तु सूर्योदयादारभ्य तदस्तपर्यन्तं वनमटसि तत्रापि तव गमनं यदा सार्थकं भवेत्तर्हि स्याद्यथाकथञ्चित्सन्तोषः परन्तु दिनमात्रं वृथा काननमेवाटसि अस्माकन्तु तदत्यन्तमसह्यमिति भावः। दर्शनसमयेऽनिमेषमाश्रमप्यन्तरमसह्यमिति दर्शनसुखमुक्तम् उदीक्षतां मध्ये पक्ष्मच्छेदकः स एवाऽजडः प्रतिबन्धकनिवृत्तकत्वात् कुशल इति वा

तथा च तत्प्रतिबन्धकस्याङ्गस्यापि छेदनीयत्वात्तत्सुखस्योत्कर्षइति भावः। यद्वा अस्माकमयं सुखजनक इतिभ्रमाद्वयं दुःखसमुद्रपतिताः विचारे कृते तु तव दुःखजनकत्वमेव सिद्ध्यति सर्वदा तथैव तव प्रवृत्तिदर्शनादित्याशयेनाहुः। अटतीति। तथाच प्रयोजनं विना चिरकालं वने भ्रमणं दर्शनकाले कुटिलकुन्तलैर्मुखस्याच्छादनञ्चेत्येतत्सर्वं केवळमस्मद्दुःखायेत्यर्थः। किञ्च तवैव कोऽपराधो दैवमप्यस्मद्दुःखाय बद्धपरिकर इत्याहुः। पक्ष्मकृत् इति तस्माद्बहुजातमितः परं करुणा विधेयेति भावः। मानिनीपक्षे ननु संप्रतियुष्मद्गर्वशैथिल्यं जातं वर्त्तते प्रकटिते तु मयि पुनर्गर्वगिरिशृङ्गारूढाः भविष्यथ इति चेदस्मदर्थं नागम्यतां यासान्तु त्वद्दर्शनादर्शनयोः सुखदुःखसागरे प्रवेशस्तदर्थमेवागम्यतामित्याशयेनाहुः। अटतीति। निवृत्तिपक्षे यथोक्तज्ञानामृतरहितानां क्षणमात्रमपि कालो दुःखकालत्वान्महानित्याहुः। अटतीति। त्वामपश्यतामह्नि अनिर्वातलक्षणे दिने संसृतिलक्षणं यत्काननं तद्भवान् यदटति तत्र त्रुटिरपि काळो युगवद्भवति "मुख निःसरणे वक्रे,, इति कोशात् श्रियःधर्मादिसम्पत्तेः निःसरणं यस्मात्तथाभूतं चेतनं कुटिलः कुन्तलो जवो विषयाभिमुखो वेगो यस्य तादृशमुदीक्षतां मध्ये यस्तुभ्यं त्वत्प्राप्त्यर्थं दृशां चक्षुरादीन्द्रियाणां पक्ष्मकृन्निरोधकः स एवाजडश्चेतनस्त्वत्स्वरूप इत्यर्थः ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सर्वात्मनि त्वय्यत्यन्ततोऽनुरक्ताः अन्यत्र विरक्ता अतोऽनुग्रहं कुर्विति काश्चिदाहुः। अटतीति द्वाभ्याम्। यत् यदा काननं प्रति गाश्चारयितुमटति तदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिरपि क्षणार्धमपि युगायते युगवद्भवति दिनान्ते तव श्रीमन्मुखमुदीक्षतामुद्वीक्षमाणानामस्माकं तु दृशां पक्ष्मकृत् प्रजापतिर्जड इति मतिर्भवति ॥ १५ ॥

भाषा टीका।

हे प्रभो ! आप जब दिनमे वनको गोचारण को जाओहो तब घरमे आपके न देखवे ते हमारो क्षणको आधो भी काल युगकी नांई वीते है हे कपटी ! जा समे सांझको जब वनमे ते आओ हो तब आपके दर्शन करवेमे जो पलक पड़ै हैं तब वा पलक वनायवे वारे ब्रह्मा को हम मूर्ख समझे हैं कि वाने पलक क्यों वनाये ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तस्मात् हे अच्युत ! पतीन्सुतानन्वयांस्तत्संबन्धिनो भ्रातॄन् बान्धवांश्चातिविलङ्घ्य तव समीपमागता वयम् कथंभूतस्य गतिविदोऽस्मदागमनं जानतः गीतगतीर्वा जानतः गतिविदो वयं वा तवोद्गीतेनोच्चैर्गीतेन मोहिताः हे कितव ! शठ ! एवंभूता योषितो निशि स्वयमागतास्त्वामृते कस्त्यजेत् कोऽपीत्यर्थः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

बान्धवाः मातापित्रादयः एषां पूर्वोक्तयुक्त्यैव व्याख्या अति तेषां वाक्यातिक्रमात् स्नेहादिपरित्यागात्यातिशयेन विशेषेण च धर्माद्यनपेक्ष्यया समूळत्वेन लङ्घयित्वा आतिक्रम्य आगमने हेतुः हे अच्युतेति प्रपन्नजनरक्षणादिमाहात्म्यतः कदाचिदपि विच्युतेरसम्भवादित्यर्थः । किञ्च गतिं स्वभावम् आत्मनः अस्माकञ्च वेत्सीति गतिविदः यद्वा तव ज्ञानम् अभिज्ञत्वं विद्म इति गतिविदो वयं सुव्रतत्वादिमाहात्म्यम् अस्माकञ्च त्वदेकगतित्वं जानासीति विदतः किम्वा कारुण्यादिमयं त्वत्स्वरूपं जानन्त्य इत्यर्थः । किञ्च उद्गीतमोहिताः कितव ! हे कपटिन् ! निजस्वभावान्यथाकरणात् निशीति रात्रौ भीरूणां स्त्रीणां त्वयि गोऽनुचित एवेति भावः । त्यजेदिति संभावनायां सप्तमी कितवेति सम्बोधनेन कः कितवोऽपि त्यजेत् अपितु कितवोऽपि त्यक्तुं न शक्नुयादिति अतस्त्वयि न केवलं धूर्त्तत्वं परमाकृतज्ञत्वमपि पर्य्यवस्येदिति भावः । अथवा रात्रौ निर्जने निजान्तिके उद्गीतेन रिरंसया प्रागाकृष्यानीतानां गोपसुन्दरीणां पश्चात्त्यागाद्धूर्त्त एवासीत्यर्थः । अतो व्यक्तीभूतं धूर्त्तत्वम् अधुना दर्शने देहीति भावः । अन्यैस्त्व्याख्यातं यद्वा कितव धूर्त्त किम्वा धूर्त्तस्य तव योषितः त्वद्वद्वयमपि धूर्त्तास्तव धूर्त्तत्वं सर्वं विद्म एवमलमस्मासु धूर्त्तत्वेनेति भावः । एतच्च दर्शनप्रार्थनचातुर्य्यं ज्ञेयम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवञ्च सति तदेतद्य कृतमत्यन्तमयुक्तमित्याहुः । पतीति । बान्धवा मातापित्रादयः अति तेषां वाक्यातिक्रमात् स्नेहादिपरित्यागात्यातिशयेन विशेषेण च धर्माद्यनपेक्ष्यया समूलत्वेन लङ्घयित्वाऽतिक्रम्य आगमने हेतुस्तवोद्गीतमोहिता इति हरिण्य इवेति भावः । नन्न यादृच्छिकमुद्गीतमपि तु ज्ञानपूर्वकमेवेत्याहुर्गतिविद इति । अस्मदागमनं जानत इति भावः । यद्वा । ननु भवत्यः परमधीराः गीतमात्रेण कथं मोहितास्तत्राहुः । गीतगति विशेषान् जानन्त्य इति । यैः शक्रशर्वपरमेष्ठिपुरोगा इति भावः । यद्वा । भवत्यो विदग्धा ममैतादृशं स्वभावमपि जानन्तीति कथं न सावधाना जातास्तत्राहुस्त्वत्स्वभावविदोऽपि वयमिति मोहनमन्त्रप्रायत्वात्त्वद्गानस्येति भावः । अहो तद्व्याप्ताः स्वयमेव तथानीता योषितः पुनर्निशि कस्त्यजेत् सम्भावनायां लिङ् न कोऽपीत्यर्थः । अत एव हे कितव ! वञ्चनशील अनेनाऽन्योऽपि कितवः कस्त्यजेत् सर्वस्यापि तस्य कैतवे लब्धैर्नार्थेन स्वव्यवहारसाधकत्वं भवतु तस्यापि तिरस्कारित्वमिति तत्रापि विशेषः । अतः एव हे अच्युत ! त्वद्गुणादच्यभिचारित्विति सान्त्वैव तवैषा संज्ञेति भावः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अन्ति अन्तिकं ते ईति पाठे त्वामित्यर्थः । कितव ! धूर्त्त ॥१६॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्धे अच्युत ! पतीन् सुतानन्वयांस्तत्संबन्धिनः भ्रातॄन् बान्धवांश्चात्यन्तं विलङ्घ्य ते तवान्ति समीपमागता वयं कथंभूतस्य गतिविदः अस्मदागमनं जानतः गतिविदो वयं वा तवोद्गीतेन मोहिताः हे कितव ! धूर्त ! एवंभूता योषितो निशि स्वयमागतास्त्वां विना कस्त्यजेत् कोऽपीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवदुन्मुखस्मरणमुग्धा गोप्यो रतिविहारसमयोऽयमिति निरूप्य सुरतसंविदा धिक्षिपन्ति । पतीति । ते तव सकाशमागता हि यस्मात् हे कितव । कः पुरुषः निशि योषितस्त्यजेदित्यन्वयः आगमने हेतुं वदन्ति गतिविद इति गतिविदः आकर्षणलक्षणगानस्य तवोद्गीतेन स्थितोत्थानकरणेन मोहिताः मूर्च्छां प्रापिताः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

दिवसविहारस्यैवमेव रजनीविहारो वा निराविलो भवितुं नत्व तथा यतो वेणुवादेन वनमानीय स्वस्मात्संधत्त इति तत्कालस्वरूपेणाह सखी ... सङ्केतात्ता पत्नीशु पतिसुतेत्यत्राह हे कितव किन्तवास्ति सर्वमेवानयेति परसर्वस्वापहारी कितवः तस्य संबोधने तथा पत्यादीन् अतिशयेन विशेषेण लङ्घयित्वा तत्सम्बन्धिनो देहान् विहायेत्यर्थः । अतिविशदाभ्याससमर्थाः ते तव अन्ति अन्तिकमागता हे अच्युतेति संबोधनेनाच्युतसमीपागमने अच्युतत्वमेव भवितुमुचितं तत्र कस्त्वदन्यो निशि योषितस्त्यजेत् कीदृशीस्तव गतिविदः तवोद्गीतमोहिताः यद्वा तव कीदृशस्य गतिविदः पश्यत्यः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं दैवत्वं भगवता संपादितं पूर्वो ब्रह्मा तादृशीनां पक्षमुक्त्वा तदपेक्षया हीना आहुः । पतीति । हे अच्युत ! स्वतः कामनिवृत्तिभयरहिताः पतिः सुताः अन्वयो वंशः भ्रातरः बान्धवाः संबन्धिनः एते सर्वथा अविलङ्घ्याः तानप्यतिविलङ्घ्य ते अन्ति समागताः त्वं सर्वेषां गतिं जानासीति गतिवित् सर्वेषां वा गतिः संपाद्यते वा भवानेव दास्यतीति वयं वा गतिविदः तेषां भजने भगवद्भजनेच तारतम्यविदः किञ्च तव उद्गीतेन च मोहिताः अतो मोहयित्वा समानीय उभयभ्रंशार्थम् अरण्ये निशि योषितः कस्त्यजेत् सर्वदैव स्त्रियो न त्याज्याः सुतरामरण्ये सुतरां निशि यदर्थं वा समाहूताः तदप्यदृत्वेत्यभिप्रायेण संबोधनं कितवानां वा वयं संबन्धिन्यः अतोऽस्माकं लेशु न प्रवेशः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

याश्च वेणुवादनसमये पतिभिरन्तर्गृहनिरुद्धा आसंस्ताः सेर्ष्यमाहुः । पतीति । गतिमन्तिमां स्वासां दशमीं दशां विश्व इति ता वयमन्ति त्वदन्तिकमायाताः । हे अच्युत ! अत्रापि च्युतोऽभूस्त्वं किं विपरीतलक्षणयैव त्वमच्युत नामेति भावः । तर्हि किमागता इति चेदुद्गीतेन मोहिताः हतविवेकीकृताः । एवञ्चेत्तर्हि रे मूढाः ! सहध्वं वेदनामिति तत्राहुः । हे कितव ! शाठ्य एवंभूता योषितो भीरुस्त्वां निर्दयमृते कस्त्यजेत् न कोऽपीत्यर्थः । यद्वा । हे कितव ! हे मत्त ! निशि आयाता युवतीः कः खलु युवा त्यजेत् अतस्त्वं वञ्चकोऽपि वाञ्छित एवाभूरिति भावः । "कितवस्तु पुमान् मत्ते वञ्चके कनकाह्वये" इति मेदिनी ॥ १६ ॥

केनचित्कृता विशुद्धरसदीपिका ।

एवं दक्षिणानां दाक्षिण्यगीतमधाय साधकचरीषु या भगवता वेणुनकृष्टा अलब्धविनिर्गमास्त्यक्तदेहाः समुपलब्धपरिकरकलेवरास्ताः ससंरम्भमिवाहुः । पतीति । अत्र योगमायाक्लृप्ता अपि पतयः आसामेव ननु सर्वासामिति नहि व्रजकक्षाविध एव प्रेमा रसकदम्बचूडामणेः परमप्रेम्णो विलासाः सर्वेऽपि सावकाशाः समुल्लसन्तः सुखयन्ति रसिकजनानिति योगमाययापि भाववत्तौचित्यं नापतेत्तावदेव कल्पयितुमुचितमिति ज्ञेयं यद्यपि परम प्राकृतलीलायां न किमप्यनुचितं तथापि नित्यदोषेपरके श्रोतृचेतसि न तत्परता समुदेति तथा सति याः श्रुत्वा तत्परो भवेदित्यादावुपवर्णितो भगवत्प्रयासो वृथैव स्यादित्यवधेयं विशेषजिज्ञासायां भक्तिमञ्जूषा द्रष्टव्या सुताश्च प्राजापत्यादीनामेवेति प्रागेव निर्णीतं बान्धवाश्च मातृपित्रादयः । अतीति । तेषां वाक्यातिक्रमात् स्नेहादिपरित्यागाच्च विलङ्घ्य धर्मादिनपेक्षया समूलमुल्लङ्घ्य अतिक्रम्येत्यर्थः । तथा आगमने हेतुः तवोद्गीतमोहिताः हरिण्य इवेति भावः । ननु परमधीराः कथमुद्गीतमात्रेण मोहितास्तत्राहुः । गतीति । गीतगतिविशेषज्ञाः यद्वा तव कापट्यपटुतादिगतिविदोऽपि मोहनमन्त्रेणेवोद्गीतेन मोहिताः यद्वा ननु पित्रादिभिः । कथं न निवारितास्तत्राहुः । तवोद्गीतेनैव हेतुना तैर्मा ऊहिताः न तर्किताः न ज्ञाता इत्यर्थः । ननु गीतमोहिता एवागता न तु स्नेहेनेत्याशङ्क्याहुः योषित इति । प्रीतिपराधीना इत्यर्थः । ईदृशीः तत्रापि निशि कस्त्यजेत् सम्भावनायां लिङ् न कोऽपीत्यर्थः । अत एव हे कितव वञ्चशील ! हे अच्युत ! तादृशस्वगुणादप्रच्युत इति दोषोद्गारः ॥ १६ ॥

श्रीरामनारायणकृतभावभावार्थभाविका ।

किञ्च नहि तव कुन्तला एव कुटिला अपि तु भवतापि कृष्णकुटिलस्वभावतयैव ते साजात्येन शिरोधृताः ननु किं मम कौटिल्यं तत्राहुः । पतिसुतान्वयेति । वयं पतीन् पतिमन्यान् ततः सुतान् स्वीकृतपुत्रान् भ्रातृपुत्रादीन् वा तेषामन्वयं वंशं वा तेषामन्वयः सम्बन्धो यस्मिंस्तद्गृहं प्रवृत्तिपथमेव वा तथा भ्रातॄन् बान्धवांश्च भ्रातृबान्धवानिति पितृकुलोपलक्षणं वा तत् सर्वमति विलङ्घ्य अतिशयेनादित एव तत्सम्बन्धासम्पत्त्या विशेषतस्तत्कुलमर्यादागतधर्मादिनवेक्ष्य लङ्घयित्वा तेऽन्ति समीपे अच्युता एवागताः प्राप्ताः ननु तत्सम्बन्धेन मनसापि कदाचित्कञ्चिदपि च्युताः कथमेवं सर्वत्यागेनागमनं तत्राहुः । तवोद्गीतमोहिता इति । त्वदीयेनासाधारणेनोत्कृष्टेन यत्र शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुरनिश्चिततत्त्वास्तादृशेन गीतेन मोहिता मृगयुगीतेन मृग्य इव गतमतयः तत एव निमित्तभूताद्वा मा ऊहितं विचारो यासां तथाभूताः यद्वा तवोद्गीते परममाधुर्य्यरसस्नेहस्वरसौष्ठवेन श्रोत्रमनोहरतया परमाह्लादप्रदे गीते मा यथार्थत्वमतिरेवोहिता याभिः एतद्गीतं यथा श्रवणमधुरं तथैव सर्वथा परमसुखपर्य्यवसायीति यद्वा तवोद्गीतेनैव मा सकलसुखसम्पत्तिर्मा स्वीया शोभा वा ऊहिता याभिः वयमेवमागता अपि नागता इव याता यतो भवान् ऽच्युतेति हेतुगर्भसम्बोधनम् अच्युतोऽद्रावितचित्त एव तिष्ठति न पुनर्वस्तुतस्तथा अपितु कितव कापट्येनैवास्मत् दुःखदानविडम्बनाद्यर्थतयाचरणशील इतिसम्बोधनान्तरं कितवेति । ननु मया बाल्येन लीलयैव वेणुर्वादितो नाहं वेद्मि भवत्य आगमिष्यन्तीति । तत्राहुः । गतिविद इति नत्वया मुग्धभावेन वेणुर्वादितः किन्तु मुग्धमोहनभावेनैव अन्यथा बाल्यभावेन क्रीडायां प्रतिदिनवादनेऽपि नास्माकं तथा मोहो मोहनं भावनं वा किन्तु तद्विरहितानां स्मरस्मरणाभ्यां दहनं प्राणोद्वहनञ्च अधुनातु मोहनेनैव शृङ्गाररसोत्कलितभावेन गतिविदस्तव वादनेनैव नो गृहाद्गतिः वने गतिः पुनरीदृशी गतिः तत्र गतिविद इति नो हृदयगतिं प्रेमाविरहविह्वालितदशां तथा नो गतिं स्ववेणुध्वनिमात्रेण विलम्बासहिष्णुतया लोककुलवेदमर्य्यादाबन्धूंश्च हित्वा गमिष्यन्तीति तथा स्वगतिं रमणार्थमेव वनागमनं वरदानमनुस्मृत्याह्वानं स्वहृदयङ्गतं कापट्यं रमणेऽपि वञ्चनादिकं तथा कापट्येनावश्यंभाविनि भामिनीनां विवशतागतिविद एव तवेदृशं मुद्गीतं तेन मोहनमागतिरिव गतिश्च ननु ममेच्छास्वभावं बहुकालपरिचिता अपि यूयं किन्तु मे वेणुशब्देनैवमागताः तत्रापि श्लेषेणोत्तरमाहुः गतिविद इति । सर्वप्रकारां तव मोहनरमणकापट्यादिगतिं स्वीयाञ्च पूर्वोदितां भूतां भाविनीं च गतिं जानन्त्योऽपि यतो मोहिता अतः स्वात्मानमजानन्त्य एवागता इति भावः । ननु मयि कैतवानुपलम्भेऽप्युपालम्भो नोचित इत्यत आहुः । योषित इत्यादि । तथाकितवत्वे योषितः कस्त्यजेत् न को ब्रह्मापि योषित्त्यागासमर्थः पुत्रीं प्रतिधावनश्रवणात् प्रार्थयमानाप्सरस्त्यागे त्वपूज्यत्वशापावगतिश्रवणाच्च तत्रापि वने विशेषतो निशि तथा स्वोद्गीतमोहिताः स्वयमागताः दक्षिण्यभावस्थिता वामा वामा को दक्षो वामेन स्वीकुर्य्यात् त्वदन्यः कितवोऽपि कस्त्यजेदिति त्वमेव कितवशिरोमणिरिति भावः नच भगवत्येवं कितवोक्तिरसम्भाव्येति सम्भवति संभावना ब्रह्ममे कितवा इति श्रुत्यनूदितत्वात् कितवत्वादेर्ब्रह्मणि यद्वा तत्र सर्वस्वभावेन तथोक्तिसम्भवेऽप्यत्र तथोक्त्यसम्भावनायामेव योजना यदा कितव योषितोऽप्येवमहेयाः पूर्वनिरूपितदिशा सर्वमतिविलङ्घ्यागता इति विरज्य परिव्रजनमुक्त्वा तत्र हेतुत्वेन नित्यानित्यवस्तुविवेकमाहुः गतिविद इति तेषां गृहबान्धवादीनां गतीः दुर्लभत्वनित्यदुःखहेतुत्वनश्वरत्वादिरूपाः—

> नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ।
> गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ।
> यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचारोमनखैः पिनद्धम् ।
> क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ॥
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

श्रीरामनारायणकृतभावभावविभाविका।

इत्यादिवाक्यैस्तव गतिश्च निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निरस्तेतरात्मकशरीरगुणैश्च हीनः आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मेत्यादि—

वाक्यैर्विदन्तीति तथा तद्युक्तमपि ताभिः।

कुर्वन्तीति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरलं इति; किमिति यद्वा गृहकुलश्रुतिधर्मादीनां गतिधूमादिमार्गेण पुनरावृत्तिलक्षणां ततो विरज्य निवृत्तिपथत्वदुपासनगतिमर्चिरादिमार्गेणापुनरावृत्तिलक्षणां विदन्तीति विदः यद्यपि—

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ॥

इत्यादिना तद्गतिविदां मोहाभावोक्तेस्तथापि भातु योगिनां मायामोहनिषेधाभिप्रायो ननु त्वद्वियोगिनीनां योषितां तव गीतमोहितत्वनिषेधाभिप्राय इति गतिविदोऽपि तवोद्गीतमोहिता इति युक्तमेव यद्वा कथमेवं भवतीनां मद्गतिज्ञानं तत्राहुः तव निगमं त्वमकमपि यत् उत्कृष्टमुत्तरकाण्डात्मकं स्वरूपसूचकं तादृशमुद्गीतमस्य च्युतवंशगुरुलब्धं तेन जाता मा शाब्दी प्रमा करहिता तच्छब्दानुगुणतद्गुणप्रेमगुणगणे भ्यो विचारिता यामिन्तथाभूता वने निवर्त्य निशि व्यापारविक्षेपशून्या चरे प्रविश्य रजनीयावद्ब्रह्मध्यानं समाचरेदित्यादिश्रुतिसिद्धयोषितः स्वत्मनि जुषमाणाः कः सुस्वरूपोऽपि कस्त्यजेदपि तु नेति काकूक्तिः ॥ १६ ॥

———

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

किञ्च सर्वथाऽत्याज्या अस्मान् किमर्थं त्यक्तवानसीति न विद्म इत्याशयेनाहुः। पतीति। हे अच्युत! भगवतोऽप्रच्युतस्वरूपत्वात्कदापि तेन वियोगो न भविष्यतीति विचार्य पतयः सुताः अन्वयो वंशः भ्रातरः बान्धवाः सम्बन्धिन एते सर्वथाप्यलङ्घ्यास्तानप्यतिविलङ्घ्य तवान्ति समीपे आगता यतस्त्वद्गतिविदः कर्मोपासनज्ञानफलजाताः तत्प्रदानाय साक्षात् दृष्टाः सर्वा अपि गतयो भगवत एव भवन्तीति वयं वा गतिविदः पत्यादिभजने भगवद्भजने च गतितारतम्यविद इति वा किञ्च त्वयाप्याकृष्टा इत्याहुस्तवोद्गीतेनोच्चैर्गीतेन मोहिताः पत्यादिविमुख्यापादकेन गीतामृतेन त्वयैव स्वस्मिन्नासक्तचित्ताः सम्पादिताः कस्त्यजेत् यस्त्वं स्वस्मिन्नासक्ताः स्वयमाहूय फलमदत्वा त्यक्तवान् स भवान् क इति न विद्म इत्यर्थः। ननु स्वपत्यादिसन्निधावेवातः परङ्गन्तव्यमितिचेत्तत्राहुः कितवानां स्वस्वरूपानभिज्ञत्वात्स्वपरवञ्चकानां सम्बन्धिन्यः स्त्रियः अतस्तदाभिमुख्यं कदापि मास्तु त्वदेकशरणा वयं त्वयैव रक्षणीया इति भावः। अनभिज्ञापक्षे आस्तां तत् अद्य तु अन्यदप्यनुचितं कृतमित्याहुः। पत्यादीनतिक्रम्य तव समीपमागताः यतस्तवोत्कृष्टेनोच्चैर्गीतेन मोहिताः यतस्तव गतिविदः अस्मन्मोहकान् गीतगतिविशेषान् जानतः उद्गीतेन मोहिता अवश्यमागमिष्यन्तीत्यस्माकं गतिविद इति वा यद्वा तव स्वभावं जानन्त्यो

विदग्धा अपि वयं मोहनमन्त्रात्मकेनोद्गानेन मोहिता एवं स्वयमेवाहूता योषितो निशि अरण्ये त्वामृते कस्त्यजेत् कापि स्त्रियो न त्याज्यास्तत्रापि निर्जनवने तत्रापि निशि तत्रापि यदर्थमाहूतास्तददत्वैवेति त्वैव शठस्यैवं विधचेष्टितं सम्भवति नान्यस्येति कितवेति सम्बोधनाशयः यद्वा हे कितव! एवम्विधः कितवोऽपि कश्चिन्नास्ति स हि कैतवाल्लब्धं तु स्वीकरोति ननु तिरस्करोतीति भावः। तथा च नास्त्यस्मत्यागे किमपि कारणं प्रच्युति लक्षणन्तु त्वयि नास्त्येवेत्यच्युतेति सम्बोधनाशयः मानिनीपक्षे तिष्ठत्वस्मदर्थं गमनागमनविचार एतास्तु पत्यादीनतिलंघ्य तव समीपमुपागताः किमर्थं त्यक्तवानसीत्याहुः पतीति च्युतिरहितं मत्वा समागतास्त्वं तु स्वयमेव पलायित इत्याश्चर्यमिति अच्युतेतिसम्बोधनाशयः शठंप्रति शठंकुर्यादिति न्यायमजानन् वृथैव कितवः सम्पन्नोऽसि सरलाः प्रति कैतवाचरणादित्याशयेनाहुः हे कितवेति निवृत्तिपक्षे एवं विधाधिकारिणमपेक्ष्यैव पत्यादिस्थानीयानर्थान् वादिनो वा तिलङ्घ्य हे अच्युत स्वरूपावबोधक यस्तवोद्गीतेन समन्वयात् स विजिज्ञासितव्यः सोऽन्वेष्टव्य इत्यादि रूपेण याथा विवेकज्ञानाः त्वत्प्रमुखेनोहिताः कितवेन कैतव्येन व्याजेन योषितः स्वाश्रितपतिपरायणाः योषित इव परब्रह्मणि तात्पर्येण संगता अस्मान् को वाविद्यानिशि कर्मादिरूपेण परिणतायामविद्यायां निशि त्यजेत् क्षिपेत् ब्रह्मातिरिक्तपरत्वस्वप्रतिपादकेनान्धगर्तेक्षयवत्पीडयत् यस्त्यजेत्स विद्मोमित्यर्थः ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं भूता वयं हे अच्युत! अखण्डैश्वर्य्य! हे कितव! वञ्चक! मुग्धया कृतमिदं सम्बोधनम् यद्वा "ब्रह्मदाशा ब्रह्म कितवा,, इत्यादिवेदान्तैकवेद्य! सर्वात्मन्! तव गतिविदः तव पुरुषोत्तमस्य सर्वविलक्षणवेणुगीतगतिविदः अत एवोद्गीतेन उत्तमेन वेणुगीतेन मोहिताः पतिसुतान् तत्संबन्धिनः भ्रातॄन् बान्धवांश्च अतिविलङ्घ्य ते तवान्ति समीपे आगताः त्वया तु त्यक्ताः एवमन्याः योषितस्तत्रापि निशि कस्त्यजेत्तस्मादागच्छेति फलितोऽर्थः ॥ १६॥

———

भाषा टीका।

हे अच्युत! हम सब अपने पति पुत्र और वंश वारे बांधव इन सबनको त्याग आपकी लीलाके जानवे वारी आपके गीत ते मोहित हो तुमारे पास आइ हैं हे कपटि! ऐसो को होगो जो पराइ स्त्रियनको बुलाय फिर रात मे वनमे छोड आयगो॥ १६॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वद्दर्शननिमित्तहृद्रोगस्य

श्रीधरस्वामिकृतभावार्थदीपिका।

त्वत्सङ्गस्यैव चिकित्सां कुर्विित्याशयेनाहुर्द्वयेन। रहसीति। श्रियो धाम ते बृहद्विशालमुरश्च वीक्ष्यातिस्पृहा भवति तथाच मुहुर्मुहुर्मनो मुह्यति ॥ १७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

अतो निजकृतत्रत्वापेक्षया दर्शनेक्षणमपि न विलम्बस्वेत्याशयेन पूर्वतो विशेषमाहुः। रहसीति। पूर्वं संविद इत्युक्तमत्रचसम्विदमिति एकामपि सम्विदं किमुत बह्वीरित्यर्थः एवं पूर्वोक्तविशेषोऽत्रोह्यः हृच्छयस्य हृदि सुसत्रिश्लेष्टतया लीनस्यापि कामस्य उदयः प्राकट्यं यस्मात् तत् इदं प्रहसितादीनां सर्वेषामपि विशेषणं ज्ञेयं यद्वा तव हृच्छयोदयं कामविकारं भावविशेषविलसितस्मित-गण्डपुलकाधरविस्फूर्त्यादिलक्षणं प्रकृष्टं हसितं यस्मिन् अनेन तत् प्रकृष्टहास्ययुक्ताननमिति वा प्रेम्णा वीक्षणं पूर्ववत्पदद्वयं वा बृहदिति गाढालिङ्गनाभिप्रायेण परमसौन्दर्य्यमुक्तं श्रियो धामेति अतिस्पृहायां हेतुविशेषः सापत्न्यात् शोभाविशेषाच्च वीक्ष्य आलोच्यचिन्तयित्वेत्यर्थः। स्थितानामित्यध्याहार्य्यं किम्वा भिन्नकर्तृकत्वे क्त्वाप्रत्यय आर्षः अत एवातिस्पृहमिति चित्सुखः आतिस्पृहा च तत्तदनुभवाय त्वत्सङ्गममात्राय वा तयाच मनो मुह्यतीति स्पृहायाः परमौत्कट्यं द्योत्यते किम्वा पूर्ववन्निजधैर्य्यहानिरेवोक्ता यद्वा रहसि सम्विदं प्रति यत् प्रहसिताननादिकं हृच्छयोदयादिकृत्वा एवंसति दृष्ट्वैवार्थः तनश्च पूर्वदृष्टानां तेषाम् अधुना स्मरणादतिस्पृहादिकमिति पूर्ववज्ज्ञेयं पूर्वमपि तथा तथैव भवेत् अधुनातु तत्तदतिशयेन स्मरणमेवासन्नमिति भावः। अन्यत्तैर्व्याख्यातं यद्वा श्रियो धाम इति सपत्न्याक्रान्तत्वेन दोषः किम्वा परमदुर्लभत्वेनात्मनस्तदयोग्यत्वं दैन्येन सूचितं यद्वा ते श्रियः विविधाः शोभाः रूपवेषलीलादिविषयकाः इत्यनुक्तमप्यन्यत्सौन्दर्य्यादिकं सङ्गृहीतं धाम च लतागृहादि न केवलमतिस्पृहा मनश्च मुह्यति परममोहनाच्चतन्माधुर्य्यात् अनेन मनसो दुर्निवारत्वादप्रतिकार्य्यत्वं तेन निजपरमदैन्यञ्च सूचितम् अन्यत्समानम्। अथवा ननु कृतज्ञोऽस्मि कथमेवं परमार्ता इत्यत आहुः। रहसीति। ते इत्यस्य पूर्वतः परतश्चान्वयः ते सम्विदादिकम्वा वीक्ष्य तेऽपि अतिस्पृहा तेऽपि मनइति आदर्शादौ निरीक्षणादिना भावविशेषोदयात् इति तेषां परममोहनत्वमुक्तम् अतोऽस्माकमतिस्पृहा मनोमोहश्च युक्त एवेति अतो यावदन्यदशा न प्रभवेत्तावदेव सन्दर्शनं देहि तत एव कृतज्ञत्वं सिद्ध्येदिति भावः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

ते तव हृदयस्य कामस्य उदयं वीक्ष्य कीदृशं रहसि सम्वित् यत्र तम्। अलुकसमासः। तथा प्रकृष्टं हसितं यस्मिन्नानने तदाननं यत्र तथा। प्रेम्णा वीक्षणं यत्र तत्तादृशं तदनन्तमुरश्च वीक्ष्य तत्र बृहदिति गाढालिङ्गनेच्छाकारकः सौन्दर्यविशेष उक्तः। श्रियः सर्वसम्पन्निधेः स्वभाविकपीतरेखारूपाया धामेति च वीक्ष्यास्माकमतिस्पृहेत्यस्मच्छब्दव्यकर्तृकवीक्षणस्पृहायाः क्रियाया वीक्षणस्य पूर्वकालत्वात्क्त्वाप्रत्ययः। स्वातन्त्र्यविवक्षया स्पृहाया एव वा वीक्षणकर्तृत्वोपचारः। अत्रोद्भवतीति शेषः। अतिस्पृहेति तृतीयापदं वा सम्पदादित्वाद्भावेऽपि क्विप्। अतिस्पृहया मनो मुह्यतीत्यर्थः। अतिस्पृहमिति चित्सुखः। अतिस्पृहा च तत्तदनुभवाय तत्सङ्गममात्राय वा। तया च मनो मुह्यतीति स्पृहायाः परमौत्कण्ठ्यं द्योत्यते। यद्वा। वीक्ष्येति पूर्ववृत्तमिदं तथा तथैव भवेत् अधुना तत्तदतिशयेन मरणमेवासन्नमिति भावः। एवं स्पृहाया दुर्निवारत्वादप्रतिकार्यत्वम्। तेन निजपरमदैन्यञ्च सूचितम् ॥१७॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

हृच्छयोदयं कामजनकम् ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अतस्त्वया त्यक्तानामस्माकं प्राकृतत्वदर्शनानिदानद्रोगस्य त्वत्सङ्गस्यैव चिकित्सां कुर्वित्याहुः द्वयेन। रहसीति। तव रहसि संविदं साङ्केत्यं कर्म हृच्छयोदयं कामजनकं प्रेम्णा वीक्षणं च प्रहसितमाननं च श्रियो लक्ष्म्याः स्थानभूतं बृहद्विशालमुरो वक्षश्च वीक्ष्यास्माकमतीव स्पृहा भवति तया च मुहुर्मनः मुह्यते मोहं प्राप्नोति ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

किं बहुनोक्तेनास्मदवस्थेयं हीति विज्ञापयन्ति रहसीति। हृच्छयस्योदयो यस्मात्तथा वीक्ष्य निरूप्य अतिस्पृहा अतिशयितस्पृहया मुह्यते विभक्तिव्यत्ययश्छान्दसः बृहति दधातीति बृहत् श्रियः निवासस्थानमितिशेषः यद्वा बृहदुरः श्रिय इत्येकं पदं बहुवचनं द्रष्टॄणामनुक्षणं कान्तिविशेषबाहुल्यद्योतकम् ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

अथ कुमारिका ऊचुः। रहसीत्यादि। रहसि निर्जने या संवित् संवेदनं मयेमा रंस्यथ क्षपा इति यत् आदिष्टं तद्वीक्ष्य ज्ञात्वा प्रेमवीक्षणञ्च वीक्ष्य दृष्ट्वा बृहदुरश्च वीक्ष्य मुहुर्वारंवारमतिस्पृहा जातेत्यर्थः। अतो मनश्च मुह्यति तत्कथमेवं करोषीति भावः प्रेमवीक्षणं कीदृशं हृच्छयस्य मनोरथस्य उदयो यस्मात् प्रहसितं प्रहास एवाननं प्रीणनं यस्य अथवा प्रहसिताननं वीक्ष्य कीदृशं प्रेमवीक्षणं यस्य बृहदुरः किंभूतं श्रियो धाम ॥ १७ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

तत उत्तमा आत्मानमेव निन्दन्ति। रहसीति। नो मनः अतिस्पृहं सत् मुह्यत इति तत्र कारणत्रयं गुणत्रयसहितं वाक्यं हास्यमुरश्चैव कामानन्दाधिकारिणः रहसि एकान्ते या संविज्ज्ञानं वा पूर्ववत् हृच्छयस्य कामस्य उदयेन तादृशं प्रहसितयुक्तमाननं प्रेमपूर्वकं वीक्षणं च यस्मिन् श्रियो धाम बृहदुरः भगवद्रूपस्य वा षड्गुणत्वमुच्यते रहसि संविदो यस्मादिति एतादृशं त्वां हृच्छ-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

यस्य उदयो यस्मात् प्रहसितमाननं यस्य प्रेमपूर्वकं वीक्षणं यस्य बृहदुरः श्रीधामच वीक्ष्य प्रमाणादिवलरूपता भगवद्रूपेति निरूपिता वक्षसिच स्वस्थित्यर्थं यशःश्रीश्च निरूपिता मुखदर्शनेनैव प्रहासितयुक्तत्वात् पूर्वं स्थित्यभावः ततः कामः प्रेमवीक्षणेन च तस्य स्थिरीकरणं ततः स्वयोग्यता ततो भोगचातुर्यं प्रथमविशेषणेन एवं सर्वं भविष्यतीति अतिस्पृहायुक्तं मनः मुह्यते केवलं मोहं प्राप्नोति पदार्थालाभात् मुहुर्मूर्च्छा समायातीति जीवनमरणान्यतराभावात् धिग्जीवनमित्यर्थः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किं कर्त्तव्यं तव मोहनपञ्चकं कामशरपञ्चकमिवास्मन्नेत्ररन्ध्रेषु प्रविश्य हृदयं ज्वलयतीत्याहुः । रहसि सम्विदं रतिप्रार्थनव्यञ्जकसम्भाषणं प्रथमम् । हृच्छयोदयम् अस्मदवलोकनहेतुकं कन्दर्पभावोदयं द्वितीयम् । प्रकृष्टं हसितं यत्र तथाभूतमाननं तृतीयम् । प्रेमयुक्तमीक्षणञ्च चतुर्थम् । श्रियो धाम शोभास्पदं बृहद्विस्तीर्णमुत्तुङ्गमुरो वक्षः पञ्चमम् । वीक्ष्य मुहुः पुनः पुनर्विशेषतो दृष्ट्वा अतिस्पृहणम् अतिस्पृहा । भावकिबन्तः । स्पृहितया मनो मुह्यते मुह्यति । उत्कण्ठाज्वालया मूर्च्छतीत्यर्थः ॥१७॥

केनचित्कृता विशुद्धरसदीपिका ।

अथ किञ्चिदवधाय पुनरपि दुर्गाव्रतपरा ऊचुः । रहसीति द्वाभ्याम् । ते तव रहसि संविदं रहसि निर्जने कालिन्दीतीरे "याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इत्यादिका प्रतिज्ञा संवित् यत्र तत् अलुक्समासः बृहदुरो वीक्ष्य तत एतदाशावन्धेन हृच्छयस्य कामस्य उदयो यत्र तत् तथा प्रकृष्टं हसितं भावविशेषगमकं स्मितं यस्मिंस्तदाननं यत्र तथा प्रेम्णा वीक्षणं यत्र तत्रापि श्रियोऽस्मत्सजातीयायाः पीतरेखारूपाया धाम मुहुरित्यभ्यासेन परमासक्तिः सूचिता अतिस्पृहेति सम्पदादित्वाद्भावे क्विप् अतिस्पृहया मनो मुह्यतीत्यर्थः । एवं स्पृहाया दुर्निवारत्वाद्प्रतिकार्य्यत्वं तेन निजानां परमदैन्यं सूचितं सम्बोधनानुक्त्या पतिभाव एव दृढीकृत इति ज्ञेयम् ॥ १७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ननु यथान्यत्र सर्वत्र दोषदृष्ट्यातत्त्यागेनागमनं तथा मय्यपि कैतवाच्युतत्वादिदोषदृष्ट्या विरज्य विश्रम्यतामित्याशङ्क्यास्माभिरतिविरहदुःखेन तत्ताभिस्त्वद्विरहदुःखगतं दोषं मनोवैक्लव्येन त्वय्यारोप्य कचित्तथोक्तावपि नत्वायि निर्दोषपूर्णगुणविग्रहे दोषगन्धो नचानुरागिणीनां नो गुणे दोषारोपो गुणानां चानन्त्येन तद्दर्शिनां न ततो विच्छेदावकाश इति तव गुणदृष्ट्यैव त्वयि नो मनो मुह्यतीत्याहुः । रहसि संविदमिति । तव रहसि संविदं रहसि विजने कालिन्दीवनतटकुञ्जादिषु यत्सम्विदं सम्यगावेदनं मनोऽनुरागोत्साहादिभावानां यस्मात्तदवञ्चनवचनरचनं वीक्ष्य विशेषेण तात्पर्य्यावगतिपर्य्यन्तं ज्ञात्वा नो मनोऽतिस्पृहं सत्त्वयि मुह्यति स्नेहवैक्लव्येन मुग्धतामेति यद्वा उत्युत्कण्ठामुद्भावयति यद्वा ऽधुना वियोगदशायान्तु तदलाभेन मूर्छां मरणसंनिधानरूपामेति मुहुरतिस्पृहेति पाठेतु तद्वीक्ष्य वर्तमानानां नस्त्वद्विषयिण्यातिनिष्ठितस्पृहाभिलाषा जायते ततश्च मनो मुह्यतीत्यादिपूर्ववत् यद्वा स्पृहेत्यत्र सम्पदादित्वाद्भावे क्विप् ततश्च तृतीया तद्वीक्ष्य जातया स्पृहाभिलाषया मनो मुह्यति यद्वा रहसि त्वद्धृदये गोपितापि यास्मद्विषया संवित्समीचीनं ज्ञानं ताम्वीक्ष्य विविधप्रकारेण हृद्भावपिशुनैर्विभावैरीक्ष्य बुद्ध्वा शेषं पूर्ववत् तत्किम्भूतं हृच्छयोदयं हृच्छयस्य कामस्योदय उत्पत्तिर्यस्मात् यद्वा त्वद्विषयो हृच्छयः कामो नित्यमस्मद्धृदि शेते एव नतु तेनैवोत्पद्यते किन्तु हृच्छयस्यैवोदयो वृद्धिर्यस्मात् । एवं हृच्छयोदयस्य प्रहसिताननमित्यादि सर्वविशेषणत्वं यद्वा त्वन्मनसि तत्तद्भावैर्मुखेच हृच्छयस्योदयं जन्म वीक्ष्य परीक्ष्य प्रथमतो बालाभावदशायामपि नो मनसि त्वत्स्पृहा तया मनोमोहश्च तर्हि किमु वाच्यं तव हृच्छयोदयदर्शने यद्वा नः कामवीरत्वात्त्वयि तद्विजयाकाङ्क्षिण्यपि हृच्छयोदयं कामोत्कर्षं दृष्ट्वा ततोऽप्यधिकं तदुदयस्पृहा भवति तया च मनो मुह्यति तदेतत्सर्वथा तद्विजयेति त्वयि तदुदयस्पृहणं मनोमोहमात्रमेव यद्वा तव हृच्छयाय कामरणाय य उदय उद्यम आरम्भो वा तं तत्तद्भावैर्वीक्ष्येत्यादि पूर्ववत् यद्वा अन्तर्द्धानात्पूर्वं रतिविहारेऽनुभूतत्वात्तव रतिरणेऽपि मुहुः हृच्छयोदयं कामोद्धर्षचेष्टाविशेषं वीक्ष्य विशेषेण स्मृत्वा पुनस्तत्स्पृहा मनोमोहश्च भवति यद्वा कातरः सन् भीत्या मा पलायस्व कामवीराणामपि नो हृच्छयरणे ततस्तवैवोदयः उत्कर्षो भाति तं वीक्ष्य तत्स्पृहादि जायते तथा ते प्रहसिताननं वीक्ष्य नो मनस्यति स्पृहा जायते मनश्च मुह्यति मोहितं भवति विरहेतु तत्स्पृत्वातिस्पृहा मनसो मूर्च्छाच भवति तत्र प्रहसिताननमित्यत्र प्रकृष्टं मृदुसितस्निग्धमिश्राह्लादामृतमयं सितं यस्मिंस्तत्प्रहसिताननं मुखं विकासितकञ्जप्रसूनप्रभसुधाकरप्रायं वीक्ष्य यद्वा प्रहसितानि स्वन्यूनतयाक्षिप्तानि सर्वाण्यप्याननानि येन तदेवाननं वीक्ष्य यद्वा तादृक् प्रकृष्टहसितेन आ ईषदपि नकारो याच्ञानङ्गीकारो न यस्मिन् यद्वा प्रहसितेन नआननानां न्यूनताद्योतनेन आ समन्तात् ननेति याच्ञास्वीकार एव यस्मिंस्तद्वीक्ष्य तथापि किम्भूतं तत प्रेमवीक्षणं प्रेम्णा उत्कलितानुरागेणान्वितं वीक्षणं यस्मिंस्तत् यद्वा प्रेम्णा विविधं नानाभावकटाक्षान्वितमीक्षणं यस्मिन् यद्वा प्रेमविशिष्टे ईक्षणे नयने यस्मिन् यद्वा प्रेम्णैव वीक्षणं दर्शनं विशेषेणेक्षणं परीक्षणं वा यस्मिन् यद्वा प्रेम्णैव वीक्षणं दर्शनं यस्य प्रेमशून्यानां तद्दर्शनासम्भवात् यद्वा प्रेम्णैव विशेषेणेक्षणं किंस्वरूपमेतत् कीदृग्विचित्रचिदानन्दात्मकगुणवद्वायामिति ज्ञानं यस्य यद्वा प्रेमोदय एव वीक्षणे दर्शने विशेषतो गुणज्ञाने वा यस्य न कदापि निर्वेदसम्भावनं यद्वा मुखविशेषणाभावेऽपि तव प्रेमवीक्षणं प्रेमपूर्वकं वीक्षणं विविधमीक्षणञ्च वीक्ष्येत्यादि पूर्ववत् यद्वा तव प्रेम च वीक्षणं विविधमीक्षणञ्च वीक्ष्य शेषं पूर्ववत् हे बृहत् ब्रह्मन् सर्वगुणैर्वा बृहत् श्रेष्ठ ! तव उरो वीक्ष्य दृष्ट्वा विशेषेण वा गुणैर्गाढालिङ्गनसुखदानादिभिर्यथावत्परीक्ष्यावशेविशेषेण वा गुणैर्गाढालिङ्गनसुखदानादिभिर्यथावत्परीक्ष्यावशेनेतु विशेषेण तत्परतया संचिन्त्य वा शेषं समानं बृहदिति उरोविशेषणं वा तथा च स्वभावत एवोच्चतया तच्छोभोक्तिः उदारतया सुखदानेन वा बृहत्त्वम् अस्मदालिङ्गनोत्साहदेन विशे-

श्रीरामनारायणकृतभावभावविभाविका ।

षत उच्चतया वा बृहत् धर्मरूपतया वा बृहत् किंम्भूतं तव श्रियो धामेति शोभाया धाम निवासास्पदं श्रियः सर्वशृङ्गारैश्वर्य्यसम्पदाद्यधिष्ठातृदेवताया वा धाम गृह सर्वत्र चला अपि सा यत्रैव सर्वमपहाय नियतं वसति तद्वक्ष इत्यादि पूर्ववत् यद्वा श्रियः संबन्धि तव उरो वीक्ष्य यद्वा श्रियोऽपि बृहद्बहुमान्यं तदभिलषणीयमुरः वीक्ष्येति पृथगन्वयेन तव धाम तनुकान्तितेजो वा वीक्ष्य तव धाम मुख्यं नित्यविहारास्पदं श्रीमद्वृन्दावनम् एतत्पुलिनं च वीक्ष्येत्यादि पूर्ववत् तथा च सर्वेषां पृथक् पृथक् स्पृहामोहयोर्जनकत्वात्तद्वीक्षणेन तदुदयान्मुहुरित्युक्तं यद्वा त्वामत्र वीक्ष्य विशेषेण निविष्टमनस्त्वेन विविधच्छविविशिष्टं वा ईक्ष्य रहसि विजने दृष्ट्वा रहसि त्वदेकपरतयान्यभानशून्य हृदि अधुना स्मृत्वा वा वर्तमानानां नो ते त्वद्विषया मुहुरति स्पृहा भवति स्पृहाः भवन्ति ताभिश्च मनो मुह्यति मनोमोहः सर्वविस्मृत्या तत्रैव मुग्धत्वं वियोगे मूर्च्छा वा भवति कीदृशं त्वां संविदं समीचीनं विदिति वेदनं ज्ञानं स्वीयानां स्वस्मिन् भावप्रदं तद्भावप्रकाशकं तद्भावफलदानाय सानुग्रहं नानारसभावविभावादियुतस्य रहसि तासां हृदि स्वभावे संवित् यथावदपरोक्षं ज्ञानं वा यस्य यद्वा रहसि विजने मनस्यन्तर्भावावेदनं यस्मात्तादृक् सविनयवचनं यस्य पुनः कीदृशं त्वां हृच्छयोदयं हृच्छयस्य कामस्योदयो यस्मिन् किशोरवयसं हृच्छयस्यास्मकृत्सु उदयो जन्म यतः यद्दर्शनाद्विश्वोद्धारहारविहारायु यत्प्रेरणाद्वास्मन्मनसि मनोजजन्मान्यत्र कामाभावादिति भावः । यद्वा स्वदर्शनजनितस्य नो हृच्छयस्य वंशध्वनिनादौ समागमे पुनः सापाङ्ग दृष्टिस्यूग्निखननवत्स्थिरत्वापादकवचनैः पुनः पुलिनविहारादौ वाभिवृद्धिर्यस्मात् यद्वा हृच्छये रतिरणे उदयः समुद्यमस्तत्समये उदयस्तदुद्भावकविविधानिर्वचनीयचेष्टासमुदायो वा यस्य यद्वा स्वाङ्गशोभायां हृच्छयादपि उदय उत्कर्षों यस्य यद्वा सद्भिर्हेयस्यापि हृच्छयस्य सतां गेयत्वध्येयत्वाद्यापादक उदयो यस्मात् पुनः कीदृशं त्वां प्रहसिताननं प्रकृष्टेन हसितेनापि हृच्छयस्य युक्तमाननं यस्य प्रहसितानि सर्वेषां कामदेवादीनामस्मदादीनां चाननानि येनेत्यादि प्रहसितेनैव वाच्य स्वीकारास्वीकारौ च मुखविशेषणतयोक्तौ भगवद्विशेषणतया योज्यौ पुनः कीदृशं प्रेमवीक्षणं प्रेमान्वितं विविधभावभावितमीक्षणं दृष्टिः ईक्षणे लोचने वा तादृशे यस्य यद्वा प्रेम्णैव वीक्षणं यस्य प्रेमैव वीक्षणे यस्येत्यादि पूर्वं मुखविशेषणतया व्याख्यातं भगवद्विशेषणतया योज्यं पुनः किंभूतं त्वां बृहद्धर्म एव उरो यस्य यद्वा बृहदुदारं सुखदं स्वभावात् एवोत्तमालिङ्गनोत्साहेनैवोच्चं वा उरो यस्य पुनः कीदृशं त्वां श्रियो धाम लक्ष्म्यास्पदम् यद्वा चतुर्वर्गप्रेमनिधिं त्वां वीक्ष्य मुहुरतिस्पृहा मनो मुह्यति तदेकपरं भवति तत्र रहसि संविदमिति सम्यग्वेदनं स्वरूपसाक्षात्कारो यस्मादिति मोक्षप्रदत्वं हृच्छयोदयमिति कामसुखप्रदत्वं बृहद्धर्म एवोरो यस्येति धर्मनिधित्वं श्रियो धामेत्यर्थनिधित्वं प्रेमवीक्षणमित्यनेन प्रेमनिधित्वं वीक्षणेनैव प्रेमजनकत्वे वीक्षणस्य प्रेमान्वितत्वे हेतुः प्रहसिताननमिति ॥ १७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु किमर्थं परमेश्वरबुद्धिमाच्छाद्य रमणबुद्धिं कृतवत्यो ययेदानीं दुःखसागरे निमग्ना अतस्त्यज्यतां सा बुद्धिरित्याशङ्क्य तव स्वरूपमेव तादृशबुद्धिमुत्पादितवत् सा चेदानीमस्माभिर्निवर्तयितुमशक्येत्याशयेनाहुः । रहसि सम्विदः सङ्केता यस्मात् अलुगार्षः हृच्छयस्य कामस्योदयो येन प्रहसितमाननं यस्य प्रेमपूर्वकं वीक्षणं यस्य तथाभूतत्वाच्छ्रियः स्थानं तव बृहद्वक्षःस्थलञ्च पुनःपुनर्वीक्ष्य स्थितानामस्माकम् अतिस्पृहा जाता तयाचास्मन्मनस्त्वत्प्राप्त्यभावान्मुह्यते पुनःपुनर्वा मूर्च्छां प्राप्नोतीत्यर्थः । यद्वा भावकिवन्तः स्पृहा तथाचास्मन्मनो वीक्ष्य तया मुह्यतीत्यर्थः । अतिस्पृहमिति क्वचित्पाठः यद्वा स्पृहोत्पत्तौ कारणत्रयं रहसि सम्विद्रूपमेकं कामोदयकरं प्रेमपूर्वकं वीक्षणविशिष्टं प्रहसिताननमिति द्वितीयं श्रियो धाम विशालमुरश्च तृतीयं तथात्र त्वदीयं मोहिनीविग्रहमालोक्य दग्धकामो महारुद्रोऽपि यत्र मोहितस्तत्र ततःकोटिगुणितसौन्दर्य्यादिविशिष्टे त्वयि सति वराकीणामस्माकं व्यामोहे किञ्चित्रमिति भावः । अनभिज्ञापक्षे त्वद्दर्शनजन्यत्वदङ्गसङ्गस्पृहा त्वाद्वियुक्तानामस्माकं रोगरूपा सम्पन्नातःस्वाङ्गसङ्गेन तच्चिकित्सा त्वयावश्यं विधेयेत्याहुर्द्वाभ्यां पूर्वमस्माकं कामो न स्थितः तव प्रहसितयुक्तस्य मुखस्य दर्शनेनोदयं प्राप्तः प्रेमपूर्वकवीक्षणेन स्थिरताङ्गतः ततो रहसि सम्विदः सम्भोगचातुर्य्यसूचनेनातिसौन्दर्य्यविशिष्टस्य विशालस्योरसो दर्शनाज्जातेन स्वयोग्यताज्ञानेन चोत्कटोत्कण्ठातच्छान्तिस्पृहोत्पन्ना तद्विषयालाभात्तद्युक्तं मनः केवलं मुहुर्मुहुर्मुह्यते मृत्युरपि नायात्यत उभयत्र भ्रष्टानां जीवन्मरणाभ्यां रहितानामस्माकं धिग्जीवनमित्यर्थः । मानिनीपक्षे यद्यपि भवान् सम्प्रति परोक्षस्तिष्ठति तथापि त्वदीयमनसोऽवस्थां वयं सम्यगवगच्छाम इत्याशयेनाहुः । अस्मत्कृतं त्वत्तोषार्थं सङ्केतं तथा कामोदयहेतुभूतं प्रेमवीक्षणं प्रहसितयुक्तमस्मदीयं मुखं श्रियः स्थानमुरःस्थलं च वीक्ष्य तत्प्राप्तिस्पृहया तव मनो मुह्यति तथाप्यस्मद् दुःखार्थं तादृशं दुःखमपि सहसे न त्वागच्छस्यतः किं वक्तव्यमाश्चर्य्यं तव हठस्य माहात्म्यमिति भावः ॥ निवृत्तिपक्षे यद्यप्येवं तथापि कामिनोऽस्मदभिप्रायं नाशयन्तीत्याहुः । प्रमदाकृतां रहसि सम्विदं तथा तदीयं यथोक्तमाननं यथोक्तमुरश्च वीक्ष्य कामरूपेण स्थितस्य तव जातया स्पृहयास्माकं मनो मुह्यते तात्पर्य्यव्यत्यासं भजत इत्यर्थः ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वयं पुरुषोत्तमस्य भक्तहितायावतीर्णस्य मधुरवचनप्रहसितश्रीमुखावलोकनादिभिरुत्पन्नं त्वद्रमणमनोरथमस्माकं सफलं कुर्वित्याहुरन्याः । रहसीति द्वाभ्याम् । ते तव रहसि एकान्ते संविदं प्रहसितमाननं च हृच्छयोदयं च प्रेमवीक्षणं च श्रियो धाम बृहद्विशालम् उरश्च वीक्ष्य नोऽस्माकमति स्पृहा तया भवति मुहुर्वारंवारं मनो मुह्यति ॥ १७ ॥

व्रजवनौकसां व्यक्तिरङ्ग ! ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ॥
त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

भाषा टीका ।

कन्दर्पकी चेष्टा करवे वारो जो आपको एकान्तमें भाषण प्रेमभरी चितवन वारे हास युक्त आपको मुख तथा लक्ष्मी के वास को स्थान आपको विशाळ हृदय इनको बारंबार स्मरणहोवेते हमारो वडो मन ललचावेहै और मोहित होवैहै ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तव च व्यक्तिरभिव्यक्तिर्व्रजवनौकसां सर्वेषामाविशेषेण वृजिनहन्त्री दुःखनिरसनीति विश्वमङ्गलं सर्वमङ्गलरूपा चातस्त्वत्स्पृहात्मनां त्वत्स्पृहारूढमनसां नो मनागीषत्किमपि त्यज मुञ्च कार्पण्यमकुर्वन् देहीत्यर्थः । किं तत् स्वजनहृद्रोगाणां यदति गोप्यं निषूदनं निवर्तकमौषधं तत्त्वमेव वेत्सीति गूढाभिप्रायः ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अतोऽधुनेदं विधेहीति सर्वान्ते फलितं निश्चित्याहुः । व्रजेति । व्रजौकसां वनौकसां चेत्यर्थः । ते व्यक्तिः अवतारः प्राकट्यं वा अतोऽन्तर्धानमयुक्तमितिभावः । अङ्गेति प्रेमसंबोधने न केवलं वृजिनहन्त्री विश्वमङ्गलम् अशेषमङ्गलरूपा च अलमतिशयेनेत्यस्योभयतोऽप्यन्वयः ततो वृजिनस्यापुनरुद्भवत्वादिकं मङ्गलस्य च भक्तिप्रेमादिसंपत्तिपूर्वकप्रतिक्षणमभिनवसुखपरंपरातिरूपत्वमूह्यं स्वजनानां या हृद्रुजः कामाः किं वा उत्तापास्तासां नितरां सूदनं स्वजनत्वात्तव विदितमेवेति भावः । चकारशब्दप्रयोगः त्वत्प्राप्त्यर्थमेवातिस्पृहा किंवा तव या स्पृहा रिरंसा तस्यामेवात्मा मनो यासां नः ईदृशीरस्मान् प्रति यद्देयं स्यात् तद्देयमेवेति भावः । मनागिति परमदौर्लभ्येन याचकरीत्या वा वस्तुतस्तु हृद्रुजामिति बहुत्वेन निःशब्देनच तथा तद्विषयककामना निवर्त्यत्वेन प्रत्युत सदा नवीनवत्तया वर्द्धिष्णुत्वेनैव निरन्तरविविधप्रमपतिपामिप्रेता अन्यैर्व्याख्यातं यद्वा हे स्वजन त्वत्स्पृहात्मनां नो या हृद्रुजस्तासामिति ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं भवतैव निजेहृच्छयोदयस्य व्यञ्जनयास्मासु ते ते नाना भावा जन्यन्ते हृत्तास्य हृच्छयताप एवमेवं शान्तः स्यादिति भावनया स्वयमभावभावितत्वेन तत्तद्भासनोदयात् । यतो ऽस्माकं त्वयि स्नेहः स्वभावजत्वान्मूलवत्तर इति द्योतयन्त्यस्तादृशस्नेहमयाभिलाषविस्फुरद्धृदयाः सदैन्यं निवेदयन्ति । व्रजेति द्वाभ्याम् । व्रजौकसां वनौकसां चेत्यर्थः । व्यक्तिः प्राकट्यम् अतोऽन्तर्द्धानमयुक्तमिति भावः अङ्गेति प्रेमसंबोधने न केवलं तेषां वृजिनहन्त्री अशेषस्यापि मङ्गलरूपा वृजिनहन्त्री । यद्वा तेषामेव सर्वसुखदा च अलमतिशयेनेत्यस्योभयतोऽप्यन्वयः अतो नः सम्बन्धे दुःखशमकं किमपि देहि ननु व्रजौकस्त्वेन भवतीनामपि तत्तद्दुत्पातजदुःखशान्त्यादिकं भविष्यत्येव किमन्यत्त प्रार्थयध्वे तत्राहुस्त्वयि त्वत्प्राप्त्यर्थमेव या स्पृहा तस्यामेवात्मा मनो यासां तासां नः ननु व्रजवनौकसामपि मत्स्पृहास्ततः कोविशेषस्तत्राहुः । स्वजनेति । तेष्वपि स्वजनविशेषो ऽस्मद्विधस्तस्य हृद्रुजां यन्निषूदनमिति मनागिति परमदौर्लभ्येन याचकरीत्या वा वस्तुतस्तु हृद्रुजामिति बहुत्वेन निःशब्देन च तथा तद्विषयककामनानिवर्त्यत्वेन प्रत्युत सदा नवनवतया वर्द्धिष्णुत्वेनैव निरन्तरं तद्वैविध्यमभिप्रेतम् ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

व्रजवनौकसां गोपानां मुनीनां च व्यक्तिरवतारः त्यज देहि मनाक् ईषत् रुजां हृद्यक्लेशानाम् ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अङ्ग ! हे कृष्ण ! तवाभिव्यक्तिरवतारो गोपानां मुनीनां च वृजिनहन्त्री पापनिरसनी दुःखनिरसनी वा विश्वस्य मङ्गलं मङ्गलावहा वा त्वत्स्पृहात्मनां त्वत्स्पृहारुग्णमनसां नोऽस्माकं मनागीषत् त्यज मुञ्च किंचिद्देहीत्यर्थः । किं तत् यत्स्वजनस्य हृद्रोगाणां निषूदनं निवर्त्तकमौषधं तत्तु त्वमेव वेत्सीति गूढोऽभिप्रायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदि भवानस्मदापदं न परिहरिष्यति तर्ह्ययमवतारो व्यर्थो भविष्यति न चैतद्युक्तम् अतोऽस्मद्दुःखं भवता अवश्यं परिहरणीयमिति भावेनाहुः । व्रजेति । भो अङ्ग ते तवेयं व्यक्तिरवताररळक्षणा व्रजौकसां गोपानां मार्गौकसां तीर्थसाधानां वा निश्चौकसां ग्रामवासिनां वा वनौकसां वनवासिनां वा सन्न्यासिनां वानप्रस्थानां वा जलाश्रयाणां वा अळमत्यर्थं वृजिनहन्त्री दुःखनाशिनी यद्यस्मा त्वयि स्पृहा यस्य स त्वत्स्पृहः आत्मा यासां तास्तथा तासां नश्च युष्मद्विषयं मनाक् ईषदपि भजे सामान्योक्त्या पुनरुक्तं कुर्वन्ति स्वजनेति विश्वमङ्गलं यद्व्यक्तं रूपं स्वजनस्य हृद्रुजाम् अन्तर्गत रोगाणां निषूदनं निर्मूलकरं तस्मादस्माकं स्वजनैकत्वादभीष्टं भवता कर्तव्यमिति भावः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तस्मादिदं ते नोचितमित्याहुः । व्रजवनौकसामित्यादि । हे अङ्ग ते तव व्यक्तिः प्रकाशः व्रजवनौकसां वृजिनहन्त्री दुःखनाशिका अलमत्यर्थं विश्वमङ्गलम् अतो व्रजौकस्त्वेन विश्वान्तर्गतत्वेन चास्माकं

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तव प्रकाशो वृजिनहन्त्वैव तस्मात्त्वत्स्पृहात्मनां यन्निषूदनं मारकम् अदर्शनं तत् मनाक्च त्यज मुञ्च तत्र कुर्वित्यर्थः । हे स्वजनबन्धो ! नोऽस्माकं कीदृशीनां हृद्रुजां हृदि रुक् यासां यद्वा नोऽस्माकं हृद्रुजांयान्निषूदनं नाशकं दर्शनं तत् मनाक्च त्यज वितर देहीतियावत् त्यजिरत्र दानार्थः स्वजनानां हृद्रुजामिति समासे एकं वा पदम् ॥ १८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

पुनरनन्यपूर्वा एतावत्कालं मनोरथाभिनिविष्टा किंचित्प्रार्थयते । व्रजवनौकसामिति । इयं ते व्यक्तिः व्रजवनौकसां वृजिनहन्त्री पापनाशिका विश्वस्याप्यलर्थं मङ्गलरूपं दोषनिवर्त्तकं विशेषाकारेणास्माकमेव गुणाधायकं सर्वेषाम् अत एतादृशं मनाक् त्यज त्यागावश्यकत्वे हेतुः । त्वत्स्पृहात्मनामिति । त्वय्येव स्पृहायुक्तः आत्मा अन्तःकरणं यासां किं त्यक्तव्यमित्याशङ्कायामाहुः स्वजने स्वजनानां गोपिकानां हृद्रुजां हृदयरोगाणां कामरूपाणां यदेव निषूदनं भवति नितरां सूदनं नाशनं यस्मात् केषांचित्फलदाता तादृशोऽस्माकं रोगनिवर्त्तको भवत्विति ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च । कुलवधूनां निरपराधानामस्माकं त्वयैव सम्मोह्य रात्रौ वनमानीतानामौत्कण्ठ्याग्निना केवलं प्राणदाहनमेव न तवाभिप्रेतं किन्तु स्वाङ्गसङ्गदानेन प्राणपालनमपीत्यत्र हेतुमाहुः। तव व्यक्तिरभिव्यक्तिः व्रजवनौकसां सर्वेषामेवाविशेषेण विश्वमङ्गलं सर्वाणि मङ्गलानि यत्र तद्यथा स्यात्तथा वृजिनहन्त्री दुःखनिरसनी अतस्त्वत्स्पृहात्मनां त्वत्कर्तृका या स्पृहा अस्मद्दर्शनोत्था तस्यामेवात्मा तत् सम्पूरयितुं कामं मनो यासां तासां नः मनाक् ईषच्च किमपि त्यज मुञ्च कार्पण्यमकुर्वन् देहीत्यर्थः। तदेव किं तत्राहुः । स्वजनहृद्रुजां युष्मज्जनकुचरोगाणां यन्निषूदनमुपशामकमौषधं करकमलमित्यर्थः । तदेव यदि अस्माभिः कुचेष्वर्पयितुं प्राप्यते तदा तेनैव त्वत्स्पृहां पूरयित्वा स्वप्राणाः पाल्यन्त इति भावः ॥ १८ ॥

केन चित्कृता विशुद्धरसदीपिका ।

किञ्च । व्रजेति । अङ्गेति प्रेमसम्बोधनम् अत्रापि नामानुक्तिः पतिभावनयैव ते व्यक्तिः प्राकट्यं स्वरूपम्वा यद्वा व्यक्तिः प्रादुर्भाव एव न तिरोभाव इत्यर्थः व्रजेति व्रजौकसां वनौकसां चेत्यर्थः एवञ्चककस्य तत्र तूभयम् अतोऽन्तर्द्धानमयुक्तमिति भावः वृजिनहन्त्री न केवलं तेषामेव किन्तु विश्वस्यापि मङ्गलं मङ्गलरूपा यद्वा तेषामेव सर्वसुखरूपा यथा स्यात्तथा वृजिनहन्त्री अलमित्युभयान्वितं ननु किन्तद्वृजिनं यदर्थमेवं प्रार्थ्यते तत्राहुः। अहो नास्माभिस्त्रपया वक्तुं शक्यते त्वत्स्पृहात्मनामस्माकं तव स्वजनानां हृद्रोगनिषूदनं यत्किमपि तत्त्यज झटिति देहीत्यधीरत्वं स्वजने

इत्यन्तर्वर्तिनीं विभक्तिमाश्रित्य देवदत्तस्य गुरुकुलमित्यादिवदन्वयः अत्र स्वजनशब्देन स्वकीयाभावो दृढीकृतः यद्वा स्वजनेति सम्बोधनं ततश्चावश्यं हृद्रोगप्रतीकारः कर्त्तव्यः ॥ १८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवमस्माकमन्यसर्वत्यागेऽपि त्वयि निर्वेदाभावादलाभेनागत्या निर्वेदमाशंसन्तीनामपि त्वच्चेष्टागुणस्मरणादिभिः कदापि तत्संभावनाया अप्यनुदयान्न त्वां विना कथञ्चिद्विश्रान्तिस्तयाप्यस्मैदैन्येनात्मप्रकृतानुग्रह एव विधेय इत्याहुः । व्रजवनौकसामिति । अङ्गेति प्रियसम्बोधनं हे प्रियेति तथाच न प्रियस्य तवाप्रियाचरणं प्रियाचरणे विलम्बो वा युज्यते यद्वा अङ्गेति सम्बोधनेन अङ्गसङ्गेनैवानङ्गोपशमो नान्यथेति भावः यद्वा अङ्गवियोगेऽस्माकमङ्गवियोग एव भाव्य इति व्यङ्गः व्रजवनौकसां व्रजे व्रजमण्डले यानि वनानि तेषु ओकांसि गृहा एषामिति व्रजगतसर्ववनवासिनां ते व्यक्तिर्नित्याविर्भावः सैव च तेषां वृजिनहन्त्री वृजिनानां दुःखानां चाभावप्रयोजिका विश्वमङ्गलं सर्वमङ्गलरूपा च नियतलिङ्गतया व्यक्तिविशेषणत्वेऽपि षण्डत्वं तथाचोक्तं ब्रह्मणा—

> तद्भूरिभाग्यमिह जन्म किमप्यटव्यां
> यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ॥
> यज्जीवितन्तु निखिलं भगवान्मुकुन्द
> स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेवेति ॥

सर्वव्रजवनौकसां त्वदेकजीवनत्वे किमु वाच्यं वृन्दावनवासिनां सुतरामस्माकं यद्वा व्रजौकसाङ्गोपालादीनां वनौकसां मृगपक्षिद्रुमगुल्मलतादीनाञ्च यद्वा व्रजन्तीति व्रजा जङ्गमास्तेषां वने एवौको निवासो येषामिति तत्रैवाचलतया निवसतां स्थावराणाञ्च ते व्यक्तिरेव वृजिनहन्त्री सर्वमङ्गलरूपा च यदा स्थावराणामपि त्वद्व्यक्त्यैव शोषादिदोषवृजिनव्रजनं विकासादिरूपप्रहासादिविविधसर्वमङ्गलञ्च तदा किमु वाच्यं चेतनानां पशुमृगादीनां सुतरां धीमतां मनुष्याणामतितरामस्माकं यद्वा विश्वमङ्गलमिति त्वदीया व्यक्तिः सर्वक्षेमाय ब्रह्मप्रार्थनया विश्वस्य मङ्गलं यदा स्मरतां स्मरणमात्रेण मङ्गलं वृजिनहन्त्री च तदा किमु वाच्यं व्रजवनौकसामिति तथा च यतो व्रजे त्वद्व्यक्तिरेव नित्यं संनिहितो हरिरित्यादिशास्त्रसिद्धान्तेऽन्तर्द्धानस्यैवान्तर्द्धानं योग्यं तथा विश्वमङ्गलत्वे वृजिनहन्त्रीत्वेतु सुतरां व्रजवनौकसां तथात्वे ऽस्माकमेव वृजिनाहननममङ्गलाचरणं चान्याय्यं ननु सर्वव्रजसामान्येन युष्माकमपि गोवर्द्धनोद्धारणादिभिर्वृजिननाशः कृत एव को भवतीनां विशेषो येन तथोच्यते किंवा वृजिनमिन्द्रकृतवातवर्षासुरोत्कर्षोयद्दर्शनात्तत्राहुः। त्वत्स्पृहात्मनामिति त्वय्येव स्पृहाआत्मनि मनसि यासां यद्वा त्वय्येव स्पृहा आत्मानः प्राणाश्च यासां त्वत्स्पृहामय्यो वा तासां तथा च त्वां विना क्षणविश्रामाभाव एव विशेषः तथा बाह्यवृजिनाभावेऽपि मनोव्याप्तस्पृहारूपं वृजिनं त्वत्प्राप्त्यैकनिवर्त्यमिति हे स्वजन स्वीया एव वयं गोपीजना न परकीया यस्य यद्वा स्वीय एव जनो नान्यदीयस्त्वं यद्वा स्वीयेषु जनिः प्रादुर्भावो यस्य तथाच स्वीयास्वस्मासु तिरोभावो नोचितः यद्वा स्वः स्वात्मैव प्रादुर्भूतस्तथा च यदा स्वात्मन्यध्यस्तप्राणावयोगे जीवनासंभवस्तदा किमु

श्रीरामनारायणकृतभावभावविभाविका ।

तिरोभावो व्यंसकतास्फूर्तिप्रदस्वात्मविरहेक्षणं स त्वं च न च कथं स्वात्मना मया वियोगसम्भव इति वाच्यम् अघटनघटनापटीयस्या त्वदिच्छया सर्वसम्भवात् तस्मात्त्वमेव कृपया हृद्रुजां निषूदनं यत्तत् मनाक् त्यज नोऽस्माकं देहि स्वजनानां नो हृद्रुजामिति वान्वयः ननु किं प्रार्थ्यते तद्ब्रूत तत्राहुः । यदिति । अत्रायमभिप्रायः मुखं दर्शय चरणं स्तनेष्वर्पयेत्याद्येकैकोक्तौ तदेव भवेदिति तत्स्पृहाशान्तावप्यन्यविधया स्पृहया दुःखाशमोऽतो हृद्रुजामिति बहुवचननिर्देशेन नास्माकमेक एव रोगः किन्तु विविधत्वद्विषयकस्पृहाव्याप्तानां तद्विषयप्राप्त्यभावे सर्वास्ताः स्पृहारुज एवातस्तासां नितरां सूदनम् अभिलषणीयनित्यप्राप्त्या स्पृहारुजां निवर्तनं देहि तत्र यदिति सर्वनामपदप्रयोगात्सर्वरोगनिवर्तकसंग्रहो विवक्षितः तद्वीक्षया वा सर्वसंग्रहः तत्सर्वस्य लज्जया वक्तुमनर्हत्वाद्वा सर्वनामनिर्देशः तव सर्वमर्मज्ञत्वेन कथनप्रयोजनाभावाद्वा सर्वनामोक्तिः प्रार्थनीयानां बहुत्वेन कथनाशक्तौ बहुकथने कालविलम्बे जीवनाशक्त्या वा प्रार्थनीयसुखस्य वाचामगोचरत्वाद्वा तथोक्तिः मनागिति एकदैव युगपदित्यर्थः । ननु मनाक्किंचिदर्थकमिति वाच्यं भगवत्स्वरूपपूर्णसुखस्य किंचित्त्वानुपपत्तेः दैन्येन तथोक्तिसम्भवेऽपि स्वसाधनबलेन फलप्राप्तिसम्भावनया न्यूनसाधने सर्वफलानुपपत्तेर्भेदेऽपि प्रार्थनासङ्कोचो ननु तदनुग्रहाधीनफलप्राप्तौ तदनुग्रहेण सर्वसम्भवे स्वसुखे सङ्कोचप्रयोजनासम्भवात् ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

स्वदुःखनिवृत्तेरनायाससाध्यतामावेदयन्ति । व्रजेति । हे करुणानिधे ! तवाभिव्यक्तिः सर्वेषां व्रजौकसां वनौकसां च विशेषेणात्यर्थं वृजिनहन्त्री दुःखनिरसनी अतो दुःखप्रदानायाल्पधीत्वमनुचितमितिभावः । किञ्च विश्वस्य सर्वस्यात्यर्थं मङ्गलरूपा तथा च विशेषसम्बन्धवतामस्माकं सम्प्रति विपरीतासम्पन्नेत्यहोऽस्मद्भाग्यमहिमेतिभावः । अतः स्वाभिव्यक्त्यनुरूपैव चेष्टान्याय्येत्याशयेनाहुः । नोऽस्माकं मनागीषदायासरहितत्यागं किंचित्त्यजास्मभ्यं हि अनादरेणापि त्वया दत्तेऽस्मत्कार्यं भविष्यतीति ज्ञापयितुं त्यजेत्युक्तं यतस्त्वय्येव स्पृहायुक्त आत्मा अन्तःकरणं यासां तथा च उत्कटस्पृहायुक्तान्तःकरणानामादरानादरविचारः कुतस्त्य इतिभावः । किन्त्याज्यमित्याकाङ्क्षायामाहुः । स्वजनानां गोपीनां हृद्रोगाणां यदेव नितरां सूदनं नाशनं भवति तदेव तदभिज्ञस्त्वं देहि तन्नाम न वक्तव्यमिति भावः । मनागिति याचकरीत्या वस्तुतस्तु हृद्रुजामिति बहुवचनेन निषूदनमित्यत्र निशब्देनच चिरकालं निरन्तरं मङ्गलोत्तराङ्गसङ्गसुखप्रार्थनीयत्वेनाभिप्रेतं ध्वनितम् अनभिज्ञपक्षे स्वरोगोपशामकौषधप्रदानोत्साहमुत्पादयितुं याचकरीतिमनुसरन्त्यः स्तुवन्ति तव व्यक्तिर्जन्म वृजिनस्य दुःखस्य पापस्यच हन्त्री अनेन सर्वदुर्गाणि यूयं मञ्जस्तरिष्यथेति गर्गाचार्येणोक्तत्वात् पूतनादिसंहारेण नलकूवराद्युद्धारेण च तत्त्वस्यानुभूतत्वाच्च किञ्च नैताव दपितु सर्वस्यापि मङ्गलरूपा तव जन्मप्रभृति क्वाप्यमङ्गलस्यादर्शनात् एवं स्तुत्वा स्वाभिमुखं प्रियमालक्ष्याहुः मनागीषत् नतु बहु तत्रापि त्यजावश्यं त्यक्तव्यमेव देहीत्यत्र प्रवृत्त्या किन्तदित्यपेक्षावन्तमिवालक्ष्य भिक्षुप्रदप्रसारणन्यायमाश्रित्याहुः स्वजनेति । तथाच केषांचिद्दुःखस्य नाशकः केषांचित्पापस्य निवर्तकः केषाञ्चिन्मङ्गलरूपफलविशेषस्य प्रदाता अस्माकन्तु रोगस्य निवर्तको भव नात्र कार्पण्यं तवोचितमिति भावः मानिनीपक्षे जन्मप्रभृति यादृशस्तवस्वभावः स्थितः संप्रत्यपि तथाभूत एवास्माकमपेक्षितः इत्याशयेनाहुः । व्रजेति । तथाच यथास्माकमपि दुःखं न भवेन्मङ्गलञ्च स्यात्तथा त्वयानुष्ठेयमिति भावः तर्हि कथमेवं भवेदितिचेत्तत्राहुः । त्यजेति । हे स्वजन नोऽस्माकं यत्तद्धृदयकान्तीनां निषूदनमीषदौदासीन्यं तत्त्यज यतस्त्वत्कर्तृका या स्पृहा तस्यामात्मा मनो यासां त्वत्कृतमानाशक्तचेतसां तथाच सम्प्रति स्वीकृतमीषदौदासीन्यं विहायागत्य पूर्ववत्प्रार्थनादिकं कुर्वित्याशयः निवृत्तिपक्षे तस्माद्यथास्मत्संरक्षणं जीवानां समुद्धारश्च भवेत्तथा त्वया कृपा विधेयेति प्रार्थयन्ते । व्रजेति । व्रजस्य वेदस्य संसारारण्यपतितानां जीवानां चातिवृजिनहन्त्री सर्वानर्थनिवृत्तिकरी तथा विश्वस्यालमङ्गलरूपा परमानन्दाविर्भावकरी हे परमात्मन् ! तव व्यक्तिः साक्षात्कारः तस्मात्स्वजनानां स्वभक्तानामज्ञानाहङ्कारादिलक्षणरोगाणां यन्निषूदनं तदस्मत्सम्बन्धिविज्ञानलक्षणं किञ्चित्स्वजनेभ्यो देहि यतस्त्वद्विषया या स्पृहा जिज्ञासा तत्कर्तव्यतायामात्माभिप्रायो यासां तथाचौपनिषदेन विज्ञानेन स्वजनानुद्धरेति भावः ॥ १८ ॥

श्रीमज्जुकदेवकृतसिद्धान्तप्रदीपः ।

ते तव श्रीसर्वेश्वरस्य सर्वात्मनः व्यक्तिरभिव्यक्तिः प्रादुर्भावः विश्वमङ्गलं सर्वमङ्गलरूपा व्रजवनौकसां सर्वेषामविशेषेण वृजिनहन्त्री दुःखनिरसनी अतः अङ्ग हे श्रीकृष्ण ! त्वत्स्पृहात्मनां त्वत्स्पृहायुक्तमनसां मनाक् ईषत्किमपि त्यज मुञ्च देहीत्यर्थः किं तत् यत् स्वजनहृद्रोगाणां निषूदनं निवर्तकमौषधमिति गूढोऽभिप्रायः ॥ १८ ॥

भाषा टीका ।

आप को जन्म वृन्दावन वासि सब प्राणिन के दुःख पाप हरबे को और संसार के मङ्गल करबे को भयो है हमारो मन आप के विषे अत्यंत है हृदयकी पीडा के नाश करबे वारो जो आप को अधरामृत थोडो सो हम को भी दे देवो ॥ १८ ॥

---

[1]यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय ! दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किं स्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां दशमस्कन्धेपूर्वार्धे रासक्रीडायां गोपिकागीतकथनं नाम
एकत्रिंशोऽध्याय ॥ ३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतिप्रेमधर्षिता रुदत्य आहुः । यदिति । हे प्रिय ! यत्ते तव सुकुमारं पदाब्जं कठिनेषु कुचेषु संमर्दनशङ्किताः शनैर्दधीमहि धारयेम वयम् त्वं तु तेनाटवीमटसि नयसीति पाठे पशून् वा कांचिदन्यां वा आत्मानमेव वा नयसि प्रापयसि ततः तत्पदाम्बुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथंनु नाम न व्यथेतेति भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एतावत्पर्यन्तं निजेष्टमेव बहुधा प्रार्थितमुपसंहारे च श्रीभगवतो वनाटनमनुसन्धाय तेनच श्रीपादाब्जयोर्व्यथां सम्भाव्य निजप्रार्थितमप्यनादृत्य प्रेमभरप्रधर्षिताः केवलं तत्सुखमेव प्रार्थयमाना रुदत्यः आहुः । यदिति । अम्बुरुहरूपकेण सिद्धेऽपि सुकोमळत्वे सुजातेति विशेषणं ततोऽपि परमकोमलत्वविवक्षया भीता इत्यत्र शनैरित्यत्र हेतुः कर्कशेष्विति श्लेषेणैवं निजानित्यं नवयौवनं तेन दुःखाधिक्यञ्च निवेदितं दधीमहीत्यत्र हेतुः हे प्रियेति प्रियत्वेन तेष्वेव तस्ययोग्यत्वात् एवंपूर्वोक्तनळिनसुन्दरमपि स्वानुभवेनदूरीकृतं तेनाटवीमटसि अधुना निशि वने भ्रमसीत्यर्थः । यद्यपि प्रेमोद्रेकवैवश्यात् पूर्वोक्तानानुसन्धानेन पौनरुक्त्येऽपि नैव दोषप्रसङ्गः किन्तु गुण एव तथापि चळसीति पूर्वं दिवाभ्रमणमुक्तम् अधुना चाटवीमटसीत्यनेन रात्राविति भेदः कल्प्यः दिने गोचारणाय तृणमयप्रदेश एव परिभ्रमणात् कूर्पादिभिः सम्बन्धो न स्यादित्युक्तमेव रात्रौ चाधुना सम्भवेदेवेत्युक्तं कूर्पादिभिरिति आदिशब्दात् कर्करादयः यद्यपि श्रीवृन्दादेव्यादिप्रयत्नेन श्रीवृन्दावनस्वभावेनच तेषामपि तत्र सत्ताशङ्का नास्ति तथापि अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्तीत्यादिन्यायेन तासां सा सञ्जायेतैव अतः स्वयमेवोक्ताङ्क्षिविदिति भ्रमति मुह्यतीत्यत्र हेतुः भवदायुषामिति अतस्तैर्व्यथा सास्मज्जीवन एवोत्पद्यते तदधुना प्राणान् धारयितुं कथंचिदपि न शक्नुम इतिभावः एवमधुना मूर्च्छया पूर्वतोऽप्याधिकव्यथा सूचिता नयसीति पाठे गच्छसीत्येवार्थः नय पय गताविति धातोः सर्वान्ते वचनमिदं श्रीराधादेव्याः स्वजनेत्यादिना स्मारितायाः इव ज्ञेयं तत्र च हृद्रुजां निषूदनमिति तेन पादाब्जेनाटव्यटनमेव हृद्रुजः ततो निवृत्तिरेव तन्निषूदनमित्यर्थः । तथापि सन्दर्शने पर्यवस्यत्येव न इति बहुत्वं निजसखीवर्गाभिप्रायेण एवं श्रीचरणारविन्दस्य परमकोमलत्वेन वनपरिभ्रमणव्यथामाशङ्क्य तदुद्दिश्य वारद्वयमुक्तम् अतः स्तनेषु तस्य धारणमपि वारद्वयं प्रार्थितं सारङ्गाणां पदाम्बुजमित्यादिन्यायेनैव तात्कालिकदैन्येन भक्त्या तस्मिन्नेवासक्तेः तथा श्रीमदधरामृतमपि वारद्वयं प्रार्थितं तस्यैव निजजीवनहेतुत्वात् तथा श्रीमुखस्य च मुहुर्वर्णनं तेनैव विशेषतो मोहितत्वात् एवमन्यच्चोह्यं सहृदयैस्तदेकरसिकैरित्येषा दिक् ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिण्याम्
एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु कास्ता हृद्रुजः किं वा तन्निषूदनमित्यपेक्षायां रुदत्य इवोद्दिशन्ति यदिति । अम्बुरुहरूपकेण सिद्धेऽपि सुकोमलत्वे सुजातेति विशेषणं ततोऽपि परमकोमळत्वविवक्षया शनैरित्यत्र हेतुः भीता इति तत्र च हेतुः । कर्कशेष्विति । स्तनेषु दधीमहीत्यत्र हे प्रियेति प्रियत्वेन ह्येव तत्रापि स्तनेष्वेव धारणस्य योग्यत्वात् तेनाटवीमटसि अधुना निशि वने भ्रमसीत्यर्थः । स एव चरणस्यैव धारणे पुनः पुनस्तदुल्लेखे च हेतुरुक्तः अनिष्टाशङ्कया तत्रैव बर्धितस्नेहातिशयत्वात् पूर्वं गोचारणाय तृणमयप्रदेश एव परिभ्रमणात् प्रायिकत्वेन शिलेत्याद्युक्तं सम्प्रति तु कर्कशप्रायत्वेन दृश्यमाने पुळिनोपरितनयमुनातटे भ्रमणात् कूर्पादिभिरिति यद्यपि तदानीं श्रीवृन्दादेव्यादिप्रयत्नेन श्रीवृन्दावनस्य स्वभावेन च तेषामपि तत्र तत्राशङ्का नास्ति तथापि अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्तीत्यादिन्यायेन शङ्का तासां सा सञ्जायेतैव भ्रमति मुह्यति अत्र हेतुः भवदायुषामिति इत्थमेवोपक्रान्तं त्वयि धृतासव इति मध्ये चाभ्यस्तं चळसि यद्व्रजादिति अतस्तैर्या व्यथा सास्मज्जीवन एवोत्पद्यते तदधुना प्राणान् धारयितुं कथं चिदपि न शक्तुम इति भावः । तदेव तादृशाशङ्का एव हृद्रुजः तन्निषूदनं च स्वयमेव परमप्रियतमाङ्कसळाळनसुखनिवासनमेवेति द्रुतमेव समागच्छेति भावः । नयसीति

---

१ अयंश्लोकः श्रीविजयध्वजमते नास्ति ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

पाठे गच्छसीत्येवार्थः । नय पय गताविति धातोः तदेव तासां सर्वस्यापि भावस्य प्रेमैकमयत्वे स्थिते श्रीभगवतोऽप्येवमेव ज्ञेयं हन्तेमा मयि प्रेमैकमय्य इत्यादिभ्यः परमसुखमयात्मदानमेव समञ्जसं तच्च योग्यत्वादेवमेवमित्यालोच्य तादृशप्रेमविलासमयतत्तदिच्छा जायते इति एवमन्यदप्यूह्यं सहृदयैस्तदेकरासिकैरिति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्

एकत्रिंशोऽध्याय ॥ ३१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तत् पदं कूर्पादिभिः तीक्ष्णशिलादिभिः किं व्यथते व्यथत एवेति धीर्भ्रमति भवदायुषां त्वदधीनजीवितानाम् ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आतिप्रेमधर्षिता रुदत्य आहुः । यदिति । हे प्रिय ! तव सुकुमारं पदाब्जं तन्नः कठिनेषु कुचेषु स्तनेषु संमर्द शङ्किताः शनैः धारयामः तेन पदाब्जेनाधुना ऽटवीमटासि चरासि नयसीति पाठे वनंप्रति पशूनात्मानं वा नयसि प्रापयासि तत्पदाब्जं कूर्पादिभिस्तीक्ष्णसूक्ष्मशिलादिभिः किंस्विन्न व्यथते कथं नु नाम न व्यथते व्यथते एवेति नोऽस्माकं धीर्भ्रमति अस्वस्था भवति कथंभूतानां नः भवानेवायुर्जीवनं यासां तथाभूतानां त्वदधीनजीवितानामित्यर्थः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कान्ता इवुजः किंवा निषूदनमित्यपेक्षायामाहुः । यत्त इति । विभ्रमा एव रुजः । तच्च स्तनेषु शनैस्तन्निधानमेव तन्निषूदनं अत एवैतदेव मुहुः प्रार्थितमिति भावः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एक त्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ प्रथमवक्त्र्य एवोपसंहरन्ति । यत्त इत्यादि । हे प्रिय ते तव यत् सुकुमारचरणाम्बुरुहं कर्कशेषु कठिनेषु स्तनेषु भीताः सत्यः शनैः दधीमहि बिभृम तेन चरणाम्बुरुहेण अटवीमटसि तत्किं न व्यथते अपितु व्यथते कैः कूर्पादिभिः अतः भवानेवायुर्यासां तासां नो धीश्चित्तं भ्रमति अनवस्थिता भवति अतःपरमटव्यटनाद्विरम प्रादुर्भूयतामिति वाक्यार्थेनोपसंहारः समवेता जगुः कृष्णमिति पूर्वाध्यायान्ते जगुरिति क्रियया जयतीति पद्यैर्गानमेव तासां ननु तदुदितं कविना पद्यैर्निबद्धं तेन रागतालस्वरसहितमेव गानमिदं तत्र च कौशलमवान्तरं बोद्धव्यं प्रतिपद्यं प्रथमपादाद्ये द्वितीयो वर्णः स एव पादान्तरस्य च द्वितीयं चाब्जरुहाननं चारु दर्शयेत्यत्र द्वितीय एव भवितुमर्हति जकारः स प्रथमोऽभूत् जड उदीक्षतमित्यत्र जकारस्थाने डकारस्तद्वर्ण्यत्वादिति स्खलितदोषो नाङ्गीकार्यः इदन्तु वैचित्र्यं गानस्य ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

काचिद्राजसतामसी सखेदमाह । यत्त इति । सुजातं यच्चरणाम्बुरुहं चरणकमलं भीताः सत्यः स्तनेषु शनैर्दधीमहि शनैर्धारणे हेतुः कर्कशेष्विति । प्रियेतिसंबोधनात् स्नेहाद्धारणं सुजातमिति यथा महत्सम्यक् प्रकारोत्पन्नं शीतलं सुगन्धितापनाशकं भवति अतः स्तनेषु स्थापनं प्रियत्वात् धार्ष्ट्येन स्थापनं तेनैवातिकोमलेन अस्मान् त्यक्त्वा अस्मद्द्वेषेण इदानीमटवीमटसि स्वयमस्मद्दुःखेन स्थित्वा यद्यन्यस्मै दुःखं दातुं शक्नुयात् तर्हि प्रयच्छेत् ननु स्वयमपि दुःखं प्राप्य तत्रास्माकं संदेहः किं व्यथते नवेति स्विदित्युत्प्रेक्षायां किं न व्यथते अपितु व्यथत एव कूर्पादिभिः शर्करादिभिः कूर्पशब्देन विषमाः शर्करा उच्यन्ते तर्हि व्यथत एव कथमुत्प्रेक्ष्यते तत्राहुः । भ्रमति धीरिति । बुद्धिः केवलं परिभ्रमति यदि व्यथत इति निश्चयः स्यात् तदा बुद्धिः शान्तैव भवेत् पुनर्यदा याति तेन संदेहः तत्र हेतुः भवदायुषामिति । भगवल्लीलार्थमेवायुर्यासां पूर्वन्तु खेदेन मनःपीडा निरूपिता इदानीन्तु मूर्छा निरूप्यत इत्यन्तास्थितिः एवं सर्वासां मूर्च्छापर्यन्त स्थितिर्ज्ञातव्या पुनर्लीलाप्रवेशे प्रलापः पुनः स्वरूपस्थितौ गानमिति एवं साधनपरीक्षयोर्यावत्तावत् तासां तापो निरूपितः ॥ १९ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे

अष्टाविंशाध्यायविवरणम् ॥ २८ ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु भो रसिकाः ! यत् प्रार्थयध्वे तन्मे चरणकमलं सम्प्रति वनभ्रमणसुखे निमज्जयतो युष्मत्कुचेषु स्थातुं नावकाशं लभते तत्र सरोदनमाहुर्यत्ते इति । तव सुजातमतिसुकुमारं यच्चर-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

णाम्बुरुहं स्तनेषु दधीमहि तेनापि भीता एव वयं तेन चरणाम्बुरुहेण अटवीम् अटसीति काक्वा हन्त हन्त कीदृशमनर्थमसमसाहसं करोषीति भावः । ननु कथं भीतास्थ तत्र विशिंषन्ति । कर्कशेष्विति । स्तनानां कठोरत्वमेव भयहेतुरित्यर्थः । किमिति तर्हि धत्थ तत्राहुः । हे प्रियेति । त्वं तेनैव स्वचरणार्पणे प्रीणासीति त्वत्सुखमालक्ष्यैवेति भावः । किञ्च । तदानीं चरणेन स्तनपीडने त्वत्सुखे साक्षाद्दृष्टेऽपि चरणसौकुमार्यदृष्ट्यैव व्यथावश्यं सम्भवेदेवेति शङ्कया अस्माकं खेदो जायत एवेत्यत आहुः । शनैर्दधीमहीति । त्वत्सख्येऽप्यातिशङ्कया खिद्यत्विमिति महाभावलक्षणमिदं तेन त्वत्संयोगेऽप्यस्माकं दुःखं विधात्रा ललाटे लिखितमेवेति ध्वनिः । किं कर्त्तव्यं तपोभिर्विधिं प्रति स्तनानां कोमलत्वे प्रार्थ्यमाने तव सुखं न स्यात् कर्कशत्वे च त्वच्चरणानां व्यथेत्युभयथैव सङ्कटमस्माकमित्यनुध्वनिः । भवत्वस्माकमेवं संयोगवियोगयोः कष्टम् । त्वन्तु स्वैरित्वेऽपि किं कष्टं सहसे यत्तेनाटवीमटसि किं चरणाम्बुरुहमेतदटव्यटनयोग्यमित्युपालम्भो व्यञ्जितः । ननु यदा यन्मे मनस्यायाति तदा तदहं करोम्यत्र भवतीनां किमित्यत आहुः । तच्चरणं न व्यथते किं स्विदपि तु व्यथत एव किन्तु त्वमेवास्मास्विव स्वाङ्गेष्वपि निर्दय एव । किम्वा एता मद्दुःखेनातिदुःखिन्यो भवन्ति तस्मादेता दुःखयितुं प्रवृत्तेन मया स्वदुःखमपि कर्त्तव्यं सोढव्यञ्चेत्याशयेन तां व्यथामपि सहसे किम्वा अस्मद्दुःखदर्शन एव तव महासुखमतस्तां व्यथामपि त्वं सुखमेव मन्यसे । किम्वा संसर्गजा दोषगुणा भवन्तीति न्यायेन यत् पूर्वं ते हृदयं कुसुमसुकुमारमासीत्तदेवास्मत्कठोरस्तनसङ्गेन सम्प्रति कठोरमभूत् यथा तथैव त्वच्चरणमपि स्तनसङ्गेनैव कठोरमभूदतः कूर्पादिभिरपि न व्यथते । किम्वा त्वच्चरणस्पर्शमाहात्म्यात् कूर्पादयोऽपि कोमला एव भवन्ति । किम्वा धरण्यैवातिकारुण्यात् त्वन्माधुर्यास्वादलोभाद्वा त्वच्चरणविन्यासस्थले स्वजिह्वा उत्थाप्यते । किम्वा त्वमस्मत्तोऽपि प्रेमसिन्धुर्दैववशादस्माद्विरहसन्तप्तो भ्रमन्नुन्माददशां प्राप्तः स्वचरणव्यथामपि नानुसन्धत्से इत्येवं नाना कारणानि परामृशन्तीनामस्माकं धीर्भ्रमति । नतु क्वापि निश्चयं लभते इति भावः । नन्वेतत् कियत् स्वदुःखं व्यञ्जयथ । अहन्तु तत्दुःखं दुःखं न मन्ये येन प्राणास्तिष्ठन्तीति चेदत आहुर्भवदायुषामिति भवति त्वय्येवायूंषि भवानेव वा आयूंषि यासां तासां कल्याणवति त्वयि स्थिते स्वेतावद्भिरपि कष्टैरस्मदायुषां न नाश इत्यर्थः । अयं भावः । भवानेवास्मान् दुःखयितुं प्रवृत्तो विधिरेतद्विचारयति स्म यद्यासामायूंषि सम्प्रत्यास्वेव स्थापयिष्यामि तदा मद्दत्तै रतिसन्तापैर्दग्धायुष इमाः सद्यो मरिष्यन्ति । ततोऽहं पुनः काभ्यो दुःखं दास्यामि तस्मादासामायूंषि मत्सधर्म्मणि मद्बन्धौ कृष्णे निधाय यथेष्टमिमा अम्रियमाणा अपारमेव दुःखं भोजयामीति अत एव वयम् न म्रियामहे । यद्वा । एवं धीरेव तदनिश्चयात्क्रमति । प्राणास्त्वस्माकं निश्चयेन देहाद्विर्गच्छन्त्येवेति त्वं सम्प्रति पश्येति भावः । नन्वायुषि स्थिते कथं नाशस्तत्राहुः । भवदायुषां त्वत्समर्पितायुषां स्वायूंषि तुभ्यमस्माभिः सम्प्रति दत्तानि । तैश्चिरं त्वं व्रजे खेलेति भावः ॥ १९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

एकत्रिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ३१ ॥

केनचित् कृता विशुद्धरसदीपिका ।

अथ तासामेतासां च परमदैन्येनाधीरप्रलपितमवकलय्य जातकारुण्या नित्यसहचर्य्यस्तदाकर्षणमन्त्रमिव तत्सुखप्रतिपादकमेकं वाक्यमतिगाम्भीर्य्येणाहुः । यदिति । हे प्रिय । प्रेमविषय यत्ते असाधारणं सुजातं परमकोमलं चरणाम्बुरुहं कर्कशेष्विति सर्वदा पुंमात्रास्पृष्टेष्वित्यर्थः । ततश्च कामासक्तिः परिहृता सख्यरुचेरुत्कटत्वादित्युक्तमुज्ज्वले यूथाधिपत्वे इत्यादिना स्तनेषु शनैर्दधीमहि नित्यं संधारयामः सम्वाहनायेति शेषः वर्तमानप्रयोगेण नित्यता सूचिता तत्र सम्वाहनं सुरतश्रमापनोदनायेति गोप्यत्वादप्रकाशत्वेनोक्तं भीता इति शनैर्द्धारणे हेतुः ततश्च सौकुमार्य्यं सूचितं वयं स्तनेषु धारयन्त्यो व्यथामस्त्वं तु कूर्पादिष्वपि धारयन्न व्यथस इत्यतिवैषम्यमिति भावः ततश्च तदेकसुखत्वं सौहृदविशेषश्चोद्दीपकचेष्टया व्यञ्जितः चरणाम्बुरुहमित्येकत्वं जात्यभिप्रायेण किम्वा द्वितीयस्य सङ्गोप्यत्वात्तथोक्तिः तेन चरणाम्बुरुहेण यद्वा तेन कर्कशत्वेनेत्यव्यवहितत्वादाक्षेपलभ्यम् एवञ्च स्वकृतमेव भुज्यते अस्माभिरिति विषादः अहो तिष्ठत्वस्माकं विरहदुःखमतिकर्कशस्तनस्पर्शदोषेण संक्रमितकाठिन्यं तच्चरणाम्बुरुहं कूर्पादिभिरतिसूक्ष्मैस्तीक्ष्णैः शिलाखण्डादिभिः तृणांकुरैश्च न व्यथते किं त्वत् व्यथत एवेत्यर्थः यद्यपि श्रीवृन्दावनतृणादीनि न तादृशानि तथाप्यनिष्टाशङ्कीनि बन्धुहृदयानीति न्यायेन जायेतैव शङ्केति तत्र हेतुः भवदायुषामिति भवत्सुखसुखीनां न इति पूर्वाभ्यो वैलक्षण्यमुक्तं धीर्भ्रमति निश्चयात्मिकापि दोलायते किं पुनर्मानसमिति भावः ॥ १९ ॥

इति श्रीभागवतेमहापुराणेदशमस्कन्धेरासपञ्चाध्यायीव्याख्याने

विशुद्धरसदीपिकायां तृतीयोऽध्यायः ॥ ॥ ३ ॥

मूलस्य एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तत्र बहुषु हृद्रोगेष्वन्यरोगाणां स्वदुःखैकहेतुत्वमेव एकस्य तु प्रियतमदुःखसम्भावनारूपतया सर्वतोबलीयस्त्वात्प्राधान्येन तमेव रोगमाहुः यत्ते सुजातेति । चरणाम्बुरुहमित्यत्रोपमावाचकेवादिशब्दाप्रयोगे तदात्मकत्वनिर्देशेन मृदुमञ्जुसुरभ्याल्हादकतापोपशमाद्यतिसादृश्यं विवक्षितं सुजातेतिविशेषणेनतु सर्वलोकोपमाधर्मेभ्यः उपमेयेऽतिशयसूचना ननु निश्चितसाध्यवान् दृष्टान्तः सन्दिग्धसाध्यवान्पक्ष इति न्यायविदां स्थितिरिति कथमुपमात उपमेये साध्यगुणातिशय इति तत्राहुः यदिति यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या मनोवाचामविषयत्वेन वर्णयितुमशक्यं "सर्वं

श्रीरामनारायणकृतभावभावविभाविका ।

वेदा यत्पदमामनन्तीतिश्रुत्या सर्ववेदतात्पर्यगोचरत्वेन चातिचित्रं तथाच पर्वते पक्षे प्रत्यक्षाभावेन प्रतिपादने सन्दिग्धेऽपि वह्नौ न महानसचुल्ह्यन्तर्गतनिश्चितस्वल्पाग्नेर्नातिशयः किन्तु दूरेऽपि भ्रमादिरिपुपराभावकधूमध्वजतेसस्ततोऽतिशय एवेत्याशयः तदतिशयगुणतोऽपि हेतुस्त इति सच्चिदानन्दघनस्य तव पदस्य तद्गुणानाञ्च "निश्चेतनात्मकशरीरगुणैश्च हीनः आनन्दमात्रकरपादमुखो दरादि"रित्यादिवचनैरानन्दमात्रत्वं तथा निर्दोषपूर्णविग्रह आत्मतन्त्रः किन्तु निर्दोषचैतन्यसुखानित्यां स्विकां तनुमित्यादिवचनैर्म्लानिविकृतिनाशादिदोषशून्यत्वंचरणाम्बुरुहस्य तद्युक्तत्वमिति महानुत्कर्षः तच्चरणाम्बुरुहं वयं हृच्छयादितापोपशमस्वाल्हादाद्यर्थं स्तनेषु दधीमहि अत्र चरणाम्बुरुहमित्याधेयस्यैकवचनेन स्तनेषु दधीमहीत्याधाराणां बहुत्वनिर्देशेन भगवच्चरणस्य विभुत्वमपि द्योतितमन्यथा परिच्छेदे त्वपरिमितस्तनेषु युगपद्धारणासम्भवः स्यात् तत्र प्रियइति संबोधनेन हेतुगर्भितेन प्रियत्वाच्चरणधारणमस्माकं युक्तमेवेति ध्वनिः तथापि चरणस्यातिमृदुत्वेन भीता अतः शनैरेव दधीमहि भीतौ हेतुः । कर्कशेष्विति । अत्र स्तनानां कर्कशत्वेन सर्वासां नवकिशोरवयस्त्वं तत्र बोध्यं त्वच्चरणस्य मञ्जुसुरभितापोपशमनाल्हादकत्वादिगुणाः स्तने धारणावश्यकत्वप्रयोजकाः मृदुत्वं तद्धारणे भीतिप्रयोजकमतस्तव चरणगुणैरेतस्तत आकृष्टमतयो वयं शनैर्दधीमहि तेन मृदुतमचरणेनाटमटसि इति वर्तमानार्थकप्रयोगेण वर्तमाननिशाकालद्योतनं तथाच मम गोचारकस्य स्वभावप्राप्तत्वात्किंताश्चिन्तयेति शङ्कायां यदा तवाह्नि परिदृश्यमानभूमिगुणदोषावसरे काननाटने शिलासदृशतृणांकुराद्यासादभयान्नो मनः कलिलतां याति तदा किमु वाच्यमधुना निशि तथा प्रकाशाभावे कूर्पादिव्याप्तयमुनावनेऽटसि तथा तदा बहुगोपबालसहकारेण तेऽपि त्वदेकप्राणाः तत्र कुपथगमननिषेधेन रक्षका भवेयुरधुना त्वाहूतमपि निजकिङ्करीपरिकरं विहाय एक एवाटसि किञ्च तत्र तु गोचारणं प्रयोजनमत्र तु न तथा किन्तु गवामिन्द्रियाणां चारणस्यास्मासु सम्भवेऽपि तत्कुलधर्मात्मकगोचारणत्यागेनापि केवलमस्मद्दुःखदानायाटवीमटसि तत्रापि त्वत्सुखभावनायां स्वदुःखमपि स्वीकुर्मस्तव सुखमपि नैव सम्भाव्यते प्रत्युत त्वच्चरणाम्बुरुहं किं कूर्पादिभिर्न व्यथते आपितु व्यथत एवेति तथाच गवां पशूनां चारणताळक्षणपरोपकाराय स्वचरणैर्वनगमनाचरणे स्वदुःखसहिष्णुना परमकृपालुसत्पुरुषेण भवतीति रक्षतीतिविद्यापि कुपुरुषैरप्यकार्य्यस्य सुखाभावेऽपि प्रत्युत स्वदुःखसम्भवेऽपि पराणां स्वचरणैकरतानां निजैकजीवनानां स्वयमाहूतानां विनयप्रार्थनावतीनां दुःखदानस्याचरणं कथमङ्गीकृतमिति नो धीर्भ्रमति तदुक्तं नीतिज्ञैः—

> ते वै मानुषराक्षसाः परसुखं स्वार्थाय निघ्नन्ति ये ।
> ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

यद्वा तेन कर्कशकुचेषु शनैर्धारणभयेनाटवीमटसि तत्किं शनैः स्तनस्पर्शेन व्यथतेऽधुना वनाटने कूर्पादिभिर्न व्यथते इति नो धीर्भ्रमति यद्वा नस्तव रमणसुखाय त्वद्भ्रमणेन सुखायच प्रवृत्तानां दुःखाय स्वदुःखस्वीकारेण भ्रमतस्तव सुखघनस्यापि दुःखक्रमेण नो धीर्भ्रमति अस्माकमात्मनोऽसह्यमपि वर्णितं दुःखजातं न तद्वदसह्यं यथास्मान्निमित्तभ्रमणे त्वत्पादकूर्पादिव्यथासम्भावितदुःखमसह्यमिति नो धीर्भ्रमति ननु मम दुःखेन किमर्थं भवतीनां खेदस्तत्राहुः भवदायुषां त्वदेकजीवनानां त्वत्खेदसम्भावनायां सद्यो मरणमिति भावः। तस्मात्त्वन्मिलनेनैव जीवनम् सर्वखेदोपशमश्चेति प्रसीदेति भावः ॥ १९ ॥

> तव प्रेरणया देव ! गोपीगीते यथामति ।
> शुभाशुभं मया गीतं तेन तुष्टो भव प्रभो ! ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत
रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्र-
भागाख्याविष्णु सख्याख्य श्रीरामनारायण रचितायां
भावभावविभाविकायां तृतीयाध्यायव्याख्या समाप्ता ॥ ३ ॥
मूले एकत्रिंशः ॥ ३१ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं बहूक्तेः परं विरहव्याकुलस्वान्ताः गतधैर्य्याः रुदत्य आहुः । यदिति । यत्तव सुजातं चरणकमलं स्तनेषु भीताः सत्यः शनैर्दधीमहि भयेन शनैर्धारणे हेतुः कर्कशेषु ननु एवं तर्हि किमर्थं धारयथेति चेत्तत्राहुः । हे प्रिय ! स्वसुखार्थं धार्ष्ट्येन धारयामः तत्रापि सुजाताम्बुरुहरूपत्वात्सुगन्धिशीतळहृदयस्थतापोपशामकं प्रियपदमतस्तद्धारणमिति सूचनार्थमुक्तं सुजातेति त्वन्तु तादृशकोमलेनास्मान्परित्यज्यास्मद्दौषेण सम्प्रति रात्रौ अटवीं शर्करादिव्याप्तमरण्यमटसि भ्रमसि किंस्वित्त्वत्पदपद्मं सन्नत्यशर्करादिभिर्न व्यथते यद्यपि तेन तादृशवनभ्रमणेन तद्व्यथते नवेति सन्देहो भवति तथापि नोऽस्माकं सन्देहोऽस्मद्दोषवशात्पलाय्यते तेन त्वया तद्व्यथामगणयित्वा भ्रमणाभितत्वाद्व्यथत एवेति निश्चयात् तथाच स्वसुखहेतुना तत्पीडापि यद्यस्माकं सह्या तदा परमदुःखकारणभूता वनभ्रमणजन्या तद्व्यथा त्वसह्यतमा नोऽस्माकं बुद्धिस्तामनुसन्धाय भ्रमति मूर्च्छां गन्तुं घूर्णत इत्यर्थः । यतो भवदायुषां त्वदेकप्राणानामस्माकं तादृशभगवत्पादपीडानुसन्धानेन मरणमेवोपस्थितमहो कष्टमिति भावः अनभिज्ञापक्षे अहो यत्प्रार्थ्यते तन्मयागतं तथापि मदीयं पादसरोजं युष्मत्स्तनेषु स्थापितं व्यथामवाप्नोति तेषां कठोरत्वात्तो भवतीनां परोक्षं वन एव भ्रमामीत्याशङ्क्य सरोदनमतिचित्रमाहुः । यदिति । तथाचातिसुकुमारत्वात्पीडाशङ्कयास्माभिः कठोरेषु स्तनेषु शनैः स्थाप्यते तेन त्वमटवीमटसीत्यति चित्ररूपोऽन्यायस्तवैव शोभत इति भावः । स्तनस्पर्शजनितदुःखासहनं कूर्पादिस्पर्शोत्थव्यथासहनञ्च किंनिबन्धनमिति तु वयं न विद्म इत्यप्यनेन ध्वनितं तव मनसोऽवस्थां को वेद कीदृशी वर्त्तते ऽस्माकन्बुद्धयस्तु संशयचक्रारूढास्थैर्य्यं न लभन्ते किन्तु भ्रमन्ति इत्याहुस्ते व्यथते परमसुकुमारत्वादादौ किंवा व्यथते भ्रमणे प्रवृत्तत्वादिति द्वयोः पक्षयोरन्यतरस्य निर्धारणादस्मद्धीः भ्रमति तथाहि अहो तस्य पदन्तु व्यथते तथाप्यसावस्मासिव स्वाङ्गेष्वपि निर्दयः किंवास्मद्दुःखार्थं स्वाङ्गे दुःखमुत्पाद्य सहते किंवास्मद्दुःखजन्यसुखेन दुःखमपि सुखमेव मन्यते किंवा दैववशाद्विरहं प्राप्तः प्रेमभराक्रान्तस्वान्तत्वादुन्मादवशां प्रविष्टस्तत्पीडां नानुसन्धत्त इत्यादिप्रथमपक्षानुकूलतर्कान्प्रति धावति

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

किं संसर्गजा दोषगुणा भवन्तीति न्यायाद्यथास्मद्धृदयमतिकोमलमप्यस्मत्कठोरकुचसंगेनातिकठोरमभूत्तथा त्वत्पदाम्बुजमप्यतो न व्यथते किंवा सुकुमारसङ्गेन कूर्पादयः कोमलतां गताः किंवा भूमिरेव कारुण्यान्माधुर्य्यरसास्वादनाय पादाधः स्वजिह्वां स्थापयति किंवा कयाचिदिन्द्रजालविद्यया भूमिं न स्पर्शयतीत्यादि द्वितीयपक्षतर्कात्प्रति धावति ननु मिथ्येदं प्राणधारणादितिचेत्तत्राहुः भवत्येव समर्पितमायुर्यासामतः सुखिनि त्वयि स्थितत्वान्न नश्यन्तीति भावः । मानिनीपक्षे अतिकोमलचित्तस्य परमसुकुमारावयवस्य स्वभावविपर्य्ययमालक्ष्य वयमति व्याकुलाः सम्पन्नाः किंकुर्म इत्याशयेनाहुः । यदिति । कुचानां कठोरत्वाच्चरणस्यातिसुकुमारत्वाद्धारणे भयं तत्र तत्तद्धारणे प्रीयसे इति कृत्वा तद्धारणं यतो हे प्रिय ! तथाच तव संयोगोऽप्यस्माकं दुःखहेतुरेव यतः कुचानां कठोरत्वे तव पादपीडाप्रयुक्तं दुःखं व्रतादिना तत्कोमलत्वप्रार्थनायां तव दुःखानुसन्धानेन दुःखमिति भावः । तादृशेनापि त्वमटवीमटसि तत्तु निश्चयेन व्यथत एव तत्तस्मिन्नपि दया नोत्पद्यते ऽतस्तव स्वभावविपर्य्ययमालक्ष्यास्मद्धीर्भ्रमति मरणावस्थां गन्तुं प्रवृत्ता त्वन्त्वस्मद्विरहितो विशिष्टास्मदायुर्भिरपि चिरं सुखेन विहरेत्याशयेनाहुः । भवत्यर्पितायुषामिति । निवृत्तिपक्षे । जीवरूपेण संसरणं तवास्मभ्यं रोचते पुनरपि वदाम इत्याशयेनाहुः । यदिति । तव पदं ब्रह्मणा साधकानुग्रहार्थं प्रकटितं सगुणस्वरूपे सुजातचरणाम्बुरुहे यस्य तदपि कठिनानुष्ठाने प्रतिपादकेषु स्तनस्थानीयेषु कर्मोपासनाप्रतिपादकयोर्वेषु अहो निर्गुणस्य निरवयवस्य कथमर्चनादिकं प्रतिपादयाम इति भीताः सत्यः शनैः साधकानां चित्तशुद्ध्यादिक्रमेण तत्त्वज्ञानोदयार्थं दधीमहि तेनैव जीवत्वं प्राप्तेन रूपेण संसाराटवीमटसि तत्किंस्वित्र व्यथते किन्तु व्यथत एव तत्रत्यैः कूर्पादिस्थानीयैराध्यात्मिकादिदुःखैः यद्वा किं व्यथते नवेति अस्माकं धीर्भ्रमति अनेन संसारस्यानिर्वचनीयत्वं बोधितं यतो भवद्बोधाद्यार्थमेवास्माकं प्रादुर्भावोऽत एवं वदाम इत्याहुर्भवदिति ॥ १९ ॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्रसूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्या आहुः । यदिति । हे प्रिय ! ते तव सुजातं सुष्ठु जातं निरतिशयसुन्दरं चरणरूपमम्बुरुहं कमलमित्यर्थः । कर्कशेषु कठिनेषु सम्मर्दभयाच्छनैर्दधीमहि धारयेम वयम् तेन सुजातचरणाम्बुरुहेणाटवीमटसि गच्छसि तत्सुजातं चरणाम्बुजं कूर्पादिभिः सूक्ष्मपाषाणादिभिः किं स्विन्न व्यथते अपि तु व्यथते एव अतो भवदायुषां भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति अस्वस्था भवति ॥ १९ ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकत्रिंशाध्यायार्थप्रकाशः ॥ ३१ ॥

भाषा टीका ।

जा आपके चरणकमल को हम आपके दुःखहोवे की भयते अपने कठोर स्तननपै वडे धीरे ते रखती ही हे प्यारे ! वाही चरण ते तुम अब वनमें विचरो हो तो कङ्करनते वे चरण दूखत होंगे याते हमारी बुद्धि वडे भ्रम को प्राप्त होवे है हमारी आयु जीवन तो आप के अधीन है ॥ १९ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धेरासपंचाध्याये इकतीस में अध्याय की भाषा टीका समाप्त ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ द्वात्रिंशोऽध्यायः ॥

श्रीशुक उवाच

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् ! कृष्णदर्शनलालसाः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः ।
तत्राविर्भूय गोपीस्ताः सान्त्वयामास मानयन् ॥
स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः ॥
सदयं नन्दयन् गोपीरुद्रतो नन्दनन्दनः ॥

इतिगोप्य इति । इत्येवं प्रभृतिश्चित्रधा अनेकधा सुस्वरमुच्चैः कृष्णदर्शने लालसातिस्पृहा यासां ताः ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

इति उक्तप्रकारेण पूर्वोक्तमन्यच्चेत्यर्थः अत एव तैर्व्याख्यातमिति एवं प्रभृतीति । एतदादिकामित्यर्थः । यद्वा चित्रधेत्यस्य विशेषणम् उक्तबहुप्रकारेणेत्यर्थः । प्रकर्षेण प्रेमोद्रेकादुच्चैर्गायन्त्यः कदाचित् प्रकर्षेण लपन्त्यश्च यद्वा विलपन्त्यः किम्वा विरहव्याकुलतया किञ्चिदनर्थकं वचस्तन्वन्त्यः चित्रधेत्यस्य पूर्वेण परेणान्वयः सुस्वरं करुणादीर्घस्वरेणेत्यर्थः । कृष्णस्य चित्ताकर्षकस्य दर्शने लालसा यासामिति रोदने प्रयाणादौ वा सर्वत्र हेतुः हे राजन्निति तद्दर्शने लालसया तद्युक्तमेवेत्यस्यार्त्तिसम्बोधनम् अन्यत्तैर्व्याख्यातं तत्र इति गोप्य इतीत्यधिकं लेखकभ्रमादिति अथवा कृष्णदर्शनलालसा अपि अधुना तदनादरेण इति एतत्पूर्वोक्तं श्रीराधादेवीगीतमेव सर्वाः प्रकर्षेण तद्विद्धचित्ततया परमसक्त्या गायन्त्यः प्रकर्षेण लपन्त्यश्च अन्यत्समानम् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

इति शब्दः प्रकारवचनस्तस्मादेवं प्रभृतीत्येवार्थः । प्रकर्षेण प्रेमोद्रेकादुच्चैर्गायन्त्यः कदाचित् प्रकर्षेण लपन्त्यश्च । किम्वा विरहव्याकुलतया किञ्चिदनर्थकं जल्पन्त्यः चित्रधेत्यस्य पूर्वेण परेणाप्यन्वयः । सुस्वरं करुणदीर्घस्वरेणेत्यर्थः । हे राजन्निति तद्दर्शने लालसया तद्युक्तमेवेत्यार्त्तिसम्बोधनम् ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं गोपीनां गानमुपवर्णितम् अथैवं गायन्तीर्गोपीरनुजिघृक्षोराविर्भूतस्य भगवतो दर्शनहर्षजां तासां विक्रियां सरससाक्षेपसंलापां तां क्रीडाञ्चानुवर्णयति द्वात्रिंशेन । इतीति । इत्थं भगवतो गुणान् गायन्त्योऽनेकधा प्रलपन्त्यश्च हे राजन् ! कृष्णदर्शने लालसा ऽतिस्पृहा यासां ताः सुस्वरं यथा तथोच्चैः रुरुदुः ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा गोपीनामात्मानं प्रकाशयन् भगवांस्तथा साधनसामग्र्या ज्ञानिनामपीतीममर्थं दर्शयितुमस्याध्यायस्य प्रारम्भः तत्र शुकः रोदनादिकमपि भक्त्युद्रेकलक्षणमिति दर्शयितुं गोपीनां रोदनप्रकारं कथयति । इतीति । चित्रधा नानाविध्येन सुस्वरं यथा श्रोतृसुखकरं भवति तथा स्वरं कुर्वत्यः । अनेन परिदेवनादिकं व्यावर्त्तयति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शौरिः शूरवंशाविर्भूतत्वेन प्रसिद्धोऽपि तासामेवाविरभूत् सर्वतोऽप्यपूर्वादाविर्भावादित्यर्थः । साक्षान्मन्मथः नानाचतुर्व्यूहस्थाः प्रद्युम्नास्तेषां मन्मथः चक्षुषश्चक्षुरितिवन्मन्मथत्वप्रकाशक इत्यर्थः ॥ १—३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ गानानन्तरं प्रलापो जातःपश्चाद्रोदनमपि जातमित्याह । इतीत्यादि । प्रकर्षेण रागादिसंवलिततया गायन्त्यः चित्रधा प्रलपन्त्यः उन्मत्ता इव शून्यं लपन्त्यः सुस्वरं यथा स्यात् तथा रुरुदुः सौस्वर्यं स्वाभाविकं नतु बुद्धिपूर्वकम् ॥ १ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एकोनत्रिंशके ऽध्याये प्रसादं भगवत्कृतम् ।
रोदनात्प्राप्य तुष्टास्ता निर्णयश्च इतीर्यते ॥
नहि साधनसंपत्त्या हरिस्तुष्यति कस्यचित् ।
भक्तानां दैन्यमेवैकं हरितोषणसाधनम् ॥
संतुष्टः सर्वदुःखानि नाशयत्येव सर्वतः ।
अतो निर्णयवाक्यानि भजनार्थं न्यरूपयत् ॥

एवंपूर्वाध्यायान्ते तासां स्तुतिमुक्त्वा ततः पूर्वाध्याये तासां प्रलापमुक्त्वोभयमप्युपसंहरन् तयोरसाधनतायां जातायां रोदनं कृतवत्य इत्याह । इतीति । पूर्वोक्तप्रकारेण सर्वा एव गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च जाताः अस्माभिरेकः प्रकार उक्तः तास्तु चित्रधा विलापयुक्ता जाताः यदा तयोरसाधनत्वं जातं तदा सर्वाः संभूय महद्रोदनं कृतवत्यः रोदने निमित्तमाह । कृष्णदर्शनलालसा इति । नतु स्वदेहरक्षार्थम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वात्रिंशे हरिरायातः स्वाङ्कभावां शुकोक्तिभिः ।
पूजितः प्रतिपूज्यैताः प्रेमोक्त्या क्षणितामधात् ॥

चित्रधा आश्चर्यतानतालादिप्रकारेण प्रगायन्त्यः अतिवैवश्योद्रेकात् प्रलपन्त्यश्च सुस्वरं रुरुदुः ॥ १ ॥

केनचित्कृता विशुद्धरसदीपिका ।

इतीति । प्रकारवचनोऽयम् एवं प्रकारकं प्रकर्षेण गायन्त्यः तथा वितर वीर नस्ते धारमृतमित्यादिकं विरहव्याकुलतया प्रजल्पन्त्यश्च चित्रधेत्युभयान्वयि सुस्वरं करुणदीर्घस्वरेणेत्यर्थः । हे राजन्निति सम्बोधनं तद्दर्शनैकलालसानामीदृशमधीरत्वं युक्तमेवेति भावः यद्वा तासामत्यन्तार्तिं श्रुत्वातिदुःखमूर्च्छितं राजानं सम्बोधयति सोऽयमाविर्भूत इत्यर्थः ॥ १ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

वन्दे स्वेष्टौ रमावेशावुमेशौ गुरून् गिराम् ।
गणेशं वैष्णवान् विप्रान् विदो विश्वं वपुर्हरेः ॥
आसामहो चरणरेणुजुषामहं स्यां वृन्दावने—
किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्य्यपथञ्च हित्वा—
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥
पश्चाध्यायाश्चतुर्थेऽस्मिन् गोपीकरुणया हरिः ।
सान्त्वयामास ता गोपीस्तत्प्रश्नोत्तरकीर्तनैः ॥

प्रेमपथाचार्य्यरूपा गोप्यः सम्प्रार्थनगुणगानरूपं भगवत्करुणोद्बोधकतया तत्प्रापकं मुख्यं प्रेमाङ्गभूतं धर्मं स्वचरितेनैवोपदिश्याधुना नित्यं कृपालुतया सर्वप्राणिषु नित्यं वर्त्तमानायाः प्रार्थनागुणगानादिपूर्वोपदिष्टसर्वधर्म्मैरुद्भूतायास्तत्कृपायाः पात्रत्वापादकं दैन्यमेव यथा सर्वत्र साम्येन वर्षतोऽपि मेघस्य तुल्यनिपतितमपि जलं निम्ने एव संगृहीतं भवति नोच्चस्थले तथा सर्वसमानोद्भूतापि तत्कृपा दीने एव स्थिरा भवतीत्युपदिशन्त्यस्तथा यद्यस्य गृहे नास्ति तत्तद्दृष्ट्वा तस्य चमत्कृतिर्भवति भगवतस्तु सर्वथापूर्णत्वान्न किमपि तच्चमत्कृतिजनकं किन्तु तस्येश्वरत्वादेव सत्यं दैन्यं नास्तीति सत्यदैन्यदर्शने चमत्कृतिसम्भवादावश्यकस्तदाविर्भाव इत्यपि द्योतयन्त्यो रुरुदुरित्याह मुनीन्द्रः इतिगोप्य इति अत्रेति प्रकारनिर्देशे इत्युक्तप्रकारेण प्रगायन्त्यस्तत्र गानस्य प्रकृष्टत्वं प्रेमविह्वलचित्तेन गद्गदकण्ठेन जातरोमाञ्चादिभावतया गानेन स्वरतालाद्यभिज्ञतामात्रेण स्वरसौष्ठवन्तु यासां रोदनेऽपि किमु वाच्यं गाने इति भगवत्प्रापकगानस्य "मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद !" इत्यादौ भक्तिसहकारित्वनिर्देशात् तदेव भक्तिविकलत्वमाह प्रलपन्त्यश्चेति । स्वीयविरहदुःखं निवेदयन्त्यः चित्रधेत्यनेन विविधप्रगानप्रलापबोधकेन यथैकः प्रकारो मया दर्शितस्तादृगनेकविचित्रप्रकारैः प्रगानप्रलापौ कुर्वत्य इत्युक्तं गोप्य इत्यनेन स्वभावतो गोप्योऽपि स्वाभिप्रायशोकादिगोपनशीला अपि प्रेमवैक्लव्येन स्वभावपरित्यागेन चित्रधा प्रलापपूर्वकं प्रगायन्त्य इति यद्वा कृष्णविहारसुखायैव यतः कृष्णदर्शनलालसा अतो गा इन्द्रियाणि यातुं शीलं यासां यथोक्तं केनापि कृष्णदर्शनविहाराशयैव स्वपादयोरुपरिबन्धनपूर्वकं कूपे प्रलम्बितेन भगवता तत्प्रेममाहात्म्यद्योतनाय काकरूपेण तन्मांसकृन्तनारम्भे काकं प्रति "काक सर्वं त्वया भोज्यं देहमांसं न मे यथा नेत्रद्वयेन भोक्तव्यमिच्छामि प्रियदर्शनमिति ततः सकृष्णकाक एव कृष्णतयात्मानं तस्मै दर्शयामास तथाकामविरहचिन्ताग्निभिर्गवामिन्द्रियाणां दाहे कथं कृष्णदर्शनं तदुपलक्षितविहारादि भविष्यतीति तद्गुणगानामृतेन तद्रक्षां कुर्वत्यः यद्वा गोप्योऽपि गोपालप्रियसख्योऽप्येवमन्वेषणलीलानुकारगुणप्रगानादिनोत्पादितभगवन्महदनुग्रहा अपि तदनुग्रहस्य स्वात्मनि संग्रहाय सुस्वरं निर्लज्जतया दीर्घस्वरेण कपाटभावादनर्गलनिर्गलितेन रुरुदुरतो दैन्यमेव तत्कृपाभाजनत्वापादकं राजन्निति प्रेमश्रिया राजमान ! यथा तव सार्वभौमश्रिया राजमानस्यापि न मद्दर्शने दैन्यश्रिया राजमानस्यैव ममाविर्भावस्तथा श्रीपतिरपि दैन्यश्रियाप्रलोभितः ॥ १ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

द्वात्रिंशे गोपिकालापविक्लिन्नहृदयोऽच्युतः ।
तासामाविर्हितस्ताश्च पूजिताः प्रत्यपूजयत् ॥

इत्थं विरहव्याकुलचेतसां चेष्टावर्णनमुपसंहरति । इतीति । इत्येवं पूर्वोक्तप्रकारेण सर्वा एव गोप्यः प्रकर्षेणोच्चैः परमप्रेम्णा गायन्त्यः तथा चित्रधा अनेकप्रकारेण प्रलपन्त्यः विरहव्याकुलत्वादनर्थकान्यपि वचांसि प्रलपन्त्यः एवं कृतेऽपि यदा प्रेष्ठदर्शनं न जातं तदा सुस्वरं करुणोत्पादकदीर्घस्वरेण रोदनं कृतवत्यः एतत्सर्वं न स्वदेहरक्षार्थं किन्तु कृष्णदर्शने लालसा उत्कटोत्कण्ठा यासां ताः यथा दुःखितानां दुःखनिवृत्यर्थं राजाग्रे रोदनेन तां निवेदयति तद्वदिति सम्बोधनाशयः निवृत्तिपक्षे गोप्यः श्रुतयः मुख्याधिकारिणं प्रति प्रकर्षेणा मुख्यतात्पर्य्येण परमात्मानमेव गायन्त्यः कर्म प्रति प्रलपन्त्यः अनर्थकवचनत्वेन प्रतीयमानाः परमजडं प्रति रुरुदुरहोमहामूर्खोऽयं सर्वथास्मद्विमुख इति रोदनमेव कुर्वत्यः अधिकार्य्यभाव उपदेशवाक्यानां रोदनरूपत्वाभिधानात् यतः कृष्णस्य सदानन्दरूपस्य

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

यस्मात्सतो दर्शनं जीवानां मोक्षार्थं भवतीति लालसा यासां ताः आत्मा वा अरे द्रष्टव्य इत्यादि श्रुतेरित्यर्थः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं गोपीभिः प्रार्थितः श्रीकृष्णः आविर्भूय ताः सान्त्वयामासेति द्वात्रिंशेनाध्यायेन वर्णयति । इत्येवं कृष्णदर्शने लालसा अतिस्पृहा यासां तास्तद्गुणान् गायन्त्यः चित्रधा अनेकधा प्रलपन्त्यः सुस्वरं यथा तथा उच्चैरुरुदुः ॥ १ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले हे राजन् ! या प्रकारसे सब गोपी गान करती हुई और नाना प्रकार प्रलाप करती हुई श्रीकृष्ण दर्शन में अत्यंत लालसा कर अति उत्तम स्वरसे रोदन करने लगीं ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

साक्षान्मन्मथमन्मथो जगन्मोहनस्य कामस्यापि मनस्युद्भूतः कामः साक्षात्तस्यापि मोहक इत्यर्थः ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तासां तादृशीमार्त्तिं गतानामाविरभूत् दृश्यो बभूव इति परमार्त्यैव तत्प्राप्तिरिति दर्शितं यद्वा तथा रुदतीनामधुना मद्दुःखसम्भावनया दैन्यविशेषेण रोदनात्प्राणा गतप्राया इत्यतो हेतोरित्यर्थः । एवमात्मानपेक्षया तदेकापेक्षयैव दैन्यविशेषेण तत्प्राप्तिरिति शौरिः शूरवंशे निजगुणरूपाद्यशेष भगवत्ता प्रकटनार्थमवतीर्णो भगवानित्यर्थः । अयमाविर्भावे हेतुः श्लेषेण सर्वासामेव युगपत्सन्तोषसामर्थ्यं दर्शितम् इति स्मयमानं मुखाम्बुजमेव ननु हृदयाम्बुजं तासां तादृगातिरोदनाद्यस्य स्मयमानता स्वभावत एव किम्वा तासां शोकनाशनार्थं पीताम्बरधरः धावनेनेव त्वरयाविर्भूय गमनात् सुललितं पीताम्बरं किम्वा तासां गलदश्रुधारासंमार्जनार्थं श्रीहस्तेनैकेन धरतीति तथा सः स्रग्वीति कमलादिपुष्पैः ताः शीतलयितुं यद्वा प्रियजनान्तिकातर्पभरेण निजापराधक्षमापणार्थमिव तृणवत् श्रीदन्तान्तिके श्रीहस्तेन निजवस्त्राञ्चलं गृहीत्वा वस्त्रमिव श्रीगले मालाञ्च बध्वेत्यर्थः । एवं वैदग्धीविशेषप्रकटनेन तासां परममोहनत्वात् साक्षान्मन्मथमन्मथ इति वा अथवा सौन्दर्य्यादिकमेव तैर्विशेषणैरुपलक्षितं तत्र सौन्दर्यस्योपलक्षणं स्मयमानेति भूषणानाञ्च पातात वेषावली-

स्य स्रग्वीति स्रक्च कौन्द्येव ज्ञेया कुन्दस्रजः कुलपतेरित्युक्तेः रात्रौ च तस्या एव शोभा विशेषसम्पत्तेः अन्यदपि वैदग्ध्यमाधुर्य्यादिकमुपलक्षयति । साक्षादिति । तथा विरहार्तिखिन्नानामपि तासां कामोद्बोधे तस्यापि कामोद्रेकं सूचयतीति दिक् । अन्यत्तै-र्व्याख्यातं यद्वा मन्मथादपि मन्मथः महामन्मथ इत्यर्थः । तस्यैव महामोहनताशक्तिसागरकणांशप्राप्त्या कामदेवस्य मोहनताशक्तेः अतोऽयमेव कन्दर्पः अत एव कन्दर्पबीजाख्य महामन्त्रे बीजमिति श्रीमदनगोपाल इत्यादि संज्ञयाप्युच्यते ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तासां तथा रुदतीनामधुना मद्दुःखसम्भावनया दैन्यविशेषेणासां रोदनात् प्राणा गतप्राया इति तेन वितर्क्यमानानामित्यर्थः । एवमात्मानपेक्षया तदेकापेक्षयैव दैन्यविशेषेण तत्प्राप्तिरिति दर्शितम् । शौरिः शूरवंशाविर्भूतत्वेन प्रसिद्धोऽपि तासामेवाविरभूत् सर्वतोऽप्यपूर्वादाविर्भावादित्यर्थः । तथा च वक्ष्यते "त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधदिति । तत्रातिशुशुभे ताभिर्भगवान् देवकीसुत" इति गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् । दृग्भिः पिबन्त्यनुसवाभिनवं दुराप"मित्यादौ च तथैव श्रीगोपीषु विशेषोक्तिः । एतत्परमित्यादौ वाञ्छन्ति यद्भवभियो मुनयो वयञ्चेति श्रीमदुद्धवसिद्धान्तानुसारेण सर्वाधिकप्रेमवतीषु तासु युक्तमेव च तादृशत्वम् । प्रपद्यमानस्य यथाश्नतः स्युरित्यादि न्यायेन तथैव दर्शयति । साक्षान्मन्मथमन्मथ इति । नाना वासुदेवादिचतुर्व्यूहेषु ये साक्षान्मन्मथाः स्वयं कामदेवाः न तु तदंशशक्त्यावेशिप्राकृतमन्मथवदसाक्षाद्रूपाः तेषामपि मन्मथः मन्मथत्वप्रकाशकः चक्षुषश्चक्षुरित्यादिवत् । येषां रूपगुणविशेषनामशेषे तत्प्रकाशकोऽसौ तानखिलान् एव प्रकाशयन्नित्यर्थः । अत एवास्य महामन्मथत्वेनैकाक्षरादि मन्त्रा ध्यानानि च सन्ति । किन्तु तस्मिन् ध्यानेऽन्याकारत्वं मन्मथत्व व्यञ्जनार्थमेव ज्ञेयं मन्मथपदस्य यौगिकवृत्त्या तेषामपि क्षोभकादिरूपः संज्ञिति ध्वनितम् । एवं तादृशरूपस्यादिरसे परमालम्बनता भक्त्यन्तरागम्यता च दर्शिता । तदेवं स्वरूपाविर्भावस्यापूर्वतामुक्त्वा विलासवैशिष्ट्योरप्याह । स्मयेत्यादि विशेषणत्रयेण । तत्र स्मयमानेति वर्त्तमानप्रयोगेण तात्कालिकत्वविवक्षया सहजस्मितावैलक्षण्यप्रतीतेः तथा पीताम्बर इत्यनेनैव विवक्षिते सिद्धे धारणप्रयोगोऽतिरिक्त एवेति तेन तदानीमन्यविशिष्टधारणबोधनात् । तथा स्रग्वीत्यत्रापि प्रशंसायां मत्वर्थीयविधानात् । किञ्च । स्मितेनात्मनः सुप्रसन्नत्वं त्यागस्य च परिहासमयत्वम् । पीताम्बरधारणेन मूर्द्धपर्य्यन्तावृततया स्वस्य तासां परित्यागतः संकुचितचित्तत्वम् । स्रग्वित्वेन केवलतत्सङ्गितया तां विना स्वस्य सङ्क्रान्तरारोचकत्वञ्च ज्ञापितं तथा च भोवृद्धये तत्प्रवेशाय तात्कालिकशोभावर्णनमिदमिति ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तासामेव रुदतीनामग्रे शौरिराविर्बभूव कथंभूतः स्मयमानं मुखाम्बुजं यस्य सः जगन्मोहकस्य कामस्यापि मोहकः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्युद्रेकोद्भूतरोदनफलमाह । तासामिति । मनोमथ्नातीति मन्मथः कामः साक्षात्स्पष्टीकृतसर्वाङ्गसुन्दरः इन्द्रतुल्यस्तस्यापि मन्मथः मदमथकः मदनो मन्मथो मारः काम इति रुद्रः अनेनैवंविधभगवदुपासनात्तामर्थ्यातसमुद्भूतः सौन्दर्यसागरः काम इति सूचितं भवति ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तासां तथाविधरोदनभवणानन्तरं सोढुमशक्तस्तदैव प्रादुरभूदित्याह । तासामित्यादि । शौरिरित्यत्र शूरशब्दो न रूढः अपितु यौगिक एव शूरपुत्रोऽपि नातः परमन्तर्धानलीलायां समर्थोऽभूत् अपितु तासां साक्षात् आविर्भूतः अत एव स्मयमानमुखाम्बुजः अतः परं मम धैर्यं न वर्तेत इति स्मयमानत्वं पीताम्बरधरं इति भावविशेषात् स्खलत्पीताम्बरं वामकरेण बिभ्रदित्यर्थः अथवा पीतोत्तरीयैकदेशं धृत्वा स्मितं संवृण्वन् अथवा स्खलदुत्तरीयतया पीताम्बरं पीताम्बरैकदेशो धरायां यस्य अन्यथा पीताम्बर इत्यनेनैव सिद्धिः स्रग्वी अम्लानवनमालः मन्मथस्य मन्मथः मनो मथ्नातीति तथा तस्यापि तथा अथवा मदयतीति मथ्नातीति वा मदमथ एव मदनः तं मथ्नातीति मन्मथो रुद्रस्तस्यापि मदं गर्वं मथ्नातीति मोहिनीरूपेण गर्वं हृतवानिति तथा तथाभूतोऽपि स्वयं तासां सौन्दर्याकृष्ट इत्यर्थः अथवा साक्षान्मन्मथो मूर्तमन्मथस्तस्यापि मन्मथः ॥ २ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो भगवान् ब्रह्मा विष्णुः रुद्रश्च भूत्वा पुनः कृष्ण एव जात इत्याह । तासामाविरभूदिति । तासां मध्य एव भगवानाविर्भूतः मायाजवनिकां दूरीकृत्य भगवान् प्रकटो जातः यतः शौरिः शूरस्य पौत्रः शौर्यमत्र प्रकटनीयमिति सर्वेषां दुःखनिवारणार्थमेव यदुवंशे अवतीर्ण इति तदा तासां दोषनिवृत्त्यर्थं स्मयमानं मुखाम्बुजं यस्य ईषद्वसन्मुखः तासां वैक्लव्येन संतुष्टः स्मितयुक्तं स्मयमानं स्मयमानाभ्यां वा सहितं मुखाम्बुजं यस्य भक्तानां दोषः भक्तेभ्यो निर्गतः भक्तौ समायातीति ज्ञापनार्थं तदानीन्तनरूपं वर्णयति पीताम्बरधर इति । पीताम्बरं हास्यसंकोचार्थं हस्ते धृत्वा तिष्ठति अथवा व्यापिवैकुण्ठरूपेण एतावत् कालं लक्ष्म्या सह रमणं कृत्वा तेनैव रूपेण प्रादुर्भूतः स्रग्वी वनमालायुक्तश्च मध्ये ब्रह्मादिपूजां च गृहीतवान् लक्ष्म्या वा अतो विलम्ब इत्यपि सूचितम् अत एव प्रथमश्लोके प्रथमाध्याये श्रयत इन्दिरेति उक्तम् इदानीन्तु उपेक्षा कर्तुमयुक्तेति प्रादुर्भूतः अत आगमनमुक्तमग्रे यद्वा तत्र हेतुमाह विशेषणद्वयेन इदानीमनाविर्भावे तु न रसो न वा कीर्तिः स्वयं त्वाच्छादनेन रसत्वसाधकपीताम्बरधरः कीर्तिमयस्रग्वां- श्चातः प्रकट इत्यर्थः । अन्यथा तु भक्तानां स्वरूपतिरोधान उक्तोभयाभावः स्फुट इति भावः । ननु कन्दर्पेण कथं न वशीकृतः स्वपतना खिन्नेति तत्राह साक्षान्मन्मथस्यापि मन्मथः आधिभौतिको मन्मथः देवतारूपः तत आध्यात्मिकः सर्वहृदयेषु साक्षान्मन्मथः तस्याप्ययं मन्मथः आधिदैविकः सर्वस्यापि सर्वत्वात् अतः कन्दर्पोऽपि मुग्धः कन्दर्पस्याप्यशक्यमोहः कन्दर्परूपश्च अतस्तासां दैन्ये प्रादुर्भूते तन्निवारणार्थं कामरूपमेव प्रकटीकृतवान् अतस्तेन पूर्ववत् कामसंपन्नाः ताः कृताः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शौरिरिति । श्रीगोपीजनपक्षस्य श्रीशुकदेवस्य कृष्णं प्रत्यसूयोक्तिः । कुटिलान्तःकरणक्षत्रियजारयुद्धवत्वादेव कृष्णः प्रेमवतीभ्य आभ्य एतावद्दुःखं दत्त्वा स्वशौर्यं प्रकटीचकार । यदि सरलान्तःकरणगोपजातिजातोऽभविष्यत्तदा नैवमकरिष्यदित्यर्थव्यञ्जिका अत एव तासां दुःखेऽपि प्रफुल्लमुखः । वस्तुतस्तु स्मयमानं तासामानन्दनार्थमेव प्रफुल्लीकृतं मुखाम्बुजमेव हृदम्बुजन्तु सन्तप्तमेव यस्य सः । पीताम्बरं स्कन्धाभ्यां पुरो लम्बितीकृत्य हस्ताभ्यां धरतीति सः । अपराधं क्षमयितुमिति भावः । स्रग्वीति प्रेयस्यैव परिधापितां स्रजं तां दर्शयितुमिति भावः । साक्षान्मन्मथो यः समष्टिः कामस्तस्यापि मनो मथ्नातीति सः । जगन्मोहनमपि कन्दर्पं मोहयितुमायान्तं स्त्रीभावं प्रापय्य तथा मोहयामास यथा सोऽपि कृष्णसौन्दर्यं दृष्ट्वा कन्दर्पशरपीडितो मुमोहेत्यर्थः । तेन कृष्णस्तत्प्रेयस्यश्च स्वरूपभूतकन्दर्पस्यैव शरपीडिताः स्मन्ते, ननु प्राकृतस्य जगन्मोहनकन्दर्पस्य तस्य तत्रानधिकारादेवेति ज्ञेयम् । तदानीं साक्षान्मन्मथमन्मथत्वेन महामोहनस्वीय माधुर्याविष्करणं तासां तादृशस्यापि विरहदुःखस्य विस्मरणार्थमिति ज्ञेयम् ॥ २ ॥

केनचित् कृता विशुद्धरसदीपिका ।

तासामिति । तथा रुदतीनां यद्वा भवदायुषामित्युक्तिमवधार्य किं मद्विषयकदुःखसंभावनया गतप्राणा जाता इति वितर्क्यमाणानामित्यर्थः । एवं च तासामेव प्रेमाङ्कुराद्धादाविर्भूत इति दर्शितं शौरिः शूरपुत्रत्वेन निर्दयोऽपि नातः परमन्तर्धानलीलायां समर्थोऽभूदित्यर्थः । यद्वा अविर्भावबोधकेन शौरिपदेन प्रकटलीलागतावेवाविर्भावतिरोभावाविति सूचितं ततश्च तादृशगोपीविशेषनिष्ठैवेयं लीलेति प्रागेव दर्शितं तथाचोज्ज्वले—

हरेर्लीलाविशेषस्य प्रकटस्यानुसारतः ।
वर्णिता विरहावस्था गोष्ठवामभ्रुवामसाविन्युक्तम् ॥

एवञ्च खण्डितात्वमप्येतदपेक्षयैवेत्यपि सूचितं तदेव विशदयति । स्मयेत्यादिना । तात्कालिकसहजस्मितेन प्रसादमाविष्कुर्वन्नित्यर्थः । यद्वा स्मयो गर्वः मानाश्चित्तसमुन्नतिः । तदुभययुक्तमुखाम्बुजं—यस्य सः अम्बुजरूपकेण रक्तत्वमपि सूचितं ततश्चासां दर्पोपशमनव्यक्तिः यद्वा अपत्रपया स्मयमानं किञ्चिद्विकसितं मुखाम्बुजं यस्येति भावगोपनं तथा पीताम्बरधरः पीतमम्बरं धरापर्यन्तं यस्य इदं चापत्रपया निजाङ्गानामाच्छादनाय अन्यथा पीताम्बर इत्येव साधुः वस्तुतस्तु सुरताङ्कगोपनायेदं तथा स्रग्वीति प्रशंसायां मत्वर्थीयवि-

केनचित् कृता विशुद्धरसदीपिका ।

धानात् स्रगिव तदा त्वयोग्या श्रीवृन्दादेव्यैव निवेदितेति ज्ञेयं किंवा कुन्दस्रजः कुलपतेरिह वाति गन्ध इत्यादिना प्रागेवदर्शिता सुरतविमर्दितेयमिति गम्यते अथवा कामविजयाभिषेकमाळेयं तदेव व्यञ्जयति । साक्षादिति । तथाहि नाना वासुदेवादिचतुर्व्यूहेषु ये साक्षान्मन्मथाः स्वयङ्कामदेवाः नतु तदीयशक्त्यंशावेशिप्राकृतमन्मथवदसाक्षाद्रूपाः तेषामपि मन्मथः मन्मथत्वप्रकाशकः चक्षुषश्चक्षुरित्यादिवत् एषां रूपगुणविशेषाणामंशेन तत्प्रकाश कोऽसौ तानखिळानेव प्रकाशयन्नित्यर्थः । अत एवास्य महामन्मथत्वेनैकाक्षरमन्त्रध्यानानि यं मां स्मृतकामः सकामो भवतीत्याद्याः श्रुतयश्च सन्ति एवं तादृशरूपस्यादिरसे परमालम्बनता भक्त्यन्तरागम्यता च दर्शिता एवञ्च साक्षादित्यादि स्मयेत्यादिस्रगित्यादिभिः त्रिभिः पदैः स्वरूपविलासवेषाणामपूर्वतोक्ता साच यथायोगं पूर्वोक्तप्रकारेण सर्वासां सुखदा विशेषतश्च सुरतान्तळक्ष्मळक्षितस्वरूपेण प्रियसखीनामिति संक्षेपः ॥ २ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तत्साधनैर्जातानुग्रहो भगवान् दैन्येन तासामनुग्रहपात्रत्वे जाते तद्दैन्यभिया लुब्धः प्रादुरभूदित्याह । तासामिति । ततश्च तासां सप्रेमव्याप्तचित्तानां भिया संश्लिष्टानां मारकेण विश्लिष्टानां मारकेण मारितानां स्वमारतानां मध्ये एव तद्दैन्यमारतः शौरिः शूरवंशवरः साक्षान्मन्मथमन्मथः ळोके आधिभौतिकः कामो मन्मथस्तदधिष्ठातृकामदेवः साक्षान्मन्मथः तस्यापि मनोमथनशीलस्तन्मनसि प्रादुर्भूतः कामः साक्षान्मन्मथन्मन्मथः आविरभूत् न तुकुत्रापि गतस्तत आगतः व्यापकत्वपुषोगमनासंभवात् यद्वा तासामाविरभूदित्युक्त्येदृक् शृङ्गाररसव्याप्तरसाभिवेर्विस्वरूपेण तासां तद्रसान्वितमनसामेवाविर्भाव इति ध्वनिः शूरवरत्वादेव कामरणविजयाय स्मयोगर्वो मानोऽभिमानश्च ताभ्यां युक्तं मुखाम्बुजं यस्य यद्वा ता गोपीराश्वासयितुं स्मयमानं मञ्जुमृदु मधु सितस्मितयुतं मुखाम्बुजं यस्य यद्वा स्मयेन तादृक्स्मितेनैव मा इति न्यक्कारोयाच्ञानङ्गीकरणलक्षणः न इति तदभावस्तथा च मानः यस्मिंस्तादृङ्मुखाम्बुजं यस्य यद्वा स्मयो गर्वसमानः नहि नहि कार्य्य इति जाते स्मये तिरोहितत्वेन तदभावे आविर्भूतत्वेन द्योतकं मुखाम्बुजं यस्य यद्वा मयि कदापि स्मयो नाहि नहि इति द्योतकं मुखाम्बुजं यस्य तथा स्मयमानविशेषणेन मुखरूपाम्बुजस्य स्मितरूपचन्द्रिकासान्निध्यत्वज्ञापनेन तासां तापोपशमाल्हादायाविर्भूतमुखस्य विकसिताम्बुजत्वनिर्देशः विकसितस्यैव तस्य तापहारित्व प्रसिद्धेः यद्वा स्मयमानतया स्मितासितामृतप्रभान्वितमुखमेवाम्बुजोऽम्बुधिप्रभवश्चन्द्रस्तासां विरहतमस्तापव्याप्तश्चनसां तदपवादेन स्वाल्हादेन प्रसादको यस्य तथा च क्षीराम्बुधिप्रभूतेन्दोर्लौकिकतमस्तापापलापकत्वेऽपि कृष्णविरहिणीनां प्रतापकत्वमेव अयंतु प्रेमरसामृताम्बुधिप्रादुर्भूतमुखेन्दुरेवामितचन्द्रप्रजाल्दादस्मितसुधाभिवर्षितया तत्समहत्तापापवादक इति भावः । तथा तासामाश्वसनाय ताभिः पीते पूर्वं विलासावसरे आस्वादिते एवाम्बरे दशनवसने धारयतीति पीताम्बरधरः भवतीभिः पीते एवैते निःशङ्कं पातव्ये यद्वा यूयं मद्वियोगेन यथा खिन्नास्तथाहमपि विकल एवेति ज्ञापनाय पीते एवाम्बरे दशनवसने धारयतीति यद्वा भगवतीं नित्यं पीताम्बरधरत्वात् विशेषकथनं तु भवदीयकाञ्चन वर्णत्वेनैव पीताम्बरं गले धारयामि भवतीनां वर्णेनैव मम शोभा तथा मम वहिरङ्गपीताम्बरेणेवान्तरमपि वोऽनुरागेण व्याप्तमिति द्योतनाय यद्वा वोऽनुराग एवान्तर्व्याप्य वहिरपि मामाच्छाद्य पीतवसनमिव लसतीति यद्वा विनयेनाश्वासनाय पीताम्बरं गले कृत्वा हस्तयोर्धारयतीति तथा यद्वा यथा मम मनो वोऽनुरागेना च्छादितं वपुश्च तद्वर्णपीताम्बरेण तथा मम कृष्णकुटिल स्वभावो भवतीभिरेव निजप्रेमगुणैराच्छाद्यते इति भावः तथा स्रग्वीति वन्यस्रग्धर इत्यनेनापि मयापि वो विरहतापतप्तहृदये तदुपशमाय युष्मत्तनुसुमनसां तापोपशमवत्ववत्तदुपशमकत्वभ्रमेण सुमनः स्रगव धृता तथापि तापानुपशमएव सन्निधि प्राप्तोऽधुना तदुपशमो युष्मदधीन इति यद्वा गुणग्रथितसुमनः स्रगिव ममातिमृदुसुमनोवृतयोऽपि युष्मद्गुणग्रथिता इतिद्योतयितुं यद्वा भवतीनां सुमनांसि एव मद्गुणग्रथिततया ममोरोहारतया मयि सलग्नानि तानि धृत्वैव विहरामि यद्वा कुसुमानां कामबाणत्वेन निर्वाणोऽप्यहं युष्मत्कामबाणव्याप्त एव यद्वा प्रेमवतीनां समीपे कपटान्निर्वाहात्त्रान्तर्द्धानापराधोपशमाय स्रग्वीति स्रजा बद्धकर एवाविरभूत यद्वा साक्षान्मन्मथमन्मथ इत्युक्त्वा स्रग्वीति तन्मित्रवसन्तालिङ्गितवपुरिति भावः । यद्वा मुनिमधुकरनिकरोपवर्णितयशोरूपस्रग्धर अस्मां प्रेमवतीनां विरहाग्निदाहेन न यशः स्थास्यतीति तत्स्रग्धर आविरभूत् यद्वा मन्मथमनोमथितुं सुमनोजमुखचन्द्रेण ज्येष्ठेन तत्पराभवसम्भवेऽपि तडिद्वर्णपीताम्बरेण तद्धीति संपत्तावपि कुसुमबाणरूणाय कुसुमधारणमेव न्याय्यमिति स्रग्वी आविरभूदित्युक्तं यद्वा यदामितानि सुमनांस्येव मद्गुणवन्तानि तदा किमु वाच्यं मनोजस्य यद्वा तासां त्रिविधतापेषु कामतापोपशमाय साक्षान्मन्मथमन्मथ इत्युक्तं विरहतापोपशमायाविरभूदिति पुनः संभावितविरहचिन्तातापोपशमाय वर्णितार्थानि स्मयमानमुखाम्बुजः पीताम्बरधरः स्रग्वीति विशेषणानि यद्वा तापशुष्कतनुसुमनःसुमनोलतानां सुरतरसवृष्टिसेचनाय पीताम्बरधरः स्रग्वीति पदाभ्यां सतडिदिन्द्रधनुर्घनघनस्यामत्वद्योतनं मुखचन्द्राधरामृतरसपोषणाय स्मयमामुखाम्बुज इति ॥ २ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततः परं भगवानप्यन्तर्द्धानतया स्थातुं नाशकत् किञ्च अतिप्रबलेन तत्प्रेम्णा समाकृष्टचेता आविरभूदित्याह । तासामिति । "मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना,, त्युक्तस्वरूपेण तावत्काळं स्थितः पुनस्तदभीष्टवासुदेवात्मकः आविरभूत् एतद्दुःखनिवृत्त्यनुकूलं शौर्यं प्रकटनीयं सर्वदुःखनिरासाय यदुवंशे ऽवतीर्णत्वात्स्वापराधशङ्कया ग्लायमानस्ता स्तोषयितुं स्मयमानः स्मितयुक्तं मुखपद्मं यस्य सः तथा च भवतीनां विरहवैकल्यदर्शनार्थमहं तिरोहितो नतुकिंचिद्दोषं मनसिनिधायातो यथोक्तवैक्लव्यमवलोक्यातिप्रसन्नोऽहमिति सूचयन्नित्यर्थः । तत्तोषोत्पादकं तत्स्वरूपमाह पीताम्बरधरः लक्ष्म्या सह रमणयोग्येन वैकुण्ठस्वरूपेणात एव स्रग्वी ब्रह्मणा लक्ष्म्या वा समर्पितया मालया अलंकृतः तत्रापि केवलं करुणयैवाविर्भूतो नतु कामकृताकर्षणेनेति बोधनाय इत्याह साक्षादिति । मन्मथः कामाधिष्ठानदेवस्तस्यापि मन्मथः स्वस्मिन्नासक्ति

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः।
उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतम्॥ ३॥
कृष्णस्य मुखलावण्यसुधां नयनभाजनैः॥
आपीयापीय नातृप्यन् सन्तस्तच्चरणं यथा॥ ०॥   इति वीर०
काचित्कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा।
काचिद्दधार तद्बाहुमंसे चन्दनरूषितम्॥ ४॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

करः तथा च एवंभूतस्य परमेश्वरस्य नास्ति कामवश्यतासंभावनेति भावः। अनभिज्ञपक्षे गोपिकादुःखदुःखितः श्रीशुकः क्षत्रियजातित्वात्तासु प्रेमभराक्रान्तासु शौर्य्यं प्रकटितवानिति द्योतयितुं शौरिरित्युक्तवान् अत एव दुःखितास्वपि तासु स्मयमानमुखाम्बुजः तत्रापि तादृशाद्धासानौचित्यमभिप्रेत्यार्धहाससंकोचार्थं मुखाग्रे हस्तेन पीताम्बरधरः स्रग्वी वनमालया शोभमानः साक्षान्मन्मथमन्मथ इति तासां तादृशस्यापि विरहदुःखस्य विस्मारणार्थं तादृश इति भावः। मानिनीपक्षे शौरिरपि तत्प्रेमपराधीनत्वादाविर्भूत स्मयमानमुखाम्बुजः अहो हासार्थं मयेदमनुष्ठितमतः कोपो न विधेय इति सूचनार्थं तथाभूतः अन्तस्तु युष्मद्विरहात्सन्तप्त एवेति भावः। अतएवापराधक्षमापणार्थं स्कन्धाभ्यां पुरोलम्बिनीकृत्य बद्धहस्ताभ्यां पीताम्बरधरः युष्मत्परिधापितामेव मालां धारयन् युष्माननुस्मरन्नेव कचिदेकान्ते विकलचित्त एवाहं स्थितो ननु कयाचिद्रममाण इत्यम्लानपुष्पां मालामवलोक्य प्रतीयतामिति सूचयन्निवेति भावः। ननु तथापि तासां कोपनिवृत्तिः कथं जातेत्याशङ्क्याह। साक्षादिति॥ २॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तासां रुदतीनां समीपे स्मयमानं मुखाम्बुजं यस्य सः शौरिः श्रीकृष्णः आविरभूत् कथंभूतः साक्षात् मन्मथस्य विश्वमोहकस्यापि मन्मथः मोहकः॥ २॥

भाषा टीका।

विन गोपिन के मध्य में मंदहास युक्त मुख कमल से शोभित पीतांबरको धारण किये वनमालाको धारण किये कोटि कन्दर्पन के मोह करवे वारे श्रीकृष्ण चन्द्र प्रगट भये॥ २॥

श्रीधरस्वमिकृतभावार्थदीपिका।

तन्वः करचरणादयः॥ ३ — ४॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

आगतमिति। तासामभिप्रायानुसारेण यद्वा तासां मध्ये प्रादुर्भूतं किंवा आदौ दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तं तथा श्रीविष्णुपुराणेऽपि "ततो ददृशुरायान्तं विकासिमुखपङ्कज" मिति अत एव विशेषेण ळोकयित्वा दृष्ट्वेति रोदनवैवश्येन ईषद्दर्शनेप्यदर्शनात् किंवा दृष्टेऽपि परमार्त्या विश्वासाभावात् सम्यक् निरीक्ष्यैवेत्यर्थः। अतः प्रीत्या प्रहर्षेण उच्चैः फुल्ळा विकसिता दृशो नेत्राणि यासां तथाभूताः सत्यः अबळाः विरहक्षामतयोत्थातुमसमर्था अपि युगपदुत्थिताः तत्र हेतुः प्रेष्ठमिति तदेकप्रेष्ठत्वेन मरणे जीवने च तदेकहेतुत्वात् ननु तथाप्यन्त्यदशाप्राप्तानामिव तासां सद्य एकदा तथोत्थानं कथं संभवेदित्याशङ्क्य एतदेव दृष्टान्तेन साधयति। तन्व इति। यद्वा आदौ प्रीत्युत्फुल्लदृशो बभूवुः पश्चादुत्तस्थुः यथा तनूनामप्यादौ स्पन्दनादि पश्चात् स्वस्वकर्म्मे प्रवृत्तिरिति आगतमिति पुनरुक्त्या उत्थाने आगमनैकहेतुता बोधिता॥ ३॥

अधुना तदागमनात् सर्वासामेव विरहतापापगमं परमोत्सवादिकञ्च षड्भिर्वर्णयन्नादौ पृथक्त्वेन तासु मुख्यानां प्रसिद्धानामष्टानां प्रेमचेष्टितान्याह। काचिदिति पञ्चभिः। कराम्बुजमेकमन्येनाम्बरधारणात् तथा व्यवहारस्य शोभनत्वात् अम्बुजरूपकेण सहजारुण्यादिसौन्दर्यं तापहारित्वञ्च व्यञ्जितम् अञ्जलिनेति निजभावानुसारेण मुदेति विरहदुःखनिवृत्तेः इदं चाग्रेऽपि सर्वत्रानुवर्त्यं तस्य तत्र सौन्दर्य्यादिना अनिर्वचनीयं बाहुं शौरेरित्यनुवर्त्तत एव एवमग्रेऽपि चन्दनेन रूषितं भक्तिच्छेदळिप्तमिति सौन्दर्य्यं तापापहारित्वं चोक्तम्॥ ४॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

आगतम् आदौ समुत्कण्ठया सद्य एव दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तम्। तथा च विष्णुपुराणे। "ततो ददृशु रायान्तं विकासिमुखपङ्कजमिति" अत एव विशेषेण लोकयित्वा दृष्ट्वेति रोदनवैवश्येन ईषद्दर्शनेऽप्यनिश्चयात्। किम्वा दृष्टेऽपि परमार्त्या विश्वासाभावात् सम्यक् निरीक्ष्यैवेत्यर्थः। अबला विरहक्षामतयोत्थातुमसमर्था अपि सर्वा युगपदुत्थिताः। तत्र हेतुः प्रेष्ठमिति। तदेकप्रेष्ठत्वेन मरणे जीवने च तदेकहेतुत्वात्। एतदेव दृष्टान्तेन साधयति। तन्व इति आगतमिति पुनरुक्तिः उत्थाने आगमनैकहेतुतास्पष्टार्थं कृता। विळासाख्योऽनुभावोऽयम्। "गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्। तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसङ्गजं" इति॥ ३॥

पूर्वं विरहदैन्येन तुल्यवचनैः सर्वासामेव तुल्यता प्राप्ति-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

दर्शिता । अधुना प्राप्तनिजालम्बनत्वेन स्वस्वभावमनुसरन्तीनां मुख्यानाश्चेष्टितभेदैर्भावभेदानाह । काचिदिति पञ्चभिः । कराम्बुजं दक्षिणं जगृहे वनभ्रमणश्रान्ततया मत्तस्य तस्य करावलम्बनाय तथा व्यवहारस्यौचित्यात् स्पर्शौत्सुक्याच्च । करस्य दक्षिणत्वञ्च निजस्कन्धे तद्बाहुधारिण्या द्वितीयायाः कान्तसमानस्थितत्वेन वामभागावस्थानौचित्यात् दक्षिणस्यैव तथा ग्रहणौचित्याच्च । एवमुत्तरोत्तरं ज्ञेयम् । अञ्जलिनेति निर्देशादियं मृदुः सख्यप्रायदास्या कान्तपराधीना दक्षिणा च । चन्दनेन रूषितं भक्तिच्छेदलिप्तमिति इयमाकृष्य धारणात् प्रखरा व्यक्तसख्या किञ्चित् पराधीनकान्ता दक्षिणा च । ताम्बूलमत्र प्रतिकुञ्जं मालादिसाहित्येन श्रीवृन्दादेव्या स्थापितम् । योगमाययैव वा सिद्धम् । शौरेरिति प्रकरणलब्धम् । अञ्जलिनाऽगृह्णादिति पूर्ववत् । अत्रौत्सुक्यं त्वधरामृतार्थम् । इयं मृदुर्दास्यप्रायसख्या कान्तपराधीना दक्षिणा च अङ्घ्रिकमलं दक्षिणमेव स्तनयोर्न्यधात् । वामभुजेन प्रियावलम्बनेन वामचरणन्यस्ताङ्गभावताप्राप्तेः । सम्प्रति स्थित एव चायमुपवेशश्चाग्रतो वक्ष्यमाणत्वात् । अत उपविष्टयैव तया चरणधारणम् । तस्य तयोर्निधाने हेतुः सन्तप्तेति विरहमयस्त्याख्येन भावेनेति शेषः । हृदय इति पाठे स एवार्थः । इयं प्रखरा दास्यप्रायसख्या कान्ताधीना दक्षिणा च ॥ ४ ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमागतं प्रेष्ठं कृष्णमवलोक्यावला गोप्यः प्रीत्योत्फुल्ला विकसिता दृशो यासां तथा भूता युगपत्सर्वा उत्तस्थुः यथा आगतं प्राणान् तन्वः शरीराणि तद्वद्वियुक्ते प्राणे पुनरागत्य सुस्थे सति यथा तनुरुत्तिष्ठते तद्वदित्यर्थः ॥ ३ ॥

अथ ताः कृष्णस्य मुखे यल्लावण्यं तदेव सुधा तां नयनरूपैर्भाजनैः पानपात्रैः पुनःपुनरापीयापीय पीत्वा पीत्वाऽपि नातृप्यन्न तृप्ता बभूवुः यथा सन्तः भक्तास्तच्चरणं भगवत्पादाब्जलावण्यमनु भूयापि न तृप्यन्ति तद्वत् ॥ ० ॥

तत्र काचिद्गोपी हरेः कराम्बुजं हर्षेणाञ्जलिना जग्राह काचित्तु चन्दनेन भूषितं लिप्तं तस्य बाहुमात्मनः स्कन्धे दधार ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तन्वः भोगायतनशरीराणि ॥ ३ ॥

गोपीनां करादिग्रहणादिषु हरेः करादानादिना भक्तैकलभ्यः श्रीनारायण इति निदर्शयंस्तत्प्रवृत्तिं कथयति । काचिदित्यादिना चन्दनरूषितं लिप्तम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

काचिदित्यादि षट्कम् ॥ ४—८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्र प्रादुर्भूते सति यदभूत्तदाह । तमित्यादि आगतमाविर्भूतं नतु कुतश्चिदायातं तत्रैवान्तर्द्धाय स्थितत्वात् अबला अपि उत्थानासमर्था अपि उत्तस्थुर्युगपदिति दर्शनस्य पौर्वापर्य्याभावात् एकस्यैव प्रत्येकं पुरतो भासमानत्वात् एतेन पूर्वमुपविष्टा एव जगुरिति मन्तव्यम् तत्र दृष्टान्तः तन्वः प्राणमिवागतं प्राणयतीति प्राणः आत्मानं प्राप्य तन्वः शरीराणीव आत्मनः एकत्वादेकवचनं तनूनां बहुत्वेन तथा ॥ ३ ॥

अथ तस्मिन्नाविर्भूते तमालोक्य या यथा चक्रुस्तदाह । काचिदित्यादिबहुभिः । काचित् कराम्बुजमिति सादरप्रणयिनी केचिदेनां चन्द्रावलीमाहुः काचिद्धार तद्बाहुमिति सख्यप्रधानप्रणयवती ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततो यज्जातं तदाह । तं विलोक्येति तमागतं विलोक्य युगपत्सर्वा उत्थिताः पूर्वमाविर्भावमुक्त्वाधुना यदा गमनमुक्तं नद्विलोकनसमये स्वामिनीः भावानुवादरूपं पूर्वमतः स्थितोऽधुना बहिरागतं इति वा तथोक्तिः ननु किमाश्चर्य्यं भगवत्यागते उत्थिता इति तत्र नह्येताः सजीवाः स्थिताः किंतु निर्जीवा इति वक्तुं दृष्टान्तमाह । तन्वः करचरणाद्यवयवाः प्राणमागतमिवेति प्रयत्ने हि एकमेवाङ्गं व्यापृतं भगवति प्राणे तु सर्वाणि संभूय अतो बहुवचनं युगपदुत्थानार्थम् उत्थापनं पश्चानां भाव्यं देहेन्द्रियप्राणान्तःकरणजीवानां तत्र जीवस्य अन्याधीनमुत्थानं परं तस्मिन्नागते सर्वाण्युत्तिष्ठन्ति सतु भगवति प्रविष्टः भगवत्सङ्गे समागतः भगवत्युत्थितएवोत्थितः अन्तःकरणं तु उत्थितमित्यत्र हेतुमाह । प्रेष्ठमिति अत्यन्तप्रियो भगवान् तं दृष्ट्वा उत्थितं भगवति या प्रीतिस्तया कृत्वा उत्फुल्ला दृक् यासाम् अनेन प्रीत्या इन्द्रियाणामुत्थानञ्चेतसां विलोकनार्थमेवागमनमित्यागमनमात्रेण विलोकनमादौ संपन्नम् उत्फुल्ला तु ततो भिन्ना तस्याः पुष्पधर्मत्वेन तदुक्त्या दृशां कमलत्वं व्यज्यते तत्र प्रीतिहेतुत्वोक्त्येयदवधितत्कार्याभावेनाधुनैव तत्प्राकट्यं ज्ञाप्यते रवेरिव विरहे सर्वैतिरोधानादेतत्तिरोधानमप्यासीदत एवाबलात्वमुक्तं कार्यमात्रे स्वसामर्थ्याभावज्ञापनार्थं दृष्टान्तेनैव प्राणानामुत्थानं प्राणानां भगवान् प्राण इति शरीरं तु पूर्वोक्ताभिलषितपदार्थत्वेन निरूपणात् उत्थितमित्यत्र तामिति हेतुः ॥ ३ ॥

एवमुत्थितानां भगवता सह स्थितानां कार्यमाह । काचिदिति पञ्चभिः । पूर्वमनेकविधा अपि भगवत्या विर्भावे सप्तविधा एव जाताः एको भगवान् सर्वार्थे प्रकटीभूतः तत्र या अग्रे स्थिताः ता अपि निकटस्थिता एव पूर्वमुच्यन्ते शुद्धसात्त्विक्यः शुद्धरजोयुक्ता रजःसात्त्विक्यस्त्र निर्गुणाश्च शिष्टाः सप्तविधा गण्यन्ते काचिदत्र शौरेः कराम्बुजं मुदा अञ्जलिना अगृह्णात् एक एव हस्तो भगवता प्रसारितः पीताम्बर धर इति द्वितीयेन हास्यनिवारणार्थं पीताम्बरग्रहणात् बहुमानेन ग्रहणमञ्जलिना भवति शौरेरिति वीरत्वज्ञापनाय मुदेति पूर्वोक्तक्लेशशल्यावृत्त्यर्थम् अन्याः पुनः ततोऽप्यन्तरङ्गा भविष्यामीति तद्बाहुमंसे दधार यथा आलिङ्गितैव भवति अग्रे एतस्या विवियोगो वक्तव्यः भुजमगरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु इति अत

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

एव तदीयो धर्मोऽन्तःतस्याः निरोधं साधयिष्यतीति चन्दनरूषित तमित्युक्तं चन्दनेन रूषितं लिप्तं चन्दनेन हेतुना पूज्या लक्ष्मीर्वा पूर्वोक्ता तथा ताम्बूलेऽपि एवं सामग्रीप्रकटनेन तासां देवोत्तमानां च कृत्यं प्रदर्शितम् एता आरोढुकामा देवोत्तमास्तु पूजका इति ॥४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तन्वः करचरणादयः। आगतमिति पुनरुक्तिस्तासां मूर्च्छितानामुत्थानं तदागमनैकहेतुकमिति स्पष्टीकर्तुम् ॥ ३ ॥

सर्वगोपीषु मुख्यानां कासाञ्चित् स्वस्वभावोचितप्रेमचेष्टितान्याह काचिदिति पञ्चभिः। करामबुजं दक्षिणमेवेत्युत्तरार्द्धव्याख्यायां व्यक्तीभावित्वात्। जगृहे विनयमयमैत्र्यात् स्पर्शौत्क्यात्स्तुति भावः। इयमादरमयसस्पर्शात्तदीयतामयघृतस्नेहवती कान्तपराधीना दक्षिणा च प्राथम्यात् सर्वज्येष्ठा चन्दनेन रूषितं भक्तिच्छेदेन लिप्तं बाहुं वाममेव स्वकान्तवामभाग एव स्थित्यौचित्यात्। इयमादरगन्धिना स्वकर्तृकालिङ्गनेन किञ्चिद्घृतस्नेहमिश्रमधुस्नेहवती व्यक्तसख्या किञ्चित्स्वाधीनकान्ता दक्षिणा च ॥ ४ ॥

केनचित्कृता विशुद्धरसदीपिका।

तमिति। आदौ समुत्कण्ठया सद्य एव दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तं, ततो ददृशुरायान्तं विकासिमुखपङ्कजमिति विष्णुपुराणोक्तेः अत एव विशेषणालोक्य नैवदर्यनेषद्दर्शनेऽप्यनिश्चयात् किंवा दृष्टेऽपि परमार्त्या विश्वासाभावात्सम्यक्न निरीक्ष्येत्यर्थः तत्र हेतुः अबला विरह क्षामाः यद्वा अबलीयन्ते इत्यवलाः सुरतराजि ततत्तदङ्गावलोकनाभिनिवेशेन नीवीनाङ्गयष्ट्य इत्यर्थः। इत्थमवला इतितन्त्रेणाभिधानं आसां च द्वैविध्यद्योतनायैवागमनमिति द्विः पाठः ततश्च प्रेयस्यो वयस्याश्च प्रीत्युत्फुल्लमुखाः युगपदुत्तस्थुः विलासाख्योऽनुभावोऽयं यथोक्तम्

गतिस्थानासनादीनां मुखनेत्रादिकर्म्मणाम्।
तात्कालिकं तु वैशिष्ट्यं विलासप्रियसंगजम् ॥

उभयत्र हेतुः प्रेष्ठमिति प्रियतमं प्रकृष्टं सखायमिति च यथायोग्यं तथैव दृष्टान्तोऽपि यद्वा तन्वः प्राणमिवेति तदेकजीवत्वेनोभयान्वयी यद्वा तन्व्यः विरहेण कृशाङ्गयष्टयः पक्षे सुकुमार्यश्च तदेवमत्र प्रीत्युत्फुल्लदृश इत्यनेन मुखाम्बुजानामर्घपात्रत्वं दृशां च सद्यो विकासितकुसुमगयत्वं प्रीतेश्च सलिलत्वमध्यवस्यार्घनिवेदनमपि सूचितम् एवं च रतेर्भावाङ्गमिति दर्शितम् ॥ ३ ॥

तदेवं विरहदैन्येन सर्वासां तुल्यभावस्तन्त्रेणैवोक्तः इदानीं प्राप्तनिजालम्बनत्वेन तदेकप्राणानां निदाघतप्तानां लतानामिवोपलब्धरसानां स्वस्वभावमनुसरन्तीनां मध्ये कासांचित्मुख्यानां चेष्टितभेदैर्भावभेदानाह। काचिदित्यादिपञ्चभिः। अत्रायमभिसंधिः आसां परः प्रेमा तावद्विविधः कासांचित्शृङ्गारप्रधानः कासांचित्सख्यप्रधानश्च आद्यश्च सम्भोगविप्रलम्भात्मत्वेनात्मनि तदीयताभावनामयदाक्षिण्यप्रचुरः स चासौ दक्षिणानां कान्तपराधीनानां परस्तु कान्ते मदीयताभावनामयः स्वाधीनप्रेष्ठत्वाद्वामतादिप्रचुरः स चासौ क्षमायाः स्वाधीनपतिकायास्तदेकजीवनानां तस्याः सखीनां च खोऽयं परम आदरसाभिधः तदुक्तमलंकारकौस्तुभे चिरद्रवस्थायी भावः प्रेमाख्यः प्रथमो रस इति चित्तद्रवस्थायीभावो रतिस्थायी इत्यर्थः-

तत्रालम्बनमन्योऽन्यं गुणाद्योद्दीपनं मतम्।
विशिष्य कथनाभावोऽनुभावः परिकीर्तितः ॥
मत्यौत्सुक्यादयोऽप्यत्र योग्याः संचारिणो मताः।
संचार्य श्रीराधामाधवयोरेव यथा तत्रैव ॥
राधामाधवयोर्यत्तत्प्रेमक्षेमंकरं महदिति।
तत्र श्रीकृष्णप्रेमा यथा तत्रैव ॥
प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवाद।
त्वं मे प्राणा अहमपि तवास्मीति हन्तप्रलापः ॥
त्वं मे ते स्यामहमिति च यत्तच्च नो साधु राधे।
व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः ॥
उभयोर्यथा श्रीमत्सुधा निधौ।
सा लावण्यचमत्कृतिर्नववयोरूपं च तन्मोहनम् ॥
तत्तत्केलिकलाविलासलहरीचातुर्य्यमाश्चर्य्यभूः ॥
नो किंचित्करमेव यत्र न स्तुतिर्नागोप्यवा सं भ्रमो।
राधामाधवयोः स कोऽपि सहजः प्रेमोत्सवः पातु नः

अयंच दाम्पत्येऽपि शुद्ध एव तत्सुखपर्य्यवसायित्वात् तदुक्तमलंकारे-

प्रेमा दाम्पत्यभावोऽपि द्वयोः शुद्धतरो मत इति ॥

तत्रैवान्यत्र-

राधामाधवयोरेव शृङ्गारः श्रुतिरोचकः।
वैदग्ध्यं यत्र पर्य्याप्तं कृतार्थश्च मनोभव इति ॥

तदेवमुभयोरायस्तु रिरंसासङ्कीर्णः तत एव च पराधीनतामयः संयोगविप्रयोगरूपश्च अयंतु केवलसंयोगमयः स्वाधीनकान्ताख्यः यथा स्वीयाः सन्ति गृहे गृहेऽम्बुजदृशो यासां विलासक्वणात्

काञ्चीकुण्डलहेमकंकणझणत्कारो न विश्राम्यति-
को हेतुः सखि! कानने पुरपथे सौधे सखीनां पुरो।
भ्राम्यन्ती मम वल्लभस्य पुरतो दृष्टिर्न विश्राम्यति ॥

तत्रैवं भावद्वयमिश्रतारतम्येनोत्तममध्यमकनिष्ठभाववतीनां प्रत्येकं त्रैविध्यं त्रिविधासु च सजातीयभावानां परस्परं सख्यरोचकत्वात् विजातीयभावानां प्रतिपक्षत्वम् अरोचकत्वादरसजातीयभावानां सौहृदं यत्किंचिद्रोचकत्वेन हिताशंसनमात्रपरत्वात् अतिमिश्रत्वेनातिसूक्ष्मत्वेन वा नातिस्फुटसजातीयभावानां ताटस्थ्यं अवधानहेत्वभावात् तत्र च श्रीकृष्णविषयकनिजभावमात्राभिरुचितमतीनां सख्यस्य तदेकमूलत्वं श्रीराधाविषयकनिजनिजभावमात्राभिरुचिमतीनां सख्यस्य तदेकमूलत्वं तत्र तदीयतामदीयतामययोर्मुख्ययोर्भावयोरुत्तर एव श्रेयान् तत्र हि ममताधिक्येन गम्भीरः प्रेमप्रवाहो वर्द्धते ततश्च तद्विवर्त्तकौटिल्यापरपर्य्यायावामरूपं वाम्यमुदेति अहेरिव गतिःप्रेम्णः स्वभावकुटिला भवेदिति भरतोक्तेः तत एव च कान्तोऽपि तद्वशः स्यादिति परमोत्तमत्वं तस्याः सखीनां च तत्सुखसुखितानां तद्वशीकारितया ततोऽपि परमत्वमिति स्थिते भावद्वयविभागे श्रीकृष्णस्य वयमित्यभिमानवतीनां दक्षिणात्वं श्रीराधाया वयमित्याभिमानवतीनां वामात्वं तत्राद्यासु श्रुतिमुनिरूपाणां समावेशः परासु च तासामेव कासां चिल्लब्धशुद्धभावानां साधकचरीणां समावेश इति अत्रासां प्रखरमृद्वीमध्यादिभूयांसो भेदा उज्ज्वलादनीलमणेर्ज्ञेयाः विस्तरभिया

केन चित्कृता विशुद्धरसदीपिका ।

नोच्यन्ते नवायं विभागः प्रतिकूलतयासंभावनयिः तत्तन्नायिकारूपेण क्रीडन्त्याः श्रीराधाया अनुगतेन प्रियतमेन तत्तन्नायकभावाभिव्यञ्जकतया तत्तत्पोषवक्तृत्वाभिप्रायाद्रसस्यास्य तत्तत्प्रकारवर्णनेनैव सर्वोत्कर्षप्रदर्शनतात्पर्यपर्यवसायित्वादित्यलमतिप्रपञ्चितेन । काचिदिति औदासीन्यव्यक्तिः शौरेरिति पूर्ववत् कराम्बुजं जगृहे तच्च दक्षिणमेव पुरुषव्यक्तौ तस्यैव प्राधान्यात् तथा वनभ्रमणश्रान्ततया मत्तस्य तस्य करावलम्बनदानाय तादृशव्यवहारस्यौचित्यात् स्पर्शौत्सुक्याच्च अञ्जलिनेत्यादरः मुदेति प्रीत्युत्कर्षः ततश्चेयं मृदुः सख्यप्रायदास्या कान्तपराधीना दक्षिणा च नामानुक्तिश्च तत्समानभावानामन्यासामपि तदनन्तरं पात विवक्षया एवं सर्वत्र श्लोकार्द्धेनैव कथनात्कवेरौदासीन्यमिति संक्षेपः । काचिदिति । चन्दनेन रूषितं भक्तिच्छेदालिप्तम् द्वयमाकृष्य धारणात्प्रखरा व्यक्तसख्या किञ्चित्पराधीनकान्ता दक्षिणा च ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तदाविर्भावे जाता तासां या दशा तामाह । तम्विलोक्येति । तमागतमासमन्ताद्गतं प्राप्तं विश्वतश्चक्षुर्विश्वतः पात् सर्वतः पाणिपादं तत् मया ततमिदं सर्वजगदव्यक्तमूर्त्तिनेत्यादिश्रुतिस्मृतिभ्योविभुसर्वाङ्गत्वात् आगतमिव विलोक्य तदेजति तन्नैजति तद्दूरे तद्वन्तिके इति श्रुत्या विभुत्वादनेजनस्य तत्तत्प्रदेशाभिव्यञ्जकत्वेच्छानुसारेणैजनगमनस्य दूरान्तिकयोर्वर्तमानत्वस्य च सम्भवात् श्रुतौ एजृकम्पने इत्यस्मात् कम्पनञ्चलनमित्यर्थः । तत् उ अन्तिके इति पदच्छेदश्च विलोक्येत्यत्र तु अन्तरापि वर्त्तमानत्वे नान्तः पश्यन्त्यः सह विहरन्त्योऽपि पूर्वगीतेषु प्रहसितं प्रियप्रेमवीक्षणमित्यादिषु ते प्रहसितादि वीक्ष्य मुहुरति स्पृहेत्यादि तेन सहभाषमाणास्वपि ध्यानमङ्गलमित्युक्त्या वयं ध्यानलयेनैव पश्यामो नैव पश्याम इति भ्रमेण विकला अधुनातु विशेषेण गततत्संशयतया लोकयित्वा ता अबला अपि उत्तस्थुः तदुक्तं प्रेमनित्यव्यक्ततया अस्य गोपीजनस्यान्तर्बहिः प्राकट्यं भगवतः श्रुत्या तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति व्यापकतयान्येषामपि तथात्वेऽप्यव्यक्तत्वेन न तथात्वं तत्रावला इति प्रथमस्वरूपेणैव अवला नार्यो विशेषतो विरहदुःखकर्षिता गतप्राणास्तन्व इवावलाः प्राणमागतं तन्व इव प्राप्तबलाः सर्वा युगपदुत्तस्थुः अयमत्राभिप्रायः प्रयत्ने जाते कस्मिंश्चिदङ्गे चेष्टामात्रं भवति मरणोत्तर प्राणागमने तु सर्वोत्थानं तथा युगपत्सर्वा उत्तस्थुः यद्वा एकैकेन्द्रियप्रवेशेनोदतिष्ठत्तदाविराडित्यनुत्थानेऽपि "अत एव प्राण" इति व्याससूत्रनिर्णीतप्राणात्मनः क्षेत्रज्ञस्य प्रवेशे उदतिष्ठत्तदा विराडिति विराडुत्थानवत् प्राणमागतमिव विलोक्य ताः सर्वा उत्तस्थुः यद्वा तासु तस्याः तन्वः वस्तुतस्तत्स्वरूपत्वात् लीलायामपि तत्पत्नीत्वात्तस्य तासामतिप्रियत्वात्प्राण इति तमागतमिव विलोक्य युगपत्सर्वा उत्तस्थुः यद्वा सर्वास्तन्व इत्युक्त्या विरहकर्षिततया सूक्ष्मताङ्गताः प्राणात्मकस्य तस्य वियोगे तनुमात्रावशिष्टा वा तमागतं विलोक्योत्तस्थुः तस्यातिप्रियत्वमेव हि प्रेष्ठमिति प्रेष्ठत्वादेव तद्विरहे तनुमात्रावशेषत्वं दर्शने संजीवत्वलब्धवत्त्वेनोत्थानं चोपपन्नमेव किंच भगवदाविर्भावे सर्वोत्थानमभिप्रेत्य विलोक्येत्यनेन विलोकयितृत्वात्मन उत्थानमुक्तं प्रेष्ठमिति प्रियत्वावगमे मनस उत्थानसूचनं प्रीत्युत्फुल्लदृश इतीन्द्रियोत्थानोपलक्षणं बला इति बलप्राप्त्या प्राणोद्गमद्योतनम् उत्तस्थुरिति शरीरोत्थानं युगपदिति सर्वसङ्घातस्य समानकालोद्गमोक्तिः उत्थितानां तासां प्रियसमागमे चेष्टामाह । काचिदित्यादिना तत्र पूर्वं विरहदैन्येनैकदशापन्नानां सर्वासां सहनिरूपणमधुना प्रियदर्शनलब्धश्वासानां जाताश्वासानामुद्भूतविविधभावोल्लासानां विचित्रचेष्टानिदर्शनमिति विशेषः काचित् शौरेः कराम्बुजमञ्जलिना मुदा जगृहे इत्यन्वयः तत्र मुदेति प्रियदर्शनजातमोदेन लब्धसामर्थ्या अञ्जलिना मुदा करग्रहणन्तु आगतस्य प्रथमं सप्रेमादररीत्या यद्वान्तर्द्धानेन वाम्यभावङ्गतस्य पुनरुद्वेगशङ्कयाक्रमेण स्पर्शाकाङ्क्षया यद्वा अञ्जलिना हस्तद्वयेन ग्रहणं पुनः पलायनभयात् यद्वा करग्रहणेन पाणिग्रहणसूचकेन स्वीकृतत्यागे लज्जोत्पादनाय यद्वा वामभागस्य वामभागत्वात् शौरिरित्युक्त्यादक्षिणं करं जगृहे इतिसूचनात् दक्षस्य तव दाक्षिणत्वेन दाक्षिण्यभावयोगस्य वामासु वामभावस्य न वामत्वमिति भावद्योतनाय यद्वा अमलं निरुपाधिकं सुखस्वरूपं तं करस्थामलकवदपरोक्षतापादनाय यद्वा स्वहस्तगतत्वेन स्ववशीकरणाय यद्वा करस्यास्बुजमिति विशेषणेन श्रान्तस्तापोपशमाय कराम्बुजस्य योग्यतामाकलय्य यद्वा अयं पद्मां सदैव वक्षसि धृत्वैव विहरति मय्यपि न रमापेक्षया रूपलावण्यमाधुर्यादिगुणेषु वैकल्यमपि तु तस्याः करे पद्म इति सुरभिमृदुत्वाल्हादकत्वाद्यखिलगुणैस्तस्याः करस्थपद्मस्य भगवत्करपद्मस्याप्यनवगतत्वात्करपद्मग्रहणेन पद्मातोऽप्याधिकमात्मनस्तत्प्रियात्वसम्पादनेन तस्य द्वन्द्वामतया तस्या अपि द्वन्द्वामतया द्वन्द्वामतापादनाय यद्वा शौरिरित्युक्त्या शूरवंशप्रभवशूरवरस्य रतिरणे मल्लक्रीडाप्रथमभावद्योतनाय काचित्तु चन्दनरूषितं तेन लिप्तं तस्य प्रियतमस्य बाहुम् अंसे स्वस्कन्धे दधारेत्यन्वयः अत्रापि मुदेति पूर्ववदनुषज्य योजनीयं तद्वा होरंसे समर्पणन्तु ततोऽप्यन्तरङ्गसख्यभावद्योतनाय आत्मनस्तदन्तरङ्गत्वसम्पादनायैव वा सख्यभावप्रियसन्मानरीत्या वा प्रथमसख्या करग्रहेणन परीक्षिते तस्य वामभावोपरमे स्वदाक्षिण्यसहितधाष्टर्याविष्कारायवा यद्वा । चन्दनरूषितमित्युक्त्या तद्विरहे दाहकस्यापि चन्दनस्य तद्बाहुसम्बन्ध एव तापापनोदकत्वमाकलय्य यद्वा चन्दनलिप्ततयागौरं तद्बाहुं करकमलनालमिवाकलय्य तापोपशमायांसे धृतवती यद्वा चन्दनलिप्तं श्यामभुजं गङ्गायमुनासङ्गमं स्वेष्टफलदतीर्थराजमाज्ञाय तदवगाहनेन स्वेष्टसिद्धौ तदन्तः प्रवेशायांसे दधार यद्वा गौरचन्दनस्य तद्बाहु संगमदर्शनजातोत्साहा स्वयमपि गौरीश्यामबाहुसङ्गतिंचकार यद्वा तद्बाहुं चन्दनलिप्तं दृष्ट्वा चन्दनानुलेपयुतपुष्पसमर्पणस्यौचित्यात् अंसे धारणेन स्वमुखाम्बुजस्य समर्पणाय यद्वा मलयादागततल्लिप्तभोगिवच्चन्दनालिप्ततद्बाहुनोचितस्वभुजभुजङ्ग्याः समागमेनैव स्वात्मनोऽपि स्वपक्षेसमागमहस्तेकप्रयत्नेन कार्यद्वयसम्पत्तिमवगत्य तथाचरणं यद्वा चन्दनालिप्तं तद्भुजंसलयद्रुम शाखां मत्वा भुजभुजङ्गया विरहविषतापोपशमार्थं तन्मेलनाय स्वांसे दधार तथाच तन्मिलनमात्रेण सा पञ्चफणा भुजभुजङ्गी गतविरहतापावधी प्रवृद्धानुरागसुखाभ्यामाभिभूतस्वपराजुसंधानत्वेनतत्तया लब्धजाड्या प्रेमोद्भूतरोमपुलकमुकुलांस्फुरदुत्फुल्लकरकुसुमा

काचिदञ्जलिनागृह्णात्तन्वी ताम्बूलचर्वितम्।
एका तदङ्घ्रिकमलं सन्तप्तास्तनयोरधात्॥ ५॥
एका भ्रुकुटिमाबद्ध्य प्रेमसंरम्भविह्वला।
घ्नन्तीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा॥ ६॥

श्रीरामनारायणकृतभावभावविभाविका।

शाखालीङ्गितलतेव बभौ ततश्च मलयसङ्गमे लताया अपि चन्दनत्ववत् हरिभुजसौरभ्यस्य तद्भुजे संपत्तौ भक्तेषु निजसत्त्वात्मकप्रेमरसं स्वयं दत्त्वा तदीयानुरागमत्या भक्तवश्यत्ववत् तल्लुब्धतया मधुपतेरपि मधुपत्वापत्तिरात्मारामत्वं च॥ ४॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

ततः किंवृत्तमित्यपेक्षायामाह। तमिति। तं तथाभूतमागतं विलोक्य तासां विह्वलतादशायामाविर्भूतत्वात्तच्छरीरसुगन्धाघ्राणादिना ससंज्ञाः सत्यः अहो आगतोऽयं प्रेष्ठ इत्यमन्यन्तेति सूचयितुमागतमित्युक्तं प्रीत्या विकासितनेत्रपद्माः प्रीतिपारवश्यात्कोपानिवृत्त्या तादृश्यो जाता इति भावः। तत्राप्यबलास्तत्प्रतीकारबलेरहिताः यद्वा विरहेण कृशतां गतत्वाद्दुर्बला बलरहिता अपि यतः प्रेष्ठं तद्दर्शनमात्रेणैव सबला इति भावः। सर्वा अपि युगपदेवोत्तस्थुः आगतं प्राणं प्राप्य तन्वः करचरणादयः शरीरावयवा यथा द्राक्त्यकान्यनेकानि योगशरीराणि प्राणं प्राप्य यथा युगपदुत्तिष्ठन्ति तद्वत् एक एव कृष्णस्तासां प्राण इतिबोधनाय प्राणमित्येकवचनम्॥ ३॥

तत्र युगपदुत्थितानां सर्वासां मध्ये मुख्यानां पृथक्चेष्टितान्याह। काचिदिति। चन्द्रावली श्यामा शैव्या पद्मा राधा ललिता विशाखा भद्रेत्यष्टौ मुख्याः सख्यः तत्राद्याश्चतस्रः सरलस्वभावत्वाद्दक्षिणाः उत्तराश्चतस्रः वामस्वभावत्वान्मानिन्यः अत एव मुनिनापि सरलानां मध्ये एकैकस्याश्चेष्टितमर्धेनार्धेनोक्तं वामानां मध्ये त्वेकैकस्या वृत्तेनोक्तं तत्रादौ कान्तपराधीनाया दक्षिणाया वृत्तमाह। काचिच्छौरेः दक्षिणं करकमलमञ्जलिना संहतहस्तद्वयेन जगृहे तत्रापि मुदा परमहर्षेण भ्रमणप्राप्तश्रमस्मरत्वा स्पर्शौत्कण्ठयात्करावलम्बनव्याजेन प्रेम्णा तद्गृहीतवतीत्यर्थः। इयं तु राधां प्रति स्पर्धिनी चन्द्रावली संज्ञा तथाचोक्तं बिल्वमङ्गले—

राधामोहनमन्दिरादुपगतश्चन्द्रावलीमूचिवान्।
राधे क्षेममिहेति तस्य वचनं श्रुत्वाह चन्द्रावली॥
कंसं क्षेममये विमुग्धहृदये कंसः क्व दृष्टस्त्वया।
राधा क्वेति विलज्जितो नतमुखः स्मेरो हरिः पातु व इति॥

अथ द्वितीयायाः कान्ताधीनायाः दक्षिणायाश्चेष्टितमाह। काचिच्चन्दनलिप्तं विरहतापोपशामकं तस्य बाहुं स्कन्धे मुदा दधार इयं राधा सुहृद्भूता श्यामलाख्या सखी॥ ४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तं श्रीकृष्णमागतमाविर्भूतम् युगपद्विलोक्य सर्वा युगपदेवोत्तस्थुरित्यर्थः। अनेन तत्तत्समीपे तत्तदाभिमुख्येनाविर्बभूवेति सूच्यते तत्र दृष्टान्तस्तन्वः करचरणादयः प्राणमागतमिवेति॥ ३—५॥

भाषा टीका।

उन प्रियतम श्रीकृष्णचन्द्र को दूरते आवत देख सब गोपी प्रीतिते प्रफुल्लित नेत्र वाली होगईं जैसे गये प्राण के लौट आयवे पै सब इन्द्रिय चेतन होवें हैं तैसे सब उठ खडी होगईं॥ ३॥

काउ गोपी ने अपने दोनों हाथों ते भगवान् के हाथ को आनन्दते ग्रहण कीनो काउ ने दिव्य चन्दन ते शोभित उनके भुजा को अपने कांधे पै धारण कियो॥ ४॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अञ्जलिना संहतहस्तद्वयेन॥ ५॥

भ्रुकुटिं भ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला विवशा दष्टाधरोष्ठा कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैस्ताडयन्तीवैक्षत॥ ६॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

अञ्जलिनेति। पूर्ववत् किंवा बहुलाभाशया सदा चर्व्यमाणं ताम्बूलं प्रवर्त्तते परम रस मयत्वात् पतन शङ्कया वा यतः तन्वी विरहेणातिकृषा ताम्बूलं श्रीभगवतैव नागर शेखरेण स्वयमानीतं किंवा श्रीवृन्दादेव्याद्यार्पितं ज्ञेयम् अंघ्रिकमलमेकं स्तनयोर्न्यधात् इत्येतस्यास्तदर्थमुपवेशो ज्ञेयः श्रीभगवदुपवेशस्त्वग्रे तत्रोपविष्ट इति वक्ष्यते तस्य तयोर्निधाने हेतुः सन्तप्तेति अन्यथा विरहतापकामज्वरयोरनुपगमः हृदय इति पाठेऽपि स एवार्थः॥ ५॥

प्रेमसंरम्भेणैव भ्रुकुटिमा सम्यक् बद्ध्वा पश्चात् प्रेमसंरम्भविह्वला बभूवेति शेषः ऐक्षतेति परेणान्वयः तथाच श्रीविष्णुपुराणे—

काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम्।
विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजमिति॥

अन्या च कटाक्षबाणाक्षेपैर्घ्नतीवैक्षत अत्रापि प्रेमसंरम्भ एव कारणं ज्ञेयं निर्दष्टदशनच्छदेत्युक्तेः प्रेमेत्यनुवृत्तेर्वा॥ ६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

प्रेमसंरम्भविह्वला सती भ्रुकुटिमाबध्य निर्दष्टदशनच्छदा भूत्वा कटाक्षेपैर्घ्नतीवैक्षतेत्यन्वयः। कटाक्षेपैः कटाक्षविक्षेपैः। सन्दष्टेति क्वचित् पाठः। शौरिमिति प्रकरणात्। घ्नतीवेति तस्यापि क्षोभं व्यज्य ताभिर्गृहीतत्वेनैव दाक्षिण्यमात्रेणैव च स

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र स्थित इति व्यज्यते । तथा वाम्येन दूरस्थिताया अपि तस्याः प्रेमसंरम्भेत्यनेन तदीक्षणे परमसुखं दर्शितम् । यथा श्रीविष्णुपुराणे । काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम् । विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजमिति अत्र बिब्बोकाख्यानुभावो दर्शितः । यथोक्तम् इष्टेऽपि गर्वमानाभ्यां बिब्बोकः स्यादनादर इति । तथा ललिताख्योऽपि यथोक्तं विन्यासभङ्गिरङ्गाणां भ्रूविलासमनोहरा । सुकुमारा भवेद्यत्र ललितं तदुदीरितम् इयं प्रखरा सुसख्यात्यन्तस्वाधीना वामा कान्ता च ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

जुषाणा जुषमाणा सेवमाना ॥ ६—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काचित्तन्वी योषिदञ्जलिना संहतहस्तद्वयेन तस्य ताम्बूलचर्वितं चर्विततांबूलं जग्राह एका तु विरहतापेन तप्तयोः स्तनयोस्तस्य भगवतोऽङ्घ्रिकमलं कमलवच्छीतलमङ्घ्रिमधाद्धार ॥ ५ ॥

एका तु भ्रुकुटिं भ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरम्भेण प्रेमगर्भक्रोधेन विह्वला निर्दष्टो दशनच्छदोऽधरोष्ठो यया तथाभूता कटाक्षेण प्रतीव ताडयन्तीवैक्षत कटाक्षेपैरिति पाठे कटाक्षपातैरित्यर्थः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चर्वितं भक्षितोच्छिष्टम् अधात् दधार ॥ ५ ॥

प्रेमसंरम्भविह्वला प्रणयकोपाकुलिता भ्रुकुटिं ललाटशिराम् आबध्य प्रकाश्य निर्दष्टदशनच्छदा नितरां दष्टोष्ठपुटा ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

काचिदञ्जलिनेति कुमारिकाणां मुख्या एका तदङ्घ्रिकमलमिति सदैन्यप्रणयवती सा तु काचिद्धारतद्बाहुमिति बाहुं स्वांसे दधत्याः कस्याश्चित्स्कन्धे कृतावर्जनतया शिथिलैकपादस्य तस्य स्थितिरत एव शिथिलं चरणं स्वयमुपविश्य स्तनयोः कृतवती ननु तदा भगवानुपविष्टः ॥ ५ ॥

एका भ्रुकुटिमाबध्येति प्रणयक्रोधवती केचिदेनां श्रीराधामाहुः ॥ ६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अतः काचित्ताम्बूलचर्वितमञ्जलिना अगृह्णात् तस्याः ताम्बूलयोग्यतामाह । तन्वीति । कोमलाङ्गी एका पुनः बहिःस्थिता साक्षात्संबन्धमलभमाना उत्थातुं वा अशक्ता उपविश्यैव तदङ्घ्रिकमलं स्तनयोरधात् अनुत्थाने धारणे च हेतुः सन्तप्तेति सा अत्यन्तं विरहातुरा ॥ ५ ॥

एकेति । अन्या पुनर्दूरस्था तामसी तमसा भ्रुकुटिमाबध्य कटाक्षेपैः प्रतीव ऐक्षत अत्र सवर्णे वर्णलोपः कटाक्षक्षेपैरित्यर्थः । प्रेम्णा सहितो यः क्रोधसंरम्भः तेन विह्वला सम्यक् दष्टः दशनच्छदो यया तादृशी च जाता भ्रुकुटिबन्धनेन चित्तकौटिल्यं प्रेमसहितसंरम्भेण इन्द्रियवैकल्यं संदंशेन देहक्षोभः प्रतीवेति प्राणैर्विलस्फूर्तिः ज्ञानसाधनमपि तस्या विकृतं प्रान्तदृष्टिः कटाक्षः तत्रापि आक्षेपभावः यथा वाचावगुरयां तथा कटाक्षा एव आक्षेपरूपाः निरन्तरं प्रवृत्ताः तादृशभावस्य पूर्णत्वाय कालनियमनार्थं वा भ्रुकुटीभङ्गः स्वभावनियमनार्थं च संरम्भः लोभनाशार्थं दंशः मोक्षाभावार्थं ज्ञानवक्रता प्रमाणनिराकरणार्थं हननमिति यतो लौकिकिकी भक्तिः पुष्टा भवति एतदर्थमेषा निरूपिता ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जलिनागृह्णादितीयं दास्यप्रायमैत्र्या कान्ताधीना दक्षिणा च । अङ्घ्रिकमलं दक्षिणमेव स्वहस्ताभ्यां गृहीत्वा भूमावुपविष्टा स्तनयोर्न्यधात् । ततश्च वामभुजेन कान्तायाः स्कन्धमालम्ब्य वामचरणेन भुवमवष्टभ्य कृष्णस्तस्थाविति ज्ञेयम् । इयं मैत्र्यप्रायदास्या कान्ताधीना दक्षिणा चेत्यत इमे तदीयतामयघृतस्नेहवत्यौ प्रथमायाः सख्यौ ॥ ५ ॥

भ्रुकुटिमाबध्य एवं कुटिलीकृत्य सज्यं धनुः शरसंसक्तं प्रतान्येवेत्यर्थः । प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला विभ्रमा कटाः कटाक्षाः शरास्तेषां क्षेपैर्निक्षेपैः कृष्णं लक्ष्यभूतं प्रतीव भोः कुहकशिरोमणे ! स्वप्रेमहालाहलं त्वया मयि प्रयुज्य सम्यक्या सफलीकृतं देहान्निःसृतप्रायान् प्राणान् दग्धुं किं पुनरपि प्रत्यासीदसि त्वं साध्वेव परिचितोऽभूरिति व्यञ्जयन्ती ऐक्षत । निर्दष्टदशनच्छदेत्यञ्जलिना धृतस्य स्वाधरस्य दंशः कोपानुभावः । इयं मदीयतामयमधुस्नेहे स्थमानकौटिल्यवती ॥ ६ ॥

केन चित्कृता विशुद्धरसदीपिका ।

काचिदिति । ताम्बूलमत्र प्रतिकुञ्जं मालादिसाहित्येन वृन्दादेव्या स्थापितं शौरेरिति प्रकरणलब्धम् अञ्जलिनेति पूर्ववत् औत्सुक्यमधरामृतसाहित्यात् एतच्च वितर वीर नस्ते धरामृतमित्यस्या एवाभिलाषः इयञ्च मृदुर्दास्यप्रायसख्या कान्तपराधीना दक्षिणा च ततश्च श्रुतिमुनिरूपासु कान्तभाववतीयमिति ज्ञेयं एकेति । तदङ्घ्रिकमलमपि दक्षिणमेव स्तनयोरधात् वामभुजेन प्रियालम्बनेन समचरणन्यस्ताङ्गभारताप्राप्तेः सम्प्रति स्थित एव चायं उपवेशस्याग्रे वक्ष्यमाणत्वात् अत उपविष्टयैव तया चरणधारणं तस्य तयोर्निधाने हेतुः सन्तप्तेति विरहमयरत्याख्येन भावेन विशेषः इयं च प्रखरा दास्यप्रायसख्या कान्ताधीना दक्षिणा च अस्याश्चरणपङ्कजं शंतमं चेत्यभिलाषः इयमपि पूर्ववत् तिस्र एताः कान्तभाववत्यः ५ ॥

अथ वामानां कामानधीनां मुख्यामेव प्रीतिसुपदशयितुं तासां स्वामिन्या सर्वाभिरन्याभिश्चेष्टितमेकेन श्लोकेनाह । एकेति । सर्वासु मुख्यतमा 'एके मुख्यान्यकेवलाः'' इत्यमरः यद्वा सर्वास्वप्यवस्थासु प्रियत-

केनचित्कृता विशुद्धरसदीपिका ।

मेनैकताङ्गतेत्यर्थः । प्रेमसंरम्भविह्वलेति स्वभावोक्तिः तत एव पूर्वोक्ताभ्यः कामविह्वलाभ्यो वैशिष्ट्यं भ्रुकुटिमावध्येति वाम्यव्यक्तिः यद्वा सुरतचिन्हगोपनाय रोषानुकरणं निर्दष्टदशनच्छदेति कथनात् कटाक्षैपैः कटाक्षविक्षेपैरित्यर्थः । इयञ्च तस्याः शोभचेष्टां वर्णयतः श्रीमुनीन्द्रस्याप्यर्द्धहासितवर्णौ क्रीगौरैवेगा भीत्यनुकृतेरिति इयं चाखिलमप्यनाविलप्रेमगोपनाय यदेताभिर्दक्षिणभागे निगृहीतोऽप्ययामित एवानुसरति रतिलम्पट इति वाम्येन तस्य स्थगनम् अयमेव विव्वोकाख्योऽनुभावः "इष्टेऽपि मानगर्वाभ्यां विव्वोकस्यादनादर" इत्युक्तेः ललिताख्योऽपि यथा " विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा सुकुमाराभवेद्यत्र ललितन्तदुदीरित" मिति तथा माधुर्य्यं सर्वभावानां सर्व्वावस्थासु चारुतेत्युक्तलक्षणे माधुर्य्यातिशयश्च सूचितः इयञ्च प्रखरा सुसख्यात्यन्तस्वाधीनकान्ता वामा सर्वाभिरामाचेति मुख्यतमैवेत्यलमतिप्रपञ्चितेन तासां तासां चेष्टितादिसंग्रहश्चैतस्या एव सौभाग्योत्कर्षवर्णनाग्रहेणेति यदेताः सर्वा अपि वञ्चयित्वैनामेवारमयदिति दिक् ॥ ६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अन्यायाः अधरामृतरसलुब्धायाश्चरितमाह । काचिदञ्जलिनेति । काचित्तन्वी तु तस्य ताम्बूलचर्वितमञ्जलिना अगृह्णादिति तस्येत्यध्याहृतेनान्वयः । तत्र तन्वीति सुन्दराङ्गी प्रियाधररसपानार्हा चर्वणे तदधररसान्वितमिदमिति ज्ञात्वा मिष्टमिष्टं हि मत्वा तल्लोभेनोच्छिष्टभक्षणमितिन्यायमाश्रित्याञ्जलिनेतियोजिनपाणिद्वयपुटेनात्यादरेण गृहीतवतीत्यर्थः । यद्वा काचित्तन्वीति विरहतापशोषणेनातितनुसूक्ष्माङ्गी स्वपोषणस्य तदधरामृतजोषणाधीनतामवगत्य बह्वीषु बलात्तदास्वादनेतिधार्ष्ट्यं तत्तर्षोत्कर्षेण विलम्बासहिष्णुताञ्च व्यञ्जस्याञ्जलिनेति पाणिद्वयं संयोज्य शिरोधारणेन प्रार्थयित्वागृह्णात् यद्वा यतस्तच्चर्वितमञ्जलिना गृह्णादत एव तत्पुष्ट्या तनुविस्तार इत्यस्मात्प्रफुल्लितशरीरा सफलदेहा वा जाता यद्वा सहजसरागोऽपि प्रियतमाधरोऽनेनातिरागान्वितः कृत इत्येतद्धृदयनिवेशोऽनुरागवृद्धौ सौभाग्यातिशयान्विताशयान्विताऽगृह्णात् तदेतदीतिदन्यदास्यभावरसाभिज्ञतान्वितावा आचरितमिति वोध्यं काचिदन्यापि दाक्षिण्यभावमेवानुगता तु प्रियदर्शनेन तदानुकूलभावेन च किञ्चित् विरहचिन्ताग्निद्वयोपशान्तावपि लब्धालम्बनया तदतिस्निग्धापाङ्गनिरीक्षणस्नेहवृष्ट्योद्दीपिततयाचातिवृद्धहृच्छयाग्निसन्तप्तास्तनयोस्तदङ्घ्रिकमलं स्वतापपरीक्षार्थं न्यधात् यद्वा स्वोरोजयोर्बहुधा बहुसरोजस्रग्योजनेऽपि विरहचिन्ताकामोद्भूतत्रिदोषज्वरानुपशमे आधिदैविकाध्यात्मिकादित्रिदोषविषमज्वरोपशमाय मुनिभिर्हृदि धृतं तदुपशमकं तदङ्घ्रिमृदुकमलं तत्सदृशं कं ब्राह्मणं मं शिवञ्च लाति अनुगृह्णातीति वा स्वर्गमपि मलमिव हेयं यस्मादिति वा कमलं तदुपशमायैव स्तनयोर्न्यधात् ॥ ५ ॥

अथ वामाया आचरितमाह । एकेति । एकातु प्रेमसंरम्भविह्वला तथा सन्दष्टदशनच्छदा भ्रुकुटिमावध्य कटाक्षेपैर्घ्नन्तीवैक्षत अत्र सवर्णे वर्णलोप इतिकटाक्षक्षेपैरित्यर्थः । एकेत्यनेन सर्वसुख्यायूथेश्वरीश्वरी यद्वा एका इति सा एकैव न तादृशी काप्यन्या स्वाधीनपतिका प्रेमगाधा लब्धविरहबाधा श्रीमती राधा कृतापराधं माधवमालक्ष्य प्रेमसंरम्भाविह्वलेति प्रेम्णा यः संरम्भः क्रोध एवमस्मत्प्रेमभावेऽप्ययं कुटिलकृष्णबहिरन्तरतया सर्वतो वियोज्य नस्त्यजतीति तत्र प्रेमिणां गृहादिभ्यो वियोजनयोग्यमेवेति न दोषाय किन्तु प्रेमभावान्वितानां तद्भावान्वितानां त्यागे सद्भावः परमदुःखायेति तेन विह्वला यद्वा प्रेमैव संरम्भः क्रोधो रतिरणे तद्रूपक्रोधस्यैवोचितत्वात् यथा यथा क्रोधाधिक्यं तथा तथाङ्गैरङ्गानि परस्परं सम्पीड्य प्रपातनरदनखादिच्छेदनरूपरणाधिक्यतया रतिरणे तु यथायथा प्रेमाधिक्यं तथा तथा गाढालिङ्गनादिपूर्वकरतिरणसौष्ठवापत्तिः तेन विह्वला प्रेम्णैव विकलचित्ता तथा सन्दष्टदशनच्छदेतिदशनच्छदसंदंशस्तु स्वभावत एव स्मितरूपविकाशाल्हादसुधात्मकविकाशान्वितः प्रियामुखाम्बुजचन्द्रः प्रियदर्शने त्वतिशयेन जातप्रहासोल्लासः तथाचैवं विरहदुःखदानेऽपि मुखप्रसादमालक्ष्य कदाचिन्निर्भयः पुनरप्येवं कुर्य्याच्चेत्तदासर्वासां मरणमेवत्याशयानुरोधेन स्मितानुरोधाय यद्वा रदकुन्दकलिकासखीभिः कुसुमयति मुखपद्मदलाधरवशीभाववत् दशनभगणरूपसखीभिर्मुखचन्द्रवशीभाववत् सखीभिः पतिः वश्यतैव रसरीतिरिति वोधाय यद्वायमधरोऽतिमधुर इति त्वयाप्यास्वादनीयः इति द्योतनाय यद्वा रतिरणारम्भाय जातप्रेमात्मसंरम्भेण त्वदधरालाभे स्वाधर एवच्छिद्येत इति त्वयाप्यतिसंरम्भेण सावधानतया रतिरणसमुद्यमः कर्तव्यः तथा भ्रुकुटिमावध्येति भ्रुकुटिबन्धस्तु कुटिलकृष्णोऽपि भवानस्माभिः शिरसि धृतस्त्वं तु तथापि कौटिल्यं न जहासीति व्यञ्जनाय यद्वा कुटिलकृष्णेऽपि भ्रुवो मया प्रेमसंरम्भेण बद्धो भवान्किमिति प्रेमसंरम्भेणापि न बध्यते यद्वा बद्धे अपि भ्रुवौ मया शिरस्येव धृते इति प्रेमसंरम्भबद्धत्वे त्वया तस्यानादरः शङ्कनीयः यद्वा रतिरणारम्भाय मया प्रेमसंरम्भेण युगधनुषी युगपदाकृष्टे इति त्वयापि न रतिरणासन्धाने विलम्बोऽनुसन्धेयः ननु मया प्रेमसंरम्भभयेन भवत्या सन्धिरेवाकाङ्क्ष्यते इतिचेद्भवतु तर्हि मया नितरां तव सन्धिरतिरणप्रतिबन्धकोऽपि तु तत्संसाधक एव किञ्च सुरतिशूराणां न रतिरणोपशमः स्पृहणीयः किन्तु तदुद्गम एवेति कटाक्षाणां तिर्य्यङ्निरीक्षणरूपापाङ्गानामनङ्गवृद्ध्या कृतस्वविद्धजनापाङ्गानां कामबाणानां इन्द्रनीलनीरजमणिजटितचित्राक्षाक्षयनिषङ्गसांगिनां भ्रूधनुर्द्वयमाकृष्य नेत्रे प्रेम्णा रतिरणोद्यतीकरणाय घ्नन्तीवैक्षत यद्वानन्दघने परप्रेमास्पदे तस्मिन् रसभावदक्षाणां तासां वामभावामभीप्स[१]तीनामतिवामानामतिवामान मतिवामानां दाक्षिण्यस्यैव वामत्वं वामभावस्य तु वामत्वमेवेत्यत्रापि दाक्षिण्यख्यापनमेव दाक्षिण्यमित्येवं योजना एकाशब्दस्तु पूर्ववदेव देव्या उत्कर्षे प्रेमसंरम्भविह्वलेति प्रेम्णः संरम्भेण रभ राभस्ये इत्यस्माद्वेगेन विह्वलातिक्रान्ततयालिङ्गनामिच्छत्यपि कर्तुमशक्ता प्रेमवेगाधिक्ये हेतुः सन्दष्टदशनच्छदेति प्रियेण सम्यग्दष्टौ पूर्वविहारावसरे आस्वादितौ दशनच्छदौ यस्याः प्रेष्ठस्यैव वा तस्य सम्यगास्वादिनौ दशनच्छदौ यया तन्मधुपानलुब्धा मत्ता चेति भावः । अनिमिषेक्षणायैव भ्रुकुटिमावध्य कटाक्षेपैः स्निग्धापाङ्गैः घ्नन्तीव हन हिंसागत्योरित्य

---

[१] अतिन्द्यां सुन्दरीणां स्वसौन्दर्यमादिगुणैरतिक्रान्ताः वामा याभिस्तासां नमतिर्वा मा विपरीता यासामत एवातिक्रान्तो वामभावे स्वकान्तरोषमानादिख्यापनरूपो याभिस्तासाम्

अपराऽनिमिषद्दृग्भ्यां जुषाणा तन्मुखाम्बुजम् ।
आपीतमपि नातृप्यत्सन्तस्तच्चरणं यथा ॥ ७ ॥
तं काचिन्नेत्ररन्ध्रेण हृदि कृत्य निमील्य च ।
पुलकाङ्ग्युपगुह्यास्ते योगीवानन्दसंप्लुता ॥ ८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

स्मादात्मानं तत्र गमयन्तीव प्रेष्ठं व नेत्रद्वारा तद्भावदर्शनोत्साहज-ननेन वा स्वस्मिन् प्रापयन्तीवैक्षत स्वान्तः प्रेमभावानेव वा तस्मै गमयन्ती ज्ञापयन्तीवैक्षत ॥ ६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ तृतीयायाः कान्ताधीनायाः दक्षिणायाः वृत्तमाह । काचि-च्छौरेः ताम्बूलचर्वितं परमादरादञ्जलिना गृहीतवती नत्वेकेन हस्तेन यतस्तन्वङ्गी कोमलाङ्गी तथा तद्ग्रहणयोग्या इयं चन्द्रा-वली सुहृद्भूता सैव्याभिधा सखी अथैवम्विधाया एव चतुर्थ्या वृत्त माह । एका तस्य वामभुजेन श्यामलाख्यां सखीमवलम्ब्य तिष्ठतः प्रेष्ठस्य दक्षिणमङ्घ्रिसरोरुहं स्वयमुपविष्य सती स्तनयोरधात् यतः सन्तप्ता इयमपि चन्द्रावली सुहृद्भूता पद्माख्या सखी ॥ ५ ॥

अथ वामासु प्रथमायाः अतिवामायाः प्रखरायाः स्वाधीन-कान्तायाः वृत्तमाह । एका भ्रुकुटिमाबध्य भ्रुवौ कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला सती सन्दष्टाधरोष्ठा भूत्वा कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैः ताडयन्तीव ऐक्षत "इष्टे ऽपि गर्वमानाभ्यां बिब्बोकः स्यादनादरः" इत्युक्तलक्षणो बिब्बो-काख्योऽयमनुभावः सर्वाः परित्यज्य या नीता पश्चात्त्यक्ता च सेयं श्रीराधाख्या मुख्या सखी गोपालतापिन्यां गान्धर्वेति नाम्ना ख्याता ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एका तु भ्रुकुटीं भ्रुवमाबध्य कुटिलीकृत्य प्रेमनिमित्तो यः संरम्भः क्रोधावेशस्तेन विह्वला व्याकुला संदष्टः दशनच्छदेऽधरोष्ठो यया सा कटाक्षैपैः कटाक्षपातैर्घ्नन्तीव ऐक्षत ॥ ६ ॥

भाषा टीका ।

कोई सुन्दर गोपी अपने अंजलिते भगवान् के ताम्बूलकी चर्वित प्रसदी को ग्रहण करत भई, एक गोपी अति विरह ते तपी भई श्री चरण कमल को अपने स्तनों पै धारण करत भई ॥ ५ ॥

एक गोपी अपनी दोनों भौं को टेढी कर प्रेमके क्रोधते अति विह्वल हो गई औ दांतो को दबाके टेढे कटाक्षों ते प्रहार करतभई ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनिमिषन्तीभ्यामनिमीलन्तीभ्यां दृग्भ्यामापीतमपि सम्यग्दृष्टमपि पुनःपुनर्जुषाणा नातृप्यत ॥ ७ ॥

हृदिकृत्य हृदयं नीत्वेत्यर्थः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

जुषाणा सेवमाना प्रीत्या वीक्षमाणेत्यर्थः । आपीतमपि दृशो-श्चषकत्वं ध्वनितं परमप्रीत्या सम्यग्दृष्टमपीत्यर्थः । सन्तः प्रीति भक्त्येकनिष्ठाः इति मधुरप्रेम्णः प्रीतिभक्तेर्वा तृप्त्यभावांशमात्रे साम्य-मभिप्रेतं किन्तु सारङ्गाणां पदाम्बुजमिति न्यायेन तेषां पदाम्बुजे भक्तिः आसान्तु प्रेयसीनामधरामृतादिलोभेन प्रायः श्रीमुख एव राग इति प्रेमवैशिष्ट्यं सूचितमेव अत एव तेषां श्रीपादाब्जयोः कोमलत्वादेः प्रायः साक्षादनुभवादब्जादि-रूपकाप्रयोगः ॥ ७ ॥

काचित् परमलज्जादिगुणनम्रा साक्षाच्चिरमुद्वेष्टुमप्यक्षमा अत एव नेत्रयोः रन्ध्रेण द्वारेण हृदि कृत्येति मनसि सर्वाङ्गस्फूर्त्या तत्तदशेषसौन्दर्य्यानुभवार्थमिवेति निमील्य नेत्रे एकस्मिन्नेवाङ्गे नेत्रयोर्लग्नयोरन्येषां मनस्यपि दर्शनासम्भवात् किम्वा नेत्रद्वा-रेण निःसरणभयादिव वस्तुतस्तु तत्तत्प्रेमसम्प्लुतत्वस्वभावेनैव अत एवोपगुह्य हृदि तमालिङ्गय चकारात् कृष्ण कृष्णेति कीर्त्तयन्ती तथाच श्रीवैष्णवे पुराणे—

काचिदालोक्य गोविन्दमायान्तमतिहर्षिता ।
कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदीरयत् इति ॥

काचित् भ्रुकुटिमित्यत्र ययैकैव गोपी व्याख्याता तदात्र पराशरो-क्तेयमष्टमी ज्ञेया आनन्दरसेत्यन्तनिमग्ना सती आस्ते क्षणमासी-दित्यर्थः । योगी ध्यानयोगेन भगवति चित्तैकाग्र्ययुक्तः तथाच श्री-वैष्णवे काचिदालोक्य गोविन्दं निमीलितविलोचना । तस्यैव रूपं ध्यायन्ती योगारूढेव चावभाविति बहिर्वृत्त्यभावमात्रे दृष्टान्तः तत्र च नेत्ररन्ध्रेणेति तस्मादप्यस्या विशेषः सूचितः ध्यानेन दर्शनादपि साक्षात्संदर्शनेऽत्यन्तानन्दात् तच्च श्रीभागवतामृते विवृतमेव तत्रापि काचिदिति गोपीत्वेन भावविशेषात् अत एवालिङ्गनाच्च साक्षा-त्संदर्शनवद्भ्यः पार्षदादिभ्यः गोपवर्गादिभ्यश्चानन्दविशेषः सूचित एवेति "नौमि चन्द्रवलीं भद्रां पद्मां शैव्यां च श्यामलां विशाखां ललितां राधामित्यष्टौ प्रेष्ठतां गताः" । तत्तन्नामाग्रहणकारणं पूर्वं लिखितमेव यद्यप्यासां प्रेम्णि तारतम्यबाहुल्यं न घटते प्रत्येकं सर्वासां तस्मिन् प्रायः परमकाष्ठापत्तेः अत एव कराम्बुजग्रहणादिषु तासां स्वस्वभावानुसारेण तदानीतनेच्छानुसारेणैव वा प्रवृत्तिः तथापि मुक्तगणपूज्यानां श्रीवैकुण्ठपार्षदवराणाम् इव तासामपि कथंञ्चित्तारतम्यकल्पनया तत्रापि मुख्यत्वेन प्रसिद्धानामष्टाना

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तास्वपि श्रीराधादेव्याः सुप्रसिद्धत्वेन सर्वतो वैशिष्ट्येन श्रेष्ठ्यं ततश्च तद्भावानां तत्तच्चेष्टितानामप्यूह्यम् अत एवाष्टौ तथा तथा पृथगुक्ता इति दिक् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

जुषाणा आस्वादयन्ती आपीतं सम्यगास्वादितं माधुर्यमपि इति दृशो रसनात्वं मुखस्याम्बुजतारूपकेण तत्सौन्दर्यस्य मधुत्वञ्च रूपितम् । दृशो रसनात्वरूपकेण तु तन्माधुर्यासक्तिर्दर्शिता । शान्ता दास्यभक्तिनिष्ठा इति साक्षाद्दर्शनेऽपि तृप्त्यभावमात्रे दृष्टान्तः । वैशिष्ट्यं तु तत्तद्भावमाधुरीव्यञ्जकश्रीमुखालम्बनतया विद्यत एव । इयं सन्मुखदत्तदृष्टित्वात् प्रखरा स्वयमेवासौ मां मिलिष्यतीति स्वस्थान एव स्थितत्वात् सुसख्या स्वाधीनकान्ता भामा च ॥ ७ ॥

तं नेत्ररन्ध्रेण हृदि कृत्येति तस्या हृदये तस्य स्वच्छोपाधौ विम्बस्यैव परमासक्तिः सूचिता ततः साक्षाद्भावाल्लज्जया नेत्रे निमील्य भावपारवश्येन पुलकाङ्गी सती उपगुह्य आलिङ्गनमनुकृत्य आस्ते चिरं तथैवास्तीत्यर्थः । योगीवेति अन्तः स्फूर्त्तौ दृष्टान्तः यद्वा योगीति क्रिया विशेषणं योगे यथा स्यात्तदित्यर्थः इयं लज्जया मुग्धा पूर्वस्माद्धेतोः सुसख्या स्वाधीनकान्ता वामा च एवं सप्तोक्ता अष्टमी तु श्रीविष्णुपुराणे—

काचिदायान्तमालोक्य गोविन्दमतिहर्षिता ।
कृष्णकृष्णेति कृष्णेति प्राह नान्यदुदैरयदिति ॥

प्रखरा सरला चेयम् अत्रेदं विवेचनीयं रत्याख्यो भावस्तावदुभयविधः एक आत्मनि तदीयताभावनामयत्वेन कान्तपराधीन्यदाक्षिण्यादिमयः अन्यः कान्ते मदीयताभावनामयत्वेन पराधीनकान्तत्ववामत्वादिमयः तदेवं भावद्वयमिश्रिततारतम्येनान्येऽपि विविधा भावा विभाव्यन्ते तदेतन्नानाभाववर्तीनां मध्ये सजातीयभावानां सख्यं स्यात रोचकत्वात् विजातीयभावानां प्रतिपक्षता स्यात् अरोचकत्वादेव सजातीयभावानां सौहृद्यं स्यात् यत्किञ्चिद्रोचकत्वेन हिताशंसनमात्रात् अतिमिश्रत्वेनातिसूक्ष्मत्वेन वा नातिस्फुटसजातीयादिभेदभावानां तटस्थ्यं स्यात अवधानहेत्वभावात् श्रीकृष्णविषयकनिजनिजभावमात्राभिरुचिमतीनां तासां सख्याद्युदयस्य तदेकमूलत्वमेवोचितमिति तत्र तदीयतामदीयतामययोर्मुख्ययोर्भावयोरुत्तरः श्रेयान् ममताधिक्येन हि गम्भीरप्रेमप्रवाहाधिक्यं भवति तत एव तद्विवर्त्तरूपवाम्यापरपर्य्यायकौटिल्याभासो जायते "अहेरिवगतिः प्रेम्णः स्वभावकुटिला भवे" दिति भरतन्यायात् अत एव कान्तोऽपि तद्वशः स्यात् तथा च रुद्रः—

वामता दुर्लभत्वं च स्त्रीणां या च निवारणा ।
तदेव पञ्चवाणस्य मन्ये परममायुधमिति ॥

यथा श्रीहरिवंशे श्रीसत्यभामायां दृश्यते—

रूपयौवनसम्पन्ना सौभाग्येन च गर्विता ।
अभिमानवती देवी श्रुत्वैवेर्ष्यावशं गतेति ॥
कुटुम्वस्यैश्वरी चासीद्रुक्मिणी भीष्मकात्मजा ।
सत्यभामोत्तमा स्त्रीणां सौभाग्येचाभिकाभवदिति च ॥

अत एवार्द्धेनार्द्धेन प्रथमचतसृणां वर्णनमुक्त्वा तिसृणां त्वेकेनैकेनेति कवेरादरोऽपि दृश्यते आसु तिसृषु च एकाभ्रूकुटिमावध्य इत्यनेन या वर्णिता सैव श्रेष्ठा भाववैशिष्ट्येन प्रथमत्वेन चोपन्यासात् तादृशसर्वविलक्षणभावश्च तस्या एव स्वपरित्यागे स्यात् यस्याः सर्वपरित्यागेन स्वसङ्गे नीतायाः सौभाग्यदानेन सर्ववैलक्षण्यं श्रीभगवान् स्वयमाविष्कृतवान् तस्मात्सैव सा भवेत् अथ प्रथमचतसृणां प्रथमैव ज्येष्ठा श्रेष्ठा च अग्रे स्थितत्वात् सर्वा अतिक्रम्य प्रथमत एव कान्तस्पर्शात् दक्षिणासु सुमधुरचेष्टत्वात् एषा चोत्तरवर्गप्रवरायाः विजातीयभावेति प्रातिपक्षिकी ज्ञेया अथानयोर्वर्गविचारः तत्रोत्तरप्रथमायाः सख्यौ तदनन्तरे द्वे प्रथमप्रथमायास्त्वेकव्यवहिततृतीयादिके द्वे भावसाम्यात् न तत्तदनुगततया वामदक्षिणयोः स्थितेश्च यातु प्रथमद्वितीया सा खलु प्रथमगणान्तः प्रविश्य स्थितापि किञ्चिद्व्यवहितत्वात्तदतिक्रमिचरित त्वाच्च न प्रथमायाः सखी पराधीनकान्तं मन्यतया किञ्चित्साहस्येनोत्तरायास्तु सुहृदिति ज्ञेयम् अथ या विष्णुपुराणोक्ता सा तु नातिनिस्पष्टभावत्वाद्वर्गद्वयाप्रवेशाच्छ्रीशुकेनावर्णनाच्च तटस्थैव ज्ञेया अथ आसां नामविचारः तत्र भाविष्योत्तरे मल्लद्वादशीप्रसङ्गे श्रीकृष्णयुधिष्ठिरसम्वादे तन्नामानि यथा "गोपीनामानि राजेन्द्र ! प्राधान्येन निवोध मे । गोपाली पालिका धान्या विशाखा ध्याननिष्ठिका । राधानुराधा सोमाभा तारका दशमी तथेति विशाखान्या धनिष्ठिकेति पाठः क्वचित् दशमीत्यपि नामैकं तच्चान्वर्थमिति सर्वान्ते पठितं यद्वा तथेति दशम्यपि तारकानुरूपैवेत्यर्थः । गोपाली चेयं नूनं पाद्मोक्तगायत्रीचरी भवेत् तथा स्कान्दप्रह्लादसंहितायां द्वारकामाहात्म्ये मायासरःप्रस्तावे पुनरुद्धवागमते प्रियप्राप्तिवक्ष्ययदुतप्राप्तावपि स्वस्वभावाभिव्यक्तेर्स्तद्वावोक्तिसहितान्येवाष्टौ नामानि निर्दिष्टानि किन्त्वत्यन्तदुःखमयोक्तित्वान्नैतादृशरसावसरे दृश्यानि कदाचिद्विचारावसरे त्वपेक्ष्याणि त्वनन्यगतिकत्वेनैव लिख्यन्ते यथा "तच्छुत्वा वचनं तस्य ललिता क्रोधमूर्च्छिता । उद्धवं साश्रुनयना सोवाच रुदती तदा । श्रीललितोवाच असत्यो भिन्नमर्य्यादः शठः क्रूरजनप्रियः । माकृथाः पुरतोऽस्माकं कथास्तस्याकृतात्मनः । धिक् धिक् पापसमाचारो धिगसौ निष्ठुराशयः हित्वा यः स्त्रीजनान्मूढो गतो द्वारवन्तीं प्रति । श्रीश्यामलोवाच किं तस्य मन्दभाग्यस्य स्वल्पपुण्यस्य दुःखदाः । मा कुरुध्वं कथाः सख्यः कथाः कथयतापराः श्रीधन्योवाच केनायं हि समानीतो दूतो दुष्टजनस्य च । यातु तेन पथा पापो येन नायाति वै पुनः । श्रीविशाखोवाच न शीलं न कुलं यस्य ज्ञायते जन्म कर्म च । हीनस्य पुरुषार्थेषु तेन सङ्गो निरर्थकः श्रीराधोवाच पूतनाघातने यस्य नास्ति पापकृतं भयम् । तस्य स्त्रीहनने साध्वः ! शङ्का कापि न विद्यते । श्रीशैव्योवाच सत्यं ब्रूहि महाभाग ! किं करोति यदूत्तमः । संवृतो नागरस्त्रीभिः कथास्माकं करोति किम् । श्रीपद्मोवाच कदोद्धव ! महावाहुः नागरीजनवल्लभः । समेष्यतीह दाशार्हः पद्मपत्रायतेक्षणः । श्रीभद्रोवाच । हा कृष्ण ! गोपप्रवर ! हा गोपीजनवल्लभ ! । समुद्धर महावाहो ! गोपीः संसारसागरादिति । एके तु चन्द्रावलीमेवाष्टानां मध्ये मन्यन्ते न तु धन्यां तस्या लोकेऽति प्रसिद्धेः तत्र दशसंख्याकं मतं नात्रैकार्थ्ये समर्थयति संख्यावैषम्यात्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अष्टसंख्याकयो रपि मतयोर्धन्यापक्षो न सङ्घटयितुं शक्यते तत्र तत्सहितत्वेन श्रीललितादीनां पञ्चानां वामप्रखरप्रायत्वात् अत्र त्वेका भ्रुकुटिमावध्येति तिसृणामेवेति चन्द्रावलीपक्षस्तु सङ्गम्येत तस्या दक्षिणावर्गाग्रिमात्वेन स्थापयिष्यमाणत्वाद्वामदाक्षिणयोर्द्वयोरपि वर्गयोस्त्रिसंख्यकत्वेन षट्त्वे द्वाभ्यां श्यामलाभद्राभ्यां चान्याभ्यामष्टतापर्य्याप्तौ सुघटता स्यादिति । तदेवं स्थिते या पुनरुत्तरवर्गप्रथमा एका भ्रुकुटीत्यादि वर्णिता सा परमभाग्यसौभाग्योपरिकाष्ठापन्नत्वाच्छ्रीराधैव । "यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभेति पाद्मोक्तेः । राधा वृन्दावने वने इति मात्स्यस्कान्दादिभ्यः । देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मी मयी सर्वकान्तिः सम्मोहिनी परेति बृहद्गौतमीये च । राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेष्वा" इति ऋक्परिशिष्टे । वर्णिता च सा तथैव श्रीजयदेवसहचरेण महाराजलक्ष्मणसेनमन्त्रिवरेणोमापतिधरेण । "भ्रूवल्लनैः कयापि नयनोन्मेषैः कयापि स्मितज्योत्स्नाविच्छुरितैः कयापि निभृतं सम्भावितस्याध्वनि । गर्वोद्भेदकृतावहेललित श्रीमाजि राधानने सातङ्कानुनयं जयन्ति पतिताः कंसद्विषो दृष्टयः" । इति विवृतं चैतन्मदनुजवरैः श्रीरूपमहाभागवतैरुज्ज्वलनीलमणेः स्थायिभावविवरणे । अतो गान्धर्वेति या श्रीगोपालतापन्यां प्रसिद्धा सापि मुख्यत्वलिङ्गेनैवमेवेति मन्यन्ते । अस्याः प्रह्लादसंहितायां पूर्वपूर्वापेक्षया वचनकौशल्यान्मध्यात्वम् । अत्र च कोपावसरेऽपि लीलाविशेषमात्रव्याञ्जितप्रागल्भ्यतया बाहुधारिण्याद्यपेक्षया मध्यात्वमिति च समाकम् । अथ यापरा निमिषदित्यादिना तत्सखी वर्णिता सा श्रीललितेत्यवगम्यते ! वाम्यप्राखर्याभ्यां साम्यात् । सम्प्रति नातिवाम्यादिकं तु निजवरसखीनिशातदृक्पातघातजातततक्षोभदर्शनेनातिसन्तोषात् । एषा च राधानुराधा इति या भविष्योत्तरपठिता तत्पर्यायैव वा । तत्र च पाठस्य नाम्नोश्च युग्मतामयत्वावगतेरत्रापि समवर्गता प्राप्तसखीवृन्दप्रथमोक्तेर्मुख्यता प्राप्तिसाम्यात् । अथ तं काचिन्नेत्ररन्ध्रेणेत्यादिवर्णिता तत्सखी तु प्रायः श्रीविशाखैव । वाम्यमार्दवाभ्यां साम्यात् । प्रह्लादसंहितायामपि च शीलमित्यादिकं तद्वाक्यं तादृशमेव । अथ या प्रमवर्गस्य प्रथमा सा श्रीचन्द्रावल्येव । यतः श्रीराधया सह प्रतियोगितयैतिह्यमस्या एव विराजते । तथाच श्रीबिल्वमङ्गलचरणाः । "राधामोहनमन्दिरादुपगतश्चन्द्रावलीमूचिवान् राधे ! क्षेममिहेति तस्य वचनं श्रुत्वाह चन्द्रावली । कंसक्षेममये विमुग्धहृदये कंसः क दृष्टस्त्वया राधा केति विलज्जितो नतमुखः स्मेरो हरिः पातु वः" इति । अर्थसाम्यप्रायादियं भविष्योत्तरख्याता सोमाभैव वा स्यात् अथ या तस्या द्वितीया काचिद्दधार इत्यादिना श्रीराधा सुहृद्वर्णिता सा श्यामला भवेत् । प्रह्लादसंहितायां ललितादिगणे प्रविश्य हितोपदेशदानेन तस्याः सौहृदलक्षणावगतेः । सखीनां समदुःखप्रलापिता भवति किञ्चिद्व्यन्तरितस्यैव तु हितोपदेशदातृता दृश्यत इति । इयमेव श्रीमध्वाचार्यैर्भागवततात्पर्ये दर्शिता लीलाख्या भवेत् । अथ काचिदञ्जलिनेति एका तदङ्घ्रीति वर्णिते ये चन्द्रावलीसख्यौ तथा विष्णुपुराणे यास्तदस्था वर्णिताः ताः क्रमेण शैव्यापद्माभद्राः स्युः सेवकवद्दैन्येन सङ्गिमिषया नातिस्फुटभावविशेषत्वेन च साम्यादिति । महानुभावसम्मत्या युक्तिशयं व्यलेखियत् । तत्र कृष्णस्तदीयाश्च ममानन्यगतेर्गतिः । ता मद्दुर्व्यरहोलीलानाम्ना सङ्कोचमाप्नुयुः । मुनिनैवं हुताह्वानाः क्षमन्तां मम चापलम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अपरा निमेषमकुर्वतीभ्यां दृग्भ्यां तस्य मुखाम्बुजमापीतमपि पुनःपुनर्जुषाणा सेवमाना नातृप्यत् न तृप्ता बभूव यथा सन्तो भक्ताः तस्य चरणं पुनःपुनरनुभूयापि न तृप्यन्ति तद्वत् ॥ ७ ॥

काचित्तु नेत्ररन्ध्रद्वारेण तं कृष्णं हृदि विधायोपगुह्यालिङ्ग्य च निमील्य नेत्रे इति शेषः पुलकानि पुलकितान्यङ्गानि यस्याः सन्तीति तथा भूता आनन्देन संप्लुता व्याप्ता आनन्दमग्ना योगीवास्ते आस्त ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनिमिषं निमेषलक्षणव्यापारशून्यमितिक्रियाविशेषणं जुषाणा सेवमाना ॥ ७ ॥

हृदि स्थितं कृत्वा पुलकाङ्गी रोमाञ्चितगात्रा उपगुह्य आलिङ्ग्य आनन्दनिर्भरा परमानन्दपूर्णा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अपरा निमिषदृग्भ्यामिति दर्शनानन्दनिस्पन्दा स्वभावसरला ॥ ७ ॥

तं काचिन्नेत्ररन्ध्रेणेत्यादि मुग्धापि गम्भीरप्रेमवती ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमतिपुष्टा निरूप्य अत्युत्तमां निरूपयति । अपरेति । एषाहि भगवद्दर्शनेन मत्तद्दोषा अतो ध्यानेन भगवन्तं हृदये स्थापयितुकामा नेत्राभ्यां नेत्रद्वारा भगवन्तं हृदि स्थापितवती अत्र लावण्यामृतं पेयं मुखस्याम्बुजत्वोक्तेः अनिमिषदृग्भ्यामिति पानकरणं द्वयद्वयस्यान्तर्निमेषानं पानं मध्यो रसविच्छेदो भविष्यतीति अनिमिषदृग्भ्यां पानं नेत्रयोरञ्जलित्वं लावण्यामृतस्य विरलत्वात् प्रीतिसेवनमत्राभिप्रेतं यद्यपि आसमन्ताद्धर्मसहितं सर्वमेवाभिनिविष्टं स्वाधीनं जातं यदैवेच्छति तदैव हृदये पश्यतीति तथापि नातृप्यत् अलंभावं न कृतवती तत्र हेतुर्विषयसौन्दर्यं नतु प्रयोजनाभावः प्रतिबन्धकः एतदर्थे दृष्टान्तमाह । सन्तस्तच्चरणौ यथेति । सन्तो हि जातकार्याः तथापि चरणारविन्दे सहजो रसः नतु किञ्चित्प्राप्तव्यं निवर्तनीयं वा ॥ ७ ॥

एका पुनर्दूरस्था अनया तुल्यशीला योगानुसारेण भगवन्तं गृहीतवतीत्याह । तं काचिदिति । पूर्वं लौकिकी पश्चाद्भक्तिमार्गानुसारिणी निरूपिता इयं योगानुसारिणी अतोऽस्याः

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

सर्वावयवे दृष्टिः उभयोरेकीकरणम् अन्यथा दृष्टिभेदः स्यात् पूर्वस्यास्तु दर्शनमेव प्रयोजनम् एषा विरळेति काचिदित्युक्तं पूर्वोक्तं न खलु गोपिकानन्दनो भवानिति यया निरूपितं नेत्ररन्ध्रेणेत्येकवचनं रूपप्रवेशार्थं हृदि कृत्येति हृदि कृत्वा असमासेऽपि ल्यप् हृदि कृत्येत्यलुक् समासो वा ततोऽन्तः प्रविष्टो बहिर्मा गच्छत्विति निमीलनं कृतवती नहि तस्या बुद्धौ भगवान् बहिरवशिष्टोऽस्ति स्वकीयो वा भागः तया गृहीत इति चकारात्सर्वेन्द्रियनिवर्त्तनं ततोऽन्तरानन्दे पूर्णे पुळकाङ्गी जाता केवलानन्देन पुलके गोपीत्वं न भविष्यतीति तदर्थं विशेषमाह। उपगुह्यास्त इति अयं रोमाञ्चः सात्विकभावे प्रविष्टः अत एवान्तरुपगुह्यालिङ्ग्य आस्ते तामेव स्थितिं धारितवती अवस्थान्तराभावाय ननु तस्या उत्तरत्र कार्यं भगवता सहसंभोगः कर्त्तव्यः आळापाः गृहे च गन्तव्यमिति कथन्तामेवावस्थां स्थापितवती तत्राह। योगीवेति। योगो हि तथैवाग्रे सर्वं कार्यं साधयति तथेयमपि तथैवावस्थया सर्वं साधनीयमिति स्थिता किंच आनन्दसंप्लुता आनन्दे निमग्ना अतएव बहिः संवेदनरहिता संवेदनायामेव सत्यां कार्यानुसन्धानं नहि पूर्णे आनन्दे कश्चन कामोऽस्ति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनिमिषन्तीभ्यामानन्दजाड्यवशादनिमीळन्तीभ्यां दृग्भ्यां भ्रमरीभ्यामिव तस्य मुखाम्बुजम् । यद्वा । तत् प्रसिद्धं पूर्वस्याः कटाक्षशरजर्जरितत्वात् सभयचकितव्याकुळमनुतप्तम् । आपीतं सम्यगास्वादितमाधुर्यमपि पुनः पुनर्जुषमाणा आस्वादयन्तीति मुखाम्बुजस्य स्वभावेनैव माधुर्यमपारं तत्रापि स्वाभीष्टेन स्वयूथेश्वरी कटाक्षशरप्रहारेण सङ्कोचत्रपाविषाददैन्यादिसञ्चारिमिश्रणाद्बहुविधमतिवर्द्धमानं तदानीमभूत्तस्तत्र तृष्णाधिक्यान्नातृप्यत् । सम्पूर्णांशेन दृष्टान्तादर्शनादेकांशेन दृष्टान्तमाह । सन्त इति । अत्र कटाक्षशरप्रहारिण्यामेव कृष्णस्य तदानीं सम्पूर्णा दृष्टिः सम्पूर्णं मनश्च न त्वन्यस्यां कस्यामप्येकांशेनापि । यत एव स्वस्मिंस्तस्यानवधानमाळक्ष्य लज्जानुद्गमात् दृग्भ्यामिति सम्पूर्णाभ्यामेव नेत्राभ्यां स्वच्छन्देनैव मुखमपश्यदतः सर्वतः सौभाग्यवती कटाक्षशरवर्षिण्येव ज्ञेया ॥७॥ हृदि कृत्य हृदयं नीत्वेति भाग्यान्मिलितोऽयं चञ्चलः कान्तः पुनर्मापसरत्विति च बुद्ध्येति भावः । निमील्य चेति पुनर्नेत्ररन्ध्रेणैव निःसरेदिति शङ्कयेति भावः । पुलकाङ्गीति निर्विघ्नसम्भोगप्राप्तिबुद्ध्या । उपगुह्यास्ते इति स्वकर्तृकोपगूहनं महाविरहोत्तरकालप्राप्त्या तृष्णाधिक्येन धैर्यापगमात् तत्र दृष्टलोकाभावाल्लज्जानुत्पत्तेश्च । तिस्र एवैताः कान्तपार्श्वे प्रत्यगमनाद्वा मा अस्मानेवायमागम्य मिळतु ननु वयमिमं गत्वा कदाचिदपि मिलाम इति मदीयतामयमधुरस्नेहवत्त्वात् सुसख्याः स्ववशीकृतकान्ताः ज्ञेयाः । तत्र तिसृषु मध्ये प्रथमा सर्वगोपीजनाधिका यूथेश्वरी द्वितीयातृये तस्याः सख्यौ । एवं सप्तानामासां श्रीवैष्णवतोषणी दृष्टैव चन्द्रावली श्यामला शैव्या पद्मा श्रीराधा ललिता विशाखा इति क्रमेण नामान्यवगतानि अष्टमी "तु काचिदायान्तमाळोक्य गोविन्दमतिहार्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यत्तदैरयदिति" विष्णुपुराणदृष्ट्या भद्रानाम्नी ज्ञेया । श्रीवैष्णवतोषणीधृतस्कान्दप्रह्लादसंहिता द्वारकामाहात्म्यविख्याताभिख्या एता अष्टावेव त्रिशतकोटिगोपीषु मुख्या ज्ञेयाः । आसु तारतम्यजिज्ञासा चेदुज्ज्वलनीलमणिर्द्रष्टव्यः सर्वमुख्या तु श्रीराधैव "यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभेति पाद्मोक्तेः । देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परेति" बृहद्गौतमीयोक्तेः राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेष्वा इति ऋक्परिशिष्टोक्तेश्च ज्ञेया ॥ ८ ॥

केनचित्कृता विशुद्धरसदीपिका ।

अथैतस्याः प्राणसहचरीणां मरीणां चेष्टामाह । अपरेति । अनन्या पूर्वोक्ताया मुख्यतमाया अभिन्ना परसुहृदित्यर्थः । अनिमिषेति । पाने समुत्कण्ठातिशयः दृग्भ्यामिति द्वित्वं ततोऽप्युत्कर्षपरं यद्वा द्वयोरेव सुखास्वादायेति जुषाणा प्रीत्या सेवमाना एवं च दृशोरसनात्वं सौन्दर्यस्य च मकरन्दत्वं निरूपितम् आपीतं सम्यगास्वादितम् अपीति । तन्माधुर्य्यासक्तिः तदेव तत्सर्वमपि सुरतचिन्हावळोकनायेति सौहृदमेवोभयमनुस्पष्टीकृतं तत्र दृष्टान्तः सन्त इति । एते च दास्यभक्तिनिष्ठा एवं तच्चरणमित्युक्तेः उपमेयवैशिष्ट्यन्तु श्रीमुखालम्बनतया एवं च साक्षाद्दर्शनेऽपि तृप्त्यभावमात्रेऽपि दृष्टान्तसङ्गतिः तदेव रम्यं रुचिरं नवं नवमिति नवमोक्तेः इयं च संमुखदत्तदृष्टित्वात्प्रखरा मुख्या श्रीललिताख्येति अत्रापि नामानुक्तिः पूर्ववदेव सङ्गमनीया ॥ ७ ॥

अथैतस्या एव सङ्गाल्लब्धसहचरीभावायाः कस्याश्चित्साधकचरीमुख्यायाश्चेष्टितमाह । तमिति । प्राकृतमध्यानावेशेन मत्कामा रमणं जारमस्वरूपविदोऽबलाः ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः इत्यस्य प्रागुक्तव्याख्यानुसारेण परमश्रेष्ठततयाभिमतं संप्रतिनेत्ररन्ध्रेण हृदि कृत्य निमील्य चेति समुच्चयेनाग्रहः सूचितः साक्षद्दर्शनेऽप्ययं ध्यानावेशो भावपरिपाकेन प्राग्भवीयसंस्कारात् ततश्च भावपारवश्येनैव पुलकाङ्गी सती उपगुह्य तत्रैवाळिङ्गनमनुक्तमास्ते चिरन्तथैव स्थगितासील् इत्यर्थः । योगीवेत्यन्तः स्फूर्त्तौ कामानासक्तौ च दृष्टान्तः निमील्येत्यस्यायम्भावः प्रियस्य नेत्रद्वारेण मा बहिर्निर्गमो भवेत् इति भीत्या चकोराक्षीव कपाटपक्ष्म संदधे वस्तुतस्तु सुरतचिन्हितविग्रहमेनमाकाचिदनुभवतु भवतु च प्राणेश्वर्य्योः क्रीडितमीडितमेवेति स्वहृदयमानीय निलीयस्थापयामीतिमौग्ध्येनानुकरणमिदं इयं च नेत्रनिमीलनेन लज्जानुभावान्मृद्वी पूर्वं सुसख्या वामा च ॥ ८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अभ्यर्हितत्वात्तस्या एव चरितं श्लोकान्तरेणाप्याह । अपरेति । सा अपरा न परः कश्चित्ससंङ्गी विद्यते यस्याः परसंबन्धशून्या यद्वा न कान्तिपरा उत्कृष्टा अन्यदीया वा विद्यते यस्याः सर्वोत्कृष्टा सर्वस्वस्वीयात्मीयमतिमती स्वयञ्चापरा वासुदेवैकपरायणा अनिमे-

श्रीरामनारायणकृतभावभावविभाविका।

षद्‌दृग्भ्यां पूर्वनिर्दिष्टभ्रुकुटिन्धनेन कृष्णदर्शनप्रेम्णैव वा निमिषरहिताभ्यां दृग्भ्यां यद्वा तत्र नरलीलया सर्वदृगीश्वर्या अपि भ्रमादिकया प्रेमसंरम्भविकलतयात्मानमितरनारीसादृश्यभ्रमेण प्रियदर्शने सम्भावितनिमिषप्रतिबन्धय तद्बन्धाय भ्रुकुटिबन्धे कावपि न वस्तुतस्तस्या निमिषपातः नैमिषे निमिषक्षेत्रे इत्यत्रानिमिषस्य विष्णोः क्षेत्र इतिस्वामिचरणैर्व्याख्यातत्वात्तत्स्वरूपात्मकाल्हादिकशक्त्यात्तस्या अपि वस्तुत एव अनिमिषदृक्त्वं ताभ्यामिन्द्रनीलवज्रमणिरचितयुगपात्राभ्यां तन्मुखाम्बुजं जुषाणेत्यत्र मुखेन मुखाम्बुजपानसम्भवेऽपि नेत्राभ्यां तत्पानासम्भवेन तद्गततरूपमाधुर्यं जुषाणा इतिवक्तव्येऽपि तद्रसाधिकपाने तत्पानमिति सरःपीतमित्यादिवन्मुखाम्बुजं जुषाणेत्युक्तं तन्मुखम् आसमन्ताद्रसग्रहणेन पीतमपि परन्तु तत्पिपासाधिक्येन नातृप्यत् यद्वा पूर्वं विहारेऽधरामृतास्वादनेनासमन्तात्पीतमपि दृग्भ्यां तद्रूपामृतं जुषाणा नातृप्यत यद्वान्तर्द्धानावसरे प्रियासन्निधानाभावादासमंतात्पीतं तत्सन्निधानेऽधुनाजातेऽप्यारुग्ये तत्प्रेमसंरम्भविह्वलत्वद्दर्शनेनेषत्पीतमपि मुखाम्बुजं जुषाणा नातृप्यत् अनेन रम्याणां विकृतिरपि भियन्तनोतीति न्यायेनारुणपङ्कजरूपं तन्मुखाम्बुजमीषत्पीतमिति स्वर्णवर्णरजात्मना भासमानमतिरुचिवर्द्धकं जातमितिध्वनिः यद्वा मुखाम्बुजमिति निर्देशादनिमिषदृग्भ्यामित्यत्रानिमिषविशेषणं तु तद्वावृत्त्या दृशोस्तारयोर्मधुपानुरूपत्वमवधार्य्य ताभ्यामेव तत्पानयोग्यतां व्यवस्य मुखाम्बुजमधुन एव कामादिनिर्दोषविषमज्वरसोचकत्वमवगत्य ताभ्यां जुषाणा अपि नातृप्यत् यद्वा मुखाम्बुजमित्यत्राम्बुजमित्यत्राम्बुनि समुद्रे जायते इति व्युत्पत्त्या मुखचन्द्रं सुधाश्रयत्वात्स्वयं सुधानिधित्वात्साक्षात्सुधात्मकं स्वाङ्गारिविरहाङ्गारभोगविकलतया पक्ष्मपक्षचालनरहिताभ्यां जुषाणा आपीतमपि नातृप्यत् अतृप्तौ हेतुः पिपासाधिक्यं विषयसौन्दर्यं च तत्र दृष्टान्तमाह। सन्तस्तच्चरणं यथेति। सन्तो जीवन्मुक्तपरमहंसाः स्वजीवजनरूपमुक्तिमपि अपहाय लीलयैव विग्रहवाप्यासम्पन्ना इव तच्चरणाम्बुजमधुरसजीवनं जीवनं जीवनमस्या तज्जुषाणा अपि न तृप्यन्ति तदुक्तं भगवत्पदाम्बुजमधुपाशिरोमणिपरमहंसाचार्य्यभगवत्पूज्यपादैः मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते इति यद्वा अपरेति श्रीमती राधापेक्षयापरा तन्मुख्यसखीललितेत्यर्थः शेषं समानम् ॥ ७॥

अन्याचरितमाह। तं काचिदिति। काचित्तुतम् अतिविलक्षणमन्ये चौराः स्वामिदृष्टिं वञ्चयित्वा बहिर्वर्तमानं वित्तं हरन्ति अयन्तु नेत्रे संयोज्य दृग्भ्यन्तःस्थं वित्तं हरति तं महतायासेन लब्ध्वा चपलचौरत्वात्पुनः पलायनभयात्स्नेहपाशेनाकृष्य नेत्ररन्ध्रेण हृदिकृत्य कृत्वात्रासमासेऽपि ल्यप्प्रयोगश्छान्दसः अलुक्समासविवक्षया वा हृत्कमळे संस्थाप्य बहुसुमनोमधुपस्य तस्य कमले एव बन्धनसम्भवात्तदुक्तं स्नेहवल्ल्यैः। "बन्धनानि खलु सन्ति बहूनि प्रेमरज्जुकृतबन्धनमन्यत्। दारुभेदनिपुणोऽपि षडङ्घ्रिर्निष्क्रियो भवति पङ्कजकोश निबद्धः" इति ततश्च प्रवेशद्वारेण पुनर्निःसरणभयेन निमील्येति पक्ष्मकपाटं दृढं दत्त्वा तिर्यक्कर्णद्वारा निर्गमभयात्तयोरलकपाशप्रसारणमपि चकारात् क्लिष्टं तत्रापि उपगुह्येत्यनेन स्वीयमनोमयरूपान्तरेण हृदि गतं तमालिङ्ग्य पञ्चफणजुष्टपुष्टभुजभुजगपाशाभ्यां सुदृढं बद्ध्वा पुळकाङ्गी जातरोमहर्षा अयमत्राशयः हरेः श्रुतिषु अणोरणीयस्त्वाम्नानाद्रोमच्छिद्रद्वारेण पलायनशङ्कया कृष्णचौररक्षणाय कृष्णान्येत्र रोमाणि द्वारपत्वेन तत्तद्वारे स्थापयामास तान्यपि सहर्षाण्येव तिष्ठन्तिः अभूवन् तथाचैवं कृष्णमपराजितमन्यं स्ववशे कृत्वा आनन्दसंप्लुता हृदि प्रवृद्धानन्दसिन्धौ निमग्ना यद्वानन्दाश्रुप्रवाहनिमग्ना आस्ते इति आस्तेत्यर्थः। यद्वा तस्या नित्यानन्दसंप्लुतत्वद्योतनाय वर्तमानप्रयोगः तत्र साधनफळयोर्दृष्टान्तः योगीवेति तत्र निमीलनहृदि करणे साधनसाम्ये आनन्दसंप्लुवस्तु फलसाम्यं नात्र योगिसाम्यं तस्याः संयोगिनीत्वेन वशीकृतयोगीश्वरेश्वरत्वेन चित्रास्पदम् ॥ ८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका।

अथ द्वितीयायाः प्रखरायाः स्वाधीनकान्ताया वामाया वृत्तमाह। अपरा अनिमिषद्दृग्भ्याम् अनिमीलन्तीभ्याम् दृग्भ्याम् अञ्जलिस्थानापन्नाभ्याम् तत्रापि क्षरणशङ्कया अनिमिषतीभ्यां तस्य प्रेष्ठस्य मुखाम्बुजं तत्रत्यलावण्यामृतम् आसमन्तात्पीतमपि जुषाणा अत्रैवागत्यालिङ्गनं करिष्यतीति मानावेशात्स्वस्थान एव स्थित्वा सेवमाना नातृप्यत् उत्कण्ठातिशयादळम्बुद्धिं न कृतवती तत्रानुरूपं दृष्टान्तमाह। यथा सन्तस्तद्भक्ताः यथोक्तदृग्भ्यामापीतमपि तच्चरणाम्बुजं जुषाणा न तृप्यन्ति तद्वदित्यर्थः। इयं राधा पक्षपातिनी ळलिताख्यसखी ॥ ७॥

अथ तृतीयायाः मध्यायाः स्वाधीनकान्तायाः वामायाश्चरितमाह। तं प्रेष्ठं नेत्ररन्ध्रेण हृदि कृत्य हृदयं लीलाप्रवेशनीयरूपस्यैकत्वाद्रन्ध्रेणेत्येकवचनं तन्निःसरणभयान्नेत्रे निमील्यच तमन्तरेवालिङ्ग्य तज्जन्यानन्दमग्ना पुलकाङ्गी रोमाञ्चिततनुरास्ते अत्रैवागत्यालिङ्गनं विधास्यतीति मानेनैवंभूता सती स्वस्थान एव स्थिता यथाविर्भूतानान्दे निमग्नो योगी समास्ते तद्वदित्यर्थः इयमपि राधासुहृद्भूता विशाखाभिधा सखी एवं सप्तात्राभिहिता अष्टमी तु सरला भद्राख्या विष्णुपुराणेऽभिहिता—

काचिदायान्तमालोक्य गोविन्दमतिहर्षिता।
कृष्णकृष्णेति सा प्राह नान्यत्किञ्चिदुदीरयदिति ॥

चन्द्रावल्यादिनामानि तु स्कान्दे प्रल्हादसंहिताद्वारकामाहात्म्यादावुक्तानि ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अपरा अनिमिषन्तीभ्यामनिमीलन्तीभ्यां दृग्भ्यां तन्मुखाम्बुजमापीतमपि सुदृष्टमपि पुनः पुनर्जुषमाणा सेवमाना नातृप्यत् यथा सन्तः साधवः तच्चरणं पुनः पुनर्ध्याने सुदृष्टमपि ध्यायन्तः न तृप्यन्ति "आवृत्तिरसकृदुपदेशात् ४।१।१। इति सूत्रमप्यत्रानुसंधेयम् ॥ ७॥

हृदिकृत्य हृदयकमले निधाय ॥ ८॥

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः।
जहुर्विरहजं तापं प्राज्ञं (१) प्राप्य यथा जनाः ॥ ९ ॥
ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः॥
व्यरोचताधिकं तात! पुरुषः शक्तिभिर्यथा ॥१०॥

भाषा टीका।

दूसरी कोइ गोपी नेत्रों को एकटक लगाय श्रीकृष्ण के मुख कमल को दर्शन करते मे मुख कमल के अमृत को अत्यन्त पान कर के वी तृप्त नही भई जैसे विन भगवान के चरण कमल की सेवा ते संत भक्त तृप्त नहीं होवे हैं ॥ ७ ॥

कोई गोपी विन भगवान को नेत्र रूप छिद्र के द्वारा हृदय मे प्रवेश कर फिर उपरते नेत्रों को वन्दकर अंगो ते पुलकित हो भगवान् को आलिंगन कर चुप रह गई जैसे योगिजन समाधि के आनंद मे रहे हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्राज्ञमीश्वरं प्राप्य यथा मुमुक्षवो जनाः यद्वा प्राज्ञं ब्रह्माज्ञं प्राप्य यथा संसारिणः यद्वा प्राज्ञं सौषुप्तं प्राप्य यथा विश्वतैजसावस्था जीवाः ॥ ९ ॥

पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा यद्वा उपासकः पुरुषो ज्ञानवलवीर्यादिभिः यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्वृतो यथाधिकं विरोचते तद्वत् ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

नच केवलं ता एव निस्तापा हृष्टाश्च बभूवुः किन्त्वन्याः सर्वा अपीत्याह। सर्वा इति। केशाः सुन्दरा वर्त्तन्तेऽस्येति केशवः अस्त्यर्थे वः तस्य तदीयैककेशस्यापीत्यर्थः। आलोकः ईषद्दर्शनं तदेव परम उत्सवः सर्वार्थसमुच्चयः चित्तोल्लासो वा तेन निर्वृताः सत्यः इति विरहतापाधिक्यं निर्वृत्त्यनन्तरमेव तत्त्यागसिद्धेः यद्वा आलोकस्तेन सम्यक् निरीक्षणं परमोत्सवश्च प्रेमनर्मादिः ताभ्यां निर्वृताः तत्रानुरूपो दृष्टान्तः प्रकर्षेण आ सम्यक् जानातीति प्राज्ञः श्रीकृष्णः तज्ज्ञत्वादिमाहात्म्यतत्त्वाभिज्ञो महाभागवतो समः तं कुत्रापि गतं पुनःप्राप्य प्रकर्षेण लब्ध्वा प्रीत्या बहुधा सङ्गम्य तद्विरहजं तापम् अकारप्रश्लेषेण अजनाः अस्य विष्णोर्जना वैष्णवा यथा जहति तद्वदिति अस्य च सुप्रसिद्धत्वेन तथा—

रामरावणयोर्युद्धं रामरावणयोरिव ॥

इत्यादि न्यायेन तदेक योग्यत्वेन च दृष्टान्तत्वम् ॥ ९ ॥

ततः श्रीभगवतोऽपिपरमनिर्वृत्त्या भगवत्तासाराविर्भावेनाधिकशोभा जातेत्याह। ताभिरिति। विधूतः निरस्तः शोको विरहजातस्तापो याभिः तद्विशेषश्लोकः श्रीपराशरेण" ततः काश्चित् प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः। निन्येऽनुनयमन्याश्च करस्पर्शेन माधव" इति अतस्ताभिर्वृतः सन् भगवान् सर्वैश्वर्य्यसम्पूर्णोऽपि अच्युतः कथञ्चित् कदाचित् कस्माच्चिदपि शोभाभरात् च्युतिरहितोऽपि अधिकं यथा स्यात्तथा विशेषेण अरोचत अशोभत भगवानिति अधिकाविरोचने हेतुर्वा तेनैवाशेषनिजभगवत्तासर्वस्वप्रकटनादित्यर्थः। स्वत एवाशेषशोभायाः परां काष्ठां प्राप्तस्यापि ताभिर्वृतत्वेनाधिकविरोचनं दृष्टान्तेन साधयति। पुरुष इति जीवः ब्रह्मत्वेन स्वतः सर्वशक्तियुक्तोऽपि इन्द्रियादिशक्तिभिः प्रकटिताभिः सतीभिरेव यथाधिकं विरोचते अन्यथा मूर्च्छितादितुल्यता प्राप्तिः एवं माधुर्य्यकारुण्यादिषु गुणप्रकटनेन निजवल्लभावलिवृतत्वेनैवाधिका तस्यापि शोभा स्यात् अन्यथा भक्तवृन्दसेव्यमानत्वेनाप्यशेषशोभामयभगवत्तासारापूर्तिप्रसक्तिरितिदिक् अत एवाश्चर्येण तद्बोधयोग्यत्वेन वा तातेति सम्बोधनं यद्वा तत्स्मरणात् प्रेमवैवश्येनैव पूर्ववत् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

नन्वन्यासां का वार्त्ता तत्राह। सर्वा इति। तासां तत्सौभगमदं वीक्ष्य मानञ्च केशव इत्यत्रैवात्र च केशवशब्दः परमतेजोनिधानतापरः। ततश्च तदानीं यथा तस्यान्तर्द्धाने तासां तेजोऽन्तर्द्धापनं तथा सम्प्रति आविर्भावेन तदाविर्भावः सञ्जात इति भावः। तस्यालोक एव परमानन्दप्रदत्वात् परमोत्सवस्तेन निर्वृताः प्राप्तदुःखनिवर्त्तकसुखाः। तत्रानुरूपो दृष्टान्तः। प्राज्ञमिति। सुषुप्तावविधया इव पुनः परित्यागशङ्काया निगूढस्थितेः। यद्वा। प्राज्ञः परमभागवतस्तं प्राप्य जना यथेति एवमप्यारम्भ एव दृष्टान्तेन सम्यक्सिद्धौ पूर्वस्मादेव हेतोः ॥ ९ ॥

ततो मदमानौ परित्यज्य सर्वा मिलित्वैव तदनुगता बभूवुस्ताभिः श्रीभगवतोऽपि परमशोभाविर्भावो जात इत्याह। ताभिरिति त्रिकेण। विधूतेत्यत्र कारणविशेषश्लोकः श्रीपराशरेण। "ततः काश्चित् प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः। निन्येऽनुनयमन्याश्च करस्पर्शेन माधव" इति। भगवान् सर्वसम्पूर्णोऽपि अच्युतः तत्र कथञ्चित्च्युतिरहितोऽपि अधिकं पूर्वपूर्वतः प्रकृष्टं यथा स्यात्तथा ताभिर्विशेषेणारोचत तादृशस्यापि ताभिस्तादृशत्वे तदाविर्भावविशेषे एव दृष्टान्त इत्याह। पुरुष ईश्वरः। स यथा भगवद्रूपेण शक्तिभिः ऐश्वर्यादिमयस्वरूपशक्तिभिर्वृत एवाधिकं विरोचते नतु ब्रह्मरूपेण ताभिरावृत इति तथा सोऽपि ताभिः प्रेमविशेषमयस्वरूपशक्तिभिर्वृत एवाधिकं व्यरोचतेत्यर्थः तातेति सम्बोधनं परमानुकम्पायाम्। "तातोऽनुकम्प्ये पितरीति" नानार्थात् परमानुकम्प्यत्वादेव रहस्यमिदं त्वयि प्रकाशयामीति भावः ॥ १० ॥

(१) प्राप्यमिति श्रीमच्छुकदेव पाठः

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्राज्ञं परमात्मानं जना योगिजनाः प्राप्य साक्षात्कृत्य ॥ ९ ॥ पुरुषः शक्तिभिः चतुर्विंशतितत्त्वात्मिकाभिः यद्वा पुरुषः परमपुरुषः शक्तिभिः विमलादिभिः ॥ १०—१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताः सर्वा गोप्यः केशवस्यावलोकनमेव परम उत्सवस्तेन सुखिता विरहजं तद्विश्लेषजं तापं जहुः तत्यजुः यथा योगिजनाः प्राज्ञं परमात्मानं प्राप्य साक्षात्कृत्य आध्यात्मिकादितापत्रयं जहति तद्वत् यद्वा "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेदनान्तरं प्राज्ञेनात्मनान्वारूढ" इत्युक्तरीत्या यथा सुषुप्तिदशायां परमात्मना सम्परिष्वक्ता जाग्रत्कालिकबाह्याभ्यान्तरक्लेशान् जहति तद्वदित्यर्थः ॥ ९ ॥

तत्र तदा ताभिर्विगतविरहजशोकाभिः परिवृतः नितरां व्यरोचत हे तात ! यथा पुरुषो जीवः शक्तिभिश्चतुर्विंशतितत्त्वात्मिकाभिः वृतो रोचते यद्वा पुरुषः परमपुरुषः शक्तिभिर्विमलादिभिर्वृतस्तद्वत् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जनः शोकाकुलः संसारी वा प्राज्ञं पण्डितं दुःखशमनवोधकं परमात्मानं वा "प्राज्ञेनात्मनान्वारूढ" इतिश्रुतिः ॥ ९ ॥

पुरुषो विष्णुः शक्तिभिः लक्ष्मीविभूतिभिः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्राज्ञं सुषुप्तिसाक्षिणमिव सुषुप्तौ अविद्यावत् पुनः परित्यागशङ्काया निगूढस्थितेः ॥ ९ ॥

पुरुषो भगवत्तत्त्वं स यथा भगवद्रूपेण शक्तिभिः ऐश्वर्यादिमयस्वरूपशक्तिभिर्वृतं एव अधिकं व्यरोचत इत्यर्थः ॥ १०—१२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

एवं स्वस्वप्रकृत्यनुसारेण विविधभावभावुकस्तुभगं भावुकाः सर्वा एव तमालोक्य विरहजं तापं जहुरित्याह । सर्वा इत्यादि । यथा जनाः प्राज्ञं भगवन्तं प्राप्य भगवद्विरहतापं जहति तथेत्यर्थः ॥ ९ ॥

अथ भगवानपि तथा एतेन पूर्वं तथा न व्यरोचतेत्याह । ताभिर्विधूतेत्यादि । ताभिर्व्यरोचतेति वाक्यार्थः अधिकं यथा भवति तथा एतेन पूर्वं तथा व्यरोचत एकाकित्वात् तत्र दृष्टान्तः पुरुषः शक्तिभिर्यथा सुप्तशक्तिः पुरुष ईश्वरस्तथा न विरोचते यथा उद्रिक्ताभिः शक्तिभिः एतेन शक्तीनां सुप्तमुद्रिक्तत्वं चेति नतु कदापि नाशः नित्यत्वात् ताते ति सविस्मयहर्षोत्कर्षे संबोधनम् ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवंविशेषाकारेण कृत्यमुक्त्वा सर्वासां सामान्याकारेण प्रयोजनमाह । सर्वास्ता इति । यो हि बलिष्ठरजस्तमोभ्यां व्याप्तयोरपि फलसंपादकः तस्य क्षुद्रगुणक्षोभयुक्तानामासामुद्धारे कः प्रयास इति वक्तुं केशवेत्युक्तं तस्य योऽयमालोकः अवलोकनं प्रकाशो वा अन्तर्बहिः अत एव स एव परमोत्सवः यथा लौकिकानां महाराज्यप्राप्तिः पुत्रोत्सवो वा तेन निर्वृताः सर्वा एव जाताः एवं तासामिष्टसिद्धिरुक्ता अनिष्टनिवृत्तिमाह । जहुर्विरहजमिति । नन्वेवं सति मुक्ता एव ता भवेयुः नहि संसारे निवृत्ते भगवत्साक्षात्कारेण परमनिर्वृत्तौ सत्यां कश्चन पुरुषार्थोऽवशिष्यते तत्राह । प्राज्ञं प्राप्येति । प्राज्ञः सुषुप्तिसाक्षी स्वाप्यये भगवदाविर्भावो निरूपितः तत्रच जीवानां प्रवेशो वासनासहितानां तं प्राप्य यथा जनाः अधिकारिणो मनुष्याः पुनरायान्ति एवमत्राप्यागमिष्यन्तीति भावः । यतो जना जायमानाः नतु उत्तमाधिकारिणः स्वसंबन्धख्यापनार्थमेव परं भगवान् प्रकटः ॥ ९ ॥

एवं तासां कृत्यमुक्त्वा ताभिर्भगवत्कृत्यमाह । ताभिरिति तासां संबन्धे प्राकृतीनां भगवतो ऽन्यथात्वं शङ्केत तन्निवृत्त्यै अन्यथा स्वार्थमेव भगवत्तिरोधानं स्यात् स नैव व्यरमत् "तस्मादेकाकी न रमत" इतिश्रुतेः लोकोऽपि केवलं भगवन्तं पश्यन् न निर्वृतो भवति किंतु सर्वशक्तियुक्तं परं पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्नेतिवाक्यात् पूर्ववत् दुःखिताश्चेत्सदोत्तमता न भवतीत्याह । विधूतशोकाभिरिति । ताः पूर्वोक्ताः गुणास्तासामुक्ता एव सर्वथा प्रपन्ना इति मध्ये शोकः समजनि तस्मिन्निवृत्ते यथापूर्वमेव ता भगवांश्च षड्गुणैश्वर्ययुक्तः तथापि प्राकृत इव यदि परिच्छिन्नकामः स्यात् तथापि वैलक्षण्यात् न रोचेत भगवांस्तु पूर्णकाम इत्याह । अच्युत इति । अतः ताभिर्वृतः अधिकं व्यरोचत सहजापेक्षया उक्तार्थे विश्वासेन हि श्रोता वक्तारं पुष्णातीव पितेव पुत्रं स्वार्थम् अतएवाग्रेऽतिगुप्तार्थकथनेन वक्ता श्रोतारं सुखयति अन्यथानाधिकारिणं मत्वा न वदेदलौकिकमर्थं प्रकृते चास्मिन्नर्थे राज्ञो विश्वासं दृष्ट्वातिसंतोषेण स्नेहेन च पितृत्वेन संबोधयति । ताते ति नन्वेवं सति भगवत्कान्तेः तारतम्यात् सहजत्वं न स्यात् अत आह । पुरुषः शक्तिभिर्यथेति । यथायं प्राकृतोऽपि पुरुषः सर्वसामर्थ्येषु लीनेषु लोकप्रतीत्या न रोचत इव स चेत् क्रियाज्ञानादिशक्तीराविष्करोति तदाधिको रोचते तथा अयमपि भगवान् रोचमान एव प्रकटासु शक्तिषु गोपिकासु सर्वप्रतीत्या युक्तानामप्यन्तःकरणेन अधिकं व्यरोचत अतिसौन्दर्यं प्राप्तवान् ततो भगवान् परमानन्दयुक्तः स "एव एषह्येवानन्दयातीति" श्रुतेः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्राज्ञं परमभागवतं जनाः संसारतप्ताः । गृहेषु तप्ता निर्विण्णा यथाच्युतजनागम इति भावृद्धजनोक्तेः ॥ ९ ॥

शक्तिभिः सर्वेन्द्रियशक्तिभिः । पुरुषो यथाऽधिकं विरोचते तासां वैकल्ये सति तु नात्यन्तं रोचते एवमेव कृष्णोऽप्यासां खिन्नत्वे खिन्नो नाधिकं रोचते । आसां विधूतशोकत्वेनाधिकरुचिमत्त्वे सोऽप्यधिकं रोचते इति । पुरुषस्य यथा स्वेन्द्रियसुख एव सुखं स्वेन्द्रियदुःखे दुःखम् एवमेव कृष्णस्यापि तासां सुखदुःखाभ्यामेव सुखदुःखे इति गोपीविषयकप्रेमवत्त्वं तासां स्वस्वरूपभूतत्वञ्च ज्ञापितम् स्कान्दे प्रभासखण्डे यथा ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

"षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एव मतः कृष्णः परमात्मा जनार्दनः । तस्यैताः शक्तयो देवि ! षोडशैव प्रकीर्त्तिताः । चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः । सम्पूर्णमण्डला तासां मालिनी षोडशी कला । षोडशैव कलायास्तु गोपीरूपा वराननाः । एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथगिति" । प्रमदा शतकोटीभिरकुलिते इत्यागमोक्तेस्त्रिशतकोट्यो गोप्यस्तासां मध्ये षोडशसहस्राणि गोप्यो मुख्यास्तासामपि मध्ये सहस्राणि मुख्यतरास्तासामेव मध्ये अष्टावेता मुख्यतमाः अष्टानामपि मध्ये द्वे राधाचन्द्रावल्यौ अतिमुख्यतमे तयोरपि मध्ये श्रीराधा सर्वमुख्यतमेति भक्तिशास्त्रनिर्णयः । ततश्च ताः सम्यक् हास्यहस्तग्रहादिना आदाय निर्विश्य पुलिनं प्रविश्य च व्यरोचतेति पूर्वेणैवान्वयः । पुलिनं विशिनष्टि सार्धेन । विकसद्भिः कुन्दैर्मन्दारैः सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिंस्तत् । वायोः शैत्यं पुलिनसम्बन्धात् मान्द्यं षट्पदास्पदत्वात् शरच्चन्द्रांशूनां सन्दोहैर्ध्वस्तं दोषाया रात्रेस्तमो यत्र तत् । शिवमत एव सुखदं यमुनाया हस्तरूपैस्तरलैस्तरङ्गैरचिता आस्तृता कोमला वालुका यस्मिंस्तत् ॥ १०-१२ ॥

केनचित्कृता विशुद्धरसदीपिका ।

याश्च तत्प्रियार्थे संभवन्तु सुरस्त्रिय इत्यनेन सूचितावतरणाः स्वीकृतनिजस्वामिनीपरिचरणाः स्वसदृशरूपवेषाभरणास्तासां सर्वासामेव चेष्टितमाह । सर्वा इति । ता इत्युक्तस्वरूपाः केशवस्य केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतमित्यादिना सूचितकेशप्रसाधनकर्तुः तथा केशांघ्रिस्पर्शोत्सवेत्यादिनानुभूततद्रहोविहारस्येत्यन्तरङ्गत्वम् आलोको दर्शनमेव परमोत्सवो यस्तेन निर्वृताः परमांशिन्यः निजेश्वर्यास्तस्याः सौभग्यसुखास्वादादितिभावः । विरहजं तापं जहुः नैतासां कदाचिद्विरह इतिभावः । तत्रानुरूपो दृष्टान्तः । प्राज्ञमिति । सुषुप्त्यभिमानिनं तदवस्थमित्यर्थः तत्राविद्याया इवात्र विरहस्फूर्त्तेरभाव इति सूचितं यद्वा प्राज्ञः परमभागवतः समयज्ञ इतियावत् तं प्राप्य जनाः परमानन्दा भागवतास्तत्सुखसुखिनो भवन्ति यथेत्यर्थः । एतासां नामानि प्रह्लादसंहितानुसारेण प्राचीनैरुक्तानि श्रीमुनीन्द्रैश्चातिरहस्यत्वाद्भाववैवश्याच्च नोक्तानि तानिच मूलविरोधात् कल्पनागौरवादस्माभिरुपेक्षितानि इति ज्ञेयं नह्यत्र संख्या विवक्षिता तत्तत्स्वभावप्रदर्शनाय तच्चेष्टितवर्णनसंरम्भादिति सूक्ष्मदृशावधेयम् ॥ ९ ॥

ततश्च मदभावप्रशमेन सर्वासामेकीभावात्संमिलितानां सांनिध्यात् भगवतोऽपि सुखमधिकं जातमित्याह । ताभिरिति । पूर्वोक्तत्तद्भावाभिः विशेषेण धूतः त्याजितः शोको यासां ताभिः तत्त्याजनप्रकारो विष्णुपुराणे ॥

ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः ।
निन्येऽनुनयमन्याश्च करस्पर्शेन माधव इति ॥

भगवानिति श्रीकिशोरीरमण इत्यर्थः । एवं च श्रीराधायुगलितो मुख्यप्रकाशस्तासां मध्यग इतिसूचितं तत एवाच्युतः तस्यामेवात्यासक्तत्वेनान्यत्रानासक्तः ताभिश्च तथैव वृतः स्वस्वामित्वेनाङ्गीकृतः इति सख्यमेव तद्युगलमत्र स्पष्टीकृतम् अधिकं व्यरोचत तत्र दृष्टान्तः पुरुषो जीवतत्त्वं शक्तिभिरिन्द्रियैः ततश्चैता अपि तयोरिन्द्रियस्थानीयास्तन्मिथुनं चासामात्मपरमात्मस्थानीयमित्यर्थः । यद्वा पुरुष ईश्वरतत्त्वं स यथैश्वर्यादिभिः स्वरूपशक्त्या चेति तातेति सानुकम्पं संबोधनम् अत्रैव मनोदेयमिति भावः ॥ १० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं कासांचिच्चरितं पृथक्पृथगुक्त्वा सर्वासां तथा वक्तुमशक्त्या समुदायेनाह । सर्वास्ता इति । ताः सर्वा अपि केशवालोकेन यः परमोत्सवस्तेन निर्वृता विरहजं तापं जहुरित्यन्वयः तत्रासंख्यातगोपिकानां युगपद्दर्शनासम्भावनानिरासायाह । केशवेति । को ब्रह्मा ईशो रुद्रस्तयोरपि तदङ्गसम्भूतत्वेन विभु सर्वाङ्गत्वान्न तदसम्भाव इति भावः । यद्वा कीदृग्रूपेणाविर्भाव इति जिज्ञासायां केशवेति केशा अपि सुन्दराः सन्त्यस्येति तथा ततश्च यस्य केशमात्रं सर्वसौन्दर्यनिधिः किमु वाच्यं मुखादीनां यद्वा कथं तद्दर्शनेनानन्दस्तत्राह केशवेति । कं सुखं तस्येशः दातुं समर्थः स्वार्थे प्रत्ययः केशवस्यालोकः कृपादृष्टिस्तद्विषयकं दर्शनं वा तस्यैवासमन्तात्सर्वासां समीपे वहिरन्तश्चाविर्भावो वा तेन यः परमोत्सव उत्कृष्टो हर्षो नित्यानिरतिशयानन्दाविष्कारो वा तेन परा मा विरहवैक्लव्येनाङ्गश्रीमान्द्येऽपि तद्दर्शनमात्रोद्भवा योत्कृष्टाङ्गशोभा उत्सवश्च ताभ्यां वा निर्वृता मग्नचित्ता विरहजं तापं जहुः तथा च परमानन्दावाप्तिर्दुःखनिवृत्तिश्च दर्शिता तत्र दृष्टान्तः । प्राज्ञमिति । यथा जनाः जन्या अन्तः करणादयो जाग्रत्स्वप्नयोस्तत्तद्व्यापृतिश्रमिताः प्राज्ञं सुषुप्तौ कारणावस्थं प्राप्य गतश्रमाः सुखिनश्च भवन्ति यद्वा जनाः संसारतापत्रयमुमुक्षवः प्राज्ञं प्रकृष्टा ज्ञा ब्रह्मापरोक्षमतिर्विद्यते यस्य सा भवति वा यस्मात्स प्रज्ञ एव प्राज्ञस्तं प्राप्य विगतभवतापाः आविर्भूतस्वरूपात्मकनित्यानन्दाश्च भवन्ति यथा वा जना जीवाः परमात्मस्वरूपाज्ञानजनानादुःखकर्षिता महावाक्यप्रज्ञैकगम्यं प्राज्ञं ब्रह्म प्राप्य साक्षात्कृत्य गतदुःखाः सुखिनश्च भवन्ति तथा यद्वा ताः सर्वा अपि जनाः भगवतो जनिः प्रादुर्भावो यासां तास्तं प्राज्ञं रसाभिज्ञं रसिकशिरोमणिं प्राप्य कं सुखं तद्दातुमीशः समर्थो यस्तदालोकस्तेन परमोत्सवनिर्वृता यथेति यथावद्विरहजं तापं जहुरिति यथा तदालोकपरमोत्सवनिर्वृतास्तथाविरहजं तापमपि जहुरिति वान्वयः ॥ ९ ॥

तत्समागमे भगवच्छोभामाह । ताभिरिति । तत्र तातेति प्रियसम्बोधनेन रहस्योपदेशयोग्यतासूचनम् अच्युत इत्यनेन यथा दिनतापहरणे सर्वजनाल्हादनेऽपि सुधानिधेश्चन्द्रस्य न सुधाच्युतिः यथा वाज्ञजनेभ्यो वोधदानेन त्रिविधभवतापनिवृत्तिपूर्वकपरमसुखदानेऽपि भगवत्स्वरूपविदुषां न विद्यासुखच्युतिः यथा वा सर्वविश्वसत्तास्फूर्तिप्रदानेऽपि ब्रह्मणो न सच्चिद्रूपत्वच्युतिः तथा भगवान् कृष्णो दुःखकर्षणनित्यानन्दस्वरूपः तद्दुःखकर्षणे परमानन्ददानेऽप्यच्युत एवेति ज्ञापितं स्वरूपादच्युतः परप्रेमास्पदोऽपि जीवः स्वप्रेमास्पदतां पुत्रवित्तादावध्यस्य तदन्वेषणपरो दुःखी भवति तथात्वशङ्कानिरासायाह । भगवानिति । तस्य स्वरूपाज्ञानेन लुप्तभगस्य तथात्वेऽप्ययं भगवान् अलुप्तभग इति भावः । ताभिः स्वस्वरूपात्मिकाभिः अतिविलक्षणप्रेमोत्साहवतीभिर्वा वृतः सन्नधिकं व्यरोचत नच पूर्णस्यान्यसम्पर्के आधिक्यासम्भवः स्वरूपतश्च-

श्रीरामनारायणकृतभावभावविभाविका ।

दानन्दस्यापि जीवस्य विरतिश्चतिरत्यादिभिरधिकं भगवत्स्वरूपानन्दाविर्भावात्पूर्णपुण्याया अपि गङ्गाया नद्यन्तरसङ्गमे पुण्यदशगुण्यमिव अव्यक्तपूर्णानन्दब्रह्मणः श्रुतिसङ्गतौ व्यक्तानन्दत्ववत् व्यक्तस्वरूपानन्दस्यापि प्रेमवृत्तिप्रतिफलने बहुगुण्यवदाधिक्यस्फूर्तिसम्भवात् यद्वा अधि सर्वतः कं सुखं सर्वासां गोपीनां तत्स्मरतां सर्वजनानां वा परमानन्दो यथा स्यात्तथा व्यरोचत विशेषेण स्वरूपरुचिमाविश्चकार ननु विरहशोकाभिन्नहृत्खेदखिन्नाभिः प्रियान्वेषणादिश्रमाखिन्नाभिः शोकाश्रुक्लिन्नाभिः छन्नत्वे का वा शोभा तत्राह । विधूतशोकाभिरिति । भगवद्दर्शनमात्रेण धूतस्तदानुकूल्यदर्शनेन तु विधूतः शोको यासां"तरतिशोकमात्मविदि" तिश्रुतेः सर्वात्मकृष्णसाक्षात्कारे एव शोकापनोदसम्भवात् यद्वा भगवता"अनीशया शोचति मुह्यमान" इतिश्रुतेः शोकग्रस्तानां"ममैवांशो जीवलोके जीवभूतः सनातनः" इति स्मृत्या स्वांशभूतानां जीवानां शोकापनोदपरमानन्दप्रदानाय लीलानन्दप्राकट्येऽपि प्रेमाभावे तद्यथावदसम्पत्तौ ताभिः प्रेमपथाविष्कारेण धूतः सर्वलोकशोको याभिः यद्वा कृपालूनां परदुःखदुःखित्वस्वभावत्वेन भगवतः परमकृपालुतया सम्भावितो यो गोपीनां शोकेन प्रजानामनुद्धारेण वा शोकः सस्वविधूतशोकत्वेन प्रेमपथप्रवर्त्तनेन वा विधूतो याभिस्ताभिरधिकं व्यरोचत तत्रोपमान्वेषणे तु न तारावृतचन्द्रस्योपमानत्वं कोटिपूर्णचन्द्रताराणां कृष्णगोपीच्छविसाम्यासम्भवात् प्रियतमकृष्णादर्शने दुःखप्रदत्वदर्शनाच्च नवा रतिप्रभृतिवृतः कामो मूर्तिमच्छृङ्गाररसो वोपमानं क्षुद्रत्वात् भवानुबन्धित्वायोगिनामनाह्लादकत्वेन रुच्यविषयत्वाच्च न वा योगर्द्धिभिर्योगानन्दोऽप्युपमानं तन्न्यूनत्वाद्भोगिनामरोचकत्वाच्च नवानन्तशक्तियुतः परमेश्वरोऽप्युपमानं सर्वानुगतत्वेऽपि तच्छोकापनोदानन्दयोरकरणात्समाद्रामरावणयोर्युद्धं रामरावणयोरिवेति न्यायमाश्रित्याह । पुरुष इति । पुरुषः कृष्णस्तदितरेषां पुरुषतासम्मतत्वात्स्वाह्लादिनीशक्तिभिः गोपीभिरेव यथेति यद्वोपमाया असम्भवान्नात्रोपमानोपमेयभावः किन्तु पुरुषस्ताभिः स्वशक्तिभिर्यथेति यथावद्व्यरोचत तत्र तदैव पुरुषत्वाद्वा पूर्ष्व बहुगोपीयूथेषु राजमानतया वा पुरुषप्रयोगः ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथान्यासां वृत्तमाह । सर्वास्ताः गोप्यः केशवस्य ब्रह्माद्यनुकम्पकस्य तेजोनिधेरवलोकनाद्यः परमोत्सवस्तेन निर्वृता आनन्दिताः विरहजन्यं तापं जहुः यथा प्राज्ञं परमेश्वरं प्राप्य तदीया जनाः यद्वा प्राज्ञं ब्रह्माक्षं प्राप्य मोक्षविरहजं तापं मुमुक्षवस्त्यजन्ति यद्वा प्राज्ञं सौषुप्तं पुरुषं प्राप्य विश्वतैजसावस्था जीवाः ॥ ९ ॥

एवम्भूताभिस्ताभिर्भगवानपि विशेषेण शुशुभ इत्याह । ताभिरिति । भगवान् षड्विधैश्वर्य्यसम्पन्नोऽपि अच्युतः स्वस्वरूपादावानन्दघनादच्युतोऽपि विधूतशोकाभिस्ताभिरधिकं तत्रापि विशेषेण अरोचत पुरुषः स्वयमेव परमात्मा सत्वादिभिः शक्तिभिर्यथा यद्वा उपासकः ज्ञानबलवीर्यादिभिर्यथा अथवा पुरुषः सङ्घाताभिमानी सर्वेन्द्रियशक्तिभिर्यथा तथा तस्य स्वरूपानतिरिक्ताभिः स्वशक्तिरूपाभिर्गोपाङ्गनाभिर्भगवतः क्रीडानुकरणं संवृत्तमिति भावः । पुत्रानुकम्प्यत्वात्तवाग्रे मयेदं रहस्यं प्रकाशितमिति तातेति सम्बोधनाशयः"प्रमदाशतकोटिभिराकुलित" इत्यागमोक्तसंख्याता गोप्यः तासां मध्ये—

> षोडशैव सहस्राणि गोप्यस्तत्र समागताः ।
> चन्द्ररूपी मतः कृष्णः कलारूपास्तु ता मताः ॥
> एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथक् ।

इतिस्कान्दोक्ताः षोडशसहस्राणि मुख्यास्तासामपि मध्ये सहस्रसंख्याकाः मुख्या स्तत्राप्युक्ता अष्टौ मुख्यतरास्तत्रापि श्रीराधाचन्द्रावल्यौ मुख्ये तत्रापि श्रीराधापरममुख्यतमेति विवेकः तासामित्यत आरभ्य निवृत्तिपक्षे तासां श्रुतीनां संबन्धी शौरिः संसारविजयं कर्तुं प्रवृत्तोऽधिकारिदेहस्तत्रस्थितं वसुदेवशब्दाभिधेयमन्तःकरणं तत्रोपलब्धुं योग्यत्वाद्वासुदेव औपनिषदः परमात्मा तत्रैव सर्वसाधनसम्पन्नाधिकार्य्यन्तःकरणलक्षणे वन एवाविरभूत् अहंब्रह्मास्मीति साक्षात्प्रकटितः आत्मन्येवात्मानं पश्येदित्यादिश्रुतेः तत्रापि यः सगुणः स्मयमानमुखाम्बुजत्वादिरूपेणानिशं ध्यातः स एव साक्षान्मन्मथश्चासौ मन्मथश्च सर्ववृत्तिसाक्षिरूपः प्रतिबोधविदितं मतमितिश्रुतेः १ तं तथाभूतं भगवन्तमधिकारिचेतसि आविर्भूतमवलोक्यावलाः साक्षात्तत्प्रकाशनबलरहिताः श्रुतयः स्वानुकूलाधिकारिणि प्रीत्योत्फुल्लाः विकाशं प्राप्ताः दृक् ज्ञानं यासामधिकारिणा प्रकाशिततत्त्वार्थज्ञानाः सर्वाः काण्डत्रयात्मिकाः युगपदुत्तस्थुः यथाभूतस्वार्थाभिमुखा जाता इत्यर्थः २ काचिदित्यादौ जातावेकवचनं काश्चिद्भगवद्वयवभूततद्देवयजनप्रतिपादिका इतिकर्मकाण्डश्रुतीनां तात्पर्यं सूचितवान् ४ काश्चित्तदुपभुक्त नैवेद्यादिग्रहणपरास्तद्गुणध्यानप्रतिपादिकाश्चेत्युपासनाकाण्डश्रुतीनां तात्पर्यं ध्वनितवान् काश्चिन्मुख्याः नेहनानास्तिकिञ्चन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्याद्या अभेददर्शनपरिशुद्धाः ५ काश्चित्तत्त्वमसि अहं ब्रह्मास्मीत्याद्याः पदार्थद्वयाभेदपराः ६ काश्चिदात्मानमेव लोकमुपासीतेत्याद्या निर्गुणोपासनपरा इतिज्ञानकाण्डश्रुतीनान्तात्पर्य्यं सूचितवान् सर्वा अपि ताः केशवस्य परमात्मनः योऽधिकारिण आलोकः साक्षात्कारस्तेन परमोत्सवस्तेन निर्वृता अहो अयंस्वात्मभूतपरमात्मानं न जानातीतितदीयविरहाज्जातो यस्तापस्तं जहुः ततश्च विधूतः शोको याभिः प्रसन्नाभिरिति वा ताभिः श्रुतिभिर्वृतः सगुणो निर्गुणश्चाधिकं व्यरोचत सच्चिदानन्दस्वरूपतया प्रतिपाद्यः सन् सम्यगशोभतेत्यर्थः ॥१०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्राप्यं मुक्तोपसृप्यं प्राप्य जनाः मुमुक्षवः प्राज्ञं विद्वांसं वा जना ज्ञानभक्त्याधिकारिणः"प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमि"त्यादिश्रुतिप्रोक्तं प्राज्ञं भगवन्तं सुषुप्तौ प्राप्य जनास्तापं जहतीति वा ॥ ९ ॥

हे तात ! विष्णुदत्त ! ताभिर्विधूतशोकाभिः शुद्धाभिरधिकं भगवान् व्यरोचत तासामनन्यत्वे च दृष्टान्तः पुरुषः स एव यथा शक्तिभिः विमलोत्कर्षिण्यादिभिरिति ॥ १० ॥

ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ।
विकसत्कुन्दमन्दार १ सुरभ्यनिलषट्पदम् ॥११॥ १ सुरतानिल
शरच्चन्द्रांशुसंदोहध्वस्तदोषातमःशिवम् ।
२ कृष्णाया हस्ततरलाचितकोमलवालुकम् १२ २ कृष्णेहायस्त इति विजय०

भाषा टीका ।

वे सब गोपी श्रीकेशव भगवान् के दर्शन ते जो उत्सव ताते सन्तुष्ट होगई और विरहते जायमान सब ताप को छोड देत भई जैसे सुषुप्ति अवस्थामे प्राप्त परमात्मा को प्राप्त हो मनुष्य सुखी हो वै हैं ॥ ६ ॥

हे तात ! परीक्षित् जी सम्पूर्ण दुःखते छूटी विन गोपिन के सहित अच्युत भगवान् अधिक शोभित भये जैसे प्रलयकालमे स्वशक्तिन ते पुरुष परमात्मा कि शोभा होवै है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विकसत्कुन्दमन्दारैः सुरभिर्योऽनिलस्तस्मात्षट्पदा यस्मिंस्तत् ॥ ११ ॥

शरच्चन्द्रांशूनां सन्दोहैः समूहैर्ध्वस्तं दोषातमो रात्रिगतं तमो यस्मिंस्तत् अतः शिवं सुखकरम् हस्तरूपैस्तरलैस्तरङ्गैराचिता आस्तृता कोमला वालुका यस्मिन् एवंभूतं पुलिनं ताः समादाय निर्विश्य ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

विशब्दोक्तस्य रोचने वैशिष्ट्यस्योपकरणान्तरमपि दर्शयति । ता इति द्वाभ्याम् । सम्यक् प्रत्येकं सर्वासामेव हस्तधारणादिना आदाय रासयोग्यपुलिनान्तरं गन्तुं पूर्वपुलिनतो गृहीत्वा निर्विश्य प्रविश्य मध्यमधिष्ठायेत्यर्थः । विभुर्व्यापक इति एकस्यापि सर्वासां युगपत् समादानादिसमावेशार्थं पुलिनस्य कामोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयन् तद्विशिनष्टि । विकसदिति सार्द्धेन । वायोः शैत्यं पुलिनसंबन्धात् मान्द्यं च षट्पदास्पदत्वात् सौरभ्यञ्च व्यक्तमेव ॥ ११ ॥

शरदिति । चन्द्रांशूनां संप्रसन्नता सन्दोहेति चन्द्रस्य पूर्णता ध्वस्तदोषेति रात्रित्वापगमेन दिनवत् प्रकाशश्च सूचितः कृष्णायाः श्रीकृष्णस्य सनामत्वेन सवर्णत्वेन च सख्यम्प्राप्तायाः अत एव हस्तेति किंवा विचित्रशोभादिना तस्यापि चित्ताकर्षिकायाः तदेवाह । हस्तेति । हस्तैरिवाचयनेन स्थलीवैषम्यकठिनांशरहित्यादिकं ध्वनितम् अन्यत्तैर्व्याख्यातं यद्वा ताः समादायेति ताभिः सह तदेव पुलिनं निर्विश्य मध्यप्रदेशं प्रविश्येत्यर्थः । विशेषेण भवतीति विभुर्बभूवेति शेषः निजवैभवं प्रकटयामासेत्यर्थः । तच्च तद्दर्शनेति द्वाभ्यां वक्ष्यते अन्यत्समानम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

विशब्दोक्तस्य रोचने वैशिष्ट्यस्योपकरणान्तरमपि दर्शयति ता इति द्वाभ्याम् । सम्यक् प्रत्येकं सर्वासामेव हस्तधारणादिना आदाय रासयोग्यं पुलिनान्तरं गन्तुं पूर्वपुलिनतो गृहीत्वा निर्विश्य प्रविश्य मध्यमधिष्ठायेत्यर्थः । विभुर्व्यापक इत्येकस्यापि सर्वासां युगपत् समादानादिसमावेशार्थम् । पुलिनस्य कामोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयंस्तद्विशिनष्टि । विकसदिति सार्द्धेन । वायोः शैत्यसौरभ्ये स्पष्टे । मान्द्यञ्च षट्पदास्पदत्वात् ॥ ११ ॥

शरदिति । चन्द्रांशूनां सुप्रसन्नता सन्दोहेति चन्द्रस्य पूर्णता ध्वस्तदोषेति दिनवद् प्रकाशश्च सूचितः । कृष्णायाः श्रीकृष्णस्य सनामत्वेन सवर्णत्वेन च सख्यं प्राप्तायाः । अत एव हस्तेति । किम्वा विचित्रशोभादिना तस्यापि चित्ताकर्षकत्वेन तन्नाम्न्याः वृन्दावनं गोवर्द्धनमित्यादिः । हस्तेति हस्तैरिवावचयनेन स्थलीवैषम्यकठिनांशराहित्यादिकं ध्वनितम् । अन्यत्तैः । यद्वा । ताः समादायेति ताभिः सह तदेव पुलिनं निर्विश्य मध्यप्रदेशं प्रविश्येत्यर्थः । विशेषेण भवतीति विभुर्बभूव इति शेषः । निजवैभवं प्रकटयामासेत्यर्थः । तच्च तद्दर्शनेति द्वाभ्यां वक्ष्यते अन्यत् समानम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो विभुः कृष्णस्ताः समादाय कालिन्द्याः पुलिनं निर्विश्य तत्र ताभिः परिवृतो व्यरोचतेति पूर्वेणान्वयः पुलिनं कथंभूतं विकसद्भिः कुन्दैर्मन्दारैश्च सुरभिर्यो मन्दानिलः तस्मात्षट्पदा भृङ्गा यस्मिन् ॥ ११ ॥

शरच्चन्द्रांशूनां सन्दोहैःसमूहैर्ध्वस्तं नाशितं रात्रितमः अतः शिवकरं तथा यमुनाया हस्तैरिव तरलैस्तरङ्गैराचिता विस्तृता कोमला वालुका यस्मिंस्तथा भूतम् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विभुः अनिलश्च षट्पदाश्चानिलषट्पदाः विकसतोः कुन्दमन्दारयोः सुष्ठु रताः क्रीडावन्तः अनिलषट्पदाः यस्मिंस्तत्तथा ॥ ११ ॥

शरत्कालचन्द्रांशूनां संदोहेन निरन्तरराज्या ध्वस्तं निरस्तं दोषातमः रात्र्यन्धकारो यस्मिंस्तत्तथा कृष्णायाः यमुनायाः ईहया प्रवाहलक्षणचेष्टया आयस्ताः आयासं प्राप्ताः तरला अस्तुतरङ्गा एतैराचितानि आसिक्तानि च कोमलानि च वालु

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कानि सैकतानि यत्र तत्तथोक्तं यद्वा कृष्णेहया श्रीकृष्णमूर्तिक्रीडया आयस्तानि च तरलानि चञ्चलानि चात एवाचितानि इतस्ततो विकीर्णानि च शेषं समम् । अणुस्तरङ्गो लोलः स्यात्तरला कुरलस्तथेति गोपालः आचितं छन्नसिक्तयोरिति च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

किं कृत्वा व्यरोचतेत्याह । ताः समादायेत्यादिद्वाभ्याम् । ताः समादाय कालिन्द्याः पुलिनं निर्विश्य आतिदीपकमिदं तद्विशिनष्टि । विकसद्भिः कुन्दैर्मन्दारैश्च सुरभयो ये ऽनिलास्तत्सङ्गिनः षट्पदा यत्र कृष्णोऽत्रागत्य क्रीडिष्यतीति कृत्वा कृष्णाया हस्तेन तरलं यथा स्यात्तथा आचिताः सम्यक्मार्जिताः कोमला वालुका यत्र ॥ ११—१२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तासामानन्दजननार्थं यत्कृतवांस्तदाह । ताः सामादायेति । ताः सम्यगादाय समीचीने पुलिने निर्विश्योपविश्य विभुर्जातः कालिन्दी कलिन्दकन्या कालिं चरतीति कलिन्दः अतस्तस्याः पुलिने तासामन्योऽन्यं भगवता कलहो न भविष्यतीति ज्ञापितं पुलिनं वर्णयति क्रीडायोग्यत्वार्थं सार्द्धेन । सर्वत उपरि अधश्चेति प्रथमतः सर्वतः सौभाग्यमाह । विकसन्ति कुन्दमन्दारपुष्पाणि तेषां सुरभ्यनिलः षट्पदा भ्रमराश्च यत्र वायोः त्रयो गुणाः स्पष्टाः मकरन्दोऽपि पुष्पेष्वधिकः तेन मत्ता भ्रमरा अपि नादसाधकत्वेन गानादावुपयुज्यन्ते विकासः वाय्वर्थ एव कुन्दगन्धः शान्तः मन्दारगन्धः पुष्टः तेन गुप्तागुप्तकामयोरुद्बोधको निरूपितः शत्रन्तोक्त्या प्रभुनिवेशनसमय एव विकासारम्भो न तु पूर्वमपीति ज्ञाप्यते अन्यथा विकसितेति वदेत् एवंसति यस्मिन् क्षणे यस्यार्थस्योपयोगस्तस्मिन्नेव क्षणे तत्कार्यं भवति नान्यदेति लीलामात्रोपयोग्येवात्रत्यं सर्वमिति ज्ञापितं भवति अन्यथा सार्द्धाध्यायत्रयोक्तलीलायां क्रियमाणायां भूयस्येव रात्रिरतीतेत्यधुनैव विकासे हेत्वन्तराभावात्स न भवेदत एव न वदेदपि एवं सत्येतादृक्चन्द्रादिसंबन्धित्वेनोक्तत्वादनिलादयोऽप्यधुनैव प्रवृत्ता न पूर्वमपीति ज्ञेयम् स्वतन्त्रतयापि सौरभ्यप्रतीत्यर्थं सुरभिरनिल उक्तः ॥ ११ ॥

एवम्परितः जलं परितः सुगन्धः परितः पुष्पाणि परितो वायुः परितो नाद इति निरूपितम् उपर्युक्तमतामाह । शरदिति शरत्कालीना ये चन्द्रांशवः तेषां सन्दोहः समूहाः तैर्ध्वस्तं दोषा रात्र्यास्तमो यत्र तेन अत्यन्तं शिवं कल्याणरूपम् अन्धकारे गतेऽपि यदि भूताद्यभिनिविष्टं भवेत् तथापि तदप्यसमञ्जसमिति कल्याणरूपता निरूपिता निर्विघ्नमग्रिमेष्टकार्यसम्पादकत्वज्ञापनाय परितश्च निकृष्टाः पदार्थाः नोपर्यधश्च अधस्तस्य पुलिनस्य गुणानाह । कृष्णेति । सापि भगवत्सनाम्नी भूसंस्कारं कृतवती भगवद्रमणार्थं कृष्णाया हस्तरूपाः तरलाः तरङ्गास्तैः चिताः कोमलवालुकाः यत्र अन्यथा हस्तरूपताभावे समता न स्यात् तेन शैत्यं कोमलत्वं समता चोक्ता तादृशं पुलिनं निर्विश्य तत्र गत्वा वा स्थितः उपवेशनमग्रे वक्ष्यति भावेनैवोपवेशनम् ॥ १२ ॥

केन चित्कृता विशुद्धरसदीपिका ।

अथैतासां रासक्रीडायोग्यदेशविशेषप्रापणमाह द्वाभ्याम् । ता इति । प्रागुक्ताः सर्वा एव सम्यक्हस्तधारणादिना आदाय कालिन्द्याः इति प्रागेव व्याख्यातं पुलिनमिति तस्या एव प्रदेशविशेषं चक्रभ्रमणाभिधं मणिसंकुलमिति क्रमदीपिकोक्तेः गोविन्दलीलामृते च—

ततः पुलिनमागत्य सचक्रभ्रमणाभिधम् ।
तत्र रन्तुमनाश्चक्रमारुरोह प्रियायुगः इति ॥
पूर्वं प्रियारूढाः पश्चात्स इत्यर्थः तथा—
वितस्तिमात्रे खनिखातशंकुगङ्गिनिमचक्रोपरि—
राधया सह ।
स्थितः स मध्ये ऽन्यसखीगणैः क्रमाद्बहिश्च कार थ—
सुमण्डलीत्रयमिति ॥

तदेव विशिनष्टि । विकसन्ति कुन्दानि माघ्यानि मन्दाराणि च देवकुसुमानि तेन दिव्यादिव्यपुष्पसमृद्धिः सूचिता तेषां गन्धेन सुरभियोऽनिळः स एव षट्पद इवेतस्ततो भ्रमन् यत्र तत् अनिलस्यैव षट्पदत्वरूपकेण देशस्यालौकिकत्वम् ॥ ११ ॥

तथा शरत्संबन्धी यश्चन्द्रस्तदंशूनां सन्दोहेन ध्वस्तं क्षिप्तं दोषाया रात्रेस्तमो यस्मिंस्तत् एवं किरणानां सन्दोहस्य मार्जनीत्वं तमसश्चावकरत्वमभिप्रेतं तेन च स्थलालौकिकत्वं शिवं सुखतमं शीतलतमं वा श्लेषेण शिववदुज्ज्वलवर्णम् एवञ्च कामविजयस्फोरणाय शिवपदोपादानमिति ज्ञेयं तथा कृष्णाया नाम्नापि साम्यप्राप्तिताया प्रियसख्यास्तरलैस्तरङ्गैराचितं वैषम्यकाठिन्याद्यपसारणेनास्तृतं कोमलं वालुकं यस्मिंस्तत् यद्वा वालुका हिमवालुका कर्पूरं इतियावत् आचिता हिमवालुका यत्र तत् विभुरिति सर्वासां यथायोग्यं मानदाने हेतुः ॥ १२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तासां सन्माननाय यत्कृतवांस्तदाह । ताः समादायेति विभुः सर्वासां प्रेमास्पदे भगवति तुल्यप्रेमर्द्धिमत्त्वात्ताः सर्वाः समादाय सम्यक् हास्यनर्मोक्तिहस्तग्रहणालिङ्गनादिभिः आदाय स्वीकृत्य सह गृहीत्वा वा कालिन्द्याः वक्ष्यमाणगुणगणयुतं पुलिनं निर्विश्याधिकं व्यरोचत तत्र विभुरित्यनेन विभुत्वं विना परिच्छिन्नेन सर्वासामसंख्यातगोपीनां हृदन्तर्भावेवेनृत्यस्य तासां सर्वासां तथा प्रत्येकहस्तग्रहादिना मनोरञ्जनसन्मानपूर्वकादानस्य चासम्भवात्तद्योग्यत्वसूचनं पूर्वमपि पुनः पुलिनमाविश्य समवेताः कृष्णं जगुरित्युक्तत्वात् पुलिने एवोपविष्टाः ताः समादाय पुलिनं निर्विश्येत्यनेन तु पूर्वं तासां कृष्णविरहेण स्मरोद्दीपनकुसुमविकासभ्रमरगानाद्यसहिष्णुतया क्वचित्तदुद्दीपनद्रुमलतादिरहितैकान्तपुलिनप्रदेशे समवेत्य गुणगानं कृतं तेनाविर्भूतो विभुरुद्दीपनविभावान्वितविहाराईप्रदेशान्ताः समादाय निर्विवेशेति द्योतितं कालिन्द्या-

श्रीरामनारायणकृतभावभावविभाविका ।

इत्यनेन तु कालिं द्यति अवखण्डयतीति कालिन्दस्तत्पुत्र्यास्तत्कुलाचलकुलागताचलकाठिनिरसनस्वभावत्वादपि तस्यास्तत्सङ्गतानामीर्ष्यामात्सर्यादभावतया सह विहारयोग्यताज्ञापनं क्रीडायोग्यत्वायैव पुलिनं विशेषयति । विकसदिति । विकसन्तो ये कुन्दमन्दारोपलक्षितविविधसुमनोविशेषास्तेषां सुरभियुक्तो योऽनिलो वायुस्तेनागताः षट्पदास्तद्रूपा मुनयो यत्रेति तथाच ये कृष्णलीलोत्साहेन विकसन्तः सुमनसस्तेषां सङ्गं ये मुनयः प्राप्नुवन्ति तद्गुणान् गायन्ति चेति ध्वनिः तत्र विकसदिति वर्तमानोक्त्या सद्योविकाससूचनेन बहुकालविकाससम्भावितम्लानम्लानिनिरासः यद्वा भगवद्विहारसमविकासोक्त्या तत्रत्यकुसुमादीनां जडत्वाभावचिदात्मकत्वं तल्लीलानुसारित्वञ्च सूचितं यद्वा पुलिनस्यैव रासविलासोल्लासेन कुन्दविकासरूपदन्तदर्शनप्रकाशात्मकप्रहासो मन्दारादिना नन्दनन्दनानन्दि पुलिनस्य नन्दनवनादेर्मन्दा अरयः स्पर्द्धिनो यस्येति मन्दविकारद्योतनं यद्वा विशेषेण कं सुखं येभ्यस्ते विकाराः कृष्णलीलोत्साहेन विशेषेण कं येषां वा परमानन्दघनलीलोपकरणानामपि परमानन्दरूपत्वात् विशेषं यत्कं सुखं परमानन्दस्तत्स्वरूपा वा तथा त एव सन्तः समीचीनाः परोपकारिणः सद्रूपा वा ये कुन्दमन्दारादयस्तेषां सुरभ्यनिलेन षट्पदा यत्रेति तथा अत्र वायोस्त्रयो गुणाः शैत्यादयस्तत्र यमुनासन्निहितदेशशरच्छिशिराकालनिकषैर्था शैत्यं कुसुमसुरभिषट्पदसम्बन्धानिर्देशेन सुरभित्वम् अनिलेति स्वनाम्नैव मन्दत्वं तीव्रो वायुः सशब्दो भवति अयन्तु अनिलो न इला वाणी तदुपलक्षितः शब्दो यस्मिन्निति यद्वा कीदृशं पुलिनं विकसद्भिः कुन्दोपलक्षितकुसुमैर्मा श्रीर्यस्य विकसतां कुन्दादीनां मा श्रीर्वा यस्मिन् यद्वा विकाशविशेषसुखरूपा सदात्मिका तथाकुं कुत्सितं द्यतीति सर्वदोषापहारिणी तद्रहिता च मा श्रीर्यस्य यद्वा विकञ्च तत्सञ्च कुं कुत्सितं दमयतीति कुन्दमं विकसञ्च तत्कुन्दमञ्च विकसत्कुन्दमं तथा आगतानां कृष्णदाराणां सुरभ्यनिलेन याताः षट्पदा वेदा एव षट्पदा यस्मिन् यद्वा दारेषु सुष्ठु रमते भाति चेति दारसुरमः कृष्णः स स्वामितया वर्तते अस्येति तत् दारसुरमि तथा भूता अनिला इला वाणी तच्छून्याः साक्षाद्वर्णनासमर्थाः षड्भिरङ्गैः पद्यन्ते ब्रह्माणि पर्यवस्यान्तीतिषट्पदाः षड्भिरङ्गैः पद्यन्ते गम्यन्ते इति वा वेदा अपि यस्मिंस्तत् यद्वा यथा योगिप्रेरितः सुसुमनाः षट्कमलभेदिवायुः कृष्णपादमनुसरति तथा विकसत्कुन्दमन्दारसुमनः परागान्वितकञ्जवनागतत्वात्सुरभिः कृष्णानुगोऽनिलः अनाहतनादवन्नादवन्तः षट्पदाश्च यस्मिंस्तत् यद्वा विकसन्तः कुन्दादयो येन तथा सुष्ठु रमते भाति चेति सुरमः कृष्णः तदङ्गसङ्गतया सुरभिरनिलस्तदुद्बुद्धनादा षट्पदाश्च यस्मिंस्तत् अनेन जगज्जीवनाङ्गसङ्गेनैव वायोः स्थिरचरचेष्टाद्बोधकतया जगत्प्राणत्वं सूचितम् ॥ ११ ॥

पुलिनमेव वर्णयति । शरदिति । यथा भक्तानां हृदयं हरिलीलोत्साहेनातिविकसिते सुमनसि प्रोद्भूताल्हादभूतमयभक्तिप्रभान्वितभजनानन्देन्दुशुसन्दोहात्मकशुद्धसत्त्वप्रकाशेन ध्वस्ताविद्याख्यदोषा तमः ध्वस्तसमस्तदोषरूपरजोस्तमो वात एव शिवं कल्याणरूपञ्च भवति तथा पुलिनमपि विकसितेऽति सुमनसि जाताल्हादे ससखिगणभगवत्सुमनसि तत्सुमनोरूपशरच्चन्द्रांशुसन्दोहेन पूर्णचन्द्ररश्मिव्रातेन ध्वस्तं समस्तं दोषारात्रिस्तस्याः समस्ततमो यस्मिंस्तथा भूतं तथा शिवं मङ्गलात्मकञ्च एवंविकसदित्यादिना परितः कुसुमविकासेन तत्सुरभिवायुना षट्पदनादेन शोभा वर्णिता शरच्चन्द्रेत्यादिना उपरिचन्द्रकिरणसमूहेन तथापूर्वेणोद्दीपनं द्वितीयेन क्रीडाप्रतिबन्धतमोनिरासश्च वर्णितः अधुना क्रीडोपयोगिपुलिनाधोभागसौष्ठवमाह । कृष्णाया इति । कृष्णायाः कृष्णनामतद्रूपवत्यास्तस्यापि मनः कर्षकनित्यानन्दरूपाया तत्प्रेम्णैव द्रवभूताया स्तत एव विकसितातिसुमनसस्तद्दर्शनोल्लासप्रफुल्लितानन्त कुमुदवशस्तत्समान सख्युर्विभाजतया तन्मानाय प्रसारितं प्रशस्तं हस्तरूपस्वरूपतरलैस्तरङ्गैः सखीरूपेण हस्तैः प्रवाहरूपेण तरलैर्वाचितः तृणादीनिरासससमतापादनाभ्यां मृद्वास्तरणादिवद्राचिता स्वभावतः कृष्णप्रेम्णाच्च कोमला वालुका यस्मिंस्तत् यद्वा कीदृशं पुलिनं तदाह शिवं स्वहृत्कुञ्जे ससखिगणकृष्णविलासोत्साहेन पुलिनात्मनाविर्भूतभक्तराजशिवरूपं तत्र विकसन्तः कुन्दमन्दाराः कृष्णस्य दृष्ट्याविर्भावेन तद्रोमहर्षः सुरभ्यनिलः उक्तव्युत्पत्त्या सुरभिकृष्णश्रितस्तत्प्राणः षट्पदाश्च ज्ञानं च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनादितिश्रीमद्भागवतोक्तेस्तस्य विद्यानिधित्वात्तदन्तर्गतकृष्णगुणानुवादात्मकवेदघोषचन्द्रश्च स्वस्य तमोऽधिष्ठातृतया कदापि तत्सङ्गेन भगवत्स्वरूपाभानं माभूदिति तदभिभवाय चन्द्रकलात्मना शिरोधृतभगवत्सखांश एव तद्रासोल्लासतया पूर्णतामापन्नः तथा च तदंशुसन्दोहेन ध्वस्ता स्वशरणापन्नानां सर्वे दोषा येन सौ तत एव तमश्च गह्वरवनागता यमुनाच तज्जटान्तर्गता गङ्गा साच भगवच्चरणसम्बन्धेन शिवशिरोवासलाभेन तद्गुध्यानपरतया कृष्णामृदुवालुकाश्च विष्णुपादोदकया नीतविष्णुपादरजस्त्वेन पुलिनशिवाङ्गवधूतभस्मउपर्य्येवरञ्च दिगम्बरपुलिनहरवराम्बरं सुरपथश्च शिवो रोगसितारोगहार इत्याद्यपि यथायथमूह्यं ख्यातव्यं प्रियासघकृष्णलीलाश्रितात्मकम् पुलिनं वैष्णवानां नोनित्यं त्वदृश्यं तु शंकरम् ॥ १२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः ।
निन्येऽनुनयमन्याश्च करस्पर्शेन माधवः ।

इति विष्णुपुराणोक्तहेतुभिर्विधूतशोकास्ताः सम्यक् हस्तधारणप्रियालापादिसमीचीनप्रकारेणादाय सह गृहीत्वा रासक्रीडायोग्यकालिन्द्याः पुलिनं निर्विश्य ताभिर्व्यरोचतेत्युत्तरसंबन्धनीयं कलिं कलहं द्यति खण्डयतीति कलिन्दस्तस्य कन्या कालिन्दी तथाच तत्पुलिने गोपीनां परस्परं मया च कलहो न भविष्यतीतीति तत्र नयनस्याशयः विभुर्व्यापकत्वात्सर्वासामैकमत्यसम्पादकः तत्र नयने समर्थ इति वा पुलिनस्य रासयोग्यतामाविष्करोति विकसत्कुन्दमन्दारैः सुरभियो वायुस्तस्मात्षट्पदा यत्र ॥ ११ ॥

पुनश्च शरत्कालीनकिरणानां समूहैर्ध्वस्तं दोषाया रात्र्यास्तमो यत्र तेन दिवसतुल्यकालवत्त्वादत्यन्तशोभनं पुनश्च कृष्णसदृशवर्णनामधेयायाः भगवत्सख्याः भगवद्रमणार्थं पुलिनभूमिं संस्कृत्य स्थिताया हस्तरूपैस्तरङ्गैराचिता आस्तृता कोमलवालुका यत्र तरङ्गैः पुलिनभूमेः समतासम्पादनात्तेषां हस्तत्वनिरूपणं तथाच जलसुगन्धपुष्पवायुनादैः परितो वेष्टितं सुप्रकाशवत् शीतलं कोमलं समं चेति बोधितम् ॥ १२ ॥

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ।
स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥
तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ।
चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ताः समादाय पुलिनं निर्विश्य तत्र ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः पुलिनं वर्णयति । विकसदिति सार्द्धेन । कुन्दैर्मन्दारैश्च सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिन् तत् ॥ ११ ॥

शरत्कालीनस्य चन्द्रस्यांशुसन्दोहैः किरणसमूहैर्ध्वस्तदोषातमो निरस्तनिशान्धकारम् शिवं सुखदम् तथा कृष्णायाः यमुनाया हस्तैरिव तरलैराचिता आस्तृता कोमला वालुका यस्मिन् तत् तस्य श्रीकृष्णस्य दर्शनेन य आह्लादस्तेन विधूता हृद्रुक् यासां ताः मनोरथान्तं ययुः प्रापुःश्रुतयो यथेति श्रुतयो यथा कर्मादिपरत्वेन प्रतीयमानाः अकृतार्था आसन् समन्वयाध्यायोक्तप्रकारेण परमात्मपरतया वेदाचार्य्येण स्थापिताः प्राप्तार्था भवन्ति तद्वत् एवं लब्धमनोरथानां भगवत्प्रावण्यमाह । स्वैरिति आत्मबन्धवे आत्मप्रियाय स्वैरुत्तरीयैरासनमचीक्लृपन् रचयामासुः ॥ १२ ॥

भाषा टीका ।

सर्वव्यापक भगवान् विन गोपिन को ले जामे कुन्द मन्दार के फूलों की सुगन्धिते भौंरा गुञ्जारकरैं हैं और शरदऋतु कि चन्द्रमा के किरण के समूह ते रात्रके अन्धकार के दूर होवे ते सुन्दर है और यमुना के लहर रूप चंचल हाथों ते जा मे कोमल वालु विछी है या प्रकार के यमुना के पुलिन पै प्रवेश करत भये ॥ ११—१२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ताश्च मनोरथानामन्तं ययुः पूर्णकामा बभूवुः श्रुतयो यथेति अयमर्थः यथा कर्मकाण्डे श्रुतयः परमेश्वरमपश्यन्त्यस्तत्तत्कामानुबन्धैरपूर्णा इव भवन्ति ज्ञानकाण्डेतु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामानुबन्धं जहति तद्वदिति आप्तकामा अपि प्रेम्णा तमभजन्नित्याह । स्वैरिति अचीक्लृपन् रचयामासुः आत्मबन्धवेऽन्तर्यामिणे ॥ १३ ॥

गोपीसभागतस्ताभिः संमानितः सञ्चकास शुशुभे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधद्दर्शयन् ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततोऽतिहृष्टानां प्रेमसेवामाह । तदिति । तस्य क्रीडाविशेषोत्सुकस्य विभोः दर्शनेनाह्लादस्तेन विशेषतो धूता नाशिता हृद्रुजः सर्वाधयो यासां तथाविधेन तेन सह तत्रागमनेन रासक्रीडानिर्द्धारात् विधूतशोकाभिरिति पूर्वं विरहशोकमात्रस्य नाशनम् अधुना त्वशेषहृद्रुजामितिभेदः अतएव मनोरथान्तं ययुः यद्वा उपमागर्भितं श्लेषं मनोरथान्तमिव ययुः रासक्रीडाप्रत्यासत्तेः यथा श्रुतयोऽपि तद्गुणादिवर्णनात्तं प्राप्ता इव भवन्ति नतु साक्षाल्लभन्ते साक्षादप्राप्तेः साचोक्तैव श्रीब्रह्मस्तुतौ अद्यापि यत्पदरजः श्रुतिमृग्यमेवेत्यादिना यद्वा तस्य विभोर्दर्शनाह्लादेन विधूता हृद्रुक् विरहार्त्तिलक्षणा यासां तथाभूताः सत्यः मनोरथस्य तद्दर्शनविषयकस्य अन्तं समाप्तिं ययुः पुनस्तद्दुःकरत्यन्तविवृद्धस्य विरहतापस्यापगमेऽपि तत्संस्कारस्य तु क्रमेणैवापगमात् श्रुतयोऽपीश्वरं दृष्ट्वा तद्भक्तिविशेषमिच्छन्ति अत एवासनमचीक्लृपन् विचित्रचारुप्रकारेण रचयामासुः कैः स्वैः स्वयं परिहितैः उत्तरीयैः कुचकञ्चुकोपरिविन्यस्तैः कञ्चुकस्य सूक्ष्मतरवस्त्रत्वात् विरहरोदनधारापाताच्च कुचकुंकुमेनाङ्कितैर्भूषितैरित्यर्थः । ननु अशेषगुणवतीभिः कथं लज्जा ताभिः परिहृता कथम्वा प्रभवे कुचकुंकुमाक्तैरुत्तरीयैरासनं दत्तं तत्राह । आत्मेति आत्मभ्योऽपि बन्धुः प्रेयान् तस्मै आत्मकोटिप्रेष्ठायेत्यर्थः । अतोऽस्य भूम्युपवेशेन परमस्वदुःखापत्तेः सख्यप्रेमविशेषाच्चेत्यर्थः । आसनकल्पनं पुनस्तिराधानव्याकुलत्वेन तत्रैवावृत्य तिराक्षिप्य स्वाभिप्रेतार्थस्य विपृच्छापरिपाटीविशेषाय वा अत्यन्तौत्कण्ठ्यात् स्वस्वोत्तरीयेण तस्य चातिसूक्ष्मतया सर्वाऽपि विस्तीर्णासनार्थम् एकत्रैव किम्वा स्वस्ववर्गादिभेदेन पृथक्पृथगेव कल्पयामासुरिति ज्ञेयम् ॥ १३ ॥

ईश्वरः परमस्वतन्त्रोऽपि भगवान् सर्वैश्वर्यपूर्णोऽपि सः रसिकशिरोमणिः प्रेमामृतार्णववर्द्धनः श्रीकृष्णचन्द्रः तस्मिन्नासने उपविष्टः सन् चकास यद्वा भगवानिति तेनैव तस्य भगवत्तासारप्रकटनमित्यभिप्रेतम् ईश्वर इति सर्वशक्तिमत्त्वं पृथक्पृथक्कल्पितासनसमूहे तासां स्वस्यच सन्तोषविशेषार्थं तत्तदपेक्षितत्वेनैव एकस्यापि पृथक्तयैवोपवेशात् योगेश्वरैः सिद्धसमाधिभिः श्रीसनकादिभिः श्रीरुद्रादिभिरपि वा अन्तर्हृदि एकाग्रताप्रापिते चित्ते कल्पितं मानसपूजायां तदुपवेशार्थं विचित्ररत्नादिना प्रयत्नेन रचितम् अर्पितम्वा आसनमेव यस्य इति तस्य साक्षात्तत्स्वीकारोऽपि नास्तीति व्यञ्जितं तादृशोऽपि चकाशेत्यत्र हेत्वन्तरं गोपीनां परिषदं सभां प्राप्तः वहुलमण्डलाकारेणोपविष्टानां तासां मध्यवर्ती सन् अनेनापि पूर्ववदैश्वर्य्यमुक्तं किञ्च अर्चितः ताभिः सम्मानितः आसनकल्पनेनैव किम्वा ताम्बूलादिसमर्पणेन नर्मादिना कटाक्षादिनावा अत एव त्रैलोक्येति श्रीभगवद्वपुषः सर्वदा त्रैलोक्यलक्ष्मीपदत्वेऽपि अधुनाऽतः सर्वकालाद्विशिष्टत्वं सूच्यते अनेन चकाशनप्रकारोऽपि दर्शितः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

ततोऽतिहृष्टानां प्रेमसेवामाह। तदिति। तस्य क्रीडाविशेषोत्सुकस्य विभोर्दर्शनेन य आह्लादस्तेन विशेषतो धूता नाशिता हृद्रुजः सर्वाः आधयो यासाम्। तथाविधेन तेन सह तत्रागमनेन रासक्रीडादिमयचिरस्थितिनिर्द्धारिता पूर्वशङ्कापगमात्। न केवलं परमदुःखशान्तिरेव अपि तु परमसुखप्राप्तिरपि जातेत्याह। मनोरथस्य वाञ्छितस्यान्तं परां काष्ठां ययुरिति। तत्र दृष्टान्तः श्रुतयो यथेति। श्रुतयोऽपि तादृशलीलाविशिष्टं तं प्रकाशं निजनिजनानातात्पर्यदौस्थ्यं परित्यजन्ति। परमतात्पर्यपर्यवसानञ्च प्राप्नुवन्तीति। तदुक्तमेकादशे स्वयं श्रीभगवता। यस्यां न मे पावनमङ्गकर्मेत्यादि। द्वादशे। श्रीसूतेन स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभाव इत्यादि च। तत्राप्येषा परमप्रेममयरासलीलेति। श्रुतयोऽप्यत्रैव कृतार्था जाता इत्यस्या लीलाया महिमापि दर्शितः। अतः सहोक्तिनामालङ्कारोऽयं व्यञ्जितः। ततश्च सुस्थिरचित्ताः सत्यः आसनमचीक्लृपन् विचित्रचारुप्रकारेण रचयामासुः। कैः स्वैः स्वयं परिहितैः उत्तरीयैः सर्वाङ्गीणवस्त्रस्यान्तर्गतैः कुचपट्टिकां वेति वक्ष्यमाणानुसारेण हृदयावरणरूपैः विरहरोदनधारापातात् कुचकुङ्कुमेनाङ्कितैराश्लिष्टैरित्यर्थः। ननु कथं लज्जाशैथिल्यमिव ताभिरङ्गीकृतं स्वोपयुक्तैः वस्त्रैरासनं दत्तञ्च तत्राह। आत्मेति। आत्मनो बन्धवे। आत्मीयत्वेन मित्रत्वेन च भावादित्यर्थः। अन्यत्तैः। आसनञ्चेदं सर्वासां सूक्ष्मवस्त्रमयविस्तीर्णमेकमेव वर्गशः पृथक् पृथगेव ज्ञेयम्॥ १३॥

स प्रेमरसाम्बुधिवर्द्धनः श्रीकृष्णचन्द्रः स्वयं भगवान् ऐश्वर्यादि षड्गुणसम्पन्नोऽपि तथा ईश्वरः नित्यमपूर्वापूर्वं तत्प्रकाशनसमर्थोऽपि तत्र तस्मिन्नासने उपविष्टः सन् चकाश तत्र तत्रासम्भवशोभाविर्भाववान् बभूव। अन्यत्र पुनरसौ परमदुर्लभ एवेत्याह। योगेश्वरैः सिद्धसमाधिभिः श्रीरुद्रादिभिरपि अन्तर्हृदि एकाग्रचित्ते कल्पितं भावनामात्रेण स्थापितमासनं यस्य तादृशोऽपि। अलुक् समासः। अर्थान्तैरेव कल्पितमिति वा। तस्मात्तासां सम्बन्धस्यैवैष महिमेति भावः। तत्र च वैशिष्ट्यमाह। गोपीति। यद्वा। तादृशेन गोपीपरिषद्गतत्वेनैव योगेश्वरान्तर्हृदि कल्पितासन इति ज्ञेयम्। किञ्च। अर्चितः आसनताम्बूलनर्मसास्मितापाङ्गादिना सम्मानितः। किं कुर्वंश्चकाश त्रैलोक्ये प्राकृताधोमध्योर्ध्वलोके परमव्योमाख्य महावैकुण्ठपर्यन्ते या लक्ष्मीस्तत्तदनन्तस्वाविर्भावपर्यन्तवस्तूनां नानाशोभादिसम्पत्तिः तस्या एकमनन्यत् पदमाश्रयभूतं वपुः प्रकाशं बिभ्रत् तासामग्रे धारयन् प्रकटयन्नित्यर्थः। तथाच वक्ष्यते। गोप्यस्तपः किमचरन् यदमुष्येत्यादि॥ १४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

मनोरथानां तत्प्रतिपादकानाम्॥ १३॥
त्रैलोक्यलक्ष्म्यैकपदं त्रैलोक्ये सौन्दर्यस्य एकाश्रयम्॥ १४—१५॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तस्य भगवतो दर्शनेन य आल्हादस्तेन विधूता निरस्ता हृद्रुजस्तद्विश्लेषजा मनः पीडा यासां ता गोप्यो मनोरथान्तं मनोरथप्रतिपादनाकाङ्क्षापर्यवसानं प्रापुः यथा श्रुतयस्तद्वत्, यथा भागवद्व्यात्मिकाः श्रुतयः तात्पर्यवृत्त्याभिधया च वृत्त्या प्रतिपिपादयिषितपरमात्मानं प्रतिपादनाकाङ्क्षापर्यवसानं प्राप्नुवन्ति तद्वदित्यर्थः। इत्थं पूर्णमनोरथा अपि प्रेम्णा तमभजन्नित्याह। कुचकुङ्कुमाङ्कितैः स्वैः स्वकीयैरुत्तरीयैरात्मबन्धवे आसनं स्वयं रचयामासुः॥ १३॥

योगीश्वराणामन्तर्हृदयकमलमध्ये कल्पितमासनं यस्य तथाभूतोऽपीश्वरो भगवांस्तत्र गोप्युत्तरीयरचितासने समासीनः गोपीसमुदायमध्यगतः त्रैलोक्यसौन्दर्यैकाश्रयं वपुर्दधद्बिभ्राणः चकाश दर्शयन् शुशुभे॥ १४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मनोरथान्तं प्रार्थितार्थपूर्तिं मनोरथानामर्थानामन्तं निर्णयहेतुं परमात्मानं रथ गताविति धातुः श्रुतिविषये तस्य ब्रह्मणो दर्शनेन विषयीकरणलक्षणेन जाताह्लादेन पूर्णार्थलक्षणेनावधूता हृद्रुजो विषयीकरणलक्षणा यासां तास्तथा उत्तरीयैः प्रावरणीयवस्त्रैः आसनं विस्रलोत्कर्षणीक्षानेत्यादि कल्पमिव पीठम् अन्यत्रात्मनो वायोर्बन्धवे "सतो बन्धु मसति निरविन्दन्नि"तिश्रुतिः॥ १३॥

गोपीपरिषद्गतः गोप स्त्रीसमूहमध्यवर्ती त्रैलोक्यलक्ष्मीणां त्रैलोक्यसौन्दर्याणामेकं पदं स्थानं त्रिलोकीजनसेव्या लक्ष्मीः श्रीस्तस्या एकं केवलं पदं भोगभोग्याश्रमं वा॥ १४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तद्दर्शनेति। तस्य क्रीडाविशेषौत्सुक्यस्य विभोर्दर्शनेनेत्यादिको विग्रहः तथाविधेन तेन सह तत्रागमनेन रासक्रीडादिमयचिरस्थितिनिर्द्धारिता पूर्वशङ्कापगमात् परमसुखप्राप्तिरपि जातेत्यर्थः। मनोरथान्तमिति। तत्र दृष्टान्तः श्रुतयो यथेति। तल्लीलानुभवेनोभयत्रापि परमकृतार्थत्वादिति सहोपमेयम् यथाशब्देन व्यज्यते॥ १३—१५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः।

तत्र गत्वोपविविक्षुं श्रीकृष्णमालक्ष्य सर्वा आसनं कल्पयामासुरित्याह। तद्दर्शनेत्यादि। ता इत्यध्याहार्य्यम् आत्मबन्धवे श्रीकृष्णाय आसनमचीक्लृपन् कैः स्वैरुत्तरीयैः प्रत्येकमेव उत्तरीयमाकृष्य उपर्युपरि कृत्वा बहूच्चमासनञ्चक्रुरिति बहुवचनमहिमा कीदृशैः कुचकुङ्कुमाङ्कितैः तेनासनस्य पूजापि कथिता अत्युच्चासनतया सर्वनिरीक्षणं सुकरमित्यर्थः। कीदृश्यः तस्य दर्शनाह्लादेन विधूतहृद्रुजः विधूतहृद्रुक्त्वे दृष्टान्तः मनोरथान्तं यथा श्रुतयो ययुः श्रुतयो भगवत्परा उपनिषदः यथा चिरकालकृतचरणारविन्दप्राप्तिरूपस्य मनोरथस्य अन्तमपरिणामञ्जोप्यन्तररूपेण प्रापुः ततश्च विधूतहृद्रुजोऽपि

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

यथा बभूवुस्तथेत्यर्थः । स्वैरुत्तरीयै रासनकल्पने सर्वा एव निरुत्तरीया बभूवुरिति न मन्तव्यं तदैव योगमायया प्रागूवदुत्तरीयसम्पादनं कृतमिति ॥ १३ ॥

अथ तदासनस्थो भगवान् पुनरत्यन्तं व्यरोचतेत्याह । तत्रेत्यादि तत्रासने उपविष्टो भगवान् चकाश कीदृशः गोपीपरिषद्गत इति हेतुमद्विशेषणम् अर्चितस्ताभिरेव सत्कृतः योगेश्वरैरन्तर्हृदि कल्पितमासनं यस्य तस्य कल्पितत्वात्तत्र तथा न शोभेत इत्यर्थः । किमिव तत्राह त्रैलोक्यलक्ष्म्यास्त्रैलोक्यश्रिय एकं मुख्यं पदं चिन्हं यद्वपुर्लक्ष्यरूपं वपुरिति यावत तथा विधं त्रैलोक्यलक्ष्म्येकपदं त्रैलोक्यशोभारूपमेकं वस्तुरूपकं "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततो गोपिकानां कृत्यमाह । तद्दर्शनाह्लादेति । शोके गतेऽपि कामस्तापात्मको वर्तत एव संबन्धस्याजातत्वात् यदा पुनस्तादृशस्थाने तदर्थं गतः तदा तद्दर्शनेन तस्य तदवस्थामापन्नस्य दर्शनेन योऽयमाह्लादः भाव्यर्थनिश्चयात् तेन विधूताः हृद्रुजो यासा मेवं निवृत्तदोषे तासां यज्जातं तदाह । मनोरथान्तं ययुरिति । ताभिर्यथाकथञ्चित्संबन्धोऽभिलषितः जातस्तु ततोऽतन्तगुणसामग्रीसहितः अतो मनोरथस्याप्यन्तो यत्र तादृशं ययुः नन्वनभिलषितं कथं प्राप्नुयुः तत्राह । श्रुतयो यथेति । श्रुतयो हि निरन्तरं भगवद्गुणवर्णनपरा तेन धर्मेण वाचः पूर्वं रूपं यन्मनः तस्यापि यदगम्यं भगवत्स्वरूपं तत्प्रतत्वतः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति भगवदानन्दः मनोरथान्तो भवति तत्प्रतिपादकाः श्रुतयो जाताः सर्वे च मन्यन्ते "तन्त्वौपनिषदं पुरुषं पृच्छामि अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति सर्वे वेदा यत्पदमामनन्ति" इत्यादिवाक्यैः ब्रह्मणि श्रुतयः प्रमाणमित्यध्यवसीयते सर्ववेदान्तप्रत्ययमितिन्यायाच्च अलौकिको वेदार्थः अलौकिका वेदशब्दाः लोके च न सङ्केतः तथापि निरन्तरं भगवत्कार्यं कथयन्तीति लोकाः तच्छ्रवणेन शुद्धान्तः करणाः स्वयमेवालौकिकविषये सामर्थ्यं मन्यन्ते श्रुतिश्च तत्प्रतिपादिका भगवदिच्छया नात्र लौकिकं साधनमपेक्षते युक्तिं वा तथा एतासामपि मनोरथान्तप्राप्तिः एवम्परमपुरुषार्थदातुर्भगवतोऽन्यत्राभिनिवेश आधारधर्मसंबन्धात् स्वस्य कृतार्थता न भविष्यतीति पूजार्थमात्मनिवेदनार्थं च आसनं चक्रुरित्याह । स्वैरुत्तरीयैरिति तद्देशस्थानां स्त्रीवस्त्राणि त्रीणि भवन्ति परिधानीयं कुचपट्टिका उपरिवस्त्रञ्च सर्वाभिरेव स्वोपरिवस्त्राणि आसनार्थं दत्तानि उपरिवस्त्राण्यपि द्विविधानि भवन्ति सर्वदापरिधेयानि भोगसमये च तानि सूक्ष्माणि भवन्ति तान्येव भगवते दत्तानीति ज्ञापयितुमाह । कुचकुंकुमाङ्कितैरिति । शुष्काण्यपि कुंकुमानि क्रीडायामार्द्राणि भवन्ति अतः तेनाङ्कितानि उत्तरीयाणि अचीक्लृपन् व्यकल्पयामासुः ननु स्वोपरिधेयं कथमधः कल्पयांचक्रुरित्याशङ्क्याह । आत्मबन्धव इति । आत्मनः स एव बन्धुः रक्षिता तदर्थमेव देहः स्वात्मा च अत उपर्याच्छादनमपि तदर्थमिति तस्यासनकल्पितरुचिता ॥ १३ ॥

ततो भगवान् तासु सर्वत्र निविष्ट इति ज्ञापयितुं तद्दत्तासन उपविष्ट इत्याह । तत्रोपविष्ट इति । भगवानिति तेषां कार्यसाधकत्वं ननूत्तरवस्त्रापगमे सभायां रसाभासो भवेत् अतः कथमुपविष्ट इति चेत्तत्राह । स ईश्वर इति । स पूर्वं प्रार्थित ईश्वरः सर्वकरणसमर्थः अतः तासां दिव्यानि वस्त्राणि संपन्नानीति बोधितं येषां जलक्रीडायां न वासस्तामार्द्रता अतः सर्वकरणसमर्थः तत्रोपविष्टः सः पूर्वं प्रार्थितः । ननु भगवान् अपवित्रे भोगादिलेपयुक्ते कथमुपविष्ट इतिचेत्तत्राह । योगेश्वरान्तर्हृदिकल्पितासन इति । योगेश्वराणां हृदयं शुद्धं तत्राप्यन्तर्हृदयं तत्रापि कल्पितमेव भगवदासनं नतु कृतं मानसी मूर्तिस्तिष्ठति नतु कदाचिदपि स्वयमुपविष्टः मुख्यमासनमेतदेव अतश्चकाश परमशोभां प्राप्तवान् पूर्वत्र गोपीनां परिषदं गतश्च जातः परितो गोपिका उपविष्टा इत्यर्थः सभापतिर्भगवान् अतः ताभिरर्चितः ततो भगवान् तासामर्थं त्रैलोक्ये यावन्ति लक्ष्मीरूपाणि इन्द्रपदादीनि तासां यदेकं पदं यस्यांशविलासाः तत्तल्लक्ष्मीभोक्तारः तादृशं वपुर्धृतवान् अस्मिन्नर्थे देशकालादिभेदेन यावन्त उत्कृष्टा अर्था अपेक्ष्यन्ते तान् प्रकटितवान् तादृशवपुर्धारणेन ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्र तासां सख्यसमुचितां प्रेमसेवामाह । तस्य कृष्णस्य दर्शनानन्देन खण्डितसर्वमनोदुःखा व्रजसुन्दर्यः स्वीयैरुत्तरीयैः कुचकञ्चुकोपरिस्थैरतिसूक्ष्मवस्त्रैरात्मबन्धवे तस्मै आसनं तथा अचीक्लृपन्नुपजह्रुर्यथा श्रुतयो महोपनिषदोऽपि मनोरथानामन्तं परमकाष्ठां ययुः । यतोऽधिकोऽन्यो मनोरथो न सम्भवति तं प्रापुः यद्दृष्ट्वा वयमपि व्रजे गोप्यो भूत्वा श्रीकृष्णेन सहैवं स्वकुचकुङ्कुमास्तिमितवस्त्रार्पणादिना कदा विलसाम इत्युत्कण्ठिता बभूवुरित्यर्थः । अत एव श्रुतयो गोपीत्वप्राप्त्यर्थं तदनुगतिव्यञ्जकं तीव्रं तपश्चक्रुरिति बृहद्वामनीया कथा । "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधा" इति तासामुक्तिश्च । तत्र पूर्वकालगतकृष्णावतारदर्शिन्यः श्रुतयो लब्धचरमनोरथा एतस्मिन् कल्पे गोप्यो बभूवुरेव । एतस्मिन् काले तु लब्धमनोरथा एताः श्रुतयोऽग्रिमकल्पे गोप्यो भविष्यन्ति श्रुतीनामानन्त्यादिति ज्ञेयम ॥ १३ ॥

तत्र प्रति स्वयूथमेव पृथक् पृथक् उपर्युपरि निहितबहुवस्त्रासनेषु ताभिः क्लृप्तेषूपविष्टः । ननु तावत्संख्येष्वासनेषु कथमेक उपविष्टस्तत्राह । ईश्वरः तत्तदलक्षिततयात्मप्रकाशवान् तत्र हेतुः । भगवान् कामवान् भग श्रीकाममाहात्म्येत्यमरः । तस्य तावत्सु सर्वेष्वेव आसनेषु उपवेष्टुं कामनामालक्ष्य ऐश्वर्यैव शक्त्या योगमायाद्वारा तावन्तः प्रकाशास्तथा प्रकाशिता इत्यर्थः । किञ्च । स हि योगेश्वरैः शेषशङ्कराद्यैरन्तर्हृदि हृदयाभ्यन्तरे एव कल्पितं मनसैवानीतत्वात् त्रिजगद्दुर्लभमनुपहतमनर्घ्यमासनं यस्य सः । एताभिस्तु हृदयाद्बहिरेव स्वगात्रनिर्माल्यवस्त्रैः स्वोपभुक्तसुगन्धैरासनं कल्पितं यत्तत्रैवोपविष्टश्चकाश दिदीपे यः खलु स्वयं भगवान् ब्रह्मरुद्रादिपार्षदः क्षीरोदादितीरे स्तुत्यादिभिर्गम्य एव मनसि प्रादुर्भवन् परोक्ष एव क्षणमात्रमेव भवेत् स एव गोपीपरिषदं स्वयं गतः अच्यु-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तश्चिरकालमपि व्याप्य च्युतिरहितः । अर्चित इति पाठे ताम्बूलनर्मस्मितापाङ्गादिना सम्मानितः किं कर्त्तुं गतः त्रैलोक्ये प्राकृत प्राकृताधो मध्योर्ध्वलोके या लक्ष्मीस्तत्तदनन्तब्रह्मांश-पर्यन्तवस्तूनां नानाशोभादिसम्पत्तिस्तस्या एकमनन्यत् पदमाश्रयभूतं यद्वपुस्तदपि दधत् तासां गोपीनामङ्गकान्तिस्मितकटाक्षादिमाधुर्यैः पुष्णन् । यद्वा । तत्रोपविष्ट एव तत्र तादृशोपवेशादिविशिष्ट एव योगेश्वरान्तर्हृदिकल्पितासनः । तत्क्षणमारभ्य महारुद्रादिभिर्योगेश्वरैर्गोपीपरिषन्मध्यगतः तादृशोपवेशतादृशशोभातत्तन्नर्मसंलापादि विशिष्ट एव कृष्णो ध्यानेन स्वहृदयमानिन्ये इत्यर्थः ॥ १४ ॥

केनचित्कृता विशुद्धरसदीपिका ।

तत्र तासां प्रेमसेवामाह । तदिति । तस्य पुलिनस्यैव दर्शनेन य आल्हादस्तेन विशेषतो धूता नाशिता हृद्रुजः कामपीडा यासां ताः मनोरथान्तं तदितरालिप्सां तं ययुः कथमित्याकाङ्क्षायामाह । श्रुतय इति । ताश्चापि तादृशलीलाविशिष्टं तं रासविहारिणं प्राकाश्य निजनिजनानातात्पर्यदौस्थ्यं त्यजन्ति शब्दत तपर्य्यावसानञ्च गच्छन्ति तद्वदित्यर्थः । त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना इति तत्स्तुतेरेव जडत्वमासामपौरुषेयत्वादेव परास्तं यद्वा आसु याः श्रुतयः श्रुतिरूपाः साधकचर्य्यस्तासु यथायथावन्मनोरथान्तं ययुः मुनिरूपास्तु कुरुक्षेत्रयात्रायां यास्यन्तीत्यपि दर्शितं "सिद्धितु काचिद्देवासां रसारम्भे प्रपेदिरे" इत्युज्ज्वलोके विधूतहृद्रुक्त्वे लिङ्गमाह । स्वैरिति । बहुत्वेन स्वैःस्वैरित्यर्थः, उत्तरीयैः कुचपट्टिकासूक्ष्मवस्त्रैः कुचकुङ्कुमाङ्कितैः विरहरोदनगलद्रश्रुभिरार्द्रतया कुचकुङ्कुमविन्दुभिरङ्कितैरिति स्ववेदनावेदनायेति भावः । अथवा उत्तरीयैरित्यनेनैव तत्प्राप्तव्यक्तेः स्वैरिति धनैरित्यर्थः । तेन सर्वस्वनिवेदनं व्यञ्जितम् अचीकॢपन्नतिशयेन कल्पयामासुः नतु कथं लज्जाशैथिल्यमङ्गीकृतं तत्राह । आत्मबन्धवे निजसखित्वेनाभिमताय अन्यथा बन्धुपदेन रसाभासापत्तेरित्यर्थः ॥ १३ ॥

तदेवम्प्रमाणाय तस्य शोभाविशेषमावेदयति । स प्रेमांबुधिवर्द्धनः श्रीकृष्णचन्द्रः भगवान् श्रीराधया नित्ययुक्तः साक्षात्कारस्वभिकारापेक्षः एकं सख्यापि नो लक्षितमित्यादेः ननु सापत्न्यं कथं न स्फुरितं तत्राह । ईश्वरः योगमायेशः तदेव नित्यकालं परिचरन्त्यास्तस्याः प्रभावेण तदयोग्याभिरलक्षितलील इत्यर्थः तथैव गोपीपरिषद्गतः ताभिरर्चितश्च आसनमित्युपचारान्तरोपलक्षणं तेनैव रूपेण योगीति योगिनोऽत्र भगवद्भक्तिसिद्धाः तादृशमुख्यरूपभगवदुपासकाः—

> योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
> श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति ॥

श्रीगीतासु तेषामेव तथा निर्धारितत्वात् चकाश परमशोभामाविष्कृतवान् किं कुर्वन् त्रैलोक्येति त्रयो लोका द्वारकामथुरागोकुलधामानीति त्रैलोक्यं तत्रत्या लक्ष्म्याः श्रीभूलीलाख्यास्तासामेकपदम् अनन्याश्रयं वपूरूपं दधत् प्रकटयन्नित्यर्थः ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तदा तासां गोपीनां तद्दर्शनाल्हादं तत्कृतां सेवां चाह । तद्दर्शनेति । तस्यामितपूर्णचन्द्रप्रभंसुखकन्दनन्दनन्दनस्य दर्शनेनामन्दाल्हादेन सुरभिषक्शतमोहनसुरभकृष्णमुखाम्बुजसुरभिमधुमयेन विशेषेण धूता हृद्रुजो विषमशरविषमशरजा विषमज्वरा यासां ता गोप्यः मनोरथानां स्वीयसर्वाभिलाषाणां दर्शनालिङ्गनादिसंभोगान्तानामन्तः पर्य्याप्तिर्यस्मिंस्तं सर्वाभिलषितभावालम्बनरूपं यद्वा मनोरथानामन्यविषयकस्वीयसर्वकामानामन्तोऽवधिर्यस्मात् यद्दर्शनावधिरेव कामोद्भवस्तद्दर्शनोत्तरन्तु नान्यत्र कामः तदुक्तं पुरस्तात् यर्ह्यम्बुजाक्ष तव पादतलमित्यत्र यद्वा सर्वेषां सर्वमनोरथानां तत्प्रतिबिम्बात्मकतत्सुखलेशगोचरत्वात् "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुतेस्तथाचांशभूतसुखेषु तत्तद्विषयलाभोत्पन्नवृत्त्याभिव्यक्तेष्वेकलाभेऽन्यत्रेच्छासम्भवेऽपि तद्विम्बपरमानन्दघनकृष्णप्राप्तावन्यत्र मनोरथासम्भवात् सर्वमनोरथानामन्तः परिसमाप्तिर्यस्मिंस्तं यद्वा मनोरूपरथानामतिधावनशीलानां कुत्राप्यनिवृत्तकामानामन्तो वेगक्षयो यस्मिंस्तं "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादिश्रुतेः नैतन्मनो विशति वागुत चक्षुरात्मेत्यादिस्मृतेश्च यद्वा "बुद्धिं स सारथिंकृत्वा मनः प्रग्रहवान् पुमान् । प्रयाति परमम्पारं विष्णवाख्यं पदमव्यय" मिति श्रुतेर्मनः प्रग्रहोपलक्षितरथस्यान्तं प्राप्यभूमिं भूमानन्दं कृष्णमेव साक्षाद्ययुः तद्दर्शनेनैव मनोरथानामन्तं पूर्णतां ययुःप्रापुरिति वा तत्र दृष्टान्तः श्रुतयो यथेति यथा श्रुतयः पूर्वकाण्डे कामतदप्राप्तिशोकचिन्ता सन्तप्ता विविधवर्णाश्रमवर्णितकर्मसु भ्रमन्ति तथा ता अपि साक्षाच्छ्रुतिरूपा कामशोकचिन्ताग्निसन्तप्ता नानावर्णपुष्पपर्णाद्याकीर्णवनाश्रमेषु तत्तद्वर्णितकर्मसु भ्रमित्वा पुनः श्रुतयो यथोत्तरकाण्डे तद्ध्यानगुणगानादिना तद्बोधं सम्पाद्य तद्दर्शनेनाभेदसाक्षात्कारेण य आल्हादो भूमानन्दस्तेन विधूता हृद्रुजो याभिस्तथाभूताः भवन्ति "रसो वै सः रसंह्येवायं लब्ध्वानन्दीभवति आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन तरति शोकमात्मविदित्यादि" श्रुतिभ्यस्तथा तद्ध्यानगुणगानदैन्यैस्तदाविर्भावमवाप्य तद्दर्शनाल्हादविधूतहृद्रुजः यथा श्रुतयो मनोरथान्तं श्रुतयस्त्वयिहि फलन्त्यतन्निरसनेन भवन्निधना इत्यादिस्वप्रवृत्तिपर्य्यवसानं ययुः यद्वा श्रुतयो वाग्रूपा अपि मनोरथान्तं मनोवागगोचरमपि गुणगानेनैव हृदयशुद्धिद्वारा अगदध्यारोपापवादेनातन्निरसनेन ययुस्तथा गुणगानातन्निरसनाभ्यां ता अपि मनोरथान्तं ययुः एवन्तत्प्राप्तावपि मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते इति भगवत्पूज्यपादवाक्येन योवेद निहितं गुहायां परमेव्योमन्सोऽश्नुतेसर्वान्कामान्सहब्रह्मणा विपश्चितेतिश्रुत्याच न सेवारमणयोरभाव इति द्योतयंस्तत्सेवारम्भमाह । स्वैरुत्तरीयैरिति स्वीयैः स्वाङ्गपरिधानभूतैर्नेत्वासनाय पृथगानीतैः उत्तरीयैः साटीकञ्चुकोपरिपरिधानवस्त्रैः आन्तरस्वानुरागद्रवीभूतान्तःकरणात्मकाम्बरैः पूर्वं विरहरोदनेनानन्दाश्रुप्रवाहणे वा निर्धूततया सलग्नकुचकुंकुमाङ्कितैः प्रथमविहारे आलिङ्गनादिसङ्घर्षेण कुचकुंकुमाङ्कितैर्वा तस्मै आत्मबन्धवे नतु कुटुम्बिजनवच्छरीरमात्रसम्बन्धिने यद्वा स्वरूपेणात्मस्वरूपाय उपाधिनापि "सयुजा सखाया" इतिश्रुत्या जीवाभिन्नात्ससखिरूपाय यद्वात्मस्वरूपत्वेऽपि लीलायां बन्धुरूपाय आत्मत्वेन प्रियाय बन्धुत्वेन सेव्याय चेति वा आसनं पीताम्बिकादीनामित्युक्ष्मचीकॢपन् रचयामासुः तत्रायमभिप्रायः यद्भवतापूर्वमुपविष्टं

श्रीरामनारायणकृतभावभावविभाविका ।

तत्तु नापृष्टः कस्यचिद्ब्रूयादिति वचनादप्रश्ने उपदेशानौचित्यात्तथा तद्विद्धि प्रणिपातेन परिप्रश्नेनसेवयेति वचनादासनप्रदानादिसेवाभावेऽपि तदनौचित्याच्चास्माभिरस्वीकृतम् अधुनात्वस्माभिर्व्यासासनादिदानपूर्वकं प्रश्नः क्रियते तत्पृष्टं तत्त्वतस्त्वया उपदेष्टव्यमिति तथाश्रुतिस्वारस्यादप्यस्य ज्ञानं नीरवन्नीरसंक्षीरवत्तु स्नेहस्वेति परीक्षितुमेवासनप्रदानमिति ॥ १३ ॥

तत्र भक्तानामासनरचनं न व्यर्थमपि तु भगवांस्तत्रोपविष्टः शुशुभे इत्याह । तत्रोपविष्ट इति । स भगवानीश्वरोयोगेश्वरान्तर्हृदि कल्पितासनस्तत्रोपविष्टोगोपीपरिसद्गतस्ताभिरर्चितस्त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधच्चकाशेत्यन्वयः तत्रस इत्यनेन यस्मै आत्मवन्धवे ताः स्वैरुत्तरीयैरासनमचीक्लृपन् स एव भगवांस्तत्रोपविष्टः तत्रभगवत्त्वेनैव धर्मविरागज्ञानाश्रयतया योगेश्वरान्तर्हृदि कल्पितासनत्वं श्रिया शृङ्गाररसोपयोगिरूपमाधुर्य्यलालित्यचापल्यविविधभावदाक्षिण्यादिरूपया यशसा च भक्तप्रीयत्वजगदुद्धारकत्वादिरूपेण तत्रोपवेश ऐश्वर्यस्य तूभयोपयोगतया भक्त्यन्तर्गततयोक्तावपि पुनः स्पष्टं पृथक्निर्देशः तत्रयोगेश्वराणामन्तर्हृदि तु कल्पितत्वेन मनोमयमासनं यस्य स तत्र तु साक्षादुपविष्टश्चकाशेति विशेषः अन्तर्हृदि कल्पितासनइत्यलुक्समासः यद्वा योगेश्वरोगोवर्द्धननाथस्तासां रक्षणेनित्योद्यतस्तासां बहिरन्तर्योगाय संयोगायेश्वरः यद्वा ताभिः स्वस्वान्तर्हृदि काल्पितं दत्तमासनं यस्मै सद्दत्तत्रचोपविष्टश्चकाश यद्वायतः स्वयमपि योगेश्वरोऽतएवस्वान्तर्हृदि तासां कल्पितमासनयेन तथाभूतः सन् ताभ्यः स्वहृदम्बरे दत्तासनस्तद्दत्ताम्बरासने उपविष्टश्चकाश सख्यभावे परस्परासनदानस्यौचित्यात् यद्वा ताभीरचितासनानुपवेशे पूर्वमेव प्राप्तविरहखेदविकळा अधुना स्वयाच्ञाभङ्गेवै क्लव्येन कां दशां गताः स्युरिति तास्त्रातीति तत्रः सन्नुपविष्टः यद्वा तत्रत्वादेवैकासनगतोऽपि सर्वासामुप समीपे यथा भवति तथोपविष्टश्चकाश यद्वा स योगेश्वरत्वादेव अन्तर्हृदि स्ववक्षसि ताभ्यो दत्तासनःकृतालिङ्गनःताभिर्वा स्ववक्षःसु दत्तासनः आलिङ्गितस्ततस्तद्दत्तवाहिरासनोपविष्टश्चकाश यतो बहूनां चन्द्रतारादीनामेकाम्बरस्थत्वं दृष्टं नैकस्य चन्द्रस्य वह्वम्बरस्थितिरतश्चित्रमेतदेकस्य वह्वम्बरस्थितिर्वह्वम्बरोपरिस्थितौचोप सामीप्येन वर्त्तनं तत्र कानिचिदम्बराण्यरुणानि काञ्चनाञ्चलसूर्य्योदयरागान्वितानि कानि चिदम्बराणि निशि सुघनश्यामघनावृतानीव नीलानि काञ्चनाञ्चला दिविद्युतद्द्युतिव्याप्तानि कानि चित्स्व च्छानिशीव रजतविन्दुतारागणव्याप्ता चलचन्द्रप्रकाशानि कानि चिदम्बराणितु दिनपरिक्षये पीतरविकिरणव्याप्तानीव पीतानि स्वाञ्चलरविद्योतितानि कानिचित्तु स्वाञ्चलचन्द्रप्रभाव्याप्तशारदसितघनान्वितत्वेनेव सितानि कानिचिदम्बराणित्तु चन्द्रप्रभागणिततारागणप्रकाश विकासेनेव सितानिद्युमन्तिच कानिचिदम्बराणितु हरिहरिसखि वहुमुखचन्द्रसमागमोत्साहेनानन्तब्रह्माण्डगतबुधव्याप्तानीव हरिं तद्युत्यन्वितानि एवं वह्वम्बरतल्पगतोऽपि त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधच्चकाश यद्वा योगेश्वरान्तर्हृदि कल्पितासन इतिदृष्टान्तोक्तिः यथा विषयसुखक्लेशकृतपः क्लेशत्यागपूर्वकं कलेशगुणगणभजातानुरागतयातिसूक्ष्मोरूरोरागान्विते हृदयशोकाम्बरे परमहंसानां सुमानसं सुमानसं मत्वा तत्र कल्पितासनो भवति तथातासां मुरोरागान्वितेष्वतिसूक्ष्मकोशाम्बरेषू पविष्टश्चकाशेत यान्यम्बराणि स्वयंचौर्य्येण हृतानि तानि ताभिः स्वयमर्पितानि उरोरागयुतानि कथं तत्र नोपविशेत् अर्चित इत्यनेनासनसमर्पणानन्तरं ताभिरर्चितस्तदप्यर्चनं न लौकिकं किन्तु नेत्रयुगळार्घपात्रयोः पूरितप्रेमसुखांशुभिस्तत्पदसमर्पितैः पाद्यमर्घ्यंच दत्त्वा ताभिः समर्पितं स्वीयरूपमधुरसं प्रभुणा स्वयंदृक्पात्राभ्यामाचमनं कृते ततोऽधरमधुमधुसितसुस्मितदधिसुस्नेहघृतान्वितं स्वातिगौरमुख रजतपात्रगतं दर्शयित्वा मधुमर्कं समर्प्य प्रमोदाब्धौ तं प्रियं स्नापयित्वा सुरागस्वाङ्गार्पणेन तदङ्गेषु रागळापनेन नचाङ्गरागं दत्त्वा पादसंवाहने पदयोः करकमलेऽर्पयित्वा कामाग्नौ मदमानदाहेन धूपं निरूप्य कुळस्नेहतल्लज्जारसनवर्त्तिकादाहकहृदय कापट्यादितमोनाशकभगवत्स्वरूपसुखप्रकारकप्रेमप्रकाशाख्यदीप संदश्यमधुधरद्राक्षाफलनैवेद्यं चुम्बनेनैव स्वमुखसुवासं मुखवासं च दत्त्वा भ्रूयुगवर्त्तनेन नृत्यं दर्शयित्वा गुणगानेन सन्तोषितः गोपीपरिषद्गत इति प्रेमवृत्तिगणगताभिव्यक्तनिजपरमानन्दपरब्रह्मैवातिरत्युत्कर्षेण बहुरतिरूपासु तासु स्वाङ्गेऽङ्गीकृतवह्वनङ्गप्रभया नङ्गीकृतवह्वनङ्गस्त्रैलोक्यळक्ष्म्यैकपदं वपुर्दधच्चकाश इतित्रैळोक्य ळक्ष्म्याः शोभाया एकं पदमाश्रयं यद्वा त्रैलोक्यस्याधिष्ठानतया लक्ष्म्याश्च स्ववक्षसि तन्निवासतया एकं पदं यद्वा पादोऽस्यविश्वा भूतानि एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतिभ्यां त्रैलोक्यं तल्लक्ष्मीस्तज्जीवनहेतुसुखदश्रीश्चैकं पदमंशो यस्य यद्वा त्रैलोक्यलक्ष्म्या एकं मुख्यं पातीति पं पातिरूपं ददातीति दं दातृ च तत्तथा लक्ष्म्यैकपदमिति पाठेतु आङ्पूर्वकम् एकपदमिति सर्वत्र व्याख्येयं यद्वा त्रैलोक्यलक्ष्म्यै शोभार्थं कपदं वपुर्दधच्चकाश तत्र कपदमिमिति चतुर्मुखोऽपि पदमंशो यस्येति यद्वा कानि ब्रह्माण्डानि तदारोपिततया पद्यन्ते यस्मिंस्तत् यद्वा कानां बहुमदनानां पदं बहुकामसदृशरूपं यद्वा सर्व कानां सुखानां पदं समाश्रयं तद्विम्वात् यद्वा कः स्वर्गोऽपि पदमंशो यस्य यद्वा कं जळ क्षीरनिधिः सर्गजळनिधिर्वा पदं यस्य यद्वा कानि सर्वसुखानि पद्यन्ते प्राप्यन्ते अनेनैतदाराधनेनेति तत् यद्वा कं सुखरूपञ्च तदेव पदं सर्वाधिष्ठानं तथा पद्यन्ते ऽस्मिन्निति पदं सर्वप्रपत्तिगोचरं च तथा पद्यते फळरूपतया प्राप्यते इति पदं चेति तथाभूतं तासां कपदं सर्वसुखास्पदं वपुर्दधच्चकाश ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ गोपीनां कृत्यमाह । तस्य क्रीडोत्सुकस्य विभोर्दर्शनेन योऽल्हादस्तेन नाशिताः तद्विरहरूपहृदयरोगाः यासां ता मनोरथस्यान्तं पूर्णकामतां ययुः यथा श्रुतयः परमात्मनि समन्वयं प्राप्य कृतकृत्याः भवन्ति तद्वत् ततः सुस्थिराचित्ताः सत्यः कुचकुङ्कुमेन स्वेन्दार्द्रेनाङ्कितैः स्वीयैरुत्तरीयैरासनं कृतवत्यः यत आत्मवन्धवे अनभिज्ञापक्षे अन्तर्यामिणे तदुत्तरपक्षयोः स्वप्रेष्ठाय तथाच तादृशोत्तरीयैस्तदासननिर्माणं सूचितमेवेति भावः एतेनाहोपूर्वमुपदेशं कर्तुं प्रवृत्तोऽस्माभिर्निवारित आसीत् कदाचित्तद्दुःखादेव तिरोहितः स्यादतोऽधुना प्रथमं व्यासासनोपर्य्युपवेश्यैतन्मुखारविन्दादुपदेशोग्राह्य इत्याशयेनैवक्तुं प्रवृत्ता इतिध्वनितं निवृत्तिपक्षे ताः श्रुतीः स्वप्रतिपादकत्वे समादाय कालिन्द्याः मायायास्तीरं शुद्धान्तःकरणे निर्विश्य विभुर्य्यराचत विकाशं प्राप्य कुन्दमन्दरादिस्थानीयैः यमनियमादिभिः सुरभियोऽ-

सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमभ्रुवा ।
संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

गोप्य ऊचुः ॥

भजतोऽनुभजन्त्येक एक एतद्विपर्ययम् ।
नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ! ॥ १६ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

ऽनिलः निरुद्धः प्राणवायुस्तेन निरुद्धषट्पदं षड्वर्गो यत्र पुनश्च शरत्कालस्थानीयेन निष्कामभगवदाराधनलक्षणेन कर्मणोदितो यो विवेकाख्यश्चन्द्रस्तस्य विचारलक्षणानामंशूनां सन्दोहेन समूहेन ध्वस्तरागद्वेषादिदोषलक्षणमासमन्तात्तमो यस्मिन् अत एव शिवं कल्याणरूपं पुनश्च कृष्णाया अविद्यायाः हस्तलक्षणैस्तरङ्गैरात्मानमात्मज्ञानभेदैराऽऽचिता असंस्पृष्टा कोमला वालुकास्थानीयाः वृत्तयोयस्मिन् तस्यप्रत्यगभिन्नस्य परमात्मनो दर्शनेन योऽह्लादस्तेन विधूतास्तद्वादिकल्पिताः विपरीताभिप्रायरूपाः हृदयरोगा यासां ताः श्रुतयः मनोरथस्याखण्डैकरसपरमात्मप्रतिपादनाभिलाषस्यान्तं समाप्तिं ययुः कुचकुंकुमेन कर्मोपासनाद्यनुष्ठानसहितपरमात्मानुरागेणाङ्कितैः स्वीयैरुत्तरीयैः स्वजन्यप्रत्ययैः आत्माबन्धवे औपनिषदाय परब्रह्मणे आसनमभिव्यक्तिस्थानं कृतवत्यः ॥ १३ ॥

स भगवानपि ईश्वरः स्वतन्त्रोऽपि तत्र ताभिरुत्तरीयैर्निर्मित आसने उपविष्टः किंच योगीश्वरैर्ब्रह्मादिभिरन्तर्हृदि एकाग्रे मनसि कल्पितमासनं यस्य तथाभूतोऽपि यद्यप्येवं तथापि गोपीपरिवृतः तत्सभापतिः ताभिस्ताम्बूलनर्मस्मितादिनार्चितः सन् अधिकं शुशुभे यतस्त्रैलोक्यस्य चतुर्दशभुवनस्य या सौन्दर्यलक्ष्मीः तस्याएव मुख्यं पदमाश्रयं वपुर्नरविग्रहं दधत् प्रकटयन् सन् यद्वा गोपीपरिषद्गतत्वादिरूपेण योगीश्वरान्तर्हृदि कल्पितासनः अत्रोत्तरीयैरासनस्य निर्माणेऽपि तदन्तस्तादृशवस्त्रान्तरस्य सत्त्वात्तत्क्षण एव भगवत्कृपया दिव्योत्तरीयोद्भवसंभवाच्च न तासां रसाभासकरा नग्नताशङ्का निवृत्तिपक्षे तत्र योगीश्वरान्तर्हृदि कल्पितासनो भगवानीश्वरः सः परमात्मा गोपीनां गोपस्य स्वस्वरूपस्फूर्तिप्रदानेन सर्वपालकस्य देवस्यावबोधनपराणां श्रुतीनां समासिस्तत्प्रतिपाद्यतया अर्चितः निखिलप्रपञ्चशोभाया एवमाधिष्ठानभूतं वपुर्दधत् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

योगेश्वराणामन्तर्हृदि हृदयमध्ये कल्पितमासनं यस्यैवंभूतः सः श्रीकृष्णः त्रैलोक्ये या लक्ष्मीः शोभा तस्याः एकमेव पदमाश्रयं वपुर्दधद्बिभ्राणः तत्रासने उपविष्टः गोपीपरिवृतः गोपीसभागतः ताभिरर्चितः सन् चकाश शुशुभे ॥ १३ ॥ १४ ॥

भाषा टीका ।

वे सब गोपी भगवान् के दर्शन करते मात्र सब हृदय की व्यथा के नष्ट होनेते अपने मनोरथ के अंत को प्राप्त होगई जैसे सबश्रुश्रुति परमात्मा को वर्णनकर पूर्ण होजावैं हैं फिर अपने स्तनों के कुंकुमते चिन्हित जो ओढनी तिन तें आत्म बंधु के अर्थ आसन कल्पना करत भई ॥ १३ ॥

तिस आसन पर बैठने से वे ईश्वर श्री भगवान् अति शोभा को प्राप्त भये जिन्हके कि ध्यान करने के लिये बडे योगीश्वरों ने हृदय कमल मे आसन कल्पना किया है तदनन्तर तीनो लोक की शोभा की खान एक शरीर को धारण किये भगवान् गोपियों की सभा मे प्राप्त भये और उन गोपियों से पूजित भये तब वडी शोभा भई ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवोपलक्षिताः संस्पर्शनेन सम्मर्दनेन ॥ १५ ॥

तत्र भगवतेऽकृतज्ञतां तद्वचनेनैवोपपादयितुकामा गूढाभिप्राया लोकवृत्तान्तमिव पृच्छन्ति । भजत इति । भजतः प्राणिनः अनु अनन्तरम् केचित्तद्भजनानुसारेण भजन्ति केचिदेतद्विपर्ययं यथा भवति तथा तद्भजनानपेक्षमभजतोऽपि भजन्ति अन्येतु नोभयानिति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

सभाजयित्वेत्यनुवादः प्रश्नार्थं सभाजनस्य सम्यक् विवक्षया किंवा पुनर्विशेषेण सम्मान्येत्यर्थः । यतः अनङ्गमङ्गरहितमपि कामं दीपयति साङ्गीकृत्य पूर्वतोऽपि प्रकाशयति तथा तमत्यन्तकन्दर्पविवर्धनमित्यर्थः । अतएव तासामङ्के कृतयोः ताभिस्तेनैव वा न्यस्तयोस्तस्याङ्घ्रिहस्तयोः अङ्घ्रेर्हस्तस्य च किंवा अङ्घ्रेर्हस्तयोश्चेत्यर्थः । सम्यक्स्पर्शनेन विविधपरिपाट्या शनैः शनैः सुखसंवाहनेन एवमपि पूर्ववदैश्वर्यं दर्शितं सर्वाभिरपि द्वयोरङ्गयोश्चतुर्णां वा तेषां युगपत् संस्पर्शनात् सम्यक्स्तुत्वा प्रश्नविशेषार्थं तदुत्तरप्रश्नार्थं च ईषत्कुपिता इति प्रेमभरस्वभावेन कोपस्यालपत्वात् किंवा आन्तरत्वेन बहिरव्यक्तत्वात् यद्वा ईषत् संक्षेपेण बभाषिरे परमवाग्मित्वात् ततश्च कुपिता इति पूर्वेद्युः स्वप्रासैः किंवा तेन कपटातिरेकेण वञ्चनात् यद्वा कोपं विनाभिप्रायाज्ञानेन तद्धप्रत्युत्तरालभ्यत्वादिति अन्यस्तैर्व्याख्यातं यद्वा तादृशसुधा कृत्वाऽनङ्ग-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

दीपनं किंवा तयैव सभाजयित्वा ताभिस्तस्य तथा समाजनमेव युक्तमित्याशयेनाह । अनङ्गेति । अयं कोपे भाषणेऽपि हेतुर्द्रष्टव्यः ॥ १५ ॥

उभयान् भजतेऽभजतश्च इतिप्रश्नत्रयं तच्चाकृतज्ञत्वादिपरिहारेण पुनः परित्यागाकरणदार्ढ्यार्थं साधु यथा स्यात्तथा एतद् ब्रूहि ते ते के किंवा तेषां फलं तत्सर्वं विविच्यास्मान्प्रति सुबोधं कथयेत्यर्थः । भो इति संबोधनेनावधापयन्ति । तत्र निजदोषपर्यवसाने तस्य मनोऽनभिनिवेशात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्र च प्रणयस्वभावेन तासां निगूढां कोपोत्पत्तिमाह । सभाजयित्वा पूर्वोक्तप्रकारेण सम्मान्य तं बभाषिरे पृष्टवत्यः । ता इति शेषः कीदृश्यः सत्यस्तत्राह । ईषत् कुपिताः । ननु तादृक् सभाजितवत्यश्चेत्तर्हि कथमीषत्कोपस्याप्यवसरमर्हन्ति तत्राह । अनङ्गदीपनमिति । तद्दीपनकृते नानाविलासमभिव्यञ्जयन्तमित्यर्थः । पूर्वं परित्यज्य गतः सम्प्रत्यसावेवं चेष्टत इति प्रणयस्वभावविमर्शनेनेति भावः । ननु कुचकुङ्कुमाकवस्त्रोपवेशतया स्वासामेव तदनङ्गदीपनत्वे प्रागेव जाते सति तस्य तद्दीपनत्वं पृष्ठा सन्तमपि कोपं व्यक्तीकर्तुं कथमर्हन्ति तत्राह । अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य इति । तादृशतया तत्तत्स्पर्शपूर्वकं नानागुणप्रशंसया सन्तोष्येत्यर्थः । तेन कोपस्तु गोपितवत्य एवेति भावः । तर्हि कोप आसीदिति कथं ज्ञायेत तत्राह । सहासेति । उपलक्षणे तृतीया स्वगिरैवायं व्यक्तदोषः स्यादिति मतिकौटिल्यव्यञ्जकेन तादृशभ्रूविलासेन व्यक्ततत्कौटिल्या इत्यर्थः । व्यक्तीभविष्यति च तत् कौटिल्यं प्रश्नपरिपाट्या इति भावः । तदेवमवहित्था नाम सञ्चारी व्यक्तः । तदुक्तं "अनुभाव पिधानार्थोऽवहित्थं भाव उच्यते" इति । अवहित्थेति स्त्रीलिङ्गता च । तथा "हेतुः कश्चिद्भवेत्काश्चिद्गोप्यः कश्चन गोपनः । इति भाव त्रयस्यात्र विनियोगः समीक्ष्यते" इति च । यथा हेतुरत्र सति कौटिल्यमेव गोप्योऽसूयामयोऽमर्षः । गोपयन्त्यनेनेति गोपनः सचात्र तादृशतया तत्तत्स्पर्शसंस्तवाभ्यां प्रख्यापित हर्षकौटिल्यं सहासादित्वञ्च मतिकौटिल्यम् अयमपि तदेव प्रसाययति एवमत्रापि योगमायावैभवमेव दर्शितम । सर्वाभिर्युगपत्तथा व्यवहारात् । अङ्घ्रिहस्तयोरिति द्वित्वं प्रत्येकं जात्यपेक्षया ॥ १५ ॥

अथ सेयं परिपाटी स्वत्यागपरिहारार्थमेव ताभिः कृतेति बोधयन्नाह । गोप्य ऊचुरिति । तत्र चैतदिति उभयान् भजतश्चाभजतश्च न भजन्तीत्यन्तं प्रश्नत्रयम् । साधु यथा स्यात्तथा ब्रूहीत्यर्थः । ते ते के किम्वा तेषां फलं तत् सर्वं विविच्य कथयेत्यर्थः । भो इति सम्बोधनेनावधापयन्ति । स्वस्मिन् दोषपर्यवसानशङ्कया तस्य मनोऽनभिनिवेशानुकरणात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतद्विपर्ययं कुर्वन्ति अभजतोऽपि भजन्तीत्यर्थः । उभयान् भजतश्चाभजतश्च । एतन्नो ब्रूहि एतेषां तारतम्यं ब्रूहीत्यभिप्रायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनङ्गं कामं दीपयत्युद्दीपयतीति तथा तं भगवन्तं सहासलीलेक्षणेन विभ्रमो यस्यां तया भ्रुवा सभाजयित्वानुरञ्जयित्वा समोमलोप आर्षः यद्वा आत्मभिः सहक्रीडायित्वा उक्तविधया भ्रुवोपलक्षिताः । गोप्यः अङ्केष्वात्मनामूरुषु यौ कृतौ निहितौ भगवतश्चरणौ तयोर्यावात्मनां हस्तौ तयोः संस्पर्शनेन करणस्य शेषत्वविवक्षया षष्ठी ताभ्यां मर्दनेन तत्पूर्वकं संस्तभ्य दृढमङ्गी गृहीत्वेत्यर्थः ईषत्कुपिताः सत्यो बभाषिरे ॥ १५ ॥

भाषणमेवाह । भजतइति । केचिद्भजतोऽनुवर्त्तमानान् भजन्त्यनुवर्त्तन्ते एके त्वेतद्विपर्ययं कुर्वन्ति अभजतो भजन्तीत्यर्थः । अन्येतूभयान् भजतश्चाभजतश्च न भजन्तीत्यर्थः । भोः कृष्ण एतन्नोऽस्मभ्यं ब्रूहि कथय उक्तविधान् प्रश्नान् तत्र प्रवर्त्तकं साधु साध्यं गुणदोषतारतम्यं च ब्रूहीत्यर्थः तृतीयकोट्यन्तर्भूतस्त्वमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनङ्गं कामं दीपयतीत्यनङ्गदीपनः तं लीलया लालित्येन ईक्षणं हाससहितं सहासं सहासलीलेक्षणेन निभ्रमन्त्यो उद्धुरं सञ्चलन्त्यः भ्रुवो यासां तास्तथा संस्पर्शनेनोत्पन्ना उत्का उत्कण्ठा सैवाऽङ्कं लक्षणं तेन कृतः पूर्णः अङ्के शरीरे हृच्छयः कामः संस्पर्शनोत्काङ्ककृताङ्घ्रिहृच्छयः । तं संस्तभ्य करचरणाचङ्कस्पर्शनेनाभिव्यक्तं कामं निरुध्येत्यर्थः ॥ १५ ॥

गोप्यः शास्त्रतत्त्वमजानन्त्यो हरेरकृतज्ञताकरणाभिप्रायेण पृच्छन्ति । भजत इति । एके केचिद्भजतः सेवमानाननुभजान्ति सेवानुकूलफलसमर्पणेन सेवन्ते एके केचित् एतस्योक्तस्य विपर्ययं कुर्वन्ति फलोद्देशेनासेवमानानभिष्टफलदानेनानुवर्तन्ते अन्ये नोभयांश्चानुवर्तन्ते यदेतत्पक्षत्रयम् अत्र साधु निर्दोषपक्षमस्माकं ब्रूहि विविच्य कथयेत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र भगवतः काठिन्यमापादयितुकामाः पृच्छन्ति । भजत इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तथा तस्मिन्नासन उपविष्टे श्रीकृष्णं करपदादिलालनपूर्वं ताः किंचित्पप्रच्छु रित्याह । सभाजयित्वेत्यादि । तं श्रीकृष्णम् अङ्केकृतकरणं यस्य तथाभूतेनाङ्घ्रिहस्तयोः संस्पर्शनेन सभाजयित्वा संस्तुत्य च पुनस्त्यागभिया संस्तवनं वस्तुतस्तु अन्तःकुपिताः

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

ईषद्भाषिरे ईषदल्पाक्षरं वहुर्थं कीदृशं सहासलीलेक्षणविभ्रम-भ्रुवा अनङ्गदीपनं न अङ्गोऽनङ्गः अङ्गीतियावत् तत्प्रेम तस्य दीपनम् ॥ १५ ॥

तत्किमित्याह। भजत इत्यादि। अल्पाक्षरेण त्रयः प्रश्नाः हे भगवन् साधु भद्रं ते एतन्नो ब्रूहि व्यक्तं यथा भवति तथा वद केचित् भजतोऽनुभजन्ति केचिद्विपर्ययं कुर्वन्तीति शेषः अभजतश्च भजन्तीतियावत् अन्ये उभयान् भजतोऽभजतश्च न भजन्तीति भजन्तीरस्मान् त्वं तु न भजसि अभजन्तमपि त्वां वयं भजाम इति अभिप्रेत्य-प्रश्ने साभ्येऽवहित्थं मिश्रीकृत्यप्रश्नः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रसन्नं भगवन्तं दृष्ट्वा स्वान्तःकरणदोषदूरीकरणार्थं स्वकृतापराधं पूर्वं भगवति कल्पितमस्य इति तन्निराकरणार्थं लोकदृष्ट्या भगवति कृतघ्नतालक्षणो दोषोऽस्ति नवेति निर्णयार्थं किञ्चित् प्रष्टुमुद्यता इत्याह। सभाजयित्वेति। प्रश्नार्थं प्रथमतः सभाजनं स्तोत्रं कृत्वा ननु किमनेन विचारेण साम्प्रतं जातं फलं भुज्यतामितिचेत्तत्राह। अनङ्गदीपनमिति। अनङ्गं दीपयति निरन्तरमेव अङ्गाभावं सम्पादयतीति च ध्वनिः अतो नैकेन भोगेन कार्यनिष्पत्तिः पुनस्तेनापि भोगेनाग्रे अधिक एव खेदः स्यात् सचेत् स्वदोषेण तदा दोषो दूरीकर्त्तव्यः भगवद्धर्मेणचेत् वाक्निर्वन्धं कारयित्वा प्रार्थयित्वा वा कालानुभवः कर्त्तव्य इति भावः। अनङ्गदीपने साधनमाह। सहासेति। साधनभावार्थं वा प्रार्थनीय इति साधनकीर्त्तनं हासपूर्वकं यल्लीलेक्षणं तेन विभ्रमन्ती या भ्रूः तया अनङ्गं दीपयति पञ्चात्र साधनानि हासो लीला ईक्षणं विलासा भ्रूश्चेति पञ्चचेष्टेनवः कार्यमप्रतिहतं भवति मायाव्यामोहिका स्वरूपविस्मारणार्थं लीलास्वासक्तिं साधयति ईक्षणं तत्र ज्ञानजनकम् अन्यथा ज्ञानान्तरेण तन्निराकरणं स्यात् विलासाः पोषकाः भ्रूर्यम नियन्ता काल इति यावत् प्रसाददाता वा तत्रैव ततः प्रश्नार्थम् उपढौकनं कुर्वन्ति संस्पर्शनेनेति अङ्के कृतः स्थापितो यो भगवदङ्घ्रिः तत्सम्बन्धिनौ यौ हस्तौ तयो सम्यक्स्पर्शनेन संलालयन्त्य इत्यर्थः। संस्पर्शनेन सहिताः तत आभिमुख्यार्थं संस्तुत्य ॥ १५ ॥

एवं सर्वभावेन प्रपन्नानपि त्यजतीति भगवति दोषदृष्ट्या ईषत्कुपिताः साधनैर्निवर्तितेऽपि दोषो न सम्यक् निवर्त्तते यावद्भगवान् न निवर्त्तयतीति अतो विवादमिव कुर्वत्यो बभाषिरे तासां प्रश्नमाह। भजत इति। त्रयः पक्षाः सान्दिग्धाः फलतः स्वरूपतश्च भजनाभजनाभ्यां तत्रैके ये यथा भजन्ति ते तथा तानपि भजन्ति एके पुनरभजतोऽपि भजन्ति अन्येतु उभयानपि न भजन्ति तेषां त्रयाणाम् उभयोरपि प्रतियोगिनोः फलं वक्तव्यं ये भजनानुसारेण भजन्ति ते किं कृतघ्नाः आहोस्वित् धूर्त्ताः आहोस्वित् समीचीना इति केनचित्पादप्रक्षालनं कृतं सोऽपि चेत्करोति तदर्थं किं स्यात् फलार्थकरणे फलं देयं तेनापि तदेव कर्त्तव्यं निरपेक्षकरणेतु सन्देह एव अभजतो भजने कश्चिद्दोषः स्यात् यथा निष्कामे कामिनी कश्चिदुपकारः अपेक्षितश्चेदर्थः क्वचित्स्नेहः क्वचिद्धर्म इति एकं फलं निर्धारितं वक्तव्यं यो वा न भजति पूर्वः तस्य वा किं फलमिति ये वा नोभयविधान् भजन्ति तेषामुभयविधानां वा किं फलमिति कृतस्य साधनस्य कुत्रावा उपयोगः एतत्सर्वं ब्रूहि साधु यथा भवति तथा भो इति संबोधनं सावधानार्थं भजतः पुरुषाननु तदनुसारेण भजन्ति एके पुनर्भजनव्यतिरेकेणैव भजन्ति इत्युभयं न भजनकर्त्तारः अन्येतु भजनरहिता एव ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च रिरंसवे तस्मै रतमदित्युक्तं तासां चेष्टितमाह सभाजयित्वेति। सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा अनङ्गदीपनं स्वीयं कामं द्योतयन्तं तासां वा कामोद्दीपकं तं सभाजयित्वा तदुचितैरेव भावैः सम्मान्य पूर्वं नः सन्त्यज्य गतः सम्प्रत्येवं चेष्टत इति प्रणयकोपगोपनार्थम् अङ्कृतयोस्तेनैव तासामङ्के न्यस्तयोस्ताभिरेव वा स्वाङ्के धृतयोः अङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य अहो ते करचरणानां शैत्यमपूर्वं यत्संस्पर्शनेनैवास्मत्सन्तापो निर्वापणस्तस्मात् त्वं सत्यं सन्तापदुःखानभिज्ञः सदा सुखी विधुरेवासीति व्याजस्तुत्या स्तुत्वा ईषत्कुपितास्तद्दर्शनानन्दस्वभावत एव विनष्टीभूतकोपस्य शेषभागवत्य इत्यर्थः ॥ १५ ॥

अत्र ताभिः प्रतिस्वं मनस्येव विचारितम् । अद्य यदयं प्रेमिमुकुटमणिरप्यस्मानेवं दुरवस्थामलम्भयत्तत्रायमेव प्रष्टव्यः भोः कृष्ण! तवास्मासु प्रीतिरौदादीन्यं द्रोहोवेति त्रयः पक्षाः संभाव्यमाना अपि विचारतो न घटन्ते। तत्र प्रीतिः सोपाधिर्निरुपाधिर्वा। नाद्या। सोपाधिप्रीतिमान् किल स्वकामसम्पादकजनाननुरञ्जयत्येव नतु विरञ्जयति। त्वंत्वस्मान् स्वविरहाग्नावधाक्षीरेव वधार्थम्। नापि परा। निशि घोरवनमध्य एवास्मत्त्यागादस्मत्कष्टद्रष्टुरपि तव क्रमानुत्पत्तेश्च। नाप्यौदासीन्यमस्मत्सुखदुःखसाधकत्वदर्शनात् नापि द्रोहः। स किं शाश्वतिकः प्रातिकूल्यनिबन्धनो वा। नाद्यः तथा दर्शनाभावादेव। नापि द्वितीयः। अस्मासु तत्प्रातिकूल्याभावात्। किन्त्वाश्वस्तपरिचारकजिघांसालक्षणो विलक्षणो यः कश्चन द्रोहस्तस्यैवोदाहरणीभवता भवता भूयत इत्यादिकं स्वमुखेनास्माभिः स्फुटं न वाच्यं किन्तु प्रहेलिकाभङ्ग्या तथा किञ्चन प्रष्टव्यं यथायमेव यथार्थतया तत्प्रत्युत्तरं ददान एतदादिकमर्थं व्याचक्षीतेति सहृदयत्वात्तुल्यमनोगतविमर्शास्ता भो महाभाग! कृष्ण एकामस्माकमर्थप्रहेलिकां व्याचक्ष्वेत्याहुः। भजतो जनान् अनु लक्ष्यीकृत्यैव भजन्ति एके जनाः सापेक्षं भजन्तीत्यर्थः। अत्र सापेक्ष्यवस्त्वलाभे सति नापि भजन्तीति सोपाधिप्रीतिरायाता। एतद्विपर्ययं यथा स्यात्तथा भजन्ति एकेऽभजतोऽपि भजन्ति। निरपेक्षं भजन्तीत्यर्थः। अत्र स्वापेक्ष्यफलान्तरानुद्देशात् भजनत्यागतो वा इति निरुपाधिप्रीतिरायाता अन्ये नोभयान् भजन्तीति सापेक्षमपि निरपेक्षमपि नैव भजन्तीत्यौदासीन्यमायातम्। द्वेषो द्रोहश्चाप्यभजनं भवेदिति तावप्यायातावित्यत एतद्विवरणे एवमेव किञ्चित्किञ्चिदधिकमपि व्यक्तीकरिष्यते भगवता। एतन्नो ब्रूहीत्येते खलु के एतद्भजनमभजनं वा किं तद्ब्रूहीत्यर्थः। एते च एतच्च एतदिति नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्येकशेषैकत्वे। साधु यथार्थमेव ब्रूहि वैयधिकरण्यं सुव्यक्तमित्यर्थः॥ १६ ॥

केनचित्कृता विशुद्धरसदीपिका ।

ततश्च प्रणयस्वभावेन निगूढां कोपोत्पत्तिमपि सामान्येनाह । सभाजयित्वेति । संमान्य कया सहासेति हासेन मन्दस्मितेन सहितं यल्लीलेक्षणं तेन विभ्रमन्ती या भ्रूस्तया अत्र हास्यस्य पुष्पत्वं लीलेक्षणस्याञ्जलित्वं विभ्रमद्भ्रुवः परिभ्रामणत्वञ्चाभिप्रेतं ततश्च पुष्पाञ्जलिदानं कृतमिति सूचितं तेन च भावेन रसाच्छादनाद्गूढकोपः ननु कोऽयं विलक्षणः सभाजनविधिस्तत्राह अनङ्गदीपनं तद्दीपनकृते नानाविलासानभिव्यञ्जयन्तमित्यर्थः अत्रायमेवोचित इति भावः । पक्षान्तरे प्रेमदीपनमिति पूर्ववत् सर्वमिदमन्तः कोपे बीजं पूर्वं संलज्य गतः संप्रत्येव चेष्टत इति प्रणयस्वभावजविमर्शेनेति भावः । ननु सहासेत्यादिकं खेषामेवानङ्गदीपनत्वगमकं तथा सति कथं कोपव्यक्तिरितिचेत्तत्राह । अङ्केति सर्वथा कुपिता एव न जानातीति तादृशतया तत्स्पर्शपूर्वकं नानागुणप्रशंसया संतोषयति तेन कोपगोपनं तर्हि कोप इति कथं ज्ञातं तत्र सहासेति पूर्वोक्त एव हेतुः यद्वा उपलक्षणे तृतीया स्वयैव गिरा व्यक्तदोषः स्यादिति कौटिल्यव्यञ्जकेन भ्रूविलासेन व्यक्तकौटिल्या इत्यर्थः बभाषिरे परिपृष्टवत्यः प्रश्नपरिपाट्यैव व्यक्ती भविष्यतीति मानसो भाव इति भावः । अवहित्थेयम् अनुभावपिधानार्थोऽवहित्थं भाव उच्यते इति भरतोक्तेः । तथा "हेतुः कश्चिद्भवेत्कश्चिद्गोप्यः कश्च नगोपनः । इति भावत्रयस्यात्र विनियोगः समीक्ष्यते" अत्र प्रणयकोपे हेतुः मतिकौटल्यमेव गोप्योऽसूयामयोऽमर्षः स्पर्शसंस्तवाभ्यां प्रत्ययितं हर्षकैतवं गोपनः एवमत्राङ्घ्रिहस्तयोरिति द्वित्वं प्रत्येकस्पर्शापेक्षया ततश्च सर्वासां तथा व्यवहारे योगमायैव हेतुः एवञ्च यथा स्वमादरस्यापरिचयेऽपि सेवेत्यवसेयमिति दिक् ॥ १५ ॥

अथ सेयं परिपाटीतदभिप्रायपरिज्ञानार्थमेव कृता नत्वसूययेति बोधयन्नाह । गोप्य इति । एतत्प्रश्नस्या साधुत्वं नहि शङ्कनीयमिति भावः । तथा तादृशसभाजनव्यापारेण विक्षिप्तचेतस भो इति संबोधनेनावधापयन्ति स्वस्मिन्दोषशङ्कायामासां गतो भूया इति भावः एवं स तासां प्रेमप्रभावेण कुण्ठितमस्यैश्वर्यमिति सूचितम ॥ १६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अर्चित इत्यत्र सूचितपूजनमेवानुवदत्प्रश्नमेवावतारयति सभाजयित्वेति । यद्वा प्रश्नार्थं तदङ्गत्वेन पुनः सभाजनं स्तवनं च सभाजने एव साधनान्याह । सहासेत्यादिहासैर्लीलाभिरीक्षणैर्विभ्रमैश्चतुर्भिः सहवर्त्तमानया भ्रुवा इत्यत्र पञ्चान्तरङ्गसाधनानि तत्र हासस्त्रिविधः सलज्जमन्दमृदुस्मितरूपः प्रेमोत्कर्षेण प्रहासस्तत्पूर्वचेष्टानौचित्य सूचनेनोपा सनरूपश्च लीला विविधोद्दीपकचेष्टा विशेषाः ईक्षणं द्विविधमपाङ्गदृष्ट्या निमिषरहितदत्तदृष्ट्या च विभ्रमा मनोहरस्वेल्यादयश्च कितवतापादकास्तैर्भ्रुवाभङ्गेन च एतेषां प्रेष्ठसभाजने प्रेममार्गीयत्वेनान्तरङ्गतालौकिकसेवारीत्यनुगतत्वाद्बहिरङ्गमिश्रितान्याह । संस्पर्शनेनेति अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन तत्र हस्ताभ्यामङ्घ्रिसंवाहनरीतिप्राप्तं बहिरंगम् अंघ्योरंकेकृत्वा संवाहनोत्था प्रेममिश्रता संस्तुत्येति तत्रोचितनर्मरीत्यैव सम्यक्प्रशंस्य इर्षत्कुपिता इत्यनेनानुरागसुखोत्कर्षाभ्याम् पराभूततया ईषदवावशिष्टं यत्पूर्वविरहजं कुपितं तदपि पुनर्विश्लेषो

माभूदित्यभिप्रायेणैव तेनान्विता तं बभाषिरे पप्रच्छुः फलप्राप्तङ्गोग एवोचितो न प्रश्नादिकमित्यपेक्षायां तं विशेषयति अनङ्गदीपनमिति । पुनः पुनः स्वांगेऽनङ्गं दीपयतीति तथा तं तत्रानङ्गदीपने वाह्य साधनानि सहासलीलेत्यादिव्याख्यानं पूर्ववत्तैरनङ्गदीपनम् अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन सभाजयित्वेत्यन्वयः यद्वा तासामङ्के कृतयोरङ्घ्र्योः संस्पर्शनेन मुखस्तननीव्यादिषु हस्तयोः संस्पर्शनेन चानङ्गदीपनं स्वविरहेचानङ्गेन दीपयतीति दाहं करोतीति तथा तथा स्वदर्शने आनन्दसंप्लुवतया प्रेमवैक्लव्यतयाचानुसंधानराहित्येनानङ्गमङ्गाभावं दीपयति प्रकाशयति अन्तर्धानेन मूर्च्छादिनाङ्गाभावं प्रकाशयतीति तथा तम् एवं सति प्रश्नेनानिर्णये पुनरन्तर्द्धाने मरणमेव संभाव्य पप्रच्छुरिति भावः ॥ १५ ॥

तासां प्रश्नमेवाह । श्रीगोप्यइति । भजतः सेवतो जनानेके भजन्ति तत्समानसेवां कुर्वन्ति ते के किंविधं वा तेषां तत्फलं एके तु एतद्विपर्ययमिति तद्विपरीतम् अभजतोऽपि भजन्ति न तत्सेवामिच्छन्ति ते के कीदृशं वा तत्फलं अन्ये तु भजतोऽभजतश्चोभयानपि न भजन्ति ते के कीदृक्तत्फलयोग्याश्चैतन्नो ब्रूहि अत्र पक्षत्रयेऽपि स्वरूपफलभेदेन प्रश्नद्वयस्योत्तरं वाच्यं तथाचास्मान भजतोऽपि तव भजनेऽस्माकंयोग्यताभजतोऽप्यस्मानभजतस्तवचयोग्यता स्फुटा स्यादिति भावः तत्र स्वस्मिन्दोष सम्भावनया अशृण्वानमिवालक्ष्य भोइति सम्बोधनेनावधानतामापादयन्ति प्रश्नं विना पूर्वं भवताबहुप्रजल्पितम् अधुनासनदानसभाजनपूर्वकप्रश्नेऽप्यकथने प्रमादमेवनिश्चितं स्यात् तत्रापि तत्समाधानाय कैतवेन किंचिद्वक्तुं विचारयन्तं प्रत्याहुः । साध्विति । साधु यथास्यात्तथाब्रूहि नहि कापट्येन व्यासासननिविष्टेन वाच्यमिति भावः ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं यथोक्तासने पर्युपविष्टं भगवन्तं किञ्चित्पप्रच्छुरित्याह । सभाजयित्वेति । तं सम्मान्य ईषत्कुपितास्ताः बभाषिरे यतः कामं नानाविलासैर्दीपयतीति अनङ्गदीपनं केन सम्मान्येत्यपेक्षायामाह सहासलीलापूर्वकं यदीक्षणं तेनविभ्रमो विलासो यस्यां तया भ्रुवा पुनश्चाङ्कीकृतयोः स्वस्वाङ्केगृहीतयोरङ्घ्रिहस्तयोः संस्पर्शनेन ततश्च संस्तुत्य भवानस्माकं मतिः परमानन्दप्रद इत्येवमादिवचनैः स्तुत्वा स्वकोपं गोपयित्वा बभाषिरे मानिनीपक्षे सहासलीलेक्षणविभ्रमभ्रुवा अनङ्गस्य दीपनं यस्य तं तेनैव स्वाङ्के कृतयोः अङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य अहो तव करचरणकमलयोरपूर्वं शैत्यं यत्संस्पर्शादस्मत्तापोऽपि निवर्तते तस्मात्त्वमन्यदीयतापोऽनभिज्ञश्चन्द्रवत्सर्वदा सुख्येवासीति व्याजेन स्तुत्वा तद्दर्शनादिना कोपस्य कुण्ठितत्वादीषत्कुपिताः बभाषिरे निवृत्तिपक्षे अनङ्गस्य सवासनस्य सकारणस्य कामादेर्दीपनं तेषामेवानुकम्पार्थमहमज्ञानजन्तमः । सहासलीलापूर्वकेणेक्षणेनासंख्यातजगदुत्पादकेन तत्सहितेन विभ्रमवत्या भ्रुवा तत्प्रलयहेतुभूतया उपलक्षितम् अङ्घ्रिहस्तयोरित्युपलक्षणं स्वस्मिन्प्रतिपाद्यनामसंख्यातावयवानां संस्पर्शनेन ईषत् सहस्रशीर्षा इत्यादिना प्रतिपादनेन संस्तुत्य अहो अस्माकमप्यगम्य इत्येवमीषत्कुपिताः बभाषिरे तथाचैवंविधानां श्रुतीनां मकथगम्यः परमात्मेत्यधिकारिचेवास शङ्का समुत्थितेति भावः ॥१५॥

अहो विज्ञातमस्माभिर्भवत उपदेशकरणे महत्युत्कण्ठा वर्त्तते ऽतः

श्रीभगवानुवाच ॥

मिथो भजन्ति ये सख्यः ! स्वार्थैकान्तोद्यमा हि ते ।
न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥
भजन्त्यभजतो ये वै करुणाः पितरौ यथा ।
धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ! ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

संप्रत्यस्मत्प्रश्नानुसारेण यथेष्टमुपदिश्य तेन च प्रसन्नो भवेति द्योतयन्त्यस्तस्याकृतज्ञतां तन्मुखेनैवोद्धाटयितुकामाः गूढाभिप्रायाः लोकवृत्तान्तमिव पृच्छन्ति । भजत इति । भजतः प्राणिनः अनु पश्चात्केचिद्भजनानुसारेण भजन्ति एके त्वेतद्विपर्ययं यथा भवति तथा अभजतोऽपि तद्भजनानपेक्षाः भजन्ति एके तु उभयान्भजतोऽभजतश्च न भजन्ति एतत्पक्षत्रयमपि सोदाहरणं साधु सम्यक् नो ब्रूहि सावधानतयैतदुत्तरं वक्तव्यमिति द्योतयितु भो इति सम्बोधनम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनङ्गं दीपयतीत्यनङ्गदीपनं श्रीकृष्णं सभाजयित्वा संस्तुत्य च सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलाक्षिता अङ्के कृतयोर्गोप्यङ्कनिहितयोः श्रीकृष्णाङ्घ्र्योः नियोजितौ यौ हस्तौ गोपीहस्तौ ताभ्यां श्रीकृष्णाङ्घ्रिसमर्द्दनेन स्वाङ्कगतश्रीकृष्णाङ्घ्री स्वहस्ताभ्यां दृढं संपीड्येत्यर्थः ईषत्कुपिता अतिस्नेहगर्भेण किंचित् कोपाभासेन युक्ताः याः काश्चिद्भगवन्तं केवलं कान्तमात्रं जानन्ति ता एव बभाषिरे ॥ १५ ॥

तदाह । भजत इति । केचित् प्राणिनः भजतः अनुवर्तमानान् भजन्ति अनुवर्तन्ते केचित्तु एतद्विपर्ययं कुर्वन्ति तद्भजनानपेक्षमभजतोऽपि भजन्तीत्यर्थः । अन्येतूभयान्न भजन्ति भो प्रिय ! एतत्पक्षत्रयं नोऽस्मभ्यं साधु यथा भवति तथा ब्रूहि कथय ॥ १६ ॥

भाषा टीका ।

कन्दर्पदेवके वर्धन कराने वाले उन भगवान् का अपनी हंसी लीला नेत्रों के भ्रूभंग आदियुक्त दोनों भौं के द्वारा पूजन कर के भगवान् के चरणको अपने गोद में स्वहस्तों सेस्पर्श करती हुई थोड़ी क्रोधित होकर स्तुती करके सबगोपी बोलती भई ॥ १५ ॥

गोपी बोलीं हे प्रभो कोई तो पुरुष अपने भजने वाले को भजते हैं उपकार करते हैं कोई इसके उलटा करते हैं कोई तो न अपने मानने वाले को मानैं न नहीं मानने वाले को मानते हैं इन तीनों के भेदको अच्छे प्रकार से आप हमसे कहिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विदिताभिप्राय उत्तरमाह । मिथ इति । हे सख्यः ! उपकारप्रत्युपकारतया ये मिथो भजन्ति ते ऽन्यं न भजन्ति किं त्वात्मानमेव कुतः हि यस्मात्स्वार्थ एवैकान्त उद्यमो येषांस्ते तत्र च न सौहृदमतो न सुखं न च धर्मो दृष्टोद्देशाद्गोमहिष्यादिभजनवदित्यर्थः ॥ १७ ॥

ये त्वभजतो भजन्ति ते द्विविधाः करुणाः स्निग्धाश्च तत्र तु यथाक्रमं धर्मकामौ भवत इत्याह । भजन्त्यभजत इति ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

स्वार्थः निजदृष्टमात्रफलार्थ एव तस्मिन् वा एकान्तः तस्मिन्नेवैकस्मिन् अन्तो निष्ठा यस्य तथा भूत उद्यमो येषां ते इति श्रीगुरुसेवा मिथो वैष्णवैः प्रणामादिकञ्च परिहृतं तत्र तत्र सद्धर्मादिसद्भावात् आत्मानमेवेति लोकदृष्ट्या परोपकारसम्भावितं धर्मादिकं निरस्तं प्रत्युपकारापेक्षयैव भजनात् एवं दोषपरिहारापेक्षया प्रत्युपकारेऽपि धर्माद्यभावः तथा भजने तारतम्याभावोऽप्यूह्यः अन्यथा उपकारप्रत्युपकारयो स्तुल्यत्वाभावेनानुभजनासिद्धिः एवमेवानुभजन्ति छायावत् भजनानुसारेण भजन्तीति प्रश्नस्योत्तरं सिध्येत् अतो यत्र प्रत्युपकारापेक्षापि न तत्र धर्म इति सूचितं हि निश्चये नान्यथा उक्तादन्यप्रकारेण ततमिथोभजनं न स्यात् यद्वा तत्तत्र मिथ्यात्वं न स्तीत्यर्थः । सख्यैनैव कथनात् यद्वा आत्मनोऽपि तासु तादृशभजनमिव कारुण्यभरेण मन्वानः सहजसख्येन तत्परिहरन् सम्बोधयति हे सख्य ! इति अन्यैस्तैर्व्याख्यातं तत्र स्वात्मानमिति सुशब्दस्यार्थः सुखमिति तद्दित्यस्य च अत इति ज्ञेयं तदिति पूर्ववदेवबा अत इतिचार्थबलादायात्येव यद्यपि तत्राप्यन्योऽन्यमुपकारेण दृष्टसुखं घटेत तथापि स्वोपकारजनितत्वात् प्रत्युपकारस्यावश्यापेक्ष्यत्वाच्च धर्माभावेन तात्त्विकत्वाभावादपि विचारेण सुखाभाव एव पर्यवस्येदिति नच सुखमिति व्याख्यातं यद्वा उन्मत्तवनितात्मेत्यादिवत् लेखनभ्रमेणैव तत् वक्ष्यमाणानुसारेणात्र तदनपेक्ष्यत्वात् स्वार्थार्थमिति पाठोऽपि क्वचित्सुखादीनां बहूनां सम्मतः अन्यत्तुस्पष्टम् अथवा स्वार्थमेव एकान्तत उद्यमो येषां जनानां ते हि ते मिथो भजनकराः यथा राजसेवकाः वित्तदवैतनिकादयः हि प्रसिद्धौ अत एव प्रायो लोकानां सर्वेषामेव दृष्टार्थपरत्वात् ते विशिष्य स्पष्टं न निर्दिष्टाः अन्यत् समानम् ॥ १७ ॥

अभजन्तः दैन्यादिना बाल्यादिना वै प्रसिद्धौ यथेति दृष्टान्तेन निरुपाधिसहजकारुण्यमभिप्रेतं ते द्वि श्रीभागवता एव तच्च सुतरां मत्कृतात्मनामित्यत्र तैर्व्याख्यातमेव तथापि करुणाः पितरौ चेति द्विविधा अवगम्यन्त एव यद्वा यथेति उभयेषामप्युदाहरणमात्रत्वेनोक्तं पितरौचेति चकारोऽध्याहार्यः निरपवादः सम्पूर्ण

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

इत्यर्थः । तैः प्रत्युपकाराद्यनपेक्षया केवलमत्यन्तकृपालुत्वेनैवोपकारात् सौहृदञ्च निरपवादं तयोः सहजस्निग्धत्वात् केवलसौहृदोक्तिः पुत्रपालने पित्रोर्द्धर्मानुत्पत्तेः यद्वा कथञ्चित्तेनापि तयोः धर्मं द्रष्टव्यः ततश्च तेषां तयोश्च स तर्वेति हे सुमध्यमाः ! हे सुन्दर्य इति तदेव सौन्दर्यमिति यद्वा ततयुष्मासु भात्येवेति भावः इदञ्च तासामात्मभजनार्थं चातुर्यम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

स्वार्थोऽत्र स्वीयं दृष्टमदृष्टञ्च भजन्ति ये यथा देवान् देवा अपि तथैव तानिति न्यायेन यज्ञादिसन्तोषिताभिर्देवताभिरपि गोमहिष्यादि भिर्दुग्धादिकमिव स्वर्गादिकं दीयत इति तस्मिन्नेकान्तस्तन्मात्रनिष्ठ उद्यमो येषां ते न तत्र सौहृदं धर्म्म इति प्रसिद्धमपि तद्द्वयं वक्ष्यमाणरीत्या सापवादमेव मन्यामहे इत्यर्थः । धर्मस्य स्वातन्त्र्येण पुरुषार्थत्वेऽप्यर्थकामाभ्यां परिवर्त्तनाय विनियोगापातात्सौहृदस्य च कैतवमयत्वादिति भावः । हि निश्चये अन्यथा उक्तादन्यप्रकारेण तत्मिथो भजनं न स्यात् यद्वा तत्र मिथ्यात्वं नास्तीत्यर्थः तत्र आत्मनोऽपि तासु तादृशभजनशङ्कां सूद्रजसख्योल्लेखेन परिहरन् संबोधयति हे सख्य ! इति अन्यस्तैः अज्ञातो न सुखमित्यर्थवलादुच्याख्यातं यद्यपि तत्रापि दृष्टसुखं घटेत तथापि सौहृदपरिहित्येनोत्तमानां सुखवृद्धिर्नजायत इति भावः । किंतु पाठोऽयं कल्पित इव लक्ष्यते उत्तरत्रैतत्प्रतियोगित्वाप्येऽपि नापेक्षितव्यइति स्वार्थैर्थमिति पाठोऽपि चित्सुखादीनां बहूनां सम्मतः तत्र तद्भजनमन्यथा प्रतीयमानमपि स्वप्रयोजनार्थमेवेत्यर्थः । स्पष्टमन्यत् ॥ १७ ॥

वै प्रसिद्धौ यथेत्युभयेषामुदाहरणार्थं पितरौ चेति चकारोऽप्याहार्य्यः निरपवादो विप्रतिपत्तिरहित इत्यर्थः । सौहृदञ्च निरपवादं हे सुमध्यमा इति सर्वसल्लक्षणोपलक्षणत्वेन तादृशगुणत्वं युष्मासु भात्येवेति भवत्य एव तत्र साक्षिण्य इतिभावः इदञ्च तासामात्मभजनार्थं चातुर्यम् अन्यत्तैः यद्वा पूर्वं सोपाधिभजतामुद्दिष्टयोरपि सौहृदधर्मयोः सापवादत्वमुक्त्वा सम्प्रति निरुपाधिभजतामुद्दिष्टयोर्निरपवादत्वमाह । तत्राप्युदाहरणीकृतानां करुणानां पित्रोरप्यविशेषमाह । भजन्त्यभजत इति । करुणेषु सौहृदस्यापि स्पष्टत्वात् पित्रोः पुत्रादिपालनस्य गार्हस्थ्यधर्मसहायत्वाद्धर्मस्य पि तामन्यतः प्राप्तेः ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मिथो भजन्ति उपकारप्रत्युपकारौ कुर्वन्ति । करुणाः कारुणिकाः केचिद्रागद्वेषाभावा दुपकर्त्तृष्वपि समदृष्टयः अकृतज्ञाः आत्मैकानुभवसुखत्वेन तदितरकृतज्ञानरहिताः गुरुद्रुहः । "अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । यया वृत्ति समास्थाय विप्रो जीवेदनापदी" ति न्यायेन प्राणिषु अत्यन्तपीडाविमुखाः ॥ १७-१९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विदिताभिप्राय उत्तरमाह । मिथ इति । हे सख्यः ! ये मिथो भजन्ति परस्परमुपकुर्वन्तो वर्तन्ते ते स्वार्थे स्वप्रयोजने एव निमित्ते एकान्तः नियत उद्यमो येषां तथाभूताः स्वप्रयोजनमात्रपरास्ते हीत्यर्थः यस्मादेवमत एव तत्र मिथो भजनेन सौहृदं मिथो भजनप्रवर्त्तकं न सौहृदमित्यर्थः । किन्तूपचिकीर्षा प्रत्युपचिकीर्षैव तत्र कारणमित्यर्थः । अत एव तत्र धर्मस्तु तत्साध्यो धर्म इत्यर्थः । किन्तु केवलं दृष्टमेव तत्साध्यं प्रयोजनमिति भावः । तदेवाह तन्मिथो भजनं स्वार्थार्थं स्वप्रयोजनमेवार्थः प्रयोजनं यस्य तथाभूतं हि नत्वन्यथा स्वार्थनिरपेक्षपरोपकारद्वारा धर्मार्थं न भवतीत्यर्थः ॥ १७ ॥

द्वितीयकोट्यन्तर्गतानाह । भजन्तीति । हे सुमध्यमा ! अभजतो ये भजन्ति ते करुणाः करुणावन्तः अशक्ताश्च स्वार्थनिरपेक्षपरोपचिकीर्षा करुणा सा च पित्रादिष्वतीव प्रसिद्धेति तानि दर्शयति पितरौ यथेति । अत्राभजद्भजने सौहृदं सर्वभूतसुहृत्त्वं प्रवर्तकं तत्साध्यस्तु निरपवादो निर्बाधो धर्मः अक्षय्यो भवदनुग्रहरूपधर्म इत्यर्थः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र परिहारं वक्तुमुपक्रमते । मिथ इति । हे सख्यः ! ये मिथो भजन्ति उपकारप्रत्युपकारलक्षणां सेवां कुर्वन्ति ते स्वार्थैकान्तोद्यमा हि स्वप्रयोजनानियतप्रयत्ना यस्मात्तस्मात्तत्र तेषु सौहृदम् अनिमित्तः स्नेहलक्षणो धर्मो नास्ति ननु तर्हि किमस्ति तत्राह । स्वार्थमिति । स्वप्रयोजनार्थं वित्तं जानीध्वं विपर्ययं प्रतिषेधति । नेति ॥ १७ ॥

ये अभजतः फलेष्विच्छानभिगतान् भजन्ति फलमर्पयन्ति तत्र कारणमाह । करुणा इति । करुणयन्ति प्राणिनो दृष्ट्वा द्रवीकृतहृदया भवन्तीति करुणाः तत्र दृष्टान्तः लोकानुग्रहकरणशीलाः पितरो यथा बालादीन् दृष्ट्वा गुणान्तरं चास्तीत्याह । धर्म इति हे सुमध्यमाः ! अत्र तेषु जनेषु सौहृदलक्षणो धर्मश्च निरपवादः निर्दोषः इदं संप्रज्ञातसमाधिमतां लक्षणम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वार्थोऽत्र दृष्टफलं ये दृष्टफलमात्रोद्यमा मिथो भजन्ति स्वात्मानमेव भजन्ति । हि यस्माद्भजनं नान्यथा भवति । अतस्तत्र न सौहृदं नच धर्मः । कारणविशेषमेव दृष्टान्तयति तत्र तस्मिन् साकूतपर्यवसानमाशङ्क्य मिथोऽक्षि निकूचन्तीः प्रत्याह । नाहमिति ॥ १७—२० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

भगवानप्याशयं ज्ञात्वा समुचितं प्रत्युत्तरमाह । मिथ इत्यादि । हे सख्य इति सप्रेमसम्बोधनम् मिथो भजनेन सौहृदं न धर्मः तद्भ-

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

जनं हि स्वात्मानं प्रत्येव परस्परानुकूल्योपाधिकत्वात् स्वात्मार्थमिति पाठे स्वात्मानिमित्तम् ॥ १७ ॥

द्वितीयप्रश्नस्योत्तरं भजन्तीत्यादि । अभजतो ये भजन्ति ते वै करुणाः कारुणिकाः यथा पितरौ तयोः केवलमभजतः शिशून् प्रति वात्सल्यमेव अत्र निरपवादो धर्मः सौहृदञ्च ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एतेषां भेदान् फलं चाह भगवान् । मिथोभजन्तीति त्रिभिः । तत्राद्यपक्षस्य निर्धारमाह । ये मिथोभजन्ति ते स्वार्थैकान्तोद्यमाः स्वार्थ एव एकान्त एकं फलमुद्यमस्य ते हि ज्ञात्वैवान्योऽन्यं भजन्ते तरतमभावेन च भजनमनुवर्त्तयन्ति अतो न तेष्वन्योऽन्यवञ्चनापि संभवति अतः स्वार्थमेव लौकिकार्थमेव तेषामुद्यमः ननु उभये ब्राह्मणाः अन्योऽन्यभजनेन धर्मः स्नेहो वा भवेत् कथं स्वार्थमेवेत्याशङ्क्याह । न तत्र सौहृदमिति । क्षणेनैव द्वितीयस्या भजनं ज्ञात्वा क्रोधकरणात् अतो न सौहार्दं नापि धर्मः "संभोजनीयानामपि पिशाचभिक्षा नैषा पितॄन् गच्छति नोतदेवान् इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्सेति" गुरुसेवायामपि यदि दृष्टार्थतोभयोः तदापि न धर्मः शास्त्रानुसारी चेत् मिथोभजनाभावः । विद्यातु फलरूपा सख्य इति संबोधनं दप्रतारणाय इति प्रसिद्धास्ते वणिज इव स्वार्थ एव तेषां प्रवृत्तिः यद्यपि धर्मोदयोऽपि स्वार्थो एव तथाप्यन्योऽन्यभजने न ते सिध्यन्ति तथा सौहार्दमपि यद्यन्यमपेक्षेत तस्य साधनस्य विनियोगमाह स्वार्थोर्थमिति अन्यार्थमपि प्रतीयमानं स्वार्थमेव एवं सेवादिदानेष्वपि दुःखनिवृत्तिस्तत्र फलम् अत्रार्थे सर्वोऽपि लोकः प्रमाणमिति हिशब्दः अन्यथा परोपकाराय न अन्यस्य हृदये तत्प्रतीकारार्थे चिन्ताजननात् ॥ १७ ॥

अतः फलं स्वार्थसिद्धिः लौकिकी नाममात्रेणैव तेषां धर्मत्वं ननु वस्तुतः ये पुनः अभजतोऽपि भजन्ति ते द्विविधा इत्याह । भजन्तीति । ये अभजतोऽपि तूष्णीं स्थितान् भजन्ति तत्र निमित्तद्वयं लौकिकं वैदिकं वा स्नेहो विधिश्च तत्र सौहार्दं धर्मश्च फलं क्रमेणैव यः पूर्वः तस्य सौहार्दमवसरे कर्त्तव्यमेवोपकारः अन्यथा कृतघ्नः स्यात् धर्मशेषश्चेत्प्रायश्चित्तं विधेयम् । तदीय एव धर्मः तद्द्वारा तेषु गच्छतीति तत्र धर्मः यत्र कर्मप्रधानं यत्र वा देवता तदुभयं न विवक्षितं प्रतियोगिनि भजनशङ्काभावात् यत्र वा असमानता गोः पङ्कोद्धारणवत् तत्रापि तथा यत्र पुनराधारे प्रत्युपकारः संभवति तत्र प्रवृत्तौ पूर्वस्याभजने उत्तरभजने निरपवादो धर्मः सौहृदं च फलम् अधिकारिविशेषणं तु एकत्र करुणा अपरत्र दैहिकः सम्बन्धः तदाह । करुणाः पितराविवेति अन्यत्रापि दृश्यत इति तद्धर्मातिदेशमाह यथेति । ये संसारिणः क्रूराः तेऽपि कदाचिद्दीनेषु भजनं कुर्वन्ति स्निग्धा इव च भवन्ति तेषां संग्रहार्थं यथेति संबन्धस्तु जन्मान्तरीयोऽपि भवतीति उपमानोपमेययोरभेदात् एकविध एव निरपवाद इति तदुपकारेण हि तस्यापवादः तदभावान्निरपवाद एव अत्र एतादृशो अर्थो अनेन यत्र प्रत्युपकारसम्भावनापि न तत्र धर्म इति सूचितम् अत एव केचित् क्रियमाणमपि नाङ्गीकुर्वन्ति सौहार्देऽपि धर्मोऽस्तीति चकारः सुमध्यमा इति संबोधनमुक्तविश्वासाय धर्मेणैव उत्तममध्यमता येतु पुनः सर्वथैव न भजन्ति भजनार्थं भजतः सौहृदेन वा भजतः धर्मार्थं तु न शङ्का तानुभयानपि केचिन्न भजन्ति अभजतो दीनान् धर्माधिकारिणश्च तानपि भजन्ति ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विदिताभिप्राया उत्तरमाह । मिथ इति । उपकारप्रत्युपकारापेक्षया ये मिथो भजन्ति ते स्वार्थं दृष्टादृष्टं स्वीयफलार्थं एव एकान्त उद्यमो येषां ते हि निश्चितं स्वात्मानमेव भजन्ति नान्यं तन्मिथोभजनं नान्यथा अन्यथा न स्यात् । अतस्ते स्वार्थपराः सोपाधिप्रीतिमन्तः । कामिन एवेत्यर्थः । तत्र तेषु सौहृदं प्रेम नास्ति । धर्मं इत्युत्तरश्लोकार्थदृष्ट्या निरपवादो धर्मश्च न स्वात्मार्थमिति पाठे तदित्यस्य विशेषणमेतत् ॥ १७ ॥

द्वितीयप्रश्नस्योत्तरमाह । अभजतो ये भजन्ति निरपेक्षं भजन्तीत्यर्थः । ते निःसम्बन्धससम्बन्धभेदाद्द्विविधाः । करुणा यथा पितरौ यथेति । तत्र करुणाः शुद्धभक्तास्तेष्वेव प्रह्लादादिषु निरुपाधिकरुणस्योदयदर्शनादिति । दृष्टान्तद्वैविध्यात् उभयेऽपि प्रत्युपकारानपेक्षिणस्तद्दुःखसुखवन्तो भजनं प्राणान्तेऽपि न त्यजन्ति पूर्वे श्रेष्ठाः । उत्तरे अवराः । अत्र एवोभयेष्वेव धर्मो निरपवादः फलाकांक्षाराहित्यादनश्वरः सौहृदं प्रेम च निरपवादम् । हे सुमध्यमा इति । श्लेषेण शोभनः मध्यम एव प्रश्नो यासां ताः । विगीतोदाहरणत्वादाद्यन्तौ प्रश्नौ विगीतावित्यर्थः । यद्वा । शोभनं मध्यममुत्तरं यास्वेव । मध्यमस्य प्रत्युत्तररूपस्य भवत्य एवोदाहरणानीत्यर्थः ॥ १८ ॥

केन चित्कृता विशुद्धरसदीपिका ।

अत्र रसपरिपाट्यामपि प्रयुक्ता सरस्वती सिद्धान्तमपि स्फोरयतीति दर्शयन्नाह । श्रीभगवानुवाचेति । मिथ इति । स्वार्थोऽत्र दृष्टमदृष्टञ्च फलं "भजन्ति ये यथा देवान् देवा अपि तथैव ता"निति न्यायेन यक्षादिसन्तोषिताभिर्देवताभिर्गोमहिष्यादिभिर्दुग्धादि दीयते इति तस्मिन्नेकान्तस्तन्मात्रनिष्ठ उद्यमो येषां ते सकामा इत्यर्थः । न तत्र सौहृदं धर्म इति तत्र प्रसिद्धमपि तद्द्वयं वक्ष्यमाणरीत्या सापवादमेवमन्यामह इत्यर्थः । धर्मस्य स्वातन्त्र्येण पुरुषार्थत्वेऽप्यर्थकामाभ्यां परिवर्तमानाय विनियोगात् सौहृदस्य कैतवमयत्वादितिभावः । हि निश्चये अन्यथा उक्तादन्यप्रकारेण तत् मिथोभजनं न स्यात् यद्वा तत्र मिथ्यात्वं नास्तीत्यर्थः तत्रात्मनोऽपि तासु तादृशभजनशङ्कां सहजसख्योल्लेखेन व्यावर्त्तयन्संबोधयति सख्य इति । अन्यत्तैः तत्र न सौहृदमतो न सुखमिति यद्यपि दृष्टं सुखं घटेत तथापि सौहृद्राहित्येन सुखवृद्धिर्न जायत इति भावः । तत्र तद्भजनमन्यार्थं प्रतीतमपि स्वप्रयोजनार्थमिति ॥ १७ ॥

भजन्तीति । ये वै प्रसिद्धौ तथेत्युभयेषामुदाहरणार्थं पितरौ चेति चकारोऽध्याहार्यः निरपवादो विप्रतिपत्तिरहितः सौहृदञ्च निर-

केनचित्कृता विशुद्धरसदीपिका ॥

यद्वादं सुमध्यमा ! इति यूयमेवात्र मुख्यमुदाहरणमिति भावः तत्र करुणेषु धर्मः पित्रोश्च सौहृदमिति विवक्षितप्रतीत्यै द्वयमुदाहृतं युष्मासु द्वयमपीति ततस्तत उत्कर्षः यद्वा करुणेषु सौहृदस्य पित्रे इव पुत्रादिपालनस्य—

वृद्धौ च मातापितरौ साध्वी भार्य्या शिशुः सुतः।
अप्यनर्थशतं कृत्वा भर्त्तव्या मनुरब्रवीदिति ॥

धर्मस्यापि सामान्यतः प्राप्तेः स्पष्टत्वादुभयोर्विशेषभेवोदाहरणमित्यर्थः ॥ १८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

भगवत उत्तरमवतारयति । मिथ इति । यन्मिथः परस्परं सद्य एव दृष्टफलमभिकाङ्क्षिणो भजन्ति ते वणिज इवस्वार्थैकान्तोद्यमाः स्वार्थे स्वदृष्टसुखार्थमेव केवलमुद्यमो येषामन्यार्थत्वेन प्रतीतावपि तद्भजनदर्शनेन स्वार्थासिद्धेः रोषादिदर्शनेन तदर्थत्वासम्भवाद्यतस्तत्स्वार्थमेवातस्तत्र न सौहृदं परस्परप्रीतिरैहिकं फलं न वा पुण्यादृष्टजनको धर्मः पारलौकिकः नान्यथेति अन्यथा धर्मबुद्ध्या सौहृदेन वा भजने भजनमेव प्रवेशातेन स्वभजनापेक्षा यद्वा नान्यथेति नाहमन्यथा वच्मि मद्वचनं निगमरूपत्वात् सत्यमेव सख्य इति संबोधनेनापि मत्सुखप्रत्यन्यथासम्भवेऽपि स्वाभाविकसख्येन न भवतीः प्रति मदुक्तिरन्यथा यद्वा ननु—

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति स्मृतेः ॥

कथन्न धर्मस्तत्राह । सौहृदमिति । तत्रापि श्रेयोमात्रं परं केवलमवाप्स्यथ न निःश्रेयसमिति सूचनात् लौकिमिकथोभजनेतूभयं नास्त्येव देवाराधनेतु धर्ममात्रव्यवहारेऽपि यथावत्कर्मसम्पत्तौ तत्कामितफलप्राप्तावपि यतो न सौहृदं मद्भक्त्युपयोगिहृदयसौष्ठवानुत्पादकमतो न परो धर्मः किन्तु श्रममात्रमेव धर्मो मद्भक्तिकृत्प्रोक्तः—

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥

इत्यादिवचनात् ॥ १७ ॥

प्रथमपक्षीयप्रश्नस्योत्तरमुक्त्वा द्वितीयप्रश्नयोरुत्तरमाह । भजन्तीति । हे सुमध्यमाः ! ये अभजतः प्रत्युपकारमकुर्वतो भजन्ति ते एके करुणा दयालवः तथा पितरावित्युपलक्षणं स्निग्धा इत्यर्थः यथेत्युक्त्वा यथैते तथा निष्कामाराधकाश्चेति त्रिविधाः तेषु फलमाह । धर्म इत्यादि तत्र करुणायाविधिप्राप्तत्वाद्धर्मो मुख्यः फलं सुष्ठु हृद्येव तद्दुद्भवदर्शनात्सौहार्दश्च स्नेहस्या नुरागप्राप्तत्वात् सुष्ठु हृद्येव तदुत्पत्तेः सौहृदमेव मुख्यं धर्मोऽपि गृहस्थधर्मप्राप्तत्वात् निष्कामाराधनेतु धर्मो निरपवादः—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादित्यादि ॥

वचनात् भक्त्युपयोगिहृदयशुद्धिहेतुत्वाच्च सौहृदमपि चकारेण विशेषणानुकर्षणात्सौहृदमपि निरपवादं तद्धर्मसौहृदयोर्मत्स्वरूपप्राप्तिपर्यवसायित्वात् यद्वा यथेति दृष्टान्तत्वेन निर्देशो यथा लोके केचित्करुणाः पितरौ च प्रत्युपकारानपेक्षया भजन्ति तथा

अभजतोऽपि तेषां फलासिलिप्सादर्शनेन तत्फलदातृत्वपि मे ये भजन्ति अत्र सकर्मकधातोः कर्मापेक्षतया मामिति वक्तव्येऽपि कर्ममात्रोक्तौ फलान्तरसम्भावना स्यादिति षष्ठ्या सम्बन्धसामान्येन कर्मत्वफलत्वोभयार्थत्वाभिमत्या षष्ठीनिर्देशः तथा च भजतो मम भजने निरपवादो धर्मः सौहृदं चेति भावः ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तासामभिप्रायमवगत्य क्रमेणोत्तरमाह । मिथ इति । ये मिथोन्योऽन्यं परस्परोपकाराकाङ्क्षया भजन्ति स्वार्थे एवैकान्तत उद्यमा येषां तथाभूता न ते कञ्चिदन्यं भजन्ति किन्तु स्वात्मानमेव दृष्टफलार्थित्वात्प्रसिद्धञ्चेदं बहुधश्चैतदुदाहरणभूता अतो नाधिकमत्र वक्तव्यमिति द्योतनाय हि शब्दः तत्र सत्कीर्त्तिकरं सौहृदं निर्व्याजेन हितैषित्वन्नास्ति नापि धर्मः दृष्टोद्देशात् यद्वा नात्रैवं विधे भजने सौहृदं धर्मः किन्तु मित्रतालक्षणो धर्मः हि यतस्तद्भजनं स्वार्थे पशूनां परस्परं कण्डूयनसदृशं नान्यथा स्वार्थाभावे निवर्त्तते हे सख्य ! इति संबोधयन् युष्माकं ममत्वनेवंविधं मैत्र्यमपितु निरुपाधिकं सख्यमिति द्योतयति ॥ १७ ॥

द्वितीयप्रश्नस्योत्तरमाह । भजन्तीति । ये अभजतोऽपि भजन्ति ते द्विविधाः सम्बन्धराहितास्तद्वन्तश्च तत्राद्याः करुणाः दयालवो यथा द्वितीयाः पितरौ यथा अत्र प्रथमपक्षे निरपवादो धर्मो निरुपाधिकत्वादनश्वरः द्वितीयपक्षे निरपवादं सौहृदं यद्वा पक्षद्वयेऽपि निरपवादो धर्मः सौहृदञ्च यद्वा अत्र सौहृदरूपो धर्मो निरपवादः हे सुमध्यमा इति सम्बोधयन् करुणायाः सम्बन्धस्य च विषयभूताः भवत्य इतिसूचयति श्लेषेण शोभनो मध्यमः प्रश्नो यासां ताः सुष्ठु मध्यमपक्षोदाहरणभूता भवत्य इति वा ज्ञापयति ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तृतीये पक्षे बहून् भेदान् जानन्त्यः कृतघ्नविषयं तृतीयं पक्षं मन्वानाः स्वस्य कृतघ्नत्वं स्वमुखेनैव कथयिष्यतीति तासामाशयं ज्ञात्वाह । मिथ इत्यादिना । हे सख्यः ! ये मिथो भजन्ति अन्योऽन्यमनुवर्तन्ते स्वार्थैकान्तोद्यमाः स्वार्थे निमित्तभूते एवैकान्तत उद्यमो येषां ते तथा अतः तत्र सौहृदं नास्ति नच धर्मः ॥ १७ ॥

ये तु अभजतोऽपि भजन्ति ते द्विविधाः एके करुणाः करुणावन्तः अस्मादादयञ्च अन्ये पितरौ यथा तथा स्नेहयुक्ताश्चेति द्विविधाः द्वैविध्यमेवाह । धर्मो निरपवादः निरपवादं सौहृदं चेति ॥ १८ ॥

भाषा टीका।

श्रीभगवान् बोले हे सखि हो। जो आपस में मानने वाले को मानते हैं वह तो केवल अपने स्वार्थ में तत्पर हैं उसमें कुछ मित्रपना का धर्म नहीं है वह केवल स्वार्थ के वास्ते है और कुछ नहीं है ॥ १७ ॥

भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः ।
आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥

तथैव मत्तः फलसम्पदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम् ।

नाहं तु सख्यो ! भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये । [१] मनुवृत्तयेयथा
[२] यथाधनोऽलब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ॥ २० ॥ इतिविज० श्लोकमध्येकपाठः

भाषा टीका ।

कोइ जो नहिं भजने वाले को भजते हैं वे दयालु हैं जैसे पिता माता हैं हे सुमध्यमा इसी बात में निःसन्देह प्रशंसा करने लायक धर्म हैं इसी में मित्रपनो भी है ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीयप्रश्नोत्तरं भजतोऽपीति अयमर्थः । ते तु चतुर्विधाः एके आत्मारामा अपराग्दृशः केचिदाप्तकामा विषयदर्शिनोऽपि पूर्णकामत्वेन भोगेच्छारहिताः अन्येऽकृतज्ञा मूढाः अन्येतु गुरुद्रुहोऽतिकठिनाः "स पिता यस्तु पोषक" इतिन्यायादुपकर्त्ता गुरुतुल्यस्तस्मै द्रुह्यन्तीति तथा ते ॥ १९ ॥

अत्र चरमकोटिगतमात्मानं मत्वाक्षिसङ्कोचैः परस्परं गूढस्मितमुखीस्ता दृष्ट्वा आह । नाहन्त्विति । हे सख्यः ! अहं तेषां मध्ये न कोऽपि किन्तु परमकारुणिकः परमसुहृच्च कथम् अमीषां भजतामनुवृत्तिवृत्तये निरन्तरध्यानप्रवृत्त्यर्थं तान्न भजामि एतत्सदृष्टान्तमाह । यथेति । तस्य धनस्यैव चिन्तया निभृतः पूर्णो व्याप्त इति यावत् अन्यत्क्षुत्पिपासाद्यपि न वेद ॥ २० ॥

श्रीसनातनगोस्वामिकृतबृहत्तोषिणी ।

वै एव नैव भजन्ति हि हेतौ निश्चये वा न कृतं तद्भजनं जानन्ति अनुसन्दधतीत्यकृतज्ञाः लोकाद्यपेक्षावत्त्वेऽपि प्रत्युपकारसामर्थ्येऽप्यज्ञानेन तदकरणान्मूर्खा एवेत्यर्थः । एवं तेषामभक्तत्वेनाभजनमभिप्रेतं सामर्थ्यवन्तो ज्ञात्वापि ये न भजन्ति ते त्वतिनिर्दया इत्याह । गुर्विति । एवन्तासां पादत्रयकृतप्रश्नस्य पद्यत्रयेण प्रत्युत्तरं तासां संक्षेपादिवाक्यगुणविशेषेण स्वस्मादपि माहात्म्यविशेषस्य विस्तारणार्थम् एवन्तासां मते श्रीभगवतो विचित्रक्रीडया आत्मारामता आप्तकामता च न घटतैव गुरुशब्दप्रयोगेण गुरुध्रुक्ता च न ज्ञेया विरहार्त्तिदत्वेन भजनासिद्ध्या प्रथमपक्षद्वयं न सङ्गच्छेत ततोऽकृतज्ञतैव परिशिष्यतैव तथाचाग्रे वक्ष्यते अकृतज्ञत्वं तद्वचनेनैवेति चरमकोटिगतमिति तत्रापि चरमकोटित्वं घटतैव यद्वा गुरुध्रुक्पदेन पदार्थानपेक्षया लक्षणयैव तैरतिकठिना इति व्याख्यातं तदत्रैव चरमकोटिगतत्वं सुसङ्गतमेव ॥ १९ ॥

तुशब्दो भिन्नोपक्रमे आत्मारामत्वादिचातुर्विध्यरहितोऽप्यहं न भजामि नञः सर्वादौ प्रयोगः स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैयग्र्यात् हे सख्य ! इति आत्मारामत्वादिराहित्यमेव साधितम् अन्यथा सख्यासम्भवः जन्तूनिति विचारविशेषराहित्यमभिप्रेतम् अन्यथा सत एवानुवृत्तिसिद्धिः ननु अस्माकं त्वय्यनुवृत्तिः सदानुवर्त्तत एवेतिचेत् सत्यं विशेषेण तत्सम्पत्त्यर्थमिति सदृष्टान्तमाह । यथेति । विशेषतो नष्टे इति पुनःप्राप्तिसम्भावना निरस्ता अत एव नितरां भृतो व्याप्तः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वै एव नैव भजन्ति हि प्रसिद्धौ एवमकृतज्ञानामभक्तत्वे नाभजनमभिप्रेतं ज्ञात्वापि ये नभजन्ति ते त्वशेषदोषयुक्ता इत्याह । गुर्विति । गुरुपेक्षका इत्यर्थः प्राणदण्डोचितविप्रादेरिव तादृशस्योपेक्षैव द्रोह इति अत्र तु पदार्थे तात्पर्य्यं नास्ति किंतु गौण्या वृत्त्या कृतोपकारापेक्षका गम्यन्ते तेन च तेषामर्थधर्मसौहृददयापेक्षाराहित्यं व्यज्यत इति ज्ञेयम् ॥ १९ ॥

तदेवं तासां मते तदादिभिः सह विचित्रक्रीडया रमणस्य तस्यात्मारामत्वादिद्वयं न घटत एव । विरहार्त्तिप्रदत्वेन च पूर्वोक्ते सापेक्षनिरपेक्षभजने तादृशोत्तरादिचातुर्येण विज्ञताभिव्यक्तेः न कृतघ्नता चाकृतज्ञत्वं ततो गुरुध्रुक्त्वं निर्विशेषं काठिन्यमेव पर्य्यवसितमित्यभिप्रेत्य तैर्व्याख्यातम् । तत्र चरमेति पूर्वं कृतज्ञतामात्रमापादयितुमपृच्छन्नधुना तु ततोऽपि दोषवैशिष्ट्यपर्य्यवसानेन सन्तुष्टा जाता इत्यभिप्रेत्य व्याख्यातम् । अक्षिनिकोचैरिति । अथवा काठिन्यपादनार्थं एवायं प्रश्नोद्यम इति व्याख्येयम् । अथाभजनेऽपि मम सर्वेभ्यो भजनकृद्भ्यः उत्तमभजनत्वं किमुत भजन इत्याह । नेति । तुशब्दो भिन्नोपक्रमे । आत्मारामादि चातुर्विध्य रहितोऽप्यहं भजतोऽपि जनान् न भजामि "नाहं वसामि वैकुण्ठे योगिनां हृदये न च । मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद" इत्यादि मदुक्तिभिस्तन्निकटे स्थितमपि स्वं तेभ्यो न दर्शयामीत्यर्थः । नञः सर्वादौ प्रयोगः स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैयग्र्यात् । हे सख्य ! इति आत्मारामत्वादिराहित्यमेव साधितम् । जन्तूनित्यविशेषात् सर्वत्रैवेदृशो मम व्यवहारो ननु भवतीष्वेवेति नात्मनि मनौदासीन्यं । शङ्कनीयमिति भावः । कथं न भजसि तत्राह अमीषामिति । अनुवृत्तीनां निरन्तरध्यानानां वृत्तिर्यस्मात्तस्मै सन्ततप्रेमप्रकर्षायेत्यर्थः । नन्वस्माकं त्वय्यनुवृत्तिवृत्तिः सदा वर्त्तत एवेति चेत् सत्यं तथापि वैशिष्ट्यार्थमिति सदृष्टान्तमाह । यथेति विशेषतो नष्टे हारिते इति वैयग्र्यविशेषो दर्शितः । अत एव तच्चिन्तया नितरां भृतो व्याप्तः । तदेवं रूपगुणादिना सर्ववशित्वात् सर्वार्थपूर्णत्वेन प्रेममात्र सापेक्षत्वेन च प्रत्युपकारानपेक्षतया साम्येऽपि करुणापितॄनप्यतिक्रम्य स्वस्य हितैषित्वं दर्शितं स्वादेयस्ववशीकारसर्वपुरुषार्थशिरोमणिस्वप्रेमदानात् । तथा प्रियप्रेमरसास्वादाधिक्यं च बोधितम् । सन्ततदर्शनलालसा तु तदर्थं तद्विरहदुःखसहनाच्चेति ज्ञेयम् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न भजामि न शीघ्रदर्शनफलकरो भवामि अनुवृत्तये अनुवर्तनस्य मदनुध्यानरूपस्याविच्छेदाय तच्चिन्तया धनचिन्तया अदृश्यमानस्यात्यन्ताभिनिवेशित्वे दृष्टान्तः यथेति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तृतीयं त्रेधा विभज्य दर्शयति । भजतोऽपीति । ये भजतोऽपि नैव भजन्ति कुतोऽभजतो भजेयुः ते त्वात्मारामादयः केवलं स्वदेहमात्रपोषणपरायणा ननु ज्ञानिनस्तेषां सर्वभूतसुहृत्त्वेन द्वितीयकोट्यन्तर्गतत्वात् आप्तकामाः शब्दादिविषयभोगतदुपकरणतत्त्वालसमृद्धिमन्तः अकृतज्ञाः कृतघ्नाः अकृतज्ञानामेव परां काष्ठां दर्शयति । गुरुद्रुह इति । यद्वा ऽकृतज्ञत्वकार्यं दर्शयति । गुरुद्रुह इति । गुरुभिः कृतमहोपकारमननुस्मृत्य तेभ्योऽपि द्रुह्यन्तीति तथाभूताः एतेषां त्रयाणामितरभजनाभावात्प्रवर्त्तकसाध्यगुणदोषा नोक्ता इति भावः ॥ १९ ॥

इत्थं भगवतोक्तास्ता गोप्यस्तावदनुवर्तमाना अस्मानभजन्नयं तृतीयकोट्यन्तर्भूतस्तत्रापि नात्मारामो नाप्याप्तकामश्च तथा चेदस्माभिः सह वने विहारासम्भवादतोऽयं नूनमकृतज्ञ इत्याक्षिसङ्कोचैः परस्परं सूचयन्तीर्दृष्ट्वा तत्कारणज्ञो भगवान् पुनराह । नाहं त्विति हे सख्यः ! भजतोऽपि जन्तूनहं भजामि न तेषां दृष्टिगोचरो भवामीत्यर्थः । तथापि नाकृतज्ञ इति भावः । तर्हि किमर्थं न भजसीत्यत्राह । अमीषां मां भजतां जन्तूनामनुवृत्तिवृत्तये ऽनुवर्तनस्य मदनुध्यानरूपस्याविच्छेदाय अनेनात्मनः कृतज्ञत्वं परमकारुणिकत्वं चोक्तं प्रियस्यादृश्यमानस्यात्यन्ताभिनिवेशविषयत्वे दृष्टान्तमाह । यथेति । अधनो निर्धनः पुमान् कदाचिद्दैवाल्लब्धधने विनष्टे सति तच्चिन्तया नष्टधनचिन्तया निभृतो व्याप्तः अन्यन्न वेद नान्यत्स्मरति किन्तु तदेव नष्टं धनमविच्छेदेनानुस्मरन्नवतिष्ठते अविनष्ट इति वाच्छेदः तस्मिन्नविनष्टे सति तच्चिन्तया विषयचिन्तया निभृतः पूर्णः तद्धनमन्यच्च न वेद नानुस्मरति किन्तु प्रमत्तो भवतीति भावः । अस्मिन् व्यतिरेके दृष्टान्तः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असंप्रज्ञातसमाधिस्थस्य लक्षणमाह । भजतोऽपीति । अत्र केचिज्जनाः भजतोऽपि फलार्थितया सेवमानानपि न भजन्ति स्वप्रयोजनाभावात् कथं तदित्यत्राह । आत्मेति । आत्मनि परमात्मन्येवारामः क्रीडा येषां ते तथा बाह्यप्रवृत्तिशून्या इत्यर्थः । तदपि कथमित्याशङ्क्य सुखार्थं हि प्रवृत्तिः सुखन्तु स्वत एव पूर्णमित्याशयेनाह । आप्तकामा इति । काम्यत इति कामः आनन्दः हिशब्दो हेतौ आनन्दाप्तौ निमित्तमाह । अकृतेति । अकृतं परमात्मानं जानन्तीति तज्ज्ञानं च निष्पापत्वादित्याह । गुरुद्रुह इति गुरूणि पापानि ये द्रोहितवन्तो नाशितवन्त इति नास्त्यकृतः कृतेनेति श्रुतिः नराणां क्षीणपापानामिति स्मृतिः कीदृशाः कृतघ्ना इत्यतो वाह भजतोऽपीति ये केचिद्भजतः शरणार्थितया सेवमानानपि न भजन्ति प्रत्युपलक्षणां सेवां न कुर्वन्ति अभजतः कुतो भजन्ति तत्र कारणमाह । आत्मारामा इति । परमात्मविषयमतिरहिता देहलक्षणात्मनि नितरां रताश्च तर्हि कुत्र रतिरित्यत्राह । आप्तेति । आप्ते विस्रब्धे स्त्रीजने कामो येषां ते तथा एतादृशाः कृतघ्ना हि कृतं न जानन्ति नाशयन्ति च अतएव गुरुद्रुहः देवादिगुरूणां द्रोग्धार इत्युच्यन्ते हविराद्यदानात् ॥ १९ ॥

अहमेष्वेक इति भवतीनामाशङ्का माभूदित्याह । नाहमिति । अपि समुच्चये तुशब्दो विशेषप्रकाशकः अहं भजतः फलार्थितया सेवमाना न भजतोऽपि फलार्थितया असेवमानान्न भजामि तदिच्छया फलं न दास्यामि "यमेवैष वृणुते तेन लभ्य" इति मम विजयशिखामणेः ततः प्रयोजनाभावात् तेभ्यः प्रयोजनं न ममेत्यर्थः । तर्ह्येषां सेवा निष्फला किं नेत्याह । अमीषामिति । अमीषामुभयेषां यथा सेवाः स्युः तथा तथा मत्तः उच्चावचाः सेवाफलसंपदः स्युरेव अर्थिनां योग्यानामधिकारिणां कल्पवृक्षाद्यथा फलानि तथेत्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तृतीयप्रश्नस्योत्तरम् भजतोऽपीत्यादि । केचिद्भजतोऽपि न भजन्ति किं पुनरभजतः के त इत्याह । आत्मारामा इत्यादि । आत्मारामाणामन्यस्फूर्तेः आप्तकामानां पूर्णत्वात् अकृतज्ञानामज्ञत्वात् गुरुद्रुहां पापाधीनमनोवृत्तित्वाच्चत्वार एव तथा ॥ १९ ॥

किं तूक्तेषु धर्मिषु अभजन्तं मां भवत्यो भजन्तीति । स्वात्मां कारुणिकत्वं मम चाकृतज्ञता नाशङ्कनीयेत्याह । नाहं त्वित्यादि । अहं तु अहं पुनः यद्यप्यात्माराम आप्तकामश्च तथापि न तदुभयत्वेन नाप्यकृतज्ञत्वादिना हे सख्यः ! भजतोऽपि जन्तून् प्राणिमात्रमपि भजामि किंतु अमीषां जन्तूनामनुवृत्तिवृत्तये अनुगतिसातत्याय भजत एव यदि भजामि तदा पूर्णत्वाभिमानेन पुनरनुवृत्तिं न करिष्यन्तीति ननु अभजनेन विते विरज्येरंस्तदा किं स्यात् नैवमित्याह । यथेत्यादि । अहन्तु सर्वेषां धनं धनं प्रति कोऽपि न विरज्यति इत्यत्र व्यतिरेके दृष्टान्तः यथाऽधनः केनाप्युपायेन लब्धस्य धनस्य पुनर्विगमे तच्चिन्तया अन्यत् निभृतं नैपुण्यं न वेद न जानाति अतः साधूक्तमनुवृत्तिवृत्तये किं त्वेतत्सामान्यजन्तुपरं न तु भवद्विधपरं यतो भवत्यः सख्यः सख्युर्मम सखीत्वे मद्धर्मिण्यः ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तेषां स्वरूपमाह । भजतोऽपीति । केचिन्महापुरुषा भजतोऽपि न भजन्ति अभजतः कुतो भजिष्यन्ति ते पूर्वोक्तन्यायेन चतुर्विधाः तन्मध्ये उभये समीचीनाः ये दयाधर्माधिकारिणस्ते अधमाः ये लौकिकनिमित्तास्ते उत्तमा इति तावद्रूपयति साङ्कर्याभावाय । आत्मारामा इति । आत्मन्येव रमन्त इति अन्येन भजनीयो देहादिर्नापेक्षित इति भजनमेव न मन्यन्ते तेषां भजनार्थं च साधनत्वेन स्वदेहादिकमपि न मन्यन्ते तथाच अन्ये आप्तकामाः आप्तः । प्राप्तः कामो यैः यो भुक्तवन्तं ब्रूयात् त्वं भुङ्क्ष्व माभुङ्क्ष्वेति वा एकत्र प्रवृत्तिः अपरत्र सिद्धसाधनत्वेनानुवादः उभयथापि वैयर्थ्यं प्रवर्तमानस्य धर्मः सेत्स्यति अज्ञानं वा उभये तु अधमा इत्याह ये कृतं न जानन्ति तदुपकारं ते प्रत्युपकारसमर्था अपि उभयविधानपि न भजन्ति तेषामज्ञानमेव हेतुरभजने ज्ञात्वा चेदभजनं गुरुद्रोहः यः कश्चित् स्वस्य पुरुष-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

र्थसाधकः स गुरुः स पूज्यः तस्यापि स्वशक्तौ सत्यां तदुपेक्षायां तद्द्रोहः अनेनैव कृत इति गुरुद्रोहकर्त्ता भवति एवं सर्वेषां गुणदोषा निरूपिताः गोपिकानां हृदये भगवानेव तन्मध्ये क इति जिज्ञासायाम् अभजनकर्तृत्वात् भजनसामर्थ्यस्यापि विद्यमानत्वान्मिथो भजनपक्षः अभजनभजनपक्षश्च व्यावर्त्तितः ॥ १९ ॥

ननु द्वितीयपक्षो गोपिकानां भजने स्नेहाद्भजनमस्तु अतो भगवाञ्छिरूपकत्वेन नैषामन्तर्भूतः ईश्वरश्च नैषामन्तर्भवतीति कथमेवं विचार इति चेन्मैवं गोपिका भोग्या इत्यविवादं ताश्च भोग्यसमर्पकत्वेन चापेक्षणीः अतो भगवत एव विचारः कर्त्तव्यः ईश्वरोऽपि फलार्थं सेव्यश्चेत् न विचार्य्यः व्यवहारे दृष्टार्थश्चेद्धीयमानग्रहणाग्रहणाभ्यां विचार्य एव पूर्वं गृहीतत्वात् नात्मारामता नापि पूर्णकामता प्रथमप्रवृत्त्या तृप्तावपि परित्यागो नोचितः ततस्तृतीयपक्ष एवाभिनिवेश उचितः तदपि सर्वज्ञस्यानुचितम् ईश्वराणां फलदातृणां कदाचिदेवं भवतीति शङ्कायाः परिहारमाह । नाहं तु सख्य इति । तुशब्दस्तं पक्षं व्यावर्त्तयति नापीश्वरस्य भजनपक्षः शङ्कनीय इत्याह । सख्य इति । गोपिकास्तु सख्यः रसे तुल्याः एकार्थाभिनिवेशाश्च अहमिति भगवान् ननु जीवः तेन आत्मारामादिपक्षा व्यावर्त्तिताः अहं राम एव नत्वात्मारामः ममात्मव्यतिरिक्तपदार्थाभावात् न व्यावर्त्यमस्ति कामाभावादेव नाप्तकामत्वम् अतो मम भिन्नैव व्यवस्था ननु जीवतुल्यता नाहं तु सख्य इति तामेव व्यवस्थामाह । भजतोऽपि जन्तून् अहं न भजामि तत्रान्य एव हेतुः अमीषामनुवृत्तिवृत्तय इति अमीषां जीवानां जन्तुपदेन प्राणिमात्रं भगवतो न केनाप्युपयोगः भगवान् फलरूप इति सर्वेषामेवोपयोगः तथा सति तेषां भजनमेव इष्टमिष्टसाधनं वा तत्राहश्चेत्साधनत्वेन प्रविशामि तदा जनमेव नाशयामि अग्रे भजनस्य प्रतिबन्धात् पूर्वभजनस्य च वैयर्थ्यापादनात् चतुर्धा हि भगवदुपयोगः भगवान् भोग्यो भोक्ता वा भोग्यपक्षे कामनापूरकत्वेन स्वातन्त्र्येण वा भोक्तापि भक्त्याभक्तदत्तपदार्थस्वीकारात् विषयत्वेन भोगाद्वा आद्ये भजनं नश्येत् अल्पफलदानात्स्वरूपतो महत्त्वेऽपि कालपरिच्छेदात् द्वितीये तु तथात्वमतिभजनेन भवति तद्गोपिकानां नास्तीति तत्सिद्ध्यर्थमभजनम् अपेक्षाभावात् नाहं विषयन्यायेन भोक्ता भक्त्यर्थं तु अभजनमेवेति सिद्धान्तसंग्रहः यथा अभजने अनुवृत्तिः सिध्यति तथा प्रकारमाह । यथाधन इति । पूर्वमधनः पश्चाल्लब्धं धनं तच्चेद्विनष्टं तदा तच्चिन्तया व्याप्तः निभृतः तदेकनिमग्नः सन् अन्यन्न वेद एतत्तु लोकप्रसिद्धं तथा गोपिकानामपि पूर्वमप्राप्तौ भगवान् प्राप्तश्चेत्तिरो भवति तदा निभृताः तत्रैव मग्नचित्ताः न प्रपञ्चं स्मरिष्यन्ति निभृतानां प्रयोजनं पूर्वमुक्तमेव ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तृतीयप्रश्नस्योत्तरमाह । भजतोऽपीति । ते यथोक्तरन्यूनाश्चतुर्विधाः । आत्मारामाः अबहिर्दृश एके । अन्ये आप्तकामाः बहिर्दृशित्वेऽपि स्वत एव पूर्णकामत्वेन न परतो भोगेच्छवः । अपरे अकृतज्ञाः परतो भोगेच्छुत्वेऽपि परैः कृतमुपकारादिकं न जानन्ति । अन्ये गुरुद्रुहः परैः कृतमुपकारादिकं न मन्यन्ते प्रत्युत तेभ्यो गुरु अधिकं द्रुह्यन्ति ते निर्हेतुकद्रोहिणः । सहेतुकद्रोहिणस्त्वल्पद्रुहः कैमुत्यप्राप्तत्वेन तदन्तर्भूता एव । तथा पालकत्वात् गुरवश्च ते द्रुहश्चेति गुरुद्रुहो विश्वस्तघातिनश्चेति त्रिविधद्रोहोऽप्यभजनमेव ततश्च प्रथमप्रश्नोत्तरस्योदाहरणमेकमेव द्वितीयप्रश्नोत्तरस्य द्वे तृतीयप्रश्नोत्तरस्य षडित्येवं नव ॥ १९ ॥

तत्र प्रथमद्वितीयप्रश्नोत्तरोदाहरणेषु त्वं न वर्त्तसे । तृतीयप्रश्नोत्तरोदाहरणेषु मध्ये कतम इति चेत् शृणुत भो मन्मुखेनैव मत्पराजयं शुश्रूषवो मिथः स्मितविलसितकटाक्षणचातुरीधुरीणाः सख्यः ! शृणुत नारायणत्वेनात्मारामः पूर्णकामश्च भवन्नपि नन्दपुत्रत्वादनात्मारामोऽपूर्णकामश्च । गोपबालकत्वेनानधीतनीतिशास्त्रत्वादकृतज्ञो भवन्नपि नारायणत्वेनैव सार्वज्ञ्यात् कृतज्ञश्च सविलासाभिर्मुहुः प्रणीतानामपि युष्माकं सकृन्मात्रत्यागेन द्रोहाद्गुरुध्रुगपि भवन् पुनः स्वदर्शनानन्ददानाद्गुरुध्रुक् च । तर्हि निश्चयेन को भवति भवानिति चेत्तत्राह । नाहं त्विति । तु भिन्नोपक्रमे । जन्तून् जीवमात्राणि भजतोऽप्यहं न भजामि तर्हि पूर्वतः को भेदस्तत्राह । अमीषां भजतामनुवृत्तिर्मद्भजनं तस्या वृत्तये जीविकायै । हे अबलाः ! मदभिप्रायं ज्ञातुमसमर्थाः । हन्त हन्त यमेवोद्यमं करोमि स एव विफलीभवति तस्मान्मय्यपराधिन्यनुग्रहलेशोऽपि कृष्णस्य नास्ति धिङ्मामिति प्रतिक्षणं निर्वेददैन्यादिवृद्ध्या कामक्रोधाद्युपशमे भक्तिः प्रदीप्ता भवत्यजातप्रेम्णां जातप्रेम्णां तु अनुवृत्तिर्मदासक्तिस्तस्या जीविकार्थं न भजामि दर्शनं दत्त्वाप्यन्तर्दधामि तत एवानुवृत्तिरासक्तिः प्रवृद्धीभवति । तत्र जातप्रेमस्वेव दृष्टान्तः । यथेति । तस्य धनस्यैव चिन्तया निभृतः पूर्णो व्याप्त इति यावत् । अन्यत् क्षुत्पिपासाद्यपि न वेद । अतो मां भजतां मदनुवृत्तिरेव वाञ्छिता तस्या आधिक्येन सम्पादनादहन्तान् प्रकटमभजन्नप्यप्रकटमधिकमेव भजामीत्यहमपि वस्तुतः करुण एव द्वितीयप्रश्नस्योदाहरणीभूतो यथा भवत्य इत्यतो मम स्वदर्शनदानादाने एव भजनाभजने न व्याख्येये । ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति वस्तु प्रतिज्ञाया अन्यथाभावानर्हादिति भावः ॥ २० ॥

केनचित्कृता विशुद्धरसदीपिका ।

भजत इति वै एव नैव भजन्तीत्यर्थः । हि प्रसिद्धौ एवमकृतज्ञानामज्ञत्वेनाभजनमभिप्रेतं ज्ञात्वा ये न भजन्ति ते त्वति दोषयुक्ता इत्याह । गुर्वीति । गुरूपेक्षका इत्यर्थः । प्राणदण्डोचिताविप्रादेरिव तादृशस्योपेक्षैव द्रोह इतिभावः । अत्र हिपदार्थे तात्पर्य्यं नास्ति । किन्तु गौण्या वृत्त्या कृतोपकारोपेक्षका गम्यन्ते तेन च तेषां धर्म्मार्थं सौहृदयापेक्षाराहित्यं व्यज्यत इति ज्ञेयं "यद्वा स पिता यस्तु पोषक" इति न्यायादुपकर्ता गुरुतुल्यस्तदुपेक्षका गुरुद्रुह इत्यर्थः । अयं विवेकः आत्मारामा अपराग्दृशः तेचान्तरनिष्ठत्वेनोपकारापकारानुसन्धानात् निर्दोषा एव केचिदाप्तकामाः भोगपूर्णत्वेन तदिच्छारहितास्तेऽप्यदूष्याः अन्येचाकृतज्ञा बालादिवन्मूढास्तेऽपि तथा तुरीयास्तु कृतघ्ना इति महादोषभाज इत्यर्थः ॥ १९ ॥

तदेवं ताभिर्विचित्रक्रीडया रममाणस्य न यद्यपि तादृशोत्तरादिचातुर्य्येणच तृतीयमदृष्टमानं मत्वा परितोषादतिकाठिन्यमेवा-

केनचित्कृता विशुद्धरसदीपिका ।

स्मिन् यस्यैव सितस्मिति परस्परं क्षिनिकोचैः सङ्केतयन्तीरिवालक्ष्य परमचातुर्येण त्मनि तथा तथाभजनेऽपि सर्वेभ्यो भजनकृत्यः उत्तमत्वं किमुत भजन इति समानमभिनयन्नाह । नाहमिति । तुभिः न्नोपक्रमे आत्मारामत्वादिचातुर्विध्यरहितोऽप्यहं भजतोऽपि न भजामि मयापरोक्षं भजता तिरोहितमिति वक्ष्यमाणाद्विद्यमानमपि स्वभजनं मध्ये मध्ये तेभ्यो न प्रकटयामीत्यर्थः । नत्रः सर्वदौ प्रयोगश्च स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैयग्र्यादेव हे सख्य इति आत्मारामत्वादिराहित्यमेव साधितं जन्तूनित्यविशेषात सर्वत्रैव ममेदृशो व्यवहारो न भवतीष्वेवेति नात्मनि ममौदासीन्यं शङ्कनीयं कथं तं भजसीति तत्राह । अमीषामिति । अनुवृत्तीनां सन्ततध्यानानां वृत्तिर्यस्य तस्मै प्रेमप्रकर्षायेत्यर्थः । नतु काठिन्येनेति भावः । नन्वस्माकं त्वय्यनुवृत्तिः सर्वदा वर्त्तत एव किन्तद्वृत्त्येति चेत्सत्यं तथापि तद्वैशिष्ट्यार्थमिति सदृष्टान्तमाह । यथेति । विशेषतो नष्टे हारिते इतिवैयग्र्यविशेषो दर्शितः अत एव तच्चिन्तया नितरां भृतो व्याप्तः तदेव रूपगुणादिना सर्वत्राशित्वात्सर्वपूर्णत्वेन च प्रत्युपकारापेक्षतया साम्येऽपि करुणपितृनप्यातिक्रम्य स्वस्य हितैषित्वं प्रदर्शितं स्वाधेयस्व वशीकारसर्वपुरुषार्थशिरोमणिस्वप्रेमदानात् एवश्चात्मनः प्रियप्रेमरसास्वादाधिक्यं बोधितं सन्ततद्दर्शनलोभेन तत्तद्विरहदुःखसहनोक्तिरिति संक्षेपः ॥ २० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तृतीयप्रश्नीयांश्चतुरो विभजति । भजतोऽपीति । केचित् भजतोऽपि जनान् वै निश्चयेन न भजन्ति तर्हि अभजतः कुतो भजेयुः न कुतोऽपि ते चतुर्विधास्तत्रैके आत्मारामास्तेषान्तु स्वात्मसुखैकमग्नतयान्यसेवापेक्षास्फूर्त्तेरभावान्नान्यकृतसेवायामुत्कर्षमतिर्न वा तद्भजनावकाशो नच तद्भजने किमपि फलोद्भावनमतो न तत्र प्रवृत्तिः नच तर्ह्यात्मारामसुनिसेवनवैफल्यमाशङ्कनीयं तैस्तत्प्रत्युपकारप्रवृत्त्यभावेऽपि तत्सुकृतस्य तस्मिन्नात्मानन्दपूर्णेऽतिशयाधायकत्वाभावेन "तस्य पुत्रा दायमुपयान्ति सुहृदः साधु कृत्यां द्विषन्तः पापकृत्या"मिति श्रुतेः तत्सुहृदां तत्फलभावत्त्वाध्यवसायात् ज्ञानीत्वात्मैव मेतमिति स्मृतेस्तस्येश्वरात्मकतयेश्वरद्वारा तत्सेवाफलोत्कर्षस्यावश्यं भावित्वात् "यद्येको ब्रह्मविद्भुङ्क्ते जगत्तर्पयतेऽखिलं तस्माद्ब्रह्मविदे देयं यद्यस्ति वस्तु किञ्चने"त्यादिस्मृतेश्च अन्ये आप्तकामास्ते त्रिविधा तत्र ये सर्वकामसुखानाम् एतस्यैवानन्दस्येत्यादिश्रुत्यात्मसुखमात्रत्वात्तदाश्रित्यप्राप्त्यैव प्राप्तसर्वकामास्तेतु प्रथमपक्ष एव गतार्थाः येच ग्राम्यसुखेषु नित्यार्तिदेन विरोनेत्याद्युक्तरीत्या तत्सुखकामे च दुःखं कामसुखापेक्षत्यादिवाक्यैर्दोषदृष्ट्या तत्र कामाभावेनैवाप्तकामा विरक्तास्तेषामपि भगवत्प्रियत्वात्पूर्वेषामिव प्रत्युपकाराप्रवृत्तिरेव तत्सेवनफलस्यापीशद्वारैव सम्भवान्न सेवनवैफल्यं ये पुनः समृद्धकामत्वादाप्तकामा नृपादयस्तेषान्तत्सेवाकामाभावेन प्रत्युपकाराप्रवृत्तावपि बहुसमृद्धोऽयं कदाचिदपि यदि कृपां करिष्यति तदास्मद्बहुभद्रं भविष्यतीत्याशया जनानां तत्सेवाप्रवृत्तिः अन्ये ये अज्ञाः स्वबुद्धिमान्द्यप्रमादादिनान्यकृतसेवाज्ञानशून्यतयैवाप्रत्युपकारिणस्तेषामपि कदाचित्तत्परिज्ञाने प्रत्युपकारसम्भावना ये पुनर्गुरुद्रुहः कृतघ्ना उपकारिण उपकारं ज्ञात्वापि दुष्टचित्ततयैव तत्प्रत्युपकाराप्रवृत्ताः प्रत्युत विरोधिनस्ते तु दुर्जनत्वादेव सद्भिर्हेयाः परत्र दुःखभागिनश्चेति भावः ॥ १९ ॥

नन्वेतेषु पक्षेष्वस्माकं द्वितीयपक्षविशेषोऽपि भवतः कस्मिन्पक्षे निवेश इत्यपेक्षायां मम तु तत्सर्वविलक्षणत्वमित्याह । नाहन्त्विति । हे सख्य इति सम्बोधनेन नास्मदुक्तौ वञ्चनाशङ्कागन्धोऽपीति भावः अहं भजतो भजामि अपि तु न तथा वणिज इव स्वार्थार्थं किन्तु मत्तः सेवाफलप्राप्तौ विश्वासेन पुनः तेन स्वस्मिन्ननुवृत्तयेऽनुवृत्तिद्वारा तेषां परमानन्दघनस्वस्वरूपलाभाय चाभजतोऽपि भजामि परन्तु न कथा करुणानामिव धर्माय पितराविव रागपरवशतया वा निष्कामाराधकानामिव वा किन्तु स्वयमभजनेऽपि पालनदर्शनेन परमकृपालुदृष्ट्यास्वस्मिन्ननुवृत्तये तेषां स्वरूपसुखलाभाय च तथा अभजतो न भजामि तदपि अभजने दुःखप्राप्त्या तदपायतद्दुःखनिवृत्तिसुखलाभाय मय्यनुवृत्तये ततः परमनिर्वृत्तिलाभाय च तथा भजतोऽपि न भजामि तदपि तेषां स्वस्मिन्ननुवृत्तये एव किञ्चिद्भजनाननुभजनेन तु तत्सुखप्राप्तौ विश्रमितानामनुवृत्तिशैथिल्ये परमपुरुषार्थलाभाभावात् भजने सम्नुग्रहात्सुखमनुभूय पुनर्मया भजने तद्विच्छेदे तत्प्राप्त्यै मय्यनुवृत्त्या परमपुमर्थसिद्धिरिति भावः । तत्र दृष्टान्तमाह । यथाधनः इति । यथा कश्चिज्जन्मारभ्याधनः कदाचित्किञ्चिन्महद्धनं लब्ध्वा पुनस्तद्धने विनष्टे तच्चिन्तया निभृतोऽन्यन्न वेद तथा सकृदनुभूतमत्सुखलाभाय मय्यनन्यानुवृत्तिरुत्सा मलिनत्वप्रातिश्च भवति ॥ २० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तृतीयप्रश्नस्योत्तरमाह । भजत इति । ते चतुर्विधाः केचिदात्मारामाः अन्तर्मुखाः केचिद्बहिर्मुखा अपि पूर्णत्वादाप्तकामा उपकारापेक्षारहिताः केचिद्कृतज्ञाः उपकारानुपकारज्ञानविधुरा अत्यन्तमूढाः केचित् उपकर्त्ता गुरुः स्मृत इत्युक्ता गुर्वादय उपकारिणस्तेभ्यो द्रुह्यन्तीति ते तथाच तदुपकारं न जानन्ति प्रत्युतापकारं प्रकुर्वन्ति ते अतिकठिना इत्यर्थः ॥ १९ ॥

समानार्थकम् एतेषु मध्ये भवान् क इत्यभिज्ञानापेक्षायामहो स्वमुखेनैव चरमकोटिप्रविष्ट इति सन्तुष्टा अक्षिसङ्कोचैः परस्परं गूढस्मितमुखीर्मानिनीश्चालक्ष्याह । नेति हे सख्यः । अहन्तु भजतोऽपि न भजामि तुशब्देन पक्षान्तरव्यावृत्तिः तच्चाभजनं नाकृतज्ञत्वादिनिबन्धनं किन्तु तदनुवृत्तिद्वारेच्छानिबन्धनमित्याशयेनाह । अमीषां भजताम् जन्तूनाम् अनुवृत्तये निरन्तरध्यानप्रवृत्त्यर्थं तान्न भजामि जन्तुमात्रं प्रति यदेवं तदा सखीर्युष्मान् प्रति किं वक्तव्यमिति सम्बोधनाशयः तथाच कारुणिकः परमसुहृदहं नत्वकृतज्ञ इति भावः । एतत्सदृष्टान्तमाह । यथेति । यथा अधनो दरिद्रो दैववशाल्लब्धधनो जातः पुनश्च तस्मिंल्लब्धधने विनष्टे सति तस्य धनस्यैव चिन्तया निभृतः पूर्णः अन्यत्क्षुत्पिपासादिकमपि न वेद ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

केचित्तु भजतोऽपि न भजन्ति यदा तदा अभजतः कुतो भजेयुः ते चतुर्विधाः एके आत्मारामाः "आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतिप्रोक्तजिज्ञास्यब्रह्मनिष्ठाः ध्रुवास्मृतियुक्ताः ध्यानप्राप्तब्रह्मानन्द-

एवं १ मदर्थोज्झितलोकवेदस्वानां हि वो २ मय्यनुवृत्तयेऽबलाः ।
मयापरोक्षं भजता तिरोहितं ३ मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥ २१ ॥
न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ।
४ या मा भजन्दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ २२ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे ।
पूर्वार्धेरासे गोपीसांत्वनंनाम
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निमग्नाः तेषां स्वभक्ताभक्तकर्मानुसारित्वाभावात् केचिदाप्तकामाः लब्धप्राकृतैश्वर्याः विषयानन्दनिमग्नाः तेषामुपकर्त्रनुपकर्तृविवेकलोपात् अन्ये अकृतज्ञाः उपकारानभिज्ञा इत्यर्थः । अपरे "जन्मदो व्रतदश्चैव प्राणदो ज्ञानदस्तथा । गुरुर्भवति धर्मेण श्रेष्ठास्तु त्द्युत्तरोत्तरा" इत्यभियुक्तोक्तेभ्यो गुरुभ्यो द्रुह्यन्तीति तथा कृतघ्ना इत्यर्थः ॥ १९ ॥

नन्वज्ञात्र को भवानित्यत आह । नाहमिति । हे सख्यः ! अहं तु तद्विलक्षण इति तुशब्देन तेभ्यो वैलक्षण्यं द्योतितं तर्हि भजतोऽप्यस्मान् वने विहाय किमर्थमन्तर्हितकौतुकं त्वया कृतमत आह । अमीषां भजतामनुवृत्तिवृत्तये अनुवृत्तिर्मदनुरक्तैवृत्तये अविच्छेदाय निरन्तरध्यानप्रवृत्त्यर्थं भजतोऽपि न भजामि एतदेव दृष्टान्तेन स्पष्टयति । यथेति । तच्चिन्तया धनध्यानेन निभृतः पूर्णः अन्यान्निलाहितं न वेद ॥ २० ॥

भाषा टीका ।

कोई तो चाहने वालेको भी नहीं चाहते हैं तो नहीं भजन वाले को तो क्यों भजेंगे तिनमें एक आत्माराम हैं और आप्त काम हैं किंवा अकृत्ज्ञ हैं अथवा गुरुद्रोही हैं ॥ १९ ॥

हे सखीहो मेरे भजने वाले जनों को भी मैं नहीं भजता हूं क्यों कि मेरे विषे उनकी अनुवृत्ति प्रीति को वढाने के वास्ते जैसे कि निर्धन पुरुष को धन मिलके फिर खोजावे तो उसकी चिंता में लगने से और किसी चीज को नहीं जानता है तैसे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं मदर्थोज्झितलोकवेदस्वानां मदर्थे उज्झितो लोको युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां वो युष्माकं परोक्षमदर्शनं यथा भवति तथा भजता युष्मत्प्रेमालापान् शृण्वतैव तिरोहितमन्तर्धानेन स्थितम् तत्तस्मात् हे अबला ! हे प्रिया ! मामामसूयितुं दोषारोपेण द्रष्टुं यूयं मार्हथ न योग्याः स्थ ॥ २१ ॥

अस्तामिदं परमार्थं तु शृणुतेत्याह । नेति । निरवद्या संयुक् संयोगो यासां तासां वो विबुधानामायुषापि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्तुं न पारये न शक्नोमि कथंभूतानाम् या भवत्यो दुर्जरा अजरा या गेहशृङ्खलास्ताः संवृश्च्य निःशेषं छित्वा मामामभजंस्तासां मादृशं तु बहुषु प्रेमयुक्ततया नैकनिष्ठम् तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु युष्मत्सौशील्येनैव ममानृण्यं नतु मत्कृतप्रत्युपकारेणेत्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवमित्यस्यानुवृत्तय इत्यनेनान्वयः हे अबलाः ! इति तत्र स्वतः शक्त्यभावं सूचयति प्रियं प्रिया इत्यन्योऽन्यप्रियत्वेन मम तिरोधानाद्यपराधो न ग्राह्य इति भावः । अन्यत्तैर्व्याख्यातं यद्वा एवमित्यस्य मयेत्यनेनान्वयः तादृशचिन्तानिभृतेन मयेत्यर्थः तत्र हेतुः मदर्थेति अतः परोक्षमपि भजतैव प्रेमालापं शृण्वता गुणगाथां गायता भावविशेषं च पृथक् स्मरता केवलमन्तर्धानमात्रेणात्रैव स्थितमित्यर्थः । अथवा अनुवृत्तिवृत्तये इत्युक्तं सा च कीदृश्यनुवृत्तिस्तां दृष्टान्तेनाह । यथेति । अतोऽस्य पूर्वेणैव संबन्धः हे सख्य ! इत्यनेन इदञ्च युष्मानधिकृत्य नोच्यते सहजसख्यादिति व्यञ्जितमेवाभिव्यञ्जयति । एवमिति हि अपि युष्माकमपि मय्यनुवृत्तये एवं युष्मान् न भजामि किं काका अपितु नैव तत्र हेतुः मदर्थेति यद्वा युष्माकमपि मय्यनुवृत्तये किमपितु नैव कुतः एवं तादृशचिन्तानिभृततया मदर्थमेव नान्यत् किञ्चिदुद्दिश्य उज्झिता उपेक्षिता लोकाश्चतुर्दशभुवनानि श्रीवैकुण्ठादयश्च अतो वेदाश्च तद्बोधित-

१ मदर्थार्पितलोक २ मय्ययुवृत्तयोऽ ३ सासूयितुं नार्हत मां ४ यो मां भजेद्दुर्जरगेहशृङ्खलाः संवृश्च्य बुद्धिं प्रति यातिसोऽमुना इति विजः पाठः

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कर्मानादरात् अत एव स्वाश्च पतिपुत्राद्यो याभिस्तासां स्वत एव मयि निरन्तरविशुद्धपरमानुवृत्तिवृत्तीरित्यर्थः । एवम्मुमुक्षुभ्यो मुक्तेभ्यश्च भक्तेभ्योऽप्यासां विशेषो दर्शितः तेषां तत्तदपेक्षासम्भवात तादृशभावाभावाच्च ननु तर्हि किमर्थमधुनैवान्तर्हितं तत्राह । मयेति । परोक्षं भजतेति कुत्रापि मया नागतमासीत् किन्तु युष्मदन्तिकेऽत्रैव वर्त्तमानेन परोक्षं मदगोचरधिया युष्माभिः क्रियमाणं विचित्रप्रेमालापादिकं भजता हेतौ शतृङ् श्रोतुमित्यर्थः । एवं कितव योषितः कस्त्यजेदित्यादिकं परिहृतं यद्वा अकारप्रश्लेषेण अपरोक्षं साक्षादेव भजता तिरोहितं युष्मददृश्यमात्रेण स्थितं तथापि प्रियजनदुःखहेतुत्वेन दोषः स्यादेवेतिचेत्तर्हि क्षन्तव्यमित्याशयेनाह । प्रियंप्रिया इति । ननुयद्वा तदपिकिमर्थं तत्राह प्रियं प्रिया इति । प्रियाभिः सह प्रियस्य तद्युक्तमेवेति भावः । यद्वा तत् परोक्षभजनं प्रियं यस्य तं मां सहजमत्कौतुकरसेनेत्यर्थः । अहो बतेदं साधुकौतुकं यत् प्रियजनप्राणैः सह क्रीडनमितिचेत्तत्राह । प्रिया इति प्रेम्णा तदपि प्रीतिविशेषायैव स्यादित्यर्थः । यद्वा तत् तथापि माशब्दद्वयं निषेधे प्रकृत्यर्थं गमयति अर्हतेत्यर्थः । कुतः प्रियं प्रियाः प्रियस्य प्रियासु तथा कर्तुमयुक्तत्वादित्यर्थः । एतच्चानुनयचातुर्यम् अन्यत्तत्र तत्र समानम् ॥ २१ ॥

व इति संबन्धमात्रे षष्ठी युष्मान् प्रतीत्यर्थः स्वसाधुकृत्यं स्वीयं प्रत्युपकारकृत्यं न पारये कर्तुं न शक्नोमि यद्वा वो युष्माकं यत् स्वीयम् असाधारणं साधुकृत्यं तदहं न पारये तत्र हेतुः निरवद्या सर्वनैरपेक्ष्येण सर्वोपाधिराहित्येन निर्मलप्रेमविशेषेण च निर्दोषा संयुक् संयोगः सम्यग् मद्विषयकचित्तैकाग्रतासङ्गमो वा यासां तासामिति मुमुक्षुप्रभृतिमनः कामादिदोषः परिहृतः प्रत्युत स्वविषयकतादृशकामस्य महानेव गुणोऽभिप्रेतः निरवद्यसंयोगहेतुत्वात् किञ्च या इति दुर्जरा अच्छेद्या अपि गेहशृङ्खलाः गेहानि गेहसंबन्धिपतिपुत्रादयस्तत्तदर्थकृत्यानिच तान्येव शृङ्खलाः कृतिनामपि बन्धहेतुत्वात् ताः संवृश्च्य अभजन् भवत्य इति प्रेमगौरवेण अतो मम तादृशतादृशत्वाभावात् न पारये इत्यर्थः इदञ्च ताभिः सहस्वच्छन्देन सदा क्रीडाळोभेनाकमपारणे हेतुः निरवद्यं निजाङ्गमात्मानं वा संयुञ्जन्ति समर्पयन्तीति तथा तासां किञ्च दुर्जराः गेहस्य शृङ्खला नित्यगोपालनादिदृढकृत्यनिबन्धान् सर्वबन्धुजनानुवृत्तिबन्धांश्च संवृश्च्य या भवतीरहं माभजन्नसेवितवानस्मि शृङ्खलामिति पाठेपि तथैवार्थः दुर्जरेति विशेषणेन शृङ्खलारूपकेण च निजशक्त्याप्यच्छेद्यत्वं संशब्देन च आसक्तित्यागेऽपि बहिस्त्यागासामर्थ्यं किंवा संच्छेदेच्छायामपि सत्यामसामर्थ्यं ध्वनितामितिदिक् । युष्मद्वदात्मानर्पणेन सर्वनैरपेक्ष्याभजनेनच प्रत्युपकाराशक्तेः अत एव ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्यादिनिजवचनव्यभिचारापत्तेश्चाहंयुष्माकमृण्येवेत्यर्थः अन्यत्समानं यद्वा साधुर्यो ना पुरुषः मद्भक्तः कश्चित् प्रतियातु प्रत्युपकारेणानुगच्छतु आशिषि पञ्चमी यद्वा वो युष्माकं तत्स्वसाधुकृत्यं प्रतियातु अनुवर्त्ततामनुकरोत्वपि अहन्तु न पारयाम्येव इति सर्वथा प्रत्युपकारासामर्थ्योक्तिः अग्रे च प्रणयकलहाध्यायान्ते श्रीरुक्मिणीप्रत्ययमेव वक्ष्यति वयं प्रतिनन्दयाम इति अत्रच प्रतिनन्दनेऽप्यशक्त्या केवलमृणित्वमेवापादयत् अतस्तस्याः सकाशादप्यासां विशेषः

प्रसिद्ध एवेति "निजोच्छिष्टप्रसादस्य प्रदानेन सदानुगम्" पुष्टं विधत्ते यस्तस्मै श्रीधरस्वामिने नमः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिण्याम्

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अद्यैव च भवतीनां निकट एव स्थितवानस्मीत्याह । एवं दुहन्त्योऽभियुः काश्चिदित्यादि प्रकारेण मदर्थेत्यादि । हे अवला इति तत्तत्परित्यागे दुष्करत्वं सूचयति । मासूयितुमित्यत्र हेतुविशेषमप्याह । प्रियं प्रिया इति । हि निर्द्धारणे । यद्वा । एवं वधाधन इत्यादिप्रकारेण वो युष्माकं मय्यनुवृत्तिवृत्तये एव मया तिरोहितम् । पदानि व्यक्तमेतानि नन्दसूनोर्महात्मन इत्यादिभवद्वाक्यानुसारेणाग्रतः पार्श्वतः स्थित्वैव भवद्दृष्टिमात्रागोचरीबभूव इत्यर्थः । किं कुर्वता परोक्षं भजता प्रेमाळापादिमनुमोदमानेन । तथानुग्रहे हेतुः मदर्थेति यद्वा अन्यत्तैः माद्वयं निषेधे तथापि प्रियं मल्लक्षणं मासूयितुं मार्हथ अपि तु मया दत्तदुःखा यूयमर्हथैवेत्यर्थः । कुतः प्रियं प्रियाः । प्रियस्य तथा कर्तुमयुक्तत्वादित्यर्थः । एतच्चानुनयचातुर्यम् ॥ २१ ॥

व इति सम्बन्धमात्रे षष्ठी । युष्मान् प्रतीत्यर्थः । स्वसाधुकृत्यं स्वीयप्रत्युपकारकृत्यं न पारये कर्तुं न शक्नोमि । यद्वा । वो युष्माकं यत् स्वीयमसाधारणं साधुकृत्यं तदहं न पारये तत्सदृशप्रत्युपकारे न समर्थोऽस्मीत्यर्थः । स्वसाधुकृत्यत्वमेव दर्शयति । निरवद्या काममयत्वेन प्रतीयमानत्वेऽपि वस्तुतो निर्मलप्रेमविशेषमयत्वेन निर्दोषा संयुक् संयोगः सम्यङ्मद्विषयकचित्तैकाग्रता स्वस्वपत्यादि स्पर्शाभावेन च निर्दोषा संयुक् सङ्गमो यासाम् । किञ्च या इति दुर्जराः कुलवधूत्वेनच्छेत्तमशक्या अपि गेहशृङ्खला गृहसम्बन्धिन्य ऐहिकपारलौकिकसुखकरलोकधर्ममर्यादाः संवृश्च्य या मामभजन् परमानुरागेण मय्यात्मनिवेदनं कृतवत्य इत्यर्थः । अतो ममान्यत्रापि प्रेमयुक्तत्वान्न पारये इत्यर्थः । अत्रोत्तरं व इति एवमनपेक्ष्यैव या इति प्रयुज्यते पश्चादेव च तेन योज्यते । अतः प्रथमपुरुषत्वम् । यद्वा । अन्यत्तैः विगतो बुधो गणनाभिज्ञो यस्मात्तेनानन्तेनायुषापीत्यर्थः । शृङ्खलामिति क्वचिदेकवचनान्तः पाठः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्

द्वात्रिंशोऽध्याय ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मयेति । परोक्षं भजता परोक्षमुपकारं कुर्वता ॥ २१ ॥

निरवद्यसंयुजां निरवद्ये मयि संयुक्तचित्तानां । वः साधुकृत्य मुपकारं कर्तुं न पारये या यूयं

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गोप्यः दुर्जयगेहशृङ्खलाः अच्छेद्यगृहस्नेह पाशान् संवृश्च्य छित्वा मा अभजन् तासां कर्तुं न पारये इत्यन्वयार्थः सा शृङ्खला अधुनापि प्रतियातु भूयोऽपि निवर्त्ततामित्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मनः कृतघ्नतामाविष्कुर्वन् कारुणिकत्वमेवाह । एवमिति । हे अवला ! मदर्थमुज्झितास्त्यक्ता लोका शुकायुका प्रतीक्षणात् वेदः धर्माधर्मानपेक्षणात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां वो युष्माकमनेन कृतघ्नत्वमाविष्कृतं मय्यनुवृत्तये परोक्षं भजता उपकुर्वता मया तिरोहितम् अनेन कारुणिकत्वमुक्तं तस्माद्धे प्रियाः ! प्रियतमं मामसूयितुं दोषदृष्ट्या द्रष्टुं मार्हथ ॥ २१ ॥

आत्मनः कृतज्ञता काष्ठामाह । नेति । निरवद्यं निष्कपटं यथा तथा संयुज्यन्ते भजन्त इति तथा तासां वो युष्माकं सुसाधु यथा तथा कर्तुं प्रत्युपकर्त्तुमहं विबुधायुषापि न पारये न शक्नोमि मनुष्यायुषा तु न शक्नोम्येव ब्रह्मायुषापि न शक्नोमीति भावः । या भवत्यः दुर्जरगेहशृङ्खलाः संछिद्य गृहरूपं पाशं सम्यक् छित्वा मा माभजन् तत्तस्मात्तासां वः सा शृङ्खला अधुना प्रतियातु भूयोऽपि निवर्तितामित्यर्थः । मया कार्यः प्रत्युपकारो मुक्तिप्रदानमेव तत्तु सदृशं भवेदिति भावः । यद्वा तस्माद्युष्माकमेव साधुना साधुकृत्येन तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु "मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ! नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षती"त्युक्तरीत्या युष्मत्साधुकृत्यं तेनैव जीर्यत्विति भावः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवान् गोपीनां सेवास्तवनव्याजेन स्वोपासनाप्रकारं दर्शयति । यथेति । यथा अधनो धनहीनः दरिद्रः दैवाल्लब्धधने नष्टे तच्चिन्तया नष्टधननियततरतमनस्कत्वेन नितरां भृतं गृहीतम् अन्यत्र वेद यद्वा निभृतं स्तिमितं निश्चलं स्थिरं पुरोवर्त्यन्यद्वस्तु हे अवलाः ! एवं मदर्थं मामुद्दिश्य अर्पिते लोकवेदस्वे लौकिककर्मादिककर्मलक्षणसर्वस्वे यासां तास्तथा तासां वो युष्माकम् अनुवृत्तयः सेवालक्षणा उपासना अविषया न स्युरित्यन्वयः तर्हि किमर्थं भवतान्तरधायीत्याशङ्क्याऽस्माकं स्वभावोऽयमित्याशयेनाह । मयेति । अत्र भजतेति शतृप्रत्ययः इच्छावाची परोक्षं भजता व्यवधानमिच्छता मया तिरोहितं पारोक्ष्यं कृतं "परोक्षप्रिया इव हि देवा" इति श्रुतेः व्यवधानमस्माकं प्रियं यस्मात्तस्मात् हे प्रियाः ! यूयं प्रियं मां सासूयितुम् असूया सहितां मतिं कर्तुं नार्हथेत्यन्वयः "संनिकर्षो हि मर्त्यानामनादरणकारण"मिति स्मृतेश्च शिक्षणायाप्येवं कृतम् ॥ २१ ॥

ननु युष्मदनुग्रहाभावात् तत्कथमित्याशङ्क्यानुग्रहविशेषं कथयति । नेति । विबुधायुषा दिव्यवत्सरकल्पितजीवनलक्षणेनापि अहं निरवद्यसंयुजां निर्दुष्टमनोयोगवृत्तीनां वः सुसाधुकृत्यं युष्माकं सर्वसंमतं निर्दोषकर्म प्रतिकर्तुं न पारये न शक्नोमीत्यनेन गोपीष्वधिकोऽनुग्रहोऽस्तीति दर्शितम् न केवलं युष्मास्वनुग्रहविशेषो मम निर्व्याजभक्त्या भजमाने कस्मिंश्चिदपि स्यादित्याशयेनाह । यो मामिति । यो मां भजन्मामुद्दिश्य भक्तिं करोति स पुरुषः स्त्रीजनो वाधुनास्मिन् जन्मन्येव दुर्जरदेहशृङ्खलाः भक्तिज्ञाने विना जरयितुं शिथिलीकर्तुमशक्याः लिङ्गशरीरलक्षणशृङ्खलाः संवृश्च्य छित्वा वृद्धिं स्वरूपभूतानन्दलक्षणां प्रति याति तस्य तावदेवाचिरमित्यादिश्रुतेः यद्वा दह्यते सिच्यते इति देहः दुर्जराः दुश्छेद्याः पुत्रमित्रादिनिबद्धस्नेहलक्षणाः शृङ्खलाः संवृश्च्य मां भजेत्सेवेत सोऽधुनैव भक्तिज्ञानादिसाधनसामग्रीलक्षणां वृद्धिं प्रतियातीत्यन्वयः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रिंशोऽध्यायः ॥ ३० ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न पारयेऽहम् न शक्नोमि २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तथापि यदेवं मया कृतं तत्र मासूयाकरणीयेत्याह । एवमित्यादि । हे अवलाः ! रामाः अव अवरवाण्यं लान्तीति तथा मा मामसूयितुं मार्हथ ननु भजन्तीरस्मान् विहाय गतवान् कथमासूयितव्य इत्याह । मयेति । परोक्षं भजतैव मया तिरोहितं तिरोभूयापि मया वो भजनं कृतमित्यर्थः । साक्षाद्भजनात् परोक्षभजनमेव प्रेमगमकं यतो भवत्यः प्रिया ननु जन्तवः अहं प्रियः नत्वात्मारामादिः इत्याह प्रियं प्रियाः ननु तर्हि तिरोहितमेव कथं तत्राह । वो युष्माकमनुवृत्तिवृत्तये अनुवृत्तेर्वृत्त्यर्थं भवतीनां मदङ्गसङ्गोत्सवेन पूर्णं मन्यानां पुनरुत्कण्ठां वर्द्धयितुं ननु तदा तिरोहितमेवेति सत्यं भजतेति यदुक्तं तत्र किंप्रमाणमिति चेत्तत्स्वभाव एव प्रमाणं यतोऽहं कृतज्ञ एवेति स्वकृतज्ञत्वं तासां विशेषणद्वारैव प्रकटयति । मदर्थेत्यादि । एवंप्रकारेण मदर्थं मन्निमित्तमुज्झितानि लोकवेदस्वानि याभिस्तासां वोऽभजने ममाकृतज्ञता स्यादितिस्वदोषपरिहारार्थं परोक्षभजनमेव कृतं तच्च सन्दर्शनरूपं कदाचिच्चीजनाविषु भवतीमिस्तु न दृश्य इति परोक्षं भजतेति पदयोर्ध्वनिः अतः सम्यगुक्तं मासूयितुमित्यादि ॥ २१ ॥

यद्यपि वो भजनं कृतमेव तथाप्यहं वः ऋणीत्याह । न पारयेऽहमित्यादि । निरवद्या निरुपाधिर्निर्व्यलीका वा संयुक् यासां तासां वः स्वसाधुकृत्यं स्वकीयसाधुकर्म अहमीश्वरोऽपि न पारये शोधयितुं

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

न शक्नोमीत्यर्थः । यद्वा वः कृत्यं स्वसाधुस्वेनैव साधु यथा भवति तथा कर्तुं न पारये विलम्बेन पारयिष्ये इत्यपि नेत्याह विबुधायुषा देवायुः परिमाणकालेनापि कुत इत्याह । या युष्मान् दुर्जरगेहशृङ्खलाः संवृश्च्य छित्त्वा माऽभजं यथा भवत्यो दुर्जरगेहशृङ्खलाः संवृश्च्य माम भजन् तथाहं भवतीर्माभजमित्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं स्वस्याभजने हेतुमुक्त्वा प्रकृते तदभावमाह । एवमिति । यदुक्तं ताभिररण्ये स्त्रियो रात्रौ कथन्त्यक्तव्याः तदर्थमेवमुच्यते द्वयमत्र कर्तव्यं भजतानुवृत्त्यर्थमभजनं रात्रौ रक्षार्थं भजनञ्च तत्परोक्षभजनेन सिध्यतीति मयापरोक्षं भजता तिरोहितं भजने हेतुमाह । एवमिति । मदर्थमेव उज्झिताः लोकवेदस्वा याभिः वृथा परित्यागव्यावृत्त्यर्थं मोक्षार्थपरित्यागव्यावृत्त्यर्थञ्च मदर्थमुज्झितेत्युक्तम् आद्ये त्यागोऽनिष्टहेतुः द्वितीये न मम भारः त्रयः पदार्थास्त्यक्तव्याः लोको दुस्त्याज्यः आर्यमार्गो वैदिकः प्रकारः तादृश इति मयैव लोके नथैव प्रतीतिजननात् पतिपुत्रादयो दुस्त्याज्याः तत्रापि न मयि प्राप्ते किन्तु मदर्थे मत्कामनायामेव तदा मे विचिकीर्षितो भवतीति सर्वधर्मान् परित्यज्येति तादृश एव मम भाव इति त्रितयपरित्यागे मया भजनं कृतं वस्तुतस्तु स्वपदं स्वात्मपरम् अन्यथा पतिपुत्रादीनामपि लोकवेदमध्यपातात्तेनैव तत्प्राप्तेः स्वपदमनर्थकं स्यात् तथाच स्वात्मकत्वेन स्नेहविषयत्वाभाव एव तत्यागः एतासां भगवदर्थमेव प्रीतिविषयत्वादात्मादीनामिति सारं युक्तश्चायमर्थः अनन्याः पालनीया इति वः युष्मान् मय्यनुवृत्तय इत्येकम् फलम् अबला इति सम्बोधनात् न सतामिव प्रत्यक्षेण भवतीनां भजनं सिध्यतीति ज्ञापितं परोक्षं भजता अतिरोहितं वा भजतां यत्तिरोहितां वा भजनं भोगो वा भोक्त्रैव मया भोगं कुर्वता तिरोहितं भवतीभिर्न दृष्ट इत्यर्थः । अनेनाभजनपक्षो व्यावर्तितः तस्मिन्नस्त्यसूया सम्भवति अकृतज्ञत्वादिदोषारोपणेन मा मसूयितुं नार्हथ यतः प्रिये प्रिये दुष्टे स्वस्यापि तथात्वस्यावश्यकत्वात् त्यक्तुमशक्यत्वात् किञ्च प्रिया यूयमकृतज्ञत्वादयो हि धर्मा न प्रतीतिविषये भवन्ति औदासीन्यसामानाधिकरण्यात् ॥ २१ ॥

एवं तासां मनोमार्जनमुक्त्वा भक्तिमार्गविरोधं परिहर्तुं ताः स्तौति । न पारयेऽहमिति । निरवद्यसंयुजां निर्दुष्टभजनयुक्तानां स्वसाधुकृत्यं स्वप्रत्युपकारकरणं विबुधायुषा ब्रह्मायुषा मन्वन्तरपरिमितायुषा वा विशेषेण बुधानां ज्ञानिनामनन्तायुषा वा न पारये भजनप्रत्युपकारयोर्वैसादृश्यात् भवतीनां भजनं निष्कपटमस्मद्भजनं सकपटमिति नह्यल्पजलस्यापि तुल्यं बह्वपि मरुमरीचिकाजलं भवति सत्यभजनन्तु ब्रह्मणोऽशक्यमेव जीवधर्मत्वात् तत्रापि विशेषमाह । या मा भजन्निति । दुर्जरा हि गेहशृङ्खला या जीर्यतोऽपि न जीर्यतीति तां संवृश्च्य छित्त्वा याः भवत्यः प्रसिद्धाः मा मभजन् यैः पूर्वं बद्धाः स्थिताः स्वार्थं तेषामर्थमात्मानञ्च मय्येव समर्पितवत्यः बहिः शृङ्खला त्यक्तुमपि शक्या नतु सर्वतः आवृते गृहे शृङ्खला एवमलौकिककर्त्रीणां यद्भजनं तद्भवतीनामेव साधुना भावप्रधानो निर्देशः साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु साधवो हि महत्कर्म कृत्वा स्वयमेव तुष्यन्ति नतु प्रत्युपकारमपेक्षन्ते अतो मयि भजनं नास्ति भजनस्य जीवधर्मत्वात् अतोऽग्रेऽपि यदि स्वयमेव सन्तुष्टाः तदा भजत नोचेद्यथासुखं विधेयमिति भावः नह्यशक्यं कश्चित्कर्तुं शक्नोतीति ॥ २२ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मज-
श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे
एकोनत्रिंशाध्यायविवरणम् ॥ २९ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु जन्तून् स्वभक्तान् अजातप्रेम्णो जातप्रेम्णश्च यदेवं भजसि तत् सम्यक् करोषि । किन्त्वस्मास्वपि तथैव त्वद्व्यवहरणाद्वयमपि जन्तुमध्य एव गण्या अभूमेति तासां सानुशयं वाक्यमाशङ्क्य भो मत्प्राणपरार्द्धप्रियपयोजपांशुपरमाणवः सख्यो युष्मासु यदन्यसाधारण्येनाद्य व्यवहृतं तदेतन्मे दौरात्म्यं क्षमध्वमित्याह ॥ एवं यद्वा यथा तथैवैवमित्यमरोक्तेस्तद्वदित्यर्थः । ततश्च मदर्थे उज्झितो लोकः युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात् । स्वान्यात्मात्मा धनज्ञातयश्च स्नेहस्यागाद् याभिस्तासामपि वस्तद्वदनुवृत्तये उक्तलक्षणानामन्येषां भक्तानामिवानुवृत्तिवृद्ध्यै परोक्षमदर्शनं यथा स्यात्तथा भजतां युष्मत्प्रेमालापान् शृण्वता तिरोहितमिति काकुस्तस्मादतीवानौचित्यं कृतमित्यर्थः । न हि प्राचीना अर्वाचीना भाविनो वा भक्ता एवं सम्भवेयुः न ह्येतावत्या अप्यनुवृत्तेरपरावृद्धिरस्ति नहि परमाणुपरममहतोः ह्रासवृद्धी केनाप्याशास्येते तस्मादन्यप्रेमिभक्तान् प्रति युष्मत्प्रेमवैप्रलम्भिकप्रतापमहोत्कर्षजिज्ञापयिषामयी ममेयमसमीक्ष्यकारिता क्षम्यतामिति भावः । यस्मादेवं तस्मान्मा मां प्रति असूयितुं दोषारोपेण द्रष्टुं नार्हथ । तत्र प्रियमिति प्रिया इति च हेतुः प्रियस्य दोषं प्रियाः खलु न मनस्यानयन्तीत्यर्थः ॥ २१ ॥

मन्मनसि सन्ततं यदुद्भवति तत् शृणुतेत्याह । नेति । निरवद्या कामकर्मलोकधर्मशास्त्रापेक्षाराहित्येन निरुपाधिसंयुक् संयोगो यासां तासां वः स्वेनैव साधु यत् कृत्यं नतु साधुत्वापादकेन केनचिद्वस्तुसम्पर्केण साध्वित्यर्थः । तत् न पारये प्रतिकर्तुं न शक्नोमि विबुधायुषापि देवानामायुः प्राप्यापीत्यर्थः । कृत्यमित्येकवचनेन युष्माकं क्षणिकमपि कृत्यमित्यर्थः । या मा मामभजन् संवृश्च्य दुर्जरा अपि पतिश्वश्रूपितृभ्रात्रादिगेहबन्धुशृङ्खलाः निःशेषं छित्त्वैव । श्लेषेण अपक्वयोगिन इव संवृश्च्यापि ताः शृङ्खलाः पुनर्नैवाभजन्नित्यर्थः । अहन्तु पित्रोर्भ्रात्रादिषु स्वेषु बन्धुष्वपि स्निह्यामि च युष्मान् भजामि चेति । ये यथा मां प्रपद्यन्त इति । स्वप्रतिज्ञातोऽपि च्युत इति मम प्रतिक्रियाया असम्भवः । व्यज्यमानोऽयमर्थः श्लेषेणापि लभ्यते । स यथा । संवृश्च्य या युष्मान् अहं मा अभजं परसवर्णेन नकारडुकारयोः संयोगः । तत्तस्माद्वः साधुत्वेनैव तत् युष्मत्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

साधुकृत्यं प्रतियातु प्रतिकृतं भवतु । युष्मत्सौशील्येनैव ममानृण्यं वस्तुतस्तु ऋण्येव भवामि युष्माकमिति भावः । ततश्च ताभिः प्रति स्वमनस्येवं विचारितम् । परमेश्वरत्वादेव सर्वगुणपरिपूर्णत्वेऽपि दोषगन्धमात्ररहितेऽप्यस्मत्प्रेमरसविवशत्वेऽप्यस्मान् प्रेमवत्त्वेनोत्कर्षयितुं स्वंचापकर्षयितुमस्मदृणी भवितुमेवास्मत्कर्मकोऽयमस्मत्त्यागस्तादृश्मं पराबुभूषुं विजिगीषवो वयमेवाधन्या एवं भवितुमपारयन्त्योऽनेन फलतः प्रेम्णा जिता एवाभूमेति ॥ २२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
दशमे द्व्यधिकत्रिंशः सङ्गतः सङ्गतः सताम् ॥ ३२ ॥

———

केन चित्कृता विशुद्धरसदीपिका ।

तदेव तासां मुख्यतमम् वर्गद्वयम् एकः कान्तभावेन भजमानानां परश्च सख्येनेति तत्राद्यमुद्दिश्याह । एवमिति । दुहन्त्योऽभिययुः काश्चिदित्यादिप्रकारेणेत्यर्थः । मदर्थे मत्प्राप्त्यै उज्झितानि लोकवेदस्वानि याभिस्तासां वः युष्माकं मय्यनुवृत्तये यथाधनइत्युक्तप्रकारो वा युष्माकं मय्येव वृत्तिर्यथा स्यात्तथा परोक्षं भजता भवतीनां दृष्टिमात्रागोचरीभूतेनेत्यर्थः । यद्वा किंकुर्वता परोक्षम्भजता प्रेमालापादिकमनुमोदमानेन तिरोहितं न त्वन्यत्र गतमित्यर्थः । अतो हे प्रियाः ! मद्विषयकप्रेमकर्त्र्यः प्रियमेवं प्रेमपरंमामसूयितुं गुणेषु दोषमारोपयितुं मार्हथ प्रियाभिः प्रियं प्रतितथा सम्भावयितुमयुक्तमिति भावः ॥ २१ ॥

अपरमुद्दिश्याह । नेति । व इतिसम्बन्धमात्रे षष्ठी युष्मान् प्रतीत्यर्थः व इत्यवधानार्थं स्वसाधुकृत्यं स्वीयं प्रत्युपकारकृत्यं न पारये कर्तुं न शक्नोमि यद्वा हे सख्यः ! वो युष्माकं यत्स्वीयमसाधारणं साधुकृत्यं तदहं विबुधायुषापि न पारये न प्रत्युपकर्तुं समर्थः यद्वा विगतो बुधो गणनाभिज्ञो यस्मात्तेनानन्तेनेत्यर्थः तत्र हेतुः । निरिति निर्मलप्रेममयत्वेन निर्दोषा संयुक् सम्बन्धः शुद्धसख्यमात्रं यद्वा मत्सुखैकतात्पर्यवत्त्वेनान्तः स्वसुखस्पर्शाभावेन निर्दोषा युक् मया सह सख्यभावेन मेलनं विद्यते यासां तासां तत्र हेतुः दुर्जरेति दुर्गता जरा यस्माद्दुर्जरं यौवनं तज्जायतीति दुर्जरगः कामः तस्य या ईहा चेष्टा सैव प्रेमप्रतिबन्धशृङ्खला तां संवृश्च्य सम्यक् छित्वा मामभजन् शुद्धप्रेम्णैवेति शेषः अथवा यामाभजन्निति गेहशृङ्खला इति च पाठः तत्र दुर्जरा गेहस्य शृङ्खलाः नित्यक्रोपालनादिगृहकृत्यनिबन्धनाः बन्धुजनानुवृत्तिनिबन्धनाः वस्तुतस्तु "गृहिणीगृहमुच्यत"इत्यादिस्मृते कान्तभाववतीभिर्दाम्पत्यनिबन्धनाः संवृश्च्य या भवतीः अहं माभजं न सेवितवानस्मि तत्प्रत्युपकारं वो युष्माकं साधुना सर्वनिरपेक्षभजनेन कृत्वा प्रतियातु प्रतिक्रियामनुकरोत्वित्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धेरासपञ्चाध्यायीव्याख्याने
विशुद्धरसदीपिकायां चतुर्थोऽध्यायः ॥ ॥ ४ ॥
मूलस्य द्वात्रिंशोऽध्यायः ॥ ३२ ॥

———

श्रीरामनारायणकृतभावभावविभाविका ।

तर्ह्यस्माकं भजन्तीनामपि भवता तथैवाभजनं कृतं नेत्याह । एवमिति । अत्र प्रश्नोत्तरादिव्यवधानेन गोपीनां भगवदर्थसर्वत्यागस्यासंनिहितपूर्वप्रकृतत्वाभावाद्व्यवहितपरामर्शात्प्रत्यक्षपरामर्शस्यैव ज्यायस्त्वादेवं शब्दः प्रत्यक्षानुभूतवाची एवं स्पष्टं परिदृश्यमानं यथा स्यात्तथा मदर्थं एव "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः येनाहं नामृतास्यां किमहं तेन कुर्यां "मित्यादिश्रुतिमनुसृत्योज्झितास्त्यक्ता लोकाः प्रवृत्तिपथवेदफलत्वेन श्रूयमाणाः स्वर्गादयस्तत्प्राप्तिसाधनवेदा इति तन्निरूपिताः कुलजात्यादिप्राप्तधर्माः ऐहिकाश्च सर्वे स्वाः स्वसम्बन्धिनः पतिबन्धुग्रहवित्तादयो याभिस्तासां वो यद्वा वस्तुतः "सर्वे वेदा यत्पदमामनन्ति वासुदेवपरा वेदाः वेदैश्च सर्वैरहमेव वेद्य" इत्यादिनाहमेव सर्ववेदप्रतिपाद्यः "तत्त्वमसि अहमात्मा गुडाकेश स आत्माश्रित्यप्रियं सयुजा सखाया" इत्यादिना सर्वेषां स्वात्मबन्धुश्चातः सर्ववेदार्थस्वात्मभूतमदर्थमेवोज्झिता लोकाः पामरजना वेदास्तान्निर्णीताः प्रवृत्तिपरा वेदार्थास्तदभिमता एव स्वाः स्वीया देहगेहादयो याभिस्तासां वः प्रथमत एवमपि सिद्धा वृत्तिः सा मया स्थूणा निखननन्यायेन विनयेज या पूर्वं दृढीकृतापि फलानुभवे योगसिद्धानां प्राप्ताष्टसिद्धिभिरिव रसास्वादकसायादिभिरिव वा मदमानाभ्यां प्रतिबद्धा तस्या अनुवृत्तये यतो यूयमबला मदमानप्रतिबन्धहरणबलरहिता यद्वा अकारो वासुदेवोऽहमेव सर्वसम्पदात्मको बलं यासां तथाभूताः प्रियाश्चातो मया परोक्षमदर्शनं यथा स्यात्तथा भजतैव तिरोहितं यद्वा प्रहसितं प्रियेत्यत्रोपवर्णितरीत्या भवतीनामप्यपरोक्षमेव यथाभवति तथा भजतैव ध्यानलयेनास्माकमिदं विहारदर्शनमिति बुद्धिमात्रप्रतिबन्धेन तिरोहितमन्यथामदेकप्राणानां वो मद्वियोगे जीवनमेवासम्भाव्यमतो मया युष्मत्सेवनात्यागात् मामां प्रियमसूयितुं मार्हथ गुणे दोषबुद्धिरसूया तां कर्तुं न योग्या प्रियदोषेष्वपि गुणबुद्धेरेव न्याय्यत्वात् ॥ २१ ॥

ननूक्तमेवास्माभिः निजजनस्मयध्वंसनस्मितेत्यत्रास्मन्मानस्य स्मितमात्रापनेयत्वेनान्तर्धानैवर्थ्यं तत्राह । न पारयेऽहमिति । या यूयं दुर्जरां गेहशृङ्खलां संवृश्च्य सम्यक् छेदयित्वा मामाभजंस्तासां निरवद्यसंयुजां वः मानमात्रस्य स्मितमात्रापनेयत्वात् स्वस्मिन्मयि यत्साधुकृत्यमुपगमनं मया विप्रलम्भेऽप्यनुवर्तनादि तत्ततोऽहं विबुधानां देवानामायुषापि तावत्कालसेवनेनापि प्रतिकर्तुं न पारये किम्मर्त्यायुषा तदन्तर्गतकिञ्चित्कालेन वा अतो मम ऋणापाकरणे असमर्थत्वाद्वः साधुनैव तत्प्रतियातु भवत्यः स्वसाधुतया ममानृण्यं जानन्तु असमर्थस्य ऋणिनो महाजनैरिव यद्वा अस्मिन्नर्थे देवायुषो भगवत्समीपे आधिक्याभावात्तथोक्तानुपपत्तिरेवातो बुधाब्रह्मतत्त्वविदो विबुधास्तु पराभक्त्यात्मकप्रेमसहकृतबोधवन्तस्तेषामायुषा जीवनभूतेन स्वात्मनापि न पारये —

एषाङ्घोषनिवासिनामुत भवान्किं देव रातेति न
श्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति ॥
सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता
यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥

इत्यादिना ब्रह्मणा निर्णीतत्वात् अतो वः साधुनेत्यादि पूर्ववत् यद्वा भगवतो ऋणापाकरणासामर्थ्यं भगवत्त्वक्षतौ तत उत्कर्षेऽपि गोपी-

श्रीरामनारायणकृतभावभावविभाविका ।

नामत्युत्कर्षसिद्धेर्नायमर्थः अपितु ब्रह्मणा तथा निर्णीतत्वात्तिरव-द्यसंयुजां तत्सेवनानुरूपफलान्तरासंभवेन मम स्वात्मसमर्पणेऽनृण्यसम्भवेऽपि यथा नित्यमुक्तस्यापि मे प्रेमबन्धनमेवेष्टं सर्वेशस्यापि प्रेमप्रमादस्वाकारस्तत्र तथा प्रेमिणामृणित्वमेवेष्टमृणित्वे नित्यसङ्गमेलाभादानृण्यस्य तदलाभेनानिष्टतया न पारये इत्येवोक्तं वस्तुतस्तु यथा केनचिद्दतिधनिना महाजनेन स्वसमर्पितधनव्याः पारिणः अकाशात्किमपि कार्यार्थमृणग्रहणेऽपि तद्धनस्य तदीयत्वेनानृण्यमेवैवम्वः साधुत्वस्याप्यन्तर्यामिणो मेऽतिप्रेमाधीनतया वः साधुनैव तत्प्रतियातु ॥ २२ ॥

यन्त्रस्य गुणदोषौ न यन्त्रिणो मधुसूदन ।
त्वत्प्रेरणी स्वत्कृता व्याख्या तया तुष्यतु मे भवान् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्राख्यविष्णुसख्यापन्न श्रीरामनारायण रचितायां भावभावविभाविकायां चतुर्थाध्यायव्याख्या समाप्ता ॥ ४ ॥

मूले द्वात्रिंशः ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं वो युष्माकं मय्यनुवृत्तये परोक्षमदर्शनं यथा लोकादित्यागे दुर्वेला इति तदाशयः मया तिरोहितं तिरोधाय स्थितं यतो मदर्थोज्झितलोकवेदस्वानां मदर्थमुज्झितस्त्यक्तौ लोकौ युक्तायुक्तप्रतीक्षणात् वेदश्च धर्माधर्मानादरात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां ननु भवतीष्ववलाप्यं बलं प्रकटयितुं मया तिरोहितमिति सूचनाय संबोधने हे अवलाः भवति तथा भजन्तीति युष्माकं प्रेमाकुलानां ममतैव तस्मी प्रियं मामसूयितुं दोषारोपेण द्रष्टुं यूयं मा अर्हथ न योग्याः स्थ यथाहं युष्माकं प्रियस्तथैव यूयमपि प्रिया अत्रार्थे संशयो न कर्तव्य इत्याशयेन संबोधयति हे प्रिया । इति मानिनपक्षे यद्यप्येवं तथापि तादृशं प्रियं मां प्रियाः यूयमासूयितुमर्हथेति मां प्रियासु प्रियस्य तथाप्रवृत्तेरनुचितत्वादिति भावः ॥ २१ ॥

आस्तामिदं परमार्थं तु शृणुतेत्याह । नेति । काममयत्वेन प्रतीयमानापि वस्तुतो निर्मलप्रेममयत्वेन निरवद्या निर्दोषा संयुक् मद्विषयकचिरोकाग्रता अङ्गसङ्गमो वा यासां तासां वः स्वीयं समीचीनमुपकारकृत्यं विबुधायुषा देवायुषा ब्रह्मायुषा वा विबुधानां ज्ञानिनां मसनायुषापि न पारये प्रत्युपकारहेतुलोकवेदमर्यादाः विवृश्च्य निःशेषं छित्वा या मामभजन् शरीरादर्पणं कृतवत्यः तथाचाभिक्षापक्षे भजनस्य जीवधर्मत्वात्तादृशभजनस्य मयि दुर्लभत्वान्न पारये अनभिक्षापक्षे मम चित्तस्य नित्यभ्रान्त्वभ्वादिष्वपि स्निग्धत्वान्न पारये मानिनीपक्षे मम चित्तं बह्वीषु प्रेमयुक्तं तत्वनन्यतासक्तमतो न पारये तत्तस्माद्युष्माकमेव साधुना साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु तथा च युष्मत्सौशील्येनैव ममानृण्यं ननु मत्कृतेन प्रत्युपकारेणेति भावः । निवृत्तिपक्षे भजतोऽपि जन्तूनहं न भजामि विषयतया तेषां प्रकटो न भवामि किमर्थमितिचेत्तत्राह । अनुवृत्तये प्रतिबोधं विदितत्वसिद्धये एतत्सदृष्टान्तमाह । यथेति । एवं वो युष्माकं मय्यनुवृत्तये मदर्थोज्झितलोकवेदस्वानां विवेकिनां परोक्षं भजता वर्तमानेन मया परोक्षतया लब्धेनापि मया तिरोहितम् अन्तर्धानेन स्थितं तथा च यावद्ब्रह्मसाक्षात्कारो न भवति तावच्छ्रवणाद्यावृत्तिः कर्तव्या परोक्षतया भातस्य तिरोहितत्वात् तथाच भगवतो बादरायणस्य सूत्रम् "आवृत्तिरसकृदुपदेशात्" इतीति भावः ॥ तस्मात्प्रियाः प्रतिपादकत्वेनाभिप्रेताः यूयं प्रियप्रतिपादनत्वेन संमतं माम् अहो अस्मद्विचारपरस्य झटिति प्रत्यक्षतया कुतो न भातीति सूचितमित्यर्थः । आस्तामिदं जीवरूपेण बद्धस्य मम बन्धननिवारकाणां युष्माकमुपकारस्य प्रत्युपकारस्य प्रत्युपकारं त्वहं न पश्यामीत्याह ॥ नेति ॥ निर्बन्धकर्तृत्वादिदोषासंस्पृष्टे मयि संयुजां तात्पर्येण संगतानां वः स्वसाधु कृत्यं विबुधायुषापि न पारये यतो भवत्यो दुर्जरा देह गेहादिशृङ्खला मदीयाः संवृश्च्य मामभजन् तस्मादायुस्सत् साधुकृत्यं स्वसाधुत्वेन प्रतियातु श्रुतिकृतोपकारस्य प्रत्युपकारः केनापि कर्तुमशक्य इत्यर्थः ॥ २२ ॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपाद-शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे अवलाः ! एवमेव मदर्थे उज्झितो लोकस्तदनुरूपयुक्तायुक्तप्रतीक्षणात् वेदश्च धर्माधर्मप्रतीक्षणात् स्वाः ज्ञातयश्च तत्स्नेहत्यागात् याभिस्तासां वो युष्माकं मयि ध्यानार्थे विश्वकारणे "कारणन्तु ध्येय" मिति श्रुतिविषये अनुवृत्तये परोक्षमदर्शनं यथा भवति तथा भजता उपकुर्वता स्नेहोद्रेकं कारयित्रा मया तिरोहितम् अन्तर्धानेन स्थितम् तत्तस्मात्सा मां भवतीनां प्रियं हे प्रियाः । असूयितुं दोषदृष्ट्या द्रष्टुं यूयं मार्हथ ॥ २१ ॥

तासां निर्दोषदासीत्वं स्वस्य परमस्वामिनः परमकृतज्ञत्वं चाह । नेति । निरवद्या संयुक् संयोगो यासां तासां वो युष्माकं विबुधायुषापि बहुकालेनापि स्वसाधुकृत्यं स्वीयं प्रत्युपकारकृत्यं कर्तुमहं न पारये न शक्नोमि या भवत्यो दुर्जरां गेहशृङ्खलां संवृश्च्य सम्यक् छित्वा मामामभजन् अतो वो युष्माकमेव साधुना साधुकृत्यं प्रतियातु प्रतिकृतं भवतु भवतीनां सौशील्येनैव ममानृण्यमिति भावः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वात्रिंशाध्यायार्थप्रकाशः ॥ ३२ ॥

भाषा टीका ।

हे अवला ! गोपियो जो तुम सबने मेरे लिये सब लोक वेद कुल की मर्यादा छोडदी है तब मेरे विषे तुमारी निरंतर प्रीति

भाषा टीका।

वढाने के वास्ते मै अंतर्धान होगया परंतु मै तुमारा अनुशरण हीं करता हूं तिस से हे प्यारियो ! हो मैं तुमारा प्रिय हूं तुम मेरे मे दोष मत देखो ॥ २१ ॥

तुम सव निष्कपट से संबंध वाली हो तुमारे उपकार के वदले को मैं देवताओं की आयु से भी नहीं करशकूंगा जि। तुम ने वडी कठिन घर की शांकलों को काटकर मेरा आश्रय लिया है सो इस का उपकार तो तुमारी ही साधुता से होगा हम कुछ नहीं कर सकैंगे ॥ २२ ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धरासपंचाध्यायी वत्तीस में अध्याय की भाषाटीका समाप्त ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ त्रयस्त्रिंशोऽध्यायः ॥

श्रीशुक उवाच ।

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ।
जहुर्विरहजं तापं तदङ्गोपचिताशिषः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयस्त्रिंशे ततो गोपीमण्डलीमध्यगो हरिः ।
प्रियास्ता रमयामास ह्रदिनीवनकेलिभिः ॥

तस्यदा अङ्ग हे राजन् ! यद्वा तस्य भगवतोऽङ्गेन वपुषा करचरणाद्यवयवैर्वोपचिताः समृद्धा आशिषो यासां ताः ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

रासलीला जयत्येषा जगदेकमनोहरा ।
यया श्रीव्रजदेवीनां श्रियोऽपि महिमाधिकः ॥

इत्थमीदृशीः भगवतः तादृशवचनादिना निजाशेषभगवत्तां प्रकटयतः अतः सुपेशलाः परममनोहराः विरहः भूतो भावी च तज्जं तापं दाहं जहुः पूर्वमुक्तस्याप्यस्यात्र पुनरुक्तिः विरहेऽप्यपरित्यजनात् तथा विशेषतो निजऋणित्वादिप्रतिपादनेनापुनर्विच्छेदस्य मननाद्धुनैव सम्यक्तापत्यागविवक्षया यतो गोप्यः सहजप्रेमरसपरिप्लुतचित्ता इत्यर्थः । किञ्च तदङ्गेति आलिङ्गनकरग्रहणादिना सम्पन्नमनोरथाः सत्यः यद्वा भगवत एव विशेषणं सुपेशलवाग्घेतुत्वेन तासां गोपीनामङ्गैरुपचिताशिष इति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रासलीला जयत्येषा जगदेकमनोहरा ।
यस्यां श्रीव्रजदेवीनां श्रीतोऽपि महिमा स्फुटः ॥

इत्थमीदृशीः सुपेशलाः परममनोहराः । विरहो भूतो भावी च तज्जं तापं जहुः विरहेऽप्यपरित्यागश्रवणात्तथा विशेषतो निजऋणित्वाद्विप्रतिपादनेन च दैवात् पुनर्विच्छेदेऽप्यत्यन्तपरित्यागशङ्कापगमाच्च । अतः पूर्वमुक्तस्याप्यत्र पुनरुक्तिरधुनैव सम्यक् तापपरित्यागस्य विवक्षया । किञ्च । तदङ्गेति आलिङ्गनकरग्रहणादिना सम्पन्नमनोरथाः सत्यः । यद्वा । भगवत एव विशेषणं सुपेशलवाग्घेतुत्वेन तासां गोपीनामङ्गैरुपचिताशिष इति ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १ ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथैवं सूक्ता भिर्गोपीभिः सह भगवतो रासक्रीडामनुवर्णयति त्रयस्त्रिंशेन । इत्थं भगवतः सुतरां पेशला वाचः श्रुत्वा गोप्यस्तस्याङ्गेनाङ्गसङ्गेनोपचिताः समृद्धा आशिषो यासां ताः तथाभूताः विरहजं तापं जहुः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिप्रसन्नभगवत्प्रीतिरेवानन्दानुभवे कारणं नान्यत्साधनमिति निदर्शयितुं रासक्रीडां वर्णयत्यस्मिन्नध्याये "स तत्र पर्येति जक्षन् क्रीडन् रममाणः" इत्यादिश्रुतिः तत्र गोपीनां कृष्णविरहसमुद्भूतसन्तापप्रणाशं वक्ति । इत्थमिति । तापत्यागे निमित्तमाह । तदङ्गेति । हरेरङ्गसङ्गलक्षणसेवनेन उपचिताः फलरूपेण परिणताः आशिषः प्रार्थना यासां तास्तथा यद्वा उपचिताः संचिताः समृद्धिङ्गताः आशिषः शुभानि यासां तास्तथा ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विरहो भूतो भावी तज्जं विरहेऽप्यपरित्यजनात् निजऋणित्वाङ्गीकाराच्च ॥ १ ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ तावतैव भगवदनुनयेन तासां हृत्तापो व्यरमदित्याह । इत्थमित्यादि । सुपेशलाः सुस्निग्धाः तदङ्गैः श्रीकृष्णाङ्गैरुपचिता आशिषः सुखानि यासाम् एवमुक्त्वा युगपदेव सर्वाः प्रत्येकमालिङ्गितवानिति ध्वनिः ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

त्रिंशत्तमे हरेः प्रीतौ लीलां कामकृतामपि ।
इन्द्रादिदुर्लभां चक्रे स्वानन्दार्थमितीर्यते ॥
अस्याः सर्वोपकाराय फलश्रुतिरुदीर्यते ।
लौकिक्यपि यदा दृष्टिस्तदा सिद्धान्त इर्यते ॥
रसात्मकस्तु यः कामः सोऽत्यन्तं गूढ एव हि ।
अतः शास्त्रं प्रवृत्तं हि तृतीयं भारतं तथा ॥
अतोऽत्र भगवांश्चक्रे नृत्यं कारितवांस्तथा ।
सर्वाङ्गेषु तु यो लीनः स यथा व्यक्ततां व्रजेत् ॥
जलं वायुश्च सामग्री श्रमात् शीतं च जायते ।
अत्रैव लौकप्रकटमाधिदैविकमुत्तमम् ॥
कामाख्यं सुखमुत्कृष्टं कृष्णो भुङ्क्ते नचापरः ॥

एवंपूर्वाध्याये तासां सर्वभावेन प्रमाणेन प्रमेयेन दुःखं दूरीकृतवान् तद्दुःखमज्ञानतश्चेत् तदेव दूरीकृतं भवति अन्यथा भगवत्तैव दुःखं दत्तं स्यात् अतो भगवता त्यक्त्वा न गतामिति न भगवान् दुःखहेतुः किन्तु ज्ञानमेव अतो भगवद्वाक्यात् अज्ञाने गते तन्मूलकं दुःखमपि गतमित्याह । इत्थमिति । भगवतो वाचः श्रुत्वा विरहजं तापं जहुः भ्रमादेवास्माकं विरहो जात इति ननु वचनमात्रेण कथमज्ञाननिवृत्तिः तत्राह । भगवत इति । गोप्य इति विपरीतभावनानिवृत्त्यर्थं ननु ता वाचः कथं न मनसि सन्देहमुत्पादितवत्यस्तत्राह । सुपेशला इति । अतिमनोहरा इति मनसि विचिकित्सायामेव सन्देहः शब्दस्वाभाव्यादेव मनसि सन्देहो न जातः अतो विरहजं तापं जहुः नास्माकं विरहो जात इति ज्ञातवत्यः यथा स्वप्नादुत्थितः स्वाप्निकं दुःखं न मन्यते तस्य भगवतः अङ्गैरुपचिता आशिषो यासां भगवत्कार्यव्यतिरेकेणैव भगवदवयवैरेव सर्वमनोरथाः पूरिताः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रयस्त्रिंशे रासलास्यविहारजलकेलयः ।
प्रश्नोत्तरत्रयप्युक्तानि परीक्षिच्छुकदेवयोः ॥

सुपेशला अतिमनोहराः तस्याङ्गस्पर्शादिना उपचिता आशिषः कामा यासां ताः । भगवत एव वा विशेषणम् । गोपीगात्रस्पर्शजनितसुखस्येत्यर्थः । तेन च प्रश्नोत्तरसमाप्तौ मानशान्त्या तदा आलिङ्गनचुम्बनादिविळासा आसन्निति द्योतितम्॥१॥

केनचित्कृता विशुद्धरसदीपिका ।

रासलीलाजयत्येषा मनोहर मनोहरा ।
यस्यां श्रीराधिका देव्याः सर्वतो महिमा स्फुटः ॥

शुक इति इत्थमीदृशीः एताश्च सुपेशलाः परममनोहराः यद्वा शोभनावयवाः भगवतः किशोरीरमणस्य वाचः परमप्रेमप्रकाशकसदुक्तीः श्रुत्वा विरहो भूतो भावी च तज्जन्यं तापं अविश्वासात्मिकां चित्तग्लानिं जहुः त्यागानुकारेऽप्यपरित्यागनिश्चयात् विशेषतः ऋणित्वादिप्रतिपादनेन सर्वशङ्कापगमाच्च वस्तुतस्तु सखीरन्यस्मान्वञ्चयित्वास्मत्प्राणेश्वरीं रहोऽनयत्तत्किंवयमयोग्या इतियोऽन्तस्ताप इति यथायोगं तत्र हेतुः । तादिति । तस्य भगवतोऽङ्गेन वपुषा करचरणाद्यवयवैर्वा उपचिताः समृद्धा आशिषो यासां ताः तच्च प्रागेव दर्शितं काचित्कराम्बुजं शौरेरित्यादिना आशिषश्च शिरसि धेहि न इत्याद्याः यद्वा तासां वाचामङ्गैः शब्दाद्यवयवैरिति किम्पुनरभिप्रायेण यद्वा अङ्गैः सुरतचिन्हाङ्कितैः उपचिताः सम्पन्ना आशिष अभिलषितानि यासां तत्र प्रथमेऽर्थे तदङ्गैः श्रीकृष्णस्याङ्गैरेव तदालिङ्गनभुजक्षेपादिभिरेवोपचिताः परमर्द्धिं प्राप्ताः आशिषस्तत्सम्भोगेच्छारूपा यासामिति तत्सुखोदयेन तदाच्छदनं वैदग्ध्यञ्च सूचितं यदाहुः "विदग्धानां मिथोलीलाविलासेन यथा सुखम् । न तथा संप्रयोगेण इतिशास्त्रविनिर्णयः" यथा अङ्गोत्तीर्णविलेपनं सखिसमाकृष्टिक्रियायां मणिर्मन्त्रो हन्त मुहुर्वशीकृतविधौ नामास्य गोपीपतेः । निर्माल्यस्रगियं महौषधिरिह स्वान्तस्य सम्मोहने नासाङ्कस्तिसृणां गृणाति परमाचिन्त्यप्रभावावलिम् । ततश्चैकमत्यमपि लब्धमिति दर्शितम् ॥ १ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

श्रियं श्रीशं गिरां ढुण्ढिं शिवां शिवमजं सुरान् ।
गुरून् द्विजान् विदो भक्तान् वन्दे विष्णोर्वपुर्जगत् ॥
ब्रह्मादिजयसंरूढदर्पकन्दर्पदर्पहा ।
जयति श्रीपतिर्गोपीरासमण्डलमण्डनः ॥
श्रीवृन्दावनकुञ्जे सुमनःकुञ्जे सतां सदा ।
सङ्क्रीडन् रमतां कृष्णो रासरत्यादिकेलिभिः ॥
पञ्चमे नन्दजो गोपीरासमण्डलमण्डनः ।
रमयामास ताः सर्वा रासरत्यादिलीळया ॥
पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो
मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेदखेदाम्बुपूरमनुपूरयतु
प्रियं नः ॥

स्वात्मभूतहरिणा यथा जीवानां कदापि वियोगो विभ्रमादेव तद्विच्छेदे सति दुःखं भगवन्निगमश्रवणजज्ञानेनैव विच्छेदाविच्छेदेन तत्स्वरूपानन्दावाप्त्या कामपूर्त्या तदुपशमस्तथा गोपीनामपि कृष्णात्मनां न कदापि तद्विच्छेदः प्रेमपथमुपदेष्टुं विभ्रमाणामपि तासां ळीलाविभ्रमादेव विच्छेदविभ्रमोऽन्वेषणविभ्रमश्चाभूत् भगवद्वचोभिरेव ता विभ्रमा अभूवन्नित्याह भगवान् शुकः । इत्थमिति । ता यतो गोप्यः प्रेमपथगोपनं रक्षणं शीलं यासां ता अतस्तद्रक्षणाय भगवता स्वात्मना नित्या वियोगं लीलाविभ्रमैरादौ गोपयन्त्यः पुनर्भगवत्प्रापकप्रेमपथसाधनबोधाय यतो गा इन्द्रियाणि वाचश्च पान्तीति गोप्योऽतः स्वेन्द्रियाणि वाचश्च तल्लीलानुकारतदन्वेषणादिचेष्टाभिस्तद्गुणगानैश्च रक्षन्त्यः पुनस्तदभिव्यक्तप्रेष्ठमपि गुरूपदिष्टतच्छुश्रूषालब्धबोध एव शोकापनोदक इति श्रुतिगाः पात्यस्तं गुरुत्वेन प्रतिष्ठाप्य सेवाप्रश्नाभ्यां प्राप्तवाचो गाश्चाप्रमादसविश्वासश्रवणेन पात्यो भगवतो वाचः श्रुत्वा विरहजं तापं जहुः भगवतो वाच इत्यनेनापि नित्यनिर्दुःखपूर्णपरमानन्दस्वरूपे स्वस्मिन्दुःखाभावसुखयोरनापादकतया भगानां यदपार्थकत्वं तत्परिहाराय स्वाश्रितेष्वेव स्वैश्वर्य्येण साधनशक्त्याधानं स्वधर्मयशोभ्यां तदन्तःकरणशोधने स्वश्रिया तत्सर्वगुणश्रीसम्पादनं स्वविरागेणेतररागापनोदं ज्ञानेन विभ्रमाभावमापादयतो वाचां श्रवणस्य विभ्रमनिवृत्तिपूर्वकवि-

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ॥
स्त्रीरत्नैरन्वितः प्रीतैरन्योऽन्याबद्धबाहुभिः ॥२॥

श्रीरामनारायणकृतभावभावविभाविका ।

रहजतापापनयनत्वसूचनं ननु "भ्रमयति भारतीत उरुवृत्तिभिरुक्थजडा" नित्यादिना भगवद्वाचां भ्रमापादकत्वमुक्तं कथं तदपनोदकत्वमुच्यते तत्राह । सुपेशला इति । तत्रोक्थजडानित्युक्त्या प्रवृत्तिगृहकुलादिधर्मबोधकवाचां तथात्वेन पूर्वं वाचः पेशैर्विमोहयन्नित्यत्रापि तथैवोक्तिः परन्तु तत्र वाचः पेशैरिति सुशब्दाप्रयोगान्मोहकत्वस्वीकारेऽप्यत्र सुशब्देन तद्व्यावृत्तेस्तथाभावेन भगवदनुवृत्तिजनकत्वमेव ततश्च वाचः श्रुत्वा विरहजं तापं जहुरित्यनेन जीवनप्रदघनश्यामस्य रसवृष्ट्यात्मकवाग्धारासारसारैरसारविरहानिदाघजतापोपशमे पूर्वं तत्तापशुष्काः स्वर्णयूथिकाललितलतारूपा गोप्यः तद्रसस्वरस्येन रोमपुलकमुकलव्याप्ताः प्रफुल्लितसर्वाङ्गकुसुमा हक्कुसुममधुस्त्रावास्तन्मुखराशिस्मितचन्द्रिकामृतपुष्टा जातास्तदङ्गोपचिताशिष इत्यनेन तदङ्गतमालालिङ्गनेन लब्धसर्वफला बभूवुरित्येकरूपकुसुमलतानां सर्वफलप्राप्तिरिति चित्रं तदङ्गसङ्गमचरितम् आशिषशब्दवाच्यसर्वफलानितु अर्थधर्मकाममोक्षप्रेमसुखाख्यानि प्रसिद्धानि तत्रार्थलाभस्तु हरिकरोरगोरगकरणेन स्तनश्रीफले समर्प्य श्रियोऽपि सर्वस्वभूतरदहीरकनखादिमणिगणयुतेन्द्रनीलतनुकरणतनुरूपाखिलभुवननिधिवशीकारेण स्पष्टः सर्वसुरावयवयज्ञपुरुषाय स्वसर्वस्वरूपरूपद्रव्यार्पणेन द्रव्यरूपस्वाङ्गस्य सर्वसुरात्मकतदङ्गसंयोगेन द्रव्यदेवतासम्बन्धरूपयागनिष्पाया तन्मुखसोमपानेन यज्ञपुरुषस्य स्वकरतलीकरणेन धर्मलाभश्च स्फुटतरः पूर्णकामानामपि सर्वकामदकोटिकामतनुहरेः सकामतयालिङ्गनेन कामज्वरशमनपूर्वकपूर्णकामत्वेन कामलाभोऽपि निकामः करस्थबिल्वसमस्तनपाणिकृष्णाब्रह्मभानेन रमणेऽपि शरीरभानाभावेन जीवन्मुक्तिप्रसिद्धिः सप्रेमकृष्णालिङ्गनेच सामीप्यादिमुक्तेः प्रेमसुखस्य च प्राप्तिः स्पष्टतमैवेति भावः ॥ १ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

त्रयस्त्रिंशे ततोऽध्याये हरेर्लीला निरूप्यते ।
वने जले च बहुधा राजप्रश्नोत्तरं तथा ॥

अथ रासोत्सवं वर्णयिष्य आदौ भगवतो कानुनयवाक्येन ताः सम्यक् प्रसन्ना इत्याह । इत्थं पूर्वोक्तप्रकारेण भगवतः पूर्णस्याहं भवतीनामधमर्ण इत्येवं रूपा गोप्यः भगवता स्वीयत्वेन स्वीकृताः वयं ननु त्यक्ता इति निश्चयवत्यः तादृशाधिकारायोग्या अपि वयं भगवतैवमनुनीता इति मनसि विचारयन्त्य इति वा वाचः श्रुत्वा विरहजं तापं जहुः यतो भगवद्वाचः सुपेशलाः अतिमनोहराः आपातरम्यतानिरासाय सुपदं प्रयुक्तं यतश्चोपचिताशिषः लब्धमनोरथाः यद्वा तस्य भगवतोऽङ्गेन वपुषा करचरणाद्यङ्गैर्वा उपचिताः समृद्धा आशिषो यासां ताः यद्यपि पूर्वं तापत्याग उक्तस्तथापि तादृशवाक्श्रवणादिना पुनर्विरहशङ्कापगमाद्विरहजन्यतापत्यागः पुनरुक्तः तासां गोपीनामङ्गस्पर्शादिना लब्धसुखा इति वा एतेन प्रश्नोत्तरसमाप्तौ मानशान्त्या तदा आलिङ्गनचुम्बनादिविलासा आसन्निति सूचितं निवृत्तिपक्षे अथ विशुद्धचेतसि परमात्मनः श्रुतिभिः रमणं वक्तुमुपक्रमते । इत्थमिति । भगवद्भावं प्राप्तस्य प्रत्यगात्मनोपयुक्ताः सुपेशला वाचः श्रुत्वा लब्धमनोरथास्तदा हे राजन् ! तत्तद्वादिभिः श्रुतिषु प्रत्यगभिन्नपरमात्मप्रतिपादनं नास्तीत्यादिना प्रतिपादिताद्विरहाज्जातं तापं जहुः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंभूताभिर्व्रजाङ्गनाभिः सह रासक्रीडां भगवतोऽनुवर्णयति त्रयस्त्रिंशे । इत्थमिति । तदङ्गोपचिताशिषः भगवदङ्गैश्चरणादिभिरुपचिताः समृद्धाः आशिषः कामाः यासां ताः गोप्यः भगवतः इत्थं सुपेशलाः सुरमणीयाः वाचश्च श्रुत्वा विरहजं तापं जहुस्तत्यजुः ॥ १ ॥

भाषा टीका ।

श्रीशुकदेवजी बोळे कि सम्पूर्ण गोपी श्रीभगवान् के सुन्दर मनोहर इन वचनों को सुनकर और भगवान के अङ्ग स्पर्श से मनोरथ को प्राप्त होकर विरह से भये सब तापों को त्याग देती भई ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रासक्रीडां रासो नाम बहुनर्त्तकीयुक्तो नृत्यविशेषस्तां क्रीडाम् अन्योऽन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अत एव रासक्रीडामारभत आसनं विहाय कर्त्तुं प्रवृत्तः गोविन्द इति श्रीगोकुलेन्द्रतया तत्र निजाशेषैश्वर्य विशेषप्रकटनेन परमपुरुषोत्तमता स्त्रीरत्नैरिति तासां च सर्वस्त्रीवर्गश्रेष्ठता प्रोक्ता इति रासक्रीडायाः परमसामग्री दर्शिता ननु तस्य साक्षात्तासां नृत्यादौ लज्जा युज्यते तत्राह । तामेव प्रथयति । अनुव्रतैः तदनुकूलैस्तत्सदृशकलाभिज्ञैरित्यर्थः । अत एव प्रीतैः तद्वाक्यादिना उल्लासितैः यद्वा तत्प्रेमभरविवशैः अतोऽनुव्रतैस्तदेकाधीनैः अत एवान्योऽन्यमाबद्धबाहुभिः बाहवोऽत्र करा ज्ञेयाः अन्यथा नृत्यादिसौन्दर्यासंपत्तिः अन्योऽन्यत्वं च तासामेव ननु तेन सह तद्बाहुभ्यां तासां प्रत्यकेमुभयतः कण्ठग्रहणात् एतच्च रासक्रीडालक्षणं तथाचोक्तम्—

नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम् ।
नर्त्तकीनां भवेद्रासो मण्डलीभूय नर्त्तनमिति ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

अयमस्मन्मण्डलीमध्येऽत्रैवास्तां नचानिःसरत्विति श्राविद्धत्याशब्दगूढाभिप्रायः रासः परमरसकदम्बमय इतिश्लेषार्थः स एवोत्सवः क्रीडाविशेषरूपः सर्वसुखविशेषसाधनसारसमुच्चयो वा कृष्णेन परमानन्दमूर्तिना हेतुना सम्यक् प्रवृत्तः इति संप्रवृत्तो रासस्य कर्तृत्वनिर्देशेन प्राधान्योक्त्या सर्वलीलानां नित्यत्वादिकेऽप्यस्य सर्वतोवैशिष्ट्यं ज्ञेयं सम्यक्त्वमेव दर्शयति । गोपीनां मण्डळेन मण्डित इति तद्विशेषश्लोकः श्रीपराशरेण —

रासमण्डलिबन्धोऽपि कृष्णपार्श्वमनुज्झता ।
गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥
हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम् ।
चकार तत्करस्पर्शनिमीलितदृशां हरिः ॥
ततः प्रववृते रासश्चलद्वलयनिःस्वनः ।
अनुयातशरत्काव्यगोपगीतिरनुक्रमात्इति ॥

किंच तासामिति तथाचोक्तं श्रीबिल्वमङ्गलेन—

अङ्गनामङ्गनामन्तरा माधवो ।
माधवं माधवं चान्तरेणाङ्गना ॥
इत्थमाकल्पिते मण्डले मध्यगः ।
संजगौ वेणुना देवकीनन्दन इति ॥

एतदनुसारेण सर्वमध्ये मेधीभूतः शङ्कुस्थानीय एको बोद्धव्यः अन्यथा मण्डले पार्श्वद्वयस्थगोपीद्वयेकण्ठग्रहणेन वेणुधारणासिध्या रासमहोत्सवे परममङ्गलमधुरमोहनतद्वाद्याभावापत्तिः तदभिप्रायेणैव वक्ष्यते मध्ये मणीनामित्यादि ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्रेति । तत्रैवं ताभिः सहात्मनः ऐकमत्ये सतीत्यर्थः । रासक्रीडामारभत परमाभिलषितानां तासां लाभेन पूर्वमेव कर्त्तुमीप्सितां महोत्सवरूपां तत्क्रीडां कर्त्तुं प्रवृत्तः । गोविन्द इति श्रीगोकुलेन्द्रतायां निजाशेषैश्वर्यमाधुर्यविशेषप्रकटनेन परमपुरुषोत्तमता स्त्रीरत्नैरिति तासाञ्च सर्वस्त्रीवर्गश्रेष्ठता प्रोक्ता । रत्नं स्वजातिश्रेष्ठेऽपीति नानार्थवर्गात् । इति रासक्रीडायाः परमसामग्री दर्शिता अत एव प्रीतैस्तत्प्रेमभरविशेषैः अतोऽनुव्रतैस्तदेकाधीनैः अत एवान्योऽन्यमाबद्धबाहुभिः बाहवो ऽत्र करा ज्ञेयाः । अन्योऽन्यत्वञ्च तासामेव । नतु तेन सह तद्बाहुभ्यां तासां प्रत्येकमुभयतः कण्ठग्रहणात् । एतद्धि रासक्रीडालक्षणम् । "नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम् । नर्त्तकीनां भवेद्रासो मण्डळीभूय नर्त्तनमिति । अयमस्मन्मण्डलीमध्येऽत्रैवास्तां न च निःसरत्विति आबद्धेत्याशब्दव्यञ्जितस्तासां गूढाभिप्रायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तत्र पुळिने भगवान् स्त्रिय एव रत्नानि तैः सहितः रासक्रीडामारब्धवान् कथंभूतैरनुव्रतैरन्योऽन्यमावद्धाः संग्र थिता बाहवो यैस्तथाभूतैः रासो नामानेकनर्त्तकनर्त्तकीयुक्तो नृत्यविशेषः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समृद्धफलशुभानुभवप्रकारं वक्तुमुपक्रमते । तत्रेति । तत्र वने तस्यामवस्थायाम् अन्योऽन्याबद्धबाहुभिः इतिरासक्रीडाप्रकारं दर्शयति । समतलसतृणप्रदेशे वितस्तिमात्रोन्नतशङ्कुं संस्थाप्य तत्परितः सर्वैः स्वपादमवष्टभ्य वृत्ताकारेण स्थित्वैकस्या वामहस्तमन्यस्या निकटवर्तिन्या दक्षिणपाणिना संगृह्य स्वशक्त्यावष्टम्भेन वर्तुलाकारभ्रमणं चक्रवत्क्रिया रासक्रीडा ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

एवं तत्र प्रसन्नाभिरेव ताभिः समं पूर्वोक्तलक्षणं रासमारब्धवानित्याह । तत्रेत्यादि । स्त्रीरत्नैः स्त्रीषु मध्ये ईश्वररूपा ळक्ष्मीस्वरूपा यास्तासामपि रत्नै रत्नभूतैः अनुगतं व्रतं येषां तैः कुमारीगणैश्च प्रीतैः प्रीणनं प्रीः तया इतैः प्राप्तैः वेणुनादाकृष्टैरन्यैश्च गोपाङ्गनागणैश्च कीदृशैः अन्योऽन्यावद्धवाहुभिः कुमारीभिः कुमार्य्यस्तदितराभिस्तदितरा अन्योऽन्यावद्धवाहवः अथवा एका कुमारी का तदितरेति वैचित्र्यार्थं तथा बन्धः अथवा मण्डलद्वयमान्वितः मध्यवर्त्ती सन्ननुगतः ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं दुःखाभावसुखयोः प्रतिबन्धकं रूपेण वाचा च निवार्य स्वकर्त्तव्यमारभते । तत्रारभतेति । गोविन्द इति तदर्थमेवेन्द्रो जातः अतोऽसाधारणो भोगश्च तस्यावश्यक इति च अनुव्रतैः स्त्रीरत्नैरन्वितः रासक्रीडामारभत बहुनर्त्तकीयुक्तो नृत्यविशेषो रासः रसस्याभिव्यक्तिर्यस्मादिति रसप्रादुर्भावार्थमेव हि नृत्यं रासे क्रीडालीला स्वस्य क्रीडायां मनसो रसस्योद्गमः नृत्ये देहस्य कामस्तु भोक्तृनिष्ठ इति स्वप्राधान्यं समाजेनापि रस उत्पद्यत इत्येकवचनं तदाहीक्षुरसवद्भक्तिरसवद्वा कामरसोऽप्युत्पद्यते गोपिकानां रसयोग्यतामाह । अनुव्रतैरिति । अनुव्रतैरिति अनु व्रतं यासां तासामपि रसोत्पादनमावश्यकमिति यादृशो भगवतोऽभिप्रेतः तादृश एवेति च नन्वयं रसः अळौकिकः न लौकिकेषु उत्पद्यते अतो व्यर्थ आरम्भः नहि सिकतासमूहात् तैळमुत्पद्यत इतिचेत्तत्राह । स्त्रीरत्नैरिति । स्वभावतः स्त्रियस्त्रिविधाः लोकभेदेन तत्रापि मानुषीषु जातिभेदाश्चत्वारः पद्मिन्यादयः वासनाभेदाश्चतुर्दश अश्वप्रकृत्यादयः सर्वास्वेवैता रत्नभूताः स्वासाधारणधर्मैः तद्धर्मप्रकाशिकाः अतः सर्वभावेन रसोत्पत्तियोग्यता तैरन्वित इति स्वयं नायकमणिः तद्योग्या एते मणय इति एकरसत्वाय च मेळनम् अनेन रसप्रकटनार्थं शुल्कदासिका भगवते दत्ता इति यदुक्तं तदपि समर्थितं नन्वेते जीवाः भगवानानन्दमयः कथं वैषम्याद्रसोत्पत्तिरितिचेत्तत्राह । प्रीतैरिति । ता अपि भगवत्सदृश्यो जाताः सर्वतः प्रीता इति तासामभिनिवेशनप्रकारमाह । अन्योऽन्यावद्धबाहुभिरिति । ताः परस्परमासमन्तादुभयतः बद्धौ बाहू यासां नतु भगवता सह ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नृत्यगीतचुम्बनालिङ्गनादीनां रसानां समूहो रासस्तन्मयी या क्रीडा ताम् अनुव्रतैस्तदानीं परस्परैकमत्येन स्वानुकूलैः । अन्योऽन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ २ ॥

———

केनचित्कृता विशुद्धरसदीपिका ।

तदेवमैकमत्ये सति रासोल्लासो जात इत्याह । तत्रेति । तस्मिन्नेवावसरे तत्र देशे वा गोविन्दः श्रीगोकुलयुवराजः पक्षे वृन्दावने तु गोविन्दमिति वराहोक्तस्तद्देशाधिपतिमुख्यतमः प्रकाशश्च रासक्रीडां रासरूपां क्रीडां तल्लक्षणम्—

नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम् ।
नर्तकीनां भवेद्रासो मण्डलीभूय नर्तनमिति ॥

अनुव्रतैः अनुगतं व्रतं येषामिति दुर्गाव्रतपराणां वर्गः संगृहीतः स्त्रीरत्नैः रस्यायन्ते सर्वपरित्यागेनानुगच्छन्तीति कान्तभावानां प्रीतैः तत्प्रेमपरवशैस्तदेकपरैरिति सखीनाम् अत्रोत्तरोत्तरं श्रैष्ठ्यमूह्यं परिगणनं तु बाह्यां मण्डलीमारभ्य कृतमिति ज्ञेयं कीदृशैः अन्येऽन्येति निजनिजसजातीयाभिराबद्धा बाहवो याभिस्ताभिः एवञ्च मण्डलीत्रयमत्रोह्यं तदुक्तं श्रीगोविन्दलीलामृते—

वितस्तिमात्रोच्चनिखातशंकुगत्रिनेमिचक्रोपरिराधया सह ।
स्थितः समध्येऽन्यसखीगणैः क्रमाद्बहिश्चकाराथ सुमण्डलीत्रयम् ॥
सुवर्णवलयश्रितमालशाखिनःस्वर्णालवालालिरिवाबभावसाविति ॥

अत्रेयं क्रीडा नित्यसिद्धानां साधनसिद्धानां संभिन्नानासंभिन्नानां च यथा योगं वेदव्यंशानान्तु परिकरत्वमेव तदुक्तमलङ्कारकौस्तुभे—

काचिद्वीणां मुरजमपरा कापि वंशीं दधाना ।
काश्चिद्रालं करकिसलये तालधारित्वमापुः ॥
चक्रुः सङ्गीतकविरचनां रासमध्ये कयाचि ।
द्गानं नानास्वरपरिमलामोदमुच्चैर्वितेने ॥

आदिपुराणे च—

तिस्रः कोट्यो कल्लवीनां समाजस्तन्मध्ये—
वल्लभस्त्वेकरूपः ।
काश्च तासां नाट्यविद्याप्रगल्भाः शश्चान्या—
गानवेदप्रवीणाः ॥
काश्चित्तासां वीटिकादानदक्षाश्चान्याविन्नावलयन—
प्रकर्य्यः ॥
काश्चित्तासां वाद्यविद्याविज्ञा नर्त्तक्योऽन्या—
स्तालतारप्रकर्य्यः ॥
तत्रस्याश्चाधित्यकुलप्रशंसां कुर्वत्योऽन्यास्तोषयन्त्य—
हमनाथमिति ।

एवं च मण्डलीत्रयमध्यगतो मुख्यतमः प्रकाशः श्रीराधया युगलितः सहचरीभिश्चान्याभिरक्षातश्च क्रीडतीति ज्ञेयं नचैवमसम्भावितं श्रुतदेवबहुलाश्वयोर्युगपत्गृहगमने तथादृष्टत्वात् तत्र तल्लीलासम्पादनेच यथावसरं योगमायापरिचरस्यैव यथाख्यानमिति सत्र द्वयम् एवमेव दर्शितं क्रमदीपिकायां सुदृशामुभयोः पृथगन्तरगं दयिता गलबद्धभुजद्वितयामिति तदेवं निजसखीगणैरेव श्रीराधाकृष्णयोरासक्रीडामुख्या अन्यासां मनोरथपूरणाय शिक्षासौष्ठवेन योगमायावैभवेन वा कण्ठे गृहीतत्वप्रत्यायनादिकमेवेति ज्ञेयं यम्मन्येरन्नित्यादिवक्ष्यमाणात् तदेवं विविधभावानांयुगपदनुशीलनं रासक्रीडामन्तरेण दुर्घटमिति तस्य प्राशस्त्यमपि सकलरसिकजनसम्मतं दर्शितम् ॥ २ ॥

———

श्रीरामनारायणकृतभावभावविभाविका ।

तत आसनादुत्थाय रासक्रीडारम्भः सहि तत्रारभतेति तत्र पुलिन एव गोविन्दो देवेन्द्रं पराभूय प्राप्तगोविन्दाभिषेक इत्यनेन तदारब्धरासक्रीडायामप्रत्यूहता सूचिता तथा देवेन्द्रविजये तद्विजयिकामसङ्ग्रामारम्भयोग्यता ध्वनिता तथा गवां रश्मीनामिन्द्रत्वकथनेन स्वाङ्गकान्त्या पुलिनस्थलातिप्रकाशकत्वं स्वकान्तिकौमुद्या सखीजनहक्कुमुदसुमनःसुमनोविकासकत्वं स्वरश्मिप्रभामण्डलगतचन्द्रवत्तन्मण्डलान्तर्भासमानत्वं तासाञ्च चन्द्रप्रभावत्तदीयत्वं मण्डलाकारत्वं तन्मण्डलादप्रच्युतत्वं स्वरस्यान्वितचन्द्रस्य जगत्समस्तापापनयनाह्लादकत्वाद्गोपीमण्डलस्थस्य सर्वस्वानुगतजनाधियातापत्रयोपशमकस्वानन्दाविर्भावकत्वं गवां सर्वेन्द्रियाणामिन्द्रत्वेन सर्वेन्द्रियसर्वरसप्रवर्तकत्वं तद्धर्षणशीलत्वं च तथा गोभिर्विद्यते इति व्युत्पत्त्या श्रुतिरूपाभिर्गोपीभिः प्राप्यत्वं तत्तात्पर्य्यगोचरत्वं तास्वभिव्यक्तत्वं गोविन्दत्वेनैव गोपीसमाजराजमानत्वयोग्यत्वं च ध्वनितं गोविन्दो रासक्रीडामारभतेत्यन्वयः बहुनर्तकीनृत्यविशेषो रासस्तद्रूपां क्रीडां स्वेच्छानुकूलचेष्टामिति स्वातन्त्र्यद्योतनं रसानां समूहो वा रासः रससमूहाविर्भाविकां वा क्रीडां यद्वा रसशब्दाभिधेयसर्वलोकसुखानां बिम्बभूततया तत्समूहात्मकः स्वयं कृष्ण एव रासः रसो वै स इतिश्रुत्या चोर एव चौर इति वद्रस एव रासो वा स्वयं स्वस्वरूपात्मिकामेव क्रीडामारभताविर्भावयामास कैरित्यपेक्षायामाह । स्त्रीरत्नैः स्त्रीषु सर्वलोकक्रीडाधामवर्तमानास्वपि रत्नभूतैः सर्वश्रुतिशिरोरत्नैः ब्रह्मैकपरवेदान्तश्रुतिभिरिव सर्वस्त्रीशिरोरत्नैस्तदात्मकैर्वा भगवतानन्दघनेन लब्धविहारतया स्त्रीत्वस्य विद्वत्प्रार्थ्यत्वापादकतया रत्नरूषकैस्तदुक्तम्—

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधुकुर्वते ।
यासां गृहात्पुष्करलोचनपतिः ॥
नैं जात्वपैत्याहृतिभिर्हृदिस्पृशन् ।
अद्वैतवीथीपथिकैरुपास्याः ॥
स्वाराज्यसिंहासनलब्धदीक्षाः ।
शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेनेत्यादि ॥

इति तासां स्वरूपत उत्कर्षोक्तिः साधनतोऽप्याहानुव्रतैरिति कृष्णानुकूल्यमेव व्रतं येषां तत्प्राप्तये ऽनुसृतं कात्यायनीव्रतं वा यैरनुवर्तमानाः सर्वे व्रतोपलक्षिता धर्मा वा येषां तैः तदानुकूल्येनैवैर्ष्याद्यभावेन सह सुखानुभवायान्योऽन्याबद्धबाहुभिरित्यनेनैव यथा पूर्वापराविरोधसमन्वयाभ्यां क्रमपठितश्रुतिषु ब्रह्माभिव्यक्तिस्तथान्योऽन्याबद्धबाहुश्रुतिरूपासु तासु तदभिव्यक्तिरित्यपि ध्वनितम् अनुव्रतत्वेनैव प्रीतिस्तत्प्रसादगोचरीभूततयाविर्भूतपरमसुखत्वेन

रासोत्सवः संप्रवृत्तो गोपीमण्डलमण्डितः ॥
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥ ३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

मुदितैः प्रीत्यात्मकैरिति वा तथाच प्रेमवृत्तिगणे ब्रह्माभिव्यक्तिवत्तद्रूपासु तासु तदभिव्यक्तिरिति सूचितम् अत्रान्योऽन्याबद्धबाहुभिरित्युक्त्या परस्परबद्धबाहुत्वं गृहीतकरत्वं न कृष्णेनेत्यत्र सर्वतो गृहीतकरा गोप्यस्तन्मध्ये स्वैश्वर्येणैव सर्वतो मुखः कृष्ण इत्येवं रूपो रासोत्सवविशेषो दर्शितः ॥ २ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

तत्र ताभिः सहैकमत्ये सति तस्मिन्प्रदेशे इति वा गोविन्दः स्त्रीरत्नैः समन्वितो रासक्रीडामारभत—

नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम् ।
नर्तकीनां भवेद्रासो मण्डलीभूय नर्तनम् ॥

इत्युक्तं रासलक्षणं रसानां समूहो रासस्तस्य क्रीडेति तद्व्युत्पत्तिः एतदर्थमेव स्वीकृतपूर्वेन्द्राभिषेक इति सूचयितुं गोविन्द इत्युक्तं भगवता सार्द्धं रासक्रीडायोग्यता तासामेवासीदिति सूचनाय रत्नैरित्युक्तं तत्राप्यनुव्रतैस्तत्रापि नान्यानुरोधेन किन्तु प्रीतैः प्रीतिपूर्वकमुत्तमोत्कण्ठावाद्भिः कथमित्यपेक्षायामन्योऽन्यैर्नैवाबद्धाः संग्रथिता बाहवो यैस्तैस्तथा चान्योऽन्याबद्धबाहूनां भगवता गृहीतकण्ठीनां नर्तनं सम्प्रवृत्तमित्यर्थः । निवृत्तिपक्षे तत्र श्रुतीनामैकमत्ये सति विद्वद्भिस्तैः करणे इति वा गोविन्दः श्रुत्यैकगम्यः परमात्मा श्रुतिलक्षणस्त्रीरत्नैः श्रुतिमस्तकैरन्वितः प्रतिपाद्यप्रतिपादकसंबन्धवान् रसो वै स इतिश्रुत्या रस आनन्दरूपः परमात्मा तदीयां तदाविर्भावकरीं क्रीडां श्रुतिप्रतिपाद्यतालक्षणां लीलामारभत तत्र क्वापि श्रुतिरद्वितीयब्रह्माननुसृता न स्थिता इत्याशयेनाह । अनुव्रतैस्तत्रापि न क्लिष्टकल्पनया तत्र नीता इत्याशयेनाह । प्रीतैरिति । तत्रापि परस्परविरोधराहित्येनेत्याशयेनाह । अन्योऽन्येति परस्परमाबद्धा अविरोधस्थापका बाहुस्थानीया वाक्यार्था येषां तैः ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र यमुनापुलिने गोविन्दः अनुव्रतैः अनुकूलैः अन्योऽन्यमाबद्धाः सङ्ग्रथिताः बाहवो यैस्तैः स्त्रिय एव रत्नानि तैरन्वितः रासक्रीडाम् रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषः स एव हल्लीश इति युगान्तरे प्रसिद्धः तद्रूपां क्रीडाम् आरभतारब्धवान् ॥ २ ॥

भाषा टीका ।

तहां पर गोविन्द भगवान् अपने अनुकूल में वर्तमान और परस्पर बाहुओं को बन्धन करी हुई अत्यन्त प्रसन्न ऐसी सब स्त्रियों में श्रेष्ठ जो गोपी तिनके साथ रास क्रीडा का आरम्भ करते भये ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्साहित्यमभिनयेन दर्शयति । रासोत्सव इत्यक्षरचतुष्टयाधिकेन सार्धेन । तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानाम् कथं भूतेन यं सर्वाः स्त्रियः स्वनिकटं मामेवाश्लिष्टवानिति मन्येरंस्तेन एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः । नन्वेकस्य कथं तथा प्रवेशः सर्वसान्निहितत्वे वा कुतः स्वैकनिकटत्वाभिमानस्तासामित्यत उक्तं योगेश्वरेणेति अचिन्त्यशक्तिनेत्यर्थः ॥ ३ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

स्त्रिय इति । स्त्रीषु सत्पुरुषस्य तथैव कृत्यं युक्तमिति बोधयति अन्यथा वैषम्येण दोषापत्तिः सुखभङ्गश्चेत्यर्थः । एकस्यैव तथा प्रवेशः सर्वासाञ्च प्रत्येकं युगपत् कण्ठग्रहणं तथापि तासां स्वनिकटत्वमानः तत्र च पार्श्वद्वये वर्तमानस्याप्येकत्वेनैव ज्ञानः तत्सर्वञ्च तत्तदलक्षितमित्याद्यशेषासमञ्जसं समाधत्ते आह । योगः अचिन्त्याद्भुतशक्तिविशेषस्तस्येश्वरेणेति ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रासः परमरसकदम्बमय इति यौगिकार्थः । स एवोत्सवः क्रीडाविशेषरूपः सुखमयः पूर्वं कृष्णेन परमानन्दघनमूर्तिना निमित्तेन सम्यक् प्रवृत्तः । सम्यक्त्वमेव दर्शयति । गोपीनां मण्डलेन मण्डितः इत्येवं तासां शोभाहेतुत्वमाधिक्यं दर्शितम् । तत्प्रवर्तने तद्विशेषश्लोकः श्रीपराशरेण । "रासमण्डलबन्धोऽपि कृष्णपार्श्वमनुज्झता । गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥ हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम् । चकार तत्करस्पर्शनिमीलितदृशां हरिः ॥ ततः प्रववृते रासश्चलद्वलयनिःस्वनः । अनुजातशरत्काव्यगेयगीतिरनुक्रमात्" । इति । किञ्च तासामिति द्वयोरित्युक्ते एकस्यैव मध्ये स्थितिर्लभ्यते । तन्निवारणार्थं वीप्सा । अत एव मध्ये मणीनामित्यत्र मध्य इति सामान्यं वक्ष्यते कृष्णस्याप्युभयतः स्थितत्वेन दोर्भ्यां गृहीतकण्ठ्य इति च । तथाचोक्तं श्रीबिल्वमङ्गलेन । "अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गना । इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दनः" इति । व्यक्तीभविष्यति च क्रमदीपिकावचनेन द्वादशानामुभयोः पृथगन्तरगमित्वनेन । अत एव तत्तद्युग्मपूजैव तत्र विहिता ननु तत्तत्त्रिकपूजेति । स्त्रिय इति । स्त्रीषु परमानुरागेण युगपदात्मसङ्ग-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

मभीप्सुषु सत्पुरुषस्य तत्रैव कृत्यं व्यक्तमिति बोधयति । अन्यथा वैषम्येण दोषापत्तिः सुखभङ्गश्चेत्यर्थः । यं स्वनिकटमेव मन्येरन्नमंसतेत्यत्रेदं विवेचनीयम् । रासमहोत्सवोऽयं परस्परसुखार्थमेव श्रीकृष्णेन प्रारब्धः । तस्माद्रासस्य सर्वशोभादर्शनं श्रीगोपीनां सर्वासामेवावश्यापेक्ष्यमिति तासामिदमेव भानं योग्यम् । कयाचिच्चान्यवियत्यैवासौ बहुत्र भाति मयातु गृहीत एव अन्यथा स्वनिकटमेवापश्यमित्युच्येत । किञ्च ताभिः प्रियस्य स्वस्व निकट एव स्थितिं मन्यमानाभिस्तस्य स्वपार्श्वद्वयेऽपि वर्त्तमानतातुलानन्दग्रस्तबुद्धित्वेन विवेक्तुं शक्येति गम्यते । तस्मात् पूर्वत्र चात्र चानन्दमोह एव मूलं कारणं ज्ञेयम् । अत्र चैकस्यैव तथा प्रवेशादिकं समाधत्ते (?) योगो योगमायाचिन्त्याद्भुतशक्तिविशेषस्तस्येश्वरेणेति स्वाभाविक तच्छक्तित्वेनैव प्रेरणां विनापीच्छामात्रेण तत्तदुदय इति व्यञ्जितं द्योराकाश ओको निवासो येषामिति स्वभावत एव व्योम्नि भ्रमतामकस्माद्रासक्रीडादर्शनात् सङ्गतानामित्यर्थः । अत एव विमानशतसंकुलं नभो बभूव । चन्द्रदिशं परित्यज्य चन्द्रोपर्येव वा ज्ञेयम् । दिवौकसां ब्रह्मरुद्रादीनामिति । स्वर्गादावपि तादृशोत्सवासम्भावः सूचितः तत्रैवात्यौत्सुक्येति औत्सुक्यमत्र नृत्यांश एव न तु रहस्य विलासांशोऽपि दासत्वेनायोग्यत्वात् । तत एवाधुनैवागतत्वात् । अत एव योगमायया तेषां रहस्ये प्रतिदृष्ट्याच्छादनमपि ज्ञेयम् ॥ ३ ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

द्वयोर्द्वयोर्मध्ये स्थित्वा कृष्णेन गृहीतानां रासोत्सवः सम्प्रवृत्त इत्यन्वयः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाभिनयेन दर्शयति । रासोत्सव इत्यादिना नभस्तावदित्यतः प्राक्तनेन तासां मण्डलरूपेण स्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन गोपीमण्डलमण्डितो रासोत्सवः संप्रवृत्त इत्यन्वयः कथंभूतानां तेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानां कथंभूतेन यं कृष्णं सर्वाः स्त्रियः स्वनिकटस्थं मन्येरन् मामेवाश्लिष्टवानिति मन्येरंस्तथाभूतेन तदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः । नन्वेकस्य तथा कथं प्रवेशः सर्वसंनिहिते तस्मिन्वा कथं तासां स्वनिकटवृत्तित्वमात्राभिमान इत्यतो विशिनष्टि । योगीश्वरेणेति । अचिन्त्यविविधविचित्रशक्तिनेति भावः । बहुरूपतामापन्नेन तासां स्वसंनिकटवर्त्तित्वमात्राभिमानं जनयता चेति गूढाभिसन्धिः तथाच वक्ष्यति "कृत्वा तावन्तमात्मानं यावतीर्व्रजयोषित" इति अत एवाचीक्लृपभासनमात्मवन्मध्ये इत्युक्तमुपपन्नं नभ इति यदा रासोत्सवः सम्प्रवर्त्तितः तावत्तत्क्षणमेवौत्सुक्यमनसां सस्त्रीकाणां देवादीनां विमानशतैः सङ्कुलं सङ्कीर्णं नभो बभूवेति शेषः ॥ ३—४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्यादिषु भरतपीति संज्ञेषु गातुमुपक्रान्तेषु योऽधिरसोल्लासो जायते स रसः तत्सम्बन्धी रसो रसः तदुद्रेकेण क्रीडानृत्यविशेषः एवं विधो रासक्रीडोत्सवः कृष्णेन सम्यक्प्रवृत्त इत्यन्वयः कीदृशो गोपीनां तासां मण्डलेन वलयेन मण्डितोऽलंकृतः कथंभूतेन तासां गोपीनां मध्यप्रविष्टेन मध्ये शङ्कुस्थापनात्कथं मध्यप्रवेशः सङ्गत इति तत्राह द्वयोरिति वलयस्थितानां तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन एकस्यैतत्कथं घटत इत्यतो योगेश्वरेणेति योगैश्वर्यादेकस्य बहुत्वं घटत इति भावः कीदृशानां कृष्णेन कण्ठे गृहीतानां तत्रैवं विशेषः कृष्णदक्षिणभागस्थितया कृष्णदक्षिणांसग्रहणं वामभागस्थितायास्तस्य वामस्कन्धग्रहणं स्वनिकटस्थास्त्रियः कण्ठे गृहीतेन तेनैव रासोत्सवः सम्प्रवृत्त इति गतेनान्वय इत्यर्थः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

योगोऽचिन्त्यशक्तिः ॥ ३-६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्प्रकारमाह । रासोत्सव इत्यादि । रासनामा उत्सवो यत्र स तथा रासलास्योचितस्थलविशेषः सम्प्रवृत्तः प्रादुरासीत् गोपीनां मण्डलेन मण्डलैर्वा मण्डितः कृष्णेन च मण्डित इत्यन्वेतव्यः अथ कृष्णेन सम्प्रवृत्तः संप्रवर्तित इत्यर्थः । योगेश्वरेण अचिन्त्यपरमैश्वर्येण कण्ठे गृहीतानां तासां द्वयो द्वयोर्मध्ये प्रविष्टेन भ्रमणकौशलेनातिवेगवता अनेन योगेश्वरत्वं प्रकटितमथवा द्वयोर्मण्डलयोर्मध्ये द्वयोर्मण्डलयोः मण्डलद्वयमध्यवर्त्तिनीनां कण्ठे गृहीतानां तासां मध्ये प्रविष्टेन स्त्रियस्तं स्वनिकटं मन्येरन् स्त्रिय इति मण्डलद्वयमध्यवर्तिन्यः एतद्देव योगेश्वरत्वं वस्तुतस्तु एकएव सर्वनिकटस्थो न तु नानात्वेन अत एव स्वनिकटं मन्येरन् मेनिरे न तु नानात्वं वास्तवं योगेश्वरमात्रस्यैव कायव्यूहकरणसामर्थ्यं तदकृत्वा एक एव गच्छ्यापकत्वेन स्फुरति तदेवाचिन्त्यपरमैश्वर्यं तर्हि "कृत्वा तावन्तमात्मानं यावतीर्गोपयोषित" इति कथं सङ्गच्छतां सत्यं तत्रैवं व्याख्या यावतीर्यावत्प्रमाणा यावदवयववत्यस्तावन्तं कृत्वा तावत्प्रमाणत्वेन तावदाशयत्वेन स्फुरति ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भगवान्पुनः हस्तमण्डलाद्बहिः स्थितो यथा सम्बध्यते तथा सन्निवेशमाह । रासोत्सवः सम्प्रवृत्त इति । सर्वेषामेव गुणभावात् रसप्राधान्यात् रासोत्सव एव सम्यक् प्रवृत्तः उत्सवो नाम मनसः सर्वविस्मारक आह्लादः उत्सवत्वसम्पादनाय सजातीयानेकरसोत्पादनार्थं विशेषमाह । गोपीमण्डलमण्डित इति । गोपीनां

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मण्डलैरनेकविधैर्मण्डितः उत्सवोऽप्यनेकविधैः ब्राह्मणादिमण्डलैर्मण्डितो भवति अत्रापि तुल्यस्वभावाः रसार्थमेकीकृताः पृथङ्मण्डलभाजः तैरपि मण्डितः पोषकाश्च रसास्तदुत्पादिता इति उत्तरोत्तरमण्डलैः पूर्वपूर्वैरसः पोष्यत इति नायं रसोऽन्यत्र भवितुमर्हति सम्यक् प्रवृत्तिर्निरन्तरमाविर्भावः । ननु कालकर्मस्वभावानां प्रतिबन्धकत्वात् अनेकत्र जायमानो रसः कथमेकीभवति तत्राह । योगेश्वरेणेति । सहि सर्वोपायवित् सर्वेवस्तुषु विद्यमानं भगवदैश्वर्यादिकं योगं एवोद्घाटयतीति साधनेषु योगः प्रधानं तत्रैश्वर्ये सर्वत्रैव मूलभूतो रस उत्पादयितुं शक्यत इति सिद्धमेव किञ्च कृष्णोऽयमिति स्वयमेव सदानन्दः उद्गतोऽग्निः सर्वत्रैवाग्निं लीनं जनयितुं शक्नोति तस्य भगवतस्तासु सन्निवेशप्रकारमाह । तासां मध्ये द्वयोर्द्वयोरिति मण्डलीकृता यावत्यो गोप्यः तासां द्वयं द्वयं भिन्नतया भावनीयं छिद्रद्वयस्य नैकाधिकरणताभाव्या अतो मण्डलमध्ये त्र हस्तद्वयग्रन्थिः तत्र भगवदुदरं यथा भवति तथा भगवानुत्थितो जातः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्साहित्यप्रकारं दर्शयति । रासोत्सव इति । षड्भरन्यूनसार्द्धेन । रास एव उत्सवः भक्तजनहृन्मनश्चातकस्य आनन्दामृतप्रदायकः सम्यगेव प्रवृत्तः । केन । तासां मण्डलरूपेणावस्थितानां गोपीनां द्वयोर्द्वयोर्मध्येन प्रविष्टेन कृष्णेन अत्र सम्प्रवर्त्तित इत्यनुक्तेः स्वतन्त्रकर्तृत्वं तस्मै रासायैव दत्ता स्वयञ्च करणत्वं भजता श्रीकृष्णेन स्वस्मात् सर्वशक्तिभ्यश्च सर्वलीलाभ्यश्च रासस्यैव महोत्कर्षः स्वतो व्यञ्जयामासे । यत एव लक्ष्मीप्रभृतयोऽपि तं लब्धुमुत्कण्ठन्त एव नतु लभन्ते इति ज्ञेयम् । कथंभूतानां तेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानाम् । अत्राग्रिमश्लोके मध्ये मणीनां हैमानां महामारकतो यथेत्यत्र मध्ये इति पदेन मरकत इत्येकवचनेन चात्र च श्लोके सता मिथो इत्यनुक्त्वा प्रविष्टेनेति पदेन च प्रयुक्तेन गोपीमण्डलमध्यकर्णिकाभूत एव कृष्णो मध्ये स्थितः सन्नेव तथा गतिलाघवं प्रकटयामास यथा मण्डलस्थानां गोपीनामपि द्वयोर्द्वयोर्मध्ये प्रविष्टो नृत्यति इमेत्येकपरमाणुमात्र कालेनैव मध्यप्रवेशाद्रासमण्डलस्थाखिलशतकोटिगोपीः सनृत्यं परिरभ्य पुनर्मध्यप्रदेशं गत एव बभूवेत्यलातचक्रादपि तस्य गतिलाघवमधिकमभूदिति ज्ञेयम् । यतो मण्डलकर्णिकागतत्वं मण्डलस्थप्रत्येकगोपीमध्यगतत्वं तस्य तदानीं सर्वैर्दृष्टम् । एवमेव । "अङ्गनामङ्गनामन्तरा माधवो माधवं माधवञ्चान्तरेणाङ्गनाः । इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दन" इति श्रीबिल्वमङ्गलमहानुभावचरणैरुक्तम् । तत्र हेतुगर्भं विशिनष्टि । योगेश्वरेण निखिलकलानिधित्वात् तदुपायमहाविज्ञेन । "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः । यद्वा । योगा योगमाया दुर्घटघटनापटीयसी महाशक्तिस्तस्या ईश्वरेण । युगपत् सर्वगोपीनामाश्लेषौत्सुक्यं तस्याभिज्ञाय सैव तावतः प्रकाशांस्तस्य प्रकटय्य समादधौ । अत्र द्वयोर्द्वयोर्मध्ये प्रविष्टेनेति वीप्सया एकैकगोपीमध्ये द्विद्विगोपीमध्ये प्रवेशः सङ्गच्छते । इति व्याचक्षते तत्रैकैकगोपीमध्यप्रवेशे व्याख्यायमाने योगमायापक्षे एकस्याः स्त्रियः स्कन्धयोः कृष्णप्रकाशद्वयस्य भुजस्पर्शानौचित्यं नाशङ्कनीयं योगमाययैव तां तां प्रत्येकस्यैव प्रकाशस्पर्शमानसमर्पणात् द्विद्विगोपीव्याख्याने तु नैवासमञ्जसम् । यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् असौ मयाश्लिष्यन्नेवास्तीति तदपि यत सर्वत्रायं दृश्यते तदियं काचिदस्य नाट्यविद्येत्यमंसतेत्यर्थः । अत्र मध्यगो देवकीनन्दनः श्रीवृन्दावनेश्वर्या सहित एवेत्याहुः तस्या एव सर्वश्रेष्ठत्वात् रासक्रीडादिकारणमिति तदीयशतनामस्तोत्रदृष्टेः । तावत् तत्क्षण एव विमानशतैर्व्योम नभो बभूव । केषां दिवौकसां ब्रह्मादीनाम् अत्यौत्सुक्यादिति कृष्णनृत्यांश एव नतु रसस्य विलासे । दासत्वेनायोग्यत्वात् तद्दाराणान्तु अनौचित्याभावात् सर्वत्रैव अत एव रासे दिवि पुंसां कृष्णदर्शनमेव न गोपीदर्शनम् । योगमायया आवरणादिति ज्ञेयम् ॥ ३—५ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तदेतद्विशदयति । रासेति । सार्द्धत्रयेण रासः प्राग्लक्षितः क्रीडाविशेषः यद्वा रसकदम्बमयः कश्चिद्विलक्षणो व्रजलीलाविशेषः यद्वा रसो मुख्यरसः शुद्धः प्रेमा स एव रासः तद्रूपो य उत्सवः तत्तत्प्रेमपोषणमयः पूर्वं कृष्णेन कर्त्रा तदात्प्रेमपरवशेनेति वा संप्रवृत्तः प्राक्सिद्ध एव संप्रति संप्रवर्तितः सम्यक्त्वमेव दर्शयति गोपीत्यादि । एवमेवाभिमतं स्वामिपादैः—

> जयति श्रीपतिर्गोपीरासमण्डलमण्डनः ।

इत्यादिना वस्तुनिर्देशात्मकमङ्गलमाचरद्भिः कीदृशेन द्वयोर्द्वयोर्मध्ये प्रविष्टेन तत्रेदमसंभावितमित्याह । योगेति योगा अचिन्त्या निजशक्तिर्योगमायाख्या तस्या ईश्वरेण मायायां किंतु दुर्घटमितिन्यायान् मायायामिति किंपुनर्योगमायामित्यर्थः । अथवा कृष्णेन परमानन्दघनमूर्त्तिना निमित्तेन सम्यक् प्रवृत्तः तदुक्तं श्रीपराशरेण—

> रासमण्डलबन्धोऽयं कृष्णपार्श्वमनुज्झता ।
> गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥
> हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम् ।
> चकार तत्करस्पर्शनिमीलितदृशां हरिः ॥
> ततः प्रववृते रासश्चलद्वलयनिःस्वनः ।
> अनुयातशरत्काव्यगेयगीतिरनुक्रमादिति ॥

तासां कण्ठेगृहीतानां मध्ये स्त्रियः स्त्रीत्वाभिमानिन्यः नतु सख्याभिमानिन्य इत्यर्थः । यं स्वनिकटं मन्येरन् अमंसत कथंचिन्नाट्यविद्ययैवासौ बहुत्र भाति मयातु गृहीतकण्ठ एवेतिभावः । अन्यथा स्वनिकटमेवापश्यन्नित्युच्येत किंच ताभिः प्रियस्य स्वस्वनिकटस्थितिमन्यमानाभिस्तस्य पार्श्वद्वये वर्तमानता तु नानन्दग्रस्तबुद्धित्वेन विवेक्तुं शक्येति गम्यते ततश्च सर्वमध्यगतं युगलं सखीभिरपि परिचीयते नान्याभिरिति सिद्धिरेव सर्वत्र योगमायैववा हेतुः एवंच तस्य तासां च नृत्यगीतादिकमपि ताभिरनाकलितमेवेतिदिक् तत्रोभयोर्नृत्यं श्रीगोविन्दलीलामृते—

> आविश्य हल्लीशककेलिरङ्गं—
> राधामुकुन्दौ ललिताविकाली ।

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तत्रांसन्यस्तभुजौ मिथस्ता—
वनृत्यतां लास्यविदां वरिष्ठौ ॥

तयोर्लक्षणं संगीतरत्नाकरे—

नर्तकीभिरनेकाभिर्मण्डलीभूय नर्तनम् ।
यत्रैको नृत्यति नटस्तद्वै हल्लीशकं विदुः ॥

तदेवेदं तालबन्धगतिभेदेन भूयसा लास्यं स्यान्न स नाकेऽपि वर्त्तते किं पुनर्भुवि तदेवं रासोऽयं हल्लीशकलास्यभेदेन द्विविधोऽपि स्थिरास्थिरभेदेन द्विविध इति दर्शितं तत्रैव—

नृत्याभिनाभिविनीतो तद्वद्द्वयं पदचालनैः ।
कुलालचक्रवच्चक्रे भ्रमदासीद्द्वयोरपि ॥
लघुभ्रमचक्रगतेः समा तासां गतिः क्वचित् ।
क्वचिन्मन्दा क्वचिच्छीघ्रा सप्रियस्य तथा हरेरिति ॥
तदेवं स्थिरमस्थिरमप्येतद्द्विधं रासमण्डलम् ।
स्थिरं स्थलविशेषस्थमस्थिरं चक्रसंश्रयम् ॥
स्थिरभ्रमिः कलुगता भवेत्सव्यापसव्ययोः ।
स्थिरे तु चक्रजा साहि प्रातिलोम्यानुलोमभाक् ॥
यथास्थाने स्थिते तत्र नृत्यं संक्रामितः पुनः ।
नत्ता स्थानास्थितं भाति नृत्यकर्तुश्च योषितः ॥

एवं च चक्रभ्रमिस्वभावानैवानेकत्र भानमेतदप्युक्तं तत्र प्रत्येकमुभयोर्यथा तत्रैव—

कृष्णः श्रीमान्मुहुरिह समागत्य तासां स मध्या-
न्नाना तालक्रमवशतया चालयन् श्रीपदाब्जे ॥
धुन्वन् पाणी नटति निगदन्नित्थमानयन्दयस्ताः ।
तत्तत्थै दृगिति दृगिथै दृकु तथैदृकुतथैथा
थो दिकु दां दां किट किट कणफत्थो क्कु थो दिक्कु भाटे ।
झेन्द्रां झेन्द्रां किट किट किट धां झङ्कुझां झङ्कुझां झां ।
थो दिकु दां दां दमि दमि दमि धां काकुझे काकुझे द्रां
मागत्यैवं नटति स हरिश्चारुपाठप्रबन्धम् ॥
कूजत्काञ्चीकटकावरण नूपुरध्वानरम्यम् ।
पाणिद्वन्द्वे मुहुरिह नद त्कङ्कणं चालयन्ती ॥
राधा कृष्णद्युतिघनचये चञ्चलेव स्फुरन्ती ।
नृत्यन्तीत्थं गदति तथथै थै तथै थै तथै था ॥
धां धां दकु दकु चड चड निडां णं गिडां णं गिडां णाम् ।
तुन्तुकु तुन्तु गुडगुडुगुड धां द्रां गुडुद्रां गुडुद्राम् ।
धकु धकु धांधां किरिटि किरिटि द्रां दिमिद्रां दिमिद्रां
मागत्यैवं मुहुरिह सदा श्रीमदीशा ननर्त ॥

प्रधानसखीनां यथा—

झंझं कुर्वत्कनकवलये धुन्वती पाणिपद्मे ।
तासाम् मध्यात्सपदि ललिताप्यागमत् कृष्णकान्त्या ॥
श्यामे रङ्गे तडिव घने नृत्यतीत्थं वदन्ती ।
थे थे थो थो तिगड तिगड थो तथैथो तथैता ॥
दमि दमि दमि धां धौं धौं मृदङ्गादिवाद्यैः ।
कण कण कण वीणा काणमिश्रैर्विदग्धा ॥
नटति भणण झंझंकायेलकारजाला ।
दृगिति दृगिति दकुथै थो तथोथै मुखाणा ॥

एवमन्यासामपि विस्तरभिया न लिख्यन्ते अथ—

छालिक्यनृत्ये राधया देयमन्यदपश्यता ।
तुष्टेनात्मार्पितस्तस्यै कृष्णेनालिङ्गनच्छलात् ॥

अपिच—

कृष्णः कान्तां नटयति मुदा कापि वंशीप्रगानैः ।
र्नर्मोन्नीतं स्खलनमिह सा तस्य दृष्ट्वा हसन्ती ॥
तालं तस्य स्खलितमपि संभालयन्त्यात्मनो द्राक् ।
तं चाप्येषा नटयति तथा कापि वीणाप्रगानैः ॥
कृष्णेन राधाथ तया समं हरिर्यथा ननर्तात्र जगावदावदयत् ।
साहाय्यकोऽक्त्वापि तयोः सखीनातिनालं तथासीन्नृतिगानवाद्ये ॥

इत्यादि बहुसः एवंचक्रमध्यगतयुगलं यद्यत्करोति तत्तदनुकरोति गोपीगण इति ज्ञेयं नात्र चित्रं यतः पश्यतां खेचराणामपि रसावेशो जातं इत्याह। नभ इति। विमानशतसंकुलत्वमपि मण्डलीवंघरीत्यैव ज्ञेयम् औत्सुक्यापहृतात्मनामित्युक्तेः दिवि ओको येषामिति तल्लीलानुमोदनपरिकराणां सर्वदा व्योम्न्येव वर्तमानानामित्यर्थः। ननु रहस्यलीलाया मनधिकारिणां प्राकृतदेवानामिति भावः। यद्वा प्राकृताप्राकृतमिश्रत्वात् प्रकटलीलाया इति प्राकृता एव नृत्यमात्रावलोकनमात्रपरा ननु रहस्यवेदिन इत्यविरोधः ॥ ३ ॥ ४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

गोपीमण्डलमध्यस्थभगवद्रासविशेषं निर्दिश्य रासप्रकारान्तरमाह। रासोत्सव इति। रासः परमरससमूहः स एवोत्सवः परमसुखरूप उदिति उत्कृष्टः स्वरूपात्मकत्वादेवातिविलक्षणः सवः कालो यस्येति वा स स्वयमेव सम्यक् प्रवृत्त इत्यत्र रासोत्सव एव प्राधान्येन सम्यक् प्रवृत्तिकर्तृत्वनिर्देशः पूर्वं तु गोविन्दो रासक्रीडामारभतेत्युक्तं तथा च कृष्णारम्भमात्रेण आरम्भोऽप्यत्रेच्छामात्रं ज्ञेयः स्वयमेव गोपीकृष्णसंबन्धाय नित्यो त्सुको रससमूहात्मको रासोत्सवः कृष्णेच्छामात्रं प्रतीक्षतामेवेस्य सम्यक् स्वसर्वगुणयुगपदाविष्कारेण प्रवृत्तो यद्वा कृष्ण एवावीरमत तस्य तदारम्भसमुद्भवेन सर्वज्ञानामपि ज्ञानप्रतिबन्धकेन नित्यमुक्तस्यापि बन्धकमातिचित्रेण प्रेमरसेन भगवतः कृष्णस्य तत्सखीनाञ्च विगतानुसंधानतया रासोचितकलाविकाशिपयासम्भावितत्वेन तत्सम्यकत्वासम्भवात्स रासोत्सव एव सम्यक् तत्प्रथमेच्छानुसारेण प्राथमिकादेव प्रयत्नात्समाधिवृत्त्यनुवृत्तिवत् भगवत्तत्सखीरासमागमोत्साहेन च प्रवृत्तः अत एवाबुद्धिपूर्वकत्वेन वेदस्मृतिभ्यः प्राधान्यवद्रासोत्सवस्यैव भगवल्लीलान्तरेभ्यः प्राधान्यं किञ्च प्रेमपथस्य प्रत्यक्त्वेन सर्वलोकवैपरीत्येन सर्वत्र सर्वेश्वरत्वात्कृष्णस्य प्राधान्यं गोपीनां तत्सखीत्वात्तदधीनत्वं रासादेस्तत्कर्मतया तदधीनत्वम् अत्र तु रासोत्सवस्य सम्प्रवृत्तिकर्तृत्वनिर्देशेन प्राधान्यं गोपीनां तदुपकरणत्वमत एव रासविशेषणतया किम्भूतो रासोत्सव इत्यपेक्षायामाह। गोपीमण्डलमण्डित इति। गोपीनां मण्डलेन मण्डितः तत्राप्ययं विशेषो गोपीनां प्रेमपारवश्येन प्रवृत्तौ रासोत्सवप्राधान्यं तन्मण्डकत्वाच्छोभाप्राधान्येन गोपीनां प्राधान्यं कासां रासोत्सवस्तत्राह। तासामिति। यासां गोपीनां मण्डलेन मण्डितस्तासामेव किम्भूतानामित्यपेक्षायामाह। द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठगृहीतानाम्

श्रीरमनारायणकृतभावभावविभाविका ।

अत्रापि गोपीविशेषणतया कृष्णस्य भगवतो निर्देशात्तासां प्राधान्यं तथा कृष्णगृहीतकण्ठतया शोभितत्वेनैव तासां रासमण्डकत्वेन तासामपि शोभाप्रदत्वात्कृष्णप्राधान्यम् असंख्यातानां तासां द्वयोर्द्वयोर्मध्ये प्रवेशयोग्यत्वाय कृष्णाविशेषणमाह । योगेश्वरेणेति । योगा काचित्स्वरूपात्मिकैव लीलोपयोगिन्याचिन्त्या शक्तिस्तदीश्वरेण अत्र शक्तेः स्वरूपात्मकत्वे तयोरीशितव्येश्वरत्वलक्षणभेदस्फूर्तिः सच्चिदानन्दानां भेदाभावेऽपि भेदभानवत् यद्वा विभुत्वेन सर्वासां योगायेश्वरेण समर्थेनेत्यर्थः । तत्र द्वयोर्द्वयोः प्रवेशप्रयोजनमाह । स्त्रियो यं कृष्णं नित्यानन्दं स्वमनःकर्षकं स्वस्वनिकटं स्वस्यैव समीपस्थं मन्येरंस्तेन तथा गृहीतकण्ठीनाम् अत्रायमाशयः सर्वमनसां नित्यानन्दकृष्णाकृष्टत्वाद्यदि कृष्णस्य स्वसमीपे दर्शनं न स्यात्तदा स्वमन्दभाग्यत्वबुद्ध्योत्सवभङ्गो यदा च मण्डले एकैकसंनिधाने प्रवेशस्तदैश्वर्य्यभानप्रातिरोधेन तादृशरसास्फूर्तिरतः स्वात्मन एकस्यां दिशि कृष्ण एकस्यां गोपीति भावेन मन्निकटे एव प्रियतम इति स्वस्वोत्कर्षमानेन सर्वासां सुखातिशयार्थं तथा प्रवेशः यद्वा नेश्वरीणामैश्वर्य्यभानं प्रतिबन्धकमीर्ष्यावापि तु प्रेमवतां कृष्णतद्भक्तोभयसमागमः सुखकरस्तथाच सर्वासां कृष्णतत्सखीनां समागमेन सुखातिशयाय तथाप्रवेश इति ध्वनिः अस्मिन्पक्षे यत्र यत्र कृष्णस्य गोपीनाञ्चाग्रे कर्तृत्वं तत्र तत्र कृष्णप्रेरितविहृदेहानामिव रासोत्सवप्रेरितत्वेनैव कर्तृत्वनिर्देशः यद्वा रासोत्सवः प्रवृत्त इत्युक्त्वा किम्भूतः स तदाह । गोपी गोशब्दवाच्यानां गोश्रुतीन्द्रियरश्मिभूम्यादीनां पतिर्गोपः सर्वेश्वरः कृष्णः प्रवर्त्तकत्वेन गोप्तृत्वेन मण्डकत्वेन चास्यास्तीति तथा पुनः कीदृशः द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठे गृहीतानां तासां मण्डलेन मण्डितः यद्वा किम्भूतो गोपी तथा मण्डलो मण्डितोऽनेनेति तथा अस्मिन्पक्षे कृष्णप्रवर्तितस्तल्लब्धश्रीको रासोत्सव एव तासां मण्डलमण्डक इति गोपीनां रासोत्सवस्य च सर्वस्य कृष्णस्वरूपात्मकत्वाद्यथेष्टमण्डकमण्डितत्वोक्तिर्गुणप्रधानभावोक्तिर्वा न दोषाय यद्वा एवं पृथगेव मण्डलरासं निरूप्य रासप्रकारान्तरमाह । मण्डलरासोत्तरं योगेश्वरेण द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठे गृहीतानां रासोत्सवः सम्प्रवृत्तः तत्रापि रासद्वैविध्यसूचनं दक्षिणवामभागस्थगोपीद्वयमध्यप्रविष्टेन कण्ठे गृहीतानामेकः परस्परयोजितकरद्वयसम्मुखगोपीद्वयद्वयमध्यप्रविष्टेन द्वितीयोऽत्र भगवतोऽप्युभयसन्तोषायोभयसंमुखतया तत्तत्कण्ठे करद्वयधारणेन चतुर्भुजत्वमिति बोध्यम् एवं यावद्रासोत्सवः सम्प्रवृत्तस्तावन्नभो रासदर्शनौत्सुक्येनापहृता आत्मानो मन इन्द्रियप्राणा येषां तेषां दिवौकसां विमानानां शतेनासङ्ख्यातेन संकुलमासीत् शतसङ्ख्यास्वीकारे नभः संकुलत्वासम्भवात् अत्र सदाराणामित्युक्त्या स्त्रीणां पुरुषाणां च सर्वेषामौत्सुक्यापहृतात्मत्वकथनं यद्वा सदाराणामपि दारपुरुषयोः सह वर्तमानत्वे परस्पर लग्नचित्ततया न्यथौत्सुक्यासम्भवेऽपि तद्रासोत्सवमाहात्म्यादेव तथौत्सुक्यमिति सूचनं नभस्तावद्विमानशतसंकुलमित्यस्यायमप्याशयः नभसा कृष्णतत्सखिवदमितशशिप्रभमुखमृगाङ्काङ्कां भूमिमालोक्य विमानेन स्वमानायामितामण्डशशिनामानयनमिव विमानानयनेऽपि तेषां शशिप्रभतया विशेषमाणानां विमानानामतिशोभमानकृष्णतत्सख्यमानिमाननिरीक्षणेन विमानानां तन्मुखचन्द्रग्रहणसहकारायेक्षितबहुतरताराकारत्वं जातं किञ्च यद्यपि तानि विमानानि चन्द्रतोऽप्यधिकप्रभतया विमानानि तथापि तानि कृष्णतत्सखिच्छविविमातानि चन्द्रस्तु स्ववंशजकृष्णादर्शनलब्धातिमानतया राजमान इति विमानचन्द्रविभागोपपत्तिः तत्रस्थाः सुराश्च शुक्लपक्षे शशिसुधापानं विस्मृत्यामितहरितत्सखिमुखचन्द्ररूपसुधारूपेपीयमाना औत्सुक्यापहृतात्मत्वेन द्रुमदशापन्नतया सुरद्रुमाः सन्तः सुमनः सुमनोऽभिवर्षिणोऽभवन् ॥ ३ ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

चतुर्वर्णाधिकेन सार्द्धेन तत्साहित्यं दर्शयति । रासेति । तासां रासक्रीडालक्षण उत्सवो मनोविस्मापकाह्लादरूपः सम्यक् प्रवृत्तः यथोत्सवोऽनेकविधैर्ब्राह्मणादिभिर्मण्डितो भवति तथाऽयमुत्सवो गोपीनां बहुविधैर्मण्डलैर्मण्डितः कथंभूतानां तासां कृष्णेन कण्ठे गृहीतानां कथम्भूतेन कृष्णेन द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णपदेनानवच्छिन्नानन्दसमुद्रे तासां निमग्नता सूचिता ननु एकस्य कथमेककलमेवंविधः प्रवेश इत्याशङ्कानिरासायोक्तं योगेश्वरेण योगः अघटितघटनापटीयसी महामायाशक्तिस्तस्या ईश्वरेण तथा च तादृशशक्त्या तस्य तथा प्रतीतिरित्याशयेनाह । यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् अत्र गोपीद्वयान्तरितः कृष्ण इत्युक्त्या गोप्यर्द्धसङ्ख्याककृष्णमूर्त्तिसंयुक्तो रासोत्सवस्तेन गोपीससंख्याकवन्मूर्त्तियुक्तेन वक्ष्यमाणेन तेन न पौनरुक्त्यं किञ्च अत्र न तावत्संख्याकमूर्त्तिस्वीकारः किन्तु एक एवातिलाघवेन तथा नृत्याकृतिः स्यात् एवं यं मन्येरन्नित्युक्तं ननु तथा दृष्टवत्य इति इयञ्च भगवल्लीला परमोत्कृष्टा लक्ष्म्यादीनामपि प्रार्थनीया परमदुर्लभा चेति बोध्यं रासोत्सव इत्यारभ्य कथालङ्कारार्थं पुरञ्जनोपाख्याने नगरीवर्णनवद्रासवर्णनमतो निवृत्तिपक्षविवरणप्रयासादुपरम्यते ॥ ३—४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवतस्ताभिः समन्वितत्वमभिनयेन दर्शयति । रासोत्सव इत्यादिना यं मन्येरन्नित्यन्तेन । तासां गोपीनां मण्डलरूपेण वर्तमानानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कथम्भूतानां कृष्णेन कण्ठे गृहीतानामुभयत आलिङ्गितानाम् कथम्भूतेन यं श्रीकृष्णं सर्वाः स्त्रियः पृथक् पृथक् स्वनिकटं मन्येरन् तेन नन्वेकस्तत्तन्निकटस्थः कथमभवदित्यत आह । योगेश्वरेणेति । अचिन्त्यशक्तिनेत्यर्थः । तथैव वक्ष्यति "कृत्वा तावन्तमात्मानं यावती व्रजयोषित" इति एवंभूतेन कृष्णेन गोपीनां मण्डलैर्मण्डितोऽलंकृतः रासोत्सवः सम्प्रवृत्त इत्यन्वयः यर्हि रासोत्सवः सम्प्रवृत्तस्तावत् तत्क्षणमेवौत्सुक्यनिभृतात्मनामौत्सुक्यपूर्णमनसां सस्त्रीकाणां दिवौकसां देवादीनां विमानशतैः सङ्कीर्णं नभोऽभूदिति शेषः ॥ ३ ॥ ४ ॥

भाषा टीका ।

तदनन्तर गोपियों के मण्डल से मण्डित होकर महारास का उत्सव प्रवृत्त भया उस रासोत्सव मे दो दो गोपिन के

१यं मन्येरन्नभस्तावद्विमानशतसङ्कुलम् । १मन्मन्येत इति वि० पाठः
दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥ ४ ॥
ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ।
जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥
वलयानां नूपुराणां किङ्किणीनां च योषिताम् ।
सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

भाषा टीका ।

मध्य में एक एक कृष्ण मूर्ति से रहकर भगवान् ने सब गोपियों के कण्ठ में हाथ डालकर योगीश्वरों की शक्ति को दर्शाया रहा ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तावत्तत्क्षणमेवौत्सुक्यव्यासमनसां सस्त्रीकाणां देवानां विमानशतैः संकुलं संकीर्णं नभो बभूव ॥ ४ ॥

ततस्य भगवतः श्रीकृष्णस्यामलं निर्मलं यशो जगुरिति ॥ ५ ॥

सप्रियाणां कृष्णसहितानाम् तुमुलः सङ्कीर्णः ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

द्यौराकाश ओको निवासो येषामिति स्वभावत एव व्योम्नि भ्रमतामकस्माद्रासक्रीडादर्शनात् संहत्य तत्र स्थितानामित्यर्थः। अत एव विमानशतसंकुलं नभो बभूव यद्वा द्यौः स्वर्गः ततश्च स्वर्गेऽपि तादृशोत्सवासद्भावः तेषां स्वस्वसेव्याया वरोऽवसरोऽपि सूचितः अतएवात्यौत्सुक्येति इत्यसमयेऽप्यागमनदोषः परिहृतः अथवा एते खलु श्रीभगवत्क्रीडाया आन्तरिक्षाः परिकरा देवविशेषा ज्ञेयाः अतएवोक्तं दिवौकसां तत्क्रीडोपकरणत्वेन सदासावधानं व्योम्न्येव वर्त्तमानानामित्यर्थः। एवमन्यत्राप्यूह्यं ततस्तेभ्यो दिवौकोभ्यः किम्वा तदनन्तरं स्वयमेव नेदुः दिव्यत्वात् महामङ्गलोत्सवस्वभावाद्वा एवमन्येऽपि आदौ दुन्दुभीनां नादो मङ्गलारम्भार्थः स्वस्ववर्ग्यसम्मेलनार्थं च नितरां पेतुः निःशब्देन वृष्टय इतिवहुत्वेनच रङ्गस्थल्यां पुष्पास्तरणं किल जातमिति बोध्यते गन्धर्वाणां पतयः श्रेष्ठा, अन्यथा तादृशनृत्ययोग्यगानासिद्धेः तेषां श्रैष्ठ्यसाफल्यसम्पत्तिश्च स्त्रीभिरप्सरोभिः स्वपत्नीभिर्वा सहिता इति सर्वेषामेव तदेकनिष्ठतोक्ता न तिष्ठति मलो यस्मादित्यमलमिति तेषामपि कामादिदोषो निरस्तः ॥ ४—५ ॥

एवं देवकृतोत्सवमुक्त्वा रासयोग्यं वाद्यगीतादिवक्तुमादौ वाद्यमाह । वलयानामिति । किङ्किणीनां काञ्च्यादिवर्त्तिनीनां योषितामिति योषित्वेन सामान्यत एव वलयादिसद्भावो ननु रासार्थं भूषणत्वेन ग्रहणादिति बोध्यते पूर्वं गृहेभ्यो निर्गमे तासां तदनपेक्षणात् सप्रियाणामिति तासां प्रीत्यर्थं तावत्त्वमिव गतस्य श्रीभगवतोऽपि तावद्वलयादिशब्दोऽभिप्रेतः रासेन यन्मण्डलं मण्डलीबन्धः किंवा रसस्येदं रासं यन्मण्डलं तस्मिन् यद्वा रससमूह इत्यर्थः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततस्तेभ्यो दिवौकोभ्यः । किम्वा तदनन्तरं स्वयमेव नेदुः दिव्यत्वात् महामङ्गलोत्सवस्वभावाच्च । एवमन्येऽपि आदौ दुन्दुभीनां नादो मङ्गलार्थः स्वस्ववर्गसम्मेलनार्थश्च । नितरां पेतुः निःशब्देन वृष्टयः इति बहुत्वेन च रङ्गस्थल्यां पुष्पास्तरणं किल जातमिति बोध्यते । स्त्रीभिरप्सरोभिः सपत्नीभिश्च सहिता इति सर्वेषामेव तदेकनिष्ठतोक्ता न तिष्ठति मलो यस्मादित्यमलमिति तेषामपि तदानीं सर्वदुर्वासना निरस्ता ॥ ५ ॥

एवं देवकृतोत्सवमुक्त्वा रासयोग्यं वाद्यगीतादि वक्तुमादौ वाद्यमाह । वलयानामिति । किङ्किणीनां काञ्च्यादिवर्त्तिनीनां योषितामिति । योषित्त्वेन स्वभावत एव वलयादिसद्भावः सूचितः । सप्रियाणामिति । तासां प्रीत्यर्थं तावत्तया प्रकाशमानस्य श्रीभगवतोऽपि तावद्वलयादिशब्दोऽभिप्रेतः । रासेन यन्मण्डलं मण्डलीबन्धस्तस्मिन् ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यं कृष्णं स्त्रियः सर्वाः स्वनिकटस्थं मन्येरन् तेन कृष्णेनेत्यन्वयः यदा रासोत्सवः सम्प्रवृत्तः नभस्तावद्दिवौकसां विमानशतसंकुलमासीत् ॥ ४—७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इति । दुन्दुभयो दध्वनुः सस्त्रीकाः गन्धर्वश्रेष्ठा अमलं शृण्वतां वदतां च पापहरं तस्य भगवतः यशो जगुः ॥ ५ ॥

वलयानामिति । सप्रियाणां श्रीकृष्णसहितानां योषितां ये वलयादयस्तेषां शब्दस्तुमुलः सङ्कीर्णो बभूवेत्यर्थः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेवं कृष्णे रासक्रीडाकारिणि के साक्षिण इति आह । यं मन्ये तेति । कृष्णो यदा रासक्रीडां कर्तुं मन्येत न्यरूरुपदिति व्यत्ययः तावत्तदा नभः औत्सुक्येन निभृतात्मनां निश्चलमनसां

श्रीमाद्विजयध्वजतीर्थकृतपदरत्नावली ।

सदाराणां सभार्याणां दिवौकसां विमानसतसङ्कुलम् आसीति शेषः ॥ ४ ॥

ततः रासोत्सवप्रारम्भानन्तरम् ॥ ५—६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तदा नभस्तावत् सकलं नभ इत्यर्थः "यावत्तावच्च साकल्ये" इत्युक्तेः सदाराणां दिवौकसां विमानशतसंकुलमासीदित्यर्थः । दर्शनार्थमत्यौत्सुक्यभृताश्चात्मानो येषाम् ॥ ४ ॥

तेषामौत्सुक्यमाह । ततो दुन्दुभय इत्यादि ॥ ५ ॥

ततस्तद्वाद्यानुकारेण मण्डले इतस्तो विचलन्तीनां सप्रियाणां तासां वलयादिभिः समतालः शब्दो बभूवेत्याह । वलयानामित्यादि । अन्योऽन्यमिश्रत्वात्तुमुलः ॥ ६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तथोद्गतस्योभयत्र संबन्धमाह । द्वयोर्द्वयोर्मध्ये प्रविष्टेन भगवता कण्ठे गृहीतानामिति हस्तद्वयेन पार्श्वस्थितयोः कण्ठे ग्रहणम् एवं षोडशगोपिकानामष्टकृष्णा भवन्ति अन्यथा रसाभासः स्यात् कृष्णद्वैविध्यप्रतीतेः इममेवार्थमाह स्वनिकटं स्त्रियः यम्मन्येरन्निति स्वस्यैव निकटे नत्वन्यासां स्वसम्मुखस्थितगोपिकाकण्ठालिङ्गितभगवद्दर्शनमपि भगवदिच्छया तासां न जायत इति प्रयोजनार्थं हि रूपद्वयं तदर्धसंख्ययैव प्रयोजनं भवतीति न समसंख्यामृग्या यावतीर्गोपयोषित इत्यग्रे समसंख्यां भगवतो वक्ष्यति यत्पुनः कैश्चिदुक्तम् "अङ्गनामङ्गनामन्तरे माधव" इति तत्रापि सविसर्गः पाठो ज्ञेयः द्विवचने बहुवचनप्रयोगश्च अन्यदेव वा तन्मण्डलं न भागवतोक्तं मध्ये वेणुनादस्योक्तत्वात् अत्र तु रसार्थं नृत्यमिति गानार्थमपेक्षायामपि देवैरेव तत्सिद्धिः मध्ये मणीनां हैमानां हैमानामित्यत्र तु दर्शनार्थमुक्तत्वात् गोपिकानां देवानाञ्च दर्शनं तथैवेति नानुपपन्नं किञ्चित् एवं रसार्थं सर्वसामग्र्या मुक्तायां सरसः प्रादुर्भूतः सर्वेषां भविष्यतीति देवादयः सर्वे अलौकिकज्ञानयुक्ता दर्शनार्थमागता इत्याह । नभस्तावदिति । तावन्नभो विमानशतसंकुलमासीत् मण्डपेहि नृत्यं रसजनकम् अन्यथोपरि वैचित्र्यं न स्यात् तदर्थमपि विमानशतेन संकुलं यथा रसोत्पादनार्थं स्त्रियः पुरुषाश्च संबद्धाः नानाबन्धयुक्ताः चित्रे स्थाप्यन्ते तदर्थं भगवतो चित्रप्रायाः स्थापिताः अत एवाग्रे औत्सुक्यापहृतात्मनामिति वक्ष्यति स्वलीलार्थं सर्वं तथा प्रेरयतीति न औत्सुक्येनान्यथासिद्धिः तासां रसग्रहणार्थमागमनं भगवदिच्छा तु चित्रार्था विमानस्थितान् तत्संबन्धिनो वर्णयति । दिवौकसामिति । स्वर्ग एव स्थानं येषां सदाराणामिति । तेषां भावान्तरव्युदासार्थं स्त्रीणामुपसर्जनत्वं तासां भावार्थे स्वर्गस्थिता रसाभिज्ञाः रसयोग्याश्च भवन्तीति नन्वीश्वरलीला न द्रष्टव्येति कथं तेषां दर्शनार्थं प्रवृत्तिः तत्राह । औत्सुक्येन विचाररहितलीलाक्षिप्तमनसा मपहृत आत्मा स्वरूपं बुद्धिर्वा येषामतः स्वधर्मादेव प्रवृत्ताः नतु भगवद्धर्मं विचारितवन्तः ॥ ४ ॥

ततो नृत्यारम्भे यद्द्रव्यं तज्जातमित्याह । तत इति आदौ दुन्दुभिवादनं "परमा वा एषा वाक् या दुन्दुभा" विश्रुतेः ततः प्रथमतः पुष्पवृष्टिर्मङ्गलार्था पुष्पाञ्जलिः प्रसिद्धः आगतो रसः तदधिष्ठाता वा पूज्यत इति नानाविधानां पुष्पाणां भिन्नावृष्टय इति बहुवचनं ततो गानं साधारणं जातमित्याह । जगुर्गन्धर्वपतय इति । भगवान् श्रोष्यतीति उत्तमैरेव गानं गन्धर्वपतयो विश्वावसुप्रभृतयः तेह्यधिकारिण इति नटानामिव तेषां दर्शनं न दोषाय अन्यथा भगवद्धस्तस्थितेन्द्रादीनामपि दोषत्वं स्यात् "अर्थद्रव्यविरोधेऽर्थो बलीयानि" ति न्यायात् तथापि तेषामन्यथा बुद्धिः सम्भाव्येतेति विशेषणमाह । सस्त्रीका इति । वैषयिकदोषव्यावृत्त्यर्थमाह । अमलं तद्यश इति । तद्धि मलनिवर्त्तकम् अतो न तासां तेषां वा तत्कालेपयोगिपदार्थादतिरिक्तो भाव उत्पद्यते ॥ ५ ॥

एवं वाद्यगीतवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगिवादित्राण्याह । वलयानामिति । स्थानत्रये हि वादित्राण्यपेक्ष्यन्ते नीचस्थाने भूमाविव मध्ये उपरि च तथैव तालभेदाः अतोऽत्रापि उपरि वलयानां शब्दः अधो नूपुराणां मध्ये किङ्किणीनामन्योन्यावद्धबाहव एव मध्ये मध्ये हस्तद्वयं योजयन्तीति वलयानां शब्दः अथवाग्रे शब्दोत्पत्त्यर्थं प्रकारं वक्ष्यति पादन्यासैरिति सप्रियाणां कृष्णसहितानामत एव सर्वलास्यसम्पत्तिः सर्वासां भगवत्संबन्धार्थैव चकारात् अन्येऽपि कूजितशब्दाः मुखशब्दाश्चोक्ताः सर्वं एकीभूय तुमुलो भूत्वा यथा दूरस्थानामवान्तरग्रहणं न भवति तथा सति किं स्यादत आह । रासमण्डल इति । रसानां समूहमण्डले यथानधिकारित्वेन शूद्रस्य वेदश्रवणे तदध्येतुर्मन्त्रस्य च शक्तिह्रासः शूद्रेच पापसंभवस्तथैतद्रसकातिरिक्तानामेतच्छ्रवणेऽ त्यनधिकारादस्य रसस्यालौकिकत्वादेतच्छ्रवणे मण्डले सर्वेषां रसो गच्छेत् श्रवणे सति तदन्वेषणपरत्वं स्यात्तेषामेवानिष्टकरमिति तदेव पापरूपम् ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्रियाणां सकृष्णानाम् । अत्र चकारेण तत्रानद्धशुषिरतुमुलान्यपि संगृहीतानि । एषां चकारेणोक्तत्वादप्राधान्याद्वलयादिवाद्यानाच्छादकत्वं ध्वनितम् ॥ ६ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

अथ चेतनानां का वार्त्ता जडानामपि रसावेशो जात इत्याह । तत इति । तदनन्तरं विमानयानानां रसावेशवैवश्ये जाते सति दुन्दुभयः स्वयमेव नेदुः तालशतालबन्धादिसंबद्धतयैव जगर्जुरित्यर्थः । पुष्पवृष्टयश्च स्वयमेव निपेतुः तथा गन्धर्वा दिव्यगायनास्तेषां पतयः पालका रागविशेषास्त एव मूर्त्तिधराः सस्त्रीका इति सपरिकरास्ते च गोविन्दलीलामृते दर्शिताः विस्तरभिया न लिखिताः तद्यशः रासलीलायशो जगुः न तिष्ठति मलं कामवासना यस्मादित्यमलं स्वभावविमलं वाशुद्धप्रेमविलासादिति भावः अथवा क्रियाविशेषणमिदम् अमलं यथा भवति तथा जगुरित्यर्थः कामकथापदेशेन कामविजयख्यापनादिति भावः ॥ ५ ॥

श्रीमत्किशोरीप्रसादविठ्ठलकृता विशुद्धरसदीपिका ।

एवंचातिवैवश्येन समाजे स्थगितप्रायेऽप्यभ्यासपाटवप्रभावेण यथावदेव रासस्थितिर्जातेत्याह । वलयानामिति । सप्रियाणामिति तासामेव योषितां प्राधान्यं सूचितं रासे यन्मण्डलं मण्डलीवन्धस्तस्मिन् तुमुलः समस्वरतालादिः नत्वसंमिलित इत्यर्थः स्पष्टमन्यत् अयं स्थिरो दर्शितः ॥ ६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तत्र नभसि जातमुत्साहं वर्णयति । ततो दुन्दुभय इति । "परमा वा एषा वाक् या दुन्दुभा" विति श्रुतेर्यतो दुन्दुभिनादस्य मङ्गलत्वं तत आदौ मङ्गलार्थं दुन्दुभयो नेदुः मङ्गलानां च मङ्गलं जगन्मङ्गलमङ्गलात्मनेत्यादिना मङ्गलमङ्गलभगवतो मङ्गले मङ्गलार्थं मङ्गलान्तरापेक्षाभावेऽपि रवेः पूजने दीपवत्तदुपपत्तिः दुन्दुभय इति वचनं प्रभूत्यर्थं तदादीनि वाद्यानि देवानां छविदर्शने प्रहृतात्मतया देहानुसन्धानाभावाद्रासोत्सवोत्साहेन तन्महन्मङ्गलसम्बन्धेन गङ्गानिषिक्तजलान्तरस्य शङ्कात्ववन्मङ्गलत्वनिष्पत्तये वा भगवतो योगिजनमनो विहारेऽनाहतध्वनिवत् स्वयमेव नेदुः तथा निपेतुः पुष्पवृष्टय इत्यत्रापि देवानां विगतानुसन्धानतयैव तत्कर्तृकवर्षणमनुक्त्वा "नित्यो नित्यानाश्चेतनश्चेतनानामिति" श्रुत्या चेतनचेतनभगवत्सान्निधानेन लब्धचेतनानां पुष्पाणां भगवत्तत्सखीगणोत्फुल्लिताङ्गपुष्पमिलनजातोत्साहतया भगवतो गोपीनां चाङ्गसक्तवृन्दावनद्रुमलतापुष्पेर्ष्यया वोत्प्लुत्योत्प्लुत्य स्वतः एव भगवत्सुमुखप्रवृत्तिमतां वृष्टयोनितरां विहारस्थलविस्तरास्तरणरूपतया पेतुःयद्वा सुरद्रुमनिपतितपुष्पवृष्टिवस्तेषां सुरद्रुमत्वापन्नानां सुराणां सुमनांस्येव सुमनांसि भगवन्मुखचन्द्रमद्भुतमनःसुदर्शनात्तत्समागमोत्साहेन बहुरूपेणोत्फुल्लितानि अपरिमिततया तद्वन्नभासि समातुमनर्हाणि सुमनोवृष्टिरूपतया निपेतुः तत्र वृष्ट्याधिक्यस्य निशब्देनैव वोधनाद्वृष्टय इति बहुवचनं तु तत्तद्वर्णसुमनसां वृष्टिभेदाभिप्रायेण तत्र कानिचित्सुरसुमनांसि सत्त्वात्मकतया शुक्लानि कानिचित्कृष्णध्यानेन तद्रूपतया कृष्णानि कानिचिदनुरागरञ्जितान्यरुणानि कानिचित्पीतवसनलसनानि पीतानि कानिचित्तु हरिहृतानि हरितानि कृष्णयशः सुरभिवासितान्यतिसुरभीणीति विभागः । कानिचित्तु तदुत्साहेनोद्भ्रम्यच्छविचाकिततया गतिभग्नानि सुखमग्नानि तदङ्गलग्नानि रोमपुलकतयोल्लसितानि तथा गन्धर्वपतयश्च सस्त्रीकास्तदमलं यशो जगुरित्यत्राप्ययमेवाशयः न मलं विद्यते यस्मात्तथाभूतामलयशउत्साहेनैव गतमलहृदयहृद्रागरूपतया तद्रागप्रवाह एवोद्गतः तत्र रागे तानवितानान्येव प्रेमप्रवाहतरङ्गाः तानगतमूर्च्छना एव तन्निमग्नमनसां पुनर्निर्गमासम्भवादावर्ताः तद्रोमपुलकं तद्रागसुरसरित्प्रवाहलब्धरसतीरभूमितनुरोमद्रुमोत्थानमित्याद्यूह्यम् ॥ ५ ॥

एवं रासानुरूपसुरसमाजवाद्यगाने निरूप्यान्तरङ्गतयान्तरङ्गवाद्यमाह । वलयानामिति । अत्र रासे उपर्यधोमध्येच समानवाद्यध्वनिरपेक्षितः तत्रोपरि नृत्ये करचालनेन स्वपतिगुणगानबहुमाणिवलयतया प्रकाशिततन्त्रा सालयकरपद्मनिवासितया पद्मया तद्गुणगानवत् मधुरशब्दोद्भवेनोपरि शब्दोल्लासतया नूपुरपातिपद्मादिपदन्यासिनां चरणाश्रितपरमहंसानां राजहंसशिशूनामिव पदकमलाश्रितानां शुभपदन्यासतद्गुणगणगणनवन्नृत्यपदन्यासे तद्वासिनां मणिनूपुराणां भुवि ध्वनिः पूरः एव मेरुसुरनीलाद्रिशृङ्गनिवसितविविधविबुधतत्रामसमनुमननवत्कनकेन्द्रजोलाभवृहदुच्चहरिसखिहरिनितम्बोद्भासिनीनां किङ्किणीनां नृत्यकटिचालनवादनेन मध्ये नादप्रसादस्तथाच रासमण्डले पुनर्मण्डलीभूय नर्तने सप्रियाणां प्रियेण कृष्णेन निर्गुणेनापि गुणीभूतेन राजमानानां तद्योषितां गोपीनां ये वलयादयस्तेषां शब्दस्तुमुलः स्वध्वनिमाधुर्यादिगुणसौष्ठवेन सुरवाद्यादिगुणपराभवेन महानभूदभवदित्यर्थः । यद्वा वलयादीनां शब्द इति रासगतवाद्यध्वनिनिरूपणं सप्रियाणां योषितां शब्द इति तासाङ्गानशब्दवर्णनं ज्ञेयम् ॥ ६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तावत्ततक्षणमेवौत्सुक्याकृष्टचेतसां सस्त्रीकाणां देवानां विमानशतैः संव्याप्तनभआसीदितिशेषः स्वर्गसम्बन्धिनृत्यगीतादिकं तेषां तदानीन्तुच्छमभूदिति सूचनाय दिवौकसामित्युक्तं रसान्तरव्यग्रतानिरासाय सदाराणामित्युक्तं ननु भगवल्लीलां द्रष्टुमधिकाराभावात्कथं तत्र प्रवृत्ता इत्याशङ्कानिवृत्त्यर्थमुक्तमौत्सुक्येति तत्रापि यावत्तेषां दर्शनाय स्थितं तावदेव तेषां दर्शयामास भगवानिति द्रष्टव्यं देवा अपि न केवलं कौतुकद्रष्टार एव, बभूवुरपितु रासक्रीडापरिकरतां ययुरित्याशयेनाह । ततस्तदनन्तरं देवैर्वादिता दुन्दुभयो नेदुस्तथा तैरेव क्रियमाणाः रङ्गाधिष्ठानदेवतापूजार्थं च पुष्पाणामास्तरणार्थं वृष्टयो निपेतुः नानाविधानां पुष्पाणां भिन्ना वृष्टय इति द्योतनाय बहुवचनं ततो गन्धर्वपतयो गानाधिकारमुख्या विश्वावसुप्रमुखा जगुः भगवान् श्रोष्यतीति मत्वा तत्पतयो जगुरित्याशयः तत्रापि सस्त्रीकाः प्रेमाविष्टत्वादव्यग्रचित्ता इति भावः । तत्रोदितां भगवल्लीलामवलोक्य न तेषां भगवति विषयित्वबुद्धिरासीदित्याशयेनाह । तस्य तादृशक्रीडायां निविष्टस्य भगवतोनिर्मलं यश इति तथाच तद्दर्शनं शुद्धबुद्धीनां तेषां मलनिवर्त्तकमभूदिति भावः ॥ ५ ॥

एवं वाद्यवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगिवादित्राण्याह । वलयानामिति । तत्राप्युपरि योषितां वलयानाम् अधो नूपुराणां मध्ये किङ्किणीनां शब्दो रासमण्डले तुमुलः संकीर्णोऽभूत् तत्रापि प्रियेण श्रीकृष्णेन संवर्त्तमानानां तथाच तत्कृपया न कस्यापि कृष्णविश्लेष आसीदिति भावः चकारेण सङ्गृहीतस्य करतालादिशब्दस्याप्राधान्यं व्यज्यते ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य श्रीकृष्णस्य अमलं यशः श्रोतॄणाञ्च पापहम् ॥ ५ ॥

प्रियेण श्रीकृष्णेन सहिताः सप्रियास्तासां वलयादीनां च तुमुलः संकीर्णः शब्दोऽभूत् ॥ ६ ॥

भाषा टीका ।

उस समय सब गोपी यह जानती थीं कि मेरे ही पास में कृष्ण हैं उसी समय बड़ी उत्कण्ठा से जिन का मन हरण होगया तब अपनी स्त्रियों के सहित वे सब देवता

(१) तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः। (१) तत्रापीति विजय० पाठः०
मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥
पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः।
स्विद्यन्मुख्यः कवररशनाग्रन्थयः कृष्णवध्वो गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

भाषा टीका।

रास देखने को आये तो उन के विमानों से आकाश भरगया ॥ ४ ॥

तब आकाश में नगारा बजने लगे और फूलों की वृष्टि भई सब गन्धर्वों के पति अपनी स्त्रियों के सहित भगवान् के निर्मल यश का गान करते भये ॥ ५ ॥

प्रिय श्रीकृष्ण भगवान् के सहित जो गोपी तिनके कंकणों का नूपुरों का क्षुद्र घटिकाओं का उस रास मंडल में बडा सघन शब्द होता भया ॥ ६ ॥

॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

महामरकतो नीलमणिरिव हैमानां मणीनां मध्ये मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीदृष्ट्यभिप्रायेण वा विनैव मध्यपदावृत्तिमेकवचनम् ॥ ७ ॥

स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह। पादन्यासैरिति। भुजविधुतिभिः करचालनैर्भज्यमानैर्मध्यैश्चलद्भिः कुचैश्च पटैश्च गण्डलोलैर्गण्डेषु चञ्चलैः स्विद्यन्मुख्यः स्विद्यन्ति खेदमुद्गिरन्ति मुखानि यासां ताः कवरेषु रशनासु च ग्रन्थयो दृढा यासां ताः यद्वा तेषु तासु चाग्रन्थयः शिथिलग्रन्थय इत्यर्थः तत्र नानामूर्त्तिः कृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव स्वेदस्तु आसार इव गीतं गर्जितमित्यादि यथा सम्भवमूह्यम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

भगवान् सर्वैश्वर्यशोभाभरसम्पन्नोऽपि तत्र रासमण्डले ऽत्यन्तं शुशुभे स्वतोऽशेषशोभाचरमकाष्ठां गतस्यापि ताभिः शोभातिशयं पूर्ववद्दृष्टान्तेन साधयति। मध्ये इति। हैमानां हेमनिर्मितानां हेमवर्णानाम्वा यथा महामरकतमणेरपि हैममणिमध्यवर्तितयैव शोभाधिका स्यात् तथा तस्यापि प्रियजनाश्लेषेणैवाधिका शोभा स्यादित्यर्थः। तत्र हेतुः देवकीसुत इति प्रेमविलासार्थं देवक्यां जनितत्वात् प्रियजनविषयकप्रेमभरविस्तारणेनैव शोभाभरसम्पत्तेरिति भावः। देवकी यशोदेति पूर्वं लिखितमेव अन्यत्तैर्लिखितं यद्वा महामरकत इत्येकत्वं वस्तुतो भगवत एकत्वस्य किंवा वेणुवादनार्थं मध्यवर्त्तिनोऽभिप्रायेण अत्र केचिदाहुः स्वभावेनेन्द्रनीलमणिवर्णोऽप्यसौ नृत्यगतिकौशलेनयुगपदिव प्रत्येकङ्कण्ठग्रहणादिना ताः सर्वा व्याप्य भ्रमणात् तासां सुहेमगौरीणां कान्तिच्छटासम्पर्कात् अनतिश्यामलमरकतमणिवर्णताप्राप्त्या महामरत इत्युक्तमिति ततश्च नृत्यशक्तिविशेष एव नतु कोऽपि भगवत्ताविशेष इति ॥ ७ ॥

न केवलं ताभिः सोऽधिकं शुशुभे किन्तु तेन ताश्च शुशुभिरे इत्याह। पादेति। पादानां न्यासाः नृत्यगतिभिर्भूम्याक्रमणभङ्ग्यस्तैः भुजानां हस्तानां विशेषेण धुतिभिः हस्तकभेदेन चालनैः यद्यप्यन्योऽन्यवद्धवाहुत्वेन भुजविधुतयो न सम्भवेयुः तथापि अन्योऽन्याबद्धाभ्यां द्वाभ्यां सहत्वैव किम्वा कदाचित्तदर्थमावद्धत्वपरित्यागेनैव यद्वा अन्योऽन्यवद्धानामपि भुजानां नृत्यगतिभङ्ग्यैव ताः वोऽन्या एवमग्रेऽपि सर्वं तथैव ज्ञेयमिति दिक् स्मितसहितैः भ्रुवां विलासैः तत्तद्रसाभिव्यञ्जकनर्तनचातुर्यैः भज्यमानैः स्वभावतः कार्श्येन विशेषतश्च नृत्यार्थपरिवर्तनादिना भङ्गमिव गच्छद्भिर्मध्यभागैः पटाः कञ्चुकानि किम्वा भगवदुत्थाने सति पुनः परिगृहीतानि निजनिजोत्तरीयाण्येव कृष्णस्य श्यामसुन्दरस्य वध्वः तदाश्लिष्टा गौराङ्ग्यस्तदेकाश्रया इत्यर्थः। तच्च दृष्टान्तेन व्यञ्जितमेव किम्वा कृष्णस्य वध्वः प्रियाः इति तत्सदृशतत्तद्वैदग्ध्यादिकं तत्प्रेममाहित्वञ्च युक्तमेवेति भावः। अतस्तमेव गायन्त्यः तत्प्रकारश्चोक्तः श्रीपराशरेण "कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम्। जगौ गोपीजनस्त्वेकं कृष्णनाम पुनःपुन" रिति विशेषेण रेजुः अशोभन्त तत्प्रेमभरमौग्ध्यनृत्यादिवैदग्ध्ययोरन्योऽन्यं सम्मेलनेन तस्यैश्वर्यलौकिकत्वयोरैक्येन च शोभाभरसम्पत्तेः तडित इवेति दृष्टान्तेनान्योऽन्यशोभया तस्यापि शोभा ध्वनितेव चक्र इति नृत्यगतिकौशलेन निजशक्तिविशेषेणैव नानात्वमिव प्राप्तत्वात् किम्वा मेघानां घटाविवक्षया अन्यथा सुष्ठ्यासत्वाद्यभावेन शोभाद्यभावः तस्यातिशोभनानन्तरं तासामतिशोभावर्णनं सर्वथा परमशोभाचरमकाष्ठागतानामपि रासक्रीडया शोभाविशेषसम्पत्त्या परमाद्भुतत्वात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

देवकीसुतस्तत्तया भवतुसु विख्यातो भगवान् सर्वैश्वर्यसर्वशोभाभरसम्पन्नोऽपि तत्र तु रासमण्डले ताभिरत्यन्तं शुशुभे। यद्वा। तत्र यशोदासुतत्वे अत्यन्तं शुशुभे तत्रापि ताभिरत्यन्तं शुशुभे इत्यर्थः। तादृशस्यापि ताभिः शोभातिशयं दृष्टान्तेन साधयति। मध्ये इति। सामान्यविवक्षयैकत्वम्। सर्वेषु मध्येष्वित्यर्थः। अतो मण्डलमध्यस्थोऽप्येकः प्रकाशो ज्ञेयः। स एवहि श्रीराधिकां सङ्गे निधाय वेणुवादनपूर्वकं भ्रमन् सर्वरासमण्डलमत्यर्थं मण्डयति। तच्च क्रमदीपिकाद्युक्तरासान्तरानुसारेण ज्ञेयम्। "इतरेतरबद्धकरप्रमदा गणकल्पितरासविहारविधौ मणिशङ्कुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम्। "सुदृशामुभयोः पृथगन्तरगं दयितागलबद्धभुजद्वितय" मिति मणिशङ्कुगतत्वमप्युक्त्वा तदेव पुनर्विशेष्य वर्ण्यते। मणिनिर्मितमध्यगशङ्कुलसद्विपुलारुणपङ्कजमध्यगमित्याद्यनन्तरम्। तरुणीकुचयुक्-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

परिरम्भमिलद्घुसृणारुणवक्षसमुख्यगातिमिति । तथैवोक्तम् । मण्डले मध्यगः सङ्गौ वेणुनेति । हैमानां हेमविकाराणां मणीनां गोलोकतया मणिवन्निर्मितानां महामारकत इत्यतिसामान्य तयैकवचनम् । मेघचक्र इतिवक्ष्यमाणात् यथा महामरकतमणेरपि हेममणिमध्यवर्त्तितयैव शोभाधिका स्यात् । तथा तस्यापि प्रियाजनाश्लेषणैवाधिका शोभा स्यादित्यर्थः । अन्यैः । तत्र महच्छब्दपूर्वः मरकतशब्द इन्द्रनीळमणिवाची ज्ञेयः । यद्वा । तासां सुहेमगौरीणां कान्तिच्छटासम्पर्कोद्गतिश्यामलमरकतमणिवर्णता प्राप्त्या महामारकत इत्युक्तम् इति ततश्च नृत्यशक्तिविशेष एव नतु कोऽपि भगवत्ताविशेष इति ॥ ७ ॥

न केवळं ताभिः सोऽधिकं शुशुभे किन्तु तेन ताश्च तथा शुशुभिरे इत्याह । पादेति । पादानां न्यासाः नृत्यगतिभिः भूम्याक्रमणभङ्गयस्तैः । भुजानां हस्तानां विशेषेण धुतिभिः हस्तकभेदेन चालनैः यद्यप्यन्योऽन्यवङ्कबाहुत्वेन भुजविधुतयो न सम्भवेयुस्तथापि कदाचित्तदर्थमावङ्कत्वपरित्यागेनैव । स्मितसहितैर्भ्रुवां विळासैस्तत्तद्रसाभिव्यञ्जकनर्त्तनचातुर्यैर्भज्यमानैः स्वभावतः कार्श्येन विशेषतश्च नृत्यार्थपरिवर्त्तनादिना भङ्गमिव गच्छद्भिर्मध्यभागैः किम्वा भज्यमानता भङ्गं कौटिल्यमिति यावत् । कुटिलीभवन्मध्यभागैरित्यर्थः । सर्वत्र मुहुरिति मन्तव्यम् । कुचपटाः भगावदुत्थाने सति पुनः पुनः परिगृहीतानि निजनिजोत्तरीयाण्येव । अन्यैः । अत्र ग्रन्थय इत्येव पदच्छेदो योग्यो नत्वग्रन्थय इति । कृष्णवध्व इत्यादिकं त्वेवं व्याख्येयम् । तं कृष्णं गायन्त्यः ता दृष्टान्तवितव्यवशात् कृष्णस्य तस्तत्प्रकाशचक्रे विरेजुः । कुत्र का इव मेघचक्रे तडित इव । ननु मध्ये मणीनामित्यादिप्रोक्तदृष्टान्तो न घटते अदाम्पत्येन तत्तदागन्तुकसम्बन्धात् न त्वयं स्वाभाविकसम्बन्धाभावात्तदेतदाशङ्क्यानन्दवैचित्र्येण रहस्यमेव व्यनक्ति । कृष्णवध्व इति । तद्वदत्रापि स्वाभाविकादेव सम्बन्धाद्दाम्पत्यमेवेति भावः । अत एव तासामभ्यासविशेषं विनापि तेषु तेषु गुणेषु परम एवोत्कर्षो वर्त्तते ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कवररशना ग्रन्थयः कबरेषु रशनासु च ग्रन्थयो यासां ताः ॥ ८—९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्रेति । हैमानां मणीनां मध्ये महामरकत इन्द्रनीलमणिरिव ताभिः स्वर्णवर्णाभिराश्लिष्टस्तत्रातीव शुशुभे गोपीदृष्ट्यभिप्रायेणैकवचनम् एवमुत्तरत्राप्यवगन्तव्यम् ॥ ७ ॥

यथा ताभिर्भगवान् शुशुभे तथा तेन ताश्च विरेजुरित्याह पादन्यासैरिति न्यासैर्विक्षेपैः भुजविधुतिभिः करचालनैः स्मितेन सहितैर्भ्रुवाम्विलासैश्च भज्यमानैर्मध्यैश्चलाङ्गैः कुचैश्च पटैश्च गण्डेषु चञ्चलैः कुण्डलैश्च उपलक्षिताः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कबरेषु रसनासु च ग्रन्थयो यासां यद्वा तेषु तासु च न विद्यन्ते ग्रन्थयो यासां ताः शिथिळकबरादिग्रन्थिमत्य इत्यर्थः । एवम्भूताः कृष्णस्य वध्वः तं कृष्णं गायन्त्यस्तेन विरेजुः यथा मेघचक्रे तडितस्तद्वत् तत्र कृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव गानं गर्जितमिवेति यथासम्भवमूह्यम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्रापि रासक्रीडायामपि यद्वा तत्रापि नभस्यपि रासमण्डले एवं चेत् स प्रियाणामिति पदं पूर्णार्थं लभते अन्यत्र कृष्णव्यतिरेकेण प्रियाभावात् अस्मिन्पक्षे प्रियेण बहुरूपं गतेन कृष्णेन सहितानां तत्रापि शब्दसामर्थ्यात्पारवश्यात् शिक्षार्थं नभस्यपि रासक्रीडा प्रवृत्तेति प्रतर्क्यं हैमानां हिमवत्सम्भूतानां मणीनां माणिक्यानां मध्ये मरकतः श्याममणिरिव अनन्तरत्नप्रभवस्येत्युक्तं रत्नजातीनामुत्पत्तिर्हिमवद्गिरेरिति प्रसिद्धं यद्वा हैमानां हेमाकार सम्भूतानां तत्रत्यानां मणीनां निर्मळत्वेन कान्त्यतिशयात् ॥ ७ ॥

तत्र नृत्यप्रकारं कथयति । पादेति । पादन्यासैर्वक्रस्थापितपादविक्षेपविशेषैः भुजानां विधुतिभिः कम्पनविशेषैः भ्रूविलासैः भ्रूभङ्गैः चलकुचतटैरिति केचित् कबरेत्यादौ श्लथविति पदमध्याहार्यं श्लथन्त्यः कबररशनाग्रन्थयः बन्धविशेषाः यासां तास्तथा यद्वा कबररशनानामग्रन्थयः अबन्धनानि यासान्ताः मुच्यमानकबरकाञ्च्य इत्यर्थः । स्रानितरसनाग्रन्थय इति केचित् स्तनष्टन इति धातुः कृष्णवध्वः कृष्णपरिग्रहाः कृष्णयुक्ताः गोपस्त्रिय इति वा भावैः पुरुषान् बध्नन्तीति वध्वः "समस्तभावैः खलु बन्धनं स्त्रिय" इत्युक्तेः तं कृष्णं गायन्त्यो या एवं विधास्ताः मेघचक्रे मेघमण्डळे तडित इवेति कान्ति विशेषद्योतनार्थं दृष्टान्तोपादानं नतु पादन्यासादिविशेषप्रकाशनार्थम् अञ्चेतनत्वात्तडितां यद्वा यत्तडित इति तडितो यथा प्रकाशनाऽप्रकाशने तथा पादविन्यासाद्यावर्त्तनमिति । दर्शनाय तड गताविति धातोः तडन्ति क्षिप्रतिरोधानं गच्छन्तीति क्षिप्रतिरोधान गमनशीळार्थं इत्प्रत्ययः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवकी पूर्ववद्यशोदैव ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

उक्तप्रकारस्य भगवत एकविधत्वम् उपमाळङ्कारेण द्योतयति । तत्रेत्यादि । अति अतिशयं शुशुभे कुतः ताभिः हेतुभूताभिः हैमानां मणीनां मध्ये महामारकतो नीलेन्द्रमणिरिति एकवचननिर्देशात् न नानाविधत्वम् ॥ ७ ॥

अथ नृत्यगीतवाद्यबन्धतालादिसमेतं स्त्रीबहुमण्डलनृत्यं रास इति स्थिते मण्डलमुक्तं बन्धोऽप्युक्तः वाद्यञ्च वलयानामित्यादिना योक्तं सम्प्रति तालगाननृत्यानि दर्शयति । पादन्यासैरित्यादि । कृष्ण-

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

वध्व इति । गोपवधूत्वं प्रसिद्धं वारयति । तं कृष्णं गायन्त्यो विजह्रु र्ननृतुरित्यर्थः । कुत्र का इव मेघचक्रे तडित इवेति तडितो यथा मेघचक्रे नृत्यन्ति मध्ये वर्त्तमानस्य भगवतोऽभितः भ्रमन्तीनां श्यामसहस्राङ्के मण्डलमध्ये मण्डलाकारेण मण्डलाद्बहिर्भवितुमशक्ततया घनीभूते श्यामलिमनि मेघचक्रत्वारोपः सचवाक्यार्थेन गम्यः प्रकरणगम्यश्च शब्देनानुपात्तत्वात् पादानां न्यासैः तालशब्दानुकारेण भुवि सशब्दपादाघातैः भुजविधुतिभिर्गतिविशेषेण भुजदोलैः मूर्च्छनाकाले तालत्यागानुकूलभुजकम्पैर्वा अन्योऽन्यावबद्धबाहुत्वेऽपि तालत्यागसमये भुजयोः कम्पनानन्तरं पुनर्बन्ध इति क्रमः एवंविध-नृत्येनापि मण्डलस्य भङ्गस्तिर्य्यक्ता वा भवतीति नानुसन्धेयं यथा-स्थानस्थितिकौशलात् भ्रुवाम्विलासैस्तालानुकूल्य भ्रुवाम्विक्षेपैः कीदृशैः सस्मितैः स्मितसहितैः भज्याद्भिरिव मध्यैर्भज्यन्मध्यैः गतिविशेष-तालत्यागकालीनतनुलतापूर्वार्द्धधूननेन भङ्गाशङ्कास्पदैर्मध्यैः तानात्यनायासेनापि चलैः कुचानामेव पटैर्नतु कुचैः तथा तावतायासेनापि गण्डलोलैरेव कुण्डलैः विशेषणे तृतीया स्विद्यन्ति मुखान्येव यासां नतु सर्वाङ्गाणि अश्रान्तत्वात् वराङ्गनात्वाच्च कबरेषु रसनासु ग्रन्थयो यासां तथा विधायासेनाप्यशिथिलत्वात् गायन्त्य इति गानानुकूलं वाद्यं वीणादिकमपि बोद्धव्यं योगमाया-सम्पाद्यमानत्वात् यद्यप्येतच्छुद्धाङ्गिकमेव नृत्यं तथापि वाद्यस्याव-श्यकम् अत्र भगवान् द्रष्टैव गोप्यः समम्भगवता न नृतुरितिपक्षा-देव सह नृत्यं इदन्तु मण्डलनृत्यं तच्च द्विविधं स्वकर्तृकभ्रमिकं परकर्तृभ्रमिकञ्चेति आद्यं च द्विविधं सव्यमपसव्यञ्च द्वितीयश्चक्रो पधिकं तच्च प्रतिलोममनुलोमं चक्रं चेद्वामतो भ्रमति तदा दक्षिण तो नर्त्तक्यो भ्रमन्ति तथा दक्षिणतश्चेच्चक्रं तदा वामतस्ता इति क्रमः किन्तु तत्र भ्रमिश्चक्रभ्रमित एव नृत्यन्तु यथास्थानम् अत्र तु भ्रमिश्च स्वकर्तृकनृत्यश्चानियत-स्थानमिति यदुक्तं "स्थिरमस्थिरमप्येतद्द्विविधं रासमण्डलम् । स्थिरं स्थलविशेषस्थमस्थिरं चक्रसंश्रयम् । स्थिरं भ्रमिः कर्तृगता भवेत् सव्यापसव्ययोः । अस्थिरेच्चक्रजा सा च प्रातिलोम्यानुलोम्यभाक् । यथास्थानस्थितं तत्र नृत्यं तद्भ्रमितः पुनः । नानास्थानमिवाभाति नृत्यकर्त्र्यश्च योषित" इति ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं नृत्यमध्ये प्रविष्टो भगवान् गुणभावात् कदाचिन्न भासेतेत्याशङ्क्य सर्वजनीना भगवच्छोभा तदा जातेत्याह । तत्रेति । स्वभावशोभातोऽप्यतिशयेन शुशुभे तदुक्तं शक्तिभिः सहितोऽधिकां शोभां प्राप्नोतीति कदाचित्स्वत एव शोभां प्रकटयेदिति तद्व्यावृत्त्यर्थं ताभिरित्युक्तं ननु सहजशोभायुक्तस्य कथं ताभिरतिशोभा तत्राह । भगवानिति । यथा गुणाः सर्वोत्तमाः न तैस्तथा इतिचेत्तत्राह । देवकीसुत इति । भक्त्या यथा देवक्या अपि पुत्रो जातः स्वागमेवोपकारायाविर्भूतः अतस्तास्वपि स्वसामर्थ्यमेव दत्त्वा शोभां प्राप्तवान् सहजस्य कृत्रिमैः शोभा न भविष्यतीति आशङ्क्य दृष्टान्तमाह । मध्ये मणीनामिति । महामारकतो गरुडोद्गारी स मणिः सहजः सुवर्णमणयः कृत्रिमाः तथापि ते परितः लग्नाः सहजमणिमप्यतिशोभयन्ति ॥ ७ ॥

एवं पूर्वपीठिकामुक्त्वा मुख्यं नृत्यमाह । पादन्यासैरिति । पादन्यासाः सर्व एव चारीकरणरूपाः भुजानां विधुतयश्च सर्वहस्तकभेदाः एकेनावयवेन शिष्टावयवाः तथा संविधानयुक्ता इति ज्ञेयं मन्दहाससहिताः सर्व एव कटाक्षा उक्ता भ्रूभेदाश्च तत्तद्रसे हृदयाविष्टे तथैव भवन्तीति भज्यन्ति भङ्गयुक्तानि मध्यानि उपरिभागपरिवर्त्तनात्मकानि रसाभिनिविष्टानां तासां सर्वावयवानि भ्रमणेन रस एकीभवतीति परिवर्त्तनादिभिरेव वा चलेषु कुचेषु पटा इति सर्वाण्येव कम्पनान्युक्तानि कुण्डलैर्गण्डलोलैरिति सर्व एव शिरोभेदाः उक्ताः शिरोभेदेष्वेव वक्तव्येषु कुण्डलानां यच्चलननिरूपणं तद्विधुतामिव शोभार्थं गण्डलोलैरिति सर्वा कान्तिस्तत्रैवोपक्षीणेति ज्ञापनार्थं गण्डे हि केवलो रसः पेयो रसस्तत एव पीयत इति विद्योतनं तस्यैवाभिव्यक्त्यर्थं ततोऽन्तः स्थितो रसः पुष्टोऽभिव्यक्त इति स्थापनार्थमाह । स्विद्यन्मुख्य इति । स्विद्यन्ति स्वेदयुक्तानि मुखानि यासामिति कबररशनासु च अग्रन्थयो जाताः रसेन सर्वावयवस्थेन एकीभूतेन देहः सूक्ष्मतामापन्नः अतः केशपाशे रसनायां च ग्रन्थिः शिथिलः नन्वेवं कथं श्रमस्तत्राह । कृष्णवध्व इति । सदानन्दस्य हि फलस्य ता उपभोक्त्र्यः अतः क्रियायां श्रमो भवत्येव एतादृश्योऽप्यन्तः सन्तोषेण गायन्त्यो जाताः एवं कायादिश्रमैरपि ता विरेजुः अतिशोभायुक्ता जाताः ननु लोकानां दर्शनसापेक्षा शोभा तास्तदा कथं सर्वैर्दृष्टा इति तत्राह । तडित इव ता इति । नहि तडित् बहुकालं दर्शनयोग्या भवति मेघचक्रे शोभामेव परं सम्पादयति तथा कृष्णसमूहे भगवता आच्छादिताः परितः कदाचिदेवोद्गताः केनचिदंशेन दृष्टा भवन्ति अतः तासां शोभा न दोषावहा जाता किन्तु विशिष्टैव जाता ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

देवकीसुतः क्षत्रियजातिरपि भगवान् षडैश्वर्यपूर्णोऽपि तत्र गोपजातिस्त्रीणां मध्ये अतिशुशुभे इन्द्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकान्तिमिश्रणान्मरकतवर्णस्तत्रापि शोभावैलक्षण्यमालक्ष्य महच्छब्दः प्रयुक्त इत्येके । मरकतशब्दोऽयमिन्द्रनीलमणिवाचीत्यपरे । महामारकत इत्यपि पाठः ॥ ७ ॥

यथा ताभिः स शुशुभे तथा तेन ता अपि शुशुभिरे इत्याह । पादन्यासैरिति । पादानां न्यासाः गीतरसतालानुसारिण्यः पुनः पुनर्व्यक्तीकृतविचित्रनृत्यगीतयस्तैः । भुजविधुतिभिरन्योऽन्यबद्धानामपि भुजानां विचित्रैः कम्पनैः । किञ्च । अन्योन्यावबद्धभुजतां त्यक्त्वा कदाचिदतिलाघवतो हस्तकभेदेन करचालनैर्गीतपदार्थाभिनयैः स्मितहासितैर्भ्रुवां विविधैर्भेदैर्भङ्गिभिः । रसाभिनयार्थं स्वस्वकौशलाख्यापनार्थञ्च । भज्यन्मध्यैः भज्यमानैः स्वभावतः कार्श्येन नृत्यविवर्त्तनादिना च भङ्गमिव गच्छद्भिर्मध्यभागैश्चलैः कुचपटैः कञ्चुकोपरितनवस्त्रैर्भगवदुत्थापनानन्तरं पुनः प्रतिसंगृहीतैः कृष्णस्य वध्वः भोग्याः स्त्रियः । वधूर्जाया स्नुषा स्त्री चेति नानार्थवर्गः । अत्र वधूशब्दस्य भार्यावाचकत्वे व्याख्यायमाने प्रकृतिभगन् किल यस्य गोपवध्व इति भीष्मोक्त्या विरुद्ध्येत तेन न तथा व्याख्येयम् । कृष्णस्य

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्यामलसुन्दरस्य तदेकाश्लिष्टा गोपाङ्गनास्तदेकाश्रयतया, तदेकभोग्यतया च वध्व इव वध्व इति प्रकृतवैष्णवतोषणी ॥ ८ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तत्र स्थिरे रासमण्डले ताभिः श्रीभगवतः शोभाविशेषं दर्शयति । तत्रेति । स्थगिते समाजे भगवान् देवकीसुत इति विशेषणद्वयेन प्रकाशद्वयविशिष्टमेकवस्तु सूचितं तत्राद्यः श्रीराधासहितः सर्वमध्यगो मुख्यतमो भगवत्पदवाच्यः प्रकाशः तथा क्रमदीपिकायाम्—

इतरेतरबद्धकरप्रमदागणकल्पितरासविहारविधौ ।
मणिशङ्कुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम् ।
सुदृशामुभयोः पृथगन्तरगं दयितागलबद्धभुजद्वितयम् ।

इत्यादिना अपरश्च सर्वासां यथोचितमभिलाषपूरकदाक्षिण्यवान्मुख्यतरो देवकीसुताख्य इति विवेकः अन्यथैकेनैव गतार्थत्वे पदद्वयोपादाने ऽधिकपदत्वं भवेत् हैमानां हेमवर्णानां पुष्परागाख्यमणिविशेषसूक्ष्मखण्डानां परितः खचितानां मध्ये ऽभितः सुवर्णखचितो महामरकतो हरिन्मणिविशेषो यथेति एवञ्च तासां तयोश्च शोभा दर्शिता तथा द्वयोरैक्यमपि सूचितं यथालङ्कारकौस्तुभे—

राधाभासौ मरकतमयी कुर्वते कृष्णकान्तिम् ।
कृष्णस्याभा अपि च हरितं कुर्वते धाम तस्याः ॥
स्थाने स्थाने यदि निवसतस्तौ तदा गौरनीलौ
वैकस्थाने यदि वत तदा तुल्यभासौ विभातः ॥

एवञ्च ताभिरलक्षितत्वमपि साधितम् ॥ ७ ॥

एवं स्थिरास्थिरभेदेन द्विविधो रासो दर्शितः इदानीं तासां नृत्याद्यपि शिक्षाकौशलं दर्शयति । पादेति । मेघचक्रे इति । मेघसदृशे मण्डले इत्यर्थः । तेन भगवतः स्थिरत्वं सूचितं मेघसादृश्यं च कृष्णवध्व इति तासामेव कर्तृत्वाभिधानं ततश्च तासां नृत्यसुखास्वादाय तेन निजरूपमेवास्वादितमिति सूचितं रङ्गस्य च स्वच्छत्वमपि साधितं तडित इवेत्यङ्गानां सौकुमार्यं चाञ्चल्यं सूचितं कथम्भूताः पादन्यासैरुपलक्षिताः गानविशेषमानपूरणं पादन्यासेनैव कृतमिति शिक्षाकौशलं तत्र पादन्यासाः नृत्यगतिलालित्येन भूम्याक्रमणभङ्गयस्तैः भुजानां विशेषेण धुतिः हस्तकभेदेन चालनं ताभिः स्मितसहितैर्भ्रूविलासैः तत्तद्रसाभिव्यञ्जकभ्रूनर्त्तनचातुर्यैः भज्यद्भिः स्वभावतः सूक्ष्मत्वेन नृत्यविशेषेण च मानादिप्रपूरणानुरोधेन परिवर्तनात्क्षणमिव गच्छाद्भिर्मध्यभागैः यद्वा कुटिलीभवन्मध्यभागैरित्यर्थः । चलन्तः किञ्चित्कम्पयुक्ताः कुचोपरिवर्त्तमानाः सूक्ष्मपटास्तैः तावतैव मानप्रपूरणादतिवैदग्ध्यं कुण्डलैर्गण्डयोरुपरि लोलैरिति कपोलानां गण्डस्थलस्थानीयताञ्च प्रकल्प्य लोलतया च तन्नृत्यानुकारः सूचित इति प्रतिव्यक्तिरासव्यूह ऊहितः तत्रोपयुक्तं सात्त्विकमाह । स्विद्यदित्यादिना । स्विद्यन्ति मुखानि यासां ताः तथा देवदत्तस्य गुरुकुलमिति वदन्तर्वर्तिनीं विभक्तिमाश्रित्य स्विद्यन्ति शिथिला इत्यर्थान्तरसंक्रमितं कवराणां रसनानाञ्च ग्रन्थयो यासामित्यतिसौकुमार्यमिति संक्षेपः ॥ ८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

अत्र भगवतो गुणभावोक्त्या गुणभावे शोभामान्द्यलक्षणदोषभावं कश्चिन्मन्द आशङ्केत तद्वारणाय प्रेमश्रृङ्गारभावपार्थिगुणभाव एव गुणभाव इति दर्शयंस्तत्र भगवच्छोभामाह । तत्रातिशुशुभ इति । अत्रायं भावः । स देवकीसुतोऽपि तत्र व्रजे तच्छोभोपयोगियशोदासुतत्वेच भगवान्षडैश्वर्यादिगुणवानपि तत्र रासमण्डले प्रेमवतीनां मध्ये स्वयं शोभमानोऽपि ताभिर्निमित्तभूताभिरतिशुशुभे ऽतिशयितां स्वशोभामाविश्चकार गुणरसश्लेष्वेव गुणचमत्कारसम्भवात् यद्वाभिव्यक्तप्रेमवृत्तिप्रतिफलितब्रह्मानन्दवत्स्वयं शोभमानोऽपि ताभिर्मिलित्वातिशुशुभे यद्वा स्वयं ब्रह्मानन्दात्मकतया कैश्चिन्निवृत्तिपरैर्विविदिषुविद्वज्जनैर्ध्येयज्ञेयत्वेन शोभमानोऽपि ताभिस्तत्र रासमण्डले श्रृङ्गाररसान्वितपरमानन्दतन्वातिशयेन सर्वविषयिमुमुक्षुविद्वज्जनध्येयज्ञेयतयातिशुशुभे यद्वा ताभिः शोभमानाभिरतितच्छोभामतिलङ्घ्य ताभ्योऽप्यतिशयेन शुशुभे तत्र दृष्टान्तमाह । मध्य इति । हैमानां हेमरचितानां कृत्रिममणीनां यद्वा हेमखचितानां मणीनां माणिक्यविशेषाणां तथाचोद्भूतानुरागनृत्यश्रमरोचनादिरागारुण्यव्याप्तगौराङ्गित्वोक्तिः यद्वा हेमवर्णानां पुष्परागमणीनां मध्ये महान् मारकतो हरितमणिर्यथा तत्र भगवतः श्यामवर्णत्वेऽपि हेमवर्णगोपीतनुमणिप्रभाव्याप्ततया हरितमणिरूपत्वनिर्देशः यद्वा महेतिविशेषणेन समानमारकतजातित्वात्तु इन्द्रनीलस्यैव निर्देशो ज्ञेयः अत्र हैमानां मणीनां मध्ये महामारकतदृष्टान्तोक्त्या सर्वतो गोप्यो मध्य एव कृष्ण इत्येवं मण्डलरचना द्योतिता यद्वा मण्डलस्य तथात्वेऽपि मध्ये मध्यनायकवदेकरूपाविष्कारः यद्वा मणीनां मध्ये मध्ये इतिवीप्सया मण्डलस्य तथात्वमेव सर्वैतद्गोपीकृष्णमण्डलस्योरोवस्याकारतया भक्तानामुरोवासेन शोभातिशयो दर्शितः यद्वा हैमानां स्वतो हेमवर्णानां तथा मध्ये मणीनां शरीरमध्ये हृङ्नखादिरूपा मणयः सर्वाङ्गेषु भूषणरूपमणयो वा यासामित्यलुक् समासः तासां तद्रचितरासमण्डले ताभिः सह महामरकतः महामराणां ब्रह्मादीनामपि के शिरसि वर्तमानः तेषां सुखं वा यस्मात्तथाभूतो वा महामरकः सार्वविभक्तिकत्वात्प्रथमायां तसिल् स यथावदति शुशुभे तासां मण्डलगतानां शोभां नभसि निरीक्षमाणानां महामराणां वा शोभामतिलङ्घ्य शुशुभे यद्वा अन्ये सापेक्षामरा अयन्तु निरपेक्षामरत्वेन महामरश्चासावेव कः सुखरूपश्च महामरकतोऽत एवाविनाशिनित्यसुखरूपतया स्वकृपालब्धसुखस्वदारसहकृतदिदृक्ष्वमरराजतिलङ्घ्य शुशुभे रराज महामारकत इति पाठेतु चोर एव चौर इतिवत् मरकत एव मारकतस्तथाच पूर्वोक्ता एवार्था अनुसन्धेयाः यद्वा महामारो मन्मथमन्मथः सच कः सुखरूपश्चेति तथा ॥ ७ ॥

तदन्वितानां तासां शोभामाह । पादन्यासैरिति । यथैकस्य कृष्णस्निग्धमेघस्य नभोव्यापकस्य मध्ये विद्युदुल्लासेन प्रविभक्ततया बहुमेघचक्रतया भासमानस्य वध्वस्तडितस्तस्मिन्मेघचक्रे तद्गर्जनानुकूलस्वशब्दं कुर्वन्त्यो राजन्ते तथा मेघचक्रे तडित इव ताः कृष्णवध्वः एकस्य कृष्णस्य श्यामस्निग्धसुन्दरस्य आकाशशरीरं ब्रह्मेतिश्रुत्या नभोव्यापकविग्रहस्य मध्ये मध्ये गोपीतनुस्फूर्त्या प्रविभक्तबहुविग्रहतयानेकमेघचक्रवद्भासमानस्य वध्वः पट्टमहिष्यो गोप्यस्तं गायन्त्यस्तद्गानमनुसृत्य

श्रीरामनारायणकृतभावभावविभाविका ।

यथोपयोगस्वरसप्तकाभिनिवेशेन तालगतिमनुल्लङ्घ्य नानारसवृष्ट्यानुकूलविविधमूर्च्छनाद्यन्वितविचित्रतानवितानगानं कुर्वत्यो विरेजुः तत्र तथा भासमानकृष्ण एव मेघचक्रं हेमवर्णद्युतिमत्यो गोपिका एव तडितस्तद्गतिनृत्यविस्फुरणचाञ्चल्यमेव चपलाचापल्यं गानमेव गर्जनं रसवृष्टिरेव वृष्टिः किम्भूतास्तास्तत्राह । स्विद्यन्मुख्य इति अत्र हरिमुखचन्द्रसन्निधौ तच्चन्द्रमणिगोपीमुखानां सुधास्रावित्वं गम्यते यद्वा हरिहरिसखिमुखानां केशपट्टिकादावामुक्तमुक्तादामयुतानां स्वेदवृष्टिस्मितयुक्तत्वेनापूर्वोच्चालितरूपसुधास्वेदवृष्ट्यन्वितभूमिलोकस्थचन्द्राणां स्वतुल्यत्वाभावेन सुधानिधित्वेऽपि तद्वृष्टिशून्यत्वेन व्योमस्थ सभगणचन्द्रप्रहासो द्योत्यते यद्वा व्योमचन्द्रमसं निरीक्ष्य परस्परं मुखावलोकनपूर्वकस्मितस्वेदवृष्टिदर्शनेन तन्मुखचन्द्राणामेव स्वप्रभाविकाशातिशयितसुधावृष्टिः सूच्यते यद्वा पर्वणि चन्द्रसुधया देवाप्यायनवत् गोपीमुखचन्द्राणां सर्वदेवात्मकदेवदेवकृष्णाप्यायनायामृतवृष्टिर्बोध्यते यद्वा श्रुतिमुनिमधुपाभिलषणीयपदाब्जमधुमाधवमधुपमुपलभ्य तत्प्रलोभाय गोपीमुखपद्मानां स्वेदमधुस्रावित्वं ख्याप्यते यद्वा हरिमुखसंनिधानसंनिधानजाताल्हादतयानुरागात्मकमन्त्वात्मना द्रवीभूतस्वहृत्कमलानुकारेण बहिर्निदर्शनं तन्मुखकमलैः क्रियते यद्वा स्विद्यन्मुख्य इत्युपलक्षणं सर्वाङ्गस्वेदस्य तथा चामितहरिरूच्छविदर्शनाय दृग्भूताखिलसखीजनरोमच्छिद्रेभ्यः स्वेदमिषेण तद्दर्शनाल्हादानन्दाश्रूद्गम एव गम्यते प्रियसङ्गमे श्रमासम्भवात् पुनः किंभूतास्तास्तदाह । कवरस्सनाग्रन्थय इति । केषु सर्वेषां शिरःसु वरः श्रेष्ठस्तद्भूषणतया राजमानः सर्वशिरोमणिः कवरः यद्वा कात्सर्वोत्कृष्टाद्ब्रह्मणोऽपि वरः कवरः यद्वा कानां सर्वसुखानां वरः श्रेष्ठस्तद्विस्वरूपब्रह्मानन्दात्मकः कवरः यद्वा कः सुखरूपश्चासावेव स्त्रीयो वरः पतिश्च कवरः यद्वा स्वकेषु शिरःसु करधारणेन वृत्तो वरो येन स कवरः यद्वा स्वकेषु शिरःसु वर्तमानो वरः कवरः कृष्णस्तेन सह प्रेमरसनया ग्रन्थिर्दृढश्लेषो यासां यद्वा तस्मिन्नेव तद्गुणगानेन तदधरामृतास्वादनेन चेन्द्रियद्वयाधिष्ठानरसनाया ग्रन्थिर्यासां यद्वा तस्मिन्कपटरसनाया अग्रन्थिः तद्ग्रन्थिविच्छेदो यासां यद्वा तेनैव निमित्तभूतेन कुललज्जादिरसनानामग्रन्थिर्ग्रन्थ्यभावो यासां यद्वा तद्गुणरसनाग्रथितसर्वाङ्गसुमनःसुमनसः यद्वा के शिरसि वराः श्रेष्ठाः कविवरवर्णितसर्वगुणनिचयः कवराः केशबन्धास्तेषु या रसनाः स्वर्णसूत्राणि तासु "भिद्यते हृदयग्रन्थि"रिति श्रुत्या कृष्णकुटिलस्निग्धहृदयग्रन्थिभेदनतः त्रिगुणान्विता गुणकेशवसन्निधानेन अग्रन्थयः स्खलितस्वर्णसूत्रबन्धा गतबन्धप्रमुदितसुमनोवृष्टिवन्मुखशशिनिजपतिशिरोरूढतया जातप्रमदया तत्प्रमदया केशपट्टिकया निशया कृष्णकुटिलस्वभावतया सापत्न्यभावेन पतिपारोक्ष्ये सितसुमनोभगणनिपातवद्वासितसुमनः सज्जनसदृशसितसुमनोभिः कृष्णकुटिलस्वभाववजनसभिसकृष्णकुटिलकवरसङ्गत्यागवद्वा स्वजनशिरोराजमानसुस्निग्धकृष्णत्रिभङ्गस्य सितसात्त्विकसुगुणवृष्टिवद्वागतबन्धकुटिलकृष्णस्निग्धकवरेभ्यो विगलिततद्ग्रथितसितसुमनसः कै विरेजुस्तत्राह । पादन्यासैरित्यादिना । तत्र शशिकिरणामृतास्वपूरितत्वेन मानसतयोल्लसितवृन्दावनभूमौ प्रेमपवनवेगेन चाल्यमानानां तन्नानागत्यनुसृतचापल्यभ्रमणमुखरितमणिनूपुरभ्रमरगीतगुणगणानां सर्वसङ्गतिपूरकश्रुतिहरिपदन्यासवत् सर्वसङ्गति पूरकाणां कमलभव—भव—कमलालया—कमलासरागकामितरजः परागपादकमलानां न्यासिनामपि मतिविमोहनगतिविलासैः प्रेमप्रभायुतभूमिवहहृत्कमलतया प्रकटितमाणिकमलेषु तद्गतानां हृत्पद्मेषु च विन्यासैः तथा सर्वौषधिपतिसुधानिधिमुखदर्शनोत्साहितसमीरसमीरितसलतिकवनस्पतिनृत्यवद्गोपालमुखदर्शनोत्साहेन पञ्चाङ्गुलिभालोल्लसितनखशशिविशालकरहरनृत्यवद्वाप्रतिस्वाङ्गुलिदलनखश्रीदर्शनप्रमदमोदाभ्यामेकपद्मासनपद्मपद्मश्रियंक्षपयतां करपद्मानां नृत्यवद्वा स्मरसमरे नखवज्रभालाङ्गुलिपञ्चकुसुमशालान्वितभुजविशालधनुर्विस्फूर्जनवद्वा भुजानां समस्तप्रशस्तहस्तचलनान्वितविधुतिभिः चालनैः तथा सानुरागगौरीसखीगणस्य कृष्णचन्द्रेण सहोल्लासवत् अरुणवसनालंकृतभगणान्वितशशिप्रभासवद्वा साधरदमुखमृदुहाससहकृतैः गोपीभिः प्रेम्णा शिरोऽवधृततत्समागमोत्साहाविष्कृतयुगलरूपत्रिभङ्गकृष्णस्य तत्तदङ्गानां भाला

ङ्गणगतदृङ्मणिकमलयोर्भज्यन्मध्यरासवत्तारायुततारापत्यङ्गीकरणहर्षोद्धर्षविष्कृताद्विगुणविगुणधनुस्तनुविबुधविबुधबुधाविविधवालोल्लासवद्वा नानाभावपिशुनभ्रूयुगविलासैः तथा सुमनोवत्सुमनोधृतकृष्णाकारतयाहृदयघटपूरितप्रेमरसासारतयास्तनघटद्वयपूरितरसशृङ्गारतया सर्वाङ्गविविधरूपनिध्याधारतया स्वर्णयूथिकालतालालितमृदुतनुफलितस्तनश्रीफलयुगलभारतया सात्त्विकगौरिवृत्तिप्रतिबिम्बितकृष्णाकारवत्कृतात्रिभङ्गकृष्णानुकारतया चपलनृत्यगतिसौष्ठवान्वितभज्यन्निव मध्यभागैः तथा पवनवेगचलितसुघनपयोधरे विद्युत्पतिचपलचलनमिव प्रेमरूपरवालसरासिचलयुगलस्तनाचलयोस्तद्भुजाञ्चलहलनमिवमुनिगणमतिप्रलयङ्करदमस्वरतिभावादिरत्नाकरगति वेगरतिरङ्गतरङ्गप्रवृद्धरूपप्रेमरत्नाकरद्वये मनाक् नाकपभयमकृत्वोद्धृतकुचयुगमैनाकद्वयपक्षबलनमिव तच्चत्पाथोधिद्वयनिविष्टरसिकवरिष्ठसुरतिनाथहरिकरसुरनाथकृततानिरिदलनपक्षविद्वलनमिव चलकुचपटैस्तथा अलकाल्यावलिवृतसुस्मितविकासविमुखकमलरूपसलिलगण्डद्वयसरससरसि दिव्यमीनयुगलविहारवत्तद्गृहनिविष्टमकरध्वजस्य कर्णविवरद्वाराङ्गणकपोलयोस्तद्भुजद्वयविस्फारवत्सविकासनिजावासमुखपद्माभ्यासे सोल्लासकृतरूपद्वय—कमला—चपलविलासवत् हरितत्स — खिजनरासोल्ला—सदर्शनोत्साहेन निशालकभगणरदनशशिमुखरविकुण्डलारब्धरासवत्सालकनिशारदभगणमुखशशिसितस्निग्धशरद्घनसदृशगण्डे तडिद्विव लोलैः कुण्डलैश्च मेघचक्रे तडित इव विरेजुः ॥ ८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु महामायानटीनर्तकस्य भगवतस्तत्र नृत्यतः का शोभेत्याशङ्क्याह । तत्रेति । तत्र तस्मिन् रासमण्डले भगवानपि देवकीसुतोऽपि अत्यर्थं शुशुभे तत्र दृष्टान्तः सौवर्णानां मणीनां मध्ये मध्ये महामरकतो नीलमणिर्यथा शोभते तद्वत् गोपीद्वयाभिप्रायेण वा विनैव मध्यपदावृत्तिमेकवचनं यद्वा कदाचिन्मण्डलमध्यगतो वेणुं वादयन् शुशुभे तदुक्तं विल्वमङ्गले—

अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गनाः ।
इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दनः ॥

इति ॥ ७ ॥

स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह । पादन्यासैः सङ्गीतशास्त्रोक्तनृत्यानुकूलपादमतिभेदैः भुजविधुतिभिः

उच्चैर्जगुर्नृत्यमाना रक्तकण्ठयो रतिप्रियाः ।
कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥
काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः ।
उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ।
तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रन्योन्यावद्धभुजानामपि यथोक्तक्रीडानुकूलैः कम्पनविशेषैः यद्वा कदाचिदन्योऽन्यावद्धवाहुत्वमुत्सृज्याऽभिनयार्थं कृतैश्चालनैः सम्वि-स्तृतैः भ्रुवाम्विलासैः कार्श्यात्कुण्डलीभवन्मध्यभागैः चलद्भिः कुचैस्तत्पटैश्च गण्डेषु चञ्चलैः कुण्डलैः स्विद्यन्ति स्वेदविन्दुलङ्कृतानि मुखानि यासां कवरेषु रसनासु च दृढा ग्रथयो यासां ताः अग्र-न्थयः शिथिलग्रन्थय इति वा तं कृष्णं गायन्त्यो विरेजुस्तत्रानेक-मूर्तिः श्रीकृष्णो मेघचक्रमिव गोप्यस्तडित इव स्वेदविन्दवस्तुषार इव गीतं गर्जितमिवेत्यप्यासूचितं कृष्णवध्वः कृष्णभोग्याः स्त्रियः कृष्णरूपेण तस्यैव वस्तुतः स्वाभाविकाः स्त्रिय इति सूचितं स्ववधूवदेव चेष्टां कृतवत्य इति वा तडित इवेत्यनेन तथाभूता अपि ताः देवादिभिर्मेघचक्रे तडित इव कदाचित् शोभमाना दृष्टा इत्यपि ध्वनितम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महामरकतो यथा इन्द्रनीलमणिरिव तत्र रासमण्डले तासां मध्ये भगवानतिशुशुभे आविष्कृतबहुमूर्तित्वेऽपि भगवति एकत्वादेक-वचनम् एवमग्रेऽपि बोध्यम् ॥ ७ ॥

नानामूर्तिघनश्यामसमीपे अप्येकैकशो विद्युद्वद्विरेजुरित्याह । पाद-न्यासैरिति । पादन्यासैः चरणविक्षेपैः भुजाविधुतिभिर्हस्तक्रियाभिः स्मितसहितैर्भ्रुवां विलासैश्च भज्यमानैर्मध्यैः कटिभागैश्च कुचैश्च पटैश्च गण्डेषु कपोलेषु लोलैश्चञ्चलैः कुण्डलैश्चोपलक्षिताः स्विद्यन्ति स्वेदयुक्तानि मुखानि यासां ताः कवरेषु रसनासु च अग्रन्थयः शिथिलग्रन्थयः कृष्णवध्वः कृष्णेन सहिताः वध्वः गोप्यः तं कृष्णं गायन्त्यः मेघचक्रे तडित इव विरेजुः तत्र बहुमूर्तिः कृष्णः श्याममेघचक्रवत्तास्तु बहुनिधास्तडिद्वत्स्वेदस्तुषारवत् गीतं गर्जितवदिति यथासम्भवमूह्यम् ॥ ८ ॥

भाषा टीका ।

उहाँ पर उन गोपिन से देवकी पुत्र भगवान अत्यन्त शोभा को प्राप्त भये कैसे कि जैसे बडी सुवर्ण की मणियों के मध्य में नील मरकत मणि की शोभा होती है ॥ ७ ॥

उस रास में पादों के चालन करने से भुजाओं के फैलाने से मन्दहास सहित भौंओं के विलासों से कमरों के लचकनों से हिलते हुये स्तनों के वस्त्रों से गंड स्थलों पर स्थित चंचल कुंडलों से शोभित भईं, मुखों में पसीना के बूदों वाली मस्त के चूडाओं में माला और कौंधनी में वस्त्रों की ढीली ग्रंथी वाली जो श्रीकृष्ण की सब वधु गान करने समय में ऐसी शोभित भईं कि जैसे मेघ के समूह में बिजुली चमकती होवैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नृत्यमाना नृत्यन्त्यः रक्तकण्ठ्यो नानारागैरनुरञ्जितकण्ठ्यः कृष्ण-स्याभिमर्शेन संस्पर्शेन मुदिताः इदं विश्वम् ॥ ९ ॥

मुकुन्देन सह स्वरजातीः षड्जादिस्वरालापगतीः अमिश्रिताः कृष्णोद्गीताभिरसंकीर्णाः प्रीयमाणेन सम्मानिता तज्जातुष्टय-नमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततश्च प्रहर्षोद्रेकेण तासां नृत्यगीतविवृद्धिं किंवा कृष्णस्य प्राधान्यमुक्त्वा गानस्याप्याह । उच्चैरिति । नृत्यमाना इति । नर्तनेऽपि तादृशगाना तत्कौशलविशेषो दर्शितः गानादिप्रयोजनमाह रतिः सुरतं प्रेम वा किंवा श्रीकृष्णप्रेमा सैव प्रियो यासां नच्चोच्चैर्गानादिना तासां श्रमः शङ्कनीय इत्याह । कृष्णस्य चित्ताकर्षकस्य परमानन्द-घनमूर्तेर्वा अभिमर्शेन मुदिता इति गीतस्योच्चैस्त्वं दर्शयति यासां येन वा गीतेन आवृतं व्याप्तं यद्वा यस्य गीतादुर्गीतेन लोकनिवद्धगाथादिना आवृतं तदेकरसमयमभूदित्यर्थः । इति तन्माहात्म्यमुक्तम् अन्यैस्तैर्व्याख्यातं यद्वा नृत्येन मानः कृष्णेन संमानः यद्वा नृत्ये मानः कृष्णादप्याधिक्येन गर्वो यासां ताः रक्तकण्ठ्यः प्रेमस्निग्धकण्ठ्यः इति मानस्य प्रेमरसमयत्वेन परममधुरत्वमुक्तम् उच्चैर्गाने हेतुः रतीति कृष्णेति च यद्वा उच्चैः श्रीकृष्णादप्युच्चतया तथाचोक्तं श्रीपराशरेण—

रासगेयं जगौ कृष्णो यावत्तारायतध्वनिः ।
साधुकृष्णेति कृष्णेति तावत्ता द्विगुणं जगुरिति

तत्र हेतुमाह । रक्तेत्यादिविशेषणैस्त्रिभिः एषां यथेष्टं हेतुहेतुमत्त्वं ज्ञेयं यद्यपि तासामभिमर्शतस्तस्यापि प्रमोदात्तथैवोच्चैर्गानं संभवेत् तथापि रासगानापेक्षया प्रेमवैवश्येन तदुच्चगीतश्रवणलालसेन वा स तादृक्कासिद्ध्येदिति ज्ञेयम् अन्यत्समानम् ॥ ९ ॥

अधुना पूर्ववत्तासां मुख्यानां प्रेमचेष्टितानि पृथक्त्वेनाह । काचिदिति सार्द्धपञ्चभिः । मुकुन्देन परमानन्दप्रदेन सममिति तादृशोन्नयने हेतुः तथा तेन तस्य जगतोऽपि परमानन्दप्रदत्वं ध्वनितम् उन्निन्ये मूर्च्छयामास यद्वा अपूर्वाः कल्पयामास अमिश्रिताः कृष्णा-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ॥

प्यश्रुताः ततश्च तेन मुकुन्देन पूजिता तेन समुन्नयनेऽपि अमिश्रितत्वेनोन्नयनात् कथं पूजिता तदाह । साध्विति । वीप्सा हर्षे । साधुत्वदार्ढ्याय वा वदतीति शेषः अन्यत्तैर्व्याख्यातं यद्वा अमिश्रिता विशुद्धा तथा च संगीतसागरे—

> जातयोऽष्टादश प्रोक्तास्तासां लक्षणमुच्यते ।
> शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
> ता एव विकृताः सत्यो जाता विकृतसंज्ञिता इत्यादि
> किंच षाड्जार्षभी च गान्धारी मध्यमा पञ्चमी तथा ।
> धैवती चाथ नैषादी शुद्धा एतास्तु जातयः इति

काचिदित्यनुवर्तत एव बहु यथास्यात्तथा इति पूर्वतोऽप्यस्याः समानाधिक्यं तेन च गानेऽपि कौशलमधिकं सूचितम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततश्च प्रहर्षोद्रेकेण तासां नृत्यस्य प्राधान्यं वर्णयित्वा गानस्याप्याह । उच्चैरिति । नृत्यमाना इति नर्त्तनेऽपि तादृशगानाद्यकौशलविशेषो दर्शितः । गानादिप्रयोजनमाह । रतिः श्रीकृष्णकर्तृका प्रीतिः सैव प्रिया, यासाम् । नत्रोच्चैर्गानादिना तासां श्रमः शङ्कनीय इत्याह । कृष्णस्याभिमर्शेन मुदिता इति अयमप्येको हेतुर्ज्ञेयः गीतस्योच्चैस्त्वं दर्शयति । यासां गीतेनावृतं व्याप्तम् । यद्वा । यासां गीतेन स्वयमुत्प्रेक्षितरागसमूहेन इदं जगदावृतं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृताः षोडशसहस्रसङ्ख्या रागा एव जगति विभक्ता इति सङ्गीतशास्त्रप्रसिद्धेः । यथोक्तं सङ्गीतसारे । "तावन्त एव रागाः स्यु र्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृता वरे" ति । अन्यत्तैः । यद्वा । नृत्येन मानः श्रीकृष्णकृतसम्मानो यासां ताः । रक्तकण्ठ्यः प्रेमस्निग्धकण्ठ्य इति परममधुरत्वमुक्तम् । उच्चैर्गाने हेतुः रतीति कृष्णेति च । यद्वा । उच्चैः श्रीकृष्णगानादप्युच्चतया तथा चोक्तं श्रीपराशरेण । "रासगेयं जगौ कृष्णो यावत्ता व्याप्तध्वनिः । साधु कृष्णेति कृष्णेति तावत्ता द्विगुणं जगु" रिति । तत्र हेतुमाह । रक्तेत्यादिविशेषणैस्त्रिभिः । एषां यथेष्टहेतुहेतुमत्त्वं ज्ञेयम् । एवं तत्रातिशुशुभे ताभिरित्यत्र तासां शोभावत्त्वात् द्विगुणस्यापि परमोत्कर्षः सूचितः । उत्तरत्र तु स्पष्टमेव ॥ ९ ॥

अधुना पूर्ववत्तासु मुख्यानां प्रेमचेष्टितानि पृथक्त्वेनाह । काचिदिति सार्द्धपञ्चभिः । मुकुन्देन समिति । तस्यापि तदनुगत्वं विवक्षितम् । सह युक्तेऽप्रधान इति स्मरणात् । उन्निन्ये उत्कृष्टं कल्पयामास अमिश्रिताः संहत्य गानेऽपि विलक्षणत्वेन पृथगवगताः । ततश्च तेन मुकुन्देन पूजिता । कथं पूजिता तत्राह । साध्विति । वीप्सा हर्षेण साधुत्वदार्ढ्याय वा वदतीति शेषः ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

उन्निन्ये अमूर्च्छयत् ॥ १०—१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उच्चैरिति । नृत्यन्त्यो नानारागै रञ्जितकण्ठ्यः श्रीकृष्णस्याभिमर्शेन मुदिता उच्चैर्जगुः यद्गीतेन यासां यस्य च गीतेनेदं विश्वमावृतं व्याप्तं कृत्स्नं जगद्गीतैकदेशवदिति भावः ॥ ९ ॥

कृष्णाभिमर्शमुदितानां तासां प्रत्येकं गीतादिचेष्टितमाह । काचिदिति । तत्र काचिदङ्गना मुकुन्देन सह स्वरजातीः स्वरभेदान् षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्यान् अमिश्रिताः श्रीकृष्णोन्नीताभिरसङ्कीर्णा उन्निन्ये ऽमूर्च्छयत् कथम्भूता सती प्रीयता प्रीयमाणेन तेन श्रीकृष्णेन साधु साध्विति पूजिता तदेव स्वरजात्युन्नयनमेव ध्रुवाख्यतालविशेषं कृत्वोन्निन्ये उद्गीतवती तस्यै इत्थमुद्गीतवत्यै बहुमानं संमानमदाच्चकार कृष्ण इति शेषः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रक्तकण्ठ्यः रागयुक्तकण्ठगुणाः अभिमर्शः कामकल्लोलोधककरस्पर्शविशेषः यासाङ्गीतेन इदं जगदावृतं व्याप्तं देवलाक्षिकत्वात् ॥ ९ ॥

अमिश्रिताः स्वरान्तरानन्तरिताः स्वरजातीः षड्जादिस्वरभेदेन उन्निन्ये उत्कृष्टत्वेन गीतवती मूर्च्छयामास च—

> निषादर्षभगान्धारषड्जमध्यमधैवताः ।
> पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥

इत्यमरः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यासां गीतेन स्वयमुत्प्रेक्षितरागसमूहेन इदं जगदावृतं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृताः षोडशसहस्रसंख्या रागा एव जगति विभक्ता इति सङ्गीतशास्त्रात् ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

गायन्त्य इत्युक्तस्य गानस्य प्रकारमाह । उच्चैरित्यादि । नृत्ये मानः पूजा यासां ताः रक्तकण्ठ्यः सुकुमारत्वादरुणकण्ठ्यः रक्तं रागकदम्बं जातित्वादेकवचनं कण्ठे यासां तत्कालरागपरिवर्त्तनसामर्थ्यवत्यः रतिर्नृत्यगीतविषया श्रद्धा तस्याः प्रियाः कृष्णस्याभिमर्शः स्पर्श आश्लेष इति यावत् तेन मुदिता गानकौशलमालोक्य क्षणे क्षणे तदालिङ्गिता इत्यर्थः । एवम्भूताः सत्य उच्चैर्जगुर्नृत्यन्त्य एव यत् यस्य तानस्य गीतेन इदं पूर्वसङ्गीताचार्यैर्ब्रह्मादिभिः कृतं गीतमावृतमाच्छन्नं तुष्णीबभूव किम्वा यद्गीतेन विश्वमिदमावृतम् अतः परं नान्यद्गीयते कैश्चिदित्यर्थः ॥ ९ ॥

अथ तासां गानमाकर्ण्य स्वयमपि गातुमुपचक्रमे तत्र तत्सदृशं गातुं सर्वासु विस्मितासु काचित्सगर्वमुपेत्य गायति

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

स्मेति दर्शयति । काचित्सममित्यादि स्वरान् षड्जादीन् अमिश्रितान् स्वस्वश्रुतिसम्भिन्नताभाववतः एवं जातीः आन्ध्रीप्रभृतीर्जातीः असिश्रिताः परस्परसांकर्य्याभाववतीः उन्निन्ये प्रीयता प्रीयमाणेन भगवता साधुसाध्विति पूजिता आत्मानं विनान्यैर्दुष्करमिति ज्ञानोत्तरं तस्याः स तथा शक्तिमालोक्य सविस्मयं पूजनं कृतवानिति भावः । अथ ता एव स्वरजातीर्ध्रुवगानोपयुक्ताः कृत्वा भगवानुन्निन्ये ततोऽप्युच्चतरं कृत्वोपनीतवान् सापि ततोऽप्युच्चतरं कृत्वोपनीतवतीति दर्शयति । तदेवेति तच्छब्दोऽव्ययं ता एव स्वरजातीः ध्रुवं ध्रुव इति गानविशेषं कृत्वा उन्निन्ये स इत्यध्याहार्य्यं तस्यै मानञ्च बहदात् इति सापि ततोऽप्युच्चतममुन्नीतवतीत्यनुसन्धेयं कथमन्यथा बहुमानदानम् ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

गाढनृत्यमुक्त्वा मध्यनृत्यमाह । उच्चैर्जगुरिति । नृत्यमाना नृत्यं कुर्वत्य एव उच्चैर्गानयुक्ता जाताः अथवा आदावुच्चैर्जगुः ततो नृत्यमाना नृत्यन्त्यो जाताः उभयत्र हेतुमाह । रक्तकण्ठ्योरतिप्रिया इति । रक्तः रञ्जकस्वरेण युक्तः कण्ठो यासामस्तीति रतिरेव प्रिया यासामिति गानेन व्यामोहनं नृत्येन च तासां प्रसिद्धं ननु पूर्वनृत्येन जातश्रमाः कथमेवं कृतवत्य इत्यत आह । कृष्णाभिमर्शमुदिता इति । भगवतः अभितो मर्शः प्रोञ्छनादिविशेषरूपः तेन मुदिताः अन्तः पूर्णानन्दाः इतरविस्मारणार्थं नादाधिक्यमाह । यद्गीतेनेदमावृतमिति । यासां गीतेनेदं जगद्व्याप्तम् अथवा यदर्थमेतन्नृत्यादिकं तत्सफलं जातमित्याह । यद्गीतेनेति । लोकैः क्रियमाणेन गीतेन एतत्प्रकाशकेन एतज्जगद्रसेन व्याप्तमित्यर्थः । लोके रसप्राकट्यार्थमेवैतत्कृतमिति उत्पन्नस्य नादस्यामृतमयत्वाय भगवता नादः कृतः सच मधुर एव कर्त्तव्यः तेन च जगत्पूरणीयम् ॥ ९ ॥

ततोऽप्यघटमानमेतदिति तदर्थमाह । काचिदिति । मुकुन्देन समम् अमिश्रिताः स्वरजातीः काचिदुन्निन्ये काचित्सम्यक् भगवद्भावं प्राप्ता भगवतो नादकरणे हेतुः मुकुन्देनेति मोक्षदानार्थमेव उपनिषदि स्वनादं पूरितवान् उभयोरेकता नादे तुल्यता मोक्षे कार्यद्वयं पूर्वसंघातान्निवर्तनं ब्रह्मप्रापणञ्च तदर्थमितरनिवारणार्थमुपनिषदामुपयोगः स्वराः षड्जादयः तेषां जातिभेदाः यथा मयूरः षड्जं वदति तथा अन्येऽपि पक्षिणः मनुष्या अन्येऽपि जीवाः षड्जं वदन्ति तथापि तेषामवान्तरजातिरस्ति ते चेद्यथाक्रमेण यथारसाभिव्यक्ति यदभिप्रायेण सृष्टावुत्पादिताः तास्तथैव योजिताश्चेत्तदा स्वरजातयः अमिश्रिता भवन्ति तद्भगवता कर्तुं शक्यं नान्येन तासां चेदुन्नयनं तदा युक्त एव संतोषस्तदाह । पूजिता तेन भगवतेति स्वस्य ब्रह्मत्वात्स्वविचारितानुपूर्वीति स्वस्य तथा गानं नाश्चर्यहेतुः अन्येतु तत्स्वरूपमेव न जानन्ति कुतः पुनः करिष्यन्तीति तेनैव पूजिता किंच कार्यमपि उन्नयनेन जातमिति । साधु साध्विति प्रीयता प्रीतिं कुर्वता भगवता स्वरूपतः फलतश्च साधुत्वाय द्विरुक्तिः प्रीतिश्च तुल्यत्वात् सर्वथा कार्यानुगुणत्वात् ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नृत्यमाना नृत्यन्त्यः । यद्वा । नृत्येन मानः कृष्णकर्तृक आदरो यासां ताः रक्तकण्ठ्यः नानारागैरनुरञ्जितकण्ठ्यः । रागाश्चोक्ताः सङ्गीतसारे । "तावन्त एव रागाः स्युर्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृता वरे"ति । रतिः कृष्णकर्तृका प्रीतिरेव प्रिया यासां ताः । कृष्णस्याभिमर्शेन स्पर्शादिना मुदिता इति नृत्यादिश्रमानुद्गमः । यद्गीतेन यत्कर्तृकेण गीतेन तदानीमिदं जगज्जातमावृतं व्याप्तमासीदित्यर्थः । यद्वा । यद्गीतेन यत्कर्मकेण गीतेनेति । अद्यापि जगद्वर्त्तिभिर्लोकैर्या गीयन्त एवेत्यर्थः ॥ ९ ॥

स्वरजतीरिति स्वराः खलु "षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः । मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् । तेषां जातीरष्टादश । यदुक्तम् । रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता । शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञया । षाड्जार्षभी च गान्धारी मध्यमा पञ्चमी तथा । धैवती चाथ नैषादी शुद्धा एतास्तु जातय" इति । अमिश्रिताः कृष्णोद्गीताभिरसङ्कीर्णाः । यद्वा । शुद्धा अपि जात्यन्तरास्पृष्टाः । परमप्रावीण्यने केवलतत्तद्गानात् । तत्रापि उत्कृष्टं निन्ये । अतः परमदुर्गेयानामपि तासां तथा गानमालक्ष्य तेन कृष्णेन सा पूजिता स्वीयपीतोत्तरीयादिभिः सम्मानितेति विशाखेयमिति प्राञ्चः तत्तज्जात्युच्चमतमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती तस्यै कृष्णो मानमादरं बहुरत्नमालापदकोर्मिकाद्यलङ्कारमदादियं पूर्वतोऽप्याधिकसाद्गुण्याविष्कारवती ललिता ततश्च यथोत्तरोत्कृष्टतादृशगाने गोपीनामप्रवृत्तिमालक्ष्य श्रीराधा स्वयमगायन्ती स्वसख्यास्तस्या एव सर्वसाद्गुण्योत्कर्षं ख्यापयामासेति ज्ञेयम् ॥ १० ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

इदानीं गानस्याप्याधिक्यमाह । उच्चैरिति । नृत्यमानाः नृत्यन्त्यः सत्यो जगुरिति कौशलं यद्वा नृत्ये लब्धो मानश्चित्तसमुन्नतिर्याभिरिति शाकपार्थिवादिः रक्तकण्ठ्य इति सौकुमार्य्यं रतिः श्रीकृष्णकर्तृका प्रीतिस्तद्विषया वा सैव प्रिया अभिलषणीया यासामिति तत्सुखित्वम् अत एव कृष्णाभिमर्शमात्रेण मुदिता इति वैदग्ध्यं किमिति काङ्क्षायामाह । यदिति । यासां गीतेन स्वयमुत्प्रेक्षितरागसमूहेन इदं जगत् आवृतं व्याप्तं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृतरागाणां षोडशसाहस्री जगति विस्तृतेति भावः । यथा सङ्गीतसारे "तावन्त एव रागाः स्यु र्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृतावरे" ति यद्वा इदमिदंतास्पदम् आवृतमाच्छादितम् एवञ्च तत्रास्पदमेवास्फुरत् पारिशेष्यादिति भावः । यद्वा यासां गीतेन येन वा गीतेन इदं मम हृदयमावृतम् इतिब्रह्मानन्दरसाच्छ्रीकृष्णरसस्याधिकरसोव्यञ्जितः तदेवं श्लोकद्वयेन कान्तभावानां नृत्यादिकौशलं दर्शितं कृष्णवच्च इत्युपक्रमात् ॥ ९ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

अथ सहचरीवर्गमुख्यतमायाः श्रीललितायाः सर्वजित्वरं तदाह । काचिदिति । मुकुन्देन सममिति तदनुगतत्वमैकमत्यञ्च सूचितं स्वरजातीरिति स्वरा उक्ताः सङ्गीतरत्नाकरे "स्वकाः श्रोतृचित्तानां स्वराः सप्तविधा मताः । षड्जार्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः ॥ मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमा" निति । जातयः "रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥ शुद्धा सप्तविधा ज्ञेयास्तज्ज्ञैः षड्जादिभेदतः । षड्जकैशिक्यादिभेदादेकादशविधापरेति आदिग्रहणादार्षभ्युदीच्यवत्यादिग्रहः ताश्चातिदुर्ग्रहा अपि अभिभिता: स्वरजात्यन्तरस्पृष्टाः उन्निन्ये उच्चैर्नीतवती सह गानेऽपि ततोऽधिकवैलक्षण्यं दर्शितवतीत्यर्थः । ततः प्रीयता प्रीतियुक्तेन तेन मुकुन्देन साधु साध्विति प्रोत्साहनं वदता पूजिता अत्यादृतेत्यर्थः । इयञ्च मुकुन्देन सममित्युक्तेः शुद्धसख्यवती काचिदिति केन तत्सुखेनाचीयते पूर्यते इति व्युत्पत्तेश्च उद्भटत्वात्प्रखरा च नामानुक्तिश्च श्रीमुनीन्द्रस्य वैवश्योदयेनेति निर्णीतमेव श्रीबृहद्भागवतामृते प्रथमखण्डान्ते परीक्षिद्वाक्येन ॥ १० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं प्रधाननृत्यं निरूप्य नृत्यमानानां तासामतिचित्रं गानसौष्ठवमाह । उच्चैरिति । आदावुच्चैर्जगुस्ततः पुनर्नृत्यमाना अभूवन् यद्वा नृत्यमाना नृत्यं कुर्वत्य एवोच्चैर्जगुरित्युभयोर्नृत्यगानयोर्युगपदाचरणेन महत्कौशलं तासां यद्वा नृत्यस्य मानो देवाङ्गनादिभ्योऽपि नृत्यकौशल्याधिक्यादभिमानो यासां यद्वा नृत्ये मानं यथार्थज्ञानं यासां यद्वा नृत्यगतौ मानं प्रमाणं यासां यद्वा कृष्णेन सह नृत्येन लब्धो मानः आदरो याभिः यद्वा नृत्येनैव कृतः कृष्णसन्मानो याभिः तथा च नृत्येन कृष्णसन्मानं कुर्वत्यो गुणगानेनापि तत्सन्मानायोच्चैरुच्चस्वरेण जगुः यद्वा चकारस्य शोभावाचकत्वादुत्कृष्टशोभा येषु तैः स्वरैर्जगुः यद्वोत्कृष्टस्य कृष्णस्यैव शोभा येषु तैर्गीतैर्जगुः तत्र प्रथमार्थे बहूच्चस्वरगाने शोभाभावमाशङ्क्याह । रक्तकण्ठ्य इति रञ्जकस्वरयुक्तकण्ठवत्य इत्यर्थः । यद्वा द्वितीयार्थे कथमुत्कृष्टशोभावत्स्वरैर्जगुस्तत्राह । रक्तकण्ठ्य इति । यद्वा तृतीयार्थे कथं कृष्णशोभान्वितैरेव गीतैर्जगुस्तत्राह । रक्तकण्ठ्य इति । रागव्याप्तकण्ठ्य इत्यर्थः । अत्रायं ध्वनिः इन्द्रनीलमणिद्युतिनीलपद्मरागसुरभिमृद्वाल्हादककृष्णाङ्गदर्शनजातोत्साहतया तद्योगयोग्यतापत्त्यै तासां हृदयपद्मोऽपि रागव्याप्ततया पद्मरागो जातः ततश्च तद्व्याप्त्योच्छलितरागरूपतया कण्ठमभिव्याप्य मुखपद्ममपि रागान्वितत्वकरणेन तद्योग्यत्वायैव पद्मरागं चकार तथाच कण्ठस्य तद्रागात्मकरागव्याप्ततया तच्छोभान्वितगीतैरेव जगुः अत्र चेन्द्रनीलपद्मपद्मनिधीनां विभवदर्शनेन स्वाभिभवमाशङ्क्य कण्ठशङ्खनिधिगर्जनेनापि गानस्योच्चत्वसम्भावना तत्र नृत्यमाना रक्तकण्ठ्य उच्चैर्जगुरित्यत्र घनश्यामकृष्णदर्शनेन बहुगम्भीरगर्जनात्मकगीतनादप्रमोदमदाः प्रमदा मयूरा इव नानावर्णाम्बरपक्षध्वननेन नृत्यमाना एव यतो रक्तकण्ठ्योऽत उच्चैर्जगुः उच्चैर्गाननृत्ययोः प्रयोजनं सूचयंस्ता

विशिनष्टि । रतिप्रिया इति । कृष्णस्य रतिविहारः प्रियो यासां रतिः प्रीतिः प्रीतिर्वा प्रिया यासां यद्वा रतिरूपाः प्रीतिमय्यश्च ताः प्रियाश्चेति रतिप्रियाः यद्वा कृष्णाय रतिर्मिथुनक्रीडा प्रीतिर्वा प्रिया यासां यद्वा रतिः स्त्रीणां प्रिया भवति ननु कापि स्त्री रतेः प्रिया भवति तास्तु मन्मथमन्मथस्य भगवतो रतेरपि प्रिया अतोऽत्यर्थं तत्सौभाग्यं यद्वा अकारसंश्लेषे रतिरेव प्रिया यासामित्यरतिप्रिया इति वा छेदः एतादृशरासगतिसातत्येऽपि तासां श्रमाभावे हेतुमाह । कृष्णाभिमर्शमुदिता इति । कृष्णस्य नित्यानन्दस्य सर्वानन्दबिम्बभूतस्य सर्वात्मत्वेन सर्वेषामपि सामान्यत्वेऽपिप्रियत्वेऽप्यात्मनस्तुविशेषतः प्रकटलीलायामप्यतिप्रियतमस्याभिमर्शेन साक्षात्प्रत्यङ्गस्पर्शेन मुदिताः ननु सर्वात्मतया सामान्यतः सर्वेषामभेदसम्बन्धादिन्द्रियाद्यव्यवहितसम्बन्धस्य कथमुत्कर्षोक्तिरिति चेत्तत्रेदं चिन्त्यं किमज्ञानां स्वरूपाभेदोत्कर्ष उच्यते विदुषां वा नाद्यस्तेषां तदज्ञानाद्भेदभ्रमाच्च सिद्धोऽप्यभेदोऽसिद्ध एव विदुषामपि परोक्षापरोक्षसन्देहादत्र तु पारोक्ष्यसंशयाभावाच्छ्रैष्ठ्यं नचेन्द्रियाद्यव्यवधानशङ्का भगवद्रासलीलागतानां तु —

देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामित्यादिवचनैः ।

कृष्णवदेव व्यवधानहेतुभूतानात्मदेहेन्द्रियाभावात् तत्र तेष्वपि देहेन्द्रियभेदवादिनामपि न व्यवधानशङ्कावसरो देहस्यैव नृत्यगानाद्यास्पदत्वेन देहे देहव्यवधानासम्भवात् तासां तद्गीतोत्कर्षमेवाह । यद्गीतेनेति । यासां गीतेनेदमन्तरिक्षमावृतं व्याप्तमासीत् अन्तरिक्षस्थविमानयातानां साङ्गनासुरप्रधानानां दिविस्थसभगणचन्द्रस्य च न तासां गीतं विनान्या स्फूर्तिरत एव वक्ष्यते —

कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ।
कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् इति ॥

यद्वा यद्गीतेन यासां स्वयं प्रकटीकृतरागसमूहेनेदं सर्वं जगत्सुरनरादिलोकमावृतं तदनुसारिगानपरं जातं तत्कृतरागाः षोडशसाहस्री त्रिलोके विभक्ता तदुक्तं सङ्गीतसारे —

तावन्त एव रागाः स्युर्यावत्यो जीवजातयः ।
तेषु षोडशसाहस्री पुरा गोपीकृतावरा इति ॥

यद्वा किम्भूतास्तास्तदाह । यद्गीतेनेति । यासां यशसा कविभिर्वर्णितेन नाना सुरनरभाषागतगीतप्रबन्धादिनेदं जगदावृतं व्याप्तं यद्वा यद्गीतेन यासां तत्र गानविषयभूतेन श्रुतिरूपतया वा वर्णितमाहात्म्येन कृष्णेनेदं जगद्व्याप्तं यद्वा यस्य कृष्णस्य गीतेनेदमावृतं तस्य कृष्णस्याभिमर्शेन मुदितास्तमेवोच्चैर्जगुः यद्वा पुनः पुनरतिशयेन कृष्णाभिमर्शो यथा स्यात्तथा नर्तने उदिता उद्यताः यद्वा कृष्णाभिमर्शो यथा स्यात्तथा नृत्यमाना इति पृथक् सम्बन्धः उदिता इति उत्कृष्टं कृष्णमेवेताः प्राप्ता अतस्तासां तत्र लीनचित्तत्वाद्यस्य कृष्णस्यैव तत्प्रेरणया तन्मुखनिःसृतेनेदं गोपीमण्डलमावृतं व्याप्तम् ॥ ९ ॥

तत्र कस्याश्चिदतिप्रियाया गीतोत्कर्षमाह । काचित्सममिति । काचिदिति सर्वाभ्यः पृथङ्निरूपणात्पृथग्वर्णितानामपि प्रथमोद्देशादग्रे गानोन्नयनस्तुतिविषयत्वोक्त्या सर्वोत्कृष्टा यद्वा कासु स्वरूपा चिदिति चिद्रूपा चिदानन्दमयी श्रीमती राधा मुकुन्देन सममभिश्रिताः स्वरजातीरुन्निन्ये इत्यन्वयः तत्र मुकुन्देन सममित्यनेन तु अन्यासां गानं स्वतन्त्रं श्रीमत्याः

काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ।
जग्राह बाहुनास्कन्धं श्लथद्वलयमल्लिका ॥ ११ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

ष्कुणेन सहैव किञ्च यथा कृष्णस्य गानादिलीला स्वतः परमानन्दघनत्वेन स्वप्रयोजनाभावाज्जीवानां मुक्तिदानाय तथा श्रीमत्या इत्यपि द्योत्यते अमिश्रिता इत्यत्र अन्यासां गानेनामिश्रिता मुकुन्देन सममित्युक्त्या सर्वोपाधिविनिर्मुक्तप्रत्यगभिन्नब्रह्मवदेव स्वरब्रह्माप्यन्यामिश्रितं मुकुन्देन समं निन्ये तथा च राधाकृष्णगानयोर्मिथः समत्वं तुल्यगुणत्वम् अन्यगानेभ्यः श्रेष्ठ्यञ्च द्योतितं यद्वा अमिश्रिता इत्यनेनान्यस्वररागादिगाने प्रमादादितरमिश्रणव्यावृत्तिस्तत्र प्रमादासम्भवात् स्वरजातीरिति स्वराः षड्जादयो ध्वनिविशेषास्तदुक्तम् —

रञ्जकाः श्रोतृचित्तानां स्वराः सप्त विधा मताः ।
षड्जर्षभौच गान्धारो मध्यमः पञ्चमस्तथा ॥
धैवतं च निषादं च सर्वे स्युः श्रुतिसम्भवाः ।
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।
मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥

जातयस्तु तत्र रागोत्पत्तिहेतवः उन्निन्ये इति सुरगन्धर्वादीनामपि व्यामोहकसर्वोत्कृष्टतया गानसूचनम् अतस्तेन भगवता साधु साध्विति पूजिता स्तुता यद्वा साध्विति कृत्वा साधु पूजिता यद्वा तेन हेतुना प्रियेण सर्वगोपीभिश्च पूजिता स्तुता सुरसुरादिभिश्च सुमनोवृष्ट्यादिभिः पूजिता ततश्च सैव तदेव गीतं ध्रुवं तालविशेषं यथा भवति तथा उन्निन्ये यद्वा प्रथमं ध्रुवस्य स्थायिपदस्य गानं कृत्वा मध्येऽन्तरा गानानन्तरं तदेव ध्रुवमुन्निन्ये नान्तरान्तरितपूर्वोत्तरध्रुवगानयोः क्वचिदपि स्वरेणास्खलितास्तस्यै स्तुत्यनन्तरमालिङ्गनचुम्बनादिना मानमावहं बहुदात् ॥ १० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

केवलनृत्यमुक्त्वा सगीतं तदाह । उच्चैरिति । नृत्यमानाः नृत्यन्त्योऽप्युच्चैर्जगुः शानजार्षः नृत्ये मानो गर्व आदरो वा यासामिति वा रक्तकण्ठ्यः नानारागैरनुरञ्जितकण्ठ्यः स्निग्धकण्ठ्य इति वा तथापि रतिरेव प्रिया यासां यद्वा गानफलमाह । रतिः कृष्णकर्तृका प्रीतिः प्रिया यासां ननु तादृशचिरकालीननृत्ये श्रमापनोदस्तासां केन जात इत्याशङ्क्याह । कृष्णेन सदानन्दरूपेण प्रेष्ठेन कृतः अभितोऽमर्शः प्रोञ्छनादिरूपः तेन मुदिता मोदसागरे निमग्नाः किंचिद्गीतेन सर्वेष्वपि सर्वं विस्मृतं तासां श्रमविस्मरणे किञ्चित्रमित्याह । यासामुच्चैर्गीतेनेदं विश्वमावृतमासीत् यद्वा यासां स्वयं कल्पितेन षोडशसहस्रभेदाभिन्नेन गीतेनेदमावृतं व्याप्तं यद्वा तद्विषयकेन लोकैः स्वोद्धारार्थं क्रियमाणेन गीतेनेदमावृतम् ॥ ९ ॥

अथ पञ्चभिस्तासां प्रेमचेष्टितान्याह । काचिदिति—

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः ॥
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।
मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥
रागस्तु जायते यस्मात्सा जातिरभिधीयते ।
शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥
शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
ता एवा विकृताः सत्यो जाता विकृतसंज्ञया ॥
षाड्जर्षभीच गान्धारी मध्यमा पञ्चमी तथा ।
धैवती चाथ नैषादी शुद्धा एतास्तु जातयः ॥

इत्युक्तजातीरमिश्रिताः जात्यन्तरासंस्पृष्टाः मुकुन्देन सह उन्निन्ये उत्कृष्टाः कल्पयामास यद्वा कृष्णोन्नीताभिरसङ्कीर्णाः स्वरजातीः षड्जादिस्वरालापगतीरुन्निन्ये सहमुकुन्देन संख्याप्राधान्यमुच्यते ततश्च प्रियमाणेन तेन साधु साध्विति पूजिता संमानिता यीप्सम हर्षेण इयं ललितानाम्नी श्रीराधासखी ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णस्याभिमर्शेन मुदिताः नृत्यमानाः नृत्यन्त्यः रक्तकण्ठ्यः विविधरागैरनुरञ्जितकण्ठ्यः उच्चैर्जगुः यच्चासां गीतेनेदं विश्वमावृतं व्याप्तमभूत् पवित्रं जातमित्यर्थः ॥ ९ ॥

तत्र काचिद्वधूः मुकुन्देन स्मरणमात्रतो मुक्तिप्रदेन सह स्वरजातीः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्यस्वरालापगतीः अमिश्रिताः मुकुन्दोन्नीताभिरसङ्कीर्णाः उन्निन्ये तदा तेन मुकुन्देन प्रियमाणेन साधु साध्विति पूजिता तदनन्तरं तदेव स्वरजात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये उन्नीतवती तस्यै बहु मानमदात् ॥ १० ॥

भाषा टीका ।

रति की अत्यन्त प्रिय अनेक रागों के कण्ठों वाली श्रीकृष्ण के अंग स्पर्श होने से अत्यन्त हर्षित हुई जो गोपी सो ऊंचे स्वर से गान करती हुई जिनके कि गीत से यह सब संसार व्याप्त होगया ॥ ९ ॥

कोई गोपी पृथक् स्वरों कि जातियों से मुकुंद भगवान् के साथ गान करती भई फिर उनके स्वरों को ग्रहण करने से भगवान् प्रसन्न भये उनने सुंदर है करके प्रशंसा किया भगवान् ने भी उसी स्वर का गान किया उस गोपी को बहु मान दिया ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं नृत्यगीतादिना श्रीकृष्णसंमानितानां तासामतिप्रीतिविलसितं वृत्तमाह । काचिदिति । श्लथन्ति वलयानि मल्लिकाश्च यस्याः सा ॥ ११ ॥

तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ।
चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥१२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

पार्श्वस्थस्येति । शीघ्रसुखग्रहणं बोधितम् अन्यथा रासावेशेन स्खलनं सम्भवेत् किञ्च पार्श्वस्थत्वेन तस्यापि तत्र सावधानत्वं तस्यां पूर्वतोऽपि भावाधिक्यञ्च सूचितम् अतः परिश्रमादिकं तदर्थं केवलं छलमेवेति ज्ञेयं रासश्रमेण कदाचिद्यष्टिमेकां लीलया गदामिवावष्टभ्य बिभर्तीति गदाभृत् यद्वा गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तां स बिभर्त्ति गदाभृत् वंशीधरः तस्य सखीकरं परित्यज्य तस्य स्कन्धं अग्राह परिश्रान्तेर्लक्षणं श्लथद्दिति तथा श्रीपराशरेणाप्युक्तम्—

परिवर्त्तश्रमेणैका चलद्वलयलापिनीम् ।
ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिन इति ॥

मल्लिकापुष्पाणां श्लथनं कबराद्वोद्वय्यम् ॥ ११ ॥

एका गोपी अंसगतं स्वस्कन्धस्थितं स्वभावत एवोत्पलपुष्पतोऽपि अधिकं सौरभं यस्य विशेषतश्चन्दनेन आसम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तम् इति भावोद्दीपनत्वं सूचितं ह स्पष्टं चुम्बने हेतुः हृष्टरोमेति प्रेमवैवश्यादित्यर्थः । श्लेषेण रोमाण्यपि हृष्टानि तस्याश्च हर्षः किंवक्तव्य इत्यर्थः षष्ठी चतुर्थ्याम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवेत्यर्द्धकम् । तदेव तालानिबद्धं केवलरागमयमेव वा प्राथमिकत्वेन प्राप्तत्वादादितालमयमेव वा गीतं तत्क्षणादेव ध्रुवं यति निःसारसंज्ञतालद्वयैकतरात्मकं ध्रुवं भोगाख्याव-यवद्वयमात्रयुतगीतविशेषं रचयित्वा जगावित्यर्थः । तस्यै च मानमदात् श्रीमुकुन्द इति शेषः । किन्तु पूर्वतो बहु यथा स्यात्तथेति । अन्यत्तैः । यद्वा । स्वरा मत्तमयूरादिवद्ध्वनयः षड्जा-दयः सप्त । तदुक्तम् । "रञ्जकाः श्रोतृचित्तानां स्वराः सप्तविधा मताः । षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः । मयूरचातकच्छा-गक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान्" इतिं । अथ जातयस्तत्र रागोत्पत्ति हेतवः । तदुक्तम् । रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्त्तिता । शुद्धा सप्तविधा ज्ञेया तज्ज्ञैः षड्जादिभेदतः । षड्जकैशिक्यादिभेदादेकादशविधा परेति आदिग्रहणादार्षभीत्यादयः षट् । षड्जो दिव्यो वेत्यादयश्च दश ज्ञेयाः । ता अभिश्रिताः स्वरजात्यन्तरास्पृष्टाः । परमप्रा-वीण्येन केवलतत्संज्ञानात् । तत्रापि उत् उत्कृष्टम् । नित्ये गृहीतवती जगावित्यर्थः एवं कासाञ्चिद्गुणोत्कर्षप्राधान्येन तत्रापि तार-तम्येन गानाद्यनुभावकं प्रेम वर्णयित्वा कासाञ्चित् सम्भोगप्राधान्येन वर्णयति । काचिद्रासेत्यादिना । तत्रापि कस्याश्चित् सौभाग्य-प्राधान्येनाह काचिद्रासेति । पार्श्वस्थस्येति शीघ्रसुखग्रहणं दर्शितम् । अन्यथा रासावेशेन स्खलनं सम्भवेत् । गदां नट-वृन्दाधिपत्युचितां गदाकृतिं यष्टिं बिभर्ति इति । यद्वा गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तां तदुचितत्वेनापि बिभर्त्तीति गदाभृत् तस्य । अत एव मध्यस्थस्यापि नटवृन्दा-धिपतिस्थानीयोऽयं प्रकाशः परिश्रान्तिलक्षणं श्लथदिति श्रमेण नवमल्लिकावद्विलुलिताङ्गायां श्लथन्तः परस्परं विच्छिद्य सङ्घट्टं कुर्वन्तो बलयाः तथा श्लथन्त्यो गलन्त्यो मल्लिकाश्च कबरस्था यस्याः सा । तथा श्रीपराशरेणाप्युक्तम् । "परिवर्त्तश्रमेणैका चल-द्वलयलापिनीम् । ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः" । इति । अत्र मल्लिकानां शिथिलता च ज्ञेया । शोभादिदशानां मध्ये सोऽयं माधुर्यनामानुभावो ज्ञेयः । यथोक्तम् । माधुर्यं नाम चेष्टानां सर्वावस्थासु चारुतेति । एवमस्याः स्वाधीन-भर्तृकात्वं मध्यस्थितत्वं दर्शितम् । तस्मात् श्रीराधिके-यम् । अतो निकटपठिते गानविषया तद्वयसुखकारिण्यौ तत्-सख्यौ श्रीललिताविशाखे भवेताम् । पूर्वस्यास्ताद्दशचेष्टत्वेन वर्णनं स्वतन्त्रनायिकात्वव्यञ्जकम् । उत्तरयोर्गीतादिगुणत्वेन वर्णनं साहाय्यकव्यञ्जकमिति ॥ ११ ॥

अथ प्राक्तनक्रियासादृश्येन नूनं श्रीश्यामलाविलासमाह । तत्रेति । एका गोपी अंसगतं स्वस्कन्धस्थितं स्वभावत एव उत्पलपुष्पतोऽप्यधिकं तज्जातीयं सौरभं यस्य इत्यर्थः । विशेषतश्चन्दनेन आ सम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तं ह स्पष्टम् । चुम्बने हेतुः हृष्टरोमेति प्रेमवैवश्यादित्यर्थः । श्लेषेण रोमाण्यपि हृष्टानि तस्याश्च हर्षः किं वक्तव्य इत्यर्थः । अयं प्रागल्भ्याख्योऽनुभावः । यथोक्तम् । "निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता" इति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नृत्यगीतवाद्यादिना श्रीकृष्णसम्मानितानां तासामति प्रेमविलसितं वृत्तमाह चतुर्भिः । काचिदिति । रासेन परिश्रान्ता श्लथन्ति वलयानि मल्लिकाश्च यस्यास्तथाभूता आत्मनो बाहुना समीपस्थस्य भगवतोऽसं जग्राह ॥ ११ ॥

तत्र तासां मध्ये एका स्वात्मनोऽसगतं स्कन्धे निहितमुत्पलस्य सौरभमिव सौरभं यस्य तं चन्दनेन समंतात्लिप्तं कृष्णस्य बाहुमाघ्राय हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता बाहुम् अधरं वा चुचुम्ब ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णोऽपि तदेव गीतं ध्रुवमुन्निन्ये व्यक्तवर्णेन श्रावयामास तेन तस्यै एव समङ्गायन्त्यै अत्र समगानं नाम तत्प्रशंसार्थं मुकुन्देन तद्गानानुसारेण गीतमिति ज्ञातव्यम् अन्यथा त्रिजगति मुकुन्दगायनसमङ्गायनक्षः कोऽस्ति स्वविभूतिमन्तरेण स्रवन्ती श्लथयन्ती-कबरबद्धमल्लिका यस्याः सा तथा ॥ ११ ॥

उत्पलसौरभम् उत्पलमालया सुगन्धितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

काचित् । गदां गोपालनोचिताम् । नटवृन्दाधिपत्युचितामेव वा गदाकृतिं यो बिभर्तीति गदाभृत् ॥ ११—२४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

एवं सङ्क्षेपेण प्रथमरासं निर्वर्ण्य तत्कृतपरिश्रममाह । काचिद्रासेत्यादि । पार्श्वस्थस्येति सर्वस्या एवेति ज्ञेयं बाहुना जग्राहेति वामेन बाहुनेति मन्तव्यं गदो वाक्रनिगदो गद इत्युक्तः गदमाबिभर्तीति तथा तस्य तया समं किमपि व्यक्तं कथयतो गायतो वा जग्राहेति पुनर्मया वक्तव्य इति प्रकारकग्रहणपरः प्रेमप्रश्रयेण संकोचाभावात् श्लथमानानि वलयानि मल्लिकाश्च कवरात् कवर्य्याश्च यस्याः सा तथा वस्तुतस्तु रासोत्सवे शृङ्गारोऽद्भुतोऽङ्गी अथवा उत्साहो हि व्यभिचारिभावः स्वातन्त्र्येण विभावादिभिः परिपुष्टः रसतामापन्नो भावाख्यो रसोऽङ्गं तत्र श्रमादयो व्यभिचारिणः ॥ ११ ॥

एवं कृष्णोऽपि श्रान्तः सन् कस्याश्चिदंसे बाहुं न्यासेत्याह । तत्रैत्यादि । तत्र रासोत्सवे एका सौभाग्यवती अंसगतं कृष्णस्य बाहुं चुचुम्ब उत्पलसौरभं स्वभावेन चन्दनालिप्तम् आरोपेण अतः आघ्राणेन परीक्ष्य किमयं चन्दनेन सुरभिः किंस्वरूपेणेति संदिग्धा उत्पलसौरभमिति स्वरूपं सौरभमनुभूय हृष्टरोमा चुचुम्बेत्यर्थः अतश्चन्दनालिप्त इति लिपिप्रकृत्यर्थमाहिमा अत्र कृष्णस्यालस्यमस्या औत्कण्ठ्यव्यभिचारिणौ ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अन्या पुनः उन्नीतमेव यावद्भगवता पुनर्गृह्यते तावत्तथैवोन्नयनं कृतवतीत्याह । तदेवेति । तदेवान्नीतं ध्रुवं निश्चलं यथा भवति तथा उन्निन्ये तं नादं ध्रुवनादे योजितवती ध्रुवः नादः कारणनादः स्थायी स्वरः "यत्रोपविशते रागः स्वरः स्थायी स कथ्यते" भगवन्नाद एव वा भगवता तथैव गीतमिति ध्रुवतालादिषु योजितवतीति केचित्तन्न विचारक्षमम् एवं ध्रुवयोजनायां भगवांस्तस्यै एव बहेव संमानमदात् चकाराद्भीष्टमपि एवं तासामन्तः सामर्थ्यं जातमिति बहिः सामर्थ्यं किंस्वकत्व्यमिति भावः । बहिरिति सर्वगोप्यधिकमैश्वर्यवीर्यरूपे चैते निरूपिते अन्याश्च चतस्रः क्रमेण बोद्धव्याः कीर्तिर्हि भगवन्तमेवावलम्बते अतः कायिकं व्यापारं द्वयोराह । काचिदिति । रासेन परितः श्रान्ता सत्स्यैकस्मिन् पार्श्वे विद्यमानस्य स्कन्धं स्वबाहुना जग्राह गदाभृत इति भगवता स्थिरत्वाय अधिकप्रयत्नेन अन्यथा क्रियमाणे रासो भज्येत परिश्रमो रसाधिक्यात् अन्यथा रसार्थं प्रवृत्तिर्न स्यात् मण्डलपरित्यागे मण्डलसिद्ध्यर्थं भगवतापि हस्तग्रहणं सम्भवति अत एकस्मिन् पार्श्वे भगवानेव पार्श्वभागे विद्यमानस्य भगवतः कण्ठग्रहणं वृक्षाधिरूढालिङ्गनं भवति भगवता पूर्वं कण्ठे सा गृहीता तयापि भगवान् गृहीत इति मित्रवत्स्थितिः स्यादिति तन्निवृत्त्यर्थमाह । श्लथद्वलयमल्लिकेति । श्लथन्ती वलयाकारा मल्लिका यस्याः कवरे वलयाकारेण मल्लिका यस्याः कवरे वलयाकारेण मल्लिका माळा बद्धा सा च शिथिला जातेति वैकल्यं प्रदर्शितम् आसक्ता च प्रदर्शिता ॥ ११ ॥

अन्या पुनः स्वस्य एकांसगतं बाहुमुत्पलापेक्षया अधिकपरिमलयुक्तं चन्दनेन आलिप्तं बाहुमाघ्राय अन्तः प्रविष्टामोदा पूर्णानन्दा सती हृष्टरोमा बाहुमेव चुचुम्ब रूपस्पर्शौ पूर्वमेव स्थितौ गन्धरसयोरप्यनुभवं कृतवतीति हेत्याश्चर्ये तत्रेति तस्मिन्नेव समये तत्रैव भगवति वा उभयपार्श्वस्थयोर्गोपिकयोस्तथा सति विनियोग उक्तो भवति एकांसगतमिति वा सैव तथा कृतवतीति केचित् सदानन्दत्वात् सर्वत्रैव समरसता उत्पलं हि रात्रिविकासि तत्स्त्रीणां मनोज्ञमाघ्राणे चन्दनजसौरभमेव न हेतुः किन्तु ततोऽपि विलक्षणं साधारणजनावेद्यं तदपेक्षयापि सौरभयुक्तत्वेनास्वलौकिकभाववतीनामेव वेद्यं सहजं सौरभमित्यपि ज्ञापनार्थेदं विशेषणं चन्दनालेपः विवेकधैर्यनाशनार्थः । घ्राणेनान्तः प्रवेशनमस्या विशेषः एषा श्रीरूपा ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

साद्गुण्यप्राधान्येन सख्यौ वर्णयित्वा सौभाग्यप्राधान्येन सर्वमुख्यतमां वर्णयति । काचिदिति । गदाभृतः कृष्णस्य पक्षे गदनं गदा गदा गीतवत्योः सख्योर्गुणतारतम्यज्ञानकथा तां बिभर्त्ति धत्ते । पुष्यति वा तस्य स्कन्धं बाहुना दक्षिणेन जग्राह आलम्बे । श्लथन्तो वलयाः मल्लिकाश्च कवरस्था यस्याः सा । स्वाधीनकान्तत्वादियं श्रीवृषभानुकुमारी ॥ ११ ॥

अंस गतं स्वस्कन्धे स्थितं चन्दनालिप्तमपि उत्पलस्येव सौरभं यस्येति स्वाभाविकेन गात्रस्योत्पलगन्धेनात्यधिकेन चन्दनगन्धस्यावरणात् पूर्वोक्तयोक्तक्रियातुल्यत्वादियं नूनं श्यामला ॥ १२ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

प्रीतियुतत्वमेवाभिव्यञ्जयति । तदित्यर्द्धेन । तदेव तयोर्गीतमेव ध्रुवं यतितिःसारुसंज्ञतालद्वयैकतरात्मकध्रुवाभोगाख्यावयवद्वयमात्रयुतगीतविशेषं रचयित्वेति शेषः तेन ध्रुवोन्नयनेन तस्यै परमसुहृदे पूर्वापेक्षया बहु अधिकतरं यथा भवति तथा मानं चेतसः समुत्कर्षमदात् दत्तवान् मुकुन्द इति शेषः अत्र मुकुन्दपदस्यामुख्यया वृत्त्या तस्यापि तामनु सख्यमेवाभिमतं तत्सुखपर्य्यवसायित्वादिति संक्षेपः तदेवं तासां तस्याश्च प्रेमसौभाग्यं गुणोत्कर्षं च वर्णयित्वा तत्तत्सौभाग्यमणिमञ्जरीनीराजितवरचरणकमलायाः श्रीराधिकायाः सर्वाधिकं स्वाधीनपतिकात्वलक्षणं सौभाग्योत्कर्षमाह । काचि-

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

दिति । अनिर्वचनीयेत्यर्थः । यद्वा तादृशसौभाग्योत्कर्षवती श्लेषेण केन ब्रह्मणा भानुनेति यावत् आचिता अयोनिजात्वात्सनातनतया संगृहीतेति काचित् "अयोनिजेयं कल्याणी कीर्त्तिता कीर्तिनन्दिनीति" ब्रह्मवैवर्ताद्भगवत इव तस्या अपि प्रादुर्भावमात्रमेवेति भावः "मारुते वेधसि ब्रध्ने पुंसि कः कं शिरो ऽम्बुनो" रित्यमरः तदेवं ककारस्यानेकार्थस्य मुख्यया वृत्त्या भानौ शक्तिः ततश्च नामैकदेशे नामग्रहणमिति न्यायाद्वृषभानुनन्दिनीति नामापि संसाधितम् "श्लिष्टैः पदैः पिशुनयेच्च रहस्यवस्त्वि" त्यालङ्कारानुसारेण सङ्गोपितमपि अथवा पद्मपुराणसंवादेन केन वेधसांशावतरणप्रसङ्गे वृषभानुनाम्ना गोपराजेनात्मजात्वेनाचितेति किवन्तोऽयमिति पूर्ववदेव रासपरिश्रान्तेति सौकुमार्य्यं पार्श्वस्थस्येति नित्यसान्निध्यं गदेति नटराजकरस्थिता गदाकृतियष्टिरेव गदेत्युच्यत इति भरतः यद्वा गदतीति कलध्वनिं करोतीति गदा वंश्येव "निगदो गद" इतिकोशाच्च परिश्रान्तिलक्षणमाह । श्लथदित्यादिना रासपरिश्रमेण, रसालसतया वा ... नवमालिकावद्विलुलिताङ्गत्वेन श्लथन्त्यो गलन्त्यो मल्लिकाः कबरगुम्फितमल्लिका स्रजो यस्या इति किञ्चित्कार्श्यं सूचितं तेन च सौकुमार्य्यं माधुर्य्याख्यानुभावोऽयं "माधुर्य्यं नाम चेष्टानां सर्वावस्थासु चारुते" ति अन्यथा कार्श्यस्यावर्णनीयत्वादिति भावः । बाहुना स्कन्धं जग्राहेति विस्रम्भात्मकं सख्यं स्वाधीनपतिकात्वं च सुव्यक्तमिति संक्षेपः ॥ ११ ॥

तदेवं तस्याः सौभाग्योत्कर्षं साक्षादनुभूय तदभिलषन्त्याः दक्षिणायाश्चेष्टितमाह । तत्रेति । तस्याः सौभाग्योत्कर्षे ऽनुभूते सतीत्यर्थः । एका प्रागुक्ताभ्यां द्वाभ्यामन्या भिन्नप्रकृतित्वात् "एके मुख्यान्यकेवला" इति कोशात् अंसगतमिति दास्यप्रायसख्यव्यक्तिः स्वभावत एवोत्पलपुष्पतोऽप्यधिकं तज्जातीयं सौरभं यस्य तं विशेषतश्चन्दनेन आसम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तं हृष्टरोमेति प्रेमवैवश्यं दैन्यञ्च सूचितं चुचुम्बेति प्रागल्भ्यञ्च "निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भते" ति वस्तुतस्तु दास्यप्रायरतेरस्या नेदं रमणीयश्चेष्टितमिति श्रीमुनीन्द्राभिप्रायः जग्राह बाहुनेत्यादिना पूर्वोक्तसुषमाविशेषस्योत्कर्षज्ञापनायैव प्रदर्शितमिति ज्ञेयम् ॥ १२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं गाननृत्यादिगुणप्रधानायाश्चेष्टास्ताः कासां चरितेन दर्शयित्वा संभोगप्रधानाश्चेष्टा निरूपयन्नादावालिङ्गनचेष्टामाह । काचिदिति । काचित्तु रासपरिश्रान्तेत्यत्र यद्यपि रासो रससमूहस्तत्रापि नित्यपरमानन्दघनसन्निधानेन पूर्वव्याख्यानरीत्या काचिदिति चित् सुखरूपत्वेन च श्रमासम्भवस्तथापि कृष्णालिङ्गनसुखसम्भोगातिशयाय मिषेण श्रान्तैवेति बोध्यं यद्वा राससुखभरपूर्णतयैव चेष्टान्तरप्रवृत्तिशैथिल्यात्परिश्रान्तेवेति ज्ञेयं यद्वा परिशब्दोऽत्र वर्जने तथाच रासश्रमरहिता अपि सह रासेन निवृत्तविरहादिश्रमा अपि केवलसुखसंभोगातिशयायैव पार्श्वस्थस्येति विभुसर्वाङ्गतया सर्वत्र स्थितस्यापि वर्णितरीत्या मण्डले स्वसमीपाविर्भूतस्य गदाभृत इति साक्षाद्रमापतेर्यद्वा गदाकारा काचिन्नटनागरस्य नृत्ये गदाचालनवदावर्तमाना यष्टिः तां धरतः यद्वा गद्यते व्यक्ताक्षरमधुरस्वरेण निगद्यते गीतमनयेति गदा वंशी तद्धृतः स्कन्धं जडीभूतयाचलया पुष्पितया स्वर्णयूथिकालतया तमालद्रुमस्कन्धाश्रयणमिव विबुधविबुधविबुधसुमनोहराविविधभगवद्गुणसुमनोऽन्वितया चतुर्वर्गभगवत्स्वरूपानन्दफलयुतया प्रेममाधुर्य्यरसमधुच्युतया भक्तिलतया श्रीभागवतप्रतिस्कन्धाश्रयणमिव कर्म्मणि खेदानुभवेन तादृग्गुणया श्रुतिलतया ब्रह्माश्रयणमिव रोमपुलकमुकुलस्वेदकणमधुस्राववत्या प्रेमवैचित्यजडीभूतया तदालिङ्गनोत्साहपवनवेगचलितया ललितया बाहुलतया जग्राह श्लथद्वलयमल्लिका इति द्रुमस्कन्धाश्रितलतया कुसुमनिपातमिव भागवतस्कन्धाश्रितभक्तिलतया त्यक्तैहिकामुष्मिकसुखयोगसिद्धकुसुमजातमिव ब्रह्माश्रितश्रुतिलतया स्वलितपुष्पितवचोव्रातमिव भगवत्स्कन्धाश्रितबाहुलतया श्लथन्त्यो वलयाकारा मल्लिका यस्याः यद्वा श्लथन्तो वलयाः कबरग्रथितमल्लिकाश्च यस्या इत्यपि रासश्रमानुकारो बोध्यः तथाच लताश्रिततमालवत् भक्त्यालंकृतभागवतवत् श्रुत्यवभासितनित्यपरमानन्दब्रह्मवत्तयालिङ्गितो भगवान् शुशुभे इति भावः ॥ ११ ॥

तस्या एव चरितान्तरमन्यस्या वा चरितमाह । तत्रैकांसगतमिति । तत्र तस्यामेव प्रियस्कन्धालिङ्गनदशायां सा स्वीयैकांसे एकस्मिन् स्कन्धे गतं प्राप्तं कृष्णस्य बाहुं चुचुम्ब तत्रैव रासमण्डले एका काचिदन्या स्वांसगतं तद्बाहुं चुचुम्ब किम्भूतं बाहुं तदाह । उत्पलसौरभम् उत्पलमिव तत्सुरभिवन्मधु ततोऽप्युत्कृष्टं सौरभं यस्मिन् यद्वा उत्पलेऽपि सौरभं यस्य—

> रसोऽहमप्सु कौन्तेय ! प्रभास्मि शशिसूर्ययोः ।
> पुण्यो गन्धः पृथिव्याश्चेत्यादिवचनैः ॥

सर्वत्र सर्वगुणानां भगवदंशत्वात् यद्वा अन्ये विषयाः पुनः पुनर्भुज्यमानाः सर्वेऽपि प्रति पलं विरसतां गच्छन्ति विकारित्वात् इदन्तु उत्कृष्टमेव प्रतिपलं सौरभं यस्य स्वरूपात्मकतयैवाविकृतत्वात् यद्वा तस्याः क्षीयमाणत्वेन प्रतिपलाभ्यस्यमानानुभवप्रकृष्टतया पदे पदे स्वादु स्वादु भागवतार्थ इव उत्कृष्टं प्रतिपलं सौरभं यस्य यद्वा उत्कृष्टं किमपि वाचामगोचरं स्वरतानां सुखं पूर्वमद्भुतं पाति पुनश्चाधिकं लाति सौरभं यस्य यद्वा उत्पलं नीलकमलं तद्वत्स्वकान्त्या सौरभं चरणकमलं तद्वत् करतलाङ्गुलिकान्त्या भातीत्युत्पलसौरभं यद्वा उत्पलं रात्रिकमलं रात्रावेव भाति सौरं दिनकमलं तु दिने एव इदं तु उत्पलवद्रात्रौ सौरभं दिनेऽपि समानं भाति स्वत एवेदृगपि पुनश्चन्दनेना समन्ताल्लिप्तम् अनेनातिसुरभित्वेऽपि चन्दनलिप्तत्वकथनेन चन्दनसौरभस्य तत्रातिशयापादनासम्भवेऽपि रविनिवेदितदीपवत्परमानन्दे ब्रह्मण्यपि श्रुत्योद्भुतसत्त्ववृत्त्यभिव्यक्तसुखत्ववत्स्वस्वरूपे एव स्वस्मिन् सखिसमागमसुखवर्द्धकप्रियत्वेन पत्रं पुष्पं फलं तोयमित्यादिस्वप्रतिज्ञानुसारेणावश्यस्वीकारो दर्शितः यद्वा चन्दनेनालिप्तमपि स्वत एवोत्पलादपि सौरभं बाहुमाघ्राय हृष्टरोमा तत्सुखातिशयेन प्रेमरसव्याप्ततनुत्वेन रससेवितभूमौ निपतिततृणलताद्युत्थानवत्प्रतिरोमव्याप्तहर्षा पुलकाङ्गी चुचुम्ब नासिकया सुरभिसुखातिशयलाभलुब्धा चुम्बनेन स्पर्शरसावास्वादितवतीति भावः । इति स्फुटं सर्वसखिनृत्यसमाजे गतत्रपतया चुम्बनेन प्रागल्भ्यलक्षणानुभावो दर्शितः किञ्च मुखकमलनिवासास्पदे स्कन्धे हरिकरकमल-

कस्याश्चिन्नाट्यविक्षिप्त¹कुण्डलत्विषमण्डितम् । ¹ कुण्डलत्विषभूषिते
² गण्डं गण्डे संदधत्याः प्रादात्ताम्बूलचर्वितम् ॥ १३ ॥ ² गण्डखण्डेअभिदधत्या
नृत्यती गायती काचित्कूजन्नूपुरमेखला ।
पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताधात्स्तनयोः शिवम् ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

गमे जाते उत्कृष्टबन्ध्वागमे तच्चरणचुम्बनलक्षणादरप्रीतिमवगत्य तत्करपद्मपदविशमिवालं चन्दनालेपासितविशालं चुचुम्बेति ध्वनिः ॥ १२ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

काचित्तु तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये उन्नीतवती तस्यै तथा गानपरायै बहु यथा स्यात्तथा मानमदात् वस्त्रालिङ्गनादिदानपूर्वकं साधुवादं श्रीमुकुन्दः कृतवान् विशाखाख्यैषा श्रीराधासखी एवं नृत्यगीतादिपराणां भगवता सम्मानितानां मध्ये कस्याश्चिदतिप्रीतिविलसितं वृत्तमाह । काचित् पार्श्वस्थस्य गदां नटवृन्दाधिपत्युचितां मदाकारां यष्टिं बिभर्ति गदति वर्णानिति गदां वंशीमिति वा तथा च अनायासग्रहणस्य स्वानिरोधपरस्य मध्यशङ्कुस्थानिभूतैः प्रेष्ठस्य स्कन्धं बाहुना जग्राह यतो रासपरिश्रान्ता यतः सौकुमार्य्यात् श्रमकार्श्येन श्लथन्तो वलयाः गलन्त्यो मल्लिकाश्च कवरस्था यस्याः तथाच विश्राममाय तथा प्रवृत्तिपरा मध्यस्थप्रेष्ठसन्निहिता स्वाधीनभर्तृका प्रियापदप्रतिपाद्या सर्वाधिका श्रीराधिकाभिधालंकृतेयमितिध्वनितम् ॥११॥

तासु मध्ये एका रासपरिश्रान्तस्यैषङ्काराक्रान्तस्य च कृष्णस्य स्वांसगतं बाहुं भगवत एवोत्पलतोऽप्याधिक्यसौरभं यस्य तं तत्रापि चन्दनेनालिप्तं चुचुम्ब यतः हृष्टरोमा अन्तर्मातुमशक्यत्वाद्रोमद्वारा बहिर्निःसृतेन हर्षेण युक्ता प्रागल्भाख्योऽनुभावोऽयं "निःशङ्कत्वं सम्प्रयोगे बुधैरुक्ता प्रगल्भता" इत्युक्तेः श्यामलाख्यैषा सखी ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं नृत्यगीतादिभिः प्रसन्नेन भगवता सम्मानितानां व्रजाङ्गनानामतिप्रीतिविलसितं वृत्तमाह । काचिदिति चतुर्भिः श्लथन्ति वलयानि मल्लिकाश्च यस्याः सा पार्श्वस्थस्य समीपस्थस्य गदाभृतः स्कन्धं स्वबाहुना जग्राह ॥ ११ ॥

अंसगतं प्रसन्नेन भगवता स्कन्धे निहितम् उत्पलस्य सौरभवत्सौरभं यस्य तं बाहुं चुचुम्ब ॥ १२ ॥

भाषा टीका ।

कोई गोपी रास के अधिक होने से श्रमित होगई उस की माला तथा कंकण हाथों से ढीले हो गिरने लगे तब पास में स्थित भगवान् गदा धरके स्कंध को अपने बाहु से ग्रहण करती भई ॥ ११ ॥

उहाँ पर एक गोपी श्रीभगवान् के चंदन से लिप्त उत्पलों कीसी सुगंधि वाले कृष्ण के बाहु को अपने कांधे पर रखकर रोमों से हर्षित होकर चुंवन करती भई ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नाट्येन नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा मण्डितं गण्डं कपोलं तथा भूते स्वगण्डे सन्दधत्याः संयोजयन्त्याः ॥ १३ ॥

कूजती नूपुरे मेखला च यस्याः सा ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

स्वं गण्डं श्रीकृष्णगण्डे नाट्योतिश्रमव्याजेन सन्दधत्या इति भावः । प्रकर्षेण संमुखत्वाभावेऽपि तन्मुखप्रवेशनादि चातुर्येणादात् ॥ १३ ॥

नृत्यती नृत्यन्ती इयमेका गायती गायन्ती च परा इति द्वे ज्ञेये कूजदिति नृत्ये गाने च परमावेशं बोधयति पार्श्वस्थस्य एवं स्थितस्य भगवतो हस्त एव अब्जं तापहारित्वादिना तत् श्रान्ता सती श्रमनिवृत्त्यर्थमेवेत्यर्थः । एतच्च पूर्वमुक्तमेव शिवं खलु सुखरूपं एवं मुख्याः सप्तोक्ता अष्टमी च "काचित्परिलसद्बाहुः परिरभ्य चुचुम्ब तम् गोपी गीतस्तुतिव्याजनिपुणा मधुसूदन"मिति श्रीपराशरेणोक्तात्र ज्ञेया यद्वा नृत्यती गायतीत्येकैव एवं षट् तासांच पूर्ववद्यथोत्तरं श्रेष्ठ्यमूह्यं द्वेच मण्डलमध्यवर्तिनः पार्श्वद्वये स्थिते श्रीराधाललिते नोक्ते प्रायोऽत्र मण्डलस्यैवोक्तत्वात् यद्वा पूर्वव्याख्यानुसारेण सप्तैवोक्ता ज्ञेयाः श्रीराधादेव्येवैका तस्य मण्डलमध्यवर्तिनः सव्यपार्श्वस्था अत्र नोक्तेति ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ताम्बूलचर्वितादानसाम्येन नूनं पूर्ववत् श्रीशैव्याविलासमाह । कस्याश्चिदिति । स्वगण्डं श्रीकृष्णगण्डे नाट्येऽतिश्रमव्याजेन सन्दधत्या इति भावः । प्रादात् तस्या मुखं स्वमुखसम्मुखं कुर्वन् प्रकर्षेणाददादित्यर्थः । अत्र दाने षष्ठी निगूढार्था आर्षी वा ॥ १३ ॥

श्रीहस्तग्रहणानुसारेण नूनं पूर्ववत् श्रीचन्द्रावलीविलासमाह । नृत्यती नृत्यन्ती गायती गायन्ती च कूजदित्यत्र गानानुरूपतालयुक्तं कूजितं ज्ञेयम् । पार्श्वस्थस्याच्युतस्य निश्चयत्वेन

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तत्पार्श्वं एव स्थितस्य भगवतो हस्त एवाब्जं तापहारित्वादिना तत् श्रान्ता सती श्रमनिवृत्त्यर्थमेवेत्यर्थः । शिवं स्वतः सुखरूपम् । एवं मुख्याः षडुक्ताः तथैव सप्तमी पञ्चापि ज्ञेया । सारल्येन लक्षिता पूर्ववद्विष्णुपुराणोक्ता भद्रा त्वियं स्फुटसप्तमी स्यात् । यथा । "काचित् परिलसद्बाहुः परिरभ्य चुचुम्ब तम् । गोपी गीत स्तुतिव्याजनिपुणा मधुसूदन"मिति । श्रीजयदेवचरणास्त्विमामेव वर्णनाविशेषेण सरसचरितां साधयित्वा व्यञ्जयामासुः । "रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा"मित्यादिना ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नाट्येन नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा अदन्तत्वमार्षम् मण्डितं कपोलं तथाभूते स्वगण्डे सन्दधत्याः संयोजयन्त्याः कस्याश्चित्कस्यैचित्ताम्बूलचर्वितं ददौ ॥ १३ ॥

काचित्तु नृत्यन्ती गायती च कूजन्ती नूपुरे मेखला च यस्यास्तथाभूता श्रान्ता शिवं शान्तम्पार्श्वस्थस्याच्युतस्य हस्ताब्जमञ्जव्छीतलं हस्तं स्तनयोरधाग्निदधे ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाट्येन नृत्येन विक्षिप्तयोः किञ्चित्स्रस्तयोः कुण्डलयोः त्विषेण रोचिषा भूषिते मण्डिते त्विष दीप्ताविति धातोः अविकृते त्विष इति रूपं भवति गण्डखण्डे गण्डमण्डले "समूहे मण्डले खण्डमाहुः शब्दविशारदा" इत्युत्पलमाला अभिदधत्या सपत्न्याः कोपोद्बोधाय यत्किञ्चिन्मन्त्रयन्त्याः ॥ १३ ॥

अधाद्दधौ शिवं सुखयतीति सुखम् ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

तत्र काचिन्निकटे नृत्यन्त्याः सख्याः मुखे स्वयमपि वात्सल्यात्ताम्बूलचर्वितं ददावित्यन्योऽन्यप्रीतिं कैमुतिकन्यायेनाह । कस्याश्चिदित्यादि । कस्याश्चित्प्रियसख्यास्ताम्बूलचर्वितं काचित्प्रियसखी प्रादात् प्रकर्षेणादौ नाट्यविक्षिप्तस्य कुण्डलस्य त्विषा मण्डितं स्वगण्डं गण्डे सन्दधत्याः अथवा काचित् कस्याश्चित् प्रादात् प्रददौ अथवा कृष्ण एव कौतुकवशात् कस्याश्चित्ताम्बूलचर्वितं प्रादात् प्रकर्षेण ददौ आददौ वा तदा कुण्डलत्विषमण्डिते गण्डे इति कृष्णस्यैव गण्डे इति बोद्धव्यं तेन तस्यापि नाट्यमत्रबोद्धव्यम् अथवा कस्याश्चित् काचित् कृष्णो वा गण्डं प्रादात् प्रकर्षेणाददौ वा प्रीत्या गण्डेन गण्डस्पर्शनमभिनीय ताम्बूलस्य चर्वितं यत्र अन्तस्ताम्बूलचर्वणेन वहिरुच्छूनमित्यर्थः । अथवा चुम्बनेनाधरस्ताम्बूलचर्वितरागस्तत्र लग्न इति चुम्बनपूर्वकं गण्डे गण्डस्पर्शनमिति भावः अन्यथा गण्डे गण्डसंधानेन ताम्बूलचर्वितस्य दानादानयोरेव दुष्करत्वान्नातिलक्षितत्वं कीदृश्याः संदधत्याः संधानं संश्लेषं कुर्वत्याः अथवा ताम्बूलचर्वितं सम्यक् दधत्या गण्डे गण्डं प्रादादिति पूर्ववद्विविधोऽर्थः कृष्णेन च महां देहीति गण्ड एव गण्डधारणं कृतं नतु तयापि दत्तस्याप्यग्रहीत् कौतुकमात्रमित्येकादशार्थाः ॥ १३ ॥

काचिदेकैव । नृत्यगीतवाद्यत्रयप्रयत्नेनातिपरिश्रान्ता सती स्वयमेव तत्प्रतीकारमकरोदित्याह । नृत्यतीत्यादि । नृत्यती नृत्यन्ती एवं गायती कूजन्नूपुरमेखलेति सन्ततनृत्यगानक्रमेण तालतुल्यं कूजतोर्नूपुरमेखलयोर्नाद एव वाद्यं श्रान्ता सती पार्श्वस्थाच्युतस्य हस्ताब्जं स्तनयोरधात् पार्श्वस्था वा शिवं सुशीतलम् ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कयाचिद्भगवद्गृहीतं ताम्बूलं ज्ञानवद्गृहीतमित्याह । कस्याश्चिदिति कस्यैचित्ताम्बूलचर्वितमदादिति स्वगण्डं भगवद्गण्डे सन्दधत्या इति तस्या अपेक्षालाघवञ्च सूचितं संमुखत्वाभावेऽपि लाघवेनैव प्रादात् अनेन तस्यै स्वाविद्यादत्तेति ज्ञापितं तेनेयमेवोपदेष्ट्री भगवद्सान्निधाने सर्वासां भविष्यति कस्या विद्यायोग्यतां वक्तुं लौकिकक्रियाज्ञानशक्तिमत्त्वमाह । नाट्यविक्षिप्तकुण्डलत्विषमण्डितमिति । नाट्येन विक्षिप्तस्य कुण्डल त्विषा मण्डितं गण्डं नाट्ये क्रिया शक्तिः । प्रतिष्ठिता कुण्डले ज्ञानशक्तिः क्रियाशक्त्या विक्षेपोऽत्यभ्यासः योगात्मकत्वात् साधनानि वा तस्य कान्तिरनुभवः तेनालङ्कृता भक्तिः भगवत्प्रेम्णा सम्बद्धा यथा सा भगवति रता एवं तस्यामपि भगवान् रतः तत्रापि गण्डमिदं साध्यरूपा भक्तिरुच्यते तां लक्ष्मीं प्रतिमूर्त्यपर्यंत्नमिति लक्ष्मीवन्तं प्रति पुनः पुनरावर्त्तेत इति ज्ञानताम्बूलयोस्तुल्यता चर्वितमिति साधनप्रयासाभावेन सिद्धदानम् ॥ १३ ॥

अपरा पुनः वैराग्यात्मकं क्रियारूपमव्छिन्नं ज्ञाने सहायार्थं भगवद्धस्तं स्वहृदये स्थापितवतीत्याह । नृत्यतीत्यादि । सा नृत्यन्ती गायन्ती स्थिता तत्रासिनयेन यथान्यहस्तः स्थाप्यते स्वहस्तो तथा भगवद्धस्तमेव स्थापितवती शाब्दज्ञानं तदर्थानुष्ठानञ्च तस्या वर्त्तेत इति ज्ञापनार्थं नृत्यगानयोः कथनं कूजन्ती नूपुरे मेखला च यस्याः उपरि गानाभिनयनं पादयोर्नृत्यम् अत एव नूपुरयोर्मेखलायाश्च शब्दः स च भावोद्दीपकः अनेन तस्याः पूर्वस्थिता सर्वैव क्रियाशक्तिः सफलेति सूचितम् एकस्मिन्नेव पार्श्वे विद्यमानस्य भगवतः हस्ताब्जं श्रान्ता सती तत्तापहरणार्थं स्तनयोरधात् तापहारकत्वमब्जस्य प्रसिद्धं श्रमो निर्वृतिसूचकः स्वस्याः पूर्वक्रियापरित्यागः बाह्यत एवेति भगवतः एकस्मिन् भागे स्थितिरुक्ता भगवत्क्रियायाकेरक्षयत्वसूचनायाच्युतेति अग्रे सम्बन्धस्यापि करिष्यमाणत्वात् तदविघातार्थं च तस्य पुनः कामोद्बोधकत्वेन तापनाशकत्वमाशङ्क्याह । शिवमिति । तद्धि कल्याणरूपमानन्दरूपत्वाच्च भगवतः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नाट्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषा कान्तिर्यत्र स चासावत एव मण्डितश्च तस्मिन् गण्डे कृष्णकपोले श्रमव्याजेन गण्डं सन्दधत्यै कस्यैचित् ताम्बूलचर्वितं प्रादात् तस्या मुखं स्वमुखसंमुखं कुर्वन् प्रकर्षेणाददादित्यर्थः । इयं पूर्वोक्तश्याम्याच्छैव्या ॥ १३ ॥

नृत्यन्ती गायन्ती हस्ताब्जमधादित्येका चन्द्रावली हस्तग्रहणख्यात् द्वितीया पद्मा सवार्ध्नी चरणाब्जं स्तनयोरधात्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

इदानीं हस्ताब्जं स्तनयोर्धत्ते स्मेति स्तनतापनिवृत्तेरुभयथापि सिद्धेः । अष्टमी भद्रा तु अत्रानुक्तापि पूर्ववदेव ज्ञेया ॥ १४ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

अथ दुर्गाव्रतपरासु कस्याश्चिन्मुख्यतमायाश्चेष्टितमाह । कस्याश्चिदिति । नाट्येत्त नृत्येन विक्षिप्तयोस्तरळयोः कुण्डळयोस्त्विषेत्यार्षं मण्डितं कुण्डलैर्गण्डलोलैरित्यादिवत् गण्डं कपोलं गण्डे श्रीकृष्णस्येतिशेषः सन्दधत्याः समर्प्पयन्त्याः तच्च श्रमव्याजेनेति भावः ताम्बूलचर्वितं प्रादादिति तस्या मुख इत्यर्थलब्धं वितरवीरनस्तेऽधरामृतमित्यस्या एव प्रार्थनमिति ज्ञेयं दाने प्रकर्षश्च चुम्बनादिव्याजेनोन्नेयः अत एव षष्ठीप्रयोग इति ॥ १३ ॥

श्रुतिमुनिरूपासु मुख्यायाश्चेष्टितमाह । नृत्यतीति । तत्तत्कलाचातुर्य्यं कूजदिति चाञ्चल्यं पार्श्वस्थेति नृत्यादिव्याजेन स्वयमागत्य पार्श्वस्था सतीत्यधीरात्वम् अच्युतस्येति स्वभावतोऽप्रच्युतस्य यद्वा तस्यामनासक्तस्य हस्ताब्जमिति तापहारित्वं शिवं सुखदं श्लेषेण कामविजयित्वेन विख्यातस्य शिवस्य तादात्म्यं कामविजयाभिप्रायेणैव स्तनयोरधात् इति किञ्चित्प्रागल्भ्यम् इयमधीरा दास्यप्रथमसख्या कृणु कुचेषु नः कृन्धि हृच्छयमित्यस्या एव गीतकं तत्र चरणपङ्कजमिति दैन्येन अत्र हस्ताब्जमिति सौभाग्येनेति विवेकः ॥ १४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

कृष्णानुकम्पितमहद्भाग्यवत्याः कस्याश्चिच्चरितमाह । कस्याश्चिदिति । कस्याश्चित्तु ताम्बूळचर्वितं प्रादादित्यन्वयः अत्र दानेऽपि षष्ठी निगूढार्था आर्षी वा यद्वा सामान्यसंबन्धे शेषे षष्ठीति विशेषपर्य्यवसाने दानपात्रार्थे पर्य्यवसानात् नत्वदानपात्रत्वसूचिका यद्वा तत्सूचकत्वेऽपि प्रादादिति प्रकर्षेण स्वानुग्रहवशादेवादादिति प्रेमपथिप्रेमवशीभूतस्य भगवतोऽपि स्वानुग्रहदशायां न पात्रापात्रविभाग इति द्योतनाय यद्वा षष्ठ्या अपात्रत्वं निर्दिश्य पुनः प्रादादित्युक्त्या अपात्राणामपि भगवत्प्रेमिणां तदनुगृहीतानां पात्रत्वसूचनम् यद्वा कस्याश्चित्ताम्बूलचर्वितं भगवानपि प्रकर्षेण प्रेमवश्यतया आदादिति दानार्थकदाधातोः आङ्पूर्वकत्वादादानार्थपरत्वेन स्वयमग्रहीदित्यर्थः । नच साक्षाद्भगवतोऽन्योच्छिष्टग्रहणायोग्यतेति वाच्यम् अन्यत्रायोग्यत्वेऽपि प्रेमपथि तदयोग्यत्वाभावात् न केनापि कर्मणा वर्द्धते नोकनीयानिति श्रुत्या परममहतस्तस्य केनापि कर्मणा महत्त्वाक्षतेश्च अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिरित्यादि स्वापकर्षोक्तावपि भृगुपादावघातसहनेऽपि तन्माहात्म्यवृद्धिप्रसिद्धेः किञ्च धर्मशास्त्रेऽपि—

वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने ।
श्वा मृगग्रहणे मेध्यः स्त्रीमुखं रतिचुम्बने ॥

इत्यादिस्मृतेः स्त्रीमुखस्य रत्यादिविहारे मेध्यत्वदर्शनात्रोच्छिष्टशङ्कागन्धोऽपि यद्वा ताम्बूलं चर्वितं येन तन्मुखमेव पाणिना मुखेनैव स्वाधरसुधास्वादायाग्रहीत्ताम्बूलचर्वितमिति पठेतु सुगमम्मुखविशेषणमेव किम्भूतायास्तस्या इति तां विशेषयति । नाट्येन सङ्गीतनृत्यगत्या विक्षिप्तस्यातिलोलस्य कुण्डलस्य त्विषेणेति त्विषा मण्डितं गण्डं स्वकपोलं गण्डे तादृशे एव कृष्णकपोले रसावेशेन रासश्रममिषेण ताम्बूलदानार्थमेव वा सन्दधत्याः सम्यग्योजयन्त्याः तथाच मुखसंनिधाने तद्दानादानसौकर्य्यसंभवात् तत्र प्रकाशवत्कुण्डलस्य रविसादृश्यं गोपीगौरगण्डस्य गङ्गाकारत्वं कृष्णस्निग्धामलकपोलस्य यमुनात्वं तथाच स्वतनयाया यमुनाया गङ्गायां सङ्गत्या स्वमानहानमन्यमानकुण्डलभानुना तत्कपोलगङ्गामानीय कृष्णकपोलयमुनायां मेलने कृष्णकपोलयमुनयाः स्वगृहागतां पित्रानीतां गङ्गां मत्वादरेण तस्यै ताम्बूळदानं तत्प्रसादादानञ्च न्याय्यमेवेति भावः ॥ १३ ॥

ततोऽन्यस्याश्चरितमाह । नृत्यतीति । काचित्तु नृत्यती नृत्यन्ती गायती गायन्तीच काचिदिति अतिदक्षतया नृत्यगीतवाद्यप्रवीणा कूजन्नूपुरमेखला कूजन्त्यः गीततालानुसृतरवयुक्ता नूपुरसहिता मेखला यस्याः तथाभूता मण्डले बद्धबाहुनृत्यमानतया पार्श्वस्थस्याच्युतस्य हस्ताब्जं करकमलं शिवं यद्यपि परानन्दघनकृष्णसन्निधानेन गतश्रमैव तथापि श्रान्तेव स्तनयोरधादित्यन्वयः तत्रायं भावः विरहचिन्ताग्न्योर्भगवत्सन्निधानेन निवृत्तावपि बहुकालात्स्तनमूळं हृच्छयाग्नितापोपशमाय रासश्रममिषेण स्तनयोरधात्तत्र तत्तापोपशमाय हस्तविशेषणमुपन्यस्तमब्जेति तस्य तापापशमने प्रशस्तत्वात् कामोपशमाय विशेषणं शिवमिति तस्य शिवत्वस्तत्वात् करस्य शिवत्वं तु पञ्चाङ्गुलिमस्तकाचिन्त्यस्तनखचन्द्रत्वात् यद्वा स्तनयोः शिवपूजास्पदाकारत्वे तत्र शिवावेशस्यावश्यकत्वाद्दुर्गितर्द्या करशिवप्रतिष्ठया प्राणप्रतिष्ठाचरणं यद्वा स्तनयोः शम्भुरूपत्वाच्छम्भुध्वस्ताङ्गः कामोऽनङ्गो यातुधानतया स्तनशम्भूना विश्य मूलतो दग्धुं हृच्छयः सन् शिवस्याप्यशिवमाचरत्तथा च शिवशिवस्य हरिकरशिवं विना सम्भवात्करशिवस्य तत्र विनिवेशे तेन च भूताविष्टपीडने भूतोपशममालक्ष्य स्तनमर्दनेनैव स्तनशम्भुकामज्वरनिवृत्तौ नूपुरमेखलाकूजनव्याजेन हररक्षणहरिविजयवाद्यध्वनिरभवत् ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

कस्याश्चित्तु नाट्येन नृत्येन विक्षिप्ते चञ्चले च स्वाभाविकी गण्डत्विड् तत्समाहारः गण्डत्विषं तेन मण्डितं स्वगण्डं श्रीकृष्णगण्डे श्रमनिरासमनोरथेन सन्दधत्याः संयोजयन्त्याः मुखं स्वसम्मुखं कृत्वा ताम्बूलचर्वितं प्रादात् सैव्याख्येयं सखी ॥ २३ ॥

अत्र काचित्पदावृत्त्या द्वे सखी प्रोक्ते इति ज्ञातव्यं तथाच कूजन्ती नूपुरे मेखला च यस्याः सा नृत्यन्ती काचित्पार्श्वस्थाच्युतहस्ताब्जं श्रमजनिततापनिवर्तकम् अतः शिवं श्रमशान्त्यर्थमञ्जलिना अधात् गृहीतवती पूर्ववद्धस्तग्रहणानुसारात् चन्द्रावळीसङ्ख्येयं सखी काचित्तु गायती तद्धस्ताब्जं शिवं श्रान्ता सती श्रमनिवृत्यर्थं स्तनयोरधात् चन्द्रावलीसहचर्य्याः स्तनयोर्धारणस्य पूर्वं साम्याच्च पद्माख्या चन्द्रावली सुहृत्ता सखीयं भद्रासंज्ञा अष्टमीतु पूर्ववद्विष्णुपुराणादवगन्तव्या—

गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम् ।
गृहीतकण्ठयस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥
कर्णोत्पलालकविटङ्ककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ।
गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

काचित्परिलसद्बाहुः परिरभ्य चुचुम्ब तम् ।
गोपीगीतस्तुतिव्याजनिपुणं मधुसूदनमिति तत्रोक्तेः ॥१४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाट्येन नृत्येन विक्षिप्तयोः इतस्ततश्चलमानयोः कुण्डलयोस्त्विषेण त्विषा कान्त्या मण्डितं गण्डं कपोलं स्वगण्डे सम्यक् दधत्या योजयन्त्याः कस्याश्चित्ताम्बूलचर्वितं प्रादात् ॥ १३ ॥

नृत्यती गायती च कूजन्ती नूपुरे मेखला च यस्याः सा एवं भूता श्रान्ता सती शिवं सुखदम् अच्युतहस्ताब्जं स्तनयोरधात् स्वहस्ताभ्यां गृहीत्वेति शेषः ॥ १४ ॥

भाषा टीका ।

कोई गोपी बहुत नृत्य के होने से चञ्चल जो कुंडल तिन कि कांति से शोभित अपने गंडस्थल को भगवान् के गंडस्थल में संयुक्त करती भई तब भगवान् ने अपना तांबूल चर्वित उस को प्रदान किया ॥ १३ ॥

किसी गोपीने नाचने में गाने में कौंधनी तथा नूपुरों के शब्दों के होते समय थक जाने से अपने पार्श्व में विद्यमान अच्युत भगवान् के सुख दायक हस्त कमल को अपने स्तनों पर धारण करलिया ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमन्या अपि गोप्यो यथायथं नानाविधैर्विजह्रुरित्याह । गोप्य इति ॥ १५ ॥

तत्र वादकेषु गायकेषु गन्धर्वकिन्नरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यासेव वाद्यादिसम्पत्तिं दर्शयन् रासरसम्भ्रममाह । कर्णोत्पलेति । कर्णोत्पलैश्चालकविटङ्कैरलकालंकृतैः कपोलैश्च घर्मैश्च वक्त्रेषु श्रीः शोभा यासां ताः घोषाः किङ्किण्यः वलयनूपुरघोषैर्वादित्रैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः एतेन तालगतिसन्तुष्टाः केशाः सशिरःकम्पपादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितं भगवता सह ननृतुः क भ्रमरा एव गायका यस्यां राससभायाम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

अच्युतं कस्माच्चिदपि रूपगुणादिमाहात्म्यात् च्युतिरहितं सुस्थिरं वा कान्तं रमणं लब्ध्वा तस्य दुर्लभतामाह । श्रिय एव नत्वन्यजनस्य एकान्तेन एकनिष्ठया वल्लभं यद्वा श्रियः कान्तं वल्लभम् आत्मनश्चैकान्तवल्लभं नितान्तप्रेष्ठं लब्ध्वा इति श्रियोऽपि सकाशात् तासां माहात्म्यमभिप्रेतं तदेव दर्शयति । गृहीतेति । तथाच गास्यते श्रीमदुद्धवेन "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः । रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषा" मित्यादि ॥ १५ ॥

कर्णेति । तासां रासेन परमा शोभोक्ता यद्वा परिश्रान्तिः सूचिता तथापि नृत्ये हेतुमाह । भगवता निजाशेषैश्वर्यसारसर्वस्वं प्रकटयता सममिति तत्साहित्यस्य परममोहनत्वात् यतो गोप्यः तदेकप्रेमपरवशा इत्यर्थः । तेन सममित्यनेन तासां तत्सदृशं वैदग्ध्यादिकमपि व्यञ्जितं तथा तासामिव तस्यापि कर्णोत्पलादिकं सर्वं बोध्यते अन्यत्तैर्व्याख्यातं तत्र वादकेष्विति दुन्दुभिनादाभिप्रायेण किन्नरादिष्विति च दिवौकसामित्युक्तेस्तदन्तर्गतत्वसम्भावनमिति अथवा उक्तं श्रीतोऽप्यधिकमाहात्म्यमेव दर्शयति किंवा पूर्वं गन्धर्वपति गानादिकमुक्तम् अधुना रासरम्भेण तासां न काचिदन्यतो गीताद्यपेक्षेत्याह । कर्णेति अर्थः स एव ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अच्युतं कस्माच्चिदपि रूपगुणादिमाहात्म्याच्च्युतिरहितम् । तस्य दुर्लभतामाह । श्रियोऽपि एकान्तं वैकुण्ठनाथादितोऽप्यतिशयान्नितान्तं वल्लभं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्यनुसारेण प्रेमविषयं नतु लब्धं तं कान्तं रमणं लब्ध्वा । यद्वा । श्रियः कान्तं कामनास्पदम् एकान्तवल्लभं केकनिष्ठप्रियतमं लब्ध्वा न केवलं लाभः किन्तु स्वल्पमपि विश्लेषमसहमानेन तेन स्वदोर्भ्यां गृहीतः कण्ठो यासां तादृश्य इत्यर्थः । अत एवातिप्रेमानन्देन तमेव गायन्त्यो विजह्रिरे इति । एवं श्रियोऽपि सकाशात्तासामतिमाहात्म्यमभिव्यक्तं तथैव गास्यते श्रीमदुद्धवेन "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः । रासोत्सवेऽस्य भुजदण्ड गृहीतकण्ठलब्धाशिषां य उदगाद्व्रजसुन्दरीणा" मित्यादि ॥ १५ ॥

तथैव तासां माहात्म्यं दर्शयति । कर्णेति द्वाभ्याम् । कर्णेति तासां रासेन श्रमेऽपि परमशोभा दर्शिता तथापि नृत्ये हेतुमाह । भगवता निजाशेषमाधुर्यसारसर्वस्वं प्रकटयता सममिति । तत्साहित्यस्य परमोल्लासकत्वात् यतो गोप्यस्तदेकप्रेमवशत्वेन प्रसिद्धा इत्यर्थः । तेन सममित्यनेन तासां तत्सदृशवैदग्ध्यादिकमपि सूचितं तथा तासामिव तस्यापि कर्णोत्पलेत्यादिकं सर्वं बोध्यते । उत्पलधारणञ्च सम्प्रति श्रीकृष्णे-

१ रासगोष्ठ्य इति शुकपक्षीय पाठः

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नैव कारितमिति ज्ञेयम् । भ्रमरगायकेति । तत्तदुचितगानसमर्थत्वात्तेषाम् असाधारणत्वं व्यञ्जितम् । अन्यत्तैः । तत्र वादकेष्विति दुन्दुभिनादाभिप्रायेण तद्धि नादादिकं तेषां तन्नृत्यानुकूलमेवासीदिति तत्सम्मतम् । किन्नरादिष्विति च दिवौकसामित्युक्तेस्तदन्तर्गतत्वसम्भावनयेति । एवं तत्र तासां न काचिदन्यतो गीतादेरप्यपेक्षा किन्तु स्वानन्देनैव तेषां मध्ये मध्ये वादनादिचेष्टितमिति ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कर्णोत्पलालकाख्यालङ्कारवन्मुखं यासां ताः यासां गोष्ठीषु भ्रमरा एव गायकाः ता भ्रमरगायकरासगोष्ठ्यः ॥ १६—२१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमन्या अपि गोप्यः यथायथं नानाविधैर्विभ्रमैर्विजह्रुरित्याह । गोप्य इति । श्रियो लक्ष्म्या एकान्तवल्लभमनन्यपतिं लब्ध्वा तस्याच्युतस्य दोर्भ्यां गृहीताः कण्ठा यासां तास्तमच्युतं गायन्त्यो विजह्रिरे ॥ १५ ॥

तत्र वादकेषु गायकेषु च सभ्रिकेषु गन्धर्वकिन्नरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन् रासलम्भ्रममाह कर्णोत्पलेति । कर्णोत्पलैः कर्णावतंसैरुत्पलैश्चालकविटङ्कैरलङ्कारालङ्कृतैः कपोलैश्च घर्मैः स्वेदविन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ता गोप्यः घोषाः किङ्किण्यः वलयादिभिर्वाद्यैर्वादित्रैश्च भगवता सह भ्रमरा एव गायका यस्यां तस्यां राससभायां ननृतुः कथंभूताः स्वकेशेभ्यः स्रस्ताः स्रजो यासां तथाभूताः एतेन तालललितगतिसंतुष्टाः केशाः सशिरःकम्पाः पादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गृहीतकण्ठ्य आलिङ्गितकण्ठ्यः एकान्तवल्लभं निर्णीतनियतभर्तारं विजह्रिरे क्रीडां चक्रुः ॥ १५ ॥

कर्णोत्पलम् अलकः कुन्तलकश्च कर्णोत्पलालकौ ताभ्यां विटङ्कं कपोलं कपोलस्य विटङ्कोऽलंकारः घर्मस्तेन स्वेदजलं लक्ष्यते कपोलालङ्कारस्वेदजलेन च वक्त्राणां श्रीः शोभा यासां तास्तथा वलयनूपुरलक्षणवाद्यघोषैः समं भगवता च समं भ्रमरा एव गायकाः अनु स्वरदानकरा यस्यां सा तथा भ्रमरगायकरासगोष्ठी रासक्रीडा तस्याम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तास्याः गोप्याः । यद्वा श्रियोऽपि एकान्तं वैकुण्ठनाथादितोऽप्यतिशयात् प्रेमविषयं नतु लब्धं तं कान्तं रमणं लब्ध्वा न केवलं लाभः किन्तु स्वल्पमपि विश्लेषमसहमानेन तेन स्वदोर्भ्यां गृहीताः कण्ठा यासां तादृश्य इत्यर्थः ॥ १५ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ क्षणं विश्रम्य पुनर्विहारमारेभिरे इत्याह । गोप्य इत्यादि गोप्यः श्रियः गोपीरूपायाः श्रियः शोभाः एकान्तवल्लभम् अतिदयितं कान्तं कमनीयमच्युतं लब्ध्वा तद्दोर्भ्यामच्युतभुजाभ्यां गृहीतकण्ठ्यस्तं गायन्त्यस्तत्क्षणकृतेन तद्गुणरूपमाधुर्य्यवर्णनगीतपदेन नानारागादिकौशलेन गायन्त्यो विजह्रिरे ननृतुरित्यर्थः ॥ १५ ॥

इदानीं भगवता सह ननृतुरित्याह । कर्णोत्पलेत्यादि । गोप्यो भगवता समं ननृतुः भगवान् यथा ननर्त्त तथेत्यर्थः समशब्दः सहार्थः सदृशार्थश्च अर्थयोर्युगपद्भासनात् तत्र नृत्यं तावद्द्विविधं भवति निर्गीतं सगीतं च निर्गीतं केवलवाद्यमात्रेण मन्दमन्देन सतालेन मुखकण्ठभ्रूनेत्रादिकम्पनेन शनैः शनैर्नृत्यं सगीतं गीतार्थानुरूपं हस्तकादिगतिविशेषवत् तत्र प्रथमं निर्गीतमेवेदं नृत्यमिति भ्रमरा गायका यत्रेति गीतान्तराभावः कर्णोत्पलैश्च अलकविटङ्कैरलकविभ्रमैश्च कपोलघर्मैश्च वक्त्रेषु श्रीर्यासां मुखनेत्रग्रीवादिदोलनेन चलद्भिः कर्णोत्पलैश्चलद्भिरलकविटङ्कैः स्फुरद्भिः कपोलघर्मैश्चेत्यर्थः । वलयानां नूपुराणां घोषा एव वाद्यानि तैः अन्यवाद्यैरपि तदा विरतमेव एतेन पूर्वं वाद्यान्तरमप्यासीदिति मन्तव्यं तदा तु भ्रमरगीतवलयादिवाद्याभ्यामेव नृत्यमित्यर्थः । स्वकेशेषु स्रस्तं स्रंसनं यासां तथाभूताः स्रजो यासां तास्तथा स्वकेशेभ्यः स्रंसमानस्रज इत्यर्थः । अर्द्धस्रंसमानस्रक्त्वेन केशानां शोभातिशयः स्वशब्दो भगवद्व्यतिरेकार्थः तस्य तु केशेषु तथैव स्रक् वर्त्तेत इति भावः १६ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

एवं षण्णां स्वरूपमुक्त्वा स्वरूपेण सर्वासां साधारणीं लीलामाह । गोप्य इति । अच्युतः कान्तो भगवानेव भवति, अन्तर्बहिश्च नित्यानन्ददायी अत एव सर्वस्त्रीणां मूलभूतायाः श्रिय एकान्ततो वल्लभः परमः प्रियः तादृशं लब्ध्वा तमेव गायन्त्यो विजह्रिरे ननु परमानन्दे प्राप्ते क्रियाया अपगम एवोचितः ननु पुनः क्रिया तत्कथं विहार इति चेत्तत्राह । तद्दोर्भ्यां गृहीतकण्ठ्य इति । भगवत्क्रिययैव व्याप्ताः नतु स्वक्रिया काचित् कण्ठे क्रियायाः स्थापितत्वात् गानं क्रिया च संभवतः इयं क्रियाशक्तिरूपेति स्वातन्त्र्यं तासां निरूपितम् ॥ १५ ॥

अतःपरं वाद्यादामोदरवत् उभयोर्नृत्यमाह । कर्णेति । रासार्थमेवैतदपि परं प्रत्येकं रस उत्पद्यत इति गोष्ठीमात्रमुक्तम् उभयोर्गाढनृत्ये विनियोगात् भ्रमरो गायकः वाद्यन्तु पूर्ववदेव भविष्यति तदाह । वलयनूपुरघोषवाद्यैरिति । वलयानां नूपुराणां घोषशब्देन किङ्किणीनां शब्दा एव वाद्यशब्दाः अत्यन्तं नृत्याभिनिवेशार्थं स्वकेशास् स्रस्ताः स्रजो यासामित्युक्तं नृत्यारम्भे तासां शोभामाह । कर्णेति । अन्यथा पूर्वोक्तनृत्येन श्रान्तानां पुनर्नृत्यमनुचितमेव स्यात् मदा रसालं कर्णे उत्पलस्थापनं तस्य अपातने चातुर्य्यार्थं तत्सहिताः अलकाः भ्रमरा इव रसपातारः तेषां विटङ्कः अलं-

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

करणरूपं स्थातम् एतादृशौ कपोलौ तत्र यो घर्मः अन्तरुद्गतश्रमजलं नृत्याभिनिवेशाज्जातं तैः कृत्वा वक्त्रे श्रीरलौकिकी काचित्संपन्ना यथा मुक्ताभिर्मण्डितं भवति कपोलद्वयम् अनेन मुखे श्रमो निवारितः ताभिः सह भगवतः नृत्ये अनुभावकश्च भवति स्वतो वा क्रीडानिवृत्तिरनेन सूचिता गोप्य इति भगवत एव तासामेतावत्त्वं न स्वत इति ज्ञापितम् अतो भगवता समं यथा यथा भगवान्नृत्यति तथा तथा ता अपि नृत्यन्तीति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवमन्या अपि गोप्यः स्वस्वभावानुसारिण्यो विजह्रुरित्याह । गोप्य इति । अत्र "यद्वाञ्छया श्रीर्ललनाचरत्तप" इति । नागपत्नीस्तुत्या "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसाद" इत्युद्धवोक्त्या च श्रीःप्रेक्ष्य कृष्णसौन्दर्यं तत्र लुब्धाचरत्तप इति भागवतामृतोत्थापितपौराणिककथया च नारायणकान्तायाः श्रियः कृष्णसङ्गासम्भवादेवं व्याख्येयम् । कान्तं कमनीयमच्युतं कृष्णमेकान्तवल्लभं लब्ध्वा विजह्रिरे । तद्दोर्भ्यां कृष्णभुजाभ्यां गृहीताः कण्ठा यासां ताः । श्रियः श्रिय इवेत्यर्थः । सा यथा नारायणवक्षोगृहीतगात्री एता गोप्योऽपि तथा कृष्णभुजगृहीतकण्ठ्य इत्यर्थः । यद्वा नारायणेनैक्यात् कृष्णस्यापि श्रीवल्लभता ॥ १५ ॥

पृथक् पृथक् गाननृत्यादिसाद्गुण्यशोभामुक्त्वा समुदितनृत्यजनितवक्त्रादि शोभां विवृणोति । कर्णोत्पलेषु । कर्णधृतोत्पलोपलक्षितचक्रिका—कुण्डलेषु अलकानामतिलौल्याद्विविधाश्छङ्गा वेष्टनानि च कपोलेषु घर्मबिन्दवश्च तैर्वक्त्रेषु श्रीः शोभा यासां ताः छकि बन्धे । वलयनूपुराद्यलङ्काराणां घोषस्तुल्यस्वरतया नादो येषु तैर्वाद्यैः तत्रानद्धशुषिरैस्तत्तदधिष्ठातृदेवताभिरेव स्वसफलीकरणार्थमागत्य वादितैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसन्तुष्टाः केशाः सशिरःकम्पं पुष्पवृष्टिमिवाकुर्वन्निति श्रीस्वामिचरणाः । भ्रमरा अपि गायका यस्यां तस्यां रासगोष्ठ्यां राससभायाम् ॥१६॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

सहचरीणां चेष्टितमाह । गोप्य इति । गोपयन्ति सर्वथा पालयन्ति निजनाथाविति यद्वा गोपयन्त्यात्ममुखे निःक्षेपयन्तीति यद्वा तयोः प्रिययोरन्योऽन्यासक्तिं गोपयन्ति ता गोप्यः यद्वा गोशब्देनेन्द्रियाणि नेत्रादीनि तानि दर्शनादिना पान्ति रक्षन्ति ताः गोप्यः सख्य इत्यर्थः । श्रियः श्रयते हरिरेनामिति श्रीः स्वाधीनपतिका तस्याः परमरमायाः कान्तं तत्सुखैकपर्य्यवसितात्मसुखम् अच्युतं दृढप्रेमाणं लब्ध्वा ईदृशोऽनेकनायिकासमुदायेऽपि तदेकनाथावन्तं ज्ञात्वा तत एवैकान्तवल्लभं तस्या एव परमप्रेष्ठं मत्वा लब्धपरमानन्दाः तद्दोर्भ्यां गृहीतकण्ठ्यः ननु स्वदोर्भ्यामिति कान्तभावनासक्तिः सौहृदञ्च सूचितं श्रीराधिकानागरमेव गायन्त्यः तद्गानं यथा श्रीमत्सुधानिधौ—

अहोरसिकशेखरः स्फुरति कोऽपि वृन्दाटवी
निकुञ्जनवनागरीकुचकिशोरकेलिप्रियः ॥
करोतु स कृपां सखीप्रकटपूर्णनात्योत्सवो
निजप्रियतमापदे मधुमये दधद्यः शिरः

यथा वा—

प्रत्यङ्गोच्छलदुज्ज्वलामृतरसे प्रेमैकपूर्णाम्बुधि-
र्लावण्यैकसुधानिधिः पुरुकृपा वात्सल्यसाराम्बुधिः ॥
तारुण्यप्रथमप्रवेशविलसन्माधुर्य्यसाम्राज्यभू—
र्गुप्तः कोऽपि महानिधिर्विजयते राधारसैकावधिः ॥

इत्यादि बहुशः विजह्रिरे विहृतवत्यः रास क्रीडादिना इति शेषः शुद्धसहचरीणामयमेव विहार इतिसूचितं यथा तत्रैव—

कदातु मणिकिङ्किणीवलयनूपुरप्रोल्लस—
न्महामधुरमण्डलाद्भुतविलासरासोत्सवे ॥
अपि प्रणयिनो बृहद्भुजगृहीतकण्ठ्यो वयं
परं निजरसेश्वरीचरणलक्ष्म वीक्षामहे ॥

तदेवं सर्वथा श्रीराधिकतानताख्यापनायैवायं श्रीरासलीलासमुद्यमः श्रीभगवत इति साधु व्याख्यातम् एतदभिप्रायेणैवाह श्रीजयदेवः—

कंसारिरपि संसारवासनाबद्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीमिति ॥

तदेवं श्रीकृष्णस्यापि प्रियामनु परमानुकूल्यं दर्शितं तदुक्तं श्रीमदुज्ज्वले—

राधायामेव कृष्णस्य सुप्रसिद्धानुकूलतेति ।

सर्वमनवद्यम् ॥ १५ ॥

अत एवैतासां पूर्वोक्ताभ्यां विलक्षणरसावेशवैलक्ष्यमावेदयति । कर्णेति । गोप्यः पूर्वश्लोकोक्ताः सहचर्य्यः अभ्यासेन गोपीपदस्यात्रैव मुख्या वृत्तिरिति सूचयति भगवता किशोरीरमणेन नित्यविहारिणा समं ननृतुरित्यन्वयः सिक्षाभ्यासपाटववलेन नृत्यमनुचक्रुरित्यर्थः । कीदृश्यः । कर्णेति कर्णोत्पलानि उत्पलाकृतीनि कर्णभूषणानि तानि च सौवर्णानीति गोपिकास्थानीयानि वर्णसाम्यात् अलकाश्चूर्णकुन्तलास्तेच श्रीकृष्णस्थानीयाः तयोर्विटं परस्परावद्धकरानुकारः संग्रथितत्वमितियावत् कपोलेषु रङ्गरङ्गस्थानीयेषु घर्म्मश्च कालिन्दीप्रवाहस्थानीयः तेन तेन च वक्त्राणां श्रीर्विलक्षणा रासमण्डलशोभा यासां ताः तथा वलयानां नूपुराणां च घोषा एव वाद्यविशेषास्तैरुपलक्षिताः तथा स्वस्वकेशेभ्यः स्रस्ताः पुष्पस्रजो यासामिति पुष्पवृष्ट्यनुकरणं कुत्रेत्यत आह । भ्रमरेति । यत्र भ्रमरा एव गायकास्तादृश्यां रासगोष्ठ्यामिति रासरूपायां परिषदि इत्यर्थः । तासां तत्सम्बन्धिनामङ्गोपाङ्गानां सर्वेषामपि जडानामजडानां च परमरसावेशो दर्शित इतिदिक् ॥ १६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

सर्वासां भाग्यसुखविहारौ निरूपयति । गोप्यो लब्ध्वेति । ता गोप्योऽपि यतो गोप्यो गवामिन्द्रियाणां वागादीनां पालनशीलास्तदेकपरतयैवात्मनश्च तदितरसम्बन्धरूपसंसारात्तदभानात्मकताद्विरहाच्च रक्षणशीला अतोऽच्युतं कुतश्चिदपि गुणशीलैश्वर्य्यस्वरूपमाहात्म्याच्च्युतिरहितं कान्तं कान्तिमन्तं कानां सर्वसुखानां पर्य्यवसा-

श्रीसनातनयणकृतभावभावविभाविका ।

नास्पदं वा तथा श्रिय एकान्तवल्लभं लक्ष्म्यापि सर्वानुत्सृज्यैकान्तवल्लभतया नितरां सेवितं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्यादिवचनात् यद्वा श्रियस्तद्रूपायाः श्रीराधाया एवैकान्तवल्लभमपि स्वकान्तं लब्ध्वा तथा च तदेकान्तवल्लभत्वात्तत्कृपया तदंशानुप्रवेशादेव कान्तं प्राप्य श्रियः कान्तमेकान्तवल्लभं लब्ध्वेति वान्वयः न केवलं लाभमात्रमपितु वदिति तल्लाभानन्तरमेव दोर्भ्यां गृहीतकण्ठ्यः दोर्भ्यां भुजभुजगपाशेन गृहीतः कण्ठो याभिस्ताः तथा च चित्रोऽयं भुजभुजगपाशः भुजगपाशानिवर्तकखगपतिपतेरपि वध्वा वध्वा सह नर्तकत्वात् भवबन्धमोचकस्य नित्यमुक्तस्यापि मुकुन्दस्य बन्धकत्वात् बन्धस्य दुष्टतयैवाकामैरपि बन्धमुक्तिकामदर्शनेऽप्यस्य बन्धस्य नित्यमुक्तमुकुन्दाभिकामित्वात्तद्विश्रामप्रदत्वात् यद्वा तद्दोर्भ्यां तस्य बाहुभ्यां गृहीतः कण्ठो यासां तास्तं गायन्त्यः तद्गुणानेव गीतप्रबन्धादिषु वर्णयन्त्यस्तेन सह विजह्रिरे विहारं चक्रिरे इदमप्यतिवैचित्र्यं प्रेमपृथभुजबन्धस्य येन बद्धास्तद्गुणगानामिति अत्र यथा ता अन्तः कृष्णगुणैर्बद्धास्तथा कृष्णोऽपि तद्धितपाशेन निबद्धः परस्परं भुजबन्धनं तु बहिस्तल्लिदर्शनं तत्र महत्कौशलं तासां प्रथमं तद्गुणैर्बद्धास्तं बबन्धुरिति महच्चित्रं तत्परस्परं निबद्धा एव विजह्रिरे इति वर्णितमपि तासां सौभाग्यं श्रीमदुद्धवेन—

> नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
> स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ॥
> रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ—
> लब्धाशिषां य उदगाद्व्रजसुन्दरीणाम् ॥

इति ॥ १५ ॥

भगवता सह तासां गानतृत्यशोभामाह । कर्णोत्पलेति । भ्रमरगायकरासगोष्ठ्यां वलयनूपुरघोषवाद्यगोप्यो भगवता समं ननृतुरित्यन्वयः अत्रायमाशयः देवगन्धर्वेषु पूर्वं भगवद्रासोत्सवोत्साहेन तद्गुणगानप्रवृत्तेषु तासां गानतृत्यवैचित्र्यदर्शनेन तत्तानवितानमूर्च्छनादिसौष्ठवं नृत्यगतिवैचित्र्यं चानवगत्य मुह्यत्सु तत्समं गातुमशक्नुवत्सु तासां च गाढनृत्योत्साहेन गानविरामे रासगोष्ठ्यां तत्तनुसुमनःसुरभिलुब्धसुमनसो भ्रमरा एव केवलं गायका आसंस्ततस्तद्गायकरासगोष्ठ्यां यद्वा भ्रमन् रौतीति भ्रमरः तद्गाननृत्यगतिगतिमनवगत्य भ्रमितचित्तत्वेऽपि गुणगानरसलुब्धतया तत्यक्तुमशक्ता भ्रमन्मतय एव गुणगानरवं कुर्वन्तो भ्रमराः सर्वे गायका गन्धर्वादयः प्रेमवैचित्र्येण भ्रमन्मतय एव रवं कुर्वन्तो गायकाः गोपीजनाश्च यस्यां तादृग्गोष्ठ्यां यद्वा नभसि हरेस्तान् गुणान् गायन्तोऽपि नभःप्रसरत्तदङ्गसौरभरभसाकृष्टमतयस्तद्रूपेण रासप्रवेशाधिकारमनालक्ष्य भ्रमररूपा एव गायका गन्धर्वादयः परस्पराङ्गसुरभिमत्ततया रूपमधुपानरततयाच भ्रमरदशापन्नत्वेऽपि परस्परगुणगायका हरितत्सख्यो वा यस्यां तद्रासगोष्ठ्यां वलयानां मणिजटितकङ्कणानां नूपुराणाञ्च रूपसुधामानससरसि करचरणकमलयोर्भ्रमरनखपरतया भ्रमरगुञ्जारवच्छब्दायमानानां घोषैर्विबुधविबुधाविविधवाद्यैश्च ननृतुः यद्वा वादकेषु देवादिषु पूर्ववर्णितदिशा मुह्यत्सु वलयनूपुरघोषा एव गीतगत्यनुसृतवाद्यानि तैर्गोप्यो भगवता समं सहेत्यर्थः । ननृतुर्नर्तितवत्यः यद्वा विचित्रमिदं देवादिषु तद्गतौ मुह्यत्सु गोप्योऽपि भ्राम्या अपि भगवता सर्वकलादिगुरुणा समं तुल्यमन्यूनं ननृतुः यद्वा देवादिषु मुह्यत्सु गोप्योऽपि समं तुल्यमप्रच्युततालादिना ननृतुस्तत्तु भगवतैव निमित्तभूतेन तथा ननृतुः किम्भूतास्तास्तदाह । कर्णोत्पलेत्यादि । कर्णेषु कृष्णेनानीय लम्बितोत्पलानि यद्वोत्पलाकाररत्नाश्चितभूषणानि तान्येवोत्पलानि तथा अलं पूर्णं कं सुखं येभ्यस्तथा भूता अलकाः कुण्डलिताः कुन्तलाः ते एवालपवलयास्तैर्विटङ्कैः अलङ्कृते कपोले माधुर्य्यसरसी तत्र घर्मैः एवोच्चलितरूपरसतरङ्गस्तेन श्रीपद्मवक्त्रपद्मश्रीर्यासां पुनः किम्भूताः स्वकेशस्रस्तस्रजः स्वकः स्वीय ईशः स्वामी कृष्णः यद्वा स्वीयं यत्कं सुखं तस्मिन्नीशः समर्थः यद्वा स्वस्मिन्नेव कं सुखं येषां तेषामात्मारामभुनीनामपीश आराध्यः यद्वा स्वक आत्मारामश्चासावीशश्चेति तथा यद्वा स्वस्वरूपात्मकस्य कस्य सुखस्य दाने ईशः यद्वा स्व आत्मरूपश्चासावेव कः सुखस्वरूपश्चेशश्च स्वकेशस्तस्मिंस्तदङ्गे स्रस्ताः पतिताः संसक्ता गुणग्रथितसुमनसः स्रज एव यद्वा स स्वकेशः केशव एव तथैव गुणग्रथितसुमनस्तया स्रस्तस्रजो यासु यद्वा नृत्यगतिचापल्यस्वकेशेभ्यः स्रस्ताः निपातिताः स्रजो यासाम् अत्रायं भावः स्रजो गुणग्रथिताः सुमनसः पदसुमनसां मृदुत्वमञ्जुवर्णसुरभिगुणमोहिता लज्जया शिरसि स्थातुमशक्ताः स्वयं पदयोर्निपतन्ति यद्वा के स्वर्गे वासिन ईशा देवा इव के शिरसि वर्तमानाश्च ते एवेशाः समर्थाश्च केशास्तेषां पदानां नृत्यगतिसौष्ठवेन सन्तुष्टाः सुमनसस्तास्वभिवर्षन्ति स्वस्रजो वा ददते यद्वा वनसुमनोमालानां हरिकरपदगुणमोहितानां तत्सुमनस्त्यागवत्केशालयोऽपि तद्गुणतुष्टाः सुमनांसि त्यजन्ति यद्वा यथा भक्तानां के शिरसि राजमान ईशस्तत्पदगुणगानतुष्टस्तेभ्यः सितसत्वगुणान्वितसुमनो ददाति तथा तासां के शिरसि स्निग्धकृष्णकेशकेशव एव केशरूपतया वर्तमानो गतितुष्टः सुमनः प्रदानवत्सुमनो ददातीति ॥ १६ ॥

—————

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवम्मुख्यानामष्टानां वृत्तमभिधाय सर्वासां तदाह । गोप्य इति । अच्युतं स्वस्वरूपात्कदाप्यप्रच्युतं श्रिय एकान्तवल्लभं व्यभिचारिप्रेमाविषयं ननु तथात्वेन लब्धं कान्तं लब्ध्वा तत्रापि तद्दोर्भ्यां गृहीतकण्ठ्यो गायन्त्यः सत्यो विजह्रिरे यद्वा श्रियः कान्तमात्रं स्वासामेकान्तं वल्लभम् एतेन श्रियोऽप्याधिक्यसौभाग्यमासामुक्तं वक्ष्यतेच "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसाद इति ॥ १५ ॥

तत्र गायकेषु च वादकेषु च सखीकेषु गन्धर्वादिषु रसविशेषेण मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसम्पत्तिं दर्शयन्त्युक्तसौभाग्यं वर्णयति । कर्णेतिद्वाभ्याम् । कर्णोत्पलैश्च अलकविटङ्कैः कुटिलकुन्तलालङ्कृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासामिति रासश्रमेऽपि शोभोक्ता ननु श्रमेऽपि कुतो नृत्ये प्रवृत्तिरित्याशङ्क्याह । भगवता सममिति । तथाच तत्साहित्याच्छ्रमोऽपि ताभिर्न गणित इति भावः यतश्च गोप्यः गोपस्य भगवतः सम्बन्धिन्यः तथाच भगवति नृत्यति तदनुयायिनीनां तासां विरामो नोचित इति भावः । भगवता सममित्यनेन भगवन्नृत्यसमं

एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ।
रेमे रमेशो व्रजसुन्दरीभिर्[1]यथार्भकः स्वप्रतिबिम्बविभ्रमः ॥ १७ ॥
तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिकां वा ।
नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्त मालाभरणाः कुरूद्वह ! ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

तासां नृत्यमित्यपि कथितं वलयानां नूपुराणाञ्च घोषाः शब्दाय-मानाः किङ्किण्यस्तद्रूपैर्वाद्यैर्वादित्रैः पुनश्च भ्रमरा एव गायका यस्यां रासससमायां ननृतुः अनेन लोकविलक्षणता ध्वनिता तदानीं स्वकेशेभ्यः स्रस्ता विगलिताः स्रजो यासां ताः एतेन नृत्य-गतिसन्तुष्टाः स्वकेशाः सशिरः कम्पं पादेषु पुष्पवृष्टिमिव चक्रु-रित्युत्प्रेक्षा दर्शिता ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थमन्या अपि गोप्यो नानाविलासैर्भगवता सह विजन्हुरिति वदन् तासां भाग्यातिशयं सूचयति । गोप्य इति द्वाभ्याम् । अच्यु-तमबाधितैश्वर्य्यम् श्रियं एकान्तवल्लभमनन्यपतिं कान्तं लब्ध्वा तदनन्यया भक्त्या प्राप्य विजन्हुरे अहो तासां भाग्यमिति भावः ॥ १५ ॥

वादकादीनां रसावेशेन मोहं दर्शयति । कर्णेति । कर्णोत्पलैः साभरणेषु कर्णेषु यानि शोभार्थं योजितान्युत्पलानि तैश्च अलकवि-टङ्कैरलकालङ्कृतैः कपोलैश्च घर्मैः प्रस्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ताः गोप्यः वलयनूपुरघोषवाद्यैः वलयनूपुरकिङ्किणीरूपैर्वादि-त्रैर्भगवता समं सह ननृतुः एतेन वादकानां गन्धर्वादीनां रसावेशेन मोहो दर्शितः क ननृतुः भ्रमरगायकरासगोष्ठ्याम् भ्रमराः श्रीकृष्ण-पादपद्मसौरभघ्राणहृष्टा एव गायकाः यस्यां तस्याम् एतेन गायकानां रसावेशेन मोहो दर्शितः कथम्भूताः गोप्यः स्वकेश-स्रस्तस्रजः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः एतेन तासां चर-णेषु माल्यवृष्टिकराः केशा एव बभूवुः अन्येषां माल्यवृष्टिकर्तॄणां प्रशंसकानुमोदकादीनां च देवानां मोहो दर्शितः ॥ १६ ॥

भाषा टीका ।

ऐसे सब गोपी लक्ष्मी जी के केवल एक नायक अच्युत भगवान् को जब कांत भाव से प्राप्त भई तब भगवान् ने दोनों भुजाओं से उन के कंठ ग्रहण किये रहे इसी प्रकार से उन का गान करती हुई सब गोपी विहार करती हुई॥१५॥

उन गोपीन के कर्णों में जो उत्पलों के फूल तिन से और टेढे केशों की जो कपोलोंपै शोभा तिस से और पसीना के बूंदों से जिन के मुखारविंद अति शोभित हैं और अपने केशों से माला जिनकी गिरती हुई हैं ऐसी गोपी, भौंरा जिस रास गोष्ठी में गान करने वाले हैं तिस में अपने कंकण नूपुरों के बाजों के शब्दों के साथ भग-वान् के सहित नृत्य करती भईं॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा गोप्यो नानाविभ्रमैर्भगवता सह विजन्हुरेवं भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह । एवमिति । तद्विलासानभिभूत-स्यैव रतौ दृष्टान्तः । यथार्भक इति । स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य स इव अनेनैतद्दर्शितं स्वीयमेव सर्वकलाकौशलं सौगन्ध्य-लावण्यमाधुर्यादि च तासु सञ्चार्य ताभिः सह रेमे यथार्भकः स्वप्र-तिबिम्बैरिति ॥ १७॥

तास्तु भगवद्विलासैराकुला बभूवुरित्याह । तदङ्गेति । तस्याङ्ग-सङ्गेन प्रकृष्टा मुत्प्रीतिस्तया आकुलान्यवशानीन्द्रियाणि यासां ताः विश्लथबन्धान्केशादीनञ्जसा प्रतिव्योढुं यथा पूर्वन्धर्तुं नालं न समर्था बभूवुः विस्रस्ता माला आभरणानि च यासां ताः ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

परिष्वङ्गः गोपीनामाश्लेषः कराभिमर्शः तासामेव करालम्बनं यद्वा स्वकरेण तासामभिमर्शः स्तनादिस्पर्शनं स्निग्धेक्षणं तन्मु-खादीनां सरसावलोकनम् उद्दामविलासः नीवीश्लथनादिः हासश्च भावोद्रेकविलसितस्मितं रमाया ईशः स्वामी इति स्वामित्वेन तस्यास्तादृशरत्ययोग्यता व्रजसुन्दरीभिरिति तासामेव तद्योग्य-ताभिप्रेता लक्ष्मीतोऽपि भाववैदग्धीविशेषात् तमेव दर्शयन् श्रीभगवतस्तासां च मिथःसाहित्यं दृष्टान्तेनाह । यथेति । यथा प्रति-बिम्बेन सहार्भकस्य क्वापि वैसादृश्यं नास्ति तथा ताभिः सह कृष्णस्येत्यर्थः । अनेन श्रीभगवद्वत्तेरपि शोभा सूचिता वैषम्ये तद्-सम्पत्तेरिति तथापि तासामिव तस्यापि प्रेमविकारो ज्ञेयः सचोक्तः श्रीपराशरेण—

गोपीकपोलसंश्लेषमभिपत्यहरेर्भुजौ ।
पुलकोद्गमसस्याय स्वेदाम्बुघनतां गताविति ॥

अन्यस्तैर्व्याख्यातं यद्वा प्रतिबिम्बेन विभ्रमो विलासो यस्य सोऽर्भको यथा तदेकनिष्ठः सन् अन्यत् किमप्यजानन् रमते तथायमपि यद्वा एवमुक्तप्रकारेण व्रजसुन्दरीभिर्ये परिष्वङ्गादयस्तैस्ताभिरेव सह रेमे सोऽपि तादृशानेव परिष्वङ्गादीनकरोदिति दृष्टान्तेनाह । यथेति । अन्यत् समानम् ॥ १७ ॥

ततश्च तासामत्यन्तानन्दो ऽजनीत्याह । तदङ्गेति । तस्याङ्गैः सङ्गः आलिङ्गनादिना मिलनमङ्गसङ्गः आकुलेन्द्रियत्वलक्षण-माह । केशानित्यादिना । दुकूलं परिधानकौशेयवस्त्रं कुचपट्टिकाम्

[1] यथा स्वतन्त्रः प्रतिघं विडम्बयन् इति विज० पाठः ।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ॥

उत्तरीयान्तरस्थसूक्ष्मवस्त्रं वा तद्द्वयमेव वा व्रजाख्रिय इति प्रेमभर-विवशतया तादृशत्वं तासामुचितमेवेति भावः ॥एवं तासामानन्दाधिक्यं सिद्धमेव अत एव प्रशब्दः तच्च भवता ऽवबुध्यते इत्याशयेन संबोधयति । हे कुरूद्वहेति ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

एवमिति । तैर्व्याख्यातम् तत्रावतारिका दृष्टान्त बलादेव प्रतिपन्ना । यथार्भक इत्यादिका स एवेत्यन्तव्याख्या चास्या एवानुगता । उभयत्रापि प्रतिविम्बस्थानीयानां श्रीगोपीनामर्भकस्थानीयस्य श्रीभगवतश्च मुहुः परस्परमनुकरणात् । तत्र च श्रीभगवत एवार्भकस्येव विलासाय स्वयं प्रवृत्तिस्तत् प्रवर्त्तनं तदीयविलासविशेषश्च लभ्यते । ततस्तद्विलासैरभिभूतस्यैव रतौ दृष्टान्त इतदिवागन्तुकमिव लक्ष्यते । यत्त्वत्रैतद्दर्शितमित्यादिकं व्याख्यातम् । तत्र च ता एव तद्गुणप्रकाशिका इति प्रतिपद्यते । यथार्भकः प्रतिविम्बद्वारत एव स्वीयमुखमाधुर्यमनुभवति नतु स्वतः तथा श्रीभगवानपि तादृशनिजप्रेयसीद्वारत एवेति हि गम्यते तासां प्रेममयमुख्यं विना तदनुदयात् । यद्वा रमाया ईशः प्रभुरपि व्रजसुन्दरीभिरेव रेमे ननु तयेति ततोऽपि तासां प्रेमगुणसौन्दर्यमधिकमभिप्रेतम् । यद्वा । रमाया ईशः प्रभुरेव नतु रमणः व्रजसुन्दरीभिस्तु रेमे तथापि तथैवाभिप्रेतं तदपि रमणमसाधारणमेवेति । सच्चमत्कारमाह । एवमिति । तत्र परिष्वङ्गस्तासामाश्लेषः । कराभिमर्शस्तासां करालम्भनं स्निग्धेक्षणं तन्मुखादीनां सरसावलोकनम् उद्दामविलासः स्तनस्पर्शनादिः हासश्च भावोद्रेकविलसितस्मितं तैः । एवं तस्य तासामपि सर्वोपरिचरगुणत्वेन परस्परं साम्यमासीत्किञ्च दृष्टान्तेन व्यञ्जयति । यथेति । कश्चिदर्भकस्तद्वयः स्वभावेनात्यन्तक्रीडासक्तः स्वप्रतिविम्बे विभ्रमी विलासो यस्य तादृशश्च यथा स्वतुल्याभिस्ताभिः स्वप्रतिमूर्त्तिभी रमेत तथासौ प्रेमवशतास्वभावेन तन्मयक्रीडासक्तः सन् स्वरूपशक्तित्वेन स्वप्रतिमूर्त्तित्वात् प्रतिविम्बस्थानीयाभिस्ताभी रेमे । अत एव तत्सदृशत्वाभिप्रायेण पूर्वमपि गोपवध्व इत्यनुक्त्वा कृष्णवध्व इत्येवोक्तम् । तथाच ब्रह्मसंहितायाम् । "आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामी"ति । अत्रच यथार्भको यादृशं मुखचालनादिकं कुरुते तादृशं तत्प्रतिविम्बमूर्त्तयोऽपि यादृशं तास्तादृशमेव क्रीडाकौतुकित्वात् सोऽप्येवं श्रीकृष्णश्च श्रीगोप्यश्च परस्परमासक्तत्वादनुचक्रुरिति ज्ञेयम् । अनेन तासामिव तस्याप्यत्र स्निग्धशब्दव्यञ्जितस्नेहविकारो दर्शितः । सच सात्त्विकोऽप्युक्तः श्रीपराशरेण "गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ । पुलकोद्गमशस्याय स्वेदाम्बुघनतां गता"विति ॥ १७ ॥

ततश्च तासामत्यन्तानन्दवैवश्यैनैव रासविरामोऽजनीत्याह । तदङ्गेति । तदङ्गसङ्गैः क्रमेण प्रकर्षं प्राप्ता या मुत् हर्षः तयाकुलेन्द्रियाः आकुलेन्द्रियतालक्षणमाह । केशानित्यादिना । दुकूलं परिधानीयं क्षौमवस्त्रं कुचपट्टिकां कञ्चुकस्थानीयमुत्तरीयम् ॥१८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थङ्गोप्यो नानाविभ्रमैर्भगवता सह विजन्हुः तथा भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह । एवमिति । इत्थं रमेशः श्रियः पतिर्भगवानपि व्रजसुन्दरीभिः सह परिष्वङ्गादिभी रेमे तत्र परिष्वङ्गः परिरम्भः कराभिमर्शः करेण स्तनोर्वादीनां संस्पर्शः स्निग्धेक्षणं सानुरागावलोकनम् उद्दामविलासः उदारलीलापरिष्वङ्गादिरूपं विहारं कृतवानित्यर्थः । रमेशो रेम इत्यनेनावाप्तसमस्तकामत्वादनपेक्षितविहारोऽपि सर्व कारणत्वादुत्मात्मक वस्त्वन्तररहितोऽपि केवलं रेम इति सूचितं कथमेवं भूतस्य क्रीडा सङ्घटते इत्यतो दृष्टान्तमाह । यथेति । अर्भको यथा स्वप्रतिविम्बैर्विभ्रमः क्रीडा यस्य तथाभूतो भवति तद्वत् यथा स्वप्रतिविम्बैः स्वानन्यैरेव रमते तथा रमेशोऽपि स्वात्मिकाभिर्व्रजसुन्दरीभिः कामिनां स्त्रीपारवश्यं दर्शयन्निव रेम इत्यर्थः । अत्र विम्बप्रतिविम्बयोरिव स्वात्मिकानां व्रजसुन्दरीणां स्वशरीरत्वेन स्वकार्यत्वेन च स्वानन्यत्वमात्रेऽर्भकदृष्टान्तः नत्वज्ञत्वादावपीति द्रष्टव्यम् ॥ १७ ॥

तास्तु भगवतस्तद्विलासैरनभिभूतस्य विलासैराकुला बभूवुरित्याह तदङ्गसङ्गेति । तस्य भगवतोऽङ्गसङ्गेन प्रकृष्टा मुत्प्रीतिस्तयाकुलान्यवशानि इन्द्रियाणि यासां तास्तथा विस्रस्ता विश्लथा माला आभरणानि च यासां तथाभूताः विश्लथबन्धान् केशादीनञ्जसा आशु प्रतिव्योढुं यथापूर्वं धर्त्तुं नालं न प्रबभूवुरित्यर्थः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वतन्त्र ईश्वरो विधिनिषेधाद्यविषयः प्रतिबं विधिनिषेधविवर्जितं पुरुषमनुकुर्वन् यद्वा प्रवृत्तिधर्मे "विध्याद्यगोचरे कोपे प्रवृत्ते प्रतिघं विदुरिति च ॥ १७ ॥

तस्य कृष्णस्याङ्गसङ्गेनोत्पन्नेन प्रमदेनानन्देनाकुलानि पूर्णानीन्द्रियाणि यासां तास्तथा केशादीन् वोढुं पतिं कृष्णं वा त्युकुम् अलं पर्याप्ताः शक्तिवर्जिता आसन्नित्यर्थः । "अपपरी वर्जने" इति सूत्रात् यद्वा शक्त्यभावेऽपि निवारिताः "अलन्तु भूषणे शक्तौ पर्याप्तौ शक्तिवारणे" इति प्रेमकामात्मत्वात् वहनादिशक्त्यभाव इत्यर्थः । कुरूद्वहेति विशिष्यसम्बोधनेन कृष्णस्य भक्तिभामिनीलोलत्वं पश्येत्यभिमुखीकरणेन भक्तेरावश्यकर्तव्यत्वं सूचयति॥१८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रमाया ईशः प्रभुरपि व्रजसुन्दरीभिरेव रेमे न तु तया । यद्वा । रमाया ईशः प्रभुरेव नतु रमणः व्रजसुन्दरीभिन्तु रेमे एव ॥ १७—१८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

समं ननृतुरिति समशब्दस्य साहस्यार्थं स्पष्टयति । एवमित्यादि । एवमनेन प्रकारेण ये परिष्वङ्गादयः तै रमेशो रेमे काभिः व्रजसुन्दरीभिः सह साहित्येन ताश्च रेमिर इत्यायातं तेन परिष्वङ्गादयः तस्य च तासाञ्चेत्युभयकर्तृकत्वमेव तेषां तस्मिन् परिष्व-

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

जने ताः परिष्वजन्ते तासु परिष्वजमानासु सच परिष्वजत इत्येवमादिप्रकारः एवङ्करामिमर्शादिषु च तत्र दृष्टान्तः यथा अर्भकः अर्भक इव कीदृशोऽर्भकः स्वप्रतिविम्वेषु स्वप्रतिच्छायासु विविधो भ्रमो यस्य स तथा अयं भावः अर्भकः स्वयं यथा चेष्टते तथा चेष्टमानायां प्रतिच्छायायां विविधं भ्राम्यति मत्सदृशः कोऽयमहं यथा करोमि तथैवायं करोतीति किम्वा त्वयं यथा करोति तथैवाहङ्करोमीति भ्रान्तः स्तब्धो भवति तथायमपि सान्द्रानन्दस्तब्धो भवति ता अपि स्तब्धा भवन्तीत्यर्थः । अथवा स्वप्रतिविम्बे भ्रमो विळासो यस्य स तथा स्वच्छायया यथार्भकः खेलति तथा यद्वा व्रज सुन्दरीभिः सह प्रतिविम्बविभ्रमः सन् यथार्भकः अर्भक इव स्तब्धोभूत्वा रेमे इति अयं भावः साहित्यात् तस्य तासां च स्वप्रतिविम्बः तासु तस्मिश्च स्वच्छभावात् लग्नः तत्र विभ्रमो विशिष्टभ्रमो यस्य स तथा पूर्वं ता अपि तथा कृष्णस्य प्रतिविम्बे तासु लग्ने तमालोक्य किमयं नाना भूत्वा प्रत्येकमासां तनुषु लग्नः किम्वाऽसौ मत्प्रतिविम्बा इति भ्रमो भवति तासामपि प्रतिविम्बे कृष्णे लग्ने तासाञ्च भ्रमो भवतीत्युभयोरेवार्भकसादृश्येन भ्रान्तिमत्त्वं व्यङ्ग्यं सहार्थतृतीयाया विशिष्टवैशिष्ट्यनान्वयात् यथा पुत्रेण स्थूलो गोमांश्च देवदत्त इति उभयोरेव स्थौल्यं गोमत्त्वं चेति ॥ १७ ॥

एवम्विहारे तासां पुनः प्रेमावेशतामाह । तदङ्गसङ्गेत्यादि । तदङ्गसङ्गेन या प्रकृष्टा मुत् तया आकुलानीन्द्रियाणि यासां केशान् दुकूलादीनि भ्रंसमानान्यपि प्रतिव्योढुं न अळमसमर्था इत्यर्थः अत्र प्रेमावेशोऽङ्गी भ्रमोऽङ्गम् ॥ १८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रादुर्भूते रसे अत्यन्तोद्गमनार्थं साक्षात्कामशास्त्रोक्ताश्चेष्टा निरूपयति । एवमिति । आलिङ्गनादयस्तत्र निरूपिताः एवमेव रसोद्गमनार्थं परिष्वङ्गः आलिङ्गनं ततः कराभिमर्शः तत्तदवयवेषु भगवद्धस्तस्पर्शः ततः स्निग्धेक्षणं भावोद्गारि तत उद्दामो विलासः प्रमर्यादो भोगः ततो हास्यानि पूर्णमनोरथानामेवं परिष्वङ्गादिहासान्ताः सर्वासु ननु प्राकृतीभिः कथं रेमे तत्राह । रमेश इति । रमाया ईशः सर्वत्र तासु रमापि भगवदाज्ञया निविष्टा ता अपि अधिष्ठानयोग्या इत्याह । व्रजसुन्दरीभिरिति । नन्वात्मारामः कथमेताभी रेमे लक्ष्मीस्तु ब्रह्मानन्द इति ब्रह्मानन्दे रमणमुचितमपि एतास्वावेशोऽप्यनुचितः ब्रह्मभावाभावादिति चेत्तत्राह । यथार्भक इति । बालको हि दर्पणजलादिकं पुरतः स्थापयित्वा तत्र तत्रात्मानं पश्यन् रमते तथा भगवानपि स्वसामर्थ्यं स्वरूपं वा तत्र स्थापयित्वा ब्रह्म ब्रह्मानन्दञ्चाविर्भावयित्वा रेमे नन्वेतदप्यनुचितं किमनेनेति चेत्तत्राह । यथार्भकः यथा बाललीलां कृतवान् तथैतदपि कृतवानित्यर्थः । यद्वा कदाचित्प्रकारसाम्येऽपि नैतद्रसानुभवो लक्ष्म्यां भवितुमर्हति किन्त्वेतास्वेवेति ज्ञापयति पदद्वयेन रमेशो व्रजसुन्दरीभिरिति रमाया ईशः स्वामी भर्तेति यावत् एतास्तु व्रजसंबन्धिन्योऽन्यसंबन्धिन्यः सुन्दर्यो नतु विवाहिता इति रमारमणदशायामेतादृग्रसानुभवो नोभयोरपि सम्भवति रसस्वरूपस्यैव तादृशत्वादिति भावः । नन्वीश्वरे नेदमुचितमित्यत आह । यथार्भक इति—

> संमुह्य नवनीतमन्तिकमणिस्तम्भे ।
> स्वबिम्बोद्गमं दृष्ट्वा—

इत्यादिवाक्यनिरूपितमुग्धलीला वान्यथा निरूप्यते पूर्णज्ञानोऽपि तद्रसस्वरूपस्य तथात्वात्तथेहापि "रसो वै स" इतिश्रुतेरिदं सर्वं रसमध्यपातित्वेन स्वरूपात्मकमेवेति तदुच्यत इति नानुपपत्तिः काचिच्छङ्काया एवानुदयादिति भावः । एतेन यथा प्रभुस्तद्भावो वा तथैता एतद्भावोऽपीति ज्ञापितं भवति तथा प्रतिबिम्बस्वभावात् अत्र रमणं बहूनामप्येकदा भवति द्वयोस्त्र अग्रे तु प्रत्येकपर्यवसानं वक्ष्यति ॥ १७ ॥

एवं सर्वभावेन भगवद्धर्मावेशे तासां देहादिविस्मरणपूर्वकं महारसाभिनिवेशमाह । तदङ्गेति । तस्य भगवतः अङ्गसङ्गेन यः प्रकृष्टो मदः देहादिविस्मारको भाव उत्पन्नः तेनाकुलानीन्द्रियाणि यासां सर्वेतिकर्तव्यतामूढा जाताः ततः केशपाशान् परिहितं दुकूलं कुचपट्टिकां वा स्वयमञ्जसा सामस्त्येन प्रतिसम्मुखतया विशेषेण बोढुमलं न जाताः पुनरल्पेनैव तथा विधा जाता इत्यत्र हेतुमाह । व्रजस्त्रिय इति । श्रमोऽपि जात इत्याह । विस्रस्तमालाभरणा इति । आकुलेन्द्रियत्वान्न विचारो लौकिकः गोपिकात्वान्न पारमार्थिकः श्रमोऽत्र दैहिकः अत आद्यन्तमध्येषु तासु युक्ता भगवतैव धृता नताभिरित्यर्थः । यद्यप्यन्यप्रतीत्या ध्रियमाणा इव तथापि न स्वतो धारणं कुरुद्वहेति सम्बोधनमभ्रमाय विश्वासार्थञ्च ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं रासनृत्याङ्गैरेव कृष्णस्य सम्भोगाङ्गान्यपि निर्वृत्तानीत्याह । परिष्वङ्ग आलिङ्गनम् एकैकया सह युग्मनृत्ये । करेणाभिमर्शः स्पर्शः सच नृत्यगतिसमाप्तौ स्वदक्षिणकरेण प्रियावामवक्षोजे तालन्यासरूपः । स्निग्धेक्षणं रहस्याङ्गेषु सप्रेमावलोकनम् उद्दामविळासः पारितोषिकप्रदानमिषाच्चुम्बनादिः । हासस्तत्प्राप्त्यनन्तरं मुखोल्लासः परिहासो वा तैः । रमेशः रमायां लक्ष्म्याम् ऐश्वर्यं प्रकटयन् व्रजसुन्दरीभिः सह रेमे नतु रमयेत्यर्थः । यथार्भको मुग्धस्तथैव तासु प्रेमाधीनत्वान्मौग्ध्यमेव दधत्तु रमायामिवैश्वर्यमित्यर्थः । ननु परःसहस्राभिस्ताभिः कथमेकः स रेमे तत्राह । स्वस्य प्रतिबिम्बं प्रतिस्वरूपमेव विभ्रमो विलासो यस्य सः । "प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम्" मित्यत्र बिम्बशब्देन यथा स्वरूपमुच्यते तथैवात्रापि एकैकया प्रियया सह एकैकस्वरूपो रेमे इत्यर्थः । तासां ह्लादिनीशक्तित्वेन स्वरूपभूतत्वात् । स्वप्रतिच्छवित्वानौचित्यात् व्याख्यान्तरं नेष्टम् ॥१७॥

ततश्च ता भगवद्विलासैरानन्दविह्वला बभूवुरित्याह । तदङ्गेति । प्रकृष्टा मुत् आनन्दस्तया आकुळेन्द्रियाः । कुचपट्टिकां कञ्चुलिकाम् । प्रति व्योढुं वोढुं नालं न समर्थाः ॥ १८ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

इदानीमेवं विधेऽपि रासरसावेशे श्रीभगवतः श्रीराधानुकूल्यमावेदयति । एवमिति । यथैता निजानिजरसाविष्टा भगवता सह विजह्रिरे तथैव रमेशः श्रीराधारमणस्ताभिर्व्रजसुन्दरीभिः रेमे इत्यन्वयः । कैरित्यत आह । परीत्यादि । कया चित्परिष्वङ्गेन कयाचित्कराभिमर्शेन क्वचित्स्निग्धेनेक्षणेन कचिद्विलासेन कयाचिच्च हासेनेत्यर्थः । तैस्तैश्च परिष्वङ्गादिभिः रमया सहैव कृतैस्तासु च तत्प्रतिच्छविरूपासु प्रतिफलितैरिति । रमेशपदेन सूचितं तत्र दृष्टान्तः । यथेति । अर्भकः उपचाराद्भ्रमसमुग्ध इत्यर्थः स्वशब्दोऽत्रात्मवचनः ततश्च तस्यात्मा परमरमा श्रीराधैव तस्याः प्रतिबिम्बेष्वेव व्रजसुन्दरीषु विभ्रमो विलासो यस्य यद्वा यथा यथावत् निश्चितमेवदस्मित्यर्थः । तदुक्तमलङ्कारकौस्तुभे—

> राधाग्रतश्च पुरतो मम पार्श्वतश्च
> राधैव मेव वसति चेतसि सर्वतश्च ॥
> लोकोऽत्र मां वदति सर्वजनोपकारी
> कृष्णोऽत्र मां स्फुरति क्वापि न राधिकान्येति ॥

एवं चार्भको यथा न स्वयं चेष्टते प्रतिबिम्बचेष्टितं दृष्ट्वैव तां तां चेष्टां करोतीति तस्मिश्च सा सा चेष्टा बिम्बचेष्टितेनैवेति मिथुनस्य तासां च रसावेशः परमकाष्ठां प्राप्तः तथार्भक इत्यनेन क्रीडामात्रे आसक्तिः नतु तच्छृङ्गारादिष्विति दिक् ॥ १७ ॥

तमेव प्रपञ्चयन् रासविरामामाह । तदिति । तदङ्गसङ्गेन अङ्गस्पर्शमात्रेण या प्रकृष्टा मुत्प्रहर्षः प्रीत्युत्कर्षो वा तया आकुलेन्द्रियाः पूर्णमनोरथाः सख्यः केशादीन् प्रतिव्योढुं विस्रस्तान् संगमयितुं नालं न शक्ता इत्यर्थः । किंपुनः रासक्रीडादानिनिति भावः । तथा विस्रस्ता माला आभरणानि च यासां ताः कुरूद्वहेति तद्वैवस्यश्रवणेन विवशं राजानं संबोधयति यद्वा केशादीनलङ्कुरु मालादीनुद्वहेति क्रमेण व्युत्क्रमेण वान्वयः ॥ १८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं तासां भगवता समं नृत्यशोभां निरूप्य भगवतस्ताभी रमणशोभामाह । एवमिति । अत्रैवमिति पदेन यथा स्थाल्यामेकतण्डुलदृष्ट्या सर्वतण्डुलानां तथात्वनिश्चयस्तथात्र किञ्चिद्विलासनिरूपणं कृतमेवमेव कल्पसमकालासु तासु सर्वासु निशासु एतादृशैरेव शृङ्गाररसाभिव्याप्तविहारै रमेशो व्रजसुन्दरीभी रेमे अत्र रमत्यस्य मिलि रमेति व्युत्पत्त्या रमायामेव तस्य रमणमन्यथा तस्यामरमणे रमेति तन्नाम न स्यात् तत्रैव रमणत्वे हेतुं दर्शयन्नाह । ईश इति । ईशस्य ईश्वर्य्यमेव रमणं तथा च रमारमण ईशोऽपि यतस्ताभी रेमे ऽतो ध्रुवं तासु रमाया राधायास्तत्स्वरूपात्मकाह्लादिन्याः शक्तेरंशावेशः तासां तदंशप्रवेशे रमणार्हत्वे च तन्मात्रेव हेतुं दर्शयन्नाह । व्रजसुन्दरीभिरिति । गेहादिभ्यो विरज्य तत्त्यागेन परिव्रजन्तीति व्रजाश्चानुरागित्वेन सुन्दर्यश्च व्रजसुन्दर्यस्ताभिस्तथा च सर्वत्यागेनानुरागित्वमेव रमात्वेन तद्रमणार्हत्वे हेतुः रमाया अपि सर्वत्र सुरादिष्वपि दोषदृष्ट्या विरज्य सानुरागतदेकपरत्वेनैव तद्रमात्वं प्रेम्णश्चैवमेव स्वरूपं यत्स्वत एव सर्वतो विरज्यैकपरत्वमन्यथा सर्वेषां तत्तद्रतत्वेन प्रेमित्वं स्यात् स्वस्वरूपच्छायावेशेन तद्रमणे दृष्टान्तो यथार्भक इति स्वामिचरणानां तद्विलासानभिभूतस्यैव रतौ दृष्टान्त इत्याद्व्याख्यानमप्येतदभिप्रायकमेव यथार्भको दर्पणाद्युपाधिधर्मैरनाक्रान्तः केवलं तत्स्वच्छत्वप्रयुक्ततत्तत्स्वप्रतिबिम्बविभ्रमैरेव विलासवान् भवति तथा तासां निष्कपटानुरागस्वच्छतया तत्राविष्टस्वाह्लादिनी शक्तिरंशावेशेनैव तत्र रमणमतस्तच्छक्तेः स्वस्वरूपात्मकतया नात्मारामत्वक्षतिरपि कैः रेमे इत्यपेक्षायामाह । परिष्वङ्गेत्यादि । परिष्वङ्ग आलिङ्गनं कराभिमर्शः तत्करकञ्जानां मृदुत्वमञ्जुत्वसौरभ्यादिगुणवतां स्पर्शः स्ववक्षःस्थलादिषु धारणं स्वकरैर्वा स्तनाद्यङ्गस्पर्शः सस्नेहेक्षणयोरुद्दामा उत्कृष्टा ये विलासा अपाङ्गनिरीक्षणानि यद्वा सस्नेहेक्षणं निरीक्षणम् उद्दामा उच्छृङ्खला ये विलासा विविधविहारा यद्वा स्निग्धेक्षणानां सस्नेहतद्भावनाध्याननिरीक्षणपराणाम् उद्दामा भवबन्धनिवर्तका ये विलासा यद्वा तत्तद्विषयेष्वपि सौन्दर्य्यभ्रान्त्या स्निग्धेक्षणानां रागवद्दृष्टीनां उद्दामास्तद्बन्धविमोचकास्तत्तद्विषयसाजात्यप्रतीत्या विषयरागिमतीनां स्वस्मिन् प्रवृत्तौ सतिशोधकतया नित्यनिरतिशयसुखतत्त्वद्गुणवत्तया च क्षुद्रानित्यनिरयानुबन्धिविषयविरक्त्या स्वस्मिन्नेव दृढस्नेहेण तद्रागबन्धनिवर्तका विलासा हासो मुखसुधाकरसुधाविस्तारात्मकस्मितरूपस्तैः ॥ १७ ॥

एवं रासरसप्रमोदमदाविष्टमतीनां तासां स्वाङ्गवस्त्राद्यननुसन्धानदशामाह । तदङ्गसङ्गेति । तस्य कृष्णस्याङ्गेन यः सङ्गः यद्वा कृष्णविग्रहस्य "सच्चिदानन्दरूपाय कृष्णाय आनन्दमात्रकरपादमुखोदरादि"रित्यादिश्रुतिस्मृतिभ्यां स्वरूपात्मकत्वेन तत्र देहदेहिविभागासम्भवात्तस्य कृष्णस्य स्वीयाङ्गेषु यः सङ्गस्तेन या प्रमुदतिप्रकृष्ट आनन्दः एतस्यैवानन्दस्येत्यादि श्रुत्या यदा तन्मात्रकप्रतिबिम्बस्य सर्वभूतजीवनत्वं तदा किमु वाच्यं साक्षात्तत्सङ्गस्य तया प्रमुदाकुलानि व्याप्तानि तदाकुलतयैव समाधिवद्विषयान्तरप्रतीत्यसमर्थानीन्द्रियाणि यासां यद्वा तदङ्गसङ्गप्रकृष्टमुदान् कुत्सितान् क्षुद्रानन्यविषयान् लान्ति गृह्णन्तीन्द्रियाणि यासां "पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्म"न्निति श्रुतौ तु अन्तरात्मदर्शने एवेन्द्रियाणां पराङ्मुखत्वलक्षणहिंसनोक्तेः एतास्तु व्रजस्त्रियो गोप्यो वा इन्द्रियाण्यन्तरात्मकृष्णपरतया हिंसनाभावेन पान्तीति न तदिन्द्रियाणां कुत्सितपरविषयग्राहित्वं यद्वा तदङ्गसङ्गप्रमुदा अकुलानि परागदर्शनान्तरात्मकृष्णदर्शने विमुखत्वस्वभावेन्द्रियकुलबहिर्भूतानीन्द्रियाणि यासां यथा ताभिः स्वकुलमर्य्यादास्त्यक्तास्तथा तासामिन्द्रियैरपीन्द्रियकुलमर्य्यादास्त्यक्ता इतिभावः । यद्वा तदङ्गसङ्गप्रमुदैव "कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन । अपारसंवित्सुखसागरेऽस्मिन् लीनं परे ब्रह्मणि यस्य चेत" इत्यादिवचनैः आ समन्तात्कुं पृथिवीं लान्ति सुखदानेनानुगृह्णन्ति रजसा गीतादिना च पवित्रयन्तीन्द्रियाणि पादवागादीनि यासां प्रमदाकुलेन्द्रिया इति पाठेतुतदङ्गसङ्गेन यः प्रकृष्टः प्रेमवैचित्त्यात्मकः सर्वविस्मारको मदस्तेनाकुलानीन्द्रियाणि यासान्ताः केशानदुकूलं कुचपट्टिकां वा अङ्ग इति यथावत् प्रतिव्योढुमलं समर्था नाभवन् युक्तं चैतत् केशपराणां केशसेवन भारादसम्भारस्तत्कुलात्प्रतिकूलदुकूलविस्मृतिः कुचकञ्चुपट्टिका विस्मरणेन तद्दिगम्बरतापादनञ्च तथापि अङ्ग इतिपदेन केशप्रक्षेप

श्रीरामनारायणकृतभावभावविभाविका ।

सेवनादेर्यथावदसम्भवेऽपि न सर्वथा तैद्वपरीत्यमिति सूचितं पुनः किम्भूतास्ताः विस्रस्तमालाभरणाः विशेषेणेति प्रायः स्रस्तानि मालाद्याभरणानि यासां यद्वा अङ्गेषु मां लान्तीति शोभाप्रदान्याभरणानि यासां तथाच भूषणभूषणमाधवधवसान्निधानलब्धमानां स्वयं मारूपाणां माभरणदत्तमाप्रयोजनमितिभावः यद्वा ताः स्वयमञ्जः प्रतिव्योदुमलं नाभवन्निति तत्केशभारस्वरादिसम्भारभारोऽपि तद्भाःप्रदातरि भारे नन्दकुमारे एवाभवत् अत एवाविस्रस्तमालाभरणा इति पदाच्छ तदाभरणविच्छेदः तथाच कुरूद्वहेति संबोधनेन यथा तव कुरुकुलोद्वहनं न तव साध्यं किन्तु त्वन्मात्राराध्य कृष्णसंपाद्यं तथा वोध्यमिति दर्शनम् ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

यथा गोप्यो नानाविभ्रमैः भगवता सह विजह्रुरेवं भगवानपि स्वविलासैस्ताभिस्सह रेमे इत्याह । एवमिति । रमाया ईशः पतिरपि व्रजसुन्दरीभिरेव रेमे न तयेति रमातोऽपि तासां प्रेमाधिक्यं सूचितं यद्वा ननु प्राकृतीभिस्ताभिरप्राकृतो भगवान् कथं रेमे इत्याशङ्क्योक्तं रमेश इति तथाच तासु भगवदाज्ञया रमा प्रविष्टा तस्तयैव भगवान् रेमे इति भावः । तास्तस्य प्रवेशयोग्या इत्याशयेनाह । व्रजसुन्दरीणामिति । यद्वा रमेशो व्रजसुन्दरीभिरिति पदद्वयेन रमया परस्त्रीरूपमादाय रममाणे भगवति द्वयोर्विलक्षणो रस उद्भूत इति ध्वनितम् एवं पदार्थमाह । परिष्वङ्गेति । आश्लेषश्च तासां करालम्भनञ्च तन्मुखादीनां सप्रेमावलोकनम् उद्दामविलासः स्तनस्पर्शादिश्च भावव्यञ्जकं स्मितं च तैस्तद्विलासानभिभूतस्यैव रतौ दृष्टान्तः यथार्भक इति स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य स एव एतेन स्वयमेव कलाकौशलं सौगन्ध्यलावण्यमाधुर्य्यादिकं च तासु सञ्चार्य्य ताभिः सह रेमे इति दर्शितं यद्वा तासां रमणयोग्यतायां दृष्टान्तः तथाच गुणलावण्यादिना स्वतुल्याभिः स्वधूत्वयोग्याभिस्ताभिः रेमे अत एव पूर्वं कृष्णवध्व इत्युक्तं यद्वा यथा कश्चित् प्रतिबिम्बद्वारैव स्वसुखमाधुर्य्यमनुभवति तथा भगवानपि तादृशस्वप्रेयसीद्वारैवेत्यनेन व्यज्यते यद्वा यथार्भको मुग्धस्तद्वत्तथा च तासु प्रेमाधीनत्वान्मौग्ध्यमेवाश्रितवान्नतु रमायामिव वैदग्ध्यमिति भावः । ननु असङ्ख्याताभिः कथमेकस्य रमणमित्याशङ्क्याह । स्वप्रतिबिम्बं प्रति स्वरूपमेव विभ्रमो विलासो यस्य सः तथाच एकैकया प्रियया सहैकैकस्वरूपः सन् रेमे इत्यर्थः । यद्वा परमेश्वरस्य नैवंविधा लीला घटत इत्याशङ्कानिवृत्त्यर्थमुक्तं यथार्भक इति तथा च यथा बाललीलां कृतवांस्तथेमामपीति भावः । यद्वा यथोक्तक्रीडादिना भगवति दोषापत्तिर्न शङ्क्या इत्याशयेनाह । स्वेति । तथाच स्वप्रतिबिम्बभूताभिस्ताभिर्बिम्बभूतस्य परमेश्वरस्य क्रीडां कुर्वतः का दोषप्रसक्तिसम्भावनेतिभावः । ननु तथापि किमर्थं तथा कृतवानिति चेत्तत्राह । अर्भक इव तथाच बालकस्य कामक्रोधादिविनिर्मुक्तस्य विहारो यथा लीलामात्रं तथा भगवतोऽपि सृष्ट्यादिवद्विदमपि विहरणं लीलामात्रमिति भावः ॥ १७ ॥

अथ रासक्रीडाविरमहेतुं तासां भगवद्विलासैराकुलेन्द्रियत्वमाह । तदिति । तस्याङ्गसङ्गैः प्रकृष्टा यामुत् हर्षस्तया विवशेन्द्रियाः यत एवातः केशान् दुकूलं कञ्चुकीं च शिथिलतां गतान्येतानि अञ्जसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं समर्था बभूवुः विस्रस्तानि मालाभरणानि यासां ताः ननु केशादिशैथिल्ये हेतुभूतां व्रीडां लज्जां विहाय किमिति कर्तुं प्रवृत्ता इत्याशङ्क्याह । व्रजस्त्रियः नगरस्त्रीणां तादृशः स्वभाव इति भावः । तत्रापि राजवंशोद्भवानां स्त्रीणां तथा प्रवृत्तिर्नोचितेति संम्बोधनाशयः ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गोप्यो नानाविलासैर्भगवता सह विजह्रुरित्युक्तमथ भगवानपि तद्भक्तियन्त्रितः स्वविलासैस्ताभिः सह रेमे इत्याह । एवमिति । एवं रमेशो माधवोऽपि व्रजसुन्दरीभिः सह परिष्वङ्गादिभी रेमे अहो हरिभक्तेर्माहात्म्यमिति भावः । भगवता इत्यनेन सर्वात्मत्वसर्वस्वामित्वादिगुणनिधेस्ताभिः स्वानन्यभक्ताभिः सह रमणे योग्यता सूच्यते व्रजसुन्दरीभी रेमे इत्यनेन भक्तमनोरथपूरकत्वं द्योत्यते रमेश इत्यनेनावाप्तसमस्तकामतया तद्विलासानभिभूतत्वं सूच्यते तदेव दृष्टान्तेन दर्शयति । यथार्भक इति । यथा स्वप्रतिबिम्बैः स्वायत्तस्थितिप्रवृत्तिमद्भिर्विभ्रमः क्रीडा यस्य सः अर्भको यथा तथा स्वायत्तस्थितिप्रवृत्त्यादिमतीभिः स्वात्मिकाभिरित्यर्थः । नचानेन दृष्टान्तेनेशजीवयोर्बिम्बप्रतिबिम्बभावासिद्धिरिति शङ्क्यम् तत्रोपाधेर्नित्यत्वस्वीकारे अनिर्मोक्षप्रसङ्गापत्तेः अनित्यत्वस्वीकारे प्रतिबिम्बस्याप्यनित्यत्वेन जीवनित्यताप्रतिपादकशास्त्रव्याकोपापत्तेः उभयपक्षेऽपि स्वरूपप्रतिबिम्ब स्वीकारे अतीन्द्रियस्य सर्वगतस्य प्रतिबिम्बासम्भवादिदोषापत्तेश्च सविग्रहस्य प्रतिबिम्बस्वीकारे प्रतिबिम्बभूतेषु जीवेष्वपि श्रीवत्सादिचिह्नदर्शनप्रसङ्गाच्च, अध्यासगोविन्दश्रुत्यन्तकल्पद्रुमादिग्रन्थेषु पूर्वैर्बहुशो निराकृतत्वादत्रोपरम्यते ॥ १७ ॥

व्रजसुन्दर्यस्तु भगवद्विहारामृतनिधौ निमग्नाः भगवदङ्गसङ्गानन्दोद्रेकेणाकुलेन्द्रियाः बभूवुरित्याह । तदङ्गेति । तस्य श्रीकृष्णस्याङ्गसङ्गेन प्रकृष्टा या मुत्प्रीतिस्तया आकुलानि अवशानीन्द्रियाणि यासां ताः विस्रस्ताः मालाः आभरणानि च यासां ताः विश्लथबन्धान् केशादीन् अञ्जसा प्रतिव्योढुं धर्तुं नालं न समर्था आसन् ॥ १८ ॥

भाषा टीका ।

इस प्रकार से आलिङ्गनकरना तथा उचित स्थलों पर हस्तसे स्पर्श करना स्नेहकी दृष्टि से देखना मनोहर रास विलास करना इत्यादि कामशास्त्र की रीतिसे लक्ष्मीकान्त भगवान् व्रजस्त्रियों के संग रमण करते भये जैसे कि बालक अपने प्रतिबिम्बको देखकर क्रीडा करता है तैसे ही भगवान् ने क्रीडा किया ॥ १७ ॥

हे कुरूद्वह ! परीक्षित्जी गोपस्त्रीयों की तो भगवान् के अंग के संग होने से सब इन्द्रिय व्याकुल होगई तब अपने खुले केश वस्त्र कुचवस्त्र, इन सबोंकी संभालने की सामर्थ्य उनको नहीं रही और उनके माला तथा आभरण भी सब बिखर गये उनको खबर नहीं रही ॥ १८ ॥

कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ।
कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ॥ १९ ॥
कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ।
[1]रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥

[1] रराम भगवान् इति वि० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलं ता एवाकुलेन्द्रियाः किन्तु देव्योऽपीत्याह । कृष्णविक्रीडितमिति । किञ्च शशाङ्कश्चेति अनेनैतत्सूचितं शशाङ्केन विस्मितेन गतौ विस्मृतायां ततः प्राक्तनाः सर्वेऽपि ग्रहास्तत्र तथैव तस्थुस्ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति ॥ १९ ॥

किञ्च कृत्वेति । अयम्भावः—

कात्यायनि महामाये महायोगिन्यधीश्वरि ! ।
नन्दगोपसुतं देवि ! पतिं मे कुरु ते नमः ॥

इति प्रत्येकं ताभिः प्रार्थनाद्भगवतापि यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति तथैव प्रति श्रुतत्वात्तावन्तमात्मानं कृत्वा रेमे इति यावतीर्योषितः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कृष्णस्य परमानन्दघनमूर्त्तेर्जगच्चित्ताकर्षकस्य वा विशेषेण पूर्वपूर्वतोऽसाधारण्येन क्रीडितं क्रीडां विशेषतः साक्षात्सेवादिद्वारा प्रीत्या ईक्षित्वा कृष्णेत्यनेन तद्विक्रीडितस्यापि तादृशत्वमेवाभिप्रेतं खेचराः देवादयः तेषां स्त्रियः सर्वा अपि कामेन श्रीभगवद्विषयकेणार्दिताः पीडिताः सत्यः विशेषेण सर्वविस्मरणादिना अमुह्यन् श्रीकृष्णप्राप्तौ निजयोग्यत्वायोग्यत्वादिविचाररहित्येन विकला अभवन् नवमीं दशां प्रापुर्वा शशाङ्क इति शशेन सहित इत्यर्थः । विस्मितोऽभूत् अदृष्टपूर्वत्वात् अन्यैस्तैर्व्याख्यातं तत्रातिदीर्घास्विति चिरकालस्वच्छन्दबहुलसुखक्रीडाभिप्रायेण अन्यथा तावत् क्रीडानां यथानिबन्धाल्पकालेन निर्वाहासिद्धेः अत एवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इत्यस्यार्थं ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्व्याचक्षते तदपि सम्भवेदेव भगवच्छक्त्याशेषविरुद्धस्य समाधानात् रात्रिष्विति बहुत्वञ्च ता रात्रीरित्युक्तस्य निशा इति वक्ष्यमाणस्य चानुसारेणेति अथवा देवानां देवीनाञ्च सर्वेषामेव व्योमयानानां विमोहमाह । खेचराः तत्स्त्रियश्च गणशब्देन तत्पत्न्यः पराश्च तारकाः चकारात् सोऽपि सगणः कामार्दितो व्यमुह्यदित्यर्थः । अनेन वक्ष्यमाणरतौ तेभ्यो लज्जादिना सङ्कोचो निरस्तः सर्वेषामेव विमोहात् तत्र शशाङ्कस्य कामो भगवद्विषयकभावविशेषलक्षणः एवं रासक्रीडायाः श्रीकृष्णविषयकभावविशेषवर्द्धनेन परममोहनत्वं दर्शितं प्रकृत्यैव तन्नृत्यगीतादिः श्रीभगवद्भावबर्द्धमानत्वात् तत्रापि तस्य साक्षात् श्रीभगवत्कर्तृकत्वात् तत्रापि ताभिः सह तत्रापि तादृशप्रकारादिना अत एव तस्यभक्तिगौरवादिभिर्युक्ताभिर्लक्ष्म्यादिपत्नीभिस्तथान्याभिश्च देवीभिराश्लेषचुम्बनाद्ययोग्याभि-रसम्पत्तेः केवलविशुद्धमधुरविशेषसम्पन्नाभिरतिविशेषपरमयोग्याभिर्व्रजसुन्दरीभिरेव सुसिद्धेः तद्योग्यस्थाने ऽनन्यसाध्यत्वायेन श्रीव्रजेन्द्रकिशोरेणानन्यभोग्यरसाया अत्र सम्पादनमिति दिक् अत एवारम्भे पूर्वमुक्तं तत्र गोविन्दः क्रीडितैरिति ॥ १९ ॥

तत्रैव परमफलमाह । कृत्वेति द्वाभ्याम् । कृत्वैव कस्यापि शक्तिविशेषेण नानात्वसत्यतापि सिद्धैव गोपयोषितः गोप्य इत्यर्थः ततश्च काश्चिदूढविवाहिताः काश्चित्कन्याश्चेति यद्वा गोपानां योषितो भार्याः ततश्च काश्चित्तेषां पत्न्य एव काश्चिच्च कृतकात्यायनीव्रता भगवदेकनिष्ठाः अजातविवाहा अपि कथञ्चिद्भगवन्मायादिना सर्वैर्विवाहमननाद्भार्यात्वेन प्रतीता इति ज्ञेयम् एतच्च श्रीरूपेण लिखिते ललितमाधवनाटकादौ व्यक्तमेव लीलया शृङ्गाररसखेलया विचित्रसौरतचेष्टया वा रराम रेमे भगवानिति तदेकभगवत्तासारसर्वस्वप्रकटनमिति भावः । तस्यैव प्रेमरसपरिपाकविलासविशेषात्मकत्वात् तथापि जगच्चित्ताकर्षकत्वेन तेनैव स्वतः प्रेमविशेषविस्फुरणाच्चेति तच्चाग्रे व्यक्तं भावि श्रीभागवतामृते च विवृतमेव आत्मारामोऽपीत्युक्तार्थमेव तद्रमणं च पृथक् पृथक् तत्रैव निकटकुञ्जादिषु किम्वा रासस्थल्यामेव तत्तदलक्षितत्वेन एवं च पूर्ववदैश्वर्यमाधुर्यं द्रष्टव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

कृष्णस्य स्वयं भगवत्त्वेन माधुर्यादिभिः परमपरिपूर्णस्य विक्रीडितं पूर्वपूर्वतोऽपि वैशिष्ट्येन क्रीडां वीक्ष्य साक्षात् स्वादिमयप्रीतिवैशिष्ट्येन दृष्ट्वा खेचरा देवादयस्तेषां स्त्रियः सर्वा अपि कामेन श्रीभगवद्विषयकेण पीडिताः सत्यो व्यमुह्यन् । पूर्वं श्रीकृष्णप्राप्तौ निजायोग्यत्वादि विचाररहित्येन पश्चाद्देहादेरपि विस्मरणेन मोहवैशिष्ट्यं प्रापुः । अन्यत्तैः । तत्रातिदीर्घास्विति अन्यथा स्वच्छन्दबहुलसुखक्रीडानामप्रासिद्धिः स्यात् । अत एवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इत्यस्यार्थे ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्व्याचक्षते तदपि सम्भवेदेव । भगवच्छक्त्याशेषविरुद्धस्य समाधेयत्वात् विस्मयादिना गतिस्थगितत्वं तूत्प्रेक्षामात्रम् । तेषां ज्योतिश्चक्राधीनगतित्वात् स्वयन्तेरत्यल्पत्वात् । प्रतिलोमत्वाच्च । वस्तुतस्तु तल्लीलामाधुर्येण नदीप्रवाहस्येव ज्योतिश्चक्रस्य स्तम्भत्वं ज्ञेयम् । रात्रिष्विति बहुत्वं च ता रात्रीरित्युक्तस्य निशा इति वक्ष्यमाणस्य चानुसारेणेति एवं रासक्रीडायाः श्रीकृष्णविषयकभावविशेषवर्द्धनेन परममोहनत्वं दर्शितं तच्च युक्तम् । तत् प्रकृत्यैव तत्सम्बन्धिनृत्यगीतादेस्तत्सद्भाववर्द्धनातिशयात् तत्रापि तस्य साक्षात्कर्तृकत्वात् । तत्रापि लक्ष्म्यादिदुर्लभतादृशसौभाग्याभिस्ताभिः

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

सहितत्वात् । तत्रापि तादृशपरिपाटीसम्बाधितत्वादिति ॥ अत्र कामार्दित इत्येकवचनान्तपाठस्तेषामसम्मतः । किन्तु देव्योऽपीत्यनेन तासामेव कामार्दितत्वस्वीकरात् । किञ्च । शशाङ्कश्चेति तदादिभिन्नवाक्यत्वाङ्गीकाराच्च ॥ १९ ॥

अथ रासानन्तरं विश्रस्य कृतं लीलाविशेषमाह । कृत्वेति द्वाभ्याम् । आत्मानमात्मनः प्रकाशमित्यर्थः । न चान्तर्न बहिर्यस्येति न्यायेन मध्यमत्वेऽपि तच्छ्रीविग्रहस्य विभुत्वात् । "चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदि" त्येकप्रकाशाच्च । पौनरुक्त्यमिदं विश्रामसमय एकीभूतत्वात् । गोपयोषितो गोपजातीययोषितः । ततश्च काश्चिद्विवाहिताः काश्चित् कन्याश्चेति ज्ञेयम् । एकविंशाद्याविंशयोर्व्यूढाकन्यानां पृथक् पृथक् पूर्वानुरागवर्णनात् । "युवतीगोपकन्याश्च रात्रौ सङ्काल्य कालवि" दिति श्रीहरिवंशोक्तेश्च । एतच्च रूपेण लिखिते उज्ज्वलनीलमण्यादौ व्यक्तम् । लीलया शृङ्गाररसखेलया रराम रेमे । भगवानिति तदेव भगवत्तासारमाधुर्यसर्वस्वप्रकटनमिति भावः । तस्यैव प्रेमरसपरिपाकविलासविशेषात्मकत्वात् । तथा जगच्चित्ताकर्षकेण तेनैव स्वतः प्रेमविशेषविस्तारणात् । तच्चात्र व्यक्तं भावि श्रीभागवतामृते च विवृतम् आत्मारामोऽपीत्युक्तार्थम् । तद्रमणञ्च पृथक् पृथक् । तत्रैव निकटनिकुञ्जादिषु इति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं ता एवाकुलेन्द्रियाः किन्तु पश्यन्त्यो देवानां स्त्रियोऽपीत्याह । कृष्णविक्रीडितमिति । खेचराणां देवानां स्त्रियः किञ्च शशाङ्कश्चन्द्रः सगणः शुक्राङ्गारकगुर्वादिगणसहितः विस्मितो बभूव अनेनैतत्सूचितं विस्मितेन शशाङ्केन स्वगतौ विस्मृतायामितरेऽपि ग्रहाः स्वस्वगतिं विस्मृत्य तत्र तत्रैव तस्थुरतो दीर्घरात्रिर्बभूव ॥ १९ ॥

कथमेकोऽनेकाभिर्युगपद्रेम इत्यत आह । कृत्वेति । गोपयोषितो यावतीर्यावत्यस्तावन्तमात्मानं कृत्वा ताभिः सह लीलया रेमे अध्ययनेन वसतीतिवत् हेतौ तृतीया आत्मारामोऽपि षाड्गुण्यपूर्णोऽपि लीलार्थं रेम इत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सगणः रोहिण्यादिनक्षत्रगणेन सहितः यद्वा गणानं सङ्ख्यानं तेन सहितः ॥ १९ ॥

किमत्र सङ्ख्येयमत्राह । कृत्वेति । यद्वा योगैश्वर्यात् बहुरूपग्रहणेन बह्वीभिः स्त्रीभी रमणं घटत इति राज्ञः सिद्धत्वेऽपि मन्दाशङ्कां परिहरति । यावतीर्यावत्यः रराम्रेति व्यत्ययेन परदाराभिमर्शनेन दोषो नास्तीति वक्ष्यमाणमर्थमिहैव सूचयति । यद्वा रराम विक्रीडे रासक्रीडा विरामसूचनार्था वा इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

कामार्दिता इति बहुवचनान्त एव पाठः टीकासम्मतः । किन्तु देव्योऽपीत्यनेन तासामेव कामार्दितत्वस्वीकारात् । किञ्च शशाङ्कश्चेति । तदादिभिन्नवाक्यत्वाङ्गीकाराच्च ॥ १९ ॥

आत्मानमात्मनः प्रकाशमित्यर्थः ॥ २०—२१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

एवं कृष्णे विक्रीडिते देवस्त्रियोऽपि मोहिता इत्याह । कृष्णविक्रीडितमित्यादि । खेचरा देवास्तेषां स्त्रियः खशब्दोऽत्र स्वर्गार्थः स्वर्व्योम्नोरपि खं विदुः काः खेचरस्त्रियः मार्दिताः अपितु सर्वा एवेत्यर्थः शशाङ्कस्तु पुनः सगणः सनक्षत्रगणः विस्मितोऽभवत् विस्मयेन स्थगितोऽभवादित्यर्थः । शशाङ्कस्य विस्मितत्वेन स्थगितत्वं तेनच गत्यभावः तेनच रात्रेर्दैर्घ्यं व्यज्यते ॥ १९ ॥

अथ सर्वासां प्रत्येकं वयोऽनुरूपमाशयानुरूपमाकारगतप्रमाणानुरूपं कलाकौशलानुरूपं प्रकाशमाविष्कुर्वन् रेम इत्याह । कृत्वेत्यादि । भगवान् अचिन्त्यपरमैश्वर्यः आत्माराम आत्मभिरात्मप्रायैर्भैकैः सह रमतीति तथा अथवा स्वलंसपरिपूर्णोऽपि स्वच्छन्दोऽपि वा लीलया कौतुकेन यावतीर्यावत्यो यावद्वयस्यः यावदाशयाः यावदाकारप्रकारा यावत्कलाकौशलास्तावन्तं तत्प्रकारमात्मानं स्वमावं प्रकटय्य ररामेत्यर्थः या आकारादिभिर्यावतीः ताः प्रति तथाभूत्वेत्यर्थः ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं समुदायलीलां निरूप्य तस्याः परिज्ञानं केषामपि न जातमिति वक्तुं देवस्त्रीणां चन्द्रस्य च विस्मयमाह । कृष्णेति । न हि कस्याश्चित्पतिः परमानन्दो भवति नहि निरानन्देनानन्दो दातुं शक्यते "एष ह्येवानन्दयाती" तिश्रुतेः एवकारेणेतरनिषेधश्च तत्रापि विशेषेण क्रीडा नहि जीवो विशेषक्रीडां जानाति खेचराणां स्त्रिय इति तासां सर्वदर्शनार्थं भगवद्दत्तो वरो निरूपितः स्त्रीणां च दर्शनं न दोषाय तासां मोह एवोत्पन्नः नतु परिज्ञानं रसो वा लौकिकोऽपि चन्द्रो दृष्टवान् सोमात्मकत्वात् "देहेऽस्य सोमः प्रथम" इति श्रुतेश्च साधारणयश्च स्त्रियः तथापि तस्य दर्शनं तस्यैव हितकारि न भवतीति निरूपयितुमाह । शशाङ्क इति । सहि कलङ्की आनन्दमयोऽपि सगणो नक्षत्रसहितः तेनोद्दीपनेऽपि न तस्यान्यासु चित्तसम्भवः चमत्कारस्तेऽपि मुमुहे यथा पुनरेता मोहनानन्तरं पुनः पुनर्दर्शने उत्सुककामा जाताः गत्वास्माभिरपि कामरूपतया क्रीडाकर्तव्येति कामार्दिता जाताः तथा चन्द्रोऽपि भगवति निवेदनार्थं यत्नं कृतवान् अतः कामार्दितो जातः अनेनाग्रे निसर्गात् सुखमिति पक्षे उपपत्तिरुक्ता अस्यैव चन्द्रस्य अंशास्सतोनिवर्तिष्यन्त इति अन्यथा "सद्दर्शनान्मुक्ति" रित्येतत्सूत्रं विरुध्येत सह सवर्णभावात् किञ्च सगणः स्वस्त्रीसहितोऽपि विस्मितो जातः विस्मयरस एवोत्पन्नः नान्यो रस इति ॥ १९ ॥

एवमाधिभौतिकानामाधिदैविकस्य च भगवदुत्पादितरसाभिनिवेशमुक्त्वा "नन्दगोपसुतं देवि पतिं मे कुर्विति" प्रत्येकं प्रार्थनया मतं कृतमिति प्रत्येकं रेम इत्याह । कृत्वेति । गोपजातीया योषितो यावत्यः तावन्तमात्मानं कृत्वा तत्र तत्र मायोद्घाटनेन तथा तथा

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

प्रकटो भवति एतन्महासौरतम् एवं करणे सामर्थ्यं यतः स स-भगवानिति स इति तदर्थमेवावतीर्णः अत्र तासां व्रतार्थं ताभिः सहैव रेमे नत्वात्मारामता पूर्ववत् इममर्थमाह । आत्मारामोऽपीति । नत्वात्माराम एव चन्द्रप्रवेशात् रमणं सम्भवति अस्यामपि दशायामात्मारामत्वमेव अधिकं तत्रानुप्रविष्टं नतु तद्वानिरिति तत्रापि आत्मरमणं एव मुख्यत्वेत्याह । लीलयेति । यथा महानपि लीलया विसदृशं करोति स्वयं पदातिरिव मृगयायां गच्छति यथा अन्या अपि अवतारलीलाः तथैतामपि कृतवानित्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ कामार्दिताः कृष्णविषयकेण कामेन पीडिताः । कामार्दित इति पाठे शशाङ्कोऽपि कृष्णमालोक्य स्त्रीभावं प्राप्तः । कृष्णविषयकेण कामेन पीडितश्च । व्रजसुन्दरीणामावां तद्विलासानाञ्च योगमाययैव पुरुषदृष्टीः प्रत्यावरणं पूर्वं व्याख्यातमेव ॥१९॥

ततश्च ताभिः सह प्रत्येकं कुञ्जेषु रहस्यक्रीडाप्यभूदित्याह-कृत्वेति । यावतीर्यावत्सङ्ख्याका गोपयोषितो गोपवध्वो गोपकन्याश्च तावन्तमात्मानं तावत्सङ्ख्यमात्मप्रकाशं कृत्वा आत्मारामोऽपीति व्यञ्ज्यतार्थम् ॥ २० ॥

॥ १९ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

एवञ्च शुद्धप्रेमलीलायां सम्प्रवृत्तायामनुषङ्गेणैव कामविजयो जात इति दर्शयति । कृष्णेति । सर्वाकर्षकपरमानन्दमूर्तेः विशिष्टं क्रीडितं विशेषणश्च भग्नमानतया पलाय्य गतेन कामेनार्दिताः खेचरस्त्रियः मुमुहुः समरपराभूतोऽहि सामन्तो हीनबलानां वासान्विलुण्ठन् पलायत इति लोकप्रसिद्धिः खेचरत्वमत्र प्रेमशून्यत्वमेव युक्तं चैतत् कर्मफलभुक्तासु प्रेमलेशाभावात् शशाङ्कश्च तत्सहायः सगणः सोडुगणः स्थगित इत्यर्थाच्छिशुमारस्यापि तथात्वं सूचितम् एवं चाधिदैवस्य चन्द्रमसोऽपि विस्मितत्वेन मनसो विस्मयस्तेन च कुतो मनोजावकाश इति ध्वनितम् ॥ १९ ॥

तदेवं कामविजयेन शुद्धप्रेमात्मिकाक्रीडा दर्शिता इदानीं दास्यस्वभावानां मयेमा रंस्यथ क्षपा इत्यादिना दत्तवराणां वाञ्छापूरणमपि प्रकाशभेदेन सम्पादितवानित्याह । कृत्वेति । आत्मानमात्मनः प्रकाशभेदमित्यर्थः । "चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावह" दितिन्यायात् तल्लक्षणस्य अनेकत्र प्रकटनारूपस्यैकस्यैकदा सर्वथा तत्स्वरूपैव सप्रकाश इतीर्यते इति अथवा नचान्तर्न बहिर्यस्येत्यादिना मध्यमत्वेऽपि तच्छ्रीविग्रहस्यैव विभुत्वेनात्मानं स्वस्वरूपमेवेत्यर्थः । यद्वा प्रकाशभेदस्याभेदत्वज्ञापनायात्मपदेनोक्तिः तदुक्तं लघुभागवतामृते प्रकाशस्तु न भेदेषु गण्यते स हिनो पृथगिति व्रजयोषितः व्रजसम्बन्धिन्यो नन्दव्रजकुमारिकात्वेन प्रसिद्धाः पाठान्तरे गोपजातयो गोप्य इत्यर्थः । यावतीर्यत्संख्याकाः तावन्तं कृत्वात्मानमित्यर्थः । स प्रेमपरवान् भगवान् समग्रया श्रिया नित्ययुक्तः एवंच ता अपि तस्या एव प्रकाशभेदा इति ध्वनितं तासु कामलीला च प्रेमविवर्तरूपैव प्रेमैव गोपरामाणां काम-इत्यगमत्प्रथा"मिति तन्त्रोक्तेः तादृश्यामपि क्रीडायां तदेकपरतामाह । आत्माराम इति । आत्मनि तस्यामेव रामो रमणं यस्य सोऽपि लीलया शृङ्गाररसखेलया तत्तन्नायिकारूपेण तयैव प्रकटितया रेमे तदुक्तमुज्ज्वले—

यथा स्युर्नायकावस्था निखिला एव माधवे ।
तथैव नायिकावस्था राधायां प्रायशो मता इति ॥

रमणं चेदं पृथक् पृथक् कुञ्जेष्विति संक्षेपः ॥ २० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तासां देहाद्यननुसन्धाने कैमुत्यन्यायेन दृढीकर्तुं प्रेम प्रमदमदिरोद्धेरानभःप्रलयकारित्वेनान्तरिक्षदिवौकसां दशामाह । कृष्णविक्रीडितमिति । अत्र शशाङ्कश्चेति चकारानुकर्षणेन विस्मितत्वमोहितत्वकामार्दितत्वानां सर्वत्र वचनपरिणामेन विनियोगो ज्ञेयः कृष्णस्य "रसो वै सः कृषिर्भूवाचक" इत्यादिश्रुतिस्मृतिवाक्यैर्नित्यपरिपूर्णानन्दाब्धेर्विशेषेण सर्वमतिप्रलयकारिरतिरङ्गतरङ्गैः क्रीडितं क्षणे क्षणे विशिष्टं विलक्षणं क्रीडितं वीक्ष्य विशेषेण तत्परतया साक्षात्कृत्वा खेचराश्च तत्स्त्रियश्च सगणो नक्षत्रगणसतारान्वितः शशाङ्कश्च उपलक्षणमेतत् शिशुमारस्यापि अखिलकलादिगुणैस्तादृशीनां रासादिक्रीडानां पूर्वदर्शनाभावात् अवितर्क्यासु तासु मतिवितर्काप्रवेशात्प्रथमं विस्मिताः किमिदमतिचित्रमिति ततो मुमुहुः विगतदेहाद्यनुसंधाना जातास्ततो मोहेन स्वात्मनः कृष्णक्रीडायोग्यत्वायोग्यत्वानुसंधानाभावात् कामार्दिताश्चाभवन् ननु स्वपतिसमीपस्थखेचरस्त्रीणां कथं कृष्णविक्रीडितदर्शने कामार्दितत्वमिति चेन्न मोहितत्वनिर्देशेन तदननुसंधानेन समाहितत्वात् ननु स्त्रीणां तथा सम्भवेऽपि तथं पुरुषाणां सुराणां तत्सम्भव इतिचेन्न मोहितत्वेनैव दण्डकारण्यमुनीनामिव भावनया तदसम्भवाभावात् ननु अन्येषां सुराणां तत्सम्भवेऽपि चन्द्रस्य तत्कुलवृद्धस्य कथं तथात्व मितिचेन्न

नूनं मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनीति ।

सङ्कर्षणनाम्नार्येण भ्रातुरित्यनुक्त्वा भर्तुरिति कथनाल्लोकदृष्ट्या संबन्धान्तरप्रतीतावपि परमपुरुषे तस्मिन् सखीभावातिरिक्तसंबन्धान्तराभावात् तथाच तदा सर्वे भगणाः कृष्णरासदर्शनोत्साहोद्भूतप्रभया पूर्णशशाङ्कसन्निभा गतिभङ्गात् ध्रुवरूपाश्चाभवन्नेताश्चित्रं यत्स्मरणमात्रेणाध्रुवमर्त्यानां ध्रुवत्वं तद्दर्शनप्राप्तावमर्त्यानां ध्रुवत्वे शङ्कानास्पदत्वात् अनेनैव सगणः शशाङ्कोपलक्षितकालचक्रस्य विस्मितत्वेन गतिविस्मृत्या निशानां कल्पसमानत्वं व्याख्यातं च स्वामिचरणैः शशाङ्केन विस्मितेन गतौ विस्मृतायां ततः प्राकृताः सर्वे ग्रहास्तथैव तस्थुः ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति तोषणीकारैश्च अतएवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इत्यस्यार्थे ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्व्याचक्षते सम्भवेदेव भगवच्छक्त्याशेषविरुद्धस्य समाधेयत्वादिति वाक्येन सम्मतं स्वामिव्याख्यायां दीर्घासु रात्रिष्विति बहुवचनं तु भगवानपि ता रात्रीरित्यत्रोक्तस्य सर्वा निशा इत्यत्र वक्ष्यमाणस्य च बहुवचनस्यानुसारेणेति बोध्यम् ॥ १९ ॥

एवं रासविहारं निरूप्य सङ्क्षेपेणैव रतिविहारं दर्शयति । गोपयोषित इति गोपजातीया योषितो नतु गोपानां योषित इति तैस्तासंबन्धाभावात् लोकप्रतीत्यनुवादेन दोषाभावात्तथा भवतु वा यद्वा

श्रीरामनारायणकृतभावभावविभाविका ।

गोपरूपप्रादुर्भूतस्य स्वात्मन एव योषित इति यद्वा गुपू रक्षणे इत्यस्मात्सर्वविश्वरक्षकस्य विष्णोः स्वात्मन एव योषित इति तथा च रक्षणसमर्थस्य योषितां तेन सर्वभावरक्षणमेव योग्यं ननु तन्मनोरथभङ्ग इति ध्वनिः यद्वा गाः स्वसर्वेन्द्रियाणि घोरविरहतापसम्भावितमरणेऽपि कृष्ण रसास्वादायैव तद्गुणगानाद्यमृतेन पान्तीति तथा योषितस्तथाच तथा तप्ततपसां स्वरसास्वादसकामतयैव रक्षितस्वसर्वेन्द्रियाणामन्याविषयप्रवृत्तिभ्योऽपि रक्षितस्वसर्वेन्द्रियाणां सर्वेन्द्रियरसदानस्यावश्यकत्वं द्योतितं यद्वा गाः कृष्णमुखचन्द्ररश्मीन् मधुस्मितरूपानधरामृतपूरितान् शुक्लपक्षे चन्द्ररश्मीन् सुरा इव पिबन्तीति तथाभूता योषितः यद्वा गोपयोषित इति कामकामगदुर्गतया कामगोपनशीला योषितस्तथाच तद्विजयोद्यतस्य तत्सर्वदुर्गवशीकाराय तावदाविर्भावस्यावश्यकत्वाद्यावत्यस्तास्तावन्तं तत्संख्याकप्रकाशवन्तमात्मानं कृत्वा "सर्वतः पाणिपादं त"दित्यादिस्मृत्या "विश्वतश्चक्षु"रित्यादिश्रुत्याच विभुसर्वाङ्गस्याखण्डस्य प्रकाशभेदं विना विभागानुपपत्तेः युक्तश्चैतत अतं सातत्यगमने इत्यस्मात्सततसर्वगमनशीलस्य गम्यागम्यविभागशून्यस्य सततसर्वगमनाय तावत्त्वं तत्र सामर्थ्यं द्योतयन् विशेषयति । स भगवानिति । यतः स ताभी रसास्वादायाभिलषितो भगवान् भगमैश्वर्यं तद्वान् ईश्वरः कर्तुमकर्तुमन्यथा कर्तुंच समर्थः यद्वा भगवानित्युक्त्या तस्यैव भगवत्त्वेनान्यस्य कस्यापि भगवत्त्वाभावेन सर्वभगस्वामिनस्तद्रमणे दोषाभावसूचनं किञ्च यः स्वयं भगवत्त्वेन स्वात्मारामोऽपि स्वात्मनि रमणशीलस्तस्यान्यासु रमणे न शङ्कागन्धोऽपि यद्वा तस्य सार्वात्म्याद्रमणास्पदस्य सुखस्य सर्वत्र तद्वशत्वाच्च रमणेऽप्यात्मारामत्वाक्षतेः अतएवाह ताभिर्निमित्तभूताभिः स्वात्मन्येव रेमे तासामपि स्वात्मरूपत्वेन तासु रमणस्यापि स्वात्मरमणत्वमेव किमर्थं तादृग्रमणं तदाह । लीलया लीलानिमित्तेन स्मरतामुद्धारकलीळार्थं तत्र रेम इत्यत्र पूर्वमपि रासोत्सवे रमणस्यैव निरूपितत्वादत्र रमणे तद्वैलक्षण्यप्रतीत्याग्रे च तासामतिविहारेणेत्यत्र सुरतान्तभावप्रतीत्या मुख्यं रतिरमणमेवावगम्यते तत्रायं क्रमः आदौ रासविलासस्तु मृदुकामसंत्रासस्तत्र भगवान्मदनमदभङ्गं कृत्वा तदसंख्यातकामगदुर्गानारुह्य रतिरणोद्वशीकाराय तद्दुर्गसंख्यकात्मत्वाविष्कारेण तदारम्भेऽपि भ्रूयुगधनुर्विस्फूर्ज्य तत्रातिचित्रमूर्ध्यैकरसदृशासंख्यालक्ष्यगतिलक्ष्यहृन्मर्मचिह्नवेधकायाङ्गीकरणापाङ्गाशुगामोघौघमोचकदृक्पक्षशरौ संयोज्य परस्परं तच्छरवर्षोद्धर्षेऽपि जयपराजयावनवगम्य ततोऽप्यनिरस्यैव रम्यबाहुयुद्धायाभिगम्य वज्रमणिनखभल्लकभाल्मृदङ्गुलिकुसुमकुसुमबाणबाणान्वितविशालमृदुबाहुकुसुमधनुर्युगधरो मुक्तामालरोमावलिगङ्गायमुनारूपजलदुर्गदुर्गमतद्गौराश्यामकुचयुगयोश्चित्रं विचित्रसुखकरकरनखशरघातं विधाय तं दुर्गभङ्गकुचकरगतकरणोद्भूताद्भुतरणोत्साहः स्वयं मन्दरगिरिनिभमदनसुन्दरमन्दिरगोपदारोदारवपूंष्यधिरुह्य बहुतरबाहुयुद्धं प्रवर्त्य तदङ्गव्यूहसमूहं स्वाङ्गैरुपमर्द्य बहिरन्तस्तद्धृदयासिंहासनाधिरूढः प्रवर्तितकिङ्किणीनूपुरादिजयवाद्यध्वनिविशेषोऽनुपमाधरसुधासीधुमुपपीयमानोऽद्भुतः कामं निकामं विजित्य स्वभृत्यांस्तद्भयादमूमुचदिति तत्स्मरतां स्वत एव कामोपरमात्र कामभयशङ्कापीति भावः ॥ २० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

साक्षाद्भगवता विक्रीडितानां तासां व्याकुलेन्द्रियत्वे किंचित्र देवाद्यङ्गनानां तु दर्शनमात्रादेव व्याकुलता संजातेत्याशयेनाह । कृष्णस्य सदानन्दरूपस्य परमात्मनः विक्रीडितमलौकिकं क्रीडनं वीक्ष्य विशेषेणोपलभ्य कामार्दिताः सत्यो देवस्त्रियो मुमुहुः विकलचित्ताः बभूवुः खेचरस्त्रिय इत्यनेन तत्पतीनां पुरुषत्वाद्बहुलीलादर्शनाभावोयोगमायया सम्पादित इतिसूचितं तत्सर्वमवलोक्य शशाङ्कश्चन्द्रः सगणः ज्योतिश्चक्रेण सर्वेण सहितः विस्मितश्चकितहृदयोऽभवत् अनेन चन्द्रादिग्रहाणां गतिविस्मृतत्वात्कालदैर्घ्यं सूचितं तत्रापि योगमायया सर्वापेक्षया यामचतुष्टयात्मिका यथा रजनी तस्यामेव क्रीडानुकूलं दैर्घ्यं संजातमिति द्रष्टव्यम् ॥ १९ ॥

अथ रासानन्तरं विश्रम्य रहस्यकृतां लीलामाह । कृत्वेति द्वाभ्याम । यावत्यो गोपाङ्गनास्तावन्तमात्मानं प्रकटीकृत्य ताभिः सह भगवान् शृङ्गाररसलीलया रेमे रमणं चेदं पृथक् कुञ्जेषु तत्रैव वा योगमायया विरचितेषु परस्परमदृश्येषु तदनुकूलप्रदेशेष्विति ज्ञेयम् अनेन "कात्यायनि महामाये महायोगिन्यधीश्वरि ! । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः" इति प्रत्येकं तासां प्रार्थना "यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा" इति भगवता दत्तस्य वरस्य च सार्थकता बोधिता ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्रजसुन्दरीभिः सह भगवतो विक्रीडितं दृष्ट्वा खेचराणां स्त्रियः मुमुहुः चन्द्रश्च सगणो विस्मितोऽभवत् ॥ १९ ॥

यावतीः यावत्यः तावन्तमात्मानं कृत्वा रेमे "नन्दगोपसुतं देवि ! पतिं मे कुरु" इत्येकवचनेन ताभिः प्रत्येकं प्रार्थनात् ॥ २० ॥

भाषा टीका ।

श्रीकृष्ण भगवान् की विशेष क्रीडा को देखकर देव स्त्री मोहित होगईं और काम से पीडित होगईं और आकाश में चंद्रमा भी स्त्री गणों के सहित विस्मित होगया ॥ १९ ॥

श्री भगवान् आत्मा राम हैं तौ भी जितनी व्रज स्त्री हैं उतनेही अपने रूपों को बनाकर उन सब के संग बरोबर रमण करते भये ॥ २० ॥

तासामतिविहारेण श्रान्तानां वदनानि सः ।
प्रामृजत्करुणः प्रेम्णा शंतमेनाङ्ग ! पाणिना ॥ २१ ॥
गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्गण्डश्रिया सुधितहासनिरीक्षणेन ।
मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृपातिशयमाह । तासामिति ॥ २१ ॥

ततोऽतिहृष्टानां गोपीनां चरितमाह । गोप्य इति । स्फुरतां स्वर्णकुण्डलानां कुन्तलानाञ्च त्विषा गण्डेषु या श्रीस्तया सुधितेन अमृतायितेन हाससहितेन निरीक्षणेनच ऋषभस्य पत्युः कृष्णस्य मानं दधत्यः पूजां कुर्वत्यस्तत्कर्माणि जगुः तस्य कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

रतिः सुरतं सैव विहारस्तेन इति तत्र रसिकता सूचिता यद्वा रतौ विहारः विविधविदग्धचेष्टा तेन स विदग्धशिरोमणिः परमप्रीतो वा श्रीकृष्णः शन्तमेन परमसुखात्मकेन पाणिना प्रकर्षेण अमृजत् प्रस्वेदबिन्द्वपसारणालकसम्वरणादिनोज्ज्वलयामास यतः करुणः कृपालुः नच केवळमन्यजनेष्विव कारुण्येन किंतु परमप्रियत्वेनेत्याह । प्रेम्णेति । परमसन्तोषणमुक्तम् अङ्गेति प्रेमसम्बोधने एवमेकस्यैकेनैव पाणिना सर्वासां युगपद्वदनप्रमार्जनादैश्वर्येण लौकिकत्वेनच पूर्ववन्मधुरभगवत्तासारप्रकटनं ज्ञेयम् एवमन्यत्रापि ॥ २१ ॥

ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षं सञ्जनयामासुरित्याह । गोप्य इति । तत्र स्फुरदिति सौन्दर्येण सुधितेति भावेन जगुरिति संकीर्त्तनेन ऋषभस्य पुरुषश्रेष्ठस्य इति तस्य परमवैदग्ध्यादिकमुक्तं तासामपि सिद्धमेव अतएव तस्य मानं दधत्यः उक्तप्रकारैः संमानं कुर्वत्यः यद्वा अहो मम धन्यत्वमित्येतादृशं तस्य गर्वमर्पयन्त्यः ऋषभत्वात् तत्कृतानामपि श्रेष्ठत्वं सूचितं तदेव दर्शयति । पुण्यानि साक्षात् पुण्यरूपाणि सुखात्मकानि वा जगुः तत्र हेतुः तस्य कररुहैः स्पर्शात् गाने तदानीमेव तेन क्रियमाणात् किंवा पूर्वकृतात् यद्वा मुखमर्जने गण्डेषु जातात् प्रकृष्टो मोदो यासां ताः इति रत्यादिपरिश्रान्तानामपि गाने श्रमाभावो रसविशेषश्च बोधितः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

रतिर्दम्पत्योर्मिथोऽनुरागस्तन्मयो विहारः विविधविदग्धचेष्टा अतिविहारेणेति पाठेऽपि स एवार्थः तेन श्रान्तानां शन्तमेन परमसुखात्मकेन पाणिना प्रकर्षेणामृजत् । स्वेदबिन्द्वपसारणालकसम्वरणादिना उज्ज्वलयामास । यतः करुणः परदुःखासहिष्णुस्वभावः सत्यपि कारुण्ये न साधारण्ये तासान्तु तानि प्रामृजदिति परमवैशिष्ट्यं दर्शितम् । प्रेमा हि साद्गुण्यानुसन्धानेनाहन्ता ममतैकतरविषयत्वे च जाता चेतसि स्निग्धता तत्रापीदृशभावमयीति परम एव विशिष्टः स्वयं कारुण्यादिकमन्तर्भावयति । शन्तमेनेति । स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वं तत्र च प्रमार्जनं तत्रापि प्रेम्णा तत्र च शन्तमेनेति परमसन्तोषणमुक्तम् । अङ्गेति प्रेमसम्बोधने ॥ २१ ॥

ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षं सञ्जनयामासुरित्याह । गोप्य इति । तत्रास्फुरदिति सौन्दर्येण सुधितेति भावेन जगुरिति सङ्कीर्त्तनेन । ऋषभस्य इति तैर्व्याख्यातम् अत्र ऋषभस्य पत्युः श्रीकृष्णस्येत्यत्रायमभिप्रायः । कृष्णवध्व इत्यस्मिन् स्वयमेव श्रीमुनीन्द्रेण व्यक्तीकृते वयं कथं गोपयामः । तस्मादस्माभिरव्याख्याता अपि दयितरमणादिशब्दाः केन वान्यथा मन्तव्या इति । तदाच परस्परमनन्यभावेनाव्यक्तदाम्पत्यस्फूर्त्या तस्य मानं दधत्य उक्तप्रकारैः पूजां कुर्वत्यः । यद्वा । अहो मम धन्यता यस्येदृश्यो वध्व इत्येतादृशं तस्य गर्वमर्पयन्त्यः पुण्यानि पुण्यकराणि चारूणिच जगुः । पुण्यन्तु चार्वपीत्यमरः । तस्यैकशेषत्वात् गाने हेतुः तस्य कररुहैः स्पर्शानुगाने गुणवत्योऽप्येताः कृतमौना इति प्रणयकोपेन तत्प्रवर्त्तनाय किञ्चिन्मोदनात् प्रकृष्टो मोदः कासाञ्चिद्यासां ताः । इति रत्यादिश्रान्तानामपि गाने रसोल्लासो बोधितः । तासामित्यादिद्वये हेला नामायमनुभावः । यथा "चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति । तत्राद्य विक्रियाभावो बीजस्यादिविकारवत् ॥ ग्रीवा रेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् । भावादीषत्प्रकाशो यः स हाव इति कथ्यते । हाव एव भवेद्धेला व्यक्तः शृङ्गारसूचक" इति ॥ २२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ऋषभस्य भर्तुर्गोप्यः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य तासु कृपातिशयमाह । तासामिति । स च भगवान् रतिविहारेण रति विहाराभ्यां श्रान्तानां तासां गोपीनां वदनानि प्रस्विन्नानि अङ्ग हे राजन् ! करुणः कृपावान् शंतमेन निरतिशयसुखकरेण पाणिना प्रामृजत्परिमृष्टवान् ॥ २१ ॥

ततोऽतिहृष्टानां गोपीनां चरितमाह । गोप्य इति । तस्य भगवतः कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ता गोप्यः स्फुरतां स्वर्णकुण्डलानां कुन्तलानाञ्च त्विषा गण्डेषु या श्रीस्तया सुधितेनामृतायितेन हास्ययुक्तनिरीक्षणेनच ऋषभस्य भर्तुः कृष्णस्य मानं दधत्यः पूजां कुर्वत्यः पुरटकुण्डलादित्विड्गण्डादिभिस्तस्य हर्षं जनयन्त्य इत्यर्थः । तस्य कर्माणि चेष्टितानि जगुः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदं च भक्तपारवश्यं हेरेरजस्रं स्मरेदित्याशयेन हरिचरितं वक्ति । तासामिति । प्रामृजत्सम्मार्जितवान् ॥ २१ ॥

ऋषभस्य प्रवृद्धानुन्मथितवीर्यस्य हरेः स्फुरतोश्चलतोर्मकरकुण्डलयोः कुन्तलानां त्विषा दीप्त्या दीप्तगण्डश्रिया युक्तसुरतयोग्यहासोपेताभीष्टाङ्गनिरीक्षणेनानन्दमात्मनो दधत्यः तस्य हरेः कररुहाणां नखानां स्पर्शेन स्मरोल्लासजनकलक्षणेन नखक्षतेनाभिव्यक्तः प्रमोदः प्रकृष्ट आनन्दो यासां तास्तथा ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

एवं रममाणस्तासां श्रममालोक्य स्वयमेव तदपनोदविनोदं चकारेत्याह । तासामित्यादि । शन्तमेन सुशीतलेन पाणिना वदनमार्जनेनैव श्रमो दूरीकृतः पुनरुत्साहवृद्धिं कारयामासेत्यर्थः ॥२१॥

एवं श्रमापनोदे सति पुनरुत्साहवत्यस्तमेव जगुरित्याह । गोप्य इत्यादि । गोप्य ऋषभस्य कृतानि लीला जगुः कीदृशानि पुण्यानि पुण्यजनकानि तान्येव वक्ष्यति च विक्रीडितं व्रजवधूभिरित्यादि ऋषभस्य परात्परस्य श्रीकृष्णस्येत्यर्थः । किङ्कुर्वत्यः स्फुरन्त्या पुरटकुण्डलानां कुन्तलानाञ्च त्विषा गण्डयोर्या श्रीस्तया सुधितः सुधया व्याप्तो यो हासस्तत्सहितेन निरीक्षणेनैव मानं दधत्यः सम्मानं वहन्त्यः कुर्वत्य इति वा आद्ये स्फुरत्पुरटकुण्डलेत्यादि तृतीयान्तपदद्वयं कृष्णस्येति मन्तव्यं द्वितीये तासामेव पुनः कीदृश्यः तत्कररुहस्पर्शेन प्रकृष्टो मोदो यासाम् ॥ २२ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ततस्तासां सुरतान्तो जात इत्याह । तासामिति । अतिविहारेणानेकबन्धैः सम्यक्श्रान्ता जाताः ततोऽग्रिमलीलार्थं तासां वदनानि स्वहस्तेन प्रामृजत् यतः स कृष्णः तदर्थमेवावतीर्णः सर्वत्रैव तथाविधं जातमिति ज्ञापयितुं बहुवचनं तथा करणे हेतुः करुण इति करुणायुक्तः सा करुणा उदासीना न भवतीत्याह । प्रेम्णेति । मार्जने क्लेश एव निवर्त्तेत इति ज्ञापयितुं शन्तमेनेत्युक्तम् अङ्गेति संबोधनमप्रतारणाय ॥ २१ ॥

एवं तासां दुःखनिवारणपूर्वकं परमानन्दं स्थापितवान् ततोऽतिमुदितानां कृत्यमाह । गोप्य इति । गोप्यो मानं दधत्यः तत्कृतानि जगुः गाने हि रजोगुणाभिनिवेशो हेतुः तदर्थं सहजमेकं भगवत्कृतञ्च हेतुद्वयमाह तत्र प्रथमं सहजं निरूपयति स्फुरद्यत् पुरटं सुवर्णं टङ्कोत्कीर्णमुज्ज्वलीकृतं च तस्य ये कुण्डले कुन्तलाश्च तेषां त्विषा सहिता या गण्डश्रीः उज्ज्वला गण्डश्रीः पीता वा उज्ज्वला नीलाचेतरे एवं कान्तित्रयं मूलभूतगुणकार्यरूपं तेनासां सर्वोत्कर्षयोग्यतां सुधितं सुधामिव प्राप्तं यद्धासपूर्वकं निरीक्षणमत्राप्यन्तः स्थितो रागः निरीक्षणं हासश्चेति त्रितयमुक्तं भगवदीयमेतत् अत उभाभ्यां संमाननमभिमानं वा दधत्यः स्वहृदयकृतविपरीतबुद्ध्या जातदोषनिराकरणार्थं तत्कृतानि जगुः तेषां न केवलं पापनिवर्त्तकत्वं किंतु पुण्यरूपत्वमपीत्याह । पुण्यानीति भगवता कृतानि पापनिवर्त्तकानि पुण्यजनकानि च अतः तासां दोषाभावः अग्रिमलीलायां पुण्योपचयश्चोक्तः पूर्वक्लेशाविस्मारणार्थमानन्दाविर्भावमाह । तस्य भगवतः कररुहा नखाः तेषां स्पर्शेन जातपीडया स्मृतसंभोगाः प्रमुदिता जाताः अन्तःपूर्णानन्दा गानेनापि जाता इति अन्ते विशेषणम् ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तासां रतिविहारेण तासामति विहारेणेति च पाठः । श्रान्तानामिति । तासां रतिश्रान्तिमालक्ष्य करुणः रमणाद्विरतोऽभूदित्यर्थः । शन्तमेन सुखमयेन प्रामृजदित्युपलक्षणं वीजनानुलेपनप्रत्यङ्गप्रसाधनवीटिकाप्रदानान्यपि चक्रे ॥ २१ ॥

ततश्च ताः स्वाधीनकान्ताः कान्तपरिधापितरत्नालङ्काराः कुञ्जेभ्यो निष्क्रम्य मिलिता रासोत्सवसमाप्तिसूचकं मङ्गलं जगुरित्याह । गोप्य इति । स्फुरतां स्वर्णकुण्डलानां कुन्तलानाञ्च त्विषा गण्डेषु श्रीस्तया सुधितेन अमृतायितेन हाससहितनिरीक्षणेन ऋषभस्य पुरुषश्रेष्ठस्य कृष्णस्य मानमादरं दधत्यः कृतानि तत्कर्माणि जगुः । पुण्यानि चारूणि तस्य कररुहाणां नखानां स्पर्शेन प्रकृष्टो मोदो यासां ताः ॥ २२ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तास्वपि श्रीभगवतः प्रेमासक्तिरेवेत्याह । तासामिति । स विदग्धशिरोमणिः तासाम् अनिर्वचनीयसौभाग्यवतीनां राजकन्यापेक्षयेदम् अतिविहारेण श्रान्तानामिति सौकुमार्य्यं वदनानि शन्तमेन परमसुखात्मकेन पाणिना प्रकर्षेण आमृजत् स्वेदापसारणादिनोज्ज्वलयामास तत्र हेतुः करुणः स्वभावतस्तासां श्रमदर्शनेन वा ननु किङ्कामेन नेत्याह । प्रेम्णेति ॥ २१ ॥

तासामाह गोप्य इति । गोपकन्याः ऋषभस्य गान्धर्ववृत्त्या वृतस्यास्य पत्युः कृतानि वैदग्ध्यचेष्टितानि जगुः पुण्यानि चारूणि पुण्यन्तु चार्वपीति कोशात् यद्वा स्वीयात्वाभिमानेनानौचित्यसन्देहाभावात्पुण्यकराण्येवेत्यर्थः । किंकुर्वत्यः सुधितहासनिरीक्षणेन मानं दधत्यः सुधा सञ्जातास्मिन्निति सुधितः परमोज्ज्वलः सचासौ हासस्तत्सहितेन निरीक्षणेनेति हासस्य पुष्पस्थानीयत्वं निरीक्षणस्याञ्जलिबन्धत्वमुक्तं मानं पूजां चित्तसमुन्नतिं च कीदृशेन स्फुरन्ती पुरटस्य शुभ्रहाटकविशेषस्य कुण्डलानां कुन्तलानां वक्रालकानाञ्च या त्विट् तया गण्डयोः श्रीर्यस्मिंस्तेन कुण्डलकुन्तलयोरन्योऽन्यमालिङ्गितयोर्गण्डपर्य्यङ्कविलसितमुद्रया भावमुद्दीपयन्त्य इत्यर्थः । हेलानामानुभावोऽयं यथा ।—

> चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति ।
> तत्राद्य विक्रियाभावो बीजस्यादिविकारवत् ॥
> ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् ।
> भावादीषत्प्रकाशो यः स हाव इति कथ्यते ॥
> हाव एव भवेद्धेला व्यक्तशृङ्गारसूचकः ।

इति तत्कररुहेति कोपकारणेऽपि प्रमोदोत्पत्त्या परमासक्तिः सूचिता ॥ २२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तासां सुरतान्तदशायां प्रभोराचरितमाह । तासामिति । प्रीतिपूर्वकसंबोधन अङ्गेति स तासां वदनानि वदनोपलक्षितसर्वाङ्गानि पाणिना प्रामृजदित्यन्वयः किम्भूतानां तासां तत्राह । कृष्णस्य भगवतोऽखिलकलानिपुणस्य किञ्चिज्ज्ञवात्स्यायनादिकामशास्त्राचार्य्यैर्निरूपितरसकणकामार्णवविहारिणोऽतिविहारेण सर्वातिक्रम्य विशेषेण हारो मनोहरो यो विहारो विविधासनबन्धाश्लेषादिचेष्टारूपस्तेनेत्युपलक्षलणं घर्म्मेण स्थलकमळरसस्रवत्सुमनोऽङ्ग सुमनोभ्यः प्रवहत्स्नेहस्वेदमधुधाराणां कुसुममृदुत्वमभिमणश्रीहारहारितनुश्रीहोत्रुटितसुमनोमणिहाराणां सखिनखरेखासर्वतोभद्रालंकृतहरिवक्षोनीलमणिवेदिकागतहरिनखरेखालोचनरोचनरोचनालिपियुतकुचमङ्गलकलशभाराणां स्वकुचकुम्भालिङ्गनलग्नकुंकुमरागव्याजहरिहृदर्पितस्वहृदुच्चलितानुरागरससाराणां कुञ्जेभ्यः कुन्ददन्तसिन्दूरसुन्दररेखावत् स्वमुखाधरोल्लसितरदरेखाकाराणां प्रामृजदित्यत्र मार्जनं प्रस्वेदापनयनं तत्र प्रकर्षस्तु आल्हादनेन विकासनम् अलङ्करणं च यथा हरिः सूर्यः स्वकरैः कञ्जानां हिमकणानपनयंस्तान् विकाशयति तथा हरिरपि करेण तत्स्वेदमपनयन् विकाशयतीति भावः । अत एव पाणिविशेषणं शंतमेनेति भगवत आनन्दमात्रकरपादमुखत्वात् तत्र स्वपाणिना प्रमार्जने हेतुद्वयमाह । करुण इति । प्रेम्णेति च तासां श्रान्तत्वदर्शनेन जाता करुणा मुखप्रस्वेदहरणमिषेण पुनरङ्गस्पर्शसौख्योत्साहोऽभूदतः प्रेमा च तत्र हेतुरिति भावः ॥ २१ ॥

भगवता लब्धमानानां प्रमोदमुदितानां तासां त्रिधा तदाल्हादजनने कृत्यं चाह । गोप्य इति । गोप्यो गोपस्वरूपस्य सर्वविश्वैकगोप्तुः श्रुतिभूमीन्द्रियगवां पालककस्याविष्कृतगोपलीलस्याल्हादिकाः शक्तयः ऋषभस्य रसिकशिरोमणेस्तस्य मानं संमानं दधत्यः कृतानि तस्योदारलीलात्मककर्माणि जगुरित्यन्वयः स्फुरती देदीप्यमाने पुरटजटिते मणिकुण्डले तत्र स्फुरदित्युक्त्यैव तयोरविसादृश्यद्योतनं तयोः कुन्तलाः कृष्णस्निग्धकुटिलालकाः त्विषा तदुद्भासगता या त्विट् दीप्तिस्तदुद्भासिते गण्डे एव चन्द्रौ तयोः श्रिया अत्र यद्यपि निशासु प्रकाशमानोऽपि पूर्णचन्द्रः सुधामयमण्डलत्वाद्रविप्रभयैव भासते इति नात्यद्भुतत्वं तथापि रविचन्द्रनिशानां युगपदपरोक्षतया भासमानत्वं विरुद्धत्वेन चित्रं परन्तु भगवद्भजने विरोधासम्भवेनैव न तस्यापि चित्रता तथा कृष्णकुटिलस्वभावानां स्वद्वारान्योपकारकत्वं चित्रमपि स्निग्धत्वेनैव स्नेहमाहात्म्यात्तस्यापि कौटिल्ये तस्याकिञ्चित्करतया प्रत्युत स्निग्धानां कौटिल्यस्यापि प्रकाशप्रवेशपथरूपत्वेन साहाय्येन न चित्रत्वं तथा चन्द्रेण भ्रात्रा श्रीसमर्पणस्य चित्रत्वेऽपि श्रीपतय एव समर्प्यमाणत्वान्न चित्रत्वं तथा चन्द्रस्य छिद्रं चित्रमपि कृष्णाय श्रीसमर्पणे हर्षाधिक्यान्न चित्रमिति ध्येयम् एवं स्वशरीरसौन्दर्य्येणालम्बनविभावेन भगवतो मानाधानं तथा सुधितोऽमृतमयो यो हासस्तद्युक्तेन सापाङ्गनिरीक्षणेन मनोभावसूचकेन हावेन तथा स्पष्टं तद्गुणगानलक्षणेन हेलानामानुभावेन तदुक्तम्—

> चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति ।
> तत्राद्यविक्रियाभावो बीजस्यादि विकारवत् ।
> ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत ॥
> भावादीषत्प्रकाशो यः स हाव इति कथ्यते ।
> हाव एव भवेद्धेला व्यक्तशृङ्गारसूचक इति ॥

यद्वा यथा तस्माद्विक्रीडनादिना लब्धमानत्वेन स्वस्मिन् दैन्योदर्के मानं जातं स्वीयतादृशश्रीनिरीक्षणगुणगानैः ऋषभस्यासम्भावितमानादिविक्रियस्यापि मानं दधत्यो मानं भवत्विति सम्भावयन्त्यः कृतानि जगुः यद्वा ऋषभस्य तस्य तादृशगण्डश्रिया सुधितहासनिरीक्षणेनच स्वस्मिंस्तत्कृतं मानं वा तदनुग्रहविवशत्वेन स्वस्मिन्धन्यत्वरूपं मानं वा सम्भावयन्त्यस्तत्प्रत्युपकारान्तरासम्भवाद्भक्त्या तत्कृतान्येव जगुः किम्भूतानि तस्य कृतानि पुण्यानि किमु वाच्यं तत् पुण्यत्वं स्मरतां महत्पापिनामपि पुण्यजनकानि संसारार्णवतारकाणि—

> सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् ।
> सद्यस्तपस्वी भवति पङ्क्तिपावनपावनः ॥
> जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
> त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुनेत्यादि

वचनात् किम्भूतास्ताः विहारे तत्कररुहाणां नखानां स्पर्शेन सुरतान्ते च प्रामृजत्करुणः प्रेम्णा शन्तमेनाङ्गपाणिनेत्यत्र वर्णितकररुहोपस्पर्शस्तेन प्रमोदो वा यासामिति श्रान्तानामपि गुणगानप्रवृत्तौ प्रमोदोद्धर्षौ हेतुर्दर्शितः अयमत्र भावः विधातृकृतत्वेन सम्भावितविरहळेखस्य भगवताङ्गाङ्गमर्दने मार्जनपूर्वकस्वकररुहमणिरोचनलिपिभिरुपलक्षणमेतद्रदरेखाया अपि ततश्च कनकपत्रात्मकोरःकपोळाद्यङ्गेषु नित्याखण्डितसौभाग्यदानपत्रं कृतं तत्र च कपोलयोर्वर्तुलाकाररदपङ्क्तिद्वयमण्डळचिन्हेन तत्पत्रमुखे मुद्रिकाचिन्हं स्थापितं तेन जातप्रमोदाः स्फटिकपात्रात्मककपोलधृतया कुन्तलप्रावरणावृतत्वेऽपि स्फुरन्त्या मणिस्वर्णकुण्डलश्रिया तदुपहारसमर्पणेन तथा सुधितहासे विद्रुमाधरसम्पुटितपद्मरागमणिसम्पुटकपोलान्तर्गतरदवज्रमणिसञ्चयस्याधरप्रावरणविकासपूर्वकसमर्पणेन तथा निरीक्षणेन कृष्णतारेन्द्रनीलान्वितदृग्जलजार्पणेन हृत्पद्मं च दृक्पद्मे कृष्णतारवद्भवतात्कृष्णनिवेशद्योतकेन ऋषभस्य संमानं दधत्यः स्तुत्यै कृतानि जगुः ॥ २२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

अथ तासु भगवतः कृपातिशयमाह । तासामिति । अत्यर्थं रमणात्मकेन विहारेण रतिविहारेणेति क्वचित्पाठः इति विहारेणेति क्वचित्पाठः श्रान्तानां वदनानि सः भगवान् प्रामृजत् तत्रापि स्वहस्तकमलेन तत्रापि शन्तमेन स्पर्शमात्रेण स्वभावतः सुखकरेण तत्रापि कान्तोचितप्रेमविशेषेण यतः करुणस्तत्परिश्रमं द्रष्टुमक्षमः प्रेम्णेति वीजनोपलेपनादेरुपलक्षणं तथा च तासां परिश्रममालक्ष्य तद्विहारान्निवृत्तः सन् तथा कृतवानित्यर्थः ॥ २१ ॥

ततः पूर्णाखिलमनोरथानां पुनर्मिलितानां तासां प्रहृष्टानां कृत्यमाह । गोप्य इति । ततश्च ताः स्वाधीनकान्ताः कान्तपरिधापितरत्नालङ्काराः कुञ्जेभ्यो निष्क्रम्य मिलिता रासोत्सवसमाप्तिसूचकं मङ्गळं जगुरित्याह । स्फुरतां कनककुण्डलानां कुन्तलानां च त्विषा या गण्डश्रीस्तया सुधितेनामृतायितेन सहासावलोकनेन च गोप्यः

१वात्स्यायनादिभिर्निरूपितारसकणायस्यैतादृशो यः कामार्णवस्तद्विहारिणः

ताभि[1]र्युतः श्रममपोहितुमङ्गसङ्ग[2]घृष्टस्रजः स कुचकुङ्कुमरञ्जितायाः।
गन्धर्वपालिभिरनुद्रुत आविशद्वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः॥ २३॥
सोऽम्भस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग!।
वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः॥ २४॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका।

ऋषभस्य पत्युर्भगवतो मानं पूजां कुर्वत्यः तस्य कृतानि जगुः यतः पुण्यानि स्फुरदिति तन्वा सुधेतेति मनसा जगुरिति वाचेति त्रिविधं प्रहर्षणमुक्तं पुनश्च तस्य भगवतो नखस्पर्शेन प्रमोदो यासां ताः॥ २२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

करुण इति तासां श्रमाधिक्यं सूचयति प्रेम्णेति तासां श्रमाधिक्येऽपि भगवत्प्रावण्यं सूचयति शन्तमेनेति सद्यः श्रमनिवृत्तिं द्योतयति॥ २१॥

भगवदङ्गसङ्गेन प्रमुदितानां गोपीनां भगवत्प्रावण्यमाह। गोप्य इति। तस्य श्रीकृष्णस्य करुहैर्नखैरुपलक्षणमेतदन्येषामङ्गानां नखादिभिरङ्गैः स्पर्शेन प्रमोदो यासां ताः गोप्यः स्फुरतां देदीप्यमानानां पुरटकुण्डलानां कुन्तलानां च त्विषा कान्त्या गण्डेषु या श्रीः शोभा तया सुधितं सुधामृतं संजातमस्य तत्तथा तेन हासयुक्तनिरीक्षणेन ऋषभस्य रासक्रीडानायकस्य मानं दधत्यः सत्कारं कुर्वत्यः हर्षयन्त्य इत्यर्थः। पुण्यानि श्रोतॄणां श्रावयितॄणां च पुण्यप्रदानि तस्य कृतानि कर्माणि जगुः॥ २२॥

भाषा टीका।

हे राजन्! अति कृपाल भगवान् कृष्णचन्द्र ने, अत्यन्त विहार करने से श्रमित जो गोपि तिनके मुखादिकों का अपने सुखदायक हस्त कमल से मार्जन किया॥ २१॥

उन सम्पूर्ण गोपियों ने भी प्रकाशमान जो सुवर्ण के कुण्डल तथा केश इनकी जो कांति तिस से शोभित जो गण्डस्थल तिसकी शोभा से अमृत सरी की हास से कटाक्ष दृष्टि से भगवान् का मान सत्कार किया फिर भगवान् के कर कमल के स्पर्श होने से उनका आनन्द वढ गया तव भगवान् के पवित्र चरित्रों को गान करती भई॥ २२॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अथ जलकेलिमाह। ताभिरिति। तासामङ्गसङ्गेन घृष्टा सम्मर्दिता या स्रक् तस्या अत एव तासां कुचकुङ्कुमेन रञ्जितायाः संबन्धिभिर्गन्धर्वपालिभिर्गन्धर्वपा गन्धर्वपतय इव गायन्तो येऽलयस्तैरनुद्रुतोऽनुगतः स कृष्णो वाः उदकमाविशत् भिन्नसेतुर्विदारितवप्रः स्वयं चातिक्रान्तलोकवेदमर्यादः॥ २३॥

स्वरतिरात्मारामोऽपि अत्र गोपीमण्डलेऽम्भसि वा॥ २४॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी।

ततः परमहृष्टस्य श्रीभगवतोऽपि प्रेमचेष्टितमाह। ताभिरिति त्रिभिः। श्रमं तासामात्मनश्चापोहितुमपनेतुं तत्र सच्चिदानन्दघनमूर्तेरपि क्रीडायामावेशेन परमवैदग्ध्यादिसूचनार्थं प्रस्वेदकणिकादिना सौन्दर्यप्रदर्शनार्थञ्च श्रमः सम्भाव्य एव अङ्गसङ्गेत्यनेन पद्मिनीस्त्रीवर्गपूज्यपादानां तासामङ्गतः स्वाभाविकामोदसञ्चारोऽभिप्रेतः किञ्च स्वकुचेति अतएवानुद्रुतः स्रक् कौन्दी श्रिया कुन्दस्रजः कुलपतेरिति पूर्वोक्तेः परमशुभ्रत्वेन कुंकुमरञ्जितत्वसम्पत्तेः स्रक्सम्बन्धित्वेन तदानीमलीनां तत्र स्थितियोग्यता तथा गन्धर्वप्रतिसदृशता तत्र तेषामेव गीतिश्च बोधिता एवं जलक्रीडायां कामोद्दीपनसामग्री च दर्शिता सः परमविनोदी वार्यामुनम् आविवेश आसक्त्या प्राविशत् दृष्टान्तो गजेन्द्रस्य बह्वीभिर्गजीभिः सह जलविहारासक्त्याद्यनुसारेण अन्यत्तैर्व्याख्यातं यद्वा गन्धर्वपा गायनश्रेष्ठाः। —

गन्धर्वो मृगभेदे स्यात् गायते खेचरेऽपिचेति विश्वः।

ते च अलयश्च तैः इति जलक्रीडायोग्यमुत्तमगीतमुक्तं यद्वा काभिः श्रीभगवदङ्गसङ्गेन घृष्टस्रजो याश्च निजकुचकुङ्कुमेन रञ्जिता याः रत्यावेशेन सर्वाङ्गेषु सम्पृक्ताः ताभिः अतएव तासां श्रममपनेतुं न केवलं तासामेव स्वस्यापीत्याह। श्रान्त इति। अन्यत्स्पष्टम्॥ २३॥

जलक्रीडामाह। स इति। परमकौतुकी अम्भसि जलमध्ये इतस्ततः सर्वदिक्षु अलमतिशयेन परितः सर्वाङ्गेषु सिच्यमानोऽम्भसैव स्वयं स्वातन्त्र्येण रेमे यद्वा स्वयमपि तथैव ताः सिञ्चन्नित्यर्थः। युवतिभिरिति कामरसमत्तत्वं तादृशसेकसामर्थ्यं च दर्शितं प्रहसतीभिः प्रकर्षेण परिहसन्तीभिः नर्मौत्सुक्येन तस्य भङ्गवितर्केण वा तस्य तु तेन प्रेमैव विवृद्धमित्याशयेनाह। प्रेम्णा प्रेमरसेन उक्षितः सिक्तः सन् पाठान्तरे प्रेम्णा ईक्षितो दृष्टः अङ्गेति प्रहर्षसंबोधने वैमानिकैर्विमानेन व्योम्नि चरद्भिर्देवादिभिः सर्वैरेव तत्क्रीडापरिकररूपैः कुसुमवर्षिभिः परमानन्देन वृष्टिवद्बहुलपुष्पाणि क्षिपद्भिः सद्भिरीड्यमानः साधु साध्विति यद्वा तस्य भङ्गं वितर्क्य बलवृद्ध्यर्थमिव जयजयेत्येव स्तूयमानः ततश्च वैमानिकैरिति पुंस्त्वेन पुरुषैरेव इतिक्षेयं स्त्रीणां लज्जया विमोहादिना तत्राशक्तेः किंवा तासां व्रजदेवीपक्षपातित्वेन कुसुमवर्षादावप्रवृत्तेः अतः स्वयमित्यस्यात्रैवान्वयः स स्वयमेक एव तैः स्तूयमानः अन्यत्तैर्व्याख्यातं यद्वा स्वेषु निजजनेष्वेव रतिः प्रीतिर्यस्य सः अतः स्वस्य जयादपि तासां जयेन सन्तोष इति भावः। यद्वा ननु श्रीगुरो कृपया तज्जलक्रीडां विस्तार्य वर्णयेति चेत्तत्राह। स्वा असाधारणी रतिर्जलादिक्रीडा यस्य सः अतो दृष्टान्ताद्यभावेन सा विस्तरेण वर्णयितुं न शक्यते इत्यर्थः। एव-

१ र्ययौ २ स्वस्तस्रजः इति वि॰ पाठः।

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

मत्रान्ते वक्ष्यमाणात् तथा श्रीहरिवंशोदिताच्च द्वारकाजलविहारा- दत्यत्र विशेषः सूचितः गजेन्द्रस्य लीलेव लीला यस्य सः पूर्वोक्ताभिप्रायमेव यद्वा तादृशजलसेकेऽपि गजेन्द्रस्येव सुखभर- विवक्षयायं दृष्टान्तः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततः परमहृष्टस्य श्रीभगवतोऽपि प्रेमचेष्टितमाह । ताभिरिति त्रिभिः । श्रमं तासामपोहितुमपनेतुम् । तादृशप्रेममयमधुरतर- लीलाविष्टत्वादात्मनश्चेत्यर्थः । अङ्गसङ्गेत्यनेन पद्मिनीस्त्रीवर्गपू- ज्यपादानां तासां सङ्गतः स्वाभाविकपरमामोदसञ्चारोऽभिप्रेतः । किञ्च स्वकुचेति स्वशब्दोऽत्रासाधारणार्थः । अत एवानुद्रुतः स्रक् कौन्दी ज्ञेया । परमशुभ्रत्वेन कुङ्कुमरञ्जितत्वसम्पत्तेः । एवं जलक्रीडायां कामोद्दीपनसामग्री च दर्शिता । वाः यामुनं आविश्य आसक्त्या प्राविशत् । दृष्टान्तो गजेन्द्रस्य बह्वीभि- र्गजीभिः सह जलविहारासक्त्याद्यनुसारेण । अन्यत्तैः । यद्वा गन्धर्वपा गायनश्रेष्ठाः । "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि च" इति विश्वः । त इव येऽलयश्च तैः । इति जलक्रीडायोग्य- मुत्तमगीतमुक्तम् । यद्वा । काभिः श्रीभगवदङ्गसङ्गेन घृष्टस्रजो याः । याश्च निजकुचकुङ्कुमेन रञ्जिता रत्यावेशेन सर्वाङ्गेषु सम्पृक्तास्ताभिः । अत एव तासां श्रममपनेतुं न केवलं तासा- मेव स्वस्यापीत्याह । श्रान्त इति । भिन्नेत्युपमानेऽपि श्रान्तत्वे हेतुः भिन्नसेतुरिव कृतलीलौद्धत्य इत्यर्थः । सकुचेति स्वामि- सम्मतः पाठः स श्रीकृष्ण इति व्याख्यानात् खेलस्याव्याख्या- नाच्च ॥ २३ ॥

जलक्रीडामाह । स इति । स परमकौतुकी युवतिभिस्ता- दृशक्रीडारसप्रसक्ताभिस्तद्वशप्रवीणाभिस्ताभिरित्यर्थः । इतस्ततः सर्वासु दिक्षु स्थित्वाभितः जलमध्येऽर्थादम्भसैव सिच्यमानः प्रेम्णोक्षितश्च प्रेम्णोक्षणेनान्तरेऽपि सिच्यमान इवेत्यर्थः । अत एव प्रेम्णोक्षित इत्यपि पाठः । न केवलं तेन बहिरेव सिक्तः, अपि तु प्रेम्णाऽन्तरपि उक्षितः सिक्त इत्यर्थः । इत्यन्तर्बहि- रिति तत्क्रीडासक्तत्वं दर्शितं किं कुर्वतीभिः परिहासरसात् प्रक- र्षेण हसन्तीभिस्तादृशः सन् स्वयमपि रेमे तथैवान्तर्बहिरपि तेन ताः सिञ्चति स्मेत्यर्थः कथंभूतोऽपि स्वरतिरपि तादृशो- ऽपि कथंभूतः सन् गजेन्द्रस्य लीलेव परमासक्तिमयी लीला यस्य तादृशः सन् पुनः कीदृशोऽपि सन् वैमानिकैः कुसुम- वर्षिभिरीड्यमानः सदा सर्वत्र स्तूयमानतया प्रकटपरममहि- मापि सन्नित्यर्थः । तेषां तादृशलीलापरिकरतायामयोग्यत्वात् नान्यथा तु व्याख्येयम् । अङ्गेति हर्षसम्बोधने । अन्यत्तैः । यद्वा स्वेषु निजजनेषु स्वासु तास्वेव वा रतिः रागो यस्य सः । अतः स्वस्य जयादपि तासां जयेन सन्तोष इति भावः यद्वा । कृपया तज्जलक्रीडां विस्तार्य वर्णयति चेत्तत्राह । स्वा- असाधारणी रतिर्जलादिक्रीडा यस्य सः । अतो दृष्टान्ताद्य- भावेन सा विस्तरेण वर्णयितुं न शक्यत इत्यर्थः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सकुचकुङ्कुमरञ्जितायाः कुचनिहितैः कुङ्कुमैः रञ्जितायाः अङ्ग- सङ्गघृष्टस्रजश्च ताभिर्युतः गन्धर्वपालिभिर्गन्धर्वसमूहैः ॥ २३—२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तस्य ताभिः सह जलक्रीडामाह । ताभिरिति द्वाभ्याम् । अङ्ग- सङ्गेन घृष्टा सम्मर्दिता या स्रक् तस्याः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिनः गन्धर्वपतय इव गायन्तो येऽलयो भृङ्गाः तैरनुद्रुतोऽनुगतः स कृष्णस्ताभिः श्रमं रतिविहा- रजं व्यपोहितुमपाकर्तुं वार्जलमाविशत् यथेभराट् गजपतिः श्रान्तो गजीभिः मुहुर्जलं प्रविशति तद्वत् भिन्नसेतुर्विदारिततटः दार्ष्टान्तिकेत्वतीतलोकवेदमर्यादः ॥ २३ ॥

स इति । स भगवान्स्वयमात्मना स्वरतिरात्मारामोऽपि गजेन्द्रस्येव लीला यस्य तथाभूतः तदेवाह अम्भस्यलं नितरां प्रहसन्तीभिर्युवतिभिः प्रेम्णोक्षितः सिक्तः स्वयमपि ताः सिञ्चमानः भ्वादिवद्दिवादेरा- कृतिगणत्वात्कर्तरि श्यन् सेचयन्नित्यर्थः । यद्वा ताभिस्तावत्किञ्चि- दुक्षितः प्रत्युक्षणेन पुनः पुनः सिच्यमानः अङ्ग हे राजन् । कुसु- माणि वर्षन्तीति तथा तैर्वैमानिकैर्विमानारूढैर्देवैरीड्य- मानः स्तूयमानोऽत्र हसे रेमे ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वनक्रीडां निरूप्य जलक्रीडां वक्ति । ताभिरिति । कृष्णस्याङ्गसङ्गेन ध्वस्ताः स्रस्ताः स्रजो यासां ताः सुकुचानां कुङ्कुमरजोभिः रञ्जिता रागिताः याः ताभिर्गोपीभिः आगच्छन्ति आवृत्य गच्छ- न्तीत्यलयस्तत्सङ्गेन ध्वस्ता निरस्ताः स्रजो यस्याः सा तथा तस्याः सुकुचकुङ्कुमरेणुभिरञ्जितायाः यमुनायाः वाः वार्यो विशदित्यन्वयः गन्धर्वाणां पालिभिः श्रेणिभिः श्रान्तः भिन्नसे- तुरिति द्वयमिभराड्विशेषणं यद्वा श्रु हिंसायामिति धातोः श्रान्तः नित्यनिरस्तमृत्युः भिन्नसेतुर्विशेषितलोकमर्यादः भेदो विशेषे दलन इति अत्र विशेषो नाम व्यावर्तको धर्मोऽपि लक्ष्यते पृथक्पृथक् स्थापिततत्सेतुरिति वा ईः कामस्य भां दीप्तिं राजयतीतीभराट् कामस्य भां राजति दीपयतीति वा इभराट् कृष्णः गोपीविषये गजगाजि शब्द इति धातोः गजीभिः शब्दयन्तीभिः यद्वा भिन्नसे- तुरित्यनेन गजस्य मदातिरेकसूचनेन कृष्णस्य तात्कालिकहर्षा- तिरेकं व्यञ्जयति भिन्नवेदविहितधर्ममर्याद इत्यर्थः । कृष्णे स्वधा- मोपगते धर्मः कं शरणङ्गत इत्यादिस्वोक्तिविरुद्धं स्यादिति नासा- वङ्गीकर्तुं योग्य इति ॥ २३ ॥

स्वस्मिन् स्वेन वा रतिर्न परास्मिन् न परेण वा यस्य स तथेत्यनेन तत्तत्काले रमणकथनं लोकमोहनाय विशेषस्मरणाय चेति गमयि- तव्यम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ पुनः श्रमोत्पत्तौ तदपनोदाय जलक्रीडारसमाह । ताभिर्युत इत्यादि । ताभिर्युतः सहितः वाः वारि अर्थात् कालिन्द्याः ततश्च कृष्णोपवन इत्यादेर्वक्ष्यमाणत्वात् किंकर्तुं श्रममपोहितुं दूरीकर्तुं कीदृश्या यमुनायाः अङ्गसङ्गेन घृष्टा म्लाना स्रजो यस्यां प्रवेशसमये तेन च ताभिश्च म्लाना माला उत्तार्य्य तस्यां न्यस्ता इति भावः । स्वस्मिन् आत्मविषये कुचकुङ्कुमानि तैरञ्जितायाः आदौ तासां कुचकुंकुमानि कृष्णे लग्नानि पश्चात्तदङ्गच्युतैः सापि रञ्जितासीदिति भावः अत्र स्वशब्दः कृष्णपरः आविशदिति कर्तृप्रत्ययात् कर्त्रा सह स्वशब्दस्य सम्बन्धात् अथवा स्वस्य च कुचानां गोपाङ्गनास्तनानाञ्च यानि कुंकुमानि तै रञ्जितायाः अत्र स्वशब्दस्य कृष्णपरत्वं मालाङ्गरागाभ्यां कालिन्दीं भूषयित्वा तत्राविशदितिभावः गन्धर्वान् पान्तीति गन्धर्वपास्तत्स्वरूपा येऽलय स्तैः सह तेषां गानश्रवणानन्देन तन्निवृत्तेरस्वीकारात् अनुद्रुतः निकटमासाद्य त्वरया धावन् ताभिर्युत इति ताश्च तथा कौतुकेन तथैवोचितमिति भावोक्तिः क इव श्रान्ताभिर्गजीभिः श्रान्तो गजराडिव भिन्नसेतुः गजपक्षे भिन्नवप्रः पक्षे अतिक्रान्तकामतन्त्रमर्यादः तथा च "रतिचक्रे प्रवृत्ते तु नैव शास्त्रं नच क्रम" इति अथवा अतिक्रान्तलोकवेदमर्य्याद एव ॥ २३ ॥

जलक्रीडाप्रकारमाह । सोऽम्भस्यलमित्यादि । अलमत्यर्थं युवतिभिः परितः सिच्यमानोऽपि प्रेम्णैवोक्षितः नतु तैस्तैर्जलैः इतस्ततः परि सर्वतोभावेन सिच्यमानत्वेऽपि सेककृतपरिभवं न सेविवानित्यर्थः अत एव कुसुमवर्षिभिर्वैमानिकैर्जयजयेति ईडितः स्तुतः प्रहसतीभिः प्रकर्षेण हसन्तीभिः रेमे इति स्वयमपि ताः सिषेच इत्यर्थः । स्वीयासु तासु रतिर्यस्य गजेन्द्रलील इति दीर्घिकरकण्डजलसेके दृष्टान्तः स्वयं रेमे इत्यन्वयः स्वस्मिन् रतिर्वा तासां तासां तथाविधजलसेकाश्रयत्वेन स्वस्मिन्नेव समधिका रति र्भवतीति भावः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततस्ताभिस्तुल्याभिर्भगवान् जलक्रीडां कृतवानित्याह । ताभिर्युत इति । ताभिः सर्वाभिरेव युतः महारात्रसमये यमुनायां जलक्रीडार्थं प्रविष्टः तत्र प्रयोजनं श्रममपोहितुमिति तासां सर्वाङ्गश्रमं जलक्रीडयैव दूरीकुर्वन् भगवतस्ताभिः सह गमने जायमानां शोभां वर्णयति स्रजः गन्धर्वपालिभिरनुद्रुता इति यमुनाया वा विशेषणानि गन्धर्वाणां रक्षका गन्धर्वपाः गन्धर्वोत्तमाः तेच ते अलयश्च तैरनुद्रुतः सङ्गे शीघ्रं गतः वाः आविशत् आमोदस्य निवारणार्थं च तथा करणं सम्भोगेन श्रमोदके पद्मिनीनां कमलरूपो गन्धो भवति तदुपरोधेन च द्रुतपदविन्यास इति अनुद्रवणं तेच भ्रमरा भगवदीया एवेत्याह अङ्गयोः सङ्गेन घृष्टा या स्रक् तस्यास्ते यस्यां वा स्रक् तादृशी स्वा चासौ कुचकुङ्कुमरञ्जिता च भगवत एव माला कालिन्द्याच कुचकुङ्कुमैरञ्जिता तत्र देहामोदः पुष्पामोदः कुङ्कुमामोदश्चेति स्वकीयत्वेनासाधारण्यं च आधिदैविकास्तु भ्रमराः तद्गन्धभोक्तार इति विशेषणं गन्धर्वपेति श्रान्तः इभराडिवेति अविचारे हेतुः भ्रान्त इति विशेषणं लीलया गमनार्थं प्रत्येकसंभोगावधि भगवतोऽन्यो भावो निरूपित इति तदपगमात् श्रमलीलाप्याविष्कृता गजीभिरित्यन्यश्रमो निवारितः सेतवो बध्यन्ते जलरक्षार्थं ते सर्वे भिन्नाः तादृशराजेन भवन्ति भगवतापि ब्रह्ममर्यादा आत्मारामत्वरूपा जीवानां च मर्यादा तथा सति निवृत्ता कामरूपस्पर्शात् परदाराणामभिमर्षणाच्च पूर्वं तासां भगवत्स्पर्श एव स्थितः नतु भगवता ताः स्पृष्टा इति कामाभावात् देशकालमर्यादाच भग्ना अतो हस्तिश्रेष्ठ इव जलक्रीडार्थं जलदेवतां दूरीकृत्य स्वयं तत्र प्रविष्ट इत्यर्थः ॥ २३ ॥

तत्र जलक्रीडां च कृतवानित्याह । स इति । सः पूर्वोक्तः स्त्रीसहितः अम्भसि अलं युवतिभिः परिषिच्यमानो जातः ततः प्रेम्णा ईक्षितश्च प्रहसतीभिः कौतुकाभिनिविष्टाभिः इतस्ततः सिच्यमानः यदभिमुखमेव व्रजति तयैव सह रेम इति एव सर्वाभिः यथा स्वयं माहात्म्यज्ञानपूर्वकं निर्भरस्नेहेन निर्दोषभावेन वदति शुकस्तथैव राजापि शृणोतीति ज्ञात्वा स्नेहेन स्वमध्यपातित्वं सूचयन् संबोधयत्यङ्गेति अत एव तुभ्यमिमां लीलां वदामीति भावः । ननु देवैः कथं न निषिध्यते तत्राह । कुसुमवर्षिभिर्वैमानिकैरीड्यमान इति । सर्वे देवा अभिनन्दनमेव कुर्वन्ति नतु निवारणमिति अन्यथा लोके कामरसो न व्यक्तो भवेदिति युवत्य इत्यविचारे परिषेके वीररसो माभवत्विति प्रेम्णैव ईक्षितः स्वयमितिपदेन बलात्कारेणापि तथेति सूच्यते तदापि स्वस्मिन्नेव रतिर्यस्य परं स्वीकृता गजेन्द्रलीला येन यथा यथा जलेनोक्षणं तथा तथा सुखमिति गजदृष्टान्तः महासौरतं च ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च रासोत्सवस्यावभृथस्नानमिव जलविहारमाह । ताभिर्युतः अपोहितुं दूरीकर्तुम् । ताभिः काभिः । याः स्वकुचकुंकुमैरेव रमणव्यापारवशेन रञ्जिताः अङ्गसङ्गेनैव घृष्टाः सम्मर्दिताः स्रजो यासां ताः । स कुचेति पाठे स श्रीकृष्णः । "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि चे" ति विश्वप्रकाशाद्गन्धर्वपा गायनश्रेष्ठा ये अलयस्तैरनुद्रुतः सन् वाः यामुनं जलमाविशत् । भिन्नसेतुर्विदीर्णावरणः । कृष्णपक्षे अतिक्रान्तलोकमर्यादः ॥ २३ ॥

प्रेम्णेक्षितः प्रेम्णोक्षित इति च पाठः स्वं धनं रतिः क्रीडैव यस्य सः ॥ २४ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तदेवं रहःक्रीडां प्रदर्श्य जलक्रीडां दर्शयति । ताभिरिति । ताभिः प्रागुक्ताभिः सर्वाभिरेव श्रमस्मधुरलीलाविष्टत्वं यथायथं राससुरतयोः खेदमपोहितुमपनेतुं काभिः याः श्रीभगवदङ्गसङ्गेन घृष्टा मर्दिताः स्रजो यासां ताः याश्च स्वैरसाधारणैः कुचकुंकुमै रञ्जिता इति सुरतान्तसूचनं ताभिस्ताभिरित्यन्वयः वाः अर्थाद्यामुनमाविशत् आसक्त्या प्राविशत् कीदृशः गन्धर्वेति

गन्धर्वपा गायनश्रेष्ठास्तेच ते अलयश्च तैः ।

गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपिचेति विश्वः ॥

बद्धा आलय इति पदच्छेदः जलक्रीडानुगुण्यगानपरैः सह-

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

सखीगणैरनुगत इत्यर्थः । यद्वा सकुचकुंकुमेति पाठः तत्राङ्गसङ्गत्वादिविशेषणद्वयमाक्षेपलभ्यायाः यमुनायाः नामानुक्तिश्च प्रेमवैवश्यादेव सच जलविहारो यथालङ्कारकौस्तुभे ।—

हारादिभिः सन्त्रुटितैर्निजाङ्गाद्विभूषयामास पतङ्गपुत्रीम् ।
तस्याः सरोजादिभिरात्मनोऽङ्गम्
राधालिवर्गो जलकेलिकाले ॥

अपिच ।—

कृष्णे कर्षति कोकयुग्ममवलाकोऽर्या न्यधात्स्वस्तिकम्
कण्ठे चारुमृणालमर्पयति सा वाहू दधे कुञ्चितौ ॥
पद्मान्निघ्राति पाणिनास्यमवृणोदित्थं जले खेलतो
स्स्पर्धा च रतिस्तयोः प्रियसखीवर्गस्य रस्याभवत् ॥

श्रीगोविन्दलीलामृते च ।—

निवारितसखीपाल्योर्मिथः संस्पर्द्धिनोस्तयोः ।
ईशयोर्द्वन्द्वयुद्धमासीदादौ जलाजलि ॥
सखीपाल्यां वृतौ सख्यां कराकरि भुजाभुजि ॥
नखानखि ततः पश्चान्मुखामुखि रदारदि ।

एतदनुसन्धायाह । इभराडिवेति । निरंकुश इति भावः भिन्नसेतुः अतिक्रान्तकामतन्त्रमर्य्यादः ।—

मत्र्त्वमितिचक्रेतु नैव शास्त्रं नच क्रम इति ।

भक्तोक्तेर्निज वशवर्तिनो ऽनुकूलस्यापि जलक्रीडावेशान्निरंकुशत्वं युक्तमेवेति भावः । यद्वा ताभिरिति बहुत्वेन तस्यान्यनासक्तिप्रसक्तिं समादधदाह । भिन्नेति । अतिक्रान्तानुकूलनायकमर्य्यादः तथात्वञ्च तस्यामेव निजवैदग्ध्यप्रदर्शनायेत्यविरोधः ॥ २३ ॥

तदेव प्रपञ्चयति परमकौतुकी युवतिभिः तत्तद्रसमत्ताभिः तादृशक्रीडाप्रवीणाभिश्च अल मतिशयेन भितः इतस्ततः सर्वासु दिक्षु परिवृत्येति शेषः अम्भसि जले तनैव सिच्यमान इतिवद्भिः अन्तश्च प्रेम्णा ईक्षितः सिक्तः इत्युभयत्र क्रीडावेशो दर्शितः प्रकर्षेण हसन्तीभिः स्वयमप्यन्तर्बहिश्च सिञ्चन् रेमे इत्यर्थः । कीदृशः स्वा असाधारणी रतिर्जलक्रीडारूपा यस्य सः यद्वा स्वेषु निजजनेष्वेव रतिर्यस्य स्वासु आत्मीयासु तास्वेव रतिर्यस्येति वा अतः स्वपराजयेऽपि तासां जये सति सन्तोष इति भावः । वस्तुतस्तु स्वयंस्वरतिः स्वात्मनि श्रीराधायामेव रतिर्यस्य सोऽपि अत्र गोपीजनसमुदाये गजेन्द्रलीलः निरंकुशचेष्टितः यद्वा अत्र मम हृदि स्वयं स्वस्वरूपेण स्वरतिः आत्मारामः श्रीराधारमण इति यावत् लोकवल्लीलायान्तु गजेन्द्रलीलः गजेन्द्रस्येव तत्सुखावेशाद्धृष्टभिः क्रीडामयी लीला यस्य सः अतएव परमोल्लासेन विस्मितैरपि पुनश्चेति तैर्वैमानिकैः सुरादिभिः कुसुमवर्षिभिः सद्भिरीड्यमानः तादृशनित्यलीलतया संस्तूयमानः एवञ्च क्रीडाया निर्दोषत्वं साधितम् अङ्गेति सहर्षसम्बोन्धनं ततश्च निर्लेपतां कुचयुगानि निरञ्जनत्वं नेत्राणि मोक्षमगमन् रसनाकचाश्च मौव्यश्च निर्गुणदशां सह हारमालयामन्नासु तद्धनरसे रमणीस्वमूषामिति ब्रह्मानन्दरसादपि जलक्रीडायामाधिको रसावेशो जात इतिसंक्षेपः ॥ २४ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तासां श्रमापोहाय भगवतो जलविहारार्थं यमुनाप्रवेशमाह ।

ताभिर्युत इति । भगवतः साक्षात्सच्चिदानन्दविग्रहस्य श्रमस्य सम्भावयितुमप्यशक्यतया तासामेव श्रममपोहितुं तथाच श्रान्त इति दृष्टान्ते एवैभराड्विशेषणं ज्ञेयं यद्वा जनोद्धाराय स्वीकृतसर्वजनमनोहरगोपाललीलानुसारेण स्वैश्वर्य्यगोपनाय स्निग्धजनध्येयनित्याच्युतसुधाच्युद्वक्त्रकोष्याप्यायनातिचित्रमुखचन्द्रच्छविप्रकटनाय च श्रमानुकारसम्भवेन तदपोहमिषेणैव ध्येयजलक्रीडाविष्कारायच श्रममपोहितुं यथा परारतिशान्त्याद्यन्विताः कुलश्रुतिकर्ममर्यादासेतुं भङ्क्त्वा भक्तास्तदनुरक्तिमत्ताः परमासक्त्या तत्तत्कर्मजनितश्रममपोहितुं नानारतिरङ्गतरङ्गान्वितविमलतापोपशामकस्यामरङ्गापगावाः प्राविशन्ति तथा ताभिर्युतः सोऽतिस्वच्छशीतलश्यामलयमुनावाः गजीभिः सह भिन्नसेतुरिभराडिव भिन्नलोकमर्य्यादासेतुः सर्वज्ञोऽपि प्रेमोन्मत्तवदाविशत्युक्तश्चायं गोपीजनानुरागभगवत्कृपाप्रवाहबलाभ्यां तन्मर्य्यादाभङ्गः पुनः कीदृशः स तत्राह । कुचयोरालिङ्गनेन तत्संलग्नकुंकुमेन रञ्जितायास्तथा तासामङ्गसङ्गेन घृष्टायाः स्रजो वनमालायाः संबन्धिनस्तदामोदामोदापूर्णमनसो गन्धर्वपतय एवालयो भ्रमरास्तैरनुद्रुतः अत्रादौ स्रजः स्वत एवामोदवत्त्वं ततः पद्मिनीशिरोऽवतंसाङ्गसुमनः संघर्षेण ततः कुचकुंकुमरञ्जितत्वेन त्रिधामोदोत्कर्षस्तन्मन आकर्षणे हेतुर्दर्शितः अलीनाञ्च दिव्यत्वेन सुरत्वं तत्रापि सुरवत् गुञ्जारात्मकगानरतत्वेन गन्धर्ववत्त्वमभिहितं स्वकुचकुंकुमरञ्जिताया इति पाठेतु स्वशब्दस्तु तासां कुचकुंकुमस्यासाधारण्यद्योतकः तथानेनातिविलक्षणेन कुचकुंकुमेन । रञ्जितत्वोक्त्यास्यामोदप्रभवत्वमूचनं तथाच यथा श्यामरङ्गगङ्गाप्रविष्टा भक्तजनाः स्वोरोऽनुरागरञ्जितहरितनुसुमनःस्रग्धरास्तथा । भक्तिसङ्गानुरञ्जित सुमनोवृत्तिगणसुमनः स्रग्धरा हरिणैव तन्मध्वामोदोन्मदमधुपतयानुद्रूयन्ते तथा स्रजो गन्धर्वपालिभिरनुद्रुत इति भावः यथा भक्तजनोरस्सुरोरागरञ्जिता हरितनुसुमनोमालाभक्तिसङ्गरङ्गरञ्जिता सुमनोवृत्तिमाला वा हरिणैव मधुपरूपतया नुद्रूयते तथा भगवदुरसि कुचकुंकुमरञ्जितवनमालागन्धर्वपैर्भक्तैरलिरूपैरनुद्रूयते इति दर्शितम् अत्र स्रगपि कौन्दी तस्य शौक्ल्येन रञ्जितत्वसंभवात् पूर्वे—

कान्ताङ्गसङ्गकुचकुंकुमरञ्जितायाः ।
कुन्दस्रजः कुलपतेरिह वाति गन्ध इति ॥

निर्देशाच्च यद्वा या गोप्य एव भगवदङ्गसङ्गेन रतिरणाभिमर्शेन घृष्टाः स्रजः कुसुममाला यासां तथाभूता यद्वा भगवदङ्गसङ्गघृष्टसुतनुसुमनस्तया धृष्टस्रग्भूषा अत एवाङ्गघर्षेण सर्वाङ्गप्रसरितस्वकुचकुंकुमेनैव रञ्जितास्ताभिर्युतं इत्यन्वयः यद्वा तासामात्मनश्चाङ्गसङ्गेन घृष्टाः स्रजः फुल्लितकुमुदादिकुसुमपङ्क्तयो यस्याः तथा कुचकुंकुमेन रञ्जिताया यमुनाया वाः आविशदिति संबन्धः ॥ २३ ॥

जलविहार एव निरूप्यते । सोऽम्भसीति । स इति नानारसविहारदक्षो रसाधारत्वेन प्रसिद्धो जलविहारानुरतः कृष्णसुरसात्मकातिस्वच्छकृष्णाम्भसि ताभिर्बहिरन्तः श्यामरसनिमग्नाभिर्युवतिभिः स्वसमानवयोनवकिशोरीभिस्तथा प्रहसतीभिः हसनं मुखचन्द्रसितप्रभामृतमयाल्हादिरश्मिमी रसवृष्टिः तयाच प्रकर्षेण मुखचन्द्रकररसवृष्टिं कुर्वतीभिरितस्ततः सर्वदिग्भ्यः प्रेम्णेक्षितस्तथा

श्रीरामनारायणकृतभावभावविभाविका ॥

परि सर्वतो बहिरन्तरतः सिच्यमानः तथा वैमानिकैः कुसुमवर्षिभिरीड्यमानः स्तूयमानः स्वरतिः स्वयं रेमे इत्यन्वयः परिसिच्यमान इत्यत्र परिशब्देन सर्वतो बहिरन्तर्वृष्टिद्योतकेन बहुधा वृष्टयो द्योतितास्तत्र करकमलैर्बहिर्जलवृष्टिसेचनं प्रेम्णेक्षित इत्यनेन सितासितारुणघनात्मकदृग्भिरनुगौरीऽब्धिहृत्पूरितैः स्निग्धापाङ्गवर्षैः प्रेम्णान्तः सेचनम् अतएव क्वचित्प्रेम्णोक्षित इति पाठः तत्रोक्षितः सिक्त इति स्पष्टमतः प्रेमरससिञ्चननिर्देशः तथा प्रहसतीभिरित्यनेन हसनं मुखचन्द्रसुधावर्षं रसस्य प्रकृष्टताद्योतकप्रशब्दपूर्वकत्वेमातिशयितसेचनसूचनं ताभिस्तथा बहिरन्तरार्द्रीभावापादकवृष्ट्या परिषिच्यमानः स्वयमपि तथा रेमे इत्यत्र भगवत्कर्तृका तासां बहिरन्तरार्द्रताप्रयोजिका अपि वृष्टयो ज्ञापिताः तत्र हरि तत्सखीकरट्ङ्मुखानां कमलत्वाद्यमुनाजलशोभापादकत्वं तथा पूर्वनिरूपिततज्जलादिवृष्टीनां तत्तत्कमलमधुस्रावत्वसम्भवात् तत्रत्यकमलानां स्वमधुवृष्ट्या ळज्जोत्पादकत्वं तथा स्वधाम्नि सलिले सूर्यः स्वमित्रमित्रतनयासन्निधौ स्वसङ्कोचकहरितत्सखिविशालभाळचन्द्रव्राताागमे तत्कमलैस्तेषु जलाद्यस्त्रप्रक्षेपक्षापकत्वं यद्वा रिपुत्वेऽपि स्वगृहागतेषु तेषु स्वस्वमधुवृष्ट्यात्मकसमानेन सज्जनसद्रीतिद्योतकत्वमुत्प्रेक्षते यद्वा प्रेमजडीकृततया स्वर्णयूथिकालतात्मकगोपीतनूनां श्रीकृष्णचन्द्रस्यकरैरेव करैः करैर्जलसुधावृष्ट्या पुलकमुकुलोत्फुल्लप्रत्यङ्गसुमनसां क्रीडोत्साहपवनजवलोलानां पूर्वोदितजलबिन्द्वादिसुमनोवृष्टिः करट्ङ्मुखैस्तत्सुमनोभिर्मधुवृष्टिर्वा ऊह्यते वैमानिकैरिति तु विमानेषु भवा वैमानिकाः सुरास्तः यद्वा विमानान्येव कानि साक्षात्स्वर्गाः तत्र तत्रत्यसर्वभोगसामग्रीसद्भावात् तत्र भवा वैमानिकाः यद्वादौ विशेषमाना विमाना अतएव कुत्सितत्वाद्विमानका विमानका एव वैमानिका अधुना भगवच्छोभावलोकने तु विगतमाना विमानास्त एव काः सुखरूपा विमानका एव वैमानिकास्तैस्तथा कुसुमवर्षिभिः कुः पृथिव्यपि सुमा सुष्ठु मा शोभा यस्यास्तादृशी येभ्यस्तानि कुसुमानि यद्वा वृन्दावनसुमनसां भगवत्तत्सखीतनुसुमनसां च शोभादर्शनलज्जितत्वेन कुत्सितां लज्जितत्वे तद्विमुखतामस्वीकृत्य तत्सम्मुखतया भगवत्प्रेमोत्साहेन सुष्ठु च मा शोभा येषां तानि कुसुमानि नन्दनवनसुमनांसि तद्वर्षोऽस्त्येषामिति कुसुमवर्षिणस्तैरीड्यमानः स्तूयमान इत्यनेन गोपीकर्तृकवृष्टित्रयवद्देवकर्तृकसुमनोवाग्वृष्टिद्वयमपि सूचितं तथा गोपीबहिरन्तरार्द्रतापादकभगवत्कर्तृकवृष्टिवत्सुरसुमनसामार्द्रत्वापादकरसवृष्टिरपि द्योतिता ताभिरभिषिच्यमानस्य भगवतोऽपि तथा रमणे दृष्टान्तो गजेन्द्रलील इति गजेन्द्रो यथा करेणुभिर्बालगजैश्चाभिषिच्यमानः स्वयमभिषिञ्चति तद्वदिति भावः ॥ २४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ततो रासोत्सवान्ते जातमवभृथस्नानमिव जलविहारमाह । ताभिर्युतः तासामङ्गसङ्गेन घृष्टाया मर्दितायाः कौन्दस्रजः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिर्गन्धर्वपाजिभिः "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि चेति" प्रकाशात् गायनश्रेष्ठैर्भ्रमरैरनुद्रुतः सः कृष्णः यमुनाया भगवदङ्गसङ्गेन घृष्टस्रजः अत एव स्वकुचकुङ्कुमेन रत्यावेशात्प्रसृतेन रञ्जिताखिलदेहायास्ताभिर्युतस्तासां श्रमं निराकर्तुं स्वयमपि श्रान्तः सन् वार्यामुनं जलमाविशत् श्रान्ततायां हेतुः भिन्नः सेतुर्लीलामर्यादा येन कृतलीलौद्धत्य इत्यर्थः गजोऽपि विदारितवप्रत्वात् श्रान्तः गजस्यैव वेदं विशेषणद्वयं स्वयं चातिक्रान्तलोकवेदमर्याद इति केचित् ॥ २३ ॥

अङ्ग हे राजन् ! सः लीलाविलासचतुरः युवतिभिर्जलक्रीडां कर्तुमतिसमर्थाभिः अम्भसि इतस्ततः सर्वतः जलैः परिषिच्यमानः प्रेम्णेक्षितश्च स प्रेमेक्षणेनान्तरपि सिच्यमानः क्वचित्प्रेम्णोक्षित इति पाठः परिषिच्यमानं प्रेष्ठमवलोक्य प्रहर्षेण हसन्तीभिः तदानीमपि पुष्पवर्षपरायणैर्विमानस्थितैर्देवादिभिः स्तूयमानः स्वयं साक्षात्पुरुषोत्तमविग्रहो रेमे तत्र दृष्टान्तः गजेन्द्रस्येव लीला यस्य अत्रैवंभूतरमणकालेऽपि वस्तुतः स्वरतिः स्वस्मिन्नेव रतिर्यस्य न बहिः तथा च तादृशरमणं कुर्वतोऽपि भगवतः स्वमाहिम्न्येवं स्थानमेवासीदिति भावः । अत्र गोपीमण्डले अम्भसि वेत्यन्ये ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्थलक्रीडामुक्त्वेदानीं जलक्रीडामाह । ताभिरिति द्वाभ्याम् । ताभिर्गोपीभिर्युतः तदङ्गसङ्गेन घृष्टा संमर्दिता या स्रक् तस्या अतस्तत्कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिः गन्धर्वपालिभिः । गन्धर्वपतय इव गायन्तो येऽलयो भ्रमराः तैरनुद्रुतः अनुगतः स कृष्णः तासां श्रमं व्यपोहितुमपाकर्तुं वार्जलमाविशत् भिन्नसेतुर्विदारिततटः अत एव श्रान्तो गजीभिर्युतः इभराड् यथोदकं प्रविशति तद्वत् दार्ष्टान्तिके स्वप्राप्ति प्रतिबन्धकतत्कर्मसेतुभिद्वित्यर्थः ॥ २३ ॥

जीवः स्वकार्योऽशः शरीरं स्वकीयशक्तिपरिणामजः अतः स्वकीयैर्गोपीजनै रतिर्यस्य सः अम्भसि युवतिभिः प्रेम्णा प्रथमतः स्नानविधिना उक्षितः सिक्तः अभिषिक्त इत्यर्थः पुनः हे अंग ! अलमत्यर्थं हसतीभिः परिषिच्यमानः वैमानिकैरितस्तुतः ईड्यमानश्च अत्राम्भस्येव स्वयमपि ताभिः सह रेमे इत्यन्वयः ॥ २४ ॥

भाषा टीका ।

तदनन्तर रास के परिश्रम को दूर करने को भगवान् ने यमुना के जल में प्रवेश किया उन के अङ्ग के संग से मर्दित जो कुन्द की माला जोकि गोपीयों के कुच कुंकुम से रंगी गई है उसके पीछे गंधर्वों मे उत्तम सरी के गान करने वाले भौंरा लगे हैं इस प्रकार से जैसे थका हुआ मत्त हस्ती हथिनियों के साथ जल मे प्रवेश करता है तैसे मर्यादा को तोड कर जल मे प्रविष्ट होते भये ॥ २३ ॥

हे राजन् ! जल के मध्य मे सब गोपी भगवानको जल से सेचन करती थीं और परिहास करती जाती थीं और प्रेम से देखती थीं उसी समय मे आकाश मे देवता विमानों पर बैठ कर फूलों की वर्षा करके स्तुति करते थे इस प्रकार महागजराज की लीळा करने वाले भगवान् अपने स्वरूप में रत गजेंद्र की लीला से जल क्रीडा करते भये ॥ २४ ॥

ततश्च कृष्णोपवने जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे ।
चचार भृङ्गप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥
एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ।
सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्थलजलक्रीडे दर्शिते वनक्रीडां दर्शयति । ततश्चेति । यमुनाया उपवने जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि दिशां तटान्यन्ता यस्मिन् यद्वा दिशश्च तटं स्थलं च यस्मिन्नुपवने भृङ्गाणां प्रमदानां च गणैरावृतः ॥ २५ ॥
रासक्रीडां निगमयति । एवमिति । स कृष्णः सत्यसंकल्पोऽनुरागिस्त्रीकदम्बस्थ एव सर्वा निशाः सेवितवान् शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः यद्वा निशा इति द्वितीयात्यन्तसंयोगे शृङ्गाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेव इति एवमप्यात्मन्येवावरुद्धः सौरतश्चरमधातुर्नतु स्खलितो यस्येति कामजयोक्तिः ॥ २६ ॥ ॥ २७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

ततो जलक्रीडानन्तरमिति जलक्रीडया पुष्पमाला देम्लौम्लापिता पुष्पावचनादिकौतुकार्थमिवेत्यर्थः । त्वर्थे चकारोऽभिमोपक्रमे जलप्रसूनानि कमलादीनि स्थलप्रसूनानि जातीकुन्दादीनि तत्सद्गन्धसंबन्धेनानिलस्य शैत्यं सौरभ्यं च सुष्ठोर मान्द्यं च ज्ञेयं चचार पुष्पावचयनिकुञ्जान्तर्निलीनतादिविचित्रप्रकारेण क्रीडन्नितस्ततो बभ्राम भृङ्गगणावृतत्वं पुष्पावचयनेन तत्साहित्येनैवागमनात् किंवा जलक्रीडायामङ्गरागापगमेन सहजमधुरसौरभ्यप्रकाशात् किंवा तेषां भावोद्दीपनस्वभावत्वेन सदा स्वीकारात् किंवा श्रीमुखवनमालाद्यामोदेन सदाकृष्टत्वात् अतएव तेषां मुहुरुक्तिः मदच्युदिति भृङ्गगणावृतत्वे हेतुता तथा द्विरदश्रेष्ठता काममत्तता च तथा गजीनामपि तत्सङ्गात्तादृश्येव सूचिता सर्वत्रायं दृष्टान्तः प्रायो मत्तगजेन्द्रस्य कामाधिकतायाः तथा सदा गजीभिः सह स्वातन्त्र्येण क्रीडया मिथः प्रीतेश्चापेक्षयेति अन्यतैर्व्याख्यातं यद्वा भृङ्गवद्गायन्त्यः क्रीडालोला याः प्रमदास्तासां गणेनावृतः इति तेषां प्रेममत्ततोक्ता अतएव प्रमदेत्युक्तम् ॥ २५ ॥
एवं तद्रात्रिकृतरासक्रीडामुक्त्वा तस्यामनुक्तमन्यमपि विलासं सङ्गृह्णन् तथा बहुलरात्रकृतायामपि तस्यां तामतिदिशन्नुपसंहरति एवमिति । उक्तप्रकारेणेति तद्रात्रावीदृशी परापि क्रीडा सूचिता सा चात्यन्तविस्तीर्णत्वाद्वर्णयितुं न शक्यते इति भावः । तथा निशा इति बहुत्वेन तत्र च सर्वा इति साकल्येन संपूर्णकैशोरं सर्वास्वेव रात्रिषु रासक्रीडा बोध्यते श्रीपराशरेणापि तदुक्तमेव सोऽपि कैशोरकवय इति तत्र च—

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशाद्यौवनन्तु ततः परम् ॥

इत्यादिवचनादेकादशाब्दमारभ्य पञ्चदशाब्दपर्यन्तं गोकुलेऽत्र नित्यं सा क्रीडा ज्ञेया यथोक्तं श्रीमदुद्धवेन तृतीयस्कन्धे एकादशसमास्तत्र गूढार्चिः सबलोऽवसदिति तत्र कौमारपौगण्डयोस्तदयोग्यवयसो रासक्रीडानुदयेन भगवता विशेषप्राकट्याभावाद्गुप्तैश्वर्यत्वाभिप्रायेण अतएवोक्तं गूढार्चिरिति अतएव रङ्गस्थलेऽपि पितरौ प्रतिश्रीभगवतैव वक्ष्यते नास्मत्तो युवयोस्तातेत्यादि यच्च मधुपुरीप्रवेशे वक्ष्यमाणस्य प्रागल्भ्यलीलाहसितावलोकनैरित्यादेरनुसारेण कैश्चिद्यौवनेऽपि श्रीभगवतो गोकुलक्रीडा मन्यते तच्च नातीव संगतं कैशोरेऽपि तस्य वैदग्धीविशेषेण प्रगल्भलीलायाः सम्भवात् अन्यथा किशोरौ श्यामलश्वेतावित्यक्रूरदृष्टेः तथा किशोरौ नातियौवनाविति पुरनारीभिरुक्तेश्च विरोधः स्यादिति किंच एवमित्यनेन तद्रात्रिक्रीडाया ईदृशी अन्यरात्रिक्रीडापि तादृश्येवेति सूच्यते ततश्च पूर्वं रासक्रीडारम्भे श्रीभगवतस्तासां च मिथोवाक्यस्य मध्ये प्रश्नोत्तरञ्च परमप्रेमरससंप्लुततयानुसंधानाभावेन नित्यनूतनवत् प्रवृत्तेः पुनःपुनः सर्वं सम्भवेदेव एतच्च पूर्वं लिखितमेवेति शशाङ्कः पूर्णचन्द्रः पूर्णत्वेनैव शशसदृशलाञ्छनस्य सम्यगुदयात् तस्यांशुभिर्विशेषेण राजिताः दिनवत्प्रकाशिताः एवं श्रीभगवद्रासक्रीडार्थं तासु रात्रिषु चन्द्रः पूर्णिमायामिव पूर्णमण्डलः एवोदगच्छेदिति ज्ञेयं यथोक्तं वैशम्पायनेन—

एवं स कृष्णो गोपीनां चक्रवालैरलंकृतः ।
शारदीषु सचन्द्रासु निशासु मुमुदे सुखीति ॥

तत्र च शारदीष्वितिउपलक्षणं किंवा शारदीष्विवेति ज्ञेयं यथा मधुपुरीमध्ये श्रीवसुदेवकृतपुत्रपरिवर्तनादिवत् कल्पभेदव्यवस्थया भेदः कल्प्यः ननु नित्यमेव तादृशरात्रौ तादृशप्रकारादिना कथं रासक्रीडा सिध्येत्तत्राह । सत्यकाम इति । ननु तथापि मानादिना पत्यादिपारवश्यादिना वा सदा तास्तस्यापि दुर्लभा मन्ये तत्राह अनु निरन्तरं रतो ऽनुरक्तः सर्वथा बहुप्रबन्धेन सर्वापेक्षया वा सम्बद्धोऽबलानां तदेकाधीनगोपीनां गणो यस्मिन्निति यद्वा ननु पत्यादिभिरस्वतन्त्राणां तासां नित्यप्राप्तिः कथं स्यात्तत्राह । अनुरतेति । सर्वापेक्षया सदा तस्मिन्नेव रतत्वादित्यर्थः । किंवा तासामनुरतत्वेन सामरस्याद्यत्र कुत्रापि यदा तदा येन केनापि प्रकारेण सिद्ध्येदेवेति भावः । तत्र चासम्भावना नास्तीत्याह सः महामोहनो रासरसिकः इति नत्र कदाचित् केनापि हेतुना तत्र तृप्तिः स्यादित्याह । अवरुद्धं स्वीकृतं सौरतं सुरतसमूहो लीलाविलासोत्सेको वा येन सः तदर्थमेव प्राकट्यादित्यर्थः । तत्रात्मन्येवेति न केवलं स्वयमौदासीन्येन ता एव रमयामास किंतु आत्मन्येवावरुद्धसौरत इति किंतु स्वस्मिन् साक्षात् स्वीकारेण परमासक्त्या स्वयमप्यनुभूतवानित्यर्थः । यद्वा आत्मनिमित्ते इत्यात्मारामत्वाद्यपेक्षया तस्यापि तेन परमानन्दो बोधितः न केवलमुक्तप्रकारा रासक्रीडैव कृता किंतु ताभिः सह विचित्रप्रकारेण विचित्रा रतिश्च कृतेत्याह । शरदिति । शरदि कामस्य माध-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

त्यन पुलिनादेश्च सौन्दर्येणोक्तं यद्वा "हायनोऽस्त्री शरत्समा" इत्यमरोक्तेः सम्वत्सरमध्ये यस्मिन् ऋतौ मासे दिवसे वा याः काव्येषु कथा निरूप्यन्ते ताः सिषेवे तदर्थान् प्रीत्यानुष्ठितवानित्यर्थः ततश्च श्रीगीतगोविन्दविदग्धमाधवनाटकाशुकप्रकारा ज्ञेयाः अन्यत्तैर्व्याख्यातं यद्वा एवं सिषेव इति रात्रिषु रासक्रीडा उक्ताः अधुना कदाचिद्दिवसेष्वपि तादृशी मन्यामपि क्रीडां सूचयति सर्वा इति शरत्काव्यकथाश्च सर्वाः सिषेवे तत्र काव्यशब्देन परमवैचित्री तासां सूचिताश्च गीतगोविन्दादिप्रसिद्धाः तथा श्रीचण्डीदासादिदर्शितदानखण्डनौकाखण्डादिप्रकारकाश्च ज्ञेयाः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ततो जलक्रीडानन्तरमिति पूर्वनेपथ्यापगमे तदानीं वन्यनेपथ्यस्य रोचकत्वात्तत्प्रचुरक्रीडाविशेषेच्छयेत्यर्थः । त्वर्थे चकारो भिन्नोपक्रमे । चचार पुष्पावचयनिकुञ्जान्तर्निलीनतादिविचित्रप्रकारेण क्रीडन्नितस्ततो बभ्राम भृङ्गगणावृतत्वं पुष्पावचये तत्साहित्येनैवागमनात् । जलक्रीडायामङ्गेषु धौतेषु सहजमधुरसौरभ्यतयातिप्रकाशाच्च । अत एव तेषां मुहुरुक्तिः मदच्युदिति भृङ्गगणावृतत्वे हेतुता तथा द्विरदश्रेष्ठता स्वकान्तासक्तता च ॥ २५ ॥

अथास्यां शरदि पूर्णिमायां कृतां रासक्रीडामुपसंहरन् तत्प्रकारतामन्यत्राप्युपदिशन्नन्यामन्यामपि क्रीडामुपलक्षयति । एवमिति । एवं पूर्वोक्तरासप्रकारेण शरत्काव्येति वक्ष्यमाणात् प्रतिशरच्छशाङ्कांशुविराजिताः निशाः सर्वा एव सिषेवे परमादरेण परिचारितवानित्यर्थः । अन्यथा ऋत्वन्तरसम्भवात् ज्योत्स्नीस्तामसीश्च रहस्तत्तद्गृहप्रवेशात्तदभिसारेण कुञ्जशयनादिना कदाचिद्रासेन चेति भावः । उत्तरासां विशेषज्ञापिकाः पूर्वा एव विशिनष्टि । शरदि ये काव्यकथारसाः सम्भवन्ति तेषामाश्रयो यासु श्रीभगवत्कृतानन्तलीलासु तादृशी निशा व्याप्येति पक्षे सर्वाः शरत्काव्यकथाः सर्वदेशकालकविभि र्यावत्यो वर्णयितुं शक्यन्ते तावतीस्ताः सिषेवे किन्तु रसाश्रया रस एव आश्रयो यासां ता एव नतु कैश्चिद्विरसतया या ग्रथितास्ता अपीत्यर्थः । उपलक्षणं चैतदन्यासाम् । यद्वा । शशाङ्कांशुविराजिताः वसन्तादिसम्बन्धिन्योऽपि या निशास्ता एवं रासप्रकारेण सिषेवे । तथा ऋतुषट्कात्मकस्य शरदाख्यस्य याः काव्यकथाः पूर्ववदनन्तास्ताश्च सर्वाः सिषेवे किन्तु रसाश्रया एवेति । कीदृशः सन् सिषेवे तत्राह । आत्मन्यन्तर्मनसि अवरुद्धाः समन्ततः स्थापिताः सौरताः तासां सुरतसम्बन्धिनो भावहावादयो येन तादृशः सन्निति तत्ताः पारेस्यकुं न शक्तवानिति भावः । अत्र विशेषानिर्देशादखिला एव भावादयो गृहीताः । "एवं सौरतसंलापैर्भगवान्देवकीसुतः । स्वरतो रमया रेमे नरलोकं विडम्बयन्" इत्यत्र तु विशेषनिर्देशात्स्वरतो रमया रेमे नरलोकं विडम्बयन्निति तु विशेषनिर्देशात् — धर्मेव हि संलापशब्दो वच इति । आत्मन्यवरुद्धसौरतत्वे हेतुः अनुरतावलागणः निरन्तरमनुरक्तोऽवलागणो यस्मिंस्तादृशः । अनुरागं एव तत्र कारणं नतु तेषां सौरतानामनुरागप्रेमवत्त्वादनुराग एव तत्र कारणं नतु

कामिजनवत् काम इत्यर्थः । यतः सत्यकामः व्यभिचाररहिततादृशाभिलाष इति । एवमेवोक्तं श्रीपराशरवैशम्पायनाभ्याम् । "एवं स कृष्णो गोपीनां चक्रवालैरलङ्कृतः । शारदीषु सचन्द्रासु निशासु मुमुदे सुखी" ति । टीकायां त्वेवमपीत्यादिना स्मरपारवश्याभावमात्रप्रतिपादनाय सौरतशब्दस्य व्याख्यान्तरमप्रसिद्धमपि कृतमिति ज्ञेयम् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं स्थलजलक्रीडे वर्णिते अथ वनक्रीडां वर्णयति । ततश्चेति जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेनजुष्टानि दिशां तटान्यन्ता यस्मिंस्तस्मिन् कृष्णाया यद्वा दिशश्च तटं स्थलं च यमुनाया उपवने भृङ्गाणां प्रमदानाञ्च गणैरावृतश्चचार कथं यथा मदच्युन्मधुधारास्रवन् द्विरदो मत्तगजः करेणुभिरिभीभिस्तद्वत् ॥ २५ ॥

रासक्रीडां निगमयति । एवमिति । इत्थं स भगवान् सत्यसङ्कल्पोऽनुरतोऽनुरागी स्त्रीणां गणो यस्य तथाभूतोऽप्यात्मन्येवावरुद्धः सौरतश्चरमधातुर्नतु स्खलितो यस्य तथाभूत इति कामजयः सूच्यते चन्द्रांशुभिर्विराजिताः सर्वाः शरदि काव्येषु कथ्यमाना ये कथारसास्तेषामाश्रयभूता निशाः सिषेवे ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णायाः यमुनायाः उपवने जलप्रसूनानि कुमुदादीनि स्थलपुष्पाणि सौगन्धिककुन्दादीनि तेषां गन्धमिश्रवायुना जुष्टाः परिमलिताः दिक्तटाः दिगन्ता यस्य स तथा तस्मिन् मदच्युन्मदजलस्रावी अयमत्र दुष्टगर्वनाशनः रदलेखन इतिधातोः पुण्यपापयोः रदो लेखनं येन स द्विरदः चित्रगुप्तेन पुण्यपापलेखनकर्तेत्यर्थः । करे हस्तविषये अणुभिः लतावत् दण्डायतबाहुभिरित्यर्थः । भृङ्गवद्गायमानप्रमदागणपरिवृतः यद्वा भृङ्गप्रमदा भृङ्गस्त्रियः तासां गणेन संवृतः ॥ २५ ॥

उपसंहरति । एवमिति । अनुरतावलागणः अनुरतस्त्रीगणः तदिच्छानुकूलरमितस्त्रीजनो वा नितरां शं सुखं यासु ताः निशाः रात्रीः एकोऽपि क्षणो रतिक्रियां विना न क्षपित इति शरत्काललक्षणवर्णनेन ये काव्यकथायां संयाताः रसाः शृङ्गारहास्यादिरूपाः एतेषामाश्रयः आश्रया इतिपाठे निशाविशेषणं रसानाश्रयन्तीति रसाश्रयाः आत्मन्यवरुद्धं निरुद्धं सोभगं सौरतं निर्दुष्टं रेतो लक्षणं वीर्यं येन स तथा सुरतक्रिया वीर्यं निरुध्य क्रियत इत्यर्थः यद्वा वशीकृतयोगैश्वर्यः यद्वात्मनि देहे विकाशीकृतसौन्दर्यः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ जलविहारावसानसमये योगमाययोपनीतवस्त्रालङ्कारानुलेपान्तराणि यथास्वं सर्वा एव सोऽपि च परिधाय मधुपानलीलामाततानेत्याह । ततश्चेत्यादि । कृष्णाया उपवने पुलिनं त्यक्त्वा उपवनमध्यं गत्वेत्यर्थः । अन्यथा वैमानिका आलोकयिष्यन् जलप्रसूनैः कुमुदादिभिः स्थलप्रसूनैर्नानाविधैरेव वा गन्धानिलः सम-

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

स्थपनस्तेन जुष्टा दिशस्तटानिव दिक्तटा इति वा यत्र भृङ्गप्रमदागणावृत इति निभृतलीला सूचिता यतः पुंभृङ्गा अपि तदा नासन् मदच्युद्द्विरदो यथेति दृष्टान्तेन मत्तताव्यङ्ग्या तया चमधुपानं ध्वनितम् ॥ २५ ॥

उपसंहरति । एवमित्यादि । सत्यकामः सत्यसङ्कल्पः स श्रीकृष्णः शशाङ्कांशुविराजिता निशा व्याप्य उक्तप्रकारे बहुत्वे बहुवचनं शरत्काव्यकथाः सिषेवे शरदि सम्वत्सरे या काव्यकथा ऋतुषट्कभवा या वनविहारजलविहारमधुपानरतोत्सवादयः काव्याङ्गभूताः कथास्ता इत्यर्थः । तादृशलीलानामतिगोप्यत्वात् श्रोतॄणामनधिकाराच्च सङ्केतेनैवोपसंहृतं भगवता श्रीशुकाचार्येण तत्र मदच्युद्द्विरददृष्टान्तेन मधुपानम् आत्मन्यवरुद्धसौरत इत्यनेन रतोत्सवः अवरुद्धम् अवरोधः सुरतमेव सौरतमात्मन्यवरोधः सौरतं यस्येति रतमर्यादा चोक्ता सङ्केतेनैवेतिदिक् तच्च विपरीतरतमित्यर्थः । रसाश्रयाः श्रृङ्गाररसाश्रयाः ॥ २६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततः पुष्पावचयक्रीडामाह । तत इति । जलक्रीडानन्तरं कृष्णायाः यमुनाया उपवने जलस्थलप्रसूनानां ये गन्धाः तत्सम्बन्धिना वायुना जुष्टाः दिक्तटाः सर्वदिग्भागा यस्मिन् वने तत्र पुनश्चचार भृङ्गैः प्रमदागणैश्चावृतः पुनर्भृङ्गाणां गमने हेतुं दृष्टान्तेनाह यथा मदच्युत् मदस्रावी गण्डयोरन्यत्र च द्विरदो हस्ती करेणुभिः सहितो भवति भ्रमरैश्च सहितः सहज एवान्तः स्थितो रस आविर्भूत इति भ्रमराणामनुद्रवणं चचारेति सर्वत्र नानाविधलीला निरूपिता क्वचिल्लतानामभङ्गः क्वचिद्वृक्षशाखानां तथा मर्यादामार्गः लौकिकश्चान्यथा कृत इति एषा त्रिविधा लीला अत्यलौकिकी ततः अविचारेण रमणमिति ॥ २५ ॥

एवं लीलामुक्त्वोपसंहरति । एवमिति । शशाङ्कांशुभिः चन्द्रकिरणैः लौकिकैर्याः विराजिता निशाः ता एवं रेमे पूर्वोक्तप्रकारस्तु सर्वदा लीलारूपः स केनापि न विरुध्यते नन्वेवं रमणे को हेतुरिति चेत्तत्राह । स सत्यकाम इति । सत्यः कामो यासां ताः सत्यकामाः ताभिः सहित इति तथा प्रार्थितो वा एवमपि क्रीडायां कामः सत्य एवास्ति न तु क्षीणः असद्विषयको वा जातः अनुरताः अबला गणा यस्य सर्वथा रतासु नित्यसम्बन्धासु न कापि शङ्का सर्वथा प्रपन्नासु च अग्रे मर्यादाभङ्गः रसपोषाय तदुक्तम्—

> शास्त्राणां विषयस्तावत् यावन्मन्दरसा नराः ।
> रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम इति ॥

तथापि तासु सत्य एव कामः स्थापितः यो मोक्षपर्यवसायी स कामो भगवन्तं प्रापयिष्यत्येव एवं निशाः सिषेवे तदनन्तरमात्मन्येव उपरुद्धं सौरतं यस्य तथा जातः ननु तासु रतिं स्थापितवान् तथा सति तासु स्वस्मात् पुत्रा भवेयुः सर्वा एव निशा एवं नीताः शरदपि नीता काव्यकथा अपि नीताः काव्योक्तप्रकारेण गीतगोविन्दोक्तन्यायेनापि रतिं कृतवान् तत्र हेतुः रसाश्रया इति कामरसस्तेष्वेव प्रसिद्धः यावत्पुरुषो रसे गौणभावं न प्राप्नोति तावन्न रसिको भवतीति शरद्वर्णनायां वा यत्काव्यं तद्रूपाः कथाः तेषां रसाश्रया इति निशा एता न लोकप्रसिद्धाः किन्तु काव्योक्ता एव तत्रहि नियतकृत्यादिराहित्यं ह्लादैकता अनन्याधीनता तथा अन्येऽपि गुणाः तथा भगवल्लीलारात्रयो जाता इत्यर्थः ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

ततो जलविहारानन्तरं चकारेणाङ्गमार्जनवनदेवतानीततादात्विकवस्त्रालङ्कारपरिधापनानन्तरञ्च कृष्णाया यमुनाया उपवने परःसहस्रकुञ्जयुक्ते तत्र स्वापलीलार्थं चचार जगाम कीदृशः । जलस्थलवर्त्तिप्रसूनानां गन्धो यत्र तथा भूतैरनिलैर्जुष्टानि दिक्तटानि यस्य तस्मिन् । भृङ्गाणां प्रमदानाञ्च गणैरावृतः । मदानां च्युत् च्योतनं क्षरणं यस्य सः ॥ २५ ॥

शरत्पौर्णमासीनक्तन्तनीं रासक्रीडामुपसंहरन्नन्यास्वपि रात्रिषु विविधविचित्राः परिगण्य तादृशक्रीडा ताभिः सह बभूवेत्याह । एवं सर्वा एव योगमायायाः प्रभावात् शशाङ्कांशुविराजिताः निशाः सिषेवे स्वविलासैर्वृन्दावनीय निशासुखमास्वादयामासेत्यर्थः । सिवुधातोः कर्तृत्वेन क्रीडोपयोगिन्यस्ता निशाः परमादरणीयत्वेन भोग्याः किमुत तत्रत्याः कामविलासा इति द्योतितं महाप्रसादाञ्च सेवते भक्त इतिवत् । यतस्ते कामविलासा न प्राकृता ज्ञेया इत्याह । सत्या वास्तववस्तुस्वरूपाः कामा विलासा यस्य सः । किञ्च रमणस्य कर्तृत्वं स्वं ता गोपीश्च प्रापयामासेत्याह । अनु तद्रमणान्तरं रता रमणकर्त्र्यः अबलागणा अपि यत्र सः । अबलापदेन तत्र तासां प्रभविष्णुत्वाभावो व्यञ्जितः । तदा च भगवतो रात्रिन्दिवं तत्केलिविलासैकतानमनस्त्वमभूदित्याह । आत्मनि मनसि अवरुद्धाः अवरुद्ध्य स्थापिताः सौरताः सुरतसम्बन्धिनो भावहावविब्बोककिलकिञ्चितादयः । वाम्योत्सुक्यहर्षादयः स्तम्भस्वेदवैवर्ण्यादयः दर्शनस्पर्शनश्लेषादयश्च येन सः एवं सौरतसंलापैर्भगवान् देवकीसुतः । स्वरतो रमयामास नरलोकं विडम्बयन्नित्यत्र विशेषाविवक्षयैव संलापपदोपन्यासः । अन्नत्वविशेषेण सर्वे एव ते सङ्गच्छन्ते इति ज्ञेयम् । सर्वा द्वादशमासिकीरेव निशाः सिषेवे । कीदृशीः । शरत्काव्यकथारसाश्रयाः । हायनोऽस्त्री शरत् समा इत्यभिधानात् । शरदि सम्वत्सरमध्य एव ऋत्वादिकमधिकृत्य ये काव्यकथारसाः सम्भवन्ति तेषामाश्रयाः या एव साम्वत्सरिकनिशाः श्रीवृन्दावने कृष्णक्रीडाधिकरणीभूता आश्रित्य सत्कवयः प्राचीनार्वाचीना व्यासपराशरजयदेवलीलाशुकगोवर्द्धनाचार्यश्रीरूपादयः स्वस्वकृतेषु काव्येषु कथाः रसांश्च श्रृङ्गारप्रधानान् वर्णयित्वापि न पारं प्राप्नुयुरित्यर्थः । अत एव मयापि साकल्येन वर्णयितुमशक्यत्वाद्दिगेवैषा दर्शितेति भावः ॥ २६ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तदनन्तरभाविनीं वनक्रीडामाह । तत इति । जलक्रीडानन्तरं कृष्णेति नामसाम्येन सख्याः श्रीयमुनायाः एवञ्च तदादीनां बुद्धिस्थैः शक्तेः श्रीकृष्णाया श्रीवृन्दादेव्या च समानीततत्कालोचितनेपथ्यरचनानन्तरमित्यर्थो ज्ञेयः उपवने तीरस्थे वने तदानीमेव

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।
पुष्पफलादिसम्पत्त्या सुसम्पादिते वा चचार तद्यथा श्रीगोविन्द-
लीलामृते—

अथाह वृन्दावनकाननेशौ पादाम्बुजे वा मृतुकारमुख्यैः ।
निवेदितं षड्भिरिहास्ति यत्तत्सार्द्धं समालोकयतं सखीभिः
प्रीत्यर्थं युवयोः सुचित्रितमिदं वृन्दावनं किङ्करै
रस्माभिर्बहुयत्नतो निपुणतासर्वस्वप्रत्यर्पणैः ॥
तन्नाथौ कृपया समीक्ष्य सकलं कर्तुं युवामर्हतं
भृत्यानां हि विशेषकौशलकृतेरीशावलोकः फलम् ॥
वृन्दावने स्थिरचरैस्तत्तल्लीलास्थलीस्थितैः ।
निवेदितं पदाब्जे वां यत्तच्छृणुतं प्रभू ! ॥
अन्योऽन्यसङ्गोल्लसितौ भवन्तौ
द्रष्टुं विजार्थैः करुणोद्भवैर्वाम् ॥
निषेवितुं चाजनि या समीहा
तामर्हतं नः सफलीविधातुम् ॥
ततो वृन्दाटवीं वृन्दा स्फीतां तत्तदृतुश्रिया
दर्शयन्ती स्वनाथौ तावभाषत पुरोगता ॥
स्फुरस्तम्भारम्भा विलसति चरैः कम्पवलिता ।
स्थिरैः कम्प्रैः स्विन्नाः स्रवदुपलकैर्गद्गदयुता ॥
विरावैरस्पष्टैः पुलकवलिताङ्ग्यङ्कुरचयैः
सखीश्रेणीवेशौ प्रणयविवशा सेयमटवी ।

इत्यादि—

अथावादीत्प्रियां प्रेष्ठो दर्शयंस्तद्वनद्युतिम् ।
प्रिये ! पश्याटवीयं ते प्रमोदभरमञ्चति ॥

इत्यादि—

ततः कदम्बादवरुह्य तूर्णमुन्मण्डलीकृत्य कलापिवृन्दम् ।
पुरो नरीनर्ति सराधिकायां नाम्ना हरेस्ताण्डविकः कलापी ॥
राधांसपालिङ्गितदेहेऽमृतवर्षे मन्दध्वाने कृष्णपयोदे स्फु-
रिते स्फुरितेऽग्रे केकाध्वानैरुन्नतपुच्छैः शिखरीभिर्नृत्यत्याराम्मत्त-
मयूरावलिरुच्चैः

शुकाः सार्य्यो वर्णयन्ति द्वयोः सुरतमाधुरीम् ।
जगुर्भृङ्गाः कोकिलाभिः पश्यति स्म मृगादयः ॥
इत्यादि तत्र कुसुमावचयो यथालङ्कारकौस्तुभे ।
सख्यैकया मूर्ध्नि धृतांशुकाञ्चला संवीज्यमाना
दलमालयान्यया ॥
अवेक्षमाणा दयितं विदूरतश्चिनोति मन्दं
कुसुमानि राधिका ।

श्रीहरेर्यथा—

एकेनानिलचपलेन पत्रहस्तेनारौत्सीत्स्तवकपु-
योधरं परेण ।
आक्षेपं नन ननेति चञ्चलालिभ्रूभङ्ग्या व्याधित
हरिं विलोकय वल्ली ॥

अपिच—

प्रियालोके राधा कुसुमविचये कौतुकवती ।
धुनीते सत्रासं करतलमदष्टापि मधुपैः ॥
अखिन्नापि श्रान्त्या श्रयति भुजपालीभुजशिरः ।
परावृत्ता पश्यत्यधृत वसनापि व्रततिभिः

अपिच—

सीमन्तोपरि बन्धजीवकुसुमं सिन्दूरबिन्दूकृतम् ।
चित्रैर्नव्यदलैर्व्यधायि मकरी गण्डे नखाग्रक्षतैः ॥
चक्रे कञ्चुलिकास्पयोधरभरे नानाप्रसूनच्छदैः ।
कृष्णेन प्रणयातिरेकरभसस्तस्यामभिव्यञ्जितः ॥

अपिच—

नानावर्णसुगन्धपुष्पपटलैर्दीव्यद्दलैः पल्लवैः
क्लृप्तैः कुण्डलहारकङ्कणलसन्मञ्जीरकाञ्च्यङ्गदैः ॥
लीलावेशवसान्मुदा प्रियतनौ या वेषसङ्गीकृता ।
सैवास्या नयनाब्जभूषणविधौ कामस्य भूषायते ॥
पौष्पैराभरणैश्चाथ राधा काण्डपटावृता ।
आलीभिर्भूषिता स्तब्धकृष्णेन तदनुक्षयेति संक्षेपः ।
विस्तरो भक्तिमञ्जूषायां द्रष्टव्यः । जलेति । जलस्थलप्रसूनसौरभ-
न्वितः युक्तो योऽनिलस्तेन जुष्टं प्रीत्या सेवितं दिशां तटं विभ गो
यस्तस्मिन् चचार पुष्पावचयानिकुञ्जनिलयनादिक्रीडाभिर्बभ्राम
भृङ्गगणावृतः प्रमदागणावृतश्च तन्नायेन विशेषणेन तत्तत्पुष्पे-
भ्योऽपि तदङ्गसौरभ्यातिशयपरेण कोटिकन्दर्पनिर्मञ्छनीयरूपातिशयः
श्चाभिप्रेतः स्पर्शमात्रसुखैकतात्पर्ये दृष्टान्तः । यथेति । मदच्युदिति
श्रीमदङ्गसौरभ्यस्य मूर्तिमत्त्वमुक्तं करेणुभिरिति तदेकाश्रयत्वम्
एवञ्च वनक्रीडानन्तरं भोजनक्रीडाप्यूह्या साच श्रीगोविन्दलीलामृते

ततस्तौ वृन्दयानीतौ भोजनानन्दकुट्टिमम् ।
प्रविष्टावुपविष्टौ च वेष्टितौ स्वसखीगणैः ॥
ततः पलाशपत्राणां रम्भावल्कलपत्रयोः ।
कुण्डीस्थाल्यादिपात्राणि सम्भृतानि पृथक् पृथक् ॥
उपविष्टा पुरो वृन्दा सम्भृता स्वानुगालिभिः ।
आनीयानीय दत्तानि फलादीन्युपवीविषत् ॥
लड्डुकानि सुगन्धीनि चन्द्रकान्ति सशर्कराम् ।
शर्करेन्दुलवङ्गैलामरिचादिभिरन्विताः ॥
स्थूलसन्तानिकाः पिष्टकृतानि लड्डुकानिच ।
पनसाम्रादिकरसान्मधुचन्द्रशितान्वितान् ।
पुनः सशितयास्वच्छमानीतानि प्रियालिभिः ॥
पर्यवेषयदेतानि ललिता मञ्जुभाषिणी ।
रुचिं दर्शयती ताभ्यां दत्तान्यालिभ्य एव च ॥
कर्पूरवासितं तोयं पपतुस्तौ परस्परम् ।
ततश्चाचेमतुस्तोयैः सखीदत्तैः सुवासितैः ॥
ताम्बूलवीटिकाः स्वस्व सखीभ्यः प्रविभज्य तौ ।
स्वयमात्ताद्धखण्डं च व्यत्यासेन परस्परामिति ॥
ततश्च कन्दर्पमाध्वीकमदाकुलाङ्गी

कन्दर्पमाध्वीकमदानुशिष्टे ॥
राधां समादाय हरिर्निकुञ्जे
सुष्वाप तल्पे विगतालिजल्पे ॥
तत्रासीत्स्तिमितप्रायं पक्षिभृङ्गमृगादिकम् ॥
निकुञ्जरन्ध्रेष्वालयोऽप्यालीना निर्निमिषेक्षणाः ।

इत्यादि रात्रिशेषे उत्थापनादिप्रकारश्च भक्तिमञ्जूषायां द्रष्टव्यः
विस्तरभिया न लिखित इति ॥ २५ ॥

तदेवमेकस्यां रात्रौ कृतां रासक्रीडामन्यत्राप्यतिदिशन्नुपसंह-
रति । एवमिति । इत्युक्तदिशा शरत्काव्येति वक्ष्यमाणप्रतिशब्दीत्यर्थः
शशाङ्कांशुविराजिता इति कौमुद्यां निशाः ताः सर्वा एवसिषेवे पर

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

माद्दरेण परिचरितवानित्यर्थः । यद्वा शरदि ये काव्यकथारसाः
प्रसिद्धास्तेषामाश्रयो यासु श्रीभगवत्कृतानन्तलीलासु तादृशीर्निशा-
व्याप्येत्यर्थः एवञ्च यत्संबन्धेन रात्रीणामपि सेव्यत्वमुक्तं
किं वक्तव्यं तत्र श्रीराधायाः सेव्यत्व इति सुसिद्धं स्वाधीनपति-
कात्वं तदेव दर्शयति । आत्मनीत्यादिना । आत्मनि परमप्रेमास्प-
दभूतायां श्रीराधायामेव अवरुद्धं सौरतं सुरतसम्बन्धि निज-
सुखं येन सः यद्वा आत्मनि स्वस्मिन्नेव अवरुद्धम् अवरोधः तद्र-
त्सौरतं यस्येति पुरुषायितं सूचितं नन्वेवमन्यासु सापत्न्यमुद-
येतइत्यत आह । अनुरतावलागणः । सर्वासामपि तत्सुखासक्तेरिति
भावः । कथमेवं सम्पन्नमित्यत आह । सत्यकामः अव्यभिचरि-
ताभिलाष इत्यर्थः । यद्वा आत्मैवसत्य पदाभिधेयः सत्यं ज्ञानमनन्तं
ब्रह्मेतिश्रुतेः ततश्च स्वरूपायां नित्यसिद्धायां श्रीराधायामेव कामोऽ-
व्यभिचरिताभिलाषो यस्येत्यनुकूलत्वम् सूचितम् अन्यत्र तु तदि-
च्छया वा निरर्गलया भक्तजनाधिकरणककृपया तद्विभ्रमणे वा तथा-
त्वानुकरणमिति सिद्धं राधिकैकतानत्वमेव श्रीभगवत इति तदेवं
यथास्थानं साधयितव्ये षड्विधे भगवत्त्वे समग्रया श्रिया नित्य-
योगोऽत्र साधित इति निखिलेऽपि प्रकरणार्थः सुसंगतो वेदि-
तव्यः—

> तथा चैश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
> ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेति ॥

विष्णुपुराणोक्तलक्षणवाक्येऽपि रहस्यत्वादेव श्रियो मध्यगतत्वेनोप-
न्यासः कृतः ततश्च धाम्नोऽपि वैशिष्ट्यंतत्कृतमेव वेदितव्यं तदुक्तं
ब्रह्मयामले—

> गोप्यैकया युतस्तत्र परिक्रीडति नित्यदेति ।

अत्र नित्यदेति प्रकटायामप्रकटायां च लीलायामित्यर्थः स्वरूपस्यापि
तत्रैव—

> भुजद्वययुतः कृष्णो न कदाचिच्चतुर्भुजः ।
> वृन्दावनं परित्यज्य स क्वचिन्नैव गच्छतीति ॥

निखिलं निरवद्यम् एवंच शरत्पदस्याश्लिष्टत्वादब्दोपि वाच्यः ततश्चाब्द
सम्बन्धिन्यो याः काव्यकथाश्चन्द्रोदयवनविहारजलविहारनौखेला-
दोळान्दोलनकुञ्जक्रीडाद्याः सर्वाः सिषेव इत्यर्थः । ता अपि रसा-
श्रया एव नतु कामाश्रया नवात्यन्तैश्वर्यादिमत्त्वेन भावाश्रया
इत्यर्थः । रतिर्देवादिविषयो भाव इत्यालङ्कारिकोक्तेः यतः सत्यः
कालत्रयाबाध्यः कामो विहारो यस्येति नित्यविहारीत्यर्थः । अत्र
निशा इत्याद्या द्वितीयान्त्यन्तसंयोगे ततश्च निशा इति शर-
त्काव्यकथा इति रसाश्रया इत्यादिपदानां सिषेव इत्यनेन
प्रत्येकमन्वयः तथाच सर्वप्रकारैर्नित्यत्वमेव साधितं तत्र निशे-
त्यस्य शशाङ्केति विशेषणं पुळिनगतानां निशानां नित्यदा
ज्योत्स्नीत्वमेव सूचितं द्वितीयस्य हायनोऽब्दोशरत्समा इति कोशा-
दब्दोऽपि लक्षितः षडृतुसम्बन्धिन्य इत्यर्थः नचैतदप्यसम्भावित-
मिति मन्तव्यं सत्यकामत्वात् तदुक्तं शतकेषु—

> क्षणाच्छरदुपागमं क्षणत एव वर्षागमं
> क्षणात्सुरभिवैभवं क्षणत एव चान्यर्तुमत् ॥

इत्यादिना समानोदितचन्द्रार्कमित्यादि बृहद्गौतमीयतन्त्रे च तृती-
यस्य रसः प्रेमरसः प्रोक्त इति भावप्रदीपोक्तेस्तदेकनिष्ठाः शृङ्गा-
रादेस्तदङ्गत्वेनैवोपादानात् अतएव शृङ्गारकथोपदेशेन निवृत्तिप-
रेयं पञ्चाध्यायीतिश्रीस्वामिपादाः एवञ्च शुद्धप्रेमरसेनैव सेव-
नीयौ श्रीराधाकृष्णाविति प्रकरणार्थः । तथा श्रीरुद्रयामळे—

> ब्रह्मानन्दरसादनन्तगुणितो रम्यो रसो वैष्णवः
> स्तस्मादप्यधिकोऽतिमुख्यसुखदः श्रीगोकुळेन्द्रानुगः ॥
> तस्मादप्यधिकं चमत्कृतिभरं वर्षद्रसानां परं
> श्रीराधापदपद्ममेव परमं सर्वस्वभूतं मम ॥

अत एव श्रीमत्सुधानिधौ—

> दूरे सृष्ट्यादिवार्त्ता न कलयति मनाक् नारदादीन् स्वभक्तान् ।
> श्रीदामाद्यैः सुहृद्भिर्न मिलतिच हरेस्स्नेहवृद्धिं स्वपित्रोः ॥
> किन्तु प्रेमैकसीमां परमसुखचमत्कारसारैरगाधां
> श्रीराधामेव जानन्मधुपतिरनिशं कुञ्जवीथीमुपास्ते ॥

अत एवोपासकस्यापि वैशिष्ट्यमुक्तं शतकेषु—

> धन्यो लोके मुमुक्षुर्हरिभजनपरो धन्यधन्यस्ततोऽसौ
> धन्यो यः कृष्णपादाम्बुजरतिरसपरमो रुक्मिणीशप्रियोऽतः ॥
> याशोदेयप्रियोऽतः सुबलसुहृदतो गोपकान्ताप्रियोऽतः
> श्रीमद्वृन्दावनेश्वर्यतिरसविवशाराधकः सर्वमूर्धा ॥

इत्यलमतिप्रपञ्चितेन विशेषजिज्ञासायां भक्तिमञ्जूषा दृश्या ॥२६॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं भगवता कामविजये कृते स्वीयत्वेन संपादिततद्वरू-
पगोपीसमाजस्य रतिरणसम्भावितश्रमे जलविहारेणापनीते हरि-
विजितकामस्य हरिरूपतयैव तद्गृहगोपीहृदयनिवासेन तद्वि-
जितानां तद्रूपतामाकलय्य वसन्तोऽपि जातोत्साहो भगवन्तमभिसं-
गम्य तेन पराभवेऽपि तत्त्रोटितसुमनसां तद्गुणग्रथिततया तद्गुणो-
हारत्वेन तदङ्गसङ्गसौख्यमभिलषन् तद्गृहवनमासिव्याप्य स्वप्रभाव-
प्रकटनेमद्धहिरन्तर्भावाभिक्षस्येर्ष्यामिषेणाप्यभिलषितपूरकस्य काम-
वलसखीगणान्वितस्य तस्य समागमं संभाव्य कालिन्द्युपवने
नितरां स्वप्रभावमाविश्चकार भगवानपि तद्भावमाळक्ष्य तथैव
तद्वने विहरंश्चचारेत्याह । ततश्चेति । ततः पूर्ववर्णितरीत्या वसन्त-
प्रभावदर्शनानन्तरं भगवान् यमुनोपवने चचारेत्यन्वयः कथ-
म्भूते यमुनोपवने तदाह । जलस्थलेत्यादि । वसन्तप्रभावेणैवाका-
लेऽपि शरदि निशायां च प्रफुल्लितानि यानि जलप्रभवाणि
कल्हारकञ्जोत्पल कुमुदादीनि स्थलप्रभवाणि मल्लिकामालती-
स्थलकमलादीनि वासन्तशारददिवानिशाविकासानि प्रसूनानि
प्रकृष्टान्यपि नन्दनचैत्ररथादिसुमनांसि सुष्ठूनानि येभ्यस्तानि
तद्गन्धवाहोय ऋतुराजसचिवोऽनिलः शीतसुरभिवायुस्तज्जुष्टा-
दिक्कृता दिशां प्रान्ता यस्य तस्मिन्अत्र वायोर्जलस्थलप्रसूनसंबन्धेन
शीतत्वं सुरभित्वं च द्योतितम् अनिलेति नाम्ना न इला वाणी शब्द-
विशेषो विद्यते अस्येति व्युत्पत्त्या रवशून्यतया मन्दत्वं दर्शितं
तत्र वायोस्तथात्वेऽयमभिप्रायः भगवतो जगज्जीवनत्वाद्वायोश्च जग-
त्प्राणत्वान्मिथोमैत्र्यं मत्वा तस्य स्वोपवने तस्मिन् स्वागते तत्स्वा-
गतार्थं सुमनस्तया सुमनआमोदेन सुमनआमोदमावेदयत तथा सज्ज-
नानांश्यामस्नेहरसस्य श्यामे समर्पणरूपां प्रीतिरीतिं व्यञ्जयन् घनश्या
मरसपूरितसरतिसरितसलिलरसघनश्यामे समर्पयत्तथा सुमनआमोदं
भगवति समर्पयंस्तत्तनुसुमनआमोदसाम्यमलब्ध्वा लज्जया मन्दगति-
रभवत् किम्भूतश्चचार तदाह । भृङ्गप्रमदागणावृत इति । तत्र भृङ्गा

श्रीरामनारायणकृतभावभावविभाविका ।

वसन्तसैनिकाः प्रमदाश्च प्रकृष्टमदयुक्ताः प्रकृष्टमादिकाश्च कामसैनिकास्तद्गणैराभृतो वेष्टितस्तैरासमन्तात् सर्वभावेन स्वामितयावृतो वा तत्रायम्भावः यथा मन्मथमन्मथच्छवितया कामराजमतुर्गानधिरुह्य रतिरणेऽप्यप्रच्युतसौरतत्वेन तद्विजयितया तद्गणैः प्रमदाभिः स्वामितयावृतस्तथा वसन्तेन भगवत्साम्याय तत्समोत्साहसमीरोत्फुल्लतनुसुमनसां सुमनसाश्चानुकारार्थं प्रति द्रुमं प्रतिशाखं कृतेऽपि तत्कुसुमकुसुमविकाशे भुजविशालमृदुतरकरानुकाराय मृदुमञ्जुप्रवालोल्लासे प्रेमोत्कलितपुलकसाम्याय कृतेऽपि मुकुलप्रसादे किंकिणिनूपुरादिवंशवाद्यादिप्रवादानुकारावितेऽपि विचित्रकलद्विजकोकिलादिनादे भगवत्तुलमालालिङ्गितसखीजनलताविहारानुकाराय प्रतिद्रुमं कृतेऽपि ललितलताविस्तारे भगवत्तत्सखिसाम्यादर्शनेन तदीयभृङ्गगणैः पामरजनभ्रमरैर्भवविपिनोत्फुल्लविषयविषमविषलतामुग्धतया तद्भ्रमणेऽपि कर्मठमधुपराठैः श्रुतिद्रुमबहुशाखागतकुसुमितवचनमधून्मत्ततया तद्रतत्वेऽपि हरिच्छविसारङ्गैर्मुनिसारङ्गैर्विविधदोषकण्टकनाशम्लानादियुतं तद्विहाय दोषम्लाननाशादिशून्यनिष्कण्टकहरिच्छविवनानुसरणतद्गुणगणनपरैः सन्तवनं विसृज्य तच्छविवनमनुसरणे तैरप्यावृतश्चचार तस्मिन् स्वच्छविविजितेऽपि तत्सुमनोविकाशेन तदन्तर्भावमालक्ष्य सखीगणैः सह तत्रैव विविधरमणं चकार बहुसखीभिर्वनविहारे कामस्पर्शसुखातिशये प्रीत्याधिक्ये च दृष्टान्तः । यथा मदच्युद्द्विरदः करेणुभिरिति । यद्वा यथा द्विरद इत्येतावदेव दृष्टान्तः मदच्युदिति भगवद्विशेषणं कामवसन्तादीनां मदाश्रयवत्त्वस्यस्मादित्यर्थः । अमदच्युदिति वाच्छेदः वसन्तसमीरादिसमीरितमदनवीरबहुसमितिरणेऽपि स्वात्मन्यवरुद्धसौरतत्वेन न मदश्च्यावितो यस्येत्यर्थः । केन ब्रह्मणा प्राप्या रेणवो यासामिति मध्यमपदलोपिसमासेन वाकाः सुखरूपाः सुखप्राचुर्येण तदात्मिकारेणवो वायासांकानि सर्वसुखानि रेणुभिर्वा यासां कानि सर्वसुखानि रेणवो मात्रात्मिकानि वा यासां तासां सर्वसुखबिम्बभूतब्रह्मसुखात्मकत्वादित्यादिव्युत्पत्त्या करेणुभिरिति सखीजनविशेषणम् ॥ २५ ॥

एवं शरत्पूर्णिमायामेकनिशागतविहारं वर्णयित्वा तत आरभ्य व्रजावतीर्णसमस्तगोपीनां वृन्दावनस्थनित्यविहारसमवायेन प्रतिनिशं तादृग्विहारमुपदिशन्नानाशृङ्गारलीलामुपलक्षयति । एवमिति । स भगवान् एवम्पूर्ववर्णितलीलोपलक्षितप्रकारैः तत आरभ्य सर्वा निशाः सिषेव इत्यन्वयः किंभूता निशाः सर्वा अपि शशाङ्कस्य नित्यपूर्णचन्द्रस्यांशुभिः सितामृतमयाल्हादिरश्मिभिर्विशेषेण कुत्रापि तमः सम्भावनाशून्यतया राजिताः शोभिताः तत्र चन्द्रमा मनसो जात इतिश्रुत्या चन्द्रमसो भगवन्मनोजत्वेन तन्मनोऽनुसारितया तत्रत्यसर्वनिशासु नित्यपूर्णप्रकाशत्वमिति केचित् भगवल्लीलायां दक्षशापाप्रवेशान्नित्यपूर्णप्रकाशता तस्येत्यन्ये स्वशप्रभवभगवल्लीलादर्शनोल्लासेन तथात्वमित्यपरे—

यदादित्यगतं तेजो जगद्भासयतेऽखिलं
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति

स्मृत्या शशाङ्केऽप्यंशू रश्मिमात्रं यस्य स शशाङ्कांशुः कृष्णस्तेनैव विशेषेण राजिता इत्यपि केचित् अन्येतु दक्षशापेन चन्द्रमसो लौकिकांशूनां ह्राससम्भवेऽपि पूर्वनिर्दिष्टवाक्येनैव शशाङ्कगतैरलौकिकैः कृष्णांशुभिरेव विशेषेण राजितत्वं वस्तुतस्तु कृष्णनित्यलीलाधाम्नि चन्द्रमसोऽपि तत्स्वरूपात्मकत्वेनैवैकरसत्वं नित्यपूर्णत्वञ्च क्वचित्यथोचिताभिसारादिकृष्णतत्सखीसंमतलीलानुसारित्वञ्च पुनः किम्भूताः शरत्काव्यकथारसाश्रयाः शरदित्युपलक्षणं वसन्तादीनामपि तथाच सर्वर्तुषु ये रसाः काव्यकथासु च ये ये रसास्तेषामेवाश्रयाः ननु तद्दोषाणां लीलाधाम्नि तदप्रवेशात् रसो वै स इति श्रुत्युक्तरसरूपस्य कृष्णस्य लीलाधाम्नि तत्स्वरूपात्मकत्वेन सर्वस्यापि रसात्मकत्वाच्च अनेन काव्यकथानामपि भगवदाविर्भावितत्तल्लीलासंबन्धेनैव रसवत्त्वं तत्संबन्धाभावे नीरसत्वमेवेत्यपि ध्वनितं स किम्भूतः सत्यकामः सत्योऽप्रतिहतः कामः संकल्पो यस्य सच्छब्देनपृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशाविति सत्यं भूतपञ्चकं कामः सङ्कल्पो यस्येति वा "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिश्रुत्या सत्यश्च तथा—

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः
परः पुरुष एक इहास्य धत्ते । स्थित्यादये
हरिविरञ्चिहरेति संज्ञा इति

स्मृत्या प्रकृतिगुणसंबन्धेन को ब्रह्मा आ विष्णुः म शिव इति रूपत्रयात्मकश्चेति सत्यकामः यद्वा सत्यात्मप्राणारामम्मनआनन्दमिति श्रुत्या सत्याः स्वरूपात्मका एव सर्वे कामा आरामशब्दवाच्या रमणोपकरणा धाम तत्रत्यसर्वभोग्याश्च यस्य "कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे"ति श्रुत्या कामो मनश्च यस्य कामो रतिर्विहारो वा यस्येति वा सत्यः नित्यसुखपर्य्यवसायित्वेनाबाधितः संसाराननुबन्धी कामोऽभिलाषो रतिविहारो वा यस्मिन्—

न मय्यावेशितधियां कामः कामाय कल्पते ।

त्यादिवचनात् यद्वा सत्यश्च कं ब्रह्म खं ब्रह्मेत्यादिश्रुत्या कं सुखं तद्रूपश्च आसमन्तात् मा शोभा यस्मात् समूर्त्यालोकलावण्यनिर्मुक्त्येति स्मृतेः यः सर्वज्ञः सर्वविदित्यादिश्रुतेर्वा आसमन्तादिति सर्वविषयिणी मा प्रमा यथार्थमतिर्यस्य यद्वा सत्ये स्वस्वरूपे एव कामो रतिर्यस्य तदितरस्य रत्यास्पदत्वाभावात् नन्वेवं भूतश्चेत्किं रमणेन तत्राह । अनुरताबलागणः । अन्वनुरतोऽबलानां गणो यस्मिन् तथाच तदभिलाषपूरणाय रमणमिति ननु तासां नित्यलीलासुखभाक्त्वाद्वतारदशायामेतल्लीलाविष्कारे किम्प्रयोजनं तत्राप्याहानुरतेति गोपी रतिमनुरतोऽबलानां बलमैश्वर्य्यज्ञानविरागादितद्धीनानां जीवानामागणो यस्मिन् तथाच सर्वजीवोद्धारकरतिपथप्रवर्त्तनमेव लीलाविष्कारप्रयोजनमितिभावः । ननु तथापि ताभीरमणे आत्मारामत्वक्षतिस्तत्राह । आत्मन्यवरुद्धसौरत आत्मन्येवावरुद्धं सौरतं सुष्ठु रतः प्रेम्णो भावो येन यद्वा तासामपि तदात्मत्वात्तासु रमणेऽप्यात्मन्येवावरुद्धं सौरतं यस्य यद्वा आत्मनि स्वविग्रहे एवावरुद्धं सौरतं सुरते भवं शुक्रं यस्येत्यसंख्यातगोपिकारमणेऽप्यप्रच्युतशुक्रत्वेन कामविजयख्यापनम् ॥ २६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

स्थलजलक्रीडे वर्णयित्वा वनक्रीडां वर्णयति । ततो यथोक्तक्रीडानन्तरञ्च जलस्थलपुष्पाणां गन्धो यत्र तेन वायुना जुष्टानि दिशां तटानि अन्ता यस्मिन् तादृशे कृष्णाया यमुनाया उपवने सौगन्ध्यासक्तानां भृङ्गाणां लावण्यासक्तानां प्रमदानां च गणैः

॥ राजोवाच ॥

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥
स कथं धर्मसेतूनां वक्ता कर्त्ताभिरक्षिता ।
प्रतीपमाचरद्ब्रह्मन् ! परदाराभिमर्शनम् ॥ २८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

रावृतः सन् विचचार विहृतवान् यथा गजः मदच्युत्तथा भृङ्गगणावृतः करेणुभिश्चावृतस्तद्वत् ॥ २५ ॥

एवं प्रथमरात्रिकृतरासक्रीडामभिधायानुक्तं शंसन् अन्यरात्रिषु तत्प्रकारमतिदिशन्नुपसंहरति । एवमिति । सः श्रीकृष्णः अनुरक्तस्त्रीकदम्बस्थः सर्वा अपि शशाङ्कांशुविराजिताः शरदि भवाः काव्येषु कथ्यमानाः ये रसास्तेषामाश्रयभूता निशा सेवितवान् यद्वा निशा इति द्वितीया अत्यन्तसंयोगे तथाभूतासु निशासु शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेवे सत्यसङ्कल्पस्य भगवतो रमणाधिकरणभूताः सर्वा अपि निशाः शशाङ्कांशुविराजिता एव सम्पन्ना इति बोधनाय सत्यकाम इत्युक्तं तस्मिन्नाभिरमणे तासां नैर्मल्यमेव स्थितमितिसूचनाय अवलेत्युक्तम् अतएवात्मन्येवावरुद्धं सौरतं चरमधातुर्नतु स्खलितो यस्येति कामविजयोक्तिः यद्वा सर्वाः द्वादशमासिकाः "हायनोऽस्त्री शरत्समा" इति कोशात् शरदि सम्वत्सरमध्ये या श्रीवृन्दावनीयकृष्णक्रीडाधिकरणभूता आश्रित्य भूतभविष्यद्वर्त्तमानकविकृतकाव्येषु याः कथाः रसाश्च तेषामाश्रयभूता निशाः सिषेवे रममाणश्च भगवानात्मन्यवरुद्धसौरतः आत्मनि मनसि अवरुद्धा अवरुध्य स्थापिताः सौरताः सुरतसम्बन्धिनो भावहावविब्बोककिलकिञ्चितादयः संलापप्रलापादयः वाम्यौत्सुक्यहर्षादयः स्तम्भस्वेदवैवर्ण्यादयः दर्शनस्पर्शनाश्लेषादयश्च येन सः यद्वा एकस्यामेव रजन्यामसंख्याताः स्वसङ्कल्पितशशांकांशुविराजिताः अतः सत्यसङ्कल्पः समानमन्यत् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ वनक्रीडामाह । ततश्चेति । ततो जलक्रीडानन्तरम् उपवने यमुनाया इति शेषः भृङ्गप्रमदागणावृतः कृष्णश्चचार कथंभूते यमुनोपवने जलस्थलप्रसूनानां गन्धो यस्मिन् तेनानिलेन जुष्टानि दिशां तटानि अन्ता यस्मिन् तथा मदच्युदित्यनेन मत्ताकृष्टभ्रमरैर्वृतः करेणुभिरिभीभिश्च आवृतः द्विरदो मत्तगज उपवने चरति तद्वत् ॥ २५ ॥

अथ रासक्रीडां निगमयति । एवमिति । आत्मन्यवरुद्धसौरतः आत्मनि परानन्दपूर्णे स्वासाधारणे मनसि अवरुद्धं सौरतं सुरतसुखसंकल्पो यस्य स स्वभावत एवाप्रस्ताविषयाभिलाषःसर्वदा जितकाम इत्यर्थः सत्यकामः यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह मिति च सत्यः सङ्कल्पो यस्य तादृशसंकल्पे हेतुं दर्शयितुं विशिनष्टि

अनुरत्तावलागण इति । अनुरक्तः कृष्णेतरपदार्थपरित्यागपूर्वकं तच्चरणं शरणं गतः अवला गणो यस्य एवंभूतः स्वचरणशरणजनमनोरथपूरक इत्यर्थः । शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूताः तदोडुराज इत्यत्रोक्तरीत्या शशाङ्कस्यांशुभिः किरणैर्विराजिताः सर्वा निशाः सिषेवे सेवितवान् ॥ २६ ॥

भाषा टीका ।

तिस के अनंतर जल के तथा स्थळ के पुष्पों के सुगंधवाले पवन से युक्त हैं दिशा तथा यमुना तट जिसमें ऐसे यमुना तट में गान करते हुये जो भौंरा तथा गोपीजन तिन के सहित भगवान् सञ्चारकरते भये जैसे कि मद से चुचाता हुआ हस्ती हथिनिन के साथ घूमता होवे तैसे ॥ २५ ॥

इस प्रकार से वे सत्य सङ्कल्प वाले भगवान् अपने आत्मा ही मे सब रति सुख को रोकने वाले, उन सब स्त्रीजनों को साथ मे लेकर सम्पूर्ण शरद ऋतु के काव्यों से संयुक्त काव्य कथा तथा सबरस के आश्रय करने वाली तथा चन्द्र के किरणों से शोभित जो रातें तिन को अनेक प्रकार से सेवन करते भये ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रतीपं प्रतिकूलमधर्ममित्यर्थः ॥ आचरत्कृतवान् नचेदमधर्ममात्रं कलञ्जभक्षणादिवत्किन्तु महासाहसमित्याह । परदाराभिमर्शनमिति ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एवं प्रीतिविशेषेण श्रीबादरायणिना वर्णितायाः श्रीरासक्रीडायाः श्रवणान्मिथोपाङ्गकूणनैर्विलोकमानानामीषद्धसतां शुष्कतार्किकमीमांसकादीनां केषाञ्चिदवैष्णवानामभिप्रायं वितर्क्य कृपया तेषामेव हितार्थं तमुत्थाप्य स्वसन्देहव्याजेन पृच्छति । संस्थापनायेति त्रिभिः । सम्यक् स्थापनाय लुप्तस्य प्रवर्त्तनाय वर्त्तमानस्यच विघ्नतो रक्षणायेत्यर्थः । न केवलं तदर्थमेव किन्तु इतरस्य अधर्मस्य प्रकृष्टशमाय सवासनोन्मूलनाय अन्यथा धर्मसंस्थापनस्याप्यसिद्धिः हि प्रसिद्धं संरक्षणाय धर्मस्येत्यादिवचनेभ्यः भगवानिति तत एव भगवत्ताप्रकटनमपि स्यादिति भावः अंशेन श्रीबलदेवेन सह इति तत्र तन्नामद्वोऽपि दार्शितः यतः जग-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तामीश्वरः प्रतिपालकः अन्यथा जगन्नाशापत्तिरित्यर्थः ॥ श्लेषार्थ-
श्चायं धर्मस्य भक्तिविरुद्धाशेषधर्मस्य संस्थापनं तस्मै प्रशमाय
अत्यन्तनाशाय तादृशधर्माभावेनैव रासक्रीडादिमहालीलासिद्ध्या
निजावतारमुख्यप्रयोजनसिद्धेः ननु तर्हि स्वकृतवेदादिनिबन्धा-
तिक्रमः प्रायः स्यात् तत्राह । जगतां ब्रह्मादीनामीश्वरः परमस्व-
तन्त्रो ऽयं कदाचिद्रसविशेषापेक्षया तादृसमपि कुर्यात् तत्रास्य को
नाम नियामकोऽस्त्वित्यर्थः । "यद्वा धर्मो मद्भक्तिकृत् प्रोक्त" इत्यादि
न्यायेन भक्तिलक्षणो धर्मस्तस्य इतरस्य तद्व्यतिरिक्ताशेषस्य मोक्षा-
देरपि अत्यन्तोपशमाय यतो जगत्प्रतिपालकः विघ्नविनाशनपूर्व-
केण भक्तेः सम्यक् स्थापनेनैव सर्वेषां स्वतः सुखसर्वार्थ सम्पत्त्या
जगत्पालनसिद्धेः ॥ २७ ॥

धर्मा एव सेतवः लोकरक्षार्थमर्यादाः धर्मं वैदिकनिबन्धा वा तेषां
वक्तृत्वादेव कर्त्ता अन्यथा वाक्यव्यवहारयोर्विसम्वादेन लोकैर-
ग्राह्यः स्यात् किञ्च अभितो रक्षिता तत्प्रतिपक्षवधादिना बहुधा
सम्वर्द्धनेनच पालकः परदाराभिमर्शनरूपं प्रतीपं धर्मसेतूनामेव
धर्मसंस्थापनदेवो प्रतिकूलं ब्रह्मन् । हे साक्षाद्वेदमूर्ते प्रतीपाचरणेन
वेदातिक्रमाद्भवादृशविप्रकुलातिक्रमोऽपि स्यात् तच्च ब्रह्मण्यदेवस्य
तस्यायुक्तमेवेति भावः । यद्वा ननु तात तत्कारणं कथं मया ज्ञातुं
शक्यमीश्वरचेष्टितत्वादित्याशङ्क्याह । हे परब्रह्मरूपेति । सर्वज्ञत्वा-
दित्यर्थः अन्यैस्तैर्व्याख्यातं यद्वा प्रतीपमाचरद्दिति अधर्मः उक्तः
कृतोऽभिरक्षितश्चेत्यर्थः । तत्र उक्तः मया परोक्षं भजता तिरोहित-
मित्यादिना कृतः साक्षादेव रमणात् अभिरक्षितः पुनः पुनरा-
चरणात् तेन लोके प्रवृत्तिसम्भवाच्चेति यद्वा धर्मः प्रकर्षेण
नाशितः अधर्मश्च सम्यक् स्थापित इति श्लेषपक्षे कथं केन
प्रकारेणाचरत् अपितु न केनापीत्यर्थः । कुतः भक्तिलक्षणा-
धर्मसेतूनां वक्तृत्वादिहेतोरित्यर्थः । अतो निजावतारमुख्यप्रयोजन-
भक्तिविशेषविस्तारणाय धर्मान्यनादरो युक्त एवेति भावः । सच
तावत्कर्माणि कुर्वीतेत्यादिवचनात् तत्सेवकेष्वपि व्यक्त एव
यद्वा प्रसिद्धधर्ममर्य्यादानां वक्तादिरपि किमर्थं प्रतिकूलमाच-
रत् रासक्रीडया परमभक्तिप्रवर्त्तनेन तदेकसाध्यकधर्मस्यापि
साफल्यार्थमिति भावः । किञ्च पराणां तदेकभक्त्या श्रेष्ठानां दाराणां
स्वस्त्रीणामिवाभिमर्शनं प्रेम्णैवमवतीर्णस्य सर्वापेक्षया प्रिय-
जनमनोरथपूरणं युक्तमेवेति किञ्च परशब्देन अन्यदीयभार्या-
णामेवाभिमर्शनं दोषः तास्तदीयाः विशेषतः पराः सर्वतः श्रेष्ठा
निजपत्न्य एवेति सूचितमिति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

वंशीसञ्जल्पितमनुरतं राधयान्तर्द्धिकेलिः प्रादुर्भूयासनमधि-
परं प्रश्नकूटोत्तरञ्च । नृत्योल्लासः पुनरपि रहःक्रीडनं वारि-
खेला कृष्णारण्ये विहरणमिति श्रीमती रासलीला । एवं सुख-
विशेषेणैव मुनीन्द्रेण प्रश्नस्य विस्तार्य च वर्णितायाः रासक्रीडायाः
श्रवणाद्राज्ञोऽपि तत्र तत्र सुखोद्बोध एव जात इति लभ्यते
ननु दोषदर्शने वैरस्यापातात् तस्मात्तत्रत्यानां केषाञ्चित् सन्देहं
वितर्क्य तेषामेव हितार्थं तमुत्थाप्य स्वसन्देहव्याजेन पृच्छति ॥
संस्थापनायेति त्रिभिः । तत्राद्य द्वयं युग्मकम् संस्थापनाय
लुप्तस्य प्रवर्त्तनाय प्रवृत्तस्य रक्षणायेत्यर्थः । न केवलं तदर्थ-
मेव किन्त्वितरस्य अधर्मस्य प्रशमाय सर्वनाशनोन्मूलनायेत्यर्थः ।
अन्यथा धर्मसंस्थापनस्याप्यसिद्धिः स्यात् । हि प्रसिद्धम् ।
"धर्मसंस्थापनार्थाय सम्भवामि युगे युग" इत्यादिवचनेभ्यः । भगवा-
निति तत एव भगवद्भावप्रकटनमपि स्यात् इति भावः । अंशेन
श्रीबलदेवेन सहेति तत्र तत्राग्रहो दर्शितः यतो जगतामीश्वरः
प्रतिपालकः । अन्यथा जगन्नाशापत्तिरित्यर्थः । यद्वा । "विष्ट-
भ्याहमिदं कृत्स्नमेकांशेन स्थितो जग" दिति न्यायेन यो जग-
दीश्वरः स्वयन्तु पूर्णैश्वर्ययुक्त इत्यर्थः । तस्यान्यकामना न सम्भ-
वतीति भावः ॥ २७ ॥

स इति । पूर्वत्र यच्छब्दस्याध्याहारादन्वयः ।
धर्माः एव सेतवः लोकरक्षामर्यादाः धर्मं वैदिकनिबन्धा वा
तेषां वक्तृत्वादेव कर्त्ता अन्यथा वाक्यव्यवहारयोर्विसम्वादेन
लोकैरग्राह्यः स्यात् । किञ्च अभितो रक्षिता तत्प्रतिपक्षवधा-
दिना बहुधा सम्वर्द्धनेन च पालकः । परदाराभिमर्षणरूपं
प्रतीपं धर्मसेतूनामेव । धर्मसंस्थापनदेवो प्रतिकूलम् । ब्रह्मन्
हे साक्षाद्वेदमूर्त्ते । प्रतीपाचरणेन वेदातिक्रमात् भवादृशविप्रकु-
लातिक्रमोऽपि स्यात् । तच्च ब्रह्मण्यदेवस्य तस्यायुक्तमेवेति
भावः । यद्वा । ननु तत्कारणं कथं मया ज्ञातुं शक्यमी-
श्वरचेष्टितत्वादित्याशङ्क्याह । हे सर्ववेदात्मक । सर्वज्ञत्वादित्यर्थः ।
अन्यैः । यद्वा । प्रतीपमाचरदिति अधर्मं मुक्तवान् कृतवान्
अभिरक्षितवांश्चेत्यर्थः । तत्रोक्तिः मया परोक्षं भजता तिरोहि-
तमित्यादिना रहोऽपि परदारान् भजे इत्यनुवादात् कृतिः साक्षा-
देव रमणात् अभिरक्षा पुनः पुनराचरणात् तेन लोके प्रवृत्ति-
सम्भवाच्चेति स्वयमधर्मकर्तृभ्योऽपि तस्य महानेव दोषबन्ध
आयातः । यद्वा । धर्मं प्रकर्षेण नाशितवान् अधर्मञ्च सम्यक्
स्थापितवानिति श्लेषेण स्वयं सिद्धान्तमप्याह । संस्थापनायेति
धर्मस्य स्थापनं नाम सामान्यतः संस्थापनन्तु तत्रैव शुद्ध-
भक्तियोगस्य सर्वातिक्रमितया स्थापनात् । "स्मर्त्तव्यः सततं
विष्णु र्विस्मर्त्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्यु-
रेतयोरेव किङ्कराः" इति पाद्मादिशास्त्रेभ्यः । तदवतारस्य तन्मु-
ख्यप्रयोजनत्वञ्चोक्तं प्रथमे श्रीकुन्तीदेव्या । "भक्तियोगविधानार्थं
कथं पश्येमहि स्त्रियः" इति । भक्तियोगविधानार्थमवतीर्णं त्वामिति
टीका च । तद्धि तत्र विनाप्युपदेशं त्वत्प्रभावेणैव भवति ।
तथेतरस्य तद्विरुद्धस्य च स्वत एव नाशो भवतीति स
तथाभूतोऽसौ परदाराभिमर्षणरूपं प्रतीपं कथमाचरत् अपि तु
नैवाचरदिति कुतो धर्मसेतूनां सर्वधर्माश्रयभूतानां भक्तियो-
गभेदानां वक्तृत्वादिहेतोरित्यर्थः । अतो निजावतारमुख्यप्रयो-
जनभक्तिविशेषफलप्रेमविशेषविस्तारणायार्थं तासां पतिसेवादि-
धर्मत्यजनेन अन्यधर्मान्यनादरो युक्त एवेति भावः । सच "तावत्
कर्माणि कुर्वीत" इत्यादि वचनात् साधनदशायामपि युक्तः
किमुत तासामिति । यद्वा । स भगवान् जगदीश्वरश्चस्यैव
वा प्रतिपत्ते हेतुः सर्वाशित्वादन्तर्यामित्वाच्चेत्यर्थः । यद्वा । परे
परमस्वशक्तिरूपा ये दाराः स्वीयरमण्यस्तदभिमर्षणमपि कथं
प्रतीपमाचरत् अपि तु नैवेत्यर्थः । यतो भवद्भिरेवोक्तं कृष्ण-
वध्व इति ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपदेशानुष्ठानविरोधिनिरसनादिभिः केवलं धर्मपरित्राणार्थमवतीर्णस्य भगवतः कथं परदारपरिग्रहरूपाधर्माचरणमिति पृच्छति राजा । संस्थापनायेति । इतरस्याधर्मस्य प्रशमनार्थं चांशेन बलरामेण सह सङ्कल्पात्मकज्ञानेनैव ननु कर्मणेति वावतीर्णः ॥२७॥

स एवंभूतः धर्ममर्यादानां स्वयं कर्त्तानुष्ठाता वक्तोपदेष्टा च विरोधिनिरसनेनाभितो रक्षिता च सन् हे ब्रह्मन् ! परदाराभिमर्शनात्मकं प्रतीपं धर्मप्रतिकूलमधर्ममिति यावत्कथमाचरत्कृतवानित्यर्थः ॥२८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञातशास्त्रतात्पर्यार्थोऽपि परीक्षित्स्वनाम्नोऽर्थं सफलं कुर्वन् तथा श्रोतृजनविद्वज्जनचित्तसन्देहप्रहाणाय पृच्छति । संस्थापनायेति । इतरस्याधर्मस्य हिशब्देन "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादिवाक्यं प्रमाणयति ॥ २७ ॥

प्रतीपं प्रतिकूलं किमकारीत्यत्राह । अभिमर्शनम् अविचार्य ग्रहणम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तेषामेव तत्रत्यानां केषाञ्चित्तत्त्वमजानतां सन्देहं वितर्क्य कृपया तेषामेव हितार्थं तमुत्थाप्य स्वसन्देह व्याजेन पृच्छति । संस्थापनायेति ॥ २७ ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अथ "नचैवंविस्मयः कार्य्यो भवता भगवत्यजे । योगेश्वरेश्वर" इत्यादिना प्रत्याख्यातोऽपि राजा श्रोतॄणां सन्देहोच्छेदार्थं पुनः पृच्छति । संस्थापनेत्यादित्रिभिः अंशेन बलदेवेन ॥ २७ ॥

प्रतीपं विपरीतं तदेव किं तत्राह । परदाराभिमर्शनं परस्त्रीसङ्गतं बहिरर्थः 'वस्तुतस्तु परात्परा दाराः स्वानन्दशक्तयः दारयन्त्यविद्यामिति दाराः ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवमेतां लीलां श्रुत्वा राज्ञः सन्देह उत्पन्नः तन्निवारणार्थं शङ्कते । संस्थापनायेति त्रिभिः । अवतारविरुद्धं लोकविरुद्धं प्रमेयविरुद्धं चेति तादृशकरणे अवश्यं हेतुर्वक्तव्यः तदभावेऽपि लीलायाः सिद्धत्वात् तत्र प्रथममवतारविरोधमाह । धर्मसंस्थापनाय भगवदवतारः धर्मसंस्थापनार्थायचेति वाक्यात् अधर्मनिवृत्तये च तदुभयार्थमेव भगवदवतारः दैत्यादिवधो भूभार हरणं च अधर्म निवृत्तये एतदर्थमेवावतारः नान्यार्थमिति हि शब्द आह । भगवानिति तस्य साधनमन्यथा पूर्णकामस्यावतारो न घटेतेति लोकोपकारश्च एतावतामेव अंशेन बलभद्रेण आगत्य तथा करणे हेतुः जगदीश्वर इति । स हि सर्वरक्षकः अतः पालनार्थमेवं कृतवान् । २७ ॥

किमतो यद्येवमेतदित्याह । स कथमिति । धर्मे मर्यादा पालकानां निर्माता स्वयं वक्ता च उपघाते अभिरक्षिता च तादृशः प्रतीपं प्रतिकूलमाचरत् धर्मो नष्टः अधर्मः स्थापितः अधर्मः कृत उक्तः रक्षितश्च अतः प्रतीपाचरणमयुक्तं तत्र हेतुर्वक्तव्य इति ब्रह्मन्निति सम्बोधनं ये पञ्चपदार्था उक्ताः तेषां स्वरूपमेकत्रैवेति तं निर्दिशति परदाराभिमर्शनमिति ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ परीक्षित्सभोपविष्टानां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये सन्देहं समुत्थितमालक्ष्य तदुच्छेदार्थं पृच्छति । संस्थापनायेति । इतरस्याधर्मस्य यः खल्वंशेन जगदीश्वरो विष्णुर्भवति स स्वयं भगवानवतीर्णः । यद्वा । अंशेन बलदेवेन सह प्रतीपं प्रतिकूलमधर्मं यदि च स्वैरलीलयैवाचरदित्युच्यते तदा ब्रह्मशापमङ्गीकृत्य तत्फलञ्च कदाचिदीश्वरस्त्वेऽन्यङ्गीकरोति यथा तथैव पापमङ्गीकृत्य तत्फलमप्यवश्यमङ्गीकुर्यादित्याक्षेप इत्येकः प्रश्नः ॥ २७ ॥ २८ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

संग्रह श्लोकः—

वंशीसञ्जल्पितमनुरतं नाथयान्तर्धिकेलिः
प्रादुर्भूयासनमधिपटं प्रश्नकूटोत्तरञ्च ॥
नृत्योल्लासः पुनरपि रहः क्रीडनं वारिखेला
कृष्णारण्ये विहरणमिति श्रीमती रासलीला ॥

एवञ्च शुश्रूषन्त्यः पतीनीति भर्तृशुश्रूषणमिति पतिसुतान्वयेति श्रीमुनीन्द्रस्य श्रीभगवतस्तासां च वाक्यजातेन सामान्यतः प्रतिभातं परकीयात्वमाक्षिपन् राजोवाच वस्तुतस्तु श्रीमुनीन्द्रेण परमकरुणायाथान्तराच्छादितैरपि पदैः प्रदर्शितं रहस्यातिरहस्यक्रीडापरिपाटी मयानुभूतेति व्यञ्जनाय तदनधिकारिणां बुद्धिवृत्तिसङ्गूपशान्तेति प्रश्नभङ्गया तदाच्छादना यद्वा परेऽयमन्यपर इत्यनुसन्धेयं तत्र श्रीराजोवाचेति

उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति

न्यायात् परमविदग्ध इत्यर्थः । समिति युग्मकं सम्यक्स्थापनाय लुप्तस्य प्रवर्त्तनाय प्रवृत्तस्य च रक्षणायेत्यर्थः । न केवलं तदर्थमेव किन्त्वितरस्य अधर्मस्य प्रकृष्टशमाय सवासनोन्मूलनायेत्यर्थः अन्यथा धर्मसंस्थापनासिद्धिः स्यात् हि प्रसिद्धं—

धर्मसंस्थापनार्थाय सम्भवामि युगे युग इति ।

श्रीगीतास्वयं भगवानिति तत एव भगवत्तासिद्धिरिति भावः । अंशेन बलदेवेन सह इति तत्र तत्राग्रे दर्शितः यद्वा अंशेनापि धर्मादिस्थापनायेति किमुत स्वयं भगवत्त्वेनेति यद्वा

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि ।

स्वांशेन यो जगदीश्वरः स्वयं तु पूर्णैश्वर्यादियुक्त एवावतीर्ण इत्यर्थः । तस्यान्या कामना न सम्भवतीति भावः ॥ २७ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

स इति । पूर्वत्र यच्छब्दाध्याहारेणान्वयः धर्मा एव सेतवः लोकरक्षा मर्य्यादाः शास्त्रयोनित्वात्तेषां वक्ता तथात्वादेव कर्त्ता नचैतावता वेदस्य पौरुषेयत्वप्रसङ्गः तन्निषेधस्य प्राकृतपुरुषपर्य्यवसितत्वादित्यन्यदेतत् अन्यथा वाक्यव्यवहारयोर्विसंवादेन लोकैरग्राह्यता स्यात् किञ्च अभितो रक्षिता तत्प्रतिपक्षवाधनादिनातिशयेन पालकः एवम्भूतः सन् परदाराभिमर्शनरूपं लोकवेदविरुद्धं प्रतीपं धर्मसेतूनामिव स्थापनादेर्वा कथमाचरेत् न कथमपीत्यर्थः सम्भावनायां लिङ् ब्रह्मन् ! वेदमूर्ते तदतिक्रमे हि भवतामप्यतिक्रमाद्ब्रह्मण्यताव्याघात इतिभावः । यद्वा ईश्वरचेष्टितं मया कथं ज्ञातव्यमित्याशङ्क्याह । ब्रह्मन्निति सर्वज्ञेत्यर्थः । तत्र मया परोक्षं भजतेत्युक्तिः साक्षादेव रमणात्कृतिः पुनः पुनराचरणादरक्षेति यथायथं प्रतीपाचरणं युग्मं श्लेषेण सिद्धान्तमप्याह तथाहि धर्मः प्रोज्झितकैतव इत्याद्युक्तस्य श्रीभगवद्धर्मस्यैव शुद्धभक्तियोग्यस्येत्यर्थः यथा पाद्मे—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्करा इति ॥

तत्रैव मुख्यो धर्मप्रयोगः तथा तदवतारस्यच तन्मुख्यप्रयोजनत्वम्—

भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः इति ।

श्रीप्रथमे कुन्तीवाक्यात् तदितरस्य अवरधर्मादेः प्रशमाय समो मन्निष्ठता बुद्धेरित्येकादशतात्पर्यपर्यवसानायेत्यर्थः । प्रकर्षश्चात्र तत्त्यागपूर्वकस्वभक्तिनिष्ठाप्रापणमेव अतो निजावतारस्य मुख्यप्रयोजनभक्तिविशेषपरमफलप्रेमविशेषविस्तारणायैव तासांपति मन्यसेवादिरूपधर्मत्याजनेनान्यधर्माद्यनादरो युक्त एवेति भावः । सच—

तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥

इत्यादिना साधकदशायामपि युक्तः किमुत सिद्धदशायामिति तदर्थम् अंशेन श्रीबलदेवेन श्रीभगवद्धर्ममूर्तिना सहेति स तथाभूतोऽसौ धर्मसेतूनां तादृशधर्माश्रयभूतानां भक्ति योगभेदानां श्रवणादीनां श्रीमदुद्धवादिषु वक्ता श्रीगोवर्धनपूजादौ कर्ता यत्कृतो गोत्रधर्म इत्युक्तेः धर्मपुत्रादिपालनेनाभिरक्षिता परदाराभिमर्शनं पराश्च ते दाराः स्वकला इत्यर्थः—

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपकलाभिरिति

ब्रह्मसंहितोक्तेः तेषामभिमर्शनं यद्वा सर्वकान्तिः संमोहिनी परेति बृहद्गौतमीयात्परायाः श्रीराधायाः ये दारा दारयन्ति स्वहृदयेभ्यः काममुखं खण्डयन्तीति दाराः सखीजनाः पुंस्त्वनिर्देशेन श्रीकृष्णविषयककामासक्ताभावः सूचितः तेषामभिमर्शनं बाहुप्रसारेत्यादिना स्पर्शनमात्रमेव नतु रमणमित्यर्थः । तद्रूपं किम्प्रतीपमाचरेदिति काकुः कामविजयक्रीडायां कामासक्तेरसम्भवादिति भावः ॥ २८ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं विचित्रकामविजयख्यापकसर्वजगदुद्धारकप्रेमपथप्रवर्तकपरमानन्दघनरासादिविहारं श्रुत्वा परमभगवदीयतया जातपरमाह्लादः गर्भे एव स्वरक्षणरूपदृष्टभगवत्प्रभावः सर्वविस्मारकयोनिप्रभावेणाप्यविस्मृतभगवत्स्वरूपतया तत्परीक्षणादेव परीक्षिन्नाम्ना प्रसिद्धः साक्षाद्भगवतैव शुकरूपतयोपदिष्टतत्त्वो हरि हरिजनकृपापात्रं स्वयमसन्दिहानोऽपि तत्रत्यानांचसाचाच्छुकश्रोतॄणां तत्कृपादृष्टिशुद्धमतीनाञ्च सन्देहासम्भवेऽपि भाविकलिजनानां धर्मानभिज्ञानां विषयैकचित्ततया स्वभोगानुकूळविपरीतार्थग्राहिणां भगवतः सदाचारप्राप्तमत्या विपरीतप्रवृत्तिर्माभूदिति सन्दिहान इव पृच्छति त्रिभिः । संस्थापनायेति । यः साक्षात्स्वयं भगवानथ च—

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ।

वचनादंशेन जगदीश्वरः ॥ २७ ॥

स एव—

यदा यदाहि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे इति ॥

वचनेन स्वधर्मप्रवृत्तिमतां साधूनां रक्षणेन दुष्कृतां तत्प्रातिकूलाधर्मरतानां नाशेन च धर्मस्य सम्यक् स्थापनायेतरस्याधर्मस्य प्रशमायावतीर्णः समस्तकल्याणगुणनिलयतयाविर्भूतः "स्वयञ्च अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इत्यादिश्रुतेः निःश्वसितमस्य वेदा इतिस्मृतेश्च निरायासवेदहेतुत्वात् धर्मसेतूनां वक्ता "द्वापरे द्वापरे विष्णुर्व्यासरूपी जनार्दन" इत्यादिरूपेण प्रवर्तकश्च

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एवच कर्मणि ॥

इत्यादिकर्ता च सयथा—

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ ! सर्वश ॥ इत्यादिना

स्वीयाचरणेन विनाशाय दुष्कृतामिति तत्प्रतीपहननेनचाभिरक्षिता कथमतिसाहसरूपं परदाराभिमर्शनं प्रतीपमाचरत् ब्रह्मन्निति साक्षात्वेदात्मक ! वेदप्रतीपतया भवतां प्रतीपतापि स्यात् साच ब्रह्मण्यदेवस्य तस्य न संभवति यद्वा किमहं जानीयामीश्वराचरितस्य दुर्विज्ञेयत्वादिति चेत्तत्राह । ब्रह्मन्निति । साक्षाद्ब्रह्मकृष्णस्वरूप तव तद्रूपत्वान्न तदभिप्रायस्य तवाज्ञानमिति भावः ननु कामविवशतया कृतं भविष्यति किमत्र चित्रं तत्राह । आप्तेति । अनाप्तकामानां कुसङ्गिनां जुगुप्सिताचरणसंभवेऽपि स्वयं नित्यानन्दघनत्वादाप्तकामः यदूनामतिधर्मशीळानां च पतिः पालकः धर्मप्रवर्तकतयैव रक्षको यज्जुगुप्सितं कृतवान् तत्किमभिप्रायः इति तदभिप्रायप्रकटनेन नः इतिबहुवचननिर्देशेन न मम संशयोऽपितु मूर्खबहुलं जगदिति लोके पामराणां बहुत्वात्तदीयसंशयं छिन्धि तत्रास्मच्छब्दादेशनिर्देशेन तेषां राज्ञो मम प्रजात्वान्मदीयानां संशयच्छेदनं मद्द्वारैव भाव्यमित्यभिमतिः यद्वा यतः सर्वधर्मप्रतीपं परदाराभिमर्शनमाचरदतः कथं धर्मस्य संस्थापनायेतरस्य प्रशमाय चावतीर्णः कथंवांशेन जगदीश्वरो भगवान् कथं वा धर्मसेतूनां वक्ता कर्ता रभिक्षिता यद्यस्माज्जुगुप्सितं कृतवानतः कथमाप्तकामः तादृशश्चेत्तत्करणे किमभिप्राय इति नः संशयं छिन्धी-

१आप्तकामो यदुपतिः कृतवान् वैजुगुप्सितम् । आत्माराम इति शुकपक्षीय विजयध्वजयोः पाठः ।
किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ! ॥ २९ ॥

॥ श्रीशुक उवाच ॥

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

त्यन्वयः यद्वा "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति सर्वावताराणां धर्मस्थापनार्थत्वात् यथा भगवान् कृष्णोऽवतारशिरोमणिस्तथ भक्तियोगः सर्वधर्मशिरोमणिः तदुक्तं पाद्मे—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥
तथा जन्मान्तरसहस्रेण तपोध्यानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ।
नोत्पादयेद्यदि रतिं श्रम एवहि केवलम् ॥

इत्यादिनान्वयव्यतिरेकाभ्यां सर्वधर्मफलभूतश्चेति तत्स्थापनाय तदितरस्योपशमायावतीर्णस्तदप्युक्तं श्रीकुन्त्या "भक्तियोगविधानार्थं कथं पश्येमहि स्त्रिय"इति तत्र"तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथा श्रवणादौ वा श्रद्धा यावन्न जायत"इत्यादिना समत्ताधिकाराणां त्यक्तपतिसेवनादीतरधर्माणां हरिवंशमुखात्तत्स्वरूपसूचकगीतश्रवणपूर्वकं पूर्ववर्णितरीत्या प्रेमपथसम्यक्स्थापनमेवात्र कृतं सतु धर्मसेतूनां वक्ता कर्ताभिरक्षिता प्रतीपं परदाराभिमर्शनं कथमाचरत् न कथमपि किंतु सतु अंशेन जगदीश्वरः परः पुरुषः तास्तु परस्य परमात्मनः कृष्णस्य दाराः कृष्णवध्व इति यत्र तत्रोक्तेरिति तदाभिमर्शनं सर्वोद्धारकगुणगानार्थं यदाचरत्तत्कथं प्रतीपं न कथमपि तथाप्तकामे यदुपतौ जुगुप्सिताचरणासंभवादाप्तकामो यदुपतिः यत्कृतवान् तत्किं जुगुप्सितम् अपितु नेत्येवं मदभिप्रायस्तथापि नोऽस्मत्प्रजानां पामराणां विपरीता प्रवृत्तिर्माभूदित्येतत्संभावितं संशयं छिन्धि ननु किमम संशयच्छेदनेन तत्राह । सुव्रतेति तव संशयच्छेदनव्रतवत्तया संशयात्मा विनश्यतीत्यादिना तन्नाशाद्रक्षणाय परमकृपालुतया चावश्यं तथाचरणीयम् ॥ २८—२९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

भगवत्कृतां रासलीलामाकर्ण्य सर्वसंदेहनिवृत्तये राजा पृच्छति धर्मेति । परित्राणाय साधूनामित्युक्तत्वात् धर्मस्य सम्यक्स्थापनायेतरस्याधर्मस्य च प्रकर्षेण शमनाय भगवान् जगदीश्वरोंऽशेन बलदेवेन सहावतीर्ण इति प्रसिद्धं भगवानिति पदेनान्यथा पूर्णकामस्यावतरणं न घटत इति सूचयति युक्तश्चैवं भगवतो जगत्परिपालनमिति द्योतनाय जगदीश्वर इत्युक्तं यद्वा अंशेन जगदीश्वरः तदुक्तं "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग" दिति ॥ २७ ॥

एवंभूतः सः धर्मसेतूनां तत्प्रतिपादकवेदानां वक्ता तत्रापि न केवलं वक्ता किंतु तत्कर्त्ता तत्प्रतिपादकशास्त्रस्य निर्माता च किंच तदुक्ताचरणेन तद्विरुद्धवादिनिराकरणेन तत्प्रतिपक्षबलवद्वधादिना च रक्षिता पालकश्च कथंप्रतीपं धर्मसेतूनां प्रतिकूलं परदाराभिमर्शनरूपं ससाहसमधर्ममाचरत् न केवलं कलञ्जभक्षणादिवदेवाधर्ममात्रमित्यर्थः । ननु ईशचेष्टितं कथं मया ज्ञातुं शक्यमितिचेत्तत्राह हे ब्रह्मन् वेदमूर्ते ! सर्वज्ञ तदभिन्नेति वा ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतत्त्वज्ञजनभ्रान्तिनिराकरणाय ब्रह्मविदाप्नोति परमित्यादिश्रुतिविरोधः कृष्णं विदुः परं कान्तं नतु ब्रह्मतयेत्यादि प्रश्नप्रतिवचनाभ्यां परिहृतः अथ धर्मान्न प्रमदितव्यमित्यादिश्रुतिविरोधः परिह्रियते । संस्थापनाय धर्मस्येत्यादि । प्रश्नोत्तराभ्याम् अंशेन बलेन सह यद्वा अंशेनेति जातावेकवचनं युधिष्ठिरार्जुनादिभिः सहेत्यर्थः ॥ २७ ॥

परदाराभिमर्शनं प्रतीपं धर्मात्प्रातिकूलमधर्ममितार्थः । यो धर्मसेतूनां वक्त्रादिरूपः स कथमाचरत्कृतवात् ॥ २९ ॥

भाषा टीका ।

श्रीमहाराज परीक्षित बोले सब जगत् के ईश्वर भगवान् बलदेवजी के सहित सब धर्मों के स्थापन करने को तथा सब पापों के नाश करने को अवतीर्ण भये हैं ॥ २७ ॥

वे भगवान् सब धर्मों के सेतु वेदादिकों के करने वाले हैं कहनेवाले हैं रक्षक हैं हे ब्रह्मन् ! शुकदेवजी उन भगवान् ने परदारा के संग रूप ऐसा विपरीत कर्म कैसे किया ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आप्तकामस्य नायमधर्म इतिचेद्यद्येवं कामाभावान्निन्दितं केनाभिप्रायेण कृतवानिति पृच्छति । आप्तकाम इति ॥ २९ ॥

परमेश्वरे कैमुतिकन्यायेन परिहर्तुं सामान्यतो महतां वृत्तमाह । धर्मव्यतिक्रम इति । साहसञ्च दृष्टं प्रजापतीन्द्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न भवतीति ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

यदुपतिरिति । धर्मपरयदुवंशे ऽवतीर्णत्वादपि तथा कर्तुं नार्हतीति भावः । वै प्रसिद्धौ एतमितिकुत्राप्यन्यः संशयो नास्ती-

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

त्यर्थः । न इति बहुत्वं सन्देहिवर्गाभिप्रायेण संशयमिति । आप्तशिरोमुकुटमणेस्तस्य कृते दोषबुद्धिर्नास्त्येव किंतु शास्त्रविरुद्धत्वेन तत्रास्माकं दार्ढ्याभावाच्चित्तदोलनं स्यादित्यर्थः । सुव्रत हे ब्रह्मचर्यादिनिष्ठ ! इति भवादृशानामाचरितविरुद्धं तत्तु जुगुप्सितमेवेति यद्वा हे सदाचारनिष्ठेति अन्यथा भवदादिसंमतसदाचारलोप इति भावः । श्लेषपक्षे पाण्डवसम्बन्धिनां यदूनां पतित्वेन निजप्रभुताममभिप्रैति इति दोषाभावो ध्वनितः यदूनां भक्तानां पतिरिति भक्तवात्सल्येन धर्मातिक्रमार्होऽपीत्यर्थः । जुगुप्सितं किं कृतवान् अपितु नैव किंतु भक्तवर्गसंमतमेवाकरोदित्यर्थः । कुतः आप्तः लब्धः कामः रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः सर्वसाध्यतमप्रेमभक्तिप्रवर्त्तनेन निन्दितानाचरणात् प्रत्युत तेन साधुवर्गसन्तोषणादेवेत्यर्थः । तथापि नः संशयम् अभिप्राय इति तत्र केषांचिच्छास्त्रार्थतत्त्वविदां भक्तिपराणां सद्रसाभिषिक्तानां प्रेमभक्तिरसमयतदीयरासक्रीडादौ संशयाभावात् यद्वा प्राये ऽन्तरानसमयेऽस्मिन् इतिसंशयस्यायोग्यतोक्ता अतः शीघ्रं तच्छेदनमाभिप्रेतं न इति स्वीयत्वेन विपक्षाणामपि ग्रहणं सहजविनयादिना किंवा वाक्चातुर्येण परमविपक्षतादिबोधनार्थम् अतो दुर्बुद्धीनामेवात्रत्यानां केषांचित् हितार्थमेवं मया पृच्छ्यते । नच निजसन्देहादिति भावः । अतः अभि अभयं यथा स्यात् तेभ्यो भयमकृत्वा तेषां संशयशृङ्खलां छिन्धीत्यर्थः । सुव्रत हे भक्त्येकनिष्ठ ! ॥ २९ ॥

सहजकृपालुतया शिष्यस्नेहापेक्षया वा परिहरति । धर्मेति सप्तभिः ईश्वराणां ज्ञाने भक्तौ च सामर्थ्यवतां भगवद्भजनादिना कर्मादिपारतन्त्र्यरहितानामित्यर्थः । धर्मव्यतिक्रमः विशेषणोल्लङ्घनं ब्रह्मादीनां दुहितृकामनादिसाहसं निर्भयतया यथा इन्द्रादीनां यथा वह्निः सर्वं भुङ्क्ते भक्षयति दहतीति वा तथा तस्य सर्वभोजनेनापि यथाग्नेरमेध्यादिभक्षणजन्यदोषो वधादिदोषो वा न स्यात् तद्वदित्यर्थः । अन्यत्तैर्व्याख्यातं यद्वा धर्मव्यतिक्रम एव साहसं त्वर्थे चकारः अनीश्वरेभ्यो भेदाय ॥ ३० ॥

———

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

यदुपतिरिति । कृततादृशाकर्त्तव्यस्यैव परमधार्मिकाणां यदूनां पतिरपि न स्यात् । एतमिति कुत्राप्यन्यः संशयो नास्तीत्यर्थः । न इति बहुत्वं सन्देहे वर्गाभिप्रायेण संशयं प्राप्तशिरोमुकुटाचरितत्वशास्त्रविरुद्धत्वाभ्यां चित्तदोलनं सुव्रत ! हे ब्रह्मचर्यादिनिष्ठ इति भवादृशामाचरितं विरुद्धं तत्तु जुगुप्सितमेवेति । यद्वा । हे सदाचारनिष्ठेति अन्यथा भवदादिसम्मतसदाचारलोप इति भावः । श्लेषपक्षे यदूनां भक्तानां पतिरिति भक्तकृपया कदाचिद्धर्मातिक्रमार्होऽपीत्यर्थः । जुगुप्सितं किं कृतवान् अपि तु नैव किन्तु भक्तवर्गसम्मतमेवाकरोदित्यर्थः । कुतः । आप्तो लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः । सर्वसाध्यतमप्रेमभक्तिप्रवर्त्तनेन निन्दितमाचरणात् प्रत्युत तेन साधुवर्गसन्तोषणादेवेत्यर्थः । तथापि नः संशयमिति साञ्जलिकरचालनेन तत्रत्यसन्दिहानवर्गाभिप्रायेण तच्च विनयेन प्राय इति तत्र केषाञ्चिच्छास्त्रार्थतत्त्वविदां भक्तिपराणां सद्रसाभिषिक्तानां प्रेमभक्तिरसमयतदीयरासक्रीडादौ संशयान्तराभावात् अतोऽनवहितानामेवात्रत्यानां केषाञ्चित् हितार्थमेव मया पृच्छ्यते नच निजसन्देहादिति भावः । तस्मात् अभि अभयं यथा स्यात्तेभ्यो भयमकृत्वा तेषां संशयशृङ्खलां छिन्धीत्यर्थः । सुव्रत हे भक्त्यैकनिष्ठ ! ॥ २९ ॥

सहजकृपालुतया शिष्यस्नेहापेक्षया वा तदीयाक्षेपाभासपरिहारपूर्वकं श्लेष दर्शिततदीयसिद्धान्तितमेव परिहरति । धर्मेधि सप्तभिः । ईश्वराणां कर्मादि पारतन्त्र्यरहितानामित्यर्थः । तेषां धर्मव्यतिक्रमो यद्दृष्टः यथा ब्रह्मादीनां दुहितृकामनादौ तथा साहसं निर्भयता च यद्दृष्टं तथा बृहस्पतेरुतथ्यपत्नीगमनादौ तत्तच्च तेजीयसां तेषां न दोषाय प्रत्यवायाय । तत्र दृष्टान्तः । सर्वभुजो वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ ३० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आत्माराम इति निरतिशयानन्दस्य ग्राम्यभोगेच्छा कथमिति चोद्यम् ॥ २९ ॥

उत्तरमीश्वराणामीश्वरवन्महातेजसाम् ॥ ३० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च स्वयमवाप्तसमस्तकामोऽपि यदुपतिर्जुगुप्सितं निन्दितं कर्म कृतवान् अनवाप्तकामस्य हीन्द्रियपारवश्यस्य जुगुप्सिताचरणं दृष्टं नत्वाप्तकामस्य स्वतन्त्रस्येति भावः । अतः केनाभिप्रायेण कृतवानिति पृच्छति । किमभिप्राय इति । एतदेतस्मिन् विषये नोऽस्माकं संशयस्तं हे सुव्रत ! छिन्धि निराकुरु ॥ २९

कैमुत्यनयेनोत्तरं विवक्षुः कर्मवश्यत्वप्रयुक्तशास्त्रवश्यानामेव शास्त्रविरुद्धकर्म प्रत्यवायजनकं नत्वकर्मवश्यानामिति तावदुत्तरमाह । धर्मव्यतिक्रम इति । यद्यपीश्वराणामशास्त्रवश्यानां धर्मव्यतिक्रमः शास्त्रोक्तधर्मातिलङ्घनं साहसं सहसा शास्त्रार्थाविमर्शेन कृतं साहसं कामचार इतियावत् तदुभयं दृष्टं तथापि तत्तेजीयसां न दोषाय न प्रत्यवायावहं स्वर्गिणां मुक्तानाञ्च व्यापारेषु व्यभिचारादिति भावः । नहि स्वर्गिमुक्तव्यापारः शास्त्रानुवर्ती नवा प्रत्यवायावहः तेजीयस्त्वमत्र शास्त्रवश्यतानापादकसामर्थ्यत्वरूपं विवक्षितं पदार्थानां विलक्षणशक्तिकत्वादिति तात्पर्यं तत्र दृष्टान्तमाह । वन्हेरिति । यथा सर्वभुजः सर्वदाहकस्य वन्हेर्दाहमात्रेण दाह्यपटादिगतमालिन्यसंबन्धो न विद्यते तद्वत् नह्यवादिषु स्वसंबन्धिपृथिव्यादिगतलौहित्यादिकं दृष्टमिति वन्हावपि तत्प्रसङ्ग इति भावः ॥ ३० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विषयभोगलौल्यात् कृतं किनेत्याह । आत्माराम इति । कोऽभिप्रायोऽस्य मच्चरितं चरेत् मदुक्तमेव चरेन्ना चरितं चरेदिति वेति नः परिसरवर्तिजनस्य ॥ २९ ॥

नारायणानुग्रहसुधापात्राणां स्मृतिविहितधर्मव्यतिक्रमो न दोषाय दृष्टः किमुत दूरीकृतविधिनिषेधबन्धस्य हरेरित्याशयेन प्रश्नं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परिहरति । धर्मेति । चशब्दः कैमुत्यद्योतकः यद्यर्थो वा यद्यपीश्वराणां योगैश्वर्यपारङ्गतानां साहसः हेतुशून्यो धर्मव्यतिक्रमः शास्त्रविहिताचारविरुद्धाचारोऽजीगर्तस्य पुत्रविक्रयः विश्वामित्रस्य श्वभक्षणप्रवृत्तिः सप्तर्षीणां शवभक्षणोद्योग इत्यादिलक्षणो दृष्टः शास्त्रे तथापि स तेषां दोषाय धर्मप्रतिबन्धकाय न भवति तत्कुत इति हेतुगर्भविशेषणमाह । तेजीयसामिति—

तेजो बले प्रभावे च ज्योतिष्यार्चिषि रेतसि ।
नवनीतेऽनले दुर्गे इति यादवः ॥

तत्र दृष्टान्तमाह । वह्नेरिति । अमेध्यादिदहनलक्षणोपेतस्याग्नेः ॥३०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आप्तकामस्य जुगुप्सितेऽति प्रवृत्ति र्न स्यात् जुगुप्सितं तु केनाभिप्रायेण कृतवानित्यर्थः ॥ २९ ॥

धर्मव्यतिक्रमो यद्दृष्टः यथा ब्रह्मादीनां दुहितृकामनादि तथा साहसं निर्भयता च यद्दृष्टम् । यथा बृहस्पतेरुतथ्यपत्नीगमनादि । तत्तत्च तेजीयसां तेषां न प्रत्यवायाय सर्वभुजो वह्नेर्यथा सर्वभुक्त्वं नापाविध्यायेत्यर्थः ॥ ३० ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

वैजुगुप्सितं विजुगुप्सितं तदेव वैजुगुप्सितं स्वार्थेऽण् ॥ २९ ॥

सिद्धान्तमाह । धर्मव्यतिक्रम इत्यादि । ईश्वराणां धर्मव्यतिक्रमः अदृष्ट एव कुत्रापि न दृष्ट एव एवं साहसं सहसा कृतं च ईश्वरैः कदाप्यधर्माचरणं न क्रियते तथापि यदि दृश्यते तदा तेजीयसां कर्तुमकर्तु मन्यथा कर्तुं सामर्थ्यं तेजः तज्जुषां धर्मव्यतिक्रमो न दोषाय गुणायैव तैस्तु यत् क्रियते तत्र निमित्तमेष्टव्यं नतु सम्प्राप्तं तत् अतो धर्मव्यतिक्रम इवासौ दृश्यते नतु वस्तुतो धर्मव्यतिक्रमः तत्र दृष्टान्तः । वह्नेरित्यादि । वन्हेरनलस्य यथा सर्वभुजः सर्वभोगाः क्रियन्ते बहुवचनं तस्य सर्वभुक्त्वं यथा न सम्प्राप्तमपि तु सहजं तथेदमपि तेनानुमन्तव्य ईश्वरस्येयं लीला न धर्मव्यतिक्रम ईश्वरस्य तत्करणासम्भवात् तेन नासां परदारत्वं नैतस्य च धर्मव्यतिक्रम इति ग्रन्थार्थः एतदग्रे स्फुटीभविष्यति ईश्वराणामिति वचनं सर्वेश्वरत्वे तात्पर्यम् ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु कामात्करणमितिचेत्तत्राह । आप्तकाम इति । स्वत एवाप्ताः कामा येन । यदुपतिरिति । विद्यमानायामपि कामनायामनेकस्त्रीप्राप्तिः तादृशोऽपि भूत्वा जुगुप्सितं लोकनिन्दितं कृतवान् तत्र करण कोऽभिप्रायः परस्परविरुद्धार्थत्वात् उभयोर्ग्रहणं न सम्भवति नैकतापि विरुद्धानां विरुद्धसर्वधर्माश्रयत्वेऽपि प्रयोजनं वक्तव्यं नैतत्कर्म लोकहितं नापि स्वहितं स्वस्य पूर्णत्वात् लोकस्य मर्यादैव हितकारिणी तथा गोपिकानामपि अन्तर्यामिण ईश्वरस्य न किञ्चिदसाध्यम् अत एवं सति किमभिप्राय एतत्कृतवान् कः अभिप्रायो यस्येति एतं नोऽस्माकं सचषमेव संशय छिन्धि किञ्च सुव्रत हे सदाचारलक्षणव्रतयुक्त ! यदीदमसङ्गतमेव स्यात् त्वया नोक्तं स्यात् यदि वा अधर्मः स्यात् तव रुचिर्न स्यात् प्रतीयते च विपरीतमतो निर्णयो वक्तव्य इत्यर्थः ॥ २९ ॥

प्रथमतः अवतारविरुद्धं कृतवानिति यदुक्तं तत्रोत्तरमाह । धर्मव्यतिक्रम इति । किमेतदीश्वराणां चरितं न भवतीत्युच्यत आहो स्विदन्यार्थमागतोऽन्यत् करोतीति नहि किञ्चिद्घटनार्थमागतः किञ्चन विघटयति नह्यन्यार्थमप्यागतः स्वधर्मं परित्यजति प्रकाशनार्थमागतो दीपः गृहेण स्पृष्टः चेत् दहत्येव अत ईश्वरधर्मोऽयम् अन्यथा ईश्वर एव न भवेत् नहि वणिजामिव प्रभोर्नियमोऽस्ति सर्वकर्मसु ईश्वरधर्माश्चैते इति तान् गणयति । धर्मव्यतिक्रमः साहसमित्यादयः धर्मव्यतिक्रमो विद्यमानोल्लङ्घनं साहसमविद्यमानकरणम् एतदुभयमीश्वरे दृष्टं नहि दृष्टे अनुपपन्नं नाम चकारादीश्वरसेवकानामपि वीर्यादिमतां वा एतदेव वा साहसं सहसा क्रियमाणत्वात् नन्वेवं सति तत्कर्मफलं कथं न भवेदित्याशङ्क्याह । तेजीयसामिति । अतितेजस्विनामेतन्नाधर्मजनकं विधिनिषेधवाक्यानां नियोज्यविषयत्वात् यथा लोके तथा वेदेऽपि अतितेजस्विनां सर्वकर्मदहनसमर्थानां न दोषजनकं भवतीत्यत्र दृष्टान्तमाह । वह्नेः सर्वभुज इति नहि सर्वान् दहन् वह्निः वधभाग्भवति सर्वं भक्षयन् अभक्ष्यभक्षको वा तथा सर्वं पिबन् सर्वत्र प्रविशन् सर्वसम्बद्धः तत्तत्कारी भवति मिथ्याज्ञानसलिलावसिक्तायामेवात्मभूमौ कर्मबीजं धर्माधर्माङ्कुरमारभते नतु तत्त्वज्ञाननिदाघनिष्पीतसलिलतयोषरायाम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परमेश्वरस्य नायमधर्म इति चेत् निन्दितमिदं केनाभिप्रायेण चकारेति पृच्छति । आप्तकाम इति । तेन स्वकाम पूरणार्थमिदं कृतवानिति प्रत्युत्तरं न दातव्यमिति भावः । अवतारेऽस्मिन्नेतादृशं जुगुप्सितमेव कर्त्तव्यमवश्यमिति चेदत आह । यदुपतिरिति । परमधार्मिकाणां यदूनां पतिस्तर्हि कथमभूदिति भावः । न इति नतु केवलस्य ममात्र संशयो ऽस्तीत्यर्थः । तस्याप्तकामत्वेऽप्यात्मारामत्वेऽपि प्रेमानन्दस्वरूपाभिस्ताभिः सोत्कण्ठं रमणं युज्यत एवेति ज्ञातप्रायरहस्यसिद्धान्तत्वादिति भावः । सुव्रतेति । सदाचारपरायणस्य तवाप्यस्यामेव लीलायामत्यावेशदर्शनादेते संशेरते इति भावः ॥ २९ ॥

कृतस्याप्यधर्मस्य फलमीश्वराणामपि न भवेत् किमुत परमेश्वरस्य तस्येति प्रथमप्रश्नोत्तरमाह । धर्मेति षड्भिः । ईश्वराणां रुद्रादीनामपि धर्मव्यतिक्रमोऽधर्मो दृष्टः । साहसं साहसहेतुक इत्यर्थः । न दोषाय न प्रत्यवायाय । वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ ३० ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका

अपि च आप्तेति यदुपतिरिति । कृततादृशाकर्त्तव्यश्चेत्परमधार्मिकाणां यदूनां पतिरपि न स्यात् जायते चानाप्तकामस्य

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

अकृत्येऽपि वृत्तिर्नतु तथास्तीति आप्तकाम इति अर्थक्रमेणेयं व्याख्या एतं नान्यमित्यर्थः । अत्यनुचितमिति भावः । शसयं सदाचारतद्विरुद्धाचाराभ्यां चित्तदोलनं सुव्रत सदाचारिवर्गपूज्यचरण ! भवतस्तादृशयशः संकीर्त्तनेन सञ्जायतेतरां शङ्केति भावः । श्लेषपक्षे यदूनां परमभक्तानां पतिरिति भक्तकृपया कदाचिद्धर्मातिक्रमार्होऽपीत्यर्थः । तेषां परमभक्तत्वञ्च यदोः प्रियस्यान्ववाय इति प्रथमात् जुगुप्सितं किंकृतवान् अपितु नैव भक्तवर्गसम्मतमेवाकरोदित्यर्थः । कुतः आप्तो लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः सर्वसाध्यतमप्रेमभक्तिप्रवर्त्तनेन निन्दिताचरणात्प्रत्युत तेन साधुवर्गसन्तोषणादिति भावः । तथापि न इति साञ्जलिकरचालनेन सन्दिहानवर्गप्रदर्शनं किमभिप्राय इति पदद्वयं तत्र प्राय इति केषांचिच्छास्त्रतत्त्वविदां भक्तिपराणां प्रेमभक्तिपोषिकायां रासलीलायां न सन्देहः केषाञ्चिदनवहितानान्तु स भवेदेवेति तद्धितार्थमेवायं प्रश्न इति तस्मादभि अभयं यथा स्यात्तथा छिन्धि यद्वा भवतोऽभिप्रायो न केनापि विज्ञातो ज्ञातकल्पः कथञ्चित्स्यात्सोऽपि प्रश्नव्याजेन चित्तवृत्तिरूपाय उपरागान्मयैव वञ्चित इति भावः ॥ २९ ॥

अथ सहजकृपालुतया शिष्यस्नेहानुरोधेन वा तदीयाक्षेपाभासपरिहारपूर्वकं श्लेषदर्शिततदीयसिद्धान्तमेव प्रपुष्णन् श्रीशुक उवाच । धर्मेत्यादिसप्तभिः । ईश्वराणां कर्मादिपारतन्त्र्यरहितानामित्यर्थः । यथाहि ब्रह्मणो दुहितृकामनादौ धर्मव्यतिक्रमो योऽसौ प्रसिद्धः सतु दृष्ट एव नतु वास्तवः तथा साहसं च तच्च बृहस्पतेरुतथ्यपत्नीगमनादौ निर्भयत्वं तत्तच्च तेजीयसां न दोषाय न प्रत्यवायाय तेजोऽत्र वस्तुतो ऽनासक्तिरेव तत्र दृष्टान्तः सर्वभुजो वह्नेर्यथा सर्वं भुक्त्वमपावित्र्याय नेत्यर्थः ॥ ३० ॥

श्रीरामनारायणकृतभावभावविभाविका ।

यद्यपि राज्ञः प्रश्नस्यान्तिमव्याख्यानानुसारेण वस्तुतः प्रतीपाचरणाभाव एव तथापि तदङ्गीकृत्योत्तरमाह । धर्मव्यतिक्रम इति । ईश्वराणां परमेश्वरानुग्रहलब्धैश्वर्याणामिन्द्रचन्द्रादीनामपि धर्मव्यतिक्रमोऽहल्याभिमर्शादिसाहसञ्च गुरुपत्न्या बलादाकर्षणादि दृष्टं तथापि तस्य सर्वथा दोषरूपत्वेऽपि तेजीयसां तेषां दोषाय पातित्याय न भवति चन्द्रश्यामाङ्कस्य तत्प्रभापराभववत् दोषस्य तत्तेजः पराभूतत्वात् तत्र दृष्टान्तमाह । वन्हेरिति । अभक्ष्यभक्षणस्य महादोषत्वेऽपि वन्हेस्तेजीयस्त्वात्सर्वभुजोऽपि तस्याभक्ष्यभक्षणं न दोषाय तद्वत् ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु आप्तकामस्य भगवतो नाधर्मसंस्पर्श इतिचेत्तत्राह । आप्तकाम इति । यद्याप्तकामस्तर्हि सुतरामिदं जुगुप्सितं कर्म-कृतवान् तथा चाप्तकामस्यावतारावस्थायां यदूनां परमधार्मिकाणां पत्युरेवं विधं कर्म निन्दितमेव ननु किमेवं परमेश्वरे दोषमुद्भावयितुं प्रवृत्तो सीत्याशङ्क्य नाहं तस्मिन् दोषमुद्भावयामि

किन्तु तदाचरणे तस्याभिप्रायं पृच्छामीत्याह । किमिति । किमभिप्रायः कृतवान् एतन्नोऽस्माकं सर्वेषां संशयं छिन्धि न इति करचालनेन संशयाक्रान्ततां दर्शितवान् यथा ब्रह्मचर्यादिसुव्रतैर्भवद्भिस्तत्प्रतीपाचरणं नो क्रियते तद्वत्तस्यापि तादृग्रमणं न शोभनमिति संबोधनाशयः यद्वा हे संशयच्छेदनलक्षणसुव्रत ! ॥ २९ ॥

ईश्वराणामपि दृष्टेन धर्मव्यतिक्रमेण साहसेन च दोषाभावनिश्चयात् परमेश्वरे कुतस्तच्छङ्कोत्थानमिति कैमुत्यन्यायेन परिहर्तुं सामान्यत ईश्वराणां वृत्तमाह । धर्मेति । ईश्वराणां प्रजापतीन्द्रचन्द्रविश्वामित्रादीनां धर्मस्य व्यतिक्रम उल्लङ्घनं तथा साहसं सहसा प्रवृत्तिरधर्माचरणञ्च दृष्टं तत्तेजीयसां न दोषाय प्रत्यवायाय न भवति यथा वन्हेः सर्वभुजः सर्वभुक्त्वं दोषावहं न भवति तद्वत् ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आप्तकामः अवाप्तसमस्तकामः स्वप्रयोजनरहितः किमभिप्रायः जुगुप्सितं परदाराभिमर्शनं कृतवान् हे सुव्रत ! हे नैष्ठिक ब्रह्मचर्यव्रतधर ! नोऽस्माकमेतत्संशयं छिन्धि निराकुरु ॥ २९ ॥

जीवविषयावेव धर्माधर्मौ तत्रासमर्थोऽधर्माचरणेन पतितो भवति समर्थस्तु "पुण्येन पापमपनुदती"तिश्रुतेः कथंचिदधर्मं कृत्वापि स्वतेजसा शुद्धो भवति नतु तौ भगवद्विषयौ सतु "प्रधानक्षेत्रज्ञपति"रित्यादिश्रुतेः सर्वचेतनाचेतनपदार्थपतित्वात्सर्वैः सह विहर्तुं योग्यो न कदाचिदप्यधर्मवातलेशेनापि स्पृश्यते सर्वथा भूतहितायैव क्रीडां करोतीति प्रत्युत्तरमाह । धर्मव्यतिक्रम इत्यष्टभिः ईश्वराणां प्रजापतिसोमेन्द्रादीनां धर्मव्यतिक्रमः धर्मप्रातिकूल्यं सहसा कृतं कर्म साहसञ्च दृष्टं तच्च तेषां तेजीयसां तपआदितेजोयुक्तानां दोषाय न भवति यथा सर्वभुजोऽपि वह्नेर्दोष्यपदार्थदोषलिप्तत्वं न क्रियते तद्वत् ॥ ३० ॥

भाषा टीका ।

यदुपति भगवान् सब मनोरथों से पूर्ण हैं तौ भी उनने जो ऐसा असंभव कर्म किया है हे सुव्रत शुकदेव जी ! इस का क्या अभिप्राय है इस में हम लोगों के संशय को आप छेदन कीजिये ॥ २९ ॥

श्रीशुकदेवजी बोले कहीं पर ईश्वर समर्थ पुरुषों का धर्म के अतिक्रमण करने का साहस दीखता है सो उस से तेजस्वी पुरुषों को दोष नहीं होता है जैसे कि सबका भक्षक अग्नि दोषों से लिप्त नहीं होता है ॥ ३०

नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजं विषम् ॥ ३१ ॥
ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।
तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि यद्यदाचरति श्रेष्ठ इति न्यायेनान्योऽपि कुर्यादित्याशङ्क्याह । नैतदिति । अनीश्वरो देहादिपरतन्त्रः यथा रुद्रव्यतिरिक्तो विषमाचरन् भक्षयन् ॥ ३१ ॥

कथं तर्हि सदाचारस्य प्रामाण्यमत आह । ईश्वराणामिति । तेषां वचः सत्यमतस्तदुक्तमाचरेदेव आचरितं तु क्वचित्सत्यमतः स्ववचोयुक्तं तेषां वचसा यद्युक्तमविरुद्धं तत्तदेवाचरेत् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

एतदीश्वराचरितं साहसं न सम्यगाचरेत् सम्यगित्यस्य निषेधे तात्पर्यं जातु कदाचिदपि तत्र च न मनसापि किमुत वाचा कर्मणा वा हि हेतौ निश्चये वा विशेषेण समूलतया लोकक्षयदुःखित्वादिप्रकारेण नश्यति मौढ्यात् ईश्वराणामैश्वर्यमात्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः । इति भक्षणे मौढ्यमेव हेतुरुक्तः अन्यथा भक्षणप्रवृत्तिः अब्धिजं कालकूटमिति परमताक्ष्णतया सद्य एव विनाशोऽभिप्रेतः ईश्वरस्तु न नश्येदेव प्रत्युत ऐश्वर्यविशेषप्रकाशादिना शोभत एव यथा नीलकण्ठत्वादिना श्रीमहादेव इति भावः ॥ ३१ ॥

स्वकीयेन वचसा युक्तमिति स्वशब्देन कदाचित् प्रेमपारवश्येनाविचाराद्रुच्यमानमाचारीवलम्बादिवचो व्यावर्तितं बुद्धिमानिति तत्तद्विचार्येत्यर्थः । अन्यथा निर्बुद्धिरेवेति भावः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तर्ह्यन्येषां का वार्त्ता तत्राह । नैतदिति । एतद्धर्मव्यतिक्रमादिमयमीश्वराचरितं न सम्यगाचरेत् । सम्यगित्यस्य निषेधे तात्पर्यम् । एकांशेनापि नाचरेदित्यर्थः । जातु कदाचिदपि तत्र च न मनसापि किमुत वाचा कर्मणा वा हि निश्चये । विशेषेण समूलतया लोकक्षयदुःखित्वादिप्रकारेण नश्यति । मौढ्यादीश्वराणामैश्वर्यमात्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः । इति भक्षणे मौढ्यमेव हेतुरुक्तः । अन्यथा भक्षणाप्रवृत्तिः स्यात् । अब्धिजं कालकूटमिति परमतीक्ष्णतया सद्य एव विनाशोऽभिप्रेतः ईश्वरस्तु न नश्येदेव प्रत्युत ऐश्वर्यविशेषप्रकाशादिना शोभते । यथा नीलकण्ठत्वादिना शिव इति भावः ॥ ३१ ॥

वच आज्ञा सत्यं प्रामाण्येन ग्राह्यं स्ववचनेनाविरुद्धमिति स्वशब्देन तेषामेव तथा विचारादाज्ञाया वलवत्तरत्वं व्यञ्जितं बुद्धिमानिति तत्तद्विचार्येत्यर्थः । अन्यथा निर्बुद्धिरेवेति भावः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

रुद्रो विषं यथाचरत् अभक्षयत् तथा चरन् भक्षयन् विनश्यति ॥ ३१ ॥

स्ववचोयुक्तं स्ववचः समायुक्तम् ॥ ३२ ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि "यद्यदाचरति श्रेष्ठ" इति न्यायेनान्योऽप्येवं कुर्यादित्याशङ्क्याह । नैतदिति । एतद्शास्त्रवश्यत्वेनाचरितमनीश्वरः शास्त्रवश्यः कदाचिदपि मनसापि नाचरेच्चिकीर्षामपि न कुर्यादित्यर्थः । विपर्यये बाधकमप्याह । नश्यतीति मौढ्यात्स्वस्यशास्त्रवश्यत्वाज्ञानात्तत्प्रतिषिद्धमाचरन्नाशु नश्यति नाशोऽत्र निरयप्राप्तिः तत्र दृष्टान्तमाह । यथेति रुद्रो यथाब्धिजं विषमाचरदभक्षयत्तथा तदन्यो भक्षयन्नाशु नश्यति रुद्रस्य विषपानप्रयुक्तप्राणविपत्त्यनापादकशक्तिमत्त्वं स्वस्य तदभावञ्चाजानन्केवलं रुद्रो भक्षितवान् तथाहमपि भक्षयिष्यामीति यो मौढ्याद्भक्षयति स नश्यत्येवेत्यर्थः ॥ ३१ ॥

कथं तर्हि श्रेष्ठाचारस्य प्रामाण्यमित्याशङ्क्य न कार्त्स्न्येन श्रेष्ठाचारः प्रमाणं किन्तु शास्त्राविरोध्येव श्रेष्ठवचःसु कार्त्स्न्येन प्रमाणमित्याह । ईश्वराणां कर्मवश्यत्वाभावप्रयुक्तशास्त्रवश्यत्वाभाववतामेवं कुर्वेवं माकुर्वित्येवं रूपं वचः कार्त्स्न्येन सत्यमबाधितं प्रमाणमिति यावत् आचरितन्तु क्वचिदेव किञ्चिदेव प्रमाणमित्यर्थः किन्तदाचरितं यत्प्रमाणमित्याह । तेषामीश्वराणां यदाचरितं स्ववचसा समायुक्तं स्ववचसोऽविरुद्धं तत्सत्यमित्यर्थः । तत्तस्माद्बुद्धिमानपीश्वरवचसोऽनुकूलमेवेश्वराचरितमाचरेत् बुद्धिमान्न तद्वाचरेदिति पाठे ऽयुक्तमितिच्छेदः स्ववचस ईश्वरवचसो विरुद्धमीश्वराणामाचरितं नाचरेदित्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

नन्वेवञ्चेत्श्रेष्ठाचरितत्वेनाश्रेष्ठस्य परावराचरणप्रसंगः यद्यदाचरति श्रेष्ठ इत्यादिस्मृतेश्चेति तत्राह । नेति । स्मृतिः सत्कर्मणः आचरमनुजानाति नत्वसत्कर्मणः लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसीति विधानाच्चेतीममर्थं हिशब्देन विशिनष्टि हि स्याद्विशेषणे हेतावितिति यादवः मनसापि नाचरेत्किमुत कायेन विपक्षे बाधकमाह । नश्यतीति णश अदर्शन इति धातोः समूलमुच्छिन्नो भवतीत्यर्थः । अदर्शनं लोप इति सूत्रात् लुप छेदन इतिधातोः मौढ्यात्कोपोद्रेकात् मौर्ख्याद्वा मोहकान्मौर्ख्यमूढत इति मोहो मोहनिः तद्विहत इति कालान्तरे सञ्जातेन निवर्तनेन नाशो न स्यादित्यतः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आश्विति किञ्चित्कालमवसरं न ददातीत्यर्थः । व्यतिरेकं दर्शयति । यथेति । यथा रुद्रो विषमपिबत् तथाहमपि विषम्पास्यामीति तत्पानेन नश्यति । तस्मात्तन्न कर्तव्यमित्यर्थः । विषपानेनाशु नाशः स्यादिति दर्शनाय तदुक्तं ननु समूलतरुच्छेदविषये विषपानान्मृतिं दृष्ट्वा अन्यस्यां निवृत्तिसम्भवात् । न तथा प्रकृत इति ॥ ३१ ॥

यद्येवं तर्ह्यासत्वेनेश्वरोक्तमपि ग्राह्यमित्यायातमिति तत्राह । ईश्वराणामिति । सत्यं परमार्थत्वेनाभीष्टज्ञापकं परमार्थेऽर्थवत्सत्यमिति यादवः तद्वचनमेव सत्यञ्चेत् —

कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ।

इति विधानं व्यर्थमिति तत्राह । तथैवेति । कचिदित्युपहासादिव्यावृत्तये अनुवर्तिनां वैदिककर्ममार्गप्रदर्शनार्थं यदाचारणं तदपि सत्यं फलदर्शनात्तर्हि वचनं सत्यं किंनेत्याह । तेषामिति । अयुक्तं वेदोऽप्रमाणलक्षणमित्यादिलक्षणं प्रतीतिकार्थविषयं यद्वा स्ववचसोऽयुक्तं विरोधि तेषां यदाचरितं बुद्धिमानेतन्नाचरेदिति श्रुतिश्च ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वचः आज्ञा सत्यं प्रमाणम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननुतर्ह्यनीश्वरोऽप्येतद्दृष्ट्या स्वाच्छन्द्यं कुर्वीतेत्याशङ्क्याह । नैतदित्यादि । अनीश्वरः श्रीकृष्णादन्यः कोऽपि मनसापि नैतत्साहसं समाचरेत् जातु कदाचिदपि आचरणे कः प्रतिबन्ध इत्याह । नश्यतीत्यादि । मौढ्यात् आचरन् सन् नश्यति आशु शीघ्रमेव ईश्वरस्तु यदि आचरति तदा ऐश्वर्यातिशयप्राकट्यं सर्वलोकहिताभिव्यक्तिश्चेत्याह । यथेत्यादि । यथा विषङ्कालकूटं जुषन् स्वैश्वर्यं प्रकटयाञ्चकार सर्वहितञ्च वस्तुतस्तु विषभक्षणं धर्मव्यतिक्रमः साहसं च नतु तस्य तद्रागप्राप्तम् अपितु परस्वस्त्यर्थं नतु तद्विषमन्यभोग्यं भवितुमर्हतीति प्रकृतेऽपि नैष धर्मव्यतिक्रमः साहसञ्च तासामन्यभोग्यत्वाभावात् तज्जोषणञ्चास्य परस्वस्त्ययनार्थञ्च वक्ष्यति च विक्रीडितमित्यादि अब्धिजं विषमिति पाठे आचरन् भक्षयन् चरिर्भक्षणार्थेऽपि वर्तते ॥ ३१ ॥

अपिच ईश्वराणां वागाचरितादीनां सत्यत्वमेवेति तच्चरितमप्यनीश्वरः कुर्यान्नेत्याह । ईश्वराणामित्यादि । ईश्वराणां स्वतन्त्राणां ब्रह्मादीनां वच एव सत्यं नचाचरितं क्वचित् कुत्रापि ईश्वरेश्वरे श्रीकृष्णे आचरितञ्च सत्यं सत्यलीलत्वात्तेषामीश्वराणामीश्वरेश्वरस्य च यत् ईहितं स्ववचोयुक्तं श्रुतिसिद्धं तदेव बुद्धिमानाचरेत् नतु सत्यत्वेन सर्वमेव तदीहितत्वमाचरेत् वचस्तु सर्वमेवाचरेत् ईश्वरवचस्त्वात् ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु तेजीयसामपि ह्येतन्न सुश्लोक्यमिति न्यायात् "यद्यत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते" इति विरोधाच्च कथमेतत्कर्तुं शक्यत इतिचेत् तत्राह । नैतत्समाचरेदिति । एतदीश्वरकृतमनीश्वरो न समाचरेत् ऐश्वर्यसमानाधिकरणमवैतत् नानिष्टं करोति अतः जातु कदाचिदपि औत्सुक्यादपि न समाचरेत् किम्बहुना मनसापि ऐश्वर्यतुल्यमेव तेषां तत्कर्म अतो यथैश्वर्यकामनायामपि अनीश्वरो वधमर्हति यथा महाराज्यानाधिकारी तदिच्छां कुर्वन् अतो मनसापि न समाचरेत् विपरीते वाधकमाह । विनश्यतीति । मौढ्यात् ऐश्वर्यसहभावं तस्य कर्मणः अज्ञात्वा केवलं तत्कर्माचरन् तेनैव कर्मणा नष्टो भवति नन्वेकमेव कर्म कथं धर्मान्तरसहितं न नाशकमितरथा नाशकमितिचेत्तत्राह । अरुद्रः रुद्रव्यतिरिक्तः रुद्रसमानपराक्रमरहितः अब्धिजं विषं कालकूटमाचरन् आसमन्तात् भक्षयन् विनश्यति तथेत्यर्थः । निन्दितं कर्मापि कालकूटवत् नाशकं तदीश्वरस्यैव शोभाकरं येन नीलकण्ठो भवति तथैव गोपीजनवल्लभ इति ॥ ३१ ॥

ननूक्तं यद्यदुत्तममनुतिष्ठन्निति तत्राह । ईश्वराणामिति । ईश्वराणां वच एव तथ्यं नत्वाचरितं क्वचिदाचरितमपि वचनानुगुणं चेत् ईश्वराणां बहवो धर्माः यथैश्वर्यं तथा धर्मात्मत्वं तथा दया तत्रैश्वर्यज्ञानवैराग्यैर्यत्करोति तत्स्वच्छन्दचरितमित्युच्यते बुद्धिमांस्तन्नाचरेत् ते ह्यन्यथा न - - न्ति अन्यार्थे कथनमन्याधिकारेणेति अतस्तद्विरुद्धं न कथयन्तीति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तर्हि यद्यदाचरति श्रेष्ठ इति न्यायेनान्योऽपि कुर्यादित्याशङ्क्याह । नैतदिति । अनीश्वरो निकृष्टो जीवः यथा रुद्रव्यतिरिक्तो विषमाचरन् भुञ्जानः सद्यो विनश्यति रुद्रस्तु भुक्त्वा प्रत्युत नीलकण्ठत्वेन शोभते स्मेति भावः ॥ ३१ ॥

कथं तर्हि सदाचारस्य प्रामाण्यमत आह । ईश्वराणामिति । सत्यं सद्भ्यो हितं क्वचित् दशरथपुत्रत्वे सतीत्यर्थः । तस्मादियं व्यवस्थेत्याह । स्ववचोयुक्तम् अविरुद्धं तदेवाचरेत् । बुद्धिमानिति तत्रापि विचार्यैव । तदसौ वध्यतां पाप आततायात्मबन्धुहेति भगवतो वचोऽप्यर्जुनेनाश्वत्थामवधविधायकं न पालितमिति ॥ ३२—३३ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तर्ह्यन्येषां का गतिस्तत्राह । नैतदिति । एतदीश्वराचरितं धर्मव्यतिक्रमादि साहसञ्च अनीश्वरः कर्मादिपारतन्त्र्यः न सम्यगाचरेत् सम्यगिति एकांशेनापि नाचरेदित्यर्थः । जातु कदाचिदपि तत्र च मनसापि आचरंश्च विशेषेण लोकद्वयप्रविष्टो भवेदित्यर्थः मौढ्यादिति भक्षणे हेतुः मौढ्यं च तेषामैश्वर्यस्यात्मनश्चानैश्वर्यस्याज्ञानमेव अब्धिजं कालकूटमिति सद्य एव नाशोऽभिप्रेतः एवं दार्ष्टान्तिकेऽपि ईश्वरस्तु न नश्येदेव प्रत्युतैश्वर्याविशेषप्रकाशनादिना शोभते यथा नीलकण्ठत्वेन रुद्र इति संक्षेपः ॥ ३१ ॥

ईश्वराणामिति वच आज्ञा सत्यं प्रमाणत्वेन ग्राह्यं तथैव यथा वचस्तथैवाचरितमपि चेत्तदा ग्राह्यमेव नतु वचसा विरुद्धमिति वचस एव बलवत्तरत्वं तत्रापि यत्स्ववचोयुक्तं स्वशब्देन तेषामेव

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

वचसाऽविरुद्धमित्यर्थः। यद्वा स्वशब्देनाधिकारिणमुद्दिश्य तेषां यद्वचस्तेन युक्तमित्यर्थः । शेषं स्पष्टम् ॥ ३२ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

नन्वेवं चेत्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।

इत्यादिवचनैः स व्यतिक्रमः सर्वैरनुष्ठेयः इत्याशङ्क्य नेत्याह । नैतदिति । अनीश्वरः परमेश्वरानुग्रहाल्लब्धैश्वर्य्यादितद्धर्म ईश्वरस्तद्भिन्नस्तथा एतत्परदाराभिमर्शनादि कर्म जातु कदाचिदपि मनसापि नाचरेत् ननु "कुशलान्याशु सिध्यन्ति नेतराणि कृतानि चे"त्यादिवचनैः कलौ मानसपापासिद्धिश्रवणात्किमिति मनसापि तन्निषिध्यते तत्राहैतदिति । एतत् परदाराभिमर्शनं तु मनसापि नाचरेत् "श्रवणं स्मरणं कीर्तिर्दर्शनैकान्तभाषणम्" दृढसंकल्पसङ्गौच भोगोऽष्टाङ्गं हि मैथुन"मित्यष्टाङ्गमैथुने स्वातन्त्र्येण मानसस्मरणस्यापि गणनात् किंच पापान्तराणां मानसत्वे कलौ मानस व्यथामात्रहेतुतया तादृक्साक्षाच्छारीरकदुःखोपभोगानुपयोगेऽपि तदुपयोगिकायिकपापबीजतया मानसव्यथाहेतुत्वेनच तान्यपि हेयान्येव विपक्षे दोषमाह । विनश्यतीति । मौढयादीश्वराणामात्मनश्च सामर्थ्याविविवेकात्तत्सामान्यदृष्ट्या चरंस्तु विशेषेण मरणेऽपि दुःखाप्रमोको यथा स्यात्तथा नश्यति मृत्वापि निरयादावुपतप्तलोहतदाकारालिङ्गनादिदुःखं प्राप्नोति किंच नह वैदेवाः पापान्स्पृशन्ति नैवऋषयइत्यादिवचनैर्देवादीनां तत्तद्देहकृतपापस्यैवाभावाद्विधिनिषेधशास्त्रस्य मनुष्यमात्राधिकाराचेषां दोषनिरूपणस्यापि मनुष्याणां भयजननार्थत्वाच्चेषामधिकाराभावेन व्यतिक्रमस्यैवाभावात्स तद्दृष्ट्या तदाचरणैत्वित्यं मौढ्यादाचरणप्रयुक्तविनाशे दृष्टान्तमाह । यथेति । अरुद्रो रुद्रव्यतिरिक्तो यथाब्धिजं समुद्रादुत्पन्नकालकूटं विषमाचरन् चर गतिभक्षणयोरित्यस्माद्भुञ्जन् विनश्यत्येव तस्य नीलकण्ठत्वादिना भूषणत्वेऽप्यन्यस्य विनाशकत्वमेव तदुक्तं "अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा विधेयस्यासीद्यस्त्रिनयनाविषं संहृतवतः । स कल्माषः कण्ठे तव न कुरुते निःश्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिन" इति ॥ ३१ ॥

ननु गतं तर्हि शिष्टाचारस्य प्रमाणत्वं तत्राह । ईश्वराणामिति । ईश्वराणां वचो वाक्यन्तु सत्यमेव "चोदनालक्षणो ह्यर्थो धर्म" इति जैमिनिना भगवता चोदनविधिरेव लक्षणं ज्ञापकं प्रमाणं यस्मिंस्तादृशस्यार्थस्य धर्मत्वनिर्णयात् तत्राप्यर्थशब्देन श्येनेनाभिचरन् यजेदिति विधिप्राप्तस्यापि श्येनयागस्याभिचारशब्दितशत्रुमारणफलद्वारानर्थत्वात्स व्यावर्तयति आचरितन्तु कचित्सत्यमलौलिकाविगीतशिष्टाचरस्यैव विध्यनुमापकतया प्रामणत्वात् तदेवाह। तेषामिति । यत्तेषामाचरणं स्ववचोयुक्तं तदीयवचनाविरुद्धं बुद्धिमांस्तु विचार्य्य तदेव समाचरेत् यथा श्रुतेतु वचस एव साक्षाल्लाभात्तदेव प्रमाणं स्याद्याचरणं वचोविरोधाभावे आचरणस्य तद्वचोरूपविध्यनुमापकतया प्रमाणत्वं वचोविरोधेतु वचसा वाधदर्शनेऽनुमानानवतार एव ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु एवं तर्हि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन" इति न्यायादितरस्यापि तदनुष्ठानं दोषावहं न भविष्यतीति तत्राह। नेति। इतरस्तु एतन्मनसापि कदाचिदपि न समाचरेत् वाचा देहेन समाचरेदिति किमु वक्तव्यं हि यतः अनीश्वरः देहादिपरतन्त्रः विपक्षे वाधकमाह। मौढ्यात्सामर्थ्यासामर्थ्यविवेकराहित्यात्तद्वदाचरन् सन् विशेषेण नश्येत् यथा रुद्रव्यतिरिक्तो विषं जुषन् भक्षयन् विनश्यति तद्वत् ॥ ३१ ॥

तस्मादीश्वराणां वचः सत्यं सर्वथाऽनुल्लङ्घनीयं तर्हि सदाचारः प्रमाणमिति घण्टाघोषस्य का गतिरिति चेत्तत्राह। तथैवेति कचित्तेषामाचरितमपि तथैव सत्यं तत्किमित्यपेक्षायामाह । तेषां यदाचरितं तेषां वचसा युक्तं तदेव बुद्धिमान् सम्यगाचरेदन्यथा निर्बुद्धिर्भवेत् तथा च धर्मबुद्ध्या सद्भिर्यदनुष्ठितं तदेव प्रमाणतयोपादेयं न सर्वमित्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतद्धर्मप्रातिकूल्यम् अनीश्वरः अतेजस्वी तपआद्यैश्वर्य्यहीनः अधर्मगर्ते पतितस्यात्मन उद्धरणे असमर्थ इत्यर्थः जातु कदाचिदपि मनसापि न समाचरेत् अन्यथातु विनश्यति यथा रुद्रस्य तेजीयसो विषभक्षणं दोषावहं नाभूत अरुद्रः रुद्राभिन्नः अब्धिजं विषं विषौषध्यादिरूपेण वर्तमानं मौढ्यादाचरन् भक्षयन् विनश्यत्येव तद्वत् ॥ ३१ ॥

ननु यद्येवं तर्हि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" इतिन्यायप्राप्तं श्रेष्ठाचरणं केनांशेन ग्राह्यं स्यात्तत्राह । ईश्वराणां समर्थानां वचः तथैव कचित् विधिशास्त्रानुरोधतः लोकशिक्षायै आचरितञ्च सत्यं सतां मुमुक्षूणामुपादेयम् अतो बुद्धिमान् तेषां यत् लोकशिक्षायै आचरितं स्ववचोयुक्तम् अनेनेदमनुष्ठेयमित्येवं स्वाधिकारानुसारिवाक्येन युक्तमभिहितञ्च तदाचरेत् ॥ ३२ ॥

भाषा टीका ।

जो असमर्थ पुरुष हैं उनको ऐसी बात को मन में भी कभी स्मरण न करना चाहिये करना तो कैसे होगा यदि मूर्खपना से करैगा तो जल्दी ही नष्ट हो जायगा जैसे कि महादेव जी ने समुद्रसे पैदा भये विष का पान किया है तौ भी दूसरा करैगा तो नहीं जियेगा ॥ ३१ ॥

समर्थ पुरुषों के वचन को सत्यमान कर करना चाहिये कहीं पर उनका आचरण भी मानना चाहिये जो कि उनके वचन से विरुद्ध न होवै तिस को विचार कर बुद्धिमान् पुरुष करै ॥ ३२ ॥

[1]कुशलाचरितेनैषामिह स्वार्थो न विद्यते ।
विपर्ययेण वानर्थो निरहङ्कारिणां प्रभो ! ॥ ३३ ॥
किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ।
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥
यत्पादपङ्कजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबन्धाः ।
स्वैरं चरन्ति मुनयोऽपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बन्धः ॥ ३५ ॥

[1] तोषिणी मतेऽस्मिन्पद्ये चकारयुतः पाठः प्रतीयते

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु तर्हि तेऽपि किमेवं साहसमाचरन्ति तत्राह । कुशलेति । प्रारब्धकर्मक्षपणमात्रमेव तेषां कृत्यं नान्यदित्यर्थः ॥ ३३ ॥

प्रस्तुतमाह । किमुतेति । कुशलाकुशलान्वयो न विद्यत इति किं पुनर्वक्तव्यामित्यर्थः ॥ ३४ ॥

एतदेव स्फुटीकरोति । यस्य पादपङ्कजपरागस्य निषेवणेन तृप्ताः यद्वा यस्य पादपङ्कजपरागे निषेवा येषां ते च ते तृप्ताश्चेति भक्ता इत्यर्थः । तथा ज्ञानिनश्च न नह्यमाना बन्धनमप्राप्नुवन्तः ॥ ३५ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

कुशलं पुण्यं तस्याचरितेनानुष्ठानेन एषामीश्वराणां चकारात् अमुत्रापि अर्थः फलं विपर्ययेण पापेन वाशब्दः समुच्चये अनर्थोऽपि नास्ति कुतः निरहङ्कारिणामहङ्कारिभ्यो व्यतिरिक्तानामहङ्काराभावेन कर्मभिरलेपादित्यर्थः । प्रभो हे बोद्धुं समर्थ ! एतत् त्वया सम्यक् बुध्यत एवेत्यर्थः । यद्वा तस्यापीश्वरत्वाभिप्रायेण सम्बोधयति हे ईश्वरेति ॥ ३३ ॥

अहो यद्येवं तेषामपि निरहङ्कारितामात्रेणैवानर्थाभावस्तर्हि सर्वजीवहितार्थमवतीर्णस्य परमेश्वरस्य कुतोऽनर्थशङ्कापीति कैमुतिकन्यायेन द्रढयन्नाह । किमुतेति । अखिलसत्त्वानां सर्वजीवानां तिर्यगादयः क्रमेण तामसराजससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानामिति मुक्तानामपि तदधीनता सूचिता कुशलाकुशले पुण्यपापे ताभ्यामन्वयः सम्पर्कः सर्वनियन्तृत्वेन नियामकाभावात् परमस्वतन्त्रत्वाच्च एतदेवहि परमेश्वरत्वं नामेति भावः । अन्यत्तैर्व्याख्यातं यद्वा ईशितव्यानां तद्भक्तानाञ्च किमुतेति ॥ ३४ ॥

परागेति । अतिनम्रत्वेन सेवया भक्तिविशेषो दर्शितः नितरां सेवेति निशब्दः स्वभावत एव तेषां सेवासक्त्यभिप्रायेण यद्वा परागेति दूरसेवाभिप्रेता निशब्देनच स्वल्पमात्रसेवाभिहिता तथापि तन्माहात्म्येन तृप्ताः निर्भयत्वादिदर्पयुक्ताः अतएव स्वैरं चरन्ति विधिनिषेधानादरेण स्वेच्छयैव कृत्यानि कर्माणि कुर्वते अतो न नह्यमानाः तैरबध्यमानाः तत्रानासक्तेः तृप्ता इति पाठे सर्वत्र सन्तुष्टाः अनन्यापेक्ष्या इत्यर्थः किञ्च योगोऽष्टाङ्गः समाधिर्ज्ञानम्वा तस्य प्रभावेण शक्त्या विशेषेण धूतः छिन्नः कर्मभिरनन्तकोटिजन्मार्जितैर्बन्धः बन्धनं तद्रूपो वा बन्धो यैस्ते मुनयोऽपि अपिशब्देन भक्तेभ्यो मुनीनां न्यूनतोक्ता अनेनैव श्रेष्ठ्याभिप्रायेण तृप्ता इत्युक्तम् इच्छया स्वच्छन्देनैव आत्तं प्रकटितं वपुर्येन तस्येति परमस्वातन्त्र्यं दर्शितं यद्वा निजप्रेमभक्तिविस्तारणेच्छया ततश्च तदपेक्षया विधिनिषेधानादरो युक्त एवेति भावः यद्वा भक्तानामिच्छया आत्तानि वपूंषि मत्स्यकूर्मादिमूर्तयो येनेति अवतारित्वेन परमैश्वर्यमुक्तम् अतः कुत एव बन्धः अपितु न कथमपि स्यादित्यर्थः । अन्यत्तैर्व्याख्यातं यद्वा योगो भक्तियोगः मुनयोऽपि किमुत प्रथमत एव भक्तिसम्मत इत्यर्थः । अथवा किम्वक्तव्यं भक्त इति योगिनोऽपि किम्वक्तव्यं योगिन इति कर्मपरा अपीत्येवं त्रिविधा अपि ज्ञेयाः अत्र मुनीनां प्रायो गार्हस्थ्येन कर्मपरत्वं तथापि स्वैराचरणं ज्ञानित्वादेव ततश्च ज्ञानिन एव द्विविधाः केचिद्योगपराः केचित्कर्मपरा इति एवं यथोत्तरमेषां न्यूनत्वम् अन्यत्समानम् अप्यर्थे चकारः किम्वक्तव्यं प्रियत्वेन तेषां तासां चेति सर्वेषामपि तत्र संशयनिरासार्थमेवशब्दः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

चकारादमुत्रापि वा शब्दःसमुच्चये अनर्थोऽपि नास्ति कुतः निरहङ्कारिणाम् अहङ्कारिभ्यो व्यतिरिक्तानाम् अहङ्काराभावेन कर्मभिरलेपादित्यर्थः प्रभो हे बोद्धुं समर्थ ! यद्वा तस्यापीश्वरत्वाभिप्रायेण सम्बोधयति हे ईश्वरेति ॥ ३३ ॥

अहो यद्येवं तेषामपि निरहङ्कारतामात्रेणैवानर्थाभावस्तर्हि तेषामपि हितार्थमवतीर्णस्य परमेश्वरस्य कुतोऽनर्थशङ्कापीति कैमुतिकन्यायेन द्रढयन्नाह । किमुतेति । अखिलसत्त्वानां तिर्यगादयः क्रमेण तामसराजससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानामिति मुक्तानामपि तदधीनता च सूचिता । त्वर्थे चकारः । ईशितव्यानां कुशलाकुशलाभ्यां पुण्यपापाभ्यां योऽन्वयः सम्पर्कः स किमुत सुतरामेव न विद्यते इति पूर्वेणान्वयः । सर्वनियन्तृत्वेन नियामकाभावात् । एतदेव हि परमेश्वरत्वं नामेति भावः । "वत्सवत् सुष्ठु किमुत सत्यतीवच निर्भरं" इत्यमरः ॥ ३४ ॥

तदेव कैमुत्यान्तरेण स्फुटं दर्शयति । यदिति । यत्तदोरन्वयाद्योगप्रभावेत्यादेरपि तदन्तः प्रवेशाद्यदिति यस्येत्यर्थः । सुब्लुक् छान्दसः । यद्वा यस्य पादपङ्कजयोः परागाणां कान्तिपरमाणूनां नितरां सेवनेन ध्यानरूपेणानुशीलनेन तृप्ताः अन्यत्रालंबुद्धयः तत् प्रेमपूर्णा इत्यर्थः । यस्यैव योग प्रभावेण भक्तियोगाख्यसाधनतेजसा विधूताखिलकर्मबन्धा ये ते चापि मुनयः स्वैरं स्वच्छन्दं यथा स्यात्तथा चरन्ति विहितमविहि-

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तमपि कुर्वन्ति तत्र नह्यमानाश्च न भवन्ति तस्मात्तस्य कुत एव बन्धः । अपि तु नास्त्येव बन्ध इत्यर्थः । तदेवं कैमुत्येन दर्शयित्वा विशेषणविशेषादपि तस्य बन्धाभावं दर्शयति । इच्छेति । इच्छया इच्छामात्रेण नतु जीववत् कर्मपारवश्येनात्तं तद्भक्ति सम्बन्धात् प्रपञ्चेऽप्यानीतं वपुर्येन तस्येति । अतो भक्तविशेषानुग्रहाय दुर्वाससः पराभावनावत् क्वचिन्मर्यादामप्यसौ लङ्घयतीति भावः ॥ ३५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कर्मवश्यानामपि तेजोविशेषात्प्रत्यवायहानिरुक्ता अपहतपाप्मन ईश्वरस्य किम्पुनरित्याह । किमुताखिलेति ॥ ३४—३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेजीयसां न दोषायेत्येतदेव स्पष्टयति । कुशलेति । एषां तेजीयसामीश्वराणामिह लोके कुशलाचरितेन साधनेनार्थः साध्यं प्रयोजनं न विद्यते नापि विपर्ययेणाकुशलाचरितेनानर्थोऽपि विद्यते तत्र हेतुं वदन्विशिनष्टि । निरहङ्कारिणामिति । अनात्मनि देहे आत्माभिमानरहितानामित्यर्थः । हे प्रभो ! देहाभिमानो हि पूर्वपूर्वकर्ममूलकः पुनरुत्तरोत्तरकर्ममूलश्च तदभावात्कर्मवश्यत्वाभावस्तदभावाच्च शास्त्रवश्यत्वाभावस्तदभावाच्च धर्माधर्ममूलकावर्थानर्थौ न स्त इति भावः ॥ ३३ ॥

यतोऽकर्मवश्यानां जीवानामेव कुशलाकुशलाचारनिमित्तकावर्थानर्थौ न स्तः किम्पुनस्तेषामपि नियन्तुरपहतपाप्मनो भगवत इत्याह । किमुतेति । तिर्यगादिरूपेणावस्थितानामखिलानां सत्त्वानां जीवानां नियाम्यानां नियन्तुः सर्वेश्वरस्य कुशलाकुशलान्वयो नास्तीति किमु वक्तव्यमित्यर्थः । कुशलाकुशलकर्मप्रयुक्तसुखदुःखादिसम्बन्धोऽत्र कुशलाकुशलान्वयशब्दाविवक्षितः सत्त्वशब्दो जीवपरः सत्त्वमस्त्री तु जन्तुष्विति कोशात् जन्तुशब्दश्च जीवपर्यायः "प्राणी तु चेतनो जन्मी जन्तुर्जन्युशरीरिणः" इति नामपाठात् सत्त्वप्रकृतिजैर्मुक्तमिति श्रीभगवदुक्तेश्च ॥ ३४ ॥

कैमुत्यनयेनोक्तमेव प्रपञ्चयति । यत्पादेति । यस्य पादपङ्कजपरागस्य निषेवणेन तृप्ताः निर्वृतशब्दादिविषयाभिलाषाः योगप्रभावेण यस्य पादपङ्कजानुध्यानात्मकयोगसामर्थ्येन विधुता अखिलाः कर्मात्मका बन्धा येषां ते मुनयः सनकादयोऽपि न नह्यमाना अनह्यमानाः अबध्यमानाः शास्त्रावश्या इतियावत् स्वैरं यथेच्छं चरन्ति किमुतेच्छया नतु कर्मणेति भावः । आत्तं परिगृहीतं वपुरप्राकृतं शुद्धसत्त्वमयं येन तस्यापहतपाप्मनः श्रीभगवतः कुत एव बन्धः कुतश्चिदप्याचरितात्स्वैराद्बन्धो नास्त्येवेत्यर्थः ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि शुष्कजलनारिकेलफलवन्निर्मुक्तशरीराभिमानानां दूरीकृतकुशलानां फलवत्त्वाद्धर्मव्यतिक्रमो न दोषायेत्याशयेनाह । कुशलेति । इह संसारमण्डले अर्थः प्रयोजनं प्रारब्धकर्मनाशेनापातकदेहत्वादभीष्टत्वाच्च । विपर्ययेण विपर्ययाचरणेनानर्थो नरकपातादिलक्षणः । अत्र हेतुमाह । निरहङ्कारिणामिति ॥ ३३ ॥

उपसंहरति । किमुतेति । अखिलसत्त्वानां समस्तप्राणिनामित्यस्य विवरणं तिर्यङ्मर्त्येत्यादिना ईशितव्यानां नियम्यानाम् ईशितुर्नियामकस्य चःसमुच्चये ईशितव्यानामचेतनानाञ्च कुशलाकुशलान्वयः पुण्यपापफललेपः किमुत ॥ ३४ ॥

कथान्तरात् कैमुत्यन्यायं दर्शयति । यत्पादेति । भक्तियोगप्रभावेण विधुतो विध्वस्तोऽखिलबन्धो येषां ते तथा न नह्यमाना अतएव पुत्रस्नेहेन बध्यमाना न भवन्ति कर्मभिर्वा ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निरहङ्कारिणामनावेशिनां तथापि तत्तत्करणं प्रारब्धवशादेवेति भावः ॥ ३३ ॥

ईशितव्यानां कुशलाकुशलाभ्यां पुण्यपापाभ्यां योऽन्वयः सम्पर्कः स पुनरीशितुर्न विद्यत इति किमुत सुतरामेव नेति पूर्वेणान्वयः । "बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे" इत्यमरः ॥ ३४ ॥

योगप्रभावेति ज्ञानिनोऽप्युक्ताः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अन्यस्य ईश्वरमात्रस्यैव रुद्रादेः स्वातन्त्र्यात्भद्राभद्रकरणेऽर्थानर्थौ न स्तः निरहङ्कारत्वादीश्वरेश्वरस्यास्यतु किमित्याह । कुशलाचरितैरित्यादि द्वाभ्याम् । एषामीश्वराणां रुद्रादीनां कुशलाचरितैः पुण्यकर्मभिरिह लोके अर्थ इष्टसिद्धिर्न विद्यते विपर्य्ययेण अकुशलचरितैरनर्थः अनिष्टोत्पत्तिश्च न विद्यते तत्र हेतुः निरहङ्कारिणाम् ॥३३॥

अस्यतु सर्वेश्वरेश्वरस्य पुनः किमुतेत्याह । किमुत किम्पुनरस्य ईशितुः सर्वेश्वरेश्वरस्य ईशितव्यानां लीलानां कुशलाकुशलान्वयः भद्राभद्रव्यवस्था सैवेव लीला कुशलरूपेत्यर्थः । सर्वमङ्गलमङ्गलचरितत्वात् इति तु सिद्धान्तः नतु गोपाङ्गनापरस्य धर्मव्यतिक्रमस्य दोषोद्धारस्तथाः अयन्तु धर्मव्यतिक्रम एव न गोपीनां स्वानन्दशक्तित्वात् तदङ्गसङ्गस्तस्य स्वारसिक एव ॥ ३४ ॥

यदि वासौ कर्तुमकर्तुमन्यथा कर्तुं समर्थतया लोकवेदातीतचेष्ट एव भवति तदपि किन्तेनास्येति भगवन्महिमानमाविष्टः सन् कथयति । यत्पादपङ्कजेत्यादि । योगप्रभावविधुताखिलबन्धा अपि यत्पादपङ्कजपरागनिषेवणतृप्ताः सन्तः स्वैरं चरन्ति लोकवेदातीताः सन्तो विचरन्ति शुभाशुभकर्मभ्यां न नह्यमाना न बध्यमाना मुनयः कीदृशा आत्तवपुषः मोक्षनैरपेक्ष्येण भजनानन्दात् गृहीतदेहाः मुक्ता अपि लीलया विग्रहं कृत्वा भजन्त इत्युक्तेः तस्य श्रीकृष्णस्य कुत एव बन्धः यच्चरणसेवा बन्धच्छेदिका तस्य स्वच्छन्दाचरणेन कुतो बन्ध इति ॥ ३५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु यथान्यस्मै न कथयन्ति तथा स्वयमपि कुतो न कुर्वन्ति तत्राह । कुशलाचरितेनेति । एषामीश्वराणां कुशलाचरितेन अर्थः प्रयोजनं न विद्यते ततोऽप्यनन्तफलस्य प्राप्तत्वादेव विपर्ययेण अकुशलाचरितेन अनर्थोऽपि न विद्यते ईश्वराणामेव निषिद्धकर्मणा अनिष्टाभाव इति न किंतु ज्ञानिनामपीति ज्ञानवैराग्ययोस्तुल्यं स्वरूपमाह । निरहंकारिणामिति । अहंकाररहितानां न केनापि किमपि कर्तृत्वाभिमानाभावात् प्रभो ! इति सम्बोधनमीश्वरस्य लोकविलक्षणत्वज्ञापनार्थम् ॥ ३३ ॥

यत्र ज्ञानसहकृतमेव तत्कर्म नानिष्टजनकं किंवक्तव्यमैश्वर्यसहकृतमित्याह । किमुतेति । ईश्वरस्य सेवकमारणे सेवकानामन्यथाकरणे च न काचिच्छङ्का भवति यथैहिकी तथा पारलौकिकी नियामकाद्धि शङ्का भगवतो न नियामकोऽन्योऽस्तीत्याह । अखिलसत्त्वानां सर्वजीवानां तिर्यङ्मर्त्यदिवौकसां गुणत्रयकार्याणां जीवजडानामप्राकृतप्राकृतानां वा सर्वेषामेव ईशितुः प्रभोः कृष्णस्य चकारादात्मनश्च ईशितव्यानां सेवकानां सम्बन्धी तत्कृतगुणदोषाभ्यां कुशलाकुशलयोरन्वयः कुतः नहि दासीभिः स्वात्मभूताभिः सम्बन्धे अनियम्यस्य ऐहिके पारलौकिके वा कश्चनापकारः सम्भवति अन्तरङ्गैरेव तथा ज्ञायत इति न जुगुप्सितानिवृत्तिः नापि कर्ममार्गविचारेण कर्मप्राधान्यपक्षेऽपि दोषः शङ्कनीयः ॥ ३४ ॥

यथा परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् ब्रह्म वा इदमग्र आसीत् स आत्मानमेवावेद इत्यादिश्रुतिषु ज्ञानकर्मभ्यामुत्कर्षः एवमपकृष्टज्ञानकर्मभ्यामपकर्षोऽपि संभाव्यत इति तत्राह । यत्पादेति । नहि सर्वेषामेव जीवानां समानकर्मणा समानं फलमुपलभ्यते अन्यथा शास्त्रवैफल्यापत्तिः उत्कृष्टकर्मादौ प्रवृत्तो नापकृष्टकर्मणा कादाचित्केन अपकृष्टो भवति तत्र मार्गत्रयं त्रिष्वपि प्रवृत्तो नापकर्षं यातीत्याह । तत्र प्रथमं भक्तिमार्गे प्रवृत्तस्य तत्र पुष्टस्य न केनाप्यपकर्ष इत्याह । यस्य भगवतः पादपङ्कजस्य परागभूता ये सेवकास्तेषां निषेवो निषेवणं तेन तृप्ताः भगवद्भक्तैः सह भगवद्गुणस्मरणेनैव विस्मारितदृष्टश्रुतसुखलेशाभासाः स्वैरं चरन्ति न तेषां कर्मोत्कर्षापकर्षौ साधकबाधकौ तथा कर्ममार्गेऽपीत्याह । योगप्रभावेति । महान् धर्मः अयं हि परमो धर्म इति स्मृतेः तस्य प्रभावः अणिमाद्यैश्वर्यसम्पत्तिः ज्ञानादयश्च तेनैव विशेषेण धुताः पूर्वकर्मजनिता अपि अखिलकर्मबन्धाः विशेषेण धुता भवन्ति तेऽपि स्वैरं चरन्ति ज्ञानमार्गेऽप्याह । मुनयोऽपि स्वैरं चरन्तीति सर्व एव न नह्यमाना अबध्यमानाः णह बन्धने सर्वत्रैव असंबध्यमानाः यत्र भगवत्प्रवर्तितमार्गेष्वप्येषा व्यवस्था तत्र भगवतः किंवक्तव्यमित्याह । तस्येच्छयात्तवपुष इति । इच्छया भोगार्थमात्तानि वपूंषि यावतीर्गोपयोषित इति तावन्ति येन तस्य कुत एव बन्धो भवेत् यो हि तावद्रूपो भवति कार्यं कृत्वा च तान्याच्छादयति तस्य केन कर्मणा बन्धो भवेत् कर्म हि प्रतिनियतं व्यवस्थितं तत्र यदि भिन्नो भिन्नो जीवः स्यात् तदा तेन कर्मणा बन्धो वा भवेत् आकाशवद्भगवद्रूपाणि प्रतिपदमन्यान्येव भवन्ति यथात्र भेदेनाप्येकदेहव्यवहारः एवं देशभेदेनापि भगवतः सर्वतः पाणिपादस्य तावत्परिच्छेदेन प्रादुर्भाव इच्छयेति स्वामिनीनां वा वपूंषि अतः सर्वथा प्रमाणप्रमेयविचारेणापि न बन्धः सम्भवति ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रस्तुतमाह । किमुतेति ॥ ३४ ॥

तद्भक्ता अपि धर्माधर्माभ्यां न बध्यन्त इत्याह । यदिति । निषेवो नितरां सेवनम् । योगो भक्तियोगस्तत्प्रभावेण विधुतोऽखिलानां स्वद्रष्टृणामपि कर्मबन्धः किमुत स्वस्य येस्ते मुनयो मननशीला भक्ता अपि न नह्यमानाः बन्धनमप्राप्नुवन्तः । तस्य तु निरंकुशया स्वेच्छयैव आत्तानि स्वीकृतानि वपूंषि परस्त्रीशरीराणि येन तस्य ॥ ३५ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तत्र हेतुमाह । कुशलेति । निरिति अहङ्काराभावेन कर्मभिरलेपादित्यर्थः —

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यत इति ॥

श्रीगीताभ्यः प्रभो ! बोद्धुं समर्थ ! यद्वा तस्यापीश्वरत्वाभिप्रायेण सम्बोधयन्नाह । हे ईश्वर अहमादिविवर्जयन्नित्यर्थः ॥ ३३ ॥

एतदेव कैमुत्येन द्रढयति । किमिति । तिर्यगादयः क्रमेण तामसराजससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानामिति मुक्तानामपि तदधीनता सूचिता कैवल्यं सात्त्विकं ज्ञानमिति तस्यापि तदन्तःपातात् कुशलाऽकुशले पुण्यपापे अन्वयः सम्पर्कः किमुत सुतरामेव नेत्यर्थः । सर्वनियन्तृत्वेन नियामकाभावात् एतदेवेश्वरत्वमित्यर्थः । "बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे" इत्यमरः ॥ ३४ ॥

अपि च यदिति । पादशब्देन गतिसाधनमुच्यते तच्च भगवतो गुणानुवाद एव आहूत इव मे शीघ्रं दर्शनं याति चेतसीति श्रीनारदानुभवात् तत्परागश्च तदर्थः पङ्कजत्वेन निरूपणात् तस्य निषेवणं श्रवणकीर्तनादिद्वारा तदास्वादस्तेन तृप्ताः अन्यत्राबद्धबुद्धयः तदेकरुचिविश्वासा भक्ता इत्यर्थः । स्वैरं तन्मात्रापेक्षत्वेनैहिकामुष्मिकसुखदुःखयोरागद्वेषाभावादनादृततत्तन्मर्यादं यथा स्यात्तथा चरन्ति तेन च नह्यमानाः बध्यमाना न भवन्ति आस्ताममीषां वार्ता मुनयो ज्ञानिनोऽपि न नह्यन्ति किमुतैत इत्यर्थः । उभयत्र हेतुगर्भं विशेषणं योगेति पूर्वत्र योगो भक्तियोगः उत्तरत्र ज्ञानयोगः विधूताखिलेति पूर्वावस्थाया अपि कर्मबन्धस्य त्याजकत्वेन नाशमङ्गीकृत्य तदवस्थायास्तु सुतरामङ्गीकृतम् इच्छयेति स्वच्छन्देनैवात्तं प्रपञ्चे प्रवर्तितं प्रकटितं वपुः श्रीविग्रहो येन तस्येति परमस्वातन्त्र्यं दर्शितं यद्वा निजप्रेमभक्तिविस्तारणेच्छया ततश्च विधिनिषेधानादरो युक्त एवेति भावः । यद्वा भक्तानामिच्छया आत्तानि वपूंषि पुरुषविष्णुमत्स्यादिरूपाणि येनेति पारमैश्वर्यमुक्तं कुत एव नास्त्येवेत्यर्थः ॥ ३५ ॥

श्रीरामनारायणकृतभावभावविभाविका

देवश्वर्येण धर्मव्यतिक्रमदोषाभिभवाद्दोषाभावमीश्वरानुग्रहाल्लब्धैश्वर्याणां दर्शयित्वा एषामेव तदनुग्रहाल्लब्धबोधानां सर्वकर्माश्लेषं सनिमित्तमाह । कुशलाचरितेनेति । एषामेव परमेश्वरानुग्रह-

श्रीरामनारायणकृतभावभावविभाविका ।

लब्धबोधानां तज्ज्ञापकमाह । निरहङ्कारिणामिति । ज्ञानमहिम्नाऽज्ञानबाधे तत्कृताहङ्काराद्यध्यासशून्यानां कुशलाचरितेनेह संसारे कश्चिदर्थो न विद्यते विपर्ययेण पापाचरणेनानर्थो न विद्यते "नैनं कृताकृते पुण्यपापे तापयतः किमहं साधुनाकरवं किमहं पापमकरवं तत्सुकृतदुष्कृते विधूनुते यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवं विदि पापं कर्म न श्लिष्यते—

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा
यस्य नाहं कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते ॥

समाहितैः किङ्करणैर्गुणात्माभिर्गुणोभवेन्मत्सु विविक्तधाम्नः । विक्षिप्यमाणैरुताकिन्नुदूषणं घनैरुपेतैर्विगते रवेः किम् । दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते । गुणबुद्ध्याच विहितं न करोति यथार्भकः तत्पूर्वोत्तराघयोरश्लेषविनाशौ तद्दर्शना"दित्यादिश्रुतिसूत्रैः संचितागामिकर्मणां विनाशाश्लेषप्रतिपादनात् प्रारब्धसुखदुःखोपभोगस्य च बाधितानात्मदेहादिसंघातपर्य्यवसायित्वात् ॥ ३३ ॥

एवं तदनुग्रहप्राप्तैश्वर्य्यबोधयोः प्रभावमुक्त्वा तत्र कैमुत्यन्यायेनादोषतामाह । किमुतेति । यद्येवं तदीशितव्यानामखिलसत्त्वानां तिर्य्यङ्मर्त्यदिवौकसां तमोरजःसत्त्वप्रकृतीनां तत्र तिरश्चां तत्प्रेरिततमसैव बोद्धा समर्थः फलार्थी चाधिकारीत्यधिकारलक्षणगतबोधसामर्थ्ययोरभावादनधिकारतया न कुशलाकुशलान्वयः मर्त्यानां शास्त्राधिकारत्वेऽपि तत्कृपालब्धबोधानामुक्तप्रकारेण बोधमहिम्नैवाधिकारिलक्षणफलार्थित्वाभावेन तस्य कार्य्यं न विद्यते इत्यादिनाधिकाराभावेन सकारणक्रियाकारकफलबाधेनच न कुशलाकुशलान्वयः दिवौकसां तत्प्रेरितैश्वर्याणां तत्पराभूतदोषत्वेन न तदन्वयः तर्हि तदीशितुः कुशलाकुशलान्वयो नेति किमुत वक्तव्यम् ॥ ३४ ॥

नन्वीशितव्यानामधिकाराभावात्कारकादिबाधाच्च कर्म्मानन्वयो दृष्ट ईशितुस्तु बोधसामर्थ्ययोः सत्वात् देहसंबन्धे सति कारकाबाधात् फलार्थित्वस्यापि सम्भावयितुं शक्यत्वाद्भवतु कर्मबन्धस्तत्र पुनः कैमुत्येनैव सावधारणमाह । यत्पादेति—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानङ्कर्मच भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचिदिति

योगत्रयस्यापि श्रेयोहेतुत्वादयोगिनामेव कर्म शुक्लकृष्णं योगिनां त्रिविधमितरेषामिति सूत्रेण कुशलाकुशलान्वयात्कर्मबन्धस्तत्र योगिनां बन्धाभावं वदन् भक्तियोगस्य—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

इत्यादिना कर्मसम्पूर्तिहेतुत्वेन—

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥

इत्यादिनाच ज्ञानकारणत्वेन स्वयञ्चानन्याधीनत्वेनाभ्यर्हितत्वं मत्वा पूर्वमाह । यत्पादेति । यस्य पादावेव पङ्कजे मृदुमञ्जुसुरभिसमूलत्रिविधतापापनोदपूर्वकनित्यपरमानन्दात्मकाह्लादाविर्भावुके तयोः परागस्तत्संबन्धिसमीरजोऽपहारिरजस्तस्य गङ्गानीतस्य नितरां सेवनेन तृप्ता भक्तादयः—

पूर्णाः पुलिन्द्य उरुगायपदाब्जराग
श्रीकुंकुमेन दयितास्तनमण्डितेन ।
तद्दर्शनस्मररुजस्तृणरूषितेन
लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥

इत्यादिनाव्रजसंचरणचरणसंलग्नरजोनिषेवतृप्ताव्रजवनौकसः ध्यानसेवनादौ तद्रजोनितरां सेवनेनैव तृप्ता विगतैहिकामुष्मिकाभिलाषाः सर्वे भक्ता यद्वा यत्पादपङ्कजपरागतद्रजोऽभिलाषया तद्भूरिभाग्यमिहजन्म किमप्यटव्यामित्यादिना चलं ब्रह्मादिपदमपहाय व्रजाश्रयणेनागा निश्चलपदवीं समाश्रिता ये वृन्दावनाद्रिद्रुमास्तेषां नितरां सेवनेन तृप्ताः यद्वा पादपङ्कजपरागस्त एव वैराग्येण गृहबन्धुवित्तादि हित्वा अगानां गोवर्द्धनादिगिरीणां निषेवेन तृप्ताः यद्वा पादपङ्कजे पात इति पादपङ्कजस्य पादुके तयो रागेण निषेवस्तेन तृप्ता यद्वा यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेष्वित्यादिना यत्पादपङ्कजे कर्कशकुचस्पर्शादिना पान्तीति पादपङ्कजपास्तथा रागपरवशतया यत्तन्निषेवः शनैर्विधारणं तेनैव तृप्ता यद्वा पिवति चाचिचोति पादं मुखं तदेववर्णितगुणैः पङ्कजं चक्षुर्भ्यां तद्रूपसुधापानं वचनादौ तदधरामृतस्य वात्यास्वादनेन तन्मुखपङ्कजमेव पिबन्तीति पादपङ्कजपः तथा रागः सा परानुरक्तिरीश्वरे इति भगवच्छाण्डिल्यसूत्रेण परा भक्तिः निषेव इत्युपलक्षणं श्रवणादिनवविधपरापरभक्ती ताभ्यां परापरभक्तिभ्यामेव तृप्ताः भक्ताः यतो न न ह्यमाना एह बन्धने इत्यस्माद्बन्धशून्या जीवन्मुक्ताः सन्तः स्वैरं यथेष्टं चरन्ति तथा योगप्रभावविधुताखिलकर्मबन्धा योगोऽत्र कर्मयोगो ज्ञानयोगश्च तत्र तदर्पितसर्वकर्मात्मककर्मयोगप्रभावेण विधुताखिलकर्मबन्धत्वं दर्शितं श्रीमद्भागवते—

कर्मणा कर्मनिर्हार एष साधुनिरूपितः ।
यच्छ्रद्धयातविस्तेन शुक्लेनेज्येत पूरुषः ॥
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।
त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥

इत्यादिज्ञानयोगपक्षेतु योगो विरुद्धोपाधितत्कल्पितधर्माणाञ्च जहदजहल्लक्षणया परित्यागेन त्वं पदार्थस्य तत्पदार्थस्वरूपाभेदज्ञानं तस्य प्रभावः कर्ममूलाज्ञानबाधनं तेन विधुता उन्मूलिता अखिलाः कर्मबन्धा येषां ते तथाभूताः—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि
तस्मिन् दृष्टे परावरे क्षीयन्ते चास्यकर्माणि दृष्ट एवात्मनीश्वरे ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा सर्वं कर्माऽखिलम्पार्थ ज्ञाने परिसमाप्यते "इत्यादिश्रुतिस्मृतिभिः तेचविधुताखिलकर्मबन्धाः सन्तः स्वैरञ्चरन्ति तथा मुनयो मननशीला ज्ञानयोगजिज्ञासवोऽपि "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते"इत्यादिना स्वैरञ्चरन्ति तदा तस्य स्वेच्छयैव स्वातन्त्र्येण तत्तद्भक्तादीनां कर्मादिबन्धबाधनेच्छया वा स्वीयानां भक्तादीनामिच्छया वा आत्तमाविर्भावितं नित्यं सच्चिदानन्दघनं वपुर्येन तस्य बन्धः कुत एव न कुतोऽपीत्यर्थः तत्रायं भावः । कर्माधीनभौतिकसाविकारदेहे आविद्यात्मन्यध्यस्ते तत्कर्माध्यासाज्जीवानां कर्मबन्धो भवेन्न त्वानन्दमात्रशरीरे स्वरूपातिरिक्तदेहतत्कर्मतदध्यासादीनामभावान्न बन्धसम्भावनापि तदुक्तं भगवज्जनिनिर्णये"किन्तु निर्दोषचैतन्यसुखानित्यां स्वकान्तनुम् आविर्भावयते सैव जनिर्विष्णोर्नचपरा । तथा वैष्णवतन्त्रे भगवद्विग्रहनिरूपणे'निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मक शरीरगुणैश्च हीनः । आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा"इति॥३५॥

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु तेऽपि स्ववचोऽनुरूपं कुतो नाचरन्तीत्याशङ्क्य स्ववचसो विधिनिषेधरूपत्वात्तेषां च तदप्रयोज्यत्वात्स्ववचनानुसरणमित्याशयेनाह। कुशलेति। तथा चोक्तं भगवता "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन" इति यतस्ते निरहंकारिणः तदुक्तं "यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते" इति तथा च तेषां तथा प्रवृत्तिरेतच्छास्त्रस्यार्थक्यमिति भावः। यथा प्रभोर्न साधनारूपस्य नियम्यता तद्भक्तानामपि नासौ विधि निषेध नियम्यतेति संबोधनाशयः॥३३॥

तथा च यथोक्तरीत्या यद्येवं तदातिर्यगाद्यखिलसत्त्वानां नियम्यानामीशितुर्नियामकस्य सर्वकर्मणां यथायथं फलप्रदस्य स्वतन्त्रस्य परमात्मनो तियम्येभ्यो कुशलाकुशलाभ्यामन्वयः नियम्यतारूपः सम्बन्धः कुतः सर्वथा न विद्यत इत्यर्थः॥३४॥

किञ्च जीवानामपि तदनधिकारिणां नास्ति कर्मबन्धो यदा तदा परमेश्वरस्य कुतस्तत्सम्भव इत्याह। यदिति। यस्य भगवतः पादपद्मयोः परागाणां कान्तिलक्षणरेणूनां नितरां सेवनेन ध्यानादिना तृप्ता अन्यत्र जातालम्प्रत्यया यत्पादपङ्कजपरागेषु निषेवामेव ते इच्छान्ति तृप्तश्चेति वा एवं भूताः भागवतप्रधानास्तथा ज्ञानयोगप्रभावेण विधुता निराकृता अखिलकर्मणां बन्धा येषां तत्वज्ञा मुनयोऽपि न नह्यमानाः कर्मभिरबध्यमानाः स्वैरं विधिनिषेधकर्मविनिर्मुक्ताश्चरन्ति तस्य स्वेच्छया स्वीकृतनरदेहस्य परमेश्वरस्यैव कुतो बन्धः सर्वथापि तत्र नाशङ्कनीयमित्यर्थः । यद्वा यद्भक्तयालब्धज्ञाना मुनयोऽपीति व्याख्येयम्॥३५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु तेजीयसां तत्कृतो धर्मव्यतिक्रमः कुतो न दोषाय भवतीत्यत आह। कुशलाचरितेनेति। ते हि द्विविधा एके निरहङ्कारिणः ध्रुवास्मृतियुक्तास्तेषां परमेश्वरध्यानपरत्वेन विधिनिषेधविस्मृतिवशात् प्रारब्धकर्मैककारितेन कुशलाचरितेन स्वार्थः विपर्ययेण प्रारब्धकर्मकारितेनाकुशलाचरितेनच अनर्थो वा न विद्यते अनिरहङ्कारिणामिति पदच्छेदादन्ये ज्ञेयाः ते हि पूर्वसञ्चितमहापुण्यपूरैः पूर्णाः पुनरपि बहूनि महापुण्यानि कर्तुं शक्ताः तेषां कुशलाचरितेन किञ्चिन्मात्रेण कुबेरगृहे वराटिकान्यास इव अर्थः विपर्ययेण कुबेरगृहे वराटिकापहार इव अनर्थो वा न विद्यते इत्यर्थः ॥ ३३ ॥

एवं सति केषुचित् जीवेषु कुशलाकुशलान्वयो न विद्यते तर्हि अखिलानां सत्त्वानामीशितव्यानां नियम्यानां जीवानामीशितुर्नियन्तुः परमेश्वरस्य सर्वस्वामिनः कुशलाकुशलान्वयो न विद्यते इति किम्पुनर्वक्तव्यमिति कैमुतिकन्यायो दर्शितः ॥ ३४ ॥

कुशलाकुशलकर्मफलास्पृष्टत्वमपि भगवतः कैमुतिकन्यायेन दर्शयति। यदिति। यस्य पादपङ्कजपरागे निशेवा येषां ते तथा ते च ते तृप्ताश्च पादपङ्कजपरागध्यानानन्दाः अत एव योगप्रभावेण तद्ध्यानसामर्थ्येन विधुताः अखिलकर्मबन्धा येषां ते मुनयः भगवत्तत्त्वमननशीलाः भागवताः न नह्यमाना निर्बन्धनाः सन्तः स्वैरं चरन्ति तस्य भगवतः इच्छयैवात्तवपुषः परिगृहीताप्राकृतविग्रहस्य कुतो बन्धः कुशलाकुशलकर्मफलभूत इत्यर्थः॥३५॥

भाषा टीका ।

इन समर्थ पुरुषों को धर्म के आचरण करने से कुछ इहां पर स्वार्थ सिद्ध नहीं होता है हे प्रभो। परीक्षित जी निरहंकारी होने से उन का अधर्म होने से कुछ अनर्थ भी नहीं होसका है॥३३॥

जब भगवान् के भक्तों की ऐसा है तो सम्पूर्ण प्राणियों देवता तिर्यक् मनुष्यादिकों के जो ईश्वर हैं नियाम्य जीवों के पति हैं उन को पाप पुण्य का संबंध कहां से होसका है॥३४॥

जिन भगवान् के चरण कमल के रेणु के सेवन करने से सन्तुष्ट भये मुनिजन योग के प्रभाव से सब कर्म बन्धों के छूट जाने से किसी कर्म के बन्धन में नहीं हद कर इच्छा पूर्वक संसार मे विचरते हैं उन मुनिन के पूज्य भगवान् श्रीकृष्णचन्द्र हैं तो उन ने तो अपनी इच्छा से शरीर को धारण किया है तो उन को तो कर्म बन्धन कहां सम्भव है॥३५॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परदारत्वं गोपीनामङ्गीकृत्य परिहृतमिदानीं भगवतः सर्वान्तर्यामिणः परदारसेवा नाम न काचिदित्याह। गोपीनामिति। योऽन्तश्चरत्यध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडनेन देहभाङ् नत्वस्मदादितुल्यो येन दोषः स्यादिति॥३६॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

स इत्यनेनास्यान्वयः स एवैष साक्षाद्भूतः अध्यक्ष इति तदंशत्वेन तत्प्रेर्यत्वेन वा तत्त्वविचारतस्तस्मिन्नेव भोक्तृत्वपर्यवसानात् किम्वा अन्तर्यामित्वेनापि मायावादिनामद्वैतव्याख्यानुसारेणच परदारत्वाभावात् परदारसेवा नास्तीति परिहृतम् अत एव परमात्मत्वसिद्धये सर्वेषामित्युक्तम् एषः श्रीगोपीरमणः क्रीडनेन लीलया किम्वा क्रीडनेन हेतुना क्रीडार्थमित्यर्थः। देहभाक् निजश्रीमूर्त्तिप्रकटकः अन्यत्तैर्व्याख्यातं यद्वा अध्यक्षः सर्वचित्ताधिष्ठाता सर्वेन्द्रियप्रवर्त्तकश्चेत्यर्थः। अत एवान्तश्चरति एवमन्तर्यामितया सर्वकर्मसु प्रवर्त्तनेनापि यथा तस्य तद्गुणदोषैर्लेपो न स्यात् किम्वा सर्वकर्मसन्तर्यामिदृष्ट्या प्रवृत्तेरन्येषामपि तैर्लेपो यथा न स्यात् तथात्रापीति भावः। तत्र गोप्यादिष्वन्तर्यामिणः प्रकाशतारतम्येन तेषां यथोत्तरं न्यूनतोह्या इति परमैश्वर्येण पूर्वोक्तबन्ध-

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी ।

भावहेतुरभिव्यञ्जितः विशेषतश्च रासक्रीडार्थमेव देहभाक् प्रकटितः तद्योग्यश्रीव्रजेन्द्रकिशोरमूर्त्तिरित्यर्थः । प्रेमरसविस्तारणार्थमवतीर्णस्य तदनुरूप एव व्यवहारो युक्तो नामेति सिद्धान्ततत्त्वम् ॥३६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तदेवं गोपीनां परदारत्वमङ्गीकृत्यापि दोषः परिहृतः तत्र च सति कुलटात्वं जारत्वं नापयाति तन्नाम च खलु धिक्काराय परं पर्यवस्यतीति तदसहमानस्तासां तत्परदारत्वमेव खण्डयति । गोपीनामिति तैर्व्याख्यातम् । तत्र वुद्ध्यादिसाक्षी परमात्मेत्यर्थः । अतो न तस्य परो नाम कश्चिदिति के वा परदारा इति भावः । ननु खलु निराकार इति श्रूयते तस्मादाकारवत्त्वादस्मदादितुल्य एवासौ न तत्राह । स एवेति । एव शब्दोऽयं चैवेत्यस्मादाकृष्टः । अत्र चशब्दः क्वचिन्नास्ति । क्रीडनेन स्वैरं तदिच्छयैव नतु कर्मपरवशत्वेन हेतुभाक् तदुचिते देशे तदुचिते निजदेहप्रवर्त्तक इत्यर्थः । अन्तर्यामितायामाकारापेक्षाया अभावादेव तत्र निराकारत्वमुच्यते नतु वस्तुतः । "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्त" मिति द्वितीयोक्तेरिति भावः । नत्विति नत्वस्मदादिजीववत् परस्परमनात्मकर्मपरवशश्चेत्यर्थः । एष क्रीडनदेहभागिति क्रीडनेनेह देहभागिति च पाठः । अथवा यो गोप्यादीनां सर्वेषामपि तत्तद्योग्यताप्रदेशेन परमात्मरूपेणान्तश्चरति स एवाध्यक्षस्तत्तदधिष्ठाता गोप्यः किमाचरदित्यादिना कात्यायनि महामाये । इत्यादिना अपि वत मधुपुर्यामित्यादिना च व्यञ्जिततादृशममतामयभावविशेषाणां तासान्तु पतिरूप एवाध्यक्ष इत्यर्थः । ननु कथं परमात्मरूपेण क्रीडति कथञ्चानेन रूपेण क्रीडति तत्राह । एष वहिःप्रकटरूप एव स श्रीकृष्णस्तादृशक्रीडासाधनं देहं भजते नित्यमेवाश्रयति नत्वन्तःस्थः परमात्मरूप इति । पाठान्तरेऽपि इह वहिःप्रकटरूपत्व एवेत्यादि योज्यम् । एवमुत्तरत्रापि तदेवमन्तर्यामित्वपक्षे स्वदारत्वस्यातिव्याप्तिपरिहाराय किञ्चिदन्यथाहार्यव्याख्यातम् । तथापि विण्मूत्रपरिपूरितदेहासु त्वक्श्मश्रुनखरोमकेशेत्यादि रुक्मिणीवाक्यानुसारेण विशुद्धसत्त्वव्यक्तविशेषमयपरमज्योतिर्देहस्य तस्य प्रवृत्तिस्तज्जुगुप्सिततामेवावगमयति नतु भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेदित्यनुसारेण रोचमानताम् । अतएवान्तर्गृहगतानां कासाञ्चिदसिद्धदेहानां तद्देहपरित्याजनञ्च निर्दिश्यते । नच सैरिन्ध्र्यादावपि तत्प्रवृत्तिदर्शनादन्यथा मन्तव्यम् । मुकुन्दस्पर्शनात् सद्यो वभूव प्रमदोत्तमेति तत्स्पर्शादिना स्पर्शमणि लोहवृत्तान्तवत् भुवदेहवत्त्व तद्योग्यदेहलक्षणप्रमदोत्तमात्वं प्राप्य तत्क्रीडनयोग्यता तत्र जातेति गम्यते । न चासामपि तादृशत्वं मन्तव्यं ताभिर्विधूतेत्यादौ प्रत्युत ताभिरेव असावधिकं व्यरोचतेत्युक्तत्वात् । किञ्च नायं श्रियोऽङ्ग इत्यादौ श्रीतोऽपि स्वर्योषिद्भ्योऽपि पराभ्योऽपि सर्वजनेभ्योऽर्हत्तमत्वं परत्वञ्चासां लक्ष्यते । यतः साधिक्षेपमुक्तं कुतोऽन्याः इति तस्मादासां विलक्षणत्वावगमाद्विलक्षणत्वेनैव व्याख्यान्तरं कर्त्तव्यम् । तथाहि गोपीनां तद्विशेषाणामासां तथा तत्पतीनां सम्प्रति तासां पतित्वेन प्रतीतानां तथा सर्वेषामपि गोपगवादीनां देहिनाञ्च योऽन्तर्मध्ये चरति जयति जननिवास इति दृष्ट्या अहो भाग्यमहो भाग्यमिति रीत्या "योऽसौ गोषु तिष्ठति योऽसौ गाः पालयती" ति तापनीश्रुत्या च तन्मध्ययोग्यक्रीडाभिर्नित्यमेव क्रीडति : सः श्रीकृष्णो ऽध्यक्षः प्रत्यक्षः प्रापञ्चिकानां प्रकटः सन्नपि चरति तत्तद्योग्यमेव क्रीडति । उभयथापि क्रीडायां हेतुः । एषः श्रीकृष्णः क्रीडाशीलः श्रीगोपालवपुः प्रकाशनशील इति । यद्वा । स एव प्रापञ्चिकप्रत्यक्षः सन्नपि क्रीडनदेहान् स्वक्रीडाहेतुविग्रहान् गोप्यादींस्तानेव भजन् क्रीडति । पाठान्तरेऽपि क्रीडनेनोपलक्षितांस्तद्रूपान् देहानिति । तदेवं तथैव नित्यविहारात्तासां तन्नित्यप्रेयसीत्वम् । ततस्तत्प्रातिमदेहत्वं च दर्शितम् । तत्र परसम्बन्धवर्णनेन सन्देहं प्रकटयन्त्यां प्रकटलीलायामपि सुखावेशात् स्पष्टमेवोक्तं तासु तद्रूपत्वं स्वयं श्रीशुकदेवेन अधोक्षजप्रिया इति भगवत्प्रिया इति कृष्णवध्व इति च । तापन्यां दुर्वाससा ताः प्रत्येव च । योऽसौ गोषु तिष्ठतीत्यादौ स वो हि स्वामी भवतीति परमसम्बन्धवर्णनेन सन्देहरहितायामप्रकटलीलायां कैमुत्येन तदेव निर्णीतम् । श्रीमदष्टादशाक्षरपटले श्रीब्रह्मणा स्वसंहितायाम् । "आनन्दचिन्मयरस प्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामी" त्यत्र कलात्वेन निजरूपत्वप्राप्तेऽपि प्रकटलीलागतपरकीयत्वे सन्देहनिरासार्थम् । निजरूपतयेति एतदेव चोपक्रमोपसंहारयोस्तासु लक्ष्मीत्वस्य तस्मिन् परमपुरुषत्वस्य निर्देशेन तथैव निर्द्धारितं तत्र चिन्तामणि प्रकरसद्मस्वित्यादौ लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानमित्युपक्रमः । श्रियः कान्ताः कान्तः परमपुरुष इत्युपसंहारः । तत्र चान्यत्र च । साक्षात् गोपीशब्दप्रधानाः श्रीमदष्टादशाक्षरप्रमुखमन्त्राश्च तथैव वदन्त आसते । तथाच तत्तन्मन्त्रव्याख्यायां गौतमीयतन्त्रे । तत्तन्मन्त्र द्रष्टारः श्रीमद्देवर्षिचरणाः तत्प्रधानाः श्रीभगवतो नामधेयं वहिरङ्गदृष्टीनामपि प्रवृत्त्यर्थं रूढिमपि परित्यजन्तः सर्वेश्वरत्वं मायास्वरूपशक्त्योर्वैभवभेदेन द्विधा निरुच्य तद्ध्यानगततदन्तरङ्गप्रेयसीभक्तानां प्रवृत्त्यर्थं श्रीगोपालमूर्तेस्तस्य श्रीगोपालीपतित्वमेवाश्रितरुचितया तत्राप्युत्तरपक्षतया पर्यवसायितवन्तः । तत्र चैवकारेण प्रकटलीलाप्रसिद्धस्वौपपत्यं निराकृतवन्तः । यथा "गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः । अनयोराश्रयत्वेन कारणत्वेन चेश्वरः । सान्द्रानन्दपरं ज्योतिर्वल्लभेन च कथ्यते । अथवा गोपीप्रकृतिर्जनस्तदंशमण्डलम् । अनयोर्वल्लभः स्वामी भवेत् कृष्णाख्य ईश्वरः । अनेकजन्मसिद्धानां गोपीनां पतिरेव वा । नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धन" इति । अत्रानेकजन्मसिद्धानामिति बहूनि मे व्यतीतानि जन्मानि तव चार्जुन इतिवत् । तासामनादिकालपरम्पराप्राप्तश्रुतिपुराणतन्त्रादिप्रसिद्धावतारित्वमेव व्यनक्ति तस्माद्वस्तुतः परदारत्वमेव नास्ति किमुतायोग्यत्वमिति भावः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत् पृष्टमाप्तकामो यदुपतिरित्यादिना-वाप्तसमस्तकामस्य स्वतो निरतिशयानन्दस्य ग्राम्यचेष्टान्वयः कथमिति तस्योत्तरमाह । गोपीनामिति द्वाभ्याम् । गोपीनां तासां पतीनाञ्च तथान्येषां देहिनां जीवानाञ्च योऽन्तश्चरत्यन्तरात्मतया व्याप्नुवन्नियमयति यश्चाध्यक्षः । तत्तत्कर्मानुगुणसुखदुःखादिफलदश्च स एष भगवान्कृष्णः क्रीडनदेहभाक् क्रीडनाय देहभाक् नत्वस्मदादिवत्सुखदुःखादिभोगाय कर्माधीनदेहभागित्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्रीडनं क्रीडासाधनं देहं भजतीति क्रीडनदेहभाक् अध्यक्षः साक्षी अयञ्च बन्धाभावे हेतुः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

गोपीनाम् अत्र टीकानुसारेण श्रीभगवतः परदारा नाम न सन्तीति व्याख्यानेऽपि तासामयोग्यत्वं न व्याहन्यत एषा व्याख्या ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

अन्यच्च गोपाङ्गनास्वस्य क्रीडापाञ्चालिका इव क्रीडादेहनिर्विशेषस्तस्य भजनमस्य नहि बहिरङ्गलीलैव अन्तर्यामिता त्वस्य बहिरङ्गलीलैवेत्याह ॥ गोपीनामित्यादि । स एष श्रीकृष्णः क्रीडनदेहभाक् क्रीडनदेहा व्रजदेव्यस्ता न भजतीति स्वरूपनिर्देशः ताच्छील्ये क्विप् अध्यक्षः साक्षात् प्रत्यक्ष इति यावत् यो नारायणरूपेणैव गोपीनां तत्पतीनाञ्च सर्वदेहिनाञ्च अन्तश्चरति अन्तर्य्यामी गोपीनां पतयः पत्याभासास्तेषां सर्वेषामपि देहिनाञ्च ननु गोपीनां सर्वसाधारण्येनान्तर्य्यामित्वम् आनन्दविग्रहत्वात् एतेनास्य व्रजाङ्गनाभिः सह क्रीडनं स्वरूपविहार एव न धर्मव्यतिक्रम इति भावः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु तथापि लोकमर्यादाया भग्नत्वात् यद्यदाचरति श्रेष्ठ इति न्यायेन शब्दबलविचारेण बन्धो भवेत् तेह्यवधूतास्त्रयोऽपि न ते व्यवहारनियामकाः अतो विषमो दृष्टान्त इति चेत्तत्राह । गोपीनामिति । नहि स्वस्य स्पर्शः स्वस्य क्वापि निषिद्धः परा चासौ परस्य स्त्री उभयमपि न भगवति यतः भगवान् गोपीनां तत्पतीनाञ्च आत्मा बान्धवाः सर्वे लौकिकाश्च न मन्यन्त इति चेत्तत्राह । सर्वेषामपि देहिनामसर्वे लौकिकाश्च न मन्यन्त इति चेत्तत्राह । सर्वेषामपि देहिनामयमात्मेति यो भगवानन्तश्चरति आसन्यो जीवो वा सर्वत्रादिसिद्धान्तसंग्रहाय सामान्यवचनं योऽन्तश्चरतीति स एवायं भगवानध्यक्षः प्रत्यक्षः क्रीडनेन कृत्वा नटवत् पुरुषदेहं भजते वस्तुतस्तु नायं पुमान् नच स्त्री नाप्यन्यः कश्चित् न स्त्री न षण्डो न पुमानितिश्रुतेः अतः केनापि विचारेण नास्या दोषसम्भवः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्तद्दृष्ट्यातु सर्वान्तर्यामिणो भगवतो न केऽपि परे इत्याह । गोपीनामिति । योऽन्तश्चरति तस्य बहिरालिङ्गने को दोष इति भावः । अध्यक्षो बुद्ध्यादि द्रष्टा तस्य रहस्य बहिर्गात्रदर्शने को दोष इति भावः । इह व्रजमण्डले क्रीडनेन हेतुना देहान् गोपीशरीराणि भजते रतिश्रमप्रस्वेदाम्बुमार्जनादिना सेवते ॥ ३६ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका

तदेवं समाहितेऽपि प्रश्नाभासे परदाराभिमर्शनेच तदवस्थतया प्रतिभासमानेऽपरितुष्यन् प्रकारान्तरेण समादधाति । गोपीनामिति । तैर्व्याख्यातं तत्र बुद्ध्यादिसाक्षी परमात्मेत्यर्थः । अतो न तस्य परो नाम कश्चिदिति केवा परदारा इति भावः । ननु सतु निराकारः श्रूयते इति चेत्सत्यम् अन्तर्यामिलीलायामाकारापेक्षाभावादेव निराकारत्वमुच्यते नत्वाकाराभावादिति—

> केचित्स्वदेहान्तर्हृदयावकाशे।
> प्रादेशमात्रं पुरुषं वसन्तमिति

श्रीद्वितीयादौ वसन्तमित्यनेन तदाकारस्य नित्यत्वावगमात् अन्यथा वसन्तमित्यत्र प्रकल्प्येत्युच्येत केचिदिति लौकिकत्वं तत्र तत्राचिन्त्यशक्तिरेव गतिः अथवा क्रीडनेनेत्येतदेवोत्तरं श्रीभगवतः साकारत्वे निराकारत्वेच क्रीडने हेतुः स एवेति सामानाधिकरण्येनाभेदं निर्दिश्य देहभागिति तथात्वस्योत्कर्षो व्यञ्जितः परमार्थस्तु गोपीनां गोपजातिस्त्रीणां तत्पतीनां गोपजातिपुरुषाणां तथा सर्वेषां गोमृगादिदेहिनां परिकराणां देहभाक् सन् देहशब्दः स्वरूपवचनः योऽन्तः अप्रकटलीलायां चरति जयति जननिवास इतिन्यायेन नित्यं क्रीडते स इह तत्तद्रूप एवाध्यक्षः प्रकटलीलायां प्रत्यक्षः योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु तिष्ठति गोपान्पालयति स वो हि स्वामी भवतीति श्रीगोपालतापिनीश्रुतेः नच साधकशरीरेषु व्यभिचारः मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमेति सैरन्ध्रीन्यायेन स्पर्शमणिवत्तेषामपि योग्यतासम्पादनावगमात् जहुर्गुणमयं देहमिति तु तत्तद्भावत्यागेन किंचिदुर्वरितदुष्पचोलिमकषायशेषेण वा समाहितं प्राक् तासां परकीयात्वञ्च भगवत्प्रिया अधोक्षजप्रियाः कृष्णवध्व इत्यादिभिर्विशेषणैरेव परास्तं तदन्यासाञ्च नित्यत्वं दशाक्षरमन्त्रव्याख्यायां श्रीदेवर्षिचरणैरुक्तं गौतमीयतन्त्रे—

> गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः ।
> अनयोराश्रयत्वेन कारणत्वेन चेश्वरः ॥
> सान्द्रानन्दं परं ज्योतिर्वल्लभत्वेन कथ्यते ।
> अनेकजन्मसिद्धानां गोपीनां पतिरेव वा ॥
> नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धन इति ।

अत्र मायास्वरूपशक्त्योर्वैभवभेदेन व्याख्याद्वयम् अनेकेति—

> बहूनि मे व्यतीतानि जन्मानि तव चार्जुनेत्यादि ।

कल्पपरंपराप्रासश्रुतिपुराणतन्त्रादिप्रसिद्धावतारित्वमेव व्यनक्ति नच तत्पतीनामिति नित्यसिद्धपरदारत्वमपीति भ्रमः कार्य्यः मोहितास्तस्य माययेत्यादिवक्ष्यमाणात्सवो हि स्वामी भवतीति निजस्वरूपतया कलाभिरिति स्मृतिश्रुत्यादिवाक्यानुरोधेन प्रकटलीला-

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

यामेव तत्प्रतीतिरिति निर्णयात् तत एव च गोपजातिपुरुषाणामिति व्याख्यातं ननु पतिं मन्यानामिति अन्यथा परमशुद्धायां लीलायामनौचित्यदोषो दुर्वार इत्यवधेयम् "अनौचित्यादृतेनान्यद्रसभङ्गस्य कारण"मित्यभियुक्तोक्तेः नवा प्राकृतत्वेनानौचित्यपरिहार इति वाच्यं प्रत्युत तदाधिक्यप्रसङ्गादिति दिक् । विवृतमिदं भक्तिमञ्जूषायाम् ॥ ३६ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

नन्वेवमिच्छयात्तसच्चिदानन्दवपुष्ट्वे सच्चित्सुखवपुषो विभुत्वमेव स्यात्तर्हि विभुत्वे रासनृत्यादि क्रियानुपपत्तिरितीमामाशङ्कामपनुदन्नेव पूर्वं धर्मव्यतिक्रमं स्वीकृत्य समाधानं कृतमधुनातु तस्य विभुत्वेनैव तासां परदारत्वाभावान्न व्यतिक्रमगन्धोऽपीत्याह । गोपीनामिति । तासामेव गोपीनां तत्पतीनामिति लोकदृष्टिविभ्रमेण पूर्ववर्णितश्रुतीनां तत्तद्देवपरत्वभानन्यायेन तत्तत्पतिमन्यतयापातदृष्ट्या भासमानानां तथा सर्वेषामपि देहिनां देहादिसंघाताध्यासेन पृथक् जीवतया प्रतीयमानानां योऽन्तश्चरति तत्तदुपाधीनामधिष्ठानतया तेषाञ्च स्वरूपभूतात्मतया प्रत्यक्तया वर्त्तमानः "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायये"त्यत्रैतच्छब्दानिर्दिष्टं सर्वापरोक्षं कृष्णविग्रहं सर्वदेहिनामात्मात्वेन निर्दिश्य तस्य देही वेति भौतिककल्पितदेहपृथक्भूततदध्यासापन्नजीववद्भानन्तु मायये ति निर्णीतं मायया तथा प्रतीतौ प्रयोजनञ्च जगद्धितायेत्यनेन दर्शितमत्र चोत्तरपद्ये वक्ष्यति अनुग्रहाय भूतानामिति गीतायाञ्चोक्तम् "अहमात्मा गुडाकेश सर्वभूताशयस्थित" इति तथा च सोऽध्यक्षः सर्वाधिष्ठानप्रत्यक्चिद्रूपः इह क्रीडने व्यापकानामपि वर्णानामभिव्यञ्जकध्वन्यनुसारेण परिच्छिन्नतया तत्तद्वाक्यपदादिक्रमेण भातीति तदभिव्यञ्जकस्वेच्छानुसारेण परिच्छिन्नतया तत्तद्रासकेल्यादिक्रमापन्नत्वेन प्रतीतावपि देहभाक् न भवति किन्तु वर्णितरीत्या देहीवाभाति नच कृष्णविग्रहस्यैवात्मत्वेन सर्वान्तश्चरत्वे कथं न सर्वेषां तदन्तरपरोक्ष इति वाच्यम् अज्ञानावृतशुक्तेः समानांशेदन्त्वेन भानेऽपि विशेषशुक्तित्वाकारेणाप्रतीतिवत् समानसच्चिदात्मना भानेप्यानन्दविग्रहत्वेन प्रतीतिसंभवात् नचात्मनो बहुश्रुतिषु निराकारत्वप्रसिद्ध्या कृष्णविग्रहाकारत्वासिद्धिरितिवाच्यं निराकारशब्दस्य सर्वत्र मायिकभौतिकाकारनिरासपरत्वात् "सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बर"मित्यादिकावेदुपनिषदि श्रुताकारस्यानन्तानन्दवद्गुणोपसंहारन्यायेन सर्वत्रोपसंहरणीयत्वाच्च तथाच गोपीनामागन्तुककिञ्चित्कालिकलोकभ्रमकल्पितपत्यादिसंबन्धापेक्षया नित्यान्तश्चरात्मत्वसंबन्धस्य ज्यायस्त्वात्कृष्णस्यैव मुख्यपतित्वान्न तासां परदारत्वं लोकभ्रमसिद्धतत्पतीनामप्यात्मत्वाच्च किञ्च नहि देहस्य पतित्वं पञ्चत्वे देहं दग्ध्वा पतिपिण्डदानाद्दर्शनादात्मनः पतित्वेतु कृष्णस्य सर्वमुख्यपतित्वमत एव प्रायः पूर्वं निर्दिष्टमधोक्षज प्रिया इति कृष्णवध्व इति तापिन्याञ्च ताः प्रत्येव कुवासस्रो वाक्यं स वः स्वामी भवतीति श्रीमदष्टादशाक्षरपटले ब्रह्मसंहितायां तदुक्तिः "आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि" इत्यत्र कलात्वोक्तस्वीयत्वे निश्चितेऽपि लोकप्रसिद्धपरकीयत्वभ्रमपरिहारायैव निजरूपतानिर्देशः तत्रैवोपक्रमोपसंहारयोस्तासां लक्ष्मीत्वं तस्य परमपुरुषत्वञ्च दर्शितं लक्ष्मीसहस्रशतसंभ्रमसेव्यमानमित्युपक्रमः श्रियः कान्ताः कान्तः परमपुरुष इत्युपसंहारः तथा साक्षाद्गोपीनाम संबद्धाष्टादशाक्षरादिमन्त्राः स्पष्टा भान्ति तथान्यत्रापि मन्त्रव्याख्याने एव "अनेकजन्मसिद्धानां गोपीनां पतिरेव वा । नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धन" इति तस्मात्तासां परदारत्वमेव नास्तीति भावः ॥ ३६ ॥

श्रीव्रजपतिसूरिकृतभागवतगूढार्थदीपिका ।

एवं गोपीनां परदारत्वं तदभिमर्शनजन्यदोषं चाङ्गीकृत्य समाहितं वस्तुतस्तु नास्ति तासां परदारत्वमतो नास्तितत्सेवाकृतदोषगन्धोऽपीत्याह । गोपीनामिति । यः गोपीनां तत्पतीनाञ्च किञ्च सर्वेषामेव देहिनामन्तर्जीवरूपेणान्तर्यामिरूपेण चरति स एवाध्यक्षस्तद्देहादिनियन्ता क्रीडनेन क्रीडार्थं देहभाक् गृहीतलीलाविग्रहः नत्वस्मदादिवत्कर्मभोगाद्यर्थं देहभाक् अतो नास्ति तत्र दोषगन्धस्य शङ्कापीति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं परमेश्वरः कुशलाकुशलकर्मतत्फलविषयो न भवति सर्वसत्त्वेशितृत्वेन सर्वस्वामित्वादित्युक्तमथ सर्वेशितृत्वमेव प्रपञ्चयति । गोपीनामिति । गोपीनां तत्पतीनां किम्बहुना सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां देहिनां च उपादानकारणतया प्रेरकतया च अन्तश्चरति अतएवाध्यक्षस्तत्तद्बुद्ध्यादिसाक्षी तत्तद्देहभोक्तृमुख्यः स्वामी स एव इह लीलायां क्रीडनेनापि अध्यक्षः देहभाक् च अतस्त्वया प्रतीपमाचरद्ब्रह्मन् ! परदाराभिमर्शनं कृतवान्वैजुगुप्सितमिति शङ्का न कार्या तस्य सर्वपतित्वात् जुगुप्सितकर्तृत्वाभावादिति भावः ॥ ३६ ॥

भाषा टीका ।

जो परमेश्वर श्रीकृष्णचन्द्र गोपिन के तथा उनके पतिन के और प्राणिमात्र के भीतर में अन्तर्यामी होकर सूक्ष्म रूप से विचरते हैं और सबके स्वामी हैं वे क्रीडा करते हैं तो वे देह धारी मनुष्य सरी के नहीं हैं किन्तु व्यापक हैं ॥ ३६ ॥

अनुग्रहाय भूतानां मानुषं देहमास्थितः[1] ।
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवञ्चेदाप्तकामस्य निन्दिते कुतः प्रवृत्तिरित्यत आह । अनुग्रहायेति । शृङ्गाररसाकृष्टचेतसो ऽति बहिर्मुखानपि स्वपरान् कर्तुमिति भावः ॥ ३७ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

एतदेव प्रपञ्चयति । अनुग्रहायेति । यद्वा अध्यक्षः प्रत्यक्षः सन् क्रीडनाय तत्क्रीडार्थं देहः अवतारो येषां गोपीजनानां व्रजजनानां वा तान् भजति रमयतीति तथा सः अतस्तेषामन्तर्बहिश्चरतः क्रीडासाधनत्वान्न तस्य क्रीडया कस्यापि कोऽपि दोषः प्रसज्जेदिति भावः । भक्तानामनुग्रहाय "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इत्यादिश्रीभगवद्वचनात् मानुषं नराकारमाश्रितः प्रकटितवान् यद्वा प्रकटयामासेति वाक्यसमाप्तिः इति भक्तानुग्रहार्थं तत्क्रीडेत्यभिप्रेतं तत्र भक्तशब्देन व्रजदेव्यो व्रजजनाश्च सर्वे तथा कालत्रयसम्बन्धिनो ऽन्ये च वैष्णवाः यद्वा भक्तानां मुख्याः श्रीव्रजदेव्य एवोक्ताः तथापि मुख्यानामनुग्रहेणान्येषामपि सर्वेषामनुग्रहः सिद्ध्येदेव अत एव क्रीडा भजते प्रीत्या सम्पादयतीत्यर्थः । श्लेषेण भजते अनुसरति प्रकाशयति क्रीडानां नित्यसिद्धत्वं सूचितं तेन च सर्वदोषः स्वत एव निरस्तः तादृशीः अनिर्वचनीयाः सर्वचित्ताकर्षणीरित्यर्थः । श्लेषेण राससदृशक्रीडाश्रवणेनापि तत्परो भवेत् किमुत रासक्रीडामित्यर्थः । तच्छब्देन भगवान् भक्ताः क्रीडा वा सर्वोऽपि जनो भवेत् यद्वा मानुषं देहमाश्रितः सर्वोऽपि जीवस्तत्परो भवेत् मर्त्यलोके श्रीभगवदवतारात्तथा भक्तियोग्यसाधनेन भजने मुख्यत्वाच्च मनुष्याणामेव सुखं तच्छ्रवणादिसिद्धेः भूतानामिति पाठे सर्वेषामेव जनानां विषयिणां मुमुक्षूणां भक्तानां चेत्यर्थः । इति परमकारुण्यमुक्तम् एवं स कथं धर्मसेतूनामित्यनेन धर्मविरुद्धं कथं कृतवानित्येकस्य प्रश्नस्य परिहारः धर्मव्यतिक्रम इत्यादिभिः तथा आप्तकाम इत्यनेन परिपूर्णस्य का तत्र स्पृहेति द्वितीयस्य अनुग्रहायेत्यनेनेति विवेचनीयम् ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

नन्वाप्तकामस्य कुतः क्रीडायां प्रवृत्तिः कुतस्तरां वा बहिर्दृष्ट्या लोकावगीते तस्मिन्नित्यत आह । अन्विति । भक्तानामनुग्रहाय "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पद्मपुराणीयश्रीभगवद्वचनात् मानुषं नराकारमाश्रितः ब्रह्मरूपेण सर्वाश्रयोऽपि स्वयमाश्रयं कृतवानिति तस्य परब्रह्म स्वरूपस्य परमाश्रयत्वं च दर्शितम् । एतदुक्तम् । "दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रह"मिति । तथाच श्रीभगवदुपनिषद् ब्रह्मणो हि प्रतिष्ठाहमिति । आस्थितः इति पाठेऽप्याद्रविषयः कृत इति स एवार्थः । स्वेच्छया मानुषं देहमधुनैव विरचय्याश्रित इति व्याख्यातुं न घटते परत्र तत्र लोके ऽधिष्ठातृत्वेन कृष्णाख्यनराकारपरब्रह्मणः श्रीगोपैरनुभूतत्वात् एवं भक्तानुग्रहार्थं तत्क्रीडेत्यभिप्रेतम् । आप्तकामत्वेऽपि भक्तानुग्रहो युज्यते । विशुद्धसत्त्वस्य तथा स्वभावात् । यद्भावभाविते चान्यत्र दृश्यतेऽसौ । तथा रहूगणानुग्राहके श्रीजडभरतचरिते यथा वा भवदनुग्राहके मयीति । तत्र भक्तशब्देन व्रजदेव्यो व्रजजनाश्च सर्वे कालत्रयसम्बन्धिनोऽन्ये च वैष्णवा गृहीताः व्रजदेवीनां पूर्वरागादिभिः व्रजजनानां जन्मादिभिरन्येषाञ्च तत्तद्दर्शनश्रवणादिभिरपूर्वत्वस्फुरणात् । अत एव तादृशभक्तप्रसङ्गेन तादृशीः सर्वचित्ताकर्षिणीः क्रीडा भजते याः साधारणीरपि श्रुत्वा भक्तेभ्योऽन्योऽपि जनस्तत्परो भवेत् । किमुत रासलीलारूपामिमां श्रुत्वेत्यर्थः । वक्ष्यते च । विक्रीडितं व्रजवधूभिरिदञ्च विष्णोरित्यादि । यद्वा मानुषं देहमाश्रितः सर्वोऽपि जीवस्तत्परो भवेत् । मर्त्यलोके श्रीभगवदवतारात्तथा भजने मुख्यत्वाच्च । मनुष्याणामेव सुखेन तच्छ्रवणादिसिद्धेः । भूतानामिति पाठे निजावतारकारणभक्तसम्बन्धेन सर्वेषामेव जनानां विषयिणां मुमुक्षूणां मुक्तानाञ्चेत्यर्थः । इति परमकारुण्यमेव कारणमुक्तम् । तथापि भजनसम्बन्धेनैव सर्वानुग्रहो ज्ञेयः । अन्यैस्तु । तत्र बहिर्मुखानपीति तत्पर्यन्तत्वं विवक्षितम् । परमप्रेमपराकाष्ठामयतया श्रीशुकस्यापि तद्वर्णनातिशयप्रवृत्तेः । गोपीनामित्यस्यार्थान्तरे त्वेवं व्याख्येयम् । नन्वेवमपि नित्यवधूगुप्तमेव तथा क्रीडतु किं प्रापञ्चिकेभ्यस्तत्प्रकटनेन तत्राह । भक्तानां प्रपञ्चगतानामनुग्रहाय मानुषं देहं मर्त्यलोकरूपं विराड्देहांशमाश्रितः तत्र प्रकटोऽभूदित्यर्थः । "यस्य पृथिवी शरीर"मित्यादि श्रुतौ । तत्रापि तच्छरीरशब्दप्रयोगात् । मानुषशब्देन तल्लोकलक्षितत्वाच्च । अन्यत् समानम् अथवा तत्परो भवेदित्यत्र भक्तानां भूतानां बहुत्वान्न ते कर्तृत्वेन विपरिणामादनुवर्त्तेरन् । व्याख्यानतरे साध्याहारादि कष्टतापत्तेन । भगवानिति तु तत्र तत्र व्याख्यानेऽपि प्रकरणादेव लभ्यते । तस्मात्तादृशीः क्रीडा असौ भजते याः श्रुत्वापि स्वयमपि तत्परो भवेत् यदा यदा शृणोति तदा तदासक्तो भवतीत्येवार्थः ॥ ३७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥

स्वतो निरतिशयानन्दस्य भाग्यचेष्टान्वयं परिहरति । अनुग्रहायेति ॥ ३७ ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अवाप्तसमस्तकामस्य किं क्रीडाजन्यसुखलेशेनेति शङ्कां निराह । अनुग्रहायेति । भूतानामनुग्रहायास्मदादिभूताननुग्रहीतुं मानुषं मनुष्यस्येव संनिवेशविशिष्टं देहमास्थितः तादृशीरुक्तविधाः क्रीडा

[1] अयं पाठोऽत्र वीरराघवीये च व्याख्यासु चाश्रित इत्येव पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भजते ऽनुकरोति क्रीडात्ववान्तरप्रयोजनं भूतानुग्रहस्तु श्रीभगवदवतारस्य परमं प्रयोजनमिति भावः । अवतारस्य क्रीडार्थत्वं क्रीडायास्त्वनुग्रहार्थत्वञ्चोक्तं कथं क्रीडाया अनुग्रहार्थत्वमित्यत्राह । याः क्रीडाः श्रुत्वा तत्परः श्रीभगवत्परो भवेत् जन इति कर्तृपदाध्याहारः मत्क्रीडाः शृण्वतो लोकस्य निरतिशयपुरुषार्थभूते मयि इष्टानिष्टप्रापणपरिहारदक्षे नितरामासक्तिर्यथा स्यादित्येवमनुग्रहाय क्रीडाः भजते नतु स्वयमपरिपूर्णो भजत इति भावः ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

स्वेच्छाविग्रहस्वीकारे निःस्पृहस्य किम्प्रयोजनमित्यत आह । अनुग्रहायेति । तादृशीं मानुषदेहक्रीडां चरितं श्रुत्वा तत्परः भगवानेव परो यस्य स तथा तस्मिन् तात्पर्ययुक्तो वा यद्वा स पुरुष इव जन्ममृत्युशून्यो भवेत् ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

तत्र च सति परैर्व्यूढत्वमासामसमञ्जसं बहूनां तेषां तस्मिन्नसूयायदि तदिति यन्मित्रं परमानन्दमित्यादिव्याहन्येत ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

ननु तर्हि रहस्यभूतामीदृशीं क्रीडां कथं भुवि प्रकटितवान् इत्यत आह । अनुग्रहायेत्यादि । भक्तानामनुग्रहाय तादृशीः क्रीडा भजते याः श्रुत्वा मानुषं देहमाश्रितो यः कश्चिदेव तत्परः श्रीकृष्णपरो भवेत् भक्तास्तावद्विविधा रसस्य वैविध्यात् तेन नानारसा एव लीलाः करोति तेषां स्वस्ववासनोपासनाभेदादिति भक्तानुग्रहार्थमेव लीलाः तास श्रवणात् कश्चिदेव मानुषदेहभाक् मुच्यत इत्यर्थः ॥३७॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु तथापि एवङ्करणे कोऽभिप्राय इति चेत्तत्राह । अनुग्रहायेति । भक्तानामनुग्रहार्थमेव भक्तसमानरूपं देहमास्थितः विजातीये तेषां विश्वासो न भवेदिति ततो यथा मनुष्यानुग्रहाय मानुषो देहः प्रदर्शितः एवं गोपिकानामप्यनुग्रहाय स्वानन्दं गोकुले दातुं तादृशीः क्रीडाः भजते तत्तद्धर्मप्रवेशव्यतिरेकेण तस्य तस्य दोषस्यानिवृत्तत्वात् यद्वा भक्तानां मानुषं देहं प्रति आस्था सञ्जाताऽस्मिन्निति स तथा तत्रापि महान् पूर्णकामः सर्वं दातुं शक्तः नत्वेवं निषिद्धप्रकारेणात्मानं दातुमिति अत एतां लीलां निरोधपूर्वकाद्येयध्यानरूपां यः श्रोष्यति स सर्वथा भगवत्परो भविष्यतीति भगवता तथाचरणं कृतं तदाह यः श्रुत्वा तत्परो भवेदिति ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जुगुप्सितं किमभिप्रायं कृतवानिति द्वितीयप्रश्नस्योत्तरमाह । अन्विति । भक्तानामनुग्रहाय तादृशीः क्रीडाः भजते याः श्रुत्वा मानुषं देहमाश्रितो जीवः तत्परस्तद्विषयकः श्रद्धावान् भवेदिति क्रीडान्तरतो वैलक्षण्येन मधुररसमय्या अस्याः क्रीडायास्तादृशीः मणिमन्त्रमहौषधानामिव काचिदतर्क्या शक्तिरस्तीत्यवगम्यते । तथैव मानुषदेहवत एव तद्भक्तावधिकारित्वं मुख्यमित्यभिप्रेतम् ॥ ३७ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

नन्वाप्तस्य कुतः क्रीडने प्रवृत्तिः कुतस्तरां लोकदृष्ट्या विगीते तस्मिन्नित्यत आह । अन्विति । भक्तानामिति—

> मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः ।
> इति पाद्मोक्तेः ॥

मानुषं नराकारमाश्रितः ब्रह्मस्वरूपेण सर्वाश्रयोऽपि स्वयमाश्रयं कृतवानिति नराकारस्य परब्रह्मत्वं च दर्शितं तदुक्तं हयशीर्षपञ्चरात्रे—

> आनन्दो द्विविधः प्रोक्तो मूर्तश्चामूर्त एव च ।
> अमूर्तस्याश्रयो मूर्तो भगवान् पुरुषोत्तमः ॥
> ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य चेति श्रीगीतासु च ।

आस्थित इति पाठेऽप्यादरविषयः कृत इत्यर्थः । एवञ्च भक्तानुग्रहार्थं तथा क्रीडते इति स्थितिः नह्येषा कामक्रीडा नचैते परदाराः किन्तु परमात्मस्वरूपिण्याः श्रीराधायाः प्रतिविम्बरूपाः प्रेमाविशेषक्रीडापरिकराः नित्यसिद्धाः साधनसिद्धभक्तजनानुग्रहाय प्रकटीभूय निजभावभावितस्वान्तान् विधाय परिकरेषु प्रवेशयन्तीति कामविजय एव प्रकरणार्थ इति प्रेक्षावतां व्याख्या । आप्तकामत्वेऽपि भक्तानुग्रहो युज्यते विशुद्धसत्त्वस्य तथा स्वभावात् यद्भावितेचान्यत्रापि दृश्यतेऽसौ यथा रहूगणानुग्राहके जडभरते यथाच भवदनुग्राहके मयीति अत एव तादृशीः सर्वभक्तजनचित्ताकर्षणीः क्रीडा भजते याः श्रुत्वान्योऽपि जनस्तत्परो भवेत् नहि कामक्रीडाश्रवणेन लोकवेदविरुद्धपरदारविनोदश्रवणेनच कश्चित्तत्परो भवति नच भक्तेभ्योऽपि सा रुचितोचिता च प्रत्युत प्रेमविघातकत्वेन तद्विरुद्धैवेति यद्वा मानुषं देहमाश्रितः सर्वोऽपि जनस्तत्परो भवेदिति संबन्धः ॥ ३७ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

तथापि सच्चिदानन्दघनस्य स्वानन्दपूर्णस्य मायया देहीव भानेविभोरपि स्वेच्छया क्रीडाप्रकाशे वा किंप्रयोजनमिति राज्ञः किमभिप्रायमेतन्नः संशयं छिन्धीति प्रश्नस्योत्तरमाह । अनुग्रहायेति । भूतानामनुग्रहाय प्रेमोद्दीपकशृङ्गारवात्सल्यादिरसोद्बोधाय सजातीयप्रतीतावेव वात्सल्यशृङ्गारादिरसे निःशङ्कता भवतीत्यभिप्रेत्य मानुषं देहमास्थित इव निर्धारकवाक्ये देहीवाभातीतीवशब्दनिर्देशात् याः क्रीडा श्रुत्वैव श्रवणमात्रेणैव सर्वोऽपि जनो विषयिमुमुक्षुमुक्तानाङ्कि मु वाच्यं विरुद्ध नास्तिकम्लेच्छादिरपि तत्परो भवेत् कृष्णलीलागाने

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ३८ ॥

श्रीपयनारायणकृतभावभावविभाविका ।

आधुनिकानां म्लेच्छादीनामपि तदर्थहृतचित्तत्वेनैव प्रवृत्तिदर्शनात्—

निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात्पुमान् विरज्येत विना पशुघ्नादित्यादि

वचनाच्च तादृशीः क्रीडा भजते नित्यसिद्धा एव प्रकटयति ॥ ३७ ॥

श्रीधनपतिसूरिकृतगूढार्थदीपिका ।

नन्वस्त्वेवं तथापि लोकदृष्ट्या निन्दितस्य कर्मणोऽनुष्ठाने भगवतः कोऽभिप्राय इतिचेत्तत्राह । अनुग्रहा-येति । भूतानां संसारिणामनुग्रहाय मानुषं देहमाश्रितः अतस्तादृशीः क्रीडा भजते याः श्रुत्वा तत्परः स्वक्रीडानुसन्धानपरो भवेत् तथाच शृङ्गाररसाकृष्टचेतसोऽत्यन्तबहिर्मुखा अपि मत्परा भूत्वा उद्धृताः स्युरित्यभिप्रायेण तदाचरणमिति भावः ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नन्वेवं मास्तु जुगुप्सितकारित्वं तस्याप्तकामस्य जुगुप्सितेऽपि कर्मणि कुतः प्रवृत्तिरित्यत आह । अनुग्रहायेति । सः भूतानां तदानीन्तनानां गोप्यादीनां लीलायां केनापि प्रकारेणान्वितानां खेचरभूचराणामनुग्रहाय स्वप्रादुर्भावप्रयोजनसिद्धये तादृशीः क्रीडा भजते न केवलं तदानीन्तनानामेवानुग्रहाय किन्तु मानुषं देहमाश्रितः यः कश्चिदपि मनुष्यदेहगतो जीवः श्रुत्वा तत्परो भवेत् भगवदीयो भवेदित्यन्वयः ॥ ३७ ॥

भाषा टीका ।

प्राणिमात्र के ऊपर अनुग्रह करने के वास्ते उनने मनुष्याकार देह को इच्छा से धारण किया है फिर ऐसी क्रीडान को करते हैं कि जिनको सुनकर मनुष्य प्रीति करके उनकी भक्ति में तत्पर होजावें ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वन्येऽपि भिन्नाचाराः स्वचेष्टितमेवमेवेति वदन्ति तत्राह । नासूयन्निति । एवं भूतैश्वर्याभावे तथा कुर्वन्तः पापा ज्ञेया इति भावः ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृतबृहत्तोषिणी ।

तासु तन्निवारणमतिक्रम्य गतास्वपि कृष्णं प्रत्यसूयां न चक्रुः कुतः तस्य मायया शक्तिविशेषेण मोहिताः प्रत्युत साध्वेवामन्यन्तेत्यर्थः । यतो व्रजौकसः तल्लीलापरिकरा इत्यर्थः । अत एव गतानपि तान् स्वस्वपार्श्वस्थानेव मन्यमाना बभूवुः यद्वा दारान् प्रति च नासूयन् कुतः स्वपार्श्वस्थानेव मन्यमानाः तत्र तत्र पूर्वं ता वार्यमाणा इत्यनेन निजवाक्यमतिक्रम्य साक्षाद्गतानामपि तासां तैः स्वस्वपार्श्वस्थत्वमननं पुनर्निवृत्त्यागमनस्य मननादिति ज्ञेयं यद्वा भक्तानामनुग्रहायेत्युक्तं तत्र गोपानां दाराकर्षणेन तस्मै तेषामसूयासम्भवात् तेषु कथमनुग्रहः सिध्येदित्याशङ्क्य तत्रोत्तरं वदन् प्रकृतञ्चानुसरति । नेति । अर्थः स एव ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

ननु भवतु परमात्मत्वेन वा नित्यमेव ताभिः प्रेयसीभिः सह विहारित्वेन वा तासु तत्परदारत्वस्य प्रत्याख्यानं तत्र प्रथमः पक्षस्त्वव्याहाराद्यादिना कथञ्चित् स्थापित एव । अथ नित्यप्रेयसीत्वेनोत्तरपक्षश्चेत्तर्हि हन्त कथं तासां परदारत्वं श्रूयते । येन तासामन्यत्र विवाहोऽपि संप्रति लभ्यते । ततश्च तं प्रति जन्मान्तरे विवाहप्राप्तत्वेन तासां तत्तत्पत्नीत्वमेव स्यात् । ततश्च तत्परता कारणाय भक्तानामनुग्रहाय तादृशीः क्रीडा भजते इति चेत्तर्हि तेषां दाराकर्षणेन तं प्रत्यसूयासम्भवात्तेषु व्रजवासित्वात् परमभक्तेषु कथम्वानुग्रहः सिध्येत् कथम्वा तासु तन्नित्यप्रेयसीषु तादृशदुरवस्थायास्तेषु परमभक्तेषु च तादृशतद्वर्णनस्य श्रवणेन परेषामपि भक्तानां तत्परता स्यात् । तत्र पाठक्रमादन्वयक्रमो बलीयानिति तत्क्रमेण सिद्धान्तयति । नासूयन् खलु कृष्णाय इति । खलु निश्चये यस्मात् व्रजौकसः तस्मात् कदाचिदपि कृष्णाय नासूयन्नित्यर्थः । यद्वामार्थ सुहृत्प्रियात्मतनयेति तं प्रति ब्रह्मवचनात् । कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा इति राजानं प्रति श्रीशुकवचनाच्च । ननु तथाप्यनुग्राह्याणां जानतामजानताञ्च स्वयं तथानिष्टकरणमसमञ्जसम् । तत्रोच्यते । यदि तेषां विवाहितोऽपि ता दाराः स्युस्तर्हि तथा त्वमेव । यदि तेषां भ्रममात्रेण व्यूढतया प्रतीताः वस्तुविचारेण तु तस्यैव दारास्तेन तदाकर्षणं तासां श्रुतमिति श्रुतार्थान्यथानुपपत्त्या "दशा पवित्रेण गृहं संमार्ष्टी"त्यादिवदाकृष्यान्वयः क्रियते । तत्र चायमर्थः । तस्य मायया प्रेमवैचित्रीरचनाय विचित्रलीलासमुल्लासिकया योगमायया मोहिताः सन्तस्ते तस्य दारान् स्वान् मन्यमानाः स्वस्वपार्श्वस्थांश्च मन्यमाना इति । तदेवं तस्येत्यस्य द्विधान्वयभेदो दर्शितः । तत्र पूर्वस्यान्वयविभेदस्यायमभिप्रायः योगमायाकल्पितानामन्यासामेव तैर्विवहनं संप्रवृत्तं ननु भगवन्नित्यप्रेयसीनामिति तथा

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

तासां तदानीं मायया गोपितानां मोहितानाञ्च न तद्वृत्तं ज्ञातमासीदन्यतः श्रुतमपि तदनभीष्टमेवासीदिति तासु तेषां दारत्वस्य मननमात्रं ननु वास्तवत्वम् । तथा तेषु तासां पतित्वञ्च मनसा त्यक्तमेव इत्येवं तासां तैर्विवाहसम्बन्धो न जात इति यतो नासूयन्नित्यनेन गुणेऽपि दोषारोपं नाकुर्वन्नित्येव मयोक्तं ननु नैर्ष्यमिति अथोत्तरस्यान्वयविभेदस्यायमभिप्रायः । रासाद्यर्थं तेन तासां कर्षेण योगमायाकल्पितानां संज्ञाकल्पितच्छायावत्तत्तत्प्रतिरूपाणामन्यासामनुभावेन तानेव ते स्वपार्श्वस्थान् मेनिरे ततोऽपि न दोषप्रसङ्ग इति । ननु श्रीभगवत्प्रेयसीनां तासां कदाचिदपि यदि वलात्तच्छायानिवेशः स्यात्तर्हि महानेव दोष इत्याशङ्क्य द्वितीयेनैवान्वयविभागार्थेन सिद्धान्तं कृतवान् स्वपार्श्वस्थांश्च मन्यमाना इति विवाहवदेव तत्र मायया वञ्चितास्त इति भावः । एतदेवाह ताः प्रति स्वयमेव श्रीभगवान् । निरवद्य संयुजामिति । एतदेव च गर्गवाक्येन कैमुत्याल्लभ्यते "य एतस्मिन् महाभागे प्रीतिं कुर्वन्ति मानवाः । नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुरा" इति । तदेवमेव ब्रह्मणा । "श्रियः कान्ताः कान्तः परमपुरुष" इति प्रोच्यान्यथात्वं मायिकमेवेति दृढीकृतमिति । अत्रेदमपि विचार्यते । ता वार्यमाणा इत्यादौ यत्तासां पतिम्मन्यादिभिर्निवारणं श्रूयते तत् किमुत श्रीकृष्णाकर्षणमज्ञात्वा ज्ञात्वा वा । यद्यज्ञात्वा तर्हि तत्रासूया न घटत एवेति न पूर्वः पक्षः सङ्गच्छते ततश्च तन्निराकरणं व्यर्थमेव स्यात् । यदि च ज्ञात्वा तर्हि तासां स्वपार्श्वस्थता दर्शनान्निजनिवारणप्रतिपादनं मत्वा ताभ्यो नासूयेयुर्नाम तदाकर्षणकर्तृक श्रीकृष्णायासूयेरन्नेवेति पूर्वपक्षः सङ्गच्छेत । तासां तत्तत्पार्श्वस्थता तु सिद्धान्ताय न कल्पते । तस्मात्तदिदं वक्तव्यम् । तदा श्रीकृष्णेन तासामाकर्षणं बुद्धिपूर्वकमिति तैर्नावगतम् । तथाहि विद्याविशेषमयत्वात् खल्वसौ वंशीनादस्तासामेव कर्णौ प्रविष्टो न पुनरन्येषाम् । सर्वकर्णप्रवेशश्चेत्तर्हि शयनावसरप्राप्तं निजशयनगृहं हित्वा कथमसौ निशि विदूरनिर्जनवनं गत इति वितर्क्य मातरः पित्रादयः सर्व एव महत्या शङ्कया तत्र गच्छेयुः । तस्मादौत्पत्तिकादेव माधुर्यान्मुहुः सर्वमेव कर्षत्यसाविति अनुभूय तासामपि तद्दर्शनार्थं गमनमाशङ्क्यते किन्त्वसमयत्वात्तैर्निवारितम् । तथापि यद्यखण्डमपि रात्रिं तत्रामूः स्थिता इति ज्ञायेत तदा व्रजवासित्वात्तेषामसूयायास्तत्रासम्भवेऽपि तदाभासः स्यादेव यथा सोऽयमस्माकं जीवनादि मूलम् । सचायमखण्डानिशि परवधूनां निजनिकटस्थितिमनुमोदमान आसीदिति तस्य लोकधर्ममर्यादामङ्गलातिक्रममनुमाय विस्मितानां तेषां तन्मङ्गलचिन्तामय एवायम्भावः कोपमय इवेति तदाभासत्वमेव तत्र लभ्यते येन ते वधूभ्यः कन्याभ्यश्चासूयेयुः । तासां स्वपार्श्वस्थतया दर्शनात्तु सोऽपि नासीदिति कुतस्तरामसूयावकाश इति । एतदभिप्रेत्यैव युगान्तरगतांस्तत्प्रेयसीनां तासां गोत्रप्रवर्त्तकान् गोपान् प्रति श्रीविष्णुना सोऽयं वरोदत्तः । यथा पाद्मे सृष्टिखण्डे । "यदा नन्दप्रभृतयय: अवतारं धरातले । करिष्यन्ति तदा चाहं वसिष्ये तेषु मध्यतः । युष्माकं कन्यकाः सर्वा रमिष्यन्ते मया सह । तत्र दोषो न भविता न रोषो नच मत्सर" इति । किञ्च स्वरूपेणैव यस्य पर्याप्ति र्न भवति तत्रोपाधिस्वीकारानर्थक्यमिति व्रजौकस्त्वेनैव श्रीकृष्णं प्रति तेषामसूयानुत्पत्तिर्व्याख्याता । मायामोहितत्वं तत्र हेतु र्विरुद्ध एव । तन्मोहिता एव तं प्रत्यसूयां कुर्वन्ति ननु तदमोहिता इति । तस्मान्मोहिता इत्यादेरन्यभागेनैव सङ्गतिः । तत्र प्रयोजनञ्च श्रीकृष्णस्य यदसमञ्जसत्वं कैश्चित्तर्क्येत तया यत्तेषां श्रीकृष्णमङ्गलचिन्तामय भाव एवासूयत्वेन प्रतीयते तयोर्निरसनमेव । तत्र माययेति करणं चेत्तर्हि कर्त्रपेक्षया तस्येत्यत्र तेनेत्येव प्रयुज्येत । यदिच हेतुत्वं तर्हि मोहिता इति न प्रयुज्येत । ततः कर्तृरूपेव सेति लभ्यते। तस्यास्तद्रूपत्वेन निर्देशश्च । प्रियजनप्रेममयलीलाविष्टस्य तस्य प्रेरणं विना सार्वभौमस्य परमदक्षप्रतिनिधिरिव तामन्तरान्तरलब्धां तल्लीलां पूर्वपूर्वतादृशतल्लीलाक्रममनुक्रम्य समुत्कर्षविलसद्रसतां सा नयतीति विवक्षया । तदेवमेव च दर्शितम् । योगमायामुपाश्रित इति । तदेवं तस्यास्तदीयत्वे प्रकरणेन लब्धे सति तस्येति पदस्य पूर्वत्र नातिप्रयोजकत्वात् श्रुतार्थान्यथानुपपन्नत्वाच्च तस्य दारान् स्वान् स्वान् स्वपार्श्वस्थांश्च मन्यमाना इति परेणापि योजयित्वा सार्थकतां समर्थयद्भिस्तासु श्रीकृष्णस्यौपपत्यं तासामन्यशय्यानिवेशः श्रीकृष्णाय व्रजवासिनामसूयाभासस्तस्यामसमञ्जसत्वञ्च परिहृतमिति । तत्र तस्य मायया ये स्वे स्वे दारास्तान् स्वपार्श्वस्थान् मन्यमानाः भगवत्प्रेयस्यवस्थानानर्हसमये तदभेदेनानुभवन्तः यतो मोहिता स्तयैवेति च योजयन्ति । यतः पतिव्रतानामपि न परात्परिभवः सम्भवति । किमुत य एतस्मिन् महाभाग इति गर्गवचनानुसारेण श्रीभगवत्पराणां किमुत तत्प्रेयसीनामिति गम्यम्। अतः कूर्मपुराणे उत्तरविभागे द्वात्रिंशदध्यायस्यान्ते तद्विधमुपोद्बलकमस्ति । यथा । "पतिव्रता धर्मपरा रुद्राण्येव न संशयः नास्याः पराभवं कर्त्तुं शक्नोतीह जनः क्वचित्—

> यथा रामस्य सुभगा सीता त्रैलोक्यविश्रुता ।
> पत्नी दाशरथेर्देवी विजिग्ये राक्षसेश्वरम् ॥
> रामस्य भार्यां विमलां रावणो राक्षसेश्वरः ।
> सीतां विशालनयनां चकमे कालचोदितः ॥
> गृहीत्वा मायया वेशं चरन्तीं विजने वने ।
> समाहर्त्तुं मतिश्चक्रे तापसः किल मामिनीम् ॥
> विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिम् ।
> जगाम शरणं वह्निमावसथ्यं शुचिस्मिता ॥
> उपतस्थे महायोगं सर्वदोषविनाशनम् ।
> कृत्वाञ्जलिं रामपत्नी साक्षात् पतिमिवाच्युतम् ॥
> नमस्यामि महायोगं कृतान्तं गहनं परम ।
> दाहकं सर्वभूतानामीशानं कालरूपिणमित्यादि ।
> इति वह्निं पूज्य जप्त्वा रामपत्नी यशस्विनी ।
> ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा ॥
> अथावसथ्याद्भगवान् हव्यवाहो महेश्वरः ।
> आविरासीत् सुदीप्तात्मा तेजसैव दहन्निव ।
> सृष्ट्वा मायामयीं सीतां स रावणवधेप्सया ॥
> सीतामादाय धर्मिष्ठां पावकोऽन्तरधीयत ।
> तां दृष्ट्वा तादृशीं सीतां रावणो राक्षसेश्वरः ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

समादाय ययौ लङ्कां सागरान्तरसंस्थिताम् ।
कृत्वा च रावणवधं रामो लक्ष्मणसंयुतः ॥
समादायाभवत् सीतां शङ्काकुलितमानसः ।
सा प्रत्ययाय भूतानां सीता मायामयी पुनः ॥
विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् ।
दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः ॥
रामायादर्शयत् सीतां पावकोऽभूत् सुरप्रियः ।
प्रगृह्य भर्तुश्चरणौ कराभ्यां सा सुमध्यमा ॥
चकार प्रणतिं भूमौ रामाय जनकात्मजा ।
दृष्ट्वा हृष्टमना रामो विस्मयाकुललोचनः ॥
ननाम वह्निं शिरसा तोषयामास राघवः ।
उवाच वह्ने ! भगवन् किमेषा वरवर्णिनी ॥
दग्धा भगवता पूर्वं दृष्टा मत्पार्श्वमागता ।
तमाह देवो लोकानां दाहको हव्यवाहनः ॥
यथा वृत्तं दाशरथिं भूतानामेव सन्निधौ ।
भर्तृशुश्रूषणोपेता सुशीलेयं पतिव्रता ॥
भवानी पार्श्वमानीता माया रावणकामिता ।
या नीता राक्षसेशेन सीता भगवता हृता ॥
मया मायामयी सृष्टा रावणस्य वधाय सा ।
यदर्थं भवता दुष्टो रावणो राक्षसेश्वरः ॥
मयापसंहृता चैव हतो लोकविनाशनः ।
गृहाण विमलामेतां जानकीं वचनान्मम ॥
पश्यन्नारायणं देवं स्वात्मानं प्रभवाप्ययम् ।
इत्युक्त्वा भगवांश्चण्डो विश्वार्चिर्विश्वतोमुखः ॥
मानितो राघवेन्द्रेण भूतैश्चान्तरधीयतेति ।

तस्मात्सदावसत्प्याभिवत्सलीलायामुपाश्रिता योगमायापि तत्र साहाय्यं कुर्यादेवेति गम्यते । ततः प्रस्तुतमेवानुसन्धीयताम् ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवमप्युक्ताभिप्रायेण क्रीडाः भजन्तं तदभिप्रायानभिज्ञा गोपीनां पतयः किनाभ्यसूयन्नित्यत्राह । नेति । व्रजौकसः गोपीनां पतयः तस्य कृष्णस्य मायया मोहिताः स्वस्वदारान् स्वस्वपार्श्वस्थानेव मन्यमानाः कृष्णाय नासूयन् दोषबुद्ध्या न ददृशुः कृष्णायेत्यत्र क्रुधद्रुहे त्यादिना चतुर्थी ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वैरिणीवृत्तिमाश्रितानां गोपीनां ग्रहणं तद्भर्तृभिः कथञ्च कृतं कथञ्च कृष्णे दोषाविष्करणमकृतमत्राह । नेति । गुणेषु दोषाविष्करणमसूया "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप" इति चतुर्थी ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्राह । नासूयन्निति । तादृिनमुपलक्षणमेव किन्तु विवाहादि सर्वावस्थास्वपि तथा ज्ञेयं सिद्धान्तरसाव्याघातात् । मायानिर्मितान् स्वान् दारान् स्वपार्श्वस्थानेव मन्यमाना इति तत्राह यन्मित्रमिति यद्धामार्थे सुहृदित्यादि न्यायेनासूयाप्यत्र लोकरीतिरक्षणार्थं तदाभास एव च ज्ञेयः । नन्वाप्तकामस्य कुतः क्रीडने प्रवृत्तिः कुतस्तरां वा बहिर्दृष्ट्या लोकगीते तस्मिन् इत्यत आह । अन्विति भूतानामिति पाठेऽपि भक्तानामेव सम्बन्धेनैवान्येषामनुग्रहो ज्ञेयः । अथवा नन्वेवमपि नित्यवत् गुप्तमेव तथा क्रीडतु किं प्रापञ्चिकेभ्यस्तत्प्रकटनेन तत्राह भक्तानां प्रपञ्चगतानाम् । मानुषं मर्त्यलोकरूपं विराड्देहांश्च समाश्रितः तत्र प्रकट इत्यर्थः । तत्र वस्तुनोऽपि प्रभावमाह । याः श्रुत्वेति अन्योऽपीति शेषः ॥ ३८—४० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

प्रकृतमाह । नासूयन्नित्यादि । असूयाभावे हेतुमाह । मोहितास्तस्य मायया योगमायया मोहिताः मोहप्रकारमाह । मन्यमाना इत्यादि । योगमायैव तासां छायारूपा दारा आविष्कारयामास ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ननु तथापि लोकव्यवहारे स्त्रियोऽन्याधीना इति मदसोपाकृाने गोपानां मनसि खेदस्तैः क्रियमाणा अपकीर्त्तिश्च न मन्नेवित्याशङ्क्याह । नासूयन्निति । ते भगवन्तं नासूयन् असूयया न दृष्टवन्तः प्रथमतः प्रवृत्तिं ज्ञात्वापि भगवन्मायया मोहिता नासूयन् अग्रेतु स्वपार्श्वस्थानेव स्वान् स्वान् दारान् मन्यमाना जाताः यतो व्रजौकसः पूर्वापरानुसन्धानरहिताः सर्वथाङ्गीकृता इति वा एतादृशानां प्रभौ दोषारोपासम्भवादिति भावः । अयमर्थः सर्वजनीन इति स्वल्वित्युक्तं भगवत्सांनिध्येऽपि मोहार्थं तस्येति बुद्धिरेव तेषां भ्रमात् शिष्टं भगवत एवेति मननमात्रेणैव सर्वदोषपरिहारः अनेन तास्वपि दोषारोपो निवारितः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नन्वेवं सर्वास्वेव निशासु गोपस्त्रीभिः सह विहरति भगवति तासां पतयश्च श्वश्र्वादयः स्वस्वगृहेषु ताः स्ववधूरदृष्ट्वा भगवते तस्मै कथं नाकुप्यंस्तत्राह । नेति । मायया योगमाययैव नतु बहिरङ्ग मायया । भगवत्परिवारेषु तस्या अधिकाराभावात् तन्मोहितानाञ्च भगवद्वैमुख्यस्यावश्यम्भावात् । तेषां गोपानान्तु भगवद्वैमुख्यमात्रादर्शनात् । तया मोहनञ्च गोपीषु कृष्णमभिसृतवतीषु तादृशीस्तावतीरेव गोपीः सृष्ट्वा तान् दर्शयित्वैव । अतः स्वान् स्वान् दारान् स्वपार्श्वस्थानेव मन्यमानाः । यदुक्तमुज्ज्वलनीलमणौ । "मायाकल्पिततादृक्स्त्री शीलनेनानुसूयुभिः । न जातु व्रजदेवीनां पतिभिः सह सङ्गम" इति । ततश्च योगमायायाश्चिच्छक्तिवृत्तित्वात् तत्कार्याणामपि नित्यसत्यौचित्यात् सर्वमायिकप्रपञ्चनाशेऽपि तेषां पार्श्वस्थदाराणां तेषु स्वस्वभार्याभिमानस्य च नित्यसत्यत्वमेव मन्यमाना इत्यभिमानमात्रं नतु योगमायाकल्पितानामपि तासां पतिभिः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सम्भोग इति तासां तदाकारतुल्याकाराणामन्यसंभुक्तत्वस्यानौचित्यात् अत एव स्वपार्श्वस्थानितितु स्वतःपरस्थानित्युक्तम् । तच्च समाधानं योगमाययैव । तत्पतीनां तासु कामभावानुत्पादनात् कृतमिति ज्ञेयम् । श्रीभगवत्पार्श्वात् स्वस्वगृहं प्रति गोपीनामागमनसमये मायिकगोपीनां माययैवान्तर्द्धापनमपि ज्ञेयम् ॥ ३८ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

ननु भवतु नित्यसिद्धानां तथात्वं साधनश्रुतिमुनिरूपाणांतु पत्यादिश्रवणात्पतिसुतान्वयभ्रातृबान्धवानित्यादिना तास्वपि तथात्वोद्भावनात्तत्पत्यादिषुच परमभक्तेषु कापट्यावरणेनासूयोदयात्कथमनुग्रहः सिध्येत् इत्यत आह । नेति । व्रजौकसः कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा इत्यादिना प्रसिद्धाः प्राग्दर्शितनिजलोकगततत्क्रीडासुखाः कृष्णं च तत्र तत्क्रीडासक्तमेव छन्दोभिः स्तूयमानं दृष्ट्वातिविस्मिताः सन्तो नासूयन् तत्र हेतुः मोहिता इति अत्र पतिमन्यत्वमेव मायामोहितत्वं सुतरां च तद्गमनाद्यपरिचय इति अन्यथा तत्तद्भ्रमे श्रीभगवत्यसामञ्जस्यं प्रसज्येतैव कथम्भूताः स्वान् स्वान् दारान् तथात्वेन मायाकल्पितान् स्वपार्श्वस्थानेव मन्यमानाः एवञ्च ता वार्य्यमाणाः पतिभिरित्यादिकमपि मायाकल्पितैरेव तैरिति व्याख्यानं सुसङ्गतं तेषां वास्तवत्वे तत्परिज्ञानेच दुरुद्धारदोषप्रसक्तिरित्यवधेयम् आसाञ्च गोत्रप्रवर्त्तकान् गोपान् प्रति प्रागेव श्रीविष्णुना सोऽयं वरो दत्तः यथा पाद्मसृष्टिखण्डे—

> यदा नन्दप्रभृतयः अवतारं धरातले ।
> करिष्यन्ति तदा चाहं वसिष्ये तेषु मध्यतः ॥
> युष्माकं कन्यकाः सर्वा रमिष्यन्ते मया सह ।
> तत्र दोषो न भविता न रोषो नच मत्सरः इति

निखिलं निरवद्यं प्रसिद्धव्याख्यायां तु दोषोऽपरिहार्य्य इत्युपेक्षिता ॥ ३८ ॥

श्रीरामनारायणकृतभावभावविभाविका

ननु मुख्यभक्तानां व्रजवासिनां स्वपत्नीत्वाभिमतानामपकर्षणे नासूयाजनकाः क्रीडाः कथं सर्वभूतानामनुग्रहाय भवन्तीत्यपेक्षायां तेषां तदनुसूयकत्वं दर्शयति । नासूयन्निति । यतस्ते व्रजौकसः सच कृष्णोऽतस्ते तस्मै नासूयन् यत्कामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते इति ब्रह्मवचनात् कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामाइत्यादिशुकोक्तेश्च तेषां व्रजवासिनां साक्षात्कृष्णे नित्यानन्दरूपतया सर्वप्रेमास्पदे विशेषतः स्वमनः कर्षकेऽसूयाद्यभावः किमु वाच्यम्—

> न क्रोधो नच मात्सर्य्यं न लोभो नाशुभा मतिः ।
> भवन्ति कृतपुण्यानाम्भक्तानाम्पुरुषोत्तमे ॥

इत्यादिस्मृतिभिः समानभक्तानां यत्र कुत्रापि विद्वेष्यादावप्यसूयाद्यशुभमत्यभावानिर्द्धारदर्शनात् अतो व्रजौकस्त्वादेव यथा तस्य मायया मोहिता असूयादि कुर्वन्ति तथा नासूयन्नित्यन्वयः यद्वा मायया मोहितास्तस्य दाराश्चित्यप्रियास्ततच्छ्रुतिदेवतावत्स्वान्स्वान् मन्यमाना अपि तया माययैव तान् सीतासंज्ञादिच्छायाकारानिव प्रतिभासमानान् स्वपार्श्वस्थान् मन्यमाना असूयानिमित्तस्यैवाभावाच्च नासूयन् तथाच ताः पूर्वोक्तप्रमाणैः कृष्णप्रेयस्य एव ब्रह्मवत्सहरणे भगवतस्तत्तदाकारत्वापत्तौ तद्विवाहान्न विवाहेनापि तत्सबन्धः कात्यायनीपूजनभगवद्वरदानादेरप्यन्यथाभावानौचित्यात् तासां नित्यदा तत्सबन्धप्रतीतिरपि रासनिशि तासां भगवद्विहारनिर्द्धारेऽपि स्वपार्श्वस्थत्वप्रतीतिवदेवेति न भगवतः परदारसंबन्धो न वा भगवत्प्रेयसीनामन्यगोपादिसंबन्धइत्यनद्यं यद्वा ते व्रजौकसः कृष्णाय नासूयन् यतस्तस्य मायया कृपया "माया दम्भे कृपायाञ्चे" ति कोशात् यद्वा तस्य मा प्रमा यया तया भक्त्या मोहिता मा प्रमा यथार्थमतिरूहिता येषां तथाभूताः स्वान् स्वान् लौकिकभ्रान्त्या स्वीयत्वेन देहसबन्धितया प्रतिभासमानानपि तस्य परमात्मनः स्वस्वात्मभूतस्यैव दारान् मन्यमानाः तत्पार्श्वगतानपि तस्य स्वात्मत्वात्स्वपार्श्वस्थानेव मन्यमाना इति ॥ ३८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

ननु एवम्प्रवृत्ते भगवति तत्पतीनामसूया कथन्नोत्पन्नेत्याशङ्क्याह । नेति । व्रजौकसां तत्पतयः कृष्णाय नासूयन् यतस्तस्य योगमायया मोहिता ननु कोऽसौ मोहो मूर्च्छारूपः किस्वान्यथाभावरूप इत्यपेक्षायामाह । स्वान् स्वान् दारान् स्वपार्श्वस्थान्मन्यमानाः एतेनान्येऽपि भिन्नाचाराः स्वचेष्टितमेव वदन्तीत्याशङ्कापि निरस्ता यथोक्तैश्वर्य्यरहितानामन्यथाचरणे पापिष्ठत्वावगमात्तस्मान्न तदेव चरितं चरेदित्युक्तत्वादेवं विधा प्रवृत्तिर्न कस्यापि मनुष्यस्यैवेति भावः ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य गोपगोप्यादीनां हितायावतीर्णस्य सर्वेश्वरस्य मायया कृपया मोहिताः वशीभूताः स्वान् स्वान् दारान् स्वपार्श्वस्थान् स्वकीयो यः कुलतः व्रजेशसूनुत्वात् गोवर्द्धनोद्धरणादिना च रक्षकत्वात् वैकुण्ठप्रदर्शनत्वेन परमप्राप्यत्वात् शास्त्रदृष्ट्या च स्वात्मत्वात् एवम्भूतस्य स्वस्य श्रीकृष्णस्य पार्श्वे स्थितान् मन्यमाना नासूयन् ॥ ३८ ॥

भाषा टीका ।

उहां व्रज में भगवान् की माया से सब व्रजवासी मोहित होगये उनने अपनी अपनी स्त्रियों को अपने ही पास में रही जाना फिर श्रीकृष्णचन्द्र पर कोइ विषम भाव नहीं किया ॥ ३८ ॥

ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः।
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥ ३९ ॥
विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः।
भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥
इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
पूर्वार्धे रासक्रीडायां
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ॥ ३९ ॥

भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह। विक्रीडितमिति। अचिरेण धीरः सन् हृद्रोगं काममाशु अपहिनोति परित्यजतीति ॥ ४० ॥

सेयं श्रीपरमानन्दसेविश्रीधरनिर्मिता।
श्रीभागवतभावार्थदीपिका दशमाश्रया ॥
इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिणी।

वासुदेवेन चित्ताधिष्ठात्रा तेनैव अनुमोदिताः अन्तः प्रेरिता अपि यद्वा वसुषु अष्टासु दीव्यतीति वसुप्रवरो द्रोणरूपः श्रीनन्द एव तत्पुत्रो वासुदेवस्तेन भगवत्ताप्रकटनपरेण श्रीकृष्णेन व्रजमङ्गलार्थमनुज्ञाताः किम्वा अनु निरन्तरं मोदिताः हर्षिताः अत एवानिच्छन्त्यः तथापि स्वस्वगृहान् ययुः कुतः भगवत्प्रियाः तत्प्रीतिमालोच्येत्यर्थः। अन्यथा तातमातृवयस्यवर्गसन्तोषणगोपाळनादेस्तथा पूर्ववद्रासक्रीडादिसुखस्य चासम्पत्तिः तत्तदसम्पत्त्या भगवतो माधुर्यविशेषासिद्धिश्चेति दिक् ॥ ३९ ॥

व्रजे या वध्व इव नवयुवत्यः यद्वा रासक्रीडया तत्पत्नीत्वमिव प्राप्तास्ताभिः इदञ्च रासक्रीडालक्षणं विशिष्टं क्रीडितं क्रीडां चकारात् ईदृशमन्यदपि किम्वा त्वर्थेचशब्दो ऽन्यतो विशेषात् विष्णोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण श्रद्धान्वित इति अन्यथा रसानुदयेन परमभक्त्यसम्पत्तिः श्रद्धान्वितत्वादेव अनु निरन्तरं शृणुयात् एतच्च तथैव यद्वा नु निश्चितम् अथ श्रवणानन्तरं श्रद्धान्वितत्वात् यद्वा विकल्पार्थे ऽनुवर्णयेद्वा किम्वा अनु उक्तसमुच्चये स्मरेच्च प्रत्येकं सर्वेषां परमभक्तिसाधनत्वात् तथापि श्रवणादित्रयस्यास्य यथोत्तरं तत्र श्रैष्ठ्यमित्यधिकारिस्वापेक्षा निरस्ता परां परमां प्रेमलक्षणां प्रतिक्षणं नूतनत्वेन लब्ध्वा हृद्रोगरूपं काममिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नः तस्य परमामृतत्वेन तद्विपरीतत्वात् धीरः सर्वथैतत्त्वेवक्ता अपुनः कामादिक्षुभितचित्तो वा हृद्रोगत्यागादिकमेतत्परमभक्तेरानुषङ्गिकं फलं तस्या एव मुख्यफलत्वात् तत्क्रीडाश्रवणादिनाप्येतत् स्यात् किम्वक्तव्यं लौकिकनिन्द्यकामक्रीडावत् तस्य सा क्रीडेति प्रसङ्गानुसारेण तात्पर्यं कल्प्यम् अतस्तस्य तासाञ्च स कामविशेषः प्रेमपरिपाकविलासविशेषरूप एव नतु प्राकृत इति लिखितमेव विवृतञ्च श्रीभागवतामृते अन्यस्तैर्व्याख्यातं यद्वा धीरः विचारयन् सन्नित्यर्थः। कामं यथेष्टमाशु भक्तिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णाप्राप्त्यादिकृतमचिरेणपहिनोति तत्प्राप्तेरिति भावः अन्यत्समानम् ॥ ४० ॥

क्रीडता बहिरन्तश्च जनोऽयं येन नर्त्यते।
तस्य चैतन्यरूपस्य प्रीत्यै भगवतोऽस्त्विदम् ॥
इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमत्सनातनगोस्वामिकृतवृहत्तोषिण्याम्
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी।

तदेतत् प्रासङ्गिकं समाप्योपसंहरन् परमसुखामृतसिन्धुमवगाढानामपि तासामतृप्तिमाह। अनिच्छन्त्योऽपि गोप्यः स्वगृहान् ययुः तेन समं विहारेणैव व्रजं निकटप्रायमागत्य स्वस्वगृहवर्त्मानि जगृहुरित्यर्थः। तत्र हेतुः ब्रह्मेति तत्कालस्य गृहगमनायैव योग्यत्वादित्यर्थः। ननु तदर्थत्यक्तसर्वाणां तासां कथं तदपेक्षा तत्राह। वसुदेवोऽत्र प्राग्जन्मनि वसुषु विराजितत्वात् व्रजेश्वर एव। गोकुललीलायां तदर्थं तस्यैव सान्निध्यात् तत्स्थापत्यार्थेऽपि तेन तस्यापत्यतयापेक्षिततदनुस्मरणाद्प्रातःकालेन अनुमोदिताः पुनराशु स्वसङ्गदानाद्यङ्गीकारस्तुत्यादिभिः कारितानुमोदना इत्यर्थः। श्लेषविशेषेण तत्तन्निकटे सर्वदा एव सता क्रीडता चानुमोदिता इति प्रत्येकमप्यनुनयो दर्शितः। ऐश्वर्यार्थत्वेतु तेनाप्यनुनयात् तासां माहात्म्यं दर्शितम्। यद्वा। वसुदेवं तासां शुद्धसन्तःकरणम्। "सत्त्वं विशुद्धं वसुदेवशब्दित" मिति श्रीशिवोक्तेः। प्रेम्णा तदधिष्ठात्रेति तत्र सत्त्वमुक्तम्। ननु ताभिर्लब्धदुर्लभसङ्गानन्दस्य तस्य त्यागे तद्यत्नेनाप्यनुमोदनं कथमिव घटेत प्रेमवशात्वपक्षेऽपि तत्सङ्ग एव प्रेमफलमिति तद्ध्यानादावपि कथं तद्धात्वं तत्राह।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

भगवानेव प्रियो यासां ताः । भगवतः प्रेयस्यो वा अतः दुःखमपि ताः सहन्ते नतु तत्सङ्कोचलेशमपीति भावः । सत्पुरुषाणां प्रेयसीवशत्वेऽपि लज्जा मर्यादा दाक्षिण्यादिभिस्तदेकसङ्गत्यागस्य दर्शनादिति च भावः ॥ ३९ ॥

अथ तादृशलीलाश्रवणादेरपि प्राकृतकामविरोधित्वेन श्रीभगवत्प्रेमावहत्वेन च कैमुत्यात्तल्लीलायाः परमभक्तिफलरूपत्वं दर्शयित्वा पूर्वसिद्धान्तमेवोत्कर्षयन् तल्लीलावर्णनसमाप्तौ सुखावेशेनोत्तरकालभावि तच्छ्रोतृवक्तृजनानाशिषयन्निव च स्वाभाविकतत्फलं कथयति । विक्रीडितमिति । विशिष्टां क्रीडां चकारादीदृशमन्यदपि विष्णोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण श्रद्धया विश्वासेनान्वित इति । तद्विपरीतावज्ञारूपापराधनिवृत्त्यर्थञ्च नैरन्तर्यार्थञ्च । तच्च फलवैशिष्ट्यार्थम् अतएव योऽनु निरन्तरं शृणुयात् अथानन्तरं स्वयं वर्णयेच्च उपलक्षणञ्चैतत् स्मरेच्च भक्तिं प्रेमलक्षणां परां श्रीगोपिकाप्रेमानुसारित्वात् सर्वोत्तमजातीयाम् । प्रतिक्षणं नूतनत्वेन लब्ध्वा । हृद्रोगरूपं काममिति भगवद्विषयः कामविशेषो व्यवच्छिन्नः । तस्य परमप्रेमरूपत्वेन तद्विपरीत्यात् । काममित्युपलक्षणमन्येषामपि हृद्रोगाणाम् । अन्यत्र श्रूयते । "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते परा"मिति । अत्र तु हृद्रोगापहानात् पूर्वमेव परमभक्तिप्राप्तिः । तस्मात् परमबलवदेवेदं साधनमिति भावः । धीरः सन्निति धैर्यञ्च लभत इत्यर्थः । यद्वा । कामं यथेष्टम् आशु भक्तिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णाप्राप्त्यादिकृतमचिरेणापहिनोति तत्प्राप्तेरिति भावः । अन्यत् समानम् ।

क्रीडता बहिरन्तश्च जनोऽयं येन मत्यते ।
तस्य चैतन्यरूपस्य प्रीत्यै भगवतोऽस्त्विदम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां
त्रयस्त्रिंशोऽध्याय ॥३३॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ब्रह्मरात्र उपावृत्ते ब्रह्मरात्रे ब्राह्ममुहूर्ते ॥ ३९ ॥

श्रोता आश्वपहिनोति वर्णयिता अचिरेण यद्वा हृद्रोगनाशोपक्रमश्रवणयोर्मध्ये काल आशुशब्दः शमोन्मुखस्य रागादेरिव चिरेण निःशेषशान्तिशङ्काव्युदासायाचिरशब्दः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये पूर्वार्धे
रासक्रीडायां त्रयस्त्रिंशोऽध्यायः ॥३३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रकृतमाह । ब्रह्मरात्र इति । ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते सति वासुदेवेनानुमोदिताः अनुमोदनपूर्वकमाज्ञापिता अपि गोप्यः भगवानेव निरतिशयप्रियो यासां तथाभूता अतएवानिच्छन्त्यः गन्तुमिति शेषः कथञ्चित्स्वगृहान्प्रति ययुः ॥ ३९ ॥

प्रकृतरासक्रीडाश्रवणादिफलमाह । विक्रीडितमिति । व्रजवधूभिः साकम् इदं विष्णोः कृष्णस्य विक्रीडितं भावे क्तः यः पुमान् श्रद्धान्वितोऽनुक्रमेण शृणुयादथवा वर्णयेच्छ्रावयेच्च स भगवति परामुत्कृष्टां भक्तिं प्राप्य धीरः जीवदशायां जितेन्द्रियः कामं नितरां हृद्रोगं रोगवदनर्थकरं हृत्स्थमज्ञानमाश्वचिरेण विधुनोति निरस्यति श्रोता आशु धुनोति तथा वर्णयिताप्यचिरेण धुनोतीति प्रत्येकाभिप्राययोरचिरेणाशुशब्दयोः प्रयोगः अतो न पौनरुक्त्यं यद्वा हृद्रोगनाशोपक्रमणयोर्मध्ये कालविलम्बाभावाभिप्रायकः आशुशब्दः श्रवणोन्मुखरोगादेरिव चिरेण निःशेषशान्तिकशङ्काव्युदासायाचिरेणशब्दः अचिरेण धीरः आशु विधुनोतीति वान्वयः हृद्रोगरूपं कामं मदनमाशु विधुनोति जयतीत्यथा वा ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
त्रयस्त्रिंशोऽध्यायः ॥३३॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मरात्रे ब्राह्मे मुहूर्ते ॥ ३९ ॥

संसारनिवृत्तिहेतुत्वादस्मिन्कृष्णविक्रीडिते श्रद्धादिकं कार्यमिति विधायकफलमाह । विक्रीडितमिति । चशब्दः श्रद्धातिशयजननार्थः पूर्वोक्तविक्रीडितानि यथा संसारनिवर्तकानि तथेदञ्चेति । आशु भक्तिं प्रतिलभ्यानुदिनं कृत्वा हृद्रोगं काममनिष्टमपहिनोति प्रतित्यजति दुष्टकामत्याग एव संसारनिवृत्तिरित्यर्थः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकत्रिंशोऽध्यायः ॥ ३१ ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥

फलितमाह । ब्रह्मरात्र इत्यादि । मिलितानामनेकरात्रीणां शेषयामार्द्धे उपावृत्ते भगवदिच्छया संप्राप्ते सति ताः गोप्यः ऊढानूढादिप्रकारोक्ताः सर्वा एव भगवत्प्रियाः सत्यः स्वगृहान् अनिच्छन्त्यः वासुदेवानुमोदिता वासुदेवमनुमोदयितुं शीलं यासामिति

श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भः ।

तथा तत् श्रीवृन्दावनान्तर्वर्तिपुरविशेषं ययुरिति भावः । वस्तु-तस्तु स्वगृहं पुनर्न गता एवेति ग्रन्थार्थः स्वगृहान् अनिच्छन्त्य इति हेतुमद्विशेषणेन गृहान्तरं लक्ष्यते ॥ ३९ ॥

उपसंहरति । विक्रीडितमित्यादि । अजते तादृशीः क्रीडाः याः श्रुत्वा तत्परो भवेदित्युक्तस्य विशेषोऽयं हृद्रोगम् अन्तःकरण-मालिन्यम् अचिरेण तत्क्षणादेव धीरः पण्डितः विचक्षण इत्यर्थः अत इदं रहस्यं धीरो यो भवति स श्रद्धान्वितः सन् शृणु-यात् वर्णयेत् कीर्तयेत् स्वतः शक्तो यदि तदा स्वपद्यैनापि वर्णयेत् सुगमम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमज्जीवगोस्वामिकृतवृहत्क्रमसन्दर्भे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रासङ्गिकं परिहृत्य उक्तां लीलामुपसंहरति । ब्रह्मरात्र इति । अरुणोदयो ब्रह्मरात्रः तस्मिन् उपावृत्ते सम्यग्जाते तदन्तर्या-मितया प्रविष्टो भगवान् गृहे गन्तव्यमितीच्छामुत्पादितवान् ततः भगवता अनुज्ञाताः यतो भगवान् मोक्षदाता ताश्चेत् आसन्ध्य-मन्तः स्मरणं करिष्यन्ति तदा मोक्षाधिकारिण्यो भविष्यन्तीति वासुदेवेनानुमोदिताः यद्यपि तासामिच्छा न स्थिता सर्वपरित्यागेन भगवद्भजनस्य कृतत्वात् किंगृहेण लोकेनेति तथापि गोप्य इति विपरीतबुद्धिः दृढबुद्धिश्च तासां नास्तीति स्वगृहान् ययुः तथापि तासां न गृहाः प्रियाः किन्तु भगवानेव नापि संसारमयं यतो भगवतः प्रियाः ॥ ३९ ॥

मोक्षार्थमिदं चरित्रमिति ज्ञापयितुमेतदुपाख्यानश्रवणस्य फलमाह । विक्रीडितमिति । व्रजवधूभिः सह भगवत इदं विशेषेण क्रीडितं श्रद्धान्वितो भूत्वा सम्यक् कथ्यमानमुपश्रृणुयात् अथवा वर्णयेत् श्रवणानन्तरमेव कीर्तनमित्यथशब्दः । य इति नात्र वर्णादिनियमः किन्तु यः कश्चन भगवतो माहात्म्यश्रवणादेव-मपि मोचयतीति भक्तानाञ्च सर्वथा प्रतिपत्तिश्रवणाच्च भगवति परां भक्तिमुपगतः ततो भक्त्या अन्तः स्थिरीभूतया हृदयस्य रोगरूपं काममाशु शीघ्रमेवापहिनोति यः पूर्वं हृदयबाधकत्वेन स्थितः शीघ्रमेवच बाधकर्त्ता तमाश्वेव दूरीकरोति श्रवणमात्रेणैव ततः पूर्ववासनया पुनर्भ्रमे अचिरेणैव धीरो भवति अत इदं साभिप्रायं श्रोतव्यमिति फलप्रकरणत्वात् फलमुक्तम् ॥ ४० ॥

इति श्रीमद्भागवतसुबोधिन्याम् श्रीमल्लक्ष्मणभट्टात्मज-श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे पूर्वार्धे रासक्रीडायां त्रिंशाध्यायविवरणम् ॥ ३० ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्मरात्र इति समासान्त आर्षः । ब्रह्मणो रात्रौ युगसह-स्रप्रमाणायामुपावृत्ते उप आधिक्येन आवृत्ते एकामावृत्तिं गते सति गोप्यः स्वगृहान् ययुः । एकस्यामेव रजन्यामेता-वत्यो लीलाः कर्त्तव्या इति भगवतः सत्यसङ्कल्पत्वात् नृत्यगी-तादयो विलासा यावन्तो मनस्यभीप्सिता आसन् तावतां सम्पूर्त्तौ यावन्तः समयाः सम्भवन्ति तावद्भिः समयैर्युगसहस्रं पूर्णं बभूव तच्च युगसहस्रं प्रहरचतुष्टयात्मकरजनीमध्य एव रास-स्थल्यां प्रविवेश । यथा पञ्चयोजनात्मक वृन्दावन प्रदेशैकदेश एव पञ्चाशत्कोटियोजनप्रमाणानि ब्रह्माण्डानि प्रविष्टानि ब्रह्मणा दृष्टानि यथा चातिस्तोक एव भगवत उदरस्योपरि अपरिमितानि दामानि अन्तरे च ब्रह्माण्डमेव दृष्टमभूदित्यत्र नासम्भावना कार्या । यदुक्तं भागवतामृते । "एवं प्रभोः प्रियाणाञ्च धाम्नश्च समयस्य च । अविचिन्त्यप्रभावत्वादत्र किञ्चिन्नदुर्घटं" मिति । वासुदेवानुमोदिताः मम च भवतीनाञ्च प्रति तादृशक्रीडासि-द्ध्यर्थं प्रच्छन्नकामतैवाभीष्टेति कृष्णेन कृतानुमोदना इत्यर्थः । यद्वा । चित्ताधिष्ठात्रा वासुदेवेनैव गुरुलज्जाभयादिकमुद्भाव्य प्रेरिताः । अत एव प्रियविरहस्य दुःसहत्वादनिच्छन्त्योऽपि ययुः ॥ ३९ ॥

सर्वलीलाचूडामणे रासस्य श्रवणकीर्तनफलमपि सर्वफल-चूडामणिभूतमेवेत्याह । विक्रीडितमिति । चकारदीदृशमन्यदृश्य-न्यकविवर्णितं ताभिः सह विक्रीडितम् । विष्णोरिति तासां मध्ये कुत्राप्यदर्शनमिति व्यापकत्वाभिप्रायेण नु निश्चितम् अनुश्रित्य शृणु यात् । अथ वर्णयेत् कीर्त्तयेत् । स्वकवितया काव्यरू-पत्वेन निबध्नीतेति वा । परां प्रेमलक्षणां प्राप्नोति क्त्वाप्रत्य-येन हृद्रोगवत्यप्यधिकारिणि प्रथमत एव प्रेम्णः प्रवेशस्तत-स्तत्प्रभावेणैवाचिरेण हृद्रोगनाश इति प्रेमार्य ज्ञान्योग इव न दुर्बलः परतन्त्रश्चेति भावः । हृद्रोगरूपं काम-मिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नः तस्य प्रेमामृतरू-पत्वेन तद्वैपरीत्यात् । धीरः पण्डित इति हृद्रोगे सत्यपि कथं प्रेमा भवेदित्यनास्तिक्य लक्षणेन मूर्खत्वेन रहित इत्यर्थः । अत एव श्रद्धान्वित इति शास्त्राविश्वासिनं नामापराधिनं प्रेमापि नाङ्गीकरोतीति भावः ।—

> श्रीकृष्णातिवशीकारसुधोर्जिष्णुशिरोमणेः ।
> प्रेम्णो धाम दृढायं श्रीरासः श्रीरपि नाप यम् ॥
>
> शास्त्रबुद्धिविवेकाद्यैरपि दुर्गममीक्ष्यते ।
> गोपीनां रसवर्त्मेदं तासामनुगतैर्विना ॥
>
> पदवाक्यप्रकरणध्वनयोऽत्र सहस्रशः ।
> गम्यागम्याश्च गम्याश्च नोक्ता विस्तरभीतितः ॥ ४० ॥
>
> इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
> दशमस्य त्रयस्त्रिंशः सङ्गतः सङ्गतः सताम् ॥ ३३ ॥

श्रीमत्किशोरीप्रसादविद्वत्कृता विशुद्धरसदीपिका ।

तदेवं प्रासङ्गिकं समाप्य प्राकरणिकमप्युपसंहरिष्यन् यत्र तत्र विलम्बितस्य प्रेयसीभावानां सखीभावानाञ्च वर्गद्वयस्य यथायोग्यं रासानन्तरभाविचरितमाह । ब्रह्मरात्र इति । ब्राह्मे मुहूर्त्ते सूर्योदयात्प्राग्दण्डद्वयात्मके प्रातः काल इत्यर्थः । उपावृत्ते शिशुमारपरिवर्त्तनेन पुनरावृत्ते सति यद्वा ब्रह्मणश्चतुर्वक्त्रस्य रात्रेरप्रवृत्तिर्यत्र तादृशे निभृतविहारे जाते सति यद्वा ब्रह्मणो वेदस्यापि रात्रिरज्ञानं यत्र तस्मिन् यद्वा ब्रह्मणः परब्रह्मणः श्रीकृष्णस्य रातिसुखसत्रमयं पर्व यस्मिंस्तादृशे समये उपावृत्ते सम्प्रवृत्ते सति यद्वा ब्रह्मणः सर्वविहारपूर्णस्य रात्रे उप अधिकमावृत्ते नित्यविहारस्य वृत्तौ ज्ञातायामित्यर्थः यद्वा ब्रह्मणः श्रीराधायाः अयमात्मा ब्रह्मेतिश्रुतेः आत्मना रमयेति ब्रह्मसंहितायाः परात्परम्ब्रह्मेति रुद्रयामलात् रात्रे राति सुखमिति रात्रस्तादृशे ऽवसरे उपावृत्ते सर्वोपरितया आवृत्ते सतीति प्रभूतार्थमिदं वासुदेवानुमोदिताः अत्र वासुदेवेति श्लेषमहिम्ना वर्गद्वयान्वयि तथाहि वसुषु दीव्यति वसूनां देवो राजा वासुदेवः श्रीनन्दराजः द्रोणो वसूनां प्रवर इति प्रागुक्तेः तस्य पुत्रापत्यम्वासुदेव इत्यवताराभिप्रायं व्रजसम्बन्धिनामधेयं तदनुमोदिताः सम्प्रति प्रातर्जातं लोकापवादो मास्त्विति पृष्टे तेन दत्तानुज्ञानाः प्रेयसीत्वाभिमानाः श्रुतिमुनिरूपाश्च काश्चित् अनिच्छन्त्योऽपि प्रियतमापवादभीता युयुः व्रजमिति शेषः । भगवत्प्रियास्तु श्रीकिशोरीरमणैकसुखाः स्वगृहान् स्वस्वकुञ्जगृहानित्यावृत्यान्वयः तत्र तत्र गमनादिकं तासां तासामन्योऽन्यमपरिकलितमेव वृत्तमिति संक्षेपः ॥ ३९ ॥

एवञ्च कामविजयक्रीडायायाः श्रवणफलमपि कामविजय एवेत्युपसंहरति । विक्रीडितमिति । विविधाभिर्व्रजवधूभिर्विविधं क्रीडितं विशिष्टं वा क्रीडितं चकारादीदृशमन्यदपि संग्राह्यं यद्वा चोऽप्यर्थे ता गोप्यो हृद्रोगं जहुरिति किंवक्तव्यं यः कश्चिदेतासां क्रीडितं शृणुयात्सोऽपीत्यर्थः । विष्णोरिति । सर्वासां यथोचितमनोरथपूरणेन व्यापकस्य यद्वा ब्रह्मक्षेतृतीयचरणप्रादुर्भावाद्विष्णुरिति श्रीनन्दात्मजस्यैव जन्मनाम ततश्च तासां तस्य नित्यसम्बन्धः सूचितः श्रद्धया दृढविश्वासेन अन्वितः असम्भावनाविपरीतभावनारहित इत्यर्थः । अनु निरन्तरं शृणुयात् अथ अनन्तरं स्वयं वर्णयेत् उपलक्षणं स्मरणस्य सर्वोऽप्ययं श्रद्धानुभावः सच परां शुद्धप्रेमलक्षणां भक्तिं भगवति श्रीराधावल्लभे प्रतिलभ्य सुखेन लब्ध्वा हृद्रोगमाशु तत्क्षणमेव अपहिनोति एवञ्च हृद्रोगहानात्प्रागेव तत्कारणपराभक्तिलाभ इति कथनात्कार्यशैघ्र्यप्रत्यायनं ततश्च प्रबलवदेतत्साधनम् अत्र हृद्रोगपदेनैव गतार्थत्वे पुनः काममित्युक्तिः स्पष्टप्रतिपत्तये सन्ति बहवो हृद्रोगा एतस्मिन्विषयेतु काम एवेति भावः । अथवा कामं यथेष्टमिति क्रियाविशेषणम् अचिरेण धीरो भवतीति शेषः । धियं निश्चयात्मिकां चेतोवृत्तिं तस्मिन्नित्यविहारिणि भगवति राति योजयतीति धीरः तद्विहारभावुको भवेदित्यर्थः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासपञ्चाध्यायी व्याख्यायां श्रीमत्किशोरीप्रसाद विद्वत्कृतायां विशुद्धरसदीपिकायां पञ्चमोऽध्यायः ॥ ५ ॥

मूलस्य त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीरामनारायणकृतभावभावविभाविका ।

एवं प्रासङ्गिकं नृपप्रश्नसमाधानं समाप्य प्रकृतं ब्रुवंस्तत्परमानन्दनिमग्नानामपि तत्रैवासक्तिं दर्शयन् प्रेमपथप्रवृत्तभगवत्कामानां गृहादित्यागावश्यकत्वेऽपितत्पथसिद्धानां प्राप्ततत्स्वरूपानन्दानां तत्रैव निमग्नचित्तत्वेन गृहाद्यासक्तिशून्यानामपि भगवदिच्छया गृहादिसम्बन्धाबाधकत्वमाह । ब्रह्मरात्र इति । ब्रह्मणो रात्रिसमकाले उपावृत्त व्यतीते सति यद्वा ब्रह्म कृष्णस्वरूपं राति तथा सर्वदोषदुःखादिभ्यः स्वानुसंधानवतोजनान् आसमन्तात् त्रातीति ब्रह्मरात्रो रासादिविहारस्तस्मिन्नुपावृत्ते सर्वजनोद्धाराय प्रेमिणामुल्लासायचैव प्रकाशमापन्ने ता यतो भगवतः प्रिया अतो वासुदेवेन वसुदेवतपसाविर्भूतेन यद्वा द्रोणवसुनामकदेवो वसुदेवस्तत्पुत्रेण गोपालब्रह्मणा यद्वा "सत्त्वं विशुद्धं वसुदेवशब्दित"मित्यादिवचनात् शुद्धसत्त्वात्मकान्तःकरणे एवाविर्भावयोग्येनानु पुनः पुनर्मोदिता अपि यतो भगवत्प्रिया भगवानेव प्रियो यासां न गृहादयोऽतो गृहान् गन्तुमनिच्छन्त्योऽपि यतो गोप्यो भगवद्रहस्यानामनधिकारिभ्यो गोपनशीला अथच वसन्त्यस्मिन्भूतानीति वासुः सर्वाधारस्तथा देवो नियन्ता तेन वासुदेवेन सर्वान्नासक्रीडापरेण वानुमोदिता न मद्विहारस्य गृहे वने वोपरामः इति बहिरन्तर्भावेन प्रत्येकं कृतानुमोदनाः तेन विहरन्त्य एव व्रजमागत्य स्वगृहान् ययुः ॥ ३९ ॥

एवम्परमानन्दरूपां सर्वजनोद्धारपरमानन्दनिमग्नताहेतुभूतां लीलां निरूप्य तच्छ्रवणादेः फलं दर्शयन्नस्य कामविजयोपाख्यानस्य श्रोत्रादीनामपि हृद्रोगकामनिवर्तकत्वान्न कामाधीनतया कथंचिद्भगवतः परकीयदारसंबन्धभ्रमो नच मिथ्यासि पराणमत्रौदासीन्ययोग्यता प्रत्युत—

> ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
> समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् इति

भगवद्वचनाद्ब्रह्मज्ञानैकलभ्य परभक्तेर्भिद्यतेहृदयग्रन्थिरित्यादिश्रुतेश्चैकसाध्यहृद्रोगविमोकस्य चात्र श्रवणादिमात्रलभ्यतयात्रैव सर्वथा प्रवृत्तिः कार्येति दर्शयति । विक्रीडितमिति । विष्णोर्व्यापकस्य "सर्वतः पाणिपादं तत्सर्वतोऽक्षि शिरोमुख"मित्यादिना विभुसर्वाङ्गस्यापीदं विक्रीडितं स्वरूपाभिव्यञ्जकस्वेच्छया यत्र तत्राविर्भावादिना विशिष्टं सर्वगुणोत्कर्षान्वितं क्रीडितं तत्रान्यक्रीडापेक्षया विशिष्टत्वद्योतनायाह । व्रजवधूभिरिति । व्रजे याः स्वीया वध्व इति वधूशब्देन परदारत्वादिभ्रमव्यावृत्तिः व्रजशब्देनान्यग्रामगतरुक्मिण्यादिवधूनां व्यावृत्तिस्ताभिस्तथाच यथैकस्य परमरसायनस्याप्यनुपानभेदेन गुणवैचित्र्यं तथापरमरसायनस्य भगवत्क्रीडितस्याप्यन्यधामवधूरूपशक्तीनां श्रीसरस्वत्यादीनामैश्वर्य्यज्ञानादिप्राधान्यतया ताभिः सह क्रीडितश्रवणादेरैश्वर्यादि फलत्वम् अत्र व्रजधामगतभगवद्वधूनां प्रेमरसैकप्राधान्यतया ताभिः सह विक्रीडितश्रवणादेः प्रेमलक्षणपराभक्तिफलत्वमिति सर्वक्रीडाभ्यो वैशिष्ट्यं ज्ञेयं तदेव दर्शयति । श्रद्धान्वित इत्यादिना । धीरो धैर्यादिगुणसम्पन्नः धियम्भगवतीरयतीति भगवद्रसजिज्ञासुर्वा धीनियन्तृतदुपाधिकजीवमात्रं वा "यच्छ्रद्धया विद्यया उपनिषदा क्रियते तद्वीर्य्यवत्तरं भवती"तिश्रुतेः "श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारत" इति वृद्धोक्तेश्च तयान्वितोऽनुशृणुयाद्भक्तिलीलारसिकतयाऽनु निरन्तरं मुहुस्तच्छ्रवणपरः स्यादथ वर्णयेत्स्वयमपि

श्रीरामनारायणकृतभावभावविभाविका ।

तद्रसभावुकेषु प्रेमभावोद्दीपनेन प्रकाशयेत् चकाराद्भक्तश्रोत्रभावे स्वरेचितैकाग्र्येण ध्यायेच्च भगवति परामनुरक्तिरूपां "सा परानुरक्तिरीश्वरे" इति सूत्रितां प्रतिलभ्य चकाराद्ब्रह्मात्मावबोधञ्चाज्ञात्वा प्रेमासम्भवात् कामं मनोजं हृद्रोगं यथा रोगोऽङ्गज एव तद्दुःखदस्तथा मनोजन्यमपि तद्दुःखदं यद्वा काममन्यच्च सर्वहृद्रोगं क्रोधादिकं यद्वा काममितराभिलाषमात्रं हृद्रोगं तन्मूलभूतान्तःकरणाद्युपाध्यध्यासात्मकहृदयग्रन्थिञ्चाशु अचिरेणानायासेन चापहिनोति निवर्तयति अत्रायं भावः निवृत्तिपरग्रन्थे सुमनोऽवलम्बमलब्ध्वा प्रथमं विषयेभ्यो दोषदृष्ट्या मनः संनिवर्त्य निरालम्बस्य भगवदालम्बनं भवति तत्र चिरम्प्रयासश्च अत्र रसरूपलीलाश्रवणेन स्वभावतस्तत्र प्रेमोत्कर्षात् सावलम्बतया झटित्यनायासं कामहृद्रोगनिवृत्तिः किञ्च परभक्तिलाभेन परमानन्दावाप्तिर्हृद्रोगोपशमेन सर्वानर्थनिवृत्तिश्च यद्वा मनोजादेरपि हृद्रोगान्तःपातित्वेन पृथगनुक्तेः कामं यथेष्टं परां भक्तिं प्रतिलभ्येति वा परां भक्तिं भगवति कामं कामसुखं सर्वकामं च "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति श्रुत्या प्रतिलभ्य इति वार्थः यद्वा कामं हृद्रोगमाश्वपहिनोत्यथ भगवति परां भक्तिं प्रतिलभ्य धीरो गायत्र्यादौ धीप्रेरकत्वेन श्रुतः परब्रह्मकृष्णात्मक एव स्यात् ॥ ४० ॥

श्रीराधा गोपिकाः कृष्णो गुरवो वैष्णवा द्विजाः ।
प्रीयन्तां स्वप्रपन्नाय यच्छन्तु परमां रतिम् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत-
रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्र-
भागाख्याविष्णुसख्यापन्नश्रीरामनारायण विरचितायां
भावभावविभाविकायां भगवच्छ्रीमद्रासविहारादि निरूपणे
पञ्चमोऽध्यायः ॥ ५ ॥
मूले त्रयस्त्रिंशः ॥ ३३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका ।

इतः परं संशयमनुचितं मन्यमानः खिन्नचित्तः श्रीशुको रासक्रीडावर्णनमुपसंहरति । ब्रह्मरात्र इति । ब्रह्मरात्रौ समासान्त आर्षः सत्यसङ्कल्पस्य भगवतः सङ्कल्पवशात् यामचतुष्टयात्मिकायां रजन्यां सहस्रयुगपरिमिते यथोक्तलीलानिर्वाहके काले उपावृत्ते सम्यगेकामात्रनिङ्गते सति नचात्र विस्मयः कार्यः भगवद्योगमायायां सर्वसंभवात् तथाच यथा वृन्दावनस्य कस्मिंश्चित्प्रदेशे असंख्यातानि ब्रह्माण्डानि प्रवृत्तानि ब्रह्मणा दृष्टानि यथा वा बाल्ये स्थितस्य भगवतः स्वल्पस्योदरस्योपर्यपरिमितानि दामानि वद्धान्यवलोकितानि ब्रजौकोभिर्यथा वा भगवन्मुखे चतुर्दशभुवनानि श्रीयशोदया तथा स्वल्पदेशे क्रीडायोग्यदेशस्य स्वल्पे काले तद्योगकालस्य चाभावे नास्ति किञ्चिदपि चित्रं ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते सतीत्यनेन वासुदेवेनानुमोदिताः वासुदेवेनान्तरवस्थितेन तेन तासामन्तरङ्गमनोद्योगं स्वयमेवोत्पाद्य बहिरप्यनुमोदिताः अतएवानिच्छन्त्योऽपि स्वगृहान् ययुः भगवानेव प्रियो यासां ताः तथाच गमनागमनाभ्यां भगवत्प्रियमेव यासां सम्पाद्यमिति भावः यद्वा स्वगृहान् प्रतिगता अपि भगवत् प्रीतिविषया बभूवुरिति भावः ॥ ३९ ॥

अथ भगवतः कामविजयरूपसर्वलीलावतंसरासक्रीडाश्रवणादेर्यथायोग्यं परमोत्कृष्टं फलमाह । विक्रीडितमिति इदं विक्रीडनं मया वर्णितं व्रजवधूभिर्विष्णोः पूर्णस्य क्रीडानुरूपरूपाणि प्रकटीकृत्य विविधं क्रीडितं श्रद्धान्वितः सर्वलोकोद्धारार्थमाप्तकामेन भगवतेदं विक्रीडनं कृतमिति विश्वासयुक्तः योऽनु निश्चयेन संशयकलङ्करहितः शृणुयात् अनुदिनम्वा शृणुयात् अथवा यः कीर्तयेत् स भगवति परां प्रेमलक्षणां भक्तिं प्रतिलभ्य भगवदनुग्रहादचिरेण धीरः तत्त्ववित्सन् हृद्रोगं सर्वानर्थभूतं काममाऽऽशु शीघ्रमपहिनोति परित्यजति तथाच सर्वानर्थनिवृत्तिपरमानन्दप्राप्तिरूपपरमपुरुषार्थफलकोऽयं पञ्चाध्यायात्मको ग्रन्थः परमादरेण श्रोतव्यो वर्णयितव्यश्चेति—

श्रुति गोपाङ्गनाभिर्यः क्रीडते सत्सुमानसे ।
वने तं धनपत्याख्यो नौमि कृष्णं परात्परम् ॥ ४० ॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यवालगोपालतीर्थश्रीपाद-
शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे पूर्वार्धे
रासक्रीडायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मरात्रे तद्रात्रीणामन्ते ब्रह्ममुहूर्ते वासुदेवानुमोदिता आज्ञापिताः क्षणमपि तद्वियोगमनिच्छन्त्यः यतो भगवानेव प्रियो यासां ताः कथञ्चित् स्वगृहान् ययुः ॥ ३९ ॥

कामविजयिसर्वेश्वररासक्रीडाश्रवणादेः कामजयं परभक्तियोगञ्च फलमाह । विक्रीडितमिति । यः धीरः श्रवणे वर्णने वा ये विद्यास्तज्जयशीलः श्रद्धान्वितश्च विष्णोर्व्रजवधूभिः सह विक्रीडितम् कामं यथेष्टमनु अनुक्रमेण शृणुयात् अथवा वर्णयेत्स अचिरेण परां भक्तिं प्रतिलभ्य आशु हृद्रोगं रोगवदनिष्टकरं काममपहिनोति परित्यजति ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे
रासक्रीडायां श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयस्त्रिंशाध्यायार्थप्रकाशः ॥ ३३ ॥

भाषा टीका ।

इस प्रकार से जब बड़ी ब्रह्म रात्री बीत गई ब्रह्ममुहूर्त भया तब छोडने की इच्छा नहीं रहने पर भी भगवान् की आज्ञा होने से भगवान् की प्यारी सब गोपी अपने घरन को चली गईं ॥ ३९ ॥

जो कोई पुरुष मात्र विष्णु भगवान् के ब्रज स्त्रियों के साथ किये इस क्रीडा चरित्र को श्रद्धा सहित श्रवण करेगा अथवा वर्णन करैगा वह पुरुष जल्दी धीर ज्ञानी होजावेगा और श्रीभगवान् के चरणकमल मे भक्ति को प्राप्त होकर शीघ्र ही हृदय के काम क्रोधादि रोगों को दूर करदेगा

भाषा टीका ।

अन्त में मुक्त होजायगा शङ्का रासक्रीडा तो भगवान् का एक एकान्त कार्य है इस के कह ने से और दोष होना चाहिये पुण्य का होना और काम की बाधाका छूटना फल क्यों कहा है समाधान भगवान् ने ब्रह्मा इंद्रा दि कों को वत्साहरण गोवर्धन धारण आदिलीला मे अपने अधीन किया है इन ब्रह्मा दि कों के जीतने से कामदेव को बडा अभिमान हुआथा उस काम के जीतने को तथा भक्त जनों के मनोरञ्जन को यह रासलीला की है तो उस लीला के कथन श्रवण से हीपाप छूट ते हैं और जो भगवान् की प्रसन्नता की लीला है उस के कथन से भगवान् प्रसन्न होते हैं तिसी से [गोपवधूटीदुकूलचौराय] इत्यादि से महाजनों ने स्तुति कीहै सोइ बात पञ्चस्तव मे श्रीकूरेश स्वामी जी ने कहा है की

[यत्त्वत्प्रियं तदिह पुण्यमपुण्यमन्यन्नान्यत्तयोर्भवति लक्षणमत्र जातु । धूर्तायितंतु तव यत्किल रासगोष्ठ्यां तत्कीर्तनं परमपावनमामनन्ति ॥] अर्थ हे प्रभो ! जो आप को प्रियलगै सो चाहै धर्मशास्त्रमे पाप होवै चाहै पुण्य होवै सो तो पुण्यही है जो आप को अप्रिय है वही पाप है यही पाप पुण्य के लक्षण हैं जिससे कि व्यासपराशरादि मुनिजन रास गोष्ठी मे आप की किई धूर्तलीला के कीर्तनकोभी पाप नाशक कहते हैं ॥ ४० ॥

इति श्रीभागवत दशमस्कन्धपूर्वार्धरासपंचाध्यायी तेतीस में अध्याय की भाषाटीका समाप्त ॥ ३३ ॥

इतिश्रीमद्भागवते दशमस्कन्धे पूर्वार्धे रासक्रीडायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

॥ रासपञ्चाध्यायी समाप्ता ॥

॥ चतुस्त्रिंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

एकदा देवयात्रायां गोपाला जातकौतुकाः ॥
अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ॥ १ ॥
तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुम् ॥
आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ॥ २ ॥
गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ॥
ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥
ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥
रजनीं तां महाभागा नन्दसुनन्दकादयः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुस्त्रिंशेऽहिना ग्रस्तं नन्दं हरिरमूमुचत् ।
विद्याधरश्चाङ्गिरः शापाच्छङ्खचूडं तथावधीत् ॥
रासोपदेशतः कामं किङ्करीकृत्य कामतः ।
अनुगृह्णन् वशं निन्ये तथा विद्याधराधिपम् ॥

तदेवं कामानुग्रहमुखेन कामजयं प्रतिपाद्य तथैव विद्याधरजयं प्रतिपादयितुं तत्प्रसङ्गं दर्शयति ॥ एकदेति ॥ १—२ ॥

गावो गाः मधु मधुरम् मध्वन्नं मधुना सहितमन्नम् ॥ ३ ॥

जलमात्रं प्राश्योपोषितास्तां निशां तत्र ऊषुर्न्यवसन् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ।

अथ रासलीलाप्रसङ्गात्तादृशीं शङ्खचूडवधावसानामन्यां लीलां दर्शयितुं तन्मध्ये जातत्वेन क्रमप्राप्तं तत्प्रभावदर्शनमयत्वेन तादृशलीलाप्रतिकूलजनस्तम्भकतया तदुपयुक्तं च लीलान्तरमाह। एक इति। तत्र रासानन्तरं फाल्गुने शिवरात्रौ देवस्य श्रीशिवस्य यात्रायां जातं कौतुकमौत्सुक्यं येषां ते। तदेतच्च गोवर्द्धनमखवत् श्रीकृष्णकौतुकमूलत्वेनैव च ज्ञेयम् । अनन्याश्रयमनस्त्वात्तेषाम् । यद्वा । ते गोपाः गोपालेन श्रीकृष्णेन हेतुना आ सम्यक् जातकौतुकाः । अत्र श्रीकृष्णस्य तु निजप्रेयसीभिः सह स्वच्छन्दलीलायां निगूढोऽभिप्रायो गम्यः । अतः पूर्वलीलासमानत्वमस्य ज्ञेयम् । अनडुद्भिरिति प्रसिद्धार्थस्यापि निर्देशस्तेनो वहति, अनड्वानिति निरुक्तविशेषविवक्षया सा चानःप्रसगमनस्यानोनिर्देशश्च तीर्थे दानार्थं बहुलद्रव्यनयनस्य तत्र प्रकर्षेण ययुः अम्बिकावनं श्रीमथुरापुरवायव्य दिग्विभागे सरस्वतीतीरस्थं श्रीशिवोमामूर्त्तिविभूषितं तद्देवलयम् । यद्वा । गुर्जरदेशे सिद्धपुरस्य नातिदूरवर्त्ति-तीर्थम् अम्बिकावनं तस्यैवातिप्रसिद्धत्वात् । देवं पूज्यं श्रीविष्णुवैष्णवैकप्रियत्वात् प्रभुं श्रीभगवद्भक्त्यादिप्रदानसमर्थं विभुमिति क्वचित् पाठः अर्हणैर्विविधोपचारैः । चकारेणाम्बिकाया अपि तादृशत्वं समुच्चीयते । हे नृपते ! इति रासलीलाविष्टं तमवधापयति ॥ १ ॥ २ ॥

तेषां सकौतुकत्वेऽपि धर्मार्थनिष्ठत्वमाह। गाव इति द्वाभ्याम्। आदृताः तद्देवालयसेवकैः संमानिताः आदरयुक्ता वा सर्वे श्रीनन्दादयः प्रत्येकमेवेत्यर्थः। देवः श्रीशिवः श्रीविष्णुर्वा वैष्णवविष्णुप्रीतिरेव वैष्णवानां प्रयोजनमिति तच्च विष्णोराराधनार्थाय स्वपुत्रस्योदयाय चेतिवत् ज्ञेयम् ॥ ३ ॥

प्राश्य प्राशनमात्रं कृत्वा तत्र हेतुः यतं संयमेन गृहीतं व्रतं यैः रजनीं शिवरात्रिं तस्यास्तत्प्रधानत्वात् सुनन्दः श्रीनन्दानुजः संज्ञायां कन् अतस्तदग्रजस्योपनन्दस्य गोष्ठ एव स्थितिर्बुध्यते योग्यता च तस्यैव ज्ञानवयोऽधिकत्वात् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ सुदर्शनाख्यविद्याधरस्य ब्राह्मणशापात्सर्पतां गतस्य शापविमोचनात्मकं संप्रस्तावं तथा शङ्खचूडाख्ययक्षवधतच्छिरोमणयपहारात्मकञ्च भगवतः कर्मानुवर्णयति चतुस्त्रिंशेनाध्यायेन। एकदेत्यादिना। कदाचिद्देवयात्रायां सारक [illegible] प्रतिगमन

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्पूजात्मिकायां निमित्तभूतायामनडुद्भिर्वृषभैर्युक्तैरनोभिः शकटैरम्बिकावनं ययुः देवयात्रायां विषयभूतायां जातं कौतुकं येषां ते तथा भूता ययुरिति वा ॥ १ ॥

तत्र तद्वनसमीपस्थायां सरस्वत्यां नद्यां स्नात्वा देवं नृपते अर्हणैः पूजासाधनैर्गन्धादिभिर्देवं पशुपतिं देवीमम्बिकाञ्च भक्त्या पूजयामासुः ॥ २ ॥

ततो गावः गाः हिरण्यं वासांसि मधु मधुरं मधुसहितमन्नञ्च ब्राह्मणेभ्यो ददुः कथम्भूताः देवः पशुपतिर्नोऽस्माकं प्रीतो भवत्वित्यभिप्रायवन्तः ॥ ३ ॥

ततो जलमात्रं प्राश्य यतं नियतं व्रतं ब्रह्मचर्यात्मकं येषां ते तथाभूताः तत्रैव सरस्वत्यास्तीरे नन्दप्रभृतयो गोपास्तां रात्रिमुषितवन्तः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दभक्त्या संसाराहिग्राससमोक्षस्य ज्ञानरत्नदानस्य निदर्शनाय नन्दस्य सर्पान्मोक्षं शङ्खचूडं हत्वा बलभद्राय तच्छिरोरत्नदानं च निरूपयत्यस्मिन्नध्याये । तत्र प्रथमतो गोपानां यात्राप्रकारं कथयति । एकदेति । अम्बिकामाहात्म्यविषयां किंवदन्तीमाकर्ण्य जातकौतुका उत्पन्नकुतूहलबुद्धयः अम्बिकावनं दुर्गावासस्थानं वनम् अनडुद्युक्तैः वृषभयुक्तैः अनोभिः शकटैः ॥ १ ॥

पशवो जीवाः तेषां पतिं प्रभुं समर्थं सुमर्थैऽधिपतौ प्रभुरिति च तत्र वने सरस्वत्यां स्यन्दमानायाम् अर्हणैः पुष्पोपहारादिसाधनैः ॥ २ ॥

मध्वन्नं मधुना युक्तमन्नं यद्वा मधुरमन्नं मधुक्षौद्रम् ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एकदा शिवरात्रौ अम्बिकावनं गुर्जरदेशे सिद्धपुरनिकटे प्रसिद्धम् ॥ १—७ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवंरूपप्रपञ्चस्य पञ्चधा रसवर्णनम् ।
निरूप्य नामलीलातो रसार्थमिदमुच्यते ॥
एवमुद्धतभक्तास्तु यद्यन्यं समुपासते ।
दुःखभाजो भवन्त्येव मुच्यन्ते हरिणैव तु ॥
एकत्रिंशे सर्वभावान्निवृत्तानां तु पूर्ववत् ।
गानेन रमणं चक्रे प्रमाणानन्दसिद्धये ॥
बलभद्रेण सहितो वेदरूपेण सर्वथा ।
तद्दोषं नाशयामास हरिरित्युच्यते स्फुटम् ॥

शब्दतोऽप्यानन्दं निरूपयितुं प्रथमं गोकुलवासिनामन्यासक्तिं निवारयति । एकदेति विंशत्या लोकन्यायेनाप्यन्यत्र गमनेऽनिष्टं भवतीति तेषां यात्राप्रसङ्गो निरूप्यते एकदा शिवरात्रिसमये प्रतिवर्षं न गच्छन्तीत्येकदेत्युक्तं देवयात्रा हि नित्या गोपालाश्च साधारणधर्म एवाभियुक्ता इति तत्रापि धर्मबुद्धिः प्रासङ्गिकी वस्तुतस्तु जातकौतुकाः अत एव न पद्भ्यां गमनं किन्त्वनोभिः शकटैः तत्रापि नाश्वयोजनं किन्तु अनडुद्युक्तैः प्रकर्षेण ययुः महता समारम्भेण गृहे पुरुषानभिनिवेश्य अम्बिकालयं मथुरातः पश्चिमे देशे अर्बुदाचलनिकटे स्थितं तीर्थविशेषं ययुः ॥ १ ॥

तत्र गतानां पूजाप्रकारमाह । तत्र स्नात्वेति । सरस्वती तत्र प्रादुर्भूता अतः स्नात्वा पशुपाशविमोचनार्थं स्वयं पशुपालका इति पशूनामधिपतिं पशुपालने फलदातारं प्रभुं सर्वदानसमर्थमर्हणैः पूजाद्रव्यैरानर्चुः ननु पामरवत् गमनमात्रं देवीञ्च अम्बिकां पार्वतीमानर्चुः चकारात्तदावरणदेवताः नृपत इतिसम्बोधनं यात्रायां तथाकरणे परिज्ञानाद्विश्वासार्थम् ॥ २ ॥

पूजामुक्त्वा दानान्यप्याह । गाव इति । सर्वकालान्येतानि दानानि हिरण्यं सुवर्णं वासांसि नानाविधानि मधुच मध्वन्नञ्च ग्राम्यारण्ययोः सिद्ध्यर्थं मधुमध्वन्नयोर्दानं गोभिः रुद्रः प्रीतो भवति हिरण्येनाग्निः सोऽपि रुद्र एव वासांसि सर्वदैवत्यानि सोमदैवत्यानिच उमया सहितः सोऽपि तेन प्रीतो भवति एवं पञ्चदानानि आदृता एव चक्रुः पात्रसम्पत्तिमाह । ब्राह्मणेभ्य इति । सर्वं इति सङ्गदोषोऽपि व्यावर्तितः कामनाञ्च व्यावर्तयति देवो नः प्रीयतामिति । देवो महादेवः इति साधारणं वचनं नोऽस्माकं प्रीतो भवत्विति नत्वन्या काचित्कामना ॥ ३ ॥

एवं यात्रायां कृत्यमुक्त्वा नियमेन तीर्थे स्थितिमाह । ऊषुरिति । सरस्वतीतीर एव अन्तः शुद्ध्यर्थं जलमेव प्राश्य तां रजनीमूषुः ननु रजन्यां किञ्चित्कृतमिति एतावान् धर्मः सिद्धः अग्रिमानिष्टं निवर्तिष्यत इति महाभागा इत्यनेन द्योतितं श्रोतुः सन्देहाभावाय नन्दः सुनन्दकश्च प्रधानभूतौ येषां नन्द इतिप्रधाननाम्ना वा सर्वे व्यपदिष्टाः सुनन्दकः आदिर्येषामिति सर्वेषामेव नन्दतुल्यता भगवत्सम्बन्धादत्यानन्दयुक्तः सुनन्दको भवति उपनन्दोऽन्यो वा नन्द एव वा धर्मप्राधान्येन गृहीतः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चतुस्त्रिंशे नन्दपादग्रासि सर्पं स्पृशन् हरिः ।
उद्धार मणिं शङ्खचूडाअग्राह तत्क्षणात् ॥

शारदीं रासलीलां वर्णयित्वा वासन्तीं होलिकागानलीलां वर्णयिष्यन् प्रथमं शिवरात्रियात्रामाह । एकदा फाल्गुनकृष्णचतुर्दश्याम् अम्बिकावनं मथुरावायव्यदिग्विभागे सरस्वतीतीरस्थं श्रीशिवोमामूर्तिभूषितमित्येके गुर्जरदेशस्थ सिद्धपुरनिकटस्थतीर्थमित्यन्ये प्राहुः ॥ १ ॥ २ ॥

गावो गाः मधु शिवाभिषेकावशिष्टं मध्वन्नं मधुसहितान्नम् ॥ ३ ॥